00051660

THE
ASIATIC SOCIETY OF BOMBAY
TOWN HALL, BOMBAY-400 001.

Digitized with financial assistance from
Shri Brihad Bhartiya Samaj
on 20 February, 2020

THE

CHOWKHAMBÂ SANSKRIT SERIES;

A

COLLECTION OF RARE & EXTRAORDINARY SANSKRIT WORKS.

Nos. 101, 102, 110, 111, 112, 115, 116, 118, 119, 120, 124, 125 & 127.

अनुमानचिन्तामणिव्याख्यायाः शिरोमणिकृतदीधित्याः

जागदीशी टीका ।

51660

ईश्वरानुमानचिन्तामणिश्च ।

काव्यतीर्थ-न्यायोपाध्यायपदवीमता

श्रीसोमनाथपाध्यायेन संशोधितौ ।

THE JÂGADÎSÎ,

A COMMENTARY ON

ANUMÂNA-CHINTÂMANI-DÎDHITÎ

BY ŚIROMANI;

And Îswarânumâna Chintâmani.

EDITED BY

SOMANÂTHOPÂDHYÂYA-NYÂYOPÂDHYÂYA AND KÂVYATÎRTH.

PUBLISHED AND SOLD BY THE SECRETARY,

CHOWKHAMBÂ SANSKRIT BOOK-DEPÔT:

BENARES:

AGENTS:-OTTO HARRASSOWITZ, LEIPZIG:

PANDITA JYESHTHÂRÂMA MUKUNDAJÎ, BOMBAY.

Printed by Hari Dâs Gupta, Proprietor,

AT THE VIDYÂ-VILÂSA PRESS.

BENARES.

1908.

Registered According to Act XXV. of 1867.

Dx-S.42

नमः श्रीगुरुचरणेभ्यः

भूमिका ।

इह खलु विचित्रचङ्क्रमचातुरीपरिचितरोचिष्णुक्रकचचक्रचर्याचार्ये वैरिञ्चे प्रपञ्चे प्रकृतिदुःसहनानाविधव्यथाप्रथापथात्को नाम सचेताः पृथग्भविता समीक्ष्यते परीक्षकैः । प्रतिनिमेषनिष्पतद्दशेषव्यसनविशेषाभियाऽभियान्तो नानोच्चावचयोनिषु न क्षणमपि सुखशय्यानिद्रामुद्रया क्रोडीक्रियन्ते केपि । मन्मथमदमन्थरनाकनितम्बिनीनिकरकरचामरधीरसमीरशिशिरीकृतरत्नसिंहासनमध्यमध्यासीनमवनतसुरनरकराञ्जलिकलिकाविलसदुपवनायमानभुवनमण्डलाधीश्वरं सुरेश्वरमपि न जातु जहाति शात्रवोदयक्लेशावेशवेषः । तदवधार्यते पर्य्याकुलयापि धिया, आ सुरेश्वरमा च कीटकुलं प्रतिकूलवेदनीयमेव दुःखमसुभृतां तन्निवृत्तिरेव स्थेयः श्रेय इति युक्तमेवोक्तमभियुक्ततरैः "बाधनालक्षणं दुःखं, तदत्यन्तविमोक्षोऽपवर्गः" इति । तच्च दुःखं जन्मना तदपि प्रवृत्त्या सा च रागादिदोषैस्ते च मिथ्याज्ञानेनेति मिथ्याज्ञानमेव सर्वानर्थपारावारप्रवाहनिमज्जननिदानमूर्द्धाभिषिक्तमिति तस्यैव समूलमुन्मूलनाय प्रवर्तनीयं प्रेक्षावद्भिः । मिथ्याबुद्धिवासनापिशाचिकावेशविवशा हि नित्यात्मादावनित्यदेहादितादात्म्यं वस्तुतो मन्यमाना असमानदुरभिमानाक्रान्तास्तदनुकूलतया ज्ञातेषु प्रवर्तमाना निवर्तमानाश्च प्रतिकूलतया विदितेषु सदसदर्थेषु सञ्चितैर्धर्म्माधर्म्मपाशैर्निगडिता नानायोनिषु जायमाना निमज्जन्ति दुष्पारदुःखकूपारमहोर्मिषु, यथावद्विवेकालोकसमुत्सारिततमसश्च हेयोपादेयरागद्वेषदोषविहीनाः सर्वतोऽपवर्तमानाः कर्माण्यसञ्चिन्वा-

नाः प्रारब्धबीजानि ज्ञानाग्निना भस्मसात्कृत्य जन्मान्यल-
भमाना न बध्यन्तेऽनर्थपाशशतैः । सा च मिथ्याबुद्धिर्नित्या-
त्मादावनित्यदेहादिधीरित्यादिका साधर्म्यवैधर्म्याभ्यामन्वयव्य-
तिरेकपर्यवसन्नाभ्यां यथावदात्मतत्त्वविवेकधिया शक्यते समूलमु-
न्मूलयितुम्, अतः सांसारिकव्यसनचक्रभ्रमिमनभिलष्यद्भिरात्मैव
तत्त्वतो जिज्ञास्यः । स्वात्मा त्वहमित्याकृत्या साक्षात्कृत्या वि-
षयीक्रियमाणोपि गौरोहमित्याद्यारोपितदेहाद्यभेदावगाहिप्रत्यय-
शततमोमलीमसदृष्टिभिर्न याथातथ्येनावगन्तुं शक्यः कुतस्तरां म-
नसोप्यगोचरो लोकोत्तरमहामहिममहनीयः सर्वजगन्नियन्ता पर-
मात्मा, यदप्रतिपत्तिविप्रतिपत्त्यन्यथाप्रतिपत्तिदुर्वासनामषीलेपम-
लिनान्तःकरणपरवशा निःसङ्कोचलेशं हानोपादानवैपरीत्यं त-
न्वानाः परामनर्थपरम्परां दुर्दशावशादासादयन्ति । करालकाल-
परिपाकप्रसूमरनास्तिकवादश्रद्धाजाड्यलब्धजन्मदुर्वादिपाशसाध-
नाभासज्वलनज्वालाविशोषितविवेकवारिषु मन्दधीभूमिषु कथङ्कारं
हार्दसौहार्दाङ्कुरं जनयेन् प्रणतकल्पपादपो जगदीश्वरः, विनिर्द-
ग्धमन्दाक्षमन्दाक्षरमप्रामाण्यवादिभिः प्रामाण्यवादिभिरपि स्वस्व-
मनोनुरूपतात्पर्यपर्यालोचनाबद्धश्रद्धाहैतुर्वादिभिर्निर्भरमुन्मथ्य-
माना विगलितैदम्पर्यनिर्द्धारणशक्तिस्तपस्विनी श्रुतिरपि न बलाद-
लौकिकं परमात्मानं साधयितुं शक्नोतीति युक्तिवाद एव शरणी-
करणीयः प्रथममनेकान्तदर्शिभिः परीक्षकैः । युक्तिवादपरमास्त्रकृ-
तबहुनरपरिश्रमस्य कस्य नाम धीरधौरेयस्य पुनः शतशो विनिकृ-
तमर्मा स्थातुमपि पारयति वादिवीरः किं पुनरीषदपि दुरुक्तिसाह-
समासादयितुम् । अत एव युक्त्यपरार्थानुमानमार्गपरिशीलनेन
दृढीकर्तव्य आत्मवादो दुर्वारवादिवीरवदनसदनमुद्रणायेति शतशः
समुद्घोषयति श्रुतिर्मननविधिम् । तर्ककर्कशप्रज्ञाप्रतिभाप्रभाप्रभा-

वर्विहितयावद्विशेषगुणतमस्तोमसमुच्छेदाः सुधियो निरन्तां विगलि-
तनिखिलोपप्लवजलधिप्लवां मुक्तिशय्यामधिशयानाः प्रकाशयन्ति
दुष्टतर्कतर्कशास्त्रप्रसादप्रतिष्ठानिष्ठाम् ।

तदेवमप्रतिरूपस्वरूपसंसारान्धकूपप्रतिघातविकलीकृतानसुभृतः
समुदिधीर्षुः करुणावरुणालयो भगवान् महर्षिर्गौतमः षोडशपदार्थ-
तत्त्वविवेकदृष्टिसिद्धौषधायमानं तर्कशास्त्रं रचयाञ्चकार । अस्यैव
महर्षेः प्रत्यक्षानुमानोपमानशब्दाख्यप्रमाणचतुष्टयवादिनो मतमव-
लम्बमानो लोकोत्तरनव्यन्यायप्रपञ्चप्रजापतिः श्रीमद्गङ्गेशोपाध्या-
यः प्रमाणचतुष्टयप्रामाण्यव्यवस्थापनपरं युक्तिदीधितिजालजटिलं त-
त्त्वचिन्तामणिग्रन्थं प्रणीय निसर्गसुन्दरवाङ्मधुमाधुरीधोरणीभिः
प्रमोदयामास निखिलं भुवनतलम् । एष च निजग्रन्थे वाचस्पतिवचः-
समुद्धरणात्सर्वतन्त्रस्वतन्त्रश्रीवाचस्पतिमिश्रादर्वाक्समये मिथिला-
मेदिनीमलञ्चकारेत्येव ज्ञायते । अस्य च ग्रन्थस्य लोकोत्तरत-
या श्रीजयदेवमिश्रेण आलोकनामकव्याख्या, श्रीरुचिदत्तेन प्र-
काशनामकव्याख्या, श्रीमथुरानाथतर्कवागीशेन रहस्यनाम-
कव्याख्या, श्रीरघुनाथशिरोमणिना दीधितिनामकव्याख्या नि-
रमायि । आसु च शिरोमणिकृतदीधितिव्याख्याया अतिसङ्क्षि-
प्ततया सोपपत्तिकवस्तुतत्त्वप्रकाशकतया चात्युत्तमाया बङ्गभू-
मीश्रवणावतंसायिताभ्यां श्रीजगदीशतर्कालङ्कार-श्रीगदाधरभ-
ट्टाचार्याभ्यां सविस्तरं विरच्यते स्म निरुपमा व्याख्या । तत्र च
अनुमानखण्डस्य जगदीशकृतव्याख्यायाः स्वरूपशोभनतागुण-
पाशवशीभूतविद्वन्मण्डलीषु प्राप्तपठनपाठनप्रचारायां अद्यापि का-
त्स्न्र्येनाऽमुद्रितायाः पुस्तकान्वेषणे बहु क्लिश्यतोऽन्तेवासिनः समीक्ष्य
पुण्यलवलाभलालसासमेधितोत्साहवशीकृतः श्रीयुतहरिदासगुप्त-
महोदयः प्रवर्तयामास मुद्रितपत्रपरिशोधनाय भट्टनाथस्वामिनम् ।

तस्मिंश्च पूर्वपक्षव्याप्तिपर्यन्तं परिशोध्य कार्यवशात्स्वदेशं गते तेनैव गुप्तमहोदयेन प्रोत्साहितोहं यथामति प्रावर्तिषि संशोधने । अस्य च वाराणसीस्थराजकीयसंस्कृतपाठशालापुस्तकालयस्थितं तदध्यक्षपण्डितवरश्रीविन्ध्येश्वरीप्रसादशर्मसमनुग्रहलब्धं पठनपाठनप्रचारपरिशुद्धं जागदीशीपुस्तकं सम्पूर्णमुपलभ्य, उपाधिवादं चैतत्पुस्तकस्याऽशुद्धिबहुलतया विश्वविख्यातवैदुषीविभवास्मद्गुरुवरपूज्यपादश्रीमहामहोपाध्यायकैलासचन्द्रभट्टाचार्यशिरोमणिमहाशयानां वङ्गाक्षरलिखितमुपाधिवादग्रन्थं, केवलान्वयिव्यतिरेक्यवयवसव्यभिचारादिग्रन्थे मध्ये खण्डिततयाऽत्रत्यरणवीरसंस्कृतपाठशालाध्यापकश्रीपण्डित-न्यायोपाध्याय-साङ्ख्यतीर्थ-लक्ष्मणशास्त्रिद्राविडमहोदयानां वङ्गाक्षरलिखितपुस्तकं, पञ्चलक्षणादिप्रकरणानां केषाञ्चिन्मल्लिखितं च पुस्तकं, चिन्तामणेः एसियाटिकसोसायटी-मुद्रितं श्रीजीवानन्दमुद्रितं च पुस्तकं, दीधितेः श्रीजीवानन्दमुद्रितं पुस्तकं च सम्पाद्य, व्यतिरेकिप्रकरणे दीधितिजागदीश्योरभावेन मथुरानाथकृतरहस्यं च सन्निवेश्य, योग्यपाठविशेषञ्च कुण्डलीमध्ये कृत्वा यथाबुद्धिवैभवं प्रकाशितोऽसौ महान् निबन्धः। तदेवमस्मिन्महति निबन्धजलधावुदुम्बरकीटकल्पधीवैभवेन बहपराद्धं स्यादिति सम्भावयन् प्रकृतिसुभगशिक्षाभिक्षाभिलाषाप्रवणान्तःकरणोहं दोषज्ञमण्डलीमण्डनायमानान्विबुधमणीन् साञ्जलिकलिकोपहारं प्रीयतामनेन क्लेशलेशेन कृतज्ञः श्रीजगदीश्वरः सर्वान्तर्यामीति समभ्यर्थये

नयपालाभिज्ञनः
सिग्याल—इत्युपनामकः
श्रीसोमनाथशर्मा.
न्याय-वैशेषिकोपाध्यायः
काव्यतीर्थश्च ।

मार्गकृष्णपञ्चम्यां
सोमे. सम्वत्. १९६४
श्रीकाशी
शुभम्.

जागदीशी—दीधितिसहिततत्त्वचिन्तामणेः
अनुमानखण्डस्य
विषयसूची

—:०:—

विषयाः	पृष्ठाङ्काः
अनुमितिग्रन्थे—	
प्रत्यक्षानन्तरमनुमाननिरूपणे सङ्गतिवर्णनम्	३
अनुमितिलक्षणनिर्वचनपूर्वकमनुमानलक्षणनिर्वचनम् ...	१३
अनुमानस्वरूपनिरूपणम्	७१
अनुमानाप्रामाण्यवादिमतखण्डनम्	७२
व्याप्तिवादे—	
व्याप्तिपञ्चलक्षणीनिर्वचनपूर्वकखण्डनम्	७७
सिंहव्याघ्रलक्षणयोर्निरूपणपूर्वकखण्डनम्	८६
व्यधिकरणधर्मावच्छिन्नाभावमूलचतुर्दशलक्षण्या निर्वचनम्	९९
तादृशाभावखण्डनम्	१६९
नानाविधलक्षणखण्डनेन व्याप्तिलक्षणपूर्वपक्षः	१७१
व्याप्तिसिद्धान्तलक्षणनिर्वचनम्	२०९
व्याप्तिलक्षणान्तर्गतावच्छेदकत्वपदार्थनिर्वचनम्	२५७
सामान्याभावस्य पृथक्त्वव्यवस्थापनम्	२८४
विशेषव्याप्तिलक्षणनिर्वचनम्	३०२
अतएवचतुष्टयघटितग्रन्थः	३४३
व्याप्तिग्रहग्रन्थे—	
व्याप्तिग्रहोपायनिरूपणम्	३६१
व्यभिचारशङ्कानिवर्तकतर्कनिरूपणम्	३८८
व्याप्तिलक्षणानुगमः	४१५
सामान्यलक्षणप्रत्यासत्तिव्यवस्थापनम्	४३३
उपाधिवादे—	
उपाधिलक्षणस्वरूपपूर्वपक्षः	५०३

विषयाः	पृष्ठाङ्कः
उपाधिलक्षणसिद्धान्तः	५४९
उपाधिविभागः	६०२
उपाधिदूषकताबीजपूर्वपक्षः	६०८
उपाधिदूषकताबीजसिद्धान्तः	६१२
उपाध्याभासनिरूपणम्	६१७
पक्षतात्रन्थे—	
संशयसिषाधयिषापक्षतावादिमतखण्डनम्	६२३
पक्षतासिद्धान्तः	६३६
पक्षतायां मिश्रमतवर्णनम्	६४९
पक्षतायां सार्वभौममतनिरसनम्	६५९
पक्षतायां यज्ञपत्युपाध्यायमतनिरसनम्	६७०
अनुमानग्रन्थे—	
परामर्शस्याऽनुमितिहेतुत्वे पूर्वपक्षः	६८९
परामर्शस्यानुमितिहेतुतासिद्धान्तः	७१८
लिङ्गपरामर्शस्य कारणत्वव्यवस्थापनम्	७६९
केवलान्वय्यनुमानपूर्वपक्षः	७९९
केवलान्वय्यनुमानसिद्धान्तः	८११
व्यतिरेक्यनुमानपूर्वपक्षः	८३७
व्यतिरेक्यनुमानसिद्धान्तः	८५५
संशयकरणकार्थापत्तिपूर्वपक्षः	८८९
संशयकरणकार्थापत्तिसिद्धान्तः	९००
अनुपपत्तिकरणकार्थापत्तिविचारः	९११
न्यायलक्षणनिर्वचनम्	९२५
अवयवसामान्यलक्षणनिर्वचनम्	९३०
प्रतिज्ञालक्षणनिर्वचनम्	९३६
हेतुसामान्यलक्षणनिर्वचनम्	९७२
अन्वयिव्यतिरेकिहेतुलक्षणनिर्वचनम्	९८५
उदाहरणलक्षणनिर्वचनम्	९९४
उपनयनिरूपणम्	९९८
निगमननिरूपणम्	१००१

विषयाः	पृष्ठाङ्काः
हेत्वाभासवादे—	
हेत्वाभाससामान्यलक्षणनिरुक्तिः	१००१
सव्यभिचारलक्षणपूर्वपक्षः	१०३७
सव्यभिचारलक्षणसिद्धान्तः	१०६३
साधारणलक्षणपूर्वपक्षः	१०७५
साधारणलक्षणसिद्धान्तः	१०७८
असाधारणपूर्वपक्षः	१०८६
असाधारणसिद्धान्तः	१०९२
अनुपसंहारिपूर्वपक्षः	११०२
अनुपसंहारिसिद्धान्तः	११०८
विरुद्धलक्षणपूर्वपक्षः	११२३
विरुद्धलक्षणसिद्धान्तः	११३०
सत्प्रतिपक्षपूर्वपक्षः	११३९
सत्प्रतिपक्षसिद्धान्तः	११४१
सत्प्रतिपक्षदूषकताबीजविचारः	११४८
सत्प्रतिपक्षे रत्नकोषकृदादिमतखण्डनम्	११५३
असिद्धिपूर्वपक्षः	११७३
असिद्धिसिद्धान्तः	११८०
बाधपूर्वपक्षः	११९५
बाधसिद्धान्तः	१२०३
हेत्वाभासानामसाधकतासाधकत्वनिरूपणम्	१२३५
ईश्वरानुमाने—	
जगत्कर्त्रनुमानेनेश्वरसाधनम्	१
सकर्तृकत्वानुमाने पक्षसाध्यहेतुव्यवस्थापनम्	२
नानाहेतुदोषोद्भावनपूर्वकखण्डनम्	१९
शक्तेरतिरिक्तत्वानतिरिक्तत्वविचारः	३६
मुक्तिपदार्थनिरूपणम्	५७
दुःखाभावस्य पुरुषार्थत्वव्यवस्थापनम्	५८
मुक्तौ नानावादिमतोपन्यासः	५९

इति शम् ।

शिरोमणिकृतदीधित्याः अनुमितिग्रन्थः ॥

तत्र सङ्गतिप्रकरणं प्रारभ्यते ।

—ooo—

ॐ नमः सर्वभूतानि विष्टभ्य परितिष्ठते ।
अखण्डानन्दबोधाय पूर्णाय परमात्मने ॥

जागदीश्याः अनुमितिग्रन्थः ॥

तत्र सङ्गतिप्रकरणं प्रारभ्यते ।

—:o:—

सस्मितानननरोजमङ्गणे रिङ्गमाणमतिलोलकुन्तलम् ।
रोचनोल्लसितभालमस्तु मे कैशवं मनसि शैशवं वपुः ॥
प्राच्यैरनुचितविविधचोद्यैः कलुषीकृतोप्यधुना ।
दीधितियुतमणिरेष श्रीजगदीशप्रकाशितः स्फुरतु ॥

परमात्मने सर्वोत्कृष्टात्मने नमः । उत्कर्षश्चात्रोत्पत्तिस्थित्यादिकर्तृत्वम् । तस्य चैकत्र संभवो न सहकार्यन्तरं विनेत्यत उक्तम् ओमिति । ब्रह्मविष्णुशिवात्मकाय नम इत्यर्थः । तथा च तत्तच्छरीरसहकारादेकस्यापि नानाकार्यकर्तृत्वं नानुपपन्नमिति भावः । यद्यपि सुखादिसमवायिकारणतावच्छेदकत्वेन [द्रव्यमानसं प्रति विषयविधया कारणतावच्छेदकत्वेन वा सिद्धाया] आत्मत्वजातेरीश्वरावृत्तित्वादात्मन इत्यसंगतम् नित्यस्येत्यादिव्यावृत्तेरप्रयोजकत्वेन तादृशजातेरीश्वरवृत्तित्वोपगमे तु गगनादावपि तज्जातिप्रसङ्गात् द्रव्यत्वमेव वा सुखादिसमवायिकारणतावच्छेदकं भवेदतिप्रसङ्गस्य तुल्यत्वात् अत एव लाघवेनात्मत्वजातेरेवात्मपदप्रवृत्तिनिमित्ततयात्मपदगर्भा श्रुतिरेव तत्रात्मत्वजातिसत्त्वे प्रमाणमित्युक्तावपि न निस्तारः [शाक्यतावच्छेदकतया जातिसिद्धेरपसिद्धान्तत्वात्]; तथापि अत्रात्मपदं कृपावदर्थकमित्याहुः । नमस्यताप्रयोजकं रूपान्तरमप्याह सर्वेति । सर्वभूतानि सर्वप्राणिनः विष्टभ्य स्वस्वकर्मणि नियोज्य परितिष्ठते इत्यर्थः । केचित्तु भूतपदं यथाश्रुतार्थकमेव विष्टम्भोपि संयोगविशेषः, न च विभुद्वयसंयोगास्वीकारादाकाशेन समं तदसंभवादसंगतिः नव्यमते गगनस्येश्वरानतिरेकात् अत्र च स्वप्र-

अध्ययनभावनाभ्यां सारं निर्णीय निखिलतन्त्राणाम् ।
दीधितिमधिचिन्तामणि तनुते तार्किकशिरोमणिः श्रीमान् ॥
परजुष्टनयान्निवर्तमाना मननास्वाद्यरसा विशुद्धबोधैः ।
रघुनाथकवेरपेतदोषा कृतिरेषा विदुषां तनोतु मोदम् ॥
न्यायमधीते सर्वस्तनुते कुतुकान्निबन्धमप्यत्र ।
अस्य तु किमपि रहस्यं के चन विज्ञातुमीशते सुधियः ॥

मान्यान्प्रणम्य विहिताञ्जलिरेष भूयो-
भूयो विधाय विनयं विनिवेदयामि ।
दृष्यं वचो मम परं निपुणं विभाव्य
भावावबोधविहितो न दुनोति दोषः ॥

पूर्वापरग्रन्थैकवाक्यताप्रतिपत्तये शिष्याणामवधानाय च

तियोगिकसंयोगविरहेपि स्ववृत्तिसंयोगानपायादित्याहुः । [केचित्तु विष्टम्भ आरम्भकसंयोगःभूतपदं जन्यभूतपरम् जनकत्वं द्वितीयार्थः तथाच जन्यसर्वभूतजनकसंयोगानुकूलकृतिसमानाधिकरणतादृश-संयोगोत्तरस्थैर्याश्रयतावते इत्यर्थ इति प्राहुः ।] अखण्डौ नित्यौ आनन्दबोधौ यस्य तस्मै । न च सुखत्वावच्छेदेन पुण्यजन्यतया नित्यसुखासम्भवः । श्रुतिवाक्येभ्यो नित्यसुखसिद्धौ सुखत्वावा-न्तरजातेरेव पुण्यजन्यतावच्छेदकत्वकल्पनात् । आनन्दाय स्वर्गा-दिरूपाय बोधो यस्य तादृशो योऽखण्डो नित्यस्तस्मै इति वार्थः । अखण्डो दुःखानवच्छिन्न आनन्दो यस्मादेतादृशो बोधो यस्य तस्मै षष्ठ्यर्थस्क विषयतेत्यपि काश्चित् । [पूर्णाय स्वनिष्ठसुखदुःखाभावगो-चरेच्छावद्भिन्नाय]॥ निपुणं विभाव्येति । [वस्तुतो] निपुणतरविभावने स्वयंमेव दोषाः प्रयास्यन्तीति भावः ॥ संगतिप्रदर्शनप्रतिज्ञयोरर्था-न्तरत्वं निराचिकीर्षुस्तयोः प्रकृतोपयोगितां दर्शयति पूर्वेत्यादिना । अत्र च संगतिप्रदर्शनस्य फलमेकवाक्यताप्रतिपत्तिः । प्रतिज्ञायास्तु फलं शिष्यावधानम् । तच्चोत्तरग्रन्थप्रवृत्त्यनुकूलव्यापाररूपम् तत्प्र-वृत्त्यनुकूलवर्तमानकृतिसाध्यताज्ञानादिपर्यवसितम् । अस्ति चोत्तर-ग्रन्थे पूर्वग्रन्थार्थसंगतार्थकत्वहेतुना पूर्वग्रन्थेन सहैकप्रयोजनहेतुप्रति-

---

(१) ' पूर्णाय स्वनिष्ठसुखेच्छाय '

चिन्तामणेः अनुमितिग्रन्थः ॥

तत्र सङ्गतिप्रकरणं प्रारभ्यते।

———:o:———

प्रत्यक्षोपजीवकत्वात्प्रत्यक्षानन्तरं बहुवादि-संमतत्वादुपमानात्प्रागनुमनं निरूप्यते ॥

संगतिं प्रदर्शयन्ननुमाननिरूपणं प्रतिजानीते प्रत्यक्षवित्यादिना। अत्रोपजीव्योपजीवकभावः फलतः स्वरूपतश्च। प्रत्यक्षफल-

पत्तिकत्वरूपस्य पूर्वग्रन्थैकवाक्यत्वस्यानुमानम्। तच्चोत्तरग्रन्थज्ञानस्येष्टसाधनत्वधीपर्यवसन्नम्। अतः प्रस्तुतप्रवृत्त्युपयोगितया संगतिप्रदर्शनस्य नार्थान्तरत्वम्। एवं प्रतिज्ञा पुनरनुमाननिरूपणे लटा लब्धाया वर्तमानकृतेः साध्यत्वं बोधयन्त्युत्तरग्रन्थे प्रवृत्त्युपयोगिनी वर्तमानकृतिसाध्यताज्ञानस्य प्रयोजिकेति भावः। अत्र च व्याख्येयग्रन्थस्य स्वरसंचलितस्यैव धारणं संप्रदायसिद्धमतः प्रत्यक्षेतीत्यपहाय प्रत्यक्षवितीत्युक्तमिति तु भ्रमः। दीधितिकृतैव व्याप्त्यनन्तरमिति पक्षतात्रन्थस्य व्याप्तीतीतिप्रकारेण धृतत्वात् तादृशनियमस्य संप्रदायासिद्धत्वात्। परं तु न नियमः क्वचिदेवं क्वचिदन्यथापि धारणमिति ध्येयम्। [वस्तुतः प्रत्यक्षानन्तरमित्यस्य धारणभ्रमनिरासाय तथोक्तम् ॥] अनुमाननिरूपणस्यैव प्रतिज्ञेयत्वेऽनुमितेरप्रतिज्ञाताया अग्रे निरूपणमर्थान्तरग्रस्तं स्यादतोऽनुमितेरनुमानस्य च द्वयोरेव निरूपणस्य प्रतिज्ञेयतामावेदयितुमाह अत्र चेति। अत्र प्रत्यक्षोपजीवकत्वादित्यादिग्रन्थे। [सप्तम्यर्थः प्रतिपाद्यत्वम्।] फलतः फलयोः साक्षात्कारानुमित्योः स्वरूपतः प्रत्यक्षप्रमाणानुमानप्रमाणस्वरूपयोः उपजीव्योपजीवकभावः प्रतिपाद्य इत्यर्थः। तथा च मूले प्रत्यक्षपदस्य प्रत्यक्षप्रमितितत्करणोभयपरतयाऽनुमानपदस्य भावकरणव्युत्पत्त्याऽनुमितितत्करणोभयपरतयानुमितेस्तत्करणस्य च द्वयोरेव निरूपणस्य प्रतिज्ञातत्वान्नानुमितिनिरूपणेऽर्थान्तरत्वमिति भावः। केचित्तु आचार्यमते नित्यस्य जात्यादेरप्यनुमानत्वाद्वक्ष्यमाणस्यानुमानत्वावच्छेदेन प्रत्यक्षोपजीवकत्वस्य संगतित्वलाभायोक्तं फलत

स्यानुमित्यनुव्यवसायादेरनुमित्युपजीवकत्वेपि न सर्वा प्रत्यक्षप्रमितिस्तथा। अनुमितयस्तु सर्वाः साक्षात्परम्परया वा व्याप्यादिप्रत्यक्षोपजीविकाः। पुरस्कृतश्चायमुपजीवकोत्कर्षः। यद्यपि सकलमेव

इति [फलद्वारेत्यर्थः तथा च प्रत्यक्षफलोपजीवकत्वमेव संगतिः तथा च स्वाश्रयकरणत्वपरंपरासंबन्धेनानुमानगतत्वम्] साक्षात्संबन्धेन प्रत्यक्षोपजीवकत्वस्य संगतित्वलाभार्थं लिङ्गज्ञानकरणतादिनो [मणिकारस्य] मतमवलम्ब्योक्तं स्वरूपत इत्याहुः। [तन्न। लिङ्गस्य नित्यत्वेप्यनुमितीत्यादिग्रन्थविरोधात्] ॥ ननूपजीवकत्वं न संगतिः अनन्तराभिधानव्याप्यस्यैव संगतित्वात् अनुमित्युपजीवकस्य तत्साक्षात्कारस्यानुमित्यनन्तरमनिरूप्यतया यस्य प्रमाणफलस्योपजीवकं यत्प्रमाणफलं तत्तन्निरूपणानन्तरं निरूप्यमिति व्याप्तिविरहादत आह प्रत्यक्षफलस्येति । अनुमित्यनुव्यवसायादेरित्यादिपदेनानुमित्युपनीतधर्मप्रकारकप्रत्यक्षसंग्रहः । न सर्वेति । अयं घट इत्यादिप्रत्यक्षस्यैवानुमित्यनुपजीवकत्वादिति । तथा चोपजीवकत्वमात्रस्यानन्तराभिधानव्याप्यत्वाभावेपि प्रमाणफलविभाजकोपाधिव्यापकत्वविशिष्टमुपजीवकत्वं तादृशाभिधानव्याप्यमेवेति स्यादेवोपजीवकत्वं संगतिरिति भावः ॥ ननु प्रमाणफलविभाजकोपाधिव्यापकत्वविशिष्टं साक्षात्कारोपजीवकत्वमनुमितावसिद्धं शाब्दादिपरामर्शादप्यनुमित्युत्पत्त्यानुमितित्वावच्छेदेन साक्षात्कारोपजीवकत्वाभावात्कुतोस्य संगतित्वमत आह अनुमितयस्त्विति। साक्षादिति। तथा चोपजीवकत्वं प्रयोज्यतामात्रं न त्वनन्यथासिद्धत्वघटितमपीति भावः॥ नन्वेवमुक्तस्यैवोपजीवकताविशेषस्यानन्तराभिधानव्याप्यत्वे प्रत्यक्षोपजीवकत्वादित्युपजीवकत्वमात्रस्य व्याप्यताप्रत्यायको मूलग्रन्थो विरुद्ध इत्यत आह पुरस्कृत इति । अयं प्रमाणफलविभाजकोपाधिव्यापकत्वरूपः उत्कर्षो ग्रन्थकृतापि तात्पर्यविषयीकृतः सामान्यशब्दस्य लक्षणया विशेषबोधकत्वादिति भावः॥ ननु परंपरोपजीवकत्वस्यापि संगतित्वे प्रमाणफलविभाजकोपाध्यवच्छिन्नोपजीवकत्वमपि न तादृशाभिधानव्याप्यम् प्रत्यक्षप्रमितावनुमितेस्तादृशोपजीवकत्वसत्त्वेप्यनुमित्युत्तरं तदनिरूपणात् तत्कुतोऽस्य

---

(१) 'न त्वनन्यथासिद्धनियमघटितमपीति'

प्रत्यक्षफलमुपजीवत्यदृष्टजननीं समयमत्कर्तव्यतादिपरिच्छेदिकामनुमितिम् ईश्वरप्रत्यक्षं तु न फलम् तथापि दृष्टद्वारकमिह तथात्वमादरणीयम् । इतरस्याविनिगम्यत्वात् । सर्वं चानुमितिकरणमि-

---

संगतित्वमित्याशङ्कते यद्यपीति । अदृष्टजननीमिति । तत्प्रयोजिकामित्यर्थः । समयः शक्तिः । मत्कर्तव्यतादीत्यादिपदादिष्टसाधनत्वादेः परिग्रहः । अयं भावः कार्यमात्रं प्रत्यदृष्टस्य हेतुतया साक्षात्कारं प्रत्यपि धर्मादिकं हेतुः तच्च स्वकारणीभूतं यागादिकं यागादिश्च स्वगोचरप्रवृत्तिं यागादिप्रवृत्तिश्च यागादिगतेष्टसाधनत्वधियं तादृशधीश्च वेदं विनानुपपद्यमाना वेदस्थपदानां शक्तिग्रहमपक्षते इदं पदमत्र शक्तमसति वृत्त्यन्तरे वृद्धैस्तत्र प्रयुज्यमानत्वादित्याद्यनुमितिरूपशक्तिग्रहं विना वेदवाक्यादर्थावगमासंभवात् एवं प्रवृत्तिजनिका यागो मत्कृतिसाध्य इत्यादिधीरपि आनुमानिक्येव मदन्तर्भावेण विधेः शक्त्यभावादिति । इदं तु चिन्त्यते यत्र शक्त्यादिघटकप्रत्येकपदार्थोपस्थित्या मनसैव शक्तेर्मत्कर्तव्यत्वादेर्वा ग्रहात्प्रवृत्तिस्तत्रत्यादृष्टजन्यप्रत्यक्षव्यक्तेरेवानुमित्यनुपजीवकत्वात्सकलमेवेत्याद्ययुक्तमिति किंच यत्तदन्तर्भावेण सामान्यव्याप्तौ व्यभिचारेपि अनुमितिनिष्ठप्रत्यक्षोपजीवकत्वस्य तादूप्येण प्रत्यक्षानन्तराभिधानव्याप्यत्वादेव तत्र संगतिलक्षणसम्भवात्साक्षात्कारादावनुमित्युपजीवकत्वहेतोर्व्यभिचारप्रदर्शनानौचित्यादिति दिक् । ननु प्रत्यक्षफलमात्रस्यानुमित्युपजीवकत्वेपि तद्भूतमनुमित्युपजीवकत्वं न प्रमाणफलविभाजकधर्मव्यापकं प्रमाणफलविभाजकस्य साक्षात्कारत्वस्य नित्यज्ञानेपि सत्त्वादत आह ईश्वरेति । तथा च जान्यसाक्षात्कारत्वं फलविभाजकं न तु साक्षात्कारत्वमात्रं नित्येऽतिप्रसक्तत्वात्तद्व्यापकत्वविशिष्टमनुमित्युपजीवकत्वं च नानुमित्यनन्तराभिधानव्याप्यमिति व्यभिचारस्तदवस्थ एवेति भावः । दृष्टेति । दृष्टद्वारकत्वम् तन्मात्रद्वारकत्वम् अदृष्टाद्वारकत्वपर्यवसितम् । तेनादृष्टद्वारकस्यापि प्रवृत्त्यादिरूपदृष्टद्वारकतया नोक्तदोषः । तथात्वं प्रमाणफलविभाजकोपाध्यवच्छिन्नमुपजीवकत्वम् । इतरस्य उक्तधर्मानवच्छिन्नोपजीवकतामात्रस्य । अविनिगम्यत्वात् अनन्तराभिधानरूपं यत्साध्यं तद्वत्त्येव वर्तते न तु तदभाववतीति विनिगमनाया अविषयत्वात् । व्यभिचारित्वादिति यावत् ॥ यत्प्रमाणं यस्यो-

न्द्रियापेक्षोत्पत्तिकम्। अनुमितिं भावयतोऽपीश्वरज्ञानस्य तत्करणतानिर्वाहकप्रत्यासत्तिविरहेणातत्त्वात्। सर्वं पुनरिन्द्रियं नानुमानाधीनजन्म। मनःश्रवणयोरजन्यत्वात्। दृष्टद्वारा वा तत्त्वमादरणीयम्। न चोत्पत्तिमदपीन्द्रियं दृष्टद्वारकमनुमानमपेक्षते। अ-

---

पजीवकं तत्तदनन्तरनिरूप्यमिति व्याप्तेरनुमानोत्तरानिरूपिते प्रत्यक्षप्रमाणे व्यभिचारात् स्वरूपत उपजीवकतापि प्रमाकरणतावच्छेदकोपाध्यवच्छिन्नैवात्र ग्राह्या इत्याशयेनाह सर्वमिति। व्याप्तिबुद्धीनामेवानुमानत्वात्तासां च सर्वासामेव मनःस्वरूपप्रत्यक्षप्रमाणाधीनत्वादिति भावः॥ अथानुमितिप्रमाकरणतावच्छेदकं व्याप्तिज्ञानत्वं तदवच्छिन्नं च न प्रत्यक्षप्रमाणोपजीवकं व्याप्तिज्ञानत्वस्येश्वरबुद्धावपि वृत्तेरिति प्रकृतासिद्धिरत आह अनुमितिमित्यादि। भावयतो जनयतः। तत्करणतेति। अनुमितिकरणताया निर्वाहिका घटिका या प्रत्यासत्तिः संबन्धो जन्यत्ववैशिष्ट्यरूपस्तद्विरहेणातत्त्वादनुमित्यकरणत्वादित्यर्थः। व्याप्तिज्ञानत्वं नानुमितिकरणतावच्छेदकम् तथा सति तद्वतो नित्यज्ञानस्य स्वरूपयोग्यतया ततोऽनुमित्यात्मकफलावश्यंभावापत्तेः किं तु जन्यत्वविशिष्टं व्याप्तिज्ञानत्वम् तदवच्छिन्नं च भवत्येव प्रत्यक्षप्रमाणोपजीवकमतो नासिद्धिरिति भावः। अनुमानत्वावच्छेदेन प्रत्यक्षोपजीवकत्वं सम्पाद्य प्रत्यक्षत्वावच्छेदेनानुमानोपजीवकत्वस्य व्यतिरेकमाह सर्वं पुनरिति॥ ननु व्याप्तिज्ञानत्वमेवानुमितिकरणतावच्छेदकम् नित्यस्य स्वरूपयोग्यत्वे इत्यादिव्याप्तेरप्रयोजकत्वात् प्रयोजकत्वे वा समवायिकारणस्थलीयत्वात्तत्रैव प्राच्यैस्तादृशव्याप्तेः सर्वत्रोद्भावितत्वात् [तथा च हेत्वसिद्धिरत] आह दृष्टद्वारेति। दृष्टमात्रद्वारेत्यर्थः। तथा चादृष्टमद्वारीकृत्य यत्प्रमाणं यदुपजीवकं तत्तदनन्तरनिरूप्यमित्येव व्याप्तिः न तु प्रमाणतावच्छेदकोपाध्यवच्छिन्नत्वमपि निवेश्यमिति भावः॥ निरुक्तमनुमानोपजीवकत्वं न प्रत्यक्षेऽस्ति यतो व्यभिचारः स्यादित्याह न चेति। अपिना नित्येन्द्रियं सुतरां नानुमानमपेक्षत इति सूचितम्। अथादृष्टमद्वारीकृत्य यत्प्रमाणं यदुपजीवकं तत्तदनन्तरनिरूप्यमित्यपि न व्याप्तिः यत्र चक्षुर्घर्षणाद्रसविशेषपानाद्वा पूर्वचक्षुर्नाशानन्तरं चक्षुरन्तरोत्पादस्तत्राहदृष्टद्वार-

थोपजीव्यं निरूप्यैवोपजीवकं निरूप्यमिति न नियमः क्वचित्कार्यं निरूप्यापि कारणनिरूपणात्। किं चातः। न हि सङ्गतिरनन्तराभिधानव्याप्या। आनन्तर्या(अनन्तरा)भिधानप्रयोजकजिज्ञासाजनकज्ञानविषयो ह्यर्थः संगतिः। जायते च कार्ये कारणे वा ज्ञाते

कस्य घर्षणरसपानादिप्रयोजकतदुगतेष्टसाधनत्वाद्यनुमानस्योपजीवके अनुमानानन्तरानिरूपिते च घर्षणजन्यचरमचक्षुषि रसपानाधीनप्रकृष्टचक्षुषि च व्यभिचारात् न चात्रोपजीवकत्वं जन्यतारूपमेव घटकमुक्तस्थले तु चक्षुषोऽनुमानप्रयोज्यत्वमेवेत्यदोषः तथा सति अदृष्टाद्वारकत्वविशेषणवैयर्थ्यापत्तेरित्याशयेन शङ्कते अथेति। उपजीवकमिति। अदृष्टमद्वारीकृत्येत्यादिः। एवं कार्यमित्यत्रापि। क्वचिदिति। यत्रोक्तप्रणाल्या चक्षुरन्तरोत्पादस्तत्रत्यं कार्यमित्यर्थः ॥ प्राच्यैरनन्तराभिधानव्याप्यस्यैव सङ्गतित्वमिष्टमतस्तन्मतमनुसृत्यैव प्राक् प्रपञ्चितम् वस्तुतस्तादृशनियमाभावेपि न क्षतिः प्रत्यक्षोपजीवकत्वादित्यत्र च पञ्चमी न हेतुतायाम् किं तु ज्ञानप्रयोज्यतायाम् सुखात्प्रवर्तत इत्यादौ तथा व्युत्पत्तेरित्याशयेन परिहरति किं चात इत्यादि ॥ अनन्तराभिधानव्याप्यस्यैव संगतिपदार्थत्वे तद्दोषतादवस्थ्यमतोऽन्यथैव सङ्गतिपदार्थं निर्वक्ति अनन्तरेति। तदभिधानानन्तरं तदभिधानस्य प्रयोजिका या जिज्ञासा तज्जनकज्ञानविषयो योर्थः स तस्य तत्र सङ्गतिरित्यर्थः। अत्र च प्रत्यक्षं कस्यचित्कारणमिति ज्ञानोत्तरं प्रत्यक्षकार्य[त्वेन सामान्यतः प्रत्यक्षकार्य]ज्ञानं ततः सामान्यप्रकारेण ज्ञानस्य विशेषधर्मप्रकारकजिज्ञासाजनकत्वाद्विशेषतः प्रत्यक्षकार्यज्ञानं भवत्वितीच्छा शिष्याणाम् सैव च किमस्य कार्यमित्याकारा ततश्च विशेषतः प्रत्यक्षकार्यज्ञानस्येष्टस्य साधनतया अनुमादिरूपप्रत्यक्षकार्यबोधकानां वाक्यानां ज्ञानात् तत्रेच्छा तत इष्टस्य तादृशवाक्यस्य साधनताज्ञानात् [कण्ठाभिघाते इच्छा तत इष्टस्य कण्ठाभिघातस्य साधनताज्ञानात्कण्ठक्रियायामिच्छा ततः] कण्ठक्रियायां गुरोः प्रवृत्तिस्ततस्तु कण्ठक्रियया तदभिघातादिक्रमेण प्रत्यक्षकार्यात्मकानुमानबोधकवाक्यस्यानन्तराभिधानरूपस्य निष्पत्तिरिति प्रत्यक्षानन्तरमनुमानाभिधानस्य परम्परया प्रयोजिकायाः किं प्रत्यक्षकार्यमित्याकारकजिज्ञा-

---

(१) 'स' निरूपिते खण्डचक्षुषि र

साया जनकं यत्प्रत्यक्षकार्यज्ञानमिष्टसाधनमित्याकारकं ज्ञानं तस्य विषयः प्रत्यक्षकार्यत्वमिति तत्र लक्षणसमन्वयः। जिज्ञासाजनकज्ञानविषयत्वमात्रस्य घटादावतिप्रसक्तत्वेन प्रयोजकान्तं जिज्ञासाविशेषणम्। प्रत्यक्षानन्तरमनुमानस्याभिधानप्रयोजिका प्रत्यक्षकार्याभिधानेच्छापीति तज्जनकज्ञानस्य विषये प्रत्यक्षकार्याभिधानादावतिव्याप्तिरतो जिज्ञासानुसरणम्। प्रत्यक्षकार्यज्ञानस्य यत्फलं सुखादि तद्गोचरज्ञानस्यापि तादृशजिज्ञासाप्रयोजकत्वात्तद्विषये सुखादावतिव्याप्तिरतस्तादृशजिज्ञासायाः प्रयोजकत्वमुपेक्ष्य जनकत्वमुक्तम् फलेच्छयैवान्यथासिद्धस्य फलज्ञानस्योपायेच्छां प्रत्यहेतुत्वात् तादृशजिज्ञासाजनिकायाः फलेच्छाया विषये फलादौ तथाप्यतिव्याप्तिप्रसङ्गोतो ज्ञानपदम्। यत्र क्रमेण दण्डचक्रयोर्निरूपणोत्तरं किं दण्डस्य कार्यमिति जिज्ञासया घटो निरूपितस्तत्र दण्डकार्यत्वमपि घटे चक्रस्य सङ्गतिः स्यात्तस्य चक्राभिधानानन्तरं घटाभिधानप्रयोजकजिज्ञासाजनकज्ञानविषयत्वादत उक्तम् अर्थ इति। तज्ज्ञानजन्यतद्विशेष्यकयथार्थस्मृतिप्रकारतापन्न इति तदर्थः। तथाचोक्तस्थले दण्डज्ञानेनैव दण्डकार्यत्वप्रकारेण घटः स्मारितो न तु चक्रज्ञानेनेति नातिव्याप्तिः। एवंच यत्र चक्रज्ञानोत्तरमेव दण्डकार्यत्वप्रकारेण घटं स्मृत्वा तस्य निरूपणं तत्र दण्डकार्यत्वमपि घटे चक्रस्य प्रसङ्गरूपा सङ्गतिर्भवत्येव। न च यथार्थपदवैयर्थ्यम्। यत्र दण्डकार्यं किमिति जिज्ञासया भ्रमवशेन दण्डोत्तरं गगनादिकं निरूपितं तत्र गगनादौ दण्डकार्यत्वस्य सङ्गतित्वापत्तेः। नचैवं यत्र प्रथमत एव घटबोधेच्छया घटस्य निरूपणं तत्र कस्यापि सङ्गतिर्घटे न स्यादिति वाच्यम्। इष्टत्वात्। तदनन्तरनिरूपणत्वस्यैव तत्सङ्गतिनियतत्वेन निरूपणमात्रस्य सङ्गत्यनियतत्वात्। यद्यपि चैवमपि प्रत्यक्षकार्यज्ञानमिष्टसाधनमित्येवं बोधस्यैव प्रत्यक्षकार्यं किमिति जिज्ञासायाः कारणत्वात्तद्विषये [ज्ञाने] ज्ञानत्वादादिष्टसाधनत्वादौ चातिव्याप्तिः तथापि यद्धर्मविशिष्टविषयकज्ञानधर्मिकेष्टसाधनताज्ञानत्वेन तदनन्तरं तदभिधानप्रयोजकजिज्ञासां प्रति जनकत्वं तादृशो धर्मस्तस्य तत्र सङ्गतिरिति विवक्षितम्। अत्र च तदनन्तरं तदभिधानं प्रति यद्रूपेण जिज्ञासायाः प्रयोजकत्वं तद्रूपावच्छिन्नकार्यतायोगिकमेव तादृशजिज्ञासाजनकत्वं वक्तव्यम् तेन यत्र

कारणत्वस्य कार्यत्वस्य वा ज्ञानात्मिकस्य कार्यं कारणं वेति

को घटः किं च द्रव्यमिति समूहालम्बनजिज्ञासया नीलो घट इत्येवाभिधानं तत्र न द्रव्यत्वेतिव्याप्तिः । नीलो घट इत्यभिधानं प्रति को घट इत्यादिजिज्ञासात्वेनैव प्रयोजकतया तद्वच्छिन्नं प्रति द्रव्यत्वविशिष्टविषयकज्ञानधार्मिकेष्टसाधनताज्ञानत्वेनाहेतुत्वात् । न च यद्धर्मविशिष्टविषयकज्ञानेच्छात्वेन जिज्ञासायां अनन्तराभिधानप्रयोजकत्वं तत्त्वमित्येव सम्यक् जनकज्ञानविषयत्वादिप्रवेशो व्यर्थ इति वाच्यम् । तस्य लक्षणान्तरत्वेपि यथासन्निवेशे वैयर्थ्यविरहात् । अत एव तदनन्तराभिधेयवृत्तित्वे सति तज्ज्ञानजन्यस्मृतिप्रकारतापन्नमित्येव सम्यगित्यपि समाहितम् । [नव्यास्तु अनन्तराभिधानेत्यादेः स्वार्थधीद्वारा अनन्तराभिधानस्य प्रयोजिका निवर्त्या या जिज्ञासा प्रत्यक्षकार्यं किमित्याकारा तस्या जनकं विषयविधया जनकतावच्छेदकं यज्ज्ञानं तस्य विषयो विषयतावच्छेदकः प्रत्यक्षकार्यत्वमित्यर्थ इति वदन्ति ।] यत्तु कार्यत्वाद्यन्यतमत्वं सङ्गतित्वमिति तन्न । तदनन्तरमनिरूपितेपि तत्कार्यत्वादेः सङ्गतित्वापत्तेः । प्रमेयनिरूपणोत्तरं प्रमेयवत्किमिति जिज्ञासया यत्र प्रमेयवान्निरूपितस्तत्र प्रमेयस्वरूपायां प्रसङ्गसङ्गतावव्याप्तेः । प्रमेयभेदाप्रसिद्ध्या तदन्यतमत्वस्य दुर्वचत्वादिति ध्येयम् । सङ्गतिः षड्विधा । तदुक्तमभियुक्तैः ' सप्रसङ्ग उपोद्घातो हेतुतावसरस्तथा । निर्वाहकैककार्यत्वे षोढा सङ्गतिरिष्यते ' इति । तत्र निर्दिष्टोपपादकत्वमुपोद्घातः । ' चिन्तां प्रकृतसिद्ध्यर्थामुपोद्घातं विदुर्बुधाः ' इति प्राचीनगाथायामपि चिन्तापदं कृदभिहितो भावः [द्रव्यवत्प्रकाशते] इति न्यायेन चिन्तनीयपरम् । तथा च तस्या अर्थोपि प्रकृतसिद्ध्युपपादकतया चिन्तनीयत्वम् प्रकृतसिद्ध्युपपादकत्व[पर्यवसन्न]मेवार्थः । हेतुत्वं कारणत्वम् । अवसरोऽनन्तरवक्तव्यत्वम् । अनन्तरोद्दिष्टत्वं तथोति न्यायभास्करकृतः । निर्वाहकं कारणतानिर्वाहकं कार्यत्वमिति यावत् । एककार्यत्वं एकं कार्यं ययोरिति व्युत्पत्त्या एककार्यकारित्वम् । प्रसङ्गत्वं तु सङ्गतित्वे सत्युपोद्घातादिभिन्नत्वम् । स्मृतस्योपेक्षानर्हत्वं प्रसङ्ग इति प्रवादेपि स्मृतत्वमनन्तराभिधानप्रयोजकजिज्ञासाजनकस्मृतिविषयत्वम् उपेक्षानर्हत्वं च प्रसङ्गलक्षणे

जिज्ञासा। अतस्तयोर्द्वयोरेव सङ्गतित्वम्। इत्थं चोपजीवकतायास्तुल्यत्वेपि न क्षतिरिति मन्तव्यम्। लघवायात्रैवोपमानस्य संगतिं दर्शयति बहुवादीति। सुप्रसिद्धतया निरसनीयाल्पवादिविप्रतिपत्तिकत्वेन सुप्रतिपदतया चानुमान एव प्रथमं व्युत्पित्सोर्जिज्ञासा। नोपमाने। अप्रसिद्धत्वात्। निरसनीयबहुवादिविप्रति-

---

ङ्क्षेक्षार्हा ये उपोद्घातादयस्तदन्यत्वम्। तेन ततोपि प्रागुक्तस्यैवार्थस्य लाभ इति संक्षेपः॥ कारणत्वस्य कार्यत्वस्य वेति। षष्ठ्यर्थः प्रकारित्वम्। तथा च कार्ये ज्ञाते कारणत्वप्रकारेण कारणस्य ज्ञानाकिमस्य कारणमिति जिज्ञासा कारणे च ज्ञाते कार्यत्वप्रकारेण कार्यस्य ज्ञानात्किमस्य कार्यमिति जिज्ञासेत्यन्वयः। कार्यकारणज्ञानयोस्तु कारणकार्यज्ञानजनकत्वमेकसम्बन्धिज्ञानस्यापरसम्बन्धिस्मारकतयेति भावः। जिज्ञासेति। तदुत्तरं च कार्यादिधीजनकवाक्येच्छादिक्रमेण कार्याद्यभिधानमिति शेषः॥ इत्थं चेति। सङ्गतेरनन्तराभिधानव्याप्यत्वाद्यदितत्वे चेत्यर्थः। तुल्यत्वेपीति। तथा च व्याप्यतारक्षार्थं प्रागुक्त उक्तर्षो नादरणीयः। प्रत्यक्षोपजीवकत्वादिति पञ्चमी तु तज्ज्ञानजन्यजिज्ञासाप्रयोज्यतायाम् न तु हेतुतायामिति भावः॥ लाघवायेति। सङ्गतिप्रदर्शनस्य यत्फलमेकवाक्यतानुमानं तल्लाघवायेत्यर्थः। अनुमानोपमाने पक्षीकृत्य समूहालम्बनैकवाक्यतासाध्यकानुमित्यपेक्षयोपमानधर्मिकैकवाक्यतानुमित्यन्तरकल्पनायां गौरवादिति भावः॥ अथानुमानगतं बहुवादिसम्मतत्वं कथमुपमाने सङ्गतिरत आह सुप्रसिद्धतयेति। इष्टसाधनीभूतप्रतिपत्तिकतयेत्यर्थः। सुप्रतिपदतया[२] [अनिष्टाजनकप्रतिपत्तिकत्वेन]। अत्र हेतुर्निरसनीयेत्यादि। तथा चानुमानप्रतिपत्ताविष्टसाधनत्वबलवदनिष्टाजनकत्वयोः सत्त्वात्तत्प्रतीत्या तत्रेच्छोत्पत्तौ बाधकं नास्तीति भावः॥ नोपमान इति। जिज्ञासेत्यनुषज्यते॥ अप्रसिद्धत्वादिति। येषामुपमाने विमतिरेव तेषामुपमानज्ञानात्मनो धर्मिण एवासत्त्वात्कुत्रेच्छा स्यादिति भावः॥ यस्योपमाने सम्मतिस्तस्याप्युपमानप्रतिपत्तौ बहु-

(१) 'विवक्षार्थम्'
(२) तयेति'

पत्तिकत्वेनातिदुरूहत्वाच्च। औत्सर्गिकीं रीतिमनुरुध्येदम्। तेन कस्य चिदुरूहजिज्ञासोदयेपि न क्षतिः। तथा चावसरसङ्गत्योपमाननिरूपणमिति भावः। यथा चावसरस्य सङ्गतित्वं तथा व्यक्तमाकरे। शब्दान्तरसमयग्राहकं सप्रवृत्तिनिमित्तकत्वबोधकमन्ततः सामान्यतोदृष्टजीवनकप्रवृत्त्यौपयिकं चानुमानमपेक्षते नि-

---

तरदुःखानुबन्धित्वग्रहान्नेच्छा सम्भवतीत्याह निरसनीयेति। अतिदुरूहत्वम् बहुतरदुःखानुबन्धिप्रतिपत्तिकत्वम्॥ ननु बहुतरदुःखानुबन्धिन्यपि पदार्थे तादृशदुःखे बलवद्द्वेषाभावदशायां प्रथमं जिज्ञासा जायत एवेत्यत आह औत्सर्गिकीमिति। प्रायशो बहुतरदुःखजनकत्वग्रहे द्वेषो भवत्येवेति रीतिमनुरुध्येत्यर्थः॥ तथाचेति। प्रथममनुमानजिज्ञासोत्पत्तौ तन्निवृत्ताबुपमाननिरूपणमिति भावः॥ ननु प्रतिबन्धकीभूतजिज्ञासानिवृत्तिरूपस्यावसरस्य कुतः सङ्गतित्वं तत्प्रकारकजिज्ञासाया अनन्तरमभिधानादत आह यथा चेति। अवसरस्य अवसरपदार्थस्य। आकरे पञ्चमतत्त्वबोधादौ। अनन्तरवक्तव्यत्वमेवावसरः तत्र चातः परं किं वक्तव्यमिति जिज्ञासयैवानन्तराभिधानान्न सङ्गतिलक्षणाव्याप्तिरिति भावः। अनन्तरोहितृत्वमेवावसरः अत एवावसरतः कथकाशक्तिनिरूपणमिति परिशिष्टव्याख्याने न्यायभास्करकृतोद्देशलक्षणा चात्र सङ्गतिरित्युक्तमित्यपि केचित्॥ सार्वभौममतमाह शब्दान्तरेति। गोसदृशो गवयपदवाच्य इत्यादितिदेशवाक्यार्थज्ञानस्य गवादिपदशक्तिग्रहं विनानुपपत्तेर्गोपदं गवि शक्तमसति वृत्त्यन्तरे वृद्धैस्तत्र प्रयुज्यमानत्वादित्याद्यनुमानोपेक्षा। उपमित्यात्मकस्य गवयादिपदशक्तिग्रहस्योपमाधीनत्वात्पूर्वं तन्नापेक्षितमतः शब्दान्तरेत्युक्तम्। गवयादिपदस्य निःशक्तिकत्वग्रहेऽतिदेशवाक्यार्थज्ञानासम्भवात्तत्प्रतिबन्धार्थं गवयादिपदं किंचिदवच्छिन्नशक्तिमत्साधुपदत्वादित्येवंविधमुपमितिविषयीभूतस्य गवयादिपदस्यापि शक्त्यनुमानं प्रागपेक्षितं भवतीत्याशयेनाह सप्रवृत्तिनिमित्तेत्यादि। ननु यत्र मनसैव गवयपदवाच्यत्वग्रहसहकृतसादृश्यज्ञानादुपमितिस्तत्रोपमानस्य शक्त्यनुमानानपेक्षितत्वा-

---

(१) 'कासञ्चि'

खिलमेवोपमानमितीहाप्युपजीवकत्वमेव सङ्गतिरिति केचित्। संभवति चेह निरूपणयोरपि कार्यकारणभावः।'अथ तत्पूर्वकम्'इत्यादिसूत्रे प्रत्यक्षपूर्वकत्वेनानुमाननिरूपणात्। तच्छब्देन व्याप्त्यादिप्रत्य-

---

न्निखिलोपमानेऽनुमानापेक्षितत्वं न सम्भवत्यत आह अन्तत इति। बहुवादीत्यादिग्रन्थतस्तादृशसङ्गतेरलाभ एव केचिदित्यत्रास्वरसः॥ अथोपजीवकत्वसङ्गतेरनन्तराभिधाननियामकत्वोपेक्षायामनुमानोत्तरमेव प्रत्यक्षं किं न निरूपितमत आह सम्भवति चेति। इह प्रत्यक्षानुमानस्थले। निरूपणमत्र ज्ञानम्। न तु तदर्थकः शब्दः। प्रत्यक्षबोधकशब्दस्यानुमानबोधकशब्दं प्रत्यहेतुत्वात्। तथा च प्रत्यक्षस्य प्रागज्ञानेऽनुमानधीरेव न स्यात्कारणं विना कार्यानुत्पत्तेरतः प्राक् प्रत्यक्षं निरूपितमिति भावः॥ नन्वनुमानत्वादिरूपेणानुमानज्ञाने व्यभिचारात्प्रत्यक्षनिरूपणं नानुमाननिरूपणहेतुरत आह अथ तत्पूर्वकमिति। सामान्यतो व्यभिचारेऽपि प्रत्यक्षपूर्वकत्वेनानुमाननिरूपणं प्रत्यक्षज्ञानजन्यमेवेति भावः। 'अथ तत्पूर्वकमनुमानं त्रिविधं पूर्ववच्छेषवत्सामान्यतोदृष्टं च'इति सूत्रम्। अथ प्रत्यक्षानन्तरम् अनुमानम् निरूप्यते इति शेषः। तच्च त्रिविधम् तदाह पूर्ववदिति। पूर्वं कारणम् तद्वत्तल्लिङ्गकम्। यथा आर्द्रेन्धनप्रभववह्निना धूमाद्यनुमानम्। शेषः कार्यम्। तद्वत्तल्लिङ्गकम्। यथा धूमादिना वह्न्याद्यनुमानम्। कार्यकारणभिन्नलिङ्गकं तु सामान्यतोदृष्टम्। यथा पृथ्वीत्वादिना द्रव्यत्वादेरनुमानमिति। वाचस्पतिमिश्रास्तु दृष्टमिति सर्वत्रान्वितम्। तथा च पूर्वमन्वयसहचारः तद्वत्तया दृष्टं गृहीतम् शेषो व्यतिरेकसहचारस्तद्वत्तया गृहीतम् सामान्यतस्तदुभयसहचारवत्तया गृहीतमित्येवं त्रैविध्यविवरणमाहुः॥ तच्छब्देन सौत्रेण। व्याप्त्यादीति। व्याप्त्यादेः प्रत्यक्षं यस्मादिति व्युत्पत्त्या प्रत्यक्षप्रमाणपरामर्शादित्यर्थः। यथाश्रुते व्याप्त्यादिसाक्षात्कारपूर्वकत्वेनानुमाननिरूपणस्य सूत्राल्लाभेऽपि प्रत्यक्षप्रमाणनिरूपणस्यानुमाननिरूपणहेतुत्वालाभादसंगत्यापत्तेः॥ नैव्यास्तु प्रत्यक्षफलानुमानफलयोः क्रमेण निरूपणे नियामकाकाङ्क्षायामाह सम्भवति चेति तत्पूर्वक-

---

(१) 'चिकीर्षादिज्ञान (?) हेतुना प्रवृत्त्याद्यनुमानम्'

(२) 'नव्यास्तु प्रत्यक्षप्रामित्यनुमानयोः क्रमेण निरूपणव्यर्थमाहुः॥

अथ अनुमानलक्षणम् ।

तत्र व्याप्तिविशिष्टपक्षधर्मताज्ञानजन्यं ज्ञानमनुमितिः । तत्करणमनुमानम् ॥

क्षपरामर्शात् । अत्रापि सहचारप्रत्यक्षजन्यत्वादिना तन्निरूपणात् । तस्य च प्रत्यक्षनिरूपणाधीनत्वात् । एवमनुमानभिन्नत्वेनोपमाननिरूपणमपि अनुमाननिरूपणापेक्षमिति संक्षेपः ॥

:o:

अथ अनुमानलक्षणम् ।

तत्र लक्षणस्वरूपप्रमाण्यादिभिरनुमाने निरूपणीये । करणस्य

मित्यादिसूत्रे चानुमानपदं भावव्युत्पत्त्यानुमितिपरम् एवं च व्याप्त्यादिप्रत्यक्षेति यथाश्रुतमेव सम्यगिति प्राहुः ॥ नन्वेतावता सौत्रक्रमस्योपपादितत्वेपि प्रकृतग्रन्थक्रमो नोपपादित इत्यत आह अत्रापीति । अनुमानखण्डेपीत्यर्थः । सहचारेति । अत्र प्रत्यक्षत्वमिन्द्रियसंनिकर्षजन्यज्ञानत्वरूपं [प्रत्यक्षमण्युक्तं] ग्राह्यम् । न तु साक्षात्कारत्वरूपम् । तथा सति प्रत्यक्षप्रमाणनिरूपणस्य अनुमाननिरूपणहेतुत्वाप्राप्तेरित्यवधातव्यम् । तन्निरूपणात् अनुमाननिरूपणात् ॥ तस्य चेति । प्रत्यक्षपूर्वकत्वेन सहचारप्रत्यक्षजन्यत्वेन चानुमाननिरूपणस्येत्यर्थः ॥ अनुमानोपमानयोरपि क्रमेण निरूपणे कार्यकारणभाव एव नियामक इत्याह एवमिति ॥

:o:

अथ अनुमानलक्षणम् ।

अथानुमानपदेन भावव्युत्पत्त्यानुमितेरपि निरूप्यत्वेन प्रतिज्ञातत्वात्तत्रत्यतच्छब्देनानुमितेः परामर्शेनुमितेरनुमितावविशेषणत्वात्सप्तम्यर्थासंगतिरतः करणव्युत्पत्त्या लब्धमनुमानमेव परामृश्य व्याचष्टे तत्रेति । निरूपणीये इति । प्रकारान्तरेण व्याप्तिज्ञानत्वानुमितिकरणत्वादिना निरूपणीयेनुमाने व्याप्तिविशिष्टपक्षधर्मताज्ञानजन्यज्ञानत्वप्रकारेणानुमितेरविशेषणत्वात्तत्रेत्यत्र सप्तम्यर्थे तादृशधि-

क्रियाभेदभिन्नमूर्तिकतया[1] क्रियालक्षणपूर्वकं तल्लक्षणमाह। व्याप्ती-

---

शेषणत्वमुपपादयितुं मध्ये पूरयति लक्षणस्वरूपप्रमाण्यादिभिरिति। तत्करणमित्यादिना लक्षणस्य तच्च लिङ्गेत्यादिना स्वरूपस्याथानुमानमित्यादिना प्रमाण्यस्य च निरूपणे यदनुमानं निविष्टं तत्र व्याप्तिविशिष्टपक्षधर्मताज्ञानजन्यज्ञानत्वेनैवानुमितेर्विशेषणत्वान्नासंगतिरिति भावः॥ ननु प्रागुक्तक्रमेणानुमित्यनुमानयोर्द्वयोरेव निरूपणस्य प्रतिज्ञातत्वादनुमाननिरूपणपूर्वमनुमितिः कथं निरूपिता इत्यत आह करणस्येति। क्रियाया यो भेदो व्यावर्तकधर्मो व्याप्त्यादिज्ञानजन्यज्ञानस्वरूपोनुमितित्वादिस्तेन भिन्ना घटिता मूर्तिः शरीरमनुमितिकरणत्वादिरूपं यस्य तादृशत्वेनेत्यर्थः। तथा च विशिष्टबुद्धेर्विशेषणज्ञानं विनानुत्पत्त्या[2] पूर्वमनुमितिर्निरूपितेति भावः। प्राञ्चस्तु नन्वनुमानस्य निरूप्यत्वेन प्रतिज्ञातत्वादनुमितेर्निरूपणमर्थान्तरग्रस्तमत आह करणस्येतीति वदन्ति। तन्मन्दम्। तावताप्यनुमितेः प्रथमतो निरूपणेऽप्राप्तकाल[त्व]तादवस्थात्। किं च व्याप्तिविशिष्टपक्षधर्मताज्ञानजन्यज्ञानकरणत्वेनानुमाननिरूपणे हेतुभूतस्य व्याप्त्यादिज्ञानजन्यत्वेनानुमितिज्ञानस्य सम्पत्त्यर्थं यदि प्रागेवानुमितेर्निरूपणं तर्हि व्याप्तिविशिष्टपक्षधर्मताज्ञानजन्यं यज्ज्ञानं तत्करणमनुमानमित्येव मणिकारो ब्रूयात्। तावतैव विशेषणज्ञानसम्पत्तेः कृतमनुमित्यभिलापेन। अत्रोपजीव्योपजीवकभावेनार्थान्तरनिरास इति तु न वाच्यम् तस्य प्रकारान्तरेण सङ्गमादिति दिक्। आह मणिकार उक्तवानित्यर्थः। [व्याप्तीति स्वातन्त्र्येण पाठधारणम्। यथाश्रुते व्याप्तीत्यनेन क्रियालक्षणस्यैवोक्तत्वादसङ्गतेः।] तल्लक्षणमित्यनन्तरं वक्तुमिति पूरणीयम्। आह अनुमितिलक्षणमाहेत्यपि कश्चित्। [क्रियालक्षणपूर्वकम् अनुमानरूप]क्रियाविशेषलक्षणपूर्वकमिति कः स्वार्थे तथा च अनुमानलक्षणपूर्वमित्यर्थः तल्लक्षणमाह अनुमितिलक्षणमाह क्वचिदाकांक्षावैचित्र्येण समासस्यैकदेशस्यापि तत्पदेन परामर्शादिति तु नव्याः। [व्याप्तीत्यादीत्येव पाठ इत्यन्ये। व्याप्तीत्यत्र इतिशब्दस्याद्यर्थबोधकत्वमित्यपरे। तयोः सम्यक्त्वमेव यदि तादृशग्रन्थ-

---

(१) 'क्रियाभेदानुमितिस्तेन भिन्ना घटिता'

(२) 'व इत्यादिनाधान्त'

ति । अत्र व्याप्तिविशिष्टत्वपक्षधर्मत्वसामानाधिकरण्यावगाहिज्ञानजन्यत्वमर्थः कर्मधारयोत्तरभावप्रत्ययस्य पदार्थतावच्छेदकद्वयसामानाधिकरण्यवचनत्वात् ज्ञानपदोपसंधानेन च बाधितावाधितसाधारणतज्ज्ञानलाभात् न भ्रान्तानुमित्यव्याप्तिरित्याहुः।तन्न।

स्यापि पुनः पुनर्धारणम् सम्प्रदायसिद्धम् । यज्ञपतिमतमुत्थापयति] अत्रेति । अर्थ इति परेणान्वयः । व्याप्तीति । व्याप्तिसम्बन्धपक्षसम्बन्धयोः सामानाधिकरण्यं संसर्गविधया यदवगाहते वह्निव्याप्तिवैशिष्ट्यवत्पर्वतवैशिष्ट्यवान् धूम इत्याकारकं [वह्निव्याप्तिवैशिष्ट्यवत्पर्वतवैशिष्ट्यं धूमे इत्याकारकं वा] ज्ञानं तज्जन्यत्वमर्थः । पदार्थतावच्छेदकेति । न च क्तान्तस्य विशिष्टपदस्य वैशिष्ट्याश्रयबोधकत्वाद्व्याप्तिवैशिष्ट्याश्रयत्वमेव पदार्थतावच्छेदकम् तत्प्रकारं ज्ञानं नोपाध्यायमतेपि हेतुरिति वाच्यम् । भावविहितक्तान्तस्य विशिष्टपदस्य वैशिष्ट्यपरतया व्याप्तेर्वैशिष्ट्यं यत्रेति व्युत्पत्त्या व्याप्तिवैशिष्ट्यस्यैव व्याप्तिविशिष्टपदार्थतावच्छेदकत्वादिति भावः । वचनत्वादिति । सामानाधिकरण्यसम्बन्धेन विशेषणतावच्छेदकविशिष्टस्य विशेष्यतावच्छेदकस्यैव कर्मधारयोत्तरभावप्रत्ययार्थत्वादिति भावः । इत्थं च नीलोत्पलत्वमित्यादौ तादृशसंसर्गेण नीलत्ववदुत्पलत्वस्यैव तादृशभावार्थस्य प्रकृत्यर्थे नीलोत्पलेऽन्वयान्नीलोत्पलीयं नीलत्ववदुत्पलत्वमित्यन्वयबोधः । एतेन तादृशभावप्रत्ययस्य यदि सामानाधिकरण्यत्वेन शक्तिस्तदा पदार्थतावच्छेदकयोरेकदेशतया तत्रान्वयासम्भवः यदि च तत्तत्पदार्थतावच्छेदकद्वयसामानाधिकरण्यत्वेन शक्तिस्तदा तादृशसामानाधिकरण्यस्याप्यवच्छेदकद्वयमात्रवृत्तित्वात्प्रकृत्यर्थस्य च तत्रानन्वयप्रसङ्गः कथं चिदवच्छेद्यत्वादिसम्बन्धेन प्रकृत्यर्थस्य तत्रान्वयसम्भवेप्युत्पलत्वे नीलोत्पलत्वमित्यादिव्यवहारप्रसङ्गः तादृश सामानाधिकरण्यस्योत्पलत्वेपि सत्त्वात् नीलोत्पलत्वं न समेवतमित्यादिव्यवहारापत्तिश्चेत्यादिकं समाहितम । यत्तु तत्तद्विशेषणतावच्छेदकादिभेदादनन्तशक्तिकल्पनापत्तेर्न कर्मधारयोत्तरभावप्रत्ययस्य उक्तरूपेण शक्तिः किं तु वृत्तित्वमात्रे तथा च नीलोत्पलत्वमित्यादौ [भाव]-समान्यशक्त्योपस्थापितस्योत्पलत्वादेर्नीलान्वितवृत्तित्वेन सहा-

न्वयान्नीलवृत्त्युत्पलत्वं वाक्यार्थ इति मतम् तन्न। नीलोत्पलत्वमित्यादौ नीलोत्पलयोरभेदानुभवस्यापलापप्रसङ्गात्। वस्तुतो घटत्वमित्यादौ घटेतरावृत्तित्वे सति सकलघटवृत्तित्वरूपेण घटत्वस्यानुभवः सर्वसिद्धः तत्र घटस्य घटपदादेव लाभादितरावृत्तित्वादौ भावप्रत्ययस्य शक्तिः तत्रापि इतरत्वमाश्रयो वृत्तिमान् साकल्यघटकीभूतं प्रतियोगित्वमवच्छेदकं च प्रत्येकमर्थः तथा च प्रकृत्यर्थस्य घटस्येतरत्वे तस्य चाश्रये आश्रयस्य वृत्तिमति वृत्तिमतः पुनरितरत्वेऽन्वयात् घटेतरावृत्तित्व[स्य सत्यन्तदलस्य] लाभः एवं प्रकृत्यर्थस्य घटस्य वृत्तिमति तस्य चेतरत्वे इतरत्वस्य च प्रतियोगित्वे प्रतियोगित्वस्य चावच्छेदके तस्य च पुनरितरत्वेऽन्वयाद्घटवृत्त्यन्योन्याभावप्रतियोगितावच्छेदकाभिन्नत्वरूपस्य सकलघटवृत्तित्वस्य लाभः व्युत्पत्तिवैचित्र्याच्चैकपदार्थानां परस्परमन्वयः न च विशिष्टस्यापदार्थत्वे प्रथमं विशिष्टवैशिष्ट्यान्वयबोधो न स्यादिति वाच्यम् इष्टत्वात् क्वाचित्कस्य [प्रथमं] विशिष्टवैशिष्ट्यबोधस्य विशिष्टे लक्षणादितोऽप्युपपत्तेः प्रकृत्यर्थे तत्त्वावच्छेदकस्य यादृशः सम्बन्धो भासते तादृशसम्बन्धावच्छिन्नवृत्तिमत्त्वादिकं ग्राह्यम् तेन घटत्वादिजातेः कालिकादिसम्बन्धेन घटेतरवृत्तित्वेऽपि न क्षतिः न वा विषयितासम्बन्धेन घटत्ववतो भेदस्य घटवृत्तित्वेऽपि घटत्वादेर्घटवृत्त्यन्योन्याभावप्रतियोगितानवच्छेदकत्वहानिः सत्त्वं प्रमेयत्वमित्यादौ च सदितरावृत्तित्वादेर्न भानमप्रसिद्धत्वात् किं तु सद्वृत्तिभेदप्रतियोगितानवच्छेदकत्वादिरूपसकलसद्वृत्तित्वादिमात्रं भासते न चैवमपि घटत्वमित्यादितोऽभावस्य गगनादेर्वा भानप्रसङ्गः स्वातन्त्र्येणापि वृत्तिमतोऽन्वयात् [वस्तुतः सदितरत्वावच्छेदेन वर्तमानभेदस्य प्रतियोगितावच्छेदकत्वमेव सदितरावृत्तित्वं वाच्यम् तच्च सत्तायामस्त्येव सत्त्वं घटत्वमित्यादितो नाभावस्य गगनादेर्वा लाभप्रसङ्गः तेषां समवायसम्बन्धेन प्रतियोगितावच्छेदकत्वाभावात् प्रमेयत्वादौ तु कथितरीत्या सकलप्रमेयवृत्तितामात्रं भासते न तु तदितरवृत्तित्वमप्रसिद्धेः] इत्थं च नीलोत्पलत्वमित्यादिकर्मधारयस्थलेऽपि नीलाभिन्नोत्पलस्य भावप्रत्ययार्थेन सहान्वये नीलत्वसमवायिसमवायरूपस्य पदार्थतावच्छेदकसामानाधिकरण्य-

(१) 'न वा विषयतया घटेतरत्ववतो घटज्ञानस्य घटत्व'

स्य भाने भवत्येव न चोक्तरीत्या भावप्रत्ययस्य शक्तिकल्पने गुरुत्वमित्यादितो रसवत्त्वस्य संयोगवत्त्वमित्यादितो द्रव्यत्वस्य [तद्भूपवत्त्वमित्यादितस्तद्रसवत्त्वस्य] प्रतीत्यापत्तिः प्रकृत्यर्थतावच्छेदकनिरूपितत्वविशिष्टप्रकृत्यर्थतावच्छेदकताघटकसम्बन्धेन वृत्तिमत्त्वस्यैव शक्यवर्गे प्रवेशे तु तत एव निखिलातिप्रसङ्गभङ्गादितरावृत्तित्वादौ शक्तिकल्पनायां मानाभाव इति वाच्यम् तादृप्येणानुभवानुरोधादेव तत्र शक्तेः कल्पनात् अव्यावर्तकस्यापि शक्यतावच्छेदकत्वादिति सम्प्रदायः । केचित्तु धर्मत्वेनैव धर्मे भावप्रत्ययस्य शक्तिः तत्र च प्रकृत्यर्थतावच्छेदकनिष्ठाधेयत्वसम्बन्धेनैव प्रकृत्यर्थान्वयस्य व्युत्पन्नत्वात् घटत्वमित्यादितो न द्रव्यत्वादेर्भानम् न वा पटादौ घटधर्मस्य द्रव्यत्वादेः सत्त्वेपि पटादौ घटत्वं नास्तीत्यस्य वाक्यस्यायोग्यत्वमित्याहुः । तन्मन्दम् । घटे घटत्वमित्यादिवाक्यस्य निराकाङ्क्षत्वापत्तेः । घटधर्मत्वावच्छिन्ने [घटत्वे] घटवृत्तित्वस्यान्वयबोधे उद्देश्यतावच्छेदकविधेयतयोरैक्यस्यावश्यकत्वादिति । नव्यास्तु घटवत्त्वमन्यत्वमित्यादिमुख्यप्रयोगसम्भवाल्लाघवेन घटत्वादिकं जातिर्भेदत्वादिरखण्डोपाधिः भावप्रत्ययस्य शक्यतायामवच्छेकं घटत्वमित्यादौ तु घटत्वत्वादिप्रकारेण लक्षणयैव बुद्धिरिति प्राहुः । तन्मन्दम् । तथा सति घटवत्त्वमित्यादौ प्रकृत्यर्थस्य घटत्वादेर्भावार्थघटादौ आधेयत्वसम्बन्धेन अन्वयस्यानुपपत्तेः । घटादिविशिष्टे घटादेरिव घटादौ घटादिमद्वृत्तित्वस्याप्यन्वयस्य निराकाङ्क्षत्वात् । घटवान्घटवानित्यत्रेव घटवति घट इत्यादावप्यन्वयबोधानुत्पादस्य सर्वानुभवसिद्धत्वादिति संक्षेपः । ननु वह्निव्याप्यधूमवैशिष्ट्यवत्पर्वतवृत्तितावद्द्रव्यत्वमित्येवंपरामर्शजन्यानुमितावव्याप्तिस्तत्र व्याप्तिविशिष्टत्वसमानाधिकरणपक्षधर्मताया द्रव्यत्वेऽभावादत आह ज्ञानेति । भ्रान्तानुमितिः भ्रान्तस्यानुमितिः । तथा च तत्र व्याप्तिविशिष्टत्वसमानाधिकरणं यत्पर्वतवृत्तित्वं पर्वतरूपादौ प्रसिद्धं तस्य द्रव्यत्वादावारोपमादायैव लक्षणसंगम इति भावः । [यद्वा ननु कांचनमयपर्वतो वह्निमानित्याद्यनुमितावव्याप्तिः तादृशपक्षवृत्तित्वाप्रसिद्धेरत आह ज्ञानपदेति । तथा वह्न्यादिव्याप्तिविशिष्टत्वसमानाधिकरणतत्तद्धर्मिवृत्तितायास्तत्तद्रूपावच्छिन्नवृत्तित्वत्वेन ज्ञानजन्यज्ञानत्वं तत्तद्रूपावच्छिन्नतत्तद्धर्मिकवन्ह्यादिसाध्यकानुमितेर्लक्षणमिति भावः ।]

परामर्शेन नियमतो व्याप्तिविशिष्टत्वादिसामानाधिक-

यत्तु ह्रदो वह्निमान्धूमादित्यादौ व्याप्तिविशिष्टत्वसमानाधिकरणह्रदध-र्मत्वाप्रसिद्ध्या तज्ज्ञानासंभवादव्याप्तिरत उक्तज्ञानपदंत्यादि तत्तुच्छम तत्र तादृशसामानाधिकरण्यस्याप्रसिद्ध्या तज्ज्ञानासंभवस्यानुपदं वक्ष्यमाणत्वेन संदर्भविरोधात् । केचित्तु बाधिताबाधितसाधारणे-त्यस्य सदसत्साधारणेत्यर्थः तथा च सदुपरागेणासतो भानस्य टीकाकृता स्वीकारादसदेव सामानाधिकरण्यमादाय ह्रदो वह्नि-मानित्याद्यनुमित्यव्याप्तिनिरासाभिप्रायकोयं ग्रन्थ इत्याहुः । परे तु यत्र वह्निव्याप्तिविशिष्टत्ववद्गुणसंयुक्तत्ववान्धूम इत्यादिपरामर्शाद्गु-णो वह्निमानित्यनुमितिस्तत्राव्याप्तिर्गुणसंयुक्तत्वरूपस्य पक्षधर्मत्व-स्याप्रसिद्ध्या तज्ज्ञानासंभवादत आह ज्ञानेति बाधिताबाधितेत्यस्य सदसत्साधारणस्य पक्षवृत्तित्वस्य ज्ञानलाभादित्यर्थ इत्याहुः । तन्मन्दम् । सदुपरागेणासतः संसर्गमर्यादयैव भानस्य टीकाकृदादि-प्राचीनसंमतत्वेन प्रकारविधयाऽसतोऽस्य गुणसंयुक्तत्वादेर्भानासं-भवात् । अन्यथा परमतविशेषप्रसंगादिति । [नव्यास्तु ननु बाध-कालीनस्य परामर्शस्यानुव्यवसायेतिव्याप्तिः न च आद्यज्ञानेऽबा-धितत्वं विशेषणम् भ्रमप्रामाण्यज्ञानविशिष्टबाधकालीनपरामर्शजन्यानु-मितावव्याप्तिप्रसंगादत आह ज्ञानेति बाधिताबाधितेति बाधिता-बाधितसाधारणपरामर्शत्वेन ज्ञानस्य कारणत्वलाभादित्यर्थः तथा च तादृशकारणत्वं लक्षणे निविष्टमिति नातिव्याप्तिः अत एव बाधितपदमपि साधु संगच्छत इति प्राहुः ।] केचित्तु ननु चरम-ज्ञानपदस्य [भ्रमपरत्वे प्रमानुमितौ] प्रमापरत्वे च भ्रमानुमितावव्या-प्तिरत उक्तं ज्ञानेति इति क्रमेणावतारणिकामाहुः तच्चिन्त्यम् ॥ [वस्तु-गत्या] तादृशपक्षधर्मताया ज्ञानमात्रनिवेशे धूमवान्पर्वत इति ज्ञान-जन्यबुद्धावप्यतिव्याप्तिरतस्तादृशसामानाधिकरण्यावगाहिज्ञानं निवे-श्यमित्याशयेन दूषयति परामर्शेनेति । अनुमितिजनकज्ञानेनेत्यर्थः । नियमत इति । तथा च वह्निव्याप्तिसंबन्धविशिष्टपर्वतसंबन्धवान् वह्निव्याप्यधूमवांश्च पर्वत इत्यादिसमूहालम्बनजन्यानुमितौ लक्षण-सत्त्वेऽपि वह्निव्याप्यधूमवान्पर्वत इत्यादिधीजन्यप्रमानुमित्यव्याप्ति-

रण्यग्रहे मानाभावात् । गौरवेण तद्विषयत्वेनाहेतुत्वाच्च । सम्बन्धसम्बन्धाग्रहेऽपि विशिष्टज्ञानत्वस्योपपादितत्वात् । भ्रमस्थले तादृशसामानाधिकरण्याप्रसिद्धया तज्ज्ञानासंभवात् । अस-

---

रिति भावः ॥ ननु व्याप्तिसंबन्धविशिष्टपक्षसंबन्धनिश्चयत्वेन हेतुत्वादुक्तस्थलेऽनुमितिरेवाप्रसिद्धा कुत्राव्याप्तिरत आह गौरवेणेति । लाघवात्पक्षवृत्तौ व्याप्तिविशिष्टत्वनिश्चयत्वेन पक्षे वा व्याप्तिविशिष्टवैशिष्ट्यावगाहिनिश्चयत्वेन हेतुत्वादिति भावः ॥ [तादृप्येण हेतुता मास्तु तथाप्यनुमितिहेतुपरामर्शस्य पक्षधर्मिकव्याप्तिविशिष्टवत्ताज्ञानत्वादिना व्याप्तिविशिष्टत्वपक्षधर्मत्वयोः सामानाधिकरण्यावगाहित्वानुमानादवश्यमुभयसामानाधिकरण्यावगाहित्वमतो नक्षत्वा(नोक्ता)नुमित्यव्याप्तिरत आह सम्बन्धेति । व्याप्तिसंबन्धपक्षसम्बन्धयोः संबन्धाग्रहेपीत्यर्थः । विशिष्टज्ञानस्य पक्षधर्मिकव्याप्तिविशिष्टज्ञानस्य । उपपादितत्वादिति । 'यत्र वह्निव्याप्यधूमवानयमिति शाब्दपरामर्शादनुमितिः' इत्यादिग्रन्थेन मूलकृतैवोक्तत्वादित्यर्थः । तथाच तादृशपरामर्श एव व्यभिचाराशोक्तक्रमेणानुमानमिति भावः ।] नेनु व्याप्तिविशिष्टबुद्धित्वं न व्याप्तिसम्बन्धावगाहिबुद्धित्वम् व्याप्तितत्संबन्धादिसमूहालम्बनादप्यनुमित्यापातात् किं तु व्याप्तिसम्बन्धसम्बन्धावगाहिबुद्धित्वमेव तत्कुतो लाघवमित्यत आह सम्बन्धेत्यादि तद्विशिष्टबुद्धित्वं तत्प्रकारकज्ञानत्वम् न तु सम्बन्धसम्बन्धावगाहित्वम् सम्बन्धसम्बन्धावगाहिसमूहालम्बनेऽतिप्रसक्तेः [अन्यथा दण्डी पुरुष इत्यादितो दण्डपुरुषसंयोगा इत्यस्य वैलक्षण्यानुपपत्तेः] प्रकारता च विषयताविशेषः स च स्वरूपसम्बन्धः पदार्थान्तरं वा अत एवाधिकरणाभावयोः सम्बन्धस्य स्वरूपानतिरेकेपि तदीयसमूहालम्बनविशिष्टबुद्धयोर्भेदः न च तुल्यविषयकत्वे विषयतावैलक्षण्येन बुद्धिभेदे साकारवादापत्तिरिति वाच्यम् बाह्यवस्तूनां प्रामाणिकतयापह्नोतुमशक्यत्वादित्यादेर्बौद्धाधिकारदिप्पण्यामुक्तत्वादिति भाव इति प्राञ्चः।[तन्मन्दम् विशिष्टबुद्धेः सम्बन्धसम्बन्धावगाहित्वमतेपि व्याप्तिविशिष्टबुद्धित्वापेक्षया व्याप्तिसम्बन्धविशिष्टबुद्धित्वस्य गुरु-

---

(१) इतः प्रभृति प्राचीनमतम् ।

तया तुल्यत्वायोगादिति ।] नव्यास्तु ननु व्याप्तिप्रकारकपक्षधर्मता-ज्ञानं नानुमितिजनकं व्याप्तिसम्बन्धपक्षसम्बन्धयोः समानाधिकरण्यावगाहिताकाङ्क्षात्वादित्यनुमानादुक्तगौरवं प्रामाणिकमेवेत्यत आह सम्बन्धेत्यादि व्याप्तिसम्बन्धपक्षसम्बन्धयोः सामानाधिकरण्याग्रहेपीत्यर्थः विशिष्टज्ञानत्वस्य विशिष्टस्य ज्ञानत्वं यत्रेति व्युत्पत्त्यानुमितिजनकीभूतविलक्षणज्ञानस्य उपपादितत्वात् मिश्रादिभिरुपपादितत्वादित्याहुः ॥ ननु व्याप्तिविशिष्टत्वसमानाधिकरणपक्षधर्मतायाविशिष्टवैशिष्ट्यनिरूपितविषयितावैशेषेण ज्ञानपदार्थेऽन्वयाद्विलक्षणज्ञानलाभान्न वह्निव्याप्यधूमवान्पर्वत इत्यादिधीजन्यप्रमानुमित्यव्याप्तिरत आह भ्रमस्थल इति । तज्ज्ञानेति । व्याप्तिविशिष्टत्वसमानाधिकरणपक्षधर्मत्वज्ञानेत्यर्थः । तथा च ह्रदो वह्निमानित्यादिभ्रमानुमितावव्याप्तिरिति भावः ॥ अथासदेव वह्निव्याप्तिविशिष्टत्वसमानाधिकरणं ह्रदवृत्तित्वं भ्रमस्थले प्रसिद्धमत आह असदिति । अलीके चक्षुः सन्निकर्षादेर्व्याप्त्यादेः शक्त्यादेश्च विरहेण प्रत्यक्षादिप्रमाणतस्तत्ख्यात्यसम्भवात् । सत्त्वे चासत्त्वव्याघातात् । विनापि प्रमाणव्यापारं तद्बुद्ध्युपगमे च शशविषाणादिप्रतीतिदशायां वन्ध्यासुतादेरपि ग्रहप्रसङ्गात् । अगृहीतशशादिकस्य पुंसः शशविषाणमित्यादिप्रतीत्यनुत्पत्त्या कल्पितशशादिविषयतामाहत्य भ्रमत्वेनैव ताहशप्रतीत्युपपत्तावतिरिक्तालीकविषयत्वे मानाभावात् । शशविषाणयोः सम्बन्धोलीक इत्यादिव्यवहारस्य चापार्थकत्वात्। शशे विषाणमसदित्यादिस्थले चासच्छब्दस्यात्यन्ताभावप्रतियोग्यर्थकत्वादिति भावः । [न चासतोऽप्रसिद्धया तत्ख्यातिनिषेधस्यायोगः । तदीयसंसर्गत्वावच्छेदेन तत्प्रमात्वघटकत्वोपगमेनार्थतस्तन्निरासादिति भावः । नव्यास्तु लिङ्गसंसर्गाग्रहाल्लिङ्गिकासंसर्गाग्रहस्योपेयत्वात् भ्रमस्थलेनुमित्यनुत्पत्तेः कुत्राव्याप्तिरत आह असदिति असतः प्रमापरमर्शादनुत्पन्नस्य ख्यातिनिरासादनुमितिभिन्नत्वनिरासादिति वदन्ति ॥] लक्षणाव्या-

---

(१) 'विशिष्टज्ञानं यत इति व्युत्पत्त्या

(२) 'ति प्राहुः । तच्चिन्त्यम् ।'

(३) 'शशविषाणमित्यादिव्यवहारस्य चापार्थकत्वा

त्व्याप्तिनिरासात् । अवान्तरवाक्यार्थायोग्यत्वनिर्णये महावाक्यार्थज्ञानानुदयात् । विषाणे शशसम्बन्धाभावनिश्चयदशायां शशविषाणजन्यमिदं कार्मुकमिति बुद्धेर्ब्रह्मणापि दुरुपपादत्वात् । न चात्र प्रमाण्यप्रस्तावात्प्रमैव लक्ष्या यदि च स-

---

न्निमुद्भाव्य लक्षणवाक्यतः शाब्दबोधोप्यनुपपन्न इत्याह अवान्तरेति । अयोग्यतासंशयस्याप्रतिबन्धकत्वादुक्तं निर्णय इति । तथा च हृदधर्मता न व्याप्तिविशिष्टत्वसमानाधिकरणेत्यवान्तरवाक्यार्थायोग्यत्वनिश्चये तादृशपक्षधर्मताया न ज्ञानपदार्थेऽन्वयः सम्भवतीति भावः ॥ अत्रैव दृष्टान्तयति विषाण इति । विषाणत्वावच्छेदेनेत्यर्थः । शशसम्बन्धेति । शशविषाणेत्यत्र तत्पुरुषे शशपदेन लक्षितस्य शशसंबन्धिनस्तादात्म्येन विषाणेऽन्वये शशसम्बन्धिभेदग्रहस्येव शशसम्बन्धाभावग्रहस्यापि स्वतो विरोधित्वात् । शशसम्बन्धाभावेत्यस्यैव वा शशसंबन्धेनाभाव इति व्युत्पत्त्या शशसंबन्धावच्छिन्नभेदोर्थः । तथा विषाणजन्यं कार्मुकमित्यादिवाक्यस्थलीयान्वयबोधाभिप्रायेण [वा] इदम् निपातार्थस्य शशसम्बन्धादेः साक्षादेव विषाणादिनामार्थेऽन्वयसंभवादिति तु परमार्थः । [वैयाकरणमते शशविषाणमित्यादिवाक्यतः शशसंबन्धवद्विषाणमित्याकारको बोधः तैर्लुप्तविभक्तिप्रतिसंधानस्यान्वयसहकारित्वस्वीकारात् नामार्थयोर्भेदेनान्वयबोधस्य समासातिरिक्तस्थल एवाव्युत्पन्नतया मणिकृन्मतेपि शशपदस्य शशसंबन्धपरतया वेति तु नव्याः । अनुभवानुरोधेनासमानाकारस्यापि विरोधित्वमित्यपि कश्चित् । अपरे तु शशस्य संबन्धो यत्रेति व्युत्पत्त्या शशसंबंधाभाव इत्यस्य शशसंबन्धिभेदस्य लाभेन यथाश्रुतमेव सम्यगिति प्राहुः । तच्चिन्त्यम् ॥] नचेति । वाच्यमिति परेणान्वयः । प्रमैवेति । प्रकृतपक्षधर्मिकप्रकृतसाध्यकप्रमानुमितिरेवेत्यर्थः । तेन भ्रमानुमितेरप्यंशतः प्रमात्वेपि न क्षतिः । प्रमापदस्य भ्रमसामान्यभिन्नार्थकत्वे हृदः पर्वतश्च धूमवानित्यादिसमूहालम्बनानुमितेरलक्ष्यत्वापत्तेरिष्टापत्तौ चोपाध्यायमतेऽपि तादृशसमूहालम्बनानुमितावेवातिप्रसङ्गसंभवादग्रे यदि चेत्यभिधानस्य संदर्भविरोधापत्तेरिति भावः । [सल्लिङ्गपरामर्शादित्यत्र सल्लिङ्गपरामर्शमात्रा-

लिङ्गकपरामर्शादपि भ्रान्तानुमितिस्तदा चरमज्ञानपदं प्रमापरमिति वाच्यम् । अव्याप्यापक्षधर्मयोस्तत्त्वावगाहिना पक्षधर्मेण जनितायां वस्तुतः साध्यावगाहितया प्रमायामव्याप्तेः । लिङ्गोपहितलैङ्गिकभाननिरासेनांशिकभ्र-

---

दित्यर्थ इत्यपि वदंति ।] ननु भ्रमस्यालक्षत्वे पृथिवीत्वादिहेतुनायां गन्धप्रागभावावच्छिन्नो घटो गन्धवानित्यादिभ्रमानुमितौ महानसीयेतरवह्निबाधसहकृताद्यथार्थवह्निपरामर्शाज्जायमानायां पर्वतो महानसीयवह्निमानित्यादिभ्रमानुमितौ चातिव्याप्तिरत आह यदि चेत्यादि । पक्षतावच्छेदकसामानाधिकरण्येनैव गृहीतव्यापकतावच्छेदकरूपेणैव च पक्षे साध्यस्यानुमितिरित्युपाध्यायमतमालम्ब्योक्तं यदि चेति । प्रथमज्ञानपदस्य प्रमापरत्वे तद्दोषतादवस्थ्यमतश्चरमेति । प्रमापरमिति । प्रकृतपक्षधर्मिकप्रकृतसाध्यवत्ताप्रमापरमित्यर्थः । तेन ह्रदो वन्हिमान्पर्वतश्च वह्निमानित्यादिप्रमानुमितेरंशतो भ्रमत्वेपि न तत्राव्याप्तितादवस्थ्यम्॥ यत्र व्याप्तिविशिष्टत्वसमानाधिकरणपक्षधर्मत्वस्य हेतौ न भ्रमः किं तु पक्षधर्महेतौ व्याप्यत्वमात्रस्य व्याप्ये वा हेतौ पक्षधर्मत्वमात्रस्य भ्रमस्तादृशपरामर्शजन्यप्रमायामव्याप्तिमाह अव्याप्येत्यादिना । वस्तुतो वस्तुगत्या । तथा च वह्निव्याप्यद्रव्यत्ववान् तादृशमहानसत्ववान्वा पर्वत इत्याकारकः परामर्शो यत्र द्रव्यत्वगतमेव पक्षधर्मत्वं महानसत्वगतमेव व्याप्यत्वं विषयीकरोति तत्रत्यायां पर्वतो वह्निमानिति प्रमायामव्याप्तिरिति भावः ॥ ननु अनुमितिमात्रस्यैव साध्यव्याप्यवत्पक्षावगाहित्वादुक्तस्थलीयानुमितिर्लिङ्गांशे भ्रमरूपैव सा च न लक्ष्या भ्रमसामान्यभिन्नत्वरूपस्यैव प्रमात्वस्य लक्ष्यलक्षणयोर्निवेशनीयत्वात् पर्वतो ह्रदश्च वह्निमानित्यादिभ्रमूहालम्बनानुमितेरलक्ष्यत्वेऽपि क्षत्यभावात्कुतोऽव्याप्तिरत आह लिङ्गेति । साधकाभावादित्यादिः । न च धूमादिपरामर्शजन्यतावच्छेदकतयैवानुमितेर्वह्निव्याप्यधूमादिविषयकत्वसिद्धिः अन्यथा विनापि धूमादिपरामर्शं आलोकादिपरामर्शाद्वह्न्यनुमितेरुत्पत्त्या व्यभिचारादिति वाच्यम् तावतापि द्रव्यत्ववत्पर्वतध-

---

(१) तेन ह्रदो वह्निमानिति भ्रमानुमितेरप्यंशतः प्रमात्वेपि न तत्राप्तिव्याप्तितादवस्थ्यम् ।

मत्वस्यायोगात् । ईश्वरज्ञानतादृशज्ञानजन्यत्वस्य चाति-

र्मिकवह्न्यनुमितित्वावच्छिन्नं प्रत्येव वह्निव्याप्यद्रव्यत्ववत्तानिश्चय-त्वेन हेतुतया तादृशानुमितेश्च प्रमात्वनियतत्वेन तत्राव्याप्तितादवस्थ्यात् । लाघवादेकविधव्याप्तेरेवानुमितिप्रयोजकत्वस्य व्यवस्थाप्यत्वादिति भावः । [परे तु वह्न्यनुमितौ उपनीतत्वतन?)-त्वादेरिव वह्न्यंशे धूमादेरपि प्रकारतया भानात्तादृशानुमितिर्भ्रमरूपैवेत्यत आह लिङ्गेति अनुमितिमात्रस्याभ्रमत्वेन लक्ष्याप्रसिद्धेरित्यादिः लिङ्गोपहितं लिङ्गविशिष्टं यल्लैङ्गिकं साध्यं तस्यानुमितौ प्रकारत्वनिरासेनेति प्राहुः । अपरे तु लिङ्गेति लिङ्गं लिङ्गतावच्छेदकं तदुपहिते तद्विशिष्टे लैङ्गिकस्य साध्यीयव्याप्यत्वस्य भाननिरासेन द्रव्यत्ववान्पर्वतो वह्निमानित्याकारकानुमितावांशिकभ्रमत्वस्याप्ययोगादित्यर्थ इत्यप्याहुः] ॥ ननु पक्षस्य वस्तुगत्या साध्यवत्त्वे तत्रेश्वरीयस्य व्याप्तिविशिष्टत्वसमानाधिकरणपक्षधर्मताज्ञानस्य जन्यतासत्त्वाच्चाव्याप्तिरत आह ईश्वरेति । अतिप्रसङ्गत्वाद्वह्निप्रत्यक्षादिसाधारणत्वात् । [इदमुपलक्षणम् व्याप्तिविशिष्टपक्षधर्मतेत्यस्य वैयर्थ्यमपि द्रष्टव्यम्] तथा च [तादृश] ज्ञानत्वाद्यनवच्छिन्नमेव जनकत्वं [जन्यतानवच्छिन्नं वा] लक्षणे प्रवेश्यम् तच्च प्रकृतानुमितावीश्वरज्ञानस्य नास्तीति भावः । यद्यपि व्याप्तिविशिष्टत्वसमानाधिकरणपक्षधर्मताया विषयितविशेषेण[ज्ञानेऽन्वयात्तादृश] ज्ञानमेव लक्षणे प्रविष्टम् अन्यथा परामर्शेन नियमत इत्युक्तदोषतादवस्थ्यात् तत्र च प्रकृतसाध्यीयव्याप्तिप्रवेशे मानाभावात् यत्किंचित्पदार्थीयव्याप्तिविशिष्टत्वसमानाधिकरणपक्षधर्मताया विषयितविशेषेण ज्ञानमादाय लक्षणसंभवान्न कुत्राप्यव्याप्तिसंभावना तथापि प्रकृतव्याप्तिविशिष्टवैशिष्ट्यनिरूपितविलक्षणविषयितासम्बन्धेन धर्मत्वस्यैव ज्ञानपदार्थेऽन्वयात्सर्वसामञ्जस्ये पक्षपदार्थपर्यन्तप्रवेशवैयर्थ्यान्नैवमन्वयो वाच्य इत्याशयः । न च साध्यभेदेन व्याप्तेर्भेदादेकोपादाने ऽन्यसाध्यकाद्यनुमित्यव्याप्तिरतो जातिगर्भत्वमप्रौव्ये न कुत्राप्यव्याप्तिरिति वाच्यम् । तत्पक्षकतत्साध्यकतद्धेतुकानुमितित्वेन विशिष्यैव लक्ष्यतया जातिघटनाया अनावश्यकत्वादेकविधव्याप्तेरेव

---

(२) 'विशिष्टज्ञानत्वा'

प्रसञ्जकत्वात् । अत एव व्याप्तिविशिष्टपक्षधर्मता तज्ज्ञानं वेत्यादिकमपास्तम् । यदपि व्याप्तिविशिष्टं पक्षधर्मश्चेति द्वन्द्वाश्रयणाद्व्याप्तिविशिष्टपक्षधर्मत्वावगाहिज्ञानजन्यत्वं लभ्यते पदार्थयोरभेदेऽपि पदार्थतावच्छेदकभेदेनैव 'प्रमाणप्रमेय'इत्यादिसूत्रे अन्यत्र

सर्वत्रानुमितौ हेतुत्वादित्याशयादिति॥अत एव उक्तानुमित्यव्याप्तेरेव। विशेषविधिं विना कारकविभक्तिमन्तर्भाव्यैव तत्पुरुषस्य व्युत्पन्नत्वादाह तज्ज्ञानं वेति । व्याप्तिविशिष्टे यत्पक्षधर्मताज्ञानमिति ज्ञानान्ततत्पुरुषोपि नेत्यर्थः । आदिपदात् व्याप्तिविशिष्टा व्याप्तिसमानाधिकरणा या पक्षधर्मतेत्यादिकर्मधारयपरिग्रहः ॥ मिश्रमतमुपन्यस्यति व्याप्तिविशिष्टमिति । अथ चार्थे द्वन्द्व इति पाणिनिसूत्रेण चार्थे समस्यमानपदार्थयोर्भेदे द्वन्द्वस्य विधानदुक्तवाक्यतः तव सङ्गिगपरामर्शालाभः तत्र व्याप्तिविशिष्टस्यैव पक्षधर्मतया तदुभयोर्भेदविरहादत आह पदार्थयोरिति।ननु न्यायसूत्रे द्वादशविधस्यैव प्रमेयस्य प्रविष्टत्वात्तस्य भेदः प्रमाणेऽस्त्येवेत्यतउक्तम अन्यत्र चेति । अन्यत्र नीलघटयोरभेद इत्यादिवाक्ये । तथा च सूत्रेपि चार्थो भेदः समस्यमानपदप्रतिपाद्यतावच्छेदकयोरेव ग्राह्यः । स च प्रकृतेपि व्याप्तिविशिष्टत्वपक्षधर्मत्वयोर्भेदादस्त्येवेति भावः । ननु पदार्थतावच्छेदकभेदेन द्वन्द्वविधाने घटाविवत्यादिसरूपैकशेषो न स्यात् द्वन्द्वापवादकस्य तस्य द्वन्द्वाप्रसक्तावसम्भवात् न च पदबोध्यभेद एव द्वन्द्वस्तथा च घटाविवत्यत्रापि घटपदबोध्यानां घटव्यक्तीनां परस्परभेदसत्वान्न द्वन्द्वाप्रसक्तिरिति वाच्यम् तथा सति घटकलशाविवेत्येवमपि द्वन्द्वप्रसङ्गात् अनुशासनाभावेन तत्रैकशेषस्य कर्तुमशक्यत्वादिति चेन्न । सरूपैकशेषासत्त्वेपि क्षत्यभावात् । यत्र विष्णुत्वसिंहत्वादिकं विभिन्नमेव हरिपदार्थतावच्छेदकं तत्रैव तत्संभवाच्चेति दिक् । अत्र च नीलघटयोरभेद इत्यादिस्थले विभक्त्युपस्थाप्यं द्वित्वादिकं न विशेष्यान्वितं तस्यैकत्वेन बाधात् नापि विशेषणीभूते नीलत्वघटत्वादावन्वितम् तयोः पदार्थतावच्छेदकत्वेनाकाङ्क्षाविरहात् । किं त्वनन्वितमेव । न चैवं द्विवचनवैयर्थ्यम् दारा इत्यत्र बहुवचनवत् [सुप्यते इत्यत्र एकवचनवच्च] साधुत्वार्थमेव तदुपयोगादिति ध्येयम् । स्वामिनो देवृदेवरावित्यत्रैव व्युत्पत्तिवै-

च द्वन्द्वस्य दर्शनात् पदार्थद्वयाभेदबोधकाच्च कर्मधारयाद्भेदाभेदोदासीनपदार्थद्वयबोधजनकत्वेनैव द्वन्द्वस्य भेदात् विशिष्टपदस्य वा धर्मपरतया व्याप्तिवैशिष्ट्यपक्षधर्मतयोर्लाभात् न चैवमालोको वह्निव्याप्यो धूमवान्पर्वत इति ज्ञानजन्येऽतिव्याप्तिः एकत्र तदुभयावगाहित्वस्योक्तत्वादिति केचित् तदप्यसत् । एवमपि धूमो वह्निव्याप्यो द्रव्यं पर्वतवृत्तीतिज्ञानजन्येऽतिप्रसङ्गात् । एकरूपेण तदुभयावगाहित्वस्योक्तौ मीमांसकमतानुपवेशात् ।

व्याप्यत्वपदार्थतावच्छेदकेपि विभक्त्यर्थस्य द्वित्वादेरन्वय इति अत एव आत्माकृतिव्यक्तयः पदार्थ इति न्यायसूत्रे पदार्थ इत्यत्रैकवचनं आत्मादित्रयस्यैकशक्तिविषयत्वलाभार्थमिति वार्तिकव्याख्ये]त्यपि वदन्ति । ननु पदार्थतावच्छेदकयोर्भेदेन द्वन्द्वविधाने नीलोत्पलमित्यादिकर्मधारयस्थलेपि तदापत्तिरत आह पदार्थेति । भेदस्तादात्म्यातिरिक्तः संबन्धः । अभेदस्तादात्म्यम् । तथा चैकपदार्थधर्मिकपदार्थान्तरवैशिष्ट्यविषयताबहिर्भूतविभिन्नधर्मावच्छिन्नपदार्थद्वयविषयताकबोधजनकत्वेनेत्यर्थः । तेनैकदा नीलोत्पलमित्यस्य द्वन्द्वकर्मधारयोभयत्वेपि न क्षतिः । [भेदात् भेदव्यवहारात् ।] पदार्थयोर्भेदे द्वन्द्वविधानेऽपि न क्षतिरित्याशयेनाह विशिष्टपदस्येति । व्याप्तिविशिष्टपक्षधर्मयोर्द्वन्द्वे अवयवस्यस्य पक्षधर्मपदस्य विशेषविधिं विना पूर्वनिपातापत्तिरत आह विशिष्टपदस्येतीत्यपि कश्चित् । ननु व्याप्तिविशिष्टेन पक्षधर्मतायां द्वन्द्वे वह्निव्याप्यद्रव्यत्ववान्पर्वत इत्यादिपरामर्शेन व्याप्तिविशिष्टस्याविषयीकरणात्तज्जन्यानुमितावव्याप्तिरतो वैशिष्ट्यपरतामाह धर्मेति । वैशिष्ट्यपरतयेत्यर्थः । न च विशिष्टपदस्य तत्परत्वं न लक्षणया तस्य वाक्यत्वेन शक्यत्वाभावादिति वाच्यम् । धातोरेव शक्त्या वैशिष्ट्यपरत्वात् । भावविहितक्तप्रत्ययस्य निरर्थकत्वात् । एतदावेदयितुमेव प्रागपि विग्रहवाक्ये व्याप्तिविशिष्टमिति क्लीबनिर्देशः कृतः । नपुंसके भावे क्त इत्यनुशासनादिति भावः । उक्तत्वादिति । 'तत्र व्याप्तिविशिष्टे'त्यादिमूलस्थतच्छब्देनैकधर्मिणो मूलकृतोक्तत्वादित्यर्थः । उक्तत्वाद्विवक्षितत्वादित्यर्थ इत्यपि केचित्॥ द्रव्यमिति । तत्र व्याप्तिविशिष्टस्य

मिथस्तदुभयोपश्लेषावगाहित्वस्य च परामर्शाव्यापकत्वात् । न च तदुभयविषयकत्वनियतधर्मावच्छिन्नकारणतानियोगिकार्यतात्रालित्वमर्थः । पक्षधर्मतापदोपदानवैयर्थ्यात् । व्याप्तिवि-

---

धूमस्यैव द्रव्यत्वेन पक्षधर्मत्वावगाहनादिति भावः॥ मीमांसकेतिमीमांसकैरनुमितित्वेनाभिमते [अनुव्यवसायाद्यात्मक]ज्ञाने उक्तलक्षणस्यानुपवेशाद्वतत्वादित्यर्थः।तथा च वह्निव्याप्यवान्पर्वत इत्यादि परामर्शजन्यानुमितावव्याप्तेर्जातिगर्भतया वारणेपि वह्निव्याप्यो धूमो धूमवांश्च पर्वत इत्याकारकसमूहालम्बनस्यानुव्यवसायेतिव्याप्तिरिति भावः ॥ ननु व्याप्तिसंबन्धपक्षसंबन्धयोः परस्परवैशिष्ट्यावगाहित्वं वाच्यं तथा चोक्तसमूहालम्बनस्यातथात्वान्नोक्तातिव्याप्तिरत आह मिथ इति । अव्यापकत्वाद्वह्निव्याप्यधूमवान्पर्वत इत्यादिज्ञान एवानन्तत्वात् । तथा च तादृशपरामर्शस्थलीयानुमित्यव्याप्तिरिति भावः॥ लक्षणस्थं जन्यपदं जन्यतावि शेषपरमतो वह्निव्याप्यो धूमो द्रव्यं पर्वतवृत्ति इत्यादिज्ञानजन्ये नातिव्याप्तिरित्याशङ्क्य निराचष्टे न चेति। तदुभयविषयकत्वनियतेति । व्याप्तिसम्बन्धविषयकत्वाभावस्य तादृशविषयकान्यत्वस्य वा पक्षधर्मताविषयकत्वाभावस्य तादृशविषयकान्यत्वस्य वाधिकरणावृत्तीत्यर्थः। व्याप्तिविशिष्टत्वपक्षधर्मत्वोभयविषयकत्वनियतो यो धर्मः परामर्शत्वं तदवच्छिन्नकारणतानिरूपितं कार्यत्वमस्त्यनुमितावितिं तत्र लक्षणसत्त्वम् परामर्शाद्यनुव्यवसाये तु न परामर्शत्वादिना हेतुत्वम् किंतु प्रत्यक्षमात्रे विषयत्वेन तच्च न तदुभयविषयकत्वनियतं घटज्ञानादौ व्यभिचारात् तत्तत्परामर्शप्रत्यक्षे विषयविधया घटादिस्मृतौ चोद्बोधकविधया तत्तत्परामर्शव्यक्तित्वेन हेतुतासत्त्वे तु धर्मैक्यं नानाव्यक्तिवृत्तिधर्मार्थकं वाच्यमिति भावः॥ वैयर्थ्यादिति । स्वव्यापकतदुभयविषयकत्वसामानाधिकरण्यात्मके तदुभयविषयकत्वनियमे स्वव्यापकव्याप्तिविषयकत्वसमानाधिकरणधर्मावच्छिन्नेत्यस्यैव सम्यक्त्वादिति प्राञ्चः। तदुभयविषयकत्वाभाववदवृत्तित्वलक्षणनियमस्य निवेशेऽखण्डाभावघटकतया पक्षधर्मताविषयकत्वस्य वैयर्थ्यविरहेप्यनतिप्रयोजनकत्वादित्यर्थ इति

शिष्टं यत्पक्षधर्मताज्ञानमिति तु स्यात् । यद्यप्यत्रापीन्धनसमाना-

---

कश्चित् । न च व्याप्तिविशिष्टबुद्धौ व्याप्तिज्ञानत्वेन हेतुत्वात्तत्राप्तिव्याप्तिवारणार्थमेव पक्षधर्मताप्रवेशः । तन्निर्देशेऽपि व्याप्तिविशिष्टवैशिष्ट्यबुद्धावनिव्याप्तिरतस्तद्वारणार्थं चरमज्ञानस्य व्याप्यत्वविषयकत्वेनावश्यं निवेशनीयत्वे तत एव व्याप्तिविशिष्टबुद्धावप्यतिव्याप्तेर्निरासात् । न चैवं व्याप्यत्वविषयकत्वे सति व्याप्तिज्ञानजन्यत्वमित्यस्यैव सम्यक्त्वे व्याप्तिविषयकत्वनियतधर्मावच्छिन्नकारणत्वप्रवेशो व्यर्थ इति वाच्यम् । परमेश्वरीयव्याप्तिज्ञानजन्यस्य वह्न्यादिप्रत्यक्षस्य वारकतयैव तस्य सार्थकत्वात् । यद्यपि पक्षधर्मताविषयकत्वनियतधर्मावच्छिन्नकारणतेत्यादेरेव सम्यक्त्वात् व्याप्तिपदोपादानवैयर्थ्यमित्यपि वक्तुं युज्यते न चैवं धूमवत्पर्वतविशिष्टबुद्धावतिव्याप्तिश्चरमज्ञानस्य पक्षधर्मत्वाविषयकत्वेन विशेषणीयत्वे चासंभवोऽनुमितिमात्रस्यैव साध्यांशे पक्षसम्बन्धविषयकत्वादिति वाच्यम् साध्यादिभेदेन व्याप्तेरिव पक्षादिभेदेन पक्षधर्मताया अपि भिन्नतया धूमवत्पर्वतविषयकत्वनियतधर्मावच्छिन्नकारणताकत्वे सति धूमवत्पर्वताविषयकज्ञानत्वमित्युक्तावसंभवविरहात् । तथाप्यभावाविषयकत्वपर्यवसन्नस्य व्याप्यत्वविषयकत्वस्य चरमज्ञानविशेषणत्वे लाघवम् । पक्षधर्मत्वाविषयकत्वप्रवेशे तु गौरवमेव । [धूमत्वाविषयकत्वेनोक्तौ गौरवविरहेपि] धूमवान्पर्वतो वह्निमानित्याकारिकैवानुमितिरिति लिङ्गोपधानमतस्य प्रमाणिकत्वे सर्वत्रैवोक्तप्रकारो न सम्भवतीत्याशयेन पक्षधर्मतापदमात्रस्य वैयर्थ्यमुक्तम् । संशयत्वस्य कार्यतावच्छेदकत्वे साधारणधर्म[दर्शन]विधया हेतुमत्तानिश्चयजन्ये साध्यादिसंशयेऽतिव्याप्तिभिया व्याप्तिविशिष्टपदवैयर्थ्यं नोक्तमित्यपि कश्चित् । यत्र साध्यस्यैव हेतुत्वमनुमित्सया चानुमितिः तादृशस्थलीयपक्षधर्मतामन्तर्भाव्योक्तक्रमेण लक्षणस्यासम्भवाद्व्याप्तिपदवैयर्थ्यं नोक्तमित्यप्याहुः ॥ इति तु स्यादिति । यद्यपि धूमो वह्निव्याप्यो द्रव्यं पर्वतवृत्तीत्यादिज्ञानस्यापि निरुक्तरूपवत्त्वात्तदनुव्यवसायेऽतिव्याप्तिः पक्षधर्मांशे व्याप्तिप्रकारकत्वविवक्षणे तु मिथोक्तद्वन्द्वपरित्यागानौचित्यम् तत्राप्युक्तविवक्षासंभवात् । तथापि

धिकरणाभावप्रतियोगितानवच्छेदकवह्नित्वावच्छिन्नवह्निसमानाधिकरणेन्धनवानयमित्यादिपरामर्शजन्येऽव्याप्तेः अखण्डव्याप्तेरप्रसिद्धत्वात् भ्रमानुमितेर्लक्ष्यत्वे चात्राकाशमात्मन इत्यादौ नितरां तथा । तथापि तावत्पदार्थानां तथाविधपरस्परोपक्षेपाव-

---

व्याप्तिप्रकारकमित्यस्य व्याप्त्या प्रकारो यस्येति व्युत्पत्त्या व्याप्त्यवच्छिन्नप्रकारताकमित्यर्थः । तथा च ज्ञानान्तकर्मधारयेऽन्वयितावच्छेदकावच्छेदेनैवान्वयस्य व्युत्पत्तिसिद्धतया पक्षधर्मतावगाहित्वावच्छेदेन व्याप्त्यवच्छिन्नप्रकारताकत्वस्य शब्दादेव लाभान्न विवक्षा। द्वन्द्वे तु स्वातन्त्र्येणैव तद्विवक्षणीयमिति पूर्वतो वैलक्षण्यमिति भावः। अत्रापीत्यपिकारेण प्रागुक्तसमस्तसमासः समुच्चीयते ॥ वह्निव्याप्येन्धनवानित्युक्तौ साध्यवदन्यावृत्तित्वरूपव्याप्तिमादाय कदाचित्प्रसिद्धिं कुर्यादतो विशिष्य निर्दिशति इन्धनसमानाधिकरणेति। अखण्डव्याप्तेरिति। यद्यपि तमो द्रव्यं रूपवत्त्वादित्यादौ तमःसमवेतत्वरूपस्य पक्षधर्मत्वस्याप्रसिद्धिरस्ति तथापि पक्षे धर्मताज्ञानमिति ज्ञानान्ततत्पुरुषेण पक्षांशे धर्मतावगाहिज्ञानलाभादेव न तद्दोष इत्याशयः । ननु साध्ये हेतुव्यापकत्वावगाहित्वानिरूपितं यद्धेतौ साध्यसामानाधिकरण्यस्यावगाहित्वं तदेव व्याप्तिप्रकारकत्वं वाच्यमतो नोक्ताव्याप्तिरित्यत आह। भ्रमानुमितेरिति। [ननु साध्याभाववदवृत्तित्वे सति साध्यसामानाधिकरण्यरूपैव व्याप्तिरत आह भ्रमानुमितेरितित्यपि कश्चित् ।] वृत्त्यनियामकसंयोगादिसम्बन्धेन साध्यहेतुभावेऽखण्डव्याप्तेः प्रसिद्धया तत्रत्यानुमितौ अव्याप्त्यसंभवात् वृत्तिनियामकसम्बन्धेन साध्यत्वसाधनत्वयोः सूचनार्थमत्रेत्युक्तम् । नितरामिति । अव्याप्तिरिति पूर्वेणान्वयः । [साध्ये हेतुव्यापकत्वावगाहि यत्साधने साध्यसामाधिकरण्यावगाहि ज्ञानं तस्यैव व्याप्तिप्रकारकपदेन विवक्षया कथं चित्पूर्वोक्ताव्याप्तिवारणेपि] अत्र हेतुव्यापकत्वसाध्यसामानाधिकरण्ययोरप्रसिद्धया तदुभयावगाहित्वमन्तर्भाव्यापि लक्षणस्य कर्तुमशक्यत्वाद्व्याप्तिरेवेति भावः ॥ तावदिति । प्रागुक्तक्रमेणान्वयव्याप्तिघटकेत्यादिः । तथाविधमनुमित्युपयोगि यत्परस्परसम्बन्धावगाहित्वं

---

(१) 'यः । व्या'

गाहित्वमात्रं विवक्षितम्।न च व्यतिरेकिण्यव्याप्तिः । व्यभिचारधीविरोधिधीविषयत्वेनान्वयव्यतिरेकव्याप्तयोरनुगमात्। भवति हि धूमसमानाधिकरणात्यन्ताभावाप्रतियोगिवह्निसमानाधिकरणधूमत्वे वह्न्यभावव्यापकीभूताभावप्रतियोगिधूमत्वे वा गृहीते नियमतो वह्निव्यभिचारधीप्रतिरोधः । तथाविधधूमसमानाधिकरणत्वादिकं तु न तथा । रासभादौ तद्ग्रहेपि व्यभि-

---

विशिष्टवैशिष्ट्यविषयिताविशेषरूपं तदेव विवक्षितं व्याप्तिप्रकारकपदेनेत्यर्थः । तेन धूमस्याधिकरणमधिकरणवृत्तिरभाव इत्याद्याकारकस्य तावत्पदार्थगोचरसमूहालम्बनस्य व्युदासः ॥ यद्यप्यन्योन्याभावादिगर्भान्वयव्याप्तिज्ञानस्थलीयानुमितावव्याप्तिः संभवति अत्यन्ताभावगर्भान्वयव्याप्तिनिविष्टवस्तूनामेव तावत्पदार्थेत्यादिना परामृष्टत्वात् तथाप्यन्वयव्याप्तीनां मध्येऽत्यन्ताभावगर्भाया: सिद्धान्तोक्तव्याप्तेरेवानुमित्युपयोगित्वमनुसृत्य शङ्कते न चेति। व्यतिरेकिणीति [व्यतिरेकव्याप्तिज्ञानजन्यानुमितावित्यर्थः । केचित्तु निरुक्तावगाहिताशून्यपरामर्शजन्यानुमितावित्यर्थः तथा चान्योन्याभावगर्भव्याप्त्यवगाहिपरामर्शस्यापि संग्रहान्न दोषः अग्रे विरोधप्रदर्शनेऽत्यन्ताभावप्रदर्शनमुपलक्षणमिति वदन्ति ।] तत्र परामर्शस्य पक्षे साध्याभावव्यापकीभूताभावप्रतियोगित्वेन हेत्ववगाहितयान्वयव्याप्तिप्रकारकत्वाभावादिति भावः ॥व्याप्तिद्वये व्यभिचारधीविरोधित्वं ग्राहयति भवति हीति। धूमत्व इति। गृहीत इत्यग्रेऽन्वितम् ॥ ननु धूमव्यापकवह्निसमानाधिकरणधूमसमानाधिकरणरासभवान्पर्वत इति ज्ञानसत्त्वेपि धूमे व्यभिचारज्ञानानुदयात्तस्यापि व्यभिचारधीविरोधित्वमतस्तज्जन्यानुव्यवसायेऽतिव्याप्तिरत आह तथाविधेति। वह्निव्याप्येत्यर्थः । न तथा न पक्षधर्मांशे व्यभिचारधीविरोधि । तथा च तदवच्छिन्नविशेष्यकव्यभिचारधीविरोधिविषयप्रकारकतदवच्छिन्नवत्ताज्ञानजन्यत्वमर्थः । प्रागुक्तबुद्धिस्तु न रासभत्वावच्छिन्नविशेष्यकव्यभिचारज्ञानस्य विरोधिनी । धूमत्वावच्छिन्नव्यभिचारधीविरोधित्वेपि न तस्य पक्षधर्मतया भानमतो न दोष इति भावः । नव्यास्तु ननु धूमव्यापकवह्निसामानाधिकरण्यमात्र-

चारग्रहात् । व्यतिरेकसहचारेणान्वयव्याप्तिग्रहणाश्रयणाद्वा । न

न्वयव्याप्तिस्तस्याश्च न व्यभिचारधीविरोधित्वं धूमव्यापकवह्नि-समानाधिकरणो रासभ इति ग्रहेपि रासभो वह्निव्यभिचारीति प्रत्यया-त्तत्कथं व्यभिचारधीविरोधिधीविषयत्वेन तदनुगम इत्यत उक्तम् तथाविधेति तथाविधं धूमव्यापकवह्निनिरूपितं धूमनिष्ठं समानाधिकरण्यं न तथा न व्याप्तिः रासभादौ पक्षवृत्तिरासभादौ [व्याप्तिग्रहेपि] व्यभिचारग्रहादनुमित्यात्मककार्यस्यान्वयव्यभिचारग्रहात् तथा चैतदर्थमेव धूमव्यापकवह्निसमानाधिकरणधूमत्वपर्यन्तं प्रागुक्तमिति भाव इति प्राहुः ॥ ननु साध्यसामानाधिकरण्यस्यापि व्यभिचारधी-विरोधिधीविषयतया तत्प्रकारकस्य वह्निसमानाधिकरणधूमवान्पर्वत इति ज्ञानस्य जन्ये तदनुव्यवसायादावतिव्याप्तिः यादृशविशिष्टविष-यकत्वेन व्यभिचारज्ञानविरोधित्वं तत्प्रकारकत्वोक्तौ चान्वय-व्याप्त्यसंग्रहः केवलं धूमव्यापको वह्निरिति ग्रहेपि धूमो वह्निव्य-भिचारीति ज्ञानानुदयेन धूमत्वविशिष्टे वह्निव्यभिचारग्रहं प्रति वह्नौ धूमव्यापकतानिश्चयत्वेनैव प्रतिबन्धकत्वौच्ये व्याप्तिनिश्चय-त्वेन पृथक् प्रतिबन्धकत्वाकल्पनात् वस्तुतः समानाकारस्यैव ज्ञानस्य प्रतिबन्धकतया द्वयोरपि व्याप्तिबुद्ध्योर्व्यभिचारधीप्रतिबन्ध-कत्वाभावादनुगमासम्भवः न च व्यभिचारधीपदेनान्वयव्याप्ते-र्व्यतिरेकव्याप्तेश्चाभावविषयकज्ञानविशेषमुपादाय तद्बुद्धिप्रति-बन्धकतावच्छेदकप्रकारितात्वेनान्वयव्यतिरेकव्याप्तेः प्रकारिताद्वय-मनुगमय्य तादृशप्रकारितावच्छिन्नपक्षधर्मताज्ञानजन्यत्वमर्थे इति वाच्यम् धूमो वह्निव्याप्यो नेति बुद्धावधिकरणं न धूमीयमित्यादि-ज्ञानस्यापि विरोधितया निर्धूम[धूम]वान्पर्वत इत्यादिज्ञानस्यापि निरुक्तरूपवत्तया तज्जन्यानुव्यवसायादावतिव्याप्तेः प्रतिबन्धक-तावच्छेदकादिभेदेन प्रतिबन्धकत्वस्य भेदादेवमप्यनुगमस्य कर्तु-मशक्यत्वाच्चेत्यस्वरसादाह व्यतिरेकेति । तथा च व्यतिरेकव्या-प्तिज्ञानं हेतुरेव न । कुतस्तज्जन्यानुमितावव्याप्तिरिति भावः । स्वयं व्यतिरेकपरामर्शजन्यबुद्धेरर्थापत्तित्वोपगमादाश्रयणादित्युक्तम् । आचार्यैराश्रयणादिति तदर्थः ॥ [अथ स्थाणुत्ववत्त्वयं न स्थाणुः स्थाणुर्न वेत्यादिभ्रमसंशयोत्तरं स्थाणुत्वव्याप्यवक्रकोटरादिमान-

च भ्रमसंशयोत्तरप्रत्यक्षं प्रति विशेषदर्शनस्य हेतुतामते तत्रा-

---

यमित्यादिविशेषदर्शनजन्ये अयं स्थाणुरित्यादिप्रत्यक्षेऽतिव्याप्तिः व्याप्तिविशिष्टपक्षधर्मत्वज्ञानजन्यत्वस्यापि तत्र सत्त्वादित्याशङ्कते न चेति ।]भ्रमसंशयेति । यद्यपि स्वमतेपि विशेषणज्ञानत्वेनोपनयविधया च विशेषदर्शनस्य [भ्रम]संशयोत्तरप्रत्यक्षे हेतुत्वाद्धेतुतामत इत्यसंगतम् तथापि प्रत्यक्षादिज्ञानस्यापि कालोपाधिविधया परामर्शजन्यत्वात्तद्वारणार्थमेवावश्यं किंचिद्विशेष्यकत्वावच्छिन्नं पक्षीभूतपर्वतादिविशेष्यकत्वावच्छिन्नं वा परामर्शजन्यत्वमेव लक्षणे निवेश्यम् तथा च तत्तत्प्रकारकबुद्धित्वावच्छिन्नं प्रत्येव तत्तद्विशेषणज्ञानत्वादिना हेतुत्वात्तत्तद्विशेषणज्ञानादिजन्यतायाः किंचिद्विशेष्यकत्वानवच्छिन्नत्वान्न तामादाय दोषः । किं तु संशयोत्तरप्रत्यक्षत्वावच्छिन्नजन्यतामादायैव । तादृशजन्यतायां धर्म्यन्तर्भावस्यावश्यकत्वादिति भावः । यत्तु कालोपाधिविधया परामर्शजन्यतामादाय प्रत्यक्षादावतिव्याप्तिं निराकर्तुं प्रमितिविभाजकोपाध्यवच्छिन्नमेव परामर्शजन्यत्वं लक्षणे निवेश्यम् तादृशं च न विशेषणज्ञानजन्यत्वं विशिष्टबुद्धित्वेनैव तदवच्छेदनादतो हेतुतामत इत्युक्तम् न च तथापि तदलौकिकप्रत्यक्षं तत्प्रकारकप्रत्यक्षं प्रत्येव वा तद्विषयकज्ञानत्वेन हेतुत्वात् व्याप्त्यापुपनयजन्यतामादाय स्वमतेपि संशयोत्तरप्रत्यक्षेतिव्याप्त्या हेतुतामत इत्यसंगतमेवेति वाच्यम् तादृशहेतुतायां मानाभावात् अप्रसिद्धसाध्यकानुमितेः साध्यविशेषणकत्ववारणाय तत्प्रकारकानुभवत्वावच्छिन्नं प्रत्येव तद्विषयकज्ञानत्वेन हेतुत्वावश्यकत्वे तत एवोपनीतप्रत्यक्षसंभवादिति मतम् तच्चिन्त्यम् । एतावतापि भावस्य स्थाणुत्वादेरलौकिकप्रत्यक्षत्वावच्छिन्नं प्रत्येव तद्गोचरज्ञानत्वेन हेतुतायां बाधकाभावात् । तदुपनीतभानात्मके संशयोत्तरप्रत्यक्षे स्वमतेऽप्यतिव्याप्तिसम्भवात् । अभावसाध्यकानुमितेरेवाप्रसिद्धसाध्यकत्वेनाभावप्रकारकानुभवत्वावच्छिन्नं प्रत्येव तद्गोचरज्ञानत्वेन हेतुत्वस्य कल्पत्वात् । प्रसिद्धसाध्यकपरामर्शस्य साध्यविशेष्यकानुमितिं प्रत्येव हेतुत्वात्ततः साध्यविशेषणकानुमितेरसम्भवाच्चेति ध्येयम् । अत्र संशयोत्तरप्रत्यक्षे विशेषदर्शनस्य हेतुत्वे मानाभावः विशिष्टबुद्धिसामान्यासामग्रीत एवसंशयाद्युत्तरप्रत्यक्षस्यापि संभवात् एककोः

तिव्याप्तिः । तथाविधनिश्चयत्वेन हेतुतायां विवक्षितत्वात् ।

टिविशेषदर्शनस्यापरकोटिविशिष्टधीप्रतिबन्धकतयोपयोगात् न चैवं तदीयसंशयोत्तरप्रत्यक्षं प्रति तदीयविशेषदर्शनस्याहेतुत्वे संशयोत्तरं विशेषदर्शनोत्पत्तिदशायामपि तद्वत्ताप्रत्यक्षस्योत्पत्तिः स्यादिति वाच्यम् इष्टत्वात् क्षणविलम्बस्य शपथनिर्णेतव्यत्वात् [न च यद्विव्याप्यधूमवत्तानिश्चयोत्तरं पर्वतधर्मिकवह्निविधेयकत्वावच्छिन्नं प्रत्येव वह्निव्याप्यधूमवत्पर्वतनिश्चयत्वेन हेतुत्वमुच्यतां लाघवान्न तु ताहशानुमितित्वावच्छिन्नं प्रति हेतुत्वं गौरवात् स्वीक्रियतां च ताहशविधेयताकत्वमनुमितावेव भ्रमसंशयोत्तरनिश्चयात्मकप्रत्यक्षेपीति तेनैव विशेषदर्शनोत्पत्तिकाले संशयोत्तरप्रत्यक्षवारणं संभवतीति वाच्यम् अनुमितावेव पक्षनिष्ठविशेष्यतानिरूपितसाध्यप्रकारतानतिरिक्तस्य विधेयत्वस्य सर्वानुभवसिद्धतया निरस्यतया प्रत्यक्षे तस्य शङ्कानास्पदत्वादिति भावः] किं च भ्रमसंशयौ तद्धर्मिकतद्विपरीतज्ञानत्वेनानुगमय्य ताहशज्ञानाव्यवहितोत्तरतद्धर्मिकतत्प्रकारकनिश्चयात्मकप्रत्यक्षत्वावच्छिन्नं प्रत्येव तद्धर्मिकतद्व्याप्यदर्शनस्य हेतुत्वं वाच्यम् अन्यथा व्यभिचारात् न चेदं युक्तम् अव्यवहितोत्तरत्वस्य स्वत्वादिगर्भत्वेन अननुगतत्वात् विशिष्टबुद्धिसामान्यं प्रत्येव विपरीतनिर्णयस्य प्रतिबन्धकतया बाधभ्रमसत्त्वे तद्वत्ताप्रत्यक्षस्य विशेषदर्शनसहस्रेणाप्यसंभवात् निश्चयत्वस्यार्थलाभाजग्रस्तत्वेन कार्यतावच्छेदकत्वासंभवाच्च न च तद्धर्मिकतद्वत्तावधारणात्मकप्रत्यक्षं प्रत्येव तद्धर्मिकतद्व्याप्यदर्शनस्य हेतुत्वम् नियमविषयकत्वस्यावधारणत्वस्य सर्वत्र संशयोत्तरप्रत्यक्षेऽसंभवात् तस्याप्यर्थसमाजग्रस्ततया कार्यतानवच्छेदकत्वाच्च विषयितावि शेषस्यावधारणत्वस्य च मानाभावेन निरस्तत्वादित्याशयेन हेतुतामत इत्युक्ताऽस्वरसो व्यञ्जितः ॥ तथाविधनिश्चयत्वेनेति । पक्षधर्मिकव्याप्यवत्तानिश्चयत्वमात्रेणेत्यर्थः । न च तत्तदप्रामाण्यज्ञानानास्कन्दितत्वस्यापि कारणतावच्छेदके प्रवेशात्तन्मात्राभिधानमयुक्तमिति वाच्यम् परामर्शधर्मिकतत्तदप्रामाण्यज्ञानाभावस्य स्वातन्त्र्येणैवानुमितिहेतुत्वात् अन्यथा विशेष्यविशेषणभावभेदेन गुरुतरानन्तकार्यकारणभावप्रसङ्गात् । गृह्यमाणाप्रामाण्यकस्यैकस्य परामर्शस्योत्तरमन्यपरामर्शात्

विशेषदर्शनस्य च भ्रमादिविरोधित्वेन तत्त्वमित्युक्तत्वात् । अत

क्षणविलम्बेनैवानुमितेः स्वीकारात । तदुत्तरपरामर्शाभावविशिष्टतत्तद्प्रामाण्यज्ञानत्वावच्छिन्नाभावत्वेनैव वा हेतुत्वस्य वक्तव्यत्वादिति भावः । [के चित्तु भ्रमेत्यादि तथाविधनिश्चयत्वेनेत्यन्तमेक एव ग्रन्थः तेन विशेषदर्शनस्य विशेषणज्ञानविधया कुत्र चिज्जनकत्वेपि हेतुतामत इत्यस्य नासङ्गतिरित्याहुः ॥ ननु निश्चयत्वेन हेतुत्वविवक्षणेप्यतिव्याप्तितादवस्थ्यम् तद्विशेषदर्शनस्यापि तद्व्याप्यवत्तानिश्चयत्वाद्त आह । विशेषदर्शनस्य चेति । तथा च विशेषदर्शनस्य भ्रमादिविरोधित्वेन कारणत्वम् । अनुमितौ तु व्याप्यवत्तानिश्चयत्वेनातो वैलक्षण्यमिति भावः ।] भ्रमादीति । अन्यथा तमसि घटसंशयोत्तरं विनापि व्याप्यदर्शनमालोकसंयोगमात्रात् घटनिर्णयो न स्यादिति भावः । तत्त्वं हेतुत्वम । [व्याप्यप्रकारकज्ञान]व्यावर्तकधर्मदर्शनव्यञ्जकधर्मदर्शनालोकसंयोगादिसाधारणं भ्रमादिविरोधित्वमप्येकं दुर्वचमित्याशयेनोक्तत्वादिति । वस्तुतस्तदपि वचनमात्रं न तु दोषखण्डियपीतत्वाभावव्याप्यदर्शनव्यावृत्तं सम्भवतीति भावः । यद्यपि वह्निव्याप्यवत्तानिश्चयत्वघटकदलद्वयस्य विशेषणविशेष्यभावेन गुरुतरकार्यकारणभावद्वयकल्पनामपेक्ष्य तत्पक्षकतत्साध्यकानुमितिं प्रति तद्विशेष्यकतद्व्याप्याभावप्रकारकज्ञानत्वेन प्रतिबन्धकतायां एव लाघवेन कल्पनात् व्याप्यसंशयतोनुमित्यनुत्पत्तिसम्भवात् व्याप्यवत्तानिश्चयत्वेनानुमितौ हेतुत्वम् किं तु व्याप्यप्रकारकज्ञानत्वमात्रेण तत्र च भ्रमत्वज्ञानानास्कन्दितत्वमेवापेक्षितम् न तु तन्निश्चयानास्कन्दितत्वम् संशयसाधारणस्य व्याप्यवत्ताज्ञानस्य क्वचिदप्यनुमित्यनुपधायकत्वात् व्याप्याभावप्रकारकत्वेन प्रतिबन्धकतायामपि न भ्रमत्वनिश्चयानास्कन्दितत्वस्य भ्रमत्वज्ञानानास्कन्दितत्वस्य वा निवेशो भ्रमत्वनिश्चयास्कन्दिताद्व्याप्याभावसंशयादप्यनुमित्यापत्तेः यत्र च व्याप्याभावस्य भ्रमात्संशयाद्ज्ञानन्तरं व्याप्यपरामर्शस्तत्र भ्रमादेर्नाशोत्तरमेवानुमितिः गुरुतरं व्याप्यनिश्चयत्वेन हेतुत्वमपेक्ष्य क्षणविलम्बकल्पनाया न्याय्यत्वात् । तथापि व्याप्यतद्भावसमुच्चयात्मकपरामर्शादनुमित्युत्पत्तये व्याप्याभावप्रकारकत्वानधच्छि-

एव लिङ्गवत्त्वादिलक्षणातिदेशवाक्यार्थज्ञानजन्योपस्थितौ नातिव्याप्तिः । तथाविधवाक्यार्थप्रतिसन्धानत्वेन तस्य हेतुत्वात् । न चोपनयार्थज्ञानजन्यन्यायार्थज्ञाने तच्छब्देन संकेतितशब्दान्तरेण

नव्याप्यप्रकारकत्वावच्छिन्नपक्षनिष्ठविशेष्यताकज्ञानत्वरूपं पक्षधर्मिकव्याप्यवत्तानिश्चयत्वं गुरुतरमपि [[1]हेतुतावच्छेदकीकृतमिति प्राञ्चः । नव्यास्तु व्याप्यप्रकारत्वान्यप्रकारत्वानवच्छिन्नपक्षनिष्ठविशेष्यताकज्ञानत्वमेव पक्षधर्मिकव्याप्यवत्तानिश्चयत्वं वाच्यम् अतस्ताद्रूप्येण हेतुतायां न विनिगमनाविरहावकाशः पक्षः साध्यव्याप्यवान्न वेत्यादिसंशस्य व्याप्यप्रकारतानिरूपितं यत्पक्षनिष्ठविशेष्यत्वं तदेव व्याप्यप्रकारताभिन्नेन व्याप्याभावप्रकारत्वेनावच्छिन्नमतस्तादृशसंशयादनुमित्यनुत्पादः संशयमात्रस्यैव प्रकारताद्वयनिरूपितैकविशेष्यत्वात् अत एव लीलावतीप्रकाशेऽपि विरोधिनानारूपावच्छिन्नविषयताप्रतियोगिज्ञानं संशयः समूहालम्बने तु विरोधिप्रत्येकप्रकारतावच्छिन्ना विभिन्नैव विशेष्यता न तु विरोधिनानारूपनिरूपितैकेति संशयग्रन्थे स्फुटमभिहितमिति प्राहुः ॥ अत एवेति । तादृशनिश्चयत्वेन हेतुत्वस्य लक्षणघटकत्वादेवेत्यर्थः । लिङ्गवत्त्वेति । लिङ्गं व्याप्यम् । तथा च व्याप्यवत्त्वरूपो योऽतिदेशवाक्यार्थः तस्य यज्ज्ञानं वह्निव्याप्यधूमवत्पर्वतसदृशं चत्वरपदवाच्यमित्याकारकं तज्जन्यायामिदं चत्वरपदवाच्यमित्याकारोपमितावित्यर्थः ॥ तथाविधेति । तादृशो योऽतिदेशवाक्यार्थः सादृश्यं तत्प्रतिसन्धानत्वेनेत्यर्थः । न तु वाक्यार्थत्वस्यापि प्रवेशो गौरवान्मानाभावच्चेति ध्येयम् ॥ न चेति । वाच्यमिति परेणान्वयः । न्यायार्थेति चिन्तामणिकृतां मते । तैः पञ्चावयवजन्यविशिष्टबुद्धिस्वीकारात् । स्वमते तूपनयार्थविशेष्यकनिगमनार्थप्रकारकबोधेऽतिप्रसङ्गो द्रष्टव्यः । ननु वह्निव्याप्यधूमवानयमित्युपनयार्थज्ञानं न पक्षे व्याप्तिविशिष्टप्रकारकं मतुबर्थस्य वह्निव्याप्यधूमसम्बन्धिन एव तादात्म्येन तत्र प्रकारत्वात् लक्षणघटकं च तादृशमेव ज्ञानमतो नातिव्याप्तिः तथा चायमित्यादिप्रयोगस्तु न सर्वसम्मत इत्यत आह

---

(१) इतः प्रभृति ३७ पृष्ठे १६ पङ्क्तिस्थ 'केचित्तु विशिष्टवैशिष्ट्य' इत्यन्तो ग्रन्थ एकस्मिन् पुस्तके लेखकमौर्ख्याद्भ्रष्टः ।

वा व्याप्त्यादिविशिष्टोपस्थितिद्वारा जनिते शाब्दबोधेतिव्याप्ति-र्दुर्वृत्पादयिष्यते हि महावाक्यार्थज्ञानस्यावान्तरवाक्यार्थज्ञानजन्य-त्वम् तदादेश्च विशेषरूपेणोपस्थापकत्वमिति वाच्यम्। तत्रातिरि-क्तस्य पदजन्यत्वस्य कारणतावच्छेदकेऽनुप्रवेशात् । निश्चय-

---

तच्छब्देनेति । ननु यत्र सोऽस्तीत्यादिवाक्यात् वह्निव्याप्यधूमवत्प-र्वतोऽस्तीत्यादिधीस्तत्रैवकारश्रव इव व्याप्त्यादिघटकीभूतप्रत्येकप-दार्थ एव तच्छब्दशक्तिज्ञानात्प्रत्येकपदार्थोपस्थित्या परस्परमन्वय-बोधो न त्वाहत्यैव तत्पदात् व्याप्यवत्पर्वतस्योपस्थितिरतो नातिव्या-प्तिरित्येवं यदि ब्रूयात्तदाप्याह संकेतितेति। यत्र वह्निव्याप्यधूमवत्पर्वत एव डित्यादिपदस्य संकेतग्रहः, प्रथमं जातः तत्र डित्थोऽस्तीत्यादिवा-क्यजन्ये वह्निव्याप्यधूमवत्पर्वतोऽस्तीत्याकारकशाब्दबोधेऽतिव्याप्तिरि-त्यर्थः । शब्दान्तरे निरुक्तव्युत्पत्तेरसत्त्वादिति भावः । ननु उपनयार्थज्ञानं न न्यायार्थबुद्धौ हेतुस्तद्धवकप्रत्येकपदजन्यपदार्थस्मृतेर्महावाक्यार्थ-ज्ञानपर्यन्तमसत्त्वेनावान्तरवाक्यार्थबोधस्य महावाक्यार्थबुद्धावहेतु-त्वा[त्त]त्कथं तत्रातिव्याप्तिरत आह व्युत्पादयिष्यत इति। पदजन्यप-दार्थस्मृतिमात्रं नान्वयबोधहेतुः। किं तु पदप्रयोज्यं पदार्थधीमात्रम। तच्चावान्तरवाक्यार्थबोधमादायैव तावत्पर्यन्तमस्तीति भावः । ननु तच्छब्दाद्बुद्धिस्थत्वेनैव पदार्थोपस्थितिरतः सोऽस्तीत्यादिवाक्यज-न्यबोधे कथमतिव्याप्तिरुक्तेत्यत आह तदादेश्चेति । व्युत्पादयिष्यत इति पूर्वेणान्वयः ॥ व्याप्यवत्त्वादेः संस्कार इव स्मरणेऽप्युपेक्षाण्यतद्धर्मा-निश्चयत्वेन हेतुत्वस्य प्रामाणिकत्वे तत्रातिव्याप्तिवारणाय तथा-विधनिश्चयत्वमात्रावच्छिन्नहेतुत्वं लक्षणे निवेश्यमित्याशयेनाह तत्रा-तिरिक्तस्येति । पदजन्यत्वस्येति । कारणत्वादिसंबन्धेन [घटादि]-पदादुपस्थितस्याप्याकाङ्क्षादेः शाब्दबोधानुत्पत्त्या वृत्त्या पदजन्यत-दुपस्थितित्वेनैव तच्छाब्दबोधं प्रति हेतुत्वादित्यर्थः ॥ ननु चरमज्ञान-पदस्यानुभवपरत्वेनैव स्मृतेर्वारणसम्भवात्तथाविधनिश्चयत्वमात्रेण हेतुत्वं न लक्षणे प्रवेश्यम् किं तु तादृशनिश्चयत्वेन हेतुत्वमेवा-

---

(१) 'यद्वा ननु ज्ञानपद' इति क्वचित्पाठः । तस्मिन् पुस्तके 'नातिव्याप्तिरिति भावः' (३६ पृष्ठे १३ पङ्क्तौ) इति ग्रन्थानन्तरमयं ग्रन्थः 'इत्यपि बोध्यम्' (३६पृष्ठे १० पङ्क्तौ) इत्यस्यभावश्च ।

त्वस्याप्रवेशाच्च । न च तथापि तत्तद्विशिष्टवैशिष्ट्यज्ञानं प्रति तत्तद्विशेषणतावच्छेदकप्रकारकनिश्चयत्वेन हेतुत्वात्तादृशशाब्दबोधे प्रत्यक्षे चातिव्याप्तिः दण्डो रक्तो न वेति संशये रक्तदण्डवानयमि-

---

न्यथानुमितावपि भ्रमत्वज्ञानानास्कन्दितव्याप्यवत्तानिश्चयत्वेनैव हेतुत्वादसंभवापत्तेस्तत्कुतः शाब्दधीवारणमत आह निश्चयत्वस्येति। ननु तच्छाब्दबोधे तदर्थकपदज्ञानत्वेनैव हेतुत्वं तत्र च वृत्त्या स्वजन्यपदार्थोपस्थितेः कारणताघटकप्रत्यासत्तित्वादेवोक्तातिप्रसङ्गनिराससंभवे पदार्थोपस्थितिहेतुतायां न पदजन्यत्वप्रवेशो मानाभावादित्यतिव्याप्तितादवस्थ्यमत आह निश्चयत्वस्येतीत्यपि कश्चित् । स्मृतिशाब्दरूपाया एव पदार्थोपस्थितेर्व्यापारत्वात् [तस्याश्च निश्चयत्वनियमात्] शाब्दबोधे पदार्थस्मृतित्वेन वृत्तिज्ञानजन्यपदार्थोपस्थितित्वेनैव[वा] हेतुत्वं न तु निश्चयत्वेनेति नातिव्याप्तिरिति भावः ॥ न चेति। वाच्यमिति परेणान्वयः। तथापि पदार्थोपस्थितिजन्यतयातिव्याप्तेर्निरासेपि । अत्र च घटवदित्यादिविशिष्टवैशिष्ट्यबुद्धौ न घटत्वादिनिश्चयत्वेन हेतुत्वं किं तु घटत्वादिप्रकारकज्ञानत्वमात्रेणाय घटो न वेति संशयोत्तरमपि तादृशबुद्ध्युत्पादात् किं तु यत्र विशेषणतावच्छेदकांशे धर्मितावच्छेदकतया किंचिद्भासते तत्रैव तत्प्रकारकनिश्चयत्वेन हेतुत्वम् यथा नीलघटवदित्यादौ वटत्वाविशिष्टविशेष्यकनीलनिश्चयत्वेन [हेतुत्वम्] इत्यावेदयितुं तत्तदित्यभिहितमिति ध्येयम् । वस्तुतः पर्वतो वह्निव्याप्यधूमवान्न वेति संशयदशायां वह्निव्याप्यधूमवत्पर्वतत्वावच्छिन्नप्रकारताकस्येव तादृश[विशिष्ट]पर्वतत्वावच्छिन्नविशेष्यताकस्यापि ज्ञानस्यानुत्पादादुभयत्रैव पर्वतविशेष्यकवह्निव्याप्यधूमवत्तानिश्चयत्वेन हेतुत्वम् । जन्यता तु वह्निव्याप्यधूमवत्पर्वतत्वावच्छिन्नविषयताकज्ञानत्वेनैव बोध्या विशेष्यत्वप्रकारत्वयोर्द्वयोरपि तादृश [ज्ञानविषयताक]त्वादेवं च विशिष्टस्य वैशिष्ट्यबुद्धौ [एक]विशिष्टेऽपरवैशिष्ट्यमिति बुद्धौ चोभयत्रापि विशेषणतावच्छेदकप्रकारकनिश्चयत्वेन हेतुत्वमित्यावेदयितुं तत्तदित्यभिहितमिति ध्येयम् । विशेष्ये विशेषणं तत्रापि च विशेणान्तरमित्यादिज्ञानस्यापि विशिष्टवैशिष्ट्यज्ञानतया तत्र विशेषणतावच्छेदकप्रकारकनिश्चयस्य हेतुत्वासम्भवात् तत्तदित्युक्तमित्यपि केचित् । खले

त्तिज्ञानानुदयादितिवाच्यम्। ज्ञानोपरमेपि विशिष्टविषयोपधाने-

कपोतन्यायेनैव शाब्दधीरिति मते तादृशप्रत्यक्षं प्रत्येव विशेषणतावच्छेदकप्रकारकनिश्चयस्य हेतुत्वं शाब्दादेस्तादृशविषयतायाः पदार्थोपस्थित्यादेरेव नियामकत्वसम्भवादिति मते वा न शाब्दादावतिव्याप्तिरतः प्रत्यक्षे चेत्युक्तम्। ननु विशिष्टवैशिष्ट्यबुद्धौ विशेषणतावच्छेदकप्रकारज्ञानत्वेनैव हेतुत्वम् न तु निश्चयत्वेन गौरवात्तत्कृतोऽतिव्याप्तिरत आह दण्डो रक्तो न वेति। तादृशसंशयानुव्यवसायस्तु रक्तत्वेन दण्डं संदेहात्मकारो रक्तत्वतदभावप्रकारकदण्डविशेष्यकज्ञानवत्त्वावगाही न तु रक्तत्वविशिष्टदण्डज्ञानावगाही। रक्तदण्डं संदेहात्मनुव्यवसायस्तु रक्तदण्डकोटिकस्य तादृशधर्मिकस्यैव संशयस्य। न तु दण्डधर्मिकरक्तत्वसंशयस्य। तदीयत्वे वा विशेष्ये विशेषणमिति न्यायेनैव। न चैवं दण्डो रक्तो न वेति संशयानन्तरमयं रक्तदण्डवान्न वेत्यौचित्या वर्जितः संशयो न स्यादिति वाच्यम्। इष्टत्वात्। सत्त्वे वा तस्यापि विशेष्ये विशेषणमित्यादिरीत्यैव स्वीकारात्।] के चित्तु विशिष्टवैशिष्ट्यविषयताकस्याप्युक्तसंशयस्यानुभवसिद्धतया विशेषणतावच्छेदकप्रकारकज्ञानत्वेनैव तादृशबोधहेतुत्वं न तु तादृशनिश्चयत्वेन व्यभिचाराद्गौरवाच्च न च संशयसाधारणज्ञान[मात्र]स्याप्रामाण्यानिश्चया[ना]स्कन्दितस्यैव कार्यजनकतया तत्तद्प्रामाण्यनिश्चयत्वावच्छिन्नाभावत्वेन हेतुत्वे गौरवमिति वाच्यम् सर्वत्रैवाप्रमाण्यज्ञानस्यानुगतरूपेण तद्विरोधित्वस्य दुर्वचत्वेनाप्रामाण्यनिश्चयानां तत्तद्व्यक्तित्वावच्छिन्नाभावत्वेन हेतुतया गौरवानवकाशात् [विशेषणतावच्छेदक]प्रकारकनिश्चयत्वेन हेतुत्वपक्षे एव तदप्रमाण्यज्ञानमात्रस्य कार्यविरोधितया तत्तद्प्रमाण्यनिश्चयव्य[क्तीनामिव तदप्रमाण्यसंशयव्य]क्तीनामप्यभाव[कूट]स्य तत्तद्व्यक्तित्वेनैव विशिष्टवैशिष्ट्यधीहेतुत्वकल्पनायां विपरीतगौरवापत्तेरित्याहुः॥ विशिष्टेति। घटत्वादिविशिष्टो यो विषयस्तद्विषयकत्वेनेत्यर्थः। तथा च विनश्यदवस्थज्ञानजनितयोरिच्छाद्वेषयोर्घटमिच्छामि घटं द्वेष्मीत्यादिविशिष्टवैशिष्ट्यप्रत्यक्षे व्यभिचाराज्ज्ञानत्वं तदीयकारणतावच्छेदके[२] निविष्टमिति

---

(२) 'प्रत्युत निश्च' (१) 'नित्यज्ञानज'

नेच्छाद्वेषयोः कृतेश्च साक्षात्काराद्विशेषणविषयकाद्विशिष्टसंस्कारादेव विशिष्टस्मरणाच्च तद्विषयकगुणानां तत्र हेतुत्वेन

भावः । तेनाविनश्यदवस्थज्ञानजनितेच्छादेरिच्छात्वाद्यंशे निर्विकल्पकप्रत्यक्षस्य तज्जनकज्ञानादिच्छात्वादिप्रकारेण तादृशेच्छादेर्द्वितीयसाक्षात्कारस्य च प्रागुपनीतघटादिविषयकेच्छात्वादिनिर्विकल्पकादेव सम्भवात्तादृशस्थले व्यभिचारासम्भवेपि न क्षतिः । ननु ज्ञानस्येच्छाद्वेषौ प्रति कार्यसहभावेन हेतुत्वमते विनश्यदवस्थज्ञानेन तयोरजननात् कस्य प्रत्यक्षे व्यभिचार इत्यतः स्थलान्तरमाह कृतेश्चेति । न च कृतिसाक्षात्कार एव विषयोपनीतभानार्थं विषयस्मृतेरावश्यकत्वान्न व्यभिचारः । सप्रकारकतद्विषयकत्वेनेच्छादिसाधारणेनैव तद्विषयकालौकिकप्रत्यक्षेपि हेतुत्वादिति भावः । ननु प्रत्यासत्ति[विषय]विधया विशिष्टविषयकस्मृतेरनपेक्षायामपि विशिष्टबुद्धौ विशेषणज्ञानस्य हेतुत्वानुरोधात्तदपेक्षावश्यकीति कुतो व्यभिचार इत्यत आह विशेषणविषयकादिति । तथा च विशिष्टबुद्धावपि न विशेषणज्ञानत्वेन हेतुत्वं स्मरणे व्यभिचारात्किं तु तद्विषयकत्वेनैव । तच्च कृत्यादिसाधारणमतो नैतदनुरोधेन [विषय]स्मृतेरावश्यकत्वमिति भावः । समानविषयकत्वेनैव संस्कारस्मृत्योः कार्यकारणभावाद्विशेषणविषयकसंस्कारात्कुतो विशिष्टस्मृतिरित्याशङ्कामपनेतुं विशिष्टसंस्कारादित्युक्तम् । तत्रेति।तत्तद्विशिष्टवैशिष्ट्यबोध इत्यर्थः । तथाच विशेषणतावच्छेदकीभूततत्तद्धर्माभावाप्रकारकतत्तद्धर्मप्रकारकत्वेन तत्तद्धर्मप्रकारत्वान्यप्रकारत्वानिरूपिततत्तद्विशेषणनिष्ठविशेष्यताकत्वेनैव वा तत्तद्विशिष्टवैशिष्ट्यबुद्धौ हेतुत्वाल्लक्षणे च तादृशप्रकारताकज्ञानत्वावच्छिन्नहेतुताया एव निवेशान्नातिव्याप्तिरिति भावः । यद्यपि विशेषणतावच्छेदकप्रकारतामात्रेण विशिष्टवैशिष्ट्यबुद्धिहेतुत्वे वह्निव्याप्यांशेऽनुद्बुद्धसंस्कारात्पर्वतेन्द्रियसंयोगदशायां वह्निव्याप्यधूमवान्पर्वत इत्याकारकविशिष्टवैशिष्ट्यप्रत्यक्षापत्तिः संस्कारात्मकस्यैव संनिकर्षस्य वह्निव्याप्यांशे सत्त्वात् धूमो वह्निव्याप्यो न वेत्याकारिकाया ज्ञानलक्षणप्रत्यासत्तेः सम्भवाच्च न चापाद्यतत्तत्प्रत्यक्षव्यक्तिविशेषान्प्रति तत्तद्बुद्धोधकस्य तत्तद्व्यक्तित्वेन हेतुत्वकल्पनात् तदभावादेव तादृशप्रत्यक्षापत्त्यसम्भवः तत्तत्प्रत्यक्षव्यक्ती-

न्यूनवृत्तिज्ञानत्वस्याप्रवेशात् । इच्छादितः संस्काराच्चानुमितेरनुदयात् । संस्काराद्यन्यत्वस्य गुरुतया ज्ञानत्वेनैव तत्र हेतुत्वात् । न च परामर्शानुव्यवसायेऽतिव्याप्तिः।सामान्यतः प्रत्यक्षे विषय-

---

नां पूर्वं स्मृतिव्यक्तीः कल्पयित्वा तत्तत्स्मृतौ तत्तदुद्बोधकव्यक्तित्वेन हेतुत्वकल्पनामपेक्ष्य तत्तत्प्रत्यक्षव्यक्तिष्वेव तत्तदुद्बोधकव्यक्तीनां हेतुत्वकल्पनायां लाघवादिति वाच्यम् [यतो] विशिष्टवैशिष्ट्यप्रत्यक्षव्यक्तीनां पूर्वं विशेषणतावच्छेदकप्रकारिकाः स्मृतिव्यक्तयोऽनुभवसिद्धास्तत्रत्यप्रत्यक्षव्यक्तीनां शाब्दानुमित्योर्द्यात्मकंविशेषणतावच्छेदकप्रकारकज्ञानैर्जनितप्रत्यक्षव्यक्तिनां चापाद्यत्वात् न हि तादृशप्रत्यक्षव्यक्तिष्वपि हेतुत्वमुद्बोधकव्यक्तीनां[कल्प्तं]येन तदभावादेव तादृशप्रत्यक्षानिरासः सम्भवति । तथापि विशेषणतावच्छेदकप्रकारकसंस्कारसत्त्वे यद्यद्बुद्धिदशायां विशिष्ट[वैशिष्ट्य]प्रत्यक्षं तत्तद्बुद्ध्यभावविशिष्ट[तादृश]संस्कारत्वेन विशिष्टवैशिष्ट्यबोधं प्रति प्रतिबन्धकत्वकल्पनाद्दोषः न च ज्ञानत्वस्य कारणतावच्छेदकत्वमेपेक्ष्योक्तप्रतिबन्धकत्वकल्पने गौरवम् । ज्ञानोपरमेऽपि विशिष्टविषयोपधानेन कृत्यादिसाक्षात्कारोत्पत्त्या व्यभिचारेण ज्ञानत्वस्याप्रवेशनियमेन तादृशप्रतिबध्यप्रतिबन्धकभावकल्पनागौरवस्य प्रामाणिकत्वादित्याशयः ॥ नन्वनुमितावपि व्याप्यभावाप्रकारकव्याप्यप्रकारकत्वमात्रेण हेतुत्वम् न तु ज्ञानत्वान्तर्भावेणेत्यसम्भव एवेत्यत आह इच्छादित इति । ननु साध्यव्याप्यवत्पक्षावगाहीच्छाद्वेषयोर्द्वितीयक्षणे प्रायशोनुमितिस्त्वयापि वाच्येच्छादिजनकस्य परामर्शात्मकज्ञानस्य पूर्वं सत्त्वात् कृत्युत्तरञ्च द्वित्रिक्षणेऽनुमित्यनुत्पादो निर्णेतुमशक्य इत्यतः स्फुटं व्यभिचारस्थलमाह संस्काराच्चेति ॥ संस्कारादीत्यादिपदादिच्छाद्वेषकृतीनां परिग्रहः । ज्ञानत्वेनैवेति । तदतन्भावेणैवेत्यर्थः । तत्र अनुमितौ ॥ न च परामर्शानुव्यवसायेऽतिव्याप्तिरिति । तथाविधनिश्चयत्वेन हेतुत्वस्य विवक्षितत्वादिति प्राक्तनो हेतुरनुषञ्जनीयः । सामान्यतो हीत्येव ग्रन्थे पाठः । तेन न चेत्यत्र हेत्वलाभेपि न क्षतिरिति ध्येयम् ॥ विषयत्वेनेति । साक्षात्करोमीति प्रतीतिसाक्षिकाविलक्षणाविषय-

---

(१) 'पुरुषवि' (२) 'त्यर्थवि'

(३) 'तत्तज्ज्ञानादेव तादृशनियमः संभवति'

त्वेन तत्तद्विषयकप्रत्यक्षे तत्त्वेन कदाचिज्ज्ञानादिप्रत्यक्षे ज्ञानत्वा-

---

त्वेनेत्यर्थः। तेनातीन्द्रियस्य गुरुत्वादृष्टादेः सत्यपीन्द्रियसंनिकर्षे न प्रत्यक्षम। न तु निर्विकल्पकविषयत्वेनेत्यर्थः। ज्ञानादेः सविकल्पकमात्रवेद्यत्वात्तत्प्रत्यक्षे व्यभिचारापत्तेः। अत्र च कारणस्य तादात्म्यं कार्यस्य तु लौकिकविषयत्वं प्रत्यासत्तिस्तेनातीतविषयकप्रत्यक्षेऽतीतविषयाणामहेतुत्वेपि न क्षतिः। ननु लौकिकविषयत्वस्यैकस्याभावात्कार्यतायच्छेदकसम्बन्धाननुगमात्कथमनुगतः कार्यकारणभावः लौकिकसन्निकर्षजन्यत्वादेरपि सन्निकर्षभेदेन नानात्वात् न च साक्षात्कारत्वनिरूपितविषयत्वमेव कार्यतावच्छेदकः सम्बन्धस्तादृशविषयतया च प्रत्यक्षं नातीतादावतो न व्यभिचार इति वाच्यम् शुक्तिरूप्यमृगतृष्णादिधर्मिकस्य तद्रजतमेवेदं तज्जलमेवेदमित्यादिप्रत्यक्षस्य दोषविशेषजन्यस्य तादृशविषयतासम्बन्धेनातीतरजतजलादावपि सत्त्वेन व्यभिचारात् तत्रापि तद्रजतं साक्षात्करोमीत्यनुभवात् न च तत्र तादृशविषयतांशे भ्रमः मानाभावात् साक्षात्कारत्वनिरूपितविषयतायाः लौकिकसन्निकर्षस्येव दोषविशेषस्यापि जन्यतावच्छेदकत्वप्रसक्तावेकशेषस्य कर्तुमशक्यत्वात् लौकिकस्येव दोषविशेषजन्यस्यापि रजतत्वप्रकारकप्रत्यक्षस्य रजतानयनगोचरप्रवृत्तिहेतुतयोपादानप्रत्यक्षनिष्ठप्रवृत्तिजनकतावच्छेदकत्वेन तादृशविषयतायाः लौकिकसंनिकर्षजन्यदोषविशेषजन्यप्रत्यक्षविशेषसाधारणत्वाच्च वस्तुतो विषयत्वस्य ज्ञानसमानकालीनतया निरुक्तविषयत्वावच्छिन्नस्य घटादेः प्रत्यक्षप्राक्कालेऽसत्त्वात् तादृशविषयत्वेन हेतुत्वं व्यभिचार्येव [तादृशविषयत्वाभाववद्वृत्ति धर्मवत्त्वेन हेतुत्वे न दोष] इत्यत आह तत्तद्विषयकेति। अत्र तत्तत्पदं विषये प्रत्यक्षे चोभयत्रान्वितम् तथा च तत्तद्विषयकत्वविशिष्टतत्तत्प्रत्यक्षव्यक्तित्वेन कार्यत्वम् तत्तद्विषयव्यक्तित्वेन हेतुत्वम् तत्र च कार्यस्य विषयता[मात्रं] कारणस्य तु तादात्म्यं प्रत्यासत्तिः न च तत्तद्विषयकत्वस्य कार्यतावच्छेदके प्रवेशो व्यर्थः तत्प्रत्यक्षव्यक्तेरेव विषयतासम्बन्धेनान्यत्रापि सत्त्वेन व्यभि-

---

(१) 'पांडा स' (२) 'विशिष्या'
(३) 'लौकिकालौकिकभानविशेषसाधारणत्वाच्च'

चारवारकत्वादिति भावः। ननु तत्तत्परामर्शव्यक्तिप्रत्यक्षे तत्तत्परामर्शव्यक्तित्वेन हेतुत्वे परामर्शप्रत्यक्षसामान्यं प्रत्यपि परामर्शत्वेन हेतुत्वमावश्यकं यद्विशेषयोरिति व्याप्तेस्तथा च तदनुव्यवसाये-ऽतिव्याप्तिरेवेत्यत आह क्वचिदिति। प्रमाणाभावात्तादृशी व्याप्तिरेव न। सती वा तत्तत्परामर्शत्वव्यापकीभूतज्ञानत्वादिधर्मावच्छिन्नकारणतामादायैव चरितार्था न परामर्शत्वेन हेतुत्वं व्यपस्थापयतीति भावः। यद्यपि विषयस्य प्रत्यक्षं प्रति हेतुत्वे मानाभावः न च घटादिविषयस्य नाशदशायामपि तदिन्द्रियसन्निकर्षसत्त्वात्तदुत्तरकालं तत्प्रत्यक्षापत्तिरिति वाच्यम् यदा यत्र यत्कार्यस्योत्पत्तिस्तदव्यवहितप्राक्क्षणे तत्र तत्कारणमिति व्याप्तेः कारणतासंपादकतया विषयनाशकालावच्छेदेन विषयसन्निकर्षात्मककारणविरहादेव तदसम्भवात् [न च यदा यद्वृत्तिकार्यस्योत्पादस्तदव्यवहितपूर्वं तद्वृत्तिकार्यस्य कारणमित्येव व्याप्तिः कारणताया ग्राहिकेति विनष्टविषयस्य प्रत्यक्षवारणार्थं विषयस्य हेतुत्वमावश्यकमिति वाच्यम्] कार्यकारणभावान्तरकल्पनागौरवेण घटीयरूपे चक्षुःसंयुक्तसमवायसत्त्वे विद्यमानस्यासन्निकृष्टरूपान्तरस्य प्रत्यक्षप्रसङ्गेन च तादृशव्याप्तेः प्रतिहतत्वात् न च शब्दप्रत्यक्षं प्रत्यवश्यं कर्णावच्छिन्नशब्दत्वेन विषयस्य हेतुत्वमन्यथा कर्णानवच्छिन्नस्यापि तस्य प्रत्यक्षापत्तेः श्रावच्छिन्नत्वप्रत्यासत्त्या कर्णस्य तत्र हेतुत्वे कर्णावच्छिन्नसंयोगादेरपि श्रावणप्रत्यक्षप्रसंगादिति वाच्यम् तावतापि ज्ञानादिसाक्षात्कारे विषयस्य हेतुत्वाप्राप्तेः। तथापि सत्यपीन्द्रियसन्निकर्षादौ सामान्यकारणे गुरुत्वाद्यतीन्द्रियपदार्थानामप्रत्यक्षतयाऽवश्यं विषयाणां विशेषतो हेतुत्वं वाच्यम्। तद्विरहादेव गुरुत्वादरतीन्द्रियत्वात्। यत्तु तेषामतीन्द्रियत्वानुरोधेन साक्षात्कारत्वनिरूपितविषयत्वेन [तादृशविषयतावदवृत्तिधर्मशून्यत्वेन वा] प्रत्यक्षसामान्यं प्रति हेतुत्वम् तत्र च लौकिकसन्निकर्षजन्यतावच्छेदकतया सिद्धस्य लौकिकत्वाख्यविषयताविशेषस्य कार्यतावच्छेदकसंबन्धत्वान्न व्यभिचारः धर्मविधयेव संबन्धविधयापि कार्यतावच्छेदक[त्व]सिद्धौ बाधकाभावान्नव्यमते कारणताया अतिरिक्तपदार्थत्वेन तदवच्छेदकोपलक्षितस्यैव पूर्वसत्त्वापेक्षणादिति वदन्ति। तन्मन्दम्। कार्यतावच्छेदकत्वे-

(१) 'गुरुत्वादिकमादाय तदकल्पनात्। के चित्तु'

दिना तद्धेतुत्वम् । न तु यावानेव तत्तदितरत्वादिर्विषयनिष्ठो धर्मः तेन तद्विषयत्वेन च कार्यकारणभावः । मैत्रावलोकितचैत्रनिर्मितनीलेतरघटतद्विषयकत्वादिना तत्त्वेऽनन्तकार्यकारणभावप्रसङ्गात् । मानाभावात् । अन्यथोपपत्तेश्च । अथ विशिष्टस्मरणे अतिव्याप्तिः न चोपेक्षान्यत्वेन तत्र हेतुत्वम् उपेक्षात्वं हि न जातिश्चाक्षुषत्वादिना संकरप्रसङ्गात्

न विषयत्वसिद्धावपसिद्धान्तात् । अन्यथा विशिष्टबुद्ध्यादौ विशेषणज्ञानादिजन्यत्वं विशिष्टबुद्धित्वादिना वह्न्यनुमितिं प्रति च वह्निव्याप्यवत्तानिश्चयत्वेन हेतुत्वं न स्यात् । [लाघवात्] विषयताविशेषस्यैव तादृशजन्यतावच्छेदकत्वौचित्यादिति दिक् ॥ तत्तादितरत्वादिरिति । व्याप्यप्रकारकत्वव्याप्याभावप्रकारकेतरत्वादित्यर्थः ॥ परामर्शत्वस्य विशेषणचतुष्टयघटितत्वात्तत्साम्यप्रदर्शनार्थं मैत्रावलोकितेत्यादिविशेषणचतुष्टयमुक्तम् । घटतद्विषयकत्वेति । द्वंद्वात्परस्य त्वप्रत्ययस्य प्रत्येकं संबन्धात्तादृशघटत्वेन हेतुत्वम् [तद्विषयकप्रत्यक्षसामान्या च]तद्विषयकप्रत्यक्षत्वेन च कार्यत्वमित्यर्थः ॥ इष्टापत्तौ बाधकमाह मानाभावादिति ॥ नन्वेतादृशकार्यान्यथानुपपत्तिरेव मानं भविष्यतीत्यत आह अन्यथेत्यादि । मैत्रावलोकनादिसामान्या द्रव्यप्रत्यक्षादिसामान्या च तादृशप्रत्यक्षस्योत्पत्तेरित्यर्थः । तथा चार्थसमाजग्रस्तत्वान्नोक्तरूपं कार्यतावच्छेदकमिति भावः । [अथेति ।] विशिष्टस्मरण इति । वह्निव्याप्यधूमवत्पर्वतस्मरण इत्यर्थः । संशयोत्तरं तदाकारस्मृत्यापत्तिभयेन स्मृतिजनकतायामपि निश्चयत्वप्रवेशादित्याशयः । यद्यपि [वह्नि]व्याप्यवत्तादिसंस्कारं प्रति व्याप्यवत्त्वनिश्चयत्वेन हेतुत्वात्तादृशसंस्कारानुत्पत्त्यैव व्याप्यवत्त्वादिसंशयान्न तद्गोचरस्मृतेः संभव इत्यनुभवस्य निश्चयत्वेन [स्मृति]हेतुतायां मानाभावान्न विशिष्टस्मृतावतिव्याप्तिसंभावना । तथापि व्यापारीभूतसंस्कारं प्रत्यनुभवस्य निश्चयत्वेन हेतुत्वे फलीभूतस्मृतिं प्रत्यपि तादृप्येण हेतुत्वमावश्यकम् फलव्यापारौ प्रत्येकरूपेणैव करणस्य हेतुत्वादिति प्राचीनमतेनेदम् । इदं तु चिन्त्यते

आंशिकत्वोपगमाच्च नापि प्रवृत्तिनिवृत्त्यजनकत्वमजिज्ञा-

धूमत्वपर्वतत्वादिरूपेण बाष्पवृक्षादिगोचरादपि वह्निपरामर्शात्पर्वतो वह्निमानित्यनुमित्युत्पादादनुमितिं प्रति वह्निव्याप्तिधूमत्वपर्वतत्वादिनिरूपितविशिष्टवैशिष्ट्यावगाहि[विषय]ताविशेषेणैव हेतुत्वं न तु धूमपर्वताद्यन्तर्भावेण व्यभिचारत् [पक्षसाध्ययोर्विशिष्य प्रवेशेपि हेतावतथात्वात्] स्मरणे तु धूमादिकमन्तर्भाव्यैव तथात्वमन्यथा धूमत्वेन बाष्पगोचरादप्यनुभवात्ताद्रूप्येण धूमस्मरणे[2] स्मृतेरगृहीतग्राहित्वप्रसङ्गात् अनुमितिजनकतावच्छेदकरूपेण स्मृतावहेतुत्वात्कथं तत्रातिव्याप्तिप्रसक्तिरिति । [आचार्यमते त्वयं दोषः तन्मते करणीभूतज्ञाने धूमत्वादिना यादृशवस्तुनो भानं फलेपि तथेति तु नव्याः] यत्तु ज्ञानपदस्य करणव्युत्पत्त्यभिप्रायेण शङ्कतेऽथेति विशिष्टस्य स्मरणं यत इति व्युत्पत्त्या विशिष्टसंस्कारेऽतिव्याप्तिरित्यर्थ इति तन्न । संस्कारानुत्पत्त्यैवेत्याद्यग्रिमग्रन्थविरोधापत्तेः। केचित्तु यादृशस्मृतौ वह्निव्याप्यधूमवत्तानिश्चयत्वेनानुगतरूपेणोद्बोधकविधया हेतुत्वं तादृशस्मृतावतिव्याप्तिरित्यर्थ इत्याहुः। तच्चित्यम्। उपेक्षान्यत्वेनेत्यादिग्रन्थस्य [व्याप्त्यविषयकत्वेनेत्यादिग्रन्थस्य च] विरोधापत्तेः। तत्र हेतुत्वमिति । स्मृतौ हेतुत्वमित्यर्थः। तथा च व्याप्यवत्तानिश्चयत्वमात्रावच्छिन्नहेतुत्वस्य लक्षणे प्रवेशान्न [विशिष्ट]स्मरणेऽतिव्याप्तिरिति भावः। [ननु] उपेक्षात्वं यद्येकं सुवचं स्यात्तदा तद्वदन्यत्वं स्मृतिजनकतावच्छेदकं भवेत् तदेव तु न संभवतीत्याशयेनाह उपेक्षात्वं हीति। संकरेति । चाक्षुषत्वं विहायोपेक्षात्वं तृणस्पार्शनादौ उपेक्षात्वं विहाय चाक्षुषत्वं कामिनीदर्शनादौ वर्तमानमेकत्र तृणचाक्षुषे संकीर्णमित्यर्थः। चाक्षुषत्वव्याप्यं नानैवोपेक्षात्वं निरुच्य तत्तद्भेदकूटमेव स्मृतिजनकतावच्छेदकं यदि ब्रूयात्तदाह आंशिकेति। [एकस्मिन्नेव ज्ञाने किंचिदंशे उपेक्षात्वस्य क्वचिदंशे तदभावस्यानुभवादित्यर्थः।] न च व्यक्तेरभेदस्तुल्यत्वमित्यादावनुक्तत्वादांशिकत्वं न जातिबाधकमिति वाच्यम् । रूपहानावसंबन्धे वा तदन्तर्भावादिति भावः। [सांकर्यघटकपरस्पराभाववद्रू-

---

(१) 'रासभ' (२) 'स्मरणप्रसङ्गात् [तथा च स्मृतेरगृहीतग्राहित्वेन प्रामाण्यापत्तेः]'

सितविषयत्वं वा तादृशादपि स्मृत्युत्पादात् नापि संस्काराजनकत्वम् तज्जनकतावच्छेदकरूपान्तरापरिचयात् अन्योन्याश्रयप्रसङ्गात् संस्कारानुत्पत्त्यैवास्मरणसम्भवे स्मृतिजनक-

---

त्तिताया आभावत्वं निरवच्छिन्नविशेषणतया ग्राह्यम्। तथा च सांकर्य एवांशिकत्वस्याप्यन्तर्भाव इति कश्चित्।] नापि प्रवृत्तीत्यादि। तथा च तद्गोचरप्रवृत्त्यजनकत्वे सति तद्गोचरनिवृत्त्यजनकं यत्तदन्यज्ञानत्वेन तद्गोचरस्मृतौ हेतुत्वम्। तद्गोचरप्रवृत्तिनिवृत्त्युभयजनकत्वेन तत्प्रत्येकजनकत्वेन वा तद्गोचरस्मृतिहेतुत्वे व्यभिचारादभावद्वयगर्भेतीति ध्येयम्। अजिज्ञासितेति। तथा च तत्प्रकारकस्मृतौ तद्धर्मव्याप्यधर्मप्रकारकजिज्ञासाया अजनकं यद्यत्तदन्यज्ञानत्वेन हेतुत्वम् व्याप्यधर्माणामननुगमात्तद्धर्मव्याप्यधर्मप्रकारकजिज्ञासाजनकज्ञानत्वमप्यननुगतमतस्तादृप्येण स्मृतिहेतुत्वासंभवाद्आपि निषेधद्वयगर्भतावश्यकीति भावः। तादृशादपीति। प्रवृत्त्याद्यजनकादपीत्यर्थः। नापि संस्कारात्। तथा च पर्वतधर्मिकव्याप्यवत्तास्मरणं प्रति तदाकारसंस्कारजनकज्ञानत्वेनैव हेतुत्वान्न व्याप्यवत्तानिश्चयत्वावच्छिन्नहेतुताघटितलक्षणस्य तत्रातिव्याप्तिरिति भावः। तज्जनकतावच्छेदकरूपान्तरेति निश्चयत्वभिन्नस्य संस्कारजनकतावच्छेदकरूपस्यापरिचयादित्यर्थः। तथा च निश्चयत्वमात्रस्य तथात्वे स्मृताविव तादृप्येणैव हेतुत्वं फलव्यापारौ प्रत्येकरूपेण करणस्य हेतुत्वनियमादित्युक्तातिव्याप्तिस्तदवस्थैवेति भावः। ननु तद्धर्मिकतत्प्रकारकस्मृताविव तादृशसंस्कारेप्यनुभवस्य तदाकारसंस्कारजनकज्ञानत्वेनैकरूपेण हेतुत्वं वाच्यम् अतो नातिव्याप्तिरत आह अन्योन्येति। अत्रावच्छेद्यमवच्छेदकीभूतं च संस्कारजनकत्वं विभिन्नव्याप्तिघटितमतोऽन्योन्याश्रयत्वम् इतरथा पुनरात्मश्रयो द्रष्टव्यः। [रूपान्तरापरिचयादिति स्मृतिजनकतावच्छेदकरूपभिन्नस्यापरिचयादित्यर्थः ननु संस्कारे स्मृतिजनकज्ञानत्वेन हेतुत्वमत आह अन्योन्येति तथा च स्मृतिजनकताग्रहे सति संस्कारजनकत्वरूपोपेक्षान्यत्वज्ञानं तज्ज्ञाने सति स्मृतिजनकताज्ञानमित्यन्योन्याश्रय इत्यपि कश्चित्।] ननु तद्धर्मिकतत्प्रकारिका यावत्यो ज्ञानव्यक्तयस्तादृशसंस्कारानुत्पादिकास्तत्त-

---

(१) 'निश्चयत्वन' (२) 'तथा च कारणतावच्छेदकभेदान्नातिव्याप्ति'

ज्ञेदकूटत्वस्यैवोपेक्षान्यत्वं निरुच्य तद्विशिष्टतद्धर्मिकतत्प्रकारकनिश्चयत्वेन तादृशस्मृतौ तथाविधसंस्कारे च हेतुत्वं वाच्यमतो नातिव्याप्ति[र्न वान्योन्याश्रयादि]रत आह संस्कारेति । उपेक्षात्मकज्ञानादि[त] इत्यादिः । तदप्रवेशादिति । उपेक्षान्यत्वाप्रवेशादित्यर्थः । न च स्मृताविव संस्कारेपि समानाकारनिश्चयत्वेनैव हेतुत्वादुपेक्षात्मकनिश्चयात्संस्कारानुत्पत्तिरेव दुर्घटेति वाच्यम । समानाकारोपेक्षाबुद्धिव्यक्तीनां तत्तद्व्यक्तित्वेन समानाकारसंस्कारं प्रति प्रतिबन्धकत्वोपगमादुपेक्षाज्ञानोत्तरं तज्ञाने सत्येव ज्ञानान्तरेण संस्कारोत्पादादिति भावः । नव्यास्तु चाक्षुषचक्षुःसंयोगौ प्रति चक्षुष्टद्रव्यत्वाभ्यां विभिन्नरूपाभ्यां चक्षुषो हेतुतया फलव्यापारौ प्रति एकरूपेण करणस्य हेतुत्वानियमे व्यभिचारात्समानाकारज्ञानत्वेनैव स्मृतिजनकत्वम् संस्कारं प्रत्येव निश्चयत्वेन हेतुतया संशयात्संस्कारानुत्पत्त्यैवास्मरणसम्भवात् न च विनिगमनाविरहः समानाकारज्ञानत्वेन संस्कारहेतुत्वे संशयजन्यानामनन्तपण्डसंस्काराणां तन्नाशकत्वेन कारणान्तराणां च कल्पनापत्तेरेव विनिगमकत्वात् तथा च स्मृतौ नातिव्याप्तिशङ्कापि न चात्यन्ताजनकसंदेहव्यावृत्तेन निश्चयत्वेन हेतुत्वसम्भवे तत्साधारेण समानाकारज्ञानत्वेन स्मृतिहेतुत्वमन्याय्यम् तथा सत्युपेक्षाज्ञानस्याप्यत्यन्ताजनकतया तद्व्यावर्तकेनोपेक्षान्यत्वेनापि स्मृतिजनकत्वस्यावश्यकत्वापातात् वस्तुतः समानप्रकारकज्ञानत्वेनापि न स्मृतिहेतुता किं तु स्मृतिसामान्ये ज्ञानत्वमात्रेण तद्धर्मिकतत्प्रकारकस्मृतिं प्रति तादृशसंस्कारत्वेन हेतुत्वस्यावश्यकतया तत एवातिप्रसङ्गभङ्गादिति प्राहुः।यत्तु संस्कारं प्रत्यपि समानाकारज्ञानत्वेनैव हेतुत्वम् न तु तादृशनिश्चयत्वेन गौरवात् संशयेन संस्कारोत्पादेपि उद्बोधकसमवधानविरहादेव ततः स्मृत्यनुत्पादसम्भवादिति तन्न । संशयजन्यपण्डसंस्कारव्यक्तीनां नाशार्थं हेत्वन्तरकल्पनागौरवप्रसङ्गात् यस्य पुंसः पटसंस्कारसत्वेपि तत्सदृशवस्तुविशेषदर्शनादेव पटस्मृतिः तत्पुरुषीयपटस्मृतिसामान्यं प्रति तत्पुरुषीयतादृशवस्तुदर्शनत्वेनानुगतैकरूपेणैवोद्बोधकस्य हेतुतया संशयजन्यसंस्कारसत्त्वे तादृशवस्तुदर्शनदशायां तत्पुरुषीयपटस्मृत्यापत्तेः [ब्रह्मणापि] वारयितुमशक्यत्वाच्चेति दिक्।अन्ये तु निश्चयत्वघटकदलद्वयस्य विशेषणविशेष्यभावेन गुरुतरकार्यकरणभावद्वयकल्पनामपेक्ष्य लाघवेन तद्विशेष्यकतत्प्रकारकसंस्कारं प्रति तद्वि-

शेष्यकतदभावप्रकारकज्ञानत्वेन प्रतिबन्धकत्वं ताद्दिशेष्यकतत्प्रकार-कज्ञानत्वमात्रेण हेतुत्वं चेत्युभयकल्पनमेवोचितं संशयोत्तरवर्तिनि-श्चयादपि संदेहनाशानन्तरमेव संस्कारोत्पादसम्भवादिति प्राहुः । तन्मन्दम् । तत्प्रकारत्वान्यप्रकारत्वानिरूपिततन्निष्ठाविशेष्यताकज्ञान-त्वपर्यवसितेन निश्चयत्वेन हेतुतायां निश्चयत्वघटकदलद्वयस्यैवास-म्भवात् । एतेन व्याप्यसंशयोत्तरं व्याप्यवत्त्वस्य संशयाकारस्मृतेरुत्प-त्तिभेयेन व्याप्यवत्तायाः स्मृतौ न तन्निश्चयत्वेन हेतुत्वम् किं तु व्या-प्यवत्ताज्ञानत्वमात्रेण व्याप्याभावप्रकारकस्मृतिं प्रति व्याप्याप्रकार-कव्याप्याभावप्रकारकज्ञानत्वेन हेतुत्वादेव व्याप्यभावप्रकारकत्वनि-यतस्य व्याप्यसंशयत्वस्य स्मृतावसम्भवात् न च व्याप्याभाववत्ता-स्मृतिं प्रति व्याप्याभाववत्तानिश्चयत्वेनेव व्याप्यवत्तास्मृतिं प्रत्यपि व्याप्यवत्तानिश्चयत्वेन हेतुतायां प्रमाणप्रसरे तदप्युचि-तमुभयथैव संशयाकारस्मृतेर्वारणसम्भवादिति वाच्यम् व्याप्य-वत्तास्मृतौ व्याप्यवत्तानिश्चयत्वेन हेतुत्वे व्याप्याभावाप्रकारकत्व-स्य हेतुतावच्छेदककोटिप्रवेशे गौरवम् व्याप्याभाववत्तास्मृतिं प्रति तु व्याप्याप्रकारकत्वघटितेन व्याप्याभाववत्तानिश्चयत्वेन हेतुत्वेऽव-च्छेदकलाघवमित्यस्यैव विनिगमकत्वात् तथा च व्याप्यवत्तास्मृतौ नातिप्रसङ्गशङ्कापि तत्र निश्चयत्वेनाहेतुत्वादित्यपि मतं निरस्तम् । प्रागुक्तदिशा निश्चयत्वस्य दलद्वयाघटितत्वात् । पर्वतो वह्निव्याप्या-भाववान्न वेत्यादिसंशयादपि तादृशसंशयाकारस्मृत्यापत्तिभेयेन व्याप्याभाववत्तास्मृतिं प्रत्यपि व्याप्याभावाप्रकारकत्वघटितेन व्याप्याभाववत्तानिश्चयत्वेन हेतुताया आवश्यकत्वेन विपरीतगौ-रवाच्चेति दिक् । केचित्तु संस्कारं प्रति निश्चयत्वेन हेतुत्वोक्ता-वपि यत्रायं घट इत्यादिप्रत्यक्षानन्तरं दिवसान्तरेऽयं न घट इत्या-कारकं ज्ञानं तत्र तादृशज्ञानद्वयेन क्रमाज्जनितस्य घटत्वतदभा-वगोचरसंस्कारद्वयस्य सत्त्वादयं घटो न वेति संदेहात्मकस्मृत्या-पत्तिः न च विरुद्धोभयकोट्योरेकदा उद्बोधकसमवधानविरहान्न तथा स्मृतिरिति वाच्यम् यस्य पुंसो घटत्वतदभावयोः संस्का-रसत्त्वे तदुभयसदृशवस्तुविशेषदर्शनादेव तदुभयस्मृतिस्तत्पुरुषी-यघटत्वतदभावस्मृतिसामान्यं प्रत्येव तत्पुरुषीयतादृशवस्तुदर्शन-

(१) 'घटितस्य'

तायां तदप्रवेशाच्च नाप्यनुभवत्वेन तथात्वम् संस्कारस्य फल-नाश्यतया सकृदनुभूतस्य स्मरणोत्तरमस्मरणप्रसङ्गात् समाना-

स्वेनानुगतरूपेणोद्बोधकस्य हेतुत्वेन तत्समवधानस्यापि सम्भवात् तथा च तादृशसंशयाकारस्मृतेर्वारणार्थमिदंत्वावच्छेदेन घटत्व-प्रकारकस्मृतौ तदवच्छेदेन घटत्वाभाववत्तास्मृतिसामग्र्यास्तादृश-धर्मिकघटत्वाभाववत्तास्मृतौ च तादृशघटत्ववत्तास्मृतिसामग्र्याः प्रतिबन्धकत्वस्य प्रामाणिकतया स्मृतिजनकतायामिव संस्कारजन-कतायामपि निश्चयत्वं न प्रवेशनीयमन्यथैव संशयोत्तरं तदाकार-स्मृतेर्वारणादित्याहुः । तच्चिन्त्यम् । संशयजन्य[पण्ड]संस्कारव्यक्ती-नां नाशार्थं हेत्वन्तरकल्पनामपेक्ष्य संस्कारजनकतायां निश्चयत्व-प्रवेशस्यैव लाघवेनोचितत्वादिति संक्षेपः । तथात्वमिति । स्मृतिहे-तुत्वमित्यर्थः । तथा च निश्चयत्वमात्रेण स्मृतिं प्रति अहेतुत्वान्न तत्र लक्षणातिव्याप्तिः । अनुभवत्वं च जातिर्न तु स्मृतिभिन्नज्ञानत्वम् तेन ज्ञानत्वापेक्षया गुरुतया न तस्य स्मृतिकारणतावच्छेदकत्व-हानिरिति भावः । द्विरादनुभवस्थले स्वजन्यस्मरणनैकसंस्का-रनाशेपि संस्कारान्तरसत्त्वात्तदुत्तरं स्मरणं संभवत्यत उक्तं सकृदिति [अनुभवोत्तरमननुभूतस्येत्यर्थः । वस्तुतस्तु] स्वविषयकस्मृत्युत्त-रमननुभूतस्येत्यर्थः । एतेन समानप्रकारकत्वेनैव स्मृतेः संस्कारना-शकत्वाद्बहुशोनुभूतस्याप्येकस्मृत्या संस्कारशतनाशात्स्मरणान्त-रासंभवे सकृत्पर्यन्तानुभावनं व्यर्थमित्यपास्तम् न चान्ततः स्वानु-भवीयानुव्यवसाय स्यैव स्वानुभवान्तरत्वात् सकृदनुभूतत्वं वस्तु-तोऽसिद्धमिति वाच्यम् स्वतः प्रामाण्यभियानुव्यवसायस्य व्यवसा-योल्लिखितधर्मवद्धर्मि विषयकत्वास्वीकारात् विषयान्तरसंचारादिना-नुव्यवसायानुत्पत्तिसंभवाच्चेति भावः । स्मरणोत्तरमिति । कालान्तर इति शेषः । तेनैकसंस्कारणैव क्वचित् क्रमिकस्मरणद्व-योत्पादसंभवेपि न क्षतिः । प्रसङ्गादिति । तथा चानुभवत्वेन हेतुत्वे व्यभिचारान्निश्चयत्वेनैव तथात्वं वाच्यमिति स्मृत्यतिव्याप्ति-स्तदवस्थैवेति भावः । [वस्तुतस्तु स्वजन्यत्वं विहाय स्वप्रयोज्यसं-स्कारसंबन्धेनानुभवत्वेन स्मृतिं प्रति हेतुत्वोक्तयानातिव्याप्तिर्गेशः न वा स्मरणोत्तरमस्मरणप्रसङ्गोपि । संस्कारं प्रत्यनुभवत्वेन तत्त्वम्

(१) तत्पुरुषीयोद्बोधकसम' (२) 'दन्व'

कारस्यैव फलस्य नाशकत्वात् समूहालम्बनादितोनैकैकगोचर-क्रमिकस्मरणानुपपत्तिः, जायते च पुनः पुनः स्मरणाद्दृढतरः

तत्र च स्मृतिविशिष्टसंस्कारं प्रति प्रयोज्यस्मृतिसंबन्धेनानुभवत्वेन तत्त्वम्।अनुभव विशिष्टसंस्कारं प्रत्यनुभवत्वेन तत्त्वम् फलव्यापारौ प्रत्येकरूपेण तत्त्वमितिव्याप्तेः।] ननु स्मरणात्मकं फलं न संस्कारनाश-हेतुः तथा सति घटः पटश्च द्रव्यमित्याकारकसंस्कारेणोद्बोधकवशाज्ज-नितया घटो द्रव्यमित्यकारकस्मृत्या तन्नाशे पश्चात्पटो द्रव्यमित्या-कारकस्मृतेरनुत्पत्तिप्रसङ्गादत आह समानेति । तथा च घटधर्मिक-द्रव्यत्वप्रकारकसंस्कारनाशं प्रत्येव तादृशस्मृतित्वेन हेतुत्वात्तादृश-स्मरणस्य सत्त्वेपि पटधर्मिकतादृशस्मृतेरभावादेव नोक्तसमूहालम्ब-नसंस्कारस्य नाशःनच घटधर्मिकद्रव्यत्वप्रकारकसंस्कारनाशत्वाव-च्छिन्नस्य सामग्रीसत्त्वादसमूहालम्बन[स्थल] इव प्रकृतेपि तदवच्छि-न्नस्य उत्पादो दुर्वार इति वाच्यम् । घटधर्मिक[द्रव्यत्व]संस्कारमात्र-स्यैव सामग्रीवशेन घटे वस्त्वन्तरे वा पदार्थान्तरावगाहित्वनियमेन पदार्थान्तरगोचरतादृशस्मरणात्मकविशेषसामग्रीविरहादेव घटधर्मि-कद्रव्यत्वसंस्कारनाशत्वावच्छिन्नस्योत्पत्त्यसम्भवादिति भावः ।समू-हालम्बनस्यापि संस्कारस्याविरलक्रमेण प्रत्येकगोचरस्मार्तद्वियजनक-त्वसम्भवात् क्रमिकेत्युक्तम् । क्रमिकदिनद्वयानन्तरोत्पन्नेति तदर्थः । यद्यप्येवमपि कालरोगादिना संस्कारनाशस्थले व्यभिचार इति कालरोगाद्यजन्यसंस्कारनाशत्वेनैव स्मृतिजन्यत्वं वाच्यम् तत्र च रोगाद्यजन्यत्वं तत्तद्भेदकूटातिरिक्तं दुर्वचम् तथा च तेषां विशेषणविशेष्यभावे विनिगमकाभावादनन्तकार्यकारणभावध्रौव्ये तत्तत्स्मृतिव्यक्तित्वेन तत्तत्संस्कारनाशं प्रति हेतुत्वमेव लाघ-वाद्युक्तमतः सकृदनुभवस्थलेपि चरमस्मृतेस्तत्तद्व्यक्तित्वेनैव तन्ना-शकत्वाङ्गीकाराच्च स्मरणोत्तरमस्मरणप्रसङ्गः । तथापि रोगादि-नाश्यव्यावृत्तस्य संस्कारत्वव्याप्यजातिविशेषस्यैव स्मृतिनाश्यता-वच्छेदकतया सिद्धत्वात् न तत्तन्नाशव्यक्तिं प्रति तत्तत्स्मृतिव्य-क्तित्वेन हेतुत्वम् वस्तुतो यत्पुरुषीययत्प्रकारकसंस्कारो न रोगा-दिनाश्यस्तत्पुरुषीयतत्प्रकारकसंस्कारनाशसामान्यं प्रत्येव तत्पु-

रुषीय]तत्प्रकारकस्मृतित्वेन हेतुत्वे बाधकाभाव इति तत्रैव स्मरणोत्तरमस्मरणप्रसङ्ग उक्त इत्यदोषः । केचित्तु रोगकालादिजन्यतत्तत्संस्कारनाशभेदकूटस्य युगपदेव विशेषणत्वम् न त्वेकविशिष्टापर[भेद]त्वेन एकविशिष्टापरवैशिष्ट्यप्रवेशे कार्यतावच्छेदकस्य गुरुत्वापातादतोऽनन्तकार्यकारणभावशङ्कैव नेत्यपि वदन्ति । समूहालम्बनादित इत्यादिपदादेकधर्मिकनानाप्रकारकसंस्कारपरिग्रहः । अत्रेदमवधेयम् तद्विशेष्यक[तत्]संस्कारनाशं प्रति तादृशस्मृतेः कार्यसहभावेनैव हेतुत्वं वक्तव्यमन्यथा स्मरणजन्य[संस्कार]व्यक्तीनां क्षणिकत्वापत्तेः नाशकीभूतस्य स्वजनकस्मरणस्यैव सत्त्वादुत्पत्त्यनन्तरमेव नाशसम्भवात् न चैवमपि यत्र घटत्वप्रकारकानुभवोत्तरं युगपत्तादृशसंस्कारोऽनुभवान्तरं च ततो घटत्वप्रकारेण संस्कारान्तरस्मरणे तत्र द्वितीयस्य घटत्वप्रकारकसंस्कारस्य क्षणिकत्वापत्तिः द्वितीय[संस्कारकालीन]स्मरणव्यक्तेरुत्तरक्षणेपि सत्त्वादिति वाच्यम् उपेक्षान्यज्ञानस्यैव संस्कारजनकतया तत्रत्यद्वितीयाद्यनुभवस्योपेक्षात्वस्वीकारेणैव ततः संस्कारानुत्पत्तेः प्रतियोगितया संस्कारनाशत्वावच्छिन्नं प्रति प्राक्क्षणवृत्तित्वविशिष्टजनकतया स्मृतित्वेन हेतुत्वमित्यपि कश्चित् वस्तुतः संस्कारनाशं प्रति समानाकारस्मृतित्वेनैव ज्ञानसुखदुःखेच्छाद्वेषप्रयत्नशब्दानामपि नाशं प्रति सामानाधिकरण्यप्रत्यासत्त्या ज्ञान[त्वसुखत्वदुःख]त्वादिप्रत्येकरूपेणैव हेतुत्वम् न तु स्वोत्तरोत्पन्न[विभु]विशेषगुणत्वादिना तथात्वं स्वत्वस्य तत्तद्व्यक्तिविश्रान्तिकत्वेनानन्तकार्यकारणभावापत्तेः एवं च ज्ञानसु[खदुः]खादीनां स्वोत्तरक्षण एव विनाशवारणाय प्रतियोगितासंबन्धेन ध्वंससामान्यं प्रति स्वप्रतियोग्यधिकरणतादात्म्यसंबन्धेन ध्वंसत्वेनाप्यनुगतैकरूपेण हेतुत्वं कल्प्यमतो ज्ञानसुखादीनामिव स्मृति[जन्य]संस्कारस्यापि न क्षणिकत्वम् स्वप्रतियोग्यधिकरणतादात्म्यसम्बन्धेन ध्वंसवत्तायाः संस्कारादौ द्वितीयक्षण एव सम्भवात् अधिकरणत्वं [चेह] कालिकसम्बन्धेन प्रवेश्यमतो न नित्यस्य ज्ञानेच्छादेश्च क्षणिकताप्रसङ्ग इति मदेकपरिशीलितः पन्थाः । यत्तु स्मृतिजन्यसंस्कारनाशस्य तत्तच्चरमस्मृत्युत्तरनष्टसविषयकप्रतियोगिकत्वस्य लाघवेन कल्पनात्तादृशप्रतियोगिनः [प्रथम]स्मृ-

(१) 'तादृशसंबन्धेन'

त्युत्तरमसम्भवान्न स्मृतिजन्यसंस्कारस्य क्षणिकत्वमिति तच्छेम तथा सति सकृदनुभवजन्यसंस्कारनाशस्यापि तत्रत्यचरमस्मृतिप्राक्कालीनसविषयकव्यक्तिप्रतियोगिकत्वकल्पनया तद्व्यक्तिविरहादेव नैकस्मरणोत्तरं तदुत्पादासम्भव इत्यनुभवत्वेनापि स्मृतिहेतुतायां दुरुच्छेदापत्तेः। केचित्तु रूपादिकं प्रति रूपादेरिव संस्कारं प्रत्यपि समानाकारसंस्कारत्वेनैव प्रतिबन्धकत्वं धारावहनस्थलेऽनेकसंस्कारव्यक्तिकल्पनामपेक्ष्य तत्कल्पने लाघवादेवं च न कस्यापि संस्कारस्य क्षणिकत्वम् प्राक्तनसंस्कारसत्त्वे स्मरणाव्यवहितोत्तरक्षणे संस्कारानुत्पादात् तन्नाशोत्तरमुत्पन्नस्य च संस्कारस्य तदानीं नाशकविरहादेव क्षणिकत्वसम्भवात् न च यत्रैकस्मृत्यनन्तरमेव स्मरणान्तरप्राक्तनसंस्कारनाशौ पश्चाच्च प्रथमस्मरणेन संस्कारोत्पादस्तत्रत्यस्य संस्कारस्य क्षणिकत्वं दुर्वारमिति वाच्यम् संस्कारस्य कार्यसहवर्त्तित्वेन स्मृतिहेतुत्वादेकस्मृतिद्वितीयक्षणे समानाकारस्मृत्यन्तरासंभवादित्याहुः। तन्मन्दम्। यत्र घटपटावित्याकारसंस्कारोत्तरं क्रमेण सकृदनुभूतस्य घटस्य पटस्य च प्रत्येकं स्मरणं तत्र पुनस्तादृशघटस्मरणानुत्पत्तिप्रसङ्गात्। क्रमिकस्मरणाभ्यां समूहालम्बनसंस्कारनाशदशायामेव घटस्मरणस्यापि नाशात्तेन पुनर्घटसंस्कारजननासम्भवादिति दिक्। ननु स्मृतेश्च संस्कारजनकतासत्त्व एव तद्द्वारा स्मृतिजनकत्वं वाच्यम् तदेवासिद्धम् संस्कारं प्रत्यपि अनुभवत्वेनैव हेतुत्वादत आह जायते चेति। तथा च संस्कारं [प्रति]अनुभवत्वेन हेतुत्वे दृढ[तर]संस्कारं प्रति पुनः पुनः स्मरणत्वेन हेतुता न स्यात् सामान्यसामग्रीविरहादतः संस्कारं प्रत्यपि निश्चयत्वमात्रेण हेतुत्वमिति भावः। प्राञ्चस्तु समानाकारस्मृतित्वेन संस्कारनाशेहेतुतामतेपि अनन्तात्मगोचरसंस्कारनाशानुरोधात्पुरुषभेदेन कार्यकारणभावनन्त्यमावश्यकमेव तथा च तत्तदात्मीयसंस्कारसामान्यनाशं प्रत्येव तत्तदात्मीयचरमस्मृतिव्यक्तीनां तत्तद्व्यक्तित्वेन हेतुत्वं युक्तमन्तरानन्तसंस्कारध्वंसकल्पनायां गौरवादवच्छेदकलाघवाच्च [सकल] संस्काराणां च[रम]स्मृतिपर्यन्तस्थायित्वेप्युद्बोधकविरहेणैव मध्ये स्मरणासम्भवात् तथा च सकृ-

(१) 'स्वेन'

संस्कारः परित्यज्य च निश्चिताव्यभिचारकं रूपं गृह्यमाण-व्यभिचारकेण कारणत्वकल्पनानुदयात् इदमेव चान्यत्र सामा-

---

नुभूतस्यापि स्मरणोत्तरं स्मरणसम्भवादनुभवत्वेन स्मृतिहेतुतायां बाधकाभाव इत्यत उक्तम् जायते चेत्यादीत्याहुः । तच्चिन्त्यम् ॥ तावता स्मृतेः संस्कारजनकत्वसिद्धावपि स्मृतिजनकत्वाप्राप्तेः । यत्र स्वसदृशपदार्थज्ञानत्वादिनाऽनुगतरूपेणोद्बोधकस्य स्मृतिहेतुत्वं तत्रान्तरा स्मरणधाराप्रसङ्गाच्च । नव्यास्तु ननु स्मृतौ न समानाकारज्ञानत्वेन हेतुत्वम् सकृदनुभवस्थले स्मृतिजन्यानेकसंस्कारकल्पनागौरवापत्तेः किं तु तादृशानुभवत्वेनैव तथात्वम् न च संस्कारस्य फलानाश्यतया सकृदनुभूतस्य स्मरणद्वयानुपपत्तिः चरमफलमात्रवृत्तिस्मृतित्वव्याप्यजातिविशेषेणैव संस्कारनाशहेतुत्वादित्यतः [आह] जायते चेत्यादि तथा च दृढ[तर]संस्कारात्मककार्यप्रयोजकतया सकृदनुभूतस्थले पुनः पुनः स्मरणस्य प्रामाणिकतया न तत्कल्पनागौरवम् किं तुसंस्कारनाशकतावच्छेदकतया चरमस्मृतिनिष्ठजातिकल्पनायामेव तदिति भाव इत्याहुः । ननु दृढत्वं न संस्कारगता जातिर्मानाभावात् परं झटित्युद्बोधकसम्पत्तिः सा च न कारणनियम्या तस्याः कार्यतानवच्छेदकत्वेपि क्षत्यभावात्तत्कुतोनुभवत्वेन संस्कारजनकतापरित्याग इत्यत आह परित्यज्य चेति । तथा च विनाप्यनुभवं स्मृतेरनन्तरं संस्कारस्य सम्भाव्यतयानुभवत्वं सन्दिग्धव्यभिचारकमतो व्यभिचारधिया प्रतिबन्धान्न तादृप्येण हेतुत्वं कल्प्यते किं तु निश्चिताव्यभिचारकेण ज्ञानत्वेनैव ज्ञानं विना संस्कारस्य केनाप्यनङ्गीकारादिति भावः । अथानुभवत्वं विशेषधर्मं परित्यज्य तद्व्यापकेन निश्चयत्वेन स्मृतिहेतुत्वोपगमे घटादिकं प्रत्यपि दण्डत्वादिकं परित्यज्य द्रव्यत्वादिना हेतुता स्यादत आह इदमेव चेति । गृह्यमाणव्यभिचारकेण कारणत्वकल्पनानुदय एवेत्यर्थः । [अन्यत्र विशिष्टबुद्ध्यादौ ।] तथा च यत्र विशिष्टबुद्ध्यादौ विशेषणज्ञानत्वादिविशेषरूपेण हेतुतायां व्यभिचारग्रहस्तत्रैव विशेषणविषयकत्वादिसामान्यधर्मेण हेतुत्वम् घटादौ तु दण्डत्वद्रव्यत्वाद्योर्द्वयोश्च निश्चिताव्यभिचारकत्वाद्दण्डत्वादिविशेषधर्मेणैव तद्धेतुत्वम् न तु तद्व्यापकद्रव्यत्वादिना

(१) 'सा च स्मरणस्यार्यसमाजमस्तत्वात्तस्याः'

न्यस्य च हेतुतावच्छेदकत्वे बीजम् अभिहितञ्च तात्पर्यटीकायां प्रथमसूत्रेऽवयवविवेचनप्रस्तावे मिश्रैः स्मृतीनां स्वकार्यसंस्काराविरोधिनीनामसहभावादितीति चेन्न। चरमज्ञानपदस्यानुभवपरत्वात्साक्षात्तज्जन्यत्वस्य वा विवक्षितत्वादित्यपि कश्चित्। किञ्च व्याप्यविशेष्यकात्पक्षविशेष्यकाच्च परामर्शादनुमितिदर्श-

---

तादृप्येण हेतुतायामन्यथासिद्धेरिति भावः। कार्यतावच्छेदकत्वं विशेषरूपस्यैव युक्तम् न तु सामान्यस्य सन्दिग्धव्यभिचारत्वादत एव विशेषणज्ञानजन्यत्वं विशिष्टानुभवत्वेनैव न तु तादृशज्ञानत्वेनेति प्राच्यैरुक्तमित्याशयेनाह हेतुतावच्छेदकत्व इति। ननु स्मृतेः संस्कारजनकत्वेऽपसिद्धान्त इत्यत आह अभिहितं चेति। स्वकार्यैः संस्कारो विरोधी नाशको यासामित्यर्थः। तथा चावयवेभ्यो न वाक्यार्थधीसम्भवस्तद्घटकप्रत्येकपदार्थस्मृतीनां तावत्कालमसत्त्वादिति टीकार्थः॥ साक्षात्तज्जन्यत्वम् व्यापारमद्वारीकृत्य परामर्शजन्यत्वम् [न तु स्वाव्यवहितोत्तरक्षणोत्पत्तिकत्वम्] तेन बाधादिस्थलीयपरामर्शतृतीयक्षणजन्यानुमितौ नाव्याप्तिः न तु स्वाव्यवहितप्राक्काल[वृत्ति]परामर्शजन्यत्वं तदर्थः। स्मृतिविशेषेऽतिव्याप्तितादवस्थ्यात्। वस्तुविशेषस्मृतिं प्रति साध्यव्याप्यवत्तानिश्चयत्वप्रकारेणानुगतरूपेण [उद्बोधक]हेतुत्वसम्भवे तस्यामतिव्याप्तिः पूर्वकल्पापेक्षाया गौरवं च कश्चिदित्युक्त्या सूचितम॥ [ननु पक्षधर्मिकव्याप्यवत्तानिश्चयत्वेन हेतुत्वस्य लक्षणघटकत्वेनुमितिमात्रेऽसम्भवः लिङ्गधर्मिकपरामर्शजातायामतिव्याप्तिश्चेत्यत आह किं चेति। प्राञ्चस्तु] ननु वह्निव्याप्यादिविशिष्टवैशिष्ट्यबुद्धौ वह्निव्याप्यादिप्रकारकनिश्चयत्वेनैव हेतुत्वं न तु ज्ञानत्वमनन्तभाव्य विशेषणांशेऽनुद्बुद्धसंस्कारसत्त्वेपि विशिष्टवैशिष्ट्यप्रत्यक्षापत्तेः तत्तद्विशिष्टवैशिष्ट्यप्रत्यक्षं प्रति तत्तद्विशेषणादिज्ञानव्यक्तीनां विशिष्य कारणत्वस्य [तादृशसंस्कारस्य] प्रतिबन्धकत्वस्य वा कल्पनायां गौरवात् न च स्मृत्यादिस्थले व्यभिचारः अग्रे निरसनीयत्वात् तथा च वह्निव्याप्यधूमवत्पर्वतवानित्याकारप्रत्यक्षेऽतिव्याप्तिस्तद्वारणार्थं प्रकारान्तरानुसरणे ततोपि स्मृत्यतिव्याप्तिनिरासः सम्भवतीति [न चरमज्ञानपदस्यानुभवपरत्वे संस्काराद्यापत्तिः इति] आशयेनाह

नाच्च तदुभयवैशिष्ट्याद्यवगाहिनिश्चयत्वेन तत्र हेतुत्वम् लक्षणघटकमपि तदेव एकतरविशेष्यकज्ञानादन्यतरविशेष्यकस्मरणाभावात् अन्यथा नियमेन स्मृतेरुभयविशेष्यकत्वप्रसङ्गात् समानप्रकारकत्वेनैव ज्ञानस्मरणयोः कार्यकारणभावाच्च तत्र विशिष्टयैव कार्यकारणभावः न तूक्तरूपेण गौरवान्मानाभावच्च इत्यपि केचित् । एवञ्च विशिष्टवैशिष्ट्यबोधादौ क्वापि नातिप्रसङ्गशङ्कापि ।वह्न्याद्यनुमितौ वह्न्यादिव्यभिचारधीविरोधिधीविषयधर्मप्रकारकपक्षधर्मताज्ञानत्वेन हेतुतामते तु नितराम् । तथैव

किं चेति । तत्र अनुमितौ । तदेवेति । अन्यथा पक्षधर्मिकव्याप्यवत्तानिश्चयत्वेन हेतुत्वस्य लक्षणे प्रविष्टत्वेऽनुमितिमात्रेऽसम्भवापत्तेरिति भावः । ननु तद्विशेष्यकतत्प्रकारस्मृतिं प्रत्यपि तदुभयवैशिष्ट्यावगाहिनिश्चयत्वेनैव हेतुत्वात्तत्रातिव्याप्तिरेवमपीत्यत आह एकतरेति । तथा चान्वयव्यभिचारान्नोक्तरूपेण तत्र हेतुत्वमिति भावः । ननु जन्यतापि तदुभयवैशिष्ट्यावगाहिस्मृतित्वेनैव वाच्या तथा च कार्यतावच्छेदकावच्छिन्नस्योत्पादान्नोक्तदोष इत्यत आह अन्यथेति । नियमेन नियमतः । [अन्यथा] अनियमेन विशेषतो[2] नियामकाभावेनेत्यपि कश्चित् । प्रसङ्गादिति । एकधर्मिकस्मृतिसामग्र्या एवापरधर्मिकस्मृतिसामग्रीत्वादिति भावः । ननु तद्विशेष्यकतत्प्रकारकस्मृतौ तादृशनिश्चयत्वेन हेतुत्वं मयापि वाच्यमेव नातः स्मरणस्योभयविशेष्यकत्वम् परं तु उभयवैशिष्ट्यावगाहिनिश्चयत्वेनापि [हेतुत्वं] यद्विशेषयोरिति न्यायादेव वक्तव्यमिति स्मृत्यतिव्याप्तिस्तदवस्थैवेत्यत आह समानेति । समानप्रकारकत्वसंबन्धेनेत्यर्थः। तेन सामान्यहेतुतायां विषयानन्तर्भावेपि न क्षतिः।]तथा च तत्प्रकारकस्मृतिसामान्यं प्रति तत्प्रकारकज्ञानत्वेनैव हेतुतयैव यद्विशेषयोरिति न्यायसामञ्जस्यान्न तदुभयवैशिष्ट्यावगाहिनिश्चयत्वेनापि हेतुत्वम् गौरवादिति भावः । तत्र ज्ञानस्मरणयोः। विशिष्येति । तद्विशेष्यकतत्प्रकारकज्ञानत्वादिनैवेत्यर्थः ॥ नानाविधव्याप्तेरनुमित्युपयोगित्वमतेनाह व्यभिचारेति । हेतुतामत इत्यनेन प्रागुक्तदोषः सूचितः ।

---

(१) 'पादाना' (२) 'विशेष्यतायाः निया'

लक्षणे निवेशात् । अत एव व्याप्यवत्पक्षाद्यभावग्रहं प्रति व्याप्यवत्पक्षादिज्ञानत्वेन हेतुत्वेऽपि न क्षतिः । व्याप्यविषयकत्वेन वा जन्यज्ञानं विशेषणीयम् । एतेन स्मृतिं प्रति संस्कारद्वारा अनुभवं

नितरामिति । नातिप्रसङ्गशङ्कापीत्यनुषज्यते ॥ तथैव व्यभिचारभीविरोधीत्यादिरूपेणैव ॥ अत एवेति । व्याप्यपक्षोभयवैशिष्ट्यावगाहित्वादिना जनकत्वस्य लक्षणे प्रवेशादेवेत्यर्थः । ज्ञानत्वेन निश्चयत्वेन । हेतुत्वेऽपीत्यपिनाऽस्वरसः सूचितः । स च व्याप्यवत्त्वावच्छिन्ने योग्यानुपलब्धिविरहात्तदवच्छिन्नाभावस्यातीन्द्रियतया न तत्र प्रतियोगितावच्छेदकविशिष्टप्रतियोगिज्ञानं हेतुरभावलौकिकप्रत्यक्षं प्रत्येव तस्य हेतुत्वादित्यादिः । अधिकं सामान्यलक्षणायां वक्ष्यते ॥ ननु व्याप्यपक्षोभयवैशिष्ट्यावगाहिनिश्चयत्वं तदुभयनिरूपितसांसर्गिकविषयताकनिश्चयत्वम् तथा च तादृष्येण हेतुत्वे वह्निव्याप्यधूमे पर्वत [इति ज्ञानदप्यनुमित्यापत्तिः पक्षे साध्यव्याप्याधारत्वावगाहित्वस्यावच्छेदककोटिप्रवेशे तु पर्वते वह्निव्याप्यधूम] इत्यादिलिङ्गधर्मिकपरामर्शस्यासंग्रहः तत्र व्याप्यांशे पक्षाधेयत्वस्यैव भानात् किं च पक्षधर्मिकव्याप्याभावप्रकारकान्यत्वे सति व्याप्यविशेष्यकपक्षाभावप्रकारकान्यव्याप्यपक्षोभयवैशिष्ट्यावगाहिज्ञानत्वमेव तादृशनिश्चयत्वं वाच्यम् तथा च तस्यापि विशेषणविशेष्यभावभेदाद्गुरुतरकार्यकारणभावापत्तिरतो व्याप्यवत्प[क्षनिश्चयत्वेनाधेयतया पक्षप्रकारकव्याप्यधर्मिकनिश्चयत्वेन वा यथानुभवमनुमितिहेतुत्वं वाच्यमतस्तादृशस्मृतावतिव्याप्तितादवस्थ्यमेवेत्यत आह व्याप्त्यविषयकत्वेनेति । नव्यास्तु व्याप्यप]क्षोभयवैशिष्ट्यावगाहिनिश्चयत्वेन हेतुत्वस्य लक्षणघटकत्वे वह्न्याद्यापत्तावतिव्याप्तिरनुमिता [वि]वापत्तौ च परामर्शस्यैवरूपेण हेतुत्वादत उक्तम् व्याप्त्यविषयकेति तथा चापत्तेः साक्षात्कारतया परामर्शोपनीतव्याप्तेस्तद्विषयत्वनियमान्नातिव्याप्तिरित्याहुः । तन्मन्दम् । पक्षधर्मतांशे गृहीताप्रामाण्यकत्वस्याहार्यत्वस्य वाधिकस्यापत्तिजनकतायामवच्छेदकत्वादन्यथा स्थाणुत्वाद्यभावभ्रमोत्तरं स्थाणुत्वादिप्रत्यक्षस्थलेपि व्याप्यदर्शनवशेन स्थाणुत्वादेरापत्तिप्रसङ्गा-

---

(१) 'व्याप्ति'

मिति च साक्षाद्विशेषणधियो हेतुत्वस्य निर्विकल्पकात्मकस्य वा स्मरणस्यानुभवं प्रत्येव वा तस्या हेतुत्वस्य नियमतः कृतिसाक्षात्कारपूर्वे विषयस्मृतेश्च कल्पनात् व्याप्यवत्पक्षवत्त्वादि-

---

दिति ध्येयम् ॥ एतेन व्याप्यत्वविषयकत्वप्रवेशेन । परास्तमिति परेणान्वयः । विशिष्टबुद्धौ विशेषणज्ञानस्य हेतुत्वे व्यवस्थापिते विशिष्टवैशिष्ट्यबुद्धेरपि विशिष्टबुद्धितया तदर्थमपेक्षितविशेषणज्ञानस्यैव विशेषणतावच्छेदकप्रकारकत्वसम्भवाद्विशिष्टवैशिष्ट्यबुद्धौ विशेषणतावच्छेदकप्रकारकज्ञानस्य व्यभिचारो न स्यादित्याशयेनोक्तम् विशेषणधिय इति । हेतुत्वस्येति । कल्पनादिति परेणान्वयः । ननु सम्बन्धद्वयेनैव [हेतुत्वे] प्रत्येकं व्यभिचारात् विशिष्टज्ञानत्वावच्छिन्नं प्रत्यनुगतहेतुत्वासम्भव इत्यत आह निर्विकल्पकात्मकस्य वा स्मरणस्येति । विशेषणाप्रकारकस्य वा स्मरणस्येत्यर्थः । तेन व्याप्यवत्त्वादिस्मरणस्य सविकल्पकत्वेपि न क्षतिः । [हेतुत्वस्य] कल्पनादिति योजना । तथा च साक्षात्सम्बन्धनैव सर्वत्र हेतुत्वम् [न तु सम्बन्धद्वयेनैव] इति भावः । ननु विशिष्टबुद्धित्वं स्मरणस्थले सन्दिग्धव्यभिचारकत्वान्न विशेषणधीजन्यतावच्छेदकम् किं च समानप्रकारकत्वेन ज्ञानस्मृत्योः कार्यकारणभावस्य कल्पनत्वान्निर्विकल्पकस्मरणस्यासम्भवोपीत्यत आह अनुभवं प्रत्येव वेति । तस्या हेतुत्वस्य कल्पनादित्यन्वयः । तस्या विशेषणधियः । नन्वेवमपि विषयोपरक्तकृत्यादिसाक्षात्कारे व्यभिचार एव इत्यत आह नियमत इति । नियमः कारणत्वम् । तदङ्गीकृत्येत्यर्थः । तथा च ल्यब्लोपे पञ्चमी । तेन यत्रापेक्षाबुद्धया कृतिर्जनिता यत्र वा प्रथमं चिकीर्षा ततो विषयोपरक्तमुपादानप्रत्यक्षं पश्चात्कृतिस्तत्र कृतिसाक्षात्कारपूर्वं विषयस्मृत्यकल्पनेपि नासङ्गतिरिति ध्येयम् । न चोक्तप्रणाल्या व्यभिचारवारणेपि ज्ञानत्वमन्तर्भाव्य हेतुत्वे मानाभाव इति वाच्यम् विशेषणगोचरानुद्बुद्धसंस्कारदशायां विशिष्टप्रत्यक्षानुत्पत्त्यर्थं तन्निवेशावश्यकत्वादिति भावः । नव्यास्तु यागादिव्यापारतया सिद्धस्यापूर्वस्येवानुभवव्यापारतया सिद्धस्य संस्कारस्यापि सविषयकत्वे मानाभावाद्विशेषणविषयकत्वेनैव विशिष्टानुभवे हेतुत्वं संस्कारद्वारा समानाकारनिश्चयत्वेनैव स्मृतिहेतुत्वेप्यतिप्रसङ्गाभावात् न च संस्कारस्य निर्विषयकत्वे यत्र घटपटावित्यनुभवस्य पटांश एवोपेक्षित्वं तत्र तादृशज्ञा-

---

(१) स्वेन ।

नस्य घटस्मृत्युपधायकस्वजन्यसंस्कारसम्बन्धेन सत्त्वात् घटस्येव पटस्यापि स्मरणापत्तिः यस्य पुंसः पटानुभवोत्तरं तत्सदृशवस्तुदर्शनादेव पटस्मृतिस्तत्पुरुषीयपटस्मृतिसामान्यं प्रत्येव तदीयतादृशवस्तुदर्शनत्वेनानुगतरूपेणोद्बोधकस्य हेतुतया तत्सत्त्वदशायामुद्बोधकविरहस्यापि वक्तुमशक्यत्वात् इति वाच्यम् स्वजन्यसंस्कारद्वारा तद्धर्मिकतत्प्रकारकोपेक्षान्यतादृशनिश्चयत्वेन तथाविधस्मृतिं प्रति हेतुत्वाद्युक्तस्थले च पटोपेक्षान्यत्वविशिष्टस्य पटधर्मिकपटत्वप्रकारकज्ञानस्य स्वजन्यसंस्कारद्वारा विरहादेव पटस्मृत्यापत्त्यसम्भवात्त्वयापि संस्कारजनकतायामप्युपेक्षान्यत्वस्य प्रवेशनीयतया गौरवानवकाशात् अन्यथोक्तस्थल एव पटत्वप्रकारकसंस्कारस्य दुर्वारत्वापत्तेः यत्तु स्वध्वंसद्वारैवानुभवस्य स्मृतिजनकत्वसंभवादतिरिक्तः संस्कार एव नास्ति कस्य सविषयकत्वचिन्तेति तत्तुच्छम् यस्य पुंसः पटानुभवोत्तरं क्रमिकचतुष्पञ्चप्रत्यक्षाद्युत्पत्त्यव्यवहितपूर्वकाल एव दशदिनेषु पटस्य दशस्मरणान्युपेक्षात्मकान्युत्पन्नानि तस्य तत्तद्दिन एव स्मरणोत्तरमपि पटस्य पुनः स्मरणप्रसङ्गात् स्वध्वंसद्वारानुभवस्य सत्त्वात् तत्रत्यदशस्मरणेषूद्बोधकदशकस्य विशेषतो हेतुत्वकल्पनया तत्र स्मृत्यनुत्पद[संपादन]मपेक्ष्य संस्कारस्य स्मृतिहेतुत्वकल्पनयैव तत्संपादने लाघवात् संस्कारस्य फलनाश्यतया प्रथमस्मरणेन तन्नाशादेवास्मन्मते पुनः स्मरणासंभवात् न च तत्तत्स्मरणपूर्वक्षण एव तत्तत्स्मरणस्योत्पादप्रसङ्गेन संस्कारहेतुत्ववादिनापि तत्रोद्बोधकस्य विशेषतो हेतुत्वं वक्तव्यमिति साम्प्रतम् प्रत्यक्षादिसामग्र्याः प्रतिबन्धकत्वादेव तत्तत्स्मृतिप्राक्क्षणे स्मरणासंभवादिति प्राहुः । केचित्तु स्मृतिनाश्यतावच्छेदकतयैव संस्कारस्य सविषयकत्वसिद्धिस्तद्धर्मिकतत्प्रकारकसंस्कारनाशं प्रत्येव तादृशस्मृतित्वेन [हेतुत्वात् स्मृतित्वेन] सामान्यतः संस्कारनाशं प्रति हेतुत्वे घटस्मरणादेव निखिलसंस्कारनाशादनुभवान्तरं विनोत्तरकाले पटादिस्मरणानुपपत्तेः न हि तत्र घटस्मृतिरेव स्वजन्यसंस्कारद्वारा पटादिस्मृतिं जनयितुमीष्टे भिन्नविषयकत्वात् अन्यथाऽतिप्रसङ्गात् न वा पटादिधीरेव तत्र संस्कारद्वारा संभवति तज्जन्यसंस्कारस्यापि घटस्मृत्यैव नाशात् न च तद्धर्मिकत्वाद्यपेक्षया लाघवेन तद्धर्मिकतत्प्रकारकस्मृतिना-

ज्ञानेऽतिव्याप्तिरित्यपि परास्तम् । साध्यादेरननुगमात् एकोपादाने अन्यानुमितौ दैवाद्व्याप्तिविषयिण्याश्च तस्यामव्याप्तेः परमवशिष्यते। सापि तादृशज्ञानवृत्त्यनुभवत्वव्याप्यजातिमत्त्वाविवक्षया निरसनीया। एतल्लाभायैव चानुभवार्थकं चरमज्ञानपदम्। एवञ्चान्वयव्यतिरेकव्याप्त्योः पृथक् प्रयोजकत्वेऽपि न क्षतिः।

इयतावच्छेदकं संस्कारनिष्ठं वैजात्यमेव कल्पयितुं युक्तम् घटत्वप्रकारकस्मृतिनाश्यतावच्छेदकजातेर्घटपटोभयानुभवजन्ये तदुभयस्मृतिनाश्यसंस्कारे पटत्वप्रकारकस्मृतिनाश्यतावच्छेदकजात्या संकरात् न च तत्रोभयगोचरस्मृतिनाश्यतावच्छेदकं वैजात्यान्तरं प्रत्येकस्मृतिप्रयोजकजातिविरुद्धमेव स्वीकार्यमिति वाच्यम् तथा सति अनन्तजातितदाश्रयकल्पनामनन्तनाश्यनाशकभावकल्पनां चापेक्ष्य संस्कारस्य सविषयकत्वकल्पनाया [एव लाघवेन]औचित्यमिति प्राहुः ॥ ननु तत्पक्षहेतुसाध्यकानुमितित्वं विशिष्यैव लक्ष्यतावच्छेदकं वाच्यमत आह दैवादिति । सामग्रीवशादित्यर्थः । तथा च वह्निव्याप्यो धूमो द्रव्यं पर्वतश्च वह्निमानित्याकारानुमित्यव्याप्तिरिति भावः ॥ ज्ञानवृत्तित्वं ज्ञानसमवेतत्वम् । तेन साक्षात्कारत्वादेः कालिकादिसंबन्धेन तादृशज्ञानवृत्तित्वेऽपि प्रत्यक्षादौ नातिव्याप्तिः । अनुभवत्वव्याप्येति । अनुभवत्वाव्यापकेत्यर्थः । तेनानुभवत्वस्यापि स्वव्याप्यत्वात्तदादाय प्रत्यक्षादौ नातिप्रसङ्गः । व्याप्यत्वभेदगर्भमित्यपि कश्चित् । यत्किंचिदनुभवावृत्तित्वेनापि जातेर्विशेषणीयत्वमित्यन्ये। जातिपदं समवायेन हेतुतालाभाय । नातः स्पन्दादौ व्यभिचारः । [अनुभवत्वजातेरसत्त्वपक्षे स्मृत्यन्यज्ञानत्वस्यैव तथात्वात्तद्व्याप्यं तादृशज्ञानत्वमपीति तद्वारणाय जातिपदमखण्डधर्मार्थकमित्यपि वदन्ति ॥] अथानुभवत्वव्याप्यजातेर्निवेशे मूलोक्तं चरमज्ञानपदं व्यर्थमव्यावर्तकत्वादत आह एतदिति । तथा च न स्वातन्त्र्येण ज्ञानपदार्थप्रवेश इति भावः ॥ पृथक् अन्वयव्याप्तित्वादिना। न क्षतिः नाव्याप्तिः। अनुमितित्वमादाय सर्वत्रैव लक्षणसत्त्वादिति भावः ॥ अनुभवत्वव्याप्यतमानिवेश्य मूलस्थजन्यपदस्य जन्यतावच्छेदकविशिष्टपरतया तदनुसारि[लघु]लक्षणमाह

पर्वतवह्निव्याप्यवैशिष्ट्यावगाहिनिश्चयत्वावच्छिन्नकारणतानिरूपितयोगिककार्यतायाः वह्निव्याप्यवत्पर्वतनिश्चयत्वावच्छिन्नकारणतानिरूपितयोगिकव्याप्त्यविषयकवृत्तिकार्यतायाः वा अवच्छेदिका ज्ञानवृत्तिः सामानाधिकरण्येन वावच्छेदिका या जातिस्तद्वत्त्वं

पर्वतवह्निव्याप्येति [अत्राबच्छेदकत्वस्य व्यासज्यवृत्तित्वमते] कार्यतावच्छेदकत्वं तत्कोटिनिविष्टतामात्रेण वाच्यमन्यथानुमितित्वस्यापि तादृशकार्यतावच्छेदकत्वपर्याप्त्यनधिकरणत्वादसंभवापत्तेः तथा च वह्न्यनुमितित्वेन जन्यतायां वह्नित्वस्यापि प्रवेशात्तदादाय वह्न्यादावतिव्याप्तिरत उक्तं ज्ञानवृत्तिरिति । ज्ञानसमवेतेति तदर्थः । तेन [वह्नित्वादेरपि] कालिकादिसंबन्धेन ज्ञानवृत्तित्वेपि नोक्तदोषः । [चरमज्ञानपदस्यैतल्लाभार्थमेव मणिकृतोक्तत्वादिति भावः ।] न च तादृशजातिमज्ज्ञानत्वमेव वक्तुमुचितं ज्ञानवृत्तित्वप्रवेशे गौरवादिति वाच्यम् । तादृशजातिमज्ज्ञानत्वं हि तादृशजातिविशिष्टज्ञानत्वम् । तथा च तस्य लक्षणत्वे सामानाधिकरण्यात्मकवैशिष्ट्यस्य हेतुतावच्छेदकविधया ज्ञानत्वत्वस्य च प्रवेशे विपरीतमेव गौरवं स्यादिति भावः । ननु धूमपरामर्शविशिष्टानुमितित्वेन तादृशपरामर्शनाशकानुमितित्वेन वा तादृशपरामर्शजन्यत्वे तादृशपरामर्शघटकतया ज्ञानत्वस्यापि प्रवेशात्तदादाय बुद्धिमात्रातिव्याप्तिरत आह सामानाधिकरण्येन वेति । विशेष्यविधयावच्छेदिकेत्यर्थः । तेन ज्ञानत्वस्यापि तादृशजन्यतायाः समानाधिकरणत्वेपि नोक्तदोषः । वस्तुतस्तु कार्यतावच्छेदकत्वस्य व्यासज्यवृत्तित्वेऽपसिद्धान्तः अन्यथा कुत्रापि कार्यतावच्छेदकधर्मस्य विशेष्यविशेषणभावभेदान्नानात्वप्रसङ्गनं शास्त्रकृतां विरुध्येत तथा च वह्न्यनुमितित्वेन जन्यतायामनुमितित्वमेव जन्यतावच्छेदकं वह्नित्वादिकं तु तादृशजन्यतावच्छेदकतायामवच्छेदकमतो नोक्तक्रमेण ज्ञानवृत्त्यादिपदस्य व्यावृत्तिरुन्निता किं तु वह्नित्वावच्छिन्नविधेयकानुमितित्वस्येव विनिगमनाविरहात्स्वावच्छिन्नविधेयताकत्वसंबन्धेन अ-

---

(१) 'जन्यत्वात्तादृशोभयवैशिष्ट्यावगाहिज्ञानजन्यतावच्छेदकान्तर्गतज्ञानत्वमादाय बुद्धिमात्रेऽतिव्याप्तिः'

नुमितिवृत्तिवह्नित्वस्यापि परामर्शजन्यतावच्छेदकत्वात् तादृशवह्नित्वादिकमादाय वह्न्यादावतिव्याप्तेर्वारणार्थमेव ज्ञानवृत्तिपदम् समवायसंसर्गेणैव जन्यतावच्छेदकत्वस्य विवक्षया वह्नित्वादेर्वारणसंभवाज्ज्ञानवृत्तित्वप्रवेशे गौरवमित्याशयादेव च सामानाधिकरण्येन वेति [कल्पान्तरमुक्तमिति] युक्तमुत्पश्यामः । [केचित्तु स्वावच्छिन्नविधेयतासंबन्धेन वह्नित्वस्य संबन्धान्तरेण पर्वतत्वस्यापि अवच्छेदकतया तदादाय वह्न्यादावतिव्याप्तिवारणाय ज्ञानवृत्तीरति ज्ञानसमवेतार्थकम् लाघवादाह समानाधिकरण्येनेति जन्यतायाः समवायेनावच्छेदिका या जातिरित्यर्थ इत्याहुः ।] यद्यपि पर्वतवह्निव्याप्योभय[वैशिष्ट्यावगाहि]निश्चयोत्तरज्ञानत्वावच्छिन्नं प्रत्येव लाघवात्तादृशवैशिष्ट्यावगाहिनिश्चयत्वेन हेतुत्वे पर्वतधर्मिकवह्न्यनुमितित्वादेः कार्यतावच्छेदकोट्यप्रविष्टत्वादनुमितिमात्र एवोक्तलक्षणस्यासंभवः । तथापि तत्तदप्रामाण्यज्ञानानास्कन्दिततादृशोभयवैशिष्ट्यावगाहिनिश्चयत्वेनैवानुमितिहेतुत्वं वाच्यमन्यथा भ्रमत्वेन गृह्यमाणादपि परामर्शादनुमितिप्रसङ्गात् न च परामर्शधर्मिकतत्तदप्रामाण्यज्ञानाभावस्य स्वातन्त्र्येणैवानुमितिहेतुत्वमिति नोक्तदोषः तथा सति गृहीताप्रामाण्यकस्यैव परामर्शस्योत्तरं परामर्शान्तरोत्पादेऽनुमित्यनुत्पत्त्यापत्तेः एवं च [पर्वतवह्निव्याप्योभयवैशिष्ट्यावगाहिनिश्चयोत्तरज्ञानत्वमात्रस्य तादृशनिश्चयजन्यतावच्छेदकत्वे गृहीताप्रामाण्यकात्] पर्वतवह्निव्याप्योभयवैशिष्ट्यावगाहिनिश्चयानन्तरं स्वसामग्रीवशाज्जायमानायां पर्वते द्रव्यत्वस्य चत्वरे वह्नेर्वह्निमत्पर्वत एव वा द्रव्यत्वादेरनुमितौ पर्वते वह्निविधेयकान्वयबुद्धौ धूमेन पर्वते वह्नेरापत्तौ च व्यभिचारः स्यादित्यवश्यं पर्वतवह्निव्याप्योभयवैशिष्ट्यावगाहिनिश्चयोत्तरपर्वतधर्मिकवह्निविधेयकानुमितित्वावच्छिन्नं प्रत्येव तत्तदप्रामाण्यज्ञानानास्कन्दिततादृशोभयवैशिष्ट्यावगाहिनिश्चयत्वेन हेतुत्वं वाच्यम् इत्यनुमितित्वस्यापि कार्यतावच्छेदकेऽनुप्रवेशाशासंभवः न च तत्तदप्रामाण्यज्ञानानास्कन्दितपर्वतवह्निव्याप्योभयवैशिष्ट्यावगाहिनिश्चयोत्तरज्ञानत्वावच्छिन्नं प्रत्येव तत्तदप्रामाण्यज्ञानानास्कन्दिततादृशवैशिष्ट्यावगाहिनिश्चयत्वेन हेतुत्वं वाच्यमनो न व्यभिचारः पर्वतधर्मिकवह्निविधेयकानुमितित्वापेक्षया गुरुत्वेन तत्तदप्रामाण्यज्ञाना-

भावकूटस्य तादृशनिश्चयकार्यतावच्छेदककोट्यप्रविष्टत्वात् अनयैव दिशाग्रिमलक्षणेप्यसंभवो वारणीय इति परैरपरिशीलितः पन्थाः। ननु पूर्वोक्तयुक्त्या व्याप्यपक्षोभयवैशिष्ट्यावगाहिनिश्चय[त्वस्य दुर्वचत्वात्तद्रूप]त्वेनानुमितावपि न हेतुत्वम् अतः कल्पान्तरमाह वह्निव्याप्यवादिति। [केचित्तु व्याप्यपक्षोभयवैशिष्ट्यनिरूपितपर्वतत्वावच्छिन्नविशेष्यताकज्ञानत्वावच्छिन्नेत्यर्थः एतेन व्यप्यवत्तानिश्चयत्वघटकदलद्वयापेक्षया लाघवाद्व्याप्यधर्मिकपर्वतनिश्चयत्वेनैव पर्वतो वह्निमानित्यनुमितौ हेतुत्वादसंभवोपीत्यपास्तम् निश्चयत्वे दलद्वयस्याप्रवेशादिति ध्येयम्]। व्याप्तिज्ञानत्वावच्छिन्नकारणत्वप्रवेशेऽनुमितावसंभवोऽनुमितिमात्रे ज्ञानत्वेन वह्न्याद्यनुमितौ च वह्न्यादिज्ञानत्वेनैव हेतुत्वस्य स्वयं वक्ष्यमाणत्वादतस्तत्परित्यागः। यद्यपि वह्न्याद्यनुमितौ वह्न्यादिव्याप्यवत्तानिश्चयत्वेनैव [समानविषयतावच्छेदकसामानाधिकरण्येन] समानविशेष्यतावच्छेदकत्वप्रत्यासत्त्या हेतुत्वमुचितम् पर्वतत्वचत्वरत्वाद्यवच्छिन्नपक्षकनिखिलानुमितिसाधारण्यात्तत्तदात्मव्यक्तीनामपि क्वचित्पक्षतया परेषां विषयविधयेवास्माकं स्वरूपतस्तत्पुरुषीयत्वस्यावच्छेदककोटिप्रवेशेपि गौरवानवकाशात् न च पर्वतत्वाद्यवच्छेदेन साध्यवत्त्वानुमितौ तदवच्छेदेन वह्निव्याप्यवत्तानिश्चयत्वेन हेतुत्वमावश्यकमुक्तक्रमेण हेतुतायां तदनिर्वाहादिति वाच्यम् तावतापि पक्षतावच्छेदक[सामानाधिकरण्येनानुमितौ समानविशेष्यतावच्छेदकत्वप्रत्यासत्त्या परामर्शस्य हेतुतायां बाधकाभावात् साध्यतद्व्याप्यवत्तानतिरिक्तवृत्तित्वविशिष्टपक्षतावच्छेदकताघटकसंसर्गावच्छिन्नस्य विशेष्यतावच्छेदकत्वस्य] प्रत्यासत्तित्वे पक्षतावच्छेदकधर्मावच्छेदनानुमितावप्युक्तक्रमेण हेतुतासंभवाच्च [वस्तुतः पक्षतावच्छेदकावच्छेदेनानुमितौ न तदवच्छेदेन हेतुमत्त्वनिश्चयः कारणं किं तु तदवच्छेदेन बाधाद्यनिश्चय एवेति एतेन पर्वतत्वावच्छेदेन प्रमेयत्वाद्यनुमितेः प्रमेयत्वानतिरिक्तत्वावगाहने भ्रमत्वापत्तिरित्यपि प्रत्युक्तमेतावतापि वह्न्यादिसाध्यकानुमितौ समानविशेष्यतावच्छेदकत्वप्रत्यासत्त्या वह्न्यादिपरामर्शस्य हेतुत्वे बाधकाप्राप्तेः] तथापि साध्यव्याप्यस्य धूमालोकादेरननुगमात्तादृशैकव्याप्यवत्तानिश्चयत्वेन हेतुत्वोक्तावन्यालिङ्गिकाया पर्वते धूमस्य चत्वरे चालोकस्य समूहालम्बनपरामर्शा-

वा बोध्यम् । व्याप्तिभानेऽवश्यं भासमानो यस्तादृशानुमित्य-विषयस्तदविषयत्वमात्रं वा ग्राह्यम् । यां काञ्चिदनुमितिव्यक्ति-

---

ज्जायमानायां साध्यस्यानुमितौ व्यभिचारः स्यादतः पक्षीभूतस्य पर्वतादेरपि विशेष्यतावच्छेदककोटावनुप्रवेशः कृतः । यदि च तत्पुरुषीयवह्निव्याप्यधूमवत्तानिश्चयत्वेनैव हेतुत्वं तत्पुरुषीयवह्न्यनुमितित्वेन च कार्यत्वं तत्र कारणस्य विशेष्यतावच्छेदकत्वमेव संबन्धः कार्यस्य तु तत्पुरुषनिष्ठज्ञानीयवह्निव्याप्यधूमवत्ताप्रकारतानिरूपितविशेष्यतावच्छेदकत्वविशिष्टमेव विशेष्यतावच्छेदकत्वं संबन्धः तादृशविशेष्यतावच्छेदकत्ववैशिष्ट्यं तु स्वनिरूपकज्ञानोत्तरज्ञानीयत्वस्वसामानाधिकरण्योभयसंबन्धेन ग्राह्यमित्युच्यते तदा समानविशेष्यतावच्छेदकत्वप्रत्यासत्त्यापि परामर्शानुमित्योः कार्यकारणभावः संभवत्येव । परं तु विषयताया ज्ञानसमानकालतया विनश्यदवस्थपरामर्शेन जनितायां अनुमितेर्विशेष्यतावच्छेदकीभूतपर्वतत्वादौ तदानीं तादृशपरामर्शविशेष्यतावच्छेदकत्वस्यासंभवादेवेदमुपेक्षितमस्माभिरिति ध्येयम् । व्याप्यविशिष्टवैशिष्ट्यबुद्धावतिव्याप्तिवारणाय व्याप्त्यविषयकेति । न च व्याप्यविशिष्टवैशिष्ट्यावगाहितामात्रस्यैव जन्यतावच्छेदकतया परामर्शजन्यतावच्छेदकजातिविरहादेव न तत्रातिप्रसङ्गः । तथापि विशिष्टस्मरणत्वस्य परामर्शजन्यतावच्छेदकतया तद्धति स्मरणेऽतिव्याप्तिवारणार्थं व्याप्त्यविषयकत्वनिवेशस्यावश्यकत्वात् । वह्न्याद्यापत्तावापत्तित्वजातिमादायातिव्याप्तिवारकं तदित्यपि कोचित् ॥ ननु यत्र [वह्नि]-व्याप्यविशिष्टवैशिष्ट्यबुद्धौ धूमत्ववह्नित्वादिना बाष्पगुञ्जादिकमेव भातं तस्या अखण्डव्याप्त्यविषयकत्वात्तत्रातिव्याप्तिरतो लाघवाच्चाह व्याप्तिभान इति । तादृशानुमित्यविषयीभूतघटादिव्यक्त्यविषयकत्वस्य व्याप्तिविशिष्टवैशिष्ट्यबुद्धावपि सत्त्वाद्भासमानान्तम् व्याप्तिभानेऽवश्यं भासमानं साध्यतावच्छेदकीभूत वह्नित्वादिकमिति तदविषयकत्वं चानुमितावसंभवीत्यत उक्तं तादृशानुमित्यविषय इति । तथा च तादृशं यदभावत्वधूमत्वादिकं तदविषयकत्वमेव विशिष्य वक्तव्यमिति भावः ॥ ननु वह्निव्याप्यालोकपरामर्शजन्यायां पर्वतो वह्निमानित्यनुमितौ व्यभिचाराद्वह्निव्याप्यधूमवत्पर्वतनिश्च-

मादाय तद्व्यक्तिसमवेतानुभवत्वान्यानुभवान्यासमवेतधर्मसमवा-

यत्वेन नानुमितिहेतुत्वमित्युक्तलक्षणासंभवः न च पर्वतधर्मि-कवह्निव्याप्यधूमवत्ताद्दिनिश्चयविशिष्टानुमितिं प्रत्येव तादृशनिश्चय-त्वेन हेतुत्वं वैशिष्ट्यं चाव्यवहितोत्तरत्वसंबन्धेन तच्च क्षणध्व-यसाधारणम् तेन विनश्यदवस्थधूममरामर्शस्थलीयानुमितावपि तद-पेक्षेति वाच्यम् अव्यवहितोत्तरत्वस्य संबन्धत्वे मानाभावात् तादृ-शनिश्चयसामान्याव्यवहितोत्तरत्वाप्रसिद्ध्या तत्तत्परामर्शाव्यवहितो-त्तरतत्तद्व्यक्तीनामननुगतानामेव निवेश्यत्वेऽनुगतकार्यकारणभा-वासंभवाच्च नापि धूमलिङ्गकपर्वतधर्मिकवह्निविधेयकानुमिर्ति प्रत्येव तादृशनिश्चयत्वेन हेतुत्वं धूमलिङ्गकत्वं तु धूमान्यमात्रलि-ङ्गिका यावत्योऽनुमितयस्तत्तद्भेदकूटत्वमतो न व्यभिचार इति वाच्यम् तथा सति तावद्भेदकूटनां विशेष्यविशेषणभावभेदादनन्त-कार्यकारणभावप्रौढ्ये लाघवेन तत्तदनुमितिव्यक्तित्वावच्छिन्नं प्रति तत्तत्परामर्शव्यक्तित्वेन हेतुत्वस्यैवोचितत्वादित्यतः स्वयं लक्षणमाह यां कांचिदित्यादिना। न च वह्निव्याप्यधूमवत्पर्वतनि-श्चयत्वेन कारणतायां संस्कारान्यतादृशनिश्चयनाशकविशिष्टा-नुमितित्वमेव कार्यतावच्छेदकमित्युक्तलक्षणमेव सम्यगिति वाच्यम्। धूमपरामर्शगोचरकाग्नेर्जिज्ञासानन्तरोत्पन्नतादृशपरामर्शेन स्व-विनाशदशायामुत्पाद्यानुमितेरसंग्रहापत्तेः। कामिनीजिज्ञासायाः प्रति-बन्धकत्वेनेष्टसाधनतादिज्ञानविरहेण च तादृशपरामर्शद्वितीयक्षणे संस्कारभिन्नस्य ज्ञानेच्छाकृत्यादेरुत्पत्त्यसंभवात्। एवं सिद्ध्या-त्मकधूमपरामर्शोत्तरमुत्पन्नेनापेक्षाबुद्ध्यात्मकालोकपरामर्शेन जनि-तायां वह्न्यनुमितौ व्यभिचारात्। ज्ञानादिनाशं प्रति लाघवेन स्वोत्तरोत्पन्नत्वेनैव जनकतया धूमपरामर्शोत्तरजातसंयोगादेरपि तन्नाशकतया तद्विशिष्टायामालोकादिलिङ्गकानुमितावपि व्यभिचा-राच्च। अत एव धूमपरामर्शनाशकानुमितित्वावच्छिन्नं प्रत्येव वह्नि-व्याप्यधूमवत्तानिश्चयत्वेन हेतुत्वं [न च विनश्यदवस्थधूमपरा-मर्शजन्यानुमित्यसंग्रहः तत्र विशिष्टस्यैव तत्तत्परामर्शानुमितिव्य-क्तीनां कार्यकारणभावस्वीकारात्तदतिरिक्तस्थल एवोक्तानुगतरू-पेण हेतुत्वसंभवात्] न च विनश्यदवस्थपरामर्शजन्यानुमितिदशा-

यामपि परामर्शनाशकानुमित्यापत्तिः सामग्र्यसत्त्वादिति वाच्यं कार्यमहवृत्तित्वेनैव धूमपरामर्शनाशकानुमितौ तादृशपरामर्शत्वेन हेतुत्वस्यौक्तत्वादित्यपि निरस्तम् । धूमपरामर्शव्यधिकरणानुमितिव्यक्तीनामपि स्वोत्तरोत्पन्नत्वेन तादृशपरामर्शनाशकतया तत्रैव व्यभिचारादिति । नव्यास्तु वह्निव्याप्यधूमवत्पर्वतनिश्चयविशिष्टानुमितिं प्रत्येव तादृशनिश्चयत्वेन हेतुत्वम् वैशिष्ट्यं च तत्र स्वसामानाधिकरण्यस्ववृत्तिप्रागभावप्रतियोगित्वोभयसंबन्धेन ग्राह्यम् वृत्तिरपि कालिकी निवेश्येति नोक्तलक्षणस्यासंभवः न च विनश्यदवस्थपरामर्शजन्यानुमित्यसंग्रहः तत्तदनुमितौ परामर्शव्यक्तीनां विशिष्यैव हेतुत्वान्तरस्य वक्तव्यत्वात् वस्तुतो वह्निव्याप्यधूमवत्पर्वतनिश्चयविशिष्टकृतिमदनुमितिं प्रत्येव तादृशनिश्चयत्वेन हेतुत्वं वाच्यम् तेन विनश्यदवस्थपरामर्शस्थलीयानुमितेर्नासंग्रहः अत्र च निश्चयस्य वैशिष्ट्यं पूर्ववत् स्वसामानाधिकरण्यस्ववृत्तिप्रागभावप्रतियोगित्वोभयसंबन्धेन निवेश्यम् तादृशकृतिमत्त्वं तु सामानाधिकरण्यसंबन्धेन वाच्यमतो न कोपि दोषः सर्वत्र जीवनयोनियत्नमादायैव कार्यतावच्छेदकसंपत्तेः न च यत्र धूमपरामर्शोत्तरं तद्धर्मिकाप्रमाण्यग्रहात्मकालोकपरामर्शस्योत्पाददशायां बाधादिनिश्चयस्य ध्वंसः तदुत्तरवह्न्यनुमितेरपि निरुक्तकृतिमदनुमितित्वात्तदव्यवहितप्राक्काले चाप्रामाण्यज्ञानाभावविशिष्टधूमपरामर्शस्यासत्त्वाद्व्यभिचार इति वाच्यम् अप्रामाण्यज्ञानव्यक्तीनामपि विशेषत एवोत्तेजकतया तत्रत्यतद्यत्नेरनुत्तेजकत्वेपि क्षत्यभावादेवं च परामर्शधर्मिकाप्रामाण्यज्ञानाभावकूटस्य स्वातन्त्र्येणानुमितिप्रयोजकत्वमेवेति वह्निव्याप्यधूमवत्तानिश्चयविशिष्टकृतिमत्त्वावच्छिन्नं प्रत्येव तादृशनिश्चयत्वेन हेतुत्वादनुमितित्वस्य जन्यतानवच्छेदकत्वात् जातिघटिततयोक्तलक्षणस्यासम्भवः स्यादतः स्वयं लक्षणमाह यां कांचिदित्यादिनेति प्राहुः । यत्तु वह्निव्याप्यधूमवत्पर्वतनिश्चयत्वपदेन मानसत्वव्याप्यपरामर्शत्वजातिरूपलक्षितेति तदवाच्छिन्नकारणतामन्तर्भाव्यैवोक्तलक्षणसंभवः प्राग्ननुभूतसाध्यादिपरामर्शादनुमित्युत्पत्त्या च परामर्शत्वजोतर्न स्मृतित्वव्याप्यत्वशङ्कापीति मतम् तत्तुच्छम् । निश्चयत्वान्तेन परामर्शत्वजात्युपलक्षणे व्याप्यविषयकवृत्तीत्यस्य ज्ञानवृत्तिरि-

(१) 'स्थलीया' (२) 'व्याप्यवत्तया तादृशनिश्चय' (३) 'स्वमते'

त्यादेश्च व्यर्थतापत्तेः।न वा परामर्शत्वस्य जातित्वे प्रमाणमस्ति।तुल्य-न्यायतयोपायेच्छाप्रवृत्त्यादिजनकतावच्छेदकत्वेन सिद्धयेष्टसाधनता-ज्ञानत्वादिजात्या सांकार्यात्। किं चानुमितित्वावच्छिन्नं प्रति ज्ञान-त्वेनैव हेतुत्वसंभवात्तादृशजातौ मानाभावः। घटाद्यावरण्यखण्डा-वेरिवानुमितौ ज्ञानमात्रस्य स्वरूपयोग्यत्वेपि क्षतिविरहात्। किं चानु-मितिसामान्यं प्रति परामर्शत्वजात्या हेतुत्वस्वीकारेपि वह्न्यनुमि-तित्वाद्यवच्छिन्नं प्रत्यनुगतनियामकाभावः। वह्निविषयकपरामर्शत्वेन तत्र हेतुत्वे वह्निविषयकाद्धटादिसाध्यकपरामर्शादपि वह्न्यनुमिति-प्रसङ्गात्। न च पर्वतधर्मिकवह्न्यनुमितित्वस्य कार्यतानवच्छेद-कत्वात्तदवच्छिन्नस्योत्पत्तावापादकाभावः।तादृशानुमितित्वस्यापि प-रामर्शधर्मिकाप्रामाण्यज्ञानाभावस्य पक्षतावि शेषस्य वा कार्यता-वच्छेदकत्वेन तदवच्छिन्नस्यापत्तिसंभवात्। इदं त्ववधातव्यम् पर्व-तधर्मिकवह्न्यनुमितित्वावच्छिन्नं प्रति जनकतावच्छेदकतया धूमा-लोकादिनानाहेतुकवह्नि[व्याप्य]परामर्शसाधारणी भ्रमत्वज्ञानास्कान्दि तव्याप्यवत्त्वनिश्चयावृत्ति]मानसत्वव्याप्या परामर्शत्वजातिः [कदा चित्] कल्पयितुं शक्यत एव यदि चाक्षुषादिपरामर्शात् क्षणविलम्बेनै-वानुमितिर्द्रव्यत्ववह्न्योः साध्ययोः समूहालम्बनपरामर्शाद्वा द्रव्यत्व-वह्न्योर्नानुमितिः किं तु प्रत्येकस्यैव परामर्शादन्यथा तदुभयजनकता-वच्छेदकजात्योस्तत्रैव संकरापत्तेः [एतेन धूमादिलिङ्गकत्वमेव धूमा-दिपरामर्शजन्यतावच्छेदकं तच्चानुमितित्वव्याप्यवैजात्यमित्यपि मतं व्याख्यातम्] इति दिक्। केचित्तु वह्निव्याप्यधूमवत्पर्वतनिश्चय-त्वेनैव हेतुत्वं जन्यता तु तादृशधूमविशिष्टपर्वतधर्मिकवह्न्यनुमिति-त्वेनैव न च धूमवत्पर्वतधर्मिकवह्न्यनुमितित्वेनैव लाघवादस्तु जन्य-तेति वाच्यम् नानाविधव्याप्तेरनुमित्युपयोगितया जनकज्ञानवि-षयीभूतव्याप्तीनां विशिष्यानुमितौ कार्यतावच्छेदकत्वादेकविधव्या-प्तेरेवानुमितिप्रयोजकत्वे तु धूमवत्पर्वतत्वावच्छिन्नधर्मिकवन्ह्यनुमि-तित्वेनैव जन्यत्वं वक्तव्यम् लिङ्गोपधानस्याचार्यसंमतत्वेन तस्यैव परामर्शजन्यतावच्छेदकत्वौचित्यात् तथा च पूर्वोक्तलक्षणमेव सम्यक् न चानुमितिमात्रस्य पक्षे हेत्ववगाहित्वे यत्र [बाधकाली-न]परामर्शोत्तरं पक्षे हेत्वभावस्य दोषज लौकिकं वा प्रत्यक्षं तत्रा-नुमितिर्न स्यादिति वाच्यम् इष्टत्वात् न चैवं सति तदानीं तन्मते

प्रत्यक्षानुपादेन साक्षात्कारादिकं प्रत्यनुमितिसामग्र्या विरोधितायां सिद्ध्यभावस्यैव पक्षधर्मिकहेत्वभावनिश्चयाभावस्यापि प्रवेशे गौरवं स्यादिति वाच्यम् मणिकृन्मतेपि यत्र सिद्ध्यंशे भ्रमत्वज्ञानात्मकस्यैव परामर्शस्योत्तरं पक्षे हेत्वभावस्य निश्चयस्तदुत्तरमनुमितेरुत्पत्त्यर्थं सिद्धेरनुमितिविरोधितायां तत्तदप्रामाण्यज्ञानाभावस्य प्रवेशे गौरवस्य तुल्यत्वादस्माकं मते हेत्वभावनिर्णयेन प्रतिबन्धात्तत्रानुमितेरनुत्पत्त्या सिद्धेर्विरोधितायां [घटादेर्विरोधितायां] तत्तदप्रामाण्यज्ञानाभावस्याप्रविष्टत्वात् यत्तु लिङ्गोपधानमते [पक्षे]ऽनुमितिमात्रस्यैव विशिष्टवैशिष्ट्यबुद्धित्वेन तन्निष्ठ साध्यव्याप्यवत्तापरामर्शजन्यत्वं वह्निव्याप्यधूमवत्पर्वतत्वावच्छिन्नविषयताकत्वेनैवावच्छिद्यते तादृशप्रत्यक्षादिसाधारण्येन कल्पनत्वान्न तु वह्निव्याप्यधूमवत्पर्वतधर्मिकवह्न्यनुमितित्वेन कार्यकारणभावान्तरकल्पने गौरवादिति कुतः परामर्शजन्यतावच्छेदकीभूतमनुमितित्वमादाय प्रागुक्तलक्षणसम्भवः न च तत्तत्साध्यकानुमितित्वस्य परामर्शजन्यतानवच्छेदकत्वे वह्निव्याप्यविशिष्टपर्वते वह्नेरनुमितिदशायां घटादेरपि तादृशपर्वतेनुमित्यापत्तिः पर्वतविशेष्यक[घटविधेयकानुमितित्वस्यापि घटसाध्यकपक्षताजन्यतावच्छेदकतया तदवच्छिन्नस्यापादनसंभवादिति वाच्यम् लिङ्गोपधानपक्षे पर्वतधर्मिकघटानुमितिमात्रस्यैव घटव्याप्यवत्पर्वतत्वावच्छिन्नविषयताकत्वनियमेन तदवच्छिन्नं प्रति हेतोर्घटव्याप्यवत्तया पर्वतनिश्चयस्य विरहादेव तदानीं] घटविधेयकानुमित्यसंभवात् व्यापकधर्मावच्छिन्नसामग्रीसहिताया एव विशेषधर्मावच्छिन्नसामग्र्याः कार्यजनकत्वादिति तत्तुच्छम् पक्षतावच्छेदकसामानाधिकरण्येन व्याप्यवत्तापरामर्शात्तदवच्छेदेन साध्यानुमित्यनुत्पत्त्या तदवच्छेदेन साध्यानुमितित्वावच्छिन्नं प्रत्यवश्यं तदवच्छेदेन साध्यव्याप्यवत्तापरामर्शत्वेन हेतुत्वादनुमितित्वस्याप्यवश्यं परामर्शजन्यतावच्छेदकेऽनुप्रवेशात्पर्वतत्वाद्यवच्छेद्यत्वाविशिष्टसंयोगसंबन्धेन वह्निव्याप्यधूमवत्पर्वतधर्मिकवह्न्यनुमितिं प्रति पर्वतत्वाद्यवच्छेदेन वह्निव्याप्यधूमवत्ता[परामर्श]निश्चयत्वेन हेतुतायाः सुवचत्वादित्याहुः।तच्चिन्त्यम्। तद्यक्तीत्यादि। अनुमितिसमवेतत्वोक्तावनुमितित्वप्रवेशे [गौरवमतस्तदप्रवेशे] लाघवं सूचयितुं [प्रथमं] व्यक्तिपदम्। जातीतरस्यापि स्वरूपतः प्रकारतायाः क्वचिदिष्टतया व्यक्तिगतधर्मान्तरस्याभानेपि क्षत्यभावात्। यत्तु अनुमितिसमवेतत्वोक्तावनुमिति-

यित्वमिति वा वक्तव्यम् । अनुभवत्वजातेरनङ्गीकारे तु तद्व्यक्ति-

---

त्वप्रवेशे लघुनस्तस्यैव लक्षणत्वसंभवे शेषवैयर्थ्यापत्तेरतस्तद्व्यक्तित्वेन प्रवेशः कृत इति तन्न । स्वरूपतोनुमितित्वस्य प्रवेशेपि हेतुतावच्छेदकरूपेणाप्रविष्टतया लक्षणत्वासंभवात् प्रत्यक्षत्वमादायातिव्याप्तेर्वारणार्थं[माद्यं समवेतान्तम । प्रत्यक्षत्वस्याप्यनुमितौ कालिकादिसंबन्धेन सत्त्वात्समवेतेति । अनुभवत्वमादाय प्रत्यक्षाद्यतिव्याप्तेर्वारणार्थं]मनुभवत्वान्येति । यद्यप्यनुभवत्वप्रतियोगिकभेदस्यानुभवत्वेपि सत्त्वादुक्तदोषतादवस्थ्यम् अनुभवत्वत्वावच्छिन्नप्रतियोगिताकभेदस्योक्तौ च तद्घटकीभूतं यत्सकलानुभववृत्तित्वं तदवच्छिन्नभेदस्यैव सम्यक्त्वे ज्ञानत्वादिवारकस्यानुभवान्यासमवेतत्वस्य वैयर्थ्यम् । तथाप्यनुभूतिरित्याकारकयत्किंचिद्बुद्धिप्रकारत्वावच्छिन्नभेदस्यैवानुभवत्वान्यपदेनोक्तत्वाददोषः । सकलानुभववृत्तित्वस्य तत्राप्रविष्टत्वात् । बाधनिर्णयादिप्रतिबध्यतावच्छेदकतया परोक्षत्वजातेः प्रामाणिकत्वे सकलानुभववृत्तिभिन्नां तादृशजातिमादाय शाब्दबोधादावतिव्याप्तिवारणार्थमनुभवान्यासमवेतपदस्यावश्यकत्वाच्चेति ध्येयम् । [ज्ञानत्वादिवारणार्थमनुभवान्यासमवेतेति ।] अनुमितित्वस्यापि कालिकादिसंबन्धेनानुभवादन्यत्र वृत्तेः समवेतत्वप्रवेशः । तादृशधर्मात्मकस्यानुमितित्वस्य कालिकादिसंबन्धेनेतरभेदव्यभिचारित्वात्समवायेन तस्य हेतुत्वलाभार्थं समवायित्वमुक्तम् ॥ ननु स्वर्गाद्यनुमितौ स्वर्गमनुभवामीत्यनुव्यवसायविरहात्साक्षात्कारत्वमेवानुभवत्वं तथा चानुभवत्वान्येत्यस्य वैयर्थ्यमेव तद्व्यक्तिसमवेतदलेनैव प्रत्यक्षत्ववारणात् तत्परित्यागेप्यनुमितित्वमप्यनुभवान्यसमवेतमित्यसंभवः तत्र अनुभवपदस्य स्मृत्यन्यज्ञानपरत्वे च स्मरणान्यज्ञानभिन्नासमवेतत्वं फलितार्थमपेक्ष्य स्मरणासमवेतत्वमेव लघुतरं निवेशयितुमुचितमित्याशयेनाह अनुभवत्वेत्यादि । नव्यास्तु यां कांचिदनुमितिव्यक्तिमित्यस्यानुमितिः स्मृतिभिन्ना इत्याकारकानुमितिव्यक्तिमित्यर्थः तद्व्यक्तिसमवेतेत्यस्य च तस्यास्तादृशानुमितिव्यक्तेर्या व्यक्तिर्विषयतासंबन्धेन आश्रयस्तत्समवेतेत्यर्थः तथा चानुभवत्वमादाय प्रत्य-

---

(१) 'मनुभवान्यासमवेतेति काश्चित्' ।

समवेतस्मरणासमवेतधर्मसमवायित्वं वक्तव्यम् । व्याप्तिज्ञानत्वावच्छिन्नकारणतानिरूपितयोगिककार्यतावच्छेदकावच्छिन्ना या विशिष्टपरामर्शत्वावच्छिन्नकारणतानिरूपितयोगिककार्यता तत्समानाधिकरणानुभवत्वव्याप्यजातिमत्त्वं तत्त्वमित्यपि केचित् । परे तु

ज्ञानादावतिव्याप्तिवारणायानुभवत्वान्येति सकलानुभववृत्तिभिन्नमात्रार्थकम् तादृशानुमितिविषयनिष्ठस्य स्मृतित्वस्य वारणार्थमनुभवान्यासमवेतेति अथानुभवत्वं न जातिः किं तु स्मृत्यन्यज्ञानत्वं तथा च तदन्यत्वस्य निवेशो व्यर्थः एवं स्मृत्यन्यज्ञानभिन्नासमवेतत्वस्वरूपमनुभवान्यासमवेतत्वमपेक्ष्य स्मरणासमवेतत्वं लघुतरं तावतैव स्मृतित्वस्य वारणसंभवादत आह अनुभवत्वेतीति प्राहुः । ज्ञानत्वादिवारणाय स्मरणासमवेतेति । यद्यपि प्रत्यक्षासमवेतेत्युक्तापि तद्वारणसंभवः । तथापि प्रत्यक्षासमवेतत्वघटितनिरुक्तेरनुभवत्वजात्यङ्गीकारेऽनङ्गीकारे चोभयथैव सम्यक्[मेतस्य तु तदनङ्गीकारे एव सम्यक्]मिति विशेषः ॥ [चक्रवर्तिलक्षणमाह] व्याप्तीत्यादि । व्याप्यविशिष्टवैशिष्ट्यबुद्धिवारणार्थमवच्छिन्नान्तं कार्यतावि शेषणम् । व्याप्तिविशिष्टबुद्धिवारणाय परामर्शत्वावच्छिन्नेत्यादि । यद्यपि धूमलिङ्गकवह्न्यनुमितित्वमेव धूमघटितव्याप्तिज्ञानस्य जन्यतावच्छेदकं तदवच्छिन्नं प्रति च न वह्निव्याप्यधूमवत्पर्वतनिश्चयत्वेन हेतुत्वं धूमलिङ्गिकायां महानसं वह्निमदित्याद्यनुमितौ व्यभिचारात् किं तु पर्वतपक्षकतादृशानुमितित्वावच्छिन्नं प्रत्येव तथात्वेन हेतुत्वं तथा चैकावच्छेदेन व्याप्तिज्ञानपरामर्शोभयजन्यत्वाभावादनुमितावसंभवः । तथापि धूमघटितव्याप्तिज्ञानस्य स्वजन्यपरामर्शद्वारानुमितिकारणतायां धूमलिङ्गकपर्वतपक्षकवह्न्यनुमितित्वस्यैव कार्यतावच्छेदकत्वादेकावच्छेदेनोभयजन्यत्वसंभवः । अन्यथा धूमगतव्याप्त्यवगाहिना वह्निव्याप्यालोकपरामर्शेन जनितायां पर्वतो वह्निमानित्यनुमितौ व्यभिचारेण स्वजन्यपरामर्शद्वारा धूमीयव्याप्तिज्ञानस्यानुमितिकारणत्वानुपपत्तेरित्याशयः । जन्यतावच्छेदकावच्छिन्नान्तभागस्य तादृशव्याप्तिज्ञानजन्यतावच्छेदकधर्मघटितरूपावच्छिन्नार्थकत्वाददोष इत्यप्याहुः । अत्र पूर्वोक्तयुक्त्यानुमितौ परामर्शत्वेन

पक्षधर्मतेत्यत्र पक्षता विशेषणम् तथाच पक्षतासहकृततादृश-परामर्शजन्यत्वमर्थः यथोक्तायां विशेष्याद्यभावरूपाया वा पक्षतायाः प्रत्यक्षवारणाय परामर्शस्योपादानम् तत्त्वेन जनकत्वमेकावच्छेदेन तदुभयजन्यत्वञ्च विवक्षितम् तेन बाधादि-

---

हेतुत्वासंभवो न वा व्याप्तिज्ञानत्वेन तथात्वमनुमितिसामान्ये ज्ञानत्वेन हेतुत्वस्याग्रे व्यवस्थाप्यत्वादित्यस्वरसः केचिदित्यनेन सूचितः ॥ मिश्रमतमाह परे त्विति। पक्षताजन्यत्वस्य शब्दाल्लाभार्थमाह विशेषणमिति। ज्ञानरूपविशेष्यान्वयि यज्जन्यत्वं तेनान्वितमित्यर्थः । पक्षधर्मताज्ञानेत्यत्र पक्षतावद्वृत्तित्वघटकतया सहकृतत्वसंबन्धेन साक्षादेव वा पक्षत्वं ज्ञाने विशेषणमिति भावः । यथोक्तायां इति । विशिष्टाभावरूपायाः पक्षतायाः प्रत्यक्षस्य वारणायेत्यर्थः । ननु विशिष्टाभावरूपायाः पक्षतायाः कालाद्यतीन्द्रियघटितत्वान्न स्वगोचरप्रत्यक्षहेतुत्वमत आह विशेष्येति । विशेष्यं सिद्धिस्तथा च यत्पक्षसाध्यस्थले सिद्धिदशायां कदाप्यनुमितिर्न जाता तत्र सिद्धयभावमात्रं पक्षता. सा च योग्यत्वात्प्रत्यक्षहेतुरेवेति तत्रैवातिव्याप्तिरिति भावः । ननु पक्षविशेष्यकसाध्यप्रकारकनिर्णयत्वमेव सिद्धित्वं तदवच्छिन्नाभावश्च न योग्यो निश्चयत्वस्यातीन्द्रियश्वरज्ञानादिघटितत्वात्तादृशनिश्चये चाप्रमाणयज्ञानाद्यनास्कन्दितत्वप्रवेशे सुतरामयोग्यत्वमत आह आदीति । विशेषणाभावरूपाया वेति तदर्थः । तथा च यत्र स्थलविशेषे सिद्धिकालीनपरामर्शसमानकालीनैकविधानुमित्सयैवानुमितिर्जनिता तत्र विशेषणाभावरूपा तादृशानुमित्सैव पक्षतेति तत्प्रत्यक्षेतिव्याप्तिवारणार्थं परामर्शोपादानमिति भावः । तत्त्वेनेति । परामर्शत्वेनेत्यर्थः । तत्त्वेन जनकतयाः फलमाह तेनेति । बाधादीत्यादिना सत्प्रतिपक्षसंग्रहः । तथा च तदानीमनुमितिसामग्र्यभावान्न तत्संभावनापीति। प्रतियोगीति । पक्षतायाः प्रतियोगिनी या सिद्धिस्तद्विषयकेनेत्यर्थः। तथा च[सिद्धयभाव]लौकिकप्रत्यक्षत्वरूपैकधर्मावच्छिन्नं प्रत्येव विषयविधया सिद्धयभावस्य सिद्धित्वरूपप्रतियोगितावच्छेदकप्रकारकप्रतियोगिज्ञान[त्वेन च परामर्शस्य हेतु]त्वमिति भावः।

कालीनेन दैवात् प्रतियोगिविषयकेण परामर्शेन जन्ये पक्षतायाः प्रत्यक्षे तदुभयसमूहालम्बने वा नातिप्रसङ्गः तद्वृत्त्यनुभवत्वव्याप्यजातिमत्त्वविवक्षया च नाव्याप्तिरित्याहुः। तच्चिन्त्यम्॥

एकावच्छेदेनेत्यस्य फलमाह तदुभयेति। पक्षतापरामर्शोभयेत्यर्थः। न च परामर्शप्रत्यक्षे विषयत्वादिनैव तस्य हेतुत्वम् न तु परामर्शत्वेनेति प्रागुक्तम् तथा च तत्त्वेन जनकत्वविवक्षयैव समूहालम्बनव्युदासः संभवतीति वाच्यम्। वह्निव्याप्यधूमवत्पर्वतं जानामीत्याकारकस्य परामर्शानुव्यवसायस्य ज्ञानधर्मिकव्याप्यविशिष्टवैशिष्ट्यबुद्धितया तत्र पर्वतधर्मिकव्याप्यप्रकारकनिश्चयत्वेन हेतुत्वस्यावश्यकत्वात्। यद्यपि पक्षताजन्यतावच्छेदकं तत्पक्षकतत्साध्यकानुमितित्वम् तच्च न परामर्शजन्यतावच्छेदकं तल्लिङ्गकत्वस्याप्यधिकस्य तत्र प्रवेशादित्येकावच्छेदेन तदुभयजन्यत्वमनुमितावप्यसिद्धं तथापि पक्षताजन्यतावच्छेदकघटितधर्मावच्छिन्नं परामर्शजन्यत्वं विवक्षितम् पक्षतायां अपि लिङ्गविशेषनियन्त्रितत्वमग्रे वाच्यमतो वा नोक्तदोषः। वस्तुतो विषयतासंबन्धेनैव तदुभयजन्यतयोरवच्छेदकस्यैक्यं वाच्यम् तथा च विषयविधया परामर्शजन्यतावच्छेदकस्य वह्निमत्पर्वतस्य, पक्षताजन्यतायामपि विषयतयावच्छेदकत्वान्नोक्तदोषः। एतेन पक्षताजन्यत्वेत्यत्राभावजन्यत्वमेव लाघवात्प्रवेशयितुमुचितं विशिष्टवैशिष्ट्यबोधस्य ग्राह्याभावनिश्चयाभावजन्यत्वेपि धर्मितावच्छेदकनियन्त्रितस्य तज्जन्यतावच्छेदकत्वस्य विशेषणतावच्छेदकप्रकारकनिश्चयजन्यतानवच्छेदकत्वादेकावच्छेदेनाभावपरामर्शोभयजन्यत्वाभावादेव तत्रातिव्याप्त्यसंभवादिति परास्तम्। विषयविधया बाधनिश्चयाभावजन्यतावच्छेदकस्यैव विषयतया विशेषणतावच्छेदकप्रकारकनिश्चयजन्यतावच्छेकतया तत्रैवातिप्रसङ्गापत्तेरिति दिक्। नाव्याप्तिरिति। अन्यथैकसाध्यादिकमन्तर्भाव्य परामर्शद्युपादानेऽन्यसाध्यकानुमितावव्याप्तिः स्यादेवेति भावः। तच्चिन्त्यमिति। पूर्वोक्तयुक्त्या परामर्शत्वेनानुमितिहेतुत्वमेव नास्ति पक्षतायाश्च हेतुत्वमग्रे स्वयं निराकर्तव्यमित्यादिकमत्र चिन्ताबीजम्॥

तत्करणमिति । न च व्याप्त्यादिज्ञानजन्यज्ञानकरणत्वेनेतरभेदसाधने व्याप्तिज्ञानत्वं तादात्म्यसम्बन्धेन व्याप्तिज्ञानमेव वा गमकं व्याप्तेरननुगमेऽपि अधिकस्य भागासिद्धवारणमात्रप्रयोजनत्वादिति वाच्यम्। फलोपहितस्य लक्ष्यतया व्याप्तिज्ञानत्वादेरतिप्रसक्तत्वात्। करणत्वनिष्ठव्याप्तेस्तादृशज्ञानत्वत्वाद्यनवच्छेद्यत्वात्। व्यतिरेकव्याप्तेर्गमकतया वैयर्थ्यशङ्कानवकाशाच्चेति॥

न चेति । वाच्यमित्यग्रिमेणान्वयः । व्याप्तिज्ञानत्वमिति । व्याप्तिप्रकारकज्ञानत्वमित्यर्थः । न च परामर्शजन्यज्ञानकरणत्वरूपेऽनुमानलक्षणे व्याप्तिज्ञानत्वत्वेन तस्याप्रवेशान्न वैयर्थ्यमिति वाच्यम्। व्याप्तिप्रकारकनिश्चयत्वावच्छिन्नकारणताघटितनिरुक्तेस्तद्घटितमूर्तिकत्वात्। व्यापकताविशेषात्मनः कारणत्वस्य तादृशनिश्चयत्वत्वेन निश्चयत्वग्रहं विना दुर्ग्रहत्वादिति भावः । तादृशनिश्चयवदन्यावृत्तितत्कत्वरूपव्याप्तेः कारणताघटकत्वे त्वाह व्याप्तिज्ञानमेवेति । व्याप्तिप्रकारकज्ञानमेवेत्यर्थः । ननु साध्यादिभेदेन व्याप्तेर्विभिन्नतया व्याप्तिज्ञानत्वादिकमनुमानमात्रस्य पक्षत्वे भागासिद्धमतो व्याप्तिविशिष्टज्ञानजन्यवृत्त्यनुभवत्वव्याप्यजातिमत्करणत्वं हेतुः कर्तव्यमत आह व्याप्तेरिति । अधिकस्य तादृशजातिमत्करणत्वस्य । भागासिद्धीति । तथा च व्यभिचारावारकत्वाद्वैयर्थ्यमिति भावः ॥ फलेति । अनुमितिरूपं यत्फलं तदुपधायकस्यैव लक्ष्यतया स्वेतरभिन्नत्वेन ज्ञाप्यतया व्याप्तिज्ञानत्वस्यानुमित्यनुपधायकवृत्तित्वेन व्यभिचारित्वान्न हेतुत्वमतस्तादृशजातिमत्फलोपहितकरणत्वमेव हेतूकृतमिति भावः ॥ स्वरूपयोग्यस्य लक्ष्यत्वेपि न क्षतिरित्याशयेनाह करणत्वेति । तथा च धर्मिभेदान्न वैयर्थ्यमिति भावः ॥ ननु [अनुमिति]करणत्वं करणतावच्छेदको धर्मः स च प्रकृते व्याप्तिज्ञानत्वमेवेति न धर्मिभेदसंभव इत्यत आह व्यतिरेकेति । व्यतिरेकिस्थले साध्याभावस्यैव हेत्वभावव्याप्यताग्रहान्न वैयर्थ्यशङ्केति भावः ॥

अथ अनुमानस्वरूपम् ।

तच्च लिङ्गपरामर्शो न तु परामृश्यमाणं लिङ्गमिति वक्ष्यते ॥

अथ अनुमानस्वरूपम् ।

लिङ्गस्य नित्यत्वेप्यनुमितिकरणस्य स्वरूपतः प्रत्यक्षोपजीवकत्वं व्यवस्थापयन्नाह तच्चेति। अनुमितेर्ज्ञानाकरणकज्ञानत्वेन प्रत्यक्षमितिमध्यनिवेशे तत्करणस्यापि प्रत्यक्षप्रमाणान्तर्भावः स्यादिति तन्निरस्यति तच्चेत्यपि कश्चित् ॥

अथ अनुमानस्वरूपम् ।

तच्चेत्यादि मूलस्य लक्षणपरीक्षयोरनुपयोगादन्यथा तदुत्थापयति लिङ्गस्येति । अनित्यलिङ्गानामहष्टादिद्वारा कदाचिदिन्द्रियोपजीवकत्वसंभवान्नित्यत्वेपीति पर्यन्तमनुसृतम् । अनुमितिकरणस्य तत्सामान्यस्यं । ज्ञानेति ॥ ज्ञानाकरणकज्ञानवृत्त्यनुभवत्वव्याप्यजातिमत्त्वमर्थः । तेन विशिष्टवैशिष्ट्यादिप्रत्यक्षे नाव्याप्तिः । साक्षात्कारत्वादिस्वरूपलक्षणान्तरस्य ज्ञानहेतुकस्यैवोपरिकानुमानस्य च संभवान्नेदं युक्तमित्यस्वरसेन कश्चिदित्युक्तम् । ननु तादृशजातिमत्करणत्वहेतुनेतरभेदसाधने जातिमदन्तभागो व्यर्थः चक्षुरादेरप्यनुमानतया करणत्वमात्रस्यैव हेतुत्वसंभवादित्यतस्तच्चेत्यादिमूलमिति नव्याः । केचित्तु लिङ्गस्य करणत्वे जगत एवानुमानतया तदितराप्रसिद्ध्या कथमुक्तलक्षणस्येतरभेदानुमापकत्वमतस्तच्चेत्यादीति प्राहुः । तच्चिन्त्यम् । कार्यमात्रं प्रत्यकारणपरिमाण्डल्यादावेवानुमितिकारणेतरत्वस्य प्रसिद्धिसौलभ्यादाचार्यमतेपि तच्चेतुकानुमितौ परामर्शस्यैव कारणत्वादिति दिक् ॥

---

(१) ज्ञानकरणकावृत्त्यनु ' (२) इदमनवधानमूलकम् ।

अथ अनुमानप्रामाण्यम् ।

अथानुमानं न प्रमाणं योग्योपाधीनां योग्यानुपलब्ध्याभावनिश्चये ऽप्ययोग्योपाधिशङ्कया व्यभिचारसंशयात् शतशः सहचरितयोरपि व्यभिचारोपलब्धेश्च लोके धूमादिदर्शनानन्तरं वह्न्यादिव्यवहारश्च सम्भावनामात्रात् संवादेन च

अथ अनुमानप्रमाण्यम् ।

अनुमानप्रामाण्यं परीक्षितुं चार्वाकमतमुत्थापयति अथेति। अनुमानमनुमानत्वेनाभिमतं धूमादिज्ञानम् असत्ख्यात्युपनीतमनुमानमेव वा। संवादेन संवादाभिमानेन। सम्भावितस्यासतोऽनुगताकारस्य परमार्थसत्स्वलक्षणमात्रसाक्षिणाध्यक्षेणानुल्लेखात् अध्यक्षमूलकविकल्पोल्लिखितत्वाद्वा संवादः। अनुमानाप्रमाण्ये च

अथ अनुमानप्रमाण्यम् ।

बौद्धस्यानुमानत्वाप्रसिद्ध्या तादूप्येण पक्षत्वासंभवाद्याचष्टे अनुमानत्वेनेति । अनुमानत्वाप्रसिद्ध्या तदभिमतत्वमपि तथेत्यतो विशिष्याह धूमेति । अनुमानशब्दस्य लाक्षणिकत्वापत्तेः कल्पान्तरमाह असदिति । पारमार्थिके धूमादिज्ञानेऽसतोनुमानत्वस्य संबन्धायोगात् अनुमितिकारणत्वविशिष्टस्यालीकान्तरत्वेदवासत्त्वमिति भावः ॥ निर्विकल्पकसमानविषयकत्वरूपसंवादस्य संभावनायामसंभवादाह संवादाभिमानेनेति ॥ संवादासंभवे बीजमाह संभावितस्येति । असत इत्यत्रैव हेतुरनुगताकारस्येति। वह्नित्वाद्यनुगतधर्मवत इत्यर्थः । अध्यक्षेणानुगताकारस्यानुल्लेखे

---

(१) 'मानाप्र' 'मित्यप्र'

प्रामाण्याभिमानादिति नाप्रत्यक्षं प्रामाणमिति। न । अप्रमाणसाधर्म्येणाप्रामाण्यसाधने दृष्टसाधर्म्यस्यानुमानत्वात् । एतद्वाक्यस्य सन्दिग्धविपर्यस्तान्यतरं प्रत्यर्थवत्त्वात् । तयोश्च परकीययो-

---

तन्मूलकसमयनिर्णयाद्यधीनप्रवृत्तिकयोः शब्दोपमानयोः सुतरामप्रमाण्यान्नाप्रत्यक्षं प्रमाणमित्याह इतीत्यादि ॥ अप्रमाणसाधर्म्येण प्रमाणताप्रयोजकरूपशून्यत्वेन दृष्टसाधर्म्यस्य

हेतुगर्भविशेषणमाह परमार्थेत्यादि । परमार्थसत्स्वमेव लक्षणं व्यावर्तकं यस्य तन्मात्रसाक्षिणेत्यर्थः । परेषामभेदेनैव धर्मधर्मिभावादिति भावः॥ विकल्पद्वयेपि परस्परसंवादव्यवहारात्प्रकारान्तरेण संवादपदार्थं निरुच्याह अध्यक्षेत्यादि । संभावितस्य [इत्यर्थ इ]त्यनुषज्यते । तथा च संभावितस्याध्यक्षमूलकविकल्पोल्लिखितत्वादध्यक्षमूलकविकल्पविषयकत्वरूपः संवादः संभावनायामस्त्येवेति भावः । विकल्पसमानविषयकत्वस्यानादिवासनामूलके शशशृङ्गादिविकल्पेऽतिप्रसक्तत्वादध्यक्षमूलकत्वेन विकल्पो विशेषितः ॥ समयादीनां ज्ञानमात्रस्योपयोगे तत्संभावनासहकारेणैव शब्दादेः प्रामाण्यं स्यादत उक्तं निर्णयेति । आदिना तात्पर्यनिर्णयादेः परिग्रहः ॥ अप्रमाणसाधर्म्येण हेतुतायां चक्षुरादौ व्यभिचारादाह प्रमाणतेति । न चेन्द्रियत्वमिव व्याप्तिनिश्चयत्वमपि प्रमाणताप्रयोजकम् अतस्तत्सामान्यशून्यत्वं पक्षे स्वरूपासिद्धमिति वाच्यम् । योग्योपाधीनामित्यादिग्रन्थोक्तक्रमेण क्वचिदपि व्याप्तिनिश्चयस्यासम्भवेन तत्त्वस्य प्रमाणताप्रयोजकत्वासंभवादिति भावः ॥

---

(१) 'तात्पर्यादेः'

रप्रत्यक्षत्वात् । अनुमानमप्रमाणमिति वाक्यस्य प्रामण्याप्रामाण्ययोर्व्याघातश्च । अपिचानुमानाप्रामाण्ये प्रत्यक्षस्याप्यप्रमाणत्वापत्तिः। प्रामाण्य-

---

साधर्म्यदर्शनस्य वा ॥ नन्वभिहितमेव साधर्म्यदर्शनं सम्भावनां भावयति सम्भावनैनैव च बहुशो व्यवहारहेतुरित्यत आह अनुमानमिति । ननु न वयमापाततो भ्रमजनकत्वलक्षणमप्रामाण्यं निरूपयामो येन भूमस्य विषयबाधाधीनतया प्रामाण्यं सम्भाव्येतापि परन्तु प्रमाकरणत्वव्यतिरेकमत आह अपि चेति ॥ स्वत इति। न चानुगताकारासंस्पर्शिनि परमार्थसत्स्वलक्षणसाक्षिणि स्वसंवेदनसंविदितप्रामाण्ये निर्विकल्पकज्ञाने नाप्रामाण्यं सन्दिह्यते परन्तु तदुत्तरभाविनि समुल्लिखितालोकानुगताकारे

मणिकृता लिङ्गस्यानुमानत्वनिरासात्तन्मते पूरयति साधर्म्यदर्शनस्येति ॥ अभिहितमेवेत्येवकारः संभावनामित्यनन्तरं योज्यः । तथा चाभिहितं यत्साधर्म्यदर्शनं प्रमाणताप्रयोजकरूपशून्यत्वदर्शनरूपं तत्संभावनमनुमानेऽप्रमाण्यस्य संभावनामेवोत्पादयति न त्वनुमितिम् । यतोनुमानेनैव तदप्रामाण्यसाधने व्याघातः स्यादिति भावः । बहुश इति । तथा च परकीयसंदेहादिकमपि संभाव्यैव तदुच्छेदाय शब्दः प्रयोक्तव्य इति न द्वितीयोपि दोष इति भावः ॥ यावदसत्ख्यातिर्न व्यवस्थाप्यते तावदेव भ्रमजनकत्वरूपमप्रमाण्यं नोच्यते तस्याः सिद्धौ तु भ्रममात्रस्यैवासत्ख्यातिरूपत्वादनुमानं न प्रमाणमिति वाक्यस्य भ्रमजनकत्वसिद्धावप्यनुमानस्य न प्रामाण्यसिद्धिरित्याशयेनोक्तमापातत इति ॥ न चेति । वाच्यमिति परेणान्वयः ।

---

(१) 'तस्मात्'

स्यानुमेयत्वात् । स्वतश्च प्रामाण्यग्रहे तत्संशयानुपपत्तेः ॥

व्याप्तिग्रहोपायश्च वक्ष्यते ।

सविकल्पक एवेति वाच्यम् । निर्विकल्पकस्य सन्मात्रावलम्बनत्वसविषयत्वप्रामाण्यावगाहित्वानामनुमानाधीनसिद्धिकत्वाद् ॥

सर्वमिदं सति व्याप्तिनिश्चये स्याद् स एव तु न संभवत्युपायाभावादित्यत आह व्याप्तीति ॥

सन्मात्रावलम्बनत्वम् सदन्याविषयकत्वम् प्रामाण्यावगाहित्वं [सद्विषयकत्वावगाहित्वम्] न च सन्मात्रावलम्बनत्वादेरपि स्वानतिरिक्तत्वादनेनैव स्वग्रहसंभवः । तस्यास्तद्घटितमूर्तिकत्वेनातिरिक्तत्वात् । संभावनया चाध्यक्षनिष्ठस्य सन्मात्रावगाहित्वादेर्ग्रहे तेषामप्रामाणिकत्वापत्तेः । संभावनामात्रस्यैवाप्रमात्वादिति भावः ॥

[इदम् अनुमानप्रामाण्यदूषणादिकम् । व्याप्तिनिश्चये सतीति । व्याप्ति निश्चयत्वं प्रमाणताप्रयोजकरूपम् । तच्छून्यत्वं पक्षे नास्तीति स्वरूपासिद्ध्यानुमानप्रामाण्यं न साधयितुं शक्यत इति भावः ॥]

इति जगदीशतर्कालंकारविरचितानुमितिदीधितिविष्पणी ॥

---

(१) 'स्वात् स्वतश्च ग्रह' (२) 'च साध्यनि' (३) इति श्रीजगदीशतर्कालङ्कारभट्टाचार्यविरचितायामनुमानदीधितिटीकायामनुमानप्रामाण्यादि समाप्तम् ॥

चिन्तामणेः पञ्चलक्षणप्रकरणम् ॥

नन्वनुमितिहेतुव्याप्तिज्ञाने का व्याप्तिः । न तावदव्यभिचरितत्वम् । तद्धि न साध्याभाववदवृत्तित्वं साध्यवद्भिन्नसाध्याभाववदवृत्तित्वं साध्यवत्प्रतियोगिका-

शिरोमणिकृतदीधित्याः पञ्चलक्षणप्रकरणम् ॥

समारब्धानुमानप्रामाण्यपरीक्षणकारणीभूतव्याप्तिग्रहोपायप्रतिपादननिदानं व्याप्तिस्वरूपनिरूपणमारभते नन्वित्यादिना ॥ साध्याभाववदवृत्तित्वस्याव्याप्यवृत्तिसाध्यकसद्धेतावव्याप्तिमाशङ्क्याह साध्यवद्भिन्नेति । साध्यवद्भिन्ने यः साध्याभावस्तद्वदवृ-

जागदीश्याः पञ्चलक्षणप्रकरणम् ॥

समारब्धेति । समारब्धं यदनुमानप्रामाण्यपरीक्षणं तत्कारणीभूतं यद्व्याप्तिग्रहोपायप्रतिपादनं तन्निदानं व्याप्तिस्वरूपनिरूपणमित्यर्थः । तथा च प्रामाण्यव्यवस्थापनोपोद्घातसङ्गत्या व्याप्तिस्वरूपनिरूपणमिति भावः ॥ अव्याप्यवृत्तीति । कपिसंयोगी एतद्वृक्षत्वादित्यादावव्याप्तिरित्यर्थः । इदं च येन रूपेण येन सम्बन्धेन च साध्यत्वं तदवच्छिन्नप्रतियोगिताकसाध्याभावस्य प्रवेशमाहत्य । अन्यथा तु व्याप्यवृत्तिसाध्यकस्थलेपि विशिष्टाभावादिकमादाय दोषो बोध्यः । अव्याप्यवृत्तिसाध्यकेप्याकाशादिहेतावव्याप्त्यभावादाह सद्धेताविति । वृत्तिमद्धेतावित्यर्थः ॥ ननु साध्यवद्भिन्नो यः साध्याभाववानित्यर्थे साध्याभाववत्पदवैयर्थ्यं साध्यवद्भिन्नावृत्तित्वस्यैव सम्य-

त्तित्वमर्थः । कर्मादौ संयोगाद्यभावस्य भिन्नत्वे मानाभावादाह

क्त्वात् न चावृत्तित्वेन समं साध्यवद्भिन्नस्यान्वयाविवक्षणात्साध्याभाववता सममेव तादात्म्येनान्वयविवक्षणान्न वैयर्थ्यमिति वाच्यम् तथा सति साध्यवद्भिन्नात्मको यो मतुवर्थः सम्बन्धी तदवृत्तित्वस्यैव सम्यक्त्वेन साध्याभावपदव्यर्थताप्रौढ्यात् अतः सप्तमीसमासं समर्थ्य व्याचष्टे साध्यवद्भिन्न इति । तथा च साध्यवद्भिन्नस्यावृत्तावनन्वयाद्यथासन्निवेशे न वैयर्थ्यम् । साध्याभावे साध्यवद्भिन्नवृत्तित्वविशेषणं त्वव्याप्यवृत्तिसाध्यकसङ्ग्रहार्थमेवेत्याशयः । साध्यवद्भिन्नवृत्तिद्रव्यत्वादिमति धूमादेः सत्त्वादव्याप्तिरसम्भवो वा स्यात् अतः साध्याभावेति । न च कपिसंयोगी एतद्वृक्षत्वादित्यादेः सङ्ग्रहार्थमधिकरणभेदेनाभावभेदमादायैव लक्षणमिदं कार्यम् तथाच साध्यवद्भिन्ने योभावस्तद्वदवृत्तित्वमित्यस्यैव सम्यक्त्वात्साध्यपदं व्यर्थमिति वाच्यम् प्रतियोगितासंसर्गेण साध्यीयत्वेनैव साध्याभावस्य प्रवेशः न त्वभावत्वेनापीति तद्वैयर्थ्यशङ्कानवकाशात् । वस्तुतस्तु स्वप्रतियोगितावच्छेदकसंसर्गेण साध्यवद्भिन्ने वर्तते यः साध्यतावच्छेदकसम्बन्धेन साध्यीयोऽभावस्तद्वदवृत्तित्वमर्थः । तथा च साध्यतावच्छेदकसम्बन्धेन साध्यीयत्वार्थकस्य साध्यपदस्यानुक्तौ स्वप्रतियोगितावच्छेदकीभूतसमवायादिसंसर्गेण वह्न्यादिमतोऽन्यस्मिन्पर्वतादौ वर्तते यः समवायसम्बन्धाद्यवच्छिन्नवह्न्यभावस्तद्वति धूमादेः सत्त्वादव्याप्तिः स्यादतस्तदुपात्तमिति नव्याः । केचित्तु व्याप्यवृत्तित्वाव्याप्यवृत्तित्वादिरूपविरुद्धधर्माध्यासात्संयोगाद्यभावस्यैव द्रव्यगुणाद्यधिकरणभेदेन भेदो न तु गगनाद्यभावस्यापि मानाभावात् तथा च साध्यवद्भिन्नगगनाद्यभाववति धूमादेः सत्त्वादव्याप्तिरतः साध्यपदमित्याहुः । तन्मन्दम् । गुणे गगनाद्यभावे गुणत्वादिसामानाधिकरण्यं न तु द्रव्ये गगनाद्यभावे तथात्वमित्यादिप्रतीत्या गगनाद्यभावस्यापि गुणत्वसामानाधिकरण्यतदभावयोर्विरुद्धधर्मयोः सम्भवादिति दिक् । न च घटत्वघटाकाशसंयोगान्यतरत्वावच्छिन्नाभाववान् गगनत्वादित्यत्राव्याप्तिः साध्यवद्भिन्ने घटे वर्त-

न्योन्याभावासामानाधिकरण्यं सकलसाध्याभाववन्निष्ठा-

साध्यवदिति । हेतोः साध्यवत्पक्षभिन्नदृष्टान्तवृत्तित्वेनाव्याप्तेराह सकलेति । साकल्यं साध्याभाववति साध्ये च बोध्यम् । साध्याभावो

मानस्य गगनघटसंयोगात्मकस्य साध्याभावस्याधिकरणे गगनत्वहेतोः सत्त्वादिति वाच्यम् । अभावाभावस्यातिरिक्तामते एवैतल्लक्षणकरणादिति भावः ॥ भिन्नत्व इति । द्रव्यनिष्ठसंयोगाभावतो भिन्नत्वे इत्यर्थः । मानाभावादिति । तथा चात्राव्याप्यवृत्तिसाध्यकसद्धेतावव्याप्तिरिति भावः ॥ हेतोरिति । न च साध्यवत्प्रतियोगिकान्योन्याभावस्य केवलान्वयित्वादसम्भव एव वक्तुमुचितो नाव्याप्तिरिति वाच्यम् । वह्निमान् गगनादित्यत्र अवृत्तिगगनादिहेतौ लक्षणसम्भवात् । तस्यापि सद्धेतुतायाः स्वयं वक्ष्यमाणत्वादिति भावः । साध्यपदस्य सिद्धिकर्मतत्तद्व्यक्तिपरतया तत्तद्व्यक्त्यवच्छिन्नान्योन्याभावासामानाधिकरण्यरूपपर्यवसितार्थस्य द्रव्यं पृथिवीत्वादित्यादावेव लक्षणसम्भवाद्गन्धवती पृथिवीत्वादित्यादावव्याप्तिकथनमित्यपि वदन्ति ॥ ननु सकलस्य साध्यप्रतियोगिकाभावस्याधिकरणाप्रसिद्ध्या व्यभिचारिण्यतिव्याप्तिवारणार्थं यदि साध्याभावस्य विशेषणं साकल्यं तदा वह्निमान्धूमादित्यादिसद्धेतावव्याप्तिः तत्रापि तत्तद्भिन्नपक्षावृत्तित्वावच्छिन्नाभावरूपस्य तत्तत्सपक्षवृत्तित्वावच्छिन्नाभावरूपस्य वा साध्यप्रतियोगिकाभावस्तोमस्याधिकरणाप्रसिद्धेरत आह साकल्यं साध्याभाववतीति । तथा च साकल्यं न साध्याभावविशेषणमतो नाप्रसिद्धिरिति भावः [केचित्तु ननु धूमवान् वह्नेरित्यादिव्यभिचारिण्यतिव्याप्तिः साध्याभाववद्यत्किञ्चिन्निष्ठाभावप्रतियोगित्वादत आह साध्याभाववतीत्याहुः] ॥ नन्वेवमपि साध्याभाववन्निखिलान्तर्गते महानसादौ वर्तमानस्याभावस्य प्रतियोगित्वं धूमादौ नास्तीत्यव्याप्तितादवस्थ्यमत आह साध्ये चेति । तथा च सपक्षो महानसादिर्न सकलसाध्याभाववान् इत्यदोषः । प्राञ्चस्तु व्यभिचारिण्यतिव्याप्ति-

वा साध्यतावच्छेदकावच्छिन्नप्रतियोगिताको ग्राह्यः । तेन विपक्षैकदेशनिष्ठाभावप्रतियोगिनि व्यभिचारिणि नातिव्याप्तिः । न वा नानाव्यक्तिसाध्यकसद्धेतावव्याप्तिः । अव्याप्यवृत्तिसाध्यकव्याप्यवृत्तिसद्धेतावव्याप्तेर्व्यभिचारिणि चाव्याप्यवृत्तावतिव्याप्तेर्वारणायाभावद्वये प्रतियोगिव्यधिकरणत्वं बोध्यम् । हेत्वभावोऽपि

वारणार्थं साध्याभाववति यावत्त्वविशेषणे दत्ते एव साध्ये यावत्त्वमव्याप्तिवारकतया सार्थकं भवतीत्यतः साध्याभाववत्येव साकल्यं प्राग्योजयति साकल्यमित्यादिनेत्यवतारयन्ति। तन्मन्दम्।साध्याभाववति साकल्यानुक्तावप्यतिव्याप्तिवारकतयैव साध्ये साकल्यविशेषणस्य प्रथमतः सार्थक्यसम्भवात् । अन्यथा गगनावृत्तिधर्मवान् द्रव्यत्वादित्यादौ पटत्वादिलक्षणतत्तत्साध्यव्यक्त्यभाववद्गुणादिनिष्ठाभावप्रतियोगिनि द्रव्यत्वादावतिप्रसङ्गादिति ध्येयम् [इत्थं च प्रथमतः साध्ये साकल्यविशेषणोपादाने गुणत्वादेरपि संग्रहात्तदभाववान्न गुणादिः किं तु गगनमात्रं तत्र हेतोर्वृत्तित्वान्नातिव्याप्तिः]॥ ननु साध्यवत्यपि द्वित्वाद्यवच्छिन्नप्रतियोगिताकस्य सकलसाध्यप्रतियोगिकाभावस्य सत्त्वादसम्भवः किं च सकलपदोत्तरनाम्ना सकलसाध्यप्रतियोगिकाभाववतोनुपस्थापनात्तेन समं सकलपदस्य कर्मधारयोप्यनुपपन्न इत्यत आह साध्याभावो वेति । तथा च साध्याभाववत्येव साकल्यं देयम् ।न तु साध्येपीति भावः ॥ साध्याभाववति साकल्यप्रयोजनमाह तेनेति । विपक्षैकदेशः कश्चिद्विपक्षः॥ साध्यनिष्ठसाकल्यस्य साध्यतावच्छेदकावच्छिन्नाभावस्य वा विवक्षायाः फलमाह न वेति । एकव्यक्तिसाध्यके सकलसाध्योक्तावप्यव्याप्तिरग्रे स्थास्यतीत्याशयेन नानेत्युक्तम् [न चैकव्यक्तिसाध्यकस्थलेपि द्वित्वाद्यवच्छिन्नाभावमादायासम्भव एव सम्भवति न त्वव्याप्तिरिति वाच्यम् । व्यासज्यवृत्तिधर्मानवच्छिन्नत्वविशेषणेनैव तद्वारणसम्भवात्] ॥ अव्याप्यवृत्तीति । कपिसंयोग्येतत्त्वादित्यादावित्यर्थः । यद्यप्यग्रे हेत्वभावस्यापि प्रतियोगि-

प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिव्यधिकरणः। तत्प्रतियोगित्वञ्च हेतुतावच्छेदकरूपेण बोध्यम्। तेन द्रव्यत्वादौ साध्ये विशिष्टसत्तादौ नाव्याप्तिः। न वा विशिष्टसत्तात्वादिना तादृशाभाव-

---

वैयधिकरण्यावच्छिन्नस्यैव निवेशः करणीय इत्यव्याप्यवृत्तिहेतावप्यव्याप्तिः सम्भवति। तथापि यथाश्रुतमूलस्य न तत्राव्याप्तिरित्यावेदयितुं व्याप्यवृत्तिहेतूक्तिः। व्यभिचारिणीति। एतद्वृक्षत्ववान् कपिसंयोगादित्यादावित्यर्थः। अभावद्वय इति। साध्याभावे हेत्वभावे चेत्यर्थः। अत्र च साध्याभावे प्रतियोगिवैयधिकरण्यं साध्यतावच्छेदकसम्बन्धेन प्रतियोगिनो यदनधिकरणं तद्वृत्तित्वम्। तेन धूमाद्यभाववतोप्ययःपिण्डादेः कालिकादिसम्बन्धेन धूमादिमत्त्वेपि नातिव्याप्तिः। हेत्वभावे प्रतियोगिवैयधिकरण्यं तु प्रतियोगितावच्छेदकसम्बन्धेन प्रतियोग्यनधिकरणत्वघटितं वाच्यम्। तेनायमात्मा ज्ञानादित्यादौ साध्याभाववतो घटादेर्विषयतया हेत्वभावप्रतियोगिमत्त्वेपि नाव्याप्तिः॥ हेत्वभावोपीति। अपिना साध्याभावसमुच्चयः। तेन विशिष्टसत्तावान् जातेरित्यादौ नातिव्याप्तिः। यद्यपि साध्याभावोपीत्येव क्रमानुरोधाद्वक्तुमुचितम्। अपिशब्दादेव हेत्वभावस्य लाभसम्भवात्। तथापि तत्प्रतियोगित्वं चेत्यग्रेतनतत्पदेनानिर्दिष्टहेत्वाभावपरामर्शासम्भवाद्धेत्वाभावप्रतियोगित्वं चेत्यभिधाने च ग्रन्थगौरवं स्यादितीत्थमभिधानम्। प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगीति। प्रतियोगिपदं प्रतियोगितावच्छेदकताघटकसम्बन्धेनावच्छेदकस्य वैशिष्ट्यलाभाय। तेन ह्रदादौ कालिकादिसम्बन्धेन धूमत्वाद्यवच्छिन्नस्य काष्ठादेः संयोगसम्बन्धेन सत्त्वेपि नाव्याप्तिः॥ तत्प्रतियोगित्वं हेत्वभावप्रतियोगित्वम्। हेतुतावच्छेदकरूपेणेति। हेतुतावच्छेदकसम्बन्धेनेत्यपि बोध्यम्। तेनात्मभिन्नं द्रव्यत्वादित्यादौ साध्याभाववत्यात्मनि वर्तमानस्य प्रतियोगितावच्छेदकसम्बन्धेन प्रतियोगिव्यधिकरणस्य कालिकादिसम्बन्धावच्छिन्नद्रव्यत्वत्वावच्छिन्नाभावस्य प्रतियोगित्वेपि द्रव्यत्वस्य नातिव्याप्तिः। न च हेतुतावच्छेदकसम्बन्धेन प्रतियोगिवैयधिकरण्योक्त्यैवातिव्याप्तिवारणसम्भवात्

भावप्रतियोगित्वं साध्यवदन्यावृत्तित्वं वा । केवलान्वयिन्यभावात् ॥

प्रतियोगिनि सत्तादावतिप्रसङ्गः। यत्रैकव्यक्तिकं साध्यं विपक्षो वा तत्र निर्धूमत्वादिव्याप्ये तत्त्वेन साध्ये निर्वह्नित्वादौ चाव्याप्तिस्तत्र हेत्वभावस्य वह्न्यादेः प्रत्येकं यावद्विपक्षावृत्तित्वादत आह साध्यवदिति। अत्रान्योन्याभावस्य साध्यवत्त्वावच्छिन्नप्रतियोगिताकत्वं व्युत्पत्तिबललभ्यम्। नाहि भवति नीलो घटो घटान्य इति ॥

हेतुतावच्छेदकसम्बन्धेन प्रतियोगित्वविवक्षा व्यर्थेति वाच्यम्। तथा सति निर्धूमत्वव्याप्यवान् निर्वह्नित्वादित्यादौ निर्वह्नित्वभेदमादायैव लक्षणसम्भवे निर्धूमत्वव्याप्येत्याद्युत्तरग्रन्थे वक्ष्यमाणाव्याप्त्यलग्रकतापत्तेरिति ध्येयम् ॥ हेत्वभावे प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिवैयधिकरण्यविवक्षायाः फलमाह तेन द्रव्यत्वादाविति । अन्यथा साध्याभाववति गुणादौ विशिष्टसत्ताभावस्य सत्तारूपप्रतियोगिसमानाधिकरणत्वाद्व्याप्तिरेव स्यादिति भावः। अत्र द्रव्यत्वस्य साध्यतायां सकलसाध्याप्रसिद्ध्याऽव्याप्तेरुक्तविवक्षयाप्यप्रतीकारादादिपदम्। तेन गुणवत्त्वादिसाध्यस्योपसङ्ग्रहः।द्रव्येतरासमवेतमात्रं वा प्रकृते द्रव्यत्वमिति ध्येयम् ॥ हेतुतावच्छेदकरूपेण हेत्वभावप्रतियोगित्वविवक्षायाः फलमाह न वेति । सत्त्वादाविति । द्रव्यत्वादौ साध्ये इत्यनुवर्तते॥ यत्रैकव्यक्तिकमिति । तथा च द्रव्यं पृथिवीत्वादित्यादावव्याप्तिः तत्र सकलसाध्याप्रसिद्धेरित्यर्थः । नन्वितोप्यस्वरसात्साध्यसामान्याभावस्यैव निवेशितत्वात्साध्ये साकल्यं न देयमेवेत्यत आह विपक्षो वेति । एकव्यक्तिक इत्यनुषज्यते । तथा च यत्रैकव्यक्तिरेव साध्याभाववती तत्र गगनावृत्तिधर्मवान् गगनान्यत्वादित्यादावव्याप्तिःसाध्याभाववतः साकल्याप्रसिद्धेरित्यर्थः । ननु साध्यादिभेदेन व्याप्तेर्भेदाद्यत्रैक एव विपक्षस्तत्रत्यलक्षणे साध्या-

भाववति साकल्यविशेषणं न देयमशेषत्वरूपं वा साकल्यं निवेश्यमतो दोषान्तरमाह निर्धूमत्वव्याप्य इति । निर्धूमत्वस्य साध्यत्वे यत्रैकव्यक्तिकमित्यनेनैव गतार्थता स्यादतो व्याप्यपर्यन्तम् । निर्धूमत्वव्याप्यस्यापि स्नेहादेः स्नेहत्वादिना साध्यत्वे वह्नयभावस्य व्यभिचारित्वादसङ्ग्रहो न दोषायेत्यत उक्तम् तत्त्वेन साध्ये इति । निर्धूमत्वव्याप्यत्वेन साध्य इत्यर्थः । प्रत्येकमिति । तथा च हेत्वभावस्य महानसीयवन्हेः साध्याभाववत्सकलान्तर्गतपर्वताद्यवृत्तित्वादव्याप्तिरिति भावः । अत्र निरुक्तप्रतियोगिवैयधिकरण्यावच्छिन्नसाध्याभावव्यापकतावच्छेदकं निरुक्तप्रतियोगिवैयधिकरण्यावच्छिन्नयद्धर्मावच्छिन्नाभावत्वं तद्धर्मवत्त्वं व्याप्तिरित्युक्तौ तु नैष दोष इति ध्येयम् ॥ ननु साध्यवत्प्रतियोगिकान्यत्वस्य धूमादिमति सत्त्वादव्याप्तिरत आह अत्रेति । तथा च साध्यवत्पदेन निरूढलक्षणयोपस्थापितस्य साध्यतावच्छेदकविशिष्टसाध्यवत्त्वावच्छिन्नप्रतियोगिताकस्यान्यपदार्थैकदेशेऽन्यत्वे तादात्म्येनान्वयात्साध्यवति च विशिष्टसाध्यवत्त्वावच्छिन्नप्रतियोगिताकभेदासत्त्वान्नाव्याप्तिः गुरुधर्मस्यावच्छेदकत्वोपगमाच्च द्रव्यं पृथिवीत्वादित्यादौ द्रव्यत्वत्वविशिष्टद्रव्यत्वावच्छिन्नभेदाप्रसिद्ध्या नाव्याप्तिरिति भावः ॥ तद्धर्मविशिष्टबोधकपदसमभिव्याहृतेनान्यादिपदेनोपस्थापितेन्यत्वादौ तद्धर्मावच्छिन्नप्रतियोगिताकत्वप्रकारेणैव तादात्म्येनान्वयो न तु तद्धर्माश्रयप्रतियोगिताकत्वेनेत्यत्र व्युत्पत्तौ प्रमाणमाह न हीति । तथा च तादृशव्युत्पत्त्यस्वीकारे नीलघटे घटप्रतियोगिकभेदसत्त्वान्नीलो घटो घटान्य इत्यपि व्यवहारः स्यादिति भावः । अत्र च द्रव्यं घटान्यादित्याद्यप्रयोगात् यन्निष्ठप्रतियोगिताकत्वेनान्यादिपदेन भेदो बोध्यते तदवृत्तिधर्मस्यैवानुयोगितावच्छेदकत्वात् तत एव घटो घटान्य इत्यस्य वारणसम्भवात् नीलघटत्वस्यानुयोगितावच्छेदकत्वपर्यन्तानुधावनमिति मन्तव्यम् । नीलो घटो घटान्य इत्येव सम्यक् पाठः तथैव प्रकृतोपयोगित्वसङ्गतेः । घटादन्य इति पाठस्तु साध्यवदन्येत्यत्र पञ्चमीसमासे लुप्तविभक्तिस्मारितप्रतियोगित्वे प्रकृत्यर्थतावच्छेदकावच्छिन्नत्वस्य संसर्गमर्यादया भानमाहत्य कथं चित्सङ्गमनीयः । घटः पटो नेत्यादौ तु पटपदं मुख्यार्थपरमेव न तु प्रकृत इव पटत्वावच्छिन्नप्रतियोगिताकपरम् । निपातातिरिक्तस्थले एव नामार्थयोर्भेदा-

न्वयस्याव्युत्पन्नतया नञोपस्थापिते भेदे पटत्वावच्छिन्नप्रतियोगिताकत्वसंसर्गेणैव पटस्यान्वयसम्भवात्। पटत्वावच्छिन्नप्रतियोगिताकत्वं तु पटत्वमवच्छिन्नत्वं प्रतियोगित्वं चेति त्रितयमेव विशेष्यविशेषणभावापन्नं संसर्गः। न तु वस्तुगत्या पटत्वावच्छिन्नं यत्प्रतियोगित्वं तन्मात्रम्। पटो नेत्यत्र पटत्वावच्छिन्नत्वस्याप्यनुभवसिद्धत्वात्।अन्यथा प्रतियोगिताव्यक्तिभिरेव तत्तद्विशिष्टबुद्ध्युपपत्तौ पटत्वादेस्तदवच्छेदकत्वमेव न स्यात्। मानाभावात्।अत एव केवलान्वयिग्रन्थे वह्निर्नास्तीत्यत्र वह्नित्वं तदवच्छिन्नत्वं प्रतियोगित्वं च संसर्गमर्यादया भासत इति स्वयमप्युक्तम्। इत्थमेव च प्रमेयं नास्ति कम्बुग्रीवादिमान्नास्तीत्यादिशाब्दबोधानां संसर्गकोटावेव प्रतियोगितायां प्रमेयत्वावच्छिन्नत्वावगाहितया भ्रमत्वम्। संसर्गप्रकारसाधारणविशेष्यविशेषणभावस्यैव भ्रमत्वघटकत्वात्। अन्यथा स्वरूपसम्बन्धेन प्रमेयत्वाद्यवच्छिन्नप्रतियोगित्वस्यालीकतयाऽखण्डतत्सम्बन्धेन प्रमेयस्याभावे धर्मिण्यन्वयासम्भवेन भ्रमत्वानुपपत्तेः। सदुपरागेणाप्यसतः संसर्गमर्यादया भानस्यानङ्गीकारात्। क्लृप्तेन पटत्वावच्छिन्नप्रतियोगित्वसम्बन्धेन चाभावे प्रमेयस्य सत्त्वेन तादृशसम्बन्धेन भ्रमत्वस्य वक्तुमशक्यत्वात्। पटत्वादेरन्वयितानवच्छेदकतया तदवच्छिन्नप्रतियोगित्वसम्बन्धेन प्रमेयत्वादिविशिष्टस्यान्वये निराकाङ्क्षत्वाच्च। अन्यथा घटवत्यपि घटो नास्तीत्यादेः प्रमाणत्वापत्तेः। तत्तद्घटत्वावच्छिन्नप्रतियोगित्वसम्बन्धेन घटविशिष्टस्य घटविशेषाभावस्य तत्र सत्त्वात्। एतेन सत्तासमवायिन्यपि गुणादौ विशिष्टसत्तात्वावच्छिन्नस्य समवायेनासत्त्ववत् घटत्वावच्छिन्नप्रतियोगित्वसम्बन्धेन घटत्वावच्छिन्नवतोपि घटाद्यभावस्य न तादृशसम्बन्धेन प्रमेयत्वावच्छिन्नवत्त्वमतः प्रमेयं नास्तीत्यादौ घटत्वावच्छिन्नप्रतियोगित्वसम्बन्धेन प्रमेयत्वावच्छिन्नस्यैवाभावांशे भ्रमत्वमित्यपि प्रत्युक्तम्। घटत्वादेरन्वयितानवच्छेदकतया तदवच्छिन्नप्रतियोगितासम्बन्धेन प्रमेयत्वविशिष्टस्यान्वये निराकाङ्क्षतया तथाशाब्दस्यासम्भवादिति ध्येयम्। नीलो घटो नास्तीत्यादौ तु नीलघटत्वस्यान्वयितावच्छेदकत्वे तादृशधर्मावच्छिन्नप्रतियोगित्वमेव संसर्गः।न तु नीलत्वघटत्वादिप्रत्येकावच्छिन्नप्रतियोगित्वम्। नीलपटस्य पीतघटस्य वाधिरकणे तादृशप्रयोगापलापापत्तेः। नीलोपलक्षितस्य

घटत्वमात्रस्यान्वयितावच्छेदकत्वे तु घटत्वावच्छिन्नप्रतियोगित्वमेव तथा । संयोगेन घटो नास्तीत्यादौ तु तृतीयाविभक्तेर्नावच्छिन्नत्वमर्थः । संसर्गीभूतप्रतियोगितायां तदन्वयासम्भवात् । किं त्ववच्छिन्नप्रतियोगिताकत्वम् । प्रतियोगित्वमात्रं वा । अवच्छिन्नत्वसंसर्गेण संयोगादेः तत्रान्वयादेव विशिष्टलाभसम्भवात् । न चैवं संयोगेन घटाभावस्यैव समवायेन घटविशिष्टद्रव्यत्वाभावतया समवायेन कपाले घटो नास्तीति व्यवहारापत्तिः । तृतीयान्तसमभिव्याहारस्थले तदुपस्थाप्यप्रतियोगित्वस्यैव संसर्गतया व्युत्पन्नत्वात् । समवायावच्छिन्नघटप्रतियोगिताकाभावस्य च कपाले विरहात् । अस्तु वा घटत्वावच्छिन्नत्वस्यैव संयोगसम्बन्धावच्छिन्नत्वस्यापि प्रतियोगित्वांशे संसर्गमर्यादयैव भानम् । तृतीयान्तसमभिव्याहारस्य नियामकत्वाच्च नातिप्रसङ्गः । घटानधिकरणं भूतलमित्यादौ तु लक्षणयाधिकरणपदमेव घटाधिकरणार्थकम् । घटपदं तात्पर्यग्राहकम् । अन्यथानधिकरणपदेनाधिकरणसामान्याभिन्नत्वोक्तौ भूतले तस्य बाधः स्यात् । न च घटान्वितस्यैवाधिकरणस्य भेदस्तत्र नञा बोधनीयः । समासान्तर्गतनञामुत्तरपदार्थमात्रान्वयित्वव्युत्पत्तेः । अन्यथा नीलाघटो घट इत्यादौ नीलघटान्यस्य घटत्वं नीलाप्रमेयः पट इत्यादौ च नीलप्रमेयान्यस्य पटत्वं प्रतीयेत । वस्तुतः ससम्बन्धिकपदस्थले व्युत्पत्तिवैचित्र्यात् प्रतियोगितानवच्छेदकं घटानधिकरणं भूतलमित्यादौ घटाद्यन्वितस्यैवाधिकरणादेर्भेदो भासते अन्यत्र त्रिपदतत्पुरुषानुपगमेपि घटस्य नाधिकरणं प्रतियोगिताया नावच्छेदकमित्यादिरीत्या त्रिपदतत्पुरुषेण विशिष्टलाभसम्भवादिति तु परमार्थः । पीतः शङ्खो नास्तीत्यादौ शाब्दबोधस्तु न शङ्खत्वावच्छिन्नतया प्रतियोगित्वमवगाहते तन्मात्रस्यान्वयितानवच्छेदकत्वात् । शङ्खत्वत्तया निश्चिते धर्मिण्यपि तादृशप्रयोगात् । परं तु पीतशङ्खत्वावच्छिन्नप्रतियोगितात्वेन संसर्गमर्यादया प्रतियोगित्वमवगाहते । नञादिपदानां यद्धर्मविशिष्टवैशिष्ट्यावगाहिस्वोपस्थाप्याभावधर्मिकान्वयबोधजनकत्वं तद्धर्मावच्छिन्नप्रतियोगितात्वेन प्रतियोगितासंसर्गकान्वयबोधजनकत्वव्युत्पत्तेः । इयांस्तु विशेषः यद्घटो नास्तीत्यादिशाब्दे सांसर्गिकी प्रतियोगित्वावगाहिता प्रसिद्धेन घटत्वावच्छिन्नप्रतियोगितात्वेन निरूपिता पीतः शङ्खो नास्तीत्यादौ तु पीतशङ्खत्वावच्छिन्नप्रतियोगितात्वेनाप्रसिद्धेनैवेत्यादिकं बहुतरमूहनीयम् ॥ इति जागदीशी पञ्चलक्षणी सम्पूर्णा ॥

चिन्तामणेः सिंहव्याघ्रलक्षणे ॥

नापि साध्यासामानाधिकरण्यानधिकरणत्वं साध्य-

शिरोमणिकृतदीधित्याः सिंहव्याघ्रलक्षणे ॥

नापीति । साध्यमसमानाधिकरणं यस्य यदधिकरणानधिकरणं साध्यं तत्त्वम् साध्यनिष्ठासामानाधिकरण्यप्रतियोगित्वम्

जागदीश्याः सिंहव्याघ्रलक्षणे ॥

साध्यासामानाधिकरण्यपदस्य साध्यवद्भिन्नवृत्तित्वार्थकत्वे साध्यवैयधिकरण्येत्याद्युत्तरलक्षणेन पौनरुक्त्यापत्तिरतो व्याचष्टे साध्यमसमानाधिकरणं यस्येति। तत्त्वमिति परेणान्वयः। वह्निमात्रस्यैव व्यधिकरणतत्तद्धूमसमानाधिकरणत्वात् वह्निमान्धूमादित्यादावव्याप्तेराह यदधिकरणेति । यदधिकरणमनधिकरणं यस्येति व्युत्पत्त्या यस्याधिकरणं साध्यानधिकरणं तत्त्वमित्यर्थः । तत्तद्धूमाधिकरणन्तु न वह्निसामान्यानधिकरणमतो नाव्याप्तिरिति भावः । ननु घटादिस्वरूपयत्किञ्चिद्वृत्त्यधिकरणं साध्याभूतधूमाद्यनधिकरणं तद्वृत्तित्वानधिकरणत्वं वह्न्यादेरप्यतो धूमवान्वह्नेरित्यादावतिव्याप्तिः यद्यद्वृत्त्यधिकरणं साध्यानधिकरणं तत्तद्वृत्तित्वानधिकरणत्वोक्तौ तु महागौरवमत आह साध्यनिष्ठेति । साध्यनिष्ठाभावप्रतियोगित्वं सद्धेतोरप्यस्तीत्यतः सामानाधिकरण्याभाव उक्तः । न च साध्यनिष्ठस्य सामानाधिकरण्याभावस्य प्रतियोगित्वं सामानाधिकरण्य एव न तु वह्न्यादावित्यसद्धेतावतिव्याप्तिः। साध्यनिष्ठाभावप्रतियोगिवृत्तित्वनिरूपकाधिकरणवृत्तित्वस्य विवक्षितत्वात्। वस्तुतः असामानाधिकरण्यं सामानाधिकरण्यसम्बन्धेनाभाव इति य-

वैयधिकरण्यानधिकरणत्वं वा । तदुभयमपि साध्यान-

साध्यनिष्ठाधेयत्वानिरूपकाधिकरणवृत्तित्वमिति यावत् तदनधिकरणत्वमित्यर्थः। साध्यवद्भिन्नस्य च साध्यनिष्ठाधेयत्वानिरूपकत्वात्तदवृत्तौ नातिप्रसङ्गः। साध्यनिष्ठाधेयत्वानिरूपकाधिकरणत्वव्यापकाभावप्रतियोग्यधिकरणतासामान्यकत्वमिति निष्कर्षः।

रमार्थः। [तदनधिकरणत्वमित्यत्राधिकरणत्वं स्वाश्रयाधिकरणत्वसम्बन्धेन ग्राह्यम् तेन सामानाधिकरण्याभावप्रतियोगित्वस्य सामानाधिकरण्यमात्रनिष्ठतया साक्षात्सम्बन्धेन तदनधिकरणत्वस्य व्यभिचारिसामान्ये सत्त्वेपि नातिव्याप्तिरिति तु नव्याः।] न चैवं द्रव्यं पृथिवीत्वादित्यादावव्याप्तिः। सामानाधिकरण्याभावस्य व्याप्यवृत्तित्वेन साध्येऽसत्त्वात्। एतदस्वरसेनैव वा कल्पान्तरानुसरणादित्यपरे। नन्वेवमपि वह्निमान्धूमादित्यादिविषमव्याप्तहेतावव्याप्तिः महानसीयवन्हिनिष्ठस्य पर्वतवृत्तित्वाद्यभावस्य प्रतियोगिभूतं यदाधेयत्वं तन्निरूपके पर्वतादौ धूमादेर्वर्तमानत्वात् साध्यसामान्यनिष्ठाभावप्रतियोग्याधेयतानिरूपकाधिकरणवृत्तित्वोक्तौ च महागौरवमत आह साध्यनिष्ठाधेयत्वेति। अत्राधेयत्वं साध्यतावटकसम्बन्धेन ग्राह्यम्। तेन रूपवान्महाकालत्वादित्यादौ सम्बन्धसामान्येन रूपनिष्ठाधेयत्वानिरूपके गगनादौ हेतोरवृत्तित्वेपि नातिव्याप्तिः॥ तदवृत्तौ साध्यवद्भिन्नवृत्तौ॥ ननु साध्यनिष्ठाधेयत्वानिरूपकाधिकरणवृत्तित्वमवश्यं हेतुतावटकसम्बन्धेन वाच्यमन्यथा वन्हिनिष्ठाधेयत्वानिरूपके स्ववयवे समवायादिना धूमादेः सत्त्वाद्व्याप्यत्वापत्तेः तथा च सत्तावान्द्रव्यत्वाद्धूमाद्वेत्यादावव्याप्तिः साध्यनिष्ठाधेयत्वानिरूपके जात्यादौ समवायेन संयोगेन वा वृत्त्यप्रसिद्धेः किं च द्रव्यं विशिष्टसत्त्वादित्यादावव्याप्तिः द्रव्यत्वनिष्ठाधेयत्वानिरूपकगुणादिवृत्तित्वस्य विशिष्टसत्तायां सत्त्वादित्यत आह साध्यनिष्ठेति। धूमनिष्ठाधेयत्वानिरूपके जलादौ वन्ह्याद्यधिकरणत्वाभावसत्त्वाद्व्यभिचारिण्यतिव्याप्तिरतो व्यापकेति। व्यापकत्वं तु प्रतियोगिवैयधिकरण्याघटितमेव ग्राह्यम्। तेन संयोगेन वन्ह्यधिकरण-

तेन सत्तावान् द्रव्यत्वादित्यादौ न दोषः । साध्यवैयधिकरण्यं साध्यवद्भिन्नाधिकरणकत्वम् ॥ चरमाधिकरणत्वांशस्यानतिप्रयोजनकतया तदपहाय द्वयमेकोक्त्या अनूद्य दूषयति तदुभयमपीति ।

त्वस्याव्याप्यवृत्तितया तदभावस्य तन्तायःपिण्डवृत्तित्वेपि नातिव्याप्तिः । वन्ह्यधिकरणत्वगगनोभयत्वाद्यवच्छिन्नाभावस्य धूमनिष्ठाधेयत्वानिरूपकाधिकरणत्वव्यापकत्वादतिव्याप्तिरतः सामान्यपदम् । तथा च हेतुतावच्छेदकसम्बन्धावच्छिन्नयद्धर्मावच्छिन्नाधिकरणत्वसामान्याभावत्वेन साध्यनिष्ठाधेयत्वानिरूपकाधिकरणत्वव्यापकत्वं तद्धर्मवत्त्वमर्थः । तेन वन्हिनिष्ठाधेयत्वानिरूपकाधिकरणजलादौ कालिकसम्बन्धेन धूमाधिकरणतायाः सत्त्वेपि नाव्याप्तिः । न वा वन्ह्यधिकरणत्वाभावस्यापि प्रमेयत्वादिना धूमनिष्ठाधेयत्वानिरूपकाधिकरणत्वव्यापकत्वेप्यतिव्याप्तिः । न च हेतुतावच्छेदकसम्बन्धेन यद्धर्मावच्छिन्नाभावत्वेन तादृशाधिकरणताव्यापकत्वमित्यस्यैव सम्यक्त्वेधिकरणत्वाभावपर्यन्तानुप्रवेशो व्यर्थ इति वाच्यम् । वृत्त्यनियामकसम्बन्धेन हेतुतायामव्याप्तिप्रसङ्गात् । तादृशसम्बन्धावच्छिन्नप्रतियोगित्वाप्रसिद्धेः । अस्माकं तु तादृशसम्बन्धेन यद्धेतुसम्बन्धित्वं तस्य स्वरूपसम्बन्धावच्छिन्नाभावप्रतियोगित्वमादाय लक्षणसम्भवात् । किं चाधिकरणत्वाप्रवेशे वह्न्यादेः साध्यत्वे संयोगादिसम्बन्धेन रूपादिहेतावतिव्याप्त्यापत्तिः संयोगेन रूपाद्यभावस्य केवलान्वयितया वह्निनिष्ठाधेयत्वानिरूपकाधिकरणत्वव्यापकत्वादिति भावः ॥ साध्यवद्भिन्नेति । अत्रापि साध्यवद्भिन्नत्वव्यापकाभावप्रतियोग्यधिकरणतासामान्यकत्वमिति निष्कर्षो बोध्यः । तेन सत्तावान्द्रव्यत्वादित्यादौ नाव्याप्तिः ॥ ननु प्रागुक्तस्यार्थस्य शब्दान्तरेणाभिधानमनुवादः स चात्रासम्भवी साध्यं यदधिकरणानधिकरणं तत्त्वानधिकरणत्वस्य साध्यवद्भिन्नवृत्तित्वानधिकरणत्वस्य च प्रागुक्तस्य साध्यानधिकरणानधिकरणत्वशब्देनाबोधनादत आह चरमेति । तत्त्वाधिकरणत्वाभावे तत्त्वाभावस्याप्रवेशाद्वैयर्थ्यमसम्भवीत्यत उक्तम् अनतिप्रयोजनकतयेति । तथा च प्रकृतलक्षणवाक्यस्य साध्यं यदधिकरणानधिकरणं तत्त्वाभावे साध्यस्य

धिकरणानधिकरणत्वम्। तच्च तत्र यत्किञ्चित्साध्यानधिकरणाधिकरणे धूमे चासिद्धम्॥

साध्येत्यादेः साध्यं यदधिकरणानधिकरणं तत्त्वाभावः साध्यस्य यदनधिकरणं तदवृत्तित्वाभावश्चार्थः॥ तत्र केवलान्वयिनि साध्यनिष्ठाधेयत्वानिरूपकाधिकरणाप्रसिद्धया नानाव्यक्तिसाध्यके च एकसाध्यव्यक्तिनिष्ठाधेयत्वानिरूपकाधिकरणत्वं साधनाधिकरणव्यत्यन्तरस्येत्यव्याप्तिः क्वचिद्व्यभिचारिण्यतिप्रसङ्गश्चाद्ये। द्वितीये च साध्यवैयधिकरण्ये यदि साध्यवत्त्वावच्छिन्नप्रतियोगिताको भेदो विवक्षितस्तदा केवलान्वयिनि यदि च यत्किञ्चित्साध्यवद्व्यक्तिभेदस्तदा नानाधिकरणसाध्यके सर्वत्राव्याप्तिः॥ केचित्तु साध्यासामानाधिकरण्यं हेतुतावच्छेदकसम्बन्धेन हेत्वधिकरणे

यदनधिकरणं तदवृत्तित्वाभाव एव च तात्पर्यात् प्रागभिप्रेतार्थस्य शब्दान्तरेणाभिधानमेवानुवादः स चात्र सम्भवत्येवेति भावः॥ साध्यमित्यादि। साध्यानधिकरणेत्यादौ मध्यवर्तिनञो व्यत्यासेन चरमाधिकरणत्वांशेन सहान्वयादेव तल्लाभ इत्याशयः॥ केवलान्वयिनीति। अव्याप्तिरिति परेणान्वयः। अव्याप्तेर्हेतुमाह। साध्यनिष्ठेति। नानाव्यक्तिसाध्यके चेति मूलोक्तं धूमहेतुमभिप्रेत्य [अथ वा नानाव्यक्तिसाध्यके नानासाध्याधेयके चेत्यर्थः]। तेन शब्दवान् गगनत्वादित्यादौ नानाव्यक्तिसाध्यकाव्याप्तिविरहेपि न क्षतिः। न्यूनतां परिहरति। क्वचिदिति। विशिष्टसत्तावान् जातेरित्यादावतिव्याप्तिरित्यर्थः। विशिष्टधर्मावच्छिन्नाधिकरणत्वस्येव तदवच्छिन्नाधेयत्वस्यानतिरिक्तत्वादिति भावः॥ यत्किञ्चिदिति। साध्यवत्तत्तद्व्यक्तित्वावच्छिन्नेत्यर्थः। नानाधिकरणसाध्यके इति। यत्र साध्यतावच्छेदकावच्छिन्नाधिकरणं नाना तत्रेत्यर्थः। तेन कस्याश्चिदपि वह्निव्यक्तेर्नानाधिकरणवृत्तित्वविरहेपि न वन्हिसाध्यकधूमाद्यसंग्रहः। सर्वत्र केवलान्वयिनि तद्भिन्ने च॥ सार्वभौममतमुत्थापयति

तेनैव सम्बन्धेन साध्यवदवृत्तित्वाभावस्तदधिकरणभिन्नत्वमर्थः तेन धूमस्य स्वावयवे संयोगेन वह्निमति च समवायेनावृत्तावपि न क्षतिः

के चित्त्विति। हेत्वधिकरण इति। सप्तम्यर्थोवच्छेद्यत्वम्। तच्च साध्यवदवृतित्वाभावेन्वितम्। तेनैवेति। हेतुतावच्छेदकसम्बन्धेनैवेत्यर्थः। तस्य च साध्यवदवृत्तित्वेन सहान्वयः। साध्यवत्त्वमपि येन सम्बन्धेन येन रूपेण साध्यता तत्सम्बन्धेन तद्रूपावच्छिन्नवत्त्वं बोध्यम्। तेन समवायेन वह्नेः साध्यत्वे धूमे विशिष्टसत्त्वसाध्यके सत्त्वादौ नातिव्याप्तिः। तदधिकरणभिन्नत्वमिति। तदत्यन्ताभाववत्त्वोक्तौ द्रव्यं सत्त्वादित्यादावतिव्याप्तिः। गुणाद्यवच्छेद्यद्रव्यवृत्तित्वाभावस्यैव द्रव्यावच्छेदेन सत्तायामभावसत्त्वादतो भिन्नत्वपर्यन्तानुसरणम्। भेदस्तु नाव्याप्यवृत्तिः। तदव्याप्यवृत्तित्वे तु तादृशवृत्तित्वाभाववती यावती व्यक्तिस्तत्तद्भेदकूटवत्त्वं वक्तव्यमिति भावः। हेतुतावच्छेदकसम्बन्धेन हेत्वधिकरण इत्यस्य फलमाह स्वावयवे संयोगेनेति। अवृत्तावपि न क्षतिरित्यन्वयः। तथा च तादृशसम्बन्धेन हेत्वधिकरणत्वाप्रवेशे स्वावयवावच्छेदेन धूमस्य वह्निमत्संयुक्तत्वाभाववत्त्वाद्वह्निमान्धूमादित्यादावव्याप्तिः स्यान्न पुनरसम्भवः। इदं वाच्यं ज्ञेयत्वादित्यादिकेवलान्वयिनि लक्षणसम्भवादिति भावः। अत्र चोत्पत्तिकालावच्छिन्ने घटे पृथिवीत्वे रूपवदवृत्तित्वं नेत्यादिप्रतीत्या घटाद्यवच्छेदेन पृथिवीत्वादौ रूपवदवृत्तित्वाभावाभ्युपगमे हेत्वधिकरणनिष्ठमवच्छेदकत्वं निरवच्छिन्नं ग्राह्यम्। तेन रूपवान् पृथिवीत्वादित्यादौ नाव्याप्तिः। तत्र घटनिष्ठावच्छेदकत्वस्योत्पत्तिकालेनावच्छेदादिति ध्येयम्। तेनैवेत्यस्य फलमाह वह्निमति च समवायेनेति। हेतुतावच्छेदकसम्बन्धेन साध्यवदवृत्तित्वानुक्तौ सम्बन्धसामान्येव हेत्वधिकरणावच्छेद्यसाध्यवदवृत्तित्वसामान्याभावो न निवेश्यः। साधनाधिकरणाद्यवच्छेद्यतादृशाभावस्याप्रसिद्धेः। किं तु यत्किंचित्सम्बन्धेन साध्यवदवृत्तित्वाभावः प्रवेशनीयः। तथा च हेत्वधिकरणपर्वताद्यवच्छेदेन धूमादौ वह्निमत्समवेतत्वाद्यभावसत्त्वादसम्भव एव स्यात् यदि तेनैव सम्बन्धेन साध्यवदवृत्तित्वप्रवेशो न स्यादिति भावः। ननु हेत्वधिकरणावच्छेद्यत्वविशिष्टस्य साध्यव-

तादृशाभावश्च सम्बन्धान्तरेण तत्रैव वर्तमाने सुलभः व्यभिचारिणस्तु

वदवृत्तित्वाभावस्याधिकरणाप्रसिद्ध्या लक्षणमिदमसम्भवि तदधिकरणस्यैव तन्निष्ठधर्मावच्छेदकतया गगनजलत्वादौ वह्निमत्पर्वतसंयुक्तत्वाभावस्य धूमवत्पर्वतानवच्छेद्यत्वादत आह तादृशाभावश्चेति । हेत्वधिकरणावच्छेद्यसाध्यवदवृत्तित्वाभावश्चेत्यर्थः । सम्बन्धान्तरेण हेतुतावच्छेदकसम्बन्धान्यसम्बन्धेन । तथा च हेतुमत्पर्वतावच्छेद्यत्वविशिष्टस्य वह्निमत्संयुक्तत्वाद्यभावस्याधिकरणत्वं पर्वतीयरूपादावेव प्रसिद्धमिति भावः । यद्यपि रूपादौ वह्निमत्संयुक्तत्वाद्यभावस्य व्याप्यवृत्तित्वात् तत्र पर्वतादिकं नावच्छेदकं भावाभावयोरेकत्र वृत्त्यर्थमेवावच्छेदकभेदस्वीकारादित्यप्रसिद्धिं तादवस्थ्यम् न च महानसादिसंयुक्ते कालिकादिसम्बन्धेन पर्वतादिनिष्ठघटादौ वह्निमत्संयुक्तत्वाभावस्य पर्वतावच्छेद्यत्वप्रसिद्ध्या न दोष इति वाच्यम् इत्थमपि एतद्रूपवानेतद्रसादित्यादावेतद्रसाधिकरणावच्छेदेन एतद्रूपवत्समवेतत्वाभावस्याप्रसिद्धेर्दुर्वारत्वात्। तथापि पर्वतावच्छेदेन तदीयरूपे न वह्निमत्संयुक्तत्वमित्यादिप्रतीत्या व्याप्यवृत्तेरवच्छेदकत्वस्वीकारादित्थमभिधानम् । हेतुतावच्छेदकसम्बन्धेन साध्यवदवृत्तित्वाभावविशिष्टस्य यस्याधिकरणं हेत्वधिकरणं तदन्यत्वे वा ग्रन्थतात्पर्यम् तथा च व्याप्यवृत्तेरवच्छेदकत्वासत्त्वेपि साध्यवदवृत्तित्वाभावविशिष्टस्य तस्याधिकरणत्वमादायैव लक्षणसङ्गतिः। न च वस्तुगत्या साध्यवदवृत्तित्वाभावविशिष्टस्य यस्याधिकरणं हेत्वधिकरणं तदन्यत्वोक्तौ वह्निमान्धूमादित्यादावव्याप्तिः स्वावयवावच्छेदेन वह्निमत्संयुक्तत्वाभाववतो धूमस्याधिकरणतायाः साधनवत्पर्वतादौ सत्त्वात् साध्यवदवृत्तित्वभावविशिष्टयद्व्यक्तित्वावच्छिन्नाधिकरणत्वं हेतुमतस्तदन्यत्वोक्तौ तु वह्निमान् धूमादिदं वाच्यं ज्ञेयत्वादित्यादौ सर्वत्रैवासम्भवः साध्यवदसंयुक्तत्वादिविशिष्टतत्तद्रूपादिव्यक्तित्वस्य गुरुतया [प्रमेयरूपत्वावच्छिन्नायाः प्रतियोगिताया इव] तदवच्छिन्नाधिकरणत्वाप्रसिद्धेः केवलस्यातिप्रसङ्ग एव विशिष्टधर्मस्याधिकरणतानिरूपकतावच्छेदकत्वकल्पनादिति वाच्यम्। सार्वभौमानां मते प्रतियोगिताया इवाधिकरणताया अपि

व्यभिचारानिरूपकाधिकरण एव तादृशि तादृशाभाववत्त्वम् सत्तायां गुणे न द्रव्यत्वसामानाधिकरण्यमित्यनुभवात् न चैवं गुणकर्मान्यत्वविशिष्टसत्त्वेऽव्याप्तिः, विशिष्टस्यातिरिक्तत्वात्, अनति-

---

गुरुधर्मावच्छेद्यत्वोपगमात्। अन्यथा समवेतत्वत्वादिकमपेक्ष्य सत्तावत्समवेतत्वत्वस्य गुरुतया साध्यवद्वृत्तित्वत्वावच्छिन्नप्रतियोगिताकाभावाप्रसिद्ध्या सत्तावान्द्रव्यत्वादित्यादावव्याप्तिप्रसङ्गात्। ननु साध्यसमानाधिकरण्यवतो न तदभाववत्त्वमतो द्रव्यं सत्त्वादित्यादौ व्यभिचारिण्यतिप्रसङ्ग इत्यत आह व्यभिचारिणस्त्विति। तादृशीति। हेतुताघटकसम्बन्धेन हेतुमतीत्यर्थः। तादृशाभाववत्त्वं साध्यवद्वृत्तित्वाभाववत्त्वम्। अत्रैवानुभवं प्रमाणयति सत्तायामित्यादि। एवं सत्तायामपि द्रव्यत्वसामानाधिकरण्यविरहे। विशिष्टसत्त्व इति। विशिष्टसत्त्वशब्दप्रतिपाद्यहेतावित्यर्थः। यथाश्रुते गुणकर्मान्यत्वविशिष्टसत्ताव्यक्तावव्याप्त्याशङ्कायामुत्तरग्रन्थेन तदनिरासादसङ्गत्यापत्तेः। अतिरिक्तत्वादिति। विशेष्यविशेषणाभ्यां भिन्नत्वादित्यर्थः। तथा च गुणादिकं न हेत्वधिकरणमतो नाव्याप्तिः। उभयत्वमपि एकविशिष्टापरत्वमेव। तच्चातिरिक्तमेव। नातः स्पर्शवान् मूर्तत्वभूतत्वोभयस्मादित्यादावव्याप्तिरिति भावः। यद्यपि हेतुतावच्छेदकविशिष्टहेत्वधिकरणावच्छेदेनेत्युक्तावपि विशिष्टसत्तादिहेतौ नाव्याप्तिः न च धूमाधिकरणमहानसाद्यवच्छेदेन पर्वतीयादिधूमे वह्निमत्संयुक्तत्वाभावस्य चालनीन्यायेन सत्त्वाद्व्याप्तिः महानसादेरपि कालिकादिसम्बन्धेन पर्वतीयधूमाधिकरणत्वात् तत्र साध्यवद्वृत्तित्वाभाववत्तायामवच्छेदकत्वादिति वाच्यम् स्वावच्छिन्नाधिकरणावच्छेद्यसाध्यवद्वृत्तित्वाभाववद्वृत्तिधर्मवत्त्वमित्यस्यैव फलितार्थस्य तत्तद्धूमत्वधर्ममादायैव धूमादौ लक्षणसंभवेन धूमत्वस्य हेतुतावच्छेदकत्वेपि क्षत्यभावात्। तथापि विशिष्टस्यातिरिक्तत्वात् तत एवाव्याप्तिवारणसम्भवे हेतुताघच्छेदकावच्छिन्नाधिकरणत्वप्रवेशे गौरवम्। असंभवो वा। विशिष्टनिरूपकाधिकरणत्वाप्रसिद्धेः। एवं धूमत्वादेर्व्याप्यतानवच्छेदकत्वे तादृप्येण कथायां हेतोरुपन्यासो न स्यादित्याश-

---

१ 'त्राधिकरणताया इव'

रिक्तत्वे तु विशेषणविशेष्यसम्बन्धस्यैव परम्परया व्याप्तत्वात् केवलान्वयिनि चाव्याप्तेरभिधानं द्वितीयलक्षणाभिप्रायेणेत्याहुः। त-

---

थः। ननु विशिष्टस्यातिरिक्तत्वे मानाभावः न च गुणो विशिष्टसत्तावानिति प्रतीत्यभाव एव मानम् गुणस्य विशिष्टनिरूपिताधिकरणत्वविरहादेव तादृशप्रतीत्यसम्भवात् न च विशिष्टनिरूपितमधिकरणत्वं यद्यतिरिक्तं तदा विशिष्टमेवातिरिक्तमस्तु विशिष्टाधिकरणतायाः क्लृप्ताधिकरणस्वरूपत्वाभ्युपगमात् किं च विशिष्टस्यातिरिक्तत्वे द्रव्यं विशिष्टसत्तावदिति निर्णयदशायामपि द्रव्यं न सत्तावदिति प्रत्ययप्रसङ्गः सत्ताभावबुद्धिं प्रति सत्तानिश्चयस्यैव विरोधितया तदसत्त्वात् स्वातन्त्र्येण विरोधितान्तरकल्पने गौरवात् एवं विशेषणविशेष्योभयग्राहकसामग्रीविरहेपि विशिष्टग्रहप्रसङ्गः तदुभयग्राहकसामग्र्या विशिष्टस्य ग्रहे हेतुत्वकल्पनेपि गौरवान्तरं स्फुटमेवेत्यत आह अनतिरिक्तत्वे त्विति। गुरवस्तु विशिष्टस्यातिरिक्तत्वादितिग्रन्थस्य विशिष्टनिरूपिताधिकरणत्वस्यातिरिक्तत्वादित्यर्थः तथा च हेतुतावच्छेदकंविशिष्टहेत्वधिकरणावच्छेदेन तादृशवृत्तित्वाभाववत्त्वमपि निवेश्यमतो नाव्याप्तिरित्याशयः ननु विशिष्टाधिकरणत्वं यदि नातिरिक्तं विशिष्टसत्तावानितिप्रतीतेः प्रत्येकनिरूपिताधिकरणताद्वयावगाहितयैवोपपत्तेः अन्यथा विशेषणाभावनिर्णयदशायामपि विशिष्टसत्तावत्त्वप्रतीत्यापत्तेः विशिष्टसत्तावुद्धौ विशेषणाभाववत्ताज्ञानस्य प्रतिबन्धकतायाः स्वातन्त्र्येण कल्पनापातादित्युच्यते तदाप्याह अनतिरिक्तत्वे त्वितीति प्राहुः। विशेषणेति। विशेषणं गुणकर्मान्यत्वं विशेष्यं सत्ता। तयोः समानाधिकरण्यात्मकसम्बन्धस्यैवेत्यर्थः। साक्षात्सम्बन्धेन तस्य व्यभिचारित्वादाह परम्परयेति। अवच्छेदकताख्यस्वरूपसम्बन्धेनेत्यर्थः। सत्त्वगुणकर्मान्यत्वयोर्द्रव्ये एव सामानाधिकरण्यमिति प्रतीत्यावच्छेदकतासम्बन्धेन तदुभयसामानाधिकरण्यस्य द्रव्य एव सत्त्वान्न व्यभिचार इति भावः। नन्वेवं ज्ञेयत्वाधिकरणपटाद्यवच्छेदेन वाच्यत्वावद्वृत्तित्वाभावस्य पट्टीयरूपादावेव सत्त्वात्तदधिकरणभिन्न-

चिन्त्यम्। सत्तायां गुणे न द्रव्यत्वसामानाधिकरण्यमिति प्रतीतिर्हि द्रव्यत्वे गुणे न पृथिवीत्वसामानाधिकरण्यमितिप्रतीतिवत्सत्तानिष्ठद्रव्यत्वसामानाधिकरण्यवच्छेदकत्वाभावं परम्परासम्बन्धेन सा-

---

त्वमस्त्येव ज्ञेयत्वादिहेतोरित्यग्रे केवलान्वयिन्यव्याप्तिप्रदर्शनमसङ्गतमत आह केवलान्वयिनीति। द्वितीयेति। तत्र साध्यवद्भिन्नस्याप्रसिद्धत्वादिति भावः। यद्यपीदं वाच्यं प्रमेयादित्यादौ तादात्म्येन केवलान्वयिनि प्रथमलक्षणेऽव्याप्तिः सम्भवति प्रमेयावच्छेदेन वाच्यत्ववत्तादात्म्यकत्वविरहिणोऽप्रसिद्धेः न च घटाद्यवच्छेदेन वाच्यत्ववत्तादात्म्यविरहो घटत्वादौ सुलभः तथा सति घटत्वं घटे न वाच्यमिति प्रतीत्यापत्तेः। तथापि स्वाधिकरणनिरूपितहेतुतावच्छेदकसम्बन्धेन साध्यवद्वृत्तित्वाभावोत्र लक्षणघटक इत्यभिप्रायेण द्वितीयलक्षणाभिधानम्। स्वपदस्य तत्तत्साधनव्यक्तिपरतया तादात्म्येन पटात्मकहेत्वधिकरणीभूतपटव्यक्तिनिरूपितताँदात्म्येन वाच्यत्ववत्तादात्म्यकत्वाभावस्य पटावच्छेदेन पटत्वादावेव प्रसिद्धेः। वस्तुतस्तु केवलान्वयित्वं वृत्तिमदत्यन्ताभावाप्रतियोगित्वमात्रम्। न त्ववच्छेदकगर्भम्। तथा च तादात्म्येन किञ्चिदपि प्रमेयं न केवलान्वयीति द्वितीयलक्षणे एव तादृशकेवलान्वयिन्यव्याप्तिसम्भवात् यथाश्रुतमेव सम्यगिति ध्येयम्। नव्यास्तु केवलान्वयिनि चाव्याप्तेरिति केवलान्वयिसामान्येऽव्याप्तेरभिधानं द्वितीयलक्षणाभिप्रायेणेत्यर्थः प्रथमलक्षणे यत्किञ्चित्केवलान्वयिनि तादात्म्येन प्रमेयादिहेतावव्याप्तावपि न क्षतिरित्याहुः॥ सत्तायां गुणे न द्रव्यत्वसामानाधिकरण्यमितिप्रतीतिः सत्तानिष्ठद्रव्यत्वसामानाधिकरण्यस्यावच्छेदकत्वाभावं गुणादावगाहते इत्यत्र समानाकारकप्रतीतिं दृष्टान्तयति द्रव्यत्वे गुण इति। न तूक्तप्रतीतेर्गुणावच्छेदेन द्रव्यत्वे पृथिवीत्वसामानाधिकरण्याभावो विषयः। गुणस्य द्रव्यत्वानधिकरणतया तन्निष्ठपृथिवीवृत्तित्वाभावावच्छेदकत्वासम्भवात्। किं तु द्रव्यत्वनिष्ठं यत्पृथिवीत्वसामानाधिकरण्यं तदवच्छेदकत्वाभाव एव गुणे विषय इति तद्धृदियमपि इति भावः।

मानाधिकरण्यस्य वा अभावं गुणेऽवगाहते । न तु सत्तायामेव द्रव्यवृत्तित्वाभावम् । सत्ता न द्रव्यवृत्तित्वाभाववती द्रव्यवृत्तित्वाभावो न सत्तावृत्तिरित्यादिसर्वजनसिद्धप्रतीतिबाधितत्वात् । बाधकाभावात्तु संयोगतदभावयोरवच्छेदकभेदेनैकत्र प्रतीत्या तदुभयोरेकत्र सिद्धिः ।

अवच्छेदकत्वाभावमिति । प्रात्यक्षिकप्रत्ययाभिप्रायेणेदम् । सत्तायां गुणे न द्रव्यत्वसामानाधिकरण्यमित्यादिशाब्दस्थलेऽवच्छेदकत्वोपस्थापकपदान्तरविरहात्तदभावस्य गुणादौ बोधयितुमशक्यत्वात् । किन्तु सत्तानिष्ठं द्रव्यत्वसामानाधिकरण्यं न गुणावच्छेद्यमित्याकार एव तत्र बोधः । गुणादावित्यत्र सप्तम्यर्थस्य नञर्थेऽन्वयादिति ध्येयम् । नन्वेवं तादृशप्रतीतेः सामानाधिकरण्याभावविषयकत्वमनुभवसिद्धं विरुध्येत सामानाधिकरण्यस्य व्याप्यवृत्तित्वेन तदवच्छेदकत्वाप्रसिद्ध्या तादृशावच्छेदकत्वाभावविषयकप्रतीतेर्भ्रमत्वापत्तिश्च स्यादत आह परम्परासम्बन्धेनेति । निरूपकताख्यस्वरूपसम्बन्धेनेत्यर्थः । न त्ववच्छेदकताख्यस्वरूपसम्बन्धेनेत्यर्थः । तथा सति सत्तायां द्रव्ये न द्रव्यत्वसामानाधिकरण्यमिति प्रतीतिप्रसङ्गात् । सामानाधिकरण्यस्य व्याप्यवृत्तितया कुत्राप्यवच्छेदकत्वसम्बन्धेन तस्यासत्त्वात् ॥ न त्विति । तथा च द्रव्यं सत्त्वादित्यादावतिव्याप्तिरिति भावः ॥ ननूक्तदृष्टान्तस्थले बाधकसत्त्वादवच्छेदकत्वाभावोऽस्तु प्रतीतेर्विषयः प्रकृते तु साक्षात्सामानाधिकरण्याभावविषयकत्वे न किञ्चिद्बाधकमस्तीत्यतो बाधकमाह सत्ता नेति । तथा च सत्तायां द्रव्यवृत्तित्वाभावसत्त्वे द्रव्यवृत्तित्वाभाववद्भिन्नत्वधीस्तत्र न स्यादिति भावः । ननु द्रव्यवृत्तित्वाभावोऽव्याप्यवृत्तिरेवेति तद्भेदोऽव्याप्यवृत्तिर्वाच्यः तथा च द्रव्यगुणात्मकविभिन्नावच्छेदेन तयोः सत्तायां समवेशात्कुतो विरोध इत्यत आह द्रव्यवृत्तित्वाभाव इति ॥ नन्वेवं मूले न कपिसंयोगीति प्रतीत्या वृक्षादौ कपिसंयोगाभावोपि न सिद्ध्येत् तत्रापि वृक्षनिष्ठसंयोगावच्छेदकत्वाभावस्य मूलेवगाहनसम्भवादत आह बाधकाभावादिति । कपिसंयोगाभावो न वृक्षवृत्तिरित्यादिप्रत्ययस्यासम्भवादिति भावः ॥ ननु द्रव्यवृत्ति-

अतीन्द्रियसाध्यकेऽतीन्द्रिये व्यभिचारिण्यतिप्रसङ्गाच्च। तत्र सामानाधिकरण्याभावस्य प्रत्यक्षत्वासम्भवेनासिद्धेः। नच तदभाववद्वृत्तित्वेन तत्र तदनुमेयम्। तद्वद्वृत्तिभिन्नत्वस्योपाधित्वात्। किञ्च इदमिदानीमितिप्रतीतिनियामकविशेषणताविशेषेण हेतुतायां सद्धेतावव्याप्तिः। तेन सम्बन्धेनाधिकरणे काले तेन सम्बन्धेन साध्यवद्वृत्तित्वस्य विरहिणोऽप्रसिद्धेः॥

त्वाभावो न सत्तावृत्तिरिति प्रतीतिरेवासिद्धा द्रव्यवृत्तित्वाभावो गुणावच्छेदेन सत्तावृत्तिरिति प्रत्ययात् एकशेषस्य कर्तुमशक्यत्वादतो दोषान्तरमाह अतीन्द्रियेति। मनस्त्ववदणुत्वादित्यादावित्यर्थः॥ तत्र अतीन्द्रियसाध्यके अतीन्द्रियासद्धेतौ॥ ननु प्रत्यक्षासम्भवेप्यणुत्वं मनस्त्वसामानाधिकरण्याभाववन्मनस्त्वाभाववद्वृत्तित्वात् पृथिवीत्ववदित्यनुमानेनैव तत्र सामानाधिकरण्याभावः सेत्स्यतीत्यत आह न चेति॥ तद्वद्वृत्तीति। साध्यवद्वृत्तिभिन्नत्वस्येत्यर्थः। तथा चोक्तानुमाने मनस्त्ववद्वृत्तिभिन्नत्वमुपाधिः। तस्य च साध्यव्यापकत्वं घटत्वादौ साधनाव्यापकत्वं द्रव्यत्वादौ ग्राह्यम्। भेदस्याव्याप्यवृत्तित्वे तु साध्यवद्वृत्तितत्तद्व्यक्तित्वावच्छिन्नभेदकूट उपाधिर्बोध्यः॥ ननूक्तोपाध्यप्रतिसन्धानदशायामुक्तानुमानादेव साध्यवद्वृत्तित्वाभावसिद्धिस्तत्र भविष्यति अन्यथा व्याप्त्यन्तरस्यापि तत्रातिप्रसङ्गादित्यत आह किञ्चेदमित्यादि। तथा च कालो गोमान् गोत्वादित्यादौ कालिकसम्बन्धेन हेतावव्याप्तिः। कालिकसम्बन्धेन हेतुमति महाकाले तेन सम्बन्धेन कालवृत्तित्वाभावस्य कुत्राप्यसत्त्वात्। न च कालावच्छेदेन गगनादावेव साध्यवद्वृत्तित्वाभावस्य प्रसिद्धिः। कालस्य गगनाद्यनधिकरणत्वेन तन्निष्ठवृत्तित्वाभावे कालावच्छेद्यत्वासम्भवात्। कालिकसम्बन्धेन गगनादेर्वृत्तिमत्त्वस्वीकाराच्च। यद्यपि गोत्वाद्यधिकरणतत्तत्क्षणावच्छेदेन कालवृत्तित्वाभावस्य तत्तत्क्षणासमानकालीने तत्तत्क्षणगोचरज्ञाने प्रसिद्धिः तत्तत्क्षणस्यापि विषयतया स्वविषयकज्ञानाधि-

करणतया तन्निष्ठंतादृशवृत्तित्वाभाववत्तायामवच्छेदकत्वसम्भवात्। तथापि महाकाल एव कालिकसम्बन्धेनाधिकरणम् इपाचीनां तत्तद्वृत्तितायामवच्छेदकत्वमात्रमिति प्राचीनसिद्धान्तमनुसृत्येदम्। महाकालनिरूपितविशेषणतया वा हेतावव्याप्तिर्द्रष्टव्या। इदमिदानीमित्याकारकप्रतीतिनियामकविशेषणतायां यो विशेषस्तेन हेतुतायामिति व्याख्यया तादृशविशेषणतायाः प्राप्तेः। सामान्यत एव विभिन्नकालीनयोर्नाधाराधेयभाव इति मते नानुपपत्तिगन्धोपि। क्षणानां स्वसमानकालीनविषयतयाप्यनधिकरणत्वेन तदवच्छेदेन ज्ञाने साध्यवदवृत्तित्वाभावप्रसिद्ध्यसम्भवादिति ध्येयम्। अत्र हेतुतावच्छेदकसम्बन्धेन स्वाधिकरणे स्वनिरूपितहेतुतावच्छेदकसम्बन्धेन साध्यवदवृत्तित्वाभावस्य विवक्षायां न कोपि दोषः साधनीभूतगोत्वाधिकरणमहाकालावच्छेदेन गोत्वनिरूपितकालिकसम्बन्धेन साध्यवदवृत्तित्वाभावस्य घटादावेव प्रसिद्धत्वात् साध्यसामानाधिकरण्यत्वं यद्धर्मावच्छिन्नाधिकरणावच्छेद्यहेतुवृत्तिकात्यन्ताभावप्रतियोगितानवच्छेदकं तद्धर्मवत्त्वं वा विवक्षितम् इत्थं च वाच्यं प्रमेयादित्यादौ प्रमेयव्यक्तीनां भेदेपि न व्याप्तेर्भेद इत्यस्मद्गुरुचरणाः। केचितु स्वनिष्ठं यत्साध्यवदवृत्तित्वं हेत्वधिकरणावच्छेद्यतदभावाधिकरणभिन्नत्वमित्यर्थः तादृशाभावाधिकरणत्वं सद्धेतुस्थले स्वभिन्नव्यक्तावेव प्रसिद्धमतो नाव्याप्तिरित्याहुः। साध्यवदवृत्तित्वाभावाधिकरणत्वसामान्ये यन्निष्ठत्वयदधिकरणावच्छेद्यत्वोभयाभावस्तत्त्वं व्याप्तिः पर्वतीयरूपनिष्ठं यत्पर्वतावच्छेद्यं वह्निमत्संयुक्तत्वाभावाधिकरणत्वं न तदधूमनिष्ठं यच्च धूमनिष्ठं न तदधूमाधिकरणावच्छेद्यमधिकरणभेदेन तस्य नानात्वात् अन्यथा पर्वते तदीयरूपे न वह्निमत्संयुक्तत्वमितिवत्पर्वते धूमे न वह्निमत्संयुक्तत्वमित्यादिप्रतीत्यापत्तेः अतो वह्निमान्धूमादित्यादौ नाव्याप्तिः व्याप्यवृत्तेरवच्छेदकत्वास्वीकारे तु तादृशाभावाधिकरणत्वसामान्ये यदधिकरणावच्छेद्यत्वसामान्याभावस्तत्त्वमित्येव वाच्यमित्यादिकं पुनरुदक्षरत्वादुपेक्षितम्। वाच्यत्वादिसाध्यके तादात्म्येन हेतावव्याप्तेश्च। वाच्यत्ववत्तादात्म्याभावाप्रसिद्धेः। एतेन सत्तायां कर्मणि न द्रव्यत्वसामानाधिकरण्यमिति प्रतीतौ कर्मण इव कर्मसत्त्वयोः समवायस्याप्यवच्छेदकत्वं भासते अन्यथा इदानीं

सत्तायां न द्रव्यत्वसामानाधिकरण्यमित्यादिप्रतीत्यापत्तेः एतत्कालस्य कर्मानतिरेकात् एवं च यद्धेतुव्यक्त्यधिकरणीयहेतुतावच्छेदकसम्बन्धे साध्यवद्वृत्तित्वाभावावच्छेदकत्वं नास्ति तत्त्वमित्यर्थः कालो गोमान् गोत्वादित्यादौ कालवृत्तित्वाभावावच्छेदकत्वस्य द्रव्यत्वादिनिष्ठात्मसमवेतत्वादौ प्रसिद्धस्य गोत्वाधिकरणीयकालिकसम्बन्धे विरहान्नाव्याप्तिरित्यपि निरस्तमिति सङ्क्षेपः ॥

इति सिंहव्याघ्रलक्षणद्वयविवरणं समाप्तम् ॥

चिन्तामणेः व्यधिकरणप्रकरणम् ॥

अथेदं वाच्यं ज्ञेयत्वादित्यत्र समवायितया वाच्यत्वाभावो घट एव प्रसिद्धः व्यधिकरणधर्मावच्छिन्नप्र-

शिरोमणिकृतदीधित्याः व्यधिकरणप्रकरणम् ॥

समवायितयेति । वाच्यत्वं न यथा समवायि तथा वक्ष्यते । घटादिसमवायितयेत्यर्थ इत्यप्याहुः । प्रमेयसाध्यके च भावत्वेनाभावानाम् अभावत्वेन भावानां वह्नित्वेन निर्वह्नौ अवृत्तिमात्रवृत्तिग-

जागदीश्याः व्याधिकरणप्रकरणम् ॥

नन्वीश्वरेच्छारूपस्य वाच्यत्वस्य गुणत्वादिसमवायित्वात् समवायित्वं न तद्व्यधिकरणधर्म इत्यत आह वाच्यत्वमिति । अस्माच्छब्दादयमर्थो बोद्धव्य इतीश्वरेच्छाविषयत्वं पदार्थान्तरं वा वाच्यत्वम् । न तु तादृशेच्छामात्रमतिप्रसक्तत्वात् । तच्च न कस्यापि समवायीति भावः । समवायितयेति मूलस्य समवायिकारणतयेत्यर्थ इत्यप्याहुः ॥ नन्विदं वाच्यं ज्ञेयत्वादित्यादौ समवायितया वाच्यत्वाभावरूपस्य साध्याभावस्य प्रसिद्धावपि प्रमेयवान् वाच्यत्वादित्यादिकेवलान्वयिनि तदप्रसिद्धेरनुद्धारात् मूलस्य न्यूनत्वमत आह प्रमेयेति । भावत्वेनाभावानामभावः सर्वत्र सुलभ इत्यन्वयः । ननु भावत्वेनाभावो नास्तीति प्रतीतिरभावस्यैवाभावत्वेन भावो नास्तीति प्रतीतिर्भावस्यैव प्रतियोगित्वमवगाहते न चैतावता प्रमेयमात्रप्रतियोगिकाभावसिद्धिरत आह वह्नित्वेनेति । वह्नित्वेन निर्वह्नौ सर्वेषामभावः सुलभ इति योजना । ननु जले वह्नित्वेन प्रमेयं नास्तीति प्रतीतिर्वह्निमात्रप्रतियो-

तियोगिताकाभावस्य केवलान्वयित्वात् न चैवं घट एव व्यभिचारः साध्यतावच्छेदकावच्छिन्नप्रतियोगिताकाभाववद्वृत्तित्वं हि व्यभिचारः न च वाच्यत्वाभावस्तादृशो घट इति चेत्तर्हि तादृशसाध्याभावसामानाधिकरण्या-

---

गनत्वादिना विरुद्धघटत्वपटत्वाभ्याञ्च सर्वत्र प्रमेयमात्रस्याभावः सुलभः ॥ ननु परिभाषिकमेवाव्यभिचरितत्वं तथाहि यत्समाना-

---

गिकाभावमवगाहते न तु प्रमेयसामान्यप्रतियोगिकं वह्निमति तादृशप्रतीत्यनुत्पत्त्या वह्निप्रतियोगिकाभावावगाहित्वस्यावश्यकत्वादत आह अवृत्तीति। तथा च गगनत्वेन प्रमेयं नास्तीति प्रतीत्यैव प्रमेयसामान्यप्रतियोगिकाभावसिद्धिः। न हि तत्रापि गगनमात्रप्रतियोगिकत्वं भासते इति वक्तुं शक्यते। विनिगमनाभावेन प्रमेयमात्रप्रतियोगिकत्वावगाहने बाधकाभावात्। कालिकसम्बन्धेन गगनत्वादिविशिष्टस्य प्रमेयस्य सर्वत्र नाभावः सम्भवतीत्यत उक्तम् अवृत्तिमात्रवृत्तीति। तथा च तादृशसम्बन्धेन गगनत्वादेर्वृत्तिमद्वृत्तित्वं तादृशसम्बन्धावच्छिन्नावच्छेदकताकप्रतियोगिताको गगनत्वादिना प्रमेयसामान्याभावो वाच्य इति भावः। ननु कालिकसम्बन्धेन प्रमेयसाध्यके तेन सम्बन्धेन साध्याभावस्यैव प्रसिद्धिः कार्या सा च कालिकसम्बन्धेन गगनत्वेन प्रमेयं नास्तीति प्रतीत्या न सम्भवति तस्सम्बन्धेन गगनादेर्वृत्तिमत्त्वमते तादृशप्रतीतेर्गगनप्रतियोगिकत्वावगाहितयैवोपपत्तौ प्रमेयान्तरप्रतियोगिकत्वे मानाभावादत आह विरुद्धेति। तथा च घटत्वपटत्वाभ्यां प्रमेयं नास्तीति प्रतीत्या निखिलप्रमेयप्रतियोगिकस्तत्राप्यभावः सुलभ इति भावः। इदमुपलक्षणम्। संयोगादिसम्बन्धेन घटत्वादिकमपि प्रमेयत्ववदवृत्ति इति तत्सम्बन्धेन घटत्वाद्यवच्छिन्नप्रतियोगिताकप्रमेयसामान्याभावोपि बोध्यः ॥ अप्रसिद्धिदोषस्यापि सत्त्वान्मूले प्रतियोग्यवृत्तीत्यादिदोषान्तरं किमित्युपासमतस्तदवतारार्थमाशङ्कते नन्विति। पारिभाषिकमेवेत्येवकारेण

न व्यभिचारोऽव्यभिचार इति योगार्थो व्यवच्छिद्यते । अव्यभिचरितत्वमिति । अथेदं वाच्यमित्यादिग्रन्थाभिप्रेतमिति शेषः । तथा च न चैवं घट इत्यादिमूलस्य केवलान्वयिनो व्यभिचरितत्वेनालक्ष्यतापदर्शनपरत्वान्न पूर्वमूलासङ्गतिरिति ध्येयम् । यदित्यादि । अत्र यत्समानाधिकरणा इत्यस्यानुक्तौ साध्यातावच्छेदकावच्छिन्नव्यापकतावच्छेदकप्रतियोगिताकस्यात्मत्वसामान्याभावस्यापि यावदन्तर्गतत्वात्तस्य च व्यापकतावटकसमवायसम्बन्धेन प्रतियोग्यधिकरणे केनापि सम्बन्धेनावृत्तित्वादयमात्मा ज्ञानादित्यादावव्याप्तिरतस्तदुपात्तमित्यग्रे स्फुटीभविष्यति । न चात्मत्वाद्यभावोपि समानकालीनत्वादिसम्बन्धेन प्रतियोग्यधिकरणवृत्तिः । तथाविधसम्बन्धानां वृत्त्यनियामकत्वात् । क्वचिदपि तेन सम्बन्धेन वृत्तित्वाप्रतीतेः । इत्थं च हेतुसमानाधिकरणत्वमपि हेतुतावच्छेदकसम्बन्धेन हेत्वधिकरणाधेयत्वं ग्राह्यम् । तेनात्मत्वाद्यभावस्यापि हेत्वधिकरणसम्बन्धित्वान्नोक्तदोषतादवस्थ्यम् । न च हेतुसमानाधिकरणा इत्यपहाय साध्यसमानाधिकरणा यावन्तस्तादृशाभावाः स्वविशिष्टयद्धर्मावच्छिन्नहेत्वधिकरणावच्छेदेन प्रतियोगिसमानाधिकरणास्तद्धर्मवत्त्वमित्येव कुतो लक्षणं न कृतमिति वाच्यम् । द्रव्यमात्मत्वादित्यादौ महाकाले साध्यसमानधिकरणस्य द्रव्यत्वादिसामान्याभावस्य स्वविशिष्टहेत्वधिकरणाप्रसिद्ध्या तत्राव्याप्तिप्रसङ्गात् । [दैशिकविशेषणतासम्बन्धेन साध्याधिकरणवृत्तित्वोक्तौ च गौरवात् वस्तुतो द्रव्यं सत्तावद्वा आत्मत्वादित्यादावव्याप्तिः । पृथिव्यन्यत्वविशिष्टद्रव्यत्वाभावस्य गुणान्यत्वविशिष्टसत्ताभावस्य वा दैशिकविशेषणतया साध्यसमानाधिकरणस्य केनापि संबन्धेन हेत्वधिकरणेऽवर्तमानत्वात् ।] यत्तु यत्समानाधिकरणा यावन्तस्तादृशाभावाः साध्यसमानाधिकरणास्तत्त्वमित्येवास्तु लक्षणं स्वस्वप्रतियोगिसामानाधिकरण्यस्य प्रवेशे बीजाभावादिति तत्तुच्छम् । तथा सति यत्समानाधिकरणा यावन्तोऽभावाः साध्यसमानाधिकरणास्तत्त्वमित्यस्यैव सम्यक्त्वे साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकप्रतियोगिताका इत्यस्य व्यर्थतापत्तेः । तन्मात्रोक्तौ च विनापि व्यधिकरणधर्मावच्छिन्नाभावं लक्षणसम्भवे प्रतियोग्यवृत्तिश्चेत्यादेरवतारकत्वानुपपत्तिः । यदपि यत्समानाधिकरणाः साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकप्रतियोगिताका-

धिकरणाः साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकप्रतियोगिताका यावन्तोऽभावाः प्रतियोगिसमानाधिकरणास्तत्त्वम् सर्वत्र

यावन्तोऽभावा दैशिकविशेषणतयोभयवृत्तयस्तत्त्वमित्येव लक्षणमस्तु स्वस्वप्रतियोगिसामानाधिकरण्यान्तर्भावे गौरवात् हेतुसमानाधिकरणस्य तत्तदयोगोलकान्यत्वाभावस्यैव दैशिकविशेषणतयोभयवृत्तित्वाभावाद्धूमवान्वह्नेरित्यादावतिव्याप्तिविरहादिति तन्मन्दम् । हेतुसमानाधिकरणस्य वह्निसंयोगाद्यात्मकाभावस्य दैशिकविशेषणतयोभयवृत्तित्वविरहेण वह्निमान्धूमादित्यादावव्याप्तिप्रसङ्गात् । न च भावभिन्नस्यैव हेतुसमानाधिकरणाभावस्य प्रवेशान्नैष दोषः । तद्घटभिन्नं घटत्वादित्यादावतिव्याप्त्यापत्तेः । तद्घटभिन्नत्वाद्यभावस्य तद्घटत्वादिस्वरूपत्वेन भावत्वात् । पटत्वादिना तद्घटभिन्नत्वाद्यभावस्य चोभयवृत्तित्वादिति । [अत्र च हेतुसमानाधिकरणा यावन्तस्तादृशाभावाः स्वप्रतियोगिमत्ताग्रहविरोधिताघटकसम्बन्धेनोभयवृत्तयस्तत्त्वमिति कृते न काप्यनुपपत्तिरित्यलं पल्लवितेन ।] अत्र च यत्पदं यद्धर्मावच्छिन्नपरम् । अग्रे च तत्त्वमित्यस्य हेतुनावच्छेदकीभूततद्धर्मवत्त्वमित्येवार्थः । तेन सकलधूमव्यक्त्यनुगताया वह्निव्याप्तेर्नालाभः । न वा ज्ञानवान्मनोन्यत्वे सति आत्ममनःसंयोगादित्यादौ मनसि हेतुसमानाधिकरणस्यात्मत्वसामान्याभावस्य स्वविशिष्टहेतुनावच्छेदकावच्छिन्नहेत्वधिकरणाप्रसिद्धिनिबन्धनाव्याप्तिः । यत्तु द्रव्यं गुणकर्मान्यत्वे सति सत्त्वादित्यादौ हेतुसमानाधिकरणस्य द्रव्यत्वाद्यभावस्यातथात्वाद्व्याप्तिरतो यत्पदस्य यद्धर्मावच्छिन्नपरत्वमिति तन्न । द्रव्यत्वाद्यभावस्यापि कालिकादिसम्बन्धेन स्वविशिष्टं यद्धेतुतावच्छेदकावच्छिन्नहेत्वधिकरणं जन्यद्रव्यादि तदवच्छेदेन प्रतियोगिसामानाधिकरण्यात्तत्राव्याप्तिविरहात् । साध्यतेत्यादि । साध्यतावच्छेदकावच्छिन्नवन्निष्ठाभावप्रतियोगितानवच्छेदिका यदभावप्रतियोगिता तादृशाभावा इत्यर्थः । अत्र च विशिष्टसत्तावान् जातेरित्यादौ विशिष्टसत्तात्वावच्छिन्नाभावस्यैव सत्तास्वरूपसाध्यव्या-

पकतावच्छेदकप्रतियोगिताकतया तस्य स्वविशिष्टेत्वधिकरणावच्छेदेन प्रतियोगिसामानाधिकरण्यादतिव्याप्तेरतः साध्यतावच्छेदकावच्छिन्नेति। तथा च द्रव्यत्वाद्यभावस्यैव निरुक्तयावदन्तर्गतस्यातथात्वान्नातिव्याप्तिः। साध्यवत्त्वं चात्र साध्यतावच्छेदकसम्बन्धेन निवेश्यम्। तेन वस्तुमात्रस्यैव विषयतासम्बन्धेन ज्ञानवत्त्वाद्घटत्वादिना वाच्यत्वाभावस्यैव साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकप्रतियोगिताकत्वेपि समवायेन ज्ञानस्य साध्यत्वे द्रव्यत्वादिहेतौ नातिप्रसङ्गः। समवायसम्बन्धावच्छिन्नज्ञानवन्निष्ठाभावप्रतियोगितानवच्छेदकप्रतियोगिताकस्याभावस्यैव प्रतियोगिसमानाधिकरणत्वात्। अत्र च साध्यवन्निष्ठाभावः प्रतियोगिव्यधिकरणत्वेन विशेषणीयः। तेन साध्यवन्मात्र एव समवायित्वावच्छिन्नवाच्यत्वाभावप्रतियोगित्वेन घटाद्यभावसत्त्वेपि न साध्यवन्निष्ठाभावप्रतियोगितानवच्छेदकप्रतियोगिताकाभावस्याप्रसिद्धिः। इत्थं च तत्सम्बन्धेन स्वावच्छिन्नानधिकरणसाध्यवन्निष्ठाभावप्रतियोगितावच्छेदको यो यस्तदन्यत्वे सति तत्सम्बन्धावच्छिन्नाधेयतावच्छेदकत्वरूपतत्सम्बन्धेन साध्यव्यापकतावच्छेदकत्वं निरुक्त्य तादृशव्यापकतावच्छेदिका यदभावप्रतियोगिता तादृशाभावाः प्रवेशनीयाः। न च तत्सम्बन्धावच्छिन्नाधेयतेत्यादिकं व्यर्थम्। द्रव्यत्वाद्यभावप्रतियोगितायामपि संयोगसम्बन्धेन वह्न्यादिव्यापकतावच्छेदकत्वापत्त्या यावदन्तर्गतस्य तत्सम्बन्धेन द्रव्यत्वाद्यभावस्य साध्यव्यापकताघटकीभूतसंयोगादिसम्बन्धेन प्रतियोगिसामानाधिकरण्याप्रसिद्ध्या सद्धेतुमात्र एवासम्भवस्य वारणार्थं तदुपादानात्। संयोगसम्बन्धावच्छिन्नाधेयत्वस्य द्रव्यत्वादावसत्त्वेन द्रव्यत्वादिनिष्ठप्रतियोगित्वस्य तादृशाधेयतानवच्छेदकत्वात्। तत्सम्बन्धेन स्वावच्छिन्नानधिकरणत्वं च तत्सम्बन्धेन स्वावच्छिन्नाधिकरणसामान्यभेदः। तेन वह्न्यादिनिष्ठप्रतियोगित्वावच्छिन्नाधिकरणगगनोभयभेदस्य घटत्वादिना वह्न्यादिनिष्ठप्रतियोगित्वावच्छिन्नाधिकरणभेदस्य च वह्न्यादिसाध्यवति सत्त्वेपि न क्षतिः। अत्राभावा इति स्वरूपकथनम्। वस्तुतः साध्यवन्निष्ठाभावस्य तत्सम्बन्धावच्छिन्नप्रतियोगितायाः सामानाधिकरण्येनानवच्छेदकत्वमेव तत्सम्बन्धेन साध्यव्यापकतावच्छेदकत्वं वाच्यम्। तत्र च साध्यवन्निष्ठत्वप्र-

वाच्यत्वाद्यभावस्य तथात्वाद्यावत्त्वोपादानम् अत एव भूतत्वमू-

भावस्य स्वरूपसम्बन्धेन ग्राह्यम् । तेन स्पन्दः कालत्वादित्यादौ स्पन्दत्वाद्यभावस्यापि कालिकसम्बन्धेन साध्यवति वृत्त्या यावदनन्तर्गतत्वात् समवायित्वेन वाच्यत्वाद्यभावस्य च तादृशप्रतियोगिसमानाधिकरणत्वेपि नातिव्याप्तिः । इत्थं च जातिसामान्याभावादेरपि वह्न्यादिव्यापकतया तत्प्रतियोगिकस्य जात्यादिस्वरूपस्य हेतुसमानाधिकरणाभावस्य जातिसामान्याभावात्मकप्रतियोग्यसमानाधिकरणत्वादसम्भवापत्तिरतोऽभावा इत्युक्तम्। भावभिन्ना इति च तदर्थः । यथा च सामानाधिकरण्येनानवच्छेदकत्वघटितायां व्यापकतायां न दोषस्तथाग्रे प्रपञ्चयिष्यते । नव्यास्तु साध्यतावच्छेदकेत्यादि साध्यतावच्छेदकावच्छिन्नाधिकरणानि यावन्ति तत्प्रत्येकवृत्तिवृत्तिप्रतियोगिताकेत्यर्थः न चैकमात्रवृत्तिसाध्यकसङ्केतावव्याप्तिः तत्र यावत्त्वस्यानुपादेयत्वात् शब्दैक्यस्याकिञ्चित्करत्वात् यद्वा साध्यतावच्छेदकावच्छिन्नसमानाधिकरणा यावन्तो धर्मास्तत्प्रत्येकसमानाधिकरणवृत्तिप्रतियोगिताकेत्यर्थः इति प्राहुः । यत्तु साध्यवदवृत्त्यभावप्रतियोगितावच्छेदकप्रतियोगिताकेत्यर्थ इति तन्न। केवलान्वयिसाध्यकसङ्केतौ तादृशप्रतियोगित्वाप्रसिद्ध्याव्याप्तेः गगनस्वरूपाभावस्य तादृशत्वेपि हेतुसमानाधिकरणत्वासम्भवादिति। अत्र व्यापकतावच्छेदकप्रतियोगिताका इत्यत्र व्यापकतायां अवच्छेदं ययेति बहुव्रीहौ कप्रत्ययः तेन प्रतियोगितया सममवच्छेदिकापदस्य समासे कोपधत्वेपि पुंवद्भावः । तद्धितवुन्कोपधस्यैव पुंवद्भावनिषेधादित्यभियुक्ताः। सर्वत्रेति । सङ्केतावसङ्केताविति यावत्यर्थः । तथा च यावत्त्वानुक्तावतिव्याप्तिरेव स्यान्नाव्याप्तिरिति भावः। सकलव्यभिचारिणोत्यर्थ इत्यन्ये । केचित्तु सर्वत्रेति सकलहेत्वधिकरणावच्छेदेनेत्यर्थ इत्यप्याहुः । वाच्यत्वाद्यभावस्येति। घटत्वादिना वाच्यत्वाभावस्य चेत्यर्थः । तथात्वात् प्रतियोगिसमानाधिकरणत्वात् । तथा च धूमवान्वह्नेरित्यादावतिव्याप्तिवारणार्थमेव यावत्पदोपादानमिति भावः । ननु साध्यतावच्छेदकव्यापकप्रतियोगिताकयावदभावोक्तावेव वाच्यत्वाद्यभावमादायोक्तस्यातिप्रसङ्गस्य व्युदास-

सम्भवात् साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकप्रतियोगिताकाभावानां यावत्त्वोपादानं गौरवग्रस्तमत आह अत एवेति । निरुक्ताभावे यावत्त्वोपादानादेवेत्यर्थः । अन्यथा भूतत्वाद्यभावस्य साध्यतावच्छेदकव्यापकप्रतियोगिताकान्यत्वादूभूतत्वमूर्तत्वोभयत्वाद्यवच्छिन्नाभावस्य च तादृशप्रतियोगिताकस्य स्वविशिष्टहेत्वधिकरणावच्छेदेन प्रतियोगिसमानाधिकरणत्वादतिव्याप्तिः स्यादेवेति भावः । यत्तु साध्यप्रतियोगिको यत्किञ्चिद्भावो यद्धर्मावच्छिन्नहेत्वधिकरणावच्छेदेन प्रतियोगिसमानाधिकरणस्तद्धर्मवत्त्वमित्येव लक्षणमस्तु कृतं यावत्त्वगर्भनिरुक्त्या धूमवान्वह्नेरित्यादौ घटत्वेन धूमाभावस्यापि तादृशहेत्वधिकरणावच्छेदेन प्रतियोग्यसमानाधिकरणत्वादतिव्याप्तिव्युदासादित्याशङ्क्यात एवेत्यादिकमवतारयन्ति तत्तुच्छम् । तादृशशङ्कायां धूमवान्वह्नेरित्यादिप्रसिद्धस्थल एव वह्निधूमोभयत्वावच्छिन्नाभावमादायातिव्याप्तिसम्भवे भूतत्वमूर्तत्वोभयवानित्याद्यनुधावनस्य सन्दर्भविरोधापत्तेः । यदपि यादृशाभावस्य प्रतियोगितायां व्यापकं साध्यतावच्छेदकं तादृशः कश्चिद्भावो यद्धर्मावच्छिन्नाधिकरणावच्छेदेन प्रतियोगिसमानाधिकरणस्तद्धर्मवत्त्वं व्याप्तिरित्युक्त्यैव वाच्यत्वाद्यभावमादायातिव्याप्तिवारणसम्भवाद्यावत्त्वगर्भलक्षणं गौरवग्रस्तमत उक्तं अत एवेत्यादीति तदप्यसङ्गतम् । प्रतियोगितामात्रस्यैव प्रत्येकपर्यवसितत्वेन वह्निधूमोभयत्वादेस्तदव्यापकत्वासम्भवाद्वह्निधूमोभयवान्धूमादित्यादावव्याप्तिभयेन तादृशनिरुक्तेः शङ्कितुमप्यशक्यत्वात् । ननु प्रतियोगिसामानाधिकरण्यमित्यत्र प्रतियोग्यधिकरणत्वं साध्यनिरूपितसाध्यतावच्छेदकसम्बन्धेन ग्राह्यमित्यलं यावत्त्वनिवेशेनेत्यत आह अत एवेत्यादीत्यपि वदन्ति । नव्यास्तु ननु साध्यतावच्छेदकातिरिक्तधर्मानवच्छिन्नसाध्यनिष्ठयादृशप्रतियोगिताको यत्किञ्चिद्भावो यद्धिकरणावच्छेदेन तादृशप्रतियोगिताश्रयसमानाधिकरणस्तत्त्वमित्यस्यैव सम्यक्त्वे यावत्त्वगर्भलक्षणारम्भो गौरवग्रस्तः प्रमेयवान् वाच्यत्वादित्यादौ विरुद्धघटत्वपटत्वोभयगगनाद्यवच्छिन्नप्रतियोगिताकप्रमेयाभावमादाय लक्षणसम्भवात् गगनादेर्वृत्तिमत्त्वलक्षणधर्मस्वाभावात् सामान्याभावीयान्यप्रतियोगित्वं स्वरूपसम्बन्धेन प्रत्यायं विभिन्नमुपेयमतो विरुद्धघटत्वपटत्वाभ्यां प्रमेयमात्रस्याभावमा-

र्तत्वोभयवान्मूर्तत्वादित्यादौ द्वित्वावच्छिन्नाभावस्य प्रतियोगि-
सामानाधिकरण्येऽपि भूतत्वमनोन्यत्वाद्यभावस्यातथात्वान्नातिप्र-

---

दायैव धूमवान्वह्नेरित्यादौ नातिप्रसङ्गः न चानवच्छिन्नान्तवैयर्थ्यं वह्निधूमोभयत्वावच्छिन्नाभावमादाय धूमवान्वह्नेरित्यादावतिव्या-प्तेर्वारकत्वात्साध्यनिष्ठपदमपि तदर्थमेव अन्यथा गगनाद्यवच्छिन्न-प्रतियोगिताकवाच्यत्वाद्यभावमादाय व्यभिचारिमात्रेतिव्याप्त्याप-त्तेरित्यत आह अत एवेति इत्थं च भूतत्वविशिष्टमूर्तत्वाद्यभावस्य साध्यतावच्छेदकातिरिक्तधर्मावच्छिन्नप्रतियोगिताकतया तस्य प्र-तियोगिसामानाधिकरण्यं नातिव्याप्तं सम्पादयतीत्याशयेन द्वि-त्वाद्यवच्छिन्नाभावपर्यन्तस्य प्रतियोगिसामानाधिकरण्यमपि साधु सङ्गच्छते परं तु प्रकृतसाध्यव्याप्यतावच्छेदकप्रतियोगिताको यः कश्चिद्भावो यदधिकरणावच्छेदेन प्रतियोगिसमानाधिकरणस्तत्त्व-मेवाव्यभिचरितत्वं कुतो नोक्तम् भूतत्वमूर्तत्वोभयत्वावच्छिन्नप्रति-योगिताव्यक्तेस्तादृशोभयात्मकसाध्यव्याप्यतावच्छेदकत्वाभावादेव तादृशोभयाभावमादायातिव्याप्त्यसम्भवादिति विभावनीयमिति प्राहुः। [के चित्तु ननु साध्यतावच्छेदकावच्छिन्नपदस्य व्यर्थतया सा-ध्यव्यापकतावच्छेदकप्रतियोगिताकाभाव एव यावत्त्वविशेषणमुचि-तमित्यत आह अत एवेति उक्ताभावे यावत्त्वोपादानादेवेत्यर्थः इति प्राहुः] भूतत्वमात्मभिन्नत्वे सति विशेषगुणवत्त्वम् तच्च न व्याप-कतायाः प्रतियोगिवैयधिकरण्याघटितकल्पे भूतत्वमूर्तत्वोभयस्य व्यापकं तादृशोभयवति घटादावुत्पत्तिक्षणावच्छेदेन विशेषगुण-त्वाद्यवच्छिन्नाभावसत्त्वादत उक्तं मनोन्यत्वेति। साध्यस्यैवाभाव-मादाय नातिव्याप्तिः सुतरां वस्त्वन्तरस्यैवेति कैमुतिकन्यायेनोक्तं मनोन्यत्वेतीत्यपि वदन्ति। अतथात्वादिति। स्वविशिष्टहेत्वधिक-रणावच्छेदेन प्रतियोग्यसमानाधिकरणत्वादित्यर्थः। मनस्येव व्यभि-चारादिति भावः। ननु यत्समानाधिकरणा यावन्तोभावाः प्रतियो-गिसमानाधिकरणास्तत्त्वमित्यस्यैव सम्यक्त्वे साध्यतावच्छेदकाव-च्छिन्नेत्यादि व्यर्थम् न च [साधनसमानाधिकरणगोत्वाद्यभावस्य हेत्वधिकरणावच्छेदेन प्रतियोग्यसमानाधिकरणत्वादसंभव इति वा-

सङ्गः साधनसमानाधिकरणस्य गोत्वाद्यभावस्य तत्तत्साध्यव्यक्त्यभावस्य चातथात्वात् साध्यतावच्छेदकेत्यादि येन सम्बन्धेन हेतुः तेनैव तदधिकरणं बोध्यम् तेनात्मत्वे साध्ये समवायेन हेतोर्ज्ञानस्य विषयतयाऽधिकरणे घटादौ वर्तमानस्य साध्याभावस्यातथात्वेऽपि न क्षतिः एवं दलान्तरेऽपि सम्बन्धभेदनिबन्धनो

व्यम्] तस्यापि पूर्वक्षणवृत्तित्वविशिष्टस्वाभावात्मकप्रतियोगिसमानाधिकरणत्वात् [न चैवंरीत्या] व्यभिचारिण्यतिव्याप्तिरिति वाच्यम् अभावस्य स्वसमानाधिकरणधर्मावच्छिन्नस्वकीययत्प्रतियोगिताश्रयसामानाधिकरण्यं तदन्यप्रतियोगिताया एव व्याप्यवृत्तितानिरूपकतया धूमाद्यभावस्य पूर्वक्षणवृत्तित्वविशिष्टस्वाभावनिष्ठप्रतियोगितायां अतथात्वेन धूमवान्वह्नेरित्यादावतिव्याप्त्ययोगादत आह साधनेत्यादि।गोत्वादीत्यादिपदेन गगनादिसंग्रहः। तथाच तद्दलानुक्तावसम्भव एव स्यादिति भावः।नन्वेवं यत्समानाधिकरणा यावन्तः साध्यप्रतियोगिकाभावाः साध्यतावच्छेदकसम्बन्धेन प्रतियोगिसमानाधिकरणास्तत्त्वमित्येवोच्यतां तावतैव गोत्वाद्यभावमादायासम्भवस्य व्युदासादत आह तत्तदिति । तथा चोक्तविवक्षायां द्रव्यत्वाद्येकव्यक्तिसाध्यकसद्धेतौ लक्षणसम्भवेपि वह्निमान् धूमाज्जातिमान् सत्त्वादित्यादौ साध्यप्रतियोगिकानां तत्तद्व्यक्त्यभावानामात्मत्वाद्यभावानां च प्रतियोग्यसमानाधिकरणत्वाद्व्याप्तिरिति भावः । न च साध्यव्यापकप्रतियोगिका इत्यस्यैव सम्यक्त्वे व्यापकतावच्छेदकप्रतियोगिताकपर्यन्तं व्यर्थमिति वाच्यम् । तत्तत्साध्यव्यक्तीनां गगनादीनां च प्रमेयत्वादिप्रकारेण साध्यव्यापकतया तदभावमादायासम्भवापत्तेः । न च वृत्तिमत्त्वे सति स्वानधिकरणसाध्यवन्निष्ठाभावाप्रतियोगित्वेन साध्यव्यापकत्वं निरुच्य तत्प्रतियोगिकाभाव एव निवेश्यतामिति वाच्यम् । तस्य लक्षणान्तरत्वेप्युक्तलक्षणस्यादुष्टत्वादिति भावः । यत्समानाधिकरणा इत्यत्र हेत्वधिकरणत्वं विशिनष्टि येनेत्यादिना । तदधिकरणमिति । तत्सम्बन्धीत्यर्थः । तेन तादात्म्येनाधिकरणाप्रसिद्धावपि तत्सम्बन्धेन सद्धेतौ नाव्याप्तिः ।

दोषः सम्बन्धैक्यविवक्षया निरसनीयः रूपादिसामान्याभावे साध्ये

अतथात्वेपीति। प्रतियोग्यधिकरणवृत्तित्वविरहेपीत्यर्थः। यद्यपि प्रतियोगिसामानाधिकरण्यमवश्यं स्वविशिष्टहेत्वधिकरणावच्छेदेनाग्रे विवक्षणीयम् तथा च हेतुतावच्छेदकसम्बन्धेन हेत्वधिकरणानुक्तौ कालिकसम्बन्धेन धूमस्याधिकरणं महाकाले वर्तमानस्य प्रलयान्यत्वाद्यभावस्यापि यावदन्तर्गतत्वात् स्वविशिष्टहेत्वधिकरणाप्रसिद्ध्या वह्निमान् धूमादित्यादावव्याप्तिः सम्भवति। तथापि स्वविशिष्टहेत्वधिकरणेत्यादेरुक्तावनुक्तौ चोभयथैव अयमात्मा ज्ञानादित्यत्राव्याप्तिः वह्निमान् धूमादित्यत्र स्वविशिष्टेत्याद्युक्तावेव तथेत्याशयेन प्रसिद्धोदाहरणं परित्यक्तम्। यत्तु महाकालस्यैव प्रलयान्यत्वाद्यभावविशिष्टहेत्वधिकरणत्वसम्भवात् स्वविशिष्टेत्याद्युक्तावपि वह्निमान् धूमादित्यादौ नाव्याप्तिः महाकालस्य हेतुताघटकसंयोगसम्बन्धेन धूमाधिकरणत्वाभावेपि हेतुसम्बन्धित्वानपायात् तादात्म्येन हेतोः सङ्ग्रहार्थं हेतुतावच्छेदकसम्बन्धेन यो हेतुसम्बन्धी तद्वृत्तियावदभावानामेव निवेशितत्वादिति मतं तत्तुच्छमा संयोगमात्रेण धूमहेतोः प्रभामण्डलादौ वह्नेर्व्यभिचारितया पर्वतादिनिरूपितसंयोगेनैव तस्य हेतुत्वात्तादृशसंयोगेन च धूमस्याधिकरणे पर्वतादौ प्रलयत्वादिस्वरूपस्य प्रलयान्यत्वाद्यभावस्य वैशिष्ट्याप्रसिद्धेरावश्यकत्वात्। विभिन्नकालीनयोर्विषयतान्यसम्बन्धसामान्येनैवाधाराधेयभावविरहादिति दिक्। ननु पृथिवीत्ववान् महाकालकपालान्यतरत्वादित्यादावतिव्याप्तिः साधनसमानाधिकरणस्य महाकालान्यत्वाद्यभावस्यापि हेत्वधिकरणमहाकालाद्यवच्छेदेन कालिकसम्बन्धेन प्रतियोगिसमानाधिकरणत्वादत आह एवमिति। दलान्तरेपि प्रतियोगिसामानाधिकरण्यदलेपीत्यर्थः। एकसम्बन्धेन व्यापकत्वमन्यसम्बन्धेन प्रतियोगिसामानाधिकरण्यमित्येवं सम्बन्धभेदनिबन्धनः प्रोक्तातिव्याप्तिरूपो दोषः साध्यव्यापकताघटकसम्बन्धेन सार्द्धं प्रतियोगिसामानाधिकरण्यघटकसम्बन्धस्यैक्यविवक्षया निरसनीय इत्यर्थः। यत्सम्बन्धेन स्वावच्छिन्नानाधिकरणसाध्यवन्निष्ठाभावप्रतियोगितावच्छेदकं

यद्यत्तदन्यप्रतियोगिताकः साध्यवन्निष्ठाभावीयतत्सम्बन्धावच्छिन्न-प्रतियोगितायाः सामानाधिकरण्येनावच्छेदकान्यप्रतियोगिको वा यो-भावस्तादृशसम्बन्धेन प्रतियोगिनो यदधिकरणं तदवृत्तित्वं विव-क्षितमिति फलितोर्थः । पृथिवीत्वाभावप्रतियोगित्वं तु न कालिक-सम्बन्धेन पृथिवीत्वादिव्याप्रकतावच्छेदकं नित्यपृथिव्यां व्यभिचा-रात् । किं तु समवायेनैव । तेन च सम्बन्धेन पृथिवीत्वाद्यभावस्य हे-त्वधिकरणमहाकालावच्छेदेन प्रतियोगिसामानाधिकरण्याभावा-न्नोक्तातिव्याप्तिरिति भावः । यत्तु येन सम्बन्धेन व्यापकत्वं तेन सम्बन्धेन प्रतियोगिसामानाधिकरण्योक्तावपि नित्यज्ञानमीश्वरस-विषयकत्वादित्यत्रातिव्याप्तिः साधनसमानाधिकरणस्येच्छाभिन्न-त्वाद्यभावस्यापि साध्यव्यापकताघटकविषयितासम्बन्धेन यावद्धे-त्वधिकरणे प्रतियोगिसमानाधिकरणत्वात् न च येन येन सम्बन्धे-न व्यापकत्वं तेन तेन सम्बन्धेन प्रतियोगिसामानाधिकरण्यविवक्ष-णान्नोक्तदोषः तथा सति यावत्पदवैयर्थ्यापत्तेः विशेषणतासा-मान्येनैव साध्यवन्निरूपितविशेषणतयापि वाच्यत्वादेः साध्यव्या-पकतया घटत्वादिना वाच्यत्वाद्यभावस्यैव तादृशसम्बन्धेन हेत्व-धिकरणावच्छेदेन प्रतियोगिसामानाधिकरण्यविरहात् धूमवान् वह्नेरित्यादौ व्यभिचारिण्यतिव्याप्तिविरहात् इति तन्मन्दम् । विष-यितासम्बन्धेन व्यापकताया एवासत्त्वाद्विषयितासम्बन्धेन स्वाव-च्छिन्नाधिकरणत्वाप्रसिद्ध्या स्वावच्छिन्नानधिकरणसाध्यवन्निष्ठे-त्यादिव्यापकतायास्तेन सम्बन्धेनासम्भवात् । न च तेन सम्बन्धेन स्वावच्छिन्नसम्बन्धित्वमेव व्यापकतायां निवेशनीयम् । त्वदुक्ता-तिप्रसङ्गभयेनैव तस्यानिवेशनीयत्वात् । न च तत्सम्बन्धावच्छिन्ना-याः साध्यवन्निष्ठाभावप्रतियोगितायाः सामानाधिकरण्येनानवच्छे-दकधर्मवत्त्वलक्षणं व्यापकत्वं विषयितासम्बन्धेन सुलभं साध्यवति नित्यज्ञाने वस्तुमात्रस्यैव विषयितासम्बन्धेन सत्त्वेपि नित्यज्ञानान्य-त्वाविशिष्टघटादेर्विषयितासम्बन्धेनाभावस्य तत्र सत्त्वे बाधकाभा-वादिति वाच्यम् । विषयिताया वृत्त्यनियामकतया तत्सम्बन्धावच्छि-न्नप्रतियोगित्वाप्रसिद्धेः । यदपि मनस्त्ववत् अणुत्वादित्यत्रातिव्या-प्तिः परमाणुत्वसमानाधिकरणस्य मनस्त्वाद्यभावस्यापि साध्यव्या-पकताघटकदिक्कृतविशेषणतया सर्वत्रैव परमाणौ प्रतियोगिसमा-

नाधिकरणत्वादिति तदपि तुच्छम् । नित्यानामव्यावर्तकत्वाज्जन्यानामेव मूर्तानां दिगुपाधितया परमाणौ दिक्कृतविशेषणतया कस्याप्यसत्त्वात् तेन सम्बन्धेन साध्यव्यापकत्वविरहात् । अन्यथा वस्तुमात्रस्यैव कालोपाधित्वसम्भवात्तदपि जन्यमात्रस्य न स्यात् । अत एव प्रलयदशायां दिग्देशविभागो नास्तीत्यादिसिद्धान्तः सङ्गच्छते । अन्यथा परमाणूनां सत्त्वात्तदानीमपि दिग्विभागप्रसङ्गादिति दिक् । यदि च स्पन्दो महाकालत्वादित्यादावतिव्याप्तिः साधनसमानाधिकरणस्य महाकालान्यत्वाद्यभावस्यापि साध्यव्यापकताघटककालिकसम्बन्धेन महाकाले प्रतियोगिसमानाधिकरणत्वात् न चायं स्पन्द इत्याकारकयत्किञ्चिद्बोधव्यक्तेर्विषयतासम्बन्धेनैव स्पन्दत्वव्यापकत्वात् यावदन्तर्गतस्य तदभावस्यैव साध्यव्यापकताघटकविषयतासम्बन्धेन हेत्वधिकरणमहाकाले प्रतियोगिसमानाधिकरणत्वाभावान्नातिव्याप्तिः न हि तादृशबोधव्यक्तौ कालिकसम्बन्धेनापि स्पन्दत्वव्यापकत्वं भाविभूतेषु स्पन्देषु व्यभिचारादिति वाच्यं विषयतायाः ज्ञानसमानकालीनतया तद्बुद्धिव्यक्त्यभावदशायामेव स्पन्दत्ववति विषयतासम्बन्धेन तत्तद्बुद्धिव्यक्त्यभावस्य सत्त्वाद्विषयतासम्बन्धेनायं स्पन्द इत्याकारकजन्यबुद्धेः साध्यव्यापकत्वासम्भवात् किं च व्यधिकरणधर्मावच्छिन्नाभावस्यासत्त्वेपि व्यधिकरणसम्बन्धावच्छिन्नवाच्यत्वाद्यभावमादायैव केवलान्वयिसाध्यकस्थले लक्षणसमन्वयात्प्रतियोग्यवृत्तिश्चेत्यादिमूलस्य तद्दूषकत्वानुपपत्तेः न च साध्यवन्निष्ठाभावीयप्रतियोगितायाः सामानाधिकरण्येनानवच्छेदकधर्मवत्त्वरूपव्यापकतायां व्यधिकरणधर्मावच्छिन्नाभावमादायासम्भववारकस्य सामानाधिकरण्येनेत्यस्य व्यर्थतायामेव तन्मूलग्रन्थस्य तात्पर्यमिति वाच्यं सामान्यधर्मेण विशेषाभावमादाय व्यापकत्वस्याप्रसिद्धेर्वारणार्थमेव सामानाधिकरण्यदलस्य व्यापकतायामवश्यं निवेशनीयत्वादित्यार्कं विभाव्यते तदा सम्बन्धैक्यविवक्षयेति ग्रन्थस्य साध्यव्यापकत्वस्य तदवच्छेदकप्रतियोगित्वस्य प्रतियोगिसामानाधिकरण्यघटकीभूतप्रतियोग्यधिकरणत्वस्य चैकसम्बन्धावच्छिन्नत्वविवक्षयेत्यर्थः । तथा च स्वप्रतियोगितावच्छेदकसम्बन्धावच्छिन्नसाध्यव्यापकतावच्छेदकप्रतियोगिताका यावन्तोभावाः स्वप्रतियोगितावच्छेदकसम्बन्धेन प्रति-

योगिसमानाधिकरणा इत्यर्थलाभात् यावदन्तर्गतस्य समवायादि-सम्बन्धेन नित्यज्ञानत्वमनस्त्वस्पन्दत्वाद्यभावस्य स्वप्रतियोगितावच्छेदकीभूतसमवायादिसम्बन्धेन यावद्धेत्वधिकरणे प्रतियोग्यसमानाधिकरणत्वात् नित्यज्ञानं नित्यसविषयकत्वात् मनस्त्ववत् अणुत्वात् स्पन्दो महाकालत्वादित्यादौ कुत्रापि नातिव्याप्तिः। नचैवं वाच्यं ज्ञेयत्वादित्यादावव्याप्तिः व्यधिकरणधर्मावच्छिन्नवाच्यत्वाद्यभावस्यैव तत्र घटकतया तस्य प्रतियोगितावच्छेदकसम्बन्धसत्त्वे मानाभावादिति वाच्यम्। स्वरूपसम्बन्धेन घटत्वादिना वाच्यत्वं नास्तीत्यादिप्रतीत्यनुरोधेन तादृशाभावस्यापि प्रतियोगितावच्छेदकसम्बन्धस्वीकारात्। अन्यथा भूतलं संयोगेन पटत्वावच्छिन्नघटवदित्येवं निर्णयसत्त्वेपि भूतले संयोगेन पटत्वेन घटो नास्तीति प्रत्ययप्रसङ्गात्। न चैवमपसिद्धान्तः। व्यधिकरणधर्मावच्छिन्नोपि चेद्भावः प्रामाणिकस्तदा सर्वैः सम्बन्धैस्तत्प्रतियोगिता अवच्छिद्यन्तामिति ग्रन्थकृतैव सामान्याभावे वक्ष्यमाणत्वात्। के चित्तु सम्बन्धैक्यविवक्षयेत्यस्य साध्यवत्त्वं साध्यव्यापकत्वं प्रतियोगिसामानाधिकरण्यघटकीभूतप्रतियोग्यधिकरणत्वं चैकेन साध्यतावच्छेदकसम्बन्धेन विवक्षणीयमित्यर्थः तथा च साध्यतावच्छेदकसम्बन्धावच्छिन्नसाध्यव्यापकतावच्छेदकीभूततादृशसम्बन्धावच्छिन्नप्रतियोगिताका यावन्तोऽभावाः साध्यतावच्छेदकसम्बन्धेन प्रतियोगिसमानाधिकरणा इत्यर्थलाभान्न कुत्राप्यतिव्याप्तिः न च प्रतियोगितायां साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वविवक्षणं व्यर्थमिति वाच्यम् तदनुक्तौ वाच्यत्वादिभेदमादायैव केवलान्वय्यादौ लक्षणसम्भवे प्रतियोग्यवृत्तिश्चेत्यादिमूले तन्निराकरणस्यासङ्गतत्वापत्तेः न चैवमपि सर्वत्र वाच्यत्वाद्यभावस्येत्यादिग्रन्थविरोधः वाच्यत्वादेः संयोगादिसम्बन्धेन धूमाद्यव्यापकत्वादिति वाच्यम् वाच्यत्वाद्यभावस्येत्यादिपदसत्त्वात् यत्र स्वरूपसम्बन्धेन साध्यता तत्र वाच्यत्वाद्यभावमादाय संयोगादिसम्बन्धेन साध्यतायां च द्रव्याद्यभावमादायातिव्याप्तिपरतयैव तत्सङ्गतेरित्याहुः। तन्मन्दम्। मनोन्यत्वाद्यभावस्येत्याद्युक्तग्रन्थविरोधात्। भूतत्वमूर्तत्वोभयस्य समवायेन साध्यतायां मनोन्यत्वस्य तत्सम्बन्धेन साध्यव्यापकत्वासम्भवात्। वृत्त्यनियामकसम्बन्धेनाधिकरणत्वस्य प्रतियोगित्वस्य चाप्रसिद्ध्या

तेन साध्यतायां धनी चैत्रत्वादित्यादिसद्धेतावव्याप्तिः । तद्रूपान्यरूपं रूपत्वादित्यादावतिव्याप्तेश्च । साध्यताघटकसमवायेन साध्यव्यापकतावच्छेदकप्रतियोगिताकानां व्यधिकरणधर्मावच्छिन्नगुणत्वाद्यभावानां सर्वेषामेव स्वविशिष्टहेत्वधिकरणावच्छेदेन प्रतियोगिसमानाधिकरणत्वादिति । यत्तु विशेषणताविशेषेण साध्यव्यापकत्वं तेनैव च प्रतियोगित्वं प्रतियोगिसामानाधिकरण्यं च सम्बन्धैक्यविवक्षेत्यस्यार्थमाह तदपि गवाद्यभावस्यात्मत्वाद्यभावस्येत्यादिग्रन्थस्यालग्रकतापत्तेरुपेक्षितमिति । नन्वेतावताप्ययमात्मा ज्ञानादित्यादावव्याप्तिरेव घटत्वादिनात्मत्वसामान्याभावस्यापि स्वविशिष्टस्य हेतोर्विषयतयाधिकरणे घटादौ व्यापकताघटकसमवायेन प्रतियोगिसामानाधिकरण्याभावादत आह दलान्तरेति प्रभावुक्तेः हेत्वधिकरणावच्छेदेनेत्यत्र हेत्वधिकरणदलेपीत्यर्थः [सम्बन्धभेदनिबन्धनो दोषः एकसम्बन्धेन हेत्वधिकरणत्वं स्वविशिष्टहेत्वधिकरणेत्यत्रान्यसम्बन्धेन हेत्वधिकरणत्वनिबन्धनोऽव्याप्तिरूपो दोष इत्यर्थः] सम्बन्धैक्यविवक्षयेति हेतुसमानाधिकरणा इत्यत्र हेत्वधिकरणत्वं येन सम्बन्धेन स्वविशिष्टहेत्वधिकरणावच्छेदेनेत्यत्र हेत्वधिकरणत्वं तेनैव सम्बन्धेनेति विवक्षयेत्यर्थः इत्थं च दलान्तरपदमपि साधु सङ्गच्छत इति तु नव्याः । यद्वा धूमवान्वह्नेरित्यत्रातिव्याप्तिः धूमसामान्याभावस्यापि हेत्वधिकरणायोगोलकावच्छेदेन स्वप्रतियोगित्वस्य कालिकसम्बन्धेनाश्रयीभूतवह्न्यादेः समानाधिकरणत्वादत आह दलान्तरेपीति । प्रतियोगिसामानाधिकरण्यमित्यत्र प्रतियोगिताश्रयदलेपीत्यर्थः । सम्बन्धभेदनिबन्धनो दोषः प्रकृतसाध्यव्यापकत्वस्यैकसम्बन्धावच्छिन्नावच्छेदकताकप्रतियोगितकाभावस्यान्यसम्बन्धावच्छिन्नप्रतियोगिताश्रयीभूतवह्न्यादेः सामानाधिकरण्यनिबन्धनो दोषः सम्बन्धैक्यविवक्षया यत्सम्बन्धेन व्यापकतावच्छेदकत्वं प्रतियोगिसामानाधिकरण्यमित्यत्रापि तेन सम्बन्धेन प्रतियोगिताश्रयत्वविवक्षयेत्यर्थ इति संक्षेपः । अत्र सम्बन्धैक्याविवक्षायां रूपसामान्याभाववान् पृथिवीत्वाज्जन्यपृथिवीत्वाद्वेत्यादिविरुद्धहेतावप्यतिव्याप्तिः साधनसमानाधिकरणस्य पृथिव्यन्यत्वाद्यभावस्यापि हेत्वधिकरणपृथिव्यवच्छेदेन जन्यपृथिव्यवच्छेदेन वा दिक्कृतविशेषणतया प्रतियोगिसमानाधिकरणत्वात् मूर्तमात्र-

पृथिवीत्वादिकं सद्धेतुरेव प्रलये परमाणावुत्पत्तिकाले त्रावयविनि तत्सत्त्वात् नच प्रतियोगिवत्तद्ध्वंसप्रागभावयोरत्यन्ताभावविरोधित्वम् मानाभावात् अतएव अन्तराश्यामे रक्तं रूपं नास्तीति

स्यैव दिगुपाधित्वोपगमात् न च तस्यालक्ष्यत्वे नीरूपमित्याकारकयत्किञ्चित्प्रमाव्यक्तेर्विषयतासम्बन्धेन साध्यव्यापकत्वाद्यावदन्तर्गतस्य तदभावस्यैव हेत्वधिकरणावच्छेदेन प्रतियोगिसामानाधिकरण्यविरहान्नातिव्याप्तिः तादृशबुद्धिव्यक्तेर्विभिन्नकालीनघटादौ केनापि सम्बन्धेनासत्त्वादिति वाच्यम् विषयताया ज्ञानसमानकालीनतया तादृशबुद्ध्यभावदशायामेव रूपशून्ये गगनादौ विषयतासम्बन्धेन तद्बुद्ध्यभावप्रतियोगित्वावच्छिन्नाभावसत्त्वात्तादृशज्ञानव्यक्त्यभावस्य साध्यव्यापकतावच्छेदकप्रतियोगिताकत्वाभावात् स्वावच्छिन्नानधिकरणसाध्यवन्निष्ठेत्यादिव्यापकतायास्तद्बुद्धिव्यक्तौ सत्त्वेपि प्रतियोगिवैयधिकरण्याघटितव्यापकत्वस्य तद्बुद्धिव्यक्तावसत्त्वेनोक्तस्थलेऽतिव्याप्तेरावश्यकत्वादिति भ्रमं निराकुरुते रूपसामान्येत्यादिना । पृथिवीत्वादिकमिति । नित्यपृथिव्या दिगुपाधित्वे मानाभावादादिपदम् । तेन जन्यपृथिवीत्वाद्युपग्रहः । सद्धेतुप्रतिकूलविरोधं निरस्यति प्रलय इति । महाप्रलय इत्यर्थः खण्डप्रलये तु पार्थिवपरमाणौ रूपप्रस्त्येव अन्यथोत्तरसर्गे पार्थिवद्व्यणुकस्य रूपोत्पत्त्यर्थं परमाणौ पाकान्तरकल्पनापत्तेरिति प्राञ्चः । प्रलय इत्यस्य पाकेन रूपादेः प्रलयदशायामित्यर्थः तेन महाप्रलयानभ्युपगमेपि न क्षतिः उत्पत्तिकाले चेत्यत्र चकारेण निरुक्तप्रलयस्यानुकर्षणाच्चावयविन्यपि पाकदशायां तत्सत्त्वात् न ग्रन्थन्यूनतेत्यपरे । ननु विरोधविरहे घटाद्यवच्छेदेन व्यभिचारित्वात्कुतः सद्धेतुत्वमत आह उत्पत्तीति । यद्यपि पाकेन श्यामादिरूपनाशकालेपि अवयविनि रूपसामान्याभावसत्त्वं तथापि पीलुपाकवादिमते तदसम्भवात् अपच्यमानावयव्यनुरोधाच्च उत्पत्तिकालमात्रानुसरणम् । तत्सत्त्वादिति । रूपादिसामान्याभावसत्त्वादित्यर्थः । प्रतियोगिवदिति । प्रतियोगिन इवेत्यर्थः । विरोधित्वं एकदैकदेशावृत्तित्वम् । मानाभावादिति । प्रलयाद्यवच्छेदेन परमाण्वादौ रूपादि-

प्रत्ययः न चैष रक्तिमध्वंसाद्यवगाही पूर्वापररक्तिमध्वंसप्रागभाववति रक्तेऽपि तथाप्रत्ययप्रसङ्गात्' तत्सामानाधिकरण्यञ्च

सामान्याभावे तु योग्यसन्निकर्षाभावात् प्रत्यक्षासम्भवेप्यनुमानादिकमानमस्तीत्याशयः। यत्तु घटादावुत्पत्तिकालावच्छेदेन रूपसामान्याभावस्य प्रत्यक्षमेव सम्भवति तदानीं चक्षुःसंयुक्तविशेषणतायास्तत्रासत्त्वेपि द्रव्यसमवेतवृत्त्यभावप्रत्यक्षहेतोश्चक्षुःसंयुक्तसमवेतविशेषणतायाः सत्त्वेन संनिकर्षसम्भवादिति तन्तुच्छम। चक्षुःसंयुक्तसमवेतद्रव्यणुकविशेषणतया रूपाद्यभावचाक्षुषापत्त्या चक्षुर्योग्यसंयुक्तसमवेतविशेषणताया एव अभावग्राहकत्वेन द्रव्यान्यद्रव्यसमवेतवृत्त्यभावचाक्षुषत्वस्यैव तज्जन्यतावच्छेदकत्वात्। अन्यथा त्रसरेणुवृत्त्यभावचाक्षुषे व्यभिचारापत्तेः। वस्तुतः स्वोत्पत्तेः पूर्वं चक्षुःसंयुक्तसमवेतस्य घटादेरसत्त्वात्तद्विशेषणतायाअपि तदानीमसत्त्वात्तदुक्तक्रमेण हेतुतैव नास्तीति ध्येयम्। अत एवेति। ध्वंसप्रागभावयोरत्यन्ताभावविरोधित्वे मानाभावादेवेत्यर्थः। रक्तिमध्वंसप्रागभावयोः सत्त्वमावेदयितुमन्तरापदम्। रक्तं रूपमिति। न च गुणे शुक्लादयः पुंसीत्यनुशासनात् रक्तो नास्तीत्येव प्रयोगो युक्त इति वाच्यम्। वस्त्वन्तरविशेषणतानापन्नस्यैव शुक्लादिशब्दस्य पुंस्त्वानुशासनात्। अत एव शुक्लं रूपमिति प्रयोगः समासे मणिकृतैव वक्ष्यत इति ध्येयम्। एष रक्तं रूपं नास्तीति प्रत्ययः। पूर्वेत्यादि। पूर्वरक्तस्य ध्वंसवति उत्तररक्तस्य प्रागभाववति इदानीं रक्तेपीत्यर्थः। न च रक्तादशायां वर्तमानस्यापि रक्तान्तरध्वंसादेस्तदानीं रक्तत्वावच्छिन्नप्रतियोगिताकत्वविरहान्न तादृशप्रत्ययस्तस्याव्याप्यवृत्तित्वादिति वाच्यम्। ध्वंसादिप्रतियोगित्वस्य किञ्चिद्धर्मानवच्छेद्यत्वात्। तत्तदनन्तध्वंसप्रागभावादिषु रक्तत्वावच्छिन्नप्रतियोगिताकत्वकल्पनामपेक्ष्य रक्तत्वावच्छिन्नात्यन्ताभावसम्बन्धस्यैवान्तराद्यामादिषु कल्पनाया लघुत्वाच्च। न च यावन्ति रक्तरूपाणि तत्तद्व्यक्तित्वेतरधर्मानवच्छिन्नतत्तद्व्यक्तिनिष्ठप्रतियोगिताकाभावकूटैरेव रक्तं रूपं नास्तीति प्रत्ययः क्रियते प्रकृते च विद्यमानरूपप्रतियोगिकस्य तादृशाभावस्यासत्त्वान्न तथा प्रतीतिरिति

स्वविशिष्टहेत्वधिकरणावच्छेदेनबोध्यम् तेन गोत्व-जन्यद्रव्यत्व-प्र-

---

वाच्यम् । तथा सत्यन्तरा श्यामे रक्तं रूपं नास्तीत्याकारकनिर्णयेपि तत्र रक्तं रूपमस्तीति प्रत्ययापत्तेः । विरोधिनः सामान्याभावस्यानिश्चयात् । विशेषाभावकूटनिर्णयस्याप्रतिबन्धकत्वात् । अन्यथा सामान्याभाव एव न सिद्ध्येदिति भावः । प्राञ्चस्तु प्रतियोगितासम्बन्धेन रूपत्वमात्रावच्छिन्नप्रकारताकः संसर्गाभावविशेष्यकः प्रत्ययो रूपत्वावच्छिन्नप्रकारताकबुद्धेर्विरोधीति रूपत्वं प्रतियोगितावच्छेदकमेव नेति श्यामतादशायां रूपत्वावच्छिन्नाभाव एव रूपं नास्तीतिप्रतीतेर्न विषयः किमनुरोधेन रूपध्वंसादिमति तदत्यन्ताभावसिद्धिरित्याहुः । तन्मन्दम् । अन्तरा श्यामे समवायेन रक्तं रूपं नास्तीतिप्रतीतेः प्रामाण्यानुरोधेनैव ध्वंसात्यन्ताभावयोर्न विरोधः । अन्यथा समवायावच्छिन्नप्रतियोगिताकध्वंसाद्यप्रसिद्ध्या तत्प्रतीतेर्भ्रमत्वापत्तेरिति तु परमार्थः । तत्सामानाधिकरण्यं चेति । प्रतियोगिसामानाधिकरण्यं चेत्यर्थः । स्वविशिष्टेति । स्वपदं लक्षणघटकतत्तद्भावव्यक्तिपरम् । तथा च तत्तद्भावाश्रयीभूतं यद्धेतुताघटकसम्बन्धेन हेतुतावच्छेदकधर्मावच्छिन्नाधिकरणं तदवच्छेदेन तत्तद्भावे स्वस्वप्रतियोगिसामानाधिकरण्यं ग्राह्यमित्यर्थः । तेन हेतुसमानाधिकरणस्य घटत्वादिना वह्न्याद्यभावस्यापि कालिकसम्बन्धेन धूमाद्यधिकरणस्पन्दादौ व्यापकताघटकसंयोगादिसम्बन्धेन प्रतियोगिसामानाधिकरण्याभावेपि वह्निमान् धूमादित्यादौ नाव्याप्तिः । न वा द्रव्यं विशिष्टसत्त्वादित्यादौ घटत्वादिना द्रव्यत्वाद्यभावस्य हेत्वधिकरणाद्यवच्छेदेन प्रतियोग्यसमानाधिकरणत्वेपि क्षतिः । गुणादीनां विशिष्टसत्तानधिकरणत्वात् । यद्यपि व्याप्यवृत्तेरवच्छेदकसत्त्वे मानाभावाद्भाव्यत्वाद्यभावनिष्ठं यत्प्रतियोगिसामानाधिकरण्यं तदवच्छेदकत्वं न हेत्वधिकरणस्येत्यसम्भवः कथितातिव्याप्तितादवस्थ्यं च न च स्वविशिष्टहेत्वधिकरणताव्यापकीभूतप्रतियोग्यधिकरणतावद्वृत्तित्वं वाच्यं स्वविशिष्टपदवैयर्थ्यापत्तेः प्रतियोग्यकरणीभूतस्वविशिष्टयावद्धेत्वधिकरणवृत्तित्वस्योक्तौ द्रव्यं तद्घटत्वादित्यादावव्याप्तिः यावद्धेत्वधिकर-

लयावृत्तित्वादिना गवादेरभावस्य गवाद्यनधिकरणधर्म्यवच्छेदेन तद्वति काले महाकाले वा वृत्तावपि यदा गोत्वं तदा गौर्यत्र कालत्वं तत्र जन्यद्रव्यम् प्रलयावृत्ति वेत्यादौ नातिप्रसङ्गः हेतुमति

णाप्रसिद्धेः। तथापि यावन्तो हेतुमद्वृत्तिधर्माः हेत्वधिकरणत्वानि वा यावन्ति तत्प्रत्येकाश्रयीभूतप्रतियोग्यधिकरणवृत्तित्वस्य विवक्षितत्वाददोषः। एकमात्रवृत्तिहेतोरपि तत्तत्क्षणवृत्तित्वविशिष्टस्य बहुन्यधिकरणत्वानि सन्तीति न तत्राव्याप्तिः। न च प्रतियोग्यधिकरणवृत्तित्वविशिष्टयावच्छेत्वधिकरणताकत्वमात्रं सम्यक् स्वविशिष्टपदस्य हेतुसमानाधिकरणा इत्यस्य च वैयर्थ्यापत्तेरिति भावः। प्रागुक्तमपि स्वविशिष्टपदं हेत्वधिकरणावच्छेदेनेत्यस्य प्रवेशे एवार्थवद्भवति इत्यतः पश्चादुक्तस्यापि तस्य प्रथमं प्रयोजनमाह तेनेति। गोत्वादिना गवाद्यभावस्य तद्वति काले वृत्तावपि यदा गोत्वं तदा गौरित्यादौ नातिप्रसङ्ग इति योजना। इदमुपलक्षणम्। तत्तदयोगोलकान्यत्वाद्यभावस्यापि प्रतियोगिसमानाधिकरणत्वाद्धूमवान्वह्नेरित्यादावतिप्रसङ्गो द्रष्टव्यः। गवाद्यभावस्य प्रतियोग्यधिकरणे दैशिकसम्बन्धेनापि वृत्तित्वमुपपादयितुमाह गवाद्यनधिकरणेति। इदानीं चत्वरे गौर्नास्तीतिप्रत्ययात् गोमत्यपि काले कालिकसम्बन्धावच्छिन्नगवाद्यभावस्य गवानधिकरणकालाद्यवच्छेदेन वृत्तौ न विरोधः। न चैतत्प्रत्ययस्य चत्वर एवैतत्कालावच्छेदेन गवात्यन्ताभावो विषय इति वाच्यम्। देशे वृत्तौ कालस्येव काले वृत्तौ देशस्यावच्छेदकत्वानुभवादेकदेशस्य कर्तुमशक्यत्वात्। इदानीं गगने गौर्नास्तीतिप्रतीतेर्गवाद्यभावस्यैतत्कालावच्छेदेन गगनवृत्तित्वावगाहितायां भ्रमत्वापत्तेश्च। गवाद्यभावस्य गगनादौ सार्वदिकत्वेन व्याप्यवृत्तितया कालावच्छेद्यत्वासम्भवादिति भावः। तद्वतीति। गवादिमतीत्यर्थः। काले जन्यकाले। ननु चरमध्वंसात्मकस्य प्रलयात्यन्ताभावाभावस्यापि यावदन्तर्गतत्वात्तस्य सृष्टिकाले प्रतियोगिसामानाधिकरण्याभावाद्व्याप्तिरत आह महाकाले वेति। तथाच तस्यापि महाकाले प्रतियोगिसामानाधिकरण्यात्तस्य कालिकसम्बन्धेन जगदाधारत्वादिति भावः। ननु गोत्वादिजातेः प्रलये कालिकसम्बन्धेन

प्रलये तत्सामानाधिकरण्याभावात् स्वविशिष्टेति विशेषणात्कपि-

सत्त्वे प्रमाणाभावाद्यदा गोत्वं तदा गौरिति सङ्केतुरेवेति यदि ब्रूया-त्तदाप्याह यत्र कालत्वमिति। उक्तविवक्षानादरे घटादिसाधारणरूपे-ण गोः साध्यतायामतिव्याप्तिरित्याशयेन साध्यान्तरमाह जन्यद्र-व्यमिति। द्रव्यस्य साध्यतायां कालत्वं सङ्केतुरेव प्रलये कालिक-सम्बन्धेन परमाण्वादेः सत्त्वात् कार्यद्रव्यानधिकरणीभूतत्वे सति द्रव्यवत्त्वेनैव धर्मिग्राहकप्रमाणेन तत्सिद्धेरतो व्यभिचारित्वसम्प-त्तये जन्यपदम्। ननु महाप्रलयानङ्गीकारे प्रागुक्तहेतुद्वयमेव लक्ष्यं खण्डप्रलयेपि ब्रह्माण्डान्तरे जन्यद्रव्यसत्त्वात् अतः साध्यान्तरमाह प्रलयावृत्ति वेति। खण्डप्रलयावृत्ति वेत्यर्थः। यद्यपि प्रतियोगिनो यदधिकरणं तद्वृत्तित्वस्य दैशिकसम्बन्धेन विवक्षायामपि यदा गोत्वं तदा गौरित्यादावतिव्याप्तिवारणं सम्भवति प्रलयाद्यवृत्तित्वा-वच्छिन्नाभावस्य प्रतियोग्यधिकरणे महाकालादौ दैशिकविशेषण-तासम्बन्धेन वृत्तित्वविरहात् न च द्रव्यं महाकालत्वादित्यादाव-व्याप्तिः कालिकसम्बन्धेन महाकालनिष्ठस्य द्रव्यत्वाद्यभावस्य स्व-प्रतियोग्यधिकरणे दैशिकविशेषणतया वृत्त्यभावादिति वाच्यं हे-तुसमानाधिकरणत्वस्यापि तादृशविशेषणतया विवक्षणीयत्वात् त-थापि रूपभिन्नं गुणत्वादित्यादौ साधनसमानाधिकरणस्य रूपान्य-त्वाद्यभावस्य रूपभिन्नत्वप्रकारकप्रमाविशेष्यत्वाद्यभावस्य च रूप-त्वादिस्वरूपतया दैशिकविशेषणतासम्बन्धेन वृत्तित्वविरहेण या-वदनन्तर्गतत्वात् घटत्वादिना रूपभिन्नत्वाद्यभावस्य च सर्वस्यैव तादृशाभावस्य महाकालादौ स्वप्रतियोगिसमानाधिकरणत्वादति-व्याप्तिरतः स्वविशिष्टहेत्वधिकरणेत्यादिविवक्षानुसरणमिति वद-न्ति। वस्तुतो दैशिकविशेषणताघटितस्य लक्षणान्तरत्वादेकेनापर-स्यान्यथा कर्तुमशक्यत्वादुक्तलक्षणे न वैयर्थ्यमिति परमार्थः। यत्तु-हेत्वधिकरणे विशेषणतया वर्तमानानां निरूक्तयावदभावानां प्रति-योगिवृत्तित्वमेव विशेषणतासम्बन्धेनोचितं प्रतियोग्यधिकरणवृत्ति-त्वप्रवेशे गौरवात् सर्वत्र व्यभिचारित्वलान्यत्वाद्यभावमादायाति-व्याप्त्यभावादिति तत्तुच्छम्। स्ववृत्तित्वविशिष्टानां केवलान्वयि-

संयोगाभाववान् मेयत्वादित्यादौ संयोगाद्यात्मकस्य साध्याभावस्य सकलहेत्वधिकरणावृत्तित्वेऽपि नाव्याप्तिः जलादिवृत्तित्वविशिष्टगोत्वाद्यभावस्याभावस्तु जलत्वाद्यभावो न तु धूमाद्यभावो जलादावपि तदभावप्रसञ्जयप्रसङ्गात् यत्समानाधिकरणानां

र्माणमत्यन्ताभावस्य स्वप्रतियोग्यवृत्तित्वेनासम्भवापत्तेः । न हि वाच्यत्वादिवृत्तित्वविशिष्टानां वाच्यत्वादीनामभावो वाच्यत्वादिरूपप्रतियोगिवृत्तिरिति दिक् । प्राचां मते संयोगसामान्याभावसाध्यकं मेयत्वं द्रव्य एव व्यभिचारीत्यतः कपिपदम् । प्रतियोग्यसिवैयधिकरण्यप्रविष्टमेव साध्यव्यापकत्वमत्र प्रवेशितम् । यथासन्निवेशे वैयर्थ्यविरहादतस्तदवच्छेदकत्वस्य संयोगाभावनिष्ठप्रतियोगितेप्यक्षतेरित्याशयेन संयोगात्मकाभावस्याभिधानम् । तदधिकरणसाध्यव्यापकतायाः प्रवेशे तु गगनत्वादिविशिष्टवाच्यत्वाद्यभावगगनत्ववाच्यत्वोभयत्वावच्छिन्नाभावदेर्यावदन्तर्गत्यात्तस्य च हेत्वधिकरणीभूतगगनावच्छेदेन प्रतियोग्यसमानाधिकरणत्वाद्व्याप्तिरतः स्वविशिष्टपदम् । एतदभिप्रायेणैव संयोगाद्यात्मकाभावेत्याद्यपदमुदात्तम् । वस्तुतः सत्तावान् द्रव्यत्वात् गुणत्ववान् रूपत्वात् इत्यादौ काले जन्यरूपे च हेतुसमानाधिकरणस्य सत्ताभावस्य गुणत्वसामान्याभावस्य च केनापि सम्बन्धेनात्मगगनादौ नित्यरूपे चावृत्तित्वाद्धेत्वधिकरणावच्छेदेन तस्यैव यावदन्तर्गतस्य प्रतियोगिसामानाधिकरण्यविरहाद्व्याप्तिः स्याद्यदि स्वविशिष्टपदं न स्यादिति दिक् । ननु धूमाद्यभावनिष्ठो जालादिवृत्तित्वविशिष्टगोत्वाभावस्याभावो धूमाभाव एवाभावप्रतियोगिकस्याभावाधिकरणकाभावस्याधिकरणस्वरूपत्वात् तथा च धूमादौ साध्ये वह्न्यादिहेतावतिव्याप्तिर्धूमाद्यभावस्य हेत्वधिकरणावच्छेदेन गोत्वाद्यभावरूपप्रतियोगिसमानाधिकरणत्वादत आह जलादिवृत्तीति । न च तादृशाभावस्य धूमाभावस्वरूपत्वेपि जलादेर्न तादृशाभावत्वावच्छिन्नाधिकरणत्वम् किंतु धूमाभावत्वावच्छिन्नाधिकरणत्वमेवेति न प्रत्ययातिप्रसङ्ग इति वाच्यम् । एवं सत्यभावमात्रस्यैव प्रायेणाभेदप्रसङ्गात् । उक्तक्रमेणैवातिप्रसङ्गवारणसम्भवादिति भावः । ननु

तथापि धूमवान् वह्नेरित्यादावतिव्याप्तिः समनियताभावानामैक्याद्धूमाभावस्य वह्निधूमोभयाभावादभिन्नस्यायोगोलकान्यत्वाभावादेश्चायोगोलकभेदत्वादिना भेदसामान्याभावादभिन्नस्य हेत्वधिकरणावच्छेदेनैव वह्न्यादिभेदाद्यात्मकप्रतियोगिसामानाधिकरण्यादिति चेदत्राहुः यावत्पदस्य फलतः प्रतियोगितावि शेषणत्वेन साध्यव्यापकतावच्छेदकीभूतयद्यत्प्रतियोगिताकोभावस्तस्य स्वविशिष्टहेत्वधिकरणावच्छेदेन तत्तत्प्रतियोगिताश्रयसामानाधिकरण्यं विवक्षितम् तथा च धूमादिसामान्याभावस्य धूमादिनिष्ठताद्दशप्रतियोगिताकस्य धूमादिनिष्ठप्रतियोगिताश्रयेण धूमादिना हेत्वधिकरणावच्छेदेन सामानाधिकरण्यविरहान्नातिव्याप्तिः न च यत्समानाधिकरणा इत्यस्य वैयर्थ्यम् आत्मत्वसामान्याभावीयप्रतियोगिताया अपि साध्यव्यापकतावच्छेदकतया तत्प्रतियोगिताकस्यात्मत्वसामान्याभावस्य ताद्दशप्रतियोगिताश्रयसामानाधिकरण्यविरहादयमात्मा ज्ञानादित्यादावव्याप्तिवारकत्वात् जलादिवृत्तित्वविशिष्टेत्यादिग्रन्थस्तु वस्तुगतिमनुरुध्यैवोक्तस्तेन ताद्दशाभावस्य धूमाभावस्वरूपत्वेपि तस्य हेत्वधिकरणावच्छेदेन साध्यव्यापकतावच्छेदकीभूतधूमनिष्ठप्रतियोगिताव्यक्त्याश्रयसामानाधिकरण्यविरहादेवातिव्याप्त्यसम्भवेपि न क्षतिः न च धूमत्वेन धूमाभावस्य धूमनिष्ठं यत्प्रतियोगित्वं तदेव धूमत्वेन प्रमेयसामान्याभावस्य प्रमेयसामान्यनिष्ठं प्रतियोगित्वं लाघवान्नतु तादृग्नं प्रतियोगित्वान्तरं गौरवादित्युक्तविवक्षयाप्यप्रतीकार इति वाच्यम् स्वरूपसम्बन्धात्मिकायाः प्रतियोगितायाः सामान्याभावस्यैक्येपि प्रतियोगिभेदेनैव भिन्नत्वादिति साम्प्रदायिकाः । वस्तुतः साध्यव्यापकतावच्छेदिकायाः स्वन्यूनवृत्तिधर्मानवच्छिन्नाया यादृशप्रतियोगिताया निरूपकोभावस्तस्य स्वविशिष्टहेत्वधिकरणावच्छेदेन तादृशप्रतियोगिताश्रयसामानाधिकरण्यमेव वक्तव्यम् तथा च धूमादिसामान्याभावस्य धूमत्वादिना प्रमेयसामान्याभावानतिरेकेपि तदीयं प्रमेयसामान्यनिष्ठं प्रतियोगित्वं स्वन्यूनवृत्तित्वेन धूमत्वधर्मेणावच्छिन्नमतो न तादृशप्रतियोगिताश्रयसामानाधिकरण्यमादायातिप्रसङ्ग इति युक्तमुत्पश्यामः । यत्तु समनियताभावानामैक्यमते धूमवान्वह्नेरित्यादावतिव्याप्तिवारणार्थं येन येन सम्बन्धेन व्यापकत्वं तेन तेन प्रत्येकं प्रतियोगिसामान-

साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताकानां यावदभावानां प्रतियोगितावच्छेदकावच्छिन्नसामानाधिकरण्यं विवक्षितम् तथा च व्यभिचारिमात्र एव यत्राधिकरणे व्यभिचारस्तदन्यत्वस्य स्वात्मकस्वरूपसम्बन्धेनापि साध्यव्यापकत्वात्तदभावस्य च हेत्वधिकरणावच्छेदेन तादृशान्यत्वनिरूपितस्वरूपसम्बन्धेन प्रतियोगिसामानाधिकरण्याभावान्नातिव्याप्तिः अत एव विषयितासम्बन्धस्य व्यापकताघटकत्वेपि नित्यज्ञानं नित्यसविषयकत्वादित्यादौ नातिव्याप्तिः नित्यज्ञानत्वाद्यभावस्य व्यापकताघटकीभूतसमवायसम्बन्धेन प्रतियोग्यसमानाधिकरणत्वादिति मतं तत्तुच्छम् । घटत्वादिना वाच्यत्वाद्यभावस्यैव घटत्वादिनायःपिण्डान्यत्वाद्यभावरूपतया तस्य व्यापकताघटकायःपिण्डान्यत्वनिरूपितस्वरूपसम्बन्धेन यावद्धेत्वधिकरणे प्रतियोगिसामानाधिकरण्यविरहादेव धूमवान् वह्नेरित्यादावतिव्याप्तिविरहाद्यावत्पदस्य स्वविशिष्टेत्यस्य यत्समानाधिकरणा इत्यस्य च व्यर्थतापातादिति दिक् । ननु व्यधिकरणधर्मावच्छिन्नाभावासत्त्वेपि सर्वत्र सद्धेतौ घटत्वादिविशिष्टवाच्यत्वाद्यभावं गगनवाच्यत्वोभयाभावं वा समादाय प्रोक्तलक्षणसम्भवात्प्रतियोग्यवृत्तिश्चेतिमूलावतारानुपपत्तिः। न च वैशिष्ट्यव्यासज्यवृत्तिधर्मानवच्छिन्नत्वेन व्यापकतावच्छेदकीभूतप्रतियोगितायां विशेषणीयत्वान्नैवमिति वाच्यं व्यभिचारावारकत्वेन तादृशविशेषणस्य व्यर्थत्वात् अन्यथा व्यधिकरणधर्मावच्छिन्नाभावसमानकालीनत्वेनापि हेतुं विशिष्यैव ग्रन्थावतारणं कुतो न समर्थयेदतो लक्षणान्तरमाह यत्समानाधिकरणानामिति। वह्निमान्धूमात्सत्तावान् द्रव्यत्वादित्यादावव्याप्तिः साध्यव्यापकप्रतियोगिकानां जलत्वविशिष्टद्रव्यत्वाभावगुणत्वविशिष्टसत्त्वाद्यभावानां स्वविशिष्टहेत्वधिकरणावच्छेदेन प्रतियोगितावच्छेदकीभूतजलत्वविशिष्टद्रव्यत्वत्वाद्यवच्छिन्नसामानाधिकरण्याभावादत उक्तं रूपावच्छिन्नेति । तथा च जलत्वविशिष्टद्रव्यत्वत्वादेः साध्यव्यापकतानवच्छेदकत्वाददोषः । यत्तु साध्यव्यापकतावच्छेदकप्रतियोगिताकस्य घटत्वेन वह्न्यभावस्य यावद्धेत्वधिकरणे घटत्वाव-

भावो व्याप्तिः तथा चाप्रसिद्धिः । प्रतियोग्यवृत्तिश्च धर्म्मो न प्रतियोगितावच्छेदकः । तद्विशिष्टज्ञानस्याभावधीहेतु-

---

धिकरण्यं तत्त्वं वा तत् ज्ञेयत्वत्वादिना वाच्यत्वादीनामभावः सुलभ एव शेषं दर्शितदिशावसेयम् अत आह प्रतियोग्यवृत्तिश्चे-

---

च्छिन्नसामानाधिकरण्याभावाद्व्यापकतावच्छेदकरूपावच्छिन्नेति तदत्यन्तमसत् । घटत्वेन वह्न्यभावस्यैव वह्नित्वेन घटाभावतया तस्यापि यावद्धेतुमति स्वप्रतियोगितावच्छेदकीभूतवह्नित्वावच्छिन्नसमानाधिकरणत्वात् । ननु समवायित्वस्य वाच्यत्वव्यापकतानवच्छेदकत्वात्तदवच्छिन्नस्य वाच्यत्वाद्यभावस्य मूलोक्तस्यैतल्लक्षणाघटकत्वादाह ज्ञेयत्वत्वादिनेति । शेषमित्यादि । येन सम्बन्धेन हेतुस्तेन सम्बन्धेन हेतुतावच्छेदकावच्छिन्नहेत्वधिकरणवृत्तित्वमभावे ग्राह्यम् । तेनायमात्मा ज्ञानात् घटान्यत्वविशिष्टात्मघटसंयोगाद्वेत्यादावात्मत्वसामान्याभावस्यातथात्वेपि नाव्याप्तिः । एवं येन सम्बन्धेन व्यापकता तत्सम्बन्धावच्छिन्नप्रतियोगिताकाभावस्य स्वप्रतियोगितावच्छेदकसम्बन्धेन प्रतियोगितावच्छेदकावच्छिन्नसामानाधिकरण्यं बोध्यम् । अतो न व्यधिकरणधर्मावच्छिन्नाभावासत्त्वेपि व्यधिकरणसम्बन्धावच्छिन्नवाच्यत्वाद्यभावमादाय लक्षणसम्भवात् प्रतियोग्यवृत्तिश्चेत्यादिग्रन्थावतारानुपपत्तिः । न वा जलत्वादेः समवायेन साध्यतायां महाकालत्वादावतिव्याप्तिः । प्रतियोगितावच्छेदकावच्छिन्नसामानाधिकरण्यं स्वविशिष्टहेत्वधिकरणावच्छेदेन बोध्यम् । तेन द्रव्यं सत्त्वादित्यादौ द्रव्यत्वाद्यभावस्य काले हेतुमति प्रतियोगिसामानाधिकरण्येपि नातिव्याप्तिः । इदं त्ववधातव्यं साध्यवन्निष्ठाभावप्रतियोगितायाः सामानाधिकरण्येनानवच्छेदकत्वरूपमेव व्यापकतावच्छेदकत्वमत्र पूर्वत्र च निवेश्यं न तु प्रतियोगिवैयधिकरण्यघटितं तथा सति व्यधिकरणधर्मावच्छिन्नाभावसत्त्वेपि सर्वं प्रमेयमित्याकारकयत्किञ्चिज्ज्ञन्यबुद्धिविषयत्वसामान्याभावमादायैव सर्वत्र लक्षणसमन्वयात्प्रतियोग्यवृत्ति-

श्चेत्यादिग्रन्थावतारानुपपत्तिः जन्यज्ञानव्यक्तिविषयत्वस्य तादृशबुद्धिदशायामेव सत्त्वेन तदसत्त्वदशायामेव तादृशज्ञानविषयत्वाभावस्य हेतुसमानाधिकरणत्वात् एवं चात्र स्वविशिष्टपदं न कपिसंयोगात्मकाभावं गगनत्वादिविशिष्टवाच्यत्वाभावं वादाय कपिसंयोगाभाववान्प्रमेयत्वादित्यादावव्याप्तिवारकं कपिसंयोगाभावत्वादेरुक्तव्यापकतावच्छेदकत्वाभावात् किं तु हेतुमति काले वर्तमानस्य सत्त्वसामान्याभावस्यापि निरुक्तरूपशालित्वात्तस्य चात्मादावसत्त्वेन यावद्धेत्वधिकरणे प्रतियोगितावच्छेदकावच्छिन्नसामानाधिकरण्यविरहात्सत्तावान् द्रव्यत्वादित्यादावव्याप्तिवारकमेव स्वविशिष्टपदम् न च साध्यतावच्छेदकसम्बन्धेन साध्यतावच्छेदकधर्मावच्छिन्नप्रतियोगिताको यत्किञ्चिदभावो यद्धेत्वधिकरणावच्छेदेन स्वावच्छेदकसम्बन्धेन प्रतियोगितावच्छेदकावच्छिन्नसमानाधिकरणस्तत्त्वमित्येव सम्यक् वाच्यत्वत्वादिना घटाभावमादायैव वाच्यं ज्ञेयत्वादित्यादौ लक्षणसमन्वयादिति वाच्यम् । स्वरूपसम्बन्धावच्छिन्नप्रमेयत्वावच्छिन्नाभावाप्रसिद्ध्या प्रमेयवान् ज्ञेयत्वादित्यादावव्याप्तिः । गुरुधर्मावच्छिन्नप्रतियोगित्वाप्रसिद्ध्या प्रमेयवह्निमान् धूमादित्यादावव्याप्तेः । वृत्त्यनियामकसम्बन्धस्य प्रतियोगितानवच्छेदकतया गोमी चैत्रत्वादित्यादौ स्वामित्वादिसम्बन्धेन गवादेः साध्यतायामव्याप्तिश्चेति दिक् । ननु वह्नित्वेन धूमवदवृत्तिसामान्याभावो धूमीयसंयोगसम्बन्धेन द्रव्यसामान्याभावो वा धूमाभाव एव तथायोगोलकभेदतदभावान्यतरत्वेनायोगोलकावृत्तेरभावोऽयोगोलकान्यत्वस्वरूपसम्बन्धेन भेदसामान्याभावो वाऽयोगोलकभेदाभाव एव समनियताभावानामैक्यात् तथा च धूमाद्यभावस्य प्रतियोगितावच्छेदकं यद्वह्नित्वादिकं तदवच्छिन्नेन समं यावद्धेत्वधिकरणे धूमाद्यभावस्य प्रतियोगितावच्छेदकावच्छिन्नसामानाधिकरण्यात् धूमवान्वह्नेरित्यादावतिव्याप्तिः सामान्यधर्मेण विशेषाभावाभ्युपगमे तु सुतरां तथा धूमत्वेन धूमाद्यभावानामेव प्रमेयत्वादिना धूमाद्यभावतया तस्य प्रतियोगितावच्छेदकीभूतप्रमेयत्वावच्छिन्नसामानाधिकरण्यादिति चेत् । अत्रापि यावत्त्वस्य फलतः प्रतियोगित्वस्य विशेषणतया साध्यव्यापकतावच्छेदकरूपावच्छिन्नयद्यत्प्रतियोगिताको यत्समानाधिकरणोऽभावः स्वविशिष्टहेत्वधिकरणावच्छेदेन तत्तत्र-

ति। केचित्तु व्याप्यवृत्तेर्हेतुसमानाधिकरणसाध्याभावस्य प्रतियोगितायाः अनवच्छेदकं हेतुसमानाधिकरणस्य व्याप्यवृत्तेः प्र-

---

तियोगितावच्छेदकावच्छिन्नसमानाधिकरणस्तत्त्वमिति पर्यवसितार्थः तथाच धूमादिनिष्ठताद्दशधूमत्वावच्छिन्नप्रतियोगिताकाभावस्य धूमादिनिष्ठं यत्प्रतियोगित्वं तदवच्छेदकीभूतधूमत्वावच्छिन्नेन सार्धं हेत्वधिकरणावच्छेदेन सामानाधिकरण्यविरहान्नातिव्याप्तिरिति साम्प्रदायिकाः। वस्तुतोत्रापि साध्यव्यापकतावच्छेदकरूपावच्छिन्नायाः स्वन्यूनवृत्तिधर्मानवच्छिन्नयाद्दशप्रतियोगितायाः निरूपकोभावस्ताद्दशप्रतियोगितायाः यदवच्छेदकं तदवच्छिन्नेन सामानाधिकरण्यं वक्तव्यम्। धूमत्वादिना धूमाद्यभावस्तु न प्रमेयत्वादिना धूमाद्यभावः सामान्यधर्मेण विशेषाभावानभ्युपगमात् तदभ्युपगमे तु याद्दशप्रातियोगिताकाभावे प्रतियोगितावच्छेदकावच्छिन्नवदवृत्तित्वस्य जगदवृत्तिभिन्नत्वस्य च द्वयोर्व्यतिरेकः साध्यव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताकानां ताद्दशप्रतियोगितावच्छेदकावच्छिन्नसामानाधिकरण्यं वाच्यमतो न कश्चिद्दोष इति ध्येयम्॥ चक्रवर्तिलक्षणान्याह के चित्त्विति। अनवच्छेदकमिति यत्साध्यतावच्छेदकमिति परेणान्वितम्। घटत्वादिना वह्न्यभावमादाय वह्निमान् धूमादित्यादौ लक्षणसङ्गतिः। व्यभिचारिणि तु हेतुसमानाधिकरणस्य साध्यसामान्याभावस्यैव प्रतियोगितावच्छेदकं साध्यतावच्छेदकमतो नातिव्याप्तिः। कपिसंयोगी एतद्वृक्षत्वादित्यादावव्याप्तिवारणार्थं व्याप्यवृत्तेरिति। वह्नित्वादिना घटाभावमादायाव्याप्तिरतः साध्येति। अत्र च प्रतियोगिता साध्यतावच्छेदकसम्बन्धेन ग्राह्या। तेन समवायादिसम्बन्धेन वह्न्याद्यभावस्य हेतुसमानाधिकरणस्य प्रतियोगितावच्छेदकत्वेपि वह्नित्वादेर्नासम्भवः। प्रतियोगिवैयधिकरण्यप्रवेशे वाच्यं ज्ञेयत्वादित्यादावव्याप्तिः प्रतियोगिव्यधिकरणसाध्याभावाप्रसिद्धेरतस्तत्परित्यागः। व्याप्यवृत्तित्वं निरवच्छिन्नहेत्वधिकरणवृत्तिकत्वं हेत्वधिकरणीभूतयत्किञ्चिद्व्यक्तिवृत्त्यभावप्रतियोगितायाः सामानाधिकरण्येनानवच्छेदकं यदभावव्यक्तित्वं तत्त्वं वा। एवं चैतल्लाभार्थमेव हेतुसमानाधिकरणस्येत्युक्तम्। न तु स्वातन्त्र्येण

तियोगिव्यधिकरणस्य वा अभावस्य प्रतियोगितायाः सामानाधिकरण्येनानवच्छेदकं यत्साध्यतावच्छेदकं तदवच्छिन्नसामानाधिकरण्यं

तद्विशेषणं वैयर्थात्। यत्किञ्चित्त्वनिवेशाच्च संयोगाभावस्य हेत्वधिकरणीभूतद्रव्यनिष्ठाभावप्रतियोगित्वेऽपि संयोगि सत्त्वादित्यादौ नातिव्याप्तिः। ननु समनियताभावानामैक्यात् घटत्वेन वह्न्यभावस्यैव वह्नित्वेन घटाभावतया हेतुसमानाधिकरणस्यैव तादृशसाध्यप्रतियोगिकाभावस्य प्रतियोगितावच्छेदकं वह्नित्वादिकमित्यव्याप्तिः अतः समनियताभावैक्यमते निरुक्तिमाह हेतुसमानाधिकरणस्येति। व्याप्यवृत्तेरभावस्य प्रतियोगितायाः सामानाधिकरण्येनानवच्छेदकं यत्साध्यतावच्छेदकमिति योजना। नन्वत्रापि हेतुसमानाधिकरणस्य वह्नित्वेन वह्निधूमोभयाभावस्य वह्नित्वेन पर्वतावृत्तेरभावस्य च प्रतियोगितायाः समानाधिकरणं सदेव वह्नित्वमवच्छेदकमित्यव्याप्तिः तादृशप्रतियोगिताया अन्यूनवृत्तित्वे सति यदवच्छेदकं तदन्यत्वोक्तावपि तथा पर्वते वह्नित्वेन तार्णातार्णदहनोभयं नास्तीतिप्रतीतिसिद्धस्यैव तादृशाभावस्य प्रतियोगितावच्छेदकत्वाद्वह्नित्वस्य न च तादृशाभावप्रतियोगितावच्छेदकत्वं न वह्नित्वमात्रे पर्याप्तं किं तु तार्णातार्णोभयत्वेऽपि अन्यथा तादृशप्रतियोगितावच्छेदकीभूतवह्नित्वावच्छिन्नवति पर्वतादौ तादृशाभावासत्त्वप्रसङ्ग इति वाच्यम् सोन्दडमते प्रतियोगितावच्छेदकधर्मावच्छिन्नवत्तामात्रस्याभावाविरोधित्वात् अन्यथा घटवति घटत्वेन पटाभावस्यापलापापत्तेः किं तु प्रतीतिबलाद्व्यधिकरणधर्मस्य प्रतियोगितावच्छेदकत्वसिद्धौ सत्यां प्रतियोग्यंशे प्रकारीभूतधर्मविशिष्टप्रतियोगितावच्छेदकावच्छिन्नैनैव सार्धमनायत्याऽभावस्य विरोधित्वं वाच्यं तदेतद्वह्नित्वादिना तार्णातार्णोभयाभावादिसत्त्वेऽपि न क्षतिकरम् अत एव च द्रव्यत्वेन वह्निर्नास्ति वह्नित्वेन तद्वह्निर्नास्तीति प्रतीत्या सामान्यधर्मेण विशेषाभावोऽभ्युपेयते न च तत्र वह्नित्वस्यैव प्रतियोगितावच्छेदकत्वं भासते द्रव्यत्वस्य तु वैशिष्ट्यमात्रं विषय इति वाच्यम् वह्निमानयमित्येवं निर्णयसत्त्वेऽपि द्रव्यत्वेन वह्निर्नास्तीतिप्रत्ययात् द्रव्यत्वस्यैवावच्छेदकतया भानात् अन्यथा वह्नित्वावच्छिन्नवह्निनिष्ठप्र-

तियोगिताकत्वेन वह्न्यभावबुद्धिं प्रति वह्नित्वेन वह्निविशिष्टनिश्चयस्यैव विरोधित्वात्तादृशप्रतीत्यसम्भवापत्तेः अस्माकं तु द्रव्यत्वावच्छिन्नवह्निनिष्ठप्रतियोगिताकत्वेन वह्न्यभावबुद्धिं प्रति द्रव्यत्वेन वह्निविशिष्टनिश्चयस्यैव विरोधित्वात्तदसत्त्वादेव तादृशाभावप्रतीतिसम्भवात् इत्यतो लक्षणान्तरमाह प्रतियोगिव्यधिकरणस्य वेति। केचित्तु सामानाधिकरण्यमभेदः तथा च हेतुसमानाधिकरणाभावीयस्वाभिन्नप्रतियोगितावच्छेदकं यद्यत्स्वं तदन्यत्वं साध्यतावच्छेदके विवक्षितं प्रतियोगित्वं स्वरूपसम्बन्धविशेषः स च सामान्याभावस्थले प्रतियोगितावच्छेदकस्वरूप एव न तु प्रतियोगिस्वरूपः अननुगमादभेदेनाधाराधेयभावानुपपत्तेश्च सामान्यधर्मेण विशेषाभावस्थले च प्रतियोग्यंशे प्रकारीभूतो विशेषधर्म एव तथा न तु सामान्यधर्मः अतिप्रसक्तत्वात् व्यधिकरणधर्मावच्छिन्नाभावस्थले च प्रतियोगितावच्छेदकादिस्वरूपं न प्रतियोगित्वं किं त्वतिरिक्तमेवान्यथा प्रतियोगितावच्छेदकविशिष्टप्रतियोगिनैव सार्धमभावस्य विरोधात् तदवच्छिन्नवति तादृशाभावस्यासत्त्वप्रसङ्गात् विवादोप्यतिरिक्तायां प्रतियोगितायामेव अन्यथा समनियताभावैक्येन निखिलव्यधिकरणाधर्मावच्छिन्नाभावस्यैव गगनाभावात्मकतया गगनाभावस्वीकर्तॄणां चिन्तामणिकाराणां तदनङ्गीकारानुपपत्तेः इत्थं च पर्वते वह्नित्वेन तार्णातार्णवह्नी न स्त इति प्रतीतिबलात्तादृशाभावप्रतियोगितावच्छेदकत्वस्य वह्नित्वे सत्त्वेपि तादृशप्रतियोगित्वं न वह्नित्वाभिन्नं किं तु तादृशोभयत्वाभिन्नमतिरिक्तमेवेतिस्वाभिन्नायाः साधनवन्निष्ठाभावप्रतियोगिताया यदवच्छेदकं तदन्यत्वस्य वह्नित्वे सत्त्वान्न तस्य धूमव्यापकतावच्छेदकत्वहानिः नन्वत्र लक्षणे हेत्वधिकरणवृत्तित्वमभावस्य सम्बन्धमात्रेण न वाच्यम् वह्निसामान्याभावस्यापि कालिकादिसम्बन्धेन धूमवति सत्त्वादव्याप्त्यापत्तेः नापि दैशिकविशेषणतया घटभिन्नं द्रव्यत्वादित्यादावतिव्याप्त्यापत्तेः घटत्वरूपस्य साध्याभावस्य दैशिकविशेषणतया वृत्तित्वविरहादित्यतो लक्षणान्तरमाह प्रतियोगिव्यधिकरणस्य वेति प्राहुः। अपरे तु प्रागुक्तं व्याप्यवृत्तित्वं यत्किञ्चित्त्वघटितत्वेन दुर्वचमतः प्रतियोगिव्यधिकरणस्येत्यादिलक्षणान्तरमुक्तमित्यप्याहुः। अन्ये तु कालिकसम्बन्धावच्छिन्नप्रतियोगिकाकाशाभावाभावादौ साध्ये आत्मत्वे

हेतावव्याप्तिः आकाशाभावात्मकस्य साध्याभावस्य निरवच्छिन्नवृत्तितया तत्प्रतियोगितावच्छेदकमेव साध्यतावच्छेदकमतः प्रतियोगिव्यधिकरणस्य वेति लक्षणान्तरमित्याहुः । हेतुसमानाधिकरणस्य प्रतियोगिव्यधिकरणस्याभावस्य प्रतियोगितायाः सामानाधिकरण्येनानवच्छेदकं यत्साध्यतावच्छेदकमिति योजना । अथात्र प्रतियोगिव्यधिकरणत्वं न स्वप्रतियोगिसमानाधिकरणभिन्नत्वं समानियताभावानामभिन्नतया घटाभावादेरपि घटत्वेन प्रमेयसामान्याभावस्वरूपत्वात्तस्य च प्रमेयात्मकप्रतियोगिसमानाधिकरणतया तदन्यत्वासम्भवात् एवं स्वप्रतियोगितावच्छेदकावच्छिन्नसमानाधिकरणो यो यस्तदन्यत्वमपि न तथा घटत्वेन घटाभावादेरपि प्रमेयत्वादिना घटाद्यभावस्य द्रव्यत्वेन घटवदवृत्तेरभावस्य वा तादात्म्योपगमात् अप्रसिद्ध्यापत्तेः व्यधिकरणधर्मावच्छिन्नाभावस्यापि· तत एव वारणसम्भवेऽव्याप्तिवारकस्य सामानाधिकरण्येनेत्यस्य वैयर्थ्यापाताच्च न च साध्यतावच्छेदकसम्बन्धेन तादृशप्रतियोगिताश्रयानधिकरणं तादृशप्रतियोगित्वं प्रतियोगितान्तार्थः तथा च वह्नित्वेन घटाभावीयं घटनिष्ठप्रतियोगित्वमपि तादृशमतस्तदवच्छेदकत्वं वह्नित्वेप्यस्तीति सामानाधिकरण्यपदं तेन तादृशप्रतियोगितायाः सामानाधिकरण्येनावच्छेदकाप्रसिद्ध्या तद्भिन्नप्रतियोगितैव लक्षणघटिकेति वाच्यं विशिष्टसत्तावान् जातेरित्यादावतिव्याप्तेर्गुणादीनामपि विशिष्टसत्तानिष्ठप्रतियोगिताश्रयाधिकरणत्वात् घटवान् महाकालत्वादित्यादावव्याप्तिप्रसङ्गाच्च हेतुमतो महाकालस्य साध्यताघटककालिकसम्बन्धेन घटाद्यभावप्रतियोगिताश्रयाधिकरणतया प्रतियोगिव्यधिकरणाभावाप्रसिद्धेरिति चेदत्राहुः साध्यताघटकसम्बन्धेन स्वाश्रयवृत्तित्वावच्छेदकधर्मावच्छिन्नाधिकरणयावद्वृत्त्वधिकरणिका यावत्यः प्रतियोगितास्तदन्यप्रतियोगित्वं प्रतियोगितान्तार्थः तथा च वह्नित्वेन घटाद्यभावस्यापि घटादिनिष्ठा प्रतियोगिता तादृशीति तदवच्छेदकत्वं वह्नित्वेऽप्यस्तीत्यतः सामानाधिकरण्यपदम् घटवान् महाकालत्वादित्यादौ गगनाभावीयं गगननिष्ठमेव तादृशं प्रतियोगित्वं सुलभमिति न कोपि दोषः । वस्तुतो धूमवति वह्नित्वेन घटो नास्तीतिवद्धूमवान्वह्नित्वेन न घटवान् किं तु घटत्वेनेति प्रतीतिबलाद्व्यधिकर-

णधर्मावच्छिन्नावच्छेदकताकप्रतियोगिताकान्योन्याभावोऽस्ति अत एव समवायितया वाच्यत्ववद्भेदो घटादौ पक्षधरमिश्रैः स्वीकृतः तथा च यादृशप्रतियोगितावच्छेदकावच्छिन्नीयत्वेन साध्यतावच्छेदकसम्बन्धेन यादृशप्रतियोगिताश्रयाधिकरणान्यत्वं हेतुमतस्तादृशप्रतियोगितासमानाधिकरणवृत्तित्वावच्छिन्नप्रतियोगिताकतादृशप्रतियोगितावच्छेदकत्वाभाववत्त्वं तादृशप्रतियोगितावच्छेदकान्यत्वं वा साध्यतावच्छेदके विवक्षितं तथा च घटादिनिष्ठस्य वह्नित्वेनैव घटाद्यभावप्रतियोगित्वस्यापि तादृशत्वेन वह्नित्वादेस्तदवच्छेदकत्वादव्याप्तिरतः सामानाधिकरण्येनेत्युक्तम् तथा च वह्नित्वस्य तादृशप्रतियोगितावच्छेदकत्वात्यन्ताभावस्य तत्र सत्त्वाद्व्याप्तिः कालो घटवान् महाकालत्वादित्यादौ तु घटादिसामान्याभावप्रतियोगिताया अतथात्वेऽपि घटत्वेन पटाद्यभावप्रतियोगितामादायैव लक्षणसमन्वयः कालः पटत्वेन पटवान् न तु घटत्वेनेत्यनुभवात् वह्नित्वादिसामान्यधर्मेण महानसीयवह्न्याद्यभावसत्त्वे तु यादृशप्रतियोगितावच्छेदकेत्यत्रावच्छेदकत्वमनतिरिक्तवृत्तित्वं ग्राह्यम् तच्च तदतिरिक्तवृत्तित्वे सति तत्समानाधिकरणं यद्यत्तदन्यत्वं नातो व्यधिकरणधर्मावच्छिन्नप्रतियोगितायास्तत एव वारणसम्भवे सामानाधिकरण्यदलवैयर्थ्यमित्यस्मद्गुरुचरणाः । यत्तु यत्प्रतियोगितावच्छेदकविशिष्टस्य यत्प्रतियोगिताश्रयस्य च द्वयोः साध्यतावच्छेदकसम्बन्धेनानधिकरणं हेत्वधिकरणं तादृशप्रतियोगित्वं प्रतियोगितान्तार्थः तथा च वह्नित्वेन घटाद्यभावस्य घटनिष्ठप्रतियोगिताया अपि तादृशत्वाद्वह्नित्वादेस्तदवच्छेदकत्वमादायाव्याप्तिः अतः सामानाधिकरण्येनेतिप्रागुक्तार्थकम् एतन्मते च सामान्यरूपेण विशेषाभावानभ्युपगमः नातो वह्नित्वेन तद्वह्न्यभावमादायाव्याप्तिः न च स्वरूपसम्बन्धात्मकप्रतियोगितायाः प्रतियोगिभेदेन भिन्नत्वाद्वह्निमान् धूमादित्यत्राव्याप्तिः वह्निसामान्याभावीयं यन्महानसीयवह्निनिष्ठप्रतियोगित्वं तद्वच्छेदकीभूतवह्नित्वविशिष्टस्य तत्प्रतियोगिताश्रयीभूतमहानसीयवह्नेश्च द्वयोरनधिकरणत्वस्य हेतुमति पर्वते सत्त्वादिति वाच्यं प्रतियोगिव्यक्तीनां भेदेपि एकधर्मावच्छिन्नप्रतियोगिताया लाघवेनैक्यस्वीकारादिति न च कालो घटवान्महाकालत्वादित्यादौ तादृशप्रतियोगित्वाप्रसिद्ध्याऽव्याप्तिः गगनाद्यभा-

धिकरण्यं व्याप्तिः एवञ्च व्याप्तेरव्यभिचारिसम्बन्धरूपतापि सङ्गच्छते हेतौ साध्यतावच्छेदकावच्छिन्नसाध्याभाववद्वृत्तित्वस्येव साध्यतावच्छेदके हेतुमन्निष्ठसाध्याभावप्रतियोगितावच्छेदकत्वस्यापि व्यभिचारत्वात् अवच्छेदकत्वञ्चेह तत्पर्याप्त्यधिकरणत्वम् तेन विशिष्टवह्न्यभावस्य ह्रदत्ववह्नित्वोभयावच्छिन्नाभावस्य

धीयप्रतियोगिताश्रयीभूतगगनस्याधिकरणाप्रसिद्ध्या तादृशप्रतियोगिताया लक्षणाघटकत्वादिति वाच्यम् महाकालान्यत्वविशिष्टघटाद्यभावस्य तादृशविशिष्टघटत्वाद्यवच्छिन्नप्रतियोगिताव्यक्तेरेव तथात्वात् यत्प्रतियोगितावच्छेदकविशिष्टयत्प्रतियोगिताश्रयोभयत्वं वा हेत्वधिकरणयत्किञ्चिन्निष्ठाधिकरणतावच्छेदकं तादृशप्रतियोगिताया एव निवेश्यतया गगनाभावादिकमादायैव लक्षणसम्भवाच्चेति तन्न। प्रतियोगिभेदेपि प्रतियोगितावच्छेदकाभेदेन प्रतियोगिताया यद्यभेदस्तदा वह्नित्वेन घटाभावस्य या वह्नित्वावच्छिन्ना घटनिष्ठप्रतियोगिता सैव वह्नित्वादिना वह्निधूमोभयाभावस्यापि वह्नित्वावच्छिन्ना धूमादिनिष्ठा प्रतियोगिता लाघवात् तथा च सामानाधिकरण्येनेत्यस्य वैयर्थ्यं दुर्वारं वह्नित्वेन घटाभावीयं यद्घटनिष्ठप्रतियोगित्वं तदवच्छेदकीभूतवह्नित्वविशिष्टस्य तादृशप्रतियोगिताश्रयीभूतवह्निधूमादेश्च द्वयोरधिकरणत्वस्य सर्वत्रैव हेतुमति सत्त्वेन वह्नित्वरूपव्यधिकरणधर्मावच्छिन्नप्रतियोगिताया लक्षणाघटकत्वादिति दिक्। एवं चेति। तथा चास्य पारिभाषिकत्वानादरेपि न क्षतिरिति भावः। वह्नित्वाद्यवच्छिन्नघटाद्यभाववति धूमादेर्वर्तमानत्वादुक्तं साध्याभावेति। अत्र साध्याभावो व्याप्यवृत्तिर्बोध्यः। एवं परत्रापि। विशिष्टेति। महानसीयत्वादिविशिष्टवह्नित्वावच्छिन्नप्रतियोगिताकस्येत्यर्थः। ननु विशिष्टस्यातिरिक्तत्वान्महानसीयत्ववह्नित्वयोर्वैशिष्ट्यस्यैव वा परंपरया तत्रावच्छेदकत्वान्नैष दोष इत्यत आह ह्रदत्ववह्नित्वेति। ननु व्याप्यवृत्तित्वघटितलक्षणयोः संयोगिसत्त्वादित्यत्रातिव्याप्तिः स्वसमानाधिकरणाभावाप्रतियोगित्वस्यावः

च प्रतियोगितावच्छेदकत्वेऽपि वह्नित्वस्य न क्षतिः सत्त्ववति गुणादौ संयोगाद्यभावोऽपि व्याप्यवृत्तिः वक्ष्यमाणं वा प्रतियोगितावच्छेदकानतिरिक्तवृत्तित्वमेव तदवच्छेदकत्वमिहापि बोध्यम् भवति च गुणत्वगुणावृत्तित्वद्रव्यमात्रसमवेतत्वाद्यवच्छिन्नप्रतियो-

---

च्छिन्नवृत्तिकान्यत्वरूपस्य वा व्याप्यवृत्तित्वस्य संयोगाभावेऽस्वादत आह सत्त्ववतीति। तथाच हेतुसमानाधिकरणस्य व्याप्यवृत्तेरित्यन्तेन निरवच्छिन्नहेत्वधिकरणवृत्तित्वं हेत्वधिकरणीभूतयत्किञ्चिद्व्यक्तिनिष्ठाभावाप्रतियोगित्वं वा ऽभावस्य विवक्षितमिति भावः। गुरुधर्मेण साध्यतायां व्यभिचारिण्यतिव्याप्तिवारणाय पारिभाषिकावच्छेदकत्वानुसरणस्यावश्यकत्वे व्याप्यवृत्तित्वस्य प्रकृतनिरुक्तावप्रवेशेपि न क्षतिरित्याशयेनाह वक्ष्यमणं वेति। यथाश्रुतस्य प्रतियोगितावच्छेदकानतिरिक्तवृत्तित्वस्योक्तौ सत्त्ववान् जातिमत्त्वादित्यादावव्याप्तिः तादृशप्रतियोगितावच्छेदकीभूतविशिष्टसत्तात्वानतिरिक्तवृत्तित्वात्सत्तात्वस्येत्यतो वक्ष्यमाणमिति। सिद्धान्तलक्षणे वक्ष्यमाणमित्यर्थः। तथा च हेतुमन्निष्ठाभावीययत्सम्बन्धावच्छिन्नप्रतियोगितायाः सामानाधिकरण्येनावच्छेदकं यद्धर्मविशिष्टसम्बन्धिनिष्ठाभावीयतत्सम्बन्धावच्छिन्नप्रतियोगितायाः सामानाधिकरण्येनानवच्छेदकं तदेव पारिभाषिकावच्छेदकम्। तदन्यत्वं साध्यतावच्छेदके वाच्यमिति भावः। मनूत्पत्तिदशायां गुणसामान्याभावस्य संयोगवति घटादौ सत्त्वाद्गुणत्वस्य संयोगत्वविशिष्टसम्बन्धिनिष्ठाभावीयतत्सम्बन्धावच्छिन्नप्रतियोगितानवच्छेदकत्वविरहान्न तमादाय संयोगत्वस्य पारिभाषिकावच्छेदकत्वसम्भावनापीत्यत आह गुणावृत्तित्वेति। गुणासमवेतत्वेत्यर्थः। घटादावुत्पत्तिदशायामपि गुणासमवेतस्य द्रव्यत्वादेः सत्त्वान्न तदभाव इति भावः। संयोगी गुणान्यत्वे सति सत्त्वादित्यादौ गुणावृत्तित्वमादाय संयोगत्वस्य न पारिभाषिकावच्छेदकत्वं सम्भवति गुणावृत्तित्वावच्छिन्नाभावस्य हेत्वसमानाधिकरणत्वात् अतः संयोगसाध्यकव्यभिचारिमात्रे यद्धर्ममादाय संयोगत्वस्य पारिभाषिकावच्छेदकत्वं तद्धर्ममाह द्रव्यमात्रेति। द्रव्या-

गिताकव्याप्यवृत्त्यभावप्रतियोगितावच्छेदकगुणत्वाद्यनतिरिक्तवृ-
त्त्येव संयोगत्वमित्याहुः । साध्यतावच्छेदकावच्छिन्नसाध्यसामा-
नाधिकरण्यावच्छेदकस्वसमानाधिकरणसाध्याभावत्वकत्वं यत्स-

न्यासमवेतत्वेत्यर्थः । उक्ताभावानामव्याप्यवृत्तित्वे संयोगात्मकस्व-
प्रतियोग्यधिकरणवृत्तित्वेन कदाचिद्गुणत्वादिरूपाणां तत्प्रतियो-
गितावच्छेदकानां संयोगत्वविशिष्टसम्बन्धिनिष्ठाभावप्रतियोगिता-
नवच्छेदकत्वं न स्यात् तदेव नास्ति तेषां व्याप्यवृत्तितया संयोगा-
त्मकस्वप्रतियोग्यधिकरणावृत्तित्वादेतावन्मात्रं सूचयितुमुक्तं व्या-
प्यवृत्तीति ॥ प्रगल्भलक्षणं दूषयितुमुपन्यस्यति साध्यतावच्छेदकेति।
स्वपदं विशिष्टहेतुपरम् । तथा च यद्धर्मावच्छिन्नसमानाधिकरणसा-
ध्याभावत्वावच्छेदेन साध्यतावच्छेदकावच्छिन्नसाध्यसामानाधिक-
रण्यं तद्धर्मवत्त्वं पर्यवसितमवच्छेदकत्वं चा[न्यूना]नतिरिक्तवृत्तित्वं
व्यभिचारिणि तु हेतुसमानाधिकरणस्य साध्यसामान्याभावस्यैव
साध्यसामानाधिकरण्यविरहान्नातिप्रसङ्गः। विशिष्टसत्तावान् जाते-
रित्यादौ यावत एव हेतुसमानाधिकरणस्य साध्याभावस्य सत्तारूपसा-
ध्यसामानाधिकरण्यादतिव्याप्तिः अतः साध्यतावच्छेदकावच्छिन्ने-
ति। तथा च विशिष्टसत्ताभावस्यैव तादृशस्य विशिष्टसत्तारूपसाध्य-
समानाधिकरणत्वाभावान्नातिप्रसङ्गः।अत्र च साध्यसामानाधिकरण्यं
येन सम्बन्धेन साध्यता तेन सम्बन्धेन साध्यस्याधिकरणे दैशिक-
विशेषणतया वृत्तिमत्त्वरूपं ग्राह्यम् । तेन द्रव्यत्वादिसमानाधिकर-
णस्य ज्ञानाद्यभावस्य विषयतया ज्ञानाद्यधिकरणे वृत्तावपि समवा-
येन ज्ञानसाध्यके द्रव्यत्वादिहेतौ नातिव्याप्तिः। न वा कालः प्रमेय-
त्वादित्यादौ सर्वेषामेव साध्याभावानां साध्यवति काले कालिकस-
म्बन्धेन वृत्तावप्यतिप्रसङ्गः । साध्याभावनिष्ठं हेतुसामानाधिकर-
ण्यमपि हेतुतावच्छेदकसम्बन्धेन प्रकृतहेतोर्यदधिकरणं तत्र विशे-
षणतया वृत्तिमत्त्वरूपं बोध्यम् । तेनायमात्मा ज्ञानादित्यादौ विष-
यतया ज्ञानस्य हेतोरधिकरणे वर्तमानस्यात्मत्वाभावस्य द्रव्यं वि-
शिष्टसत्त्वादित्यादौ च सत्तासमानाधिकरणस्य द्रव्यत्वसामान्या-
भावस्य साध्यसामानाधिकरण्यविरहेपि नाव्याप्तिः । न वा कालः

मानाधिकरणसाध्याभावप्रमायां साध्यवत्ताज्ञानप्रतिबन्धकत्वं नास्ति

कालपरिमाणादित्यादौ हेत्वधिकरणे कालिकसम्बन्धेन वर्तमानस्य कालत्वादिसामान्याभावस्य साध्यवति दैशिकविशेषणतया वृत्तिमत्त्वविरहेपि क्षतिः । साध्याभावस्तु पूर्वोक्तद्वितीयरीत्या बोध्यः । तेन व्यधिकरणधर्मावच्छिन्नाभावासत्त्वेपि साध्यस्य विशिष्टाभावादिकमादायैव लक्षणसम्भवान्न प्रतियोग्यवृत्तिश्चेत्यादिग्रन्थावतारासङ्गतिः । कपिसंयोगी सत्त्वादित्यादौ तु कपिसंयोगाद्यभावस्य साध्यसामानाधिकरण्येपि द्रव्यमात्रसमवेतत्वाद्यवच्छिन्नप्रतियोगिताकाभावस्य साध्यसामानाधिकरण्यविरहान्नातिव्याप्तिः । कालिकसम्बन्धावच्छिन्नप्रतियोगिताके गगनाभावस्याभावे साध्ये यत्र प्रमेयत्वादिकं हेतुस्तत्र हेतुमति दैशिकविशेषणतया वर्तमानस्याकाशाभावात्मकस्य साध्याभावस्य साध्यवति दैशिकविशेषणतया वृत्तावपि हेतुसमानाधिकरणस्य नित्यत्वादिसामान्याभावस्यापि निरुक्तसाध्याभावतया तस्यैव साध्यसामानाधिकरण्यविरहान्नातिव्याप्तिः । यत्समानाधिकरणेति । यत्समानाधिकरणसाध्याभावप्रमासामान्य इत्यर्थः । तेन धूमवान्वह्नेरित्यादौ व्यधिकरणधर्मावच्छिन्नसाध्याभावप्रमाव्यक्तेः साध्यवत्ताज्ञानाविरोधित्वेपि साध्यसामान्याभावप्रमाया एव साध्यवत्ताज्ञानविरोधितया नातिव्याप्तिः । व्यधिकरणधर्मावच्छिन्नसाध्याभावस्य साध्यसामान्याभावत्वभ्रमदशायां पर्वतो वह्निमानित्याकारकसाध्यवत्ताज्ञानविरोधित्वादसम्भवः स्यादतः प्रमात्वोपादानम् । प्रमात्वं चात्र भ्रमसामान्यभिन्नज्ञानत्वम् । नातस्तादृशबुद्धेरपि अंशतः प्रमात्वादुक्तदोषतादवस्थ्यम् । ह्रदादौ वह्निसामान्याभावप्रमायाः साध्यवत्ताज्ञानविरोधित्वादव्याप्तिरतो यत्समानाधिकरणेति फलतः प्रमाविशेषणम् । तथा च यद्धर्मावच्छिन्नवह्निशेष्यकसाध्याभावप्रमासामान्ये इत्यर्थः । तेन वृक्षत्वसमानाधिकरणस्य संयोगसामान्याभावस्यैव गुणं धर्मिणि प्रमायाः साध्यवत्ताज्ञानविरोधित्वेपि संयोगि वृक्षत्वादित्यादौ नाव्याप्तिः । यत्तु साध्यवत्ताज्ञानविरोधित्वं हेतुमन्मात्रवृत्तिधर्मावच्छिन्नविशेष्यकं यत्साध्यवत्ताज्ञानं तद्विरोधित्वरूपं वाच्यं तथा

तत्त्वं वा व्याप्तिरिति तु न युक्तम्। सर्वत्र साध्याभावपदवैयर्थ्यात्।

च गुणो न संयोगीति प्रमाया गुणः संयोगीत्याकारकबुद्धिविरोधित्वेपि तादृशी साध्यवत्ताधीर्न हेतुमन्मात्रवृत्तिधर्मावच्छिन्नविशेष्यका गुणत्वादेर्हेतुमदन्यवृत्तित्वादतो नोक्तदोष इति तत्तुच्छम् । यत्समानाधिकरणेत्यस्य व्यर्थत्वापत्तेः । साध्याभावप्रमासामान्ये यद्धर्म्मावच्छिन्नविशेष्यकसाध्यवत्ताज्ञानस्य विरोधित्वं नास्ति तत्त्वमित्यस्यैव सम्यक्त्वात् । जलादिधर्मिकवह्निसामान्याभावप्रमायाः साध्यवत्ताधीविरोधित्वेपि धूमवन्मात्रवृत्तिधर्मावच्छिन्नविशेष्यकं यद्वह्निमत्ताज्ञानं तद्विरोधित्वाभावादेव वह्निमान् धूमादित्यादावव्याप्त्यसम्भवादिति दिक् । अत्र च साध्यतावच्छेदकेन सम्बन्धेन तेन रूपेण च साध्यवत्ताज्ञानं बोध्यम्। तेन पर्वतो न समवायेन वह्निमानित्यादिप्रमायाः समवायेन वह्निमत्ताबुद्धिं प्रति पर्वतो महानसीयवह्निमान्नेति प्रमायाश्च संयोगेन महानसीयवह्निमत्ताबोधं प्रति प्रतिबन्धकत्वेपि वह्निमान् धूमादित्यादौ नाव्याप्तिः । प्रतिबन्धकत्वं चावच्छेदकधर्मवत्ताज्ञानव्यावृत्तं ग्राह्यम् । तेन वह्निसामान्याभावावच्छेदकतया गृहीतस्य महानसीयवह्न्यभावादेः पर्वतादौ प्रमायाः संयोगसम्बन्धावच्छिन्नपर्वतधर्मिकवह्निमत्ताबुद्धिविरोधित्वेपि नासम्भवः ॥ सर्वत्रेति । साध्यसामानाधिकरण्यावच्छेदकस्वसमानाधिकरणत्वकत्वमित्यत एव प्रथमस्य द्वितीयस्य च यत्समानाधिकरणप्रमासामान्ये साध्यवत्ताज्ञानविरोधित्वं नास्ति तत्त्वमित्यत एव सामञ्जस्यादिति भावः । यत्तु यत्समानाधिकरणसाध्याभावत्वावच्छेदेन साध्यतावच्छेदकावच्छिन्नप्रतियोगिसामानाधिकरण्यं तत्त्वमेव प्रथमलक्षणार्थः तथा च धूमसमानाधिकरणस्य घटादिसामान्याभावस्य वह्नित्वाद्यवच्छिन्नघटाद्यप्रसिद्ध्या साध्यतावच्छेदकावच्छिन्नप्रतियोगिसामानाधिकरण्याभावादसम्भवः स्यादतः साध्याभावपदम् न चैवमपि प्रतियोगिपदं व्यर्थमेवेति वाच्यम् अनतिरिक्तवृत्तित्वरूपावच्छेदकत्वे साध्यतावच्छेदकावच्छिन्नप्रतियोगिसामानाधिकरण्याभावस्याखण्डस्यैव निविष्टत्वात् एवं द्वितीयलक्षणेपि साध्यतावच्छेदकावच्छिन्नप्रतियोगिमत्ताग्रहविरोधित्वं

यत्तु साध्याभाववति यद्वृत्तौ प्रकृतानुमितिविरोधित्वं नास्ति

निवेश्य साध्याभावपदस्य सार्थक्यं बोध्यमिति तन्मन्दम् । प्रतियोग्यवृत्तिश्चेत्यादिग्रन्थावतारानुरोधेन साध्याभावस्य पूर्वोक्तद्वितीयरीत्यैव वक्तव्यतया हेतुसमानाधिकरणस्य वह्नित्वेन घटाभावादेरेव साध्यतावच्छेदकावच्छिन्नप्रतियोगिसामानाधिकरण्याप्रसिद्ध्या तादृशपदप्रक्षेपेप्यसम्भवतादवस्थ्यात् । न च घटत्वेन वह्न्यभावो वह्नित्वेन घटाभावात्मकः समनियताभावानामैक्यात् तथा च तस्यापि साध्यतावच्छेदकविशिष्टवह्निस्वरूपप्रतियोगिनः सामानाधिकरण्यमक्षतमेवेति वाच्यम् । तथा सति घटसामान्याभावादेरपि घटत्वादिना प्रमेयसामान्याभावात्मकतया तस्यापि साध्यतावच्छेदकीभूतवह्नित्वावच्छिन्नप्रमेयरूपप्रतियोगिसमानाधिकरणतया तमादायासम्भववारकस्य साध्याभावपदस्य व्यर्थताया वज्रलेपत्वादिति ॥ प्रगल्भस्यैव लक्षणान्तरमुपन्यस्यति यस्त्विति । यद्वृत्ताविति । यन्निष्ठसाध्याभाववद्वृत्तित्वसामान्य इत्यर्थः । तेन वह्निनिष्ठस्य व्यधिकरणधर्मावच्छिन्नाभाववद्वृत्तित्वस्य धूमसाध्यकानुमित्यविरोधित्वेपि धूमवान्वह्नेरित्यादौ नातिव्याप्तिः।धूमादिनिष्ठेन्धनत्वाद्यवच्छिन्नवह्न्यभाववद्वृत्तित्वस्यापि इन्धनत्वादिप्रकारेण वह्न्यनुमितेर्विरोधित्वादसम्भवः स्यादतः प्रकृतेति । साध्यतावच्छेदकेन सम्बन्धेन रूपेण च प्रकृतसाध्यकेत्यर्थः । तथा च तादृशसाध्याभाववद्वृत्तित्वस्य वह्नित्वेन वह्न्यनुमितिं प्रत्यविरोधित्वाददोषः । प्रकृतानुमितिविरोधित्वं न प्रकृतानुमितिविरोधिज्ञानविषयत्वमात्रं धूमनिष्ठवृत्तित्वस्यापि वह्न्यनुमितिविरोधिनो व्यभिचारभ्रमस्य विषयत्वसम्भवात् किं तु विषयितया प्रकृतानुमितिप्रतिबन्धकतावच्छेदकत्वम् तथा च वह्निनिष्ठवृत्तित्वमात्रस्य धूमसाध्यकानुमितिविरोधितावच्छेदकत्वाभावाद्व्यभिचारिण्यतिव्याप्तिरतः साध्याभाववतीति । तथा च यन्निष्ठसाध्याभाववद्वृत्तित्वविषयितासामान्यं प्रकृतानुमितिप्रतिबन्धकतानवच्छेदकं तत्त्वमर्थः । न च घटाभाववद्वृत्तित्वादौ साध्याभाववद्वृत्तितात्वभ्रमदशायामपि धूमसाध्यकानुमित्यनुत्पत्त्या वह्निनिष्ठनिर्धूमवृत्तित्वस्य धूमसाध्यकानुमितिप्रतिबन्धकतानवच्छेदकत्वाद्व्यभि-

तत्त्वं व्याप्तिरिति तन्न । अनुमित्यविरोधित्वज्ञानस्यानुमितिजनकत्वे साध्याभाववद्वृत्तित्वज्ञानस्यानुमित्यविरोधितया व्यभिचारिण्यतिप्रसङ्गात् । केचित्तु यावन्तः साध्याभावाः प्रत्येकं तत्तत्सजातीया ये तत्तदधिकरणवृत्तित्वाभावास्तद्वत्त्वं तत्त्वम् साजात्यञ्च

चारिण्यतिव्याप्तितादवस्थ्यमिति वाच्यम् । यन्निष्ठसाध्याभाववद्वृत्तित्वविषयितासामान्यं न प्रकृतानुमितिप्रतिबन्धकतानरिक्तवृत्ति तत्त्वमित्यस्योक्तत्वात् साध्याभावस्तु पूर्वोक्तद्वितीयरीत्या प्रवेशनीयः । तेन न पूर्वोक्तदोषः ॥ अनुमित्यविरोधित्वज्ञानस्येति । अनुमित्यविरोधित्वं हि न साक्षादनुमितिप्रतिबन्धकत्वं व्यभिचारधियः साक्षादतथात्वेन व्यभिचारिमात्रेतिप्रसङ्गापत्तेः । किं त्वनुमितिजनकज्ञानविरोधित्वम् । तज्जनकं च यदि निरुक्तव्याप्तिज्ञानं तदा तादृशज्ञानं प्रति न साध्याभाववद्वृत्तित्वज्ञानं विरोधि किं तु साध्याभाववद्वृत्तित्वमनुमितिविरोधीत्याकारकज्ञानमेव तथेति व्यभिचारिण्यतिव्याप्तिः । यदि तु साध्याभाववदवृत्तिर्हेतुरित्याकारकज्ञानं प्रकृतानुमितिजनकं तदा निरिक्तव्याप्तेरनुमित्यनुपयुक्ततया तदभिधानमर्थान्तरग्रस्तमिति भावः । एतेन यदि प्रकृतानुमितिपदं प्रकृतहेतुधर्मिकसाध्याभाववदवृत्तित्वानुमितिपरं [न तु प्रकृतसाध्यकानुमितिपरं] विरोधित्वं चात्र साक्षादेव निवेश्यते तदा व्यभिचारिण्यतिप्रसङ्ग इत्यपास्तम् । तादृशव्याप्तेरनुमित्यनुपयुक्ततया तदभिधानेऽर्थान्तरतादवस्थ्यमिति ॥ मिश्रलक्षणमेव परिष्कृत्योपन्यस्यति केचित्त्विति । केवलान्वयिनि प्रसिद्धावपि वह्न्यादिसाध्यके व्यतिरेकिणि यावन्तः साध्याभावास्तत्तत्सजातीयत्वं तत्तदधिकरणवृत्तित्वाभावे तादृशान्यतररूपात्मकमप्रसिद्धमत उक्तं प्रत्येकमिति । यावन्तः साध्याभावास्तेषाम्प्रत्येकमपि सजातीयत्वं एकस्मिन्नभावे नास्त्यत उक्तं तत्तत्सजातीया इति । तदधिकरणवृत्तित्वाभावा इत्युक्ते तत्पदेन यावत्साध्याभावपरामर्शे वह्निमान् धूमात् रूपसामान्याभाववान् वायुत्वादित्यादौ साध्याभावात्मकतत्तद्विपक्षावृत्तित्वावच्छिन्नाभावयावद्रूपाद्यधिकरणाप्रसिद्ध्याऽव्याप्तिरतस्तत्तदधिकरणेति । तथा च प्रातिस्विकरूपेण साध्याभावानुपादाय तत्तु-

समानासमानाधिकरणधर्मावच्छिन्नप्रतियोगिताकत्वान्यतररूपेण साध्याभावश्च पूर्वोक्तद्वितीयरीत्या प्रवेतव्यो व्याप्यवृत्तिश्च प्रति-

---

त्सजातीयस्तत्तदधिकरणवृत्तित्वाभावो ग्राह्य इति भावः । व्यधिकरणधर्मावच्छिन्नसाध्याभावसजातीयं घटत्वादिना तत्तदधिकरणवृत्तित्वाभावमादाय व्यभिचारिण्यतिव्याप्तिवारणाय यावन्त इति । तथा च साध्यसामान्याभावसजातीयस्य तदधिकरणवृत्तित्वाभावस्य तत्रासत्त्वाददोषः । साध्यसामान्याभाववद्वृत्तित्वस्यैव व्यधिकरणधर्मावच्छिन्नाभावो व्यभिचारिण्यप्यस्तीत्यतः सजातीया इत्युक्तम् । ननु घटत्वेन निर्धूमवृत्तित्वस्याभावोपि अभावत्वादिना धूमसामान्याभावसजातीय एवेत्यतिव्याप्तितादवस्थ्यमत आह साजात्यं चेति । यद्यपि साध्याभावनिष्ठं यत्समानाधिकरणधर्मावच्छिन्नप्रतियोगितात्वव्यधिकरणधर्मावच्छिन्नप्रतियोगितात्वान्यतररूपं तेनैव रूपेण साजात्यं वाच्यम् तथा च वह्निसामान्याभावादिनिष्ठं यत्तादृशान्यतररूपं वह्निनिष्ठवह्नित्वावच्छिन्नप्रतियोगितात्वस्वरूपं तस्य निर्वह्निवृत्तित्वसामान्यभावेऽसत्त्वादसंभवः तथापि यावन्तः समानाधिकरणधर्मावच्छिन्नाभावास्तावदन्यतमत्वतद्भिन्नत्वान्यतररूपेण साजात्यं वाच्यमित्यदोषः । समनियताभावानामैक्यात् गगनाभाव एव निखिलव्यधिकरणधर्मावच्छिन्नाभाव इति मते तु गगनाभावत्वतदन्यत्वान्यतररूपेणैव साजात्यं वाच्यम् । तेन घटत्वेन निर्धूमवृत्तित्वाभावस्यैव गगनत्वादिसमानाधिकरणधर्मावच्छिन्नप्रतियोगितात्वेपि धूमसामान्याभावसजातीयत्वेपि नातिव्याप्तिः । साध्याभावश्चेति । साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताकाभावोऽत्र साध्याभावपदेनोक्त इत्यर्थः । साध्यव्यापकतावच्छेदकप्रतियोगितात्वरूपप्रथमरीत्याभिधाने घटत्वविशिष्टवाच्यत्वाद्यभावस्यापि साध्याभावपदार्थतया तत्तत्सजातीयस्य तदधिकरणवृत्तित्वाभावस्यापि हेतावसत्त्वादसम्भवः स्यादतस्तत्परित्यागः । अत्र साध्यव्यापकताघटकसम्बन्धेनैव साध्यव्यापकस्याभावो ग्राह्यः । तेनैकसम्बन्धेन साध्यव्यापकस्य सम्बन्धान्तरावच्छिन्नाभाववति हेतोर्वृत्तावपि न क्षतिः । यत्तु साध्यतावच्छेदकस-

योगितावच्छेदकावच्छिन्नप्रतियोगिव्यधिकरणो वा तेन तत्तत्सा-

म्बन्धेन साध्यव्यापकत्वं तेनैव साध्यव्यापकस्याभावो निवेश्य इति मतं तत्तुच्छम् । यत्र तादात्म्यसम्बन्धेन प्रमेयमात्रं साध्यं तत्र तेन सम्बन्धेन साध्यव्यापकतावच्छेदकं यत्प्रमेयत्वादिकं तादात्म्येन तदवच्छिन्नप्रतियोगिताकाभावाप्रसिद्ध्या तत्र सद्धेतावव्याप्तिः । प्रमेयत्वेन घटपटोभयभेदस्वीकारेण कथं चित्तत्राव्याप्तिवारणेपि वृत्त्यनियामकसम्बन्धेन साध्यतायामव्याप्तिः । साध्यतावच्छेदकसम्बन्धावच्छिन्नप्रतियोगित्वाप्रसिद्धेः । किं चैवं धूमवान्वह्नेरित्यादावतिव्याप्तिः । संयोगेन धूमसामान्याभावस्याव्याप्यवृत्तितया धूमत्वेन घटाद्यभावस्यैव तादृशस्य यावदन्तर्गतत्वेन तत्सजातीयस्य तदधिकरणवृत्तित्वाभावस्य वह्नौ सत्त्वात् । अस्माकं तु स्वरूपसम्बन्धेनायःपिण्डभेदस्यापि धूमव्यापकतया वह्नेस्तदभाववदवृत्तित्वाभावादेवातिव्याप्तिनिरासादिति बोध्यम् । ननु कपिसंयोगि एतद्वृक्षत्वादित्यत्राव्याप्तिः कपिसंयोगसामान्याभावस्यापि प्रतियोगिवैयधिकरण्यघटितसाध्यव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताकत्वेन यावदन्तर्गतत्वात्तत्सजातीयस्य तदधिकरणवृत्तित्वाभावस्य हेतावभावादत आह व्याप्यवृत्तिश्चेति। व्याप्यवृत्तित्वमवच्छिन्नवृत्तिकान्यत्वम् । संयोगी सत्त्वादित्यादौ तु द्रव्यत्वादिसामान्याभावस्यापि साध्याभावतया हेतोस्तदधिरकणवृत्तित्वादेव नातिव्याप्तिः।ननु रूपवान्पृथिवीत्वादित्यादावव्याप्तिः रूपत्वेन नित्यसमवेताभावस्यापि निरुक्तयावत्साध्याभावान्तर्गतत्वात्तत्सजातीयस्य तदधिकरणवृत्तित्वसामान्याभावस्यापि हेतावसत्त्वात् सामान्यधर्मेण विशेषाभावस्वीकारे तु रूपत्वेन तद्रूपाभावमादायाप्यव्याप्तिरत आह प्रतियोगितावच्छेदकावच्छिन्नेत्यादि । प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिव्यधिकरणत्वं च यत्प्रतियोगिताकाभावे स्वावच्छेदकसम्बन्धेन स्वसमानाधिकरणस्वावच्छेदकावच्छिन्नसामानाधिकरण्यं तदन्यप्रतियोगितात्वं बोध्यम् । तेन नित्यरूपात्मकेन प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिना सामानाधिकरण्यविरहेप्युक्ताभावस्य न संग्रहः। न वा वाच्यत्वत्वेन प्रमेयत्वाद्यभावस्यैव ज्ञेयत्वत्वेन वाच्यत्वाद्यभावस्या-

ध्यव्यक्तेरव्याप्यवृत्तेर्वा साध्यस्याभाववति वृत्तावपि हेतोर्नाव्याप्तिः तद्वदवृत्तित्वाभावश्च तत्तत्साध्याभाववदवृत्तित्वव्यापकव्यासज्यवृत्तिधर्मानवच्छिन्नप्रतियोगिताकः तत्तत्साध्याभाववद्वृत्तित्व-

---

व्याधिकरणधर्मावच्छिन्नाभावमात्रस्यैव प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिसामानाधिकरण्येपि तद्ग्रहः । अत्र च निरुक्तायास्तदन्यप्रतियोगितायाः एव साध्यव्यापकतावच्छेदकरूपावच्छिन्नत्वं बोध्यम् । तेन संयोगात्मकस्यैव साध्याभावस्य समवेतसामान्याभावनिष्ठनिरुक्तप्रतियोगिताकत्वकपिसंयोगाभावत्वरूपसाध्यव्यापकतावच्छेदकधर्मावच्छिन्नप्रतियोगिताकत्वयोः सत्त्वेपि कपिसंयोगाभाववान्वाच्यत्वादित्यादौ रूपत्वेन नित्यसमवेताभावस्यैव नित्यरूपसामान्याभावतया तत्र नित्यरूपत्वावच्छिन्ननिरुक्तप्रतियोगिताकत्वसाध्यव्यापकतावच्छेदकीभूतरूपत्वावच्छिन्नप्रतियोगिताकत्वयोः सत्त्वेपि रूपवान् पृथिवीत्वादित्यादौ नाव्याप्तिः । समवेतसामान्याभावत्वाद्यवच्छिन्नप्रतियोगितायाः साध्यव्यापकतावच्छेदकरूपानवच्छिन्नत्वादिति ध्येयम् । द्वितीयरीतेः प्रवेशफलमाह तत्तत्साध्यव्यक्तेरिति । अभाववति हेतोर्वृत्तावपि नाव्याप्तिरित्यन्वयः । व्याप्यवृत्तित्वादेः फलमाह आव्याप्यवृत्तेर्वा साध्यस्येति । तत्तत्साध्याभावेत्यादि । सामान्यतः साध्याभाववदवृत्तित्वत्वव्यापकेत्युक्तौ वह्निसामान्याभावसजातीयव्यधिकरणधर्मावच्छिन्नाभावसाधारणसाध्याभाववदवृत्तित्वत्वव्यापकप्रतियोगिताकाभावस्याप्रसिद्ध्या व्यतिरेकिमात्रेव्याप्तिरतस्तत्तदिति साध्याभावस्य विशेषणम् । तथा च निर्वह्निवृत्तित्वसामान्याभाव एव निर्वह्निवृत्तित्वत्वव्यापकप्रतियोगिताकस्तत्र साध्याभावसजातीयत्वमस्तीत्यदोषः । नन्वेवमपि जलवृत्तित्वत्वेन निर्धूमवृत्तित्वाभावस्य निरुक्तरूपशालिनो वह्नौ सत्त्वादतिव्याप्तिः न च व्यासज्यवृत्तिधर्मानवच्छिन्नत्वं परित्यज्य स्वन्यूनवृत्तिधर्मानवच्छिन्नत्वमेव प्रतियोगिताया विशेषणं वाच्यमतो नोक्तदोषः तथापि गुणभेदाभावसजातीयस्य पूर्वक्षणवृत्तित्वविशिष्टगुणसमवेतत्वाभावस्य हेतौ सत्त्वाद्गुणभिन्नं सत्त्वादित्या

त्वातिरिक्तसमानाधिकरणधर्मानवच्छिन्नप्रतियोगिताको वा बोध्यः तेन साध्याभाववद्वृत्तिविशेषवृत्तित्वस्य पार्थिवत्वादिविशेषितस्य

दावतिप्रसङ्गादत आह तत्तत्साध्याभाववदवृत्तित्वत्वातिरिक्तसमानाधिकरणधर्मानवच्छिन्नप्रतियोगिताको वा बोध्य इति। अयं पाठः काचित्कः। तत्र चातिरिक्तान्तेन निर्वह्निवृत्तित्वसामान्याभावादेः सङ्ग्रहः। अन्यथा वह्निसामान्याभावसजातीयस्य समानाधिकरणधर्मानवच्छिन्नप्रतियोगिताकाभावस्याप्रसिद्ध्याऽव्याप्तिप्रसङ्गात्। न च निर्धूमत्वादिसजातीयस्य निर्धूमवृत्तित्वत्वादिना वह्न्यवृत्तेरभावस्य हेतौ सत्त्वाद्धूमवान्वह्नेरित्यादावतिव्याप्तिर्हेतुतावटकसम्बन्धावच्छिन्नवृत्तितामात्रनिष्ठत्वेन प्रतियोगिताया निवेशनीयत्वेपि निर्धूमवृत्तित्वेन जलवृत्तित्वजलान्यनिर्धूमवृत्तित्वोभयाभावमादायातिव्याप्तितादवस्थ्यमिति वाच्यम्। एतदस्वरसेनैव यद्वेत्यादिलक्षणान्तरस्य वक्ष्यमाणत्वात्। यद्यपि तत्तत्साध्याभाववदवृत्तित्वत्वावच्छिन्नभाव इत्यस्यैव सम्यक्त्वे सामानाधिकरणधर्मादिकं प्रक्षिप्य निषेधद्वयप्रवेशो निरर्थकः सर्वत्र व्यधिकरणधर्मावच्छिन्नसाध्याभाववदवृत्तित्वत्वेन घटाद्यभावस्यैव तादृशस्य साध्याभावसजातीयस्य सम्भवात्। तथापि यथासन्निवेशे न वैयर्थ्यम्। यत्र तादात्म्येन सम्बन्धेन हेतुता तत्र सद्धेतौ व्यधिकरणधर्मावच्छिन्नसाध्याभाववत्तादात्म्यस्य जगत्स्वरूपतया तादृशतादात्म्यत्वस्य केवलान्वयित्वेन तदवच्छिन्नाभावाप्रसिद्ध्याऽव्याप्तिः स्यादतो वा निषेधद्वयमेभता। यत्तु तत्तत्साध्याभाववदवृत्तित्वत्वावच्छिन्नाभावा इत्युक्तावसम्भवः स्याद्व्यधिकरणधर्मावच्छिन्नसाध्याभाववद्वृत्तित्वत्वावच्छिन्नाभावाप्रसिद्धेः तादृशवृत्तितात्वमपेक्ष्य लघुवृत्तित्वत्वमात्रस्यैवोक्ताभावप्रतियोगितावच्छेदकत्वादिति तन्तुच्छम्। गुरोः प्रतियोगितावच्छेदकत्वमङ्गीकृत्यैव लक्षणकरणात्। अन्यथा महाकालभेदे साध्ये जन्यत्वविशिष्टघटादेः कालिकसम्बन्धेन हेतुतायामव्याप्तिप्रसङ्गात्। महाकालभेदाभाववद्वृत्तित्वत्वमपेक्ष्य लघुना वृत्तित्वत्वमात्रेणैव महाकालभेदाभाववद्वृत्तित्वाभावप्रतियोगितायाः अवच्छेदात्। महाकालभेदाभावसजातीयस्य तद्वद्वृत्तित्वत्वा-

द्वित्वाद्यवच्छिन्नस्य वा साध्याभाववद्वृत्तित्वस्याभावमादाय नातिप्रसङ्गः अत्र च हेतुतावच्छेदकसम्बन्धेन साध्याभाववद्वृत्तित्वं बोध्यम् तेन वह्न्यभाववति स्ववयवे धूमस्य वृत्तावपि न दोषः इत्थञ्च साध्याभावोऽपि हेतुतावच्छेदकसम्बन्धेन कस्यचिदधिकरणे वर्तमानो ग्राह्यः तेन जातिमान् सत्त्वादित्यादौ हेतुतावच्छेदकसम्बन्धेन साध्याभाववद्वृत्तित्वस्याप्रसिद्धावपि न क्षतिः

तिरिक्तसमानाधिकरणधर्मानवच्छिन्नप्रतियोगिताकाभावस्याप्रसिद्धेरिति ध्येयम्। तादृशवृत्तित्वत्वव्यापकत्वस्य प्रयोजनमाह साध्याभाववद्व्यक्तिविशेषवृत्तित्वस्येति। आभावमादाय नातिप्रसङ्ग इत्यन्वयः। ननु व्यभिचारनिरूपकाधिकरणव्यक्त्यन्यत्वस्याभावस्यापि साध्याभावतया तद्वद्वृत्तित्वसामान्याभावस्य व्यभिचारिण्यसत्त्वात् कुतोऽतिव्याप्तिरत आह पार्थिवत्वादीति। पार्थिवत्वविशिष्टं यन्निर्धूमवृत्तित्वं तद्ह्रदौ नास्ति वह्नेरपार्थिवत्वादित्यतिप्रसङ्ग इति भावः। आदिना जलत्वादिपरिग्रहः। व्यासज्यवृत्तिधर्मानवच्छिन्नेत्यस्य प्रयोजनमाह द्वित्वाद्यवच्छिन्नस्य वेति। निर्धूमवृत्तित्ववह्निभेदोभयत्वावच्छिन्नस्य वेत्यर्थः। न दोष इति। अन्यथा निर्वह्निसंयुक्तत्वाभावस्य साध्याभाववद्वृत्तित्वत्वव्यापकप्रतियोगिताकत्वाभावान्निर्वह्निवृत्तित्वसामान्याभावस्य च धूमे सत्त्वाद्व्याप्तिरेव स्यादिति भावः। इत्थं च साध्याभाववद्वृत्तित्वस्य हेतुतावच्छेदकसम्बन्धेनोक्तौ चेत्यर्थः। तादृशसम्बन्धेन हेत्वधिकरणत्वानुप्रवेशे गौरवमतः कस्य चिदित्युक्तम्। तथा च हेतुतावच्छेदकसम्बन्धावच्छिन्नाधिकरणतावद्वृत्तित्वं साध्याभावविशेषणमित्यर्थः। सत्त्वादित्यादावित्यादिपदेन वह्निमान् धूमादित्यादेः परिग्रहः। तत्रापि जातिसामान्याभावादेः साध्याभावतया तद्वति संयोगसम्बन्धेन वृत्त्यप्रसिद्धेरव्याप्तिसम्भवात्। ननु द्रव्यं विशिष्टसत्त्वादित्यत्राव्याप्तिः विशिष्टसत्त्वस्य केवलसत्त्वानतिरेकेण द्रव्यत्वाभाववति वृत्त्या द्रव्यत्वाभावसजातीयस्य तद्वद्वृत्तित्वाभावस्य हेतावसत्त्वात् नचैवं विशिष्टहेत्वधिकरणे वर्तमान एव साध्यीयो गृह्यतां तावतैवोक्तदोषव्युदासादि-

यद्वा यावन्तस्तादृशाः साध्याभावाः प्रत्येकं तेषां सजातीयस्य व्यापकीभूतस्य व्याप्यवृत्तेरभावस्य प्रतियोगितावच्छेदकेन धर्मेण यद्रूपावच्छिन्नं प्रति व्यापकत्वमवच्छिद्यते तद्रूपवत्त्वं तत्त्वम्,

---

ति वाच्यम् तथापि धूमवान्वह्नेरित्यत्रातिव्याप्तिर्निर्धूमवृत्तित्वसामान्याभावस्य महानसीयवह्नौ सत्त्वात् न च हेतुतावच्छेदकधर्मावच्छेदेन तादृशवृत्तित्वाभाववत्त्वं विवक्षितम् तथा सत्यपि निर्धूमत्वादिसजातीयं निर्धूमवृत्तित्ववत्त्वेन रूपेण वह्नयवृत्तेरभावं तादृप्येण जलवृत्तित्वजलान्यनिर्धूमवृत्तित्वोभयाभावं चादायातिव्याप्तितादवस्थ्यादत आह यद्वेति वह्नित्वावच्छिन्नधूमाभावसजातीयस्य तद्व्यापकीभूतस्य तस्यैवाभावस्य प्रतियोगितावच्छेदकेन वह्नित्वादिना वह्नित्वाद्यवच्छिन्नं प्रति व्यापकतावच्छेदाद्व्यभिचारिण्यतिव्याप्तिरतो यावन्त इति। तथा च धूमादिसामान्याभावस्यापि साध्याभावतया यावदन्तर्गतत्वात्तद्व्यापकीभूताभावप्रतियोगितावच्छेदकेन तत्तद्वह्नित्वादिना वह्नयादिकं प्रति व्यापकत्वाभावान्नातिव्याप्तिः तत्तद्वह्नयभावसजातीयस्य तद्व्यापकीभूताभावस्य प्रतियोगितावच्छेदकेन तत्तद्वह्नित्वादिना धूमादिकं प्रति व्यापकत्वाभावादसम्भवः स्यादित्यतस्तादृशाः साध्याभावा इति। साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताकाभावा इति तदर्थः। तत्तद्वह्नित्वादिकं तु न साध्यव्यापकतावच्छेदकमतस्तदवच्छिन्नाभावमादाय नोक्तदोषः। तादृशयावत्साध्याभावसाजात्यं तादृशसाध्याभाववृत्तिप्रागुक्तान्यतररूपवत्त्वम् तच्च व्यतिरेकिण्यप्रसिद्धमतः प्रत्येकमिति। यद्यपि तादृशयावत्साध्याभावानां प्रत्येकनिरूपितमपि साजात्यं न कुत्राप्यभावेस्तीति व्यतिरेकिण्यव्याप्तितादवस्थ्यम्। तथापि तेषामित्यत्र तस्य तस्य तस्येत्येकशेषकरणात् यावन्तः साध्याभावाः प्रत्येकं तत्तत्सजातीयस्य तत्तद्व्यापकीभूताभावस्य लाभाददोषः। धूमादिसामान्याभावव्यापकस्य वह्नित्वादिना घटाद्यभावस्य प्रतियोगितावच्छेदकेन वह्नित्वादिना वह्नयत्वाद्यवच्छिन्नं प्रति व्यापकत्वाद्व्यभिचारिण्यतिव्याप्तिरतः सजातीयस्येति। साजात्यन्तु

(१) 'धूमत्वादिना'

प्रागुक्तदिशा ग्राह्यम्। तेन संयोगादिसम्बन्धावच्छिन्नद्रव्यत्वाद्यभावप्रतियोगितावच्छेदकेन द्रव्यत्वत्वादिना वह्न्यादिव्यापकत्वसत्त्वेन धूमवान्वह्नेरित्यादौ नातिव्याप्तिः । तादृशाभावस्य धूमादिसामान्याभावसाजात्यविरहादिति ध्येयम् । धूमादिसामान्याभावसजातीयस्य तद्व्यापकीभूतस्य च वह्निसंयोगाद्यभावस्य प्रतियोगितावच्छेदकेन वह्निसंयोगत्वादिना वह्न्यादिकं प्रति व्यापकत्वादतिव्याप्तिरतो व्याप्यवृत्तेरिति । वस्तुतो वह्नित्वेन धूमवदवृत्तेरभावस्य प्रतियोगितावच्छेदकेन वह्नित्वेन वह्निं प्रति व्यापकत्वादतिव्याप्तिरतो व्याप्यवृत्तितानिरूपकप्रतियोगितायाश्च लाभाय व्याप्यवृत्तिपदम् । तेन यत्प्रतियोगिताकाभावे स्वावच्छेदकावच्छिन्नसामानाधिकरण्यव्यधिकरणधर्मावच्छिन्नाभावभिन्नत्वोभयाभावस्तादृशप्रतियोगितायाः एव लक्षणघटकत्वान्नोक्तदोषः । धूमाद्यभावसजातीयस्य वह्न्याद्यभावस्य प्रतियोगितावच्छेदकेन वह्नित्वादिना वह्न्यादिकं प्रति व्यापकत्वाद्धूमवान्वह्नेरित्यादावतिव्याप्तिरतो व्यापकीभूतस्येति । यद्यपि तत्तद्व्यभिचारस्थलान्यत्वाभावस्यापि निरुक्तसाध्याभावतया तत्समानाधिकरणस्य तत्सजातीयाभावस्य प्रतियोगितावच्छेदकेन धर्मेण तत्तद्योगोलकभेदत्वादिना वह्नित्वाद्यवच्छिन्नं प्रति व्यापकत्वाभावात्सामानाधिकरण्यमात्रोक्तावपि नातिव्याप्तिः तथापि साध्याभावव्यापकत्वघटितनिरुक्तौ साध्याभावसजातीयाभावे साध्याभावसामानाधिकरण्यस्याप्रविष्टतया न व्यापकीभूतपर्यन्तस्य व्यर्थतेति ध्येयम् । यत्तु साध्यतावच्छेदकसम्बन्धेन साध्यव्यापकताया यदवच्छेदकं तेन सम्बन्धेन तद्रूपावच्छिन्नाभावोत्र साध्याभावपदार्थः तथा चायोगोलकभेदत्वस्य न संयोगात्मकसाध्यतावच्छेदकसम्बन्धेन धूमव्यापकतावच्छेदकत्वमिति तदवच्छिन्नाभावो न साध्याभावः किं तु धूमाद्यभावः एवं च तत्समानाधिकरणस्य वह्न्याद्यभावस्य प्रतियोगितावच्छेदकेन वह्नित्वादिना वह्नित्वाद्यवच्छिन्नं प्रति व्यापकत्वादतिव्याप्तिरतः समानाधिकरणस्येत्यपहाय व्यापकीभूतस्येत्युक्तम् न चैवं वह्निमान्धूमादित्यत्रैवाव्याप्तिः संयोगेन वह्न्याद्यभावस्यापि साध्याभावतया तस्य केवलान्वयितया तत्सजातीयतद्व्यापकीभूतव्याप्यवृत्त्यभावाप्रसिद्धेरिति वाच्यम् यावन्तो व्याप्यवृत्तयः साध्याभावास्तेषामेव प्रवेश्यतया वह्नि-

साधनस्य तादृशाभावप्रतियोगित्वं तदवच्छेदकत्वं वा साधनतावच्छेदकं

सामान्याभावस्य निरवच्छिन्नहेत्वधिकरणवृत्तिकत्वरूपव्याप्यवृत्तित्वविरहेण यावदनन्तर्गतत्वात् धूमाद्यभावस्तु वह्निमदयोगोलक एव तादृशव्याप्यवृत्तिरिति तन्न । तादात्म्येन प्रमेयमात्रस्य साध्यतायामव्याप्तेः । तत्र प्रमेयत्वादेरेव तादात्म्येन साध्यव्यापकतावच्छेदकतया तादात्म्येन तदवच्छिन्नाभावाप्रसिद्धेः । अन्ये तु यावन्तः साध्याभावाः प्रत्येकं तत्तत्सजातीयनिष्ठं यद्यद्रूपावच्छिन्नप्रतियोगिताकाभावत्वं तत्तत्साध्याभावव्यापकतावच्छेदकं तत्तद्रूपेण यद्रूपावच्छिन्नं प्रति व्यापकत्वमवच्छिद्यते तद्रूपवत्त्वमर्थः तत्र च साध्याभावव्यापकतावच्छेदकत्वमपहाय साध्यभावसमानाधिकरणवृत्ति वोक्तौ गुणान्यत्वविशिष्टसत्ताभाववान् द्रव्यान्यत्वविशिष्टसत्त्वाभावादित्यत्रातिव्याप्तिः गुणान्यत्वविशिष्टसत्ताभावाभावरूपस्य द्रव्यान्यत्वाद्यभावरूपस्य वा निरुक्तसाध्याभावस्य सजातीये समानाधिकरणे च सत्तास्वरूपेऽभावे वर्तते यद्द्रव्यान्यत्वविशिष्टसत्ताभावत्वस्वरूपधर्मावच्छिन्नप्रतियोगिताकाभावत्वं तेन द्रव्यान्यत्वविशिष्टसत्ताभावत्वरूपधर्मेण हेतुतावच्छेदकावच्छिन्नं प्रति व्यापकतावच्छेदात् साध्याभावव्यापकतावच्छेदकत्वोक्तौ तु द्रव्यान्यत्वविशिष्टसत्त्वाभावत्वावच्छिन्नप्रतियोगिताकाभावत्वं न गुणान्यत्वविशिष्टसत्ताभावाभावाद्यात्मकस्य द्रव्यान्यत्वाद्यभावरूपस्य वा साध्याभावस्य व्यापकतावच्छेदकं द्रव्य एव व्यभिचारादतो नोक्तदोष इति प्राहुः । द्रव्यं विशिष्टसत्त्वादित्यादौ व्यापकीभूतताद्दशाभावप्रतियोगितावच्छेदकेन द्रव्यत्वत्वादिना [गुणकर्मान्यत्वविशिष्ट]सत्तादिकं प्रति व्यापकतानवच्छेदादव्याप्तेराह यद्रूपावच्छिन्नेति । न चेदं गमनं स्पन्दत्वादित्यादौ तादृशगतित्वाद्यभावस्य प्रतियोगितावच्छेदकीभूतगतित्वत्वादिनापि कालिकसम्बन्धेन स्पन्दत्वव्यापकत्वादतिव्याप्तिरिति वाच्यम् । तादृशाभावस्य यत्सम्बन्धावच्छिन्नप्रतियोगिताया अवच्छेदको यो धर्मस्तत्प्रतियोगितावच्छेदकसम्बन्धेन हेतुव्यापकत्वस्योक्तत्वादिति भावः । परैः परिष्कृतं निरसि-

(१) 'दकेन [धर्मेण] गुणकर्मान्यत्व[विशिष्टसत्ता]त्वादिना'.

च्छेदकस्येति तु न वक्तव्यम् द्रव्यं सत्त्वादित्वादौ सत्त्वादेर्गुण-कर्मान्यत्वविशिष्टसत्तात्वाद्यवच्छिन्नप्रतियोगिताकतादृशाभावप्रतियोगित्वादतिव्याप्तेः ज्ञेयं प्रमेयादित्वादौ प्रमेयत्वादेस्तादृशप्रतियोगितानवच्छेदकत्वादव्याप्तेश्च प्रमेयत्वव्यधिकरणप्रतियोगि-

---

तुमाह साधनस्येत्यादिना । तादृशेति । यावन्तः साध्याभावाः प्रत्येकं तत्तत्सजातीयव्यापकीभूताभावेत्यर्थः । तदवच्छेदकत्वमिति । तत्तत्साध्याभावसजातीयतद्व्यापकीभूताभावप्रतियोगितावच्छेदकत्वं वेत्यर्थः । प्रथमे दूषणमाह द्रव्यमित्यादि । तादृशाभावेति । साध्याभावसजातीयव्यापकीभूताभावेत्यर्थः । द्वितीये दूषणमाह ज्ञेयं प्रमेयादित्यादि । प्रमेयत्वादेरिति । नच सामान्यधर्मेण विशेषाभावस्यापि व्यवस्थापितत्वात् प्रमेयत्वेन गगनाभावस्यैव प्रागुक्तक्रमेण साध्याभावसजातीयस्य प्रतियोगितावच्छेदकत्वे मेयत्वमादाय नाव्याप्तिरिति वाच्यम् । वह्नित्वेन महानसीयवह्नयभावमादाय धूमसाध्यकवह्नावतिव्याप्तिभिया स्वाधिकदेशवृत्तिधर्मानवच्छिन्नप्रतियोगितायाः प्रवेश्यत्वात् प्रमेयत्वेन गगनाभावप्रतियोगितायाश्चातथात्वात् । तथापि विषयत्वाद्यपेक्षया गुरोः प्रमाविषयत्वस्य प्रतियोगितानवच्छेदकत्वेनोक्ताव्याप्तितादवस्थ्यादिति भावः । नव्यास्तु यावन्तः साध्याभावाः प्रत्येकं तत्तत्सजातीयो यस्तत्तत्समानाधिकरणो व्याप्यवृत्त्यभावः तत्प्रतियोगित्वमेव व्याप्तिः व्याप्यवृत्तित्वं तु प्रकृतहेतुसामानाधिकरण्यव्यधिकरणधर्मावच्छिन्नाभावभिन्नत्वोभयाभाववत्त्वं तेन धूमसामान्याभावसमानाधिकरणस्य तत्तत्सजातीयस्य वह्निधूमोभयत्वाद्यवच्छिन्नाभावस्य प्रतियोगित्वेपि धूमसाध्यकवह्न्यादौ नातिव्याप्तिस्तादृशोभयाभावस्य निरुक्तव्याप्यवृत्तित्वाभावात् एवं च यत्राभावे प्रकृतसाध्यसामानाधिकरण्यव्यधिकरणधर्मावच्छिन्नाभावभिन्नत्वोभयाभावः स एव साध्याभावपदार्थः तेनाऽभाववान् प्रमेयत्वादित्यादौ साध्यप्रतियोगिकस्य घटावृत्तित्वावच्छिन्नाभावस्याधिकरणे घटादौ वर्तमानस्य तत्तत्सजातीयहेत्वभावस्य निरुक्तव्याप्यवृत्तित्वाप्रसिद्धावपि नाव्याप्तिः । इत्थं च द्रव्यं सत्त्वादित्यादौ गुणान्य-

त्वस्याप्रसिद्धेः यद्वा यावन्तस्तादृशाः साध्याभावाः प्रत्येकं तत्प्रतियोगितावच्छेदकेन धर्मेण यद्रूपावच्छिन्नं प्रति व्यापकत्वमवच्छिद्यते तद्रूपवत्त्वं वा तत्त्वमित्याहुः । परे तु वृत्तिमदवृत्तयो या-

---

त्वाद्यभावस्यापि निरुक्तसाध्याभावत्वात्तदधिकरणे गुणादौ वर्तमानस्य तत्सजातीयाभावस्य निरुक्तव्याप्यवृत्तित्वाप्रसिद्धैव नातिव्याप्तिः वाच्यं प्रमेयादित्वादौ तु व्यधिकरणधर्मावच्छिन्नवाच्यत्वाद्यभावसमानाधिकरणस्य विरुद्धघटत्वपटत्वाभ्यां प्रमेयाभावस्य घटत्वादिना वाच्यत्वाद्यभावस्यैव वा निरुक्तव्याप्यवृत्तिताशालिनः प्रतियोगितामादाय लक्षणसम्भव इति यथाश्रुतमेव मिश्रलक्षणं सम्यगिति प्रतीमः [न च वह्निमान् धूमादित्यादावव्याप्तिः यावत्साध्याभावान्तर्गतद्रव्यसामान्याभावसजातीयनिरुक्तव्याप्यवृत्तिसमानाधिकरणाभावप्रतियोगित्वस्य धूमादावसत्त्वात् संयोगेन धूमस्याव्याप्यवृत्तितया धूमाद्यभावस्य लक्षणाघटकत्वादिति वाच्यम् संयोगेन द्रव्यस्य व्याप्यवृत्तित्वाद्धूमद्रव्यान्यतराभावस्य निरुक्तरूपशालितः प्रतियोगित्वस्य धूमादौ सत्त्वाच्च मिश्रलक्षणम्] इति प्राहुः । व्यापकीभूतस्य सजातीयस्येत्यादिपरित्यागेन लघुलक्षणमाह यद्वेति । तादृशा इति । प्रकृतसाध्यव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताकाभावा इत्यर्थः । अत्रापि येन सम्बन्धेन साध्यव्यापकता तत्सम्बन्धावच्छिन्नाभावानां प्रतियोगितावच्छेदकधर्मैस्तत्सम्बन्धेन यद्रूपावच्छिन्नं प्रति व्यापकत्वमवच्छिद्यते इति पर्यवसितार्थः । तेन गमनं स्पन्दत्वादित्यादौ गमनत्वाद्यभावप्रतियोगितावच्छेदकैर्गमनत्वत्वादिभिः कालिकसम्बन्धेन स्पन्दत्वादिहेतुव्यापकत्वेपि नातिव्याप्तिः । न वा वाच्यत्वादिभेदप्रतियोगितावच्छेदकमादायैव केवलान्वयिस्थले लक्षणसम्भवे प्रतियोग्यवृत्तिश्चेत्यादिग्रन्थावतारानुपपत्तिः । न च धूमत्वेन धूमाभावस्यैव वह्नित्वेन धूमवद्वृत्तेरभावत्वादयःपिण्डान्यत्वाभावस्य चायःपिण्डान्यत्वनिरूपितस्वरूपसम्बन्धेन भेदत्वावच्छिन्नाभावत्वात्तत्प्रतियोगितावच्छेदकीभूतवह्नित्वभेदत्वादिभिर्वह्नित्वाद्यवच्छिन्नं प्रति व्यापकतावच्छेदात् धूमवान्वह्नेरित्यादावतिव्याप्तिरिति वाच्यम। यत्प्रतियोगिताकाभावे स्वा-

वन्तः साध्याभाववद्वृत्तित्वाभावास्तद्वत्त्वं व्याप्तिः येन सम्बन्धेन हेतुता तेनैव वृत्तिमत्त्वं बोध्यम् तेन व्यधिकरणधर्मावच्छिन्नवह्न्यभाववति संयोगेन या वृत्तिस्तदभावस्य जात्यादौ वर्तमा-

---

वच्छेदकावच्छिन्नवद्वृत्तित्वव्यधिकरणधर्मावच्छिन्नाभावभिन्नत्वोभयाभावस्तादृशप्रतियोगिताया एवावच्छेदकधर्मस्य लक्षणघटकत्वादिति सङ्क्षेपः ॥ परे त्विति । साध्याभाववद्वृत्तित्वस्य घटत्वादिनाऽभावमादाय व्यभिचारिण्यतिव्याप्तिरतो यावन्त इत्युक्तम् । तादृशवृत्तित्वाभाववत्त्वमत्र दैशिकविशेषणतया ग्राह्यम् । तेन निर्धूमवृत्तित्वादिसामान्याभावस्यापि कालिकादिसम्बन्धेन वह्न्यादिवृत्तित्वाद्यवत्त्वोपादानेपि नातिव्याप्तितादस्थ्यम् । वह्निमान् धूमाद्वाच्यं ज्ञेयत्वादित्यादावव्याप्तिः व्यधिकरणधर्मावच्छिन्नसाध्याभाववत्संयुक्तत्वत्वादिसमनियतप्रतियोगिताकस्य संयुक्तत्वादिसामान्याभावस्य हेतावसत्त्वात् अतो वृत्तिमद्वृत्तयः इत्युक्तम् । तदनुक्तावसम्भवस्तु नास्ति तादात्म्यसम्बन्धेन सद्धेतावेव निरुक्तलक्षणसङ्गमनात्। व्यधिकरणधर्मावच्छिन्नसाध्याभाववत्तादात्म्यप्रतियोगिकस्य व्यधिकरणधर्मावच्छिन्नाभावस्यैव वस्तुगत्या तादृशवृत्तित्वत्वव्यापकप्रतियोगिताकतया तथाविधयावद्भावस्यैव हेतौ सत्त्वादिति ध्येयम्। येन सम्बन्धेन हेतुता वृत्तिमद्वृत्तय इत्यत्रापि वृत्तिमत्त्वं तेन बोध्यमिति पाठः । तदभावस्येति । तत्सामान्याभावस्येत्यर्थः । जात्यादाविति । समवेतत्वघटितजातित्वोक्त्या सम्बन्धान्तरेण यो वृत्तिमान्तद्वृत्तित्वमुपदर्शितम् । न क्षतिः नाव्याप्तिः । हेतुताघटकसम्बन्धेन यो वृत्तिमान् तद्वृत्तित्वेन तादृशाभावस्य यावदनन्तर्गतत्वादिति भावः । अत्र वृत्तिमद्वृत्तिता दैशिकविशेषणतया ग्राह्या । तेन वाच्यं द्रव्यत्वादित्यादौ व्यधिकरणधर्मावच्छिन्नवाच्यत्वाभाववत्समवेतत्वसमनियतप्रतियोगिताकस्य समवेतत्वसामान्याभावस्य हेतुताघटकसमवायसम्बन्धेन वृत्तिमति स्पन्दादौ कालिक सम्बन्धेन वर्तमानस्य दैशिकविशेषणतया द्रव्यत्वादिहेतावसत्त्वेपि नाव्याप्तिः । इत्यत्रापीत्यपिकारेण साध्याभाववति वृत्तिरपि हेतुताघट-

नस्य धूमादावसत्त्वेऽपि न क्षतिः साध्याभावश्च पूर्ववदूह्यः

कसम्बन्धेन वाच्येति व्यञ्जितम् । तेन तत्तद्धूमावयवान्यत्वाभावस्यापि पूर्वोक्तद्वितीयरीत्या साध्याभावत्वेन तद्वति सम्बन्धसामान्येन या वृत्तिस्तदभावस्य तत्तद्धूमावयवासामानकालिकद्रव्यवृत्तेर्धूमहेतावसत्त्वेपि वह्निमान् धूमादित्यादौ नाव्याप्तिः । ननु साध्यप्रतियोगिकाभावमात्रस्य प्रवेशे धूमस्य तत्तद्वह्न्यभाववद्वृत्तित्वेन वह्निमान्धूमादित्यादावव्याप्तिः साध्यतावच्छेदकधर्मावच्छिन्नाभावप्रवेशे तु गगनादेः साध्यत्वे द्रव्यत्वादावतिव्याप्तिः साध्याभावस्य केवलान्वयित्वात् एवं घ्राणग्राह्यगुणवान् प्रमेयवान्वा पृथिवीत्वादित्यादावव्याप्तिः तादृशधर्मावच्छिन्नप्रतियोगित्वाप्रसिद्धेरत आह साध्याभावश्चेति । पूर्ववदिति । प्रकृतसाध्यव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताको व्याप्यवृत्तिश्चाभावोत्र साध्याभावपदार्थः इत्यर्थः । [यथाश्रुते साध्याभावत्वप्रवेशेनासङ्गत्यापत्तेः] अत्रापि येन सम्बन्धेन व्यापकता तत्सम्बन्धेन तादृशरूपावच्छिन्नाभावो ग्राह्यः । तेन ज्ञानवानात्मत्वादित्यादौ स्वरूपसम्बन्धेन साध्यव्यापकस्य प्रमेयत्वादेः कालिकसम्बन्धेनाभावाधिकरणसमवेतत्वाभावस्य स्पन्दत्वनिष्ठस्य हेतावसत्त्वेपि न क्षतिः । यत्तु साध्यतावच्छेदकसम्बन्धेन तादृशरूपावच्छिन्नाभावनां विवक्षणात् ज्ञानवानात्मत्वादित्यादावपि नाव्याप्तिः कालिकसम्बन्धेन प्रमेयत्वाभावस्य साध्यताघटकसमवायसम्बन्धानवच्छिन्नत्वात् इत्थं च व्यापकतापि तेनैव ग्राह्या तेन विषयतया साध्यव्यापकस्य ज्ञानादेः साध्यताघटकसमवायेनाभाववति हेतोर्वर्तमानत्वेपि द्रव्यं पृथिवीत्वादित्यादौ नाव्याप्तिः इति तन्नुच्छम् । वृत्त्यनियामकसम्बन्धेन साध्यतायां तदवच्छिन्नप्रतियोगित्वाप्रसिद्ध्या सद्धेतावव्याप्तेः । धूमवान् वह्नेरित्यादावतिव्याप्तेश्च । संयोगेन व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकाभावस्यैव व्याप्यवृत्तितया तद्वद्वृत्तित्वाभावस्यापि व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकस्यैव वृत्तिमद्वृत्तित्वात् । प्रमेयं द्रव्यत्वादित्यादौ तादात्म्येन साध्यतायामव्याप्तेश्च । साध्यताघटकतादात्म्येन प्रमेयत्वादेरेव सा-

तद्वदवृत्तित्वाभावोऽपि स्वव्यापकतत्तत्साध्याभाववदवृत्तित्वत्व-

---

ध्यव्यापकतावच्छेदकतया तत्सम्बन्धेन तदवच्छिन्नाभावाप्रसिद्धेरिति दिक्। वह्निमान् धूमादित्यादावव्याप्तिः वह्निसंयोगाभावस्यापि साध्यव्यापकतया तदभावात्मकवह्निसंयोगवदवृत्तित्वसामान्याभावस्य घटादिनिष्ठस्य हेतावसत्त्वादतो व्याप्यवृत्तित्वेनाभावो विशेषितः। वस्तुतो निरुक्तसाध्याभावाधिकरणत्वमवश्यं विशेषणतांविशेषसम्बन्धेन प्रवेश्यम्। अन्यथा द्रव्यं गुणादित्यादौ द्रव्यत्वाभावस्य कालिकसम्बन्धेनाधिकरणे गुणस्य वृत्तेर्द्रव्यत्वाभाववत्समवेतत्वसामान्याभावस्य ज्ञानादिनिष्ठस्य हेतावसत्त्वादव्याप्तेः। तथा च वह्निसंयो गाद्यात्मकाभावस्य तादृशसम्बन्धेनाधिकरणाप्रसिद्धेस्तमादायाव्याप्तिवारणार्थं न व्याप्यवृत्तिपदम्। परं तु रूपवान् पृथिवीत्वादित्यादौ नित्यत्वादिना रूपाद्यभावस्यापि तादृशधर्मावच्छिन्नाभावतया तद्वत्समवेतत्वाभावस्य नित्यरूपादिनिष्ठस्य हेतावसत्त्वादव्याप्तिरतो व्याप्यवृत्तिपदम्। न च तस्यापि व्याप्यवृत्तित्वादुक्तदोषतादवस्थ्यम्। यत्प्रतियोगिताकाभावे स्वावच्छेदकसम्बन्धेन स्वावच्छेदकावच्छिन्नवदवृत्तित्वस्य व्यधिकरणधर्मावच्छिन्नाभावभिन्नत्वस्य द्वयोर्व्यतिरेकः साध्यव्यापकतावच्छेदकरूपावच्छिन्नतादृशप्रतियोगिताकाभावस्योक्तत्वान्नित्यत्वादिना रूपाद्यभावस्य व्यधिकरणधर्मावच्छिन्नाभावभिन्नस्य स्वावच्छेदकीभूतनित्यत्वाद्यवच्छिन्नवदवृत्तित्वादेव व्युदासः। एतेन संयोगाभावत्वादेः साध्यवन्निष्ठाभावप्रतियोगितावच्छेदकतया प्रतियोगिवैयधिकरण्याघटितसाध्यव्यापकतानवच्छेदकत्वेपि न व्याप्यवृत्तिपदवैयर्थ्यमिति ध्येयम्। ननु वह्निमान् धूमादित्यादावालोकाद्यवृत्तित्वादिनालोकावृत्तिसामान्याभावोपि साध्याभाववदवृत्तित्वाभावो यावदन्तर्गतः संयोगादिसम्बन्धेन वह्निसामान्याभाववदवृत्तित्वस्याप्यालोकावृत्तिमध्ये निवेशात् एवमिन्धनत्वावच्छिन्नवह्न्यभावाधिकरणीभूतमहानसवृत्तित्वादेर्महानसवृत्तित्वत्वादिना योऽभावः सोपि साध्याभाववदवृत्तित्वाभावो यावदन्तर्गतस्तयोर्धूमादावसत्त्वादसम्भव इत्यत आह- तद्वदवृत्तित्वाभावोपीति। मिश्रलक्षण इवात्रापि तत्तत्साध्याभाववदवृत्तित्वत्वव्यापकव्यासज्यवृत्तिधर्मानवच्छिन्नप्रतियोगि-

व्यापकप्रतियोगिताकः तत्तत्साध्याभाववद्वृत्तित्वत्वातिरिक्तेन समानाधिकरणेन वृत्तित्ववृत्तिना वा धर्मेणानवच्छिन्नप्रतियो-

---

ताकत्वप्रवेशे आलोकावृत्तित्वाद्यवच्छिन्नप्रतियोगिताकाभावस्य हेतावसत्त्वाद्वह्निमान् धूमादित्यत्राव्याप्तिरतोन्यथा व्याचष्टे स्वव्यापकेति। स्वं प्रतियोगितातद्व्यापकीभूतं यत्तत्तत्साध्याभाववद्वृत्तित्वत्वं तद्व्यापकप्रतियोगिताकत्वमित्यर्थः। व्यधिकरणधर्मावच्छिन्नसाधारणसाध्याभाववद्वृत्तित्वत्वव्यापकप्रतियोगिताकस्य व्यधिकरणधर्मावच्छिन्नाभावस्यैव वृत्तिमद्वृत्तित्वाद्व्यभिचारिण्यतिव्याप्तिरत उक्तं तत्तदिति। तथा च निर्धूमवृत्तित्वाभावस्यैव स्वव्यापकतत्तत्साध्याभाववद्वृत्तित्वत्वव्यापकप्रतियोगिताकतया तस्य वह्नावसत्त्वान्नातिव्याप्तिरिति भावः। स्वनिष्ठवृत्तित्वत्वेन वृत्तित्वसामान्याभावस्य व्यधिकरणधर्मावच्छिन्नसाध्याभाववद्वृत्तित्वत्वसमनियतप्रतियोगिताकस्य हेत्वन्तरवृत्तेः स्वस्मिन्नसत्त्वात् सद्धेतुमात्रेऽसम्भवापत्तेः कल्पान्तरमाह तत्तदिति। समानाधिकरणधर्मानवच्छिन्नप्रतियोगिताकस्य यावद्भावस्यैव व्यभिचारिण्यतिप्रसञ्जकत्वादतिरिक्तान्तम् तत्रापि निर्धूमवृत्तित्वत्वस्यापि सामान्यतः साध्याभाववद्वृत्तितात्वातिरिक्तसमानाधिकरणधर्मतया तदवच्छिन्नसामान्याभावमादायातिव्याप्तिवारणायोगात् तत्तदित्युक्तम्। नन्वेवमपि व्यधिकरणधर्मावच्छिन्नद्रव्यत्वाभाववद्वृत्तित्वत्वेन घटवृत्तित्वजातित्वान्यतराभावं घटावृत्तेर्वाभावमादाय द्रव्यं पृथिवीत्वादित्यादावव्याप्तिः। हेतुतावच्छेदकसम्बन्धावच्छिन्नवृत्तित्वभिन्नावृत्तित्वेनापि प्रतियोगिताया विशेषणीयत्वात्। अत एव तत्तत्साध्याभाववद्वृत्तित्वत्वावच्छिन्नाभावा इत्युक्तौ वाच्यं ज्ञेयत्वादित्यादावव्याप्तिः साध्याभाववद्वृत्तित्वत्वावच्छिन्नं यद्धेतुतावच्छेदकसम्बन्धावच्छिन्नवृत्तित्वभिन्नावृत्तिप्रतियोगित्वं तादृशप्रतियोगिताकस्य वृत्तिमद्वृत्त्यभावस्याप्रसिद्धत्वादतो निषेधद्वयगर्भता। तेन घटत्वादिना तादृशवृत्तित्वाभावमादायैव लक्षणसङ्गतिः। केचित्तु यद्यपि तत्तत्साध्याभाववद्वृत्तित्वत्वावच्छिन्ना यावन्तोऽभावा इत्येव लाघवाद्वक्तुमुचितं तथापि वाच्यं

प्रमेयादित्यादौ तादात्म्येन हेतौ जगत एव साध्याभाववत्तादात्म्यतया तादृशतादात्म्यत्वावच्छिन्नाभावाप्रसिद्ध्याव्याप्तिरतो निषेधद्वयगर्भता इत्थं च विरुद्धघटत्वपटत्वाभ्यामेव तादृशवृत्तित्वाभावः सुलभ इति प्राहुः । यत्तु वृत्तित्वत्वमपेक्ष्य गुरोर्वाच्यत्वाभाववद्वृत्तित्वत्वस्य प्रतियोगितानवच्छेदकतया केवलान्वयिन्यव्याप्तिभिया तत्तत्साध्याभाववद्वृत्तित्वत्वावच्छिन्नाभावा नोक्ता इति तत्तुच्छम् । गुरुधर्मस्य प्रतियोगितावच्छेदकत्वमादायैव लक्षणकरणात् । अन्यथैतत्कल्पे वृत्तिमद्वृत्तिपदवैयर्थ्यापत्तेः । वृत्तित्वत्वमात्रस्यैव तत्तत्साध्याभाववद्वृत्तित्वत्वातिरिक्तसमानाधिकरणधर्मतयैव तदवच्छिन्नाभावमादायाव्याप्त्यभावात् । किं चैवं गुरुधर्मस्य प्रतियोगितानवच्छेदकत्वे तद्घटभिन्नं द्रव्यत्वादित्यादावतिव्याप्तिरपि स्यात् । तद्घटवृत्तित्वत्वापेक्षया गुरुत्वेन तद्घटभेदाभाववद्वृत्तित्वत्वावच्छिन्नाभावाप्रसिद्धेः । तद्घटवृत्तित्वत्वस्य साध्याभाववद्वृत्तित्वत्वातिरिक्तसमानाधिकरणधर्मतया तदवच्छिन्नाभावस्य लक्षणाघटकत्वात् । एवं स्नेहशून्यं द्रव्यत्वादित्यादौ स्नेहशून्यत्वाभाववद्वृत्तित्वत्वादेर्जलवृत्तित्वत्वापेक्षया गुरुत्वेन तदवच्छिन्नाभावाप्रसिद्ध्यातिव्याप्तिर्द्रष्टव्येति दिक् । यस्य कस्य चित्सामानाधिकरण्यमव्यावर्तकमतस्तत्तत्प्रतियोगितासामानाधिकरण्यनिवेशापेक्षया लाघवमनुसृत्याह वृत्तित्ववृत्तिना वेति। [तत्तत्साध्याभाववद्वृत्तितात्वातिरिक्तेनेति पूर्वेणान्वयः। तथा च तत्तत्साध्याभाववद्वृत्तित्वत्वातिरिक्तवृत्तित्ववृत्तिधर्मानवच्छिन्नेत्यर्थः] साध्याभाववद्वृत्तित्ववृत्तिना वेति पाठे साध्याभाववत्पदं सम्पातायातम् । यद्यपि वृत्तित्ववृत्तिधर्मानवच्छिन्नप्रतियोगिताकस्य धूमत्वादिसामान्याभावस्य घटाद्यन्यत्वाभावस्य वा हेतावसत्त्वाद्वह्निमान् धूमादित्यादौ सर्वत्रासम्भवः तादृशधर्मानवच्छिन्नवृत्तित्वनिष्ठप्रतियोगिताकाभावविवक्षणेपि घटभेदत्वेन घटभेदनिर्वह्निवृत्तित्वान्यतराभावस्य तादृशस्य हेतावसत्त्वात् तथापि पूर्ववदत्रापि कल्पे [हेतुतावच्छेदकसम्बन्धावच्छिन्न] वृत्तित्वभिन्नावृत्तित्वेन प्रतियोगित्वं विशेषणीयमित्यदोषः। स्वन्यूनवृत्तिधर्मानवच्छिन्नवृत्तित्वनिष्ठप्रतियोगिताया एव तादृशवृत्तित्वत्वातिरिक्तवृत्तित्वनिष्ठधर्मानवच्छिन्नत्वं विवक्षितमिति कोचित् । वृत्तित्ववृत्तिना धर्मेण वेति पाठे तु धूमत्वाद्यभावमादायासम्भ-

गिताको बोध्यः तेनालोकाद्यवृत्तित्वेन रूपेण यो वह्निसामान्याभाववद्वृत्तित्वस्य यश्चेन्धनत्वाद्यवच्छिन्नवह्न्यभावाधिकरणीभूतमहानसवृत्तित्वादेरभावस्तस्य धूमादौ स्वनिष्ठसाध्याभाववद्वृत्तित्वविरहस्य च हेत्वन्तरवृत्तेः स्वस्मिन्नसत्त्वेऽपि न क्ष-

---

वापत्तेरेव धर्मेण वेति कल्पान्तरोल्लेखः। तथा च धूमत्वत्वघटभेदत्वादेस्तादृशवृत्तित्वत्वातिरिक्तधर्मत्वादेव तदवच्छिन्नाभावमादाय नासम्भवः। वाच्यं प्रमेयादित्यादौ तु तादात्म्येन हेतौ विरुद्धघटत्वपटत्वाभ्यामवृत्तिगगनादिना वा वृत्तित्वाभावमादाय लक्षणसमन्वय इति ध्येयम्। स्वव्यापकतत्तत्साध्याभाववद्वृत्तित्वत्वेत्यस्य फलमाह आलोकाद्यवृत्तित्वेनेति। निर्वहनिवृत्तित्वस्येति प्रतियोगितायास्तत्तत्साध्याभाववद्वृत्तित्वत्वव्यापकत्वप्रदर्शनार्थम्। न च स्वव्यापकवृत्तित्वत्वकेत्युक्तावपि आलोकावृत्तित्वत्वावच्छिन्नाभावस्य वारणसम्भवात्प्रतियोगिताव्यापकत्वदिशि तत्तत्साध्याभाववत्त्वप्रवेशो व्यर्थ इति वाच्यम्। आलोकावृत्तित्वाभावमादायाव्याप्तिवारणार्थं तस्यावश्यकत्वात्स्वसमानाधिकरणात्यन्ताभावाप्रतियोगितत्तत्साध्याभाववद्वृत्तित्वत्ववन्निष्ठात्यन्ताभावाप्रतियोगिप्रतियोगिताकत्वरूपपर्यवसितार्थं तत्तत्साध्याभाववतः सकृदेव निविष्टतया वैयर्थ्यशङ्कानवकाशाच्चेति भावः। तत्तत्साध्याभाववद्वृत्तित्वत्वव्यापकप्रतियोगितेत्यस्य फलमाह यश्चेति। आदिना वाच्यत्वत्वादेः परिग्रहः। घटत्वादेः साध्यव्यापकतावच्छेदकत्वाभावात्तदवच्छिन्नवह्न्यभावस्य लक्षणाघटकत्वादत उक्तं इन्धनत्वादीति। इन्धनत्वावच्छिन्नाभावस्य महानसादावसत्त्वात्तमादाय क्षतिविरहादाह वह्न्यभावेति। तादृशवृत्तित्वत्वव्यापकप्रतियोगिताकेत्यस्यानुक्तावसम्भव एव स्यान्न तु वह्निमान्धूमादित्यत्राव्याप्तिमात्रम्। प्रमेयमात्रस्य हेतुतास्थले तत्तत्प्रमेयनिष्ठवृत्तित्वाभावस्य प्रमेयान्तरवृत्तेस्तत्तत्प्रमेये विरहादित्येवमावेदयितु सर्वसाधारण्येनाह स्वनिष्ठेति। स्वनिष्ठं यत्साध्याभाववद्वृत्तित्वं तत्सामान्याभावस्येत्यर्थः। अत्र घटत्वादौ साध्ये स्वीयविशेषणतया घटान्यत्वादिहेतावतिव्याप्तिः साधनस्यैव हेतुतावच्छेदकसम्बन्धेन वृत्तिमत्तया तन्निष्ठयावद्भावस्यैव हेतौ सत्त्वात् न

तिरित्याहुः । अन्ये तु वृत्तिमद्वृत्तयो यावन्तः साध्याभावसमुदायाधिकरणवृत्तित्वाभावास्तद्वत्त्वम् तादृशवृत्तित्वाभावश्च स्वव्या-

---

चैतस्य विरुद्धत्वात्साध्यसमानाधिकरणत्वेन हेतुविशेषणादेव नातिव्याप्तिरिति वाच्यम् तथापि द्रव्यत्वादौ साध्ये स्वीयसमवायादिना सत्त्वादिहेतावतिव्याप्तिः तादृशसम्बन्धेन हेतोरेव वृत्तिमत्तया तन्निष्ठयावद्भावस्य साध्यसामानाधिकरण्यस्य च हेतौ सत्त्वात् एवं महाकालान्यो घटादित्यादौ कालिकसम्बन्धेन हेतावतिव्याप्तिः वृत्तिमन्मात्रस्यैव हेतुताघटककालिकसम्बन्धेन महाकालवृत्तेस्तेन सम्बन्धेन तदवृत्तित्वाभावासंभवात् न च महाकालवृत्तित्वसामान्याभावस्यापि प्रलयावच्छेदेन पटादावेव वृत्तिमद्वृत्तित्वान्नातिव्याप्तिरिति वाच्यम् सामानाधिकरण्यस्य व्याप्यवृत्तित्वात् अन्यथा घटादिहेतावपि खण्डकालावच्छेदेन महाकालवृत्तित्वाभावसत्त्वादुक्तातिव्याप्तितादवस्थ्यात् एवं द्रव्यत्वादेः साध्यतायामवृत्तिगगनादिहेतावतिव्याप्तिर्विशिष्टसत्तायामव्याप्तिः द्रव्यान्यस्मिन् गुणादौ विशिष्टसत्ताया वृत्तिमत्त्वादिति वदन्तिार्यदि च वृत्तिमद्वृत्तयो यावन्तः साध्याभाववद्वृत्तित्वाभावास्तद्वत्स्वावच्छिन्नाधिकरणतासामान्यकधर्मवत्त्वं व्याप्तिरिति विवक्ष्यते तदा नैतेषामेकोपि दोषः पदमादधाति वृत्तिमद्वृत्तय इत्यादौ सर्वत्र दैशिकविशेषणतासम्बन्धेन वृत्तेर्निवेशनीयत्वात् अन्यथाधिकरणत्वमात्रस्यैव संयोगादिसम्बन्धेनावर्तमानत्वाद्भूमवान् वह्नेरित्यादावतिव्याप्तिरिति ध्येयम् ॥ [कूटपदप्रवेशेन सार्वभौमीयं लक्षणं परिष्कुर्वन्नाह] अन्ये त्विन्यादि । अत्र साध्याभावकूटाधिकरणवृत्तित्वस्य घटत्वादिनाभावमादाय व्यभिचारिण्यतिव्याप्तिरतो यावन्त इति । तथा च तादृशवृत्तित्वसामान्याभावस्य हेतावसत्त्वान्नातिप्रसङ्गः। न च तादृशवृत्तित्वत्वावच्छिन्नाभाववत्त्वोक्तावपि तादृशातिव्याप्तिव्युदासः सम्भवतीति वाच्यम् । तथापि तादृशवृत्तित्वत्वेन घटादेरभावमादायाव्याप्तितादवस्थ्यात्।तादृशवृत्तित्वत्वस्य गुरुतया तदवच्छिन्नाभावाप्रसिद्धेश्च। अत एव तादृशवृत्तित्वसामान्याभाववत्त्वमपि न विवक्षितम् केवलान्वयिन्यव्याप्तेः। वाच्यत्वाभावकूटवद्वृत्तित्वसामान्याभा-

वस्य हेतावसत्त्वादिति भावः। इत्थमपि वाच्यत्वाभावकूटवदवृत्तित्वसामान्याभावस्यैव यावदन्तर्गतस्य ज्ञेयत्वादिहेतावसत्त्वाद्वाच्यं ज्ञेयत्वादित्यादावव्याप्तिरतो वृत्तिमदवृत्तय इत्युक्तम्। तथा चैतस्य वृत्तिमदवृत्तित्वान्न तस्य निरुक्तयावदन्तर्गतत्वं किं तु घटत्वादिना तादृशवृत्तित्वाभावस्यैव स च ज्ञेयत्वादिहेतौ वर्तते इति नाव्याप्तिः। अत्र वृत्तिमत्त्वादिकं पूर्वलक्षणदिशावसेयम्। तेन न प्रागुक्तदोषः। ननु प्रलयभिन्नं गोत्वादित्यादौ कालिकसम्बन्धेन हेतावतिव्याप्तिः महाकालस्य कालिकसम्बन्धेन प्रलयान्यत्वाभावकूटवत्त्वेन तत्र हेतुताघटकसम्बन्धेन या वृत्तिस्तस्याः व्यधिकरणधर्मावच्छिन्नाभावस्यैव वृत्तिमदवृत्तित्वात् न च दैशिकविशेषणतया साध्याभावकूटवत्त्वं विवक्षितमतस्तादृशकूटवत्प्रलयवृत्तित्वसामान्याभावस्याधुनिकघटादिवृत्तेर्गोत्वहेतावसत्त्वान्नातिव्याप्तिरिति वाच्यम् घटत्वाभाववान् पटत्वादित्यादावभावसाध्यकेऽव्याप्तिप्रसङ्गात् साध्याभावकूटान्तर्गतस्य घटत्वस्वरूपसाध्याभावस्य विशेषणतयाधिकरणाप्रसिद्धेः दैशिकविशेषणतया वृत्तिमतामेव साध्याभावानां प्रवेशे तु घटत्वाभाववान् द्रव्यत्वादित्यादावतिव्याप्तिर्व्यधिकरणधर्मावच्छिन्नसाध्याभावस्यैव तत्र दैशिकविशेषणतया वृत्तिमत्तया तत्कूटवदवृत्तित्वस्यापि तादृशधर्मावच्छिन्नाभावस्यैव वृत्तिमदवृत्तित्वात् एवं कालिकसम्बन्धावच्छिन्नप्रतियोगिताके गगनत्वाभावस्याभावे साध्ये ज्ञानादिहेतावव्याप्तिः गगनत्वाद्यभावघटितकूटस्य दैशिकविशेषणतासम्बन्धेन यदधिकरणं तदवृत्तित्वसामान्याभावस्य वृत्तिमति शब्दादौ प्रसिद्धस्य ज्ञानादिहेतावभावादिति चेन्न। साध्यतावच्छेदसम्बन्धेन स्वप्रतियोगितावच्छेदकविशिष्टसाध्यवत्ताबुद्धेः संसर्गविधया प्रतिबन्धकतावच्छेदको यः सम्बन्धस्तेन वृत्तिमतः साध्याभावकूटस्य तादृशसम्बन्धेनैवाधिकरणत्वस्योक्तत्वात्संयोगाभाववान् प्रमेयत्वादित्यादौ च संयोगादिरूपसाध्याभावो न तादृशसम्बन्धेन वृत्तिमान् निरवच्छिन्नसमवायादिसम्बन्धेनैव संयोगादिनिश्चयस्य तद्विरोधित्वमतो न तत्राव्याप्तिः। केवलान्वयिनि तादृशाभावप्रतियोगितावच्छेदकविशिष्टसाध्यवत्ताबुद्धिर्भ्रमरूपैव सुलभा। सत्यां हि घटत्वेन वाच्यत्वं नास्तीति बुद्धौ जात्यपि घटत्वेन वाच्यत्वमस्तीति ज्ञानानुदयात्। घटत्वाद्यभाववत्ताबुद्धिं प्रति च समवा-

पकतादृशवृत्तित्वत्वव्यापकप्रतियोगिताको बोध्यः प्रयोजनञ्चो-

यादिना घटत्वादिमत्तानिश्चयस्य प्रतिबन्धकत्वादेवोक्ताव्याप्तयादेर्व्यु-दासः। तादृशवृत्तित्वत्वव्यापकप्रतियोगिताकत्वप्रवेश एव समुदायपदं सार्थकं भवत्यतः प्रागेव वृत्तित्वाभावं व्याचष्टे तादृशेति । स्वेति । स्वं प्रतियोगिता।तद्व्यापकं यत्साध्याभावकूटवद्वृत्तित्वत्वं तद्व्यापकप्र-तियोगिताकेत्यर्थः।प्रयोजनं चेति। वह्निमान् धूमादित्यत्रालोकावृत्ति-सामान्याभावस्य साध्याभावकूटवद्वृत्तित्वत्वव्यापकप्रतियोगिताक-स्य यावदन्तर्गतस्य हेतावसत्त्वाद्व्याप्तिरतः स्वव्यापकेति । तथा चालोकावृत्तित्वावच्छिन्नप्रतियोगित्वस्य व्यापकं न निर्वह्निवृत्तित्व-त्वं धूमत्वादौ व्यभिचारादित्ययमभावो न लक्षणघटक इति नाव्या-प्तिः । प्रतियोगितायां तादृशवृत्तित्वत्वव्यापकत्वानुक्तौ वाच्यं ज्ञेय-त्वादित्यादावव्याप्तिः प्रतियोगिताव्यापकसाध्याभावकूटवद्वृत्तित्व-त्वकस्य घटवृत्तित्वसामान्याभावस्य यावदन्तर्गतस्य हेतावसत्त्वात् तदुपादाने च तादृशाभावप्रतियोगित्वं न वाच्यत्वाभावकूटवद्वृत्ति-त्वत्वव्यापकं पटवृत्तित्वे व्यभिचारादित्येतस्य लक्षणाघटकत्वान्ना-व्याप्तिरिति भावः । अत्र च प्रतियोगित्वं स्वन्यूनवृत्तिधर्मानवच्छिन्नं ग्राह्यम् ।तेनेदं वाच्यं ज्ञेयत्वादित्यादौ घटवृत्तित्वत्वेन वृत्तित्वसामा-न्याभावस्य घटान्यत्वादिवृत्तेर्हेतावसत्त्वेपि नाव्याप्तिः । सार्वभौममते एकविशिष्टापरत्वमेवोभयत्वम् । तेन घटवृत्तित्वघटान्यवृत्तित्वोभया-भावमादाय नाव्याप्तिः । तादृशप्रतियोगितायास्तादृशवृत्तित्वत्वाव्या-पकत्वादिति ध्येयम् । स्वव्यापकत्वदलस्य पूर्वोक्तलक्षणोक्तैव व्यावृत्तिः तादृशवृत्तित्वत्वव्यापकत्वदलस्य तु न प्रागिव वह्निमान् धूमादित्यादावव्याप्तिः तत्र महानसादेः साध्याभावकूटानधिक-रणत्वात् किं तु केवलान्वयिस्थल एवेत्याशयेनाह उक्तप्रायमिति । न च स्वव्यापकेत्याद्यपेक्षया लाघवात् साध्याभावकूटवद्वृत्तित्वत्वा-वच्छिन्नाभावा एव यावन्तो निवेश्यन्तां तादृशवृत्तित्वत्वेन घटादेर-भावमादाय केवलान्वयिनि लक्षणसम्भवादिति वाच्यम् । वह्निमान् धूमाद्वाच्यं ज्ञेयत्वादित्यादौ सर्वत्रासम्भवापत्तेः।निर्वह्निवृत्तित्वत्वा-द्यपेक्षया गुरुत्वेन वह्न्यभावकूटवद्वृत्तित्वत्ववाच्यत्वाभावकूटवद्-वृत्तित्वत्वादेः प्रतियोगितानवच्छेदकत्वेन तदवच्छिन्नाभावाप्रसि-

क्तप्रायम् साध्याभावाधिकरणवृत्तित्वत्वव्यापकप्रतियोगिताकस्य व्यधिकरणधर्मावच्छिन्नस्यैवाभावस्य वृत्तिमद्वृत्तित्वाद्व्यभिचारिण्यतिव्याप्तिरतः समुदायेति साध्याभावश्च साध्यावच्छेदकसम्बन्धेन बोध्यः तेन समवायेन वह्नेः साध्यत्वे धूमे संयो-

---

क्षेपेति भावः। ननु वृत्तिमद्वृत्तयो यावन्तः साध्याभाववद्वृत्तित्वत्वव्यापकप्रतियोगिताकाभावास्तद्रूपमेवोच्यतां कृतं कूटपदनिवेशेनत्यत आह साध्याभावेति। साध्यप्रतियोगिकाभावेत्यर्थः। व्यधिकरणेति। साध्यप्रतियोगिकाभाववद्वृत्तित्वसामान्याभावस्य वृत्तिमात्रनिष्ठत्वादिति भावः। अत इति। तथा च धूमाभावकूटवद्वृत्तित्वत्वव्यापकप्रतियोगिताकस्य निर्धूमवृत्तित्वसामान्याभावस्यैव वह्न्यदिहेतावसत्त्वान्न व्यभिचारिण्यतिव्याप्तिः। न चैवं गगनाभाववान्वाच्यत्वादित्यादावव्याप्तिः गगनस्यापि साध्याभावतया तदधिकरणाप्रसिद्धेरिति वाच्यम्। वृत्तिमत्त्वेनापि साध्याभावस्य विवक्षणीयत्वात्। नव्यमते गगनस्य स्वाभावविरहत्वे मानाभावाच्चेति भावः। अत्र साध्याभावकूटवद्वृत्तित्वत्वव्यापकप्रतियोगितेत्यत्र कूटपदस्य फलं ग्रन्थकृतैवोक्तम् प्रतियोगिताव्यापकसाध्याभाववद्वृत्तित्वत्वमित्यत्र कूटपदस्य फलं तु नालोकावृत्तेरभावमादाय वह्निमान् धूमादित्यादावव्याप्तिवारणं तादृशाभावस्य स्वव्यापकवृत्तित्वत्वकप्रतियोगिताकेत्युक्तावपि वारणसम्भवाद्धूमत्वादावपि तदभावप्रतियोगितासत्त्वात् परं त्वालोकावृत्तिवृत्तित्वस्याभावमादायाव्याप्तिवारणमेव तत्फलमिति प्राञ्चः। तन्नोच्छम्। स्वाश्रयनिष्ठात्यन्ताभावाप्रतियोगिनः साध्याभावकूटवद्वृत्तित्वत्वस्याश्रये वर्तमानस्याभावस्याप्रतियोगिप्रतियोगिताकाभावेनैव तादृशवृत्तित्वाभावानां निवेशात्। तत्र च सकृदेव कूटपदस्यान्तर्भावेणोभयथा तन्निवेशे फलानुसन्धानस्य वायसदन्तानुसन्धानसमानत्वात्। अन्यथा साध्याभाववद्वृत्तित्वत्वव्यापकप्रतियोगिताकस्य व्यधिकरणधर्मावच्छिन्नाभावस्यापि प्रतियोगिताव्यापकसाध्याभावकूटवद्वृत्तित्वत्वत्वकत्वाभावादेव व्युदासात्तमादाय व्यभिचारिण्यतिव्याप्तिवारणार्थं ग्रन्थकृता कूटपदोपन्यासानौचित्यापत्तेरिति ध्येयम्। धूम इति।

गेन च तथात्वे वह्न्यवयवत्वे पर्वतवह्न्यवयवसंयोगे च पर्वतस्य वह्न्यवयवस्य च सम्बन्धद्वयावच्छिन्नवह्न्यभावद्वयानधिकरणत्वेऽपि

नातिव्याप्तिरिति परेणान्वयः। एवमग्रेपि। इदमापाततः साध्यतावच्छेदकसम्बन्धावच्छिन्नाभावप्रवेशेप्यत्रातिव्याप्तेर्दुरुद्धरत्वात्। साध्याभाववत्संयुक्तत्वसामान्याभावस्य कुत्रापि संयोगेन वृत्तिमत्यसत्त्वात्। वह्न्यवयवमात्रसंयुक्तवस्तुनोऽसत्त्वादिति ध्येयम्। ननु सम्बन्धविशेषाविवक्षायां प्रलयोत्पन्नकर्मतद्ध्वंसनित्यरूपादिकमेव वह्न्यभावकूटाधिकरणं वाच्यम् जन्यविभुमूर्तानां यथायोगं कालिकसंयोगादिकृतविशेषणताभिर्वह्निमत्त्वेन द्रव्यस्य वह्न्यभावकूटवत्त्वविरहाद्वह्न्यसमानकालीनस्य धूमसंयोगिद्रव्यस्यासत्त्वात् तथा च तत्र साध्याभावकूटवति हेतुतावच्छेदकसम्बन्धेन वृत्त्यप्रद्धैव न धूमेऽतिव्याप्तिः समवायेन धूमस्य हेतुत्वं तु विरुद्धत्वादेव तद्व्युदासस्संम्भवादत आह संयोगेन चेति। तथात्वे वह्नेः साध्यत्वे। तथा चात्र वह्न्यभावाधिकरणं यन्नित्यरूपादिकं तत्र हेतुतावच्छेदकसम्बन्धेन तदवृत्तित्वस्य रूपत्वादौ प्रसिद्धस्याभावो वर्तत एव वह्न्यवयवत्वे इत्यतिव्याप्तिः स्याद्यदि साध्यतावच्छेदकसम्बन्धेन साध्याभावस्य प्रवेशो न स्यादिति भावः। ननु समवायेन वह्न्यभावस्य वह्न्यवयवत्वासमानाधिकरणत्वात् अग्रे वक्ष्यमाणेन साध्याभावानां हेतुसामानाधिकरण्यविशेषणेनैव न तादृशाभावमन्तर्भाव्योक्तहेतावतिव्याप्तिरतो हेत्वन्तरमाह पर्वतेति। अत्र समवायेन वह्न्यभावस्य पर्वते संयोगेन वह्न्यभावस्य च वह्न्यवयवे हेतुसमानाधिकरणत्वात् तदुभयघटितसाध्याभावकूटाधिकरणं यन्नित्यरूपादिकं तत्समवेतत्वाभावस्य तादृशसंयोगहेतौ सत्त्वाद्धत्वतिव्याप्तिः। यत्तु संयोगेन वह्नेः साध्यत्वे वह्न्यवयवत्वस्य विरुद्धत्वात् हेतौ साध्यसामानाधिकरण्यविशेषणेनैव वारयितुं शक्यत्वात् पर्वतेत्यादि हेत्वन्तरमिति तत्तुच्छम्। वह्न्यवयवेपि वह्न्यन्तरस्य संयोगेन वृत्तौ विरोधविरहात्। तादात्म्येन साध्यत्वानुरोधात्सम्बन्धितामात्रस्यैव सामानाधिकरण्ये प्रवेश्यत्वादिदिति भावः। सम्बन्धद्वयेति। पर्वतस्य संयोगावच्छिन्नवह्न्यभावान-

नातिव्याप्तिः तथा स्वव्यापकीभूतसाध्यतावच्छेदकव्यापकप्रतियोगिताकोऽपि बोध्यः तेन यत्र पृथिवीत्वाभावादौ साध्ये तत्तद्विपक्षावृत्तित्वाद्यवच्छिन्नप्रतियोगिताकाभावकूटाधिकरणमप्रसिद्धं तत्र सद्धेतो पृथिवीत्वादौ साध्ये जातित्वाद्यवच्छिन्नाभाव-

---

धिकरणत्वात् बह्वयवयवस्य च समवायावच्छिन्नवह्न्यभावानधिकरणत्वादिति भावः । [नातिव्याप्तिरिति ।] प्रागुक्तरीत्या साध्याभावकूटवति नित्यरूपादौ हेतुतावच्छेदकसम्बन्धेन वृत्त्यप्रसिद्ध्या वह्निमान् धूमादित्यादावव्याप्तिर्वेत्यपि द्रष्टव्यम् । अत्र च वृत्त्यनियामकसम्बन्धस्य प्रतियोगितावच्छेदकत्वमत एवेदमुक्तम्। तेन धनी चैत्रत्वादित्यादौ स्वामित्वादिसम्बन्धेन साध्यतायां नाव्याप्तिः। साध्यतावच्छेदकसम्बन्धातिरिक्तसमानाधिकरणसंसर्गानवच्छिन्नप्रतियोगिताकसाध्याभावो ग्राह्य इति तु न युक्तम् । धनी द्रव्यत्वादित्यादौ व्यधिकरणसम्बन्धेन साध्याभावस्यैव तादृशत्वेनातिव्याप्तिप्रसङ्गात् । ननु साध्याभावो यदि साध्यतावच्छेदकरूपेण विवक्षितस्तदा प्रमेयं वाच्यत्वादित्यत्राव्याप्तिः प्रमेयत्वावच्छिन्नप्रतियोगित्वाप्रसिद्धेः न च साध्यतावच्छेदकातिरिक्तसमानाधिकरणधर्मानवच्छिन्नप्रतियोगिताकाभाव एवाभावो वक्तव्यः तथा चावृत्तिगगनादिना प्रमेयादेरभाव एव तत्र सुलभ इति वाच्यं घ्राणग्राह्यगुणवान् द्रव्यत्वादित्यादावतिव्याप्तिस्तादृशगुणत्वस्य ग्राह्यगन्धत्वापेक्षया गुरुत्वेन प्रतियोगितानवच्छेदकतया व्यधिकरणधर्मावच्छिन्नाभावानामेव तादृशसाध्याभावत्वादत आह तथेति।स्वं प्रतियोगिता । प्रतियोगिताव्यापकसाध्यतावच्छेदकेत्यस्य फलमाह पृथिवीत्वाभावादाविति । तत्तद्विपक्षो घटादिः । तथा च घटावृत्तित्वावच्छिन्नाभावघटितसाध्याभावकूटाधिकरणाप्रसिद्ध्या पृथिवीत्वाभाववज्जलत्वादित्यादौ नाव्याप्तिः । प्रतियोगितायाः पटत्वादावपि सत्त्वेन साध्यतावच्छेदकस्य तदव्यापकतया तादृशभावानां लक्षणाघटकत्वात् । प्रतियोगिभेदेपि एकधर्मावच्छिन्नप्रतियोगिताया एकत्वादिति भावः। सद्धेताविति । नाव्याप्तिरित्यन्वयः । वह्निमान्धूमादित्यत्र साध्यतावच्छेदकसम्बन्धेन विपक्षीभूततत्तज्जलावृत्तित्वावच्छिन्नाभावकूटस्य

वति सामान्यादावव्यर्तमाने द्रव्यत्वप्रकारकप्रमाविषयत्वादौ च नाव्याप्तिरतिव्याप्तिर्वा नाप्यभावत्वादिना अभावादौ साध्ये तत्तत्साध्याभावकूटाधिकरणाप्रसिद्ध्या अव्याप्तिरित्याहुः। तन्न।

गुणादौ द्रव्यं पृथिवीत्वादित्यादौ च विपक्षीभूतरूपरसादिप्रत्येकासमवेतसामान्याभावकूटस्य जात्यादावधिकरणतासत्त्वात्तदप्रसिद्धिनिबन्धनाव्याप्तेरुक्तस्थले विरहात्तदुभयं नोदाहृतम्। ननु यावतामैकाधिकरण्यं तावत्समुदायस्य विवक्षायां नोक्तव्याप्तिरत आह पृथिवीत्वादाविति। साधनसमानाधिकरणत्वेन साध्याभावस्य विशेषणीयत्वेन जातित्वावच्छिन्नाभावमादाय नातिव्याप्तिसम्भव इत्यादिपदमुपात्तम्। तथा च जलासमवेतत्वावच्छिन्नाभावस्य तेजोसमवेतत्वावच्छिन्नाभावस्य च साधनसमानाधिकरणत्वात् तदुभयघटितसाध्याभावकूटवति जात्यादौ प्रकृतहेतोरसत्त्वादतिव्याप्तिरिति भावः। द्रव्यत्वस्य समवायेन हेतुत्वे तादृशसाध्याभावकूटवति जात्यादौ हेतुतावच्छेदकसम्बन्धेन वृत्त्यप्रसिद्धयैव नातिव्याप्तिः स्यादत उक्तं द्रव्यत्वप्रकारकेति। सामान्यादौ स्वरूपसम्बन्धेन वृत्तिर्वाच्यत्वादावेव सुलभा। प्रमाविशेष्यत्वादाविति। नातिव्याप्तिरित्यन्वयः। तादृशप्रतीतिविषयत्वं भ्रममादाय जात्यादावपीत्यतः प्रमेति। अत्र प्रतियोगितान्यापकत्वं साध्यतावच्छेदकताघटकसम्बन्धेन ग्राह्यम्। तेन नित्यज्ञानवतस्तादात्म्येन साध्यतायामीश्वरत्वादिहेतौ घटान्यभेदस्य पटान्यभेदस्य च द्वयोर्विषयतासम्बन्धेन प्रतियोगिताव्यापकीभूतनित्यज्ञानात्मकसाध्यतावच्छेदकव्यापकप्रतियोगिताकयोरेकाधिकरणाप्रसिद्धावपि नाव्याप्तिः। न वा तादृश एव साध्ये द्रव्यत्वप्रकारकप्रमाविशेष्यत्वादित्यत्र पृथिव्यादौ साधनसमानाधिकरणस्य पृथिव्यादिनवद्रव्याणां प्रत्येकभिन्नद्रव्यभेदस्य कूटवति गुणादौ हेतोरसत्त्वेप्यतिव्याप्तिः। न चैवं वह्निधूमोयभवान् धूमादित्यत्राव्याप्तिः प्रतियोगितामात्रस्यैव प्रत्येकपर्यवसितत्वेन तां प्रति पर्याप्त्याख्यसाध्यतावच्छेदकताघटकसम्बन्धेन कस्याप्यव्यापकतया निरुक्तसाध्याभावाप्रसिद्धेरिति वाच्यम्। एकविशिष्टापरत्वानतिरिक्तस्योभयत्वस्य सार्वभौममते पर्याप्तिभिन्नसम्बन्धेनैव साध्यतावच्छेदकत्वादिति भावः। सा-

ध्यतावच्छेदकव्यापिका प्रतियोगितेत्यस्य फलमाह नापीतिघटत्वाभावत्वेन साध्यत्वे साध्याभावकूटवत्त्वं घटस्यैव सुलभमत उक्तम् अभावत्वादिनेति। आदिना प्रमेयत्वादेरुपग्रहः। तथा चाभाववान् प्रमेयवान्वा घटत्वादित्यत्र साधनसमानाधिकरणस्य तत्तद्घटान्यत्वाभावकूटस्याधिकरणाप्रसिद्ध्याव्याप्तिः स्यादतः साध्यतावच्छेदकव्यापकेति। साध्यतावच्छेदकीभूताभावत्वादिव्यापकप्रतियोगिताकत्वाभावादेव तत्तद्घटान्यत्वाभावानां लक्षणाघटकत्वादिति भावः। अत्र स्वन्यूनवृत्तिधर्मानवच्छिन्नाया एव प्रतियोगितायाः साध्यतावच्छेदकसमनैयत्यं वाच्यम्। तेन घटत्वाभावत्वेन पटत्वाभाववेन चाभावप्रमेयसामान्याभावयोरेकाधिकरणाप्रसिद्धावपि नोक्तव्याप्तिरतादवस्थ्यम्। घटत्वाभावत्वादेः प्रमेयसामान्यनिष्ठप्रतियोगितान्यूनवृत्तित्वेन तादृशप्रतियोगिताकाभावानां लक्षणाघटकत्वात्। एवं साध्यसामानाधिकरण्यमपि हेतौ वक्तव्यम्। तेन सत्तावत्समवेतत्वत्वसमनियतप्रतियोगिताकस्य व्याधिकरणधर्मावच्छिन्नाभावस्यैव वृत्तिमद्वृत्तित्वात्तादृशस्य च यावत एव हेतौ सत्त्वेपि जात्यभाववान् द्रव्यत्वादित्यादिविरुद्धहेतौ नातिव्याप्तिरिति ध्येयम्॥ यद्यपि घटवृत्तित्वविशिष्टवाच्यत्वाभावस्य घटान्यवृत्तित्वविशिष्टवाच्यत्वाभावस्य च द्वयोरेकाधिकरणाप्रसिद्ध्या वाच्यं ज्ञेयत्वादित्यादावव्याप्तिः न च घटादिवृत्तित्वविशिष्टवाच्यत्वत्वं न प्रतियोगितावच्छेदकम् तदपेक्षया लाघवाद्घटादिवृत्तित्वविशिष्टत्वस्यैव तथात्वात् तादृशवैशिष्ट्यावच्छिन्नाभावानां साध्यतावच्छेदकसमव्याप्तप्रतियोगिताकत्वाभावादेव व्युदासः घटवृत्तित्वविशिष्टवस्तुमात्र एव तत्प्रतियोगितासत्त्वादिति वाच्यम् वाच्यत्वनिष्ठाधेयताविशेषेण घटावच्छिन्नप्रतियोगिताकाभावस्य तादृशसम्बन्धेन घटान्यावच्छिन्नप्रतियोगिकाभावस्य च द्वयोस्तथाप्येकाधिकरणाप्रसिद्ध्याव्याप्तितादवस्थ्यात् न चाधेयताविशेषेण घटादेः प्रतियोगितावच्छेदकत्वे मानाभावः तस्य त्वयाप्यवश्यं वाच्यत्वात् अन्यथा घटवृत्तित्वविशिष्टवाच्यत्ववान् द्रव्यत्वादित्यादावतिव्याप्त्यापत्तेः गुरुतरतादृशवाच्यत्वत्वावच्छिन्नाभावस्याप्रसिद्ध्या घटवृत्तित्वविशिष्टत्वावच्छिन्नाभावस्य साध्यतावच्छेदकसमनियतप्रतियोगिताकत्वाभावेन व्यधिकरणधर्मावच्छिन्नस्यैव घटवृत्तित्वविशिष्टवा-

द्रव्यत्वपृथिवीत्वोभयवान् द्रव्यत्वादिरादौ तदुभयान्यतरत्वावच्छिन्नाभाववति द्रव्यत्वादेरवृत्तेरतिव्याप्तेः। अपि च इदं पृथिव्यन्यद्रव्यत्ववत् द्रव्यत्वादिरादौ द्रव्यत्वत्वाद्यवच्छिन्नाभावकूटाधिकरणगुणाद्यवृत्तित्वस्य द्रव्यत्वे सत्त्वादतिव्याप्तेः। द्रव्यत्वत्वाद्यवच्छिन्नप्रतियोगितायाः पृथिव्यन्यत्वविशिष्टद्रव्यत्वत्वसमव्याप्तत्वात्। किञ्च रूपाभावसाध्यके सद्धेतौ साध्याभावसमुदायनिवि-

---

व्यत्वाभावस्य लक्षणघटकत्वात् तथापि दूषणमिदं स्फुटतयोपेक्ष्याह द्रव्यत्वेत्यादि॥ ननु सार्वभौमानां मते विरुद्धयोरुभयत्वस्यातिरिक्तायामपि समानाधिकरणयोरेकविशिष्टापरत्वमेवोभयत्वं तथा च पृथिवीत्वविशिष्टद्रव्यत्वत्वं द्रव्यत्वविशिष्टपृथिवीत्वत्वमेव साध्यतावच्छेदकं पर्यवसितामिति तत्समनियतप्रतियोगिताकत्वाभावादेतदुभयान्यतरत्वावच्छिन्नाभावमादाय नातिव्याप्तिः तन्प्रतियोगितायाः पृथिवीत्वेपि सत्त्वेन निरुक्तसाध्यतावच्छेदकस्य तदव्यापकत्वादत आह अपि चेति। उद्देश्यविधेयस्थले समानलिङ्गकत्वस्यातन्त्रत्वात् पृथिव्यामन्यत्वविशिष्टद्रव्यत्वस्य साध्यताभ्रमं निराकर्तुं पक्षमुल्लिखति इदमिति। पृथिवीति। पृथिव्यन्यत्वे सति द्रव्यान्यासमवेतसकलद्रव्यसमवेतवदित्यर्थः। नच सकलद्रव्यवृत्तित्वान्तर्भावेण द्रव्यत्वस्य साध्यत्वे द्रव्यान्यासमवेतत्वावच्छिन्नाभावस्य तादृशसाध्यतावच्छेदकसमनियतप्रतियोगिताकत्वाभावादगुरुतरसकलद्रव्यवृत्तित्वघटितद्रव्यत्वत्वावच्छिन्नात्यन्ताभावस्य चाप्रसिद्धत्वादग्रे द्रव्यत्वत्वावच्छिन्नाभावमादायातिव्याप्तेरसङ्गत्यापत्तिरिति वाच्यम्। द्रव्यत्वत्वादीत्यत्र द्रव्यत्वत्वपदेन द्रव्यमित्याकारकतदबुद्धिप्रकारत्वस्यैवाग्रे वक्तव्यत्वात्तस्य च द्रव्यान्यासमवेतत्वमपेक्ष्यापि लघुत्वेन प्रतियोगितावच्छेदकत्वसम्भवादिति भावः। द्रव्यत्वत्वादीत्यत्रादिना पृथिव्यन्यत्वविशिष्टद्रव्यत्वत्वस्य पृथिवीवृत्तित्वविशिष्टद्रव्यत्वत्वस्य च द्वयोरेवावच्छेदकयोः परिग्रहः॥ ननु साध्यतावच्छेदकान्यसमानाधिकरणधर्मानवच्छिन्नप्रतियोगिताकाभाव एव साध्यभावपदार्थो वाच्यः तथा च विशिष्टद्रव्यत्वस्य साध्यतायां द्रव्यत्वसामान्याभा-

ष्टसकलरूपव्यक्त्यधिकरणाप्रसिद्धिः । यावतामभावानामैकाधिकरण्यं तावतां समुदाये विवक्षितेऽपि इदंपृथिवीवृत्तिगुणशून्यं सत्तान्यपृथिवीसमवेतशून्यं वा वायुत्वात् रूपवदन्यत्वाद्वेत्यादावति-

---

वस्यातथात्वान्नातिव्याप्तिः गुरुधर्मस्य प्रतियोगितावच्छेदकत्वोपगमाच्च तादृप्येण साध्यतायामपि नातिव्याप्तिरत आह किं चेति । ननु विशिष्टस्यातिरिक्तत्वमते द्रव्यत्वादिसामान्याभावस्य विशिष्टसाध्यतावच्छेदकसमनियतप्रतियोगिताकत्वाभावादेव तमादाय नातिव्याप्तिरत आह किं चेतीति प्राञ्चः । सद्धेतौ वायुत्वादौ । अप्रसिद्धिरिति । कालस्य सकलरूपवत्त्वेऽपि साध्यवत्ताधीविरोधिताघटकसमवायसम्बन्धेन तदनधिकरणत्वादिति भावः ॥ शङ्कते यावतामिति । तथा च व्यधिकरणधर्मावच्छिन्नाभावैरैकाधिकरण्यापन्नस्य तद्रूपस्याधिकरणे वृत्तित्वप्रसिद्ध्यैव नाव्याप्तिरिति भावः । विवक्षितेपीत्यपिना तदविवक्षायामपि वक्ष्यमाणातिव्याप्तिः सूचिता । ननु यावतां मिथः सामानाधिकरण्यं तावत्समुदायो विवक्षितः किं वा यावतां साध्याभावानामभावान्तरेण सामानाधिकरण्यं तावत्समुदायोऽभिप्रेतः प्रथमे इदमिति । अत्रेदमिति पृथिव्याः विशेषणम् । न तु पक्षनिर्देशः । तथासति घटतद्वायुद्वित्वपटतद्वायुद्वित्वकुड्यतद्वायुद्वित्वादीनामेव तद्वायौ मिथः सामानाधिकरण्यापन्नसाध्याभावानामधिकरणे तद्वायौ वृत्तित्वादेव वायुत्वादिहेतावतिव्याप्त्यनुपपत्तेः । एतत्पृथिवीसमवेतप्रतियोगिकाभावस्य साध्यत्वे वायुत्वादेः सद्धेतुत्वात्समवेतत्वापेक्षया गुरुत्वेनैतत्पृथिवीसमवेतत्वावच्छिन्नाभावाप्रसिद्ध्यैव साध्यत्वायोगाद्गुणपदम् । नन्वेतत्पृथिवीवृत्तिगुणत्वावच्छिन्नाभावसाध्यकमपि वायुत्वादिकं सद्धेतुरेव प्रलये परमाणावुत्पत्तिकाले चावयविनि वायौ तत्सत्त्वात् अतः साध्यान्तरमाह सत्तान्येति । अत्र पृथिवीपदमेतत्पृथ्वीपरम् । अन्यथा प्रागुक्तद्वित्वादिव्यक्तीनां तद्वायौ मिथःसामानाधिकरण्यापन्नसाध्याभावतया वायुत्वादेस्तत्कूटाधिकरणीभूतवायुवृत्तित्वेनैवातिव्याप्त्यसम्भवापत्तेरिति ध्येयम् । अत्राप्येतत्पृथिवीसमवेतप्रतियोगिकाभावस्य केवलान्वयितया तत्साध्यकवायुत्वादेः सद्धेतुत्वात्समवेतत्वा-

व्याप्तिः । तत्र तादृशसाध्याभावस्तोमस्य नियमतो रूपादिघटितत्वेन तद्वति तद्धेतोरवृत्तेः । वस्तुतो निखिलानामेव रूपाणां तादृशाभावसहस्रसमानाधिकरणत्वात्समानाधिकरणयावद्भावोधकरणाप्रसिद्धिर्दुर्वारैव । किञ्च हेतुतावच्छेदकसम्बन्धेन या साध्याभाववति

पेक्षया गुरुत्वेनैतत्पृथिवीसमवेतत्वावच्छिन्नाभावस्य चाप्रसिद्ध्या साध्यत्वायोगात्सत्तान्यपदम् । न च सत्तान्यैतत्पृथिवीसमवेतत्वावच्छिन्नाभावोप्यप्रसिद्धः द्रव्यत्वत्वस्यैव तदवच्छेदकत्वादिति वाच्यम् । सकलद्रव्यवृत्तित्वादिघटितद्रव्यत्वत्वस्यैव तादृशसमवेतत्वापेक्षया गुरुत्वेनानवच्छेदकत्वात्सत्तान्यसमवेतत्वावच्छिन्नाभावस्याप्रसिद्धत्वात् । समवेतत्वावच्छिन्नाभावस्य साध्यत्वे समवेतमात्रस्यैव तदभावत्वेन मिथः सामानाधिकरण्यापन्नसमवेतकूटवति वायौ हेतोः सत्त्वादेव नातिव्याप्तिरतः पृथिवीपदम् । ननु वायुत्वस्योक्तसाध्यसामानाधिकरण्याभावादेव न तत्रातिव्याप्तिरतो हेत्वन्तरमाह रूपवदिति । अयं हेतुर्गुणादौ साध्यसमानाधिकरणः । रूपात्यन्ताभावस्य पृथिव्यामुत्पत्तिकालावच्छेदेन सत्त्वात्तत्रातिव्याप्त्यसम्भवाद्रूपवदन्यत्वानुधावनम् । रूपवद्भेदस्यापि तदानीं पृथिव्यामुपगमेत्वाह इत्यादाविति । आदिना वायुरूपान्यतरत्वादेः परिग्रहः ॥ तादृशेति । मिथः सामानाधिकरण्यापन्नेत्यर्थः ॥ द्वितीये त्वाह वस्तुत इति । तादृशाभावेति । व्यधिकरणधर्मावच्छिन्नसाध्याभावेत्यर्थः । सहस्रेति । अवच्छेदकभेदेनाभावभेदमभ्युपेत्योक्तम् । दुर्वारैवेति ॥ ननु यावतामेकव्यक्तिवृत्तित्वं तावत्कूटवत्त्वोक्त्या नाप्रसिद्धिः न वा प्रागुक्तातिव्याप्तिः किं च सत्तान्यैतत्पृथिवीसमवेतशून्यत्वाभावो द्रव्यत्वस्वरूप एव लाघवात् न तु सत्तान्यैतत्पृथिवीसमवेतमात्रं बहूनां तथात्वे गौरवादतः परस्परसामानाधिकरण्यापन्नतादृशद्रव्यत्वादिस्वरूपसाध्याभावस्तोमवति हेतोः सत्त्वादेव नातिव्याप्तिरिति यदि ब्रूयात्तदा दोषान्तरमाह किं चेति । यत्तु रूपसामान्याभावस्याभावोनुगतप्रतीतिबलादतिरिक्त एवेति तद्वति हेतोः सत्त्वासत्त्वाभ्यां नोक्तातिव्याप्त्यव्याप्त्योः सम्भव इत्यतः किंचेति । तच्चुच्छम् । इदानीमेवाभावाभावस्यातिरिक्तत्वमङ्गीकृत्य दोषनिरासे भूतत्वमूर्तत्वान्यतरत्वावच्छि-

वृत्तिस्तदभावो वक्तव्यः। अन्यथा धूमादावव्याप्तिः साध्यतावच्छेदकसम्बन्धेन साध्याभाववति कालादौ वृत्तिमन्मात्रस्यैव वृत्तेर्व्यभिचारिण्यतिप्रसङ्गो वा। तथा च सत्तादिसाध्यके संयोगेन समवायेन वा हेतावव्याप्तिः । साध्याभाववति तेन सम्बन्धेन वृत्तेरप्रसिद्धेः। साधनसमानाधिकरणत्वेन साध्याभावा विशेषणीया इति

भावाभावस्यातिरिक्तत्वादग्रे भूतत्वमूर्तत्वेत्यादिनातिव्याप्त्यभिधानस्य संदर्भविरोधापत्तेः। साध्याभावकूटवदवृत्तित्वस्य संयोगसमवायादिप्रत्येकसम्बन्धेन प्रवेशमभिप्रेत्याह धूमादाविति। अव्याप्तिरिति। निर्वह्निसमवेतत्वावाच्छिन्नाभावस्य यावदन्तर्गतस्य धूमादावसत्त्वादिति भावः। सम्बन्धसामान्येन तादृशवृत्तित्वस्य प्रवेशमभिप्रेत्याह साध्यतेति। कालादाविवादिपदेन दिशः परिग्रहः। व्यभिचारिणि पृथिवी द्रव्यत्वादित्यादौ। ननु धूमवान्वह्नेरित्यादौ। तत्र हेतुतावच्छेदकसम्बन्धेन वृत्तित्वविवक्षायामप्यतिव्याप्तिर्ध्रौव्यात् धूमाभाववत्कालदिगादौ मूर्तमात्रस्यैव संयोगसम्बन्धेन वृत्तेः तत्सामान्याभावस्य हेतुतावटकसम्बन्धेन यो वृत्तिमान् तदवृत्तित्वेन लक्षणावटकत्वादिति ध्येयम्॥ सात्तादीत्यादिना समवेतादेः परिग्रहः ॥ शङ्कते साधनेति। तथा च सद्धेतुस्थले व्यधिकरणधर्मावच्छिन्नसाध्याभावस्यैव साधनसमानाधिकरणत्वात् तत्कूटवदवृत्तित्वस्यापि तादृशाभावमादायैव लक्षणसङ्गतिः। इत्थं च वृत्तिमदवृत्तिपदस्य सार्थक्यं व्यतिरेकिण्यपि सम्भवतीति द्रष्टव्यम्। यथा चैवं साध्यतावच्छेदके प्रतियोगिताव्यापकत्वदलस्य सार्थक्यं तथोपपादितं प्रागेव। यद्यपि हेतुसमानाधिकरणत्वेन साध्याभावानां निवेशे तादृशसाध्याभावकूटवदवृत्तित्वत्वे प्रतियोगिताव्यापकत्वस्योपादानं विफलं वह्निमान् धूमादित्यादावालोकावृत्तित्वावच्छिन्नाभावमादायाव्याप्तिप्रसङ्गस्य तादृशाभावे साधनसमानाधिकरणे साध्याभावकूटवदवृत्तित्वत्वव्यापकप्रतियोगिताकत्वाभावादेव व्युदासात् न चात्र कल्पे तादृशवृत्तित्वत्वस्य प्रतियोगिताव्यापकत्वं न देयमेवेति वाच्यम् तथा सति हेतुसमानाधिकरणसाध्याभावकूटवदवृत्तित्व-

चेद्विशेष्यन्ताम्। तथापि भूतत्वमूर्तत्वाद्योरन्यतरत्वेनाभावे साध्ये स्पर्शवदन्यत्वादावतिव्याप्तिः। तादृशसाध्याभावसमुदायवति पृथिव्या-

---

त्वव्यापकप्रतियोगिताकस्य द्रव्यवृत्तित्वसामान्याभावस्यैव स्पर्शवदन्यत्वहेतावसत्त्वादग्रे भूतत्वमूर्तत्वेत्यादिनातिव्याप्तेरसङ्गत्यापत्तेः तथापि वृत्तित्वालोकान्यत्वोभयत्वावच्छिन्नाभावस्यैव हेतुसमानाधिकरणसाध्याभावकूटवद्वृत्तित्वत्वव्यापकप्रतियोगिताकस्य वृत्तिमद्वृत्तेर्धूमहेतावसत्त्वेन तमादायाव्याप्तिवारकत्वादेव तस्य सार्थक्यम्। न च पर्वतवृत्तित्वपर्वतान्यवृत्तित्वोभयत्वावच्छिन्नाभावमादायाव्याप्तिवारणार्थं व्यासज्यवृत्तिधर्मानवच्छिन्नत्वेनैव प्रतियोगितावश्यं विशेषणीयेति तत एव वृत्तित्वालोकान्यत्वोभयाभावस्य व्युदासात्तादृशवृत्तितात्वे प्रतियोगिताव्यापकत्वस्योपादानं विफलमिति वाच्यम्। पर्वतवृत्तित्वपर्वतान्यवृत्तित्वोभयत्वावच्छिन्नाभाववारणायवृत्तित्वपर्याप्तव्यासज्यवृत्तिधर्मानवच्छिन्नत्वेनैव प्रतियोगितायाः वाच्यत्वात् तादृशप्रतियोगिताकत्वस्य च वृत्तित्वालोकान्यत्वोभयाभावेऽपि सत्त्वादिति ध्येयम्॥ भूतत्वमूर्तत्वान्यतरप्रतियोगिकाभावस्य केवलान्वयित्वात्तत्त्वेन साध्ये स्पर्शवदन्यत्वादिकं सद्धेतुरेवेत्यत उक्तम् अन्यतरत्वेनेति॥ तादृशेति। हेतुसमानाधिकरणो यो भूतत्वमूर्तत्वोभयघटितसाध्याभावस्तोमस्तद्वतीत्यर्थः। पृथिव्यादावित्यादिना जलतेजोनिलानां परिग्रहः। अत्र भूतत्वं विशेषगुणवत्त्वे सत्यात्मभिन्नत्वम्। न तु बहिरिन्द्रियग्राह्यजातीयविशेषगुणवत्त्वम्। मूर्तत्वं स्पर्शवन्मनोन्यतरत्वं जातिविशेषो वा। नत्ववच्छिन्नपरिमाणवत्त्वम्। तथा सति मनःपरिमाणशब्दयोरेव साधनसमानाधिकरणतादृशसाध्याभावयोरेकाधिकरणाप्रसिद्ध्यातिव्याप्तयसम्भवादिति द्रष्टव्यम्॥ ननु साधनाधिकरणयत्किञ्चिद्धर्मावच्छिन्नवृत्तिसाध्याभावकूटस्य निवेशान्नैष दोषः क्वचिदपि स्पर्शवद्भिन्ने भूतत्वमूर्तत्वोभयोरसत्त्वात्तदुभयान्यतरघटितसाध्याभावकूटत्वाकाशे मनसि च हेतोः सत्त्वात् वस्तुतः समनियताभावानामैक्यमते भूतत्वमूर्तत्वान्यतरत्वावच्छिन्नाभाव एव भूतत्वमनस्त्वान्यतरत्वावच्छिन्नस्य मूर्तत्वगगनत्वावच्छिन्नस्य चाभावः तथा च मनस्त्वगगनत्वयोरपि भूतत्वमूर्तत्वान्यतरत्वा-

दौ तस्यावृत्तेः । किञ्च महाकालान्यत्वादिसाध्यके व्यभिचारिणि कालिकविशेषणताविशेषेण हेतावतिव्याप्तिः । तादृशसाध्याभावसमुदायवति महाकाले तेन सम्बन्धेन वृत्तिमन्मात्रस्यैव वृत्तेः ।

वच्छिन्नाभावस्य साध्यस्याभावत्वात् हेतुसमानाधिकरणतदुभयघटितसाध्याभावकूटाधिकरणाप्रसिद्ध्या नातिव्याप्तिः अस्तु वा यावन्ति निरुक्तसाध्याभावत्वानि तावतां प्रत्येकावच्छिन्नस्य यदधिकरणं तदवृत्तित्वाभावा वृत्तिमदवृत्तयो यावन्तस्तद्वत्त्वमेव व्याप्तिः तथा च भूतत्वमूर्तत्वान्यतराभावाभावत्वावच्छिन्नस्याधिकरणे मनस्येव हेतोः सत्त्वान्नातिव्याप्तिरत आह किं चेति । ननु भूतत्वमूर्तत्वान्यतरत्वावच्छिन्नाभावाभावोऽनुगतव्यवहारादतिरिक्त एव न तु भूतत्वमूर्तत्वोभयस्वरूपः तथा च साधनसमानाधिकरणातादृशाभाववति गगने मनसि हेतोः सत्त्वान्नातिव्याप्तिरतः किं चेतीत्यपि वदन्ति । गुरुचरणास्तु ननु हेतुसमानाधिकरणा यावन्तः पदार्थाः साध्यावदवृत्तित्वव्यधिकरणधर्मावच्छिन्नाभावभिन्नत्वोभयाभाववन्तस्तावत्पदार्थकूटाधिकरणवृत्तित्वाभावा वृत्तिमदवृत्तयो यावन्तस्तद्वत्त्वं विवक्षितं तथा च हेतुसमानाधिकरणयोर्गगनत्वमनस्त्वयोरेव तादृशपदार्थयोरेकाधिकरणाप्रसिद्ध्या नातिव्याप्तिः निरुक्तोभयाभाववतां घटत्वपटत्वादीनामेकाधिकरणाप्रसिद्ध्या वह्निमान्धूमादित्यादावव्याप्तिरतो हेतुसामानाधिकरण्योपादानमित्यतः किं चेतीति प्राहुः। कालान्यत्वसाध्यकस्य कालिकसम्बन्धेन हेतोर्विरुद्धत्वादेव तत्र नातिव्याप्तिरत उक्तं महेति । तथा च महाकालान्यो घटादित्यादावित्यर्थः । वृत्तिमन्मात्रस्यैवेति । तथा च महाकालवृत्तित्वसामान्याभावस्य वृत्तिमदवृत्तित्वाभावाद्व्यधिकरणधर्मावच्छिन्नाभावस्य च यावत एव हेतौ सत्त्वादतिव्याप्तिरिति भावः । अत्र केचित् सार्वभौममते सामानाधिकरण्यस्य व्याप्यवृत्तित्वात् खण्डकालावच्छेदेन पटादावेव वृत्तिमति वर्तमानस्य माहाकालवृत्तित्वसामान्याभावस्य यावद्धेत्वधिकरणावच्छेदेन हेतावसत्त्वान्नातिव्याप्तिः वृत्तिमदवृत्तयो यावन्तस्तादृशवृत्तित्वाभावा यावद्धेत्वधिकरणावच्छेदेन तद्वत्त्वस्य विवक्षितत्वात् अत एवैतद्रूपभिन्नं गुणत्वादित्यादावे-

तद्रूपभिन्नसमवेतत्वसमनियतप्रतियोगिताकस्य व्यधिकरणधर्मावच्छिन्नाभावस्यैव वृत्तिमद्वृत्तित्वेपि नातिव्याप्तिः एतद्रूपावच्छेदेन गुणत्वादावेव वर्तमानस्यैतद्रूपभिन्नसमवेतत्वसामान्याभावस्य हेत्वधिकरणीभूतगुणान्तरावच्छेदेन हेतावसत्त्वादित्याहुः। तच्चिन्त्यम्। यत्तु वृत्तिमद्वृत्तय इत्यस्य वृत्तिमद्वृत्तित्वसाध्यावद्वृत्तित्वप्रतियोगिकत्वोभयानधिकरणत्वमर्थः तथा च महाकालवृत्तित्वसामान्याभावस्यापि साध्यवद्वृत्तित्वप्रतियोगिकत्वविरहेण निरुक्तोभयानधिकरणस्य हेतावसत्त्वात् महाकालान्यो घटादित्यादौ नातिव्याप्तिः न च महाकालवृत्तित्वत्वापेक्षया लघोः कालिकसम्बन्धावच्छिन्नवृत्तित्वत्वस्यैव महाकालवृत्तित्वाभावप्रतियोगितावच्छेदकतया महाकालवृत्तित्वसामान्याभावस्य न निरुक्तवृत्तिमद्वृत्तित्वम् वृत्तिमद्वृत्तेस्तस्य साध्यवद्वृत्तित्वप्रतियोगिकत्वादिति वाच्यम् यावन्ति कालिकसम्बन्धेन महाकालवृत्तित्वानि तावदन्यतमत्वावच्छिन्नाभावस्य तावद्धर्मिकयत्किञ्चिद्बुद्धिविशेष्यत्वावच्छिन्नाभावस्य वा निरुक्तोभयानधिकरणस्य हेतावसत्त्वेनातिव्याप्तिसम्भवात् कालिकसम्बन्धावच्छिन्नवृत्तित्वत्वमपेक्ष्य तावदन्यतमत्वलक्षणाखण्डभेदस्यैव लाघवेन प्रतियोगितावच्छेदकत्वौचित्यादिति तन्मन्दम्। तथापि नित्यज्ञानभिन्नं घटादित्यादौ विषयितासम्बन्धेन हेतावतिव्याप्तेर्वज्रलेपत्वात्। नित्यज्ञानविषयतासामान्याभावस्याप्रसिद्धत्वात्। व्यधिकरणधर्मावच्छिन्नतादृशविषयत्वाभावस्य यावत एव हेतौ सत्त्वात् । नव्यास्तु साधनसमानाधिकरणा व्याप्यवृत्तयो यावन्तः साध्याभावाः साध्यसामानाधिकरण्यापन्नतावत्कूटवद्वृत्तित्वाभावो विवक्षितः तथा च व्यभिचारिमात्र एव साध्यसामान्याभावघटितकूटस्य साध्यसामानाधिकरण्याप्रसिद्ध्या नातिव्याप्तिः यावन्तस्तादृशाः साध्याभावाः तत्कूटाधिकरणस्य वा साध्यवत्त्वं विवक्षितम् लाघवात् तादृशवृत्तित्वाभावस्य च वृत्तिमद्वृत्तित्वं यावत्त्वं वा नापेक्षितं वैयर्थ्यात् इत्थं च साधनसमानाधिकरणा यावन्तस्तादृशाः साध्याभावाः साध्याश्रयीभूततावत्कूटवद्वृत्तित्वमपि लक्षणं साधीय इति प्राहुः । वस्तुतः पूर्वलक्षण इवात्रापि वृत्तिमद्वृत्तयो यावन्तः साध्याभावकूटवद्वृत्तित्वाभावास्तद्वृत्त्यवच्छिन्नाधिकरणतासामान्यकधर्मवत्त्वमेव व्याप्तिर्वाच्या तत्र वृत्तिमद्वृत्तित्वं साध्याभाववद्वृत्तित्वं च दैशिकविशेषण-

एतेन साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताकव्याप्यवृत्तित्वसमानाधिकरणयावदभावाधिकरणवृत्तित्वाभावा यावन्तो वृत्तिमद्वृत्तयस्तद्वत्त्वं व्याप्तिः केवलान्वयिनः संयोगा-

---

तयैव वक्तव्यमतो न कोपि दोषः पदमादधातीत्यवधातव्यमिति दिक्॥ एतेनेति । महाकालान्यो घटादित्यादावतिव्याप्तिप्रसङ्गेनेत्यर्थः । परास्तमिति परेणान्वयः । अत्र वाच्यं ज्ञेयत्वात्सत्तावान्द्रव्यत्वादित्यादिनानाव्यक्तिवृत्तिसाध्यकसङ्केतौ तद्व्यक्तिवृत्तित्वविशिष्टसाध्याभावस्य तदन्यव्यक्तिवृत्तित्वविशिष्टसाध्याभावस्य च द्वयोः साधनसमानाधिकरणयोरेकाधिकरणाप्रसिद्ध्या साधनाधिकरणयत्किञ्चिद्व्यक्तिवृत्तिकूटवदवृत्तित्वसामान्याभावानां हेतावसत्त्वेनाव्याप्तिरतः प्रतियोगिकान्तं यावदभावविशेषणम्। विशिष्टसत्तावान् जातेरित्यादौ जातिसमानाधिकरणस्य साध्यीभूतसत्त्वव्यापकतावच्छेदकरूपावच्छिन्नाभावस्य व्यधिकरणधर्मावच्छिन्नाभावत्वनियमादवृत्तिमद्वृत्तेस्तत्कूटवदवृत्तित्वाभावस्य यावत एव हेतौ सत्त्वादतिव्याप्तिरतः साध्यतावच्छेदकावच्छिन्नेति । तथा च गुणान्यत्वाभावकर्मान्यत्वाभावयोरप्युक्तरूपावच्छिन्नप्रतियोगिताकत्वादुभयघटितकूटाधिकरणाप्रसिद्ध्यैव नातिव्याप्तिः । अत्रापि येन सम्बन्धेन व्यापकता तेनाभावो ग्राह्यः । तेन समवायावच्छिन्नवह्न्यभावघटितकूटवदवृत्तित्वाभावस्य वह्न्यवयवत्वादिनिष्ठस्य हेतावसत्त्वेपि वह्निमान् तत्पर्वतत्वादित्यादौ नाव्याप्तिः । न च विशेषणताविशेषेणैव साध्यव्यापकत्वं तेन सम्बन्धेन तादृशरूपावच्छिन्नाभावश्च ग्राह्यः । साध्यस्य गुणसामान्यस्याभाव इत्याद्युत्तरग्रन्थविरोधात् । गुणस्य दैशिकविशेषणतासम्बन्धेन गुणाव्यापकत्वात् । यत्तु साध्यतावच्छेदकसम्बन्धेनैव व्यापकत्वं तादृशरूपावच्छिन्नाभावं च निवेशयन्ति तत्तुच्छम् । वृत्त्यनियामकसम्बन्धेन साध्यतायां तदवच्छिन्नप्रतियोगित्वाप्रसिद्ध्याऽव्याप्तिप्रसङ्गात् । धूमवान्वह्नेरित्यादावतिव्याप्तेश्च । संयोगेन द्रव्यस्याव्याप्यवृत्तितया व्यधिकरणधर्मावच्छिन्नप्रतियोगितानामेव संयोगेन द्रव्याभावानां व्याप्यवृत्तित्वात् तत्कूटवदवृत्तित्वसामान्याभावस्य वृत्तिमत्यवृत्तेः। तादात्म्येन प्रमेयव्यापकताव-

द्यभावस्याभावाः संयोगादयो न व्याप्यवृत्तयः एवं साध्यस्य गुणसामान्यस्याभावो द्रव्यत्वाधिकरणे उत्पत्तिकालावच्छेदेन वर्तमानोऽपि न व्याप्यवृत्तेः उक्तरूपावच्छिन्नप्रतियोगिताकाः क्वचिदप्रसिद्धया-

---

च्छेदकं यत्प्रमेयत्वादि तेन सम्बन्धेन तदवच्छिन्नाभावाप्रसिद्ध्या तादात्म्येन प्रमेयसाध्यकसद्धेतावव्याप्तेरसकृदावेदितत्वाच्च । न च द्रव्यं घटादित्यादौ कालिकसम्बन्धेन हेतावतिव्याप्तिः साधनसमानाधिकरणस्य द्रव्यत्वाभावकूटस्य कालिकसम्बन्धेनाधिकरणमहाकाले हेतुतावच्छेदकसम्बन्धेन वृत्तिमन्मात्रस्यैव वृत्तेरिति वाच्यम् । दैशिकविशेषणतया तादृशयावदभावाधिकरणत्वस्य निवेशनीयत्वादिति भावः । तदृघटभिन्नं घटत्वादित्यादौ साध्यव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताकयावदभावाधिकरणीभूततदृघटवृत्तित्वस्य व्यधिकरणधर्मावच्छिन्नाभावो घटत्वेपीत्यत उक्तं यावन्त इति । न च दैशिकविशेषणतया तदृघटभिन्नत्वाभावस्याधिकरणाप्रसिद्धयैव नातिव्याप्तिः कथं यावत्त्वविशेषणमिति वाच्यम् । तथापि तदृघटान्यत्वप्रकारकप्रमाविशेष्यत्वाभावस्यापि यावदन्तर्गतस्य साध्याभावस्य तादृशसम्बन्धेन तदधिकरणीभूततदृघटवृत्तित्वस्य व्यधिकरणधर्मावच्छिन्नाभावस्य घटत्वहेतौ सत्त्वादतिव्याप्तिरतो यावन्त इति। वह्निसंयोगसामान्याभाववान् संयोगसामान्याभाववान् वा धूमादित्यादावव्याप्तिः साधनसमानाधिकरणस्य साध्यव्यापकतावच्छेदकीभूतसंयोगसामान्याभावत्वावच्छिन्नप्रतियोगिताकस्य वह्निसंयोगाद्यात्माभावकूटस्याधिकरणाप्रसिद्धेरतो व्याप्यवृत्तिपदमित्याह केवलेत्यादिना । केवलान्वयिन इत्यनेन साध्यव्यापकत्वमाविष्कृतम्। संयोगादित्यादिना वह्निसंयोगत्वावच्छिन्नाभावस्योपग्रहः । तेन प्राचां मते द्रव्ये संयोगसामान्याभावस्यासत्त्वेपि न क्षतिः । दैशिकाव्याप्यवृत्तिसाध्यके प्रयोजनमुक्ता कालिकाव्याप्यवृत्तिसाध्यके तदाह एवमिति। ननु तादृशरूपावच्छिन्नप्रतियोगिताकानां वास्तवाभावानामेव लक्षणघटकत्वात्संयोगाद्यात्मकाभावमादाय नाव्याप्तिरत उक्तम् एवमितीत्यपि केचित् । न व्याप्यवृत्तिरिति । तथा च गुणसामान्याभावस्य साधनसमानाधिकरणत्वेपि व्याप्यवृत्ति-

दिसम्पादकाः पुनरभावा न हेतुसमानाधिकरणाः उक्तसमुदायाधिकरणवृत्तित्वतदभाववृत्तिमत्त्वानि पूर्वोक्तरीत्या प्रसेतव्यानीत्यादिकमपास्तम्॥

त्वाभावादेव गुणवान् द्रव्यत्वादित्यादौ नाव्याप्तिः। अन्यथा गुणसामान्याभावस्यापि साधनसमानाधिकरणसाध्याभावतया तदघटितकूटाधिकरणसमवेतत्वसामान्याभावस्य वृत्तिमति नित्यैकत्वादौ प्रसिद्धस्य द्रव्यत्वहेतावसत्त्वादव्याप्तिरेव स्यादिति भावः। स्वसमानाधिकरणेत्यस्य व्यावृत्तिमाह उक्तरूपेति। साध्यव्यापकतावच्छेदकरूपावच्छिन्नेत्यर्थः। क्वचिदिति। वह्निमान् धूमादित्यादौ घटपटाद्यात्मकतत्तद्विपक्षावृत्तित्वावच्छिन्नाभावकूटस्यापि निरुक्ताभावतया तदधिकरणाप्रसिद्धिनिबन्धनाव्याप्तिवारणार्थमेव स्वसमानाधिकरणेत्युक्तमिति भावः। तदघटभिन्नं पटत्वादित्यादौ वाच्यं ज्ञेयत्वादित्यादौ च साध्यव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताकाभावकूटत्वत्वं तदघट एव प्रसिद्धमतस्तत्राव्याप्त्यसम्भवात् क्वचिदित्युक्तम्। अत्र च हेत्वधिकरणयत्किञ्चिद्व्यक्तौ दैशिकविशेषणतया वर्तमानत्वमेव हेतुसामानाधिकरण्यं बोध्यम्। तेन पृथिवी द्रव्यत्वप्रकारकप्रमाविषयत्वादित्यादौ जले तेजसि च साधनसमानाधिकरणस्य जलावृत्त्यभावस्य तेजोऽवृत्त्यभावस्य च निरुक्तरूपावच्छिन्नप्रतियोगिताकत्वात् तदुभयघटितकूटवज्जात्यादौ हेतोरवृत्तित्वेपि नातिव्याप्तिः हेत्वधिकरणजलादिप्रत्येकनिष्ठं यत्तादृशकूटं तदधिकरणजलादौ हेतोः सत्त्वादिति भावः। उक्तसमुदायेति। तादृशाभावकूटवदवृत्तित्वं हेतुतावच्छेदकसम्बन्धेन ग्राह्यम्। तेन द्रव्यभिन्नं सत्त्वादित्यादौ साधनसमानाधिकरणसाध्याभावकूटाधिकरणे माहकाले वृत्तिमन्मात्रस्यैव कालिकसम्बन्धेन वृत्तावपि नातिव्याप्तिः। तादृशवृत्तित्वाभावस्तादृशवृत्तित्वत्वसमनियतप्रतियोगिताको ग्राह्यः। तेन पर्वतवृत्तित्वादिसामान्याभावस्य वृत्तित्वालोकान्यत्वोभयत्वावच्छिन्नाभावस्य च हेतावसत्त्वेपि वह्निमान्धूमादित्यादौ वाच्यं ज्ञेयत्वादित्यादौ नासम्भवः। अधिकमभिहितं प्राक्। वृत्तिमद्वृत्तय इत्यत्रापि वृत्तिमत्त्वं हेतुतावच्छेदकसम्बन्धेनैव ग्राह्यम्। तेन

स्वात्। अन्यथा निर्विकल्पकादपि घटो नास्तीति प्रतीत्यापत्तेः। गवि शशशृङ्गं नास्तीतिप्रतीतेरप्रसिद्धेः। शशशृङ्गं नास्तीति च शशे शृङ्गाभाव इत्यर्थः॥

तद्विशिष्टेति। विशेषणतावच्छेदकविशिष्टज्ञानस्य विशिष्टवैशिष्ट्यप्रत्ययहेतुत्वात्। अभावप्रत्ययो हि घटत्वादिविशिष्टस्य घटादेः प्रतियोगित्वमवगाहमानो विशेषणस्यापि घटत्वादेस्तदवच्छेदकत्वमगाहते। न स्वातन्त्र्येण। घटो नास्तीत्येव प्रतीतेः। तदिहाभावप्रत्ययो यदि व्यधिकरणधर्मेण विशिष्टं प्रतियोगिनं

संयुक्तत्वसामान्याभावस्यापि तादृशस्य समवायेन वृत्तिमति जात्यादौ प्रसिद्धस्य हेतावसत्त्वेपि वह्निमान् धूमादित्यादौ नाव्याप्तिरित्यर्थः। साध्यवत्ताधीविरोधिताघटकसम्बन्धेन कूटाधिकरणतायाः पूर्वमुक्तायाः प्रकृतलक्षणाघटकत्वात्तन्नोक्तम्। इत्यादिकमित्यादिपदेन गुरोः प्रतियोगितावच्छेदकत्वमते तादृशवृत्तित्वत्वावच्छिन्नाभावावृत्तिमद्वृत्तयो यावन्तस्तद्वत्त्वमित्यादेः सूचनम्॥

अभाववुद्धौ प्रतियोगितावच्छेदकविशिष्टप्रतियोगिज्ञानत्वेन हेतुतायाः स्वयमनङ्गीकाराद्भावार्थमाह विशेषणेति॥ ननु घटत्वेन पटो नास्तीत्यादिबुद्धेः घटत्वादिविशिष्टवैशिष्ट्यावगाहित्वमेवासिद्धमत आह अभावेत्यादि॥ न स्वातन्त्र्येणेति। न घटत्वादेः प्रतियोगिवृत्तित्वमविषयीकृत्येर्थः।तद्धर्मावच्छिन्नप्रतियोगित्वसंसर्गकाभावप्रत्ययस्य तादृशसम्बन्धेन तद्धर्मविशिष्ट्यवैशिष्ट्यावगाहित्वनियमादिति भावः॥ ननु तद्घटत्वेन घटो नास्तीत्याकारकसमानाधिकरणधर्मावच्छिन्नाभावप्रत्यक्षे व्यभिचारान्नोक्तनियम इत्यत आह घटो नास्तीत्येवेति। तथा च विशेषधर्मेण सामान्याभावोप्यसिद्ध एवातद्घटत्वेन घटो नास्तीति प्रतीतेः घटे तद्घटत्वाभावमात्रावगाहित्वादतस्तत्र हेत्वभावादेव न व्यभिचारः।अन्यथा सामान्यरूपेण विशेषाभावस्यापि स्वीकारापत्तेर्वाच्यत्वेन घटो नास्तीत्यपि प्रत्ययप्रसङ्गादिति भावः॥ प्रकृते योजय-

नावगाहते नावगाहत एव तदा तस्यापि प्रतियोगितावच्छेदकत्वम्। अथावगाहते तर्हि भ्रम एवानच ततोऽर्थसिद्धिरिति भावः। यदि पुनरानुभविको लोकानां स्वरसवाही घटत्वेन पटो नास्तीत्यादिप्रत्ययो न तदा तादृशाभावनिवारणं गीर्वाणगुरूणामपि शक्यमिति मन्तव्यम्॥

ति तदिहेति। इह घटत्वेन पटो नास्तीत्यभिलापस्थले। तस्य व्यधिकरणधर्मस्य॥ अथावगाहत इति। व्यधिकरणधर्मेण विशिष्टं प्रतियोगिनमित्युक्तेनान्वयः॥ न च तत इति। प्रमाया एवार्थसाधकत्वादिति भावः। ननूक्तव्याप्तावप्रयोजकत्वाद्घटत्वादेः प्रतियोगिवृत्तित्वमनवगाह्यापि तदवच्छेदकत्वावगाहिप्रत्ययसम्भवाद्व्यधिकरणधर्मावच्छिन्नाभावः सेत्स्यतीत्यत आह यदि पुनरिति। स्वरसवाही यथार्थः। स च पटे घटत्वानवगाहन एव सम्भवतीति भावः। घटत्वेन पटो नास्तीत्यादिपदेन घटत्वेन द्रव्यं नास्ति द्रव्यत्वेन घटो नास्ति इत्याद्यनुभवस्योपग्रहः। तुल्ययुक्त्या तदवृत्तिधर्मेण तस्येव विशेषरूपेण सामान्यस्य सामान्यरूपेण च विशेषस्याभावे बाधकाभावादिति ध्येयम्। घटत्वेन घटो नास्तीतिपाठे घटत्वेनेत्यस्य घटत्वत्वविशिष्टेनेत्यर्थः। तेन तद्रूपेण प्रतियोग्यंशे घटत्ववत्तामनवगाह्य जातेः समानाधिकरणधर्मावच्छिन्नाभावप्रत्यक्ष एवोक्तनियमस्य व्यभिचारो दर्शितः। तादृशाभावेति। स्वसमनियतान्यधर्मावच्छिन्नप्रतियोगिताकाभाववारणमित्यर्थः। तेन सामान्यरूपेण विशेषस्य विशेषरूपेण च सामान्यस्याभावः संगृहीतः। यत्तु द्रव्यत्वेन घटो नास्तीतिप्रतीतेर्घटत्वाद्यवच्छिन्नाभावेनैवोपपत्तौ सामान्यरूपेण च विशेषाभावादौ मानाभाव इति तत् प्रागेव दूषितमिति। यदपि संयोगसंसर्गकघटत्वाद्यवच्छिन्नाभावत्वावच्छेदेन लाघवात्तादृशसम्बन्धेन घटत्वाद्यवच्छिन्नस्य विरोधित्वकल्पनात् संयोगेन घटादिमति घटत्वादिना पटाद्यभावस्यासम्भव इति कैश्चिदुक्तं तदपि मन्दम्। तावतापि गगनत्वादिना घटादेर्वाच्यत्वत्वादिना ज्ञेयत्वादेश्च व्यधिकरणधर्मावच्छिन्नाभावस्य दुर्वारत्वादिति। गगनादेरधिकरणस्य स्वरूपसंसर्गकवाच्यत्वत्वाद्यवच्छिन्नाभावस्य चाप्रसिद्ध्या तत्र विरोधस्य कल्पयितुमशक्यत्वादिति दिक्॥

चिन्तामणेः पूर्वपक्षग्रन्थः ॥

अथ साध्यासामानाधिकरण्यानधिकरणत्वे सति साधिकरणत्वं व्याप्तिः केवलान्वयिनि साध्यासामानाधिकण्यं निरधिकरणे आकाशादौ प्रसिद्धमिति चेन्न ।

शिरोमणिकृतदीधित्याः पूर्वपक्षग्रन्थः ॥

साध्येति । साध्यस्यासामानाधिकरण्यं येषु तेषामनधिकरणत्वम् । तदभाववत्त्वमिति यावत् । तस्मिन् सति साधिकरणत्वं तदवच्छिन्नाधिकरणताकत्वम् । सति सप्तम्यावच्छेदकत्वलाभात् ।

जागदीश्याः पूर्वपक्षग्रन्थः ॥

ननु साध्यासामानाधिकरण्यं न साध्यानधिकरणावृत्तित्वम् केवलान्वयिनीत्याद्युत्तरग्रन्थासङ्गतेः नापि साध्याधिकरणवृत्तित्वम् द्रव्यं सत्त्वादित्यादावतिव्याप्तेः साधिकरणपदवैयर्थ्याच्चेत्यतो व्याचष्टे साध्यस्येति ॥ साध्यासमानाधिकरणस्य गगनादेरधिकरणाप्रसिद्ध्या केवलान्वयिन्यव्याप्तेराह तदभाववत्त्वमिति ॥ तस्मिन् साध्यासमानाधिकरणपदार्थाभाववत्त्वे । साध्यासमानाधिकरणधूमत्वाद्यभावस्य धूमादिसद्धेतावसत्त्वादाह तदवच्छिन्नेति । साध्यवदवृत्तिपदार्थाभाववत्त्वावच्छिन्नेत्यर्थः ॥ अवच्छेदकत्वांशस्योदक्षरतां निरस्यति सतीति । साध्यवदवृत्तिपदार्थाभाववत्त्वे हेत्वधिकरणतावच्छेदकत्वं न तदनतिरिक्तवृत्तित्वम् वाच्यं ज्ञेयत्वादित्यादौ हेत्वधिकरणत्वाभावाप्रसिद्ध्या तदनतिरिक्तवृत्तित्वाप्रसि-

(१) पूर्वपक्षशेष इति नामोचितम् पूर्वस्य व्यधिकरणधर्मावच्छिन्नाभावप्रकरणमिति ।

तच्चेहान्यूनवृत्तित्वम् । एवञ्च साध्यवदवृत्तिसकलपदार्थाभाववत्त्वं यदधिकरणताया अन्यूनवृत्ति तत्त्वमिति तु फलितार्थः । यथासन्निवेशे अधिकरणत्वस्य न वैयर्थ्यम् । हेतुतावच्छेदकसम्बन्धलाभाय वा तत् । येन येन सम्बन्धेन यो यः साध्यवदवृत्तिः तेन तेन सम्बन्धेन तत्तदभावो बोध्यः । एतेन साध्यवदवृत्तित्वं यदि साध्यतावच्छेदकसम्बन्धेन विवक्षितं तदा समवायेन साध्यतायां सा-

---

ङ्केः वह्निमान् धूमादित्यादावव्याप्तेश्च वह्निमदवृत्तिपदार्थावरहत्वस्य धूमाधिकरणत्वाभाववत्ययःपिण्डे सत्त्वात् एवं धूमवान्वह्नेरित्यादावतिव्याप्तिरपीत्यत आह तच्चेति ॥ ननु धूमवदवृत्तिजलत्वाभावस्य वह्न्यधिकरणताव्यापकत्वात् धूमवान्वह्नेरित्यादावतिव्याप्तिरत आह एवं चेति । सकलेति । तथाच धूमवदवृत्तिसकलान्तर्गतायःपिण्डत्वाभावस्यैव वह्न्यधिकरणताव्यापकत्वविरहान्नातिव्याप्तिरिति भावः ॥ ननु तादृशाभाववत्त्वं यदन्यूनवृत्ति तत्त्वमित्यस्यैव सम्यक्त्वे अधिकरणताप्रवेशो व्यर्थ इत्यत आह यथेति । हेत्वधिकरणताव्यापकत्वे हेतुव्यापकत्वाप्रवेशान्न वैयर्थ्यमित्यर्थः ॥ नन्वेवमप्यनतिप्रयोजनकत्वमेवेत्यत आह हेतुतावच्छेदकेति । तत् अधिकरणत्वम् । अन्यथा हेतुमति कालादौ साध्यवदवृत्तिस्पन्दत्वादेः सत्त्वेन तदभावस्य हेतुव्यापकत्वानुपपत्तिरिति भावः॥ ननु कालः प्रमेयत्वादित्यादौ साध्यवदवृत्तिरवृत्तिरेव तथाच तदभावस्य हेतुव्यापकत्वात्तत्रेति व्याप्तिरत आह येन येनेत्यादि । तथाच कालत्ववति समवायादिसम्बन्धेनावर्तमानस्य घटत्वादेः समवायेनाभावस्य प्रमेयत्वाव्यापकत्वान्नोक्तदोषः ॥ एतेनेति । प्रत्युक्तमिति परेणान्वितम् । साध्यवदसमवेतस्येति । प्रमेयत्वादेरिति शेषः । साध्यवदवृत्तिपदार्थस्य यत्किञ्चित्सम्बन्धेनाभावप्रवेशे द्रव्यं सत्त्वादित्यादावतिव्याप्तिः द्रव्यासमवेतस्य गुणत्वादेरपि संयोगादिसम्बन्धेनाभावस्य सत्त्वव्यापकत्वादतः सम्बन्धसामान्येनैव साध्यवदवृत्तिपदार्थस्याभावो वाच्य इत्याशयेनाह । सकलतच्छून्याप्रसिद्धिरिति । तथाच द्रव्यं पृथिवीत्वादित्यादावव्याप्तिरिति भावः ।

ध्यवदसमवेतस्य सार्वत्रिकत्वात्सकलतच्छून्याप्रसिद्धिः अथ तद्भावोपि तेनैव सम्बन्धेन वाच्यः तदा जातिमान् प्रमेयत्वादित्यादावतिव्याप्तिः जातिमदसमवेतानां समवायेनाभावस्य केवलान्वयित्वात् अत एव न संयोगेन समवायेन वा इदं न जातिमज्जातित्वादित्यादौ साध्यवत्समवेताद्यप्रसिद्धेश्च नापि साधनतावच्छेदकसम्बन्धेन इदमेतद्रूपभिन्नं गुणत्वादित्यादावतिव्याप्तेः नापि विषयतया घटभिन्नं मेयत्वादित्यत्राप्यातिव्याप्तेः सविषयकमात्रस्यैव घटभिन्नविषयत्वात् घटनिर्विकल्पकेऽपि घटत्वादिभानात् नापि

तद्भावोपि साध्यवदवृत्तिपदार्थस्याभावोपि। तेनैव साध्यतावच्छेदकसम्बन्धेनैव । तथाच द्रव्यत्ववदसमवेतस्य समवायेनाभावो द्रव्यादावेव सुलभ इति नोक्तदोषः। केवलान्वयित्वादिति । तथाच सुतरां तस्य हेतुव्यापकत्वमिति भावः। अत एव उक्तातिव्याप्तेरेव। समवायेनेति । साध्यवदवृत्तित्वं तदवच्छिन्नाभावश्च समवायेनेत्यपि नेत्यर्थः। ननु हेतुनिरूपितसमवायेन साध्यवदवृत्तित्वादिकं वाच्यम् तथाच प्रमेयत्वसमवायाप्रसिद्धेरेव नोक्तातिव्याप्तिरत आह इदं न जातिमदिति। समवेतादीत्यादिना संयुक्तसंग्रहः।नापीति। साध्यवदवृत्तित्वं तदवच्छिन्नाभावश्च साधनतावच्छेदकसम्बन्धेनेत्यपि नेत्यर्थः। जात्यभाववति हेतुताघटकस्वरूपसम्बन्धेनावर्तमानस्य द्रव्यगुणान्यतरत्वादेस्तेन सम्बन्धेनाभावस्य हेतुव्यापकत्वादुक्ताव्याप्त्यसम्भवादाह एतद्रूपभिन्नमिति । एतद्रूपभिन्नासमवेतानां समवायेनाभावस्य केवलान्वयितया सुतरां गुणत्वव्यापकत्वादिति भावः। इत्यत्रापीत्यपिना तद्रूपभिन्नं गुणत्वादित्यस्य संग्रहःसविषयकमात्रस्येति। तथाच घटभिन्नाविषयकं निर्विषयकमेव । तस्य विषयतासम्बन्धेनाभावः प्रमेयत्वस्य व्यापक एवेति भावः। ननु घटभिन्नाविषयकस्य घटनिर्विकल्पकस्यैव विषयतासम्बन्धेनाभावो न प्रमेयत्वव्यापको घटे व्यभिचारादित्यत आह घटनिर्विकल्पकेपीति । इदमापाततः। तद्व्यक्तित्वेन तद्घटस्मरणस्यैव घटभिन्नाविषयकत्वेन विषयतया तादृशस्मरणाभावस्य हेत्वव्यापकत्वात्।तद्व्यक्तित्वस्य तद्घटव्यक्तिस्वरू-

सम्बन्धमात्रेण द्रव्यं सत्त्वादित्यादावतिव्याप्तेः वृत्तिमन्मात्रस्यैव स्वरूपसम्बन्धेन महाकाले वृत्तेरवृत्तेरभावस्य च केवलान्वयित्वादिति प्रत्युक्तम् । विशेषणताविशेषेण वा साध्यवदवृत्तित्वं वक्तव्यम् । सर्वत्रैव तत्तद्व्यक्तित्वे तत्तदन्यान्यत्वे तत्प्रकारकप्रमाविषयत्वे वा तत्मुलभम् । तेनैव सम्बन्धेन तदवच्छिन्नसामान्याभावो वाच्य इति ।

त्वात् तद्घटीयरूपरसादिस्वरूपत्वे तद्घटोत्पत्तिदशायां तद्व्यक्तित्वाभावापत्तेः । न च जातीतरस्य तद्व्यक्तित्वस्य स्वरूपतः प्रकारताविरोधात्तादृशस्मृतौ धर्मान्तरभानमावश्यकम् । घटोऽस्ति तद्व्यक्तिरस्तीत्यादिप्रत्ययानां वैलक्षण्याननुभवेन तादृशविरोधास्वीकारात् । न च विशेष्यतया साध्यवदवृत्तित्वाद्युक्तौ न कोपि दोषः घटभिन्नाविशेष्यकस्य घटमात्रविशेष्यकज्ञानस्य विशेष्यतासम्बन्धेनाभावस्य हेत्वव्यापकत्वादिति वाच्यम् । यन्मात्रविशेष्यकं ज्ञानमप्रसिद्धं तद्धेदसाध्यकप्रमेयत्वादावतिव्याप्तितादवस्थ्यादिति भावः ॥ येन येन सम्बन्धेनेत्यत्र विशेषणताविशेषस्यापि निवेशात्तत एवातिप्रसङ्गादिभङ्गे सम्बन्धान्तरप्रवेशो व्यर्थ इत्याशयेनाह विशेषणताविशेषेण वेति॥नन्वेवं व्यभिचारिण्यतिव्याप्तिः विशेषणतया धूमादिमत्यवर्तमानस्यायःपिण्डत्वादेर्विशेषणतया अभावस्य वह्न्यादिव्यापकत्वादित्यत आह सर्वत्रेति । व्यभिचारिणीति शेषः । तत्तद्व्यक्तित्व इति । व्यभिचारनिरूपकतत्तदधिकरणव्यक्तित्व इत्यर्थः । तथाच तदभावस्यैव हेत्वव्यापकत्वान्नातिव्याप्तिरिति भावः । ननु तत्तद्व्यक्तित्वं तत्तदयोगोलकादिस्वरूपं तदीयरूपादिस्वरूपं वा तस्य च विशेषणतयाऽभावो वह्न्यादिव्यापक एवेत्यत आह तत्तदन्यान्यत्व इति । ननु तत्तदन्यान्यत्वं तन्नायःपिण्डादिस्वरूपमेवेत्युक्तदोषतादवस्थ्यमत आह तत्प्रकारकेति । तत्तद्व्यक्तित्वप्रकारकेत्यर्थः । तादृशभ्रमविषयत्वस्य साध्यवत्यपि सत्त्वात्प्रमेति । तत् साध्यवदवृत्तित्वम् । नच साध्यवदन्यत्व एव तत्सौलभ्यादेतावत्पर्यन्तानुधावनमफलम् । भेदस्याप्यव्याप्यवृत्तित्वे सर्वत्र व्यभिचारिणि तत्सौलभ्यासम्भवादिति भावः । साध्यवदवृत्तितत्तद्व्यक्तित्वावच्छिन्नाभावकूटप्रवेशे गौरवादाह तेनैव सम्बन्धेनेति । तदवच्छिन्नेत्यादि । विशे-

केचित्तु नञ्व्यत्यासेनासाध्यानि साध्यविरोधीनि साध्यसमानाधिकरणानीति यावत् तानि सामानाधिकरण्यानधिकरणानि यस्य तत्त्वम् साध्यसामानाधिकरण्याभावव्यापकाभावप्रतियोगिसामानाधिकरण्यसामान्यकत्वमिति फलितार्थः अत्र च साध्यसामानाधिकरण्यं साध्यतावच्छेदकसम्बन्धेन साध्यवति हेतुतावच्छेदकसम्बन्धेन वृत्तिः परञ्च सामानाधिकरण्यं हेतुतावच्छेदकसम्बन्धेन हेतुमति तेनैव वृत्तिः तेन समवायेन पृथिवीत्वादेः साध्यतायां

षणताविशेषेणैव साध्यवदवृत्तित्वावच्छिन्नसामान्याभाव इत्यर्थः॥ मिश्रमतमुपन्यस्यति केचित्त्विति। नञ्व्यत्यासेन साध्यपदोत्तरनञः तत्पूर्वप्रक्षेपेण। ननु साध्यभिन्नस्य धूमादेः साधनसामानाधिकरण्याधिकरणत्वाद्वह्निमान्धूमादित्यादावव्याप्तिः प्रमेयवान्वह्नेरित्यादौ साध्यभिन्नाप्रसिद्धिश्चेत्यत आह साध्यविरोधीनीति। असुरादिपदे नञो विरोधिबोधकताया व्युत्पन्नत्वादिति भावः। ननु साध्यविरोधित्वं साध्याभावव्याप्यत्वम् तच्च केवलान्वयिन्यप्रसिद्धमत आह साध्यासमानाधिकरणानीति। साध्यासमानाधिकरणानां असामानाधिकरण्यस्योक्तौ केवलान्वयिन्यव्याप्तितादवस्थ्यमतो बहुव्रीहिमाश्रित्य व्याचष्टे तानीति।साध्यासमानाधिकरणानीत्यर्थः। ननु साध्यासमानाधिकरणस्य जलत्वादेः साधनसामानाधिकरण्यानधिकरणत्वाद्धूमवान्वह्नेरित्यादावतिव्याप्तिरत आह साध्यसामानाधिकरण्याभावेति। वह्निसामानाधिकरण्यगगनोभयत्वावच्छिन्नाभावस्य धूमसामानाधिकरण्याभावव्यापकत्वादुक्तातिव्याप्तितादवस्थ्यमतः साधनसामानाधिकरण्यत्वावच्छिन्नाभावत्वेन व्यापकत्वमाविष्कर्तुं सामान्यपदमुपात्तम्। साध्यवतीति। साध्यतावच्छेदकविशिष्टसाध्यवतीत्यर्थः। तेन विशिष्टसत्तासाध्यकजातिमत्त्वादौ नातिप्रसङ्गः। परञ्च हेतुनिरूपितं च हेतुमतीति। हेतुतावच्छेदकविशिष्टेत्यादिः। तेन द्रव्यं विशिष्टसत्त्वादित्यादौ नाव्याप्तिः। तेनैव हेतुतावच्छेदकसम्बन्धेनैव। साध्यतावच्छेदकसम्बन्धेन साध्यवत्त्वप्रवेशस्य फलमाह तेनेति। हेताविति। नातिप्रसङ्ग इति परेणान्वयः। समवायेन पृथिवीत्ववति कालिकेनावर्तमानस्य प्रलया-

व्यभिचारिणि कालिकसम्बन्धेन हेतौ द्रव्यत्वादेश्च समवायेन साध्यतायां समवायेन हेतौ सत्त्वादौ नातिप्रसङ्गः न वा संयोगेन वह्न्यादौ साध्ये समवायेन तद्व्याप्यस्य रूपविशेषादेः कालिकसम्बन्धेनाधिकरणे काले स्पन्दे च कालपरिमाणस्पन्दत्वादेः समवायेन तदधिकरणे घटादेः संयोगेन वृत्तावपि चाप्रसङ्गः सम्व-

---

देः कालिकेन हेतुमति महाकालेऽवृत्तित्वविरहान्नातिव्याप्तिः । अन्यथा प्रलयादेरपि पृथिवीत्ववन्महाकालादिवृत्तित्वा[त्पृथिवीत्ववद्वृत्तित्वमवृत्तिगगनादावेव तत्र हेत्वसामानाधिकरण्यसत्त्वा]दतिव्याप्तिः स्यादेवेति भावः । पूर्वदलप्रविष्टहेतुतावच्छेदकसम्बन्धावच्छिन्नवृत्तेः फलमाह द्रव्यत्वादेश्चेति । द्रव्यत्ववत्यसमवेतस्य गुणत्वादेरेव हेत्वसामानाधिकरण्यविरहान्नातिप्रसङ्गः । अन्यथा वृत्तिमन्मात्रस्यैव द्रव्यत्ववति महाकाले वृत्त्या द्रव्यत्ववदवृत्तित्वमवृत्तिगगनादावेव स्यात् तच्च सर्वं हेत्वसमानाधिकरणमेवेत्यतिव्याप्तिरिति भावः । द्रव्यत्वे साध्यं गुणत्वस्य विरुद्धतया साध्यसामानाधिकरण्यविवक्षयापि निरासः सम्भवतीत्यतः सत्त्वपर्यन्तमनुसृतम् । सत्त्वगुणत्वादावित्यपि क्वचित्पाठः।तत्र सत्ताया हेतुत्वे हेत्वसामानाधिकरण्यस्य साध्यासामानाधिकरण्यव्यापकत्वाभावो हेतुभिन्न एवानुसरणीयः । गुणत्वस्य हेतुतायां तु तत्रैवायं सुग्रह इत्याशयेन गुणत्वस्य पश्चादुक्तिः । हेतुतावच्छेदकसम्बन्धेन हेतुमत्त्वोक्तेः फलमाह न वा संयोगेनेति । स्पन्दत्वादेरिति । वृत्तावपीति परेणान्वयः। तथाच वह्निमान्पर्वतरूपादित्यत्र वह्निमदसमवेतस्य कालपरिमाणादेः कालिकसम्बन्धेन पर्वतीयरूपवति काले समवेतत्वेपि हेतुताघटकसमवायसम्बन्धेन तादृशरूपवति पर्वतादावसमवेतत्वान्नाव्याप्तिरिति भावः । कालस्यापि संयोगेन वह्निमत्त्वात्साध्यवदसमवेतत्वं न कालपरिमाणस्यातः स्पन्दत्वमनुसृतम् । केचित्तु महाकालस्य कालिकसम्बन्धेन रूपाद्यधिकरणत्वे मानाभावः इदानींतदानीमित्यादिप्रत्ययेन कालोपाधीनामेव तथात्वावगाहनादिति मतेप्यव्याप्तिसम्पत्तये स्पन्दत्वपर्यन्तमित्यप्याहुः।तेनैवेत्यस्य प्रयोजनमाह समवायेनेति। तदधिकरण इति।वह्निव्याप्यस्य रूपविशेषादेरधिकरणे पर्वतादावित्य-

साध्यासामानाधिकरण्यं हि न साध्यानधिकरणाधिकरणत्वं साध्याधिकरणानधिकरणत्वं वा केवलान्वयिनि यत्किञ्चित्साध्याधिकरणानधिकरणे धूमे चाव्याप्तेः ॥

नापि स्वसमानाधिकरणात्यन्ताभावाप्रतियोगिसाध्यसामानाधिकरण्यम् पर्वतीयवह्नेर्महानसीयधूमसमानाधिकरणात्यन्ताभावप्रतियोगित्वात् । द्रव्यत्वादेरव्याप्यवृत्त्यव्याप्यतापत्तेश्च । न च प्रतियोगिविरोधित्वं व्याप्यवृत्तित्वं वा अभावविशेषणं देयम् । संयोगादौ साध्ये स-

---

न्धविशेषेण व्याप्यत्वलाभाय साधिकरणत्वमित्याहुः । तच्चिन्त्यम् । यथाश्रुतं यथासम्भवं विकल्प्य दूषयति नेत्यादि ॥

नन्वप्रतियोगिपदेन प्रतियोगितानवच्छेदकावच्छिन्नं वक्तव्यमत आह द्रव्यत्वादेरिति ॥ प्रतियोगिविरोधित्वं प्रतियोग्यधिकरणावृत्तित्वम् । व्याप्यवृत्तित्वं स्वसमानाधिकरणात्यन्ताभावाप्रतियोगित्वम् ॥ अधिकरणेति । तथा सत्यभाव एव न सिद्ध्येदिति भावः । संयोगाद्यर्थः ॥ तच्चिन्त्यमिति । एतद्रूपभिन्नं गुणत्वादित्यत्राव्याप्तिः गुणत्ववदसमवेतत्वस्यैतद्रूपभिन्नासमवेतत्वव्यापकत्वात् एवं वाच्यत्वसाध्यके तादात्म्येन विषयतया वा ज्ञानादिहेतावव्याप्तिः वाच्यानात्मकत्वस्य वाच्याविषयत्वादेश्चाप्रसिद्धेः । न च साध्यस्य हेतोश्च सामानाधिकरण्यं विशेषणताविशेषेण प्रवेश्यमतो न कोपि दोष इति वाच्यम् । तस्य व्याप्तिग्रहोपाये स्वयमेव वक्ष्यमाणत्वादिति भावः ॥ यथाश्रुतमिति । अन्यथा साध्यवदवृत्तित्वस्यैव लक्षणघटकतया साध्यानधिकरणवृत्तित्वमादाय दोषप्रदर्शनस्यासङ्गत्यापत्तेरिति भावः ॥ प्रतियोग्यनधिकरणहेतुमन्निष्ठत्वरूपस्य प्रतियोगिविरोधित्वस्य निरवच्छिन्नहेतुमद्वृत्तिताकत्वरूपस्य वा व्याप्यवृत्तित्वस्य प्रवेशे वक्ष्यमा-

त्वादेरनैकान्तिकत्वाभावप्रसङ्गात् । न हि प्रतियोगि-विरोधी संयोगादेरपरोऽत्यन्ताभावोऽस्ति । अधिकरणभेदे-नाभावभेदाभावात् ॥

नापि साधनवन्निष्ठान्योऽन्याभावाप्रतियोगि-साध्यवत्कत्वं व्याप्तिः । मूले वृक्षः कपिसंयोग-वान्नेत्यबाधितप्रतीतेः । तदन्योऽन्याभावस्यापि तत्र स-त्त्वात् । न चैवं भेदाभेदः अवच्छेदकभेदेन तत्सत्त्वाभ्यु-पगमात् । साधनवन्निष्ठान्योऽन्याभावाप्रतियोगि साध्य-

---

न्ताभावस्य द्रव्ये प्रतियोगिसामानाधिकरण्यम् अव्याप्यवृत्तित्वञ्च प्रतियोग्यधिकरणीभूतद्रव्यवृत्तित्वं स्वाधिकरणीभूतद्रव्यनिष्ठात्यन्ता-भावप्रतियोगित्वम् गुणे च प्रतियोग्यसामानाधिकरण्यं व्याप्यवृत्ति-त्वञ्च प्रतियोग्यनधिकरणीभूतगुणवृत्तित्वं स्वाधिकरणीभूतगुण-निष्ठात्यन्ताभावाप्रतियोगित्वम् । एतानि च न भेदकान्यविरोधात् ।

णातिव्याप्त्यसङ्गतेराह प्रतियोगीति ॥ तथा सतीति नास्तीत्यनुगतप्रती-तेरननुगताधिकरणव्यक्तिभिरसम्भवादेवातिरिक्तोऽभावः सिध्यति-सोपि चेदधिकरणभेदाद्भिन्नस्तदा अधिकरणव्यक्तीभिरेवाभावव्यव-हारोस्त्विति कृतमतिरिक्ताभावेनेति भावः ॥ ननु प्रतियोगिसामाना-धिकरण्यतदसामानाधिकरण्यव्याप्यवृत्तित्वाव्याप्यवृत्तित्वलक्षण-विरुद्धधर्माध्यास एव द्रव्यगुणवृत्तिसंयोगाभावयोर्भेदकोस्त्वत आह संयोगेति । द्रव्यनिष्ठेति । प्रतियोगित्वं वैशिष्ट्यव्यासज्यवृत्तिधर्मानव-च्छिन्नं ग्राह्यम् अतो न द्वित्वाद्यवच्छिन्नाभावमादाय गुणेपि संयोगाभा-स्याव्याप्यवृत्तित्वम् एवमुत्तरत्रापि बोध्यम् ॥ अविरोधादिति । संयो-गाधिकरणद्रव्यवृत्तित्वतदनधिकरणगुणवृत्तित्वयोर्गगनाद्यभावे स-

वद्यस्येति षष्ठ्यर्थव्याप्यव्यापकभावानिरूपणात् । साध्यसाधनत्वयोर्व्याप्तिनिरूप्यत्वात् । वह्निमत्पर्वतस्य धूमव-

---

सामान्यतश्चाव्याप्यवृत्तौ प्रतियोगिसमानाधिकरणे च न तथात्वव्यतिरेक इति भावः ॥

ननु साध्यवान् यस्येति साध्यवति सम्बन्धोऽन्वेष्टव्यः स चाधिकरणत्वं साध्यसाधनयोरपि सामानाधिकरण्यमेवेक्षतो दूषणान्तरमाह साध्येति । साध्यत्वसाधनत्वे व्याप्तिप्रतियोगित्वानुयोगित्वे ॥ यत्तदभ्यामेव व्याप्तिर्निर्वक्तव्येक्षत

स्वादिति भावः ॥ ननु स्वसमानाधिकरणात्यन्ताभावप्रतियोगित्वतत्सामान्याभावादिलक्षणविरुद्धधर्म एव भेदको वाच्य इत्यत आह सामान्यत इति । न तथात्वव्यतिरेक इत्यन्वयः । तथा चाव्याप्यवृत्तित्वसामान्याभावः प्रतियोगिसामानाधिकरण्यसामान्याभावः संयोगाभावे नास्त्येव को भेदकः स्यादिति । इदं च सामानाधिकरण्यस्य व्याप्यवृत्तितामनुसृत्य । अन्यथा प्रतियोगिसामानाधिकरण्यतत्सामान्याभावयोर्द्रव्यगुणात्मकावच्छेदकभेदेन संयोगसामान्याभावे वृत्तावपि क्षत्यभावादिति ध्येयम् ॥

साध्यवानिति । साधनवन्निष्ठान्योन्याभावाप्रतियोगीति प्रकृतम् । साध्यवतीति । समस्यमानपदार्थ एवान्वयस्यौत्सर्गिकत्वादिति भावः । स चेति तथा च साधनवन्निष्ठान्योन्याभावाप्रतियोगिसाध्यवत्त्वस्याधिकरणं तत्त्वं वाक्यार्थः । अधिकरणत्वं च सम्बन्धित्वम् । अतस्तदात्म्येन गगनादिहेतौ नाव्याप्तिः । यस्य साध्यवान् साधनवन्निष्ठान्योन्याभावाप्रतियोगीत्येवमन्वयेपि न क्षतिः साधनसामानाधिकरण्यरूपस्यैव यत्पदार्थसम्बन्धस्य साध्येऽनुप्रवेशादित्याशयेनाह साध्यसाधनयोरपीति । सामानाधिकरण्यमेवेति । सम्बन्ध इत्यनुषज्यते ॥ सिद्धिकर्मत्वादिरूपस्य साध्यत्वादेर्व्याप्यनिरूप्यत्वादन्यथा व्याचष्टे साध्यत्वेति॥ यत्तद्भ्यामिति । तथा च यद्वन्निष्ठान्योन्याभावाप्रतियो-

न्महानसनिष्ठान्योऽन्याभावप्रतियोगित्वाच्च। विशेषाभाव-कूटादेवाभावव्यवहारोपपत्तौ सामान्याभावे मानाभावात्॥

आह वह्निमदिति॥ ननु यत्समानाधिकरणान्योन्याभावप्रतियोगितावच्छेदकं यद्रूपावच्छिन्नं न भवति तद्रूपावच्छिन्नेन समं तस्य सामानाधिकरण्यं व्याप्तिरित्यर्थः न च धूमसमानाधिकरणान्योन्याभावप्रतियोगितावच्छेदको वह्नित्वावच्छिन्नो वह्निः धूमवान् वह्निमान्नेयप्रतीतेरत आह विशेषेति। य एव प्रसेकं वह्निमद्भेदाः धूमसमानाधिकरणास्त एव चैकाधिकरणवृत्तित्वावच्छिन्ना वह्निमत्सामान्यभेदबुद्धिं जनयन्ति तत्प्रतियोगितावच्छेदको वह्नित्वावच्छिन्नो वह्निरिति भवत्यव्याप्तिः॥

गी यद्वांस्तेन समं तस्य सामानाधिकरण्यं व्याप्तिरिति फलितम्॥ प्रतियोगितावच्छेदकमिति भावप्रधानो निर्देशः। प्रतियोगितावच्छेदकत्वमित्येव वा पाठः। तेन वह्नित्वावच्छिन्नस्य वह्निमात्रस्यैव धूमसमानाधिकरणतत्तद्वह्निमत्त्वावच्छिन्नभेदप्रतियोगितावच्छेदकत्वेपि न क्षतिः। तादृशप्रतियोगितावच्छेदकत्वस्य वह्नित्वेनानवच्छेदादिति ध्येयम्। ननु तत्तद्वह्निमत्त्वावच्छिन्नभेदस्यैव प्रतियोगितावच्छेदकत्वं वह्नित्वावच्छिन्नं वाच्यमित्यव्याप्तिरेवेत्यत आह न चेति। वह्नित्वावच्छिन्नो वह्निर्यावान्वह्निः। तथाच यावद्वह्निनिष्ठभेदाभावस्य प्रतियोगितावच्छेदकत्वं वह्नित्वावच्छिन्नमित्येकवह्निनिष्ठस्य प्रतियोगितावच्छेदकत्वस्य वह्नित्वावच्छेद्यत्वविरहान्नाव्याप्तिरतस्तत्रैव युक्तिमाह धूमवान्वह्निमान्नेत्यप्रतीतेरिति। केचित्तु यद्रूपविशिष्टं तादृशप्रतियोगितावच्छेदकत्वपर्याप्त्यधिकरणं तदन्यरूपावच्छिन्नसामानाधिकरण्यं विवक्षितमित्याहुः॥ ननु सामान्याभावासत्त्वेपि लक्षणस्य को दोष इत्यत आह य एवेति। वह्निमद्भेदाः तत्तद्वह्निमत्त्वावच्छिन्नभेदाः। एकाधिकरणेति। अन्यथा वह्निमत्यपि वह्निमान्नेति प्रतीत्यापत्तेरिति भावः॥

नापि साधनसमानाधिकरणयावद्धर्मनिरूपितवैयधिकरण्यानधिकरणसामानाधिकरण्यम्। साधनसमानाधिकरणस्य प्रमेयत्वादेर्वैयधिकरण्याप्रसिद्धेः। महानसादौ

साधनेति। वैयधिकरण्यं तदनधिकरणवृत्तित्वम्। तच्च केवलान्वयिनः साधनस्याप्रसिद्धम् अतिप्रसञ्जकञ्च पृथिवी द्रव्यत्वादित्यादौ अतः समानाधिकरणोपादानम्। धूमादेरपि न वह्न्यादिसमानाधिकरणद्रव्यत्वाद्यनधिकरणवृत्तित्वमतो यावदिति। यद्यपि पृथिवी-

---

तदधिकरणावृत्तित्वरूपस्य वैयधिकरण्यस्य प्रवेशे प्रमेयत्वादेर्वैयधिकरण्याप्रसिद्धेरितिमूलासङ्गतिर्गगनादावेव तत्प्रसिद्धेरतो व्याचष्टे वैयधिकरण्यमिति॥ ननु साधनवैयधिकरण्यानधिकरणत्वप्रवेशेनैव सामञ्जस्ये समानाधिकरणपदं व्यर्थमत आह तच्चेति। साधनसमानाधिकरणोक्तावपि केवलान्वयिसाधनवैयधिकरण्याप्रसिद्धिरेव साधनस्यापि स्वसमानाधिकरणयावद्धर्मान्तर्गतत्वादतो दूषणान्तरमाह अतिप्रसञ्जकं चेति। पृथिवीत्वस्य द्रव्यत्वानधिकरणवृत्तित्वानधिकरणत्वादिति भावः। अत इति। तथाच द्रव्यत्वादिसमानाधिकरणीभूतजलत्वाद्यनधिकरणवृत्तित्वस्य पृथिवीत्वे सत्त्वान्नातिव्याप्तिरिति भावः। अत्र च येन येन सम्बन्धेन यो यः साधनसमानाधिकरणस्तेन तेन सम्बन्धेनैव तत्तदनधिकरणे साध्यतावच्छेदकसम्बन्धेनैव वृत्तिमत्त्वं तादृशवैयधिकरण्यान्तार्थो ग्राह्यः। तेन साधनसमानाधिकरणस्यायःपिण्डत्वादेः सम्बन्धसामान्येनानधिकरणे गगनादौ धूमादेरवृत्तित्वेपि धूमवान्वह्नेरित्यादौ नातिव्याप्तिः। न वा ज्ञानवानात्मत्वादित्यादौ साधनसमानाधिकरणस्यात्मत्वादेरनधिकरणे कालिकादिसम्बन्धेन साध्यस्य ज्ञानादेर्वृत्तावप्यव्याप्तिः॥ धूमादेरिति। समवायेन साध्यतामभिप्रेत्य। संयोगेन तथात्वे द्रव्यत्वानधिकरणसंयुक्तत्वाप्रसिद्ध्या द्रव्यत्वमादायातिव्याप्त्यसम्भवादिति ध्येयम्। नच समवायेन धूमस्य

त्वादिसमानाधिकरणघटत्वपटत्वाद्यनधिकरणवृत्तित्वं द्रव्यत्वादेः तदनधिकरणमात्रवृत्तित्वञ्च निखिलघटपटादिरूपाणाम् । तथापि तादृशधर्मानधिकरणमात्रवृत्तित्वानवच्छेदकसाध्यतावच्छेदकत्वं बोध्यम् । नहि पृथिवीत्वसमानाधिकरणस्तादृशः कश्चिदेको धर्मो यदनधिकरणमात्रवृत्तितावच्छेदकं रूपत्वादि । धूमत्वादिकञ्च वह्न्यादिसमानाधिकरणायोगोलकत्वाद्यनधिकरणमात्रवृत्तितावच्छेदकम् । तदवच्छेदकत्वञ्च तदनतिरिक्तवृत्तित्वम्।तच्च तच्छून्यधर्मावृत्तित्वम् ।तेन मेयत्वसमानाधिकरणगुणत्वाद्यनधिकरणमात्रवृत्ति-

---

साध्यतायां वह्न्यादिहेतोर्विरुद्धत्वात् साध्यसामानाधिकरण्याप्रसिद्धैव नातिव्याप्तिर्यावत्त्वोपादानमफलमिति वाच्यम् । तथापि संयोगेन धूमस्य साध्यतायामपि स्वसमानाधिकरणस्य वह्न्यादेः साधनाधिकरणवृत्तेरनधिकरणे जलादौ तादृशसंयुक्तत्वप्रसिद्ध्यातिव्याप्तिरतो यावदिति ॥ द्रव्यत्वादेरिति । तथाच द्रव्यं पृथिवीत्वादित्यादावव्याप्तिरिति भावः । ननु तदनधिकरणमात्रवृत्तित्वमेव वैयधिकरण्यं वाच्यम् तथा च द्रव्यत्वस्य घटत्वाद्यनधिकरणमात्रवृत्तित्वाभावान्नाव्याप्तिरत आह तदनधिकरणेति । तथाच मात्रपदप्रवेशेपि रूपवान् पृथिवीत्वादित्यादावव्याप्तिरिति भावः॥ तादृशेति । साधनसमानाधिकरणयावद्धर्मेत्यर्थः। बोध्यं मूलस्थसाध्यान्तभागेन॥रूपवान् पृथिवीत्वादित्यादावव्याप्तिमुद्धरति न हीति ॥ धूमवान्वह्नेरित्यादावतिव्याप्तिं निरस्यति धूमत्वादिकं चेति ॥ नन्ववच्छेदकत्वमत्र न स्वरूपसम्बन्धविशेषः मानाभावात् गुरुधर्मे तदभावेन प्रमेयधूमत्वादिना साध्यतायां व्यभिचारिण्यतिव्याप्तेश्च नाप्यन्यूनवृत्तित्वम् प्रमेयवान् धूमादित्यादावव्याप्तेः पर्वतत्वाद्यनधिकरणमात्रवृत्तित्वान्न्यूनवृत्तित्वात्प्रमेयत्वस्येत्यत आह तदवच्छेदकत्वमिति । तदनतिरिक्तेति । तादृशधर्मानधिकरणमात्रवृत्तित्वशून्यावृत्तित्वमित्यर्थः । तादृशवृत्तितात्शून्यवृत्तित्वं च साध्यतावच्छेदकतावटकसम्बन्धेन ग्राह्यम् । तेन वह्निसमानाधिकरणायःपिण्डत्वाद्यनधिकरणमात्रवृत्तित्वशून्येऽयःपिण्डीयवह्न्यादौ धूमत्वादेः कालिकसम्बन्धेन वृत्ता-

तानधिकरणगगनादिवृत्तित्वेऽपि द्रव्यत्वस्य द्रव्यसाध्यकमेयत्वे नातिव्याप्तिः । वस्तुतस्तु तादृशधर्मानधिकरणमात्रवृत्तित्वावच्छिन्नाधिकरणताकत्वं तदवच्छेदकत्वं वाच्यम् । तेन सत्ताद्रव्यत्वोभयवान्

वापि न तादृशावच्छेदकत्वहानिः॥तच्चेति । तदपीत्यर्थः । तच्छून्येति । तदनधिकरणमात्रवृत्तिताशून्येत्यर्थः ॥ तेन धर्मपदप्रवेशेन । नातिव्याप्तिरिति । तादृशवृत्तिताशून्यो यः सत्तादिरूपो धर्मस्तदवृत्तितामादायैव द्रव्यत्वस्यावच्छेदकत्वसम्भवादित्याशयः । न च गगनादेरपि कालिकादिसम्बन्धेन वृत्तिमत्त्वादुक्तदोषतादवस्थ्यम् । सम्बन्धसामान्येनैव तेषामवृत्तित्वोपगमात् । वस्तुतः साध्यतावच्छेदकसम्बन्धेन सम्बन्धित्वरूपमेवात्र धर्मत्वं वाच्यम् । अन्यथा तादात्म्येन गगनसाध्यकशब्दवत्त्वादावव्याप्त्यापत्तेः । साधनसमानाधिकरणद्रव्यत्वाद्यनधिकरणमात्रवृत्तिताशून्ये वृत्तिमति घटादौ गगनत्वस्यावृत्तित्वात् तथाच गगनादेः कालिकतादात्म्यादिसम्बन्धेन धर्मत्वेऽपि समवायसम्बन्धेन तथात्वविरहाद्द्रव्यसाध्यकमेयत्वादिहेतौ नोक्तातिप्रसङ्गः । यद्यप्येवं संयोगेन द्रव्यसाध्यके सत्त्वादावतिव्याप्तिः साधनसमानाधिकरणगृहत्वाद्यनधिकरणमात्रसंयुक्तत्वशून्ये गृहवृत्तिदण्डादौ वर्तमानतया द्रव्यत्वस्य निरुक्तावच्छेदकत्वाभावात् गुणत्वाद्यनधिकरणमात्रसंयुक्तताशून्यस्य संयोगेन वृत्तिमतोऽप्रसिद्ध्या साधनसामानाधिकरणगुणत्वादिकमुपादाय तद्धारणासम्भवात् । तथापि तादृशधर्मानधिकरणमात्रवृत्तिताशून्यत्वनिरुक्तवृत्तिमत्त्वोभयाभाववत्त्वाश्रयसामान्यकत्वं विवक्षितमित्यदोषः । द्रव्यत्वावच्छेदेनैव गुणत्वानधिकरणमात्रसंयुक्तताशून्यत्वसंयुक्तत्वोभयाभाववत्त्वेन द्रव्यत्वस्य निरुक्तावच्छेदकत्वादिति भावः॥ ननु साधनसमानाधिकरणगुणत्वानधिकरणमात्रवृत्तिताशून्ये सत्त्वादौ द्रव्यत्वसत्त्वोभयत्वादेः साध्यतावच्छेदकस्य वृत्तित्वाद्द्रव्यत्वसत्त्वोभयवान् जातेरित्यादावतिव्याप्तिरत आह वस्तुतस्त्विति । तादृशेति । साधनसमानाधिकरणधर्माधिकरणावृत्तीत्यर्थः । पूर्वकल्पे विशिष्टाभावघटकतया सार्थकत्वेऽप्यत्र कल्पे तादृशधर्मानधिकरणवृत्तित्वांशस्य प्रवेशवैयर्थ्यात् । नचैवं प्रमेयत्वादेरित्यग्रिममूलास-

गुणान्यत्वविशिष्टसत्तावान् वा जातिमत्त्वादिस्यादौ नातिप्रसङ्गः। सत्तायाः गुणत्वाभाववन्मात्रवृत्तित्वविरहेऽपि उभयत्वाद्यवच्छिन्नाधिकरणतायाः गुणत्वाभाववन्मात्रवृत्तित्वात् ॥ प्रमेयत्वादेरिति ॥ ननु व्यतिरेकित्वेन धर्मो विशेषणीयः वस्तुतस्तु यावत्पदं

ङ्गतिः प्रमेयत्वाद्यधिकरणावृत्तित्वरूपस्य तद्वैयधिकरण्यस्य गगनादौ प्रसिद्धेरिति वाच्यम्। तदग्रन्थस्य वैयधिकरण्यावच्छेदकाप्रसिद्धिपरत्वादिति भावः।अत्र स्वावच्छिन्नाधिकरणत्वं साध्यताघटकसम्बन्धेन ग्राह्यम्।तेन समवायावच्छिन्नवह्न्यधिकरणतायाः साधनसमानाधिकरणपर्वतत्वाद्यनधिकरणमात्रवृत्तित्वेपि न वह्निमान् धूमादित्यादावव्याप्तिः। स्वरूपसम्बन्धात्मकस्याधिकरणत्वस्याधिकरणभेदाद्भेदोपगमे साध्यताघटकसम्बन्धेन स्वावच्छिन्नाधिकरणत्वसामान्यं निवेशनीयम्। तेन महानसनिष्ठाया वह्नित्वावच्छिन्नाधिकरणताव्यक्तेः पर्वतत्वाद्यनधिकरणमात्रवृत्तित्वेपि नोक्तदोषः। न चैवं घटवान् महाकालत्वादित्यादावव्याप्तिः कालिकसम्बन्धेन साध्यतायां महाकालान्यत्वविशिष्टघटत्वादेः कथञ्चिदवच्छेदकत्वसम्भवेपि महाकालनिरूपितविशेषणतया साध्यतायां कुत्राप्यवच्छेदकत्वाप्रसिद्धेरिति वाच्यम्। तादृशधर्मानधिकरणमात्रवृत्त्यधिकरणत्वसामान्याभिन्नं यत्साध्यतावच्छेदकसम्बन्धावच्छिन्नप्रकृतसाध्याधिकरणत्वं तत्सामानाधिकरण्यं व्याप्तिरिति वर्तुलार्थे तात्पर्यादिति ध्येयम् ॥ ननु गुणत्वाद्यनधिकरणमात्रवृत्तिताशून्ये सत्त्वादौ द्रव्यत्वसत्त्वोभयत्वादेः साध्यतावच्छेदकत्वघटकपर्याप्तिसम्बन्धेनावृत्तेस्तस्यावच्छेदकत्वमक्षतमेवेत्यत आह गुणान्यत्वेति॥ नन्वित्यादि। व्यतिरेकित्वं भेदप्रतियोगितावच्छेदकत्वम्। तच्च साधनाधिकरणवृत्तिताघटकसम्बन्धेन ग्राह्यम्। तेन गगनाभावसंयोगाभावादेर्व्युदासः। ननु यावद्धर्मोक्तावपि तत्समुदायाधिकरणाप्रसिद्ध्या प्रातिस्विकरूपेण तत्तद्धर्मवैयधिकरण्यं वाच्यम् तथाच येषां वैयधिकरण्यं प्रसिद्धं साधनसमानाधिकरणतत्तद्धर्माणामेव विशिष्य प्रवेशात् सर्वसामञ्जस्ये व्यतिरेकित्वनिवेशो व्यर्थः तादृशयावदवच्छेदकभेदप्रापकतयैव मूलोक्तयावत्पदस्य सार्थकत्वसम्भवात् अन्यथा व्यतिरेकिणोपि हे-

समवायितया वह्निवह्निमतोरत्यन्तान्योन्याभावयोः सत्त्वात् धूमादावप्युक्तलक्षणाभावाच्च ॥

तादृशस्य कस्यापि न वैयधिकरण्यावच्छेदकमेतावन्मात्रस्फोरणाय तथा च साधनसमानाधिकरणधर्मनिरूपितवैयधिकरण्यावच्छेदकं यद्यत्तद्भिन्नधर्मवता यावत्तादृशावच्छेदकत्वशून्यधर्मवता वा समं सामानाधिकरण्यमिति पर्यवसितम् अतो दोषान्तरमाह महानसादाविति । तथा च तदनधिकरणत्वं तदभावाधिकरणत्वं तद्भिन्न-

---

तुसमानाधिकरणयावद्धर्मान्तर्गतस्य द्रव्यत्वादेरनधिकरणे संयोगेन वृत्त्यप्रसिद्ध्या वह्निमान्धूमादित्यादावव्याप्त्यापत्तेरित्यतस्तथैवाह वस्तुत इति । तादृशस्येति । साधनसमानाधिकरणस्येत्यर्थः । तथा चेत्यादि । साधनसमानाधिकरणतत्तद्धर्मानधिकरणमात्रवृत्तिस्वावच्छिन्नाधिकरणताकं यद्यदित्यर्थः । यद्यपि तादृशधर्मानधिकरणमात्रवृत्त्यधिकरणतावच्छेदकत्वावच्छिन्नभेदोक्तावपि न क्षतिः । तथापि यावत्पदसार्थक्याय भेदकूटोक्तिः । तद्भिन्नधर्मेत्यादौ धर्मपदं साध्यतावच्छेदकधर्मपरम् । ननु तादृशपर्वतत्वाद्यनधिकरणमात्रवृत्तिस्वावच्छिन्नाधिकरणताकं महानसीयवह्नित्वमपि तद्भिन्नत्वं च न वह्नित्वे इत्यव्याप्तिरत आह यावत्तादृशेति । साधनसमानाधिकरणतत्तद्धर्मानधिकरणमात्रवृत्त्यधिकरणतानिरूपकतावच्छेदकताकूटशून्येत्यर्थः । तथा च महानसीयवह्नित्वनिष्ठं यद्व्यासज्यवृत्त्यवच्छेदकत्वं तच्छून्यत्वं शुद्धवह्नित्वेऽस्त्येवेत्यदोषः । न चैवं यावन्ति तादृशधर्मानधिकरणमात्रवृत्त्यधिकरणतावच्छेदकत्वानि तत्प्रत्येकावच्छिन्नभेदोक्त्या पूर्वकल्पोपि सम्यक् विशिष्टपर्याप्तं यदवच्छेदकत्वं तदवच्छिन्नभेदस्य शुद्धवह्नित्वे सत्त्वादिति वाच्यम् । तत्तदवच्छेदकत्वावच्छिन्नभेदस्य बहुतरावच्छेदकव्यक्तिघटितमूर्तिकतया गौरवेण तस्यानुक्तत्वादिति भावः ॥ मूलोक्तयोरत्यन्तान्योन्याभावयोः सङ्गमार्थमाह तथा चेति । इत्थञ्च साधनसमानाधिकरणधर्मत्वेन वह्निरेवाभि-

अथानौपाधिकः सम्बन्धो व्याप्तिः उपाधिश्च साध्यव्यापकत्वे सति साधनाव्यापकः व्यापकत्वन्तु तद्वन्निष्ठात्यन्ताभावा-

---

त्वं वा द्वयमपि दुष्टमित्यर्थः । एतेन तदधिकरणावृत्तित्वमत्र वैयधिकरण्यमिति निरस्तम् । समवायितया महानसवृत्तित्वं वह्नौ नास्तीति प्रतीतेर्वह्न्यादेरपि तादृशवैयधिकरण्याधिकरणत्वात् । सम्बन्धविशेषेण वैयधिकरण्यविवक्षायान्तु नोक्तदोष इति ध्येयम् ॥

उपाधिपदस्य साध्यसमव्याप्तवचनतया आत्माश्रयप्रसङ्गादाह साध्यव्यापकेति। व्यापकत्वं व्याप्तिनिरूपकत्वमात्माश्रयादिग्रस्तमत आह तद्वन्निष्ठेति । यत्रोपाधिरव्याप्यवृत्तिर्नानाव्यक्तिको वा तत्रापि व्याप्यवृत्तिरखण्डश्चान्ततस्तद्वद्भिन्नत्वप्रकारकप्रमाविशेष्यत्वा-

---

प्रेत इति ध्येयम् ॥ एतेनेति। विभिन्नसम्बन्धेन वैयधिकरण्यमादाय दोषेणेत्यर्थः ॥ दोषमेवाह समवायितयेत्यादिना । वह्नाविति । यथाश्रुतं मूलमभिप्रेत्य निरुक्तलक्षणाभिप्राये तु वह्न्याधिकरणतायामिति बोध्यम् । तादृशेति । साधनसमानाधिकरणीभूतं यन्महानसत्वादिकं तदधिकरणावृत्तित्वरूपवैयधिकरण्यवत्त्वादित्यर्थः ॥ सम्बन्धविशेषेणेति । प्रथमकल्पे येन सम्बन्धेन धर्मस्य साधनसमानाधिकरणत्वं तेनैव यत्तदनधिकरणं तन्मात्रवृत्तित्वस्य द्वितीयकल्पे च साध्यतावच्छेदकसम्बन्धेन स्वरूपसम्बन्धेन वा तदधिकरणावृत्तित्वस्य विवक्षायां न सम्बन्धभेदनिबन्धनो दोष इत्यर्थः ॥

आत्माश्रयेति । साध्यसमव्याप्तस्य व्यभिचारसम्बन्धेनाभावरूपायामनौपाधिकत्वव्याप्तौ साधननिष्ठप्रकृतसाध्यव्याप्तेरपि साध्यसमव्याप्यत्वांशे प्रवेशादिति भावः॥ आत्माश्रयादिग्रस्तमिति । साध्यस्यापि साध्यनिष्ठव्याप्तिनिरूपकत्वेन साध्यनिष्ठायामेव साध्यीयव्याप्तौ तादृशव्यापकत्वप्रवेशादात्माश्रयो बोध्यः ॥ ननु द्रव्यं सत्त्वादित्यत्रानौपाधिकत्वलक्षणातिव्याप्तिः तत्र संयोगादेरव्याप्यवृ-

प्रतियोगित्वम् व्यभिचारे चावश्यमुपाधिः प्रतियोगित्वं न विरोधित्वं सहानवस्थानानियमलक्षणम् गोत्वाश्वत्वयोरतथात्वात् अन्योऽन्याभावप्रतियोगिन्यसत्त्वाच्च किन्तु यथा-

---

भावादिरेवास्ति । यदि च तस्यापि विशेषणान्तरविशिष्टस्य द्वित्वाद्यवच्छिन्नस्य वा तत्राभावसम्भवस्तदा साध्यसमानाधिकरणात्यन्ताभावप्रतियोगितानवच्छेदकीभूतसाधनसमानाधिकरणात्यन्ताभावप्रतियोगितावच्छेदकधर्मवत्त्वं दलद्वयार्थो बोध्यः । अनवस्थान्निरसितुमाह प्रतियोगित्वमिति । सहेति । एकदेशकालाव-

---

च्छितया संख्यापरिमाणादेश्चालनीन्यायेन साध्यवन्निष्ठाभावप्रतियोगितयोपाधित्वाभावादत आह यत्रेत्यादि। यत्साध्यक इत्यर्थः। यत्राधिकरणे व्यभिचारस्तद्भिन्नत्वादेरेवाखण्डस्य सर्वत्र सौलभ्यादन्तत इत्युक्तम्। तद्वद्भिन्नत्वेति । साध्यवद्भिन्नत्वप्रकारकेत्यर्थः । तद्वत्त्वप्रकारकप्रमाविशेष्यत्वस्य विशेष्यभेदेन नानात्वादखण्डत्वासम्भव इत्यतोऽभावद्वयगर्भानुसरणम् ॥ विशेष्यवन्निष्ठस्य विशिष्टाभावस्य विशेषणाभावपर्यवसायिनः प्रतियोगित्वं विशेषण एव न तु विशेष्य इति प्राचीनप्रवादमनुसृत्य यदिचेत्युक्तम् । तस्यापि अखण्डस्यापि। तत्र साध्यवति । साध्यसमानाधिकरणेत्यादि । यद्यपि प्रतियोगितादृयं वैशिष्ट्यव्यासज्यवृत्तिधर्मानवच्छिन्नं ग्राह्यमित्येतावतैव मूलं समञ्जसम् तथाप्यार्द्रेन्धनत्वादिरूपेणोपाधिव्यवहारं समर्थयितुमवच्छेदकपर्यन्तानुसरणम् ॥ सहानवस्थानियम इत्यत्रानौपाधिकत्वरूपनियमस्य प्रकृतसाध्यीयत्वाभावादात्माश्रयासम्भवादाह अनवस्थामिति ॥ एकेति । तत्तदभाववत्त्वानवच्छेदकीभूततत्तद्देशकालानवच्छिन्नं यत्तत्तदभावाधिकरणवृत्तित्वं तदन्यत्वमर्थः। तेन गोत्वाद्यभावस्य व्याप्यवृत्तेर्देशानवच्छिन्नवृत्तिकत्वेपि न तत्प्रतियोगितायामव्याप्तिः । तदनवच्छेदकत्वं चेह अवच्छेदकतासम्बन्धेन तदभा-

च्छेदनेति पूरणीयम् । तेन नाव्याप्यवृत्तेरभावस्य प्रागभावादेश्च प्रतियोगितायामव्याप्तिः । अन्योन्येति । अत्र समवायादिसम्बन्धावच्छिन्नप्रतियोगिताकाभाववति महानसादौ संयोगादिना वह्न्यदेर्वृत्तेर्येन सम्बन्धेनाभावः तद्वति तेनावृत्तित्वं वक्तव्या । इत्थञ्च तेन सम्बन्धेनासम्बद्धत्वोक्तौ नायं दोषः । अन्योन्याभावस्य तादात्म्यसम्बन्धावच्छिन्नप्रतियोगिताकतया तद्वति तेन सम्बन्धेन प्रतियोगिनोऽसम्बद्धत्वात् । परन्तु समवायेन सत्ताया अभावस्य प्रतियोगितायामव्याप्तिः । तद्वति समवायेन वृत्तेरप्रसिद्धेः । तादृशस्वसम्बन्धाधिकरणावृत्तितत्कत्वाभिधाने च व्यधिकरणसम्बन्धावच्छिन्नाभावप्रतियोगितायामव्याप्तिः सिद्धान्तलक्षणवक्ष्यमाण-

---

वयत्त्वमिति न कश्चिद्दोषः ॥ तेनेति । संयोगाद्यभावस्यैकदेशावच्छेदेन घटादिप्रागभावस्य चैककालावच्छेदेन प्रतियोगिना सादेरभावादिति भावः ॥ अभावविरोधित्वं नाभावविरहव्याप्यत्वं येनानवस्था स्यात् किन्त्वभाववदवृत्तित्वमेव तथा वाच्यमित्याशयेन स्वयं भेदप्रतियोगिनि तदव्याप्तिमुद्भर्तुमाह अत्रेति । यथाश्रुते तु मूलाभिप्रेतस्य नियमघटितप्रतियोगित्वस्याव्याप्तेरुक्तग्रन्थेनानुद्धारात्तद्विरोधश्चिन्तनीयः । वक्तव्येति । अन्यथात्यन्ताभावप्रतियोगिन्यप्यव्याप्तिसम्भवेऽन्योन्याभावमात्रप्रतियोगिन्यव्याप्त्यभिधानं मूलकृतो विरुद्धमिति भावः ॥ इत्थं सम्बन्धविशेषस्य निवेशे। तद्वति समवायेन सत्त्वाभाववति ॥ तादृशेति । प्रतियोगितावच्छेदकसम्बन्धेन यत्प्रतियोगिसम्बन्धि तदवृत्त्यभावकत्वमित्यर्थः । अत्रावृत्तित्वं तादृशप्रतियोगिमत्ताबुद्धिविरोधिताघटकसम्बन्धेन ग्राह्यम् । तेन सत्त्ववति महाकालादौ तद्विरहस्य कालिकादिसम्बन्धेन वृत्तावपि नाव्याप्तिः । नचैवं सत्तारूपस्य सदन्यत्वाभावस्य प्रतियोगिन्यव्याप्तिः सदन्यत्ववति जात्यादौ तद्विरोधिताघटकेन समवायेन वृत्तेरप्रसिद्धेरिति वाच्यम् । स्वसम्बद्धाधिकरणावृत्त्यभावाधिकरणतासामान्यकत्वस्योक्तत्वात् । अभावमात्रस्यैव भावभिन्नत्वोपगमाद्दीशि-

धिकरणाभावयोः स्वरूपविशेषःसम्बन्धः, तथा प्रतियोगित्वमनुयोगित्वमपि अभावविरहात्मत्वं वेति चेत् । य-

---

रीक्षा च खण्डशः प्रसिद्धया तत्परिहारोऽपीति ध्येयम् । अभावविरहात्मत्वमिति । न चान्योन्याभावप्रतियोगितत्त्वावच्छेदकयोरप्रसक्त्यतिप्रसक्ती प्रकृतोपयोगिप्रतियोगितामात्रस्य लक्ष्यत्वे तु लक्षणेऽस्यन्ताभावपदवैयर्थ्यम् सर्वत्र नित्यस्यनित्यसाधारणरूपाव-

---

च्छेदकस्वरूपसम्बन्धेनावृत्तित्वं वाच्यमिति तु भ्रमः । गगनाभावस्य कालिकसम्बन्धेन यो विरहस्तदभावप्रतियोगिन्यव्याप्तेः । तादृशविरहाभावस्य गगनाभावात्मकस्य तादृशविरहात्मकप्रतियोगिमति नित्यद्रव्यादौ स्वरूपसम्बन्धेन वृत्तेरिति ध्येयम् । व्यधिकरणेति । संयोगेन रूपाद्यभावस्थले संयोगेन रूपादिसम्बद्धाधिकरणाप्रसिद्धेरिति भावः । सिद्धान्तेति । यत्प्रतियोगितावच्छेदकसम्बन्धसामान्ये यदीयत्वयदभावाधिकरणीभूतयत्किञ्चिद्व्यक्त्यनुयोगिकत्वाभयाभावस्तेन सम्बन्धेन तस्य तदभावप्रतियोगित्वमिति क्रमेणेत्यर्थः । तत्परिहार इति । संयोगसामान्य एव रूपीयत्वतादृशरूपाभावाधिकरणानुयोगिकत्वोभयाभावसत्त्वाद्व्यधिकरणसम्बन्धेनाभावस्य प्रतियोगितायां नाव्याप्तिरित्यर्थः । यथाश्रुते घटत्वादेरपि द्रव्यत्वाद्यभावप्रतियोगित्वापत्तिः स्वीययदभावाधिकरणानुयोगिकत्वेत्युक्तौ च स्वप्रतियोगिकत्वपर्यवसायिनः स्वीयत्वस्य विनाऽतिरिक्तस्वप्रतियोगितां दुर्वचत्वमित्यादिदोषसम्भवान्निर्दोषत्वासम्भवादाह अपीति॥ न चेति । वाच्यमिति परेणान्वयः।घटादिभेदस्य प्रतियोगिन्यव्याप्तिः।तस्य भेदविरहत्वाभावात्। एवं तत्प्रतियोगितावच्छेदके घटत्वादावतिव्याप्तिः । तस्य घटादिभेदविरहस्वरूपत्वादित्यर्थः । ननु प्रकृतानौपाधिकत्वरूपव्याप्तिनिविष्टस्यैव प्रतियोगित्वस्य निर्वचनादन्योन्याभावप्रतियोगिन्यव्याप्त्यादिकं न क्षतिकरम् साध्यवन्निष्ठात्यन्ताभावविरहान्यत्वे सति साधनवन्निष्ठात्यन्ताभावविरहात्मकस्योपाधेर्यत्र विरहस्तत्रैवानौपाधिकत्वव्याप्तेः पर्यवसानादित्यत आह

च्छिन्नस्य वा उपाधितासम्भवात् इतरथा तु भेदप्रतियोगितावारणाय संसर्गाभावपरतया तस्य सार्थकत्वादिति वाच्यम् । विरहपदस्य तज्ज्ञानप्रतिबन्धकज्ञानविषयार्थकत्वात् । प्रतिबन्धाति हि

प्रकृतेति । लक्षणे मूलोक्तोपाधिलक्षणे । वैयर्थ्यमिति । साध्यवन्निष्ठो योभावस्तद्विरहान्यत्वेनैव धूमवान्वह्नेरित्यादावार्द्रेन्धनादेरुपाधितया व्याप्तिलक्षणातिव्याप्तिव्युदासादिति भावः । ननु आर्द्रेन्धनादेर्धूमसमानाधिकरणस्वध्वंसादिविरहस्वरूपतया तदन्यत्वाभावादनुपाधित्वं स्यादतो ध्वंसप्रागभावव्यावारकतयैवात्यन्तपदं सार्थकं स्यादत आह सर्वत्रेति । नित्यस्येति । व्यभिचारस्थलान्यत्वस्वरूपस्यायःपिण्डभेदादेरित्यर्थः । नित्यस्यापि साध्यवन्निष्ठस्य स्वीयविशिष्टाभावादेर्विरहस्वरूपतया अनुपाधित्वापत्तिरतो अवच्छेदकत्वप्रवेशधौव्ये जन्यस्याप्यार्द्रेन्धनादेस्तत्साधारणरूपेणोपाधित्वं सम्भवतीत्याह नित्यसाधारणेति । तथाच साध्यवन्निष्ठाभावविरहत्वानवच्छेदकीभूतसाधनवन्निष्ठाभावविरहत्वावच्छेकधर्मवत्त्वमेवोपाधित्वमिति तन्नायःपिण्डभेदार्द्रेन्धनान्यतरत्वादिनार्द्रेन्धनस्याप्युपाधित्वं सुवचमिति भावः । इतरथेति । यद्यद्रूपेणोपाधिव्यवहारस्तद्रूपावच्छिन्नप्रतियोगित्वस्य लक्ष्यत्व इत्यर्थः । भेदेति । तथा चायःपिण्डभेदत्वादेः साध्यवन्निष्ठभेदप्रतियोगितावच्छेदकत्वात्तद्रूपेणोपाधिव्यवहारो न स्यादतोऽत्यन्तपदमुपाधिलक्षणे सार्थकं स्यादितिस भावः । प्राञ्चस्तु इतरथा भेदसाधरणप्रतियोगितामात्रस्य लक्ष्यत्वे । तथा चायःपिण्डभेदत्वादेः साध्यवन्निष्ठभेदप्रतियोगितावच्छेदकत्वादयःपिण्डान्यत्वादिकमुपाधिर्न स्यादतस्तत्सङ्ग्रहार्थं भेदप्रतियोगितावारकमत्यन्तपदं सार्थकमित्याहुः । तच्चिन्त्यम् । अयःपिण्डभेदत्वादिरूपेणोपाधित्वाभावेपि व्यभिचारनिरूपकाधिकरणीभूतायःपिण्डभिन्नत्वरूपेणैवार्द्रेन्धनादेरयःपिण्डभेदादेश्चोपाधित्वसम्भवात् । न हि धूमवत्ययःपिण्डभेदत्वावच्छिन्नस्य भेदसत्त्वेप्ययःपिण्डभिन्नत्वावच्छिन्नस्य भेदसम्भवःधूमवन्मात्रस्यैवायःपिण्डभिन्नत्वात्। नच घटाभावान्यो वाच्यत्वादित्यादौ व्यभिचारस्थानस्य घटाभावस्य यदन्यत्वं तदवच्छिन्नभेदोपि घटाभावान्यत्वस्य साध्यस्य समानाधिकरणस्तादृशभेदस्य च

तादात्म्येन प्रतियोगिज्ञानमन्योन्याभावबुद्धिम् । प्रतिबन्धकत्वञ्चा-त्रैककालावच्छेदेन एकत्रावर्तमानत्वम् । अभावपदस्य स्वाभाव-परत्वात् । वस्तुतस्त्वेकसम्बन्धावच्छिन्नायास्तत्समानाधिकरणाभा-वप्रतियोगितायाः अनवच्छेदकमपि भवत्येव सम्बन्धान्तरावच्छिन्ना-

---

घटाभावस्वरूपत्वादतस्तत्रैव व्यभिचारस्थानान्यत्वप्रकारेणोपाधित्वा-सम्भव इति वाच्यम् । घटाभावत्वस्यैव घटाभावान्यत्वावच्छिन्नभे-दस्वरूपत्वात्तस्य च घटाभावान्यत्वरूपसाध्यासमानाधिकरणत्वा-त्। अन्यथा घटाभावस्य तथात्वे निर्घटे भूतलादावप्ययं देशो न घटा-भावान्य इति प्रतीतिप्रसङ्गादिति दिक् ॥ तज्ज्ञानेति । अभावज्ञानवि-रोधिज्ञानप्रकारार्थकत्वादित्यर्थः ॥ भेदप्रतियोगिन्यव्याप्तिमुद्धरति प्रतिबध्नाति हीति ॥ कारणीभूताभावप्रतियोगित्वलक्षणप्रतिबन्धक-त्वस्य प्रतियोगिताघटितत्वेनात्माश्रयापत्तेराह प्रतिबन्धकत्वं चेति । तथा च तत्तदभावगोचरज्ञानेन सहैककालावच्छेदेनैकत्रावर्तमानस्य ज्ञानस्य तेन सम्बन्धेन प्रकारत्वं तत्सम्बन्धावच्छिन्नतत्तदभावप्रतियो-गित्वमिति समुदितार्थः । यत्र वस्तुविशेषतदभावयोरेकेनैव पुंसा वेदनं तत्राभावज्ञानेन सह एकत्रावर्तमानस्य प्रतियोगिज्ञानस्याप्र-सिद्ध्याऽव्याप्तिरत उक्तम् एककालावच्छेदेनेति । प्रतियोगिज्ञानमा-त्रस्यैव परमेश्वरीयाभावज्ञानेन सहैककालावच्छेदेन वर्तमानत्वाद-सम्भवः स्यादत उक्तम् एकत्रेति ॥ ननु भेदबुद्धौ प्रतियोगितावच्छे-दकवत्ताज्ञानस्य प्रतिबन्धकत्वात्तदवच्छेदकेऽतिव्याप्तिः वह्न्यादिव्या-प्यवत्ताज्ञानस्य वह्न्याद्यभावबुद्धिविरोधित्वात्तद्विषयेपीत्यत आह अभावपदस्येति । घटादिभेदश्च न घटत्वादेरभाव इति नातिप्रसङ्ग इति भावः ॥ प्रतियोगितामात्रस्य लक्ष्यत्वेप्यत्यन्तपदं न देय-मेव संसर्गविशेषस्य निवेशश्रौव्ये तत एव भेदप्रतियोगितावा-रणादित्याशयेनाह वस्तुतस्त्विति । एकसम्बन्धेति । तथा च साध्यवन्निष्ठात्यन्ताभावप्रतियोगितासामान्यानवच्छेदकत्वघटितोपा-धिर्धूमवान्वह्नेरित्यादिव्यभिचारिण्यपि दुर्घटः तन्तायःपिण्डभे-दत्वादेरपि धूमवन्निष्ठसंयोगसम्बन्धानवच्छिन्नाभावप्रतियोगिता-वच्छेदकत्वात् । न च भेदत्वस्यैव लघोः संयोगादिसम्बन्धा-

याः तस्या अवच्छेदकम् । अतो यत्सम्बन्धावच्छिन्नायाः साध्यसमानाधिकरणाभावप्रतियोगितायाः अनवच्छेदकं तत्सम्बन्धावच्छिन्नाया एव साधनसमानाधिकरणाभावप्रतियोगितायाः अवच्छेदकं तद्वाच्यम् । तथा च संसर्गाभावत्वमनुपादेयमेव । वाशब्दोऽत्रास्वरससूचनाय । स च व्यधिकरणसम्बन्धेन सर्वस्य प्रतियोगिनस्तादृशभ्रमे मानाभावात् स्वाभावसम्बन्धित्वस्य स्वाभावज्ञानविषयत्वस्य वा लघोः सर्वत्र सम्भवित्वात् स्वाभावे-

---

वच्छिन्नाभावप्रतियोगितावच्छेदकत्वादयःपिण्डभेदत्वस्य गुरोरनवच्छेदकत्वमेवेति वाच्यम् । अयोगोलकनिरूपितस्वरूपसम्बन्धेनायःपिण्डभेदत्वावच्छिन्नात्यन्ताभावस्य धूमवत्यवश्यं वाच्यत्वात् न हि तादृशसम्बन्धावच्छिन्नाभावस्यापि प्रतियोगितावच्छेदकं भेदत्वमात्रं शक्यते वक्तुम् । तादृशसम्बन्धेन भेदत्वावच्छिन्नस्यायःपिण्डे सत्त्वात् तत्र तादृशसम्बन्धेनायःपिण्डभेदाभावस्यानुपपत्तेरिति भावः ॥ तत्सम्बन्धावच्छिन्नेति । अन्यथा वह्निमान् धूमादित्यादौ समवायेन साध्यव्यापकस्य द्रव्यत्वादेः संयोगेन साधनाव्यापकत्वात्तस्योपाधितापत्तेरिति भावः । तत् उपाधित्वम् ॥ सदातनसंसर्गाभावत्वरूपस्यात्यन्ताभावत्वस्य सदातनत्वांशेऽत्यन्ताभावं निवेशयतामपि त्याज्य एव निष्प्रयोजनत्वादित्याशयेनाह संसर्गाभावत्वमित्यादि । प्रतियोगितयोरेकसम्बन्धावच्छिन्नत्वलाभार्थमेवात्यन्तपदं मौलमिति तु वस्तुगतिः ॥ स चेति । अस्वरसश्चेत्यर्थः । मानाभावादित्यादिभिः पञ्चभ्यन्तैरन्वयः । व्यधिकरणेति । अभावज्ञानासमानकालीनां प्रतियोगिभत्वप्रमामादायैव समानाधिकरणसम्बन्धावच्छिन्नाभावस्थले लक्षणसमन्वयाद्व्यधिकरणेत्युक्तम् । ननु तत्तत्सम्बन्धावच्छिन्नस्वाभावज्ञानेन सह एककालावच्छेदेनैकत्रावर्तमानज्ञानविषयत्वमात्रं विवक्षितम् तच्च स्वाभावज्ञानासमानकालीनां यथाकथंचित्प्रतियोग्युपस्थितिमादायैव व्यधिकरणसम्बन्धावच्छिन्नाभावप्रतियोगिन्यपि स्थास्यतीत्यत आह स्वाभावेति । विशिष्टधीजनकत्वादिगर्भस्य स-

त्किञ्चित्साध्यव्यापकसाधनाव्यापकधर्मनिषेधो न धूमादौ। प्रकृतसाध्यव्यापकसाधनाव्यापकधर्मश्च सिद्धसिद्धिभ्यां न निषेद्धुं शक्यः। यावत्साध्यव्यापके प्रमेयत्वादौ साधनाव्यापकत्वं यावत्साधनाव्यापके च घटत्वादौ साध्यव्यापकत्वं निषिध्यत इति चेन्न। व्यधिकरणत्वात् ॥

त्वादौ षष्ठ्यर्थप्रतियोगितायाः प्रवेशात् तत्र स्वरूपसम्बन्धस्य शरणीकरणीयतया तस्यैवावश्यकत्वेन तथात्वौचित्याच्च अभावत्वप्रतिबन्धकत्वयोः प्रतियोगितायघटितत्वात् तथाविधव्यवहारगोचरस्यापि विना प्रतियोगितां निर्वक्तुमशक्यत्वाच्च ॥

म्बन्धत्वस्य प्रवेशे गौरवादाह स्वाभावज्ञानेति। ननूक्तनिरुक्तावेतयोरप्रवेशाद्गौरवं न क्षतिकरम् अन्यथा घटत्वापेक्षया गुरुत्वेन कम्बुग्रीवादिमत्त्वमपि लक्षणं न स्यादत आह स्वाभावेत्यादाविति। अभावेत्यादेश इत्यर्थः। यत्तु लाघवात्तदेव तर्हि प्रतियोगित्वमस्तु इत्यतः तत्रापि दूषणमाह स्वाभावेत्यादाविति इति तत्तुच्छम्। तथा सत्युक्तदोषेणैव मूलोक्तलक्षणस्य निरस्तत्वे अभावत्वप्रतिबन्धकत्वयोश्चेत्यादिना अग्रे पुनस्तत्र दोषोद्भावनस्य सन्दर्भविरोधापत्तेः। तथात्वम् प्रतियोगित्वम्। ननु उक्तनिरुक्तावंशान्तरे स्वरूपसम्बन्धरूपप्रतियोगित्वस्यानिवेशात्स्वाभावेत्यादावित्यादिपदमसङ्गत मत आह अभावत्वेति। यद्यभावत्वं न भावत्वावच्छिन्नप्रतियोगिताको भेदः किन्तु भावाभावसाधारणः स्वरूपसम्बन्धविशेषः तदाप्याह प्रतिबन्धकत्वेति। एकदैकत्र वर्तमानत्वत्वावच्छिन्नप्रतियोगिताकाभावरूपस्य प्रतिबन्धकत्वस्य घटकीभूतप्रतियोगतायाः स्वरूपसम्बन्धताध्रौव्ये सर्वत्रैव तादृशप्रतियोगित्वौचित्यादिति भावः। ननु स्वीयतया व्यवह्रियमाणतत्तदभावकत्व-

यावत्साधनाव्यापकमव्यापकं यत्साध्यस्य यावत्साध्यव्यापकं व्यापकं वा यस्य तत्त्वं तदिति चेन्न। सोपाधेरपि तथात्वात्। तथाहि। साधनस्य वह्नेरव्यापकं

यत्साध्यस्य यत्समानाधिकरणसाध्यस्य ॥ तथाहीत्यादि। यत्समानाधिकरणात्यन्ताभावप्रतियोगितावच्छेदकम् यावत् साध्यसमानाधिकरणात्यन्ताभावप्रतियोगितावच्छेदकं साध्यसमानाधिकरणात्यन्ताभावप्रतियोगितानवच्छेदकं यावत् यत्समानाधिकरणात्यन्ताभावप्रतियोगितानवच्छेदकम् तत्त्वमित्यर्थे तु नोक्तदोष इति ध्येयम्। प्रतियोगितयोश्चैकसम्बन्धावच्छिन्नत्वं विशेषणताविशे-

---

मेव तत्तदभावप्रतियोगित्वं वाच्यमतस्तत्र प्रतिबन्धकत्वाद्यप्रवेशान्नोक्तदोष इत्यत आह तथाविधेति। स्वीयत्वस्य स्वप्रतियोगितानतिरेकात्तत्रापि प्रतियोगित्वानुयोगित्वघटितत्वेन तद्दोषतादवस्थ्यमिति भावः ॥

यदभिन्नसाध्यस्येत्यर्थे तत्त्वमित्यनेनापि साध्यस्यैवोपग्रहे व्यधिकरणत्वादित्युक्तदोषतादवस्थ्यमतः अन्यथा व्याचष्टे यत्समानेति। यस्य साध्यं यत्साध्यमिति व्युत्पत्त्या तदर्थलाभादिति भावः ॥ नोक्तदोषः सोपाधेरपि तथात्वादिति मूलोक्तदोषो नेत्यर्थः ॥ प्रतियोगित्वयोः साधनवन्निष्ठाभावस्य साध्यवन्निष्ठाभावस्य च प्रतियोगित्वयोरित्यर्थः। एकेति। रूपं गुणत्वादित्यत्रातिव्याप्तिः साधनवन्निष्ठाभावीयसंयोगसम्बन्धावच्छिन्नप्रतियोगितावच्छेदकानां यावतामेव रूपत्वस्वरूपसाध्यवन्निष्ठाभावीयसंयोगलक्षणैकसम्बन्धावच्छिन्नप्रतियोगितावच्छेदकत्वात् साधनवन्निष्ठाभावप्रतियोगित्वं यद्यत्सम्बन्धावच्छिन्नं साध्यवन्निष्ठाभावप्रतियोगित्वमपि तत्तत्सम्बन्धावच्छिन्नं ग्राह्यमित्युक्तौ चाननुगमो गौरवं चेत्यत आह विशेषणतेति। विशेषेति कालिकादिव्यावृत्त्यै। तेन नित्य-

षावच्छिन्नत्वं वा वक्तव्यम्। तेन प्रतियोगितावच्छेदकमात्रस्यैव यत्किञ्चित्सम्बन्धावच्छिन्नसाध्यसमानाधिकरणात्यन्ताभावप्रतियोगितावच्छेदकत्वेऽपि एकसम्बन्धावच्छिन्नसाध्यसमानधिकरणात्यन्ताभावप्रतियोगितानवच्छेदकस्य सम्बन्धान्तरावच्छिन्नसाधनसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वेऽपि च न क्षतिः। व्यभिचारिणि तु यत्राधिकरणे व्यभिचारो विशेषणताविशेषावच्छिन्नतन्निष्ठाभावप्रतियोगितावच्छेदकं साध्यवत्त्वप्रकारकप्रमाविषय-

---

रूपं नित्यगुणत्वादित्यादौ कालिकविशेषणतावच्छिन्नप्रतियोगितामादाय नातिव्याप्तिः॥ प्रथमनिरुक्तेः सम्बन्धविवक्षायाःफलमाह तेनेति। प्रतियोगितावच्छेदकमात्रस्येति। तथा च धूमवान्वह्नेरित्यादावतिव्याप्तिः। अयःपिण्डभेदत्वादेरप्ययःपिण्डनिरूपतस्वरूपसम्बन्धावच्छिन्नायाः साध्यवन्निष्ठाभावप्रतियोगितायाः अवच्छेदकत्वादिति भावः। नचैवमपि तत्रातिव्याप्तिः विषयितासम्बन्धेनायःपिण्डभेदत्ववतो ज्ञानादेः स्वरूपसम्बन्धेनाभावस्य धूमवति सत्त्वादयःपिण्डभेदत्वादेरपि साध्यवन्निष्ठविशेषणतासम्बन्धावच्छिन्नाभावप्रतियोगितावच्छेदकत्वादिति वाच्यम्। स्वरूपसम्बन्धेन ज्ञानाभावस्य केवलान्वयितया तत्प्रतियोगितायाः भेदत्वादिनैव विषयितया अवच्छेदादयःपिण्डभेदत्वादेस्तदपेक्ष्य गुरुत्वादिति भावः। यत्समानाधिकरणाभावप्रतियोगित्वं यावत्साध्यसमानाधिकरणाभावप्रतियोगितात्मकं तत्त्वं व्याप्तिः अवच्छेदकत्वाप्रवेशेन लाघवादिति तु नव्याः। द्वितीयनिरुक्तेः सम्बन्धविवक्षायाः फलमाह एकेति। सामान्यतः साध्यवन्निष्ठाभावप्रतियोगितानवच्छेदकत्वोक्तौ धूमवान्वह्नेरित्यादावतिव्याप्तिः गुरुधर्माणामेव तादृशानवच्छेदकत्वादतो यत्किञ्चित्सम्बन्धावच्छिन्नायाः साध्यवन्निष्ठाभावप्रतियोगितायाः अनवच्छेदकत्वं निवेश्यम्। तथा च वह्निमान्धूमादित्यादावव्याप्तिरित्यर्थः॥ लक्षणद्वयस्यैवातिव्याप्तिमुद्धरति व्यभिचारिणीति॥ ननु नव्यमते गुरुधर्मस्याप्यवच्छेदकत्वादुक्तलक्षणद्वयमेव धूमान्वह्नेरित्यत्रातिव्याप्तं विषयितया अयोगोलकभेदत्वावच्छिन्नस्य ज्ञानादेः

यावदार्द्रेन्धनन्तत् प्रत्येकमव्यापकं साध्यधूमस्य । द्वितीये साध्यधूमस्य व्यापकमार्द्रेन्धनं तद्व्यापकं महानसीयवह्नेः ॥

त्वत्वं विशेषणताविशषावच्छिन्नसाध्यसमानाधिकरणाभावप्रतियोगितावच्छेदकमिति नातिप्रसङ्गः । वस्तुतस्तु हेतुसमानाधिकरणान्योन्याभावप्रतियोगितावच्छेदकं यावद्यद्धर्मावच्छिन्नयत्समानाधिकरणान्योन्यागावप्रतियोगितावच्छेदकम् तद्धर्मावच्छिन्नसामानाधिकरण्यम् साध्यसमानाधिकरणान्योन्याभावप्रतियोगितानवच्छेदकम् यावत्स्वसमानाधिकरणान्योन्याभावप्रतियोगितानवच्छेदकम् तत्त्वं वा व्याप्तिरिति ध्येयम् ॥

स्वरूपसम्बन्धेनाभावस्य धूमवति सत्त्वात् भेदत्वस्येवायोगोलकभेदत्वादेरपि साध्यवन्निष्ठाभावप्रतियोगितावच्छेदकत्वात् प्रतियोगितावच्छेदकत्वयोरप्येकसम्बन्धावच्छिन्नत्वप्रवेशे चातिगौरवादतः प्रतियोगित्वयोरेकसम्बन्धावच्छिन्नत्वाप्रवेशेन लघुतरं कल्पान्तरमाह वस्तुतस्त्विति । न च तादात्म्यसम्बन्धावच्छिन्नप्रतियोगिताकत्वमेवान्योन्याभावत्वमित्यत्रापि प्रतियोगितायां सम्बन्धविशेषावच्छिन्नत्वं निविष्टमेवेति वाच्यम् । नव्यमते भेदत्वस्याखण्डोपाधित्वात् । अवच्छेदकत्वयोरेकसम्बन्धावच्छिन्नत्वं पुनरत्रापि देयमेव। तेन साधनवन्निष्ठभेदप्रतियोगितावच्छेदकस्यायोगोलकान्यत्वादेः साध्यवन्निष्ठस्य स्वविषयकज्ञानभेदस्य प्रतियोगितावच्छेदकत्वेपि धूमवान्वह्नेरित्यादौ नातिव्याप्तिरिति ध्येयम् । वस्तुतोऽत्यन्ताभावगर्भव्यापकत्वस्य प्रवेशे साधनाव्यापकं यावदव्यापकं यस्येत्यादिमूले व्यापकादिपदस्य व्यापकतावच्छेदकादौ लक्षणा स्यात् अन्योन्याभावगर्भव्यापकत्वस्य प्रवेशे तु नैवमित्याशयेनैव वस्तुत इत्याद्युक्तमिति युक्तमुत्पश्यामः ॥

नापि साध्यं यावद्व्यभिचारि तदव्यभिचारित्वमनौपाधिकत्वम्।साध्याव्यभिचारित्वस्यैव गमकत्वसम्भवात्।तच्च दूषितम् ॥

नापि कात्स्न्र्येन सम्बधो व्याप्तिः । एकव्यक्तिके तदभावात् । नानाव्यक्तिकेऽपि सकलधूमसम्बन्धस्य प्रत्येकवह्नावभावात् । अत एव न कात्स्न्र्ये-

---

साध्यमिति । यावतां तेषामित्यर्थः॥ दूषितं केवलान्वयिन्यव्याप्त्या । सा च यथोक्तलक्षणेऽपि। गौरवं परमतिरिच्यत इति॥

कात्स्न्र्यं साधनस्य साध्यस्य साध्याश्रयस्य साध्यसमानाधिकरणस्य साधनाश्रयस्य साधनसमानाधिकरणस्य वा । आद्ये कृत्स्नसाधनसामानाधिकरण्यं साध्ये, कृत्स्नेषु साधनेषु साध्यसामानाधिकरण्यं वार्थः । प्रथमे एकेति नानेति च

साध्याभिन्नं यावदित्यभेदभ्रमं निराकर्तुमाह यावतामिति । तदेवाव्यभिचारि यस्येत्यर्थे वह्निमान्धूमादित्यादावव्याप्तिः यावदन्तर्गतस्य द्रव्यत्वादेः साधनाव्यभिचारित्वाभावादत आह तेषामिति। तथाच साध्यं यावतां अव्यभिचारि तेषामव्यभिचारित्वं फलितार्थः ॥ दूषितमित्यत्र मणिकृता हेत्वनुपन्यासात् स्वयं तमाह केवलेति ॥ नन्वेवमव्याप्तिभयादेव साध्याव्यभिचारित्वस्य परित्यागेप्युक्तलक्षणे बाधकाभाव इत्यत आह सा चेति। प्रमेयत्वादिसाध्यं यस्याव्यभिचारि तादृशाप्रसिद्ध्या प्रकृतलक्षणेपि केवलान्वय्यव्याप्तिरित्यर्थः ॥

वक्ष्यमाणदोषान्तरसङ्गमयितुं साध्याश्रयसमानाधिकरणयोः कात्स्न्र्यस्यानभिधानेन मूलस्य न्यूनतामपाकर्तुञ्च कात्स्न्र्याश्रयं वितर्कयति कात्स्न्र्यमित्यादिना । सकलधूमसम्ब-

म साध्येन सम्बन्धो व्याप्तिः । विषमव्याप्ते तदभावाच्च ।

व्याप्तेश्चाहेतुवृत्तित्वम् । पृथिवी पृथिवीत्वव्यापकजातेरित्यादावतिव्याप्तिश्च । अत एव नेतरः ॥ अर्थाभिधानपूर्वकं द्वितीयं निरस्यति अत एवेति । अतएव एकव्यक्तिसाध्यकाव्याप्तेरेव ॥ विषमव्याप्ते समव्याप्तेऽपि च संख्यापरिमाणादावेकत्र साधने सक-

---

न्धस्येति मूलमुपपादयितुमाद्यं विकल्पयति आद्य इति । साधनस्य कात्स्न्यैकल्प इत्यर्थः ॥ अथाशेषसाधनस्य प्रत्येकसमानाधिकरणवृत्तिसाध्यतावच्छेदकवत्त्वस्य विवक्षणान्नोक्तदोषद्वयावकाशः साधनस्याशेषत्वं च प्रकृतसाधनवद्वृत्तित्वावच्छेदकधर्माणां तादृशयावदधिकरणताव्यक्तीनां वा प्रत्येकाश्रयवृत्तित्वं तच्चैकव्यक्तिसाधनस्थलेपि न दुर्घटम् इत्यतः स्वयं दूषणमाह व्याप्तेश्चेति ॥ अथाशेषसाधनाधिकरणवृत्तिसाध्याधिकरणताकत्वं वाच्यमत आह पृथिवीत्वादि ॥ समवायावच्छिन्नस्वानधिकरणपृथिवीनिष्ठाभावाप्रतियोगित्वरूपं पृथिवीनिष्ठान्योन्याभावप्रतियोगितानवच्छेदकत्वरूपं वा पृथिवीत्वव्यापकत्वमसमवेतस्य गगनादेरपीति पृथिवीत्वे तत्समानाधिकरणत्वाभावादतिव्याप्तिर्न स्यादतो गगनादिव्यावृत्तये जातिपदं समवेतार्थकम् । द्रव्यत्वादिरूपायाः तादृशजातेः प्रत्येकं हेतुतायामेकव्यक्तिके तदभावादित्यनेनैव गतार्थत्वमतोऽनुगतरूपानुधावनम् । न चैवं पृथिवीसमवेतादित्यस्यैव सम्यक्त्वे व्यापकत्वप्रवेशो व्यर्थ इति वाच्यम् । कृत्स्नसाधनैकाधिकरणवृत्तित्वप्रवेशेप्यतिव्याप्तिदानार्थं तदुपादानादिति भावः ॥ अत एवेति । उक्तातिव्याप्तेरेवेत्यर्थः । नेतरः न कृत्स्नसाधनेषु साध्यसामानाधिकरण्यं व्याप्तिरित्यर्थः ॥ पूर्वमेकव्यक्तिसाधनस्यैवोक्तत्वात्तत्परामर्शकत्वासम्भवादन्यथा व्याचष्टे एकव्यक्तिसाध्यकेति ॥ वह्निमान्धूमादित्यादिविषमव्याप्ते इव संख्यावान्परिमाणादित्यादिसमव्याप्तेष्यव्याप्तिसम्भवान्मूलस्य न्यूनताभङ्गार्थं पूरयति समव्याप्तेपि चेति । संख्यापरिमाणादाविति । संख्यासाध्यकपरिमाणादावित्यर्थः । तद-

नच यावत्साधनाश्रयाश्रितसाध्यसम्बन्धः। साधनाश्रये महानसादौ सकले प्रत्येकं वह्नेराश्रितत्वाभावात् । नापि

लसाध्यसम्बन्धस्याभावात् । भावाच्च शब्दवान् द्रव्यत्वादित्यादौ । तृतीये साध्याश्रययावद्वृत्तित्वम् चतुर्थे साध्यसमानाधिकरणयावत्सामानाधिकरण्यमर्थः । तत्र च यथासम्भवमेकमात्रवृत्तिसाध्यके वह्न्यादौ साध्ये धूमादावव्याप्तिरतिव्याप्तिश्च सत्त्वादौ ॥ अर्थपरिष्कारपूर्वकं पञ्चमं निरस्यति न चेति । एकमात्रवृत्तिसाधने चाव्याप्तिश्च ॥ तथैव षष्ठं निरस्यति नापीति । तादृ-

---

भावादिति मूलस्य सकलसाध्यसम्बन्धाप्रसिद्धेरिति नार्थः सत्त्वप्रमेयत्वादावेव तत्सौलभ्यादतस्तस्यान्यमर्थं व्याकरोति एकत्र साधने इत्यादि ॥ ननु हेतुविशिष्टस्याशेषसाध्यस्य प्रत्येकाधिकरणं यद्धर्मावच्छिन्नाधिकरणं तादृशधर्मवत्त्वं विवक्षितमिति नोक्तदोषत्रयमित्यत आह भावाच्चेति । सकलसाध्यसम्बन्धस्येत्यनुषज्यते । कृत्स्नसाध्यस्यैकाधिकरणप्रवेशेप्यतिव्याप्त्यर्थं धूमवान्वह्नेरित्यादिकमुपेक्षितम् ॥ स्वाशङ्कितयोस्तृतीयचतुर्थयोरर्थं परिष्कृत्य दूषणमाह तृतीय इत्यादिना ॥ अत्र एतयोः एकमात्रवृत्तिसाध्यके शब्दवान्गगनत्वादित्यादौ तृतीयस्यैवाव्याप्तिः न चतुर्थस्य साध्यसमानाधिकरणयावद्धर्माणां सामानाधिकरण्यस्य तत्राप्यनपायादित्याशयेनोक्तं यथासम्भवमिति । वह्न्यादाविति । धूमस्य वह्निमदयःपिण्डावृत्तित्वेनोभयत्रापि वह्निमान्धूमादित्यत्राव्याप्तिरित्यर्थः । अतिव्याप्तिश्चेति । सत्तायां वह्न्यधिकरणयावद्वृत्तित्वस्य वह्निसमानाधिकरणयावद्धर्मसामानाधिकरण्यस्य च सत्त्वाद्वह्निमान्सत्त्वादित्यत्रातिव्याप्तिरित्यर्थः ॥ साधनाश्रयस्य कात्स्न्योक्तौ साधनाश्रयैर्यावद्भिः सम्बन्धो वाक्यार्थः स्यात्तत्र च सम्बन्धो नाश्रितत्वम् हेतुमात्रेऽतिप्रसक्तेः नापि सामानाधिकरण्यं साधनाश्रयैः पर्वतादिभिः सामानाधिकरण्यस्य धूमे विरहादव्याप्तेरत उक्तम् अर्थपरिष्कारेति ।

साधनसमानाधिकरणयावद्धर्मसमानाधिकरणसाध्यसामानाधिकरण्यम् । यावद्धर्मसामानाधिकरण्यं हि यावद्धर्माधिकरणाधिकरणत्वम् । तच्चाप्रसिद्धम् । साधनसमानाधिकरणसकलमहानसत्वाद्यधिकरणाप्रतीतेः ॥

ज्ञानां सर्वेषां महानसत्वादीनां प्रत्येकनिरूपितान्यपि सामानाधिकरण्यानि न कुत्रापि वह्नौ । अथ यद्धर्मावच्छिन्नसामानाधिकरण्यत्वेन साधनसामानाधिकरण्यव्यापकत्वं तद्धर्मावलीढसामानाधिकरण्यं विवक्षितमिति चेत् इतोऽपि लघुतया साधनव्यापकतावच्छेदकरूपावच्छिन्नसामानाधिकरण्यमेव व्याप्तिरिति सिद्धान्तयिष्यते ॥

तथा चाश्रितसाध्यसामानाधिकरण्यमेव सम्बन्धपदस्य परिष्कृतोऽर्थ इति भावः ॥ ननु यद्धर्मावच्छिन्नाश्रयेयवति साध्यवत्त्वं तादृशधर्मवत्त्वं वाच्यमत आह एकमात्रेति । द्रव्यं शब्दादित्यादौ साधनाश्रयस्य यावत्त्वाभावादव्याप्तिरित्यर्थः ॥ उक्तक्रमेणासङ्गतेराह तथैवेति । परिष्कारपूर्वकमेवेत्यर्थः ॥ ननु साधनसमानाधिकरणयावद्धर्माणां प्रत्येकं सामानाधिकरण्यं निवेश्यमतो नाप्रसिद्धमित्यत आह तादृशानामिति । साधनसमानाधिकरणानामित्यर्थः । न कुत्रापीति । तथा चैकव्यक्तिसाध्यकसङ्केतौ लक्षणसम्भवेपि वह्निमान्धूमादित्यादावव्याप्तिरेव । पर्वतीयादिवह्नेर्महानसीयधूमाद्यसमानाधिकरणत्वादिति भावः । नच साधनसमानाधिकरणयावद्धर्माणां प्रत्येकसमानाधिकरणवृत्तित्वं साध्यतावच्छेदकस्य वक्तव्यमित्युक्तदोषायोग इति वाच्यम् । तथा सति रूपत्वन्यूनवृत्तिजातिमत्वान् रूपवत्त्वादित्यादावव्याप्त्यापत्तेः । साध्यतावच्छेदकीभूतनीलत्वादिजातेस्तादृशयावद्धर्मसमानाधिकरणवृत्तित्वाभावादिति-भावः ॥ धूमादिसामानाधिकरण्यस्यापि प्रमेयत्वादिप्रकारेण

नापि स्वाभाविकः सम्बन्धो व्याप्तिः । स्वभावजन्यत्वे तदाश्रितत्वादौ वा व्याप्त्यतिव्याप्तेः ॥

नाप्यविनाभावः । केवलान्वयिन्यभावात् ॥

अविनेति । साध्यं विना साध्याभाववति यो भावो वृत्तिस्तद्विरहः । साध्यं विना अभावः साध्याभावव्यापकीभूताभावप्रतियोगित्वमिति वा ॥

ह्यादिसामानाधिकरण्यव्यापकत्वादतिव्याप्तिरत उक्तं सामानाधिकरण्यत्वेनेति । विवक्षितमिति । साधनसमानाधिकरणा यावन्तो धर्माः समानाधिकरणा यस्येति व्युत्पत्त्या तादृशार्थलाभात्तत्र यावत्पदस्य व्यापकतायामेव पर्यवसानादिति भावः । लघुतयेति । सामानाधिकरण्यद्वयाप्रवेशलाघवेनेत्यर्थः । इदमापाततः । सिद्धान्तलक्षणस्य स्वप्रतियोगिवैयधिकरण्यादिघटितत्वेन विपरीतगौरवात् अन्योन्याभावस्याप्यव्याप्यवृत्तिताया दुर्वचत्वाच्च । अत एव दीधितिकृद्भिरपि व्याप्तिग्रहोपाये स्वसमानाधिकरणा यावन्तो धर्माः तादृशसाध्यसमानाधिकरणाः तादृशसाध्यसामानाधिकरण्यमेव व्याप्तिः स्वीकरिष्यत इति ध्येयम् ॥

गगनेन विनाभावस्य वृत्तिमन्मात्र एव सत्त्वाद्व्याप्तेरतः पूरयति । साध्यमिति । विनाशब्दार्थस्याभाववतस्तादात्म्येन भावान्वये प्रकृतासङ्गतिरतः सप्तमीमन्तर्भाव्य तदर्थमाह साध्याभाववतीति । भावपदस्योत्पत्तिपरत्वे द्रव्यं जातेरित्यादावतिव्याप्तिरत आह भावो वृत्तिरिति । पूर्वस्थनञा विनाभावस्यान्वयेनाह तद्विरह इति । साध्याभाववद्वृत्तिभिन्नत्वमेव प्रागाशङ्कितमिति नाभेद इति भावः ॥ ननु साध्याभाववद्वृत्तिर्हेतुतावच्छेदकसम्बन्धेनैव ग्राह्या तथा च सत्तावान्द्रव्यत्वादित्यादावव्याप्तिः सामान्यादौ समवायेन वृत्तेरप्रसिद्धेरतः कल्पान्तरमाह साध्यं विना अभाव इति । साध्याभाववत्त्वावच्छेदेनाभावस्यान्व-

अथ सम्बन्धमात्रं व्याप्तिः व्यभिचारिसम्बन्धस्यापि केनचित् सह व्याप्तित्वात् धूमादिव्याप्तिस्तु विशिष्यैव निर्वक्तव्येति । तन्न । लिङ्गपरामर्शविषयव्याप्तिस्वरूपनिरूपणप्रस्तावे लक्षणाभिधानस्यार्थान्तरत्वात् । न च सम्बन्धमात्रं तथा । तद्बोधादनुमित्यनुत्पत्तेः । नापि व्याप्तिपदप्रवृत्तिनिमित्तमिदम् । सम्बन्धज्ञानेऽपि व्याप्तिपदाप्रयोगात् ॥

अथेति । सम्बन्धः सामानाधिकरण्यम् । व्यभिचारिसम्बन्धस्येति केनचित्किञ्चिद्रूपावच्छिन्नेन । धूमादेरपि द्रव्यत्वादिना वह्न्यव्यापकत्वात् ॥ तद्बोधादिति । न च व्यभिचाराग्रहसहकृतस्तद्बोधस्तथा । व्यभिचारतद्व्यतिरेकयोः अनुपस्थितावपि समानाधिकरणधर्मवत्ताज्ञानमात्रादनुमित्युत्पादस्य सर्वानुभवसिद्ध-

---

यात् साध्याभावव्यापकीभूतोऽभावो लभ्यते अवच्छेदकत्वस्य व्यापकत्वे पर्यवसानात् प्राग्वृत्तिनञा च पुनस्तथाविधाभावस्यान्वयात्तादृशाभावाभावत्वरूपं प्रतियोगित्वं प्राप्यत इति न व्यभिचारिण्यतिप्रसङ्गशङ्कापीत्याशयेन फलितार्थमाह साध्याभावेति ॥

ज्ञानादेर्घटादौ विषयतासम्बन्धस्य व्याप्तित्वाभावादाह सामानाधिकरण्यमिति ॥ एकनिरूपितसामानाधिकरण्यस्यान्यदीयव्याप्तित्वायोगादाह किञ्चिद्रूपेति । तथा च वह्नौ धूमसामानाधिकरण्यमेव द्रव्यत्वावच्छिन्नधूमस्य व्याप्तिरिति भावः ॥ व्यापकसामानाधिकरण्यं व्याप्तिरिति सिद्धान्तिमतेपि व्यभिचारिसम्बन्धेप्यवश्यं व्याप्तित्वमस्तीत्याशयेनाह धूमादेरपीति ॥ तद्बोधादिति मूलस्य व्यभिचाराग्रहदशायामित्यादिरित्याशयेन श-

स्यात् । हेत्वन्तरे तत्रैव च रूपान्तरेण व्यभिचाराग्रहे हेतुतावच्छेदकाग्रहेऽप्यनुमित्युत्पादाच्च । विवदन्ते च सामानाधिकरण्यज्ञानस्यैव हेतुतायाम् । व्यभिचारज्ञानाभावकारणत्वमपेक्ष्य कारणीभूतसामानाधिकरण्यज्ञाने लाघवेनाव्यभिचारस्य विषयतयावच्छेदकत्वमुचितम् । न च व्यभिचारसंशयेऽनुमित्यनुत्पादादव्यभिचारनिश्चयत्वेन कारणत्वोक्तौ गौरवम् व्यभिचारज्ञानस्य हि

ङ्क्ते न चेति । तद्बोधः सम्बन्धमात्रबोधः । तथा अनुमितिहेतुः ॥ शङ्कां निरस्यति व्यभिचारतद्व्यतिरेकयोरिति ॥ तदानीमनुमित्यनुत्पादे सर्वजनसिद्धत्वं विवादग्रस्तमत आह हेत्वन्तर इति । हेत्वन्तरे व्यभिचाराग्रहेऽप्यनुमित्युत्पादाच्चेत्यन्वयः ॥ ननु तद्धेतुकानुमितौ तद्धेतुगोचरव्यभिचारज्ञानस्याभावो हेतुर्वक्तव्य इत्यत आह तत्रैव रूपान्तरेणेति । तथा च द्रव्यत्वरूपेण धूमव्यभिचाराग्रहेपि धूमत्वावच्छिन्नहेतुकानुमितिर्न स्यादिति भावः । ननु साध्यसमानाधिकरणवृत्तितद्धर्मावच्छिन्नवत्ताज्ञानजन्यानुमितौ तद्धर्मावच्छिन्ने व्यभिचारज्ञानाभावो हेतुरतस्त्वत आह हेतुतावच्छेदकेति।तथा च वह्निसमानाधिकरणवान्पर्वत इत्यादौ हेतुतावच्छेदकधूमत्वाद्यग्रहादनुमितिर्न स्यादिति भावः ॥ साध्यसमानाधिकरणवान्पक्ष इत्यादिस्थालीयानुमितौ व्यभिचारज्ञानाभावस्याहेतुत्वेपि न क्षतिः यदि च वह्निसमानाधिकरणो वह्निव्यभिचारीतिज्ञानदशायां साध्यसमानाधिकरणवत्ताज्ञानान्नानुमितिस्तदा तादृशानुमितौ साध्यसमानाधिकरणत्वावच्छिन्नधर्मिकव्यभिचारज्ञानाभाव एव हेतुर्वक्तव्य इत्यत आह विवदन्ते चेति । तथा च सन्दिग्धव्यभिचारकत्वात्साध्यासामानाधिकरण्यज्ञानं नानुमितिहेतुरितिभावः ॥ ननु व्यापकसामानाधिकरण्यावगाहिज्ञानस्यानुमितिहेतुतावादिमते सामानाधिकरण्यज्ञानं निश्चिताव्यभिचारकमेवेति तन्मते तस्य हेतुत्वे बाधकाभाव इत्यतआह व्यभिचारेति । अव्यभिचारस्येति।हेतु व्यापकत्वांशस्य साध्यांशेप्रकारतया अवच्छेदकत्वं युक्तमित्यर्थः । न च ममापि व्यभिचारज्ञानाभावसहितसहचारज्ञानत्वेन हेतुत्वे व्यभिचारज्ञानाभावो अवच्छेदक

भ्रमत्वनिश्चयदशायामेवाविरोधितया भ्रमत्वेनानिश्चीयमानस्य विरोधित्वं वाच्यम् । अव्यभिचारनिश्चयस्य च भ्रमत्वशङ्कायामप्यनुमितिजनकतया भ्रमत्वेनागृह्यमाणस्यैव हेतुत्वमिति तवैव गौः

एवेति वाच्यम् । तथापि ज्ञानस्य द्वेधा प्रवेशेनावच्छेदकगौरवात् । विनिगमकाभावेन सहचारज्ञानसहितव्यभिचारज्ञानाभावत्वेनापि हेतुत्वान्तरापत्तेश्चेति भावः ॥ गौरवमिति । यद्यपि स्वव्यापकसाध्यसामानाधिकरण्यरूपव्याप्तिविशिष्टहेतुवैशिष्ट्यावगाहानिश्चयस्यैवानुमितिहेतुत्वाद्व्यभिचारसंशयदशायां च विशेषणतावच्छेदकीभूतव्याप्यत्वप्रकारकनिश्चयाभावात्कारणबाधेन तादृशविशिष्टवैशिष्ट्यावगाहिनिर्णयानुत्पत्त्यैवानुमित्यनुत्पादसम्भवाद्व्यभिचारांशे निश्चयत्वं नापेक्षितम् । तथापि विशेष्ये विशेषणमिति न्यायेन परामर्शादप्यनुमितिर्जायत इति प्राचीनमतेनेदम् । अन्यथा धूमव्यापकतावच्छेदकेन तदन्येन वा वह्नित्वेनावच्छिन्नवह्निसमानाधिकरणधूमवान्पर्वत इत्यादिज्ञानादप्यनुमित्यापत्तेः । न चाव्यभिचारनिश्चयत्वस्य प्रवेशेपि तदघटितगुरुतरैकरूपेण हेतुत्वमेवोचितम् व्यभिचाराज्ञानसहचारज्ञानयोः कारणताद्वयकल्पनमपेक्ष्य लाघवादिति वाच्यम् । अव्यभिचारनिश्चयत्वघटकदलद्वयस्य विशेष्यविशेषणभावेन कार्यकारणभावद्वयस्य तवाप्यावश्यकत्वादिति भावः ॥ तवैवेति । व्यभिचारज्ञानस्याप्रामाण्यं व्यभिचाराभावावच्छिन्नविशेष्यकव्यभिचारप्रकारकत्वम् । तथाच तन्निश्चयत्वघटकस्य तदभावाप्रकारकत्वस्य व्यभिचारनिश्चयत्वघटकव्यभिचाराप्रकारकत्वापेक्षया गुरुत्वान्न भ्रमत्वनिश्चयानास्कन्दितव्यभिचारज्ञानाभावत्वेन हेतुत्वं किन्तु भ्रमत्वज्ञानानास्कन्दिताव्यभिचारनिश्चयत्वेनैवेत्यर्थः । नच व्यभिचारज्ञानान्तरं भ्रम इति निश्चयेपि व्यभिचारसन्देहदशायामनुमित्यनुत्पादाद्भ्रमत्वनिश्चयविशेषाणामेव तत्तद्व्यक्तित्वेनोत्तेजकत्वमिति भ्रमत्वनिश्चयत्वेनाप्रवेशात् कुतो गौरवमिति वाच्यम् । व्यभिचारज्ञानत्वावच्छेदेन भ्रमत्वनिर्णयानां तादृशभ्रमत्वनिश्चयत्वेनानुगतरूपेणैव निविष्टत्वात् तथाविधानन्तनिर्णयानां तत्तद्व्यक्तित्वेनाभावकूटस्योत्तेजकत्वे गौरवात् । यद्वि

रवात् । नानाविधव्यभिचारज्ञानाभावानां नियतपूर्ववर्तित्वेन क्लृप्तानामपि हेतुत्वमपेक्ष्य वक्ष्यमाणैकविधाव्यभिचारज्ञानस्यैव हेतुत्वं युक्तमित्यप्याहुः । सामानाधिकरण्यविशिष्टपक्षधर्मत्वं तु पक्षे सा-

---

च व्यभिचारस्य ज्ञानसामान्यमप्रमेति ज्ञानसत्त्वेपि इदं ज्ञानं व्यभिचारविषयकं न वेदं ज्ञानं प्रमेत्येवं वा गृहीतस्य व्यभिचारज्ञानस्योत्तरमनुमित्यनुत्पादाद्व्यभिचारज्ञानत्वावच्छेदेनाप्रामाण्यज्ञानस्यापि नानुगतरूपेणोत्तेजकत्वं किन्तु विशेषत एवेति विभाव्यते तदापि तत्तदप्रामाण्यज्ञानाभावविशिष्टव्यभिचारज्ञानाभावत्वेन हेतुतायां तत्तदप्रामाण्यज्ञानाभावव्यक्तीनां विशेष्यविशेषणभावभेदेन गुरुतरानन्तकार्यकारणभावापत्तिः । अव्यभिचारनिश्चयत्वेनैव हेतुत्वे तु तद्धर्मिकाप्रामाण्यज्ञानानां तत्तद्व्यक्तित्वावच्छिन्नाभावत्वेन स्वातन्त्र्येणाप्यनुमितिहेतुतयाऽस्मन्मतेऽवच्छेकगौरवासम्भवात् । नच तत्तदप्रामाण्यनिश्चयानास्कन्दितव्यभिचारज्ञानत्वावच्छिन्नप्रतियोगिताकत्वेनोपलक्षितस्याखण्डाभावस्य तत्तद्व्यक्तित्वेनैवानुमितिहेतुत्वादगौरवानवकाश इति वाच्यम्। विशिष्टाभावस्य विशेष्यविशेषणप्रत्येकाभावानतिरेकेणोभयसाधारणस्य तत्तद्व्यक्तित्वस्यासम्भवात् । अस्तु वा विशिष्टाभावोतिरिक्तः तथापि प्रतियोग्यविशेषितस्यापि तस्य तद्व्यक्तित्वेन हेतुत्वे घटादिज्ञानविशेषाणां प्रत्येकस्य तादृशव्यभिचारज्ञानस्यान्यतरत्वावच्छिन्नप्रतियोगिताकत्वेनोपलक्षितानामप्यखण्डाभावानां तत्तद्व्यक्तित्वेनानुमितिहेतुतापत्तिः । किञ्चैवं सामानाधिकरण्यधीरपि अनुमितिहेतुर्न स्यात्। आत्मनि यद्यद्गुणदशायां नानुमितिः तत्तत्कालावच्छिन्नतत्तद्गुणान्यतमत्वावच्छिन्नाभावस्याखण्डस्यैव तत्तद्व्यक्तित्वेन हेतुतायामतिप्रसङ्गाभावात् । तस्मादखण्डतत्तद्भावत्वेन हेतुतायामवश्यमन्यथासिद्धत्वं स्वीकार्यम् । एतेन कार्यान्तरेप्यखण्डाभावो व्याख्यातः । किञ्च व्यभिचारधियोनुमितिविरोधित्वे व्यभिचारव्याप्यानां व्यभिचारावच्छेदकानां चानन्तधर्माणां तादृप्येण ज्ञानाभावा अप्यनन्ता अनुमितिहेतवो वाच्याः तत्सत्त्वेप्यनुमित्यनु-

केवलान्वयिनि केवलान्वयिधर्मसम्बन्धो व्यतिरेकिणि साध्यवदन्यावृत्तित्वं व्याप्तिः एतयोरनुमितिविशेषजनकत्वं अनुमितिमात्रे पक्षधर्मतैव प्रयोजिका नचातिप्रसङ्गः विशेषसामग्रीसहिताया एव सामान्यसामग्र्याः कार्यजनकत्वनियमादिति केचित्। तदपि नासाध्यवदन्या-

---

ध्यग्रहं विना दुर्ग्रहमिति । केवलान्वयित्वस्याग्रहे सामानाधिकरण्यमात्रग्रहादनुमित्युत्पत्तेस्तद्ग्रहोऽपि वाच्यः । तच्च वृत्तिमदसत्ता-

---

त्पत्तेरित्यधिकं गौरवम् । अस्माकं तु हेतौ व्यभिचारव्याप्यत्वाद्यग्रहदशायां व्याप्तिनिर्णयविलम्बादेवानुमितिविलम्बः । एतेन व्याप्तिनिर्णयस्य हेतुत्वे तद्धर्मिकाणां नानाविधभ्रमत्वज्ञानानामभावाच्चाप्यनुमितिहेतवो वाच्या इति लाघवात् भ्रमत्वेनानिश्चीयमानव्यभिचारज्ञानाभाव एव एवानुमितिहेतुरित्यपास्तम् । तथापि व्यभिचारावच्छेदकतत्तद्धर्मवत्ताज्ञानाभावानामनन्तहेतुत्वस्यावश्यकत्वादिति सङ्क्षेपः ॥ नानाविधेति । साध्यनिष्ठहेत्वव्यापकत्वसाधननिष्ठसाध्याभावव्यधिकरणत्वादिरूपेत्यर्थः । आहुरित्यस्वरसबीजन्तु यादृशाव्यभिचारज्ञानं हेतुत्वयोच्यते तद्विरोधिनो लघुतरस्यैव व्यभिचारस्य ज्ञानाभावो मयापि हेतुर्वाच्यः । लघुव्याप्तेर्ज्ञानसत्त्वे व्यभिचारान्तरज्ञानदशायामनुमित्युत्पत्तेस्त्वयापि स्वीकारादित्यादिकं द्रष्टव्यम् ॥ ननु साध्यसामानाधिकरण्योपलक्षितहेतुमत्त्वज्ञानं नानुमितिहेतुः किन्तु पक्षे तद्विशिष्टहेतुमत्त्वनिश्चय एव तथोक्तं तादृशज्ञानसत्त्वे व्यभिचारज्ञानदशायामप्यनुमित्यङ्गीकाराद्व्यभिचारज्ञानाभावो न हेतुर्वाच्यः कुतो गौरवं दत्तमित्यत आह सामानाधिकरण्येति । साध्यग्रहं विनेति । पर्वते वह्निमत्त्वसन्देहदशायां वह्निमद्वृत्तित्वविशिष्टधूमवान्पर्वत इत्याकारकज्ञानानुत्पत्त्या तद्धर्मिकतत्सामानाधिकरण्यविशिष्टवत्ताबुद्धिं प्रति तद्धर्मिकतद्वत्ता-

वृत्तित्वस्य धूमेऽसत्त्वात् वह्निमत्पर्वतान्यस्मिन् धूमसत्त्वात् नच सकलसाध्यवदन्यावृत्तित्वम् वह्निमतां प्रत्येकं तथात्वात्। सर्वत्र लक्षणे साध्यत्वसाधनत्वतदभिमतत्वानां व्याप्तिनिरूप्यत्वेनात्माश्रयः। साध्यत्वं हि न सिद्धिकर्मत्वं सिषाधयिषाविषयत्वं वा। महानसीयवह्नौ तदभावात्। नच सामान्यतो व्याप्त्यवगमोऽस्त्येव परस्य कथमन्यथा दूषणेनासाधकता साधयेदिति वाच्यम्। स्वार्थानुमानोपयोगिव्याप्तिस्वरूपनिरूपणं विना कथायामप्रवेशादिति॥

भावाप्रतियोगित्वादिकमन्योन्याभावप्रतियोगितानवच्छेदकत्वं वा। तथा च सर्वसाधारण्याय लाघवात्साधनवतस्तद्वृत्तित्वस्य वा वृत्ते-

---

निश्चयत्वेन हेतुत्वस्यावश्यकत्वादिति भावः। दुर्ग्रहमिति। तथाच तदर्थं पक्षे साध्यनिश्चयश्चौव्ये विनाऽनुमित्सामनुमितिः कुत्रापि न स्यादिति भावः॥ ननु साध्यवत्सामान्यभिन्नावृत्तित्वविवक्षणे मूलोक्तदोषाभावात् केषां चिन्मते स्वयं सिद्धान्तमाह केवलेति। सामानाधिकरण्यमात्रेति। मात्रपदेनाव्यभिचारग्रहनैरपेक्ष्यमुक्तम्। तद्ग्रहेऽपि केवलान्वयित्वग्रहोपि॥ तच्च केवलान्वयित्वं च। अप्रतियोगित्वादिकामित्यादिपदेन तादृशप्रतियोगितानवच्छेदकधर्मत्वादेः संग्रहः। कपिसंयोगाद्यभावस्य केवलान्वयित्वार्थं वृत्तिमदत्यन्ताभावस्य व्याप्यवृत्तित्वेन विशेष्यतया तदप्रवेशेन लाघवादाह अन्योन्येति॥ आद्यमभिप्रेत्याह साधनवत इति। वृत्तेर्विशेषणत्वमुचितमित्यन्वयः। अन्त्यमभिप्रेत्याह तद्वृत्तित्वस्य वेति। साधनवद्वृत्तित्वस्येत्यर्थः। अन्योन्याभावस्य विशेषणत्वमुचितमित्यन्वयः।

रन्योन्याभावस्य वा विशेषणत्वमुचितमिति सिद्धान्तरहस्यम् । शेषं केवलान्वयिखण्डने वक्ष्यामः ॥

तथाच साधनाश्रयवृत्तिमदत्यन्ताभावाप्रतियोगित्वं साधनवद्वृत्त्यन्योन्याभावप्रतियोगितानवच्छेदकत्वं वा साध्ये निवेश्यैकविधैव केवलान्वयिव्यतिरेकिसाधारणी व्याप्तिरनुमितिप्रयोजिकास्तु केवलान्वयित्वसाध्यवदन्यावृत्तित्वयोरुभयोस्तत्त्वापेक्षया लाघवादिति भावः ॥ ननु उक्तव्याप्तेः साधनभेदेन नानात्वादेकसाध्यकानुमितिस्थलेपि तज्ज्ञानस्यानेककार्यकारणभाव इति लाघवात् केवलान्वयिसाध्यसम्बन्धः साध्यवदन्यावृत्तित्वं वा व्याप्तिरनुमितौ हेतुरस्त्वित्यत आह शेषमिति । केवलान्वयित्वाग्रहेपि अनुमितेरानुभविकत्वात्तज्ज्ञानं न हेतुः किन्तु साध्यवदन्यावृत्तित्वज्ञानमेव साधनभेदेप्यभेदादित्यादिकमित्यर्थः ॥

समाप्तोयं पूर्वपक्षग्रन्थः ॥

चिन्तामणेः सिद्धान्तलक्षणम् ॥

अत्रोच्यते । प्रतियोग्यसमानाधिकरणयत्समानाधिकरणात्यन्ताभावप्रतियोगितावच्छेदकावच्छिन्नं यन्न भवति तेन समं तस्य सामानाधिकरण्यं व्याप्तिः ।

अन्यनिष्ठवह्नेर्धूमवत्पर्वतवृत्त्यत्यन्ताभावप्रतियोगित्वेऽपि तत्प्रतियोगिता न वह्नित्वेनावच्छिद्यते, धूमवति वह्निर्नास्तीत्यप्रतीतेः ।

दीधित्याः सिद्धान्तलक्षणम् ॥

प्रतियोग्यसामानाधिकरणेति । प्रतियोग्यसमानाधिकरणयद्रूपविशिष्टसमानाधिकरणात्यन्ताभावप्रतियोगितानवच्छेदको यो

जागदीश्याः सिद्धान्तलक्षणम् ।

वन्हित्वावच्छिन्नस्य सर्वस्यैव धूमादिमन्निष्ठाभावप्रतियोगितावच्छेदकीभूततत्तद्व्यक्तित्वाद्यवच्छिन्नत्वादव्याप्तिरित्यन्यथा व्याचष्टे प्रतियोगितानवच्छेदको यो धर्म इति । तथा च प्रतियोगितावच्छेदकेत्यस्य भावप्रधाननिर्देशतयाऽवच्छिन्नपदस्यावच्छिन्नप्रतियोगिताकपरतया तादृशप्रतियोगितावच्छेदकत्वावच्छिन्नप्रतियोगिताकभिन्नत्वं लभ्यत इति मूलेनाऽवच्छिन्नपदवैयर्थ्यमिति ध्येयम् ।

धर्मस्तद्धर्मावच्छिन्नेन येन केनापि समं सामानाधिकरण्यं तद्रूपविशिष्टस्य तद्धर्मावच्छिन्नयावन्निरूपिता व्याप्तिरित्यर्थः । दण्ड्या-

---

यद्यपि महानसीयवह्निर्नास्तीत्यादिप्रतीतिसिद्धस्य हेतुमन्निष्ठाभावस्य प्रतियोगितावच्छेदकमेव वह्नित्वमित्यव्याप्तिरेवस्थ्यम्, न च तादृशावच्छेदकतापर्याप्त्यधिकरणत्वं न वह्नित्वस्येत्यदोषः, प्रत्येकमुभयत्र पर्याप्तिसम्बन्धेनाऽसतोवच्छेदकत्वस्योभयत्र पर्याप्तिसम्बन्धेन सत्वायोगात्।तथापि साध्यतावच्छेदकतदितरोभयावच्छेद्यभिन्नाया एव प्रतियोगिताया अनवच्छेदकत्वस्य विवक्षितत्वाददोषः।न च प्रमेयाश्रयवान् धूमादित्यादावव्याप्तिः साध्यतावच्छेदकेतरस्याप्रसिद्धेरिति वाच्यम् । तदितरपदेन स्वानवच्छिन्नप्रकारतावच्छेदकस्य विवक्षितत्वात् । साध्यतावच्छेदकभिन्नो यः साध्यनिष्ठो धर्मस्तदनवच्छेद्या प्रतियोगिता तु न निवेश्या । तथा सति तादृशप्रतियोगिताशून्यसाध्यसामानाधिकरण्यस्यैव व्याप्तित्वसम्भवे साध्यतावच्छेदकस्य तादृशप्रतियोगितानवच्छेदकत्वानुसरणवैय्यर्थ्यापत्तेरिति ध्येयम् । अपि च प्रमेयवान् वाच्यत्वादित्यादावव्याप्तिः तथा हि साध्यतावच्छेदकातिरिक्तं साध्यवृत्ति यद् घटत्वादिकं तदनवच्छेद्यप्रतियोगिताकस्य हेतुसमानाधिकरणाभावस्याप्रसिद्धेरिति तु नव्याः । द्रव्यत्वादिरूपेण धूमे वह्निव्याप्यत्वस्य धूमसामान्ये वा तत्तद्वह्निव्याप्यत्वस्य वारणार्थं विशिष्य लक्ष्यं निर्दिशति तद्रूपविशिष्टस्येत्यादिना । तद्धर्मावच्छिन्नहेतुकतादृशधर्मावच्छिन्नविधेयकानुमितेर्जनकतायां विषयविधयावच्छेदिका इति तदर्थः।तेन व्याप्तिपदेनापि तादृशसामानाधिकरण्योक्त्या न पौनरुक्त्यम् । व्याप्तेः सामान्यरूपतालाभाय यावदिति ॥ ननु दण्डिमान् दण्डिसंयोगादित्यत्राव्याप्तिः चालनीन्यायेन दण्डमात्रस्यैव प्रतियोगितावच्छेदकत्वात् । न च शुद्धसाध्यतावच्छेदकस्थले प्रतियोगितानवच्छेदकत्वमित्यत्रावच्छेदकत्वं निरवच्छिन्नमिव विशिष्टसाध्यतावच्छेदकस्थले येन रूपेण साध्यतावच्छेदकत्वं तत्तदितरोभयानवच्छिन्नप्रतियोगितावच्छेदकत्वं ग्राह्यम् । अन्यथा पर्वते महानसीयवह्निवृत्तित्वविशिष्टजातिमान्नास्तीत्यादिप्रतीत्या विशिष्टजात्यस्तादृशाभावप्रतियोगितावच्छेदकतया वह्निमान् धू-

दौ साध्ये परम्परासम्बद्धं दण्डत्वादिकमेव साध्यतावच्छेदकमतो

मादित्यादाविव जातिमत्वान् घटत्वादित्यादावव्याप्तिप्रसङ्गात्, घटे पटसमवेतत्वविशिष्टजातिमान्नास्तीत्यादिप्रतीत्या विशिष्टजातेस्तादृशाभावप्रतियोगितावच्छेदकत्वात्, तथा च तद्दण्डवान्नास्तीतिप्रतीत्या तत्तद्विशिष्टदण्डव्यक्तेरेवावच्छेदकत्वावगाहनात् शुद्धदण्डव्यक्तीनां दण्डत्वतदितरोभयानवच्छिन्नं यद्धेतुमन्निष्ठाभावप्रतियोगितावच्छेदकत्वं तदभावसत्वान्नाव्याप्तिरिति वाच्यं। प्रमेयदण्डवान्नास्तीत्यादौ प्रमेयत्वोपलक्षितस्येव तद्दण्डवान्नास्तीत्यादावपि तत्तोपलक्षितदण्डमात्रस्यैवावच्छेदकत्वकल्पनात् । केवलस्यावच्छेदकत्वासम्भव एव विशिष्टस्य तथात्वस्वीकारात् अन्यथा प्रमेयत्वविशिष्टदण्डादेरपि तथात्वापत्तेरत आह दण्ड्यादाविति । हेतुमति दण्डसामान्याभावसत्त्वात् दण्डत्वमपि तादृशावच्छेदकमेवेत्यत उक्तं परम्परासम्बद्धमिति । तथा च स्वाश्रयवत्त्वरूपपरम्परासम्बन्धेन दण्डत्ववतो दण्डिनः साधनवत्यभावविरहान्नाव्याप्तिः । साध्यतावच्छेदकतावच्छेदकसम्बन्धावच्छिन्नाया एव हेतुमन्निष्ठाभावप्रतियोगितावच्छेदकतायाः प्रविष्टत्वात् । अन्यथा विषयितया रूपत्वादिमतो ज्ञानस्य समवायेनाभावस्य हेतुमति सत्वाद्रूपवान् पृथिवीत्वादित्यादावव्याप्तिप्रसङ्गादिति भावः । यदि च शुद्धदण्डव्यक्तेरवच्छेदकत्वावगाहिप्रत्ययान्तरासत्वात् तद्दण्डी नास्तीति प्रतीत्या तत्तद्विशिष्टदण्डव्यक्तेरेवावच्छेदकत्वं युक्तं दण्डी नास्तीति प्रतीत्यन्यथानुपपत्त्या दण्डत्वावच्छेदकत्वसिद्धौ प्रमेयदण्डवान्नास्तीत्यादेरपि तन्मात्रावच्छेदकत्वेनैव सामञ्जस्ये विशिष्टस्य तत्रावच्छेदकत्वाकल्पनात् तथा च कथमुक्ताव्याप्तिरित्युच्यते तदा रूपत्वन्यूनवृत्तिजातिमत्वान् रूपादित्यादावव्याप्तिः सर्वस्या एव नीलत्वपीतत्वादिरूपायाः रूपत्वन्यूनवृत्तिजातेः साधनवन्निष्ठाभावप्रतियोगितायाः निरवच्छिन्नावच्छेदकत्वाद् रूपवति नीलो नास्तीत्यादिप्रत्ययादित्याशयेन दण्ड्यादावित्यादिपदमुपात्तम्। तथा च तत्रापि स्वन्यूनवृत्तिजात्याश्रयत्वसम्बन्धेन रूपत्वमेव साध्यतावच्छेदकमिति भावः । साध्यतावच्छेदकमिति । अनुमितिविधेयतावच्छेदकमित्यर्थः । तथा चोक्तव्याप्तिज्ञानाद्दण्ड्यंशे

नाव्याप्तिः । इत्यश्च इदं द्रव्यं गुणकर्मान्यत्वे सति सत्वादित्यादौ

दण्डत्वप्रकारिका दण्डत्ववत्वानित्येवानुमितिः न तु दण्डिमानिति दण्डप्रकारिकापि तस्य व्यापकतावच्छेदकत्वेनाग्रहात् कारणबाधेन तदवच्छिन्नविधेयताकानुमित्यसम्भवादिति भावः । वस्तुतो दण्डत्वस्य साध्यतावच्छेदकत्वे दण्डिमानित्यनुमितिर्न स्यात् दण्डानां व्यापकतानवच्छेदकत्वादित्यस्वरसादेव दण्डत्वादिकमित्यादिपदमुपात्तम् । तेन तत्र दण्डव्यक्तीनामेव स्ववृत्तिदण्डत्वावच्छिन्नवत्तालक्षणपरम्परासम्बन्धेन साध्यतावच्छेदकत्वलाभात् दण्डिमानित्यनुमितेर्नानुपपत्तिलेशोपीति ध्येयम् । केचित्तु साध्यसाधनभेदेन व्याप्तिग्रहानुमित्योः कार्यकारणभावभेदात् यत्र दण्डत्वादिविशिष्टं साध्यतावच्छेदकं तत्र हेतुमन्निष्ठाभावप्रतियोगितावच्छेदकतानवच्छेदको यो धर्मस्तद्विशिष्टावच्छिन्नसामानाधिकरण्यरूपैव व्याप्तिस्तद्विशिष्टावच्छिन्नविधेयकानुमितिप्रयोजिका एवं यत्र परम्परया दण्डत्वादिकमेवानुमितौ विधेयतावच्छेदकं तत्र हेतुमन्निष्ठाभावप्रतियोगितानवच्छेदको यो धर्मः परम्परया तदवच्छिन्नसामानाधिकरण्यरूपैव व्याप्तिः प्रयोजिकेति सामानाधिकरण्यांशे दण्डादेः प्रवेशाप्रवेशकृत एव दण्डिमान् दण्डत्ववत्वानित्यनुमित्योर्दण्डादिविषयकत्वनियम इत्याहुः । यत्तु दण्डत्वधर्मिकनिरुक्तानवच्छेदकत्वज्ञानस्यैव कार्यतावच्छेदकं दण्डावच्छिन्नविधेयताकानुमितित्वमित्यनुमितौ दण्डप्रकारकत्वं नानुपपन्नमिति । तत्तुच्छम् । परम्परया दण्डत्वावच्छिन्नविधेयकानुमितित्वस्यापि तादृशज्ञानकार्यतावच्छेदकतया सर्वत्र दण्डिमान् दण्डत्ववत्वानित्युभयाकारानुमित्यापत्तेरुभयधर्मावच्छिन्नस्यैव सामग्रीसम्भवादिति दिक् । अपरे तु नोक्तव्याप्तिज्ञानं दण्डिमान् दण्डिसंयोगादि[वह्निसंयोगवान्वे]त्याद्यनुमितौ हेतुः किं तु वक्ष्यमाणान्योन्याभावघटितव्याप्तिज्ञानमत एव यथायथमित्यादिग्रन्थोपि सङ्गच्छत इत्याहुः । नव्यास्तु दण्डिमानित्यादौ न संयोगेन दण्ड्यादेः प्रकारत्वं किं तु स्ववृत्तिपुरुषत्वावच्छिन्नाधिकरणत्वसम्बन्धेन । नचैवमनुभवापलापापत्तिः । दीधितिकृन्मतेपि दण्डस्य साध्यतावच्छेदकधर्मविधया संयोगस्य साध्यतावच्छेदकतावटक-

सत्त्वाद्यधिकरणगुणादिनिष्ठात्यन्ताभावप्रतियोगित्वेऽपि द्रव्यत्वादे र्नाव्याप्तिः । साधनस्य विशिष्टसत्त्वादेर्गुणादाववृत्तेः । सामानाधिकरण्यव्यक्तीनां भेदेऽपि निरूपकतावच्छेदकस्याऽधिकरणताव-

---

संसर्गाविधयाऽवगाहितापलापापत्तेरिति प्राहुः ॥ यद्रूपविशिष्टेत्यस्य फलमाह इत्थं चेति । चोऽवधारणे । इत्यादौ । इत्यादिन्यायस्थलीयहेतौ । तथा च न्यायः पक्षनिर्देशं विना नास्त्यत इदंपदेन तन्निर्देशः एवमग्रेपि । यत्तु द्रव्ये धर्मिणि तादात्म्येन गुणकर्मणोः साध्यताभ्रमं निरसितुं इदमिति पक्षनिर्देश इति । तन्मन्दम् । एवमपि इदंत्वविशिष्टद्रव्ये गुणकर्मणोः साध्यताभ्रमस्यानिरासादिति । गुणादावावृत्तेरिति । गुणादावभावादित्यर्थः । तथा च हेतुतावच्छेदकावच्छिन्नाधिकरणत्वं न गुणस्येति भावः । यद्यप्यवश्यं कल्पनाभिः पर्वतत्वचत्वरत्वादितत्तद्धर्मविशिष्टधूमत्वाद्यवच्छिन्नाधिकरणताव्यक्तिभिरेव धूमवानितिप्रतीत्युपपत्तौ धूमत्वावच्छिन्नाधिकरणतायां मानाभावात् वह्निमान् धूमादित्यादावव्याप्तिः हेतुतावच्छेदकीभूतधूमत्वावच्छिन्नाधिकरणत्वाप्रसिद्धेः, तथापि हेतुतावच्छेदकधर्मे स्वाश्रयाधिकरणीभूतयन्निष्ठाधिकरणतानवच्छेदकत्वस्य सामान्यतोधिकरणतावच्छेदकत्वस्य च द्वयोर्व्यतिरेकस्तथाविधहेतुतावच्छेदकाश्रयाधिकरणमेव हेतुतावच्छेदकावच्छिन्नाधिकरणेत्यनेन विवक्षितं वह्निमान् धूमादित्यादौ च तादृशहेत्वधिकरणं धूमस्याधिकरणमात्रं द्रव्यं विशिष्टसत्त्वादित्यादौ च तादृशं हेत्वधिकरणं द्रव्यमेव न तु गुणादि विशिष्टसत्तात्वे तन्निष्ठाधिकरणतानवच्छेदकत्वस्य सामान्यतोधिकरणतावच्छेदकत्वस्य च द्वयोः सत्त्वादिति ध्येयम् । साध्यसाधनभेदेन व्याप्तेर्भेदात् यत्र साधनतावच्छेदकं नाधिकरणतावच्छेदकं तत्र तदाश्रयसमानाधिकरणत्वमेव निवेश्यमित्यपि वदन्ति । ननु सामानाधिकरण्यस्य व्याप्तित्वे तस्य प्रतिधूमं भिन्नत्वेन धूमसामान्ये वह्निसामान्यस्यैका व्याप्तिरिति व्यवहारोनुपपन्न इत्यत आह सामानाधिकरण्येति । तथा च वह्नित्वधूमत्वाद्यनुगमादेव तत्र व्याप्तेरैक्यव्यवहारो न तु वस्तुगत्या-

च्छेदकस्य चैक्याद्व्याप्तेरैक्यम् । वस्तुतस्तु धूमत्वादिविशिष्टव्यापकवह्निसामानाधिकरण्यस्य रासभादिसाधारणत्वात् धूमत्वादिमति तादृशसामानाधिकरण्यं तद्वति धूमत्वादिकं वा व्याप्तिः । आद्या भिन्ना द्वितीया त्वभिन्नैवेति ध्येयम् । अयं कपिसंयोगी एतद्वृक्ष-

---

पि व्याप्तेरैक्यमिति भावः । नन्वेवं [सामान्यलक्षणाऽस्वीकारे] महानसीयवह्निसामानाधिकरण्यस्य स्मृतस्य पक्षवृत्तिधूमादावसत्वात् पर्वतीयवह्निसामानाधिकरण्यस्य च प्राग्ननुभवात् कुतः परामर्श इत्याशङ्क्यायमेव हि सा व्याप्तिरिति परामर्शसिद्धान्तग्रन्थोऽसङ्गत इत्यत आह वस्तुतस्त्विति । रासभादीति । तथा च धूमव्यापकवह्निसमानाधिकरणरासभवान् पर्वत इति ज्ञानाद्प्यनुमितिः स्यादिदिति भावः।न च धूमादिव्यापकवह्न्यादिसमानाधिकरणधूमादिमत्ता-निश्चयत्वेनैव परामर्शस्य धूमादिलिङ्गकानुमितौ हेतुत्वादुक्तव्याप्ते रासभादिसाधारण्येपि न क्षतिरिति वाच्यं। पक्षधर्मांशे विषयतयाऽनुमितिजनकतावच्छेदकस्यैव व्याप्तिपदार्थतया धूमत्वादेस्तत्र निवेशे तदघटितस्यैव व्याप्तित्वादिति भावः । धूमत्वादिमतीति । तथा च तस्येति मूलस्थं तत्पदं लक्ष्ये लक्षणे चोभयत्र एवान्वितमिति भावः । ननु साधनिष्ठसामानाधिकरण्यस्य व्याप्तित्वे एकैव हीत्यादि ग्रन्थानुपपत्तिस्तदवस्थैव विशिष्टसत्वव्यापकीभूतद्रव्यत्वसामानाधिकरण्यवतः सत्वस्य गुणादौ परामर्शाद् गुणेपि द्रव्यत्वानुमितिः प्रमा स्यादत आह तद्वतीति । तादृशसामानाधिकरण्यवतीत्यर्थः । तथा च तादृशसामानाधिकरण्यविशिष्टधूमत्वं व्याप्तिस्तत्प्रकारिकैव पक्षधर्मताधीरनुमितिहेतुः । तत्र च नीलघटत्वप्रकारकबुद्धौ घटत्वस्येव स्वरूपत एव धूमत्वस्य भानं न तु धूमत्वत्वेन यतो गौरवमिति भावः । आद्येति । तथा च तामुपादायैव पर्वतीयवह्निधूमयोरसन्निकर्षात्तयोः कथं व्याप्तिग्रह इति परामर्शीयपूर्वपक्षग्रन्थ इति भावः।द्वितीयेति।तथा च तामभिप्रेत्यैव एकैव हि सा व्याप्तिरिति परामर्शीयसिद्धान्तग्रन्थ इति भावः । यत्रैकमेव साध्याधिकरणं तत्रैतद्रूपवानेतद्रूपादित्यादावाद्याप्यभिन्नैव यत्र च द्रव्यत्वादौ साध्ये रूपत्वव्याप्यजातिमतो हेतुत्वं तत्र हेतुतावच्छेदकी-

त्वादिसादिसंग्रहाया ऽसमानाधिकरणान्तम् । यत्तु इदं संयोगि द्रव्यत्वादिसत्राव्याप्तिवारणाय तत्, संयोगस्य शाखाद्यवच्छेदेन वृत्तेर्वृक्षत्वावच्छेदेन तत्सामान्याभाववृत्तावविरोधात् तत्र चातीन्द्रियस्य संयोगस्य सत्त्वात्परितः प्रतियोग्युपलब्धेर्दोषाद्वा वृक्षे न संयोग इत्यादि नाध्यक्षमिति । तन्न । द्रव्ये संयोगसामान्याभावे

भूतानां नीलत्वादिजातीनां नानात्वेन द्वितीयापि क्वचिद्भिन्नैवेति मन्तव्यं । [आद्या भिन्ना अनुमितेर्विषयविधया जनकतावच्छेदकाद्भिन्ना किन्तु व्यवहारौपयिकीति, द्वितीयात्वभिन्ना विषयतयाऽनुमितिजनकतावच्छेदकादभिन्नैवेत्यर्थ इत्यपि कश्चित्] कपिसंयोगिन्येतत्पदार्थस्य साध्यताभ्रमखण्डनार्थमयमिति पक्षनिर्देशः । साम्प्रदायिकमते संयोगसामान्याभावस्य द्रव्येऽभावात् कपीति । वृक्षमात्रे कपिसंयोगाभावादेतदिति । न चाभावे हेतुसामानाधिकरण्यस्यैव हेत्वधिकरणे निरवच्छिन्नवृत्तित्वरूपस्य निवेशादुक्ताव्याप्तिव्युदाससम्भवात् प्रतियोगिवैयधिकरण्यनिवेशो मूलकृतामनुचित इति वाच्यम् । अग्रे समाधास्यमानत्वादिति भावः । तत् । असमानाधिकरणान्तम् । ननु शाखामूलादिसर्वावयवावच्छेदेन सर्वत्र द्रव्ये गगनादिसंयोगस्य सत्वात्कुतस्तत्सामान्याभावस्य द्रव्ये सम्भव इत्यत आह । संयोगस्येति । वृक्षत्वेति । शाखाद्यवच्छेदेन तत्तत्संयोगसत्वेपि वृक्षत्वावच्छेदेन कस्याश्चिदपि संयोगव्यक्तेरसत्वात्तदवच्छेदेनैव संयोगसामान्याभावसम्भवः अवच्छेदकभेदेनैकत्र भावाभावयोः समावेशादिति भावः । नन्वेवं वृक्षे संयोगसामान्याभावस्य कुतो नाध्यक्षमित्यत आह तत्र चेति । तत्र संयोगसान्याभावे सत्वादित्यस्य प्रतियोगितासम्बन्धेनेत्यादि । तथा च संयोगसामान्याभावस्यायोग्यप्रतियोगिकत्वान्नाध्यक्षमिति भावः ननु प्रतियोगितावच्छेदकविशिष्टयत्किञ्चित्प्रतियोगिनो योग्यत्वमत्यन्ताभावग्रहे तन्त्रं न तु योग्यमात्रप्रतियोगिकत्वम् अन्यथा गुणेपि संयोगसामान्याभावस्य तादृशप्रत्यक्षं न स्यादित्यतआह परित इति । परितः सर्वावयवावच्छेदेन प्रतियोगिग्रहात्मकदोषाद्वेत्यर्थः । न चै-

मानाभावात्। न च यो यदीययावद्विशेषाभाववान् स तत्सामान्याभाववानिति व्याप्तेर्यावत्संयोगाभावा एव मानम् । यत्तदर्थयोर-

---

वमपि प्रतियोगिग्रहोत्पत्तिदशायां प्रत्यक्षं दुर्वारं, प्रतियोग्युपलम्भकसामग्र्या अपि दोषत्वोपगमात् प्रतियोगिन उपलब्धिर्यया इति व्युत्पत्त्या तस्या एव प्रस्तुतत्वादिति भावः । प्रतियोग्युपलम्भरूपदोषाभावस्य संयोगसामान्याभावप्रत्यक्षे कार्यसहभावेन हेतुत्वोपगमान्नोक्तदोष इत्यपि वदन्ति। न चेति। मानमिति परेणान्वयः । यो यदीयेति । यो यज्जातिसमानाधिकरणोभयावृत्तिधर्मावच्छिन्नयत्संबन्धावच्छिन्नप्रतियोगिताकयावद्भाववान् स तज्जात्यवच्छिन्नतत्सम्बन्धावच्छिन्नप्रतियोगिताकाभाववानित्यर्थः। तेन न स्वरूपासिद्धिर्न वा सिद्धसाधनम्। जात्युपादानात् गुरुधर्मस्य प्रतियोगितानवच्छेदकत्वे तदवच्छिन्नाभावाप्रसिद्ध्यापि न व्यभिचारः । न च सत्वगुणत्वाद्यवच्छिन्नाभावमादाय स्वरूपासिद्धेर्वारकस्योभयावृत्तिपदस्य वैयर्थ्यम्। व्यभिचारवारकस्येवासिद्धिवारकस्यापि विशेषणस्य सार्थकतायाः पक्षधरमिश्रादिसम्मतत्वात्। अत एव नित्यत्वसाध्यकानुमाने सामान्यवत्वे सति विशेषगुणान्तरासमानाधिकरणैकमात्रवृत्तिगुणत्वहेतौ शब्देतरार्थकस्यान्तरपदस्य शब्दमष्यालोके सार्थकत्वं तैः समर्थितम । यद्वा यदीयानां यद्धर्मावच्छिन्नप्रतियोगित्वानां यावतां विशेषाभाववान् प्रत्येकावच्छिन्नप्रतियोगिताकयावद्भाववान्यः स तद्धर्मावच्छिन्नप्रतियोगिताकाभाववानित्यर्थः । तथा च संयोगत्वावच्छिन्नप्रतियोगिताव्यक्तीनां प्रत्येकावच्छिन्नाभावकूटवत्वस्य पक्षे सत्वान्नासिद्धिर्न वा व्यर्थविशेषणत्वमिति ध्येयम । यो यद्धर्मन्यूनवृत्तिधर्मावच्छिन्नयावद्भाववान् स तद्धर्मावच्छिन्नाभाववानित्यर्थस्तु संयोगत्वन्यूनवृत्तिधर्मावच्छिन्नप्रतियोगिताकस्य घटावृत्तिसंयोगत्वादिवृक्षान्यासमवेतत्वाद्यवच्छिन्नाभावस्य यावदन्तर्गतस्य वृक्षादौ पक्षे स्वरूपासिद्धत्वादनुपादेयः। संयोगयावद्विशेषाभावाइति । न च सर्वावयवावच्छेदेन वृक्षे गगनादेरेक एव संयोगो लाघवादिति तस्यैवाभावविरहात्संयोगयावद्विशेषाभाववत्वं पक्षे स्वरूपासिद्धमिति वाच्यम् ।

ननुगमात् एकावच्छेदेन यावद्विशेषाभाववत्त्वस्योपाधित्वाच्च । एतेन अयं संयोगसामान्याभाववान् संयोगयावद्विशेषाभाववत्त्वादिति निरस्तम् । व्यर्थविशेषणत्वादप्रयोजकत्वान्निर्गुणत्वादेरुपा-

---

अतिप्रसङ्गभङ्गाय शाखादितत्तदवयवावच्छिन्नवृत्तिकसंयोगं प्रति तत्तदवयवत्वेन हेतुत्वस्यावश्यकतया वृक्षे व्याप्यवृत्तिगगनसंयोगस्यासम्भवादिति भावः । प्राचां मते यत्तदर्थयोरनुगमादाह एकावच्छेदेनेति । इदमुपाधेः साधनव्यापकत्वरक्षायै । न चैवं तत्तत्संयोगाभावस्य गुणे व्याप्यवृत्तित्वादेकावच्छिन्नत्वेन साध्यव्यापकत्वं दुर्घटम् [व्याप्यवृतेरवच्छेदकानङ्गीकारात्] इति वाच्यम् । एकावच्छेदेनेत्यनेन निरवच्छिन्नवृत्तिकत्वविशिष्टस्य विवक्षितत्वात् । न च तथापि कपिसंयोगसामान्याभाववति वृक्षे निरवच्छिन्नवृत्तिकत्वविशिष्टस्य तदीययावद्विशेषाभावस्यासत्वादुपाधेः साध्याव्यापकत्वमिति वाच्यं । जात्यवच्छिन्नाभावस्यैवोक्तव्याप्तौ साध्यविधया प्रवेशात् कपिसंयोगाभावस्य चातथात्वेन तं प्रति तदीययावद्विशेषाभावस्योक्तरूपेणाव्यापकत्वेपि क्षत्यभावात् । न चाभिघातादिसामान्याभावस्य वृक्षे सत्वात् तत्र च निरवच्छिन्नवृत्तिकत्वविशिष्टस्य तदीययावद्विशेषाभावस्यासत्वादेवमप्युपाधेः साध्याव्यापकत्वमिति वाच्यम् । गुणविभाजकजातेरेव हेतुसाध्ययोः प्रवेशात् । केचित्तु एकावच्छेदेनेत्यस्यावच्छेदकतासम्बन्धेन तदभावाधिकरणीभूतदेशस्याऽवच्छेद्यतासम्बन्धेनाभाववत्वेनेत्यर्थः तथा च तद्विशिष्टयावद्विशेषाभाववत्वमुपाधिरित्याहुस्तच्चिन्त्यम् । यत्वेकावच्छेदेनेत्यस्य परस्परानवच्छेदकानवच्छिन्नवृत्तिकत्वविशिष्टेत्यर्थमाह । तन्न । व्याप्यवृत्तिरूपादीनां विशेषाभावस्यावच्छेदकाप्रसिद्ध्या तदनवच्छेदकस्याप्यसम्भवेन तत्रैव साध्याव्यापकत्वतादवस्थ्यादिति दिक् । यतदभ्यां विनाकृतमनुगतानुमानमाशङ्क्य निषेधति एतेनेति । वक्ष्यमाणदोषेणेत्यर्थः । व्यर्थेति । संयोगसामान्याभावस्य त्वन्मते केवलान्वयितया तत्साध्यतायामभाववत्वादित्यस्यैव सम्यक्त्वादिति भावः । अथास्वभाववत्वादिति तर्हि हेतुरत आह । अप्रयोजकत्वादिति । [अनुकूलतर्करहितत्वादित्यर्थः] ननु निरुपाधिकत्वमेव प्रयोजकमत आह । निर्गुणत्वादेरिति । आ-

धित्वाच्च । न च प्रतियोग्यनवच्छेदकतयैव वृक्षत्वादेरभावावच्छेदकत्वं, गुणाद्यनवच्छेदकप्रमेयत्वादेस्तदभावावच्छेदकत्वप्रसङ्गात् । यथा च घटपूर्ववर्त्तित्वस्य प्रतिदण्डं वह्निसामानाधिकरण्यस्य वा प्रतिधूमं भिन्नत्वेऽपि दण्डत्वं धूमत्वं वा तत्सामान्यस्यावच्छेदकं तथैव संयोगसामान्यस्यावच्छेदकं द्रव्यत्वादिकमित्यस्यापि सुवचत्वाच्चेति सम्प्रदायविदः । नवीनास्तूत्पत्तिकालावच्छेदेन घटादौ गुणस्य प्रलयावच्छेदेन गगनादौ संयोगस्य सामान्याभावो वर्त्तते,

---

दिना द्रव्यभिन्नत्वादेरुपग्रहः । अत्र यद्यपि निर्गुणत्वोपाधेः स्वाभावेन साध्याभावोन्नायकतया न दोषत्वं संयोगस्यैव साध्याभावतया वृक्षादौ तस्येष्टत्वात् नापि व्यभिचारोन्नायकतया तत एव, तथापि स्वव्याप्यत्वेन साध्यस्य पक्षावृत्तित्वोन्नायकतया दूषकत्वं बोध्यम् । संयोगसामान्याभावो न वृक्षवृत्तिः निर्गुणत्वव्याप्यत्वादित्यनुमानेनापि वृक्षः संयोगसामान्याभाववानित्यनुमितेः प्रतिरोधादिति ध्येयम् । ननु यो यद्धर्मस्यानवच्छेदकः स तदभावस्यावच्छेदक इति व्याप्त्यैव वृक्षत्वादेः संयोगसामान्याभावावच्छेदकत्वं सेत्स्यतीत्याशङ्क्य निराचष्टे न चेति । गुणादीति । तथा च व्यभिचाराभावोक्तव्याप्तिरिति भावः । ननु वृक्षत्वं संयोगसामान्याभावावच्छेदकं संयोगसामान्यानवच्छेदकत्वादिति विशिष्यैव व्याप्तिर्वाच्या प्रमेयत्वसत्वादेः पक्षसमत्वादतः स्वरूपासिद्धिमाह यथा चेति । प्रतिदण्डमिति । भिन्नत्वेपीति परेणान्वयः । नन्वव्यवहितपूर्ववर्तिताया अवच्छेदकं न दण्डत्वमतिप्रसङ्गात् किं त्वव्यवहितपूर्ववर्तिजातीयतायाः सा चाभिन्ना अतः संयोगस्थलएवानुरूपं दृष्टान्तमाह वह्नीति । तत्सामान्यस्येति । घटपूर्ववर्तित्वसामान्यस्य वह्निसामानाधिकरण्यसामान्यस्य चेत्यर्थः । केचित्तु कथितव्याप्तावप्रयोजकत्वमन्यथा तदभावानवच्छेदकत्वहेतुना तदवच्छेदकत्वमेव कुतो न वृक्षत्वादेः साध्यते वृक्षत्वाद्यवच्छेदेन तत्तत्संयोगव्यक्तीनामसत्वेपि संयोगसामान्यस्य सम्भवादित्यभिप्रायकोऽयं ग्रन्थ इत्याहुः । गुणस्येति । सामान्याभाव इति परेणान्वयः । नन्वाद्यक्षणे घटे गुणो नास्तीति प्रत्यक्षमसम्भवि सन्निकर्षाद्यभावात्

तथा धूमवत्यपि विरहो दहनस्य, इह पर्वते नितम्बे हुताशनो न शिखर इति प्रतीतेः संयोगेन द्रव्यस्याप्यव्याप्यवृत्तित्वात्, वृत्तेरव्याप्यवृत्तित्वे वृत्तिमतो व्याप्यवृत्तित्वस्यासन्तमसम्भावितत्वाच्च, एवं प्रतियोगिमतोरपि कालदेशयोर्देशकालभेदावच्छेदेन तदभावः तथा च तत्तत्साध्यकाव्याप्तिवारणाय तत् । नोपादेयञ्च सर्वथैव

प्रथमक्षणे घटे गुणो नास्तीत्यादिव्यवहारादिकं च सन्दिग्धप्रामाण्यकमतः स्वलान्तरमाह प्रलयावच्छेदेनेति । तदानीं जन्यभावसत्वे प्रलय एव व्याहन्येतेति भावः । ननु महाप्रलये मानाभावात्तदवच्छेदेनेत्ययुक्तमत आह तथेति । ननूक्तप्रतीतिः पर्वतवृत्तिहुताशनावच्छेदकत्वाभावं शिखरे शिखरावच्छिन्नपर्वतवृत्तित्वाभावं वा हुताशनेऽवगाहते न तु पर्वत एव हुताशनाभावमिति यदि ब्रूयातदाप्याह वृत्तेरिति । वृत्तेः सम्बन्धस्य, वृत्तिमतः सम्बन्धवतः, तथा च यो यदवच्छेदेन यदीययत्सम्बन्धाभाववान्स तदवच्छेदेन तत्सम्बन्धावच्छिन्नतदभाववानिति व्याप्त्यापि शिखरावच्छेदेन संयोगसम्बन्धावच्छिन्नवह्न्यभावसिद्धिरिति भावः । ननूक्तव्याप्तावप्रयोजकत्वमन्यथा तुल्यन्यायेन यो यदीययत्सम्बन्धवान् स तत्सम्बन्धेन तद्वानिति व्याप्त्याऽपि कुण्डादिसंयोगिनो वदरादेः संयोगेन कुण्डादिमत्तापत्तेरित्युक्तावाह एवमिति । भेदो विशेषः । घटवत्यपि काले इदानीं तन्तौ न घट इति प्रतीत्या तन्त्ववच्छेदेनैतत्काले घटाभावः तथा घटवत्यपि कपाले घटनाशदशायामिदानीमिह कपाले न घट इत्यनुभवात्तत्कालावच्छेदेन घटसामान्याभावः सिद्ध्यति । न चेदानीं तन्तुषु न घट इत्यादिप्रतीतेरेतत्कालावच्छेदेन तन्तुष्वेव घटाभावो विषयो न तु तन्त्ववच्छेदेनैतत्काले तथेति वाच्यम् । तन्तुषु घटाभावस्य व्याप्यवृत्तितयैतत्कालस्य तदवच्छेदकत्वावगाहने उक्तप्रतीतेर्भ्रमत्वापातात् । न च तथाप्येतत्कालवृत्तिघटस्याभाव एव तन्तुषु भासतां तत्रेति वाच्यम् । कालस्य प्रतियोगिकुक्षावप्रवेपि तादृशप्रतीतेस्तन्त्ववच्छेदेन समये घटाभावावगाहित्वस्याऽनुभविकत्वादिति भावः तथा चेति गुणवत्संयोगवद्वा द्रव्यत्वात्, वह्निमान् धू-

व्याप्यवृत्तिसाध्यके, साध्यसाधनभेदेन व्याप्तिभेदादिति वदन्ति।

मात्, समयो घटवानेतत्कालत्वात्, कपालं घटवत् घटध्वंसादित्यादावव्याप्तिवारणायेत्यर्थः। तदिति। असमानाधिकरणान्तदलमित्यर्थः। नोपादेयमिति। येन सम्बन्धेन येन रूपेण च यद्व्याप्यवृत्ति तेन सम्बन्धेन तेन रूपेण च तत्साध्यतायां नोपादेयमित्यर्थः। तेन संयोगत्वेनाव्याप्यवृत्तेरपि संयोगस्य समवेतत्वेन रूपेण साध्यतायां कालिकतयाऽव्याप्यवृत्तेरपि द्रव्यत्वस्य समवायेन साध्यतायां च, न प्रतियोगिव्यधिकरणपदमिति परं तु समवायेन व्याप्यवृतेरपि द्रव्यत्वसत्वादेः कालिकेन साध्यतायां तूपादेयमेव। अव्याप्यवृत्तिसाध्यके संयोगाभाववान् गुणत्वादित्यादौ क्वचिदेव न देयम्, व्याप्यवृत्तिसाध्यके तु प्रयोजनविरहात् सर्वत्रैव न देयमित्यावेदयितुं सर्वथैवेत्युक्तं। साध्यसाधनभेदेनेति। साध्यताघटकसम्बन्धादेरप्युपलक्षणम्। यद्यपि व्याप्यवृत्तिसाध्यकस्थले तदप्रवेशे सत्तावान् जातेरित्यादावव्याप्तिः साधनवति स्पन्दादौ समवायेन सत्ताभावस्यापि कालिकादिसम्बन्धेन वृत्तेःन चाभावे हेत्वधिकरणवृत्तित्वस्य विशेषणतया विवक्षणान्नोक्तदोषः। तथा सत्यपि द्रव्यत्वशून्यं सत्वादित्यादावतिव्याप्तेः द्रव्यत्वरूपसाध्याभावस्य विशेषणतया वृत्तित्वविरहात् द्रव्याभिन्नत्वप्रकारकप्रमाविशेष्यत्वाभावस्यापि द्रव्यत्वानतिरिक्तत्वात्। न चाभावत्वप्रतीतेः प्रमात्वरक्षार्थमभावाभावस्यातिरिक्ततयोक्तातिव्याप्तिवारणमिति वाच्यम्। अभावत्वं चेत्यग्रिमग्रन्थेन भावाभावसाधारणस्याभावत्वस्य निर्वचनविरोधापत्तेः, घटत्वाद्यभावस्य कालिकसम्बन्धावच्छिन्नाभावे स्वरूपसम्बन्धेन साध्ये गगनत्वादिहेतावव्याप्तेस्तथाप्यनुद्धाराच्च। विशेषणतया गगननिष्ठस्य घटत्वाभावस्यैव तादृशघटत्वाभावाभावाभावत्वकल्पनात्तावतैवाऽभावत्वप्रतीतेः प्रमात्वसम्भवात्। अत एव साध्यताघटकसम्बन्धेन साध्यवत्वबुद्धेर्विषयाविधया प्रतिबन्धकतावच्छेदको यः सम्बन्धस्तेन सम्बन्धेन हेतुसामानाधिकरण्यमभावस्य ग्राह्यमित्युक्तावपि न निस्तारः तथाविधसम्बन्धेन हेतुसामानाधिकरण्याप्रसिद्धया प्रागुक्तगगनत्वादिहेतौ द्रव्यत्वाभाववज्जातित्वादित्यादौ चा-

प्रतियोग्यसामानाधिकरण्यञ्च प्रतियोगितावच्छेदकावच्छिन्नासामानाधिकरण्यं, तेन अयं गुणकर्मान्यत्वविशिष्टसत्तावान् जातेः

व्याप्तेः । तथापि साध्यतावच्छेदकसम्बन्धेन प्रतियोगिमत्ताबुद्धेर्विषयतया प्रतिबन्धकतावच्छेदको यः सम्बन्धस्तेन हेत्वधिकरणवृत्तित्वमभावस्य विवक्षितमित्यदोषः। तथा च द्रव्यत्वाभाववज्जातित्वादित्यादौ विशेषणता विशेषेण जातित्वाभावबुद्धेर्विषयविधया प्रतिबन्धकतावच्छेदको यःस्वरूपसम्बन्धस्तेन जातित्वरूपाभावस्य प्रसिद्धेरिति भावः । वस्तुतो व्याप्यवृत्तित्वमत्र साध्यतावच्छेदकसम्बन्धेनः यत्स्वाधिकरणं तदवृत्त्यभावस्य तादृशसम्बन्धावच्छिन्नप्रतियोगित्वाभावरूपं ग्रन्थकृतोऽभिप्रेतं, तादृशसाध्यकञ्च समवायादिनात्मत्वादेः साध्यतायां ज्ञानवत्वादिकं समवायेनात्मत्ववति समवायावच्छिन्नात्मत्वाभावस्य केनापि सम्बन्धेनावृत्तेः । तथाच तादृशसाध्यकएव नोपादेयम । सत्तावान् जातेरित्यादौ पुनरुपादेयमेव सत्ववति स्पन्दादौ समवायावच्छिन्नसत्त्वाद्यभावस्यापि कालिकादिसम्बन्धेन वर्त्तमानतया सत्तादेर्निरुक्तव्याप्यवृत्तित्वाभावात् व्याप्यवृत्तिताघटकस्य स्वाधिकरणवृत्तित्वस्य सम्बन्धसामान्येन प्रविष्टत्वात् । एतल्लाभार्थमेव सर्वथैव व्याप्यवृत्तेरित्युक्तं, तस्य सम्बन्धविशेषानियन्त्रितत्वात् । व्यभिचारादिस्तु सम्बन्धो न वृत्तिनियामकस्तेनात्मत्वादेरपि न व्याप्यवृत्तिताहानिरिति ध्येयम् । सर्वथैव व्याप्यवृत्तिसाध्यके प्रतियोगिवैयधिकरण्याघटितव्याप्तिविशिष्टहेतुमत्तानिश्चयोत्तरानुमितौ नोपादेयम् प्रतियोग्यसमानाधिकरणांशो जनकतावच्छेदके नोपादेयः साध्यसाधनभेदेन कार्यकारणभेदेन व्याप्तेः कारणताघटकव्याप्तेर्भेदात् भिन्नत्वादित्यपि वदन्ति । एकधर्मावच्छिन्नप्रतियोगितायाः प्रतियोगिव्यक्तीनां भेदेष्वैक्यमिति नव्यमतेः वह्न्यादिसामान्याभावमादायाव्याप्त्यसम्भवादतिव्याप्तिवारणमेव प्रयोजनमाह तेनेति । न च विशिष्टसत्वस्य व्याप्यवृत्तितया तत्साध्यके प्रतियोगिवैयधिकरण्याप्रवेशादिदमयुक्तमिति वाच्यम । जातौ विशिष्टसत्वव्यभिचारज्ञानदशायामपि विशिष्टसत्वधर्मिकजातिमद्भिन्नप्रतियोगिव्यधिकरणाभावाप्रतियोगित्वज्ञानाद्विशिष्टसत्वसाध्यका-

भूतत्वमूर्त्तत्वोभयवान् मूर्त्तत्वादित्यादौ नातिव्याप्तिः । न चोभयत्वमेकविशिष्टापरत्वं विशिष्टश्च केवलादन्यदिति तदभावो मनसि सहजत एव प्रतियोगिव्यधिकरण इति वाच्यम् । उभयत्वं हि न विशिष्टत्वादनतिरिक्तं न वा तदवच्छिन्नाभावस्तदवच्छिन्नाभावात्, वैशिष्ट्यविरहेऽपि घटत्वपटत्वयोरुभयत्वस्योभयत्वेन तदभावस्य च प्रत्यक्षसिद्धत्वात् । न च तत्र व्याप्तेरेवोभयत्वाधिक-

---

नुमितिप्रसङ्गस्यैव प्रकृतेऽतिप्रसङ्गपदार्थत्वात् विशिष्टसत्वस्याप्युक्तरीत्या व्याप्यवृत्तित्वविरहाच्च । विशिष्टस्यातिरिक्तत्वमते तत्रातिव्याप्त्यसम्भवादाह भूतत्वेति । प्राञ्चस्तु विशिष्टसत्वस्य व्याप्यवृत्तितया तत्साध्यके प्रतियोगिवैयधिकरण्याप्रवेशात् भूतत्वेत्यादिसाध्यान्तरम् तत्र च भूतत्वमात्मान्यत्वे सति विशेषगुणवत्त्वम् मूर्तत्वमवच्छिन्नपरिमाणवत्त्वं तदुभयं चाव्याप्यवृत्त्येव घटादावुत्पत्तिकालावच्छेदेन तदुभयस्याभावसत्वादित्याहुः । सार्वभौममतमाशङ्कते न चेति । वाच्यमित्यन्वयः । तदभावः । भूतभूतत्वमूर्तत्वोभयाभावः । सहजत एवेति । प्रतियोगितावच्छेदकावच्छिन्नत्वाप्रवेशेपीत्यर्थः । ननूभयत्वस्य विशिष्टत्वातिरिक्तत्वेपि सहजतः प्रतियोगिव्यधिकरणस्य विशिष्टत्वावच्छिन्नाभावस्य प्रतियोगितावच्छेदकमेवोभयत्वमतो नातिव्याप्तिः विशिष्टत्वावच्छिन्नाभावस्योभयाभावानतिरेकादत आह न वेति । तदवच्छिन्नाभावः । उभयत्वावच्छिन्नाभावः । तदवच्छिन्नाभावात् वैशिष्ट्यावच्छिन्नाभावात् । लिङ्गव्यत्ययेन नातिरिक्त इत्यनुषज्यते तथा चातिरिक्त एवेति भावः । न चान्यत्रोभयाभावस्य विशिष्टाभावातिरिक्तत्वेपि प्रकृते भूतत्वविशिष्टमूर्तत्वाभावस्यैव तदुभयत्वावच्छिन्नप्रतियोगिताकत्वं समनियताभावयोर्लाघवेनैकत्वादिति वाच्यम् । तावतापि हेतुमतो यादृशप्रतियोगिताश्रयानधिकरणत्वं तादृशप्रतियोगितानवच्छेदकत्वस्य भूतत्वमूर्तत्वोभयत्वेऽनपायादतिव्याप्तितादवस्थ्यादिति भावः । उभयत्वस्येति । प्रत्यक्षसिद्धत्वादिति परेणान्वयः । तथा च विरुद्धयोरप्युभयत्वमतिरिक्तमेव । उभयत्रैवो-

रणस्य मूर्त्तत्वस्य मनसिसत्त्वादिति वाच्यम् । तथात्वेप्युभयत्वेन रूपेण तत्रासत्त्वात् नात्रोभयमिति प्रतीतेर्दुर्व्वारत्वात् । अत्यन्तपदञ्चात्यन्ताभावत्वनिरूपकप्रतियोग्यसामानाधिकरणस्य अत्यन्ताभावत्वनिरूपकप्रतियोगितायाश्च लाभाय, अन्यथा सर्वस्यैवाभावस्य स्वसमानाधिकरणाभावान्तरभिन्नत्वात्तद्भेदस्य स्वस्वरूपानतिरिक्ततया प्रतियोग्यसामानाधिकरण्यस्यैव दुर्ल्लभत्वापत्तेः, स-

---

भयत्वप्रतीत्योः समानाकारत्वात् भूतत्वमूर्तत्वयोर्विरुद्धत्वभ्रमदशायामप्युभयत्वप्रत्ययाच्चेति भावः । न चेति । वाच्यमिति परेणान्वितम् । तत्राभूतत्वमूर्त्तत्वोभयवान्मूर्तत्वादित्यादौ । व्याप्तिरेवेति। तथा च तस्य लक्ष्यतया तद्वारणप्रयासोनुचित इति भावः । तथात्वेपीति । उभयत्वाश्रयस्य मूर्तत्वस्य मनसि सत्वेपीत्यर्थः । तथा च हेतुतावच्छेदकावच्छिन्नहेत्वधिकरणावच्छेदेन साध्यतावच्छेदकावच्छिन्नवत्तास्थल एव व्याप्तिरतो नैतल्लक्ष्यमिति भावः । वृत्तिमति व्याप्त्यभावस्य व्यभिचारनियतत्वाद्व्यभिचारं ग्राहयति नेति । अत्रेत्यर्थः । मूर्तत्वाश्रये मनसीत्यर्थः । ननु वह्न्यादिभेदमादायाव्याप्तेः प्रतियोग्यसमानाधिकरणपदेनैव वारणादत्यन्तपदं व्यर्थमत आह अत्यन्तपदं चेति । अत्यन्ताभावत्वनिरूपकं यत्प्रतियोगित्वं तदाश्रयवैयधिकरण्यविवक्षायाः फलमाह अन्यथेति । तद्भेदस्य । स्वसमानाधिकरणाभावान्तरभेदस्य स्वरूपानतिरिक्ततयेति । अनवस्थाभयेनेत्यादिः । दुर्लभत्वापत्तेरिति । हेतुसमानाधिकरणाभावमात्रस्यैव स्वात्मकभेदप्रतियोगि यदभावान्तरं तत्समानाधिकरणत्वादिति भावः [न च भावस्वरूपाभावस्यैव प्रतियोग्यसामानाधिकरण्यं सुलभमिति वाच्यम् । तस्यापि स्वसमानाधिकरणाभावाभिन्नत्वादभावमात्राधिकरणक इवाभावमात्रप्रतियोगिको विशिष्टाभावाद्यनात्मकोऽभावोधिकरणभिन्नो नेष्यते लाघवात्] अग्रे विवक्षणीयस्य साध्यताघटकसम्बन्धेन प्रतियोग्यसामानाधिकरण्यस्य वह्निमान्धूमादित्यादौ घटाद्यभावे सत्वान्न सर्वत्राप्रसिद्धिः किं तु स्वरूपसम्बन्धेन[अभावस्य] साध्यतायामेवेति सूचयितुमप्रसिद्धिमपहायदुर्लभत्वमुक्तम् । अत्यन्ताभावत्वनिरूपकप्रतियोगितानवच्छेदकत्वविवक्षायाः फलमाह

र्वेषामेवाभावानां हेतुसमानाधिकरणात्यन्ताभावत्वनिरूपकप्रतियो-
ग्यसमानाधिकरणाभावान्तरात्मकस्य स्वभेदस्य प्रतियोगित्वादभा-
वसाध्यकाव्याप्तेश्चेति सम्प्रदायविदः । अथ यदा गोत्वं तदा गौ-
रित्रत्राऽतिव्याप्तिः । प्रलयस्य गोध्वंसत्वेन गवात्यन्ताभावान-

---

सर्वेषामिति । भावभेदस्यातिरिक्तास्वीकारादाह अभावसाध्यके-
ति । तथा च घटभिन्नं पटत्वादित्यादौ पटत्वसमानाधिकरणनिरुक्त-
प्रतियोगिव्यधिकरणगोत्वाद्यभावस्य घटभेदभिन्नत्वात्तादृशभेदस्य
च गोत्वाद्यभावरूपत्वात्तत्प्रतियोगितावच्छेदकमेव घटभेदत्वमित्य-
व्याप्तिरिति भावः।सम्प्रदाय इत्यस्वरसः तद्बीजं तूक्तविवक्षायां सर्वे-
षां हेतुसमानाधिकरणात्यन्ताभावानामत्यन्ताभावत्वनिरूपकेन पूर्व-
क्षणादिवृत्तित्वविशिष्टस्वाभावात्मकेन प्रतियोगिनासमं सामाना-
धिकरण्यादभावसाध्यकाव्याप्तितादवस्थ्यम् यादृशप्रतियोगिताव-
च्छेदकविशिष्टस्यानधिकरणं हेत्वधिकरणं तादृशप्रतियोगितानव-
च्छेदकत्वप्रवेशे तु व्यर्थमेवान्यन्तपदमिति ध्येयम् । गोध्वंसवत्वेने-
ति [प्राचीनमते] गवात्यन्ताभावस्य गोध्वंसाविरोधित्वादित्याशयः ।
न च दैशिकविशेषणतया यद्गोध्वंसस्याधिकरणं तत्रैव गवात्यन्ता-
भावस्य विरोधित्वात् कालिकसम्बन्धेन गोध्वंसवत्यपि प्रलये तद-
त्यन्ताभावसत्वे बाधकाभावान्नातिव्याप्तिरिति वाच्यम् । प्राचां मते
भूतलादिदेशस्येव कालस्यापि दैशिकविशेषणतया गोध्वंसवत्वात्।
अत एव त्वक्संयुक्तकाले विशेषणतया वायुस्पर्शनाशस्य साक्षा-
त्कारः शब्दानित्यतायां मिश्रैरुक्तः । यद्यप्येवमपि नातिव्याप्ति सम्भ-
वः कालिकसम्बन्धावच्छिन्नगवात्यन्ताभावस्यैव प्रलये कालिकस-
म्बन्धेन वर्तमानत्वात् ध्वंसादिमति दैशिकसम्बन्धेनैवात्यन्ताभाव-
स्यानभ्युपगमात् । तथापि प्रतियोगिवैयधिकरण्याघटितस्य व्याप्य-
वृत्तिसाध्यकस्थलीयलक्षणस्यावश्यं दैशिकविशेषणतयाऽभावे हेतु-
सामानाधिकरण्यघटितत्वात् तस्यैवातिव्याप्तिर्बोध्या । न च का-
लिकसम्बन्धावच्छिन्नप्रतियोगिताकस्य दैशिकसम्बन्धेन हेतुमन्नि-
ष्ठात्यन्ताभावस्याप्रसिद्ध्या तथापि नातिव्याप्तिरिति वाच्यम् । सृष्टि-

धिकरणत्वात्।संसर्गाभावमात्रोक्तावपि यदा स्पन्दस्तदा द्व्यणुकं, यदा अदृष्टं तदा जन्यं ज्ञानं दुःखं वा, यदा तस्याऽदृष्टं तदा तदीयं

कालवृत्तित्वविशिष्टगोत्वादेरत्यन्ताभावस्यैव तादृशस्य प्रसिद्धत्वादिति भावः। मिश्रमतं निरसितुमाह संसर्गाभावेति। अत्यन्ताभावपदेनेत्यादिः। तथा च प्रलये गोत्वावच्छिन्नध्वंसवत्त्वादेव नातिव्याप्तिरिति भावः। न च गोध्वंसस्य गोत्वावच्छिन्नप्रतियोगिताकत्वस्वीकारेपि साध्यतावच्छेदकसम्बन्धीभूतकालिकविशेषणतावच्छिन्नप्रतियोगिताकत्वविरहात् कुतस्तमादायातिव्याप्तिव्युदास इति वाच्यम्। साध्यतावच्छेदकसम्बन्धान्यसम्बन्धानवच्छिन्नस्यैव हेतुसमानाधिकरणाभावप्रतियोगित्वस्य लक्षणे प्रवेशनीयत्वात् तस्य च ध्वंसप्रतियोगितासाधारण्यादिति भावः। यदा स्पन्द इति। स्पन्दवति खण्डप्रलये सर्गान्तरीयद्व्यणुकप्रागभाववत्त्वेन द्व्यणुकत्वावच्छिन्नध्वंसविरहादतिव्याप्तिः। [न च खण्डप्रलये स्पन्दसत्वे मानाभावः, ब्रह्मणो वर्षशतमायुरित्यागमप्रसिद्धेरेव मानत्वात्। न हि क्रियां विना मुहूर्तादिघटितस्य वर्षस्य सम्भव इति] ननु महाप्रलयपूर्वतृतीयक्षणे द्व्यणुकत्वावच्छिन्नध्वंससत्वान्नातिव्याप्तिस्तदानीमपि चरमद्व्यणुकनाशानुगुणस्य परमाणुस्पन्दस्य सत्वात्तत्कालोत्पन्नपरमाणूत्तरसंयोगेन प्रलयपूर्वक्षण एव पश्चात्तस्य विनाश्यत्वात् तादृशपरमाणूत्तरसंयोगस्य च कार्यद्रव्येण सहैव स्वीकारादनित्यत्वमाश्रयनाशादेव तन्नाशसम्भवादत आह यदादृष्टमिति। केचित्तु स्वमते द्व्यणुकस्याभावात् स्पन्दस्य च खण्डप्रलये वृत्तौ बलवत्तरप्रमाणाभावाद्यदादृष्टमित्याद्युक्तमित्याहुः। तच्चिन्त्यम्। नित्यज्ञानमादाय सद्धेतुत्ववारणाय जन्यमिति। नित्यसुखाभिव्यक्तेर्मोक्षत्वमते सद्धेतुत्वमाशङ्क्य साध्यान्तरमाह दुःखं वेति। ननु कार्यमात्रं प्रत्यदृष्टस्य हेतुत्वात् प्रलयप्राक्क्षणेपि तस्य सत्वं तथा च तदानीमेव दुःखत्वावच्छिन्नध्वंससत्वान्नातिव्याप्तिः दुःखादेः स्वसाक्षात्कारनाश्यतया तदानीमसम्भवात् उत्तरक्षणे साक्षात्कारासम्भवादविदिते प्रमाणाभावाच्च, किं च यावद्ब्रह्माण्डानां युगपत्प्रलयानभ्युपगमे ब्रह्माण्डान्तरवर्तिदुःखमादाय सद्धेतुरेवायमत आह। यदा तस्यति। अत्र च तदीयसुषु-

ज्ञानमित्यादावतिव्याप्तेः।द्व्यणुकत्वादेर्द्व्यणुकादिशून्यखण्डप्रलयादिनिष्ठध्वंसप्रागभावप्रतियोगितानवच्छेदकत्वात्। न हि तयोः सामान्याभावत्ववादिमतेऽपि एकविशेषप्रागभावविशेषान्तरध्वंसवत्त्वेऽपि समये सामान्यावच्छिन्नध्वंसप्रागभावयोः सम्भव इति चेन्न। प्रतियोगिमत इव ध्वंसादिमतोऽपि कालस्यात्यन्ताभाववत्त्वेऽविरोधात्। अन्यथा अत्यन्ताभावस्य कालमात्रावृत्तित्वप्रसङ्गात्।

प्यादिसमये तदीयज्ञानविरहाद्व्याभिचारः स्फुट एव [द्व्यणुकत्वादेरिति। खण्डप्रलये केषाञ्चित् ध्वंसस्य केषां चित्प्रागभावस्य सत्वात्तस्य प्रतियोगितातिरिक्तवृत्तित्वेनानवच्छेदकत्वादिति भावः। ननु द्व्यणुकत्वावच्छिन्नानधिकरणकालवृत्तित्वविशिष्टस्यैव तदूध्वंसस्य प्रतियोगितावच्छेदकमेव द्व्यणुकत्वम्। अवच्छेदकत्वं चान्यूनवृत्तित्वमेवेत्यत आह नहीति।] ध्वंसादिप्रतियोगितायां गोत्वादिधर्मावच्छिन्नत्वं मानाभावः गौर्नष्टेत्यादिप्रतीतेर्गौप्रतियोगिकध्वंसाद्यवगाहितयैवोपपत्तेः बाधनिश्चयादिप्रतिबन्धकत्वाद्यनुरोधेनैव भेदात्यन्ताभावयोर्गोत्वाद्यवच्छिन्नप्रतियोगिकत्वोपगमात्। न चैवं तदूगोत्वाद्यवच्छिन्नवत्तावुद्धिं प्रति तदूगोत्वावच्छिन्नाभाववत्तानिश्चयत्वेन विरोधितया तद्वत्वात्यन्ताभावस्येव तद्वोध्वंस्यापि तद्वोत्वावच्छिन्नप्रतियोगिताकत्वमावश्यकमिति वाच्यम्। एकसम्बन्धेन तद्वत्वात्यन्ताभावग्रहेऽपि सम्बन्धान्तरेण तद्वोमत्तावुद्युत्पादात्सम्बन्धविशेषमन्तर्भाव्यैवात्यन्ताभावग्रहस्य प्रतिबन्धकतया ध्वंसवत्ताग्रहसाधारण्यासम्भवात् ध्वंसत्वस्याभावत्वाघटितत्वेन तदवगाहिबुद्धेरत्यन्ताभावसाधारण्यायोगाच्चेत्याशयेनाह मते पीति। ननु प्रतियोगिमत इवेत्यसिद्धं तत्रात्यन्ताभावानुपगमादत आह अन्यथेति। अत्यन्ताभावस्येति। गोत्वादिना गवादेरत्यन्ताभावस्येत्यर्थः। तेन गगनाद्यभावस्य गोविशिष्टगोत्वाद्यभावस्य वा प्रलयवृत्तित्वेपि न क्षतिः। कालमात्रेति। अत्र गवात्यन्ताभावस्य दैशिकविशेषणतया कालमात्रावृत्तित्वं प्राच्यैरिष्यत एव सदातनत्वव्यवहारस्य कालिकविशेषणतयैव सम्भवादिति तु विभावनीयम्। ननु प्रतियोगिविशिष्टेपि काले तदस्य-

इयांस्तु विशेषो यदेकस्य देशभेदावच्छिन्नं तथात्वमपरस्य तु स्वरूपावच्छिन्नमिति । देशे कालस्येव कालेऽपि देशस्यावच्छेदकत्वात् तच्छून्ये च काले तदभावस्य प्रतियोगिव्यधिकरणत्वात् । न च संसर्गाभावविशेषोऽस्यन्ताभावः संसर्गाभाववत्वञ्च संसर्गारोपजन्यप्रतीतिविषयाभावत्वरूपं जन्यताघटकनियमघटितमिति वा-

---

न्ताभावसत्वे गवाद्यवच्छेदेनेदानीं गोत्वं नास्तीत्यपि प्रतीतिः कथं न स्यादत आह इयांस्त्विति । एकस्य । प्रतियोगिमतः कालस्यादेशभेदः । प्रतियोग्यनाधारदेशः । तथात्वम् । अत्यन्ताभाववत्वम् । अपरस्येति । ध्वंसादिमतः कालस्येत्यर्थः । स्वरूपावच्छिन्नमिति । निरवच्छिन्नमित्यर्थः । तथात्वमिति । पूर्वेणान्वयः । नन्विदानीमश्वे न गोत्वमित्यादिप्रतीतेः कालवृत्तितया ऽश्ववृत्तितया च गोत्वाभावावगाहितयैवोपपत्तौ देशस्य कालवृत्तितावच्छेदकत्वे मानाभाव इत्यत आह देशइति । इवार्थः सादृश्यं तच्चानुभूयमानत्वेन । तथाचानुभव एव देशस्य कालवृत्तितावच्छेदकत्वे मानम् । अन्यथा गृहे नेदानीं गौरित्यादिप्रत्ययबलात् गृहादिदेशस्य गवात्यन्ताभाववत्तायामपि कालो नावच्छेदकः स्यात् तत्र गवाभावे गृहवृत्तित्वैतत्कालवृत्तित्वोभयावगाहितायाः सुवचत्वादिति भावः । नन्वेवमपि प्रतियोगिवैयधिकरण्यघटितस्याव्याप्यवृत्तिसाध्यकस्थलीयव्याप्तिलक्षणस्य गोमान् गोत्वादित्यादावतिव्याप्तिरेव गवाद्यभावस्य सृष्टिकाले प्रतियोगिसमानाधिकरणतया लक्षणाघटकत्वादत आह तच्छून्येति । गवादिशून्ये चेत्यर्थ । तथा च यत्किञ्चिद्धेत्वधिकरणावच्छेदेन प्रतियोगिवैयधिकरण्यं यदग्रे वाच्यं तस्य गवाद्यभावेपि सत्वान्न तत्रातिव्याप्तिरिति भावः । न चेति । वाच्यमित्यन्वयः । संसर्गाभावविशेष इति । सदातनसंसर्गाभाव इत्यर्थः । संसर्गेति । स्वप्रतियोगितावच्छेदकसंसर्गेण यः प्रतियोग्यारोपस्तज्जन्यप्रतीतिविषयो योऽभावस्तत्वमित्यर्थः । संसर्गस्तु तादात्म्यभिन्नो ग्राह्यस्तेन भेदव्युदासः । ध्वंसप्रागभावयोरप्युत्तरकालपूर्वकालावेव प्रतियोगितावच्छेदकसम्बन्धाविति ताभ्यामेव सम्बन्धाभ्यां प्रतियोग्यारोपः प्रागभावध्वंसयोः प्रत्यक्षहेतुरतस्तयोर्नाव्याप्तिरिति प्राचामाशयः ॥

क्यम् । तद्वदन्यावृत्तित्वरूपनियमस्य तत्र घटकत्वात् । एवं नियमान्तरस्यात्र प्रवेशेऽपि न क्षतिरित्याहुः । वक्ष्यते च नियमाघटितमेव संसर्गाभावादिलक्षणम् । अनुपदमेव च विवेचयिष्यते। संसर्गाभावत्वप्रवेशे प्रयोजनविरहोऽव्याप्तिश्च । अथ ज्ञानवान्

घटितमिति । तथा च चक्रकादिप्रसङ्ग इति भावः । तत्र । जन्यत्वे । नियमान्तरस्य । साध्यसम्बन्धितावच्छेदकरूपवत्वादिस्वरूपस्येत्यर्थः । नन्वभावबुद्धौ प्रतियोग्यारोपस्य हेतुतास्वीकारे मानाभावादुक्तसंसर्गाभावत्वघटितव्याप्तिलक्षणस्यासम्भवः कथञ्चिद्भावलौकिकप्रत्यक्षं प्रत्यारोपस्य हेतुतास्वीकारेप्यतीन्द्रियसाध्यके व्यभिचारिण्यतिव्याप्तिः तत्र हेतुसमानाधिकरणसाध्याभावस्यातीन्द्रियतया निरुक्तसंसर्गाभावत्वविरहादत आह वक्ष्यते चेति । भेदभिन्नाभावत्वं संसर्गाभावत्वं सदातनत्वविशिष्टं च तदेवात्यन्ताभावत्वं भेदत्वं तु संसर्गविधयां तादात्म्यावच्छिन्नप्रतियोगिताकाभावत्वमनुयोगितावशेषो वेत्याशयः । यत्तु भेदत्वादिवत्संसर्गाभावत्वमप्यखण्डोपाधिरिति । तत्तुच्छम् । भेदत्वादिवदखण्डस्य संसर्गाभावत्वस्यानुभवेनाविषयीकरणात् तान्त्रिकव्यवहारस्य भेदभिन्नाभावत्वादिनाप्युपपत्तेः । वस्तुगतिमनुरुध्याह अनुपदमिति । विवेचयिष्यत इति । तदपि वा नोपादेयमित्यादिग्रन्थेनेति शेषः । साध्यतावच्छेदकसम्बन्धेन प्रतियोगिवैयधिकरण्यघटितलक्षणमभिप्रेत्याह प्रयोजनविरह इति । धूमादिसमानाधिकरणस्य वन्ह्यादिभेदस्य प्रतियोगिसमानाधिकरणत्वादेव तमादायाव्याप्तिविरहादिति भावः । व्याप्यवृत्तिसाध्यकस्थलीयलक्षणस्य साध्यतावच्छेदकसम्बन्धावच्छिन्नप्रतियोगिताघटितत्वात् तदभिप्रेत्याह अव्याप्तिश्चेति । तादात्म्येन गवादेः साध्यतायां तत्सम्बन्धावच्छिन्नात्यन्ताभावाप्रसिद्ध्या सास्नावत्वादावव्याप्तिरित्यर्थः। इदमप्यभाववृत्तिरभावो नाधिकरणस्वरूपो न वा धर्मात्यन्ताभाव एव धर्मिणो भेद इति मतेन । अन्यथा पटभेदस्वरूपस्य घटभेदत्वात्यन्ताभावस्य पटत्वात्यन्ताभावस्य च पटनिष्ठप्रतियोगितायामेव तादात्म्यसम्बन्धावच्छिन्नत्वादव्याप्तिविरहादिति ध्ये-

द्रव्यत्वात्, विशेषगुणवान् मनोऽन्यद्रव्यत्वात्, जातिमान् भावत्वादित्यादौ समवायेन ज्ञानादेः साध्यतायामतिव्याप्तिः । साध्यशून्यानामपि हेतुमतां विषयत्वविशेषणत्वैकार्थसमवायैः साध्यवत्त्वादिति चेत् । मैवम् । प्रतियोगितावच्छेदकसम्बन्धेन प्रतियोगिनो यदधिकरणं सम्बन्धि वा तदवृत्तित्वाभावस्योक्तत्वात्

यम् । ननु विषयताया वृत्त्यनियामकत्वमते ज्ञानाभावस्य गगनादौ सहजत एव प्रतियोगिव्यधिकरणत्वान्नातिव्याप्तिरत आह विशेषगुण इति । अत्र व्यभिचारनिरूपकः कालो दिक् च । तत्र काले कालिकसम्बन्धेन दिशि दैशिकसम्बन्धेन विशेषगुणस्य सत्वात्तदभावो न प्रतियोगिव्यधिकरण इति भवत्यतिव्याप्तिः । विशेषपदं व्यभिचारित्वरक्षायै । द्रव्यत्वादित्युक्तौ सम्बन्धसामान्येन विशेषगुणस्य मनस्यसत्वान्नातिव्याप्तिसम्भवः, कालोपाधित्ववद्दिगुपाधित्वस्यापि मनस्यसत्वाद्व्यावर्त्तकत्वात् अन्यथा मनसः कालोपाधित्वमपि स्यादत उक्तं मनोन्येति।यत्तु मूर्तमात्रस्य दिगुपाधित्वं महादिग्वृत्तितायामवच्छेदकत्वं नत्वधिकरणत्वमिति प्राचां मते सम्बन्धसामान्येनैव तस्य विशेषणगुणानधिकरणत्वान्मनोन्यपदमिति । तन्मन्दम् । एवमप्यवच्छेदकतासम्बन्धेनैव मनसो विशेषगुणवत्तायास्सम्भवेन मनोन्यपदवैयर्थ्यापत्तेः । ननु स्वमते दिक्कालयोरपीश्वरानतिरिक्तत्वादत्र व्याप्तिरेवेत्यत आह जातीति । न च जातेर्व्याप्यवृत्तितया तत्साध्यके प्रतियोगिवैयधिकरण्याप्रवेशादेव नातिव्याप्तिरिति वाच्यम्।समवायेनाव्यापकत्वग्रहदशायामपि सम्बन्धसामान्येन प्रतियोगिवैयधिकरण्यघटितव्यापकत्वज्ञानात् समवायेन जात्यनुमित्यापत्तेरेव प्रकृतेऽतिव्याप्तिपदार्थत्वात् जात्यादेरपि प्रागुक्तव्याप्यवृत्तित्वविरहाच्च । अतिव्याप्तिं योजयति साध्यशून्येति । विशेषणता दिक्कृता कालिकी च । एकार्थेति।समवायस्यापि स्वात्मक एव स्वरूपसम्बन्ध इति तत्रापि जात्येकार्थसमवायोस्तीत्याशयः । [जातिः सतीतिवत्समवायः सन्निति प्रतीतेरविशेषात्] भावत्वात् समवेतत्वादित्यपि के चित्।प्रतियोगितेति।तथा च

ज्ञानाद्यभावस्य तादृशेन समवायसम्बन्धेन घटादौ प्रतियोगिव्यधिकरणत्वान्नातिव्याप्तिः। न च तादृशयत्किञ्चित्सम्बन्धेन प्रतियोगिसामानाधिकरण्याभावोक्तौ वह्निसामान्याभावस्यापि धूमवत्पर्वतावच्छेदेन महानसीयसंयोगेन प्रतियोग्यसमानाधिकरणत्वात् वह्निमान् धूमादित्यादावव्याप्तिः स्वप्रतियोगितावच्छेदकसम्बन्धसामान्येन तथात्वोक्तौ च जातिमान् जातित्वादित्यादावतिव्याप्तिः समवायेन जात्यभावस्यैव तादात्म्येन जातिमद्भेदत्वात् तस्य च स्वप्रतियोगितावच्छेदकतादात्म्यसम्बन्धेन यज्जातिसम्बन्धि तदवृत्तित्वेन प्रतियोगिव्यधिकरणत्वाभावादिति वाच्यम्।स्वप्रतियोगित्वं यादृशसम्बन्धावच्छिन्नं तादृशसम्बन्धेन यत्प्रतियोगिसम्बन्धि तदवृत्तित्वाभावस्योक्तत्वात् संयोगसामान्यावच्छिन्नवन्ह्यभावप्रतियोगितायां महानसीयसंयोगत्वादिविशिष्टानवच्छेद्यतया वन्ह्यभावस्य पर्वतादौ महानसीयसंयोगसम्बन्धेन प्रतियोगिसामानाधिकरण्यविरहेण्यव्याप्त्यभावादिति ध्येयम् । ननु समवायावच्छिन्नवन्ह्यभावमादाय धूमादावव्याप्तिवारणार्थमग्रे साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वेन प्रतियोगित्वं निवेशनीयं तथा च कपिसंयोगवतस्तादात्म्येन साध्यतायामव्याप्तिः भेदमात्रस्यैव स्वप्रतियोगितावच्छेदकतादात्म्यसम्बन्धेन प्रतियोगिवैयधिकरण्याप्रसिद्धेरत आह सम्बन्धि वेति । न च तादात्म्येन वस्तुमात्रस्यैव व्याप्यवृत्तित्वात्तादृशसम्बन्धेन प्रतियोगिवैयधिकरण्याप्रवेशादिदमयुक्तमिति वाच्यम् । मूलावच्छेदेन कपिसंयोगवद्भेदस्य वृक्षादौ स्वयमङ्गीकारात्तादात्म्येन कपिसंयोगवतोप्यव्याप्यवृत्तित्वात् । न चैवं प्रतियोग्यनधिकरणहेतुमन्निष्ठाभावेत्यग्रिमनिष्कर्षेप्यप्रतीकारः । प्रतियोगितावच्छेदकसम्बन्धेन ये प्रतियोगिसम्बन्धिनस्तत्तद्व्यक्तित्वावच्छिन्नभेदकूटविशिष्टहेतुमदवृत्तित्वस्यैव तत्र वक्तव्यत्वात् । वस्तुतस्तु तादात्म्यसम्बन्धेनापि न कस्य चित्प्रागुक्तव्याप्यवृत्तित्वमतो यथाश्रुतमेव सम्यक् । केचित्तु प्रतियोग्यनधिकरणहेतुमन्निष्ठाभावप्रतियोगितायां यद्धर्मावच्छिन्नत्वयत्सम्बन्धावच्छिन्नत्वोभयाभाव इत्यादिवक्ष्यमाणनिष्कर्षस्य तादात्म्येन साध्यतायां व्यभिचारिण्यतिव्याप्तिरतः प्रतियोग्यनधिकरणत्वं परित्यज्य प्रतियोग्यसम्बन्धित्वमवश्यं तत्र निवेश्यमित्याशयेन सम्बन्धित्वमुक्तमित्याहुः।ननु कपिसंयोगाभावस्या-

भवति चैवमन्योन्याभावोऽपि प्रतियोग्यसमानाधिकरणः । तद्विशिष्टस्य च हेत्वधिकरणवृत्तित्वं वाच्यं तेन नाव्याप्यवृत्तिसाध्यकासंग्रहः। तद्वदवृत्तिभिन्नत्वन्तु नार्थः अव्याप्यवृत्तिसाध्यकव्यभिचारिण्यतिप्रसङ्गात् । अत्र सामानाधिकरण्यवतो न तदभाववत्त्वं प्रतीतेरन्यथैवोपपादितत्वादित्यस्वरसात् प्रतियोगिवैयधिकरण्येत्या-

---

पि गुणादौ प्रतियोग्यसमानाधिकरणत्वात् कपिसंयोगि एतत्वादित्यादावव्याप्तिरत आह तद्विशिष्टस्येति । प्रतियोगिसामानाधिकरण्याभावविशिष्टस्येत्यर्थः, तथा च हेतुमति वृक्षादौ संयोगवदवृत्तित्वाभावविशिष्टः संयोगाभावो नास्तीति नाव्याप्तिः । विशिष्टनिरूपिताधेयत्वमप्यतिरिक्तामित्याशयेनेदम् । यद्वा तद्विशिष्टेत्यस्य हेत्वधिकरणेन्वयः तत्र च षष्ठ्यर्थोधिकरणत्वं तेन प्रतियोगिसामानाधिकरण्याभावविशिष्टस्याधिकरणं यद्धेत्वधिकरणं तदवृत्तित्वमभावे वाच्यमित्यर्थः । यद्यपि प्रतियोग्यसमानाधिकरणत्वं हेतुविशेषणीकृत्य प्रतियोग्यसामानाधिकरण्यविशिष्टो यो हेतुस्तदधिकरणवृत्यभावस्य प्रतियोगितानवच्छेदकत्वं वाच्यं तावतैव संयोग्येतत्वादित्यादौ नाव्याप्तिसम्भावना वृक्षस्य प्रतियोगिवैयधिकरण्यावच्छिन्नहेत्वधिकरणत्वाभावात्, तथापि कर्मणि च संयोगाभावः प्रतियोग्यसमानाधिकरण इत्यग्रिममूलस्वरसेन हेतुसमानाधिकरणाभावस्यैव विशेषणं प्रतियोग्यसमानाधिकरणदलमत एतावान्प्रयास इत्यवधेयम् । ननु भेदस्य व्याप्यवृत्तितया प्रतियोगिसमानाधिकरणभिन्नत्वोक्त्यैव प्रागुक्ताव्याप्तिवारणसम्भवे तद्विशिष्टस्येत्यादिकं विफलमत आह तद्वदवृत्तीति । प्रतियोगिमदवृत्तिभिन्नत्वमित्यर्थः । अत्रेति । अस्वरसादित्यन्वयः । न तदभाववत्त्वमिति । तथा च संयोगी सत्वादित्यादावतिव्याप्तिरिति भावः । ननु संयोगाभावे गुणे न संयोगसामानाधिकरण्यमितिप्रतीतिबलादेव गुणाद्यवच्छेदेन संयोगाभावे प्रतियोगिसामानाधिकरण्याभावसत्वान्नातिव्याप्तिरत आह प्रतीतेरिति । उक्तप्रतीतिस्तु संयोगाभावनिष्ठस्य संयोगसामानाधिकरण्यस्यावच्छेदकत्वाभावमेव गुणादौ संयोगानधिकरणीभूतगुणवृत्तित्वमेव

दिविशेषणं वक्ष्यति तच्च हेत्वधिकरणे बोध्यम् । प्रतियोग्यनधिकरणीभूतहेत्वधिकरणवृत्त्यभावेति पुनरभावान्तार्थनिष्कर्षः । ननु प्रतियोगितावच्छेदकावच्छिन्नस्य यस्य कस्य चित्तत्सामान्यस्य प्रतियोगितावच्छेदकयत्किञ्चिदवच्छिन्नस्य वा अनधिकरणमुक्तम् । आद्ये अव्याप्यवृत्तिसाध्यकाव्याप्तिः एकप्रतियोग्यधिकरणस्यापि तदव्यक्तस्तरानधिकरणत्वात् । द्वितीये संयोगसामान्याभाववान् द्रव्यत्वाभाववान् वा सत्त्वादिसादावतिव्याप्तिः

वा संयोगाभावादावगाहत इति भावः । वक्ष्यति । मूलकारः । तच्च । तदपि । हेत्वधिकरण इति । तेन कपिसंयोगाभावस्य प्रतियोगिवैयधिकरण्यावच्छेदकीभूतगुणाद्यवच्छिन्नत्वेपि कपिसंयोगीयतत्त्वादित्यादौ नाव्याप्तिः । ननु हेत्वधिकरणे प्रतियोगिवैयधिकरण्यावच्छेदकावच्छिन्नत्वं प्रतियोगिसामानाधिकरण्यानवच्छेदकीभूतहेत्वधिकरणवृत्तित्वं तच्च व्याप्यवृत्तेरवच्छेदकत्वविरहादप्रसिद्धं गुरुतरं चेत्यत आह प्रतियोग्यनधिकरणेति । कस्य चिदिति । अनधिकरणत्वमिति परेणान्वयः । तदव्यक्तस्यन्तरेति । प्रतियोगिव्यक्तस्यन्तरेत्यर्थः । स्वमते संयोगसामान्याभावस्य केवलान्वयित्वात् तत्साध्यकसत्त्वादिकं सद्धेतुरेवेत्यतःसाध्यान्तरमाह द्रव्यत्वाभावेति । यद्यपि द्रव्यत्वाभावस्य व्याप्यवृत्तित्वात्तत्साध्यके प्रतियोगिवैयधिकरण्याप्रवेशादिदमसङ्गतम् । न चात्र कालिकसम्बन्धावच्छिन्नद्रव्यत्वाभावः साध्यः स च गुणाद्यवच्छेदेन काल एवाव्याप्यवृत्तिरिति वाच्यम् । तथा सति तस्य केवलान्वयित्वात्तत्साध्यकसत्त्वादेः सद्धेतुत्वेन तत्रातिव्याप्तेरुपन्यासस्यानौचित्यात् । तथापि सत्त्वहेतौ द्रव्यत्वाभावस्य व्यभिचारधीदशायामपि प्रतियोगिसामान्यानधिकरणसत्त्वनिष्ठाभावप्रतियोगितानवच्छेदकं द्रव्यत्वाभावत्वमित्याकारकव्यापकताज्ञानादनुमित्यापत्तिरेवात्रातिव्याप्तिशब्दार्थः । वस्तुतो द्रव्यत्वाभावस्यापि न प्रागुक्तव्याप्यवृत्तित्वमिति ध्येयम् । प्रथमसाध्येतिव्याप्तिं ग्राहयति साध्याभाववत इति । तत्प्रतियोगीति । तस्य संयोगात्मनः साध्याभावस्य यः प्र-

साध्याभाववतो द्रव्यस्य तत्प्रतियोगिसंयोगविशेषाभाववत्त्वात् नि-
त्यत्वादिविशिष्टद्रव्यत्वाभावात्मकतत्प्रतियोगिनोऽधिकरणत्वाच्च ;
स्वाभावाभावात्मकस्य विशिष्टस्यापि द्रव्यत्वस्य द्रव्यत्वानतिरे-

---

तियोगी संयोगविशेषाभावस्तद्वत्त्वादित्यर्थः। द्वितीयेऽतिव्याप्तिं योजयति नित्यत्वादीति । नित्यत्वादिविशिष्टं यद्द्रव्यत्वं तदभावात्मको यः साध्याभावस्य प्रतियोगी तदधिकरणत्वात् साध्याभाववतो द्रव्यस्येति पूर्वेणाऽन्वयः। ननु विशिष्टद्रव्यत्वाभावो न द्रव्यत्वस्वरूपस्य साध्याभावस्य प्रतियोगी किन्तु नित्यवृत्तित्वविशिष्टद्रव्यत्वस्यैवेति द्रव्यत्वं प्रतियोगिव्यधिकरणमेवेत्यत आह स्वाभावेति । स्वं नित्यवृत्तित्वविशिष्टद्रव्यत्वम् । न च नित्यत्वविशिष्टद्रव्यत्वाभावस्याऽभावो न नित्यवृत्तित्वविशिष्टद्रव्यत्वं विशिष्टस्यानतिरिक्तया जन्यद्रव्येपि नित्यवृत्तित्वविशिष्टद्रव्यत्वस्याभावो नास्तीति प्रतीतिप्रसङ्गात् किन्तु नित्यैकत्वादिकमेवेति नातिव्याप्तिरिति वाच्यम् । विशिष्टाधिकरणतायाः प्रतीतिनियामकतयैवातिप्रसङ्गभङ्गे द्रव्यत्वमपेक्ष्य नित्यानन्ततत्संख्यापरिमाणादौ तादृशाभावत्वकल्पनायां गौरवात् अभावाभावस्यैव प्रतियोगित्वमिति सिद्धान्तप्रवादाच्च । नन्वेवमपि निखिलाभावस्यैव स्वाश्रयतत्तद्व्यक्तिवृत्तित्वविशिष्टं यत्स्वं तदभावात्मकस्वप्रतियोगिना सह समानाधिकरणत्वात्प्रतियोगिव्यधिकरणाभावाप्रसिद्ध्यैव नातिव्याप्तिः एकव्यक्तिमात्रवृत्तीनां गुणाद्यात्मकाभावानामपि पूर्वक्षणवृत्तित्वविशिष्टस्य स्वस्य योभावस्तादृशप्रतियोगिना सार्द्धं सामानाधिकरण्यात् । नच वक्ष्यमाणखण्डशः प्रसिद्ध्या गगनाभाव एव प्रतियोगिव्यधिकरणः, तस्यापि नित्यवृत्तित्वविशिष्टो यो गगनाभावस्तद्भावात्मकेन स्वप्रतियोगिना समं समानाधिकरणत्वात् गगनाभावस्यैव संयोगादिसम्बन्धेनाभावत्वावच्छिन्नाभावतया खण्डशः प्रसिद्ध्यापि तस्य प्रतियोगिव्यधिकरणत्वासम्भवाच्च । एतेन नित्यत्वादिविशिष्टस्य गगनाद्यभावस्य योभावस्तदभावत्वं न गगनाभावस्य, तस्य केवलान्वयितया जन्येपि नित्यवृत्तित्वविशिष्टस्य गगनाभावस्याभावो नास्तीति प्रतीतिप्रसङ्गात् किं तु नित्यत्वादेरेव तथात्वमित्युक्तावपि

कात् । तृतीये कपिसंयोगाभाववान् आत्मत्वादिसादावव्याप्तिः । साध्याभावानां कपिसंयोगानां गुणानामधिकरणस्याऽऽत्मनस्तत्प्रतियोगितावच्छेदकगुणसामान्याभावत्वावच्छिन्नानधिकरणत्वात् ।

न निस्तार इति चेत् । अत्र नव्याः, यथाश्रुतस्य प्रागुक्तक्रमेण प्रतियोगिव्यधिकरणाभावस्याप्रसिद्ध्या वह्निमान् धूमादित्यादौ सर्वत्रासम्भवः स्यादतो यत्किञ्चित्स्वप्रतियोगित्वं यादृशसम्बन्धावच्छिन्नं तादृशसम्बन्धेन स्वप्रतियोगितावच्छेदकावच्छिन्नसामान्यानधिकरणं यस्साधनाधिकरणं तन्निष्ठाभावस्य साध्यतावच्छेदकसम्बन्धावच्छिन्नप्रतियोगितानवच्छेदकत्वमेव लक्षणे प्रवेशनीयं तथा च सङ्घेतुस्थल इव द्रव्यत्वाभाववान् सत्वादित्यत्रापि संयोगेन घटाद्यभाव एव प्रतियोगिव्यधिकरणः तदीयं हि घटनिष्ठप्रतियोगित्वं यादृशसंयोगसम्बन्धेनावच्छिन्नं तादृशसंयोगसम्बन्धेन साधनवता द्रव्यस्य तदीयप्रतियोगितावच्छेदकावच्छिन्नसामान्यानधिकरणत्वमक्षतमेव । न चैवमपि तदीयस्य साध्यतावच्छेदकीभूतस्वरूपसम्बन्धावच्छिन्नप्रतियोगित्वस्याप्रसिद्ध्या न दोषसङ्गतिः, पूर्वक्षणवृत्तित्वादिविशिष्टस्य घटाद्यभावस्याभाव एव तत्प्रसिद्धेरित्याहुः । स्वावच्छेदकसम्बन्धावच्छिन्नप्रतियोगिसामान्यानधिकरणीभूतहेत्वधिकरणवृत्त्यभावप्रतियोगितासामान्ये यत्सम्बन्धावच्छिन्नत्वयद्धर्मावच्छिन्नत्वोभयाभाव इत्यग्रिमलक्षणाभिप्रायेणेदम्, संयोगेन घटाभावस्यैव प्रतियोगिवैयधिकरण्यसौलभ्यादित्यपि वदन्ति । प्राचां मते संयोगसामान्याभावसाध्यकमात्मत्वं विरुद्धमतः कपिसंयोगसामान्याभाव उक्तः । वृक्षादावुत्पत्तिकालावच्छेदेन गुणसामान्याभावसत्वाद् वृक्षत्वादिकं परित्यज्यात्मत्वं हेतुरुक्तः । यद्यपि वृक्षादेः स्वसमवेतकपिसंयोगप्रतियोगिनः समवेतसामान्याभावस्य द्रव्यमात्रसमवेताभावस्य चानधिकरणत्वाद्वृक्षत्वादेरपि हेतुतायामव्याप्तिः सम्भवत्येव, तथापि सत्ताद्रव्यत्वयोरेव समवेताभावद्रव्यमात्रसमवेताभावयोरभावत्वं लाघवान्न तु कपिसंयोगाद्यात्मकसमवेतमात्रस्य तथात्वं गौरवादित्याशयः । गुणसामान्याभावस्य संयोगप्रतियोगित्वमाविष्कर्तुं गुणानामित्युक्तम् । तत्प्रतियोगितेति । कपिसंयोगीयप्रतियोगितावच्छेदके-

मैवम् । यादृशप्रतियोगितावच्छेदकावच्छिन्नानधिकरणत्वं हेतुमतः

त्यर्थः । न च गुणसामान्याभावस्याभावो द्रव्यत्वमेव लाघवान्न गुणो गौरवादतः संयोगप्रतियोगित्वं न गुणसामान्याभावस्येति वाच्यम् । घटादावुत्पत्तिदशायां गुणसामान्याभावस्यैव सत्त्वेन द्रव्यत्वस्य तदभावत्वासम्भवादभावाभावस्य प्रतियोगित्वनियमाच्चेति भावः।याद्दशेति।तथा च गुणसामान्याभावनिष्ठप्रतियोगिताया अवच्छेदकं यद्गुणसामान्याभावत्वं हेतुमतस्तदवच्छिन्नानधिकरणत्वेपि कपिसंयोगाभावत्वस्य तादृशप्रतियोगितानवच्छेदकत्वात्तद्रूपेण साध्यतायामात्मत्वहेतौ नाव्याप्तिः । द्रव्यत्वाभाववान् सत्त्वादित्यादौ तु द्रव्यत्वाभावत्वावच्छिन्नानधिकरणत्वं यद्धेतुमतस्तन्निष्ठाभावस्य तादृशप्रतियोगितावच्छेदकमेव द्रव्यत्वाभावत्वमतो नातिव्याप्तिरिति भावः । न च वह्निमान् तत्पर्वतत्वादित्यादौ तत्तद्वह्निसंयोगसम्बन्धेन साध्यतायामव्याप्तिः तत्सम्बन्धावच्छिन्नघटाद्यभावप्रतियोगिनः तेन सम्बन्धेनाधिकरणाप्रसिद्धेरिति वाच्यम् । यत्प्रतियोगितावच्छेदकसम्बन्धावच्छिन्नाधिकरणतानिरूपितस्वरूपसम्बन्धेन यादृशप्रतियोगितावच्छेदकावच्छिन्नाधिकरणतासामान्याभाववत्वं हेतुमतस्तेन सम्बन्धेन तादृशप्रतियोगितानवच्छेदकत्वस्य विवक्षितत्वात् घटत्वावच्छिन्नाधिकरणतासामान्यस्यैव तत्तद्वह्निनिरूपितसंयोगसम्बन्धावच्छिन्नाधिकरणतानिरूपितस्वरूपसम्बन्धेनाभावस्य हेतुमति सत्त्वेन तादृशसम्बन्धेन घटाद्यभावस्यैव प्रतियोगिव्यधिकरणत्वसम्भवात् । तादृशाभाववत्वं च हेतुमतो निरवच्छिन्नविशेषणतयैव वाच्यमतः कपिसंयोगाधिकरणत्वाभावस्य वृक्षवृत्तित्वेपि तत्साध्यक एतत्वादौ नाव्याप्तिः। अत्र प्रतियोगितावच्छेदकधर्मावच्छिन्नत्वं साध्यतावच्छेदकताघटकसम्बन्धेनैव ग्राह्यं तेनायःपिण्डस्य कालिकादिसम्बन्धेन यद्भूमत्वविशिष्टं तृणादिकं संयोगेन तस्याधिकरणत्वेपि धूमवान् वह्नेरित्यादौ नातिव्याप्तिः । प्रतियोगितावच्छेदकताघटकसम्बन्धेन तदवच्छिन्नत्वनिवेशे तु प्रतियोगितानवच्छेदकत्वमित्यत्रावच्छेदकत्वं साध्यतावच्छेदकताघटकसम्बन्धेनैव ग्राह्यम् । अन्यथा विषयितासम्बन्धेन रूपत्वावच्छिन्नस्य ज्ञानादेः पृथिव्यादौ समवायेनाभावस्य सत्त्वात्

रूपवान् पृथिवीत्वादित्यादावव्याप्तिप्रसङ्गात् । वस्तुतः साध्यतावच्छेदकताघटकसम्बन्धावच्छिन्नं यत्प्रतियोगितावच्छेदकत्वं तन्निरूपितस्वरूपसम्बन्धेनैव निरुक्तप्रतियोगितावच्छेदकत्वस्याभावः साध्यतावच्छेदकधर्मे वक्तव्यः । तेन वह्निमान् धूमादित्यादौ यत्र वह्नित्वादिनिरूपितसमवायादिसम्बन्धेन वह्नित्वादेः साध्यतावच्छेदकत्वं तत्र तादृशसम्बन्धावच्छिन्नस्य प्रतियोगिव्यधिकरणहेतुमन्निष्ठाभावप्रतियोगितावच्छेदकत्वस्याप्रसिद्धावपि न क्षतिरिति ध्येयम् । अत्र यादृशप्रतियोगितावच्छेदकधर्मे तादृशप्रतियोगिताश्रयाधिकरणीभूतयद्यद्व्यक्तिनिष्ठाधिकरणतावच्छेदकत्वस्याऽधिकरणतावच्छेदकत्वस्य च द्वयोर्व्यतिरेकस्तत्तद्व्यक्तिभेदकूटत्वमेव यादृशप्रतियोगितावच्छेदकावच्छिन्नानधिकरणत्वमित्यस्याऽर्थो बोध्यः । तेन धूमवदित्यादिप्रतीतेरवश्यकल्पनाभिः पर्वतत्वचत्वरत्वादितत्तद्धर्मविशिष्टतत्तद्धूमत्वावच्छिन्नाधिकरणताव्यक्तिभिरेवोपपत्तौ धूमत्वाद्यखण्डधर्मावच्छिन्नाधिकरणतायां मानाभावात् धूमादिसामान्याभावप्रतियोगितावच्छेदकं यद्धूमत्वादिकं तदवच्छिन्नाधिकरणत्वाप्रसिद्धावपि धूमवान् वह्नेरित्यादौ नातिव्याप्तिः धूमाधिकरणतत्तद्व्यक्तिभेदकूटत्वमादायैव धूमसामान्याभावस्य प्रतियोगितावच्छेदकावच्छिन्नवैयधिकरण्यसम्भवादिति ध्येयम् । नन्वत्र प्रतियोगित्वं नातिरिक्तः पदार्थः प्रतियोगित्वादिकं तु स्वरूपसम्बन्धविशेष इत्याद्युत्तरग्रन्थविरोधात् किं तु स्वरूपसम्बन्धविशेषः स च यदि प्रतियोगिस्वरूपः तदा वन्हिमान्धूमादित्यादौ सर्वत्रासम्भवः पटादिस्वरूपस्यैकस्यैव पटाद्यभावप्रतियोगित्वस्य पटत्वसमेवतत्वज्ञेयत्वावच्छिन्नतया तादृशावच्छेदकीभूतज्ञेयत्वावच्छिन्नस्य हेतुमति सत्वात् प्रतियोगिव्यधिकरणाभावाप्रसिद्धेः । न च प्रतियोगितावच्छेदकस्वरूपमेव प्रतियोगित्वमित्यदोषः,समवायेन वह्नेः साध्यत्वे धूमादावतिव्याप्तिप्रसङ्गात् समवायावच्छिन्नवन्ह्यभावस्य, वह्नित्वरूपं यत् प्रतियोगित्वं समवायवत्संयोगस्यापि तदवच्छेदकसम्बन्धतया स्वावच्छेदकीभूततादृशसम्बन्धेन साधनवतः प्रतियोग्यनधिकरणत्वाभावात् । प्रतियोगितावच्छेदकीभूतयत्किञ्चित्सम्बन्धेन प्रतियोग्यनधिकरणत्वोक्त्या तद्वारणे तु संयोगेन वह्निसाध्यके धूमादावव्याप्तिः समवायावच्छिन्नवन्ह्यभावस्यैव समवायेन प्रतियोगिव्यधिकरणस्य

तदनवच्छेदकत्वस्योक्तत्वात् । अत्र च ग्राह्यसामानाधिकरण्ये हेतोर्यादृशः सम्बन्धः प्रविष्टस्तेन सम्बन्धेन यो हेतुमान् तत्र वर्त्त-

---

वह्नित्वस्वरूपं यत्प्रतियोगित्वं तस्यैव संयोगेनाप्यवच्छिन्नत्वादिति चेत् । अत्र वदन्ति प्रतियोगिस्वरूपं तदवच्छेदकस्वरूपं वा यत्प्रतियोगित्वं तदपि कस्यचिदभावस्य केनचिद्धर्मेण सम्बन्धेन वावच्छिन्नं व्यवहारबलान्न तु सर्वेण सम्बन्धेन धर्मेण वा, समवायावच्छिन्नवन्ह्यभावप्रतियोगित्वं न संयोगावच्छिन्नमित्यादिव्यवहारात् तथा च यदभावीययत्प्रतियोगितावच्छेदकसम्बन्धेन यदभावीययत्प्रतियोगितानिरूपितावच्छेदकीभूतधर्मावच्छिन्नासम्बन्धित्वं हेतुमत्तस्तदभावीयतत्प्रतियोगितानिरूपितावच्छेदकताशून्यत्वं साध्यतावच्छेदके निवेश्यमित्यदोषः तत्प्रतियोगितेत्यपहाय यादृशप्रतियोगितेत्यभिधानादेव तादृशार्थलाभात् । न च प्रतियोगितावच्छेदकरूपं यदि प्रतियोगित्वं तदा यदभावीययादृशप्रतियोगितावच्छेदकसम्बन्धेन तदभावीयतादृशप्रतियोगित्वावच्छिन्नस्यानधिकरणत्वं हेतुमत इत्येव सम्यक् प्रतियोगितावच्छेदकावच्छिन्नानधिकरणत्वप्रवेशो व्यर्थ इति वाच्यम् । वह्निधूमोभयवान् वह्नेरित्यादावतिव्याप्त्यापत्तेः हेतुमन्मात्रस्यैव वह्निधूमोभयत्वावच्छिन्नाभावप्रतियोगित्वावच्छिन्नाधिकरणत्वादित्यस्मद्गुरुचरणाः ॥ ग्राह्यसामानाधिकरण्यइति । परामर्शविषयसामानाधिकरण्य इत्यर्थः । सम्बन्धविशेषेणैव साध्यसाधनयोः सामानाधिकरण्यज्ञानादनुमितिस्तत्प्रतिबन्धकतयैव विरोधस्य हेत्वाभासत्वमिति मतेनेदम् । यदि च येन केनापि सम्बन्धेन साध्यसाधनयोः सामानाधिकरण्यज्ञानादनुमितिः स्वव्यापकसाध्यसम्बन्धितामात्रं वा व्याप्तिः व्यापकत्वदले साध्यसाधनयोः सम्बन्धविशेषप्रवेशनादेवातिप्रसङ्गभङ्गादिति विभाव्यते, तदा परामर्शेन साधनस्यानुमित्या च साध्यस्य ग्राह्यो यत्पक्षतावच्छेदकेन सार्द्धं सामानाधिकरण्यं तत्र प्रविष्टो यादृशः सम्बन्ध इत्यर्थो बोध्यः। धूमवान् वह्नेरित्यादौ महानसीयसंयोगेन सम्बन्धेतौ संयोगमात्रेण हेतुमत्तामादायाव्याप्तिः एवं द्रव्यत्वसाध्यके घटानुयोगिकसमवायेन सत्त्वादिहेतौ समवायमात्रेण तद्वत्तामादा-

मानत्वमभावस्य, साध्यस्य च यादृशः सम्बन्धः प्रविष्टस्तत्तत्सम्बन्धावच्छिन्नायाश्च प्रतियोगितायाः अनवच्छेदकत्वं बोध्यम् । तेन धूमसमवायिनिष्ठाभावस्य संयोगावच्छिन्नप्रतियोगितायाः धूमसंयोगिनिष्ठाभावस्य च समवायावच्छिन्नप्रतियोगितायाः अवच्छेदकत्वेऽपि वह्नित्वस्य न क्षतिः । यद्वा साध्यतावच्छेदकसम्बन्धेन प्रतियोग्यसम्बन्धित्वं हेतुमतो वक्तव्यम् । तथा च सम्बन्धभेदेन

यापीत्यतो यःसम्बन्ध इत्यपहाय यादृशःसम्बन्ध इत्युक्तम् । साध्यस्य चेति । ग्राह्यसामानाधिकरण्ये प्रविष्ट इत्यन्वयः । धूमाधिकरणे तत्तत्संयोगेन वन्ह्यभावसत्त्वाद्वन्हिमान् धूमादित्यादावव्याप्तिरतो यादृश इत्युक्तम् । तेन सम्बन्धेन यो हेतुमानित्यस्य फलमाह धूमसमवायीति । प्रतियोगितायाः इति । अवच्छेदकत्वेऽपि वह्नित्वस्य न क्षतिरित्यन्वयः । साध्यस्य चेत्यादेः फलमाह धूमसंयोगीत्यादि । ननु तादात्म्येन गवादेः साध्यत्वे सास्नादावतिव्याप्तिस्तत्र साधनवन्निष्ठान्योन्याभावप्रतियोगितायाः साध्यतावच्छेदकतादात्म्यसम्बन्धावच्छिन्नत्वे मानाभावस्य स्वयमेव बौद्धाधिकारटिप्पण्यामुक्तत्वात् एवं धनी चैत्रत्वादित्यादौ वृत्त्यनियामकस्वामित्वादिसम्बन्धेन धनादेः साध्यतायामपि तादृशसम्बन्धावच्छिन्नप्रतियोगित्वाप्रसिद्धेरत आह यद्वेति । यत्तु प्रतियोगितावच्छेदकसम्बन्धेन तद्वैयधिकरण्यं प्रवेश्य पुनः प्रतियोगितायाः साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वविवक्षायां गौरवमतो यद्वेत्यादिकल्प इति । तन्न । सम्बन्धान्तरावच्छिन्नतत्तदनन्ताभावप्रतियोगितावच्छेदकभेदकूटघटितत्वेन यद्वेत्यादिकल्पस्यैव गुरुतरत्वादित्याहुः । सम्बन्धभेदेन साध्यतावच्छेदकसम्बन्धभेदेन । [न चोक्तमतद्वय एव पर्वताद्यनुयोगिकसंयोगादिना वह्न्यादेः साध्यतायां तत्तद्धूमेऽव्याप्तिः तादृशप्रतियोगितावच्छेदकसम्बन्धेन प्रतियोगिनो यदधिकरणं तदन्यत्वस्य साध्यतावच्छेदकसम्बन्धेन यत्प्रतियोगिसम्बन्धि तदन्यत्वस्य च हेतुमत्यस्मिन्नेरिति वाच्यम् । तादृशप्रतियोगितावच्छेदकसम्बन्धावच्छिन्नाधिकरणतानिरूपितविशेषणता-

प्रतियोगिता न विशेषणीया । एवं स्थिते सामानाधिकरण्यादौ सम्बन्धित्वं निवेशनीयं नत्वधिकरणत्वम् । तथा च धर्मिणोऽपि व्याप्यत्वं व्यापकत्वञ्च निर्वहति । तथा हि तादात्म्येन सम्बन्धेन धूमवतः सम्बन्धिनि महानसे वर्त्तमानो योऽन्योन्याभावस्तस्य तादात्म्यसम्बन्धावच्छिन्ना या प्रतियोगिता तदनवच्छेदकवह्निमत्त्वावच्छिन्नस्य वह्निमतस्तादात्म्येन सम्बन्धिनि महानसे धूमवतस्तादात्म्येन सम्बन्धित्वम् । एवं धर्मिणो धर्मव्याप्यत्वव्यापकत्वे

विशेषेण साध्यतावच्छेदकसम्बन्धावच्छिन्नाधिकरणतानिरूपितविशेषणताविशेषेण वा तादृशप्रतियोग्यधिकरणत्वसामान्याभावस्योक्तत्वात् । अन्यथा कालिकादिसम्बन्धेन सर्वस्यैव हेतुमतः प्रतियोग्यधिकरणतावत्त्वात्प्रतियोग्यनधिकरणहेत्वधिकरणाप्रसिद्धेः] ननु सम्बन्धविशेषेण साध्यसाधनयोः सामानाधिकरण्यप्रवेशे तादात्म्येन हेतुसाध्यभावेऽव्याप्तिः तादृशसम्बन्धेन हेतुसाध्ययोरधिकरणाप्रसिद्धेरत आह । एवं स्थित इति । सम्बन्धविशेषस्यात्र निवेशे स्थित इत्यर्थः । सामानाधिकरण्यादावित्यादिपदेन हेतुसामानाधिकरण्यप्रविष्टहेत्वधिकरणत्वस्य परिग्रहः । प्रयोजनमाह तथा चेति । धर्मिणोपीति । तादात्म्येन व्याप्यत्वं व्यापकत्वं च निर्वहतीत्यर्थः । अन्यथा तादात्म्येन हेतोः साध्यस्य चाधिकरणाप्रसिद्ध्या न तन्निर्वाह इति भावः । योन्योन्याभाव इति । योभाव इति वक्तुमुचितम् अन्योन्याभावत्वनिवेशे वैयर्थ्यादिति ध्येयम् । तदनवच्छेदकवह्निमत्वेति । वह्निमत्वं च वह्न्यधिकरणत्वं तच्चाधिकरणव्यक्तीनां भेदेप्यभिन्नमित्याशयेनेदम् । अत्र साध्यसाधनयोरिव तदीयसम्बन्धयोरपि भेदेन व्याप्तेर्भेदात्तादात्म्येन हेतुसाध्यकस्थले हेतुनिष्ठाभावाप्रतियोगिसाध्यतादात्म्यमेव व्याप्तिर्वक्तुमुचिता लाघवादिति वदन्ति । एवमिति । सामानाधिकरण्यादौ सम्बन्धित्वनिवेशे कृते इत्यर्थः । धर्मिण इति । वस्तुन इत्यर्थः । तथा च गौः सास्नावत्वाद्वह्निमान् धूमवत इत्यादौ तादात्म्यसम्बन्धेन व्यापकता व्याप्यतापि सङ्गच्छत इति भावः । ननु तादात्म्येन धर्मिणो धर्मव्याप्यतायाम-

बोध्ये । अत एव जलादीनां पृथिवीत्वाभावव्याप्यत्वं तत्र तत्रोक्तं सङ्गच्छते । यथा च तादृशेन सम्बन्धेन हेतोर्व्याप्यता गृहीता तादृशेन सम्बन्धेन तस्य पक्षविशिष्टत्वज्ञाने तादृशेन सम्बन्धेन च साध्यस्य व्यापकत्वमवगतं तादृशेनैव साध्यपक्षयोर्विशिष्टानुमितिः तेन न धूमावयवे संयोगेन न वा समवायेन पर्वते वह्निधीः, तथैवावगतव्यापकताघटकसम्बन्धेन व्यापकस्याभावग्रहे गृहीतव्याप्यताघटकसम्बन्धेन व्याप्यस्याभावः सिध्यतीति । कथमन्यथा समवायेन वह्निविरहिणि महानसे संयोगेन संयोगेन वा वह्निविरहिणि स्वावयवे धूमः समवायेन न निवर्त्तते, निवर्त्तते च संयोगेन वह्निविरहिणि स्वावयवे संयोगेनेति नियम उपपद्यते। तथा च तादात्म्यसम्बन्धेन जलादीनां व्याप्यत्वग्रहाद्व्यापकनिष्ठत्वया तादात्म्येनैव तेषामभावः सिध्यति स एव चान्योन्याभावः। इत्थमेव च तादात्म्यात् दृशशिंशपयोर्व्याप्तिनिश्चय इति सङ्गच्छ-

---

पसिद्धान्त इत्यत आह अत एवेति । धर्मिणो धर्मव्याप्यत्वादेवेत्यर्थः । तत्र तत्र । व्यतिरेक्यादिग्रन्थे। ननु समवायेन जलादौ पृथिवीत्वाभावव्याप्यत्वपरतयैव तद्ग्रन्थसङ्गतिरित्याशङ्क्य तथा सति पृथिव्यां जलादिभेदसाधनार्थं तदुपन्यासो न स्यात् व्यापकताघटकसम्बन्धावच्छिन्नव्यापकाभावेन व्याप्यताघटकसम्बन्धावच्छिन्नव्याप्याभावस्यैव सिद्धेरित्यन्वयिदृष्टान्तपूर्वकं परिहरति यथा चेति । पक्षविशिष्टेति । पक्षविषयक इत्यर्थः।प्राचां मते पक्षविशेष्यकज्ञानस्येव पक्षप्रकारकज्ञानस्यापि कारणत्वात् । धूमावयव इति । न वह्निधीरित्यन्वयः । कथमिति। नियम उपपद्यत इति परेणान्वयः।महानसे संयोगेनेति । न निवर्तत इत्यन्वयः । न संयोगावच्छिन्नाभावोनुमितौ भासत इति तदर्थः । निवर्तते चेति । धूम इति पूर्वेणान्वयः । तादात्म्येनैवेति । समवायेन व्याप्यतायान्तु समवायेन जलात्यन्ताभाव एव सिद्ध्येदिति जलभेदसाधनार्थं तद्ग्रन्थावतारो न स्यादिति भावः । नन्वेतावतापि तादात्म्यसम्बन्धेन जलाभावः

ते । अत एव गोत्वत्वाद्यग्रहदशायां यत्र सास्नादिः सा गौरिति

सिद्धो न तु जलान्योन्याभाव इति तद्दोषतादवस्थ्यमत आह स एव चेति । धर्मिणो धर्मव्याप्यत्वे प्राचां संवादमुपन्यस्य धर्मिणो धर्मिव्याप्यत्वे तमाह इत्थमेव चेति । धर्मिणो धर्मव्यापकत्वे युक्तिमप्याह अत एवेति । धर्मिणो धर्मव्यापकत्वादेव चेत्यर्थः । नन्वियं गौरित्यनुमितिर्गवेतरावृत्तित्वरूपायाः शुद्धगोत्वनिरूपितव्याप्तेर्ज्ञानात् समवायेन निरवच्छिन्नगोत्वसाध्यकैव भविष्यति साध्यवद्व्यावृत्तित्वरूपाया अपि व्याप्तेरनुमितिहेतुत्वस्याग्रे वाच्यत्वादतस्तादृशानुमित्यनुरोधात् धर्मिणो धर्मव्यापकत्वस्वीकारोऽनुचित इत्यत उक्तं गोत्वत्वेति । गोत्वत्वं गवेतरावृत्तित्वं तथा च गवेतरावृत्तित्वरूपाया गोत्वव्याप्तेरज्ञानदशायामुत्पन्नाया इयं गौरित्यनुमितेर्गोत्वविधेयकत्वासम्भवाद्गोविधेयकत्वमेवेति तदनुरोधादवश्यं धर्मिणो धर्मव्यापकत्वं वाच्यमिति भावः । ननु गोः साध्यत्वेपि गोत्वं हेतुमन्निष्ठाभावप्रतियोगितानवच्छेदकमित्याकारकव्याप्तिधियोनुमितिहेतुत्वात्तत्र च धर्मितावच्छेदकविधयैव गोत्वत्वग्रहस्यापेक्षितत्वात् तदग्रहे गोविधेयकानुमितिरप्यनुपपन्नेत्यत आह आदीति । आदिना पक्षधर्मतापरिग्रहः तथा च गवेतरावृत्तित्वव्याप्तेः सास्नाव्यापकतावच्छेदकताग्रहे धर्मितावच्छेदकतयोपस्थितिर्भवेपि तद्विशिष्टस्य यत्र न पक्षधर्मताधीस्तत्रैवायं गौरित्यनुमितेर्गोविधेयकत्वमावश्यकमितितदनुरोधेनैव तादात्म्येन व्यापकत्वं वाच्यमित्याशयः । यत्तु शुद्धगोत्वावच्छिन्नविधेयकानुमितिं प्रति गोत्वनिष्ठनिरवच्छिन्नविशेष्यतांकमेव प्रतियोगितानवच्छेदकत्वज्ञानं हेतुरतो गोत्वत्वाग्रहेपि गोत्वे सास्नादिव्यापकतावच्छेदकत्वग्रहसम्भवाद्गोसाध्यकानुमितेर्नानुपपत्तिः । अभावलौकिकप्रत्यक्ष एवाधिकरणतावच्छेदकस्वरूपेण तदुपस्थितेर्हेतुत्वादिति मतम् । तत्तुच्छमाव्यभिचारज्ञानाऽप्रतिबध्यतया तादृशव्यापकताग्रहस्यानुमित्यहेतुत्वात् । अन्यथा तुल्ययुक्त्या शुद्धगोत्वविधेयकानुमितिं प्रति निरवच्छिन्नगोत्वविशेष्यतांकस्य प्रतियोग्यनधिकरणहेतुमन्निष्ठाभावाप्रतियोगित्वज्ञानस्य हेतुत्वादयं गौरित्यनुमितेर्गोत्वत्वाद्यनुपस्थितावपि गोत्वरूपधर्मसा-

तादात्म्येन गोर्व्यापकत्वग्रहे सास्नादिना तादात्म्येन गौः तादात्म्येन गोर्व्यतिरेकाच्च सास्नादिव्यतिरेकः सिध्यति । एवञ्च संयोगेन गगनादेरपि द्रव्यत्वव्याप्यत्वम्। वृत्त्यनियामकसंयोगमात्रस्याभावप्रतियोगितावच्छेदकसम्बन्धरूपत्वे साध्यतावच्छेदकसम्बन्धेन प्रतियोग्यसम्बान्धत्वाभिधाने वा पृथिवीत्वादिव्यापकत्वमपि । तदभाववतोऽपि पृथिव्यादेः संयोगेन तत्सम्बन्धित्वात्

ध्यकत्वस्य दुर्वारत्वापत्तेरिति दिक् । प्राञ्चस्तु गोतादात्म्यस्य साक्षाव्यापकत्वग्रहादेव गोस्तादात्म्येन सिद्धिसम्भवान्न तदनुरोधेन गोस्तादात्म्येन व्यापकत्वस्वीकारो युक्तः सम्बन्धगतव्यापकत्वग्रहादेव सम्बन्धिनोनुमितेर्मिश्रादिसम्मतत्वात् अत उक्तं गोत्वत्वाद्यग्रहदशायामिति, गोतादात्म्यत्वाद्यग्रहदशायामिति तदर्थ इत्याहुः।तच्चिन्त्यम। गोत्वत्वाग्रहदशायामित्यस्य गोत्वत्वेनाग्रहो यस्मादिति व्युत्पत्त्या गोत्वबाधनिश्चयदशायामित्यर्थः तथा च तदानीमयं गौरित्यनुमित्यर्थं धर्मिणो धर्मव्यापकत्वमवश्यं स्वीकार्यमित्यपि वदन्ति । गौरिति । सिद्ध्यतीति परेणान्वयः । गोर्व्यतिरेकादिति । तादात्म्येनेत्यनुषज्यते। एवं चेति । सामानाधिकरण्यादौ सम्बन्धित्वप्रवेशे चेत्यर्थः । संयोगत्वेन संयोगमात्रस्य प्रतियोगितावच्छेदकसम्बन्धत्वे वृत्त्यनियामकसंयोगस्यापि तत्वं सर्वसिद्धमतो मात्रपदम् । सम्बन्धरूपत्व इति । अन्यथा तादृशप्रतियोगिताकाभावाप्रसिद्ध्या गगनादेः पृथिवीत्वव्यापकत्वं दुर्घटमेव स्यादिति भावः । तादृशसम्बन्धस्य प्रतियोगितानवच्छेदकत्वेपि द्वितीयकल्पानुसारेण व्यापकत्वं सम्पादयति साध्यतावच्छेदकसम्बन्धेनेति । तथा च सम्बन्धान्तरावच्छिन्नघटाद्यभावमादायैव लक्षणसमन्वय इति भावः।द्रव्यत्वस्य गगनासंयुक्तविभ्वन्तरे तद्व्यभिचारित्वात् हेत्वन्तरमाह पृथिवीत्वादीति । व्यापकत्वमिति । गगनादेरिति पूर्वेणान्वयः।[ननूत्पत्तिकाले जन्यस्य प्रलयकाले नित्यस्य पृथिवीमात्रस्य गगनाभाववत्वात् कथं तस्य पृथिवीत्वव्यापकत्वमत आह तदभाववतोपीति।गगनादेरभाववतोपीत्वर्थः। संयोगेन।वृत्त्यनियामकसंयोगेन । तत्सम्बन्धित्वात् । गगनादिस-

सिद्धिरपि तस्य तथैव । न तु वृत्तिनियामकसम्बन्धेन, तेनासम्बन्धित्वादव्यापकत्वाच्च । व्यक्तीभविष्यति चैतदुपरिष्टात् ॥ नन्वष्टद्रव्यातिरिक्तद्रव्यात्मककालमात्रवृत्तिधर्मस्य विशेषणताविशेषेणा-

---

म्बन्धित्वात्] नन्वेवं निरुक्तव्याप्तिज्ञानात् घटो गगनवानित्यनुमितिः प्रमा स्यादत आह सिद्धिरपीति । तथैवावृत्त्यनियामकसंयोगेनैवातथा च तादृशसम्बन्धेन गगनानुमितेः प्रमात्वमिष्टमेवेति भावः । तेनासम्बन्धित्वादिति । येन सम्बन्धेन साध्यसामानाधिकरण्यं परामर्शे भासते तेनैव सम्बन्धेन साध्यानुमितेः फलत्वादिति भावः । सामानाधिकरण्यधियो हेतुत्वस्य तदंशे सम्बन्धविशेषनिवेशस्य वाऽनङ्गीकारमतेप्याह अव्यापकत्वाच्चेति । तेनेत्यनुषज्यते । तथा च यादृशसम्बन्धेन साध्यस्य हेतुव्यापकत्वं गृह्यते तेनैव सम्बन्धेन साध्यसिद्धिः फलमतो वृत्तिनियामकसम्बन्धेन साध्यस्य हेतुव्यापकत्वासम्भवादेव न तेन साध्यस्य प्रमानुमितिरिति भावः । ननु वृत्तिनियामकसंयोगेनापि गगनस्य पृथिवीत्वादिव्यापकत्वं दुर्वारं तादृशसम्बन्धेन गगनसम्बन्ध्यप्रसिद्ध्या गगनाभावस्य प्रतियोगिव्यधिकरणत्वाभावात् तादृशाभावान्तरप्रतियोगित्वस्य च गगनादावसत्वादत आह व्यक्तीत्यादि । इदम् । वृत्तिनियामकसम्बन्धेन गगनादेरव्यापकत्वम् । तथा च निरुक्तप्रतियोगिप्रतियोगिकत्वेत्यादिना वक्ष्यमाणं प्रतियोग्यसामानाधिकरण्यं वृत्तिनियामकसम्बन्धेन गगनाभावेपि स्थास्यतीति भावः ॥ कालिकसम्बन्धेन गोत्वादौ साध्ये घटादिकालोपाधिमात्रवृत्तिघटत्वादिहेतौ नाव्याप्तिःभिन्नकालीनतत्तद्व्यक्तित्वावच्छिन्नाभावस्यैव घटादौ प्रतियोगिवैयधिकरण्यसम्भवादत उक्तमष्टद्रव्यातिरिक्तेति । पृथिव्यादिचतुर्द्रव्यातिरिक्तेति तु ज्यायः गगनादेः कालत्वविरहादेव तद्व्युदासादिति ध्येयम् । कर्मात्मकखण्डकालस्यापि भिन्नकालीनतद्व्यक्तित्वावच्छिन्नाभावप्रतियोग्यनधिकरणत्वप्रसिद्ध्या तन्मात्रवृत्तिस्पन्दत्वादिहेतौ नाव्याप्तिरतश्चरमं द्रव्यपदम् । तथाविधकालत्वादावप्युक्तदिशा नाव्याप्तिरतो मात्रपदम् । [समवायसम्बन्धेन हेतुतालाभाय धर्मपदम् । अन्यथा कालिकेन महाकाल-

ऽव्याप्यवृत्ति किमपि व्यापकं न स्यात् । स्वावच्छेदकसम्बन्धेन प्रतियोगिनोऽसम्बन्धिनि काले वर्त्तमानस्याऽभावस्य प्रतियोगितायां तत्सम्बन्धावच्छिन्नत्वस्य तेन सम्बन्धेन यत्र प्रतियोगिसम्बन्धि तदन्यत्वस्य च कालेऽसम्भवात् । न च तादृशसम्ब-

---

त्वाद्यधिकरणघटादौ प्रतियोगिव्यधिकरणातीततत्तद्व्यक्तित्वावच्छिन्नाभावप्रसिद्ध्या नाव्याप्तिरिति ध्येयम् ।] तादृशधर्मस्य महाकालत्वादेः समवायादिना व्यापकत्वं संयोगाद्यव्याप्यवृत्तेः सुघटमित्यत उक्तं विशेषणतेति । कालिकविशेषणतेत्यर्थः। व्याप्यवृत्तिप्रमेयत्वादेः प्रतियोगिवैयधिकरण्याघटितमेव कालिकसम्बन्धावच्छिन्नव्यापकत्वं सम्भवतीत्यत उक्तमव्याप्यवृत्तीति।तादृशं साध्यं घटादिकं द्रव्यत्वादिकं च, तद्वतोपि कालस्य तदनधिकरणदेशावच्छेदेन कालिकसम्बन्धावच्छिन्नतदभाववत्वात् । नह्येवंविधो वाच्यत्वादिः तदनधिकरणदेशाप्रसिद्ध्या तदवच्छेदेन कालिकसम्बन्धावच्छिन्नवाच्यत्वाभावस्य कालेऽसम्भवादिति भावः । न स्यादिति । तथा च कालो घटवान् महाकालत्वादित्यादौ व्याप्तिलक्षणाव्याप्तिरिति भावः। प्रथमविवक्षानुसारेण दोषं सङ्गमयति स्वावच्छेदकेति । प्रतियोगितावच्छेदकसम्बन्धेनेत्यर्थः।काले। महाकाले । तत्सम्बन्धावच्छिन्नत्वस्य । साध्यतावच्छेदकीभूतकालिकसम्बन्धावच्छिन्नत्वस्य असम्भव इति परेणान्वयः । द्वितीयविवक्षानुसारेणाह तेन सम्बन्धेनेति । साध्यतावच्छेदकीभूतकालिकसम्बन्धेनेत्यर्थः । ननु महाकालान्यत्वविशिष्टघटाभाव एव महाकाले प्रतियोगिव्यधिकरणः सुलभः । न चात्र विशेषणताविशेषशब्देन महाकालनिरूपितविशेषणताया एव विवक्षितत्वात्तादृशसम्बन्धेन निरुक्तप्रतियोगिवैयधिकरण्याप्रसिद्ध्यैवोक्ताभावस्यापि प्रतियोगिवैयधिकरण्यासम्भव इति वाच्यम्। तथा सति कालमात्रवृत्तिधर्मस्य तादृशविशेषणतया किमपि व्यापकं न स्यादित्यस्यैव सम्यक्त्वेऽष्टद्रव्यातिरिक्तत्वाभिधानस्य सन्दर्भविरोधापत्तेः स्वरूपसम्बन्धेन गगनादेर्वृत्तिमत्वे तु इत्यग्रिमग्रन्थविरोधाच्च । महाकालीयविशेषणतया गगनादेर्वृत्तिमत्वेपि तादृशसम्बन्ध सामा-

न्ये महाकालान्यत्वविशिष्टघटत्वावच्छिन्नप्रतियोगिताकत्वविरहात् तादृशघटत्वावच्छिन्नाभावस्यैव निरुक्तप्रतियोगिव्यधिकरणत्वसम्भवेन पूर्वमतस्यैव सम्यक्त्वात् इति चेन्न । तदानीं महाकालान्यत्वविशिष्टो घटः कालोयं महाकालान्यत्वविशिष्टघटवानित्यादिप्रतीत्या महाकालस्यापि तत्तत्कालोपाध्यवच्छेदेन महाकालान्यत्वविशिष्टघटवत्वात् । अन्यथोक्तप्रतीत्या खण्डकाल एव विशिष्टघटवत्वावगाहने वस्तुमात्रस्यैव महाकालेऽसत्वप्रसङ्गात् इदानीन्तदानीमित्यादिप्रतीतिव्यतिरेकेण महाकालविषयिण्याः प्रतीतेः स्वरसतः क्वाप्यसत्वात् । न चैवं खण्डकालस्याधिकरणत्वे मानाभावः पटध्वंसविशिष्टः कालः पटवदन्य इत्यादिप्रतीतेः प्रमात्वानुरोधेनैव खण्डकालस्यापि तथात्वादिति सिद्धान्तानुसारी पन्थाः । परे तु महानसीयवह्नित्वेन वह्निघटोभयत्वेन वाऽवच्छिन्नप्रतियोगिताकस्य धूमसमानाधिकरणाभावस्य प्रतियोगितावच्छेदकत्वं वह्नित्वेप्यस्तीत्यव्याप्तिभियाऽवश्यं साध्यतावच्छेदकाऽघटको यः साध्यवृत्तिर्धर्मः तदनवच्छिन्नैव हेतुसमानाधिकरणाभावप्रतियोगिता लक्षणे प्रवेशनीया प्रत्येकमुभयत्र पर्याप्तिसम्बन्धेनासतो धर्मस्य तादृशसम्बन्धेनोभयवृत्तित्वासम्भवेन हेतुमन्निष्ठाभावप्रतियोगितावच्छेदकतापर्याप्तेरधिकरणभिन्नत्वनिवेशायोगात्, एवं च प्रकृते महाकालान्यत्वविशिष्टघटत्वावच्छिन्नाभावस्य प्रतियोगितायाः साध्यतावच्छेदकाघटकेन महाकालान्यत्ववैशिष्ट्यरूपधर्मेणावच्छिन्नत्वात्तादृशप्रतियोगिताकाभावमादाय न प्रतियोगिव्यधिकरणाभावस्य प्रसिद्धिसम्भावनापीति प्राहुः । तच्चिन्त्यम्।प्रमेयवान् वाच्यत्वादित्यादौ हेतुसमानाधिकरणतादृशप्रतियोगिताकाभावाऽप्रसिद्ध्याव्याप्तिप्रसङ्गात् । वस्तुतो यादृशप्रतियोगितावच्छेदकविशिष्टस्यानधिकरणत्वं हेतुमत इत्यत्रावच्छेदकवैशिष्ट्यमवश्यं साध्यतावच्छेदकताघटकसम्बन्धेनैव वाच्यम् । अन्यथा तप्तायःपिण्डस्यापि कालिकसम्बन्धेन यद्धूमत्वविशिष्टं वह्न्यादिकं संयोगसम्बन्धेन तदधिकरणतया धूमवान् वह्नेरित्यादावतिव्याप्त्यापत्तेः। एवं च यत्र समवायेन घटत्वविशिष्टस्य कालिकसम्बन्धेन साध्यता तत्र महाकालान्यत्वविशिष्टघटत्वावच्छिन्नाभावस्य साध्यतावच्छेदकताघटकसम्बन्धेन प्रतियोगितावच्छेदकावच्छिन्नत्वमप्रसिद्धं स्वरूपसमवायाभ्यामेव तत्र तथा-

न्धेन हेत्वधिकरणीभूतयत्किञ्चिद्व्यक्त्यवृत्तिप्रतियोगितावच्छेदक-विशिष्टप्रतियोगिसामान्यकत्वमेव वक्तव्यम् । तथा चावृत्तिगगनाद्यभावद्वारिकैव तत्सिद्धिः । सत्ताद्यधिकरणकर्मादौ समवायेन ज्ञानसामान्यस्य चावृत्तेर्नातिप्रसङ्गः भूतत्वमूर्त्तत्वोभयत्वविशिष्ट-

---

त्वात् विशिष्टनिरूपितसमवायानभ्युपगमादतस्तादृशाभावमादाय न प्रसिद्धिसम्भव इति ध्येयम् । केचित्तु साध्यसाधनभेदेन व्याप्तेर्भेदाद्विशिष्टसाध्यकस्थल एव यादृशप्रतियोगितावच्छेदकावच्छिन्नानधिकरणत्वं हेतुमत इति वक्तव्यम् अविशिष्टसाध्यकस्थले तु यादृशप्रतियोगिताश्रयानधिकरणत्वं हेतुमत इत्येव लाघवात् वक्तव्यं तथा च शुद्धघटस्य साध्यतायां महाकालान्यत्वविशिष्टघटाभावोपि प्रतियोगिसमानाधिकरण एव, प्रतियोगिता च प्रतियोगितावच्छेदकधर्मस्वरूपैव लाघवात् न तु प्रतियोगिस्वरूपा तेषां नानात्वेन गौरवादतो नैकप्रतियोग्यनधिकरणतामादाय संयोगि एतत्वादित्यादावव्याप्तिरित्याहुः । तच्चिन्त्यम् । कालो घटवान् महाकालत्वादित्यादावव्याप्तिवारणार्थमेवाविशिष्टसाध्यकस्थलेपि प्रतियोगितावच्छेदकावच्छिन्नानधिकरणत्वप्रवेशस्य प्रामाणिकतया गौरवस्याकिञ्चित्करत्वादिति । सार्वभौममतमाशङ्क्य निराचष्टे न चेति । वाच्यमिति परेणान्वयः । तादृशसम्बन्धेनेति । साध्यतावच्छेदकसम्बन्धेनेत्यर्थः । इदं चावृत्तीत्यस्य प्रतियोगिन्या वृत्त्यान्वितम् । तादृशपदस्य प्रतियोगितावच्छेदकसम्बन्धपरत्वे पुनरग्रे प्रतियोगिता साध्यतावच्छेदकसम्बन्धावच्छिन्ना ग्राह्या । तादृशसम्बन्धेनेत्यस्य फलमाह सत्त्वादीति । विषयताया वृत्त्यनियामकत्वमते सत्त्ववति घटादौ ज्ञानाभावस्य सहजत एव प्रतियोगिवैयधिकरण्यं सम्भवतीत्यतः संयोगसामान्यस्य चेति । नातिप्रसङ्ग इति । ज्ञानवान् संयोगवान् वा सत्त्वादित्यादौ नातिप्रसङ्ग इत्यर्थः । सत्तावद्वृत्तित्वसामान्याभावस्य संयोगादावभावादुक्तातिव्याप्तिवारणमेव यत्किञ्चिदित्यस्यापि प्रयोजनमित्यवधेयम् । प्रतियोगितावच्छेदकविशिष्टेत्यस्य फलमाह भूतत्वेत्यादि । स्वयं मनसः खण्डनात् भूतत्वमूर्तत्वोभयसाध्यकमूर्त-

गुणकर्मान्यत्वविशिष्टसत्तात्वविशिष्टसत्तादिकन्तु न मनोगुणादिवृत्ति संयोगसामान्यन्तु न किञ्चिद्द्रव्यावृत्तीति वाच्यम् । विशिष्टस्यानतिरिक्तत्वात् । समवायेन जातेः साध्यत्वे मेयत्वादावतिव्याप्तिः जातिमन्निष्ठतादृशाभावप्रतियोगितायाः जातित्वेनानवच्छेदात् जातिशून्ये च तादृशसम्बन्धेन वृत्तेरप्रसिद्धेः, संयोगादिसाध्यकगुणकर्मान्यत्वादौ चातिव्याप्तिः अद्रव्ये हेतुमति तादृशसम्बन्धेन वृत्तेरप्रसिद्धेः द्रव्ये च संयोगादेरपि वृत्तेः । मैवम् ।

त्वस्य सद्धेतुतामाशङ्क्याह गुणकर्मान्यत्वेत्यादि । विशिष्टान्तद्वयं मनोगुणयोः क्रमेणान्वितम् । इदं च विशिष्टस्यानतिरिक्तत्वं विशिष्टधर्मावच्छिन्नाधेयत्वस्यातिरिक्तत्वमित्यभ्युपेत्य । अन्यथा [सार्वभौममते] उभयत्वस्यैकविशिष्टापरत्वरूपत्वे भूतत्वमूर्तत्वोभयगुणकर्मान्यत्वविशिष्टसत्त्वयोरतिरिक्ततया तयोः सहजत एव मनोगुणाद्यवृत्तितया प्रतियोगितावच्छेदकविशिष्टेत्यभिधानमसङ्गतं स्यादिति ध्येयम् । सामान्यपदस्य फलमाह संयोगसामान्यं त्विति । तथा च संयोगी द्रव्यत्वादित्यादावव्याप्तिवारणार्थमेव सामान्यपदमिति भावः । विशिष्टस्येति । विशिष्टनिरूपिताधेयत्वस्येत्यर्थः । तथाच विशिष्टसत्तावान् जातेरित्यादावतिव्याप्तिरिति भावः । ननु तादृशसम्बन्धावच्छिन्नयत्किञ्चिद्धेत्वधिकरणनिष्ठाधिकरणतानिरूपकतानवच्छेदकप्रतियोगितावच्छेदककत्वं सामान्यकान्तेन विवक्षितमतो नोक्तदोष इत्यत आह समवायेनेति । ननु समवायेन जातेर्व्याप्यवृत्तित्वात्तत्साध्यके प्रतियोगिवैयधिकरण्यमेव न देयं देयं चाव्याप्यवृत्तिसाध्यकस्थलीयनिरुक्तौ साध्यतावच्छेदके व्याप्यवृत्तितानवच्छेदकत्वविशेषणमनो न तत्रत्यलक्षणस्यातिव्याप्तिरत आह संयोगादीति [गुणकर्मान्यत्वेति । एकैकोपादाने तत्र प्रतियोगिवैयधिकरण्यं प्रसिद्धमत उभयोपादानम् । अद्रव्ये गुणादौ समवायेन वृत्तेः प्रसिद्धेरत आह । हेतुमतीति ।] अत्र विशिष्टनिरूपिताधेयत्वस्यातिरिक्तत्वोपगमे स्वप्रतियोगितावच्छेदकावच्छिन्नत्वसाध्यतावच्छेदकसम्बन्धावच्छिन्नत्वोभयाभाववद्धेत्वधिकरणयत्किञ्चिद्व्यक्तिवृत्तित्वसामान्यकत्वस्य

साध्यतावच्छेदकसम्बन्धसामान्ये निरुक्तप्रतियोगिप्रतियोगिकत्व-हेत्वधिकरणीभूतयत्किञ्चिद्व्यक्त्यनुयोगिकत्वसामान्योभयाभावस्य विवक्षितत्वात्। धूमसंयोगे वन्ह्यधिकरणायोगोलकानुयोगिकत्वस्य

विवक्षणान्नोक्तदोष इत्यस्मद्गुरुचरणाः। नव्यास्तु साध्यतावच्छेदकसम्बन्धेन प्रतियोग्यधिकरणयावद्धेत्वधिकरणको यो यस्तदन्यत्वं प्रतियोगिवैयधिकरण्यं वाच्यमतो गगनाभावमादायैव प्रसिद्धेर्न कोपि दोषः। न चैवं यद्यत्सम्बन्धेन यद्धर्मावच्छिन्नानधिकरणं हेत्वधिकरणं तत्तत्सम्बन्धान्यसाध्यतावच्छेदकसम्बन्धेन तद्धर्मावच्छिन्नसामानाधिकरण्यमेव लाघवाद्व्याप्तिरस्तु तथा च घटवान् महाकालत्वादित्यादौ समवायेन घटाद्यभावोपि प्रतियोगिव्यधिकरणः सम्भवतीति वाच्यम्। घटवृत्तित्वविशिष्टद्रव्यत्ववान् घटत्वादित्यादावव्याप्तेः केनापि सम्बन्धेन हेतुमतः साध्यतावच्छेदकावच्छिन्नानधिकरणत्वासम्भवात्। [तादात्म्येन तथाविधानधिकरणत्वसम्भवेपि दधित्वविशिष्टप्रमेयवान् अन्त्यावयविभिन्नस्थूलदधित्वादित्यादावव्याप्तिः] इति प्राहुः। तादृशसम्बन्धसामान्य इत्यस्य पूर्ववदर्थो बोध्यः। कुत्रचित्साध्यतावच्छेदकसम्बन्धसामान्य इत्येव पाठः। विवक्षितत्वादिति। अभावान्तमूलग्रन्थेनेत्यादिः। तथा च साध्यतावच्छेदकसम्बन्धसामान्ये यादृशप्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिकत्वहेत्वधिकरणीभूतयत्किञ्चिद्व्यक्त्यनुयोगिकत्वसामान्योभयाभावस्तादृशप्रतियोगितानवच्छेदकीभूतसाध्यतावच्छेदकावच्छिन्नसामानाधिकरण्यं व्याप्तिरित्यर्थः। सम्बन्धसामान्य इत्युक्तौ कालिकसम्बन्धे धूमप्रतियोगिकत्वायःपिण्डानुयोगिकत्वोभयसत्वाद्धूमवान् वह्नेरित्यादावतिव्याप्तिरतः साध्यतावच्छेदकेति। समवायिनः संयोगेन साध्यतायां जातिमत्त्वादावतिव्याप्तिः साध्यतावच्छेदकीभूतसमवायात्मकधर्मे समवायित्वावच्छिन्नप्रतियोगिकत्वहेत्वधिकरणगुणाद्यनुयोगिकत्वोभयसत्त्वेन साध्याभावस्य लक्षणाघटकत्वादतः सम्बन्धपदम्। यद्धर्मावच्छिन्नसंसर्गताकप्रकृतसाध्यकानुमितिः फलं तद्धर्मावच्छिन्नसम्बन्धसामान्य इति तु फलितार्थः। घटीयसंयोगे पर्वतीयसंयोगे वा हेतुमन्महानसानुयोगिक-

स्ववह्नित्वावच्छिन्नप्रतियोगिकत्वोभयाभावसत्त्वाद्वह्निमान् धूमादित्यादावव्याप्तिरतः प्रथमं सामान्यपदम् । तथा च महानसीयवह्निसंयोग एव तादृशोभयाभावविरहान्नाव्याप्तिः । संयोगसामान्य एव हेतुमदयोगोलकानुयोगिकत्वधूमत्वावच्छिन्नप्रतियोगिकत्वोभयाभावसत्त्वाद्धूमवान् वह्नेरित्यादौ नातिव्याप्तिः । संयोगसामान्य एव समवायनिष्ठपर्वतानुयोगिकत्वस्य वह्नित्वावच्छिन्नप्रतियोगिकत्वस्य च द्वयोरभावसत्त्वात्तथैवाव्याप्तिरतः सामान्योभयेति । सामान्यपदमुभयत्रान्वितमिति भावः । तादृशोभयाभावश्च स्वरूपसम्बन्धेन बोध्यः तेन समवायादिना तदुभयाभावस्य सम्बन्धमात्रे सत्त्वेपि सम्बन्धौ नाव्याप्तिः । एतद्घटवान् कालान्तरीयतद्घटत्वादित्यादौ एतद्घटत्वावच्छिन्नप्रतियोगिकत्वविशिष्टतद्घटानुयोगिकत्वाप्रसिद्धेरभावान्तरमादायातिव्याप्तिः गगनप्रतियोगिकत्वविशिष्टमहाकालानुयोगिकत्वाप्रसिद्ध्या गगनाभावमादाय प्रकृताव्याप्तिवारणासम्भवश्च स्यादतो निरुक्तप्रतियोगिकत्वविशिष्टयत्किञ्चिद्धेत्वधिकरणानुयोगिकत्वसामान्याभावं परित्यज्य तदुभयसामान्याभावः उक्तः । न च यादृशप्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिकत्वविशिष्टसम्बन्धसामान्ये हेत्वधिकरणीभूतयत्किञ्चिद्द्रव्यत्वानुयोगिकत्वविशिष्टसाध्यतावच्छेदकसम्बन्धत्वस्य तथाविधसम्बन्धसामान्ये वा यादृशप्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिकत्वस्य व्यतिरेकः तादृशप्रतियोगितानवच्छेदकत्वमेव साध्यतावच्छेदकस्य कथं नोक्तमिति वाच्यम् । द्रव्यवान् प्रमेयत्वादित्यादौ संयोगेन साध्यतायामतिव्याप्त्यापत्तेः प्रमेयानुयोगिकसंयोगसामान्यस्यैव द्रव्यत्वावच्छिन्नप्रतियोगिकत्वेन साध्याभावस्य लक्षणाघटकत्वादिति ध्येयम् । एवं च कालिकसम्बन्धसामान्ये महाकालानुयोगिकत्वसत्त्वेपि गगनप्रतियोगिकत्वविरहाद्गगनाभाव एव घटवान् महाकालत्वादित्यादौ प्रतियोगिव्यधिकरणतया प्रसिद्ध इति भावः । ननु हेत्वधिकरणीभूतयत्किञ्चिद्द्रव्यत्वानुयोगिकत्वं यदि तद्वृत्तित्वं तदा धूमवान् वह्नेरित्यादावतिव्याप्तिः धूमप्रतियोगिकस्यापि संयोगस्य कालिकसम्बन्धेनायोगोलकवृत्तित्वात् । यदि च साध्यतावच्छेदकसम्बन्धस्य संसर्गतानियामको यः सम्बन्धस्तेन हेत्वधिकरणवृत्तित्वमेव तदनुयोगिकत्वं, तदा संयोगेन द्रव्यस्य साध्यतायां द्रव्यजात्य-

चैत्रान्यत्त्वविशिष्टैतदण्डसंयोगे एतदण्डाधिकरणचैत्रानुयोगिकत्व-

न्यतरत्त्वादावतिव्याप्तिः जातौ समवायेन वृत्त्यप्रसिद्धेः। न च साध्यतावच्छेदकसम्बन्धावच्छिन्नाधिकरणतासामान्ये निरुक्तोभयाभावघटकत्वं विवक्षितं तत्र च हेत्वधिकरणवृत्तित्वं स्वरूपसम्बन्धेनैव वाच्यमिति साम्प्रतम्। अत एवेत्यादिवक्ष्यमाणग्रन्थासङ्गतिप्रसङ्गात्। समवायस्यैकत्वेपि तदवच्छिन्नद्रव्यत्वाधिकरणतायां निरुक्तोभयाभावसत्त्वेन द्रव्यं जातेरित्यादावतिव्याप्त्यभावादिति चेन्न। संयोगः पर्वते वह्नेः सम्बन्धो न तु वह्नौ पर्वतस्येत्यादिप्रतीत्या हि किञ्चित्प्रतियोगिकाकिञ्चिदनुयोगिकसम्बन्धत्वमनुभवसिद्धं कुत्रचिदेव संयोगादौ न तु सर्वत्र तच्च स्वरूपसम्बन्धविशेषोतिरिक्तो वेत्यन्यदेतत् तथा च साध्यतावच्छेदकसम्बन्धसामान्ये निरुक्तप्रतियोगिकसम्बन्धत्वहेत्वधिकरणीभूतयत्किञ्चिद्व्यक्त्यनुयोगिकसम्बन्धत्वोभयाभावस्य विवक्षणाद्धूमसंयोगस्यायोगोलकानुयोगिकसंसर्गत्वविरहादेव नातिप्रसङ्गः तत्र यथार्थविशिष्टधीनियामकस्यैव तदनुयोगिकसम्बन्धत्वात्। एतेन वह्निमान् वह्निरूपादित्यादावतिव्याप्तिः पर्वतवह्निसंयोग एव वह्निप्रतियोगिकत्वहेत्वधिकरणीभूतवन्ह्यनुयोगिकत्वोभयाभावविरहेण वह्निसामान्याभावस्य लक्षणाघटकत्वादित्यपास्तम्। पर्वतवह्निसंयोगस्य हेतुमद्वह्निवृत्तित्वेपि वन्ह्यनुयोगिकसम्बन्धत्वविरहेण तत्र तादृशोभयाभावसत्त्वात्। इदन्त्ववधेयम्। यत्रैकसंयोगव्यक्त्या यत्पदार्थयोः परस्परं विशिष्टधीः प्रमा तत्र तयोरेकस्मिन्संयोगेन साध्ये तदीयरूपादौ व्यभिचारिण्यतिव्याप्तिः तदुभयसंयोगस्य निरुक्तोभयाभावविरहादिति। यत्किञ्चिदित्यस्य फलमाह धूमसंयोग इति। अन्यथा वन्ह्यधिकरणमहानसानुयोगिकत्वधूमप्रतियोगिकत्वोभयस्यैव धूमसंयोगे सत्त्वेन धूमाभावस्य प्रतियोगिवैयधिकरण्याभावाद्धूमवान् वह्नेरित्यादावतिप्रसङ्गः स्यादिति भावः। षष्ठ्यन्तत्रयं विरहादित्यन्वयि। निरुक्तपदस्य छलतः फलमाह। चैत्रान्यत्त्वेति। निरुक्तपदानुक्तौ चैत्रान्यत्त्वविशिष्टैतद्दण्डवानेतद्दण्डादित्यत्र चैत्रवृत्त्येतद्दण्डसंयोग एव चैत्रान्यत्त्वविशिष्टैतद्दण्डाभावप्रतियोगिप्रतियोगिकत्वहेत्वधिकरणीभूतचैत्रानुयोगिकत्वोभयाभावविरहात्तादृशदण्डाभावस्य लक्षणाघटकतयाऽ-

स्य गुणकर्मान्यत्त्वविशिष्टसत्तासमवाये च जात्यधिकरणगुणान-

तिव्याप्तिः स्यात् तदुपादाने तु चैत्रान्यत्त्वविशिष्टैतद्दण्डत्वावच्छिन्नप्रतियोगिकत्वस्याभावादेव तत्रोभयाभावसम्भव इति नातिव्याप्तिरिति भावः । यदि च प्रतियोगिता प्रत्याश्रयं नानैव न त्वेकेति मतं तदा चैत्रान्यत्त्वविशिष्टदण्डत्वावच्छिन्नं यच्चैत्रावृत्तिदण्डनिष्ठं प्रतियोगित्वं तदाश्रयप्रतियोगिकत्वहेत्वधिकरणीभूचैत्रानुयोगिकत्वोभयाभावस्य संयोगसामान्य एव सत्त्वान्निरुक्तपदं विनापि नातिव्याप्तिः सम्भवतीति तन्मतसाधारण्येनातिव्याप्तिरक्षणार्थमुक्तमेतदिति । [यद्यनुयोगिता प्रत्याश्रयं नानैव न त्वेकेति मतं तदा] दण्डसामान्यस्य हेतुत्वे एतद्दण्डप्रतियोगिकसंयोगसामान्य एव दण्डान्तराधिकरणीभूतयत्किञ्चिद्द्रव्यत्त्वानुयोगिकत्वाभावादेवोभयाभावसत्त्वादतिव्याप्तिविरहः स्यादतो हेतावेतदिति । संयोगेन साध्यतायां निरुक्तपदव्यावृत्तिमुक्त्वा समवायेन साध्यतायां तामाह गुणकर्मान्यत्त्वेति। इदं च समवायस्य नानात्वमभिप्रेत्य तस्यैकत्वे तु तत्र गुणानुयोगिकत्वविशिष्टसत्ताप्रतियोगिकत्वोभयसत्त्वेनातिव्याप्तितादवस्थ्यात्। यद्यपि यादृशप्रतियोगितावच्छेदकावच्छिन्नेत्याद्युक्तौ वह्निधूमोभयवान् धूमादित्यत्राव्याप्तिः संयोगसामान्य एव वह्निधूमोभयत्वावच्छिन्नप्रतियोगिकत्वधूमाधिकरणपर्वतानुयोगिकत्वोभयाभावसत्त्वात् । न च निरुक्तप्रतियोगितावच्छेदकावच्छिन्नवत्ताप्रमायां सांसर्गिकविषयत्वमेव निरुक्तप्रतियोगिकत्वं वक्तव्यं तच्च पर्वते वह्निधूमयोः प्रत्येकसंयोगस्याप्यस्तीति नाव्याप्तिः अन्यथा पर्वतः संयोगेन वह्निधूमोभयवानित्यादिप्रमाया दुर्घटत्वापत्तेरिति वाच्यम् । तथासत्यत एवेत्यादिना वक्ष्यमाणाया वह्निधूमोभयवान् वह्नेरित्यत्राऽतिव्याप्तेरसङ्गत्यापत्तेः वह्निधूमोभयवत्ताप्रमानियामकसंयोगमात्रस्यैव हेत्वधिकरणीभूतायोगोलकानुयोगिकत्वाभावेन वह्निधूमोभयत्वावच्छिन्नाभावमादायैवातिव्याप्त्यसम्भवात् । तथापि साध्यसाधनभेदेन व्याप्तेर्भेदात् व्याप्यवृत्तिधर्मेण साध्यतायां निरुक्तपदमपहाय यादृशप्रतियोगिताश्रयप्रतियोगिकत्वघटितोभयाभावस्यैव प्रवेशान्नोक्तस्थलाव्याप्तिः । न चैवमुभयत्वेन साध्यतायां व्यभिचारिण्यतिव्याप्तिः, तद्दोषस्य अत एवेत्यादिना वह्निधूमोभयवान् वह्नेरित्यादौ अ-

योगिकत्वस्य विरहान्नातिप्रसङ्गः । स्वरूपसम्बन्धेन गगनादेर्वृत्ति-
मत्त्वे तु निरुक्तप्रतियोग्यनधिकरणहेतुमन्निष्ठाभावप्रतियोगितासा-

---

न्यकृतैवाग्रे वक्ष्यमाणत्वादिति । वस्तुतः सम्बन्धस्यैकप्रतियोगि-
कत्वापरानुयोगिकत्वनियमेन वह्निधूमोभयत्वावच्छिन्नप्रतियोगिक-
सम्बन्धत्वाप्रसिद्धैव तदुभयत्वावच्छिन्नाभावस्य लक्षणाघटकत्वा-
न्नाव्याप्तिः अत एवाग्रे वह्निधूमोभयवान् वह्नेरित्यादावतिव्याप्तिर्दास्य-
ते । न च वह्निधूमोभयत्वावच्छिन्नप्रकारित्वादावेव तादृशोभय-
त्वावच्छिन्नप्रतियोगिकसम्बन्धत्वप्रसिद्धिसम्भवः, प्राचां मते प्रका-
रित्वादौ सम्बन्धत्वाभावात् । विशिष्टधीनियामकस्यैव तथात्वा-
दिति ध्येयम् । न चैवमपि घटवान्नित्यज्ञानत्वादित्यत्राव्याप्तिः विष-
यितासम्बन्धे गगनीयत्वनित्यज्ञानानुयोगिकत्वोभयसत्त्वेन गगनाभा-
वमादायापि प्रसिद्ध्यसम्भवादिति वाच्यम्।तादृशसम्बन्धेन घटादे-
र्व्याप्यवृत्तितया तत्साध्यके प्रतियोगिवैयधिकरण्यस्याप्रवेशादिति
ध्येयम् । अत्र ब्रूमः साध्यतावच्छेदकसम्बन्धावच्छिन्नप्रकृतसाध्या-
धिकरणतानिरूपितस्वरूपसम्बन्धेन यदभावप्रतियोगितावच्छेदका-
वच्छिन्नाधिकरणतासामान्याभाववत्त्वं हेतुमतस्तदभावप्रतियोगिता-
नवच्छेदकत्वस्य साध्यतावच्छेदके विवक्षणेनैव सामञ्जस्ये निरु-
क्तप्रतियोगिकत्वेत्यादिखंडशः प्रसिद्धिर्विफला कालो घटवान् महा-
कालत्वादित्यादौ कालिकसम्बन्धावच्छिन्नघटाधिकरणतानिरूपित-
स्वरूपसम्बन्धेन पटत्वावच्छिन्नाधिकरणत्वसामान्याभावस्यैव हेतु-
मति सत्त्वेन पटत्वावच्छिन्नाभावस्यैव निरुक्तप्रतियोगिव्यधिकरणस्य
सुलभत्वात्।[इति ध्येयम्] एवं यादृशप्रतियोगितावच्छेदकावच्छिन्नप्र-
तियोगिकसम्बन्धसामान्ये साध्यतावच्छेदकसम्बन्धत्वहेत्वधिकरणी-
भूतयत्किञ्चिद्व्यक्त्यनुयोगिकसम्बन्धत्वोभयाभावस्तादृशप्रतियोगिता
कथं नोक्तेति चिन्तनीयम् । कालस्य जगदाधारत्वप्रवादमनुसृत्याह
स्वरूपसम्बन्धेनेति । कालिकविशेषणतयेत्यर्थः । गगनादेरवृत्तित्व-
प्रवादस्तु संयोगसमवायपरः । तथा चोक्तप्रणाल्याऽपि गगनाभा-
वो न प्रतियोगिव्यधिकरण इति घटवान् महाकालत्वादित्यादावव्या-
प्तिस्तदवस्थैवेति भावः । निरुक्तेति । प्रतियोगितावच्छेदकसम्बन्धेन

मान्ये यत्सम्बन्धावच्छिन्नत्वयद्धर्मावच्छिन्नत्वोभयाभावस्तेन सम्ब-

---

यादृशप्रतियोगितावच्छेदकावच्छिन्नासम्बन्धित्वं हेतुमतस्तादृशप्रतियोगितासामान्य इत्यर्थः । तथा च संयोगादिना घटाद्यभावमादायैव घटवान्महाकालत्वादित्यत्र सङ्गतिः । घटाभावप्रतियोगितायां धूमत्वावच्छिन्नत्वसंयोगसम्बन्धावच्छिन्नत्वोभयाभावसत्त्वेन धूमादेर्वह्न्यादिव्यापकत्वापत्तिवारणाय सामान्येति । तथा च धूमनिष्ठतादृशप्रतियोगितायामेव तदुभयसत्त्वाद्दोषः । यत्सम्बन्धेति । समवायिनः संयोगेन साध्यतायां घटत्वादिहेतावव्याप्तिः साधनवन्निष्ठस्य समवायेन संयोगिसामान्याभावस्य प्रतियोगितायां संयोगसमवायोभयावच्छेद्यतासत्त्वादतो धर्मसम्बन्धयोरुपादानम् । तथा च तद्भावप्रतियोगितायां धर्मविधया समवायेन सम्बन्धविधया संयोगेन चाऽवच्छेद्यत्वाभावान्नाव्याप्तिरिति भावः । अत्र च क्वचिद्यादृशसम्बन्धावच्छिन्नेत्यपि द्रष्टव्यम् । शब्दैक्यस्यानुपादेयत्वात् तेन धूमवति तत्तत्संयोगसम्बन्धेन वह्निसामान्याभावसत्त्वेपि नाव्याप्तिः तत्तत्संयोगाद्यवच्छिन्नप्रतियोगितायाः संयोगसामान्यानवच्छिन्नत्वात् संयोगत्वस्य सम्बन्धविधयावच्छेदकतावच्छेदकत्व एव तथात्वात् । एवं यद्धर्मावच्छिन्नेत्यत्रापि क्वचिद्यादृशधर्मावच्छिन्नेतिबोध्यं तेन दण्डिमान् दण्डिसंयोगादित्यादौ तादृशप्रतियोगितायां तद्दण्डावच्छेद्यत्वसंयोगावच्छेद्यत्वोभयाभावासत्वेपि नाव्याप्तिः । प्रमेयत्वावच्छेद्यत्वविशिष्टस्वरूपसम्बन्धावच्छिन्नत्वाप्रसिद्ध्या प्रमेयवान् वाच्यत्वादित्यादावव्याप्तिरतो विशिष्टाभावमपहाय तादृशोभयाभाव उक्तः । न च निरुक्तप्रतियोग्यनधिकरणहेतुमन्निष्ठाभावीययद्धर्मावच्छिन्नप्रतियोगितासामान्ये यत्सम्बन्धावच्छिन्नत्वाभावस्तत्सम्बन्धेन तद्धर्मावच्छिन्नं व्यापकमित्यस्तु धर्मान्तरावच्छिन्नाभावाप्रवेशेन लाघवादिति वाच्यम् । घटवृत्तित्वविशिष्टद्रव्यत्ववान् घटत्वादित्यादावव्याप्तेः । तादृशद्रव्यत्वभेदमादाय कथञ्चित्तत्र लक्षणसमन्वयेपि दधित्वविशिष्टप्रमेयवान् स्थूलदधित्वादित्यत्राव्याप्तिः केनापि सम्बन्धेन हेतुमतः साध्यतावच्छेदकावच्छिन्नानधिकरणत्वासम्भवात् । तत्रापि दध्यन्तरानुयोगिकसमवायादिसम्बन्धेन हेतुमतः प्रकृतसाध्यानधिकरणत्वे तूक्तक्रमेणापि व्यापकत्वं सुवचमिति तु विभावनीय-

न्धेन तद्धर्मावच्छिन्नस्य व्यापकत्वं बोध्यम् । समवायसम्बन्धेन

मिति । तेन सम्बन्धेनेति । न चैवं संयोगेनापि रूपस्य पृथिवीत्वव्यापकत्वापत्तिः तेन सम्बन्धेन रूपाभावप्रतियोग्यधिकरणाप्रसिद्धेरिति वाच्यम् । तथात्वेपि तेन सम्बन्धेन रूपसामानाधिकरण्याप्रसिद्ध्यैव व्याप्तिलक्षणातिव्याप्तिविरहात् यद्धर्मेत्यत्र धर्मस्य साध्यतावच्छेदकसम्बन्धावच्छिन्नाधिकरणतानिरूपकतावच्छेदकत्वेनापि विशेषणीयत्वाद्वा । न च वृत्त्यनियामकसम्बन्धेन साध्यतायामव्याप्तिः तादृशसम्बन्धस्य प्रतियोगितानवच्छेदकतया तत्सम्बन्धावच्छिन्नत्वस्याप्रसिद्धेः । तादृशसम्बन्धस्यापि प्रतियोगितावच्छेदकत्वपक्ष एवैतन्निरुक्त्यादरात् । निरुक्तप्रतियोगितासामान्ये यत्सम्बन्धातिरिक्तसम्बन्धानवच्छिन्नत्वयद्धर्मावच्छिन्नत्वोभयाभावस्तत्सम्बन्धेन तद्धर्मावच्छिन्नस्य व्यापकत्वमिति तु न युक्तम् । वृत्त्यनियामकसम्बन्धेन साध्यतायां व्यभिचारिण्यतिव्याप्त्यापत्तेः । यद्वा स्वावच्छेदकताघटकसम्बन्धेन यादृशप्रतियोगितावच्छेदकानधिकरणं हेत्वधिकरणं तादृशप्रतियोगितासामान्ये यद्धर्मावच्छिन्नावच्छेदकताकत्वयत्सम्बन्धावच्छिन्नावच्छेदकताकत्वोभयाभावस्तेन सम्बन्धेन तद्धर्मावच्छिन्नस्य व्यापकत्वं विवक्षितं वृत्त्यनियामकसम्बन्धस्य प्रतियोगितावच्छेदकत्वाभावेपि प्रतियोगितावच्छेदकताघटकसम्बन्धत्वं सर्वसंमतमेव, चैत्रो न पचतीत्यादौ वृत्त्यनियामकानुकूलत्वसम्बन्धेन पाकविशिष्टायाः कृतेरभावस्य चैत्रादावन्वयदर्शनात् । व्यभिचारिणि तु साध्यवत्सामान्याभावप्रतियोगितायामेव तादृशोभयाभावविरहान्नातिव्याप्तिरिति तु नव्याः । ननु व्याप्यवृत्तिसाध्यकस्थलेप्युक्तक्रमेणैव व्यापकत्वं निर्वाच्यम् । अन्यथा दण्डिमानित्यादौ दण्डित्वादिप्रकारेण व्यापकत्वानुपपत्तेः तथा च प्रमेयवान् वाच्यत्वादित्यादावव्याप्तिः प्रमेयत्वावच्छिन्नत्वस्याप्रसिद्धेः । न च प्रकारित्वादौ तत्प्रसिद्धिः, प्रतियोगितानिष्ठाया एवावच्छेद्यतायाः प्रकृते निवेशनीयत्वात् अन्यथा प्रकारित्वप्रतियोगित्वसाधारणैकावच्छेद्यत्वविरहेण व्यभिचारिण्यतिव्याप्त्यापत्तेरत आह समवायेति । ननु स्वरूपसम्बन्धेन गगनादेर्वृत्तिमत्वेपि प्रकृतसाध्यीयसाध्यतावच्छेदकसम्बन्धसा-

मेयसामान्याभावस्य सामान्यादौ सत्त्वान्मेयत्वादेरप्यभावप्रतियोगितावच्छेदकत्वं सुलभम् । अत एव समवायस्यैकत्वेन द्रव्यत्वादिप्रतियोगिकत्वगुणाद्यनुयोगिकत्वोभयसत्त्वेऽपि द्रव्यं जातेरित्यादौ वह्निधूमोभयवान् वह्नेरित्यादौ संयोगस्य द्वित्वावच्छिन्नप्रतियोगिकत्वविरहेऽपि च नातिव्याप्तिरित्यपि वदन्ति । प्रतियोगित्वादिश्च स्वरूपसम्बन्धविशेषो न सम्बन्धत्वेन निविष्टः । सामा-

---

मान्ये तादृशोभयाभावविवक्षयैव सर्वसामञ्जस्ये कृतं विवक्षान्तरेण घटवान् महाकालत्वादित्यत्र घटीयतादृशविशेषणतायां पटत्वावच्छिन्नप्रतियोगिकत्वविरहेण पटाभावस्यैव प्रतियोगिवैयधिकरण्यसम्भवात्, कालः प्रमेयवान् महाकालत्वादित्यत्र च कालिकसम्बन्धेन प्रमेयसामान्यस्य व्याप्यवृत्तितया तत्र प्रतियोगिवैयधिकरण्यस्यैवानुपादेयत्वेन निर्दोषादतः पूर्वकल्पे दोषान्तरमाह अत एवेति । यद्यपि संयोगमात्रस्यैव द्वित्वावच्छिन्नप्रतियोगिकत्वविरहाद्वह्निधूमोभयत्वावच्छिन्नाभावमादायैव नातिव्याप्तिसम्भावना, तथापि वह्निधूमोभयवान् वह्नेरित्यादौ संयोगस्य द्वित्वावच्छिन्नप्रतियोगिकत्वविरहेपि समवायस्यैकत्वेन द्रव्यत्वप्रतियोगिकत्वगुणानुयोगिकत्वोभयवत्त्वेन द्रव्यं जातेरित्यादौ नातिव्याप्तिरिति योजना । विरहेपि चेति । चकारस्तु प्रामादिकं इति प्राञ्चः । वस्तुतस्तु संयोगस्य सम्बन्धमात्रस्य द्वित्वावच्छिन्नप्रतियोगिकत्वाप्रसिद्धावपीत्यर्थः । तथा च सम्बन्धमात्रस्यैकप्रतियोगिकापरानुयोगिकसम्बन्धत्वनियमेन वह्निधूमोभयत्वावच्छिन्नप्रतियोगिकसम्बन्धस्याप्रसिद्ध्या तादृशप्रतियोगिकत्वस्य लक्षणाघटकत्वेपि वह्निधूमोभयवान् वह्नेरित्यादौ नातिव्याप्तिःप्रकारित्वादेः सम्बन्धत्वे मानाभावादिति तु प्रागेव प्रपञ्चितमस्माभिः । केचित्तु वह्नेरित्यत्र धूमादिति नातिव्याप्तिरित्यनन्तरं चाव्याप्तिर्वेति पाठं कल्पयन्तो द्रव्यं जातेरित्यादावतिव्याप्तिं वह्निधूमोभयवान् धूमादित्यत्र चाव्याप्तिमेव पूर्वलक्षणे दोषं सङ्गमयन्ति। ननु स्वरूपसम्बन्धात्मकप्रतियोगित्वस्य विशिष्टधीजनकत्वरूपसम्बन्धताघटकनियमघटितत्वादात्माश्रयत्वमत आह प्रतियोगित्वादिरिति । आदिना

नाधिकरण्येऽपि सम्बन्धः संयोगत्वादिनैव निविशते। दर्शितश्च नियमाघटितमपि सम्बन्धत्वम्। अभावत्वञ्चेदमिह नास्तीदमिदं न भवतीति प्रतीतिनियामको भावाभावसाधारणः स्वरूपसम्बन्धविशेषः। अतो नाऽभावसाध्यकव्यभिचारिण्यतिप्रसङ्गः। तदपि वा नोपादेयं प्रयोजनाविरहात्। विषयतातत्त्वादिवत् प्रतियोगित्वाधिकरणत्वतत्त्वसम्बन्धत्वादयोऽप्यतिरिक्ता एव पदार्था इत्येकदेशिनः॥

ऽवच्छेदकत्वपरिग्रहः। न सम्बन्धत्वेनेति। प्रतियोगित्वादिधर्मान्तरप्रकारेण हेतुमन्निष्ठाभावीयत्वप्रकारेणैव वा तत्प्रवेशादिति भावः। संयोगत्वादिनैवेति। ननु प्रतियोगितात्वमपि स्वरूपसम्बन्ध एवेत्युक्तदोषतादवस्थ्यम् किं च वृत्त्यनियामकसम्बन्धेन हेतुताग्रहे तेन सम्बन्धेन हेतुसम्बन्धित्वस्यावश्यं प्रवेश एवेत्यतः सम्बन्धत्वेन निवेशेपि न क्षतिरित्याशयेनाह। दर्शितं चेति। विशेष्यविशेषणत्वान्यविशिष्टधीविषयत्वमेव सम्बन्धत्वमिति भावः। भावभिन्नत्वरूपस्याभावत्वस्य प्रवेशे घटत्वाभाववान् द्रव्यत्वादित्यादावतिव्याप्तिरित्याह अभावत्वं चेति। इदमिहेत्यादि। इदं चात्यन्तान्योन्याभावत्वयोरभावत्वागर्भतामभिप्रेत्य। तयोस्तद्गर्भतायां त्वाह तदपि वेति। अभावत्वमपि वेत्यर्थः। अपेरभावोऽर्थः। अतिरिक्तविषयतापक्षस्य केन चित्स्वीकारात् दृष्टान्तता। तत्त्वादीति। विषयतात्वादीत्यर्थः। आदिना प्रकारित्वग्रहः। केचित्तु तत्वं तत्ता आदिना चेदन्तस्योपग्रहः तत्त्वेदन्तयोः पदार्थान्तरत्वं विना दुर्वचत्वात्तत्रैव पर्यवसानादित्याहुः। तत्त्वेति। प्रतियोगितात्वाधिकरणतात्वेत्यर्थः॥

समाप्तमिदं सिद्धान्तलक्षणप्रकरणम्।

दीधित्या अवच्छेदकत्वनिरुक्तिः ।

नन्ववच्छेदकत्वमिह न स्वरूपसम्बन्धविशेषः । सम्भवति लघौ

जागदीश्या अवच्छेदकत्वनिरुक्तिः ॥

इह । अनवच्छेदकत्वमित्यत्रापि अवच्छेदकत्वम् । अवच्छेदकत्वपदार्थः । विशिष्टसत्तात्वसमनियतस्य सत्तात्वस्य लघुनोपि न विशिष्टाभावस्य प्रतियोगितावच्छेदकत्वं गुणादावपि सत्ता नास्तीतिप्रतीतिप्रसङ्गात्, पृथिवीसमवेतत्वासमनियतस्यापि च समवेतत्वस्य पृथिवीसमवेताभावप्रतियोगितावच्छेदकत्वमनतिप्रसङ्गात्, एवं घटरूपत्वस्यासमनियतमपि रूपत्वं व्यधिकरणसंयोगादिसम्बन्धावच्छिन्नघटरूपाद्यभावस्य प्रतियोगितावच्छेदकमतः समनैयत्यमकिञ्चित्करम्

---

(१) अत्र अनवच्छेदकेत्यत्रेति पाठो युक्तः, तस्यैव पूर्वमुल्लिखितत्वात् । अत्रेदमवधेयम् । द्विविधावच्छेदकत्वानुगताऽवच्छेदकतात्वस्याऽभावेन स्वरूपसम्बन्धरूपमनतिरिक्तवृत्तित्वरूपं वाऽवच्छेदकत्वं पक्षीकृत्य स्वरूपसम्बन्धविशेषत्वाभावे साध्ये क्रमशो बाधसिद्धौ स्यातामित्यवच्छेदकत्वपदार्थत्वेन पक्षता जगदीशैरुक्ता । परमिदं यथाश्रुते, तथात्वेप्यवच्छेदकावच्छेदेन पक्षत्वे सामानाधिकरण्येन बाधस्य सामानाधिकरण्येन पक्षत्वे वा सामानाधिकरण्येन सिद्धेश्च प्रतिबन्धकयोर्जागरूकत्वात् । किन्तु स्वरूपसम्बन्धविशेषं पक्षीकृत्याऽवच्छेदकत्वपदप्रयोगप्रयोजकतात्पर्याविषयत्वस्य साध्यत्वमभिप्रेतम् । तत्र च व्यभिचारिण्यतिप्रसङ्गो हेतुः स च लक्षणगतव्यभिचारिहेतुत्ववृत्तित्वरूपः हेतुता च स्वाश्रयलक्षणघटकसाध्यतावच्छेदकांशविशेषणीभूताभावप्रतियोगित्वसंसर्गेण । अतिप्रसङ्गे च प्रमेयधूमत्वादीनामनवच्छेदकत्वरूपमतथात्वम्, तत्र च सम्भवति-तदभावादिति हेतुः । लघुधर्मनिरूपितावच्छेदकत्वनिष्ठसम्भवत्त्वप्रयुक्तगुरुनिष्ठतदभाव इति तु तदर्थः । अवच्छेदकत्वे सम्भवत्त्वञ्च स्वनिष्ठापादकताकापत्तिविशेष्यत्वसम्बन्धावच्छिन्नस्वनिष्ठावच्छेदकताकप्रतियोगिताकभेदप्रतियोगितावच्छेदकत्वरूपम् । लघुन्यपि द्रव्यत्वे प्रमेयधूमाभावप्रतियोगितावच्छेदकत्वे सम्भवत्त्वं नास्ति द्रव्यत्वं यदि प्रमेयधूमाभावप्रतियोगितावच्छेदकत्ववत्स्यात्तदा ह्रदवृत्त्यभावप्रतियोगितावच्छेदकं स्यादित्यापत्त्या स्वावच्छिन्नभेदासत्त्वात्, धूमत्व त्वापत्त्यभावेन तादृशभेदसत्त्वादवच्छेदकत्वं सम्भवदेव । सम्भवत्त्वस्य च गुरुनिष्ठावच्छेदकत्वाभावे स्वाश्रयवृत्तिलघुतावाधिकगुरुतावत्त्वसम्बन्धेन प्रयोजकता । एवञ्च कथञ्चिदपि साध्यहेत्वोर्न सामानाधिकरण्यञ्चातिरिक्तेतादृशापत्तिसाध्यहेतुभावेनानुमितावेव दीधितिकृतां तात्पर्यमुन्नेयमिति दिक् ।

धर्म्मे गुरौ तदभावात् प्रमेयधूमत्वकम्बुग्रीवादिमत्त्वघ्राणग्राह्यगुणत्वादेरतथात्वेन तेन रूपेण साध्यतायां व्यभिचारिण्यतिप्रसङ्गात् । नाप्यनतिरिक्तवृत्तित्वम् । प्रतियोगितायाः स्वरूपसम्बन्धात्मिकायाः प्रतिव्यक्ति भिन्नत्वेन धूमत्वादेरपि तदतिरिक्तवृत्तित्वात् । न च

यस्यावच्छेदकत्वस्वीकारेऽतिप्रसङ्गाद्यभावः स एवावच्छेदक इत्याशयेनाह सम्भवतीति । अतिप्रसङ्गाद्यनापादके लघौ सम्भवतीत्यर्थः । प्रमेयधूमत्वस्य तादृशप्रतियोगितावच्छेदकतापर्याप्त्याधिकरणधूमत्वानतिरेकादाह कम्बुग्रीवेति । न च कम्बुग्रीवादिमत्त्वं कम्बुग्रीवादिव्यक्तिरेव सा च प्रत्येकं हेतुमन्निष्ठाभावप्रतियोगितावच्छेदिकैवेति कुतोऽतिव्याप्तिरिति वाच्यम् । परम्परया संस्थानगतकम्बुग्रीवात्वादिजातिमत्त्वस्यैव साध्यतावच्छेदकत्वात् । तस्य च परम्परयावच्छेदकत्वकल्पनामपेक्ष्य लाघवेन घटत्वस्यैव साक्षात्तथात्वादिति भावः । ननु पृथिवीत्वतेजस्त्वादिना साङ्कर्यात् घटत्वं यदि नाना तदा नैकमपि घटत्वं कम्बुग्रीवादिमत्त्वसमनियतमत आह घ्राणग्राह्येति । घ्राणग्राह्यगुणत्वापेक्षया लघोर्घ्राण्यगन्धत्वस्यैवाऽवच्छेदकत्वं बोध्यमन्यथा परमाणौ गन्धत्वेन सह घ्राणग्राह्यगुणत्वस्य समनियतत्वाभावादगन्धत्वस्यैव प्रतियोगितानवच्छेदकत्वादिति भावः। अत्र घ्राणग्राह्यगुणत्वं घ्राणग्राह्यत्वे सति गुणत्वाव्यापकजातिमत्त्वं तेन गन्धत्वस्य लघोः समनैयत्ये तात्पर्यमित्यपि कश्चित्[अतथात्वेन। प्रतियोगितानवच्छेदकत्वेन । तेन रूपेणाप्रमेयधूमत्वादिरूपेणेत्यर्थः ।] व्यभिचारिणि । प्रमेयत्वादौ । [सपक्षवृत्तिप्रमेयत्वादौ तेन विरुद्धे साध्यसामानाधिकरण्याभावादतिव्याप्त्यभावेपि न क्षतिः ।] नापीति। तादृशप्रतियोगितायास्तद्धर्मावच्छिन्नाभाववदवृत्तित्वमपि नेत्यर्थः । तेन तादृशप्रतियोगिताप्रतियोगिकाभाववदवृत्तितया धूमत्वादेरवच्छेदकत्वाभावादतिप्रसङ्गसम्भवात्स्वरूपसम्बन्धात्मिकाया इत्यस्य न वैयर्थ्यं न वाग्रिमग्रन्थविरोध इति ध्येयम्।स्वरूपसम्बन्धात्मिकाया इति । प्रतिव्यक्ति भिन्नत्वे हेतुः। तत्तदभावप्रतियोग्युभयस्वरूपाया इति तदर्थः । तत्तत्प्रतियोगिमात्रस्वरूपत्वे सामान्याभावविशेषाभावयोः प्रतियोगितयोरविशेषापत्तेरिति ध्येयम् । धूमत्वादे-

तथाविधयत्किञ्चिदेकाभावप्रतियोगितासामान्यशून्यावृत्तित्वं तत्, अत एवातिरिक्तसामान्याभावस्याभावे धूमत्वादेरप्यनवच्छेदकत्वापातादग्रे तत्साधनमपि साधु सङ्गच्छत इति वाच्यम् । वह्निघटवृत्ति-

---

रपीति । तथा च धूमवान् वन्हेरित्यादौ व्याप्तिलक्षणातिव्याप्तिरिति भावः । न चेति । वाच्यमिति परेणान्वयः । तथाविधेति । यत्किञ्चित्पदं व्याप्यवृत्तिसाध्यकस्थलीयलक्षणाभिप्रायेण । तथा च तथाविधो हेतुसमानाधिकरणो यो यत्किञ्चिदभावस्तत्प्रतियोगितात्वावच्छिन्नाभाववदवृत्तित्वं तत्रार्थः । तथाविधाभावीयप्रतियोगितासामान्यशून्यत्वमप्रसिद्धं सर्वस्यैव वस्तुनस्तादृशयावत्त्वाद्यवच्छिन्नाभावप्रतियोगितावत्त्वादत उक्तं यत्किञ्चिदिति । समनियतभावयोरैक्यानुपगमाच्च घटादिसामान्याभावस्यैव घटीयादिसंयोगसम्बन्धेन प्रमेयादिसामान्याभावतया पुनर्नाप्रसिद्धिः । एकधर्मावच्छिन्नार्थकश्चैकपदमव्याप्यवृत्तिसाध्यकस्थलीयनिरुक्तयाभिप्रायेण । तथाविधा या एकधर्मावच्छिन्ना प्रतियोगिता तत्सामान्यशून्यावृत्तित्वमिति योजनया यत्प्रतियोगितायाः अवच्छेदकीभूतधर्मावच्छिन्नाधिकरणत्वं हेतुमतस्तत्प्रतियोगितायाः अवच्छेदकीभूतधर्मावच्छिन्नप्रतियोगितासामान्यशून्यत्वं तत्रार्थ इति वस्तुगतिः । एकपदं शक्तिग्राहिकतया तत्तदभावप्रवेशार्थमिति तु रिक्तं वचः, तन्निवेशे हेतुसामानाधिकरण्यप्रवेशस्य वैयर्थ्यात् [तन्निवेशवैयर्थ्यात् यत्किञ्चित्पदेनैव तल्लाभात्] इति ध्येयम् । यद्यपि प्रमेयवान् वाच्यत्वादित्यादौ समवायेन साध्यतायां व्यभिचारिण्यतिव्याप्तिः प्रमेयत्वावच्छिन्नाभावप्रतियोगितासामान्यशून्यत्वाप्रसिद्धेः तादृशाभावान्तरस्य निरुक्तप्रतियोगितानवच्छेदकतायाः प्रमेयत्वे सत्वात् । तथापि तादृशयत्किञ्चिदेकाभावप्रतियोगितात्वं यद्धर्मव्यापकतावच्छेदकं तत्त्वं विवक्षितम् । अस्ति च प्रमेयत्वव्यापकत्वं प्रमेयसामान्याभावप्रतियोगितायामित्यदोषः । तत् । अवच्छेदत्वम् । अत एवेति । यत्किञ्चिदेकाभावव्यक्तेः प्रवेशादेवेत्यर्थः । यदि सामान्याभावो नास्ति तदा वह्निमन्निष्ठतत्तद्धूमाभावप्रतियोगितासामान्यशून्ये धूमान्तरे वर्तमानतया धूमत्वस्य निरुक्तावच्छेदकत्वं न स्यादिति व्याप्तिलक्षणातिव्याप्तिनिरा-

द्वित्वतार्णातार्णदहनवृत्तित्वद्वित्वाद्यवच्छिन्नप्रतियोगिताकाभावप्रतियोगितानातिरिक्तवृत्तित्वाद्वह्नित्वादावतिप्रसङ्गात् । एतेनान्यूनवृत्तित्वविशेषितमपि परास्तम् । अत एव नानाप्रतियोगिवृत्त्येकप्रतियोगिताङ्गीकारेऽपि न निस्तारः । लघुरूपसमनियतगुरुरूपेण साध्यतायां सद्धेतावव्याप्तिः तादृशतदवच्छिन्नत्वाप्रसिद्धेरिति चेन्न । प्रतियोगितावच्छेदकानातिरिक्तवृत्तित्वस्य विवक्षितत्वात् । स्वस-

---

सार्थमेव सामान्याभावः साधयिष्यत इति । तथा च धूमसामान्याभावस्यैव हेतुसमानाधिकरणस्य प्रतियोगितासामान्यशून्ये घटादाववृत्त्या धूमत्वस्यावच्छेदकत्वमिति भावः । ननु तादृशप्रतियोगितायां अन्यूनानतिरिक्तवृत्तित्वं वाच्यं वह्नित्वं तु घटवृत्तितादृशप्रतियोगितान्यूनवृत्त्यत आह । तार्णातार्णेति । अतिप्रसङ्गादिति । तथा च व्याप्तिलक्षणासम्भव इति भावः । [एतेनेति क्वाचित्कम् । तत्र] एतेन। तार्णातार्णोभयाभावमादाय दत्तदोषेण । सामान्याभावप्रतियोगित्वमेकमेव समस्तप्रतियोगिवृत्ति इति तदनतिरिक्तवृत्त्येव धूमत्वमतो नोक्तातिव्याप्तिरिति प्रगल्भोक्तं दूषयति । अत एवेति । उक्तरीत्या वह्नित्वादेरवच्छेदकत्वप्रसङ्गादेवेत्यर्थः । ननु प्रतियोगितानवच्छेदकामित्यत्रावच्छेदकत्वं स्वरूपसम्बन्ध एव वाच्यम् स्वावच्छेद्यप्रतियोगिताकत्वेन च साध्यतावच्छेदकं पुनर्विशेषणीयमतो गुरुधर्मेण साध्यतायां नातिव्याप्तिरत आह लघुरूपेति । ननु घटवान् महाकालत्वादित्यादावव्याप्तिभियेव गुरुरूपेण साध्यतायामतिव्याप्तिभियापि प्रतियोगिताधर्मिकोभयाभावघटितं लक्षणं वाच्यमतस्तदपि दूषयति लघुरूपेत्यादिनेत्यपि कश्चित्। वह्नित्वादिलघुरूपसमनियतं यत्प्रमेयवह्नित्वादिकं तद्रूप्येण साध्यतायां धूमादावव्याप्तिरित्यर्थः । प्रतियोगितावच्छेदकेति । हेतुसमानाधिकरणाभावप्रतियोगिताया यदवच्छेदकं तदभाववदवृत्तित्वस्य मूलस्थप्रतियोगितावच्छेदकान्तेन विवक्षितत्वादित्यर्थः । अत्र च येन सम्बन्धेन प्रतियोगितावच्छेदकत्वं तेनैव तदभावो ग्राह्यस्तेन धूमादिमन्निष्ठाभावप्रतियोगितावच्छेदकस्य घटत्वादेः कालिकादिसम्बन्धे-

मानवृत्तिकञ्चावच्छेदकं ग्राह्यम् । तत्त्वञ्च स्वपर्याप्त्यधिकरणपर्या-

---

नाभाववत्यात्मादौ वह्नित्वादेः समवायेनावृत्तावपि नोक्तावच्छेदकत्वम्, न वा धूमत्वादेः संयोगादिसम्बन्धेन स्वाभाववति समवेतत्वेप्यवच्छेदकत्वहानिः । यत्तु साध्यतावच्छेदकताघटकसम्बन्धेन तदभावो ग्राह्य इति । तत्तुच्छम् । धूमत्वप्रकारकप्रमाविशेष्यवान् वह्नेरित्यादावतिव्याप्तेः । लघुतया हेतुमन्निष्ठताद्दशप्रमाविशेष्याभावप्रतियोगितावच्छेदकीभूतस्य धूमत्वादेः स्वरूपसम्बन्धेनाभाववति धूम एव ताद्दशप्रमाविशेष्यत्वस्य वृत्तेः । तद्वदवृत्तित्वं च स्वरूपसम्बन्धेन तद्वति साध्यतावच्छेदकताघटकसम्बन्धेनावर्तमानत्वं नातो धूमत्वाभावस्यैव कालिकसम्बन्धेनाश्रये धूमे समवायेन स्वरूपसम्बन्धेन च तदाश्रये स्पन्दादौ कालिकविशेषणतया धूमत्वस्य वर्तमानत्वेप्यवच्छेदकत्वहानिः । न च तथापि समवायेन प्रमेयस्य साध्यतायां भावत्वादावतिव्याप्तिः प्रमेयत्वरूपस्यावच्छेदकस्याभावाप्रसिद्ध्या प्रमेयाभावस्य लक्षणाघटकत्वादिति वाच्यम् । हेतुमन्निष्ठाभावप्रतियोगितावच्छेदकं यद्धर्मान्यूनवृत्ति तत्त्वस्यैव विवक्षितत्वात् । अत एव समवायेन सत्ताश्रयस्य साध्यत्वेपि ताद्दशावच्छेदकीभूतस्य सत्त्वस्याभाववति सामान्यादौ साध्यतावच्छेदकताघटकीभूतसमवायसम्बन्धेन वृत्तेरप्रसिद्धावपि भावत्वादिहेतौ नातिव्याप्तिः । इदं तु चिन्त्यते । ताद्दशप्रतियोगितावच्छेदकानतिरिक्तवृत्तिभिन्नत्वापेक्षया नञर्थद्वयाप्रवेशेन लाघवात्ताद्दशावच्छेदकं यद्यत्तत्तत्प्रत्येकातिरिक्तवृत्तित्वं साध्यतावच्छेदकस्य विशेषणं वक्तुमुचितमिति । ननु धूमादिमन्निष्ठाभावप्रतियोगितावच्छेदकं यद्वह्न्यादिनिष्ठं तार्णातार्णदहनोभयत्वं यावत्त्वं वा तदनतिरिक्तवृत्तेरेव वह्नित्वादिकमिति व्याप्तिलक्षणमसम्भवीत्यत आह स्वसमानेति । स्वमनतिरिक्तवृत्तित्वेनाभिमतम् । तथा च स्वसमानवृत्तिकं यद्धेतुमन्निष्ठाभावप्रतियोगितावच्छेदकं तदनतिरिक्तवृत्तित्वमर्थः । यावत्स्वस्य वह्नित्वव्यापकत्वेपि वह्नित्वसमानवृत्तिकत्वाभावादेव न तस्य ताद्दशावच्छेदकत्वमिति भावः । ननु स्वसमानवृत्तिकत्वं स्वान्यूनानतिरिक्तवृत्तित्वम्, तथा च वह्निनिष्ठयावत्त्वादेरपि समवायादिना व-

प्तिवृत्तिकत्वम् । यावत्त्वादिकन्तु न तथा । पर्याप्तिश्चायमेको घट इमौ द्वाविति प्रतीतिसाक्षिकः स्वरूपसम्बन्धविशेष एव । त्रित्वादिकमपि न द्वित्वादिसमानवृत्तिकमिति द्वित्वादिना साध्यतायां

न्हित्वादिसमानवृत्तिकत्वमेवात आह तत्त्वं चेति । [स्वसमानवृत्तिकत्वं चेत्यर्थः ।] स्वपर्याप्तीति । न च वन्हित्वपर्याप्त्यधिकरणे यावत्येव वह्नौ वह्निवृत्तियावत्वादेः पर्याप्तत्वाद्वह्नित्वस्यावच्छेदकत्वं दुर्वारमिति वाच्यम । स्वपर्याप्त्यवच्छेदकधर्मावच्छिन्नपर्याप्तिकत्वस्योक्तत्वात् । वह्नित्वपर्याप्त्यवच्छेदकीभूततत्तद्वह्नित्वावच्छेदेन यावत्त्वादेरपर्याप्तत्वात् । न चैवमनतिरिक्तवृत्तित्ववैयर्थ्यम्, वन्हित्वपर्याप्त्यवच्छेदकधर्मावच्छिन्नपर्याप्तिकतत्तद्वन्ह्यन्यतरत्वादिकमादाय वन्हित्वस्यापि पारिभाषिकावच्छेदकत्वापत्तेरिति भावः । यावत्त्वादिकमिति । आदिना तार्णातार्णोभयत्वादिसंग्रहः । न तथेति । न वन्हित्वपर्याप्त्यधिकरणपर्याप्तिवृत्तिकमित्यर्थः । ननु पर्याप्तिः समवायः स च तार्णातार्णोभयत्वादावप्यक्षत एवेत्यत आह पर्याप्तिश्चेति । अयमेको घट इति एकमात्रवृत्तिधर्मावच्छेदेन घटत्वस्य पर्याप्तिं दर्शयितुम्, इमौ द्वावित्युभयवृत्तिधर्मावच्छेदेन द्वित्वस्य पर्याप्तिं दर्शयितुम् । अन्यथा द्वौ द्वित्ववानिति प्रतीत्योरविशेषप्रसङ्गादिति भावः । न चायमेक इत्यादिप्रतीतेः समवायेनैवोपपत्तौ एकत्ववन्हित्वादेः पर्याप्तिसम्बन्धसत्वे मानाभावात्तादृप्येण साध्यतायां व्यभिचारिण्यतिव्याप्तिरिति वाच्यम । इदंत्वावच्छिन्न एव वन्हित्वमेकत्वं च पर्याप्तं न तु द्वित्वमित्याद्यनुभवादेव तदभ्युपगमादिति भावः । व्यासज्यवृत्तित्वतदन्यत्वान्यतररूपेणैव स्वसमानवृत्तिकत्वोक्त्यापि वन्हित्वादिवारणसम्भवे स्वपर्याप्तीत्यादिपर्यन्तानुधावनस्य प्रयोजनमाह त्रित्वादिकमिति।तथा च धूमवन्निष्ठाभावप्रतियोगितावच्छेदकस्य वह्निधूमघटत्रितयत्वस्य व्यासज्यवृत्तितया स्वसमानवृत्तिकस्य तस्यैवानातिरिक्तवृत्तित्वं वह्निधूमोभयत्वस्यापीति तादृप्येण स्वसमानवृत्तिकत्वोक्तौ वह्निधूमोभयवान् धूमादित्यादावेव व्याप्तिलक्षणाव्याप्तिः स्यादिति भावः। यद्यपि तार्णातार्णोभयत्वाद्यव-

च्छिन्नाभावस्य प्रतियोगितावच्छेदकताघटकसम्बन्धः पर्याप्तिरेव न तु समवायः तार्णमात्रसत्वेपि तार्णातार्णोभयं नास्तीतिप्रतीतेः तथा च प्रतियोगितावच्छेदकताघटकपर्याप्तिसम्बन्धेन तादृशोभयत्वाद्यभावति प्रत्येकवह्नौ वृत्तिमत्त्वादेव वह्नित्वादेरवच्छेदकत्वासम्भवात् स्वसमानवृत्तिकेति व्यर्थम्। तथापि प्रत्येकवह्नौ पर्याप्तिसम्बन्धेनापि न तार्णातार्णोभयत्वादेरभावः किं तु घटादावेव। अन्यथा तत्सम्बन्धेन प्रत्येकावृत्तिधर्मस्य तत्सम्बन्धेन समुदायावृत्तित्वनियमात् उभयत्रैव प्रत्येकं द्वित्वाभावसत्वादिमौ न द्वावित्यपि प्रतीत्यापत्तेः। न चैवमयं द्वावित्यपि प्रत्यक्षप्रतीतिः प्रमा स्यादेकव्यक्तावपि द्वित्वस्य पर्याप्तिसम्बन्धेन सत्त्वादिति वाच्यम्। मूलावच्छिन्नो वृक्षः कपिसंयोगीत्यादिप्रतीतेर्मूलावच्छेद्यसमवायेन कपिसंयोगाद्यवगाहित्ववदुक्तप्रतीतेरपीदन्त्वावच्छेद्यपर्याप्तिसम्बन्धेनैव द्वित्वावगाहितया प्रमात्वायोगात्। एकव्यक्तेरिदन्त्वावच्छेद्यपर्याप्तिसम्बन्धेन द्वित्वरहितत्वात्। अत एवायं न द्वावित्यादिप्रतीतेः प्रमात्वमुपपद्यते इदन्त्वावच्छेद्यपर्याप्तिसम्बन्धेन यो द्वित्वस्याभावस्तद्वति तदवगाहित्वात्। न चेदन्त्वावच्छेद्यपर्याप्त्यप्रसिद्धिः, एकत्ववह्नित्वादौ तत्सौलभ्यात्। एकत्वं वह्नित्वं चेदन्त्वावच्छिन्ने पर्याप्तं न तु द्वित्वादिकमित्यनुभवस्य सर्वसिद्धत्वात्। न चैकस्य द्वित्वपर्याप्त्यधिकरणत्वे घटद्वयशून्येपि गृहादावत्र घटाविति प्रतीतिः प्रमा स्यादिति वाच्यम्। तदगृहनिष्ठे घटे घटद्वयत्वावच्छेदेन तदगृहवृत्तित्वविरहात् घटद्वयत्वावच्छेदेन तदगृहवृत्तित्वावगाहिन्याः प्रोक्तप्रतीतेर्भ्रमत्वात्। अत एव घटौ न तदगृहनिष्ठावित्याकारकधीस्तत्र प्रमा तदगृहस्थितत्वापि घटस्य घटद्वयत्वावच्छेदेन तन्निष्ठत्वाभावसम्भवात्। घटपटयोर्न घटत्वमित्यादिप्रतीतेः प्रमात्वानुरोधेन व्यासज्यवृत्तिधर्मावच्छिन्नाधिकरणताकस्य प्रतियोगिमत्यपि तदभावस्य सर्वसंमतत्वात्। न च घटत्वादौ घटपटोभयवृत्तित्वाभाव एवोक्तप्रतीतिविषयः। सामान्यघटयोर्न समवायेन घटत्वमित्यादौ सामान्यघटोभयसमवेतत्वाप्रसिद्ध्या तदभावस्य भानासम्भवादिति सम्प्रदायविदः। परे तु तदनतिरिक्तवृत्तित्वमत्र न तदभाववदवृत्तित्वम्, तथा सति हेतुमन्निष्ठाभावप्रतियोगितावच्छेदकं यद्वह्निधूमोभयत्वं प्रत्येकं तदभाववान्वह्निधूमश्चेति तदुभयवृत्तित्वस्यैव वह्निधूमोभयत्वे सत्त्वात्

तादृप्येण साध्यतायां वह्न्यादिहेतावतिव्याप्त्यापत्तेः । किन्तु तादृशप्रतियोगितावच्छेदकवती यावती व्यक्तिस्तद्भेदकूटवदवृत्तित्वमेव तथात्वं वाच्यम् । तथा च वह्निमान् धूमादित्यत्राव्याप्तिरेव तादृशावच्छेदकीभूतं यत्तार्णातार्णोभयत्वादिकं तद्वतो निखिलवह्नेः प्रत्येकभेदकूटवति वह्नित्वस्यावृत्तेरतः स्वसमानवृत्तिकत्वं देयमेवेति वदन्ति । तत्तुच्छम् । हेतुमन्निष्ठाभावप्रतियोगितावच्छेदकं यद्धूमत्वं तद्भाववति पर्याप्तिसम्बन्धेन वह्निधूमोभयत्वस्यावृत्तित्वादेव तादृप्येण साध्यतायां वह्निहेतावतिव्याप्त्यभावाद् भेदकूटनिवेशव्यर्थतापातादिति । के चित्तु तार्णातार्णोभयं नास्तीतिप्रतीतौ प्रतियोगितावच्छेदकतानिर्वाहकः समवाय एव सम्बन्धो भासते न तु पर्याप्तिः दण्डिपुरुषत्वाश्रयस्य सत्वेपि तदवच्छिन्नाभाववत्तादृशोभयत्वाश्रयस्य तार्णमात्रस्य सत्वेपि तादृशोभयत्वावच्छिन्नाभावो न विरुद्धस्तदवच्छिन्नाधिकरणतया सार्धमेव तस्य विरोधात् एवं च यथाश्रुतमेव सम्यगित्याहुः । तच्चिन्त्यम् । समवायेन तद्वतोऽधिकरणे तदवच्छिन्नानधिकरणत्वस्यासम्भवात् । वस्तुतस्तु समवायेन प्रमेयसाध्यके भावत्वादिहेतावतिव्याप्तिवारणार्थमवश्यं प्रतियोगितावच्छेदकानतिरिक्तवृत्तित्वमित्यस्य हेतुमन्निष्ठाभावप्रतियोगितावच्छेदकं यदन्यूनवृत्ति तत्त्वमर्थो वाच्यः तत्रान्यूनवृत्तित्वं न प्रतियोगितावच्छेदकताघटकसम्बन्धेन वाच्यम् । वह्निधूमोभयवान् वह्नेरित्यादावतिव्याप्त्यापत्तेः । हेतुमन्निष्ठाभावप्रतियोगितावच्छेदकं यद्वह्निधूमोभयत्वं तस्य तादृशपर्याप्त्यधिकरणं यद्वह्निधूमोभयं तत्प्रत्येकनिष्ठस्य पर्याप्तिसम्बन्धावच्छिन्नाभावस्य प्रतियोगित्वेन तन्न्यूनवृत्तित्वात् । किन्तु स्वावच्छिन्नप्रतियोगित्वसम्बन्धेनैव तथात्वं वाच्यं, तथा च वह्निनिष्ठयावत्त्वतार्णातार्णोभयत्वादेरपि स्वावच्छिन्नप्रतियोगित्वसम्बन्धेन वह्नित्वादिकं प्रत्यन्यूनवृत्तित्वात् वह्निमान् धूमादित्यादौ वह्नित्वादेरवच्छेदकत्ववारणाय स्वसमानवृत्तिकत्वेनावच्छेदकं विशेषणीयमिति युक्तमुत्पश्यामः । ननु प्रतियोगितावच्छेदकानतिरिक्तवृत्तित्वमित्यत्र प्रतियोगितावच्छेदकत्वं यदि प्रतियोगितानतिरिक्तवृत्तित्वरूपं तदा तार्णातार्णोभयत्वावच्छिन्नाभावमादाय वह्निमान् धूमादित्यादौ वह्नित्वमपि पारिभाषिकावच्छेदकं स्यादत आह । घटकमिति । प्रतियोगिताधर्मिकोभयाभावघटितलक्षणे गुरु-

व्याप्तिः। घटकश्चावच्छेदकत्वं स्वरूपसम्बन्धविशेषः। एवञ्च यद्धर्मावच्छिन्नेयत्र यद्धर्मान्यूनवृत्तिधर्मावच्छिन्नेति वक्तव्यम्, तेनोक्ताव्याप्तिनिरासः। वस्तुतस्तु तदवच्छिन्नप्रतियोगिताकाभाववदस-

---

रूपेण साध्यतायामव्याप्तिमपाकर्तुमाह एवं चेति। ननु धूमत्वमेकस्मिन्नेव धूमे पर्याप्तमित्यादिप्रतीतेः प्रत्येकवृत्तिधर्मावच्छिन्नाधिकरणताकत्वावगाहितयैवोपपत्तौ धूमत्वादेः पर्याप्तिसम्बन्धत्वे मानाभाव इति धूमवान् वह्नेरित्यादावतिव्याप्तिः स्वपदेन धूमत्वस्य गृहीतुमशक्यत्वात्, एवं सत्तात्वस्य विशिष्टसत्तात्वानतिरिक्तवृत्तितया सत्त्वादिसाध्यकजातिमत्त्वादिहेतावव्याप्तिश्चेत्यत आह वस्तुतस्त्विति। तदवच्छिन्नेति। हेतुमन्निष्ठाभावप्रतियोगितावच्छेदकीभूततत्तद्धर्मावच्छिन्नाभाववत्यसम्बद्धं यद्धर्मविशिष्टं सामान्यं तदेव पारिभाषिकावच्छेदकमित्यर्थः। अत्र तदाश्रयप्रतियोगिकाभावेत्युक्तौ तादृशधूमत्वाश्रयप्रतियोगिकोभयाभावादिमति प्रमेयधूमत्वविशिष्टस्य सम्बद्धतयाऽवच्छेदकत्वं न स्यात्किं तु गगनत्वादेरेव तथात्वं स्यादत उक्तं तदवच्छिन्नेति। प्रतियोगित्वं साध्यतावच्छेदकसम्बन्धेन ग्राह्यम्, तेनायं घट एतत्त्वादित्यादौ हेतुमन्निष्ठाभावप्रतियोगितावच्छेदकं पटत्वं सम्बन्धसामान्येन कालिकसम्बन्धेन वा तदवच्छिन्नाभाववति नित्यगुणगगनादौ घटत्वत्वविशिष्टस्यासम्बद्धत्वेपि नाव्याप्तिः। पर्वतादेरुत्पत्तिकालावच्छेदेन संयोगसम्बन्धावच्छिन्नधूमाभाववत्त्वात् तत्र च धूमत्त्वविशिष्टस्य सम्बद्धत्वात् तदसम्बद्धस्वविशिष्टसामान्यकं गगनत्वादिकमुपादाय धूमवान् वह्नेरित्यादावतिव्याप्तिरतः प्रतियोगिव्यधिकरणत्वेन तदवच्छिन्नाभावो विशेष्यः। प्रतियोगितावच्छेदकसम्बन्धेन प्रतियोगितावच्छेदकावच्छिन्नासम्बन्धी तदवच्छिन्नाभाववान् ग्राह्य इति तु पर्यवसितार्थः। तेन संयोगसम्बन्धावच्छिन्नधूमाभावस्यैव धूमवत्पर्वतादौ समवायादिसम्बन्धेन प्रतियोगिव्यधिकरणत्वेपि धूमत्वस्य नावच्छेदकत्वहानिः, न वा द्रव्यं घटत्वादित्यादौ हेतुमन्निष्ठाभावप्रतियोगितावच्छेदकं यद्घटभिन्नद्रव्यत्वत्वं प्रतियोग्यनधिकरणे तदवच्छिन्नाभाववति गुणादौ द्रव्यत्त्वत्त्वविशिष्टस्यासत्त्वेप्यव्याप्तिः। वस्तुतो निरुक्तप्रति-

योग्यनधिकरणत्वमेव तदवच्छिन्नाभाववतः साध्यतावच्छेदकसम्बन्धेन वाच्यं न तु प्रतियोगितायास्तत्सम्बन्धावच्छिन्नत्वम्, वृत्त्यनियामकसम्बन्धेन साध्यतायां तत्सम्बन्धावच्छिन्नप्रतियोगित्वाप्रसिद्ध्या ऽव्याप्तिप्रसङ्गादिति ध्येयम् । न च घटवान् महाकालत्वादित्यादौ तादृशप्रतियोगितावच्छेदकं यद्गगनत्वं तदवच्छिन्नाभावस्य प्रतियोगिवैयधिकरण्याप्रसिद्ध्याव्याप्तिरिति वाच्यम् । अत्रापि साध्यतावच्छेदकसम्बन्धसामान्ये तादृशधर्मावच्छिन्नप्रतियोगिकत्वयदनुयोगिकत्वोभयाभावस्तदसम्बद्धत्वस्य विवक्षितत्वात् । तदसम्बद्धत्वमपि साध्यतावच्छेदकसम्बन्धेन सम्बद्धत्वसामान्याभावो बोध्यः । तेन घटत्वाद्यवच्छिन्नाभाववति घटत्वगगनत्वविशिष्टस्यापि यथाकथञ्चित्तादात्म्यादिना सम्बद्धतया न पारिभाषिकावच्छेदकाप्रसिद्धिनिबन्धनो व्याप्तिलक्षणासम्भवः । [न वा तादृशप्रतियोगितावच्छेदकीभूतमहानसीयवन्हित्वावच्छिन्नाभाववति जलादौ वन्हित्वविशिष्टस्यासम्बद्धत्वाद्वन्हिमान् धूमादित्यादावव्याप्तिः] धूमवन्निष्ठाभावप्रतियोगितावच्छेदकीभूततत्तद्वन्हित्वावच्छिन्नाभाववति वन्हित्वविशिष्टस्य तत्तद्वन्हेरसम्बद्धत्वाद्वह्निमान् धूमादित्यादौ वह्नित्वमप्यवच्छेदकं स्यादतः सामान्यपदम् । ननु कालिकादिसम्बन्धेन गगनत्वविशिष्टं घटादि तस्य तादृशप्रतियोगितावच्छेदकीभूतगगनत्वाद्यवच्छिन्नाभाववति, साध्यताघटकसंयोगादिसम्बन्धेन सम्बद्धत्वात् पारिभाषिकावच्छेदकाप्रसिद्ध्या व्याप्तिलक्षणासम्भवः । न च साध्यतावच्छेदकताघटकसम्बन्धेनं स्ववैशिष्ट्याभिधानान्नैष दोषः । पुरुषनिष्ठसंयोगसम्बन्धेन दण्डवतः कालिकविशेषणतया साध्यतायां महाकालत्वहेतावव्याप्त्यापत्तेः । गगनत्वादेः पुरुषनिष्ठसंयोगसम्बन्धेनावृत्त्या पारिभाषिकावच्छेदकाप्रसिद्धेः । न च हेतुमन्निष्ठाभावप्रतियोगितावच्छेदकत्वं तादृशसम्बन्धावच्छिन्नं तेनैव सम्बन्धेन स्ववैशिष्ट्याभिधानात् घटत्वगगनत्वादौ पारिभाषिकावच्छेदकत्वं सुलभमिति वाच्यम् । धूमत्वप्रकारकप्रमाविशेष्यवान् वह्नेरित्यादौ साध्यतावच्छेदकमपेक्ष्य लघोर्धूमत्वस्यैव समवायेन हेतुमन्निष्ठसंयोगसम्बन्धावच्छिन्नाभावप्रतियोगितावच्छेदकतया समवायेन च धूमत्वप्रकारकप्रमाविशेष्यत्वस्यावृत्त्या तस्य पारिभाषिकावच्छेदकत्वाभावप्रस-

म्बद्धस्वविशिष्टसामान्यकत्वं स्वविशिष्टसम्बन्धिनिष्ठाभावप्रतियोगितानवच्छेदकतत्कत्वं वा तदनतिरिक्तवृत्तित्वं वक्तव्यम्। अत

ङ्गात्। न च साध्यत्वतादृशप्रतियोगित्वयोरन्यतरावच्छेदकताघटकसम्बन्धेनैव स्ववैशिष्ट्यस्य विवक्षणान्नोक्ताव्याप्त्यतिव्याप्त्योः प्रसङ्ग इति वाच्यम्। तादात्म्येन धूमवतः संयोगेन साध्यतायां द्रव्यत्वादावतिव्याप्त्यापत्तेः। धूमापेक्षया लघुत्वेन हेतुमन्निष्ठाभावप्रतियोगितावच्छेदकं यद्धूमत्वं तदवच्छिन्नाभाववति [तत्तत्परमाणौ] प्रतियोगितावच्छेदकताघटकसमवायसम्बन्धेन धूमविशिष्टस्य परमाणोः साध्यताघटकसंयोगसम्बन्धेन सम्बद्धतया धूमस्य पारिभाषिकावच्छेदकत्वविरहादिति चेत्। अत्राहुः। यद्यत्सम्बन्धेन यद्धर्मविशिष्टसामान्यं निरुक्तधर्मावच्छिन्नाभाववति साध्यतावच्छेदकसम्बन्धेनासम्बद्धं तत्तत्सम्बन्धेन तत्तद्धर्मावच्छिन्नविशेष्यताभिन्नं यत्साध्यतावच्छेदकताघटकसम्बन्धावच्छिन्नं विशेष्यत्वं तदवच्छेदकसाध्यतावच्छेदकधर्मवत्त्वस्य विवक्षितत्वान्नोक्तदोषः। समवायेन वह्नित्वावच्छिन्नविशेष्यतायाः स्वरूपादिसम्बन्धेन गगनत्वावच्छिन्नविशेष्यताभिन्नत्वादेवावच्छेदकाप्रसिद्धिनिबन्धनासम्भवस्य व्युदासादिति। नन्वेवमपि विशिष्टसत्तावान् जातेरित्यादावतिव्याप्तिः तादृशद्रव्यत्वाद्यभाववति गुणादौ विशिष्टसत्त्वस्य सम्बद्धत्वात्। स्वस्य तादृशधर्मावच्छिन्नाभाववन्निष्ठसम्बन्धितानवच्छेदकत्वविवक्षया कथञ्चित्तत्रातिव्याप्तिवारणेपि सत्तावान् भावत्वादित्यादावतिव्याप्तिः। सत्तात्वाद्यवच्छिन्नाभाववति सामान्यादौ साध्यताघटकसमवायसम्बन्धेन सम्बन्धित्वाप्रसिद्धेः सत्तात्वस्य निरुक्तावच्छेदकत्वाभावात्। न च साध्यतावच्छेदकसम्बन्धसामान्ये तदवच्छिन्नाभाववदनुयोगिकत्वयद्धर्मावच्छिन्नप्रतियोगिकत्वोभयाभावस्तत्वं विवक्षितमतो नोक्तदोषः। तथासति प्रमेयधूमवान् वह्नेरित्यादावतिव्याप्त्यापत्तेः। धूमत्वघटितताद्दशोभयत्वापेक्षया प्रमेयधूमत्वघटिततादृशोभयत्वस्य गुरुतया तदवच्छिन्नप्रतियोगित्वाप्रसिद्धेरित्यस्वरसादाह स्वविशिष्टेति। स्वं पारिभाषिकावच्छेदकत्वेनाभिप्रेतम्। तथा च हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकं यद्विशिष्टस-

म्बन्धिनिष्ठाभावप्रतियोगितानवच्छेदकं स एव पारिभाषिकावच्छेदकः तदन्यत्वं साध्यतावच्छेदकविशेषणमिति भावः। अत्र स्वविशिष्टसम्बन्धित्वं साध्यतावच्छेदकसम्बन्धेन ग्राह्यम्। तेन प्रतियोतावच्छेदकमात्रस्यैव यथाकथञ्चित्सम्बन्धेन यत्स्वविशिष्टसम्बन्धि तन्निष्ठाभावप्रतियोगितावच्छेदकत्वेपि न पारिभाषिकावच्छेदकाप्रसिद्धिः। अभावश्चात्र प्रतियोगिव्यधिकरणो बोध्यः। तेन घटत्वाद्यवच्छेदकमात्रस्यैव स्वविशिष्टसम्बन्धिनिष्ठसंयोगसम्बन्धावच्छिन्नाभावप्रतियोगितावच्छेदकत्वात् पारिभाषिकावच्छेदकाप्रसिद्ध्या वह्निमान् धूमादित्यादौ नाव्याप्तिः। प्रतियोगितावच्छेदकसम्बन्धेन प्रतियोगितावच्छेदकविशिष्टप्रतियोग्यसम्बन्धित्वं स्वविशिष्टसम्बन्धिनो विशेषणं देयमिति तु फलितार्थः। तेनाऽभावमात्रस्यैव यथाकथञ्चित्कालिकादिसम्बन्धेन प्रतियोगिनः सम्बन्धिनि वृत्तावपि न क्षतिः न वा हेतुमन्निष्ठाभावप्रतियोगितावच्छेदकीभूताविशिष्टसत्तात्वादेः सत्तात्वाद्यवच्छिन्नसम्बन्धिनिष्ठप्रतियोगिव्यधिकरणाभावप्रतियोगितानवच्छेदकत्वेपि सत्तावान् जातेरित्यादावव्याप्तिः। तादृशाभावप्रतियोगित्वन्तु साध्यतावच्छेदकसम्बन्धावच्छिन्नं ग्राह्यम्। तेन न घटत्वादेरपि स्वविशिष्टसम्बन्धिनिष्ठसमवायाद्यवच्छिन्नप्रतियोगिव्यधिकरणाभावप्रतियोगितावच्छेदकत्वेपि वह्निमान् धूमादित्यादावव्याप्तिप्रसिद्धिनिबन्धनो दोषः। वस्तुतः पूर्ववदिहापि साध्यतावच्छेदकसम्बन्धेन निरुक्तप्रतियोग्यसम्बन्धित्वमेव स्वविशिष्टसम्बन्धिनो वाच्यम्। तेन वृत्त्यनियामकसम्बन्धेन साध्यतायां तादृशसम्बन्धावच्छिन्नप्रतियोगित्वाप्रसिद्धावपि नाव्याप्तिः। [प्रतियोगितानवच्छेदकमित्यत्रावच्छेदकत्वं हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकताघटकसम्बन्धेन बोध्यम्। तेन घटत्वादेर्विषयितासम्बन्धेन घटत्वादिविशिष्टस्य ज्ञानादेः संयोगेनाभावस्य प्रतियोगिव्यधिकरणस्य घटादिविशिष्टसम्बन्धिनिष्ठस्य प्रतियोगिताया विषयितासम्बन्धेनावच्छेदकत्वेपि न तादृशावच्छेदकाप्रसिद्धिः।] ननूक्तपारिभाषिकावच्छेदकत्वद्वयस्य प्रवेशे मूलोक्तप्रतियोगिव्यधिकरणस्य प्रतियोगितावच्छेदकावच्छिन्नप्रतियोग्यनधिकरणार्थकत्वं विफलम्, हेतुमन्निष्ठाभावप्रतियोगितावच्छेदकस्य द्रव्यत्वत्वादेर्विशिष्टसत्तात्वाद्यवच्छिन्नवन्निष्ठाभावप्रतियोगितानवच्छेदकत्वादेव विशि-

ष्टसत्तावान् जातेरित्यादावतिव्याप्त्यभावात्। न च संयोगेन घटाद्यभावस्यैव तत्समनियतघटविशिष्टवाच्यत्वाद्यभावत्वात् तत्प्रतियोगित्वावच्छिन्नस्य च वाच्यत्वस्य सर्वत्र सत्त्वात् प्रतियोगिव्यधिकरणाभावस्यैवाप्रसिद्धिः स्यात्, यदि प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिवैयधिकरण्यप्रवेशो न स्यादिति वाच्यम्। यत्प्रतियोगित्वावच्छिन्नस्यानधिकरणं हेत्वधिकरणं तत्प्रतियोगितावच्छेदकीभूतधर्मो यद्विशिष्टसम्बन्धिनिष्ठप्रतियोगिव्यधिकरणाभावप्रतियोगितानवच्छेदकस्तत्पारिभाषिकावच्छेदकमित्यस्य निर्दोषत्वात्। घटाभावस्य घटविशिष्टवाच्यत्वाभावस्वरूपत्वेपि तस्य घटत्वावच्छिन्नं यत्प्रतियोगित्वं तदाश्रयव्यधिकरणत्वस्य सुलभत्वादिति। न च तत्रावच्छेदकभेदेपि प्रतियोगितैक्यं युक्तम्, घटपटाद्यभावानामप्येकप्रतियोगिताकत्वापत्तेरिति चेत्। अत्र प्राञ्चः। यत्प्रतियोगिताश्रयानधिकरणं हेत्वधिकरणं तत्प्रतियोगितावच्छेदकेत्याद्यभिधाने वह्निमान् धूमादित्यत्राव्याप्तिः। स्वरूपसम्बन्धात्मिकायाः प्रतियोगितायाः प्रतिव्यक्ति भिन्नत्वात्। वह्नित्वावच्छिन्नाभावीयं महानसीयवह्निनिष्ठं यत्प्रतियोगित्वं तदवच्छिन्नानधिकरणहेतुमत्पर्वतादिनिष्ठवह्निसामान्याभावप्रतियोगितावच्छेदकीभूतवह्नित्वादेः स्वविशिष्टसम्बन्धिनिष्ठनिरुक्तप्रतियोगिव्यधिकरणाभावप्रतियोगितानवच्छेदकत्वात्।प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिवैयधिकरण्यप्रवेशे तु तादृशप्रतियोगिताया अवच्छेदकं यद्वह्नित्वादिकं तदवच्छिन्नानधिकरणत्वं न हेतुमतः पर्वतादेरित्यदोष इत्याहुः। परे तु प्रतियोगिभेदेऽप्येकधर्मावच्छिन्नप्रतियोगिता लाघवादेकैवेतिमते वन्हिमान् धूमादित्यादौ नाव्याप्तिः परं तु तद्भूपान्यत्वविशिष्टसत्तावान् रूपत्वादावतिव्याप्तिरेव स्याद्यदि प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिव्यधिकरणाभावो मौलो न स्यात्, प्रतियोग्यनधिकरणहेतुमन्निष्ठाभावप्रतियोगितावच्छेदकस्य घटत्वादेः सर्वस्यैव तद्भूपान्यत्वविशिष्टसत्तात्वावच्छिन्नसम्बन्धिनिष्ठाभावप्रतियोगितावच्छेदकत्वेन तादृशसत्तात्वस्य पारिभाषिकानवच्छेदकत्वादिति प्राहुः। इदन्त्ववधातव्यम्। अत्रापि लक्षणे हेतुमन्निष्ठाभावप्रतियोगितावच्छेदकं यद्यत्सम्बन्धेन यादृशयादृशधर्मविशिष्टसम्बन्धिनिष्ठाभावप्रतियोगितानवच्छेदकं तत्तत्सम्बन्धेन तादृशतादृशधर्मा-

वच्छिन्नविशेष्यतान्यसाध्यतावच्छेदकताघटकसम्बन्धावच्छिन्नविशेष्यतावच्छेदकत्वमेव साध्यतावच्छेदके द्रष्टव्यम्, नातः प्रागुक्तदोषाणामवकाशो न वा महानसीयवह्नित्वादेः पारिभाषिकावच्छेदकतया तदन्यत्वस्य वह्नित्वादावसत्त्वेपि वह्निमान् धूमादित्यादावव्याप्तिः, विशिष्टवह्नित्वाभिन्नस्यापि वह्नित्वस्य विशिष्टवह्नित्वावच्छिन्नविशेष्यतावच्छेदकत्वानपायात् । ननु घटवान् महाकालत्वादित्यादावव्याप्तिः गगनत्वादिविशिष्टस्य कालिकादिसम्बन्धेन सम्बन्ध्यप्रसिद्ध्या पारिभाषिकावच्छेदकत्वासम्भवात् । न च साध्यतावच्छेदकसम्बन्धसामान्ये यादृशधर्मावच्छिन्नाभावयदनुयोगिकत्वयद्धर्मविशिष्टप्रतियोगिकत्वोभयाभावस्तत्वं विवक्षितं तच्च गगनत्वादौ सुलभमिति वाच्यम् । तथासति प्रमेयधूमवान् वह्नेरित्यादावतिव्याप्तेरित्युक्तत्वात् । धूमत्वविशिष्टप्रतियोगिकत्वघटितताद्दशोभयत्वापेक्षया प्रमेयधूमत्वविशिष्टप्रतियोगिकत्वघटितताद्दशोभयत्वस्य गुरुत्वेन तदवच्छिन्नप्रतियोगित्वाप्रसिद्धेरिति चेत् । अत्र वदन्ति । स्वविशिष्टप्रतियोगिकत्वानि विशिष्योपादाय साध्यतावच्छेदकसम्बन्धसामान्ये हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकीभूततत्तद्धर्मावच्छिन्नाभाववदनुयोगिकत्वस्य यद्धर्मविशिष्टप्रतियोगिकत्वव्यक्तीनां प्रत्येकस्य च द्वयोर्व्यतिरेकः स धर्मः पारिभाषिकावच्छेदकः । प्रमेयधूमत्वावच्छिन्नप्रतियोगिकत्वघटितोभयत्वस्य गुरुतया प्रतियोगितानवच्छेदकत्वेपि तत्तद्धर्मप्रतियोगिकत्वघटितोभयाभावकूटमादायैव नातिव्याप्तिः । कालो घटवान् महाकालत्वादित्यादौ च गगनत्वमेव तादृशावच्छेदकमादाय लक्षणसमन्वय इति । वस्तुतस्तु हेतुमन्निष्ठाभावप्रतियोगितावच्छेदको यो धर्मः प्रतियोगिव्यधिकरणतदवच्छिन्नाभावत्वावच्छेदेन साध्यतावच्छेदकसम्बन्धावच्छिन्नसम्बन्धितानिरूपितविशेषणतया यद्धर्मविशिष्टसम्बन्धित्वसामान्याभावस्तत्वे यद्धर्मे हेतुमन्निष्ठाभावप्रतियोगितावच्छेदकधर्मावच्छिन्नप्रतियोग्यनधिकरणवृत्त्यधिकरणतावच्छेदकत्वसामान्यस्य प्रकृतसाध्याधिकरणतावच्छेदकत्वनिरूपितस्वरूपसम्बन्धेनाभावस्तत्वे वा स्वविशिष्टसम्बन्धीत्यादिनिरुक्तेस्तात्पर्यात् गगनत्वादौ सहजतः पारिभाषिकावच्छेदकत्वं सुलभमिति ध्येयम् । के चित्तु तादात्म्यसाध्यतावच्छेदकान्यतरसम्बन्धेन

यः स्वविशिष्टसम्बन्धी तन्निष्ठो यस्तदन्यतरसम्बन्धेन प्रतियोगिव्यधिकरणोऽभावस्तत्प्रतियोगितानवच्छेदकतत्कत्वमुक्तलक्षणार्थः। तथा च तादृशान्यतरतादात्म्यसम्बन्धेन गगनत्वविशिष्टसम्बन्धिन्याकाशे वर्तमानोपि गगनाभावो नैतादृशान्यतरसम्बन्धेन प्रतियोगिव्यधिकरणः तस्य तादात्म्येन प्रतियोगिसमानाधिकरणत्वात् किं तु घटाभाव एव तथेति तत्प्रतियोगितानवच्छेदकमेव हेतुमन्निष्ठाभावप्रतियोगितावच्छेदकीभूतं गगनत्वमिति तमादायैव कालो घटवान् महाकालत्वादित्यादौ लक्षणसङ्गतिः। न चैवं धूमगगनाभावान्यतरस्य संयोगेन साध्यत्वे वन्ह्यादावतिव्याप्तिः तादृशान्यतरत्वापेक्षया लघुत्वेन धूमत्वस्यैव हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वात्तस्य च संयोगतादात्म्याम्यतरसम्बन्धेन यस्तदन्यतरत्वविशिष्टस्य सम्बन्धी गगनाभावस्तन्निष्ठस्य तादात्म्यसंयोगान्यतरसम्बन्धेन प्रतियोगिव्यधिकरणस्य धूमाभावस्य पारिभाषिकावच्छेदकत्वविरहादिति वाच्यम्। धूमगगनाभावान्यतरत्वस्याप्यखण्डस्य धूमत्वतुल्यतया तस्यैव हेतुमन्निष्ठाभावप्रतियोगितावच्छेदकस्य स्वविशिष्टसम्बन्धिनिष्ठतादृशसम्बन्धावच्छिन्नप्रतियोगिव्यधिकरणाभावप्रतियोगितानवच्छेदकतया पारिभाषिकावच्छेदकत्वेनातिव्याप्तिविरहादिति प्राहुः। तन्मन्दम्। रूपवान् घटत्वादित्यादावव्याप्तिप्रसङ्गात्। हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकं यद्रूपत्वद्रव्यान्यतरत्वं तस्य [तादृशसम्बन्धेन] रूपत्वविशिष्टसम्बन्धिनिष्ठतादृशसम्बन्धावच्छिन्नप्रतियोगिव्यधिकरणाभावप्रतियोगितानवच्छेदकत्वेन रूपत्वस्य पारिभाषिकावच्छेदकत्वात्। तथा हि, तादात्म्यसमवायान्यतरसम्बन्धेन यद्रूपत्वविशिष्टस्य सम्बन्धि रूपं पृथिव्यादिकं वा तत्र तादात्म्यसमवायान्यतरसम्बन्धेन प्रतियोगिव्यधिकरणो न रूपत्वद्रव्यान्यतरत्वावच्छिन्नाभावः समवायेन रूपे रूपत्वाख्यप्रतियोगिनस्तादात्म्येन च पृथिव्यादौ द्रव्यात्मकप्रतियोगिनः सम्बद्धत्वात् किं तु रूपत्वविशिष्टस्य तथाविधसम्बन्धिनिष्ठो यः पदार्थाभावः स एव तादृशप्रतियोगिव्यधिकरण इति रूपत्वद्रव्यान्यतरत्वे तत्प्रतियोगितानवच्छेदकत्वध्रौव्यम्। न च हेतुसमानाधिकरणस्याभावस्यापि तादृशान्यतरसम्बन्धेन प्रतियोगिवैयधिकरण्यस्य वक्तव्यत्वान्नैष दोषः।

एव सत्तावान् जातेरित्यादौ जातिमन्निष्ठाभावप्रतियोगितावच्छेदकगुणान्यत्वविशिष्टसत्तात्वतुल्यवृत्तिकत्वेऽपि सत्तात्वस्य न क्षतिः। एवं स्वविशिष्टसम्बन्धिनिष्ठाभावप्रतियोगितानवच्छेदकावच्छेद्यत्वं बोध्यम् । तादृशप्रतियोगिताश्च विशिष्योपादेयाः नातोगुरोरवच्छेदकत्वं विना दुर्वचत्वं प्रतियोगित्वस्य । सम्बन्धित्वञ्च सा-

---

तथासति समवायेन घटस्य प्रमेयस्य वा साध्यत्वे तादात्म्येन हेतौ घटत्वे प्रमेये वातिप्रसङ्गादिति दिक्। अत एवेति। वस्तुतस्त्वित्यादिकल्पस्याऽऽहतत्वादेवेत्यर्थः। यथाश्रुतस्यावच्छेदकानतिरिक्तवृत्तित्वस्यादरे तु सत्तावान् जातेरित्यादावव्याप्तिः स्यादेवेति भावः। जातिमन्निष्ठाभावप्रतियोगितायां सत्तात्वान्यूनवृत्तित्वविशिष्टसत्तात्वावच्छेद्यत्वसमवायसम्बन्धावच्छेद्यत्वोभयसत्त्वादवच्छेद्यता। घटितलक्षणस्य प्रागुक्तस्यापि सत्तावान् जातेरित्यादावव्याप्तिरतस्तदपि परिष्करोति एवमिति। स्वं साध्यतावच्छेदकम्। अत्र स्ववैशिष्ट्यं साध्यतावच्छेदकताघटकसम्बन्धेनैव वाच्यम्। तेन धूमत्वादीनां कालिकादिसम्बन्धेन धूमत्वादिविशिष्टस्य घटादेः संयोगिनि वर्तमानस्याभावस्य प्रतियोगितावच्छेदकत्वेपि धूमवान् वह्नेरित्यादौ नातिव्याप्तिः। स्वविशिष्टस्य सम्बन्धित्वं तु साध्यतावच्छेदकसम्बन्धेन ग्राह्यम्। तेन धूमत्वाद्यवच्छिन्नप्रतियोगितायां कालिकादिसम्बन्धेन यद्धूमत्वविशिष्टस्य सम्बन्धि तन्निष्ठाभावप्रतियोगितानवच्छेदकावच्छेद्यत्वविरहेपि धूमवान् वह्नेरित्यादौ नातिव्याप्तिः । न च सामान्यतो धूमसम्बन्धिनि संयोगेन सर्वस्यैवाभावसत्वाद्धूमवन्निष्ठसंयोगसम्बन्धावच्छिन्नाभावप्रतियोगितानवच्छेदकाप्रसिद्ध्या कथमतिव्याप्तिरिति वाच्यम्। गोत्वत्वघटाभावत्वादेरेव तत्प्रसिद्धेः। संयोगसम्बन्धावच्छिन्नगोत्वाद्यभावप्रतियोगिताया लाघवेन गवेतरासमवेतत्वादिभिरेवावच्छेदात्। न चैवमपि तदवच्छेद्यत्वाप्रसिद्ध्यैव नातिव्याप्तिः। गोत्वादिभेदप्रतियोगितायां तत्सौलभ्यात्। न हि सापि गवेतरासमवेतत्वमात्रावच्छिन्ना, गोरूपादौ गोत्वभेदासत्त्वप्रसङ्गात्। यदि च गोत्वत्वावच्छेद्यत्वसंयोगसम्बन्धावच्छेद्यत्वोभय-

त्वावच्छिन्नाभावाप्रसिद्ध्यैव नातिव्याप्तिः गवेतरासमवेतत्वाद्यवच्छेद्यत्वमात्रघटितताद्दशोभयत्वस्यैव लघुत्वेन प्रतियोगितावच्छेदकत्वादिति विभाव्यते, तदोक्तरीत्या वह्निमान् धूमादित्यादावव्याप्तिवारणार्थमेव साध्यतावच्छेदकसम्बन्धेन स्वविशिष्टस्य सम्बन्धित्वं निवेश्यम्। इत्थं च निरुक्तप्रतियोग्यनधिकरणहेतुमन्निष्ठाभावप्रतियोगितासामान्य एव साध्यवन्निष्ठाभावीयसंयोगसम्बन्धावच्छिन्नप्रतियोगितानवच्छेदकीभूतगोत्वत्वाद्यवच्छेद्यत्वसंयोगसम्बन्धावच्छेद्यत्वोभयत्वावच्छिन्नाभावसत्त्वाद्धूमवान् वह्नेरित्यत्रैवातिव्याप्तिः गुरुतयोक्तक्रमेण ताद्दशोभयत्वावच्छिन्नाभावाप्रसिद्ध्या वह्निमान् धूमादित्यादावव्याप्तिर्वा स्यादतः प्रतियोग्यसम्बन्धित्वेनापि स्वविशिष्टसम्बन्धी विशेषणीयः। तदर्थश्च प्रतियोगितावच्छेदकसम्बन्धेन प्रतियोगितावच्छेदकावच्छिन्नासम्बन्धित्वम्। तेन सम्बन्धसामान्येन यत्प्रतियोगितावच्छेदकावच्छिन्नासम्बन्धी वह्नित्वविशिष्टसम्बन्धी पर्वतादिस्तन्निष्ठस्य प्रलयपूर्वोत्पन्नकर्मात्यन्ताभावस्य प्रतियोगितानवच्छेदकं यद्घटत्वादिकं तदवच्छेद्यत्वसंयोगसम्बन्धावच्छेद्यत्वयोश्च साधनवन्निष्ठाभावप्रतियोगितायां सत्त्वेपि वह्निमान् धूमादित्यादौ नाव्याप्तिः, न वा प्रतियोग्यसम्बन्धिसाध्यवन्निष्ठाभावप्रतियोगितानवच्छेदकीभूतविशिष्टसत्तात्वाद्यवच्छेद्यत्वसमवायसम्बन्धावच्छेद्यत्वयोः साधनवन्निष्ठाभावप्रतियोगितायां सत्वेपि सत्तावान् जातेरित्यादावव्याप्तिप्रसङ्गः। प्रतियोगितावच्छेदकसम्बन्धेन प्रतियोग्यसम्बन्धी यः साध्यतावच्छेदकावच्छिन्नसम्बन्धी तन्निष्ठाभावप्रतियोगितानवच्छेदकं न घटाद्यभावत्वगोत्वत्वादिकं तस्यापि साध्यवन्निष्ठताद्दशभेदादिप्रतियोगितावच्छेदकत्वात् किन्तु लघुसमनियतं गुरु प्रमेयधूमत्वादिकमेव। तथा च तदवच्छेद्यत्वाप्रसिद्ध्या वह्निमान् धूमादित्यादावसम्भवोव्याप्तिर्वेत्यतः साध्यवन्निष्ठाभावप्रतियोगित्वमपि साध्यतावच्छेदकसम्बन्धावच्छिन्नं ग्राह्यम्। तेन संयोगादिसम्बन्धावच्छिन्नप्रतियोगितानवच्छेदकीभूतगोत्वत्वाद्यवच्छेद्यत्वप्रसिद्ध्यैव लक्षणसम्भवः। वस्तुतः प्रागुक्तयुक्त्याऽत्रापि साध्यतावच्छेदकसम्बन्धेन प्रतियोग्यसम्बन्धित्वमेव साध्यतावच्छेदकावच्छिन्नसम्बन्धिनो वक्तव्यं न तु प्रतियोगितापि ताद्दशसम्बन्धेन ग्राह्या। नन्वेवमपि साध्यतावच्छेदकसम्बन्धेन प्रतियोग्यसम्ब-

न्धिसाध्यतावच्छेदकावच्छिन्नसम्बन्धिनिष्ठाभावाप्रसिद्ध्या विभुत्व-विशिष्टघटवान् महाकालत्वादित्यादावव्याप्तिः। महाकालान्यत्वावि-शिष्टघटत्वावच्छिन्नाभावस्यैव तादृशस्य कथञ्चिन्महाकाले प्रसि-द्ध्या तत्राव्याप्तिवारणेपि तद्वह्नीयसंयोगसम्बन्धेन वह्नेः साध्यतायां सद्धेतावव्याप्तिः। तत्सम्बन्धेन यत्प्रतियोगिसम्बन्धि तदन्यत्वस्य तद्वह्निमत्यभावात्। महाकालनिरूपितविशेषणतया घटादेः साध्य-तायां महाकालत्वहेतावुक्तक्रमेणाप्यव्याप्तिवारणासम्भवाच्च, तेन सम्बन्धेन यः प्रतियोगिसम्बन्धी तदन्यत्वस्य महाके विरहात्। न च साध्यतावच्छेदकसम्बन्धसामान्ये साध्यतावच्छेदकावच्छिन्नसम्ब-न्धियत्किञ्चिद्व्यक्त्यनुयोगिकत्वयादृशप्रतियोगितावच्छेदकावच्छि-न्नप्रतियोगिकत्वोभयाभावस्तादृशप्रातयोगितानवच्छेदकावच्छिन्नत्वं निवेश्यमतो गगनाभावद्वारैव प्रसिद्धिरिति वाच्यम्। स्वरूपसम्ब-न्धेन गगनादेर्वृत्तिमत्त्वपक्ष एव प्रतियोगिताधर्मिकोभयाभावगर्भनि-रुक्त्यादरात् तत्र गगनाभावमादाय प्रसिद्ध्यसम्भवात्। कालिक-विशेषणतायां गगनत्वाद्यवच्छिन्नप्रतियोगिकत्वसाध्यवन्महाकाला-नुयोगिकत्वयोः सत्त्वादिति चेत्। एतदस्वरसेनैव प्रतियोगितयो-रित्यादिना प्रतियोगिवैयधिकरण्यमुपेक्ष्य लक्षणान्तरं वक्ष्यत इत्येके। परे तु निरुक्तप्रतियोग्यसम्बन्धिप्रकृतसाध्यवन्निष्ठाभावप्रतियोगिता-यां यद्यद्धर्मावच्छेद्यत्वसाध्यताघटकसम्बन्धावच्छिन्नत्वोभयाभावः प्रतियोगितावच्छेदकावच्छिन्नस्वप्रतियोग्यनधिकरणप्रकृतहेतुमन्नि-ष्ठाभावप्रतियोगितासामान्येपि तादृशोभयाभावकूटत्वं विवक्षित-म्। अस्ति च समवायाद्यवच्छिन्नघटाद्यभावप्रतियोगितायां यत्का-लिकसम्बन्धावच्छिन्नत्वघटत्वावच्छिन्नत्वोभयाभाववत्त्वं तदेव प्रति-योग्यनधिकरणमहाकालनिष्ठाभावप्रतियोगितासामान्येपीति घटवान् महाकालत्वादित्यादौ नाव्याप्तिः। यद्यदिति वीप्सादरात् निरुक्त-प्रतियोग्यनधिकरणहेतुमन्निष्ठाभावप्रतियोगितासामान्य एव गुण-त्वावच्छेद्यत्वसंयोगसम्बन्धावच्छेद्यत्वोभयाभावसत्त्वेपि धूमवान् व-ह्नेरित्यादौ नातिव्याप्तिः। धूमत्वावच्छेद्यत्वसंयोगसम्बन्धावच्छेद्य-त्वोभयाभावस्यापि तादृशत्वेन तस्यैव प्रतियोग्यनधिकरणवह्निमन्नि-ष्ठाभावप्रतियोगितासामान्ये विरहात् संयोगसम्बन्धावच्छिन्नधूमा-भावप्रतियोगितायां तदसत्त्वादित्याहुः। ननु स्वविशिष्टसम्बन्धिनि-

ध्यतावच्छेदकसम्बन्धेन बोध्यमतो न सम्बन्धभेदमादाय दोषः ।

ष्ठाभावप्रतियोगितानवच्छेदकेत्यत्रानवच्छेदकत्वे न तादृशावच्छेदकप्रतियोगिकभेदमात्रं धर्ममात्रस्यैव तादृशयत्किञ्चिदवच्छेदकभिन्नत्वेन व्याप्तिलक्षणासम्भवप्रसङ्गात् । किं तु तादृशप्रतियोगितावच्छेदकत्वावच्छिन्नप्रतियोगिताको भेदस्तथा चाबच्छेदकत्वगर्भाया निरुक्तेः प्रमेयधूमवान् वह्नेरित्यादावतिव्याप्तिः अवच्छेद्यत्वगर्भायास्तु प्रमेयवह्निमान् धूमादित्यादावव्याप्तिः प्रमेयवह्नित्वविशिष्टसम्बन्धिनिष्ठाभावप्रतियोगितावच्छेदकवृत्तिप्रतियोगितायां लाघवेन वह्निमन्निष्ठाभावप्रतियोगितावच्छेदकत्वेनैवावच्छेदादत आह प्रतियोगिताश्रेति । तादृशावच्छेदकनिष्ठप्रतियोगिताव्यक्तयो विशिष्य तत्तदवच्छेदकत्वावच्छिन्नत्वेन प्रवेशनीया न त्वनुगततादृशावच्छेदकत्वावच्छिन्नत्वेन, यतो गुरुधर्मस्यानवच्छेदकत्वे व्याप्तेर्दुर्वचत्वं स्यादित्यर्थः । स्वविशिष्टसम्बन्धिनिष्ठाभावीयप्रतियोगिताव्यक्तीर्विशिष्योपादाय तत्तत्प्रतियोगितावच्छेदकत्वावच्छिन्नभेदकूटत्वं निवेशनीयमिति त्वपव्याख्यानम् । तत्तत्प्रतियोगिताविशेषितावच्छेदकत्वव्यक्तीनां वास्तविकतत्तदवच्छेदकत्वव्यक्तीरपेक्ष्य गुरुत्वेन तत्प्रतियोगितानिरूपितावच्छेदकत्वावच्छिन्नभेदानामप्यप्रसक्त्या दुर्वचत्वतादवस्थ्यात् । यदि च समनियतनानाधर्मावच्छिन्नप्रतियोगित्वस्य भेदे मानाभावस्तदा तत्तत्प्रतियोगितावच्छेदकत्वावच्छिन्नभेदकूटस्य प्रवेशेपि न क्षतिः । तत्तत्प्रतियोगितावच्छेदकत्वस्य तत्तदवच्छेदकत्वसमनैयत्याभावेन गुरुत्वस्याकिञ्चित्करत्वादिति ध्येयम् । सम्बन्धभेदमिति । इदं च प्रागेव निरुक्तिव्याख्यायां प्रपञ्चितम् । ननु प्रतियोग्यनधिकरणहेतुमन्निष्ठाभावप्रतियोगितायाः संयोगत्वावच्छेद्यत्वेपि संयोगत्वस्य स्वविशिष्टसम्बन्धिनिष्ठाभावप्रतियोगितानवच्छेदकत्वाभावात् संयोगी सत्त्वादित्यत्रातिव्याप्तिरत आह अभावश्रेति । निरुक्तित्रयेपीति शेषः । तथा च निरुक्तप्रतियोग्यनधिकरणस्वविशिष्टसम्बन्धिनिष्ठाभावप्रतियोगितानवच्छेदकत्वं संयोगत्वेप्यक्षतमिति हेतुमन्निष्ठाभावप्रतियोगितायास्तदवच्छेद्यत्वादेव नातिव्याप्तिरिति भावः । नन्वेवं गोमान् महाकालत्वादित्यत्राव्याप्तिः। गोत्वाविशिष्टसम्बन्धिनिष्ठस्याभावमात्रस्यैव साध्यताघटककालि-

कालिकविशेषणताविशेषेण च साध्यतायां तादृशप्रतियोगितावच्छेदकत्वमनियततत्तद्व्यक्तित्वे प्रसिद्धम्। अभावश्च प्रतियोगिव्यधिकरणो बोध्यः। न च मौलमिदमीयञ्च प्रतियोगिवैयधिकरण्यमनुपादेयं संयोगत्वाद्यवच्छिन्नाभाववति संयोगत्वादिविशिष्टस्य वृत्तेर्गुणादिनिष्ठाभावप्रतियोगितावच्छेदकद्रव्यत्वत्वद्रव्यमात्रसमवेतत्वाद्यवच्छि-

---

कसम्बन्धेन प्रतियोगिसमानाधिकरणतया स्वविशिष्टसम्बन्धिनिष्ठप्रतियोग्यसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वाप्रसिद्धेरत आह कालिकेति। तथा च स्वावच्छिन्नानधिकरणसाध्यवत्खण्डकालनिष्ठाभावप्रतियोगितावच्छेदकतयैव तत्तद्व्यक्तित्वे निरुक्तावच्छेदकत्वं सुलभमिति भावः। ननु हेतुमन्निष्ठाभावीयसंयोगसम्बन्धावच्छिन्नप्रतियोगितावच्छेदकमात्रस्यैव घटत्वादिविशिष्टसम्बन्धिनिष्ठाभावीयसंयोगसम्बन्धावच्छिन्नप्रतियोगितावच्छेदकत्वात्पारिभाषिकावच्छेदकाप्रसिद्ध्या वह्निमान् धूमादित्यादावव्याप्तिवारकं द्वितीयनिरुक्तावभावे प्रतियोगिवैयधिकरण्यं प्रवेश्यताम्, अवच्छेद्यत्वघटिततृतीयनिरुक्तावपि हेतुमन्निष्ठाभावप्रतियोगितासामान्य एव धूमत्वविशिष्टसम्बन्धिनिष्ठाभावीयसंयोगसम्बन्धावच्छिन्नप्रतियोगितानवच्छेदकीभूतगोत्वत्वाद्यवच्छेद्यत्वाभावात् धूमवान् वह्नेरित्यादावतिव्याप्तिवारणार्थमभावे तद्विशेषणं दीयताम्, प्रथमनिरुक्तौ तु प्रतियोगिवैयधिकरण्यमभावे विशेषणं किमर्थमित्याशङ्क्यते न चेति! वाच्यमिति परेणान्वयः। संयोगी द्रव्यत्वादित्यादावव्याप्तिवारणं मौलस्य फलमन्यथोपपादयति संयोगत्वावच्छिन्नेति। वृत्तेरिति। अव्याप्त्यनवकाशादित्यग्रेऽन्वयः। संयोगि सत्त्वादित्यादावतिव्याप्तिवारणमिदमीयस्य फलमन्यथाकुरुते गुणादीति। द्रव्यत्वत्वं द्रव्यान्यासमवेतत्वविशिष्टसकलद्रव्यसमवेतत्वं तच्च न समवायसम्बन्धेनाभावस्य प्रतियोगितावच्छेदकं लाघवेन द्रव्यान्यासमवेतत्वस्यैव तत्वादित्यतस्तथैवाह द्रव्यमात्रेति। द्रव्यान्यासम-

(१) अत्र प्रतियोगिवैयधिकरण्यप्रवेशोत्तरमेवाऽव्याप्तिशङ्कासङ्गतेर्व्याख्योद्धृतप्रतीकक्रमस्वारस्याच्च कालिकेत्यादि-प्रसिद्धमित्यन्तस्य अभावश्च-बोध्य इत्यनन्तरमेव पाठ उचितः प्रतिभाति।

न्नाभाववति चावृत्तेरव्याप्त्यतिव्याप्त्योरनवकाशादिति वाच्यम्। धूमवान् वह्नेरित्यादावतिव्याप्तेः। न ह्युत्पत्तिकालावच्छेदेनापि महानसादौ किञ्चिद् संयोगेन वर्त्तते येन वह्निमदयोगोलकनिष्ठासन्ताभावप्रतियोगितावच्छेदकायोगोलकावृत्तिद्रव्यत्वाद्यवच्छिन्नाभाववदवृत्तित्वं धूमत्वविशिष्टस्य सम्भाव्येत। प्रतियोगितयोरेकसम्बन्धावच्छिन्नत्वस्य विशेषणताविशेषावच्छिन्नत्वस्य वा विवक्षणे पुनरनुपादेयमेव प्रतियोगिवैयधिकरण्यद्वयम्। यत्राधिकरणे

वेतत्व इत्यर्थः। अवृत्तेरिति। अतिव्याप्त्यनवकाशादिति योजना। धूमवानिति। संयोगेन द्रव्यानामव्याप्यवृत्तितया धूमत्वावच्छिन्नाभाववत्यपि धूमत्वादिविशिष्टस्य सत्त्वादिति भावः। ननु हेतुमन्निष्ठाभावप्रतियोगितावच्छेदकं यदयोगोलकासंयुक्तत्वं धूमत्वविशिष्टस्य तदवच्छिन्नाभाववदवृत्तित्वादेव नातिव्याप्तिरत आह न हीति। इत्थं चावच्छेदकनिरुक्तौ प्रतियोगिवैयधिकरण्यप्रवेशे मूलोक्तहेतुसमानाधिकरणाभावेपि तदवश्यं निवेश्यमन्यथा हेतुमन्निष्ठाभावप्रतियोगितावच्छेदकीभूतसंयोगत्वाद्यवच्छिन्नाभावस्य प्रतियोगिवैयधिकरण्यावच्छिन्नस्याधिकरणे गुणादौ संयोगत्वादिविशिष्टस्यावृत्तेः संयोगी द्रव्यत्वादित्यादावव्याप्तिरिति भावः। लाघवमभिप्रेत्याह प्रतियोगितयोरिति। मौलेदमीयप्रतियोगितयोरित्यर्थः। तथा च हेतुमन्निष्ठाभावीयतत्तत्सम्बन्धावच्छिन्नप्रतियोगितावच्छेदकीभूतयत्किञ्चिद्धर्मावच्छिन्नतत्तत्सम्बन्धावच्छिन्नप्रतियोगिताकाभाववदसम्बद्धस्वविशिष्टसामान्यकत्वं प्रथमस्य, द्वितीयस्य तु स्वविशिष्टसम्बन्धिनिष्ठाभावीयतत्तत्सम्बन्धावच्छिन्नप्रतियोगितानवच्छेदकीभूतहेतुसमानाधिकरणाभावीयतत्तत्सम्बन्धावच्छिन्नप्रतियोगितावच्छेदकत्वमर्थः। तत्तत्सम्बन्धावच्छिन्नत्वपर्य्यवसन्नस्यैकसम्बन्धावच्छिन्नत्वस्याननुगमाद्विशेषणताविशेषावच्छिन्नत्वप्रवेशावश्यकत्वेन [सम्बन्धान्तरप्रवेश गौरवात्तदपेक्षया] लाघवाच्चाह विशेषणतेति। अभावीयविशेषणताया लक्षणघटकत्वमभिप्रेत्याह तदन्यत्व इति।

व्यभिचारस्तदन्यत्वत्वतदन्यत्वप्रकारकप्रमाविषयत्वत्वसाध्यवत्त्व-प्रकारकप्रमाविषयत्वत्वादीनां साध्यतावच्छेदकविशिष्टसाध्यवन्नि-ष्ठात्यन्ताभावप्रतियोगितानवच्छेदकत्वाद्धेतुतावच्छेदकविशिष्टहेतुम-न्निष्ठाभावप्रतियोगितावच्छेदकत्वाच्चातिव्याप्तेरनवकाशात् । तथा च विशेषणताविशेषावच्छिन्नयद्धर्मविशिष्टसम्बन्धिनिष्ठाभावप्रति-योगितानवच्छेदकावच्छेद्यत्वं तत्सम्बन्धावच्छिन्नसाधनसमानाधि-करणात्यन्ताभावप्रतियोगितासामान्ये नास्ति साधने तद्धर्मविशिष्ट-

---

प्रमाविषयत्वीयविशेषणतायास्तथात्वमभिप्रेत्याह तदन्यत्वप्रकारके-त्यादि। साध्यवत्त्वस्यावश्योपस्थितिकतया तद्घटितधर्मस्योपस्थिति-लाघवात्तमादायैवातिव्याप्तिवारणं सुघटमित्याशयेनाह साध्यव-त्त्वेत्यादि । नन्वेवं हेतुमन्निष्ठाभावीयविशेषणताविशेषावच्छिन्न-प्रतियोगितासामान्ये यद्धर्मविशिष्टसम्बन्धिनिष्ठाभावीयविशेषणता-विशेषावच्छिन्नप्रतियोगितानवच्छेदकीभूतधर्मावच्छिन्नत्वसाध्यता-वच्छेदकसम्बन्धावच्छिन्नत्वोभयाभावः साध्यतावच्छेदकसम्बन्धेन तद्धर्मावच्छिन्नो हेतुव्यापक इत्युक्तक्रमेण तृतीयार्थः फलितः। तथा च विशेषणताविशेषावच्छिन्नप्रतियोगितासामान्य एव साध्यताव-च्छेदकीभूतसंयोगसम्बन्धावच्छिन्नत्वाभावेन तादृशोभयाभावसत्त्वा-त् धूमवान् वह्नेरित्यादावतिव्याप्तिः। न च हेतुमन्निष्ठाभावप्रतियो-गितायां विशेषणताविशेषावच्छिन्नत्वं न देयमिति वाच्यम् । वह्नि-मत्त्वप्रकारकप्रमाविशेष्यत्वादीनां संयोगादिसम्बन्धेनाभावस्य हेतु-मति सत्त्वेन वह्निमान् धूमादित्यादौ सर्वत्रैवाव्याप्तिप्रसङ्गादित्यतः साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वांशपरित्यागेन तृतीयस्यार्थं नि-ष्कृष्य दर्शयति तथा चेत्यादिना। यद्धर्मेति । यत्पदं साध्यताव-च्छेदकपरम्। तत्सम्बन्धावच्छिन्नेति । विशेषणताविशेषावच्छिन्ने-त्यर्थः। अत्र प्रतिपदव्यावृत्तिरुक्तादिशा बोद्धव्या। न च निरुक्तप्रतियो-गितासामान्ये यद्धर्मविशिष्टसम्बन्धिनिष्ठाभावीयविशेषणताविशे-षावच्छिन्नप्रतियोगितावच्छेदकावच्छेद्यत्वं साधने तद्धर्मावच्छिन्न-

सामानाधिकरण्यं व्याप्तिरिति पर्य्यवसितोऽर्थः। यत्र सद्धेतुविशेषे साध्यतावच्छेदकं न प्रतियोगितावच्छेदकं तत्रैवेयं रीतिरुपादेयेत्यपि वदन्ति। गौरवप्रतिसन्धानदशायामपि कम्बुग्रीवादिमान्

सामानाधिकरण्यमेव लाघवाद्व्याप्तिरुचितेति वाच्यम्। सामान्यपदस्य व्यापकतावाचित्वेन निरुक्तप्रतियोगितात्वव्यापकतावच्छेदकं यद्धर्मावच्छिन्नवन्निष्ठविशेषणताविशेषावच्छिन्नाभावप्रतियोगितावच्छेदकावच्छेद्यतात्वमित्यर्थपर्य्यवसानेन प्रमेयधूमवान् वह्नेरित्यादावतिव्याप्त्यापत्तेः। प्रमेयधूमत्वावच्छिन्नवन्निष्ठाभावप्रतियोगितावच्छेदकावच्छेद्यत्वस्य गुरुधर्मतया वह्निमन्निष्ठाभावप्रतियोगितात्ववन्निष्ठाभावप्रतियोगितानवच्छेदकत्वेन तादृशप्रतियोगितात्वव्यापकतावच्छेदकत्वात्। अस्माकं तु प्रमेयधूमत्वावच्छिन्नवन्निष्ठाभावप्रतियोगितानवच्छेदकं यदयःपिण्डभेदत्वं तदवच्छेद्यत्वाभावस्यैव साधनवन्निष्ठाभावप्रतियोगितात्वव्यापकत्वाभावेनाऽतिव्याप्त्यभावात्। एतेन साधनसमानाधिकरणाभावसामान्ये यद्धर्मावच्छिन्नसमानाधिकरणाभावत्वं तादृशाभावप्रतियोगितासामान्ये वा यद्धर्मावच्छिन्नसमानाधिकरणाभावप्रतियोगितात्वं साधने तद्धर्मावच्छिन्नसामानाधिकरण्यमेवव्याप्तिर्लाघवादित्यपि प्रत्युक्तमिति ध्येयम्। साध्यसाधनभेदेन व्याप्तेर्भिन्नतया प्रमेयवह्नित्वादिना गुरुधर्मेण साध्यतास्थल एव साध्यतावच्छेदकावच्छेद्यत्वाप्रसिद्ध्या प्रोक्तक्रमेण व्याप्तिर्वाच्या वह्निमान् धूमादित्यादौ तु लघुरूपेण साध्यतास्थले हेतुमन्निष्ठाभावप्रतियोगितासामान्ये यत्सम्बन्धावच्छिन्नत्वयद्धर्मावच्छिन्नत्वोभयाभावघटितैव सा वक्तव्या शब्दैक्यस्यात्किञ्चित्करत्वादित्याह यत्र सद्धेतुविशेष इति। नव्यमतमुपन्यस्यति गौरवेति। यादृशप्रतीत्या गुरोरवच्छेदकत्वप्रसिद्धिस्तादृशबुद्धौ गौरवज्ञानस्य यदि विरोधित्वं स्यात्तदा मानाभावाद्गुरोरवच्छेदकत्वं न स्यात् न चैतदस्तीति भावः। यद्यपि गौरवज्ञानमात्रं नावच्छेदकत्वधीप्रतिबन्धकम्, विशिष्टसत्तात्वस्य द्रव्यत्वत्वापेक्षया गुरुत्वग्रहेपि विशिष्टसत्ता नास्तीति प्रतीत्या तदवच्छेदकत्वग्रहस्य प्राच्यैरपि स्वीकृतत्वा-

नास्तीतिप्रतीतिबलात् गुरुरपि धर्मोऽवच्छेदकः प्रतियोगितायाः ।

त् । न च तद्धर्मसमानाधिकरणधर्मधर्मिकस्तदपेक्षया लघुत्वग्रहस्तद्धर्मस्यावच्छेदकत्वधीप्रतिबन्धकः । नीलधूमत्वसमानाधिकरणधूमत्वे तदपेक्षया लघुत्वग्रहेपि नीलधूमो नास्तीतिप्रतीत्या नीलधूमत्वस्यावच्छेदकत्वावगाहनस्य सर्वसम्मतत्वात् । नापि तद्धर्मसमनियतधर्मधर्मिक एव तद्धर्मापेक्षया लघुत्वग्रहस्तद्धर्मस्यावच्छेदकत्वधीप्रतिबन्धक इति साम्प्रतम् । घटज्ञानत्वापेक्षया लघुनोपि ज्ञानत्वस्य घटज्ञानत्वसमनियतत्वाभावात् गुरुणोऽपि घटज्ञानत्वस्य संयोगसम्बन्धावच्छिन्नघटज्ञानाभावस्य प्रतियोगितावच्छेदकत्वापत्तेः तथापि संसर्गमर्यादया प्रतियोगितावच्छेदकत्वग्रहं प्रति तादात्म्येन कम्बुग्रीवादिमत्स्वरूपस्तत्तद्गुरुधर्मः प्रतिबन्धक इति न कदा चिदपि तेषु [संसर्गमर्यादया] अवच्छेदकत्वग्रह इति प्राचां तात्पर्यम् । वस्तुतः संसर्गमर्यादया कम्बुग्रीवादिमत्त्वावच्छेद्यप्रतियोगिताकत्वावगाहिज्ञानं प्रति समानविशेष्यत्वप्रत्यासत्या कम्बुग्रीवादिमत्त्वापेक्षया लघुधर्मावच्छिन्नप्रतियोगिताकत्वज्ञानत्वेनैव प्रतिबन्धकत्वं प्राचामभिप्रेतम् । तथा च जलादौ निर्वन्हित्वस्याग्रहदशायां वन्हिमत्त्वभ्रमस्येवोक्तक्रमेण गौरवस्याग्रहदशायामपि कम्बुग्रीवादिमत्त्वावच्छिन्नप्रतियोगिताकत्वेनापि तादृशग्रहो जायत एव । अन्यथा तदानीमुत्पन्नायाः कम्बुग्रीवादिमान्नास्तीतिधियो बाधनिश्चयविधया कम्बुग्रीवादिमत्त्वावच्छिन्नविशिष्टधीविरोधित्वानुपपत्तेः । कम्बुग्रीवादिमत्वावच्छिन्नस्य विशिष्टबुद्धौ तदवच्छिन्नप्रतियोगिताकत्वेनाभावनिश्चयस्य विरोधित्वादिति ध्येयम् । प्रतीतेर्बलमवच्छेदकत्वावगाहित्वम् । गुरुरपीति । तथा च स्वरूपसम्बन्धरूपावच्छेदकत्वघटितं मूलोक्तं यथाश्रुतमेव व्याप्तिलक्षणं सम्यक् प्रमेयधूमत्वादेस्तादृशावच्छेदकत्वेन व्यभिचारिण्यतिव्याप्तिविरहादिति कृतं पारिभाषिकावच्छेदकत्वनिर्वचनेनेति भावः । ननूक्तक्रमेण गौरवज्ञानस्य विरोधित्वात्तादृशप्रतीत्यावच्छेदकत्वं नावगाह्यते परन्तु कम्बुग्रीवादिमन्निष्ठप्रतियोगिताकाभा-

न चास्यास्तत्प्रतियोगिकाभावमात्रमवलम्बनम्। तथाविधयात्किञ्चिद्व्यक्तिसत्त्व एव तादृशप्रतीतेरनुदयात्। अत एवैकघटवति भूतले कम्बुग्रीवादिमान् नास्तीतिशब्दो न प्रमाणं प्रमाणञ्च घटसामा-

---

वमात्रमित्याशङ्क्य निषेधति न चेति। अवलम्बनम्। विषयः। तथाविधेति। कम्बुग्रीवादिमत्त्वाश्रयेत्यर्थः। तादृशप्रतीतेः। कम्बुग्रीवादिमान्नास्तीत्याकारकप्रतीतेः। अनुदयादिति। तथा च त्वन्मते कम्बुग्रीवादिमदन्तरस्याभावमादाय तदुदयप्रसङ्ग इति भावः। ननु तथाविधयत्किञ्चिद्व्यक्तिनिर्णये स एव प्रतिबन्धकः अन्यथा विशेषादर्शनदशायां तवापि कम्बुग्रीवादिमान्नास्तीतिप्रतीतिर्जायत एव तत्रेत्यत आह अत एवेति। गुरुधर्मस्यावच्छेदकत्वादेवेत्यर्थः। न प्रमाणमिति। कम्बुग्रीवादिमत्त्वावच्छिन्नप्रतियोगिताकाभावशून्ये कम्बुग्रीवादिमत्त्वावच्छिन्नप्रतियोगिताकाभावप्रकारकत्वेन तादृशान्वयबोधो भ्रम इति तादृशशब्दस्य भ्रमजनकत्वेनाप्रमाणत्वम्। त्वन्मते च कम्बुग्रीवादिमत्प्रतियोगिकाभावशून्यताया घटवत्यभावात् तादृशप्रतीतेर्न भ्रमत्वमिति तादृशशब्दोप्यप्रमाणं न स्यादित्यर्थः। ननु भ्रमत्वस्य प्रकारभेदेन भिन्नत्वात्सर्वत्र तद्भाववद्विशेष्यकत्वं न भ्रमत्वघटकं समवायेन गगनादिभ्रमे तन्निवेशवैयर्थ्यात् तथा च तत्रैव प्रकृतेपि कम्बुग्रीवादिमत्प्रतियोगिकाभावप्रकारकतामात्रेण तादृशान्वयबोधो भ्रमो भविष्यतीत्यत आह प्रमाणं चेति।तथा च तत्रापि कम्बुग्रीवादिमान्नास्तीति शब्दः प्रमाणं न स्यादित्यकामेनापि प्रकृते भ्रमत्वं तद्भाववद्विशेष्यकत्वघटितं वाच्यमिति भावः। धूमो न वह्निव्याप्य इत्यादेर्वह्निव्याप्त्यभावकूटार्थकत्ववत् कम्बुग्रीवादिमान्नास्तीत्यादावपि कम्बुग्रीवादिमत्प्रतियोगिकाभावकूटबोधकत्वादेव तादृशशब्दस्याप्रामाण्याद्युपपत्तिरन्यथा धूमालोकसाधारणानुगतव्याप्तेरभावादालोकगर्भव्याप्तित्वावच्छिन्नाभावस्य धूमे सत्त्वात्तमादाय धूमो न वह्निव्याप्य इति वाक्यस्य प्रामाण्यापत्तेः। एवं गुरुधर्मस्यानवच्छेदकतया तादृशधर्मावच्छिन्नविशिष्टबुद्धिं प्रति तादृशधर्माश्रयप्रतियोगिकाभावकूटवत्तानिश्चयत्वेनैवानन्यगत्या विरोधित्वकल्पना-

न्यशून्ये। न चैवं, लघुरूपसमनियतानां गुरूणामव्याप्यतापत्तिः। गुणादिगुणकर्म्मान्यत्त्वविशिष्टसत्तादिसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वनिष्ठायाः प्रतियोगितायाः लाघवेन द्रव्यादिनिष्ठाभावप्रतियोगितावच्छेदकत्वत्वेनैवावच्छेदात् तत्तदवच्छेदकत्वव्यक्तीनाञ्च प्रातिस्विकरूपेणाभावानां युगसहस्रेणापि ज्ञातुमशक्यत्वात्। एवं द्रव्यत्वत्वादिविशिष्टद्रव्यत्वादेरव्याप्यत्वप्रसङ्गो-

---

त्र कम्बुग्रीवादिमाञ्जास्तीतिप्रतीतिदशायां कम्बुग्रीवादिमदस्तीतिज्ञानविरोधोपि घटत इति प्राचीनमतनिर्भरः। अतो गुरुधर्मस्यानवच्छेदकत्वे व्याप्तेरपि दुर्वचत्वमित्याह न चेदेवमिति। लघ्विति। द्रव्यं गुणाद्यिशिष्टसत्त्वाद्या इत्यादौ द्रव्यत्वसमनियतानां गुणवत्त्वविशिष्टसत्तादीनामित्यर्थः। अव्याप्तिमुपपादयति गुणादीति। ननु हेतुमन्निष्ठाभावप्रतियोगितावच्छेदकत्वव्यक्तीनां तत्तद्व्यक्तित्वेनाभावकूटत्वमेव साध्यतावच्छेदकांशे निवेश्यमतो नोक्तदोषोऽत आह तत्तदिति। यद्यपि गुरोरवच्छेदकत्वपक्षेपि स्वस्वप्रतियोगिव्यधिकरणाभावघटितव्याप्तेस्तत्तत्प्रतियोगितागर्भत्वेन दुर्ज्ञेयत्वम्। तथापि व्याप्यवृत्तिसाध्यकस्थलीयव्याप्तेरभिप्रायेणेदम्। तत्र प्रतियोगिवैयधिकरण्याप्रवेशात्। निरवच्छिन्नहेत्वधिकरणवृत्तिकाभावप्रतियोगितानवच्छेदकत्वमेव सर्वत्र व्याप्तौ प्रविष्टमित्याशयेनेदमिति तु परमार्थः। तेनाव्याप्यवृत्तिसाध्यकस्थलेपि व्याप्तेर्न दुर्ज्ञेयत्वमिति ध्येयम्। द्रव्यत्वत्वेति। द्रव्यनिष्ठाभावप्रतियोगितावच्छेदकत्वापेक्षया द्रव्यत्वत्वावच्छिन्नवन्निष्ठाभावप्रतियोगितावच्छेदकत्वस्य गुरुतया तदवच्छिन्नाभावाप्रसिद्धेरिति भावः। ननु हेतुमन्निष्ठाभावप्रतियोगितावच्छेदकीभूतयत्किञ्चिद्धर्मावच्छिन्नाभाववदसम्बद्धस्वविशिष्टसामान्यकभिन्नं स्वविशिष्टसम्बन्धिनिष्ठाभावीयप्रतियोगितानवच्छेदकीभूततादृशधर्मावच्छिन्नभिन्नं वा यत्साध्यतावच्छेदकं तदवच्छिन्नसामानाधिकरण्यं व्याप्तिरित्यत्र हेतुमन्निष्ठाभावीयविशेषणतावच्छिन्नप्रतियोगितासामान्ये यद्धर्मविशिष्टसम्बन्धिनिष्ठाभावीयता-

ऽप्यनुसन्धेयः। उपदर्शितप्रकाराणामपि स्वत्वादिघटितत्वेन दुर्ज्ञेयत्वात् । अत एव घ्राणग्राह्यगुणत्वादिना साध्यतायां द्रव्यत्वादेर्व्यभिचारित्वं साधु सङ्गच्छत इत्यपि केचित् । इति कृतं पल्लवितेन ॥

इदृशप्रतियोगितानवच्छेदकावच्छेदत्वं नास्ति साधने तद्धर्मावच्छिन्नसामानाधिकरण्यं व्याप्तिरित्यत्र वा दुर्ज्ञेयत्वाभावात्तथैव व्याप्तिर्वाच्येत्यत आह उपदर्शितेति। स्वत्वादीति । आदिना व्यापकतापर्यवसन्नस्य तत्तदवच्छेदकत्वाभावगर्भसामान्यत्वस्योपग्रहः। अत एव । गुरोरवच्छेदकत्वादेव। सङ्गच्छत इति। अन्यथा ग्राह्यगन्धत्वापेक्षया गुरुत्वेन घ्राणग्राह्यगुणत्वावच्छिन्नाभावाप्रसिद्ध्या तद्वदवृत्तित्वरूपं व्यभिचारितत्वं तत्र न स्यादिति भावः । यद्यपि साध्यव्यापकतावच्छेदकधर्मावच्छिन्नाभाववदवृत्तित्वमेव व्यभिचारः स च ग्राह्यगन्धत्वावच्छिन्नाभाववदवृत्तित्वेनैव तत्र सुलभ इत्यपि शक्यते वक्तुम्, तथापि तदबुद्धेः प्रकृतसाध्यकानुमित्यविरोधितया हेत्वाभासता न स्यात् यद्विषयकत्वेन यादृशानुमानविरोधित्वं तस्यैव तत्र तथात्वादिति भावः ॥

इति श्रीजगदीशभट्टाचार्यविरचितमवच्छेदकत्वनिरुक्तिप्रकरणं सम्पूर्णम् ।

समाप्तश्च

व्याप्तिसिद्धान्तलक्षणानिर्वचनम् ।

दीधित्याः सामान्याभावग्रन्थः ।

ननु य एव मिलिता वह्न्यभावा जलह्रदादौ वह्निर्नास्तीतिधियं जनयन्ति त एव प्रत्येकं धूमवति महानसादौ वर्त्तन्ते, तत्र च तेषां स्वस्वावच्छेदकतत्तद्वह्नित्वावच्छिन्नवैयधिकरण्यनिरूपिका याः प्रतियोगितास्तदवच्छेदकमेव वह्नित्वमतोऽव्याप्तिः । न चैवं व-

जागदीश्याः सामान्याभावग्रन्थः ।

ननु व्याप्तिनिरूपणप्रस्तावे सामान्याभावव्यवस्थापनमर्थान्तरग्रस्तमित्युपोद्घातसङ्गत्या तदवतारयति नन्विति । अत्र तत्तद्वह्नित्वावच्छिन्नप्रतियोगिताकाभावो वह्नित्वावच्छिन्नप्रतियोगिताको न वेति विप्रतिपत्तिर्द्रष्टव्या । य एवेत्यादिना वह्नित्वस्यावच्छेदकत्वं त एवेत्यादिना चाऽव्याप्त्युपयुक्तं तदवच्छिन्नाभावस्य हेतुसामानाधिकरण्यं प्रकाशितम् । विशेषाभावीयतत्तद्वह्नित्वावच्छिन्नप्रतियोगित्वान्येव वह्नित्वावच्छिन्नानि न तु सामान्यधर्मावच्छिन्नप्रतियोगित्वान्तरम्, सामान्याभाव इव तत्राप्यतिरिक्ते मानाभावादित्याशयेनाह तत्र चेति । महानसाद्यवच्छेदेन च तत्तद्वह्न्यभावानां यत्तत्तत्प्रतियोगित्वावच्छेदकीभूततत्तद्वह्नित्वावच्छिन्नवैयधिकरण्यं तन्निरूपिका यास्तद्वह्नित्वावच्छिन्नप्रतियोगितास्तदवच्छेदकमेव वह्नित्वमित्यर्थः । तथाच यादृशप्रतियोगितायाः अवच्छेदकीभूतयत्किञ्चिद्धर्मावच्छिन्नानधिकरणं हेत्वधिकरणं तादृशप्रतियोगितानवच्छेदकत्वगर्भं लक्षणमसम्यक् । न च यादृशप्रतियोगितावच्छेदकीभूतयद्धर्मावच्छिन्नानधिकरणं हेत्वधिकरणं तादृशप्रतियोगितावच्छेदकतत्तद्धर्मभिन्नत्वं साध्यतावच्छेदके निवेश्यमिति वाच्यम् । तथा सति हेत्वधिकरणं यद्यद्धर्मावच्छिन्नानधिकरणं तत्तद्धर्मभिन्नसाध्यतावच्छेदकेत्युक्तेरेव सम्यक्त्वेऽवच्छेदकान्तवैयर्थ्यादिति भावः । अ-

न्हित्वावच्छिन्नस्य तदवृत्तित्वान्नं तथात्वम् । तथा सति ह्रदवृत्ति-धूमाभावप्रतियोगितावच्छेदकह्रदावृत्तित्वावच्छिन्नस्य वन्हिमदयो-गोलकवृत्तित्वादतिव्याप्तेः । अथानुगतं रूपं तत्तदभावप्रतियोगि-गितानां नावच्छेदकम् । अनवच्छेदकमेव तर्ह्यभावप्रतियोगितायाः,

---

व्याप्तिरिति । यद्यपि तत्तद्व्यक्तिवृत्तित्वविशिष्टद्रव्यत्वाद्यभावकूट-स्यैव द्रव्यत्वत्वाद्यवच्छिन्नाभावत्वात् द्रव्यं पृथिवीत्वादित्यादाव-प्युक्तलक्षणासत्त्वादसम्भव एव वक्तुमुचितस्तथापि वाच्यं ज्ञेयत्वा-दित्यादावेव सम्भवादव्याप्तिरित्युक्तम् । क्वचिदपि वाच्यत्वं नास्ती-त्यप्रतीत्या स्वरूपसम्बन्धावच्छिन्नतत्तद्व्यक्तिवृत्तित्वविशिष्टवाच्य-त्वत्वावच्छेद्यत्वानुपगमादिति भावः । ननु यत्किञ्चित्पदाप्रक्षेपेण यादृशप्रतियोगितावच्छेदकावच्छिन्नसामान्यानधिकरणं हेत्वधिक-रणं तादृशप्रतियोगितानवच्छेदकत्वं वाच्यं तथा च धूमवतस्तत्तद्व-ह्नित्वावच्छिन्नानधिकरणत्वेपि वन्हित्वावच्छिन्नाधिकरणत्वान्नाव्या-प्तिरित्याशङ्क्य निराचष्टे न चेति । एवम् । विशेषधर्मावच्छिन्नप्रतियोगि-त्वस्यैव सामान्यधर्मावच्छिन्नत्वे । तदवृत्तित्वात् । धूमवदवृत्तित्वात् । न तथात्वम् । न तत्तद्व्यभावस्य प्रतियोगिव्यधिकरणत्वम् । ह्रदेति । ह्रदवृत्तिर्यस्तत्तद्धूमाभावस्तत्प्रतियोगितावच्छेदकं यत् ह्रदावृत्तित्वं तदवच्छिन्नस्य तृणादेरित्यर्थः । अतिव्याप्तेरिति । यद्यपि प्रागुक्तक्रमेण प्रतियोगिव्यधिकरणस्याभावस्यैवाप्रसिद्ध्या धूमवान् वह्नेरित्यादौ ना-तिव्याप्तिः अभावमात्रस्यैव तत्तदधिकरणावृत्तित्वरूपस्वप्रतियोगिता-वच्छेदकधर्मावच्छिन्नसमानाधिकरणत्वात्, तथापि तत्तदभावप्रति-योगितावच्छेदकावच्छिन्नानधिकरणस्यापि तादृशप्रतियोगितावच्छे-दकावच्छिन्नवत्तापत्तिरूपोऽतिप्रसङ्ग एवातिव्याप्तिपदेन विवक्षितः । तथा च प्रतियोगिव्यधिकरणाभावाप्रसिद्ध्या द्रव्यवान् वह्नेरित्यादा-वव्याप्तिरिति भावः । शङ्कते अथेति । तथा च प्रतियोगिवैयधिकर-ण्याप्रसिद्धिनिबन्धना नाव्याप्तिरिति भावः । शङ्कां निरस्यति अनव-च्छेदकमेवेति । अनुगतरूपं प्रतियोगितामात्रस्यैव तर्ह्यनवच्छेद-कमित्यर्थः । ननु विशेषाभावीयप्रतियोगितानवच्छेदकत्वेप्यतिरि-

चिन्तामणेः सामान्याभावग्रन्थः ॥

सामान्यावच्छिन्नप्रतियोगिताकाभावः पृथगेव। अन्यथा सकलप्रसिद्धरूपाभावे प्रसिद्धरूपवदन्यत्त्वे चाऽवगते वायौ रूपं न वा वायूरूपवान्नवेति संशयो न स्यात्। विशेषाभावकूटस्य निश्चितत्वात् ॥

अभावान्तरे मानाभावात्। तथा च तद्रूपावच्छिन्नसाध्यके व्यभिचारिण्यतिव्याप्तिरत आह सामान्येति। संशयान्यथानुपपत्तिं प्रमाणयति अन्यथेति। वायाविति। यद्यप्ययं संशयो न वायुविशेष्यकः, तस्य विशेषणत्वेनोल्लेखात्। न वा रूपविशेष्यकः, तथा सति रूपतदभावयोर्विरोधिनोरकोटितायां प्रकृतानुपयोगप्रसङ्गात्।

कसामान्याभावस्यैव प्रतियोगितावच्छेदकोऽनुगतधर्मः स्यादित्यत आह अभावान्तर इति। ह्रदे वह्निर्नास्तीत्यादिप्रतीतेर्वह्निप्रतियोगिताकाभावकूटमात्रावगाहित्वेनाप्युपपत्तेरिति भावः। ननु मा भूदनुगतधर्मः प्रतियोगितामात्रस्यावच्छेदकस्ततः किमत आह तथा चेति। तद्रूपेति। अनुगतधूमत्वाद्यवच्छिन्नसाध्यके वन्ह्यादावित्यर्थः। प्रत्यक्षविधया प्रमाणत्वे संशयत्वपर्य्यन्तस्य विशेषाभावनिर्णयस्य चानुसरणवैयर्थ्यापत्तेराह संशयान्यथेति। तथाच वायूरूपवान्न वेत्याकारकः सन्देहस्तत्तद्रूपाभावातिरिक्ताभावप्रकारकस्तत्तद्रूपाभावनिश्चयोत्तरकालीनाभावसंशयत्वादिति व्यतिरेक्यनुमानमेव रूपसामान्याभावे मानम्, अत्र च क्रमिकतत्तद्रूपाभावनिर्णये व्यभिचारवारणार्थं हेतौ संशयत्वानुसरणम्, घटाभावाद्यप्रकारकत्वेन पक्षविशेषणाच्च न तैः सिद्धसाधनमर्थान्तरं वेति भावः। अवच्छेदकावच्छेदेन साध्यसिद्धेरुद्देश्यत्वान्न सिद्धसाधनादिकमित्यपि वदन्ति। अयमिति। वायौ रूपं न वेत्यभिलप्यमान इत्यर्थः। तस्य। वायोः। प्रकृतेति। रूपध-

तथापि वायूरूपवान् तदभाववान् वेति रूपतदभावकोटिकसंशये तात्पर्य्यम्। अन्यस्तु रूपवत्तदन्योन्याभावकोटिक इति नाभेद इति सम्प्रदायविदः। विरुद्धयोरेकधर्म्मिसंसर्गावगाहिज्ञानमेव संशयो न तु तदुभयप्रकारतापि नियता, तथा च रूपतदभावविशेष्यको वायुविशेषणकोऽसाविति तु नव्याः। वायुवृत्तित्वतदभावकोटिको रूपधर्म्मिक एवायं संशयः, अधिकरणे तत्तदभावान्यतरनिश्चयस्यापि तत्राधिकरणवृत्तित्वसंशयविरोधित्वात्। अन्यथा भूतले घटतदभावान्यतरनिर्णयेऽपि घटो भूतलवृत्तिर्न वेति संशयप्रसङ्गादित्यपरे। अथैतावन्त्येव रूपाणीत्यनिर्णयात् यावद्रूपा-

---

र्मिकवायुवृत्तित्वसन्देहं प्रति वायुधर्मिकरूपाभाववत्तानिश्चयस्याविरोधित्वेन रूपसामान्याभावासाधकत्वादिति भावः। यद्यपि वायुवृत्तित्वसामान्याभावसाधकतयैवोक्तसंशयस्योपयोगित्वं सम्भवति प्रसिद्धं यत् सकलं रूपं वायुवृत्तित्वस्वरूपं तदभावेऽवगतमिति योजनया पूर्वग्रन्थाविरोधात्, तथापि तुल्यवदुपात्तानामेकरूपेण बोधकत्वमनुरुध्याह तथापीति। उक्तपदानां तत्रासामर्थ्यादाह तात्पर्य्यमिति। नन्वेवं वायूरूपवान्न वेत्यग्रिमसंशयेन पौनरुक्त्यमत आह अन्त्यस्त्विति।[शब्दासन्दर्भमेव सम्प्रदाय इत्यनेनोद्धाव्य शब्दसन्दर्भमेव व्यवस्थापयति विरुद्धयोरित्यादिना।]तथा चेति। वायौ रूपं तदभावो वेत्याकारकसंशय इत्यर्थ।वायुधर्मिकरूपाभावनिश्चयस्य वायुरूपोभयवैशिष्ट्यावगाहिज्ञानत्वावच्छिन्नं प्रत्येव विरोधितया प्रकृतोपयोगित्वसम्भवादिति भावः। प्रकृतोपयोगार्थमाह अधिकरण इति। तदिति दृष्टान्तार्थम्। तत्रेति।सप्तम्यर्थो विशेष्यत्वं तथाच वायुधर्मिकरूपवत्तानिश्चयस्येव तद्धर्मिकरूपाभावनिश्चयस्यापि रूपधर्मिकवायुवृत्तित्वसंशयप्रतिबन्धकत्वात् प्रकृतोपयोग इति भावः। अन्यथा। तादृशनिश्चयस्याविरोधित्वे।[अत्र क्षणविलम्बादिना प्रतिबन्धकीभूतज्ञानान्तरसम्पादकत्वेनापि उपपत्तावन्वयव्यतिरेकयोरन्यथासिद्धत्वात्स्वातन्त्र्येण प्रतिबन्धकत्वकल्पने गौरवमित्यरुचिः

भावानिर्णये संशयो न विरुध्यत इति चेत् । यावद्रूपाभावानिर्णय इत्यस्य यावन्तो रूपाभावास्तेषां यावत्त्वेन रूपेण तेषां यावन्ति रूपाणि तावदभावानां यावद्रूपत्वेन तदभावानां वाऽनिर्णय इत्यर्थः । न प्रथमतृतीयौ, तथा निर्णीतत्वात् । नेतरौ, प्रतियोगितदभावयोर्यावत्त्वानुल्लेखेऽपि योग्यानुपलब्ध्या भूतले घटो नास्तीति निश्चयमात्रादेव घटतदभावसंशयोच्छेददर्शनेन तस्याकिञ्चित्करत्वात् । न चातिरिक्तसम्भावनाविरहसहकृत एवाभावनिश्चयस्तत्प्रतिबन्धकः, सम्भावना च रूपं पार्थिवादित्रितयभिन्नं न वेत्याकारा, निवर्त्तते चेयं रूपत्वावच्छेदेनैतत्त्रितयभिन्नत्वाभावनिश्चयादेवेति वाच्यम् । गौरवात्, विनापि अतिरिक्तसम्भावनां विशे-

---

सूचिताऽपरे इत्यनेन।] एतावन्त्येवेति। प्रसिद्धरूपाण्येव रूपाणीत्यवधारणदशायां तस्यैव विशेषदर्शनतया प्रसिद्धरूपाभावे यावद्रूपाभावव्याप्यतानिश्चयसम्भवात्तद्धेतुक एव यावद्रूपाभावनिश्चयः स्यादिति भावः। तेषामिति। अनिर्णय इत्यग्रेन्वयः। एवमग्रेष्वपि । यावत्त्वेन तेषामिति। यावत्त्वप्रकारेण रूपाभावानामित्यर्थः। यावद्रूपत्वेन। यावद्रूपप्रतियोगिकत्वेन। तथेति। यावन्तोरूपाभावास्तेषां यावन्ति रूपाणि तावदभावानां च वस्तुगत्या निर्णीतत्वादित्यर्थः। तस्येति। प्रतियोगिन्यभावे वा यावत्त्वोल्लेखस्य प्रतिबन्धकतायामनुपयुक्तत्वादित्यर्थः। न चेति। वाच्यमित्यन्वयः। तत्प्रतिबन्धकः। तस्य संशयस्य प्रतिबन्धकः। तथा च प्रकृते सम्भावनासत्त्वादेव तत्तद्रूपाभावनिश्चयः सन्देहं न प्रतिबन्धीयादिति भावः । ननु पार्थिवाद्यतिरिक्तं रूपमस्ति न वेत्याकारिकैव सम्भावना वाच्या सा च तादृशरूपाप्रसिद्धया दुर्घटेत्यत आह सम्भावना चेति । ननु सर्वत्रैवोक्तसम्भावनायाः सामग्रीसम्भवाद्रूपं नास्तीतिनिर्णयस्य संशयो न स्यादत आह निवर्त्तते चेति। गौरवादिति। रूपाभावनिर्णयाभावत्वापेक्षया सम्भावनाविरहविशिष्टतादृशनिश्चयाभावत्वेन हेतुतायां

षाभावनिश्चये सामान्यसंशयदर्शनाच्च । अथाऽभावस्य सामान्याभावच्छिन्नप्रतियोगिताकत्वनिश्चय एव तादृशसंशयविरोधी । अन्यथा तवाप्यतिप्रसङ्गात् । स च न प्रकृते । अभावस्य च यावद्विशेषाभावाधिकरणवृत्तित्वेन विशिष्टस्य तदवच्छेदेन वा सामान्याव-

---

गौरवादित्यर्थः । ननु रूपाभावनिश्चया यावन्तस्तत्प्रत्येकप्रतियोगिकाभावत्वेनैव तादृशसंशये हेतुत्वं वाच्यं न तु तादृशनिश्चयत्वावच्छिन्नाभावत्वेन, सामान्याभावानभ्युपगमात् ध्वंसादिभिरत्यन्ताभावस्य विरोधाच्च, तथा च सम्भावनाकालीनरूपाभावनिश्चयानामप्रवेशेन सम्भावनाविरहविशिष्टा ये रूपाभावनिश्चयास्तत्प्रत्येकप्रतियोगिकाभावत्वेन हेतुतायामेव विपरीतलाघवमत आह विनापीति । यत्तु सम्भावनाविरहविशिष्टरूपाभावनिश्चयत्वावच्छिन्नाभावस्याखण्डस्य तद्व्यक्तित्वेन हेतुत्वे गौरवानवकाशादुक्तं विनापीत्यादि । तत्तुच्छम् । सामान्याभावानभ्युपगन्तॄणामनुगतरूपावच्छिन्नस्याखण्डाभावस्य शङ्कितुमप्यशक्यत्वात् । विशेषाभावनिश्चय इति । विशेषाभावत्वप्रकारकनिश्चय इत्यर्थः । यच्चपत्युपाध्यायमतमुत्थापयति अथेति । सामान्येत्यादि । सामान्यपदमवच्छिन्ने प्रतियोगितायां चान्वितम् । तथा च सामान्याभावच्छिन्नस्य स्वावच्छिन्नप्रतियोगिताकत्वसंसर्गेणाभावविशेष्यकनिर्णय एव संशयविरोधीत्यर्थः । तेन रूपं नास्तीत्यादिप्रतीतौ रूपत्वाद्यवच्छिन्नप्रतियोगिताकत्वस्याप्रकारत्वेपि न क्षतिः । तव । सामान्याभाववादिनः । अतिप्रसङ्गादिति । अभावत्वादिप्रकारेणापि सामान्याभावस्य निश्चयसत्त्वे तादृशसंशयानुत्पत्तिप्रसङ्गादित्यर्थः । स चेति । तादृशनिश्चयो न संशयस्थल इत्यर्थः । तत्सत्त्वे संशयस्य केनाप्यनङ्गीकारादिति भावः । ननु विशेषाभावस्यैव सामान्यावच्छिन्नप्रतियोगितात्वे रूपवत्यपि रूपं नास्तीतिप्रत्ययस्य प्रामाण्यापत्तिः तत्रापि यत्किञ्चिद्रूपाभावसत्त्वादत आह अभावस्य चेति । ननु विशिष्टस्यानतिरिक्ततया तद्दोषतादवस्थ्यमधिकरणभेदेनाभावभेदस्यानभ्युपगमादत आह तदवच्छेदेनेति । यावद्विशेषाभावाधिकरणवृत्ति-

च्छिन्नप्रतियोगिताकत्वम्। सम्भवति चेदम्, तादृशाभावप्रतियोगिताया अतिरिक्तत्वात्। तेन नैकविशेषवतो विशेषान्तराभाववत्त्वेन सामान्याभाववत्त्वप्रसङ्गः। न च प्रतियोगितावच्छेदकभेदस्याभावभेदनियामकतया भेदसिद्धिः, प्रतियोगिभेदस्य तत्त्वे एकघटप्र-

---

त्वावच्छेदेनेत्यर्थः।तथा च रूपवतो यावद्विशेषाभावानधिकरणत्वादेव न तत्र रूपं नास्तीतिप्रत्ययः। नन्विदमसम्भवदुक्तिकं तत्तद्रूपत्वावच्छिन्नप्रतियोगिताया एव रूपत्वावच्छिन्नप्रतियोगितात्वाद्रूपवदवच्छेदेनापि तत्तद्रूपाभावस्य रूपत्वावच्छिन्नप्रतियोगिताकत्वात्, अन्यथा तत्तद्रूपत्वावच्छिन्नप्रतियोगिताकत्वमपि तदवच्छेदेन न स्यादत आह सम्भवति चेदमिति। इदम्। यावद्विशेषाभावाधिकरणावच्छेदेनैव सामान्यावच्छिन्नप्रतियोगिताकत्वम्। तादृशेति। सामान्यावच्छिन्नप्रतियोगिताया यावद्विशेषधर्मावच्छिन्नप्रतियोगित्वातिरिक्तत्वादित्यर्थः। यद्यपि सामान्यविशेषावच्छिन्नयोः प्रतियोगितयोरैक्येपि न क्षतिः सामान्यावच्छेद्यत्वविशिष्टप्रतियोगिताकत्वावच्छिन्नस्याधिकरणताया विशेषवत्यसत्त्वादेवातिप्रसङ्गभङ्गात्, अन्यथा गुणान्यत्ववैशिष्टं यद्वस्तुगत्या सत्त्वं तस्यैव गुणेपि सत्त्वात्तत्रापि विशिष्टसत्ताप्रतीत्यापत्तेः। तथापि अनुगतप्रतीतिबलात् सामान्यावच्छिन्नप्रतियोगिताव्यक्तेरतिरिक्तत्वसिद्धौ तत एवातिप्रसङ्गव्युदासः सम्भवतीत्याशयेनेदमसंहितमिति द्रष्टव्यम्। सामान्याभाववत्त्वम्। नीरूपमित्यादिप्रमाविशेष्यत्वम्। मिश्रमतमाशङ्कते न चेति। वाच्यमितिपरेणान्वयः।अभावभेदेत्यस्य सर्वत्रेत्यादिः। नियामकत्वादिति। अन्यथा घटपटाद्यभावयोरपि भेदो न सिध्येदिति भावः। भेदसिद्धिरिति। सामान्याभावविशेषाभावयोरित्यादिः। अवच्छेदकीभूतयोः सामान्यविशेषधर्मयोर्भेदादिति भावः। ननु प्रतियोगिभेदस्यैवाभावभेदनियामकत्वात् घटपटाद्यभावयोरस्तु भेदो न तु सामान्यविशेषाभावयोरभिन्नप्रतियोगिकत्वादत आह प्रतियोगीति। तत्त्वे अभावभेदकत्वे। प्रागभावादित्यादिना ध्वंसात्यन्ताभावान्योन्याभावानां परिग्रहः। अभेदप्रसङ्गात्। भेदासिद्धिप्रसङ्गात्। नन्ववच्छेद-

तियोगिकस्य प्रागभावादिचतुष्कस्याभेदप्रसङ्गात्, अवच्छेदकन्तु भिद्यत एव तत्र क्व चित्तादात्म्यस्य क्व चित्संसर्गस्य क्व चित्पूर्वापरकालीनतद्वदृत्त्वादेश्च तथात्वादिति वाच्यम् । संसर्गप्रतियोगिविशेषणसाधारणस्यैकस्यावच्छेदकत्वस्य दुर्वचत्वात्, पूर्वापरकालीनत्वादेर्ध्वंसादिप्रतियोगितावच्छेदकत्वे मानाभावाच्च । किञ्च अवच्छेदकभेदस्याभावभेदनियामकत्वं न तज्जनकत्वम्, अनन्ताभावादिस्वरूपस्य तस्याजन्यत्वात् । नापि तदव्याप्यत्वमपि, वैयधिकरण्यात् । अत एव न तदव्यापकत्वमपि, अभे-

---

कभेदस्य नियामकत्वेप्युक्तदोषतादवस्थ्यम्, घटत्वादिलक्षणावच्छेदकस्यैकत्वादत आह अवच्छेदकन्त्विति । क्व चित् । घटस्यान्योन्याभावस्थले तादात्म्यस्य । तथात्वादित्यन्वयः । अवच्छेदकत्वादिति तदर्थः । एवमग्रेपि । क्व चित् । घटस्यात्यन्ताभावस्थले । संसर्गस्य । संयोगादेः । क्व चिदिति । ध्वंसस्थले पूर्वकालीनतद्घटत्वस्य प्रागभावस्थले चोत्तरकालीनतद्घटत्वस्य प्रतियोगितावच्छेदकत्वादित्यर्थः । दुर्वचत्वादिति । तथा चानुगमात् कथं नियामकत्वमिति भावः । ननु संसर्गविधया विशेषणविधया वा अवच्छेदकयोरन्यतरभेद एव नियामको वक्तव्य इति नाननुगम इत्यत आह पूर्वेति । मानाभावाच्चेति । तथाच न सर्वसाधारण्यमिति भावः । ननूक्तक्रमेणावच्छेदकभेदो नित्याभावभेदको वक्तव्य इत्यत आह किञ्चेति । एकाभावनिष्ठस्यापराभावभेदस्याधिकरणस्वरूपत्वमतिरिक्तत्वं वा उभयथाप्यस्य नित्यत्वादिति भावः । वैयधिकरण्यादिति । यद्यपि तत्तद्रूपाभावीयप्रतियोगितावच्छेदकतत्तद्रूपत्वभेदस्य तत्तद्रूपाभावभेदेन सामानाधिकरण्यं रूपत्वघटत्वादावेव सुलभम्, तथापि यथाश्रुतस्य तत्तद्रूपाभावेष्वेव व्यभिचारित्वाद्यदभावप्रतियोगितावच्छेदकवृत्तित्वविशिष्टो यदभावप्रतियोगितावच्छेदकभेदो यत्र तत्र तदभाववृत्तित्वविशिष्टस्तदभावभेद इत्येवं व्याप्तिर्वाच्येति तत्रैव वैयधिकरण्यं द्रष्टव्यमिति ध्येयम् । अत एव । उक्तक्रमेण

देऽप्यविरोधाच्च । न च तादितरधर्म्मावच्छिन्नप्रतियोगिताकत्वं तदवच्छिन्नप्रतियोगिताकान्यत्वस्य व्याप्यम् । मानाभावात् । अत एव च समनियतसुखदुःखादितत्तत्संख्यापरिमाणव्यक्त्यादिनानाधर्मावच्छिन्नोऽप्यभिन्न एवाभावः । भेदसिद्धिस्तु भाववदभा-

---

वैयधिकरण्यादेव । ननु यत्रात्यन्ताभावे यद्धर्मावच्छिन्नाभावभेदस्तत्रावश्यं तदन्यधर्मावच्छिन्नप्रतियोगिताकत्वमित्युक्तौ न वैयधिकरण्यावकाश इत्यत आह अभेदेपीति । सामान्याभावविशेषाभावयोरभेदेप्युक्तनियमस्याविरुद्धत्वादित्यर्थः । तथा चाभावभेदासाधकत्वेनोक्तव्यापकत्वमर्थान्तरग्रस्तामिति भावः । न चेत्यादि । घटत्वेतरसंयोगसम्बन्धावच्छिन्नप्रतियोगिताके घटत्वावच्छिन्नाभावे व्यभिचारस्य वारणाय प्रथमं धर्मपदं विशेषणविधयावच्छेदकस्य प्रापकम्, समवायसम्बन्धेतरघटत्वावच्छिन्नप्रतियोगिताके समवायसम्बधावच्छिन्नघटाभावे तद्वारणाय द्वितीयं धर्मपदम् । न च गुरुधर्मावच्छिन्नाभावाप्रसिद्ध्या व्याप्यत्वासिद्धिः, तदितरत्वेनेन तद्धर्मानवच्छेद्यप्रतियोगिताकत्वस्य विवक्षितत्वात् । तत्पदेनाखण्डधर्मस्यावच्छेदकीभूतधर्मस्य वा विवक्षणात् । गुरोरवच्छेदकत्वोपगमाद्वा नोक्तदोष इत्यपि वदन्ति । मानाभावादिति । तथा च तत्तद्रूपत्वावच्छिन्नाभावो रूपत्वावच्छिन्नप्रतियोगिताकान्यः रूपत्वेतरधर्मावच्छिन्नप्रतियोगिताकत्वादित्याद्यनुमानमप्रयोजकमिति भावः । अत एवेति । उक्तव्याप्तौ मानाभावादेवेत्यर्थः । दुःखादीत्यादिना धर्माधर्मादेः परिग्रहः । न चात्मत्वापेक्षया गुरुत्वेन सुखवत्त्वादेरवच्छेदकत्वासम्भवः, तस्येश्वरवृत्तितयातिप्रसक्तत्वेन लाघवस्याकिञ्चित्करत्वादिति भावः । ननु सुखावच्छिन्नस्य चैत्रादेः सत्वेपि भूतलादाविदानीं दुःखविशिष्टो नास्तीतिप्रत्ययादिदमसङ्गमत आह तत्तत्संख्येति । द्रव्यत्वापेक्षया गुरुणः संख्यावत्त्वादेरवच्छेदकत्वायोगादुक्तं तत्तादिति । नानाधर्मावच्छिन्न इति । नानाधर्मावच्छिन्नप्रतियोगिताक इत्यर्थः । ननूक्तव्याप्तेरसत्वे घटपटाद्यभावानामपि भेदो न सिद्ध्येदत आह भेदसिद्धिस्त्विति । तथा च घटवदवृत्तित्वादि-

वस्यापि विरुद्धधर्म्माध्यासादेव। अत एव गगनादीनामवृत्तीनां समानियतानां वा धर्माणामेक एवात्यन्ताभावः, युगपदुत्पन्नविनष्टानां समानदेशानामसति बाधके एक एव ध्वंसः प्रागभावो वे-

---

विरुद्धधर्म्मवत्त्वादेव घटाद्यभावाद्भेदः पटाभावादौ साध्य इति भावः। अवृत्तीनामिति। येन सम्बन्धेन येऽवृत्तयस्तेन सम्बन्धेन तेषामेक एवाभाव इत्यर्थः। तेन वृत्तिमतोपि रूपादेः संयोगादिसम्बन्धेनाभावस्योपग्रहः। समानियतानामिति। तत्तदेकत्वपरिमाणादिव्यक्तीनामित्यर्थः। युगपद्विनष्टानामेक एव ध्वंसो युगपदुत्पन्नानां चैक एव प्रागभाव इत्यर्थः। समानदेशावच्छिन्नयोरपि विभिन्नकालोत्पन्नविनष्टयोः प्रागभावध्वंसयोर्नानात्वाद्युगपदित्युक्तम्। व्यधिकरणयोः समानाधिकरणयोरपि न्यूनाधिकदेशवृत्तिकयोर्युगपदुत्पादविनाशशालिनो रूपसंयोगाद्योः प्रागभावस्य ध्वंसस्य च विभिन्नत्वात् समनियतदेशानामित्युक्तम्। मूलाग्रावच्छिन्नवृक्षवृत्तिकयोर्युगपदुत्पन्नविनष्टयोरपि वृक्षपटसंयोगयोर्ध्वंसप्रागभावयोर्नानात्वादाह असतीति। तत्र ध्वंसादेरेकत्वे मूलावच्छिन्नसंयोगोऽग्रे नष्ट इत्यादिप्रतीत्यापत्तिरेव बाधिकेति भावः। यत्तु युगपदुत्पन्नविनष्टानामपि समनियतरूपरसादीनां न ध्वंसादैक्यं तथा सति तद्रूपं नष्टमितिवत् तद्रसो नष्ट इत्यपि चाक्षुषापत्तेः, रूपध्वंसस्यैव रसध्वंसत्वेन चक्षुरयोग्यत्वस्य वक्तुमशक्यादत उक्तमसति बाधक इति। तत्तुच्छम्। रसध्वंसव्यक्तेश्चक्षुर्योग्यत्वेपि रसप्रतियोगिकध्वंसत्वेनायोग्यत्वसम्भवात्प्रतियोगिविशेषमन्तर्भाव्यैवाभावस्य तत्तदिन्द्रिययोग्यताया निर्वाच्यत्वादिति। प्राञ्चस्तु युगपदुत्पन्नस्यैकपाकजातरूपादिचतुष्टयस्य विभिन्न एव प्रागभावः। कथमन्यथा सामग्र्यभेदे कार्य्यस्य रूपादेर्मिथो भेद इत्यत उक्तमसति बाधक इति। न च नित्यानामिव जन्यानामपि रूपादिचतुर्णां विरुद्धधर्माध्यासादेव भेदोपपत्तौ सामग्रीभेदस्य कार्यभेदाप्रयोजकत्वमिति वाच्यम्। सामग्रीभेदस्य कार्य्यभेदाप्रयोजकत्वे सामग्रीविशेषस्य कार्य्यविशेषनियामकत्वस्याप्युपेक्षापत्तेः कार्य्याणां कालान्तरानुत्पादस्यापि विरुद्धधर्म्मा-

ति । व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकोऽपि चेदभावः प्रामाणिकस्तदा तस्यैकस्यैव प्रतियोगिताः सर्वैरेव व्यधिकरणैर्धर्मैः सर्वैश्च समानासमानाधिकरणैः सम्बन्धैरवच्छिद्यन्ताम्, आकाशाभाव एव वा तथास्तामिति । मैवम् । एवं हि तत्तद्देशकालाद्यवच्छिन्नानवच्छिन्नतत्तदधिकरणवृत्तित्वेन विशिष्टस्य तत्तदवच्छेदेन वा एकस्यै-

---

ध्यासादेवोपपत्तेरित्याहुः । प्रतियोगिता इति । बहुत्वं प्रतियोगिभेदेन स्वरूपसम्बन्धरूपायाः प्रतियोगितायाः नानात्वमभिप्रेत्य । वस्तुतस्तु तद्धर्मानधिकरणेषु सर्वेष्वेव तद्धर्मावच्छिन्नैकप्रतियोगितास्वीकारे घटनिष्ठपटत्वावच्छेद्यप्रतियोगिताव्यक्तेरेव पटनिष्ठघटत्वावच्छिन्नप्रतियोगितात्वाद्घटवत्यपि घटत्वेन घटो नास्तीत्यादिव्यवहारस्य प्रामाण्यापत्तिरतोऽतिरिक्तापि प्रतियोगिता स्वाश्रयभेदान्नानैवेति ध्येयम् । सर्वैश्चेति । समानाधिकरणैर्व्यधिकरणैश्चेत्यर्थः । [इत्थं च प्रतियोगितावच्छेदकधर्मस्येव प्रतियोगितावच्छेदकसम्बन्धस्यापि अभावभेदनियामकत्वे व्यभिचारो दर्शितः] यथा च व्यधिकरणधर्मावच्छिन्नप्रतियोगितायाः सम्बन्धावच्छिन्नत्वं तथा विवेचितमधस्तात् । लाघवादाह आकाशाभाव एव वेति । एतन्नये कालाद्यभावस्याप्याकाशाभावत्वान्नैवकारासङ्गतिः । एवमिति । तत्तदधिकरणमन्तर्भाव्य विशेषाभावैरेव सामान्याभावस्यान्यथासिद्धाविति्यर्थः । देशे काले चाव्याप्यवृत्तीनां घटादीनामभावस्य तत्तदधिकरणवृत्त्यभावमात्रेण अन्यथा कर्तुमशक्यत्वादाह तत्तद्देशकालावच्छिन्नेति । प्रतियोग्यनवच्छेदकीभूतदेशकालावच्छिन्नेत्यर्थः । अन्यथा कोण इव मध्येपि गृहे घटो नास्ति तदानीमिवेदानीमपि गृहे घटो नास्तीत्यादिप्रत्ययो घटाद्यवच्छेदकदेशकालाद्यवच्छेदेनापि स्यात् तदधिकरणवृत्त्यभावस्य घटत्वावच्छिन्नप्रतियोगिकत्वनियमादिति भावः । व्याप्यवृत्तीनां गोत्वाश्वत्वादीनामभावस्य गोत्वादिशून्यतत्तदधिकरणवृत्तित्वविशिष्टाभावमात्रेणैवान्यथासिद्धिसम्भवे तत्र देशकालावच्छिन्नत्वं न प्रवेशनीयमित्याशयेनाह अनवच्छिन्नेति । देशकालानवच्छिन्नेत्यर्थः । तत्तदधिकरणेति । प्रतियोगिशू-

वाभावस्य घटपटगोत्वाश्वत्वादिप्रतियोगिकत्वसम्भवेन तत्तद्भेदोऽपि विलुप्येत। तत्तत्प्रतियोगिकत्वं तत्तत्स्वभावो न च तत्राधिकरणवृत्तित्वस्यान्तर्भावोऽवच्छेदकत्वञ्चेति तु समानम्। अत एव सामान्यावच्छिन्नप्रतियोगिताकत्वं व्यासज्यवृत्तीत्यपि प्रत्युक्तम्। अव्यासज्यवृत्तेस्तत्स्वभावस्य तत्त्वानुपपत्तेरतिरिक्तकल्पने च किम-

---

न्येत्यादिः। विशिष्टस्यानतिरिक्तत्वादाह तदवच्छेदेन वेति। देशकालावच्छिन्नवच्छिन्नतत्तदधिकरणवृत्तित्वावच्छेदेन वेत्यर्थः। तद्भेदोपीति। घटपटाद्यभावभेदोपीत्यर्थः। सामान्याभावस्थल इव युक्तेस्तौल्यादिति भावः। शङ्कते तत्प्रतियोगिकत्वमिति। तत्स्वभावः। तत्तदभावस्वरूपः। न चेति। तादृशस्वभावलक्षणे तत्प्रतियोगिकत्वे अधिकरणविशेषवृत्तित्वस्यान्तर्भावो घटकत्वमवच्छेदकत्वं वा न युक्तं तदभावस्वरूपस्य सर्वत्राविशेषात् तथा च घटाभावस्यैव पटाभावत्वे पटवत्यपि पटो नास्तीतिप्रतीत्यापत्त्या तयोर्भेद इति भावः। शङ्कां निरस्यति इति तु समानमिति। सामान्यावच्छिन्नप्रतियोगिताकत्वमपि तत्तद्विशेषाभावस्वरूपमेवेति तत्र यावद्विशेषाभावाधिकरणवृत्तित्वस्यानन्तर्भावादनवच्छेदकत्वाच्च रूपवत्यपि रूपं नास्तीतिप्रतीत्यापत्त्या सामान्यविशेषाभावयोरप्यवश्यं भेद इत्यर्थः। अत एव। प्रतियोगिकत्वस्य तत्स्वभावलक्षणत्वादेवेत्यर्थः। व्यासज्यवृत्तीति। तथा च तत्पर्य्याप्त्यधिकरणस्य विशेषाभावकूटस्य विरहादेव रूपवति रूपं नास्तीति न प्रत्यय इति भावः। तत्स्वभावस्य। तत्तदभावपर्य्यवसितसामान्यावच्छिन्नप्रतियोगिताकत्वस्वरूपस्य। तत्त्वम्। व्यासज्यवृत्तित्वम्। ननु सामान्यावच्छिन्नप्रतियोगिताकत्वं न तत्तदभावस्वरूपं किं त्वतिरिक्तमेवेति तस्य व्यासज्यवृत्तित्वकल्पने बाधकाभाव इत्यत आह अतिरिक्तकल्पने चेति। अतिरिक्तेनेति। प्रागुक्तघटपटादिनिखिलप्रतियोगिकैकाभावेनेत्यर्थः। घटपटगोत्वादिप्रतियोगिकत्वमपि न तदभावव्यक्तिस्वरूपं किं तु सामान्यावच्छिन्नप्रतियोगिताकत्ववदतिरिक्तमेव वाच्यमिति घटादिशून्यतत्तदधिकरणावच्छेदेनैकस्यैवातिरिक्ताभावस्य घटपटादिप्रतियोगिक-

पराद्धमतिरिक्ताभावेन । किञ्च व्यधिकरणयोर्घटपटयोर्द्वित्वप्रतीतिवद्व्यधिकरणानामपि विशेषाभावानां युगपदिन्द्रियसन्निकर्षे सामान्यावच्छिन्नप्रतियोगिताकत्वप्रत्ययोऽपि स्यात् । अपि च रूपान्तरेण सम्बन्धविधया वा व्यासज्यवृत्तिधर्मस्य ज्ञाने न यावदाश्रयसन्निकर्षापेक्षा मानाभावात् । एवञ्च एकाभावसन्निकर्षेऽपि सामान्याभावबुद्धिप्रसङ्गः । यादृशे च तस्य ज्ञाने यावदाश्रयाणां स

त्वं स्यादबाधकाभावात् तथा च घटपटाद्यभावानां मिथो भेदो विलुप्येतेति पूर्वमेवानुवर्त्तत इति भावः । ननु घटपटयोरिव तदुभयाभावयोरपि मिथो भेदस्यानुभवसिद्धत्वान्न तद्विलोपप्रसङ्गः, सामान्यावच्छिन्नप्रतियोगिताकत्वस्यातिरिक्तस्य व्यासज्यवृत्तितायां बाधकः प्रतिबन्दिरनुत्तरं चेत्यत आह किञ्चेति । व्यासज्यवृत्तिप्रत्यक्षं प्रत्यैकाधिकरण्यापन्नयावदाश्रयाणां सन्निकर्षस्य हेतुत्वे वक्ष्यमाणातिप्रसङ्गासम्भवात्तथा हेतुतायां व्यभिचारं दर्शयन्नाह व्यधिकरणयोरिति । इन्द्रियसन्निकर्ष इत्यस्य विशेषाभाववदधिकरणद्वयादिमात्रावच्छेदेनेत्यादिः । प्रत्ययः । साक्षात्कारः । तथा च घटपटोभयमात्रसन्निकर्षेपि रूपं नास्तीतिप्रत्यक्षं स्याद्रूपाभावकूटस्यैवोभयत्र सन्निकर्षादिति भावः । ननु व्यासज्यवृत्तिव्यक्त्यन्तरप्रत्यक्षं प्रत्यैकाधिकरण्यापन्नयावदाश्रयसन्निकर्षस्य व्यभिचारेणाहेतुत्वेऽन्वयव्यतिरेकाभ्यां सामान्यावच्छिन्नप्रतियोगिताकत्वप्रत्यक्षं प्रति तथाविधसन्निकर्षत्वेन हेतुत्वे बाधकाभावान्नोक्तदोष इत्यत आह अपि चेति । [नन्वैकाधिकरण्यापन्नवृत्तिव्यासज्यवृत्तिधर्मप्रत्यक्षं प्रत्यैकाधिकरण्यापन्नयावदाश्रयसन्निकर्षत्वेन हेतुत्वान्नोक्तदोष इत्यत आह अपि चेति तु नव्याः] रूपान्तरेणेति । व्यासज्यवृत्तित्वानिरूपकगुणत्वरूपप्रतियोगिताकत्वत्वादिप्रकारेणेत्यर्थः । प्रकृतमभिप्रेत्याह सम्बन्धविधया वेति । मानाभावादिति । द्रव्यान्तरसन्निकर्षदशायां घटो गुणवानित्यादिप्रत्यक्षेण गुणत्वादिप्रकारेण द्वित्वादेर्घटे रूपप्रतियोगिकोऽभाव इत्यादिप्रत्यक्षेण च रूप

न्निकर्षोऽपेक्ष्यते तत्र तेषां तद्भेदस्य च ज्ञानमपि। तदज्ञाने तदभेद-

---

प्रतियोगितात्वप्रकारेण रूपत्वावच्छिन्नप्रतियोगिताव्यक्तेर्विषयीकरणे क्षत्यभावादिति भावः। सामान्याभावेति। स्वावच्छिन्नप्रतियोगिताकत्वसंसर्गेण रूपत्वादिसामान्यविशिष्टवैशिष्ट्यावगाह्यभावप्रत्यक्षप्रसङ्ग इत्यर्थः। न च संसर्गप्रकारसाधारणसामान्यावच्छिन्नप्रतियोगिताकत्वलौकिकप्रत्यक्षमात्रं प्रत्येव निरुक्तयावदाश्रयसन्निकर्षत्वेन हेतुत्वान्नोक्तदोषः, तथा सत्यनन्तसामान्यान्तर्भावेणानन्तकार्यकारणभावकल्पनामपेक्ष्य लाघवादतिरिक्तसामान्याभावकल्पनस्यैव युक्तत्वादिति भावः। न च यत्किञ्चिद्रूपाभावसन्निकर्षदशायां रूपसामान्याभावप्रत्यक्षं जायत एव त्वन्मतेपि घटत्वादौ रूपसामान्याभावस्य सन्निकृष्टतया घटत्वे रूपं नास्तीतिप्रत्यक्षस्य तदानीं दुर्वारत्वादिति वाच्यम्। घटद्वयसन्निकर्षदशायां रूपत्वावच्छिन्नप्रतियोगिताकत्वपर्य्याप्त्यधिकरणेष्वभावेषु घटवृत्तित्वावगाहिनो घटे रूपं नास्तीत्याकारकप्रमात्मकप्रत्यक्षस्यापाद्यत्वात् घटादीनां रूपत्वावच्छिन्नप्रतियोगिताकत्वपर्य्याप्त्यधिकरणयावद्भाववत्त्वविरहेपि तादृशयावद्भावस्य घटवृत्तित्वानपायात्। न हि घटवृत्तित्वप्रमाया एकव्यक्तिमात्रविशेष्यकत्वेनैकव्यक्तिनिरूपिताधेयत्वप्रकारकत्वेन वा समं नियमः, मानाभावात् रूपद्वयं घटवृत्तीत्यादिप्रमायां व्यभिचाराच्चेति भावः। सामान्यावच्छिन्नप्रतियोगिताकत्वस्य व्यासज्यवृत्तित्वे सामान्याभावप्रतीतेरतिप्रसक्तिमभिधायाऽप्रसङ्गमप्याह यादृशे चेति। तस्य। व्यासज्यवृत्तिधर्मस्य। तेषाम्। यावदाश्रयाणां ज्ञानमप्यपेक्ष्यत इति योजना। विषयतासम्बन्धेन पर्याप्तवृत्तिकस्य चाक्षुषादिकं प्रति स्वविषयपर्य्याप्तत्वसम्बन्धेन चाक्षुषत्वादिना हेतुत्वादिति भावः। तद्भेदस्येति। तेषामाश्रयाणां मिथो भेदस्येत्यर्थः। ज्ञानमप्यपेक्ष्यत इति पूर्वेणान्वयः। तत्तद्व्यक्तिधर्मिकपर्य्याप्तवृत्तिकप्रत्यक्षं प्रति तत्तद्व्यक्तिभिन्नत्वप्रकारकप्रत्यक्षप्रमात्वेन हेतुत्वं तत्र च कार्यस्य तत्तद्व्यक्तिभिन्नवृत्तिविशेष्यत्वं कारणस्य च विशेष्यतामात्रं प्रत्यासत्तिः, विशेषाभावानामैक्यभ्रमदशायां तेषु पर्याप्तिसम्बन्धेन त्रित्वादिप्रत्यक्षानुदयेन तदन्तर्भावेनाप्युक्तकार्य्यका-

ज्ञाने च तदग्रहात् आश्रयभेदभ्रमेण तद्भ्रमदर्शनाच्च । न चात्र यावद्विशेषाभावानां प्रथममुपस्थितिः सम्भवति, तत्प्रतियोगिनां

रणभावस्यावश्यकत्वात् । अभावादौ संख्यायाः समवायेनाऽसत्त्वेपि पर्य्याप्तिसम्बन्धेन सत्त्वे बाधकाभावात् तत्तद्व्यक्तिधर्मिक पर्य्याप्तवृत्तिकस्य भ्रमात्मकप्रत्यक्षे तु तत्तद्व्यक्तिभिन्नत्वस्य भ्रमात्मकमेव प्रत्यक्षं दोषः समानविशेष्यतासत्त्वया हेतुर्वक्तव्य इत्याश्रयभेदभ्रमाद्द्वित्वादिभ्रमो नानुपपन्न इति वदन्ति। अपेक्षायामन्वयव्यतिरेकौ दर्शयति तदज्ञान इत्यादिना । यावदाश्रयाणामज्ञाने परस्परभेदज्ञाने वा व्यासज्यवृत्तिधर्मस्य द्वित्वादेरप्रत्यक्षत्वादित्यर्थः । अत एव दूरत्वादिदोषात् क्रमापन्नवृक्षाणामभेदभ्रमे तत्र सतोपि द्वित्वादेर्न साक्षात्कार इति भावः । तद्भ्रमेति । अत एव मध्याच्छादितैकदण्ड एव भेदभ्रमाद्दण्डद्वयीबुद्धिरिति भावः । अत्र सामान्यावच्छिन्नत्वस्थले । यावद्विशेषाभावानामिति । यावत्सामाश्रयाणां ये विशेषाभावाः परस्परभेदरूपाभावास्तेषामित्यर्थः । प्रथमम् । सामान्यावच्छिन्नप्रतियोगिताकत्वग्रहात्पूर्वम् । तत्प्रतियोगिनामिति । तस्य परस्परभेदस्य ये प्रतियोगिनो विशेषाभावास्तेषां विशेषतस्तत्तदभावव्यक्तित्वेनानुपस्थितेरित्यर्थः । तथा च सामान्यावच्छिन्नप्रतियोगिताकत्वस्य व्यासज्यवृत्तित्वे कारणबाधात् प्रत्यक्षमेव न स्यादिति भावः । केचित्तु वन्ह्यादिकार्य्यजनकत्वेनोत्तेजकाभावविशिष्टमणयादिसामान्याभाव आवश्यको न हि तत्र तत्तन्मण्यभाववत्त्वेन हेतुत्वमनन्तकार्यकारणभावापत्तेर्नाप्युत्तेजकाभावविशिष्टमणित्वावच्छिन्नप्रतियोगिताकत्वेनानुगतधर्म्मेण विशेषाभावानामेव तत्र हेतुत्वमवच्छेदकगौरवापत्तेरस्माकं स्वखण्डताहशमण्यभावव्यक्तित्वेनैव हेतुतायामवच्छेदकलाघवात् । न चोत्तेजकाभावविशिष्टमणित्वावच्छिन्नप्रतियोगिताकत्वसम्बन्धेन मणिमदभावत्वेनैव हेतुत्वम्, ताहशप्रतियोगिताकत्वस्याभावांशे मणित्वावच्छिन्नीयसंसर्गत्वविरहात्। अन्यथा मणिमत्यपि देशे मणिर्नास्तीतिप्रत्ययापत्तेः विशिष्टमणित्वावच्छिन्नप्रतियोगिताकत्व-

विशेषतोऽनुपस्थितेरिति दिक् । केचित्तु अनन्तविशेषाभावानां सामान्यावच्छिन्नप्रतियोगिताकत्वस्य तद्व्यासज्यवृत्तित्वस्य च कल्पनामपेक्ष्य लाघवात् सामान्यावच्छिन्नप्रतियोगिताकत्वेनैक एवाभावः कल्प्यते । कल्पनीयशरीरस्योभयत्र तुल्यत्वेऽपि एतदपेक्ष्य तस्य गुरुत्वात् । विनिगमनाभावेऽपि च सामान्याभावसिद्धि-

---

सम्बन्धेन यो मणिमानभावस्तस्य तत्र सत्त्वात् । अत एव घटत्वावच्छिन्नप्रतियोगिताकत्वं घटत्वविशिष्टस्यैव संसर्गो न तु द्रव्यत्वप्रमेयत्वादिविशिष्टस्येति निर्घटे घटो नास्तीत्येव प्रत्ययो न तु द्रव्यं प्रमेयं वा नास्तीत्याकार इति सिद्धान्तः । न च प्रतियोग्यविशेषितस्याऽखण्डाभावस्य तत्तद्व्यक्तित्वेन हेतुतायामन्यथासिद्धिः अन्यथा मणेस्तत्तद्घटादीनां चान्यतमत्वावच्छिन्नाभावस्याप्यखण्डस्य तत्तद्व्यक्तित्वेन दाहजनकत्वापत्तेरिति वाच्यम् । त्वन्मतेऽप्येतद्दोषस्य तुल्यत्वाद्यद्धर्मावच्छिन्नाभावत्वापेक्षया यद्धर्मावच्छिन्नाभावत्वं गुरुतरं तद्धर्मावच्छिन्नाभावव्यक्तयैव तद्धर्मावच्छिन्नाभावव्यक्तेरन्यथा सिद्धेः सुवचत्वाच्चेति वदन्ति । यत्तु विशेषाभावकूटस्य सामान्यावच्छिन्नप्रतियोगिताकत्वोपगमे प्रमेयं नास्ति प्रमेयाद्भेद इत्यादिप्रतीतेः प्रामाण्यापत्तिस्तत्तत्प्रमेयात्यन्ताभावकूटस्य तत्तत्प्रमेयभेदकूटस्य च प्रमेयत्वावच्छिन्नप्रतियोगिताकत्वसम्भवादिति । तन्न । प्रतियोगितावच्छेदकीभूतं यत्सामान्यं तदवच्छिन्नप्रतियोगिताकत्वस्यैव विशेषाभावकूटेषु स्वीकर्त्तव्यत्वात्, अन्यथा सामान्याभावस्वीकारेऽपि तद्दोषतादवस्थ्यादिति संक्षेपः । सार्वभौममतमुपन्यस्यति केचित्त्विति । तद्व्यासज्येति । सामान्यावच्छिन्नप्रतियोगिताकत्वे पर्याप्तिलक्षण्व्यासज्यवृत्तित्वस्य वैयर्थ्यः । ननु तव सामान्यावच्छिन्नप्रतियोगिताकत्वतदाश्रयोभयोः कल्पनावन्ममापि सामान्यावच्छिन्नप्रतियोगिताकत्वतदव्यासज्यवृत्तित्वोभयोः कल्पनात्कुत एकत्र लाघवमत आह कल्पनीयेति । एतत् । अतिरिक्ताभावे सामान्यावच्छिन्नप्रतियोगिताकत्वम् । तस्य । व्यासज्यवृत्तिसामान्यावच्छिन्नप्रतियोगि-

रप्रत्यूहैव । धर्मकल्पनातो धर्मिकल्पनाया गुरुत्वं कल्पनीयानेकत्वप्रयुक्तम् । न चातिरिक्ताभावस्य तत्र च सामान्यावच्छिन्नप्रतियोगिताकत्वस्याऽनन्तवाय्वाद्यधिकरणवृत्तित्वस्य च कल्पनामपेक्ष्य कल्पनानन्तवाय्वाद्यधिकरणवृत्तित्वानां यावद्विशेषाभावानामेव सामान्यावच्छिन्नप्रतियोगिताकत्वस्य तद्व्यासज्यवृत्तित्वस्य च कल्पनैव लघीयसीति वाच्यम् । एवं सत्यभावमात्रासिद्धिप्रसङ्गादित्याहुः ॥

ताकत्वस्य । गुरुत्वादिति । पर्याप्तेः सम्बन्धान्तरनियतत्वेन बहुविधाभावेषु कल्पनीयस्वरूपसम्बन्धकत्वेन गुरुत्वादित्यर्थः । ननु पर्याप्तेः सम्बन्धान्तरनियतत्वे मानाभावाद्विशेषाभावेषु सामान्यावच्छिन्नप्रतियोगिताकत्वस्यातिरिक्तः पर्य्याप्त्याख्य एव सम्बन्धो वाच्यो न तु स्वरूपसम्बन्धोपीति विशेषाभावकूटेपि सामान्यावच्छिन्नप्रतियोगिताकत्वस्य पर्य्याप्तिमात्रकल्पनायां न गौरवमत आह विनिगमनाविरहेपीति । विवादास्पदयोरर्थयोरेकमात्रे प्रमाणस्य सद्भावो विनिगमना तद्विरहस्थलेपि चेत्यर्थः । यत्रोभयत्रैव प्रमाणाविरहस्तत्रोभयमेव न सिद्ध्यति यथा चक्रविशिष्टदण्डत्वेनेव दण्डविशिष्टचक्रत्वेनापि न घटं प्रति जनकत्वं लाघवसहकृतप्रत्यक्षादिप्रमाणेन दण्डत्वचक्रत्वाभ्यामेव तदवधारणात् यत्र चोभयत्रैव प्रमाणस्यावतारस्तत्र द्वयमेव सिद्ध्यतीति प्रकृते सामान्यावच्छिन्नप्रतियोगिताकत्वस्य पर्य्याप्त्याख्यसम्बन्ध इव तस्याश्रयेप्यतिरिक्ते रूपं नास्तीति प्रत्यक्षप्रमाणस्य तौल्यादवश्यमतिरिक्तः सामान्याभावो वाच्य इति भावः । ननु उभयत्र प्रमाणसद्भावेपि धर्मकल्पनातो धर्मिकल्पनाया गुरुत्वमिति न्यायलब्धमेव गौरवं सामान्याभावे धर्मिणि बाधकं भविष्यतीत्यत आह धर्मेति । कल्पनीयेति । तथा चानेकस्याऽकल्प्यतया सामान्याभावधर्म्मिणः कल्पने बाधकाभाव इति भावः । सामान्याभावधर्म्मिणः कल्पने तत्प्रयुक्तमनेकं कल्प्यमेवेत्याशयेनाशङ्क्य निराचष्टे न चेति । वाच्यमिति परेणान्वयः । वाय्वादीति । रूपाद्यभावाभिप्रायेण । एवं सतीति । धर्म्मिकल्पनोत्तरकल्पनागौरवस्यापि

धर्म्मिकल्पनाविरोधित्व इत्यर्थः। अभावमात्रेति। तत्तद्रूपादिप्रतियोगिकत्वेनातिरिक्ताभावस्यानन्तभूतलाद्यधिकरणे तत्सम्बन्धस्य च कल्पनामपेक्ष्य कल्पनानन्तभूतलाद्यधिकरणवृत्तिकेषु तत्तद्भूतलत्वादिधर्मेषु तत्तद्रूपत्वाद्यवच्छिन्नप्रतियोगिताकत्वकल्पनायामेव लाघवस्य सुवचत्वात् तत्तद्रूपादिविशेषाभावोप्यतिरिक्तो न सिद्ध्येत्, तद्रूपं नास्तीत्यनुगतप्रतीत्याऽतिरिक्तविशेषाभावसिद्धौ सत्यां तत्रानेकाधिकरणसम्बन्धकल्पनागौरवस्य फलमुखत्वाददोषत्वे तु प्रकृतेपि सामान्याभावे तत् सुवचमिति भावः। अत्र प्रतिबन्दिरनुत्तरमित्यस्वरसः केचिदाडरित्याभ्यां सूचितः॥

इति श्रीजगदीशभट्टाचार्यविरचितं सामान्याभावप्रकरणं सम्पूर्णम्।

चिन्तामणेर्विशेषव्याप्तिः ।

यद्वा प्रतियोगिव्यधिकरणस्वसमानाधिकरणात्यन्ताभावाप्रतियोगिना सामानाधिकरण्यम् ।

दीधित्या विशेषव्याप्तिः ।

यद्वेत्यादि । अथात्र नानाव्यक्तिरूपादिसाध्यकैकव्यक्तिपृथिवीत्वादावव्याप्तिः । न च तत्र रूपवत्त्वादिकमेव साध्यं तच्च परम्परासम्बन्धेन रूपत्वादिकमेव तेन च सम्बन्धेन न तदभावः पृ-

जागदीश्या विशेषव्याप्तिः ।

द्रव्यं पृथिवीत्वादित्यादावव्याप्त्यभावादाह नानाव्यक्तीति । ज्ञानत्वेन शब्दत्वेन वा नानाव्यक्तेः साध्यतायामव्याप्त्यभावाद्रूपादीत्युक्तम् । रूपवान् रसादित्यादौ यद्रूपव्यक्तेः प्रतियोगिव्यधिकरणयद्रसवन्निष्ठाभावाप्रतियोगित्वं तद्रूपसामानाधिकरण्यस्य तद्रसव्यक्तौ व्याप्तित्वसम्भवादाह एकव्यक्तीति । रूपवान् तद्रसादित्यादावेकव्यक्तिहेतावव्याप्तिविरहात् पृथिवीत्वादावित्युक्तम् । अव्याप्तिरिति । रूपमात्रस्यैव चालनीन्यायेन तत्तत्पृथिवीनिष्ठप्रतियोगिव्यधिकरणाभावप्रतियोगित्वादिति भावः । न चेति । वाच्यमित्यन्वयि । रूपवत्त्वं रूपाधिकरणत्वं तदप्यधिकरणभेदाद्भिन्नमेवेत्युक्तदोषतादवस्थ्यादाह तच्चेति । रूपत्वपृथिवीत्वयोः साक्षात्सामानाधिकरण्याभावात् कथं तयोर्व्याप्तिरत आह परम्परेति । स्वाश्रयाधिकरणत्वरूपपरम्परासम्बन्धेनेत्यर्थः । ननु पृथिवीत्ववति समवायेन रूपत्वस्याभाव-

थिव्यादाविति वाच्यम्। रूपादेरसाध्यतापत्तेः। द्रव्यान्यत्वादिविशिष्टसत्त्वाद्यभावस्य द्रव्यादिवृत्तित्वाद् सत्त्वादिसाध्यकद्रव्यत्वादावव्याप्तेश्च। अन्यथा विशिष्टतया सत्तादेः साध्यत्वे व्यभिचारिणि जातिमत्त्वादावतिप्रसङ्गाद्। व्युत्पादयिष्यते च विशिष्टाभावस्य विशेष्यप्रतियोगिकत्वम्। द्वित्वाद्यवच्छिन्नसाध्याभावस्य तत्र

सत्त्वात् कथं तन्निष्ठाभावाप्रतियोगित्वमत आह तेन चेति। परम्परासम्बन्धेन चेत्यर्थः। तदभावः। रूपत्वादेरभावः। प्रतियोगितावच्छेदकसम्बन्धेन प्रतियोगिताश्रयानधिकरणीभूतहेतुमन्निष्ठाभावस्य साध्यतावच्छेदकसम्बन्धावच्छिन्नाया एव प्रतियोगिताया लक्षणघटकत्वादितिभावः। असाध्यत्वम्। अनुमित्यविधेयत्वम्। ननूक्तव्याप्तिज्ञानाद्रूपत्वादिसाध्यकैवानुमितिः व्याप्त्यन्तरज्ञानादेव रूपादिसाध्यकानुमितेः सम्भवात्, स्ववृत्तिरूपत्वावच्छिन्नवत्त्वसम्बन्धेन रूपादेः साध्यतायामुक्तव्याप्तिज्ञानादपि रूपादिसाध्यकानुमित्युत्पादे बाधकाभावाच्चेत्यत आह द्रव्यान्यत्वादीति। अव्याप्तिरिति। व्याप्यवृत्तिसाध्यकस्थले प्रतियोगिवैयधिकरण्यस्यानुपादेयत्वात् तत्रत्यलक्षणस्याव्याप्तिरित्यर्थः। ननु तत्र हेतुमन्निष्ठाभावस्य प्रतियोगित्वं वैशिष्ट्यानवच्छिन्नं वाच्यमतो नाव्याप्तिरित्यत आह अन्यथेति। ननु विशेष्यवति विशिष्टाभावो विशेषणाभाव एवेति द्रव्यनिष्ठस्य द्रव्यान्यत्वविशिष्टसत्त्वाभावस्य प्रतियोगित्वं द्रव्यान्यत्वादौ विशेषण एव न तु विशेष्ये सत्तायामतो नाव्याप्तिरत आह व्युत्पादयिष्यत इति। विशिष्टाभावस्तावदतिरिच्यतां मा वा द्रव्ये तदन्यत्वविशिष्टसत्ता नास्तीतिप्रतीतिबलात् द्रव्यनिष्ठाभावस्य वैशिष्ट्यावच्छिन्नप्रतियोगित्वं पुनः सत्तायामावश्यकम्, अन्यथा विशिष्टसत्तावान् जातेरित्यादावतिव्याप्त्यापत्तेरितिभावः। केचित्तु ननु विशेषणविशेष्ययोः सम्बन्धाभावपर्य्यवसन्नस्य विशिष्टाभावस्य प्रतियोगित्वं तदुभयोः सम्बन्ध एव न तु विशेष्य इति नाव्याप्त्यवकाश इत्यत आह अन्यथेति। विशेष्यस्य विशिष्टाभावाप्रतियोगित्वे इत्यर्थः। ननु लक्षणातिप्रसङ्गवारणान्यथानुपपत्तिर्न

सत्वाच्च । अथाऽप्रतियोगित्वं प्रतियोगित्वाभावः स च येन रूपेण तद्रूपावच्छिन्नव्याप्यत्वं हेतौ, अस्ति चायं रूपादौ रूपत्वादिना न पृथिव्यादिनिष्ठाभावप्रतियोगित्वमिति प्रत्ययादिति चेन्न । तादृशप्रतीत्यादितो रूपत्वादौ प्रतियोगितायां अवच्छेदकत्वाभावो गृह्यते न तु तदभावावच्छेदकत्वम्, सर्वत्रैव रूपे पृथिवीनिष्ठाभावम-

---

वस्तुसाधिकेत्यत आह व्युत्पादयिष्यते चेतीत्याहुः । ननु साध्यतावच्छेदकबहिर्भावेन यद्वैशिष्ट्यावच्छिन्नं प्रतियोगित्वं तदन्यत्वेन हेतुमन्निष्ठाभावप्रतियोगित्वं विशेषणीयमतो नोक्ताव्याप्त्यतिव्याप्तीत्यत आह द्वित्वादीति । तथा च सत्तागुणत्वोभयाभावस्य द्रव्ये सत्त्वात्तमादाय सत्तावान् द्रव्यत्वादित्यत्राव्याप्तिः । यद्यपि साध्यतावच्छेदकभिन्नो यः साध्यनिष्ठो धर्मस्तदनवच्छिन्नैव हेतुमन्निष्ठाभावस्य प्रतियोगिता निवेशनीयेत्युक्ताव्याप्त्यादिव्युदासः, तथाऽपि प्रमेयवान् वाच्यत्वादित्यादावव्याप्त्यापत्तेः, घटत्वाद्यवच्छिन्नाभावस्य तादृशधर्मावच्छिन्नत्वात् प्रमेयत्वावच्छिन्नाभावस्य चाप्रसिद्धत्वादिति भावः । सार्वभौममतमुत्थापयति अथेति । अप्रतियोगित्वम् । मूलोक्ताप्रतियोगित्वान्तस्यार्थः । प्रतियोगित्वाभावः । हेतुमन्निष्ठाभावप्रतियोगित्वाभावः न तु तादृशप्रतियोग्यन्यत्वं भेदमात्रस्यैव व्याप्यवृत्तित्वेन तदवच्छेदकस्योक्तासम्भवात् । नन्वेवं तद्रूपवान् पृथिवीत्वादित्यादावतिव्याप्तिः तद्रूपेऽपि रूपत्वाद्यवच्छेदेन तादृशप्रतियोगित्वाभावसत्त्वादतो धर्मविशेषमन्तर्भावयति स चेति । तथा च हेतुमन्निष्ठाभावप्रतियोगित्वाभावावच्छेदको यो धर्मस्तदवच्छिन्नसामानाधिकरण्यमेव तद्धर्मावच्छिन्नस्य व्याप्तिरिति भावः । रूपवान् पृथिवीत्वादित्यादावव्याप्तिमुद्धरति अस्ति चेति । अयम् । रूपत्वाद्यवच्छेद्यः पृथिवीत्वादिमन्निष्ठाभावप्रतियोगित्वाभावः । रूपादावस्तीत्यर्थः । प्रमाणमाह रूपत्वादिनेति । प्रतियोगितायां इति । पृथिवीनिष्ठाभावप्रतियोगितायां इत्यर्थः । अवच्छेदकत्वाभाव इति । प्रात्यक्षिकप्रतीत्यभिप्रायेण । तथाविधशब्दस्य तु तादृशप्रतियोगित्वं न रूपत्वावच्छेद्यमित्यर्थो ग्राह्यः । तदभावेति । तादृशप्रतियोगित्वाभावेत्यर्थः । तथा चोक्तलक्ष-

तियोगित्वं न तु कुत्रापि रूपे तदभाव इत्यबाधितप्रत्ययात्। अन्यथा यो यो धर्मो यस्य यस्य नावच्छेदकः तत्तदवच्छेदेन तत्तदभावोऽप्युक्तरीत्या सिध्येत्। प्रमेयधूमत्वेन न वह्निमन्निष्ठाभावप्रतियोगित्वमितिप्रत्ययात्तदवच्छेदेन तादृशप्रतियोगित्वाभावस्यापि सुवचत्वात्। अथ प्रमेयधूमत्वं न गौरवेण सामानाधिकरण्यप्रतियोगितावच्छेदकम्, विवक्षितञ्चात्र तथेति चेत्। असमानाधिकरणधूमकव्यक्तिवृत्तितया वह्नित्वमपि न तदवच्छेदकं कम्बुग्रीवादिमत्त्वादिना च घटादेरसाध्यतापत्तिरिति बहुव्या-

---

णाप्रसिद्धिरिति भावः। रूपत्वाद्यवच्छेदेन तादृशप्रतियोगित्वाभावे बाधकमाह सर्वत्रेति। ननु तादृशप्रतियोगित्वमिव तदभावोऽप्यव्याप्यवृत्तिरिति तत्तद्रूपत्वाद्यवच्छेदेन तादृशप्रतियोगित्वाभावस्याप्यभावसत्त्वादबाधितापि तादृशप्रतीतिर्न बाधिकेत्यत आह अन्यथेति। घटजनकत्वं दण्डत्वेन न तु द्रव्यत्वादिना घटाभावप्रतियोगित्वं घटत्वेन न तु पटत्वादिनेत्यादिप्रतित्या द्रव्यत्वाद्यवच्छेदेन दण्डादौ घटजनकत्वाद्यभावः पटत्वाद्यवच्छेदेन घटाभावप्रतियोगित्वाभावश्च घटादौ सिध्येदिति भावः। तथा च दण्डो न घटजनक इत्यादिप्रतीत्यापत्तिः। प्रतिबन्देरनुत्तरत्वादाह प्रमेयेति। सुवचत्वाच्चेति। तथा च प्रमेयधूमवान् वह्नेरित्यादावतिव्याप्तिरिति भावः। अथेति। तथा च साधननिष्ठसाध्यसामानाधिकरण्यनिरूपकतावच्छेदकयद्धर्मावच्छेदेन हेतुमन्निष्ठाभावप्रतियोगित्वाभावस्तद्धर्मावलीढसामानाधिकरण्यं व्याप्तिरित्यर्थः। अत्र साधननिष्ठसामानाधिकरण्यनिरूपकतायाः अवच्छेदकत्वमनतिरिक्तवृत्तित्वविशिष्टस्वरूपसम्बन्धः स्वरूपसम्बन्धमात्रं वा, प्रथमे असमानेति। असमानाधिकरणो धूमो यस्य तत्तायःपिण्डस्थवह्नेस्तदवृत्तितयेत्यर्थः। न तदवच्छेदकम्। न धूमनिष्ठसामानाधिकरण्यनिरूपकतानतिरिक्तवृत्ति। तथा च वह्निमान् धूमादित्यादावव्याप्तिरिति भावः। द्वितीये त्वाह कम्बुग्रीवेत्यादि। असाध्यत्वम्। अव्यापकत्वम्। घटत्वाद्यपेक्षया गुरुतरकम्बुग्रीवादिमत्त्वा-

कोपश्च । अत एव प्रमेयधूमत्वं गौरवेण प्रतियोगितायां इव तच्छून्यतायां अपि नावच्छेदकमित्युक्तावपि न निस्तारः । अत्र वदन्ति। अप्रतियोगित्वं प्रतियोगितानवच्छेदकधर्मवत्त्वम् । न चैवं पूर्वस्मादभेदः, तत्र साध्यजातीयसमानाधिकरणसाधनजातीयत्वस्य अत्र च साध्यसाधनयोः सामानाधिकरण्यस्य व्याप्तित्वे तात्पर्यात।

यवच्छिन्नाधिकरणत्वाप्रसिद्ध्या तस्य सामानाधिकरण्यनिरूपकतानवच्छेदकत्वादिति भावः।अत एव। लघुसमनियतगुरुरूपेण साध्यतायामव्याप्तेरेव। न निस्तार इति । प्रमेयधूमसाध्यके व्यभिचारिण्यतिव्याप्तिनिरासेऽपि तत्साध्यकसङ्केतावव्याप्तितादवस्थ्यादिति भावः। न च पूर्वलक्षण इवाऽत्रापि साधनवन्निष्ठाभावप्रतियोगितावच्छेदकं यद्धर्मविशिष्टसम्बन्धिनिष्ठाभावप्रतियोगित्वाभावावच्छेदकं तद्भिन्नधर्मवता सामानाधिकरण्यं व्याप्तिरित्युक्तौ निस्तार इति वाच्यम्। तादृशप्रतियोगित्वाभावो ह्यत्र विशिष्य तत्तत्प्रतियोगित्वाभावकूटत्वेन निवेश्यः अन्यथा गुरोरवच्छेदकत्वं विना दुर्वचत्वापत्तेः । तथा च वह्निमान् धूमादित्यत्रैवाव्याप्तिः धूमवन्निष्ठाभावप्रतियोगितावच्छेदकीभूतस्य घटत्वादेः स्वविशिष्टसम्बन्धिनिष्ठपटाद्यभावीयप्रतियोगित्वाभावानवच्छेदकत्वेन पारिभाषिकावच्छेदकाप्रसिद्धेः । घटादौ पटाद्यभावप्रतियोगित्वाभावस्य व्याप्यवृत्तित्वेनाऽवच्छेदकानपेक्षणात् । न च तादृशयत्किञ्चित्प्रतियोगित्वाभावस्यैवावच्छेदकत्वं निवेश्यं तथा च घटत्वादेः स्वावशिष्टसम्बन्धिनिष्ठस्य तत्तद्घटाद्यभावस्य प्रतियोगित्वाभावावच्छेदकतयैव पारिभाषिकावच्छेदकत्वमिति वाच्यम् । तथा सति धूमवन्निष्ठाभावप्रतियोगितावच्छेदकस्य घटत्वादेर्वह्नित्वादिविशिष्टसम्बन्धिनिष्ठतत्तद्घटाभावप्रतियोगित्वाभावावच्छेदकत्वात् वह्निमान् धूमादित्यादौ वह्नित्वादेरपि पारिभाषिकावच्छेदकत्वापत्तेरिति भावः। [वस्तुतस्तु प्रकृतसाध्यवत्तानिरूपितविशेषणताविशेषसम्बन्धेन यदभावप्रतियोग्यधिकरणतासामान्याभाववत्त्वं हेतुमतस्तदभावाप्रतियोगिवृत्तिसाध्यतावच्छेदकावच्छिन्नसामानाधिकरण्यं व्याप्तिरित्यत्र मूलतात्पर्यमतो रूपवा-

यत्समानाधिकरणान्योन्याभावप्रतियोगि यद्वन्न भवति तेन समं तस्य सामानाधिकरण्यं वा, स्वसमानाधिकरणान्योन्याभावाप्रतियोगियद्वृत्कत्वं वा ।

घटकयोस्तादृशप्रतियोगितावच्छेदकतत्त्वान्योन्याभावात्यन्ताभावयोर्भेदेन भेद इत्यपि कश्चित् ।

अत्यन्ताभावगर्भवत्सामान्यविशेषभेदेनाऽन्योन्याभावगर्भमपि व्याप्तिद्वयमाह यत्समानाधिकरणेत्यादिलक्षणद्वयेन । प्रथमे एकस्य साध्याधिकरणांशस्याऽऽधिक्यात् द्वितीयलक्षणम्।अत्र यद्यपि नानाव्यक्तिसाध्यकस्थले तत्तत्साध्यवत्तत्तत्साध्यवत्त्वस्य च सा-

---

न् पृथिवीत्वादित्यादौ नाव्याप्तिः न वा सत्तावाज्ञातेरित्यादौ विशिष्टसत्ताभावमादायाव्याप्तिः सत्ताधिकरणतानिरूपितविशेषणताविशेषसम्बन्धेन विशिष्टसत्ताभावप्रतियोगिमत्त्वस्य गुणादौ सत्त्वात् । विशिष्टसत्तावाज्ञातेरित्यादौ विशिष्टसत्ताभावप्रतियोगिमत्त्वस्य विशिष्टसत्तारूपसाध्यतावच्छेदकावच्छिन्नाधिकरणत्वीयविशेषणतासंबन्धेन गुणादावसत्त्वात् विशिष्टसत्ताभावो लक्षणघटक इति नातिव्याप्तिः ।] तादृशेति । हेतुसमानाधिकरणाभावीयेत्यर्थः ।

पौनरुक्त्यमपाकर्तुमाह अत्यन्ताभावगर्भेति । सामान्यविशेषेति । स्वव्यापकसाध्यसमानाधिकरणसाधनजातीयत्वसामान्यं तत्तत्साधननिष्ठतादृशसाध्यसामानाधिकरण्यं विशेषः । लाघवमभिप्रेत्य द्वितीयमवतारयति प्रथम इति । तथा च साधनवन्निष्ठान्योन्याभावाप्रतियोगिस्वाश्रयकसाध्यसामानाधिकरण्यरूपस्य प्रथमलक्षणार्थस्य साध्याधिकरणताद्वयानवेशेन गुरुतया तदपेक्ष्य लाघवादेव साधनवन्निष्ठान्योन्याभावाप्रतियोगिसाध्यवदवृत्तित्वपर्य्यवसितद्वितीयलक्षणमुक्तमित्यर्थः।तद्रूपवान् तद्रूपादित्याद्येकव्यक्तिसाध्यकस्थलेऽन्योन्याभावस्य प्रतियोग्यवृत्तित्वविवक्षयाप्य-

अन्यवृत्तिवह्नितद्वतोरन्यवृत्तिधूमवन्निष्ठात्यन्ताभावान्योन्याभावप्रतियोगित्वात् व्याधिकरणवह्निधूमयोर्न व्याप्तिः,

---

धनसमानाधिकरणान्योन्याभावप्रतियोगित्वात्तदवच्छेदकत्वाच्चाव्याप्तिः, तथापि यद्रूपावच्छिन्नवत्त्वं तादृशान्योन्याभावप्रतियोगितानवच्छेदकं तद्रूपावच्छिन्नसामानाधिकरण्यमित्यत्र तात्पर्यम् । वह्न्यादौ तत्संयोगादौ तद्वदादौ वा साध्ये सर्वत्र साक्षात्परम्परया वा अनुगमकं वह्नित्वादिकमेव साध्यतावच्छेदकं तदवच्छिन्नवत्त्वस्य

व्याप्तिवारणसम्भवादाह नानाव्यक्तीति । नानैव व्यक्तिराश्रयो यस्य तादृशसाध्यक इत्यर्थः । तथा च तत्तद्द्रव्यभेदमादाय वह्निमान् धूमात् द्रव्यं पृथिवीत्वादित्यादावव्याप्तिरिति भावः । ननु हेतुसमानाधिकरणान्योन्याभावप्रतियोगितानवच्छेदकसाध्यवत्त्वविवक्षणान्नैष दोष इत्यत आह तत्तत्साध्यवत्त्वस्य चेति । तदवच्छेदकत्वादित्यन्वयः । तथा च वह्निमान् धूमात् रूपत्वाव्यापकजातिमान् रूपत्वादित्यादौ तत्तद्वह्निमत्त्वाद्यवच्छिन्नभेदं नीलपीतत्वाद्यवच्छिन्नभेदं चादायाव्याप्तिरिति भावः । यद्रूपेति । अधिकरणभेदेऽप्येकधर्मावच्छिन्नाधिकरणत्वस्यैकयमतेनेदम् । अन्यथा वह्नित्वावच्छिन्नवत्त्वस्यापि पर्वतादौ नानात्वेन तदोषतादवस्थ्यापत्तेः। हेतुमन्निष्ठान्योन्याभावप्रतियोगितावच्छेदकत्वसामान्यं यद्रूपानवच्छिन्नं तद्रूपावच्छिन्नसामानाधिकरण्ये वा तात्पर्य्यम् । ननु यद्रूपावच्छिन्नवत्त्वमित्यत्र यत्पदस्य सखण्डधर्मपरत्वे वह्निमान् धूमादित्यादावव्याप्तिः वह्नित्वादेरखण्डत्वात्, अखण्डधर्मपरत्वे च वह्निसंयोगवान् धूमादित्यादौ तथेत्यत आह वह्न्यादाविति । तद्वदादौ । वह्निसंयोगवदादौ । वह्नित्वादिकमेवेति । तथा च सर्वत्रैव यत्पदेनाऽखण्डधर्म्मो धर्तव्य इति भावः । तादृशेति । हेतुसमानाधिकरणेत्यर्थः । नन्वेवं वह्निसंयोगीत्याद्यनुमितिर्न स्यात् तादृशसंयोगत्वस्य व्यापकतानवच्छेदकत्वे-

किन्तु तत्तद्धूमस्य समानाधिकरणतत्तद्वह्निना। न चैवं धूममात्रे न व्याप्तिरिति वाच्यम्। सर्वधूमव्यक्तेस्तथात्वेन धूममात्रस्य व्याप्यत्वात् धूमसम्बन्धिवह्निस्तद्व्याप्य एव युगपदुत्पन्नविनष्टयोश्च व्याप्तिरेव कर्माणि च संयोगाभावः प्रतियोग्यसमानाधिकरणः। यद्वा प्रतियोगिवैयधिकरण्यावच्छेदकावच्छिन्नत्वमत्यन्ताभावविशेषणम्, कर्मणि च संयोगाभावस्य प्रतियोगिवैयधिकरण्यावच्छेदकावच्छिन्नत्वमेव। न चान्योऽन्याभावस्याव्याप्यवृत्तित्वम्, अभेदस्याऽबाधितप्रत्यभिज्ञानात्।

च न तादृशान्योन्याभावप्रतियोगितावच्छेदकत्वमिति। यत् यद्रूपावच्छिन्नं यादृशरूपावच्छिन्नमनवच्छेदकमिति वा यथायथं वक्तव्यं शब्दैक्यस्यानुपादेयत्वात्। अन्येत्यादि। यद्यप्युक्तरीत्या सर्वत्र तादृशप्रतियोगितानवच्छेदकत्वपर्य्यन्तानुधावनस्यावश्यकत्वेनाऽकिञ्चित्करमेव तादृशाभावप्रतियोगित्वम्, तथापि विशिष्टसामानाधिकरण्यरूपाया व्याप्तेर्व्यधिकरणासम्भवित्वमात्रे तात्पर्य्यम्। व्या-

---

नानुमितेस्तदवच्छिन्नविधेयताकत्वासम्भवादतः साध्यसाधनभेदेन व्याप्तेर्नानात्वादननुगतैव सा वाच्येत्याह यदित्यादिना। द्रव्यं पृथिवीत्वादित्यादौ यत्साध्यं तादृशान्योन्याभावप्रतियोगितानवच्छेदकमित्येव वक्तव्यम्, अत एवेदं द्रव्यमित्यनुमितौ निरवच्छिन्नद्रव्यत्वनिष्ठविधेयताकत्वमपि सर्वसिद्धं सुसङ्गच्छते निरुक्तव्याप्तेस्तादृशानुमितावेव प्रयोजकत्वादिति भावः। वह्निमान् धूमादित्यादिकमभिप्रेत्याह यद्रूपावच्छिन्नमिति। अधिकरणत्वमिति शेषः।तेन न

प्तिरेवेयस्य कालिकीत्यादिः । अन्योन्याभावगर्भलक्षणस्याव्याप्यवृत्तिसाध्यकसद्धेतावव्याप्तिं निरस्यति न चेति । अभेदस्येति । तथा च मूले महीरुहो विहङ्गमसंयोगी नेति प्रतीतेरनुभूयमानविशिष्टभेदोल्लेखिन्या अपि शिखी विनष्ट इति प्रतीतिवद्विशेषणाभाववि-षयतामात्रं कल्प्यते बाधकबलात् अत्र च विशिष्टभेदे न बाधकं तत्र तथाप्रतीति बलात्तत्सिद्धिरप्रत्यूहैवेति नातिप्रसङ्गः ।

अत्र वदन्ति । अभेदस्य भेदाभावस्य ज्ञानं न बाधकं भेदवत्तत् प्रतियोगितावच्छेदकस्य संयोगात्मनस्तदभावस्याव्याप्यवृत्ति-

---

प्रागुक्तदोषः । एवमग्रेऽपि । वह्निसंयोगवानित्यादिकमभिप्रेत्याह यादृशेति । उक्तरीत्येति । रूपादिसाध्यकपृथिवीत्वादावव्याप्तिमित्यर्थः । अकिञ्चित्करम् । व्यधिकरणयोर्व्याप्त्यभावाप्रयोजकम् । तात्पर्यमिति । तथा चाऽसामानाधिकरण्योत्थापकत्वेनैव तादृशप्रतियोगित्वोपन्यास इति भावः । व्यधिकरणयोर्दैशिकव्याप्त्यसम्भवात्तादृशव्याप्तौ युगपदुत्पादविनाशयोरकिञ्चित्करत्वाहाह व्याप्तिरेवेत्यस्येति । अर्थान्तरत्वमपाकर्तुमवतारयति अन्योन्येत्यादि । लक्षणस्येत्यत्रैकत्वमविवक्षितम् । ननु भेदस्यापि प्रत्यभिज्ञानात्तत्र का गतिरित्यत आह तथा चेति । अभेदस्याऽबाधितत्वे चेत्यर्थः । अनुभूयमानेति । अनुव्यवसीयमानसंयोगिभेदविषयताकाया इत्यर्थः । शिखीत्यादि । तथा च यथा शिखिनो धर्मिणः सत्त्वेऽपि शिखी विनष्ट इतिप्रतीत्या विशेषणीभूतशिखाया एव ध्वंसरूपोऽभावो गृह्यते तथा संयोग्यभेदेऽपि न संयोगीत्यादिप्रतीत्या विशेषणस्य संयोगस्यैवाभावो गृह्यत इति भावः । नन्वेवं गुणो न संयोगीति प्रतीतेरपि संयोगाभाव एव विषयोऽस्तु न तु संयोगिभेदः तथा च संयोगी सत्त्वादित्यादौ निरुक्तलक्षणाऽतिव्याप्तिरत आह अत्र चेति । तत्सिद्धिः । संयोगिनो भेदसिद्धिः ।

भेदवत् संयोगिभेदवत् । तदभावस्य । संयोगिभेदाभावस्य । तदुपपत्तेरिति । एकत्र धर्मिणि सं-

त्वेन तदुपपत्तेः। यथा हि प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिज्ञाने तदत्यन्ताभावस्याऽग्रहादभावव्यवहाराच्च स एव तदभाव इति कल्प्यते तथा प्रतियोगितावच्छेदकधर्मग्रहे तद्भेदन्योन्याभावस्याऽग्रहादभावव्यवहाराच्च स एव तस्याभाव इति निश्चीयते। आधिक्येऽपि चाव्याप्यवृत्तित्वात्। अत एव न मूलावच्छेदेन कपिसंयो-

---

योगिभेदतदभावयोर्निश्चयोपपत्तेरित्यर्थः। वस्तुतः प्रत्यक्षमणौ संयोगिभेदस्यापि अव्याप्यवृत्तित्वोपगमात् वृक्षे संयोगित्वावच्छिन्नभेदसत्त्वेऽपि न क्षतिः अत्यन्ताभावगर्भायां प्रतियोग्यनधिकरणत्वेनेवान्योन्याभावगर्भायामपि व्याप्तौ स्वप्रतियोगित्वावच्छिन्नभिन्नत्वेन हेत्वधिकरणविशेषणादेव कपिसंयोग्येतत्त्वादित्यादावव्याप्त्यसम्भवात्। न चैवं न चान्योन्याभावस्येत्यादिमूलासङ्गतिः। कपिसंयोगित्वावच्छिन्नभेदस्यैव कपिसंयोगिभेदप्रतियोगित्वावच्छिन्नभेदस्यापि मूलावच्छेदेन वृक्षे सत्त्वमाशङ्क्यैव तदवतारात्, अभेदस्येत्यादिमूलस्यापि कपिसंयोगिभेदप्रतियोगित्वावच्छिन्नाभेदस्येत्यर्थकत्वादित्यस्मद्गुरुचरणाः। ननु भेदस्यात्यन्ताभावो न प्रतियोगितावच्छेदकीभूतसंयोगादिरूपः येनाव्याप्यवृत्तेस्तस्य भेदेन समं विरोधो न स्यात् किन्त्वतिरिक्त एवेति तद्विरोधो दुर्वार इत्यत आह यथा हीति। ननु यद्वृत्त्वज्ञाने यदत्यन्ताभावाग्रहस्तस्यैव तदत्यन्ताभावविरहत्वे प्रतियोगिव्याप्यवत्त्वस्यापि तथात्वापत्तिरत आह अभावेति। तदत्यन्ताभावस्याभावव्यवहाराच्चेत्यर्थः। स एव। प्रतियोगितावच्छेदकावच्छिन्न एव। ननु बहूनां संयोगव्यक्तीनां संयोगिभेदाभावत्वकल्पने गौरवादभावत्वप्रतीतेः प्रमात्वानुरोधाच्चातिरिक्त एव संयोगिभेदाभावः कल्पनार्ह इत्यत आह आधिक्येपीति। अव्याप्यवृत्तित्वादिति। तथा चैकत्र भेदतदभावयोः सम्भवान्न मिथो विरोधित्वमिति भावः। अत एव। भेदस्याप्यवृत्तित्वादेव। न तथा न भेदबाधकम्। असम्भवादिति। कपिसंयोगाद्यात्मकस्यातिरिक्तस्य वा संयोगिभेदाभावस्य मूलाद्यवच्छेद्यत्वासम्भवादित्यर्थः। तथा चोक्तप्रतीतेर्वि-

गिभेदाभावज्ञानं तथा, असम्भवादसिद्धेश्च। नापि कपिसंयोगिभेदस्य वृक्षावृत्तित्वज्ञानम्, असिद्धेः तद्वृत्तित्वस्यैव ग्रहात्। नापि कपिसंयोगिभिन्नभेदज्ञानम्, कपिसंयोगिभेदवत्तद्भेदस्याप्यव्याप्यवृत्तित्वेनाविरोधात्। नापि मूलावच्छेदेन तज्ज्ञानम्, असिद्धेः तद्धर्मवद्भिन्नभेदस्य तद्धर्ममात्रपर्य्यवसिततया कपिसंयोगिभिन्नभेदात्मनः कपिसंयोगस्य मूलवृत्तित्वे विरोधाच्च। न हि घटभिन्नभेदो घटत्वादतिरिच्यते, आवश्यककल्पितघटत्वेनैवोपपत्तौ अतिरिक्तकल्पनायां मानाभावात्। अन्यथा सर्वत्राऽभावस्याभावोऽतिरिक्त एव कल्प्येत। अत एवात्यन्ताभावप्रतियोगिनोरन्योन्याभावप्रतियोगितावच्छेदकयोः सामान्यत एव क्लृप्तो विरोधः, तत्र कपिसंयोगवत्त्वमपि वृक्षे मूले न

षयबाधः। स्वरूपबाधमप्याह असिद्धेश्चेति। मूलावच्छेदेन भेदस्यैव प्रत्ययान्मूले वृक्षः कपिसंयोग्यभिन्न इति ज्ञानस्यैवासिद्धेरित्यर्थः। ज्ञानमितीथथेति पूर्वेणान्वयः।एवमग्रेऽपि। तद्वृत्तित्वस्यैव वृक्षवृत्तित्वस्यैव। तज्ज्ञानम्। कपिसंयोगिभिन्नभेदज्ञानम्। असिद्धेरिति। मूलावच्छेदेन भेदस्यैव प्रत्ययात्तादृशभिन्नभेदज्ञानस्यैवासिद्धेरित्यर्थः।तथा च स्वरूपबाधः। विषयबाधमप्याह तद्धर्मवदित्याहि। ननु प्रतियोगितावच्छेदकधर्म्मस्य तद्वद्भिन्नभेदत्वं न दृष्टचरमत आह न हीति। न च घटत्वस्यैकत्वेन घटभिन्नभेदत्वोपगमेऽपि संयोगव्यक्तीनामनेकत्वात्तेषु संयोगिभिन्नभेदत्वापेक्षया लाघवादतिरिक्त एव संयोगिभिन्नभेदो युक्त इति वाच्यम्। तथात्वेऽपि तस्याऽव्याप्यवृत्तित्वात्। अन्यथा मूले वृक्षः संयोगिभिन्नो नेति प्रतीतेः प्रमात्वापत्तेरिति भावः। सर्वत्र। नानाप्रतियोगिकाभावस्थले। अत एवेति। परास्तामित्यग्रेऽन्वयः। आद्ययोः। अत्यन्ताभावप्रतियोगिनोः। सः। विरोधः। सङ्कोच्यताम्। अंशतो भ्रमविषयत्वेन कल्प्यताम्। ननु मूले वृक्षे न संयोग इति प्रतीतेः संयोगवद्भेदविषयकत्वमेव कल्प्यतामित्याद्ययोरपि सङ्कोचे मानाभाव इत्यत आह न हीति। संयोगस्येव तद्वतोऽपि क्व चिदुपस्थि-

कपिसंयोग इति प्रतीतेरन्यथानुपपत्त्या तावदाद्ययोः स सङ्कोच्यतां न ह्येषा प्रतीतिः कपिसंयोगिभेदविषयत्वेनोपपादयितुं शक्या नियमतः संयोगवत्त्वेन प्रतियोगिनोऽनुपस्थितेः प्रतियोगिकोटौ तदनुल्लेखाच्च, मूले न कपिसंयोगीति प्रतीतेस्तु शिखी विनष्ट इति वह्नासमानविशेषणस्याभावमात्रविषयत्वेनोपपन्नत्वान्नान्तिमयोरपीति परास्तम् । अन्योन्याभावान्तरस्य प्रतियोगितावच्छेदकान्तरसमानाधिकरणतया स्वस्वप्रतियोगितावच्छेदकासामानाधिकरण्यपर्य्यवसायिनो विरोधस्य स्वरूपघटितत्वेन विशेष एव विश्रामात्, अत्यन्ताभावप्रतियोगिनोरिवान्योन्याभावप्रतियोगितावच्छेदकयोरबाधितसामानाधिकरण्यानुभवेन प्रतिविरुद्धतया

तिसम्भवान्नियमत इत्युक्तम् । अनुपस्थितेरिति । तथा च कारणबाधादेव तादृशप्रतीतेर्न संयोगिभेदावगाहित्वमिति भावः । अनुभवबाधमप्याह प्रतियोगीति । अभावांशे साक्षात्परम्परया वा अप्रकारत्वेन संयोगवतोऽनुव्यवसायेनाग्रहणाच्चेत्यर्थः । भासमानं प्रागुपस्थितं यद्विशेषणं संयोगस्तदभावविषयत्वेनेत्यर्थः । अन्तिमयोः । अन्योन्याभावप्रतियोगितावच्छेदकयोः । स सङ्कोच्यतामिति पूर्वेणान्वयः । विशेष एवेति । तथा च घटभेदघटत्वादीनां विरोधस्य कल्पितत्वेऽपि संयोगतद्भेदयोस्तथात्वे मानाभावात् तदव्याप्यवृत्तित्वे बाधकाभाव इति भावः । ननु संयोगिभेदो नावच्छिन्नवृत्तिकः अन्योन्याभावत्वात् घटभेदवदित्यनुमानात् संयोगिभेदस्य व्याप्यवृत्तित्वसिद्धावर्थवशात्सम्पन्न एव संयोगेन समं तस्य विरोधः, संयोगिभेदो न संयोगवद्वृत्तिः संयोगिभेदत्वात् घटत्वाद्यभाववदिति व्यतिरेकिणा वा तस्य व्याप्यवृत्तित्वं साध्यम् इत्यत आह अत्यन्ताभावेति । अबाधितेति । विभिन्नावच्छेदेनेत्यादिः । तथा च संयोगिभेदोऽवच्छिन्नवृत्तिकस्त्वेन प्रमीयमाणत्वादित्यनुमानेन प्रतिबन्धादवच्छिन्नवृत्तिकत्वाद्यभावकल्पनमेव दुःशक्यमिति भावः । मूले वृक्षो

तथाविधविरोधकल्पनाया अनवकाशाच्च । किञ्च शिखी विनष्ट इति प्रतीतेर्विशिष्टध्वंसोल्लेखिन्या विशेष्ये तद्बाधादास्तां विशेषणध्वंसविषयता न संयोगीति प्रतीतेर्विशिष्टभेदमवगाहमानायाः कथं विशेषणसंसर्गाभावविषयत्वेनोपपत्तिः । न खलु सहस्रेणापि बाधकैरिदं रजतमिति प्रतीते रङ्गत्वावलम्बनं व्यवस्थापयितुं शक्यते। न च विशेषणभेद एव तस्या विषयः। अग्रेऽपि न कापिसंयो

न संयोगीति प्रतीतेः शिखी विनष्ट इतिवद्भासमानविशेषणाभावविषयत्वं यदुक्तं तत्र दृष्टान्तवैषम्यमाह किञ्चेति । विशेष्ये । शिखिनि । तद्बाधात् । साक्षात् ध्वंसबाधात्। विशेषणध्वंसेति । तथा च शिखी विनष्ट इत्यत्र स्ववृत्तिशिखानिष्ठप्रतियोगित्वरूपपरम्परासम्बन्धेनैव शिखिनो ध्वंसे प्रकारत्वमित्याशयः । न चैवं सत्यपि पुरुषे शिखी विनष्ट इतिवत् पुरुषो विनष्ट इत्यपि प्रतीतिः प्रमा स्यात् इति वाच्यम्। तत्तद्विशेषणध्वंसादौ तत्तद्विशेषणावच्छिन्नस्यैव निरुक्तपरम्परायाः संसर्गत्वात् । अत एवायं घटः श्यामो भविष्यतीत्यादौ श्यामरूपनिष्ठप्रतियोगितायाः प्रागभावे श्यामरूपावच्छिन्नस्य संसर्गत्वेऽपि न घटत्वविशिष्टस्य संसर्गत्वम् अतस्तत्रैव घटो भविष्यतीत्यादिको न प्रत्यय इति ध्येयम् । विशिष्टभेदमित्यस्य भेदत्वेनेति शेषः। कथमिति। तादृशप्रतीतावत्यन्ताभावत्वानुल्लेखादिति भावः । एकोल्लेखिप्रत्ययस्यान्यावगाहित्वोपगमे भ्रममात्रस्योच्छेद इत्याह न खलिवति । बाधकैः । कारणबाधादिभिः । शक्यते इति। अन्यथा शुक्तौ रजतत्वादिप्रतीत्यपलापादवाऽन्यथाख्यातिनिरसने जितं प्राभाकरैरिति भावः । तस्याः। न संयोगीतिप्रतीतेः।विषय इति। स्ववृत्तिसंयोगनिष्ठप्रतियोगित्वसम्बन्धेनैव संयोगिनो भेदप्रकारत्वादिति भावः । अग्र इति । न च संयोगभेदपर्य्यवसन्नस्योक्तपरम्परया संयोगिभेदस्य वृक्षे सत्त्वेऽपि तस्य व्याप्यवृत्तित्वेनाग्रानवच्छेद्यत्वादेव नैतादृशप्रत्यय इति वाच्यम्। तथा सत्युक्तक्रमेण संयोगभेदस्य मूलानवच्छेद्यत्वान्मूलेऽपि न संयोगीत्यपि प्रत्ययापलापापत्तेरिति भावः । शब्दवि-

गीति प्रतीत्यापत्तेः। युज्यते चान्योन्याभावोऽव्याप्यवृत्तिः, कथमन्यथा पक्वतादशायां घटादावयं न श्यामो दण्डादिविनाशसमये चैत्रादौ नायं तद्दण्डवानित्यादयो व्यवहाराः। न च तत्र विशेषणसंसर्गाभाव एव प्रतीयते, अनुयोगिनि सप्तमीं विना तदनुपपत्तेः। न खलु भूतलं न घट इत्यादीनि वाक्यानि कदाचिदपि घटसंसर्गाभावं बोधयन्ति तथात्वे वा घटो न घट इत्यादेरपि प्रसङ्गात्। अपि च विशिष्टवाचकदण्ड्यादिपदेभ्योधर्म्युपसर्जनतयोपस्थितस्य द-

---

शेषाणां प्रामाण्यानुरोधादपि भेदस्याव्याप्यवृत्तित्वं वाच्यमित्याह युज्यते चेति। पिठरपाकानुपगमे रक्तघटस्य श्यामान्यत्वं व्याप्यवृत्त्येवाऽत उक्तं दण्डादीति। श्यामपदस्य गुणेऽपि शक्तत्वात्तदलन्ताभावबोधने धर्म्युपसर्जनत्वनिबन्धननिराकाङ्क्षत्वासम्भवादाह दण्डादीति तु कश्चित्। व्यवहाराः प्रमाणमिति शेषः। तत्र। घटो न श्याम इत्यादौ। विशेषणस्य। श्यामत्वदण्डादेः। अनुयोगिनीति। तत्र नञा संसर्गाभावबोधने तदर्थबोधकपदोत्तरसप्तम्यास्तन्त्रत्वादिति भावः। तदेव द्रढयति न खल्विति। नन्वुक्तस्थले संसर्गाभावबोधने का क्षतिरत आह तथात्वे वेति। प्रसङ्गादिति। घटेऽपि घटात्यन्ताभावस्य सत्त्वादिति भावः। ननु यत्र नञ्रहितयोः प्रतियोग्यनुयोगिनोः साकाङ्क्षत्वं तत्रैव नञा अभावो बोध्यते प्रकृते च घटो घट इत्यस्य निराकाङ्क्षतया नञा घटे घटस्य भेद इव संसर्गाभावोऽपि न बोध्यते कम्बुग्रीवादिमान्न घट इत्यादिकं तु भूतलं न घट इत्यादिभिः समानमित्यत आह अपि चेति। यद्वा ननु नञा प्रत्ययार्थविशेषणत्वानापन्नस्यैवात्यन्ताभावबोधनेऽनुयोगिवाचकपदोत्तरं सप्तम्यपेक्षा वक्तव्या न तु तद्विशेषणतापन्नस्येति यदि ब्रूयात्तदाप्याह अपि चेति। एतेन घटो घटान्यो नेत्यादौ नञ्रहितयोः प्रतियोग्यनुयोगिनोर्निराकाङ्क्षत्वेऽपि नञाऽभावबोधनात्तत्रैव घटो न घट इत्यत्रापि अभावबोधने बाधकाभाव इत्यपास्तम्। विशिष्टवाचकेति। विशिष्टबोधकेत्यर्थः। दण्डीत्यादेर्वाक्यत्वेन वाचकत्वासम्भवात्। यद्वा वैया-

ण्डादेः कथं प्रतियोगित्वेनाभावेऽन्वयः इतरविशेषणत्वेनोपस्थितस्य निराकाङ्क्षतयान्यत्र विशेषणत्वेनान्वयायोगात्। न चात्र विशिष्टोपस्थापकं पदं विशेषणमात्रपरम्, तथापि चैत्रो न दण्डी घटो न श्यामं रूपमित्यादावपि दण्डादिसंसर्गाभावप्रतीतापत्तेर्दुर्वारत्वात्। एतेन नञोऽभाववल्लाक्षणिकतया विनैव सप्तमीमन्वयबोधसमर्थनं प्रत्युक्तम्। एवञ्च चैत्रो न पचतीत्यादौ आख्याताच्छ-

---

करणमतेनेदम्। धर्मीति। मतुबर्थसम्बन्धिनि विशेषणतयोपस्थितस्येत्यर्थः। उपस्थितस्येत्यस्य वृत्तिशब्दादित्यादिः।तेन नीलो घटः,पटश्चेत्यादौ घटविशेषणतयोपस्थितस्यापि नीलादेः पटेऽन्वयः नीलघटः पटश्चेत्यादौ तु वृत्तिशब्दादेव नीलस्य तथोपस्थितिरतः पटे तस्य नान्वयः। विशेषणमात्रेति।तथा च चैत्रो न दण्डीत्यत्र मतुपः पदसाधुतामात्रं फलं न तु शाब्दे तदर्थप्रवेश इति भावः। दुर्वारत्वादिति। यद्यपि भूतलं न घट इत्यत्रैव चैत्रो न दण्ड इत्यादावपि पूर्वपक्षिणा दण्डात्यन्ताभाववुद्ध्याविष्टापत्तिः कर्तुं शक्यत एव,तथापि तन्नामार्थस्य नञा अत्यन्ताभावबोधने तन्नाम्नः प्रथमान्तत्वं प्रथमासाकाङ्क्षत्वं वा तन्त्रम् अन्यथा गृहे दण्डस्य नेत्यतोऽपि दण्डात्यन्ताभावप्रतीत्यापत्तेः।अतश्चैत्रो न दण्डीत्यादौ दण्डपदस्य प्रथमान्तत्वस्य प्रथमासाकाङ्क्षत्वस्य वाऽभावात्तदत्यन्ताभाववोधो नञा दुर्घटः। चैत्रमैत्रयोर्दण्डघटौ नेत्यादियथासङ्ख्यस्थले चैत्रधर्मिकदण्डात्यन्ताभावबोधे दण्डपदस्य प्रथमान्तत्वव्यभिचारेऽपि प्रथमासाकाङ्क्षत्वमस्त्येव द्वन्द्वोत्तरप्रथमायाः सकलप्रकृत्यर्थान्वयित्वादितिदिक्। एतेनेति। चैत्रो न दण्ड इत्यादौ दण्डात्यन्ताभावप्रत्ययेनेत्यर्थः। विनैवेति। यत्राधिकरणाभावयोराधाराधेयभावः संसर्गस्तत्रैव सप्तम्यपेक्षणाच्चैत्रो न दण्डीत्यत्र दण्डाभाववतस्तादात्म्यस्यैव चैत्रे संसर्गत्वान्न सप्तम्यपेक्षेति भावः। ननु चैत्रो न पचतीत्यादौ पाककृतेरिव चैत्रो न दण्डीत्यादावपि दण्डस्यात्यन्ताभावः सप्तमीं विनापि प्रतीयतामत आह एवञ्चेति। चैत्रो न दण्ड इत्यादौ संसर्गाभावप्रतीति-

क्त्या लक्षणया वोपस्थितस्य कर्त्तुरेव भेदो भासत इत्यस्तु। वस्तुतो न पचति चैत्रो नेदं मैत्रस्येत्यादौ विभक्त्यर्थस्य कृतिसम्बन्धादेरभावान्वयबोधे नञा सप्तमी नापेक्ष्यते अपेक्ष्यते च प्रातिपदिकार्थस्येति निपुणतरमुपपादयिष्यामः । नञो वैधर्म्यपरतया न श्याम इत्यादेः श्यामादिविधर्म्मेसर्थः । वैधर्म्यञ्च रक्तत्वादिकमेव। यदाहुराचार्य्याः श्यामाद्रक्तो विधर्म्मा न तु पृथगित्यपि वदन्तीति कृतं पल्लवितेन ।

भिया सप्तम्यपेक्षणे चेत्यर्थः । शक्त्येति । शाब्दिकानां मतेन । न्यायमते त्वाह लक्षणया वेति । भेदो भासत इति । तथा च दृष्टान्तासिद्धिरिति भावः । नन्वेवमनुभवसिद्धस्य कृत्यत्यन्ताभावबोधस्यापलाप इत्यत आह वस्तुत इत्यादि । स्वादित्यादिभेदेन विभक्तेर्द्वैविध्यादुदाहरणद्वयम् । प्रातिपदिकार्थस्येति । अभावान्वयबोधने इत्यनुषज्यते । निपुणतरमिति । यत्रानुयोगिनि प्रतियोग्यन्वये सप्तम्यपेक्षा तत्रैव नञा तदत्यन्ताभावबोधने तदर्थकपदोत्तरं सप्तम्या अपेक्षा न तु सर्वत्रेति नञ्वादे वक्ष्यमाणत्वादिति भावः । भेदस्य व्याप्यवृत्तित्ववादिनां प्राचां मते रक्तत्वादशायां न श्याम इत्यादिव्यवहारमुपपादयति नञ इत्यादिना । ननु वैधर्म्यमपि भेद एवेति तद्भत्वं तत्र बाधितमत आह वैधर्म्यं चेति । तद्भैशिष्ट्यकालावच्छेदेन तद्वति वर्तमानस्याभावस्य प्रतियोगिधर्मवत्त्वन्तद्धर्मविशिष्टस्य वैधर्म्यं तथा च रक्तो न श्याम इत्यत्र श्यामत्ववैशिष्ट्यकालावच्छेदेन श्यामवृत्त्यभावप्रतियोगिधर्मवान् रक्तः इत्याकारकस्तत्र बोधः । न तु पृथक् । न तु भिन्नः ।

ननु विशिष्टधीजनकत्वादिगर्भस्य सम्बन्धत्वस्य प्रवेशोऽप्यात्माश्रयादिरेवेत्यत आह निरूपितेति । साध्यवान् यस्येति विग्रहे साध्यवत्येव साधनस्य सम्बन्धोऽन्वेष्टव्यः स चाधिकरणत्वम् न तु व्याप्तेस्तत्र प्रवेश इति प्रागेवोक्तमितिभावः । मूले कस्येति । कुत्रेत्यादिः । तथा च किंहेतुककिंसाध्यकानुमितिजनकताव्यवच्छेदिका का व्याप्तिरित्यर्थः । ननु तद्धेतुकतत्साध्यकानुमितिं प्रत्यपि तद्धेतुकतत्सा-

व्याप्यव्यापकभावाज्ञानेऽपि वस्तुसतस्तथात्वेनाऽज्ञायमानस्य सम्बन्धत्वेनैव भातस्य षष्ठ्यर्थत्वम्। न चैवमननुगमो दोषाय, कस्य का व्याप्तिरित्यननुगतस्यैव लक्ष्यत्वात्। अथ धूमवति वह्निह्रदौ न स्तः धूमवान् वह्निमद्ह्रदौ न भवतीतिप्रतीतेर्व्यासज्यवृत्तिप्रतियोगिकौ वह्निवह्निमतोरत्यन्तान्योन्याभावौ धूमवति विद्येते इति कथमेते लक्षणे इतिचेन्न। तादृशाभावानभ्युपगमात् अभ्युपगमे वा तत्र तदुभयं प्रतियोगि न वह्निवह्निमन्तौ।

सम्बन्धत्वेनेति निरूपिततत्त्वमेतत्। कस्येति। इत्थज्ञाननुगतायां अपि व्याप्तेर्ज्ञानं यथाऽनुमितिहेतुस्तथा वक्ष्यते। एते। अन्योन्याभावात्यन्ताभावगर्भं। तादृशेति। ननु किं द्वित्वादिकं प्रतियोगितावच्छेदकमेव न भवति किं वा भवत्येव परन्तु क्लृप्तानामेव स्वसमानाधिकरणतत्तद्धर्म्मावच्छिन्नप्रतियोगिताकानामभा-

---

व्यकनानाविधव्याप्तिज्ञानानां हेतुत्वात् इत्थमप्यननुगम एवेत्यत आह दीधितावित्थं चेति। इत्थमपीत्यर्थः। वक्ष्यत इति। तद्धेतुकतत्साध्यकव्यभिचारधीविरोधिधीविषयत्वेन तद्धेतुकतत्साध्यकनिखिलव्याप्तीरनुगमय्य तदुगोचरज्ञानत्वेनैव तद्धेतुकतत्साध्यकानुमितिं प्रति हेतुत्वं व्याप्तिग्रहोपायं वक्ष्यते इत्यर्थः। लक्षणत्रयस्यैव यथाश्रुतक्रमेणाव्याप्तिसम्भवादेते इत्यनेन लक्षणद्वयाभिधानमसङ्गतमतो व्याचष्टे एत इति। तथा चान्योन्याभावगर्भत्वेन द्वयोरैक्यादेव द्विवचनोपपत्तिरिति भावः॥ धर्मिणः सिद्ध्यसिद्धिपराहतत्वादतिरिक्तद्वित्वाद्यवच्छिन्नाभावस्यासत्त्वं शङ्कितुमशक्यमित्यन्यथा वितर्कयति नन्वित्यादिना।

वानां लाघवादेस्त्वभिप्रायः। नाद्यः, एकैकाभावप्रतीतितो द्वौ न स्त इति प्रतीतेर्विलक्षणत्वात् शब्दादिना द्वौ न स्त इति निश्चयेऽप्येकैकाभावसंशयाच्च विषयानुगमं विना अनुगताकारप्रत्ययायोगात्। न चाभावस्य द्वित्वाधिकरणप्रतियोगिकत्वमात्रं द्वित्वसमानाधिकरणधर्मावच्छिन्नप्रतियोगिताकत्वं वा द्वयं नास्तीति प्रतीतेर्विषयः। तादृशद्वित्वाधिकरणव्यक्तिविशेषविरहिणि तथाविधोभयशालिनि तादृशौ द्वौ न स्त इत्यप्रत्ययात् द्वित्वसामानाधिकरण्याभानेऽपि प्रतीतेरनुगताकारत्वाच्च अत एव न तादृश प्रतीतेर्घट-

---

न भवतीत्यस्याभिप्राय इत्यग्रेऽन्वयः। स्वं द्वित्वादि। तत्समानाधिकरणं यद्घटत्वपटत्वादि तदवच्छिन्नाभावानामित्यर्थः। द्वावित्यस्य घटपटावित्यादिः। तथा च घटो नास्तीत्यादिप्रत्ययात् घटपटौ न स्त इत्यादिप्रत्ययस्य वैलक्षण्यं विषयभेदं विना अनुपपद्यमानं द्वित्वस्यावच्छेदकत्वं साधयतीति भावः। [ननु प्रतियोग्यंशे द्वित्वाधिकरणत्वस्य भासमानतया वैलक्षण्यं स्यादित्यत आह शब्देति। यद्वा] ननु द्वित्ववैशिष्ट्यावगाहितयैव वैलक्षण्यं सुवचमत आह शब्देति। तथा च भूतले घटपटौ न स्त इति प्रतीते र्घटत्वादिप्रत्येकधर्मावच्छिन्नाभावगोचरत्वे भूतले घटो न वेति संशयो न स्यात् बाधनिर्णयसत्त्वादित्यर्थः। इन्द्रियेण द्वित्वावच्छिन्नाभावस्य निर्णयदशायां सन्निकृष्टत्वेन घटत्वादिप्रत्येकधर्मावच्छिन्नाभावस्यावश्यं निर्णय इति तदानीं संशयानुत्पादस्य सर्वानुभवसिद्धत्वात् शब्दादिनेत्युक्तम्। ननु घटपटौ न स्त इत्यादितो द्वित्वाश्रयवृत्तिघटत्वादिरूपेणैवाऽभावस्य निर्णयात्तदानीं भूतले घटो न वेत्यादिसंशये बाधकाभावः शुद्धघटत्वप्रकारेणाभावनिश्चयस्यैव तद्विरोधित्वादत आह विषयेति। घटपटादिप्रत्येकाभावस्याननुगतत्वादिति भावः। विशेषणतावच्छेदकानुगमादेव घटपटौ न स्त इत्यादिप्रत्ययस्यानुगताकारत्वमित्यभिप्रायेण शङ्कते न चेति। द्वित्वाधिकरणेति। तथा च घटपटपर्याप्तद्वित्वाश्रयप्रतियोगिकाभाव-

त्वपटत्वाद्यन्यतरावच्छिन्नप्रतियोगिताकाभावविषयत्वम् । अन्यतरत्वानुल्लेखेऽपि घटपटौ न स्त इत्यनुगतप्रत्ययाच्च । न च परम्परासम्बन्धेन तादृशद्वित्वसामान्याभावएव द्वौ न स्त इति प्रतीतेर्विषयः । द्वित्वाधिकरणयोरेव प्रतियोगित्वोल्लेखाद् द्वित्वादेर्घटादिवृत्तित्वानुपस्थितावपि अन्ततः शब्देनापि घटपटौ नस्त इत्यादिप्रत्ययाच्च।अत एवैकैकविशिष्टापराभावोऽपि न तदालम्बनप्रतिरुद्धयोरपि जलत्वपृथिवीत्वयोर्द्वित्वेनाभावप्रत्यय इत्युक्तत्वाच्च । नान्यः,

---

त्वेनैव घटादिप्रत्येकाभावस्यानुगमः । ननु घटपटौ न स्त इति प्रतीतेः कुत्र चिद्धर्मेऽवच्छेदकत्वावगाहित्वस्यानुभवसिद्धत्वान्नोक्तक्रमेण तन्निर्वाह इत्यत आह द्वित्वसमानेति । मात्रपदेन द्वित्वस्यावच्छेदकत्वव्युदासः । द्वयमित्यस्य घटपटेत्यादिः । शङ्कां निरस्यति तादृशेति । तथा च यत्किञ्चित्घटपटोभयशून्ये घटपटोभयवत्यपि घटपटौ न स्त इत्यादिप्रतीत्यापत्तिरिति भावः । ननु घटत्वपटत्वान्यतरनिरूपितसम्बन्धेनैव घटपटौ न स्त इत्यत्र प्रत्येकधर्मस्य द्वित्वसामानाधिकरण्यं निवेश्यम् एवं कुड्यकुसूलौ न स्त इत्यादावपि यथायोग्यं तदुग्राह्यम् अतो द्वितीयकल्पेनायं दोष इत्यत आह द्वित्वसामानाधिकरण्येति । अत एवेति । यदनुपस्थितिदशायां यादृशप्रतीतिस्तदवगाहित्वस्य तादृशप्रतीतावसम्भवादेवेत्यर्थः । परम्परेति । स्वपर्य्याप्त्यधिकरणवत्तासम्बन्धेनेत्यर्थः । तादृशद्वित्वेति । घटपटवृत्तिद्वित्वेत्यर्थः । द्वावित्यस्य घटपटाविति । द्वयोः प्रतियोगित्वोल्लेखे विप्रतिपन्नं प्रत्याह द्वित्वादेरिति । घटपटयोर्द्वित्ववत्तायां प्रत्यक्षे तुल्यविशिष्टवेद्यतया द्वित्वे घटपटवृत्तित्वावगाहनेऽपि नियन्त्रितविषयशाब्दस्थले तदसम्भवात् अस्माकं तु नीलघटो नास्तीत्यादौ नीलत्वघटत्वाभ्यामिव घटपटौ न स्त इत्यादिशाब्दस्थले घटत्वपटत्वाद्वित्वैरवच्छिन्नप्रतियोगिताकस्यातिरिक्ताभावस्य बोधनान्नानुपपत्तिः अवच्छेदकत्वस्य त्रितय एव पर्याप्तत्वादिति भावः । अत एव । वैशिष्ट्यानुपस्थितावप्युक्तप्र

तथात्वेऽपि साध्यतद्वतोस्तादृशाभावप्रतियोगित्वानपायात्। अन्तरेणाभावान्तरमेकैकघटत्वति जायमानाया यत्किञ्चिद्घटद्वयवति चानुत्पद्यमानाया घटौ न स्त इति प्रतीतेरुपपादयितुमशक्यत्वादिसत

तीतेरेव । नन्वेकविशिष्टापरत्वमेवोभयत्वमिति वैशिष्ट्यानुपस्थितौ घटपटोभयं नास्तीतिप्रतीतिरसिद्धैवेत्यत आह विरुद्धयोरिति । इदं च विरोधितानियामकसम्बन्धेन वैशिष्ट्याप्रसिद्धिसूचनाय । उक्तत्वात् । उक्तप्रायत्वात् । तेन घटत्वपटत्वयोरेव द्वित्वेनाभावस्य प्रतीतेः सिद्धान्तनिरुक्तावुक्तत्वेऽपि न क्षतिः । कल्पितस्य घटत्वाद्यवच्छिन्नाभावस्यैव प्रतियोगितावच्छेदकं द्वित्वमित्यन्यकल्पं निरस्यति नान्त्य इति । तथात्वेऽपि । द्वित्वादेः कल्पितप्रत्येकाभावप्रतियोगितावच्छेदकत्वेऽपि । तादृशाभावेति । साधनवन्निष्ठात्यन्तान्योन्याभावेत्यर्थः । ननु तद्दोषभिया वरं साध्यतावच्छेदकातिरिक्तव्यासज्यवृत्तिधर्मानवच्छिन्नत्वेन प्रतियोगित्वं विवक्ष्यतां तावतापि व्याप्तिनिरासेऽभ्युपगमे वेति ग्रन्थेनाऽतिरिक्ताभावमङ्गीकृत्य सिद्धान्तो ग्रन्थकृतो नोचित इत्यतस्तमपि व्यवस्थापयति अन्तरेण चेति। अभावान्तरमिति। घटद्वयत्वाद्यवच्छिन्नप्रतियोगिताकमित्यादिः।एकैकेति । तथा च न घटत्वावच्छिन्नाभावेन तदन्यथासिद्धिः । घटद्वयेति । तथा च तत्तद्घटत्वावच्छिन्नाभावेनापि न तदन्यथासिद्धिरिति भावः। यद्यपि यावन्तो घटाः प्रत्येकं तत्तद्घटान्यघटत्वाद्यवच्छिन्नाभावेष्वेव कल्पितेषु घटद्वयत्वावच्छिन्नप्रतियोगिताकत्वकल्पने घटद्वयवति घटौ न स्त इत्यस्य न प्रसङ्गः न वा एकघटवति तादृशप्रत्ययाप्रसङ्गः । तथाप्यनन्तेष्वभावेषु तादृशप्रतियोगिताकत्वकल्पनामपेक्ष्य तथाविधप्रतियोगिताकत्वेनैकस्यातिरिक्ताभावस्यैव कल्पना लघीयसी सामान्याभावस्थल इव युक्तेस्तौल्यादिति भावः । न च घटविशिष्टघटत्वावच्छिन्नाभावस्यैव घटद्वयत्वावच्छिन्नप्रतियोगिताकत्वं कल्प्यं न तु तत्तद्घटान्यघटत्वावच्छिन्नाभावानां घटानाम्, आनन्त्यात्, तत्र च घटविशिष्टत्वं स्वनिष्ठभेदप्रतियोगित्वस्वसामानाधिकरण्योभयसम्बन्धेन वक्तव्यम्, अतो घटद्वयव-

अथवाऽनौपाधिकत्वं व्याप्तिः । तच्च यावत्स्वसमानाधिकरणात्यन्ताभावप्रतियोगितावच्छेदकावच्छिन्नं यत् तत्प्रतियोगिकात्यन्ताभावसमानाधिकरणं यत् तेन समं सामानाधिकरण्यम् । न ह्येवं सोपाधिः, तत्र सा-

---

आह अभ्युपगमे वेति । उभयत्वमेव प्रतियोगितावच्छेदकं न तु साध्यतावच्छेदकं साध्यवत्त्वं वेत्यर्थः। अश्रूयमाणावच्छेदकत्वांशेऽपि लक्षणे तथैव विवक्षितमिति भावः । तच्चेति । स्वं साधनत्वाभि-

---

ति घटौ न स्त इत्यस्य न प्रसङ्गः न वैकघटवति तादृशप्रत्ययाप्रसङ्ग इति वाच्यम्। इह कपाले समवायेन घटौ न स्त इति प्रतीतेस्तादृशाभावेनाप्यन्यथा कर्तुमशक्यत्वात्। स्वाधिकरणसमवेतत्वस्वनिष्ठभेदप्रतियोगित्वोभयसम्बन्धेन घटविशिष्टस्य घटान्तरस्याप्रसिद्धत्वादिति भावः । वृत्त्यनियामकसम्बन्धस्य प्रतियोगितावच्छेदकत्वोपगमे स्वपर्याप्तयधिकरणवत्तासम्बन्धेन घटपर्याप्तद्वित्वाभावस्यैव घटद्वयत्वावच्छिन्नप्रतियोगिताकत्वकल्पनसम्भवादन्तरेणेत्यादिकमयुक्तमिति तु विभावनीयम् । ननु साध्यघटितोभयस्य प्रतियोगित्वे सुतरां साध्यस्यापि तथात्वमतस्तदुभयमित्यादिमूलासङ्गतिरतो व्याचष्टे तदुभयत्वमिति । तथा च भावप्रधानो निर्देशः । ननु तथाप्यप्रतियोगित्वगर्भाणि यथाश्रुतलक्षणानि अव्याप्तान्येवेत्यत आह अश्रूयमाणेति । तथेति। प्रतियोगिपदस्य प्रतियोगितानवच्छेदकधर्मवत्परत्वादिति भावः। के चित्तु प्रतियोगितानवच्छेदकत्वगर्भेष्वेव समस्तलक्षणेषु प्रतियोगितानतिरिक्तवृत्तित्वरूपं तदवच्छेदकत्वमभिप्रेत्याशङ्क्याह मूले अथेति। स्वरूपसम्बन्धविशेषरूपमेवावच्छेदकत्वं निविष्टमित्याशयेनैव परिहृतम् । अभ्युपगमे वेति । तदुभयमित्यादौ तु सर्वत्र धर्मपरो निर्देश इत्याहुः । स्वपदस्य साध्यपरत्वे व्यभिचारिण्यतिव्याप्तेराह स्व[पद]मिति । अत्र प्रतियो-

धनसमानाधिकरणात्यन्ताभावप्रतियोगिन आर्द्रेन्धनवत्त्वादेरुपाधेर्योऽत्यन्ताभावस्तेन समं साध्यस्य धूमादेः सामानाधिकरण्याभावात् उपाधेः साध्यव्यापकत्वात् ।

मतम् । तथा च साधनसमानाधिकरणात्यन्ताभावप्रतियोगितावच्छेदका यावन्तो धर्मा यद्धर्मावच्छिन्नसमानाधिकरणात्यन्ताभावप्रतियोगितावच्छेदकाः तद्धर्मावलीढसामानाधिकरण्यमित्यर्थः । एतेन सर्वत्र तादृशैर्यावद्भिरवच्छिन्नस्य तादृशावच्छिन्नयावत्प्रतियोगिकस्य चातिप्रसञ्जकात् यावत्त्वाद्यवच्छिन्नप्रतियोगिता-

---

गित्वयोरेकसम्बन्धावच्छिन्नत्वं विशेषणताविशेषसम्बन्धावच्छिन्नत्वं वा वक्तव्यम् । तेनायोगोलकभेदत्वादेर्विषयितया धूमसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वेऽपि नातिव्याप्तिः । न च तथापि विषयितयाऽयोगोलकभेदत्ववज्ज्ञानस्य विशेषणतया योऽभावस्तस्य तथात्वादतिव्याप्तिरिति वाच्यम् । तादृशव्यधिकरणसम्बन्धावच्छिन्नाभावे अयोगोलकभेदत्वापेक्षया लाघवात्किञ्चित्पदार्थस्यैव विषयितयाऽवच्छेदकत्वात् । गुरुधर्मस्यावच्छेदकत्वस्वीकारे तु प्रतियोगितावच्छेदकताप्येकसम्बन्धेन विवक्षणीया । यथाश्रुतार्थत्यागे बीजमाह एतेनेति । प्रत्युक्तमित्यग्रेऽन्वयः । तादृशैः । साधनवन्निष्ठाभावप्रतियोगितावच्छेदकैः । अवच्छिन्नस्येति । अप्रसिद्धिरित्यग्रेणान्वयः । तथा चैं यावत्त्वं नावच्छेदकविशेषणमिति भावः । तादृशावच्छेदकावच्छिन्नस्यापि यावत्त्वं न विशेषणमित्याह तादृशावच्छिन्नयावदिति । प्रतियोगिकस्येति । अत्राप्यप्रसिद्धिरित्यन्वयः । ननु तादृशयावत्प्रतियोगिको यावत्त्वाद्यवच्छिन्नाभाव एव प्रसिद्ध इत्यत आह अतिप्रसञ्जकादिति । तथा च यावत्त्वाद्यवच्छिन्नतादृशाभावमादाय धूमवान् वह्नेरित्यत्रातिव्याप्तिभिया यावत्त्वाद्यनवच्छिन्नाभाव एव लक्षणे निवेश्य इति तदप्रसिद्ध्या वह्निमान् धूमादित्यादावसम्भव इति भावः । ननु द्वितीयात्यन्ताभाव एव यावत्त्वेन वि-

कादतिरिक्तस्याभावस्याप्रसिद्धिः तादृशावच्छिन्नप्रतियोगिताकानां यावद्भावानामधिकरणस्य प्रायशस्तथा, रूपादिसाध्यकपृथिवीत्वादावव्याप्तिश्च क्वापि रूपादिव्यक्तौ तादृशयावद्भावसामानाधिकरण्यासम्भवादिति प्रत्युक्तम् । सर्वत्र सोपाधावेकव्यक्तिकस्य सम्भवतोऽप्युपाधेर्द्धर्मान्तरविशिष्टत्वादिना अभावो भवत्येव सा-

---

वक्षितः समासनिविष्टेनापि तेन व्युत्पत्तिवैचित्र्याद्यावत्पदार्थस्याभेदान्वयसम्भवादत आह तादृशावच्छिन्नेति । तथा। अप्रसिद्धिः। तथा च तत्तत्पर्वताद्यन्यत्वाभावकूटाधिकरणाप्रसिद्ध्या नानाव्यक्तिवृत्तिसाध्यके द्रव्यं पृथिवीत्वादित्यादावव्याप्तिरिति भावः। अत्र च वह्निमान् धूमादित्यादौ व्यधिकरणयोर्व्याप्त्यस्वीकारात्पर्वतीयधूमसमानाधिकरणाभावप्रतियोगितावच्छेदकावच्छिन्नतत्पर्वतान्यत्वाभावकूटस्याधिकरणं पर्वत एव इति नाव्याप्तिरितिध्येयम्। वाच्यं गगनत्वादित्यादावेकव्यक्तिवृत्तिसाधनस्थले तादृशयावद्भाववत्त्वं साधनवत्त्वेव प्रसिद्धमतः प्रायश इत्युक्तम्।ननु तादृशयावद्भावानां प्रत्येकाधिकरणवृत्तित्वं साध्ये वाच्यमतो नोक्ताप्रसिद्धिरत आह रूपादीति। तादृशेति। तत्तद्घटान्यत्वाभावकूटस्यापि निरुक्ताभावतया तत्प्रत्येकसामानाधिकरण्यस्य कुत्रापि रूपे ऽसत्त्वात्। न च तादृशयावद्भावानां प्रत्येकसमानाधिकरणवृत्तित्वं साध्यतावच्छेदके वाच्यमतो नोक्तदोषः। दण्डिमान् दण्डिसंयोगादित्यादावेवमप्यव्याप्तेरिति भावः । यद्यपि तादृशयावद्भावानां प्रत्येकाधिकरणं यद्धर्मावच्छिन्नस्याधिकरणं हेतौ तदवच्छिन्नस्य सामानाधिकरण्यविवक्षायां न कोऽपि दोषः, तथापि एतस्यैव फलतः कल्पान्तरेणाग्रे वक्ष्यमाणत्वान्नाशङ्कितमिति भावः। ननु साधनवन्निष्ठाभावप्रतियोगिनो यावन्तो यत्समानाधिकरणाभावप्रतियोगिन इत्यस्यैव सम्यक्त्वेऽवच्छेदकद्वयोपादानं व्यर्थम् अयःपिण्डभेदस्यैव साधनाव्यापकस्य साध्यवन्निष्ठाभावप्रतियोगित्वविरहाद्भूमवान् वह्नेरित्यादिसोपाधावतिव्याप्त्यभावादत आह सर्वत्रेति । धर्मान्तरेति । साध्यन्यूनवृत्तिघटत्वादिविशिष्टत्वेनेत्यर्थः ।

ध्यसमानाधिकरण इत्यवच्छेदकानुसरणम्। साधनसमानाधिकरणात्यन्ताभावप्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिताका यावन्तोऽभावा यद्धर्मावच्छिन्नसमानाधिकरणास्तद्धर्मावलीढसामानाधिकरण्यमित्यर्थः। अभावश्चात्र भावभिन्नो ग्राह्यस्तेन इदं जलं स्नेहवत्त्वादित्यादौ स्नेहवत्त्वसमानाधिकरणात्यन्ताभावप्रतियोगितावच्छेदकरूपसामान्याभावत्वावच्छिन्नप्रतियोगिताकाभावानां सकलरूपाणां जलत्वसामानाधिकरण्यविरहेऽपि नाव्याप्तिः। घटध्वंसो

विशिष्टस्यातिरिक्तत्वे शुद्धायःपिण्डभेदस्य विशिष्टाभावप्रतियोगित्वासम्भवादाह आदिनेति। तेन द्वित्वाद्यवच्छिन्नतदभावस्योपग्रहः। अत्र साधनवन्निष्ठाभावप्रतियोगिता यावत्यः साध्यवन्निष्ठाभावप्रतियोगितास्वरूपा इत्युक्तौ नैष दोषः तप्तायःपिण्डभेदत्वावच्छिन्नप्रतियोगिताव्यक्तेर्धूमवन्निष्ठाभावप्रतियोगितानात्मकत्वात् अतिव्याप्त्यसम्भवादिति ध्येयम्। मतान्तरमाह साधनसमानेत्यादिना। यद्धर्मावच्छिन्नेति। तथा च मूले तादृशप्रतियोगिताकात्यन्ताभावाः समानाधिकरणा यस्येति बहुव्रीहिः। नाव्याप्तिरिति। न च रूपसामान्याभावत्वस्य रूप इव रूपध्वंसरूपप्रागभावयोरपि प्राचीनमते सत्त्वात्तयोश्च भावभिन्नयोरपि निखिलयोर्जलत्वसामानाधिकरण्याभावादव्याप्तितादवस्थ्यमिति वाच्यम्। यद्धर्मावच्छिन्नाभावत्वावच्छेदेन भावभिन्नत्वम्, हेतुसमानाधिकरणाभावीयप्रतियोगितावच्छेदकीभूतताद्दशधर्मावच्छिन्नाभावो ग्राह्य इत्यत्र भावभिन्नो ग्राह्य इत्यस्य तात्पर्यात्। न च रूपसामान्याभावत्वावच्छिन्नाभावत्वावच्छेदेन भावभिन्नत्वं रूप एव व्यभिचारात्। अत एव रूपप्रागभावसामान्याभावत्वावच्छिन्नाभावस्वरूपप्रागभावानप्यादाय न दोषः। तादृशरूपप्रागभावसामान्याभावत्वावच्छिन्नाभावत्वावच्छेदेन प्राचां मते भावभिन्नत्वविरहात् रूपस्यापि तथात्वादिति भावः। न च तथापि स्नेहवत्त्वसमानाधिकरणाभावप्रतियोगितावच्छेदकं जलान्यत्वविशिष्टसत्त्वाभावतेजोऽन्यत्वविशिष्टसत्त्वाभावान्यतरत्वावच्छिन्नाभावत्वं तद्वच्छिन्नाभावस्य तेजोऽन्यत्वविशिष्टसत्त्वात्यन्ताभावस्य ज-

ध्वंसत्वादित्यादौ च घटध्वंसत्वादेस्तत्प्रकारकप्रमाविशेष्यत्वादेर्वा भावाभाववृत्तिरतिरिक्तोऽभावस्तादृशो न घटध्वंसत्वादिसमानाधिकरण इति नातिव्याप्तिरित्यपि वदन्ति ।

लत्वसामानाधिकरण्याभावाद्व्याप्तिरिति वाच्यम् । जलतेजोऽन्यत्वविशिष्टसत्तायाः एव तादृशान्यतरत्वावच्छिन्नाभावतया जलतेजोऽन्यत्वविशिष्टसत्ताभावस्य । तदवच्छिन्नप्रतियोगिताकाभावत्वात् तस्य च जलत्वसमानाधिकरणत्वेनाव्याप्त्यनवकाशात् । तादृशान्यतरत्वावच्छिन्नाभावस्य भावरूपत्वे तदवच्छिन्नाभावत्वस्यैकस्मिन्नेवोक्तविशिष्टाभावे कल्पयितुमुचितत्वात् । ननु घटध्वंसत्ववान् ध्वंसत्वादित्यत्रातिव्याप्तिः घटध्वंसत्वत्वस्य हेतुमन्निष्ठाभावप्रतियोगितावच्छेदकत्वेऽपि तदवच्छिन्नाभावत्वावच्छेदेन भावभिन्नत्वविरहेण घटध्वंसत्वसामान्याभावस्य लक्षणाघटकत्वात् । जन्याभावत्वलक्षणध्वंसत्वस्य जन्यत्वे सति भावभेदस्वरूपत्वादभावप्रतियोगिंकाभावमात्रस्यैव च अधिकरणस्वरूपत्वोपगमात् भूतलादिनिष्ठस्य घटध्वंसत्वाभावस्य भूतलादिभावे पर्यवसानात् घटत्वाद्यवच्छिन्नाभावस्य च तथाविधयावदन्तर्गतस्य साध्यसामानाधिकरण्यादत आह घटध्वंस इति। भावाभाववृत्तिरिति। तथा च भावनिष्ठत्वमभावप्रतियोगिकत्वं वा नाधिकरणस्वरूपत्वे तन्त्रम् अपि तु तदभावमात्रनिष्ठत्वं स्वेनैव तादात्म्येन स्वमात्रवृत्त्यभावस्य विशिष्टबुद्ध्युपपत्तौ तत्तदभावभिन्नत्वाद्यभावस्यातिरिक्तत्वकल्पने मानाभावादिति भावः । स्नेहवत्त्वसमानाधिकरणाभावप्रतियोगितावच्छेदकं यत्तज्जस्त्वाभावसत्त्वाभावान्यतरत्वावच्छिन्नाभावत्वं तदवच्छिन्नप्रतियोगिताको यो निरुक्तभावभिन्नोऽभावस्तेजस्त्वाभावः सत्त्वाभावश्च तयोर्न साध्यसामानाधिकरण्यं सत्त्वाभावस्य जलत्वविरुद्धत्वादित्यादिक्रमेण जलं स्नेहवत्त्वाद्वह्निमान् धूमादित्यादावव्याप्तिरित्यस्वरसेन वदन्तीत्युक्तम् ॥ साम्प्रदायिकास्तु भावभिन्न इत्यस्य वास्तविकात्यन्ताभावो ग्राह्य इत्यर्थः तेन रूपप्रागभावध्वंसात्य-

न्ताभावत्वावच्छिन्नाभावानां रूपप्रागभावध्वंसात्मकानां भावभिन्नानां जलत्वसामानाधिकरण्याभावेऽपि जलं स्नेहवत्त्वादित्यत्र नाव्याप्तितादवस्थ्यम्। ननु घटध्वंसो ध्वंसत्वादित्यत्रातिव्याप्तिः अभावप्रतियोगिकाभावमात्रस्याधिकरणरूपतया घटात्यन्ताभावादिवृत्तेर्घटध्वंसत्वात्यन्ताभावस्य घटात्यन्ताभावादिस्वरूपस्य घटध्वंसत्वरूपसाध्यसामानाधिकरण्यात् पटध्वंसादिनिष्ठस्य च घटध्वंसात्मकस्य वास्तवात्यन्ताभावत्वविरहेण लक्षणाघटकत्वादत आह घटध्वंस इत्यादीत्याहुः। तन्मन्दम्। अभावप्रतियोगिकाभावानामधिकरणस्वरूपतामाशङ्क्य घटध्वंसेत्यादेरवतारणे धूमवन्निष्ठाभावप्रतियोगितावच्छेदकीभूतघटध्वंसत्वत्वावच्छिन्नाभावस्य द्रव्यत्वाभावनिष्ठस्यापि तुल्ययुक्त्या द्रव्यत्वाभावात्मकस्य वह्निसामानाधिकरण्याभावाद्वह्निमान् धूमादित्यादावव्याप्तेरेव सम्भवे घटध्वंसो ध्वंसत्वादित्यादावतिव्याप्तिपर्यन्तानुसरणस्य सन्दर्भविरोधापत्तेः। नव्यास्तु भावभिन्न इत्यत्र भावेन भिन्नः प्रतियोगिविधया सम्भिन्नो भावमात्रप्रतियोगिक इति यावत्। तेन स्नेहवत्त्वसमानाधिकरणस्य हिमावृत्तिस्वरूपस्याभावस्य प्रतियोगितावच्छेदकं यद्धिमावृत्तेरभावत्वं तदवच्छिन्नप्रतियोगिताकस्य यावद्धिमावृत्त्यन्तर्गतस्य जलत्वाभावस्य साध्यासामानाधिकरण्येऽपि जलं स्नेहवत्त्वादित्यादौ नाव्याप्तिः हिमावृत्तेरभावत्वस्य भाव इवाभावेऽपि सत्त्वात्तदवच्छिन्नाभावस्य भावमात्रप्रतियोगिताकत्वाभावात्। नन्वेवं घटध्वंसो ध्वंसत्वादित्यादावतिव्याप्तिः व्यभिचारनिरूपकाधिकरणपटध्वंसान्यत्वाभावादेर्घटध्वंसत्वाभावादेर्वा भावप्रतियोगिकत्वविरहेण लक्षणाघटकत्वात् जन्यत्वे सति भावभिन्नत्वपर्यवसन्नस्य घटध्वंसत्वस्य भावत्वविरहात् घटात्यन्ताभावादेश्च तादृशस्य साध्यसमानाधिकरणत्वात् अत आह घटध्वंस इत्यादि। भावभिन्नत्वविशिष्टजन्यत्वमेव ध्वंसत्वमखण्डधर्मान्तरमेव वा तत् तथा च घटध्वंसत्वाभावस्यैव भावमात्रप्रतियोगिकत्वात्तेनैवोक्तातिव्याप्तिनिवारणं सम्भवतीत्याशयेनाह घटध्वंसत्वादेरिति। आदिना घटप्राग भावः प्रागभावत्वादित्यादौ घटप्रागभावत्वादेः परिग्रहः। जन्यत्वे सति भावभिन्नत्वं ध्वंसत्वमित्युक्तावपि न क्षतिरभावान्तरमादायैवातिव्याप्तेर्निरासस्सम्भवादित्याशयेनाह तत्प्रकारकेति। भावाभाव-

एतदेव यावत्स्वव्यभिचारिव्यभिचारिसाध्यसामानाधिकरण्यमनौपाधिकत्वं गीयते ।

यद्वा यावद्यत्समानाधिकरणात्यन्ताभावाप्रतियोगिप्रतियोगिकात्यन्ताभावासामानाधिकरण्यं यस्य तस्य तदेवानौपाधिकत्वम् । सोपाधौ तु साध्यवन्निष्ठात्यन्ताभावाप्रतियोगिन उपाधेर्योऽत्यन्ताभावस्तेन समं हेतोः सामानाधिकरण्यम् । उपाधेः साधनाव्यापकत्वात् ।

यावदिति । स्वं व्यभिचारि येषां तेषां यावतां व्यभिचारिणा साध्येन सामानाधिकरण्यमित्यर्थः ।

यावदिति । यत्पदं साध्यत्वाभिमतपरम् । सोपाधिवारणाय यावदिति लुप्तसप्तमीकस्य द्वितीयात्यन्ताभावस्य विशेषणम् ।

वृत्तिरित्यनेनानुगतप्रतीतिप्रमाणकत्वं तादृशाभावस्याविष्कृतम् । अतिरिक्तो भावमात्रप्रतियोगिक इत्यर्थ इति प्राहुः । अत्र तादृशध्वंसत्वाभावस्यापि जन्यत्वविशिष्टाभावभेदाभावानतिरिक्ततया न भावमात्रप्रतियोगिकत्वं तस्येति पूर्वग्रन्थासङ्गतिश्चेति चिन्त्यम् ॥

ननु यावन्तः स्वस्य व्यभिचारिणस्तद्व्यभिचारिसाध्येत्यर्थे वह्निमान् धूमादित्यादौ सर्वत्रासम्भवः साधनव्यभिचारिणः प्रमेयत्वद्रव्यत्वादेर्व्यभिचारस्य साध्ये विरहादत आह स्वमिति । यत्पदस्य साधनपरत्वे सोपाधावतिप्रसङ्गादाह साध्यत्वेति । साध्यव्यापकप्रतियोगिकस्य तत्तद्विपक्षान्यत्वाद्यभावकूटस्याधिकरणाप्रसिद्ध्या वह्निमान् धूमादित्यादावव्याप्तेराह लुप्तसप्तमीकेति । तथा च यावति यद्व्यापकस्याभावे यस्यासामानाधिकरण्यं तस्य तत्त्वमेव व्याप्तिरि-

तथा च साध्यव्यापकतावच्छेदकावच्छिन्नप्रतियोगिताकात्यन्ताभावत्वव्यापकस्त्वसामानाधिकरण्यसामान्याभावकत्वमर्थः । केवलान्वयिस्थले त्वाकाशादिरेव तथाविधोऽभावः प्रसिद्ध इति सम्प्रदायः । केचित्तु तादृशयावदभावशून्यत्वं यदधिकरणताया व्यापकं तत्त्वमर्थः । न च तादृशप्रतियोगितानवच्छेदकवन्तमेव या-

---

तिभावः । विशेषणमभेदान्वयसाकाङ्क्षं तेन पदस्य विशेषणत्वाभावेऽपि न क्षतिः । वस्तुमात्रस्यैव साध्यवन्निष्ठाभावप्रतियोगित्वेन तदप्रतियोगित्वाप्रसिद्धिः व्यापकत्वातिरिक्तं यावत्त्वञ्च दुर्वचमित्यतो निष्कर्षमाह तथा चेति । एतस्यार्थः प्रागेव प्रपञ्चितः । ननु एकव्यक्तिवृत्तयो यावन्तः साध्यव्यापकतावच्छेदकरूपावच्छिन्नाभावास्तेषामसामानाधिकरण्यमेवार्थः कुतो न कृतः तत्तद्विपक्षान्यत्वाद्यभावकूटस्यैकव्यक्तिवृत्तित्वाभावादेव तेषामधिकरणाप्रसिद्धावपि वह्निमान् धूमादित्यादावव्याप्त्यसम्भवादत आह केवलान्वयिनि चेति । तथाविधः । साध्यव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताकः । तथा च तदधिकरणाप्रसिद्ध्या प्रमेयं वाच्यत्वादित्यादावव्याप्तिभियैव तादृशार्थस्त्यक्त इति भावः । अत्र वह्निमान् धूमादित्यादावव्याप्तिः, वह्निव्यापकस्य ह्रदत्वविशिष्टद्रव्यत्वाद्यभावस्य योऽभावो द्रव्यत्वादिः तत्र धूमादिसामानाधिकरण्यस्यैव सत्त्वात् अभावविरहात्मकत्वलक्षणप्रतियोगित्वान्यथानुपपत्त्या द्रव्यत्वस्यैव विशिष्टद्रव्यत्वाभावाभावत्वात्, अन्यथा गगनस्यापि स्वाभावाभावत्वे मानाभावात् केवलान्वयिन्यव्याप्त्यापत्तेरित्यस्वरसः सम्प्रदाय इत्यनेन सूचितः । अत एवैतद्दोषं निरस्यतां मतमुपन्यस्यति केचित्त्विति । तादृशेति । साध्यव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताकाभावसामान्याभावत्वेन यदधिकरणताया व्यापकत्वं तत्त्वमित्यर्थः । सामान्याभावलाभायैव यावत्पदोपादानं तेन तादृशाभावानां यावत्त्वाद्यवच्छिन्नाभावस्य केवलान्वयित्वेऽपि न धूमवान् वह्नेरित्यादावतिप्रसङ्गः । न चेति । वाच्यमित्यन्वयः । तादृशेति । साध्यवन्निष्ठाभावीयेत्यर्थः । अनतीति ।

वत्त्वेन विशिष्य यावत्तादृशाश्रयत्वं यदधिकरणताया व्यापकं तत्त्वमित्यर्थलाभादेव सामञ्जस्येऽभावद्वयोपादानमनतिप्रयोजनकमिति वाच्यम्। यावतां तादृशानामिन्धनादीनामैकाधिकरण्यस्याऽप्रसिद्धेः। न चावच्छेदकांशमपहायाऽप्रतियोग्येव यावत्त्वेव विशिष्यते साध्यव्यापकस्यापि रूपान्तरेण साध्यसमानाधिकरणात्यन्ताभावप्रतियोगित्वस्योपदर्शितत्वादित्याहुः।

अवच्छिन्नं सामानाधिकरण्यं सामानाधिकरण्यावच्छेदकरूपं वा व्याप्तिः। इत्थञ्च धूमत्वद्रव्यत्वत्वादेर्व्याप्यतावच्छेदकत्वं दण्डत्वादेर्नियतपूर्ववर्त्तितावच्छेदकधर्मात्मककारणतावच्छेदकत्ववदभेदेऽप्युपहितानुपहितभेदाद्वा समर्थनी-

---

साध्यव्यापकानां यावत्त्वेनाप्रवेशाद्वैयर्थ्यासम्भवादिति भावः। ऐकाधिकरण्यस्येति। तेषां प्रत्येकाश्रयत्वस्य प्रवेशे तु तादृशतत्तद्वह्निमत्त्वस्य धूमाधिकरणत्वाव्यापकत्वादव्याप्तिरसम्भवो वेति भावः। रूपान्तरेण। किञ्चिद्विशिष्टत्वादिना। तादृशाप्रतियोग्यप्रसिद्धेरवच्छेदकांशो निवेशित इति भावः। अत्र गगनस्य स्वाभावविरहत्वे मानाभावः स्वरूपसम्बन्धविशेषस्यैव प्रतियोगित्वादतः केवलान्वयिन्यव्याप्तिरित्यस्वरसः केचिदित्यनेन सूचितः। स्वमते तु साध्यव्यापकतावच्छेदका यावन्तो धर्माः यद्धर्मावच्छिन्नस्य व्यापकतावच्छेदकास्तद्धर्मवत्त्वमेवानौपाधिकत्वमिति प्रागेव पूर्वपक्षग्रन्थे विवेचितमिति ध्येयम्।

लक्षणयोः पौनरुक्त्यमपाकर्तुं विकल्पयति अवच्छिन्नमित्यादिना। ननु व्याप्यवच्छेदकस्य धूमत्वादेः सामानाधिकरण्यावच्छेदकधर्मत्वरूपव्याप्तित्वानुपपत्तिः विभिन्नयोरेवावच्छेद्यावच्छेदकभावनियमादत आह इत्थञ्चेति। दण्डत्वादेरिति। तथा चोक्तनियमो व्यभिचारपराहत इति भावः। ननु इतोऽपि बाधकात् कारणत्वमतिरिक्तः पदार्थ इति दण्डत्वादेस्तदवच्छेदकत्वं सुघटमेवेत्यत आह उपहितेति। विशिष्टाविशिष्टेत्यर्थः। स-

यद्वा यत्सम्बन्धितावच्छेदकरूपवत्त्वं यस्य तस्य सा व्याप्तिः। तथा हि धूमस्य वह्निसम्बन्धित्वे धूमत्वमवच्छेदकं धूममात्रस्य वह्निसम्बन्धित्वात् वह्नेस्तु धूमसम्बन्धे न वह्नित्वमवच्छेदकं धूमासम्बन्धिनि गतत्वात्। न ह्यतिप्रसक्तमवच्छेदकं संयोगादौ तथात्वादर्शनात्। किन्तु वह्नावार्द्रेन्धनप्रभववह्नित्वं धूमसम्बन्धितावच्छेदकं तादृशञ्च व्याप्यमेव।

यमुतत्राद्यमभिप्रेत्याह यत्सम्बन्धितेति। सा सम्बन्धिता सामानाधिकरण्यरूपा जनकत्वादिव्यावृत्ता। अत्र च विशिष्टसत्तात्वाद्यवच्छिन्नगुणादिसामानाधिकरण्याधिकरणसत्त्वादेः कर्मादौ परामर्शाद्गुणाद्यनुमित्यापत्तेः। साध्यसामानाधिकरण्यविशिष्टहेतुम-

---

मर्थनीय इति। धूमत्वादेर्व्याप्त्यवच्छेदकत्वमिति पूर्वेणान्वयः। भेदादिति। ल्यब्लोपे पञ्चमी। भेदमङ्गीकृत्येत्यर्थः। तथा च शुद्धधूमत्वं व्याप्त्यवच्छेदकं सामानाधिकरण्यावच्छेदकत्वोपहितञ्च तदवच्छेद्यमतः केवले विशिष्टभेदोपगमान्नासङ्गतिरिति भावः। तत्र। तयोर्मध्ये। सा इत्यनेनावच्छेदकपरामर्शे द्वितीयलक्षणाभेदप्रसङ्ग इत्यतो व्याचष्टे सा सम्बन्धितेति। एवं च मूले यस्याः सम्बन्धितायाः अवच्छेदकरूपवत्त्वं यत्रेत्येवमन्वयो बोध्यः। जनकत्वादिरूपायाः साध्यसम्बन्धितायाः व्याप्तित्वविरहादाह समानेति। जनकत्वादीत्यादिना जन्यत्वादेः परिग्रहः। विशिष्टेति। विशिष्टसत्तात्वाद्यवच्छिन्नं यद्गुणादिसामानाधिकरण्यं तद्वतः सत्त्वादेरित्यर्थः। गुणाद्यनुमित्यापत्तिरिति। सत्तायां गुणव्यभिचारित्वज्ञानेऽपीत्यादिः। कर्मादावित्यनुषज्यते। गुणव्याप्तिमतः सत्त्वस्य

त्तापरामर्शस्तु पक्षे साध्यनिर्णयात् प्रागसम्भवीत्यनुशयेन द्वितीयम् । अयमालोको धूमो वेत्यादौ विशिष्य सन्देहेऽपि सामान्यतोऽवच्छेदकरूपवत्त्वनिर्णयः सम्भवत्येवेति हृदयम् । अत्राऽवच्छेदकत्वं नाऽन्यूनवृत्तित्वम् अन्यूनानतिरिक्तवृत्तित्वं वा । वह्न्यादौ साध्ये मेयत्वादावतिप्रसङ्गात् धूमत्वादावप्रसङ्गाच्च । किन्त्वनतिरिक्तवृत्तित्वम् । तच्च यद्यपि न तदभाववदवृत्तित्वम् । गुणवान् सत्त्वादित्यत्र सत्तात्वेऽतिप्रसङ्गात् । न च कर्मादिवृत्तित्वावच्छेदेन

कर्मणि पक्षधर्मतानपायादिति भावः । ननु व्याप्त्यवच्छिन्नस्य हेतोः पक्षधर्मताज्ञानमनुमितिहेतुरतः साध्यसामानाधिकरण्यविशिष्टस्य सत्त्वादेः कर्मणि परामर्शे व्यभिचारधीदशायामप्यनुमितिरिष्यत एवेत्यत आह साध्यसमानेति । प्रागिति । तथा च पक्षे साध्यनिर्णयप्रौढ्ये विनानुमित्सां क्वचिदप्यनुमितिर्न स्यादिति भावः । ननु धूमत्वादितत्तद्धर्मावच्छिन्नसाध्यसामानाधिकरण्यवतो धूमत्वादितत्तद्धर्म्मप्रकारेणैव पक्षधर्मतानिश्चयोऽनुमितौ हेतुर्वाच्यः तथा च कर्मणि तादृशविशिष्टसत्तात्वरूपेण पक्षधर्मत्वाऽनिर्णयान्नोक्तानुशयः सम्भवतीत्यत आह अयमित्यादि । अयं पक्षवृत्तिः । विशिष्येति । तथा च धूमत्वादिप्रकारेण पक्षधर्मतासन्देहदशायां उक्तप्रकारासम्भवादिदानीमनुमित्युत्पत्त्यर्थमपि द्वितीयकल्पानुसरणमिति भावः । सामान्यतः । साध्यसम्बन्धितावच्छेदकत्वप्रकारेण । इदं च स्वरूपसम्बन्धविशेष एवावच्छेदकत्वमित्याशयेन । प्रकारान्तरेणाऽवच्छेदकत्वोक्तौ तु तत्तद्धर्मनिवेशावश्यकत्वादिति द्रष्टव्यम् । आद्ये दूषणमाह प्रमेयत्वादाविति । तथा च वह्निमान् प्रमेयादित्यादौ व्याप्तिलक्षणातिप्रसङ्ग इति भावः । उभयत्रैव तदाह धूमत्वादाविति । वह्न्यादौ साध्ये इत्यनुषज्यते । तथा च वह्निमान् धूमादित्यत्र व्याप्तिलक्षणाव्याप्तिरिति भावः । कर्मादिवृत्तित्वेति । कर्मादिसमवेतत्वाद्यवच्छेदेनेत्यर्थः । कर्मावच्छेदेनेत्युक्तौ कर्मणि सत्तायां न गुणसामानाधि-

गुणसामानाधिकरण्याभाववत्यां सत्तायां वर्त्तमानत्वान्न तथा। तथा सति विशिष्टसत्तात्वे प्रागुपदर्शितदिशा च धूमत्वादावव्याप्तिप्रसङ्गात्। तथापि अतिरिक्ते यद्धर्मविशिष्टहेत्वधिकरणवृत्तित्वं न वर्त्तते तत्त्वम्। साध्यासमानाधिकरणावृत्तिस्वविशिष्टाधिकरणवृत्तित्वसामान्यकत्वं स्वविशिष्टाधिकरणावृत्तियावत्साध्या

करण्यमितिवदिदानीं सत्तादौ न गुणसामानाधिकरण्यमित्यपि प्रतीतिः स्यात् कर्मण एवेदानींकालत्वादतो वृत्तिविशेषानुधावनम्। तेन कालिकसम्बन्धेन यत्कर्मवृत्तित्वं तदवच्छेदेन गुणसामानाधिकरण्यस्यैव सत्त्वान्नोक्तप्रतीत्यापत्तिरिति भावः। न तथा। न सत्तात्वं गुणसम्बन्धित्वाभाववदवृत्ति। विशिष्टेति। कर्माद्यवच्छेदेन गुणसामानाधिकरण्याभाववत्यां सत्तायां वर्तमानत्वाद्विशिष्टसत्तात्वमप्यवच्छेदकं न स्यात् तथा च गुणवान् विशिष्टसत्त्वादित्यत्राव्याप्तिरिति भावः। ननु सामानाधिकरण्यस्याव्याप्यवृत्तित्वमुररीकुर्वतः सार्वभौमस्य मते विशिष्टस्यातिरिक्तत्वान्नैष दोष इत्यत आह। प्रागिति। तथा च स्वावयवे धूमे न वह्निसामानाधिकरण्यमितिप्रतीतेर्धूमेऽपि वह्निसामानाधिकरण्याभावसत्त्वात् धूमत्वमप्यवच्छेदकं न स्यादित्यर्थः। न च हेतुताघटकसम्बन्धेन यद्धेत्वधिकरणं तदवच्छेदेन साध्यसामानाधिकरण्याभावस्य निवेश्यत्वान्नैष दोषः। तथा सति गोत्ववान् अश्वत्वादित्यादौ महाकालनिरूपितविशेषणतया हेतुतायामव्याप्त्यापत्तेः। हेतुमन्महाकालाद्यवच्छेदेन तादृशसम्बन्धेन वृत्त्यभावस्याप्रसिद्धेरिति भावः। अतिरिक्ते इत्यस्य साध्यसमानाधिकरणादित्यादिः। ननु धूमासमानाधिकरणस्य घटत्वादेर्वह्नित्वविशिष्टाधिकरणावृत्तित्वाद्धूमवान् वह्नेरित्यादावतिव्याप्तिरत आह साध्यासमानेति। स्वपदं साधनतावच्छेदकीभूतधूमत्वादिपरम्। वह्नित्वविशिष्टाधिकरणीभूतपर्वतवृत्तित्वस्य धूमासमानाधिकरणावृत्तित्वादतिव्याप्तिरतः सामान्येति। तथा च वह्निमदयोगोलकवृत्तित्वस्यैव धूमासमानाधिकरणवृत्तित्वान्नातिप्रसङ्ग इति भावः। वृत्तिद्वयानन्तर्भावेन

समानाधिकरणकत्वमिति तु फलितार्थः । सत्तात्वविशिष्टसत्ताधिकरणकर्मादिवृत्तित्वस्य साध्यसमानाधिकरणे कर्मत्वादौ सत्त्वान्नातिप्रसङ्गः । कर्माद्यन्यत्वविशिष्टसत्ताश्रयश्च न कर्मादिरिति नाप्रसङ्गः । एवञ्च मेयत्वादेरपि केवलान्वयिसामानाधिकरण्यावच्छेदकत्वोपपत्तिः । यत्तु वृत्तिमत्त्वादिकमेव तत्र व्याप्तिस्तद्ग्रहस्तु मेयत्वादिनेति । तन्न । व्याप्तिविरहिवृत्तितया गृह्यमाणेन

पूर्वापेक्षया लघुतरमाह स्वविशिष्टेति । गुणवत्सत्त्वादित्यत्र प्रागुक्तातिव्याप्तिमुद्धरति सत्तात्वेत्यादिना । तथैव गुणवद्विशिष्टसत्त्वादित्यत्रोक्तामव्याप्तिं निरस्यति कर्माद्यन्यत्वेति । यथाश्रुतस्यानतिरिक्तवृत्तित्वरूपस्यावच्छेदकत्वस्योपेक्षायां बीजान्तरमप्याह एवं चेति । उपपत्तिरिति । अन्यथा वाच्यत्वसामानाधिकरण्याभाववति गगनादौ प्रमेयत्वादेः सत्त्वाद्वाच्यं प्रमेयादित्यादावव्याप्तिरेव स्यादिति भावः । मिश्रमतं निरसितुमुपन्यस्यति यत्त्विति । ननु प्रमेयत्वं यदि तत्र न व्याप्तिस्तदोदाहरणादौ तादृप्येण हेतोरुपन्यासोऽनुचितः तस्य व्याप्त्युपस्थितिमात्रफलकत्वादत आह तदग्रहस्त्विति । तथा च व्याप्त्यन्तरवादिनामिव प्रमेयत्वावच्छिन्नविशेष्यकव्याप्तिग्रहार्थमेव हेतोः प्रमेयत्वेनोदाहरणादावुपन्यास इति भावः । यदि व्याप्तिविरहिवृत्तिरूपेणाप्युदाहरणादितो व्याप्तिग्रहः प्रामाणिकस्तदा यो यो द्रव्यवान् स वह्निमानित्यप्युदाहरणं स्यात् द्रव्यत्वस्यापि वह्निव्याप्तिविरहिवृत्तित्वाविशेषादित्यभिप्रेत्याह व्याप्तिविरहीत्यादि । स्वमते प्रमेयत्वस्यापि व्याप्तिविरहिवृत्तित्वाभावात् गृह्यमाणेनेत्युक्तम् । व्याप्तिग्रहेत्यस्योदाहरणादित्यादिः । अत्रोदाहरणस्य व्याप्तिविरहिवृत्तिरूपेण व्याप्तिग्राहकत्वेऽपि न क्षतिः व्यभिचारिवृत्तिरूपेण व्याप्त्यग्राहकत्वनियमादेव यो यो द्रव्यवान् स वह्निमानित्यादिवाक्यस्योदाहरणत्वासम्भवादिति चिन्त्यम् । यत्तु प्रमेयत्वप्रकारेण गगनादौ निरुक्तव्याप्त्यभावनिश्चयदशायां तादृप्येण धूमादौ व्याप्तिग्रहो न स्यात् समानरूपेण विरोधिनिश्चयस्यैव विशिष्टधीविरोधित्वात्, अन्यथा वह्निर्न धूमव्याप्य इति निर्णये ऽपि वह्निर्धूमव्याप्य

रूपेण व्याप्तिग्रहासम्भवात् । अन्यथा अतिप्रसङ्गात् । साध्यतावच्छेदकसम्बन्धेन साध्याधिकरणे येन येन सम्बन्धेनावर्त्तमानत्वं हेतुतावच्छेदकसम्बन्धेन हेत्वधिकरणेऽपि तेन तेन तथात्वं बोध्यम् । नीलधूमत्वादेर्वारणीयत्वे तु स्वसमानाधिकरणतादृश-

---

इतिज्ञानापत्तेरित्यप्यर्थमाह। तन्मन्दम्। प्रमेयत्वावच्छेदेनैव बाधनिश्चयस्य विरोधितया तत्सामानाधिकरण्येन बाधनिश्चयेऽपि तादृप्येण व्याप्तिग्रहसम्भवात् । अन्यथा व्याप्यान्यप्रमेयं नित्यमितिधीदशायां व्याप्यप्रमेयं जन्यमिति ग्रहस्याऽपलापापत्तेरितिदिक् ॥ स्वविशिष्टाधिकरणावृत्तियावत्साध्यासमानाधिकरणकत्वमित्यत्र सम्बन्धविवक्षामाह साध्येति । नातः समवायेन वह्नेः साध्यत्वे संयोगेन धूमादिहेतावतिव्याप्तिः । उभयत्रैव हेतुतावच्छेदकसम्बन्धेनावर्त्तमानत्वस्योक्ताविदमेतद्रूपभिन्नं गुणत्वादित्यादावतिव्याप्तिः स्यादत आह येन येनेति । यथाश्रुतस्य द्रव्यं सत्त्वादित्यादावतिव्याप्तिरिति भावः । हेतुतेति । तेन संयोगेन वह्निमति समवायेनावर्त्तमानस्य धूमावयवत्वादेः समवायेन धूमवति अवयवे वर्त्तमानत्वेऽपि वह्निमान् धूमादित्यादौ नाव्याप्तिरिति भावः । वस्तुतो लाघवादावश्यकत्वाच्च साध्यसाधनयोरधिकरणे विशेषणतयाविशेषेणैवाऽवर्त्तमानत्वं प्रागुक्तमिहाप्यनुसन्धेयम् ॥ वारणीयत्वे त्विति । वस्तुतः स्वमते नीलधूमत्वमपि व्याप्तिरेव तादृप्येण हेतुप्रयोगे तु अधिकेनैव निग्रहस्थानेन पुरुषो निगृह्यत इति भावः । स्वेति । स्वं साध्यसम्बन्धितावच्छेदकत्वेनाभिमतम् । स्वसमानाधिकरणं यत्तादृशसाध्यसम्बन्धितावच्छेदकीभूतं धर्मान्तरं तदघटितत्वेनेत्यर्थः । तथा च नीलधूमत्वस्य तादृशधूमत्वाघटितत्वादेव व्युदासः । द्रव्यं गुणाद्यन्यत्वे सति सत्त्वादित्यादौ विशिष्टसत्तात्वस्य स्वसमानाधिकरणं यद्गुणान्यत्वं धर्मान्तरं तद्घटितत्वाद्व्याप्तिरतस्तादृशेति । तथा च गुणाद्यन्यत्वस्य तत्र साध्यसम्बन्धितानवच्छेदकत्वात् तदघटितत्वेऽप्यदोषः । न च महाकालनिरूपितविशेषणतया दिक्कृतविशेषणतया वा गुणाद्यन्यस्य हेतु-

धर्मान्तराघटितत्वेन विशेषणीयम् । सामानाधिकरण्योपादानाद्-धूमप्रागभावत्वादिसंग्रहः । तदघटितत्वञ्च तदविषयकप्रतीतिविषयत्वम् । स्वरूपसम्बन्धविशेष एवावच्छेदकत्वम् । अत एव न ह्यतिप्रसक्तमवच्छेदकमित्यादिकमपि सङ्गच्छते । अन्यथाऽतिप्रस-

---

तायां गुणाद्यन्यत्वस्यापि द्रव्यत्वसम्बन्धितावच्छेदकत्वादुक्तदोष तादवस्थ्यम् प्रकृतहेतुतावच्छेदकसम्बन्धेन यत्साध्यसम्बन्धित्वं त दवच्छेदकधर्मान्तराघटितत्वस्यैव प्रवेश्यत्वात् । धूमत्वादेरपि स्वेनैव साध्यसम्बन्धितावच्छेदकधर्मेण घटितत्वादवच्छेदकत्वं न स्यादित्यन्तरपदम् । न चैवं नीलधूमत्वं नीलत्वविशिष्टधूमत्वं तच्चावच्छेदकं स्यात् धूमत्वस्य विशिष्टधूमत्वाभिन्नतया धर्मान्तरत्वाभावादिति वाच्यम् । स्वानवच्छिन्नप्रकारतावच्छेदकस्य धर्मान्तरपदेन विवक्षितत्वादिति भावः । धूमप्रागभावत्वेति । ननु धूमत्वस्य साध्यसम्बन्धितावच्छेदकत्वेऽपि हेतुताघटकस्वरूपसम्बन्धेन यत्साध्यसम्बन्धित्वं तदनवच्छेदकत्वेन धूमप्रागभावत्वस्य तदघटितत्वेऽपि न क्षतिरत आह आदीति । तेन धूमविशिष्टरासभत्वादेः परिग्रहः । अत्र धर्मस्य स्वसामानाधिकरण्यं हेतुतावच्छेदकताघटकसम्बन्धेन यत् स्वाधिकरणं तत्र साध्यसम्बन्धितावच्छेदकताघटकसम्बन्धेन वर्त्तमानत्वरूपं ग्राह्यम्, तेन यथाकथञ्चित्सम्बन्धेन धूमत्व-धूमप्रागभावत्वयोर्मिथः सामानाधिकरण्येऽपि न क्षतिः । हेतुतावच्छेदकताघटकसम्बन्धेन स्वाधिकरणे तेनैव सम्बन्धेन वर्त्तमानत्वं तु न तथा वाच्यम् । धूमत्वप्रकारकप्रमाविशेष्यत्वादेरपि व्याप्यतावच्छेदकत्वापत्तेः । ननु तदघटितत्वं तदविषयकप्रतीत्याविषयत्वं तदन्यत्वं च तदघटितत्वमित्यभावद्वयप्रवेशे गौरवादाह तदघटितत्वञ्चेति । मिश्रस्य मतान्तरमुपन्यस्यति स्वरूपेत्यादिना । अत एवेति । अतिप्रसक्तत्वविशिष्टेऽपि स्वरूपसम्बन्धरूपावच्छेदकत्वधीसम्भवेन तयोर्विरोधप्रतिपत्त्यर्थमेव तदग्रन्थावतारादितिभावः । अन्यथेति । यद्यनतिरिक्तवृत्तित्वमेवाच्छेदकत्वपदार्थस्तदेत्यर्थः । अतिप्रसक्ते । अतिप्रसक्तत्वावच्छिन्ने । अप्रसक्तत्वेनानाहार्यज्ञानासम्भवेन

क्ते अनतिप्रसक्तत्वस्याऽप्रसक्तत्वेन तन्निराकरणायोगात्। विरुद्धयोर्भावाभावयोरधिकरणे एकस्यैकेन सम्बन्धेन वृत्तिर्विरुध्यते, अतस्तत्रावच्छेदकभेदापेक्षा। अत एव व्यभिचारिणि साध्यतदभावसामानाधिकरण्ययोर्विरुद्धयोरुपपादनायोपाधितदभावावच्छेदकावनुमन्यन्ते न्यायाचार्याः। सत्तात्वन्तु गुणाद्यभावस्येव गुणस्यापि न सामानाधिकरण्यावच्छेदकम्। विरोधात्। अव्याप्यवृत्तेश्च कपिसंयोगादेरधिकरणे वृक्षादौ तदभावस्य संयोगेन च वह्नेरधिकरणे महानसादौ समवायावच्छिन्नप्रतियोगिताकतदभावस्य सत्त्वेनाविरुद्धत्वात्। वह्निमति च संयोगेन वर्त्तमानस्य धूमा-

---

तन्निराकरणायोगात्। आहार्यस्य तस्य निराकरणायोगादनुचितत्वादित्यर्थः। गुणवत् सत्त्वादित्यादौ सत्तात्वादेः साध्यसम्बन्धितावच्छेदकत्वमपाकर्तुं भूमिकामाह विरुद्धयोरित्यादि। एकस्य। एकरूपावच्छिन्नस्य। तेन धूमवान् वह्नेरित्यादौ वह्निव्यक्तीनां नानात्वेऽपि वह्नित्वस्य धूमसम्बन्धितानवच्छेदकत्वसम्पत्तिः। ननूक्तक्रमेणावच्छेदकभेदापेक्षायामप्रसिद्धान्त इत्यत आह अत एवेति। [अवच्छेदकाविति। तथा चोपाधिविशिष्टहेतुतावच्छेदकं साध्यसम्बन्धितावच्छेदकं उपाध्यभावविशिष्टं साध्याभावसम्बन्धितावच्छेदकमिति भावः।] विरोधादिति। एकस्यावच्छेदकत्वकल्पने विनिगमकप्रमाणाभावादिति भावः। विरुद्धयोरित्युक्तेः फलमाह अव्याप्यवृत्तेरिति। तदभावस्य। संयोगाद्यभावस्य। अविरुद्धत्वात् वृक्षत्वत्वादेर्न साध्यसामानाधिकरण्यावच्छेदकत्वविरोध इत्यग्रिमाभ्यामन्वयः। अत्रैवं सति संयोगी सत्त्वादित्यादावविरुद्धयोः संयोगतदभावयोः सामानाधिकरण्यावच्छेदकत्वं सत्तात्वस्य दुर्वारमिति चिन्त्यम्। ननु लीलावतीकृन्मते संयोगस्य व्याप्यवृत्तित्वात्तदभावो न वृक्षादावतः स्थलान्तरे विरुद्धयोरित्यस्य फलमाह संयोगेन चेति। तदभावस्य। वह्न्यभावस्य। एकेन सम्बन्धेनेत्यस्य फलमाह व-

देर्वह्नयभाववति स्वावयवे संयोगेनावर्त्तमानत्वाच्च तदवृत्तित्वम् धूमत्वादेर्न साध्यसामानाधिकरण्यावच्छेदकत्वविरोधः । व्यभिचारधीरप्येतद्व्याप्तिबुद्धौ विरोधिन्येव । तद्धर्मविशिष्टस्य साध्यानधिकरणवृत्तित्वग्रहे तदवच्छेदेन साध्यधिकरणवृत्तित्वग्रहायोगात् । अस्तु वा एतन्मते हेतुवृत्तिधर्मस्य साध्यसामानाधिकरण्यानवच्छेदकत्वमेव व्यभिचारः । तद्धीरेव साक्षाद्विरोधिनी, व्यभिचारान्तरधीस्तु परम्परयेति । नीलधूमत्वादिकन्तु गौरवान्नावच्छेदकम् । एवञ्च लघु घटत्वादिकमेव सामानाधिकरण्यावच्छेदक व्याप्तिः न तु तत्सहचरितकम्बुग्रीवादिमत्त्वादिकम् । तेन गुरु

ह्मितीति । ननूक्तव्याप्तेरनुमित्युपयुक्तत्वे साध्यवदन्यवृत्तित्वादिलक्षणव्यभिचारस्य तज्ज्ञानाविरोधित्वाद्धेत्वाभासत्वं न स्यादत आह व्यभिचारेति । ग्रहायोगात् । ग्रहानुत्पत्तेः । तथा चानुभववलाद्धिन्नविषयकमपि ज्ञानं प्रतिबन्धकमिति भावः । समानविषयकमेव ज्ञानं विरोधीति नव्यानां मतमनुसृत्याह अस्तु वेति । साक्षात् । ग्राह्याभावनिर्णयविधया । नन्वेवं व्याप्तिग्रहप्रतिबन्धाय कथकानां व्यभिचारान्तरस्योपन्यासो न स्यादत आह व्यभिचारान्तरेति । परम्परयेति । तथा च प्रकृतव्याप्त्यभावावच्छेदकधर्मविधयैवोपाधेरिव व्यभिचारान्तरस्याप्युपन्यासः कथायामिति भावः । स्वसमानाधिकरणतादृशधर्मान्तरेत्यादिविशेषणाप्रक्षेपेण पूर्वकल्पालाघवमाविष्करोति नीलधूमत्वेति । गौरवादिति । लघुधर्मसम्भवे स्वरूपसम्बन्धरूपावच्छेदकत्वस्य तत्रैवावस्थितिस्वाभाव्यादिति भावः । ननु गुरोरपि तवच्छेदकत्वे घटवान् कम्बुग्रीवादिमत इत्यादौ कम्बुग्रीवादिमत्त्वावच्छेदेनापि व्याप्तिर्न स्यात् घटत्वस्यैव लघोस्तथात्वसम्भवादतस्तत्रेष्टापत्तिमाह एवञ्चेति । ननु गुरुधर्मस्यानवच्छेदकत्वे तदवच्छेदेन व्याप्तिग्रहो भ्रमः स्यात् एवं गुरुणैव व्यभिचारिसाधारणेनापि धर्मेण कथायां हेतोरुपन्यासः स्यात् व्याप्यतानवच्छेदक-

णापि रूपेण व्याप्तिग्रहे कथायां हेतोरुपन्यासे वाऽनुयोगः प्रकारान्तरव्याप्तिवादिनामपि समानः । एवं द्रव्यं रूपात् रसादिस्वादौ सकलगुणसाधारणस्य गुणत्वस्य द्रव्यत्वादिसाधारणस्य गुणासमवेतत्वे सति द्रव्यसमवेतत्वस्य वैकस्यावच्छेदकत्वसम्भवे

त्वस्याविशिष्टत्वादित्यत आह तेन चेति । कम्बुग्रीवादिमत्त्वादिना चेत्यर्थः । तदवच्छिन्नविशेष्यक एव व्याप्तिग्रहो न तु तस्य साध्यसम्बन्धितावच्छेदकत्वावगाहीत्युक्तौ न भ्रमत्वानुयोगः सम्भवतीत्यतः कथायामित्युक्तम् । प्रकारान्तरेति । व्यापकसामानाधिकरण्यादिव्याप्तिवादिनामपि स्वरूपसम्बन्धातिरिक्तस्यव्याप्यतावच्छेदकत्वस्य दुर्वचत्वादिति भावः । समान इति । यदि च व्याप्तिसमनियतधर्मान्तराघटितेन व्याप्तिसमनियतरूपेणैव हेतूपन्यासः साम्प्रदायिक इत्युच्यते तदा ममापि तुल्यमिति भावः । ननु शरीरगौरवस्येवाश्रयगौरवस्यापि कल्पनापरिपन्थित्वाद्द्रव्यत्वादौ साध्ये रूपत्वरसत्वादीनां बहूनामप्यवच्छेदकत्वं न स्यात् लाघवेन गुणत्वस्यैकस्यैव तथात्वादित्यतस्तत्रेष्टापत्तिमाह एवमिति । ननु रूपत्वादिकमिव गुणत्वमपि न सर्वसाध्यसम्बन्धिसाधारणमत आह द्रव्यादीत्यादि । आदिपदेन गुणकर्मघटपटत्वादीनां परिग्रहः । द्रव्यसमवेतत्वस्य साध्यतदभावसहचरितसत्तावृत्तित्वेन सत्तात्वस्यैव साध्यसम्बन्धितावच्छेदकत्वायोगादाह गुणासमवेतत्वे सतीति । न च रूपरसादीनां प्रत्येकासमवेतत्वे सतीत्युक्तावपि सत्तावारणसम्भवाद्विनिगमकाभावेन तेषामनन्तानां गुरुशरीराणामवच्छेदकत्वप्रसक्तौ तदपेक्षया लघुशरीराणां रूपत्वरसत्वादीनां बहूनां तथात्वौचित्यमिति वाच्यम् । गुरुशरीराणामपि रूपरसादिप्रत्येकासमवेतत्वे सति द्रव्यसमवेतत्वानां सर्वेषामेव घटपटादिद्रव्यघटत्वपटत्वादिजातिविशेषपदार्थसाधारण्यानुरोधाद्विनिगमनाविरहेणावच्छेदकत्वस्य प्रामाणिकत्वात् । रूपत्वरसत्वगुणत्वादीनामखण्डानामपि द्रव्यजात्यादिसाधारण्याविरहेणावच्छेदकत्वाकल्पनादिति भा-

बहूनां रूपत्वादीनां न तत्त्वम्, विरुद्धधर्मद्वयाधिकरणयोश्च एकस्यैकेन सम्बन्धेन वृत्तौ कथं विरोधः कथं वा द्रव्यत्वादौ साध्ये हेतुत्वेन विशिष्टरूपादेः प्रयोगः तथा परामर्शाद्धाऽनुमितिरिति विभावनीयम्। अपरे तु यद्धर्मविशिष्टहेत्वधिकरणत्वं साध्याधिकरणताया अवच्छेदकं स धर्मो व्याप्तिः। ग्रन्थस्तु धूमस्य धूमवतः

वः। न तत्त्वम्। नावच्छेदकत्वम्। अत्र द्रव्यत्वे साध्ये रूपरसादिप्रत्येकासमवेतत्वे गुणासमवेतत्वे वा सति द्रव्यसमवेतत्वं न साध्यसम्बन्धितावच्छेदकं किं तु द्रव्येतरासमवेतत्वमात्रं लाघवात् तावतैव घटादिवृत्तिगुणकर्मघटत्वादिजातिविशेषपदार्थानामुपग्रहसम्भवादिति तु चिन्त्यम्। मतमिदं दूषयति विरुद्धेत्यादिना। कथं विरोध इति। तथा च सत्तात्वावच्छेदेनैव गुणतभावयोः सामानाधिकरण्यसम्भवात् गुणवान् सत्त्वादित्यादावतिव्याप्तिरिति भावः। नन्वेकावच्छेदेन विरुद्धभावाभावयोः सामानाधिकरण्याप्रतीतेरेव विरोधः कल्प्यतामित्यत आह कथं वेति। साध्यसम्बन्धितानवच्छेदकप्रकारेणापि हेतुप्रयोगे द्रव्यं प्रमेयादित्यपि प्रयोगापत्तेरिति भावः। ननु तत्प्रकारेण हेतुप्रयोगे तद्धर्मस्य साध्यसम्बन्धितावच्छेदकत्वं न तन्त्रम् किन्तु प्रकृतव्याप्तिनियतधर्मान्तराघटितत्वे सति प्रकृतव्याप्तिनियतत्वं तच्च रूपत्वादेरप्यक्षतं न तु प्रमेयत्वादेरतो नातिप्रसङ्ग इत्यत आह तथा परामर्शाद्धेति। स्वरूपसम्बन्धरूपावच्छेदकत्वावगाहिपरामर्शाद्धेत्यर्थः। कथमित्यनुषज्यते। अनुमितिरिति। यदि धूमत्वादौ स्वरूपसम्बन्धात्मकमवच्छेकत्वं नाम वस्तु स्यात्तदा तद्गोचरपरामर्शसम्भवात्ततोऽनुमितिः सम्भाव्येत वस्तुतस्तत्रैव मानाभावो न हि धूमो वह्निसमानाधिकरण इत्यादिप्रतीतिः धूमो द्रव्यमित्यादिबोधव्यावृत्तं धूमत्वे सामानाधिकरण्यावच्छेदकत्वमवगाहत इति कस्याप्यनुभवसिद्धमिति भावः। यद्धर्मविशिष्टहेत्वधिकरणत्वम्। यद्धर्मावच्छिन्नाधिकरणत्वम्। ननु हेतुमत्त्वस्य साध्यसम्बन्धितावच्छेदकत्वे धू-

धूमत्वं धूमवत्त्वं वन्हेस्तु वन्हिमतस्त्वसादिप्रकारेण व्याख्येयः। अत्र चावच्छेदकत्वं न स्वरूपसम्बन्धविशेषः, विरुद्धदिक्कालावच्छिन्नवृत्तिकस्य न्यूनदेशकालवृत्तिकादेश्चाधिकरणतायां तदसम्भवात्तुल्यवृत्तिकधर्मद्वयाधिकरणत्वयोर्मिथोऽवच्छेद्यावच्छेदकभावस्य च नियन्तुमशक्यत्वात्। नाप्यन्यूनवृत्तिकत्वम्, न्यूनवृत्तिकधूमादेरव्याप्यतापत्तेः। किन्त्वनतिरिक्तवृत्तित्वं स्वान्यूनवृत्तित-

---

मत्वादेर्हेतुतावच्छेदकस्य तथात्वप्रदर्शनं मूलकृतो विरुद्धमत आह ग्रन्थस्त्विति। धूम एव मात्रो धर्मो यस्येतिव्युत्पत्त्या धूममात्रपदाद्धूमवतो लाभसम्भवात्तत्परित्यज्यैव वह्नेस्त्विति पाठं व्याचष्टे वन्हिमतस्त्विति। इत्यादीत्यादिपदान्न वह्नित्वमित्यादावपि न वह्निमत्त्वमित्याद्यर्थः। विरुद्धेति। साध्यविरुद्धदिगवच्छिन्नवृत्तिकस्य साध्यविरुद्धकालावच्छिन्नवृत्तिकस्य च तदनवच्छेदकत्वानियमात्। तथा च भूगोलकमुदयगिरिमदस्तात्वलवत्वात् कपालमेतद्घटवत् घटध्वंसादित्यादावव्याप्तिरिति भावः। न्यूनेति। साध्यन्यूनदेशवृत्तिकस्य साध्यन्यूनकालवृत्तिकस्य च हेतोरधिकरणतायां साध्याधिकरणतावच्छेदकत्वासम्भवात् तन्न्यूनदेशादिवृत्तिकस्य तदनवच्छेदकत्वनियमात्। तथा च इदं द्रव्यं पृथिवीत्वात् कालो घटत्ववान् घटादित्यादावव्याप्तिरिति भावः। ननूक्तनियमद्वयमप्रयोजकमत आह तुल्यवृत्तिकयोश्चेति। चकारेणाऽतुल्यवृत्तिकयोः परिग्रहः। अवच्छेद्येति। स्वरूपसम्बन्धरूपावच्छेद्यावच्छेदकभावस्येत्यर्थः। नियन्तुम्। अवधारयितुम्। अशक्यत्वादिति। तथा च तद्रूपवत्त्वावच्छेदेन तद्रसवत्त्वमित्यादिप्रतीत्यानतिरिक्तवृत्तित्वस्यैवावच्छेदकत्वस्य कल्पस्यावगाहनाद्धेतुसाध्याधिकरणतयोः स्वरूपसम्बन्धरूपावच्छेदकत्वे मानाभावादप्रसिद्धिरेव लक्षणस्येति भावः। नापीति। अपिना अन्यूनानतिरिक्तवृत्तित्वस्य परिग्रहः अतो न धूमवान्वह्नेरित्यादौ अतिव्याप्तिः। उभयत्र दूषणमाह न्यूनवृत्तिधूमत्वादेरिति। ननु वाच्यं ज्ञेयत्वादित्यादौ साध्याधिकरणत्वातिरिक्ताप्रसिद्धिरत आह स्वान्यूनेति। स्वं स्वीयम्। तथा च स्वीयाधिक-

त्कत्वमिति यावत् । अतो न केवलान्वयिन्यव्याप्तिः । अत्र च यदन्यूनवृत्ति साध्यं तत्वं स्वव्यापकसाध्यम्बन्धित्वपर्य्यवसन्नमपेक्ष्य गौरवं परमवशिष्यते तच्च ग्रन्थकार एवाऽग्रे विवेचयिष्यत इत्याहुः ।

रणत्वान्न्यूनवृत्तिसाध्याधिकरणाताकत्वमर्थः गोत्वस्याप्यश्वत्वन्यूनवृत्तिभिन्नत्वादयं गौरश्वत्वादित्यादावतिव्याप्तेराह स्वव्यापकेत्यादि । अत्र इति । लाघवादन्योन्याभावगर्भैव व्याप्तिरित्यादि ग्रन्थ इत्यर्थः ॥

इति श्रीजगदीशतर्कालङ्कारविरचिता विशेषव्याप्तिः समाप्ता ।

चिन्तामणेः अतएवचतुष्टयम् ।

अथ वा यत्सामानाधिकरण्यावच्छेदकावच्छिन्नं यस्य स्वरूपं तत्तस्य व्याप्यम्। वह्निसामानाधिकरण्यं हि धूमे धूमत्वेनावच्छिद्यते सोपाधौ तूपाधिना ॥

दीधित्या अतएवचतुष्टयम् ।

उपाधिनेति । विशेषणतामापन्नेनोपाध्यनुप्रवेशेनेति यावत् । वह्नावार्द्रेन्धनप्रभववन्हित्वेन रासभार्द्रेन्धनादौ च तथाविधवन्हिविशिष्टत्वेन धूमसम्बन्धेऽवच्छिद्यमाने तथाविधवन्हेरप्यनुप्रवेशात् ।

जागदीश्या अतएवचतुष्टयग्रन्थः ।

सर्वत्र साक्षादुपाधेरवच्छेदकत्वासम्भवादाह विशेषणेति । यद्यपि सर्वस्यैवोपाधेः सामानाधिकरण्य सम्बन्धेन साध्यसम्बन्धितावच्छेदकत्वं सम्भवत्येव तथापि प्राचां ऽमते सामानाधिकरण्यादेः सम्बन्धत्वे विवादादिदमुक्तम् । ननु विशेषणीभूतस्याप्युपाधेर्नावच्छेदकत्वं किन्तु तत्कोटिनिविष्टतामात्रमत आह उपाध्यन्विति । उपाधेरनुप्रवेशो यत्रेति व्युत्पत्त्या उपाधिर्घटितेनेत्यर्थः । उपाधिविशिष्टेनेति पाठेप्ययमेवार्थो ग्राह्यः । अनुप्रवेशं व्युत्पादयति वह्नावित्यादिना । आर्द्रेन्धन प्रभवेति । आर्द्रेन्धनप्रभववह्नित्वे अवच्छेदके आर्द्रेन्धनप्रभवत्वप्रकारेण तादृशवह्न्यात्मकोपाधेर्घटकत्वादिति भावः । यद्रूपेणोपाधित्वं तद्रूपावच्छिन्नस्याप्यवच्छेदकत्वप्रवेशं दर्शयति रासभेत्यादिना । यद्वा साक्षाद्विशेषणीभूतमुपाधिं व्युत्पाद्य परम्पराविशेषणभूतन्तमाह रासभे-

रासभत्वादिकन्तु निविशते न वेत्यन्यदेतत् । अत्र चेदं स्नेहवत् निःस्नेहं वा स्पर्शादित्यत्र विनाप्युपाधिप्रवेशं शीतत्वेन शीतान्यत्वेन वा साध्यासमानाधिकरणतया साधनव्यापकतया वा स्वयमनुपाधिना केवलेन विशेषणीभूय वा शीतान्यस्पर्शत्वेन चोपाधिना स्वत एव स्पर्शे साध्यसम्बन्धोऽवच्छिद्यत इत्युपाधिनैवेति नियमे न तात्पर्य्यम्, परन्तु शुद्धस्य साधनतावच्छेदकस्यानवच्छेदकतामात्रे ।

त्यादि । तथाविधेति । आर्द्रेन्धनप्रभववह्निविशिष्टत्वेनेत्यर्थः । तथाचार्द्रेन्धनप्रभवविशिष्टत्वं साध्यसम्बन्धितावच्छेदकमिति भावः । ननु धूमवान् रासभादित्यादावार्द्रेन्धनजन्यवह्निविशिष्टरासभत्वमप्यवच्छेदकं सम्भवति तत्कुतः परित्यक्तमत आह रासभत्वादिकमिति । नीलधूमत्वादेरवच्छेदकत्ववादिनां नव्यानां मतमाह निविशत इति । स्वसमानाधिकरणावच्छेदकान्तराघटितस्यैव व्याप्त्यवच्छेदकत्वमिति प्राचां मतेनाह न वेति । अन्यदेतदिति । उभयथाप्युपाध्यनुप्रवेशाभावादिति भावः । उपाधेरिव साधनतावच्छेदकस्यावच्छेदकत्वेपि सोपाधावित्यादिमूलसामञ्जस्यान्न तेन व्यभिचारिवारणं लभ्यत इत्युपाधिनैवेति नियमे मूलस्थतुकारस्य तात्पर्य्यं केचिदाहुः । तन्निरस्यति अत्रेति । इदं स्नेहवत् स्पर्शादित्यत्र विनाप्युपाधिप्रवेशं शीतत्वेन साध्यासमानाधिकरणतया स्वयमनुपाधिना केवलेन साध्यसम्बन्धोवच्छिद्यत इत्यन्वयः । ननूपाधिनैव विशेषणीभूयावच्छिद्यत इति नियमः तेनोपाधिभिन्नेन विशेषणीभूतेन नावच्छिद्यत इति केवलशीतत्वेन साध्यसम्बन्धितावच्छेदेपि न क्षतिः । न चैवं साधनतावच्छेदकस्यावच्छेदकत्वेप्युक्तनियमसम्भवात्प्रकृतानुपयोगः साधनतावच्छेदकभिन्नो यो विशेषणतानापन्नस्तदन्यस्यैव विशेषणीभूतपदेनोक्तत्वादत आह निःस्नेहमिति । निःस्नेहं स्पर्शादित्यत्रशीतान्यत्वेन साधनव्यापकतया स्वयमनुपाधिनाविशेषणीभूय साध्यस-

अत एव साधनतावच्छेदकभिन्नेन येन साधनता-

यत एव सोपाधौ साधनतावच्छेदकातिरिक्तं नियतमवच्छेदकम् अत एव तद्विशेषस्तत्रोपाधिरिति वदन्तीत्याह अत एवेत्यादि।

स्बन्धोवच्छिद्यत इत्यन्वयः। शीतान्यस्पर्शत्वेन तदवच्छेदे शीतान्यत्वस्यापि विशेषणविधयावच्छेदकत्वादिति भावः। यत्तु शीतो वायुरिति प्रतीत्या वायुस्पर्शस्यापि यदि शीतत्वं तदा तदवच्छेदेन स्नेहसामानाधिकरण्याभावान्न तदादाय व्यभिचारसम्भव इत्यत आह निःस्नेहमितीति। तत्तुच्छम्। एवं सत्युष्णञ्जलमिति प्रत्ययाज्जलस्पर्शस्यापि शीतान्यस्पर्शत्वसम्भवात्तदवच्छेदेन निःस्नेहत्वस्य सामानाधिकरण्यासम्भवात्तदादायापि व्यभिचारस्योपन्यासायोगात्, केवलेनेत्यादिपदसन्दर्भविरोधाच्च। ननूपाधिना विशेषणीभूयैवावच्छिद्यत इति नियमः तेन विशेषणतानापन्नेनोपाधिना साध्यसम्बन्धो नावच्छिद्यत इत्यर्थलाभात् उपाधिभिन्नेन विशेषणतयावच्छेदेपि न क्षतिः, न च साधनतावच्छेदकत्वेप्युक्तनियमसम्भवात् प्रकृतानुपयोगः, साधनतावच्छेदकभिन्नत्वे सत्युपाधिभिन्नो यस्तदन्यस्यैवोपाधिपदेन विवक्षितत्वादत आह शीतान्यस्पर्शत्वेनेति। यद्यपि क्षित्यादौ व्यभिचारात्तस्योपाधेः शुद्धसाध्यव्यापकत्वं तथाप्युष्णस्पर्शजलान्यतरत्वाद्यवच्छिन्नसाध्यव्यापकत्वं द्रष्टव्यम्। न तात्पर्य्यमिति। नन्वेवं साधनतावच्छेदकस्यानवच्छेदकत्वाप्राप्तेरुपाधिनेतिमूलोक्तिर्विफलेत्यत आह परन्त्विति। शुद्धस्वेति। तेन धूमवान् वन्हेरित्यादावार्द्रेन्धनजन्यवन्हित्वेन धूमसम्बन्धेऽवच्छिद्यमाने वह्नित्वस्य प्रवेशेपि न क्षतिः। नियतम्।अवश्यम्।अवच्छेदकम्। साधननिष्ठसाध्यसम्बन्धितावच्छेदकम्। अत एवेति। अन्यथा यत्र साधनतावच्छेदकातिरिक्तः साध्यसम्बन्धितावच्छेदकोऽप्रसिद्धः तत्र सोपाधावुक्तलक्ष्यतावच्छेदकस्याव्याप्त्यापत्तेरिति भावः। स्नेहवत् स्पर्शादित्यादौ साध्यसम्बन्धितावच्छेदकस्यापि शीतत्वादेरुपाधित्वाभावादाह तद्विशेष इति। साधननिष्ठसाध्यसम्बन्धितावच्छेदकविशेष इत्यर्थः। तत्र। सोपाधौ। वदन्ति। प्राभाकराः। ननु

भिमते साध्यसम्बन्धोऽवच्छिद्यते स एव तत्र साधने विशेषणमुपाधिरिति वदन्ति ।

अत्रावच्छेदकत्वं सामानाधिकरण्येन, तत्त्वञ्चान्यूनवृत्तित्वं व्यापकत्वमिति यावत्, तच्चाधिकरणान्तर्भावेन। तेन साध्यविशिष्टसाध-

---

शब्दवान् द्रव्यत्वादित्यादौ साधननिष्ठसाध्यसामानाधिकरण्यस्य देशविधयावच्छेदकत्वं गगनादेरप्यस्तीति तत्रातिव्याप्तिरित्यत आह अत्रेति । सामानाधिकरण्येन । समानाधिकरणविधया नत्वधिकरणविधया । तथा च समानाधिकरणीभूय यः साधननिष्ठसाध्यसामानाधिकरण्यस्यावच्छेदकः स उपाधिः शब्दवान् द्रव्यत्वादित्यादौ च गगनादिर्न तथेति तद्व्युदास इति भावः । ननु साध्यसम्बन्धितायाः समानाधिकरणविधयावच्छेदकत्वमात्रं न स्वरूपसम्बन्धविशेषो मानाभावात् नाप्यनतिरिक्तवृत्तित्वं द्रव्यं जातेरित्यादौ घटत्वाद्यतिव्याप्त्यापत्तेरत आह तत्त्वं चेति । समानाधिकरणीभूयावच्छेदकत्वं चेत्यर्थः । यद्वा ननु द्रव्यं जातेरित्यादौ साध्यसमानाधिकरणीभूतस्यैव घटादेः साधननिष्ठसाध्यसम्बन्धितायां देशविधया अवच्छेदकत्वादुक्तविवक्षया अपि तद्वारणासम्भव इत्यत आह तत्त्वं चेति । ननु तदव्यापकत्वे सति तत्समानाधिकरणत्वलक्षणस्य न्यूनवृत्तित्वस्य विरहश्चेदन्यूनवृत्तित्वं तदा धूमवान् वह्नेरित्यादौ जलत्वादावतिव्याप्तिः तस्य समानाधिकरणविधया साध्यसामानाधिकरण्याव्यापकत्वेपि तत्समानाधिकरणत्वाभावादेव तन्न्यूनवृत्तिभिन्नत्वादत आह व्यापकत्वमिति । ननु साधननिष्ठसाध्यसामानाधिकरण्यस्य व्यापकत्वमुपाधिताघटकसम्बन्धेनैव वाच्यमन्यथा जलं रसवत्त्वादित्यादौ स्वरूपसम्बन्धेन पृथिवीभिन्नत्वाद्युपाधेः सम्बन्धान्तरेण साधननिष्ठसाध्यसम्बन्धित्वाव्यापकत्वादव्याप्त्यापत्तेः एवञ्च तत्रैव समवायेन स्नेहाद्युपाधावव्याप्तिः तस्य समवायेन रसावृत्तित्वात् एवं मधुरत्वजातावतिव्याप्तिश्च जलवृत्तिरसमात्रस्यैव मधुरत्वनियमादत आह तच्चेति । तत्। व्यापकत्वम् । अधिकरणेति।साधननिष्ठसाध्यसा-

नतावच्छेदकावच्छिन्नसाधनवत्त्वव्यापकाधिकरणताकत्वं पर्य्यवस्यति । निरुक्तविशिष्टसाधनव्यापकत्वमिति तु निष्कर्षः । इत्थञ्च

मानाधिकरण्यावच्छेदकीभूताधिकरणान्तर्भावेणेत्यर्थः । तथा च प्रकृतसाधननिष्ठसाध्यसामानाधिकरण्यावच्छेदकीभूतं यदधिकरणं तन्निष्ठस्योपाधिताघटकसम्बन्धावच्छिन्नाभावस्याऽप्रतियोगित्वमेव प्रकृते व्यापकत्वं वाच्यमिति भावः । ननु स्वमते सामानाधिकरण्यस्य व्याप्यवृत्तित्वादवच्छेदकतासम्बन्धेन तद्धत्वाप्रसिद्ध्या निरुक्तव्यापकत्वासम्भवः सत्तायां द्रव्ये गुणसामानाधिकरण्यमित्यादिप्रतीत्या सत्तायां गुणाधिकरणीभूतद्रव्यादिवृत्तित्वस्यैव विषयीकरणात् । न च प्रकृतसाधननिष्ठसाध्यसामानाधिकरण्यनिरूपकाधिकरणान्तर्भावेणैव व्यापकत्वं प्रवेश्यमतो नोक्तदोषः, तावतापि द्रव्यं जन्यत्वे सति सत्त्वादित्यादौ स्पर्शवत्त्वादावव्याप्तिप्रसङ्गात् जन्यत्वविशिष्टसत्तानिष्ठं यद्द्रव्यत्वसामानाधिकरण्यं तन्निरूपकत्वस्य गगनादेरपि सत्त्वादित्यस्वरसाल्लाघवाच्चाह तेनेति । साध्यपदं प्रकृतसाध्यपरम् । साध्यविशिष्टेति । साध्यतावच्छेदकावच्छिन्नविशिष्टेत्यर्थः । तेन विशिष्टसत्तावाञ्जातेरित्यादौ द्रव्यत्वस्य केवलसत्त्वविशिष्टजातिमत्त्वाव्यापकत्वेपि न तत्राव्याप्तिः । गोत्ववानश्वत्वादित्यादौ च न सास्नावत्त्वमुपाधिः परमते विरोधभङ्गकस्यैव लक्ष्यत्वादतः तत्र साध्यविशिष्टसाधनाप्रसिद्धावपि न क्षतिः । येन सम्बन्धेन साधनतावच्छेदकत्वं तत्सम्बन्धेन वावच्छिन्नत्वस्य लाभार्थं साधनपदम्, तेन प्रत्यक्षः स्पर्शादित्यादौ साध्यविशिष्टस्य विषयितासम्बन्धेन स्पर्शत्वाद्यवच्छिन्नस्य ज्ञानादेरव्यापकत्वेपि रूपवत्त्वाद्युपाधौ नाव्याप्तिः न चाधिकरणतापदवैयर्थ्यम् । सम्बन्धितार्थकस्य तस्य वृत्त्यनियामकसम्बन्धेनोपाधावव्याप्तिवारकत्वात् अन्यथा तत्सम्बन्धावच्छिन्नप्रतियोगित्वाप्रसिद्ध्या तेन व्यापकत्वायोगादिति भावः । सम्बन्धमात्रस्यैव प्रतियोगितावच्छेदकत्वमतेनाह निरुक्तेति । प्रकृतसाध्यविशिष्टप्रकृतसाधनव्यापकत्वमित्यर्थः । अत्र कालो विभुत्वादित्यादौ महाकालनिरूपितविशेषणतया घटादेरुपाधित्वसम्पत्तये निरुक्त-

सत्ताद्येकव्यक्तिकहेतुनिष्ठद्रव्यत्वादिसामानाधिकरण्यव्यापकसामानाधिकरण्यप्रतियोगिनि घटत्वादौ नातिप्रसङ्गः, न वा द्रव्यं जन्यत्वे सति सत्त्वादित्वादौ द्रव्यत्वविशिष्टसत्ताद्यव्यापके स्पर्शवत्त्वादावप्रसङ्गः। निःस्नेहं स्पर्शात् द्रव्यं सत्त्वादित्वादौ शीतस्पर्शान्यत्वरूपान्यत्वादेर्वारणाय तत्रेत्यादि। तत्र। साध्यविशिष्टे साधने।

साधनव्यापकाधिकरणताकत्वमेवोचितमन्यथा तादृशसम्बन्धेन प्रतियोगिवैयधिकरण्याद्यप्रसिद्ध्या तन्नाव्याप्त्यापत्तेरिति चिन्तनीयम्। ननु साधननिष्ठसाध्यसामानाधिकरण्यस्य सामानाधिकरण्यसम्बन्धेन व्यापकत्वविवक्षयैव जलं रसवत्त्वादित्यादौ स्नेहवत्वाद्यव्याप्तेर्मधुरत्वाद्यतिव्याप्तेश्च वारणसम्भवादधिकरणान्तर्भावेण व्यापकत्वानुसरणं विफलमत आह इत्थं चेति। चोऽवधारणेऽत्थमेवेत्यर्थः तथाच द्रव्यं सत्त्वादित्यादौ घटत्वादिवारणायैव तावत्पर्य्यन्तानुसरणमिति भावः। द्रव्यं जातेरित्यादौ नानाव्यक्तिसाधनस्थले पटत्वादेरपि साधनतावच्छिन्ननिष्ठसाध्यसामानाधिकरण्यं प्रत्येव सामानाधिकरण्यसम्बन्धेन घटत्वस्य व्यापकत्वायोगादेकव्यक्तीत्युक्तम्। साधनतावच्छेदकावच्छिन्नेत्यस्य फलमाह न वेति। द्रव्यत्वादिविशिष्टसत्ताया आत्माद्यवच्छेदेन सत्त्वात्स्पर्शवत्त्वादेरव्यापकत्वादिति भावः। निःस्नेहं स्पर्शादित्यत्र शीतस्पर्शान्यत्वादेः साधनाव्यापकत्वविवक्षयापि वारणसम्भवादाह द्रव्यं सत्त्वादिति। शीतस्पर्शान्यत्वादेरनुपाधित्वे विरोधाभञ्जकत्वमात्रं न तन्त्रं साधनव्यापकतया व्यभिचारानुन्नायकत्वस्यापि तत्र तथात्वसम्भवादतः साध्यव्यापकत्वे सति साधनाव्यापकत्वेन व्यभिचारोन्नयनक्षमस्यापि विरोधभञ्जकत्वमात्रेण यस्यानुपाधित्वं तत्रातिप्रसङ्गमाह द्रव्यं सत्त्वादित्यादावितीत्यपि केचित्। ननु शीतस्पर्शान्यत्वमपि साधनवृत्तितया तत्र विशेषणं भवत्येवेत्यतो व्याचष्टे विशेषणमिति। व्यावर्त्तकत्वं भेदानुमापकत्वं तच्च शुद्धसत्तायां साध्याभावविशिष्टसत्ताभेदविरहेण द्रव्यं सत्त्वादित्या-

विशेषणम्। साध्याभावविशिष्टात्साधनात्सामानाधिकरण्येन व्यावर्त्तकं साध्याभावविशिष्टनिरुक्तसाधनवदवृत्तीति यावत्। एवञ्च द्र-

---

दौ गुणवत्त्वाद्युपाधावव्याप्तमतो व्याचष्टे साध्यविशिष्टसाधन इति। विरुद्धधर्मद्वयवैशिष्ट्यावच्छिन्नयोः सत्त्वयोर्मिथो भेदस्य प्राच्यैः स्वीकारादिति भावः। भेदमात्रस्यानुमापकत्वलक्षणं व्यावर्त्तकत्वं निःस्नेहं स्पर्शादित्यत्र शीतत्वभेदानुमापकतया शीतस्पर्शान्यत्वादेरप्यक्षतमत उक्तं साध्याभावविशिष्टात्साधनादिति। तत्सामान्यादित्यर्थः। तथा च शीतस्पर्शेपि सामानाधिकरण्यसम्बन्धेन शीतस्पर्शान्यत्वादेः सत्त्वात् तत्र च निःस्नेहत्वाभावविशिष्टसाधनभेदविरहादिति भावः। तत्र साधनसामान्यव्यावर्त्तकत्वमसम्भवि यत्किञ्चित्साधनव्यावर्त्तकत्वं तु निःस्नेहं स्पर्शादित्यादौ हिमान्यत्वेऽतिप्रसक्तं तस्यापि सामानाधिकरण्यसम्बन्धेन हिमस्पर्शस्यैव भेदानुमापकत्वादतो विशिष्टान्तम्। साध्याभावविशिष्टसामान्याद्व्यावर्त्तकत्वोक्ताविदं गुरु रूपादित्यत्र तेजोन्यत्वादावव्याप्तिः तेजोन्यत्वसामान्याधिकरणस्य वायुत्वादेर्गुरुत्वाभावविशिष्टभिन्नत्वविरहेण तस्य निरुक्तव्यावर्त्तकत्वाभावादतः साधनादित्युक्तम्। उपाधिताघटकसम्बन्धेन व्यावर्त्तकत्वोक्तौ जन्यं द्रव्यादित्यत्र समवेतत्वोपाधावव्याप्तिः द्रव्यणुके व्यभिचारेण स्वरूपसम्बन्धेन समवेतत्वस्य जन्यत्वाभावविशिष्टद्रव्यभेदानुमापकत्वाभावात्, एवं निस्नेहं स्पर्शादित्यत्र शीतस्पर्शान्यत्वेतिप्रसङ्गश्च स्यात् शीतस्पर्शान्यत्वावच्छेदेनैव निःस्नेहत्वाभावविशिष्टस्पर्शभेदस्य सत्त्वादत उक्तं सामानाधिकरण्येनेति। ननु साध्याभावविशिष्टसाधनभेदस्यानुमापकत्वं न तत्फलोपधायकत्वं तदनुपधायकोपाधावव्याप्तेः निःस्नेहं स्पर्शादित्यादौ व्याप्तिभ्रमेण तदनुमापके शीतान्यत्वादावतिप्रसङ्गाच्च किन्तु साध्याभावविशिष्टसाधनभेदस्य व्याप्यत्वपर्यवसितं तत्स्वरूपयोग्यत्वमेव तद्वाच्यं तथा च द्रव्यं सत्त्वादित्यादौ गुणकर्मान्यत्वोपाधावव्याप्तिः तत्समानाधिकरणस्यापि सत्त्वस्य द्रव्यत्वाभावविशिष्टसत्त्वाभिन्नतयोक्तव्याप्तिविरहात् एवं साध्यविशिष्टसाधनार्थकस्य तत्रेत्यस्य वैयर्थ्यम-

व्यं सत्त्वादित्यत्र सत्ताया अभेदेऽपि गुणकर्म्मान्यत्वे नाव्याप्तिः, नापि द्रव्यं कर्म्मान्यत्वे सति सत्त्वादित्यत्र गुणान्यत्वादौ। इत्थञ्च साधनतावच्छेदकस्यानवच्छेदकत्वद्योतनाय परं तद्भिन्नत्वमुक्तं न तु विवक्षितमेव तत्। वैयर्थ्यात् इदं दधि जन्यं वा दध्न इत्यादौ दधित्वाद्यव्याप्तेश्च । यद्वा प्रकृतसाधनतावच्छेदकानवच्छेद्यप्रकृतसाधननिष्ठसाध्यसम्बन्धितावच्छेदकत्वं पूर्वदलार्थः । अनवच्छे-

---

पीत्यत आह साध्याभावविशिष्टेत्यादि । अत्र यद्यपि साध्याभावविशिष्टसाधनवर्ति वृत्तिरुपाधिताघटकसम्बन्धेनैव ग्राह्या अन्यथा साध्यशून्यमहाकालवृत्तितया क्षितिर्द्रव्यत्वादित्यादौ गन्धवत्त्वाद्युपाधावव्याप्तेः तथा च सत्तावान्मेयत्वादित्यादौ सत्ताशून्यप्रमेये जात्यादौ समवायेन वृत्त्यप्रसिद्ध्या जातिमत्त्वाद्युपाधावव्याप्तिः, एवं जातेरित्यादौ विशिष्टसत्त्वेऽपि सत्तानतिरेकिणस्तस्य गुणादावपि वृत्तेः । तथापि साध्याभावविशिष्टप्रकृतसाधनाधिकरणावृत्तित्वावच्छिन्नाधिकरणतासामान्यकधर्मवत्त्वं विवक्षितम्।अत्र च पूर्वदलनिविष्टं साध्यविशिष्टसाधनव्यापकत्वमपि तादृशधर्मेणैव ग्राह्यं तेन द्रव्यत्वादिना साध्यविशिष्टसाधनव्यापकस्यापि घटादेर्गुणवत् सत्त्वादित्यादौ घटत्वादिना नोपाधित्वमिति ध्येयम् ।साधनतावच्छेदकावच्छिन्नेत्यस्य फलमाह न वेति । अन्यथा द्रव्यत्वाभावविशिष्टसत्त्ववत्कर्मवृत्तित्वेन तत्राव्याप्तिः स्यात् इति भावः । ननूक्तक्रमेणैव सामञ्जस्ये साधनतावच्छेदकभिन्नेनेत्यस्य वैफल्यमत आह इत्थं चेति । निष्फलत्वमुक्त्वा विरुद्धफलकत्वमप्याह इदमित्यादिना । ननु दधित्वस्य साध्यत्वे साध्यं च नोपाधिरिति प्राचीनप्रवादात्तस्यानुपाधित्वेपि न क्षतिरतः साध्यान्तरमाह जन्यं वेति । दधित्वादीति । दधित्वाद्यभावविशिष्टदधिमत्परमाणुवृत्तित्वाभावेन तस्यापि लक्ष्यत्वादिति भावः । साधनतावच्छेदकभिन्नेनेत्यस्य भिन्नान्तं सार्थकीकृत्य फलपान्तरमाह यद्वेति । साधनतावच्छेदकानवच्छेद्येति । तथा च असति बाधके सर्ववाक्यानामवधारणपरत्वमिति न्यायेन भिन्नेनेति सावधारणमिति भावः । द्रव्यं

दकत्वञ्च तस्य साध्याभावविशिष्टसाधनवृत्तितया तद्विशिष्टसाधनस्य साध्याभाववद्वृत्तित्वेन साध्याभाववतस्तद्विशिष्टसाधनवत्त्वेनेति यावत् । एतेन धूमवान् मेयवत इत्यादौ मेयानवच्छेद्यसाध्यसम्बन्धाप्रसिद्धिः गुणवत् गुणकर्म्मान्यत्वे सति जातिमत्त्वा-

---

गुणकर्मान्यत्वे सति सत्त्वादित्यादौ गुणवत्त्वादावतिव्याप्तिवारणाय प्रथमं प्रकृत पदम् । द्रव्यं जन्यत्वे सति सत्त्वादित्यादौ स्पर्शवत्त्वादावव्याप्तिवारणाय द्वितीयं प्रकृतपदम् । ननु साध्यसम्बन्धितायाः साधनतावच्छेदकधर्मानवच्छेद्यत्वं स्वानवच्छेदकीभूतसाधनतावच्छेदकधर्मकत्वं तत्रानवच्छेदकत्वं यद्यतिरिक्तवृत्तित्वं तदा द्रव्यं सत्त्वादित्यादौ गुणवत्त्वाद्युपाधावव्याप्तिरत आह अनवच्छेदकत्वं चेति । तस्य । साधनतावच्छेदकस्य । वृत्तितयेति । अभेदे तृतीया एवमग्रेपि । ननु द्रव्यं विशिष्टसत्त्वादित्यत्र सद्धेतौ गुणवत्त्वेतिव्याप्तिः द्रव्यत्वाभावविशिष्टायामपि सत्तायां विशिष्टसत्तात्वस्य वृत्तेरत आह तद्विशिष्टसाधनस्येति । प्रकृतसाधनतावच्छेदकविशिष्टसाधनस्येत्यर्थः । षष्ठ्यर्थो निष्ठत्वं तथा च साध्याभाववद्वृत्तितावच्छेदकीभूतसाधनतावच्छेदकधर्मावच्छिन्ननिष्ठसाध्यसम्बन्धितावच्छेदकत्वं फलितमतो विशिष्टसत्तात्वस्य द्रव्यत्वाभाववद्वृत्तित्वानवच्छेदकत्वादेव नोक्तातिप्रसङ्ग इति भावः । स्वमते विशिष्टनिरूपिताधेयत्वस्यातिरिक्तस्याभावात्तद्दोषतादवस्थ्यमत आह साध्याभाववत इति । तथा च साध्याभाववन्निष्ठस्वावच्छिन्नाधिकरणताकहेतुतावच्छेदकधर्मावच्छिन्नसाधननिष्ठसाध्यसम्बन्धितावच्छेदकत्वं फलितार्थः । ननु स्वरूपसम्बन्धरूपस्यैव साधनतावच्छेदकावच्छेद्यत्वस्याभावः कथं न निविष्टः तावतापि द्रव्यं सत्त्वादित्यादौ गुणवत्त्वाद्युपाधेः संग्रहसम्भवादत आह एतेनेति । निरस्तमित्यन्वयः । अप्रसिद्धिरिति । सम्बन्धितामात्रस्यैव यत् किञ्चित्प्रमेयावच्छेद्यत्वात् । तथा च तत्रार्द्रेन्धनप्रभवबह्व्याद्युपाधावव्याप्तिरिति भावः । न च स्वानवच्छेदकीभूतसाधनतावच्छेदकधर्मावच्छिन्नसाधननिष्ठायाः साध्यसम्बन्धितायाः

दित्वादौ जातित्वघटकनित्यत्वादेर्वैयर्थ्येन विशिष्टस्यानवच्छेदकतया गुणकर्मान्यत्वादेरुपाधितापत्तिश्चेति निरस्तम् । अवच्छेदकत्वञ्च सामानाधिकरण्येन । तथा च साध्यविशिष्टस्य साध्यसम्बन्धितानवच्छेदकसाधनतावच्छेदकावच्छिन्नसाधनस्य व्यापकत्वमर्थः पर्य्यवस्यति । उपदर्शितशीतस्पर्शान्यत्वादिवारणाय तत्रेत्यादि । तत्र । साधनतावच्छेदकविशिष्टे साधने । विशेषणं सा-

---

अवच्छेदकत्वं विवक्षितं तथा च वह्नित्वादिप्रमेयस्यैव धूमसम्बन्धितानवच्छेदकत्वप्रसिद्ध्या नाव्याप्तिरिति वाच्यम् । इदं जन्यं रूपमहत्त्वोभयवतः इत्यादौ तादात्म्येन हेतुतायां द्रव्यत्वादावतिव्याप्त्यापत्तेः। ननु येन रूपेण यत् साधनतावच्छेदकं तद्रूपविशिष्टानवच्छेद्यत्वमेव क्वचिद्वाच्यं अतः प्रमेयत्वविशिष्टानवच्छेद्यत्वं प्रसिद्धमेवेत्यत आह गुणवदित्यादि।नित्यत्वादेरित्यादिनाऽनेकव्यक्तेः परिग्रहः । गुणाद्यन्यत्वविशिष्टसमवेतत्वस्यैव लाघवेन साध्यसम्बन्धितावच्छेदकत्वादिति भावः । अत्रापि प्रकृतसाधननिष्ठसाध्यसम्बन्धितायाः अवच्छेदकत्वं न स्वरूपसम्बन्धविशेषो मानाभावात् किं त्वन्यूनवृत्तित्वं तच्च साधनावृत्तीनामुपाधीनां साक्षादसम्भवीति पूर्ववदेव ग्राह्यमित्याशयेनाह अवच्छेदकत्वं च सामानाधिकरण्येनेति । ननु द्रव्यं सत्त्वादित्यादौ घटत्वादेरुपाधितावारणार्थमवश्यमधिकरणान्तर्भावेनैव व्यापकत्वं निवेश्यं तच्च सामानाधिकरण्यस्य व्याप्यवृत्तितायामप्रसिद्धमत आहतथेति दर्शितेति । निःस्नेहं स्पर्शादित्यादिस्थलीयेत्यर्थः । साध्याशून्याद्व्यावृत्यौपयिकं साध्याभाववद्वृत्तित्वाभावानुमापकम् । प्रकृतसाधने यत्समानाधिकरणत्वहेतुना साध्याभाववद्वृत्तित्वाभावोनुमातुं शक्यत इति यावत् । तथा च शीतस्पर्शान्यत्वसामानाधिकरण्यावच्छेदेन स्नेहवद्वृत्तित्वाभावविरहान्न तत्रातिप्रसङ्ग इति भावः । ननु साध्याभावसामानाधिकरण्यवतो न तदभाववत्त्वं प्रतीतेरन्यथोपपादितत्वात् तथा च द्रव्यं सत्त्वादित्यादौ गुणवत्त्वाद्युपाधावव्याप्तिरत आह

ध्यशून्याद्व्याद्वृत्त्यौपयिकम्। यत्सामानाधिकरण्यविशिष्टप्रकृतसाधनवत्त्वं साध्याभाववति न वर्त्तत इति यावत्। साध्याभावविशिष्टप्रकृतसाधनाधिकरणसामान्यात् साध्यविशिष्टप्रकृतसाधनाधिकरणसामान्यस्य व्यावर्त्तकमिति समुदायार्थनिष्कर्ष इत्याहुः। केचित्तु विशेषणं सामानाधिकरण्यं तथा च सामानाधिकरण्यप्रयासत्त्या येनावच्छिद्यते अवच्छेदकीभूतसामानाधिकरण्यप्रतियोगीति यावत्। अवच्छेदकत्वञ्चेदमन्यूनानतिरिक्तवृत्तित्वं गुरोरप्युपाधिसामानाधिकरण्यस्याक्षतमेव। यद्यपि प्रयत्न उदभ-

---

यत्सामानाधिकरण्येत्यादि। दलद्वयनिष्कृष्टार्थमाह साध्याभावविशिष्टेत्यादि। व्यावर्त्तकम्। व्यावृत्त्यनुकूलव्याप्तिपक्षधर्मतावि शिष्टम्। तथा च साध्याभावविशिष्टप्रकृतसाधनवत्सामान्यभेदव्याप्यत्वे सति साध्यविशिष्टप्रकृतसाधनवत्सामान्यवृत्तित्वं पर्य्यवसितार्थः। द्रव्यं सत्त्वादित्यादौ साध्याभावविशिष्टसाधनवतो रूपाद्भेदकस्य रूपान्यत्वादेः साध्यविशिष्टसाधनवत्सकलावृत्तिघटत्वादेश्च वारणाय सामान्यद्वयम्। यद्यपि साध्यविशिष्टसाधनवत्सामान्यवृत्तित्वं तादृशसाधनव्यापकत्वपर्य्यवसितमन्यस्य दुर्वचत्वात्, एवं साध्याभावविशिष्टसाधनवत्त्वावच्छिन्नभेदव्याप्यत्वमपि साध्याभावविशिष्टसाधनवद्वृत्तित्वमेव, तद्भदन्यावृत्तित्वलक्षणव्याप्तस्तत्रैव विश्रामात् तथा च पूर्वकल्पादभेदः, तथापि विशेषणविशेष्यभावभेदान्न पौनरुक्त्यमित्येके। साध्याभावविशिष्टसाधनवत्त्वावच्छिन्नभेदनिष्ठस्वव्यापकताकत्वमेवात्र तादृशभेदव्याप्यत्वमतः पूर्वकल्पाद्भेद इत्यन्ये। सार्वभौममत आह केचित्त्विति। सामानाधिकरण्यस्य सम्बन्धत्वे वृत्तिनियामकतयावच्छेदकताप्रविष्टव्यापकतावच्छेदकत्वे वा प्रमाणाभावादाह अवच्छेदकीभूतेति। नन्वत्रावच्छेदकत्वं यदि स्वरूपसम्बन्धस्तदा आर्द्रेन्धनप्रभववह्नित्वमेव तथा लाघवात् न तु तत्सामानाधिकरण्यमित्यव्याप्तिरत आह अवच्छेदकत्वं चात्रेति। रूपमात्रस्य हेतुत्वे प्रत्यक्ष-

तरूपवत्त्वादित्यत्र महान् अनित्यद्रव्यत्वादित्यत्र महत्त्वस्यानित्यद्रव्यसमवेतत्वस्य च वक्ष्यमाणलक्षणाक्रान्तस्योपाधेः सामानाधिकरण्यं साध्यसामानाधिकरण्यान्यूनातिरिक्तवृत्ति । तथापि हेतुनिष्ठसाध्यसामानाधिकरण्यस्य हेतुनिष्ठं यत् सामानाधिकरण्यमन्यूनानतिरिक्तवृत्ति तत्त्वं विवक्षितम् । सत्त्वनिष्ठद्रव्यत्वसामानाधिकरण्यस्य च तन्निष्ठकर्मान्यत्वसामानाधिकरण्यमतिरिक्तवृत्ति

त्वाभाववविशिष्टरूपवति पिशाचादौ महत्त्वस्य, वर्त्तमानत्वाद्वक्ष्यमाणलक्षणाक्रान्तता न स्यादत उद्भूतपदम् । ननु प्रत्यक्ष उद्भूतरूपादित्यत्रापि महत्त्वं नोपाधिः सामग्रीविरहेणाऽप्रत्यक्षे घटादावुद्भूतरूपवति वर्त्तमानतया वक्ष्यमाणलक्षणाक्रान्तत्वादतस्तदसंग्रहो नदोषायेत्यतआह महानित्यादि । अत्रापि द्रव्यत्वमात्रस्य हेतुत्वे गगनादौ साध्याविशिष्टसाधनाव्यापकत्वादनित्यसमवेतत्वस्य वक्ष्यमाणलक्षणाक्रान्तता न स्यादित्यनित्यपदम् । वक्ष्यमाणेति । साध्यविशिष्टसाधनव्यापकत्वे सति साध्याभावविशिष्टसाधनवद्वृत्तित्वरूपेत्यर्थः । न्यूनातिरिक्तेति । प्रथमे प्रत्यक्षत्वसमानाधिकरणे रूपत्वादौ महत्त्वस्य महत्त्वसमानाधिकरणं च पिशाचत्वादौ प्रत्यक्षत्वस्य सामानाधिकरण्यविरहात्, द्वितीयेपि महत्त्वसमानाधिकरणे शब्दादावनित्यसमवेतत्वस्याऽनित्यसमवेतत्वसामानाधिकरणे च रूपत्वादौ महत्त्वस्य सामानाधिकरण्याभावादिति भावः । हेतुनिष्ठेति । हेतुतावच्छेदकावच्छिन्ननिष्ठेत्यर्थः । तेन महाननित्यद्रव्यत्वादित्यादौ द्रव्यत्वनिष्ठमहत्त्वसामानाधिकरण्यस्य गगनाद्यवच्छेदेन सत्त्वेऽनित्यसमवेतत्वे नाव्याप्तिः । वस्तुतः सार्वभौममते विशिष्टस्यातिरिक्तत्वात् यथाश्रुतमेव साधु, एव मग्रेपि । तेन द्रव्यं कर्मान्यत्वे सति सत्त्वादित्यादौ सत्त्वनिष्ठगुणान्यत्वसामानाधिकरण्यस्य कर्मावच्छेदेन सत्त्वेपि गुणान्यत्वादौ नाव्याप्तिरिति ध्येयम् । अत्र अन्यूनानतिरिक्तवृत्तित्वं न स्वरूपसम्बन्धेन ग्राह्यं द्रव्यं सत्त्वादित्यत्र घटत्वादावतिप्रसङ्गात् किन्त्ववच्छेदकतासम्बन्धेनेत्याह-

गुणे तदभावावच्छेदकावच्छिन्नवृत्तिकत्वात् । पृथिवीत्वादिसामानाधिकरण्यन्तु न्यूनवृत्ति, जलादौ तदवच्छेदकावच्छिन्नवृत्त्यभावप्रतियोगित्वात् । साध्यव्यापकानां सद्धेतावुपाधित्ववारणाय साधनतावच्छेदकाभिन्नेनेति तदनवच्छेद्यार्थकामित्याहुः ।

ननु सर्वत्र सोपाधौ सर्वेणोपाधिना साध्यसम्बन्धोऽवच्छिद्यत

येन तयोर्व्यावृत्तिमाह सत्त्वनिष्ठेत्यादिना। अतिरिक्तवृत्तीति । तथा च द्रव्यं सत्त्वादित्यत्र कर्मान्यत्वादेर्वारणार्थमनतिरिक्तपदमिति भावः । पृथिवीत्वसामानाधिकरण्यमित्यस्य सत्तानिष्ठेत्यादिः। न्यूनवृत्तीति । सत्त्वनिष्ठद्रव्यत्वसामानाधिकरण्यस्येत्यनुषज्यते । तथा च द्रव्यं सत्त्वादित्यत्रैव पृथिवीत्वादेर्वारणार्थमन्यूनवृत्तिपदमिति भावः । तदवच्छेदकेति । सत्त्वनिष्ठद्रव्यत्वसामानाधिकरण्यावच्छेदकेत्यर्थः । सद्धेतौ। वह्निमान् धूमादित्वादौ । द्रव्यत्वादेरपि साधनतावच्छेदकीभूतधूमत्वादिभिन्नत्वात् यथाश्रुतेन वारणायोगादाह तदनवच्छेद्येति । प्रकृतसाधनतावच्छेदकानवच्छेद्येत्यर्थः । अत्रापि साधनतावच्छेदकस्य साध्यानधिकरणावृत्तित्वावच्छिन्नाधिकरणताकत्वे तात्पर्य्यन्तेन धूमवान् प्रमेयवत इत्यादौ प्रमेयानवच्छेद्यत्वाप्रसिद्धावपि न क्षतिः । अत्र सामानाधिकरण्यस्य व्याप्यवृत्तित्वादवच्छेदकतासम्बन्धेन तद्धर्म्मत्वाप्रसिद्ध्या लक्षणासम्भव इत्यस्वरसः केचिदित्युक्त्वा सूचितः ।

साध्येति । साध्यस्य सम्बन्धो यत्रेति व्युत्पत्त्या साध्यविशिष्टसाधनाश्रयअवच्छिद्यते । व्यवच्छिद्यते साध्याभावविशिष्टसाधनाश्रयाद्व्यावर्त्यतइत्यर्थः। यथाश्रुते साध्यविशिष्टसाधनव्यापकत्वरूपस्य प्रागुक्तसाध्यसम्बन्धितावच्छेदकत्वस्योद्भूतरूपादावपि सत्त्वेनाग्रिमग्रन्थासङ्गतिप्रसङ्गात् । अन्यूनानतिरिक्तवृत्तित्वरूपावच्छेदकत्वघटितसार्वभौमलक्षणानुसारेणेयमाशङ्केत्यप्याहुः। वस्तुतो गुरूणां मते वायोरपि प्रत्यक्षत्वादुद्भूतरूपस्य तत्रैव साध्यविशिष्टसाधनाव्यापकत्वात्तन्मतानुसारेणैवेयमनवच्छेदकत्वशङ्केति युक्तमुत्पश्यामः । तथात्वासम्भवादिति । प्रत्यक्षत्वाभावविशिष्टमूर्त्तत्ववत्परमाणुवृत्तित्वे-

अत एव च साधनाव्यापकत्वे सति साधनावच्छिन्नसाध्यव्यापकत्वं लक्षणं ध्रुवम् । व्यभिचारिणि साधने एकत्र साध्यतदभावयोर्विरोधेनावच्छेदकभेदं विना तदुभयसम्बन्धाभावादवश्यं साध्यसम्बन्धितावच्छेदकमस्ति । तदेव च साधनावच्छिन्नसाध्यव्यापकं साधनाव्यापकं तत्रोपाधिः ।

इति न नियमः अयं प्रत्यक्षो मूर्त्तत्वादित्यादावुद्भूतरूपवत्त्वादेः तदसम्भवादित्यत आह अत एव च तत्रेति । यत एवोद्भूतरूपवत्त्वादेर्न तथात्वसम्भवः अत एव तत्र तादृशनियमवादिमते इदं लक्षणमिति । साधनाव्यापकत्वमिह साध्याभावविशिष्टसाधनव्यापकीभूताभावप्रतियोगित्वं तादृशसाधनासामानाधिकरण्यमिह पर्य्यवसितम्, तेनोपदर्शितोद्भूतरूपवत्त्वव्युदासः । अथ प्रत्यक्षो द्रव्यत्वादित्यादौ घटत्वादावतिव्याप्तिः । साध्यव्यापकत्वेन विशेषणे च स श्यामो मित्रातनयत्वादित्यादौ शाकपाकजत्वादावव्याप्तिरत उक्तं साधनावच्छिन्नेत्यादि । साध्याभावसम्बन्धिनि विरु-

---

न साध्याभावविशिष्टसाधनवद्व्यावर्त्तकत्वासम्भवादित्यर्थः । तत्र । उपाधौ । तादृशेति । साध्याभावसम्बन्धिनि विरुद्धस्य साध्यसम्बन्धस्यावच्छेदकीभूयोपपादक एवोपाधिरिति मत इत्यर्थः । इदं लक्षणमिति । अन्यथा तस्य लक्ष्यत्वे तल्लक्षणस्याव्याप्त्यापत्तेरिति भावः । उद्भूतरूपस्यापि यथाश्रुतलक्षणसत्त्वेन वारणायोगात् द्रव्यं सत्त्वादौ रूपान्यत्वादावतिप्रसङ्गाच्चाह साधनाव्यापकत्वमिति । द्वित्वाद्यवच्छिन्नतादृशाभावमादायातिव्याप्तितादवस्थ्यादाह । तादृशेति । साध्याभावविशिष्टसाधनेत्यर्थः । अत्रापि सा-

अत एव व्यभिचारे चावश्यमुपाधिरिति सङ्गच्छते । अन्यथा व्यभिचारादेव तत्रागमकत्वेन व्यभिचारित्वेन न तदनुमानमप्रयोजकत्वात् ।

द्धस्य साध्यसम्बन्धस्यावच्छेदभेदं विनानुपपद्यमानस्यावच्छेदकीभूयोपपादनमुपाधिफलं तदसमर्थानाञ्चोपदर्शितोद्भूतरूपवत्त्वादीनां नोपाधिभावः सम्भवतीत्याह व्यभिचारिणीति । व्यभिचारः सपक्षविपक्षवृत्तित्वम् ।

अथ विपक्षगामित्वरूपव्यभिचारोन्नयनमेवोपाधिफलं तच्चोद्भूतरूपादीनामप्यस्तीत्यत आह अत एवेति । यत एव साध्यसम्बन्धितावच्छेदकं रूपं व्याप्तिः, सोपाधौ तु स्वाभाविकं हेतुतावच्छेदकं न साध्यसम्बन्धितावच्छेदकम् ।

ध्याभावविशिष्टसाधनवदवृत्तिस्वावच्छिन्नाधिकरणताकधर्मवत्वे तात्पर्यं तेन जातिमान् मेयत्वादित्यत्र सत्तायां द्रव्यं सत्त्वादित्यत्र च विशिष्टसत्तायां प्रागुक्तरीत्या नाव्याप्तिः । केचित्तु न चेयं गौरश्वत्वात् इत्यादौ साधननिष्ठसाध्यसम्बन्धितावाप्रसिध्या साक्षावत्त्वाद्युपाधावव्याप्तिरत उक्तं मूलेऽत एवेति । विरुद्धस्थले साक्षावत्त्वादेरलक्ष्यत्वादेवेत्यर्थः । अन्यथा साधनावच्छिन्नसाध्याप्रसिद्ध्या तेषां लक्षणमपि तत्राव्यापकं स्यादिति भाव इत्याहुः । नन्वुद्भूतरूपवत्वादेरप्युपाधिफलोपधायकत्वेनोपाधित्वाल्लक्षणमपि तेषां दुष्टमेव भविष्यतीत्यतस्तेषामुपाधिफलोपधायकत्वमेव निरस्यन्नाह साध्याभावसम्बन्धिनीत्यादिना । तदसमर्थानाम् । अवच्छेदकीभूय साध्यसम्बन्धोपपादनासमर्थानाम् । ननु व्यभिचारिण्यवश्यं साध्यसम्बन्धितावच्छेदकमस्तीत्यसङ्गतं विरुद्धस्थले तदभावादतो व्याचष्टे व्यभिचार इति ।

अत एवेतीति । तथा च सपक्षविपक्षवृत्तित्वलक्षणव्यभि-

अत एव च तस्य साध्यसम्बन्धितावच्छेदकरूप-लक्षणा व्याप्तिः साधनताभिमते चकास्तीति स्फटिके जवाकुसुमवदुपाधिरसावुच्यते। लक्षणन्तु साध्यसाधन-सम्बन्धव्यापकत्वे सति साधनाव्यापकत्वम्। विषम-व्याप्तस्तु नोपाधिपदवाच्यः, प्रवृत्तिनिमित्ताभावात्। दूषकता च तस्य व्यभिचारोन्नायकतया। न च व्यभि-चारोन्नायकत्वमेवोपाधित्वम्। अप्रयोजकसाध्यव्याप-कव्यभिचारिणोप्युपाधित्वापत्तेरिति॥

यत एव स्वसमीपवर्त्तिनि स्वसमानाधिकरणे व्यभिचारिणि हेतौ स्वनिष्ठसाध्यसम्बन्धितावच्छेदकरूपलक्षणव्याप्तिसंक्राम-कतया साध्यव्याप्यस्यैवोपाधित्वमाचार्य्यैरनुमन्यत इत्याह अत-एवेति। साध्यन्यूनवृत्तावुपाधिव्यवहारं दूषणौपयिकरूपस्याव-

---

चारस्यैकत्र विरोधात्तदुपपादनार्थमेव व्यभिचारे चावश्यमुपाधि-रिति ग्रन्थेनोपाध्युपन्यास इति भावः। स्वाभाविकम्। शुद्धम्। तेन धूमवान् वह्नेरित्यादावार्द्रेन्धनजन्यत्वविशिष्टस्य वह्नित्वस्यावच्छेद-कत्वेपि न क्षतिः।

उपाधिपदान्तर्गतस्योपशब्दस्यार्थमाह स्वसमीपेति। जात्युपा-धेः सामीप्यासम्भवादाह स्वसमानाधिकरण इति। नन्वेवमाचार्य्यम तेपि साधनासमानाधिकरणस्योपाधित्व न स्यादतः फलितार्थमाह व्यभिचारिणीति। विपक्षगामिनीत्यर्थः। संक्रामकतया। भ्रमानु-कूलतया। क्व चित्प्रसिद्धस्यैवान्यत्रारोपादिति भावः। यद्यपि स्वनिष्ठव्याप्त्यन्तरसंक्रामकतयाप्याचार्य्यमते साध्यसमव्याप्तस्यो-पाधित्वसम्भवादेत एवेत्यत्रैतस्य नोपोद्बलकत्वम्। न च

वश्यं वाच्यतयोपाधिपदस्य योगरूढित्वव्यवस्थापनेन निराकुरुते लक्षणन्त्विति । लक्षणं दूषणौपयिकं रूपम् । साध्येति । अत्र साध्यव्यापकमात्रं विवक्षितं तावतैव साधनवृत्तितद्व्यतिरेकेण साध्यव्यतिरेकानुमानसम्भवात्, साधनवति व्यापकनिवृत्त्या साध्यसाधनसम्बन्धनिवृत्तिसिद्धावर्थात्साध्यनिवृत्तिः सिद्धतीति प्रकारान्तरप्रदर्शनाय परं तथाविधोक्तिः । रूढया न्यूनवृत्तावुपाधित्वव्यवहारं निरस्य योगेनाधिकवृत्तौ तन्निरस्यति विषमेति । प्रवृत्तिनिमित्तं यौगिकम् । व्यभिचारोन्नायकत्वमेवेसेवकारेण

व्याप्त्यन्तरस्य विशेषतस्तत्तत्साधनतावच्छेदकघटितत्वात्तत्संक्रामकतयोपाधित्वे सद्धेतावप्युपाधिलाभः स्यादतः स्वरूपसम्बन्धरूपसाध्यसम्बन्धितावच्छेदकत्वस्य सद्धेतुतावच्छेदके भ्रमासम्भवात्तादृशव्याप्तिसंक्रामकत्वमेवोपाधित्वमिति वाच्यम् । उपाधिपदान्तर्गतोपशब्दलब्धव्यभिचारिणीत्यत एव सद्धेतोर्वारणसम्भवात् । तथापि व्याप्त्यन्तरस्य साधनतावच्छेदकभेदेन नानात्वात्साध्यवदन्यावृत्तित्वस्य च केवलान्वयिन्यभावात् सर्वानुगतं लघु च साध्यसम्बन्धितावच्छेदकरूपवत्त्वमेव व्याप्तिरतस्तत्संक्रामकतयैवोपाधित्वं युक्तमिति भावः । दूषणौपयिकरूपस्य वाच्यतयेति । उपाधिपदवाच्यतयेत्यर्थः । साध्याधिकदेशवृत्तावुपाधिव्यवहारस्याचार्य्यमते विरहादुक्तलक्षणस्य व्यवहारौपयिकत्वासम्भवात् पूरयति दूषणौपयिकमिति । यथाश्रुतस्य गोत्ववानश्वत्वादित्यादौ सांस्नावत्त्वाद्यव्याप्तेराह अत्रेति । साध्यव्यापकतामात्रस्य दूषणौपयिकत्वं दर्शयति तावतैवेति । तद्व्यतिरेकेण । उपाधिव्यतिरेकेण । सम्भवादिति । तथैव व्यभिचारधीसम्पत्तेरिति भावः । नन्वेवं स्वायत्ते शब्दे किमित्यन्यथाभिलाप इत्यत आह साधनवतीति । तथाविधेति । साध्यसाधनसम्बन्धव्यापकेत्युक्तिरित्यर्थः । तं उपाधिव्यवहारम् । साध्यव्यापकतारूपरूढ्यर्थसत्वादाह । यौगिकमिति । योगानादरमिति रूढ्यर्थ-

योगार्थानादरं सूचयति । उपाधित्वम् । उपाधिपदप्रवृत्तिनिमित्तम् । उपाधिता । उपाधिपदवाच्यता । योगादरे तु लाघवात्साध्यापकतामात्रे रूढिरिति भावः ॥ इति व्याप्तिवादः समाप्तः ॥

मात्रानादरे योगार्थविरहादेवाप्रयोजकत्वादावतिप्रसङ्गविरहादग्रिमग्रन्थविरोधापत्तेरिति भावः । उपाधित्वमित्यस्य यदि साध्यव्यभिचारोन्नायकव्यभिचारप्रतियोगित्वमर्थस्तदान्वयायोगादाह उपाधिपदप्रवृत्तीति । एवमग्रेपि । ननु व्यभिचारोन्नायकस्याप्यप्रयोजकत्वादेः साध्यव्याप्यत्वरूपयोगार्थविरहान्नोपाधिपदवाच्यत्वमत आह योगादरे त्विति । लाघवादिति । व्यभिचारोन्नयनानुकूलव्याप्तिपक्षधर्मतारूपस्य तदुन्नायकत्वस्य गुरुत्वादिति भावः । साध्यव्यापकतामात्र इति । साधनाव्यापकत्वस्य व्यभिचारिहेतौ स्वनिष्ठव्याप्तिसंक्रामकत्वरूपयोगार्थबलादेव प्राप्तेरिति भावः ॥

इति श्रीजगदीशतर्कालङ्कारकृतामनुमानचिन्तामणिदीधितिटीकायामतएवचतुष्टयी समाप्ता ॥

इति व्याप्तिवादः समाप्तः ॥

चिन्तामणेः व्याप्तिग्रहोपायः ।

सेयं व्याप्तिर्न भूयोदर्शनगम्या, दर्शनानां प्रत्येक-महेतुत्वात्, आशुविनाशिनां क्रमिकाणां मेलकाभावात् ।

दीधित्याः व्याप्तिग्रहोपायः ।

व्याप्तिस्वरूपं निरूप्य परमतनिराकरणपूर्वकं स्वमतेन तद्ग्रहोपायमभिधातुं प्रथमं प्राभाकरमतमुपदर्शयति सेयमित्यादिना। दर्शनानां प्रत्येकं वा हेतुत्वं मिलितानां वा, मिलनमपि स्वरूपतो व्यापारतो वा, आद्ये दर्शनानामिति, द्वितीये आश्वितिं। क्रमिका-

जागदीश्याः व्याप्तिग्रहोपायः

तस्मात्परिशेषेण सकृद्दर्शनगम्या सेत्युपसंहारस्य न्यायमते विरोधान्नैय्यायिकानां सेयमित्याद्याशङ्कया असम्भवादाह परमतेत्यादि । नानादर्शनजन्यग्रहविषयत्वरूपस्य यथाश्रुतभूयोदर्शनगम्यत्वस्य सकृद्दर्शनगम्यत्ववादिना गुरुणापि व्याप्तौ स्वीकारात्तदभावसाधने बाध इत्यतः साध्यं विकल्प्य हेतुं योजयति दर्शनानामित्यादिना । प्रत्येकं तत्तद्दर्शनत्वेन हेतुत्वमिति । साध्यघटकमिति शेषः । मिलितानां वेति । भूयस्त्वविशिष्टानां वेत्यर्थः । मिलनमपि । भूयस्त्ववैशिष्ट्यमपि । स्वरूपत इति । पर्याप्त्याख्यस्वरूपसम्बन्धेनेत्यर्थः । व्यापारतः । व्यापारद्वारा स्वपर्याप्त्यधिकरणसंस्का-

न च तावद्दर्शनजन्यसंस्कारा इन्द्रियसहकृता व्याप्तिधी-हेतवः, प्रत्यभिज्ञायामिन्द्रियस्य तथात्वकल्पनादिति-

---

णामपि स्थिराणामस्थिराणामपि सहोत्पन्नानां मिलनमस्तीत्युभयमुपात्तम् । तृतीयमाशङ्क्य निराकुरुते न चेति । व्यापकसाध्यसामानाधिकरण्यात्मिकायां व्याप्तौ साध्यसामानाधिकरण्यांशस्य प्रथममेव गृहीतत्वादगृहीतव्यापकत्वांशग्रहे सहचारदर्शनजन्यसंस्काराणां हेतुत्वं वाच्यं तच्च न सम्भवति भिन्नविषयक-

---

रूपव्यापारसम्बन्धेनेति यावत् । आद्य इति । तथा च तत्तत्सहचारदर्शनत्वं न व्याप्तिग्रहजनकतावच्छेदकं तन्नियतपूर्ववर्त्तितानवच्छेदकत्वात् इति प्रयोगार्थः । प्रत्येकमहेतुत्वादिति मूलस्य प्रत्येकरूपेणानियतपूर्ववर्त्तित्वाभावार्थकत्वादिति भावः । द्वितीयत इति । तथा च भूयोदर्शनत्वं न व्याप्तिग्रहजनकतावच्छेदकमेकक्षणावच्छिन्नाधिकरणतानिरूपकतानवच्छेदकत्वादिति प्रयोगार्थः । आश्वत्यादिमूलेनाऽऽशुविनाशिक्रमिकानेकत्वावच्छेदेनैकक्षणावच्छिन्नाधिकरणत्वनिरूपकत्वरूपस्य मेलकस्याभावबोधनादिति भावः । स्थिराणामनेकक्षणस्थायिनां संस्कारादीनामस्थिराणां तृतीयक्षणवृत्तिध्वंसप्रतियोगिनां यत्नादीनामुभयमिति । आशुविनाशिक्रामकोभयमित्यर्थः । इदमुपलक्षणम् । आशुविनाशिनोः क्रमिकज्ञानयोर्निरुक्तमिलनसत्त्वादबहुवचनेनानेकत्वमुपात्तमित्यपि द्रष्टव्यम् । तृतीयमिति । व्यापारद्वारामिलनमित्यर्थः । न चेतीति । व्यापारत्वसम्पत्त्यर्थमेव तत्र संस्कारस्य व्याप्तिधीहेतुत्वकथनादित्याशयः । यद्यपि न चेत्यादिग्रन्थस्य स्वातन्त्र्येण संस्कारस्य व्याप्तिधीहेतुत्वपरतयैवोपपत्तौ व्यापारद्वारा मिलनं वितर्क्य तदवतारो व्यर्थः । तथापि तद्ग्रन्थस्य भूयोदर्शनहेतुतानुपयुक्तत्वे प्रागेव निरस्तस्य भूयोदर्शनहेतुत्वस्य पुनः किं चेत्यादिना वितर्क्य खण्डने सन्दर्भावरोधापत्तेरुक्तक्रमेणावतारणमिति भावः । ननु व्यापकसा-

वाच्यम्।समानविषये स्मरणे प्रत्यभिज्ञाने च संस्कारो हेतुरतः कथं संस्कारेण व्याप्तिज्ञानं जन्येत। अन्यथाति-प्रसङ्गः । किञ्च सम्बन्धभूयोदर्शनं भूयःसु स्थानेषु

त्वादिस्राह समानेति । भ्रमस्त्वगृहीतभेदं ज्ञानद्वयं न तु वैशिष्ट्याव-

---

मानाधिकरण्यरूपाया व्याप्तेरपि सहचारविशेषत्वात् व्याप्तिप्रत्यक्ष-समानविषयकत्वं सहचारगोचरसंस्कारस्याक्षतमेवेत्यत आह व्यापकेत्यादि । ननूपस्थितस्यापि सौरभादेः क्व चिदेव धर्मिणि उप-नयानुरोधात्तद्धर्मिकतद्लौकिकप्रत्यक्षं प्रति तद्धर्मिकत्वद्वत्तासं-स्कारत्वेनैव हेतुत्वं वाच्यम्, तथा च पूर्वागृहीतशुक्त्यादौ रजतत्वसं-स्काराभावात्तत्रेदं रजतमिति भ्रमो न स्यादत आह भ्रमस्त्विति। य-द्यप्यपूर्वचन्दनधर्मिकायां सुरभि चन्दनमित्यादिप्रमायामपि व्य-भिचारः सम्भवति । तथापि यो यत्र विशिष्य पूर्वमवगतः स एव तत्र संस्कारवशाद्यथार्थप्रत्यक्षे भासतेऽन्यत्र पुनरनुमानमिति प्रा-चां मते तादृशप्रमात्मकप्रत्यक्षविरहादभ्रमपर्यन्तानुसरणमाश्रयन्तु तद्-लौकिकप्रत्यक्षसामान्यं प्रति तद्गोचरसंस्कारस्य हेतुत्वे पूर्वानुपस्थित-संयोगस्य दण्डीति भ्रमे संसर्गविधया भानं न स्यात्तद्गोचरसंस्कार-विरहादित्याशङ्क्या भ्रमस्त्वितिग्रन्थमवतारयन्ति । तन्मन्दम् । त-थासति अपूर्वसंयोगसम्बन्धेन दण्डीत्यादिविशिष्टप्रमायां व्यभि-चारस्य दुरुद्धरत्वापत्तेरिति ध्येयम् । [ननु स्मृता-विव प्रत्यक्षेपि समानविषय एव संस्कारस्य न हेतुत्वं रजतमिति संस्कारादेव इदं रजतमिति भ्रमःस्यात् । न च रज-तत्वविषयतयैव संस्कारस्य हेतुत्वं विशिष्टज्ञानं स्वार्थसमाजादिति वाच्यम् । कुत्र चिदेव कस्य चिद्वैशिष्ट्यभानानियमाय तद्व्यक्तित्वेन हेतुत्वे विनिगमकाभावात् संस्कारस्यापि तथा हेतुत्वादत आह भ्रम-स्त्विति । प्रमात्वं यत्र गृहीतं तत्र तस्यैव संस्कारहेतुतावादिनां प्राचां नय इति हृदयम्।] ननु ज्ञानद्वयमेव भ्रम इत्यनुपपन्नं भेदाग्रह-कालीनस्य शुक्तिरजतगोचरसमूहालम्बनस्य धर्मधर्मिभावानवगा-

दर्शनं भूयसां वा दर्शनं भूयांसि वा दर्शनानि न तथा, एकत्र रूपरसयोर्द्रव्यत्वघटत्वयोश्च व्याप्तिग्रहात् एकत्रैव धारावाहिके तद्ग्रीप्रसङ्गात् भूयस्त्वस्य त्रिचतुरादित्वेनाननुगमाच्च । अपि च पार्थिवत्वलौहलेख्यत्वादौ शतशो दर्शनेऽपि व्याप्त्यग्रहात् तर्कसहकृतं तथेति चेत्तर्हि सहचारदर्शनव्यभिचारादर्शनसहकृतः स एव व्याप्तिग्राहकोऽस्तु आवश्यकत्वात् किं भूयोदर्शनेन । न च तेन विना तर्क एव नावतरति, प्रथमदर्शने व्युत्पन्नस्य तर्कसम्भवात्। न चैवमेवास्तु, तर्कस्य व्याप्तिग्रहमूलकत्वेनान-

---

गाहीति भावः।न तथा।न व्याप्तिग्राहकम्।व्यभिचारदर्शनं व्यापारतया सहकारीति व्यभिचारादर्शनसहचारदर्शनसहकृतस्तर्क एव व्याप्तिग्राहकः भूयो दर्शनन्तु क चित्तर्कप्रवृत्तावुपयुज्यत इति निर्गलितम् । नैयायिकमतमाशङ्क्य निराचष्टे न चैवमिति । जातमा-

---

हिनोपि तन्मते भ्रमत्वं न स्यादत आह न त्विति।तथा च वैशिष्ट्यावगाहित्वस्यैव व्यवच्छेदे नियमो न तु ज्ञानद्वयत्वेपीति । न व्याप्तिग्राहकमिति । किञ्चेत्यस्य दूषणान्तरं चेत्यर्थमनुसृत्येदम् । सम्बन्धभूयोदर्शनं च किमित्येवं प्रश्नपरत्वे तु न तथेत्यस्य न सम्बन्धभूयोदर्शनमित्यर्थो द्रष्टव्यः । ननु व्यभिचारादर्शनस्यावश्यकत्वे तेनैवान्यथासिद्धस्तर्कः कथं हेतुः स्यादत आह व्यभिचारेति । तथा च व्यापारेण व्यापारिणो नान्यथासिद्धिः व्यभिचारादर्शनस्य तर्कव्यापारत्वं तु क्षैमिकं तर्कजन्यत्वमादायैवेति भावः। ननु न चैवमित्यादिना नैय्यायिकानां भूयोदर्शनस्य व्याप्तिग्रहानुपयोगित्वस्वीकारे स्वपसिद्धान्त इत्यतो भावार्थमाह व्यभिचारेत्यादिना । ननु जातमात्रप्रवृत्तिनिवृत्त्युपयुक्तव्याप्तिग्रहस्य तर्कानपेक्षत्वेपि धूमा-

वस्थानात्। जातमात्रस्य प्रवृत्तिनिवृत्तिहेत्वनुमितिजनक-व्याप्तिज्ञानं तर्कं विनैवाऽतो नानवस्थेति चेत्तर्हि व्यभिचारात् सोऽपि न व्याप्तिग्रहे हेतुः। न चैतद्बुद्धावन्तर-जातिरस्ति, सामान्यप्रत्यासत्त्या सव्वोपसंहारादविनाभा-

---

त्रस्येति।तथा च तन्मूलको व्याप्यन्तरग्राहकतर्कावतार इति भावः। तर्हीति। न च व्याप्तिप्रत्यक्षं प्रति तर्को हेतुस्तत्तु स्मरणमिति न व्यभिचारावकाशः, विनानुभवं स्मरणस्यायोगात्। न च जन्मान्त-रीणः सः, जन्मान्तरेऽपि पर्य्यनुयोगतादवस्थ्यात्। अनादित्वेन च परिहारः परतो विचारयिष्यते। न चेति। मानाभावात् तर्कस्य च

दिव्याप्तिग्राहकतर्कमूलस्य वह्निव्यभिचारित्वादौ वह्न्यजन्यत्वादि-व्याप्तिग्रहस्य तर्कान्तरसापेक्षत्वात्तत्रानवस्थैवेत्यत आह तथा चेति। तन्मूलक इति।जातमात्रव्याप्तिग्रहाधीन एवेत्यर्थः। फलबलेन तस्यैव तर्कमूलयावद्व्याप्तिविषयकत्वकल्पनादिति भावः। तत्त्विति। जातमात्रव्याप्तिज्ञानादिकं त्वित्यर्थः। विनानुभवमिति। अनुभ-वत्वेन स्मृत्यहेतुत्वेपि स्मृतेः समानविषयकानुभवपूर्वक-त्वनियमादिति भावः। सः तर्कमूलव्याप्त्यनुभवः। पर्यनुयो-गेति। जन्मान्तरीयव्याप्त्यनुभव एव तर्कान्तरापेक्षायामनव-स्थायास्तत्रापि सत्त्वादिति भावः। यद्यपि व्याप्तिघटकप्रत्येकपदा-र्थोपस्थित्यादिसाचिव्येन शाब्द एव जन्मान्तरे तर्कमूलव्याप्त्यनु-भवः सम्भवति तस्य च प्रत्यक्षभिन्नत्वान्न तर्कान्तरसापेक्षत्वाम-त्यनवस्थाशङ्कापि न, तथापि व्याप्तेस्तादृशशाब्दबोधं प्रति यो-ग्यताज्ञानविधया व्याप्तिज्ञानान्तरापेक्षायां तदुपयुक्ततर्कमादाय प-र्यनुयोगो द्रष्टव्यः। ननु तर्कस्य व्याप्तिप्रत्यक्षहेतुत्वानुरोधेन सिद्धं तर्कमूलव्याप्त्यनुभवप्रबन्धमादायाऽनवस्था न दूषणमनादित्वादित्यत आह अनादित्वेन चेति।परत इतियत्र स्वतःसिद्धो व्यभिचाराग्रहस्त-

वग्रहः सामान्यरूपता च सकृद्दर्शनगम्येति भूयोदर्शनापेक्षेति चेन्न। सामान्यस्य हि प्रत्यासत्तित्वं लाघवात् न तु सामान्यतया ज्ञातस्य, तदनभ्युपगमाच्च । न च काकतालीयत्वादिशङ्काव्युदासार्थं द्वितीयादिदर्शनापेक्षेति वाच्यम् । द्वितीयादिदर्शनेऽपि शङ्कातादवस्थ्यात् । नत्वनौपाधिकत्वज्ञानं व्याप्तिज्ञाने हेतुः तद्देशकालतत्रावस्थितघटादीनामुपाधित्वशङ्कानिरासः कस्य चित् साधनव्यापकत्वज्ञानेन कस्य चित् साध्याव्यापकत्वज्ञानेन स्यात्, तच्च भूयोदर्शनं विना नावतरतीति चेन्न। अयोग्योपाधिव्यतिरेकस्यानुमानाधीनज्ञानत्वेनाऽनवस्थापातात्। अथ साध्यसाधनसहचरितधर्मान्तराणामुपाधित्वसंशये न व्याप्तिग्रहः अतस्तेषामनुपाधित्वज्ञानं भूयोदर्शनाधीनसा-

---

हेतुत्वासिद्धेः। यदि चागृहीतस्याऽगृहीतपुरोवर्त्तिसंसर्गस्य वा प्रत्यासत्तित्वेऽतिप्रसङ्गस्तदा पुरोवर्त्तिनि तद्ग्रहो मृग्यतां न तु सामान्यत्वेनेत्याह नत्विति। साध्याव्यापकत्वं साध्यसमानाधिकरणाभाव-

---

त्र तर्कं विनैव व्याप्तिग्रह इत्यग्रिमग्रन्थेनेत्यर्थः । तथा च व्यभिचारात्तर्कस्य हेतुत्वासिद्धौ तदनुरुद्धमनादित्वं सुदूरपराहतमिति भावः। हेत्वनुपन्यासन्यूनतां परिजिहीर्षुः पूरयति मानाभावादिति। ननु जन्यतायाः किंचिदवच्छिन्नत्वनियमात्तर्कजन्यत्वमेव व्याप्तिबुद्धौ वैजात्यसाधकं भविष्यतीत्यत आह तर्कस्य चेति । मूले न तु ज्ञातस्येत्यपहाय न तु समासान्यतया ज्ञातस्येति यदुक्तं तस्य भावार्थमाह यदि चेत्यादिना । तद्ग्रहो मृग्यतामिति । सा-

ध्याव्यापकत्वज्ञाने सतीत्येतदर्थं भूयोदर्शनापेक्षा, अत एव यावता दर्शनेन तन्निश्चयस्तावद्भूयोदर्शनं हेतुरिति न वारसंख्यानियमो न वाऽननुगमः। यद्यपि चान्यस्य साध्यव्यापकत्वसाधनव्यापकत्वसंशयो नान्यव्याप्तिग्रहप्रतिबन्धकस्तथापि तदाहितव्यभिचारसंशयः प्रतिबन्धकइति तद्विधूननमावश्यकमिति चेन्न अयोग्योपाधिसंशयाधीनव्यभिचारसंशयस्य तथाप्यनुच्छेदात् स च न भूयोदर्शनान्नाप्यनुमानादित्युक्तम्। अपि च भूयोदर्शना-

---

प्रतियोगित्वं तद्ग्रहश्च साध्याधिकरणैकव्यक्तिवृत्तितया गृह्यमाणस्य तादृशव्यक्त्यन्तरग्रहं विना न सम्भवतिइति भूयो दर्शनापेक्षा।

मान्यस्य हीत्यत्र जातस्येत्यनुषङ्गेन तल्लाभादिति भावः। न तु सामान्यत्वेनेति। तद्ग्रहो मृग्यतामिति पूर्वेणान्वयः। मूलेऽनौपाधिकत्वज्ञानम्।अनौपाधिकत्वस्य निश्चयः न पुनरौपाधिकत्वज्ञानस्याभावः, तथा सति स्वरूपसत एव तस्य हेतुत्वादयोग्योपाधिव्यतिरेकज्ञानस्यानवस्थयाऽग्रे निरासस्य उन्मत्तप्रलपितत्वापत्तेः। न चैवमुपाधित्वशङ्कानिरासश्चेत्यग्रिममूलविरोधः, तस्यानौपाधिकत्वनिश्चयकारणसम्पत्तिपरत्वेनैवोपपत्तेः। अथेत्यादावनुपाधित्वज्ञानाभावः न पुनरनुपाधित्वस्य ज्ञानम्।अतो न पूर्वशङ्कायाः पौनरुक्त्यम्। अत एवेति।भूयोदर्शनस्य साध्याव्यापकत्वग्राहकत्वादेवेत्यर्थः। तन्निश्चयः। साध्याव्यापकत्वनिश्चयः। तथा च साध्यसहचरितधर्मिकसाध्याव्यापकत्वनिश्चायकत्वमेव भूयस्त्वं भूयोदर्शनहेतुतायां निविष्टमिति भावः। तद्विधूननम्। उपाधित्वशङ्काविधूननम्।ननु भूयोदर्शनस्य साध्याव्यापकत्वादिनिश्चायकत्वाभावादुक्तरूपं भूयस्त्वमसिद्धमत आह दीधितौ साध्याव्यापकत्वमित्यादि। तादृशेति।साध्यवदन्यत्वान्तरेत्यर्थः।

हितसंस्कारो न बहिरिन्द्रियसहकारी तद्व्यापारं विना-
पि च सहचारादिज्ञानवतो व्याप्तिग्रहात्, नापि मनसः,
इन्द्रियादिवद्भूयोदर्शनजन्यसंस्कारस्य तज्जन्यस्मरणस्य
वा प्रमाणान्तरत्वापत्तेः तस्मात् परिशेषेण सकृद्दर्शन-

तद्वाहितः संस्कारो बहिरिन्द्रियमात्रस्य सहकारी मनसोऽपि वा,
आद्ये तद्व्यापारं विनेति। द्वितीये नापीति। परिशेषात्साध्यसाधन-
सम्बन्धग्राहकातिरिक्तानपेक्षग्रहकत्वात्। उपाध्यभावग्राहकस्यापेक्ष-

---

भूयोदर्शनेति। भूयःसु स्थानेषु दर्शनापेक्षेत्यर्थः। ननु बहिरिन्द्रि-
यव्यापारदशायामेव संस्कारस्य तत्सहकारित्वसम्भवात्तद्व्या-
पारं विनेत्यादि मूले असङ्गतमत आह बहिरिन्द्रियमात्रस्येति। ननु
संस्कारस्य मनःसहकारित्वखण्डनेपि इन्द्रियान्तरसहकारेण
व्याप्तिग्राहकत्वप्रतिक्षेपाप्राप्तिरत आह मनसोपि वेति। तथा
च नापि मनस इति मूलस्थापिशब्दव्यत्यासेन न मन-
सोऽपीत्यर्थः। इन्द्रियमात्रसहकारित्वमेव प्रतिक्षिप्तमिति भावः।
मूले तस्मादित्यादि। यद्यपि व्याप्तिः सकृद्दर्शनगम्येति प्रतिज्ञा-
यां व्याप्तित्वस्यैकस्याभावात् व्यापकसामानाधिकरण्यस्य व्या-
प्तित्वेन पक्षत्वे बाधः परैरपि तस्याः सकृद्दर्शनगम्यत्वानुपगमात्
निरुपाधिसम्बन्धस्य व्याप्तित्वेन पक्षत्वे तु न न्यायमतव्युदासः
तस्याः सकृद्दर्शनगम्यत्वसिद्धावपि तन्मते अनुमित्युपयुक्ताया-
व्यापकसामानाधिकरण्यव्याप्तेस्तदगम्यत्वसम्भवात्, तथापि ज्ञान-
विषयतयानुमितिजनकतावच्छेदकतापर्याप्त्यधिकरणत्वेनैवोभयव्या
प्तिसाधारणधर्मेण पक्षत्वम्। सकृद्दर्शनगम्यत्वं तु साध्य-
साधनसम्बन्धत्वव्यापकविषयिताकत्वं विषयितासम्बन्धेन ताद्-
शग्रहकत्वव्यापकत्वं वा। तेन व्यापकसामानाधिकरण्यरूपव्याप्ते-
र्व्यभिचारज्ञानाभावादिसाचिव्येनैकदर्शनग्राह्यत्वेपि न सिद्ध-

गम्या सा। तथा ह्युपाध्यभावो व्याप्तिः। अभावश्च केवलाधिकरणं तत्कालसम्बन्धो वा स्वप्रकाशरूपं तज्ज्ञानं वा, तच्च प्रथमदर्शनेनावगतमेव चक्षुरादिना, न चाधिकस्तदभावोऽस्ति। न च प्रतियोगिज्ञानमधिकरणादिज्ञानजनकं येनोपाधिज्ञानं विना तन्न स्यात्। एवमुपाध्यभावे ज्ञाते किञ्चिन्न ज्ञातुमवशिष्यते। उपाध्यभावव्यवहारस्तु तद्धियमपेक्षते दीर्घत्वादिव्यवहार इवावधिज्ञानम्। न चैवं रासभसम्बन्धतुल्यवन्हिधूमसम्बन्धज्ञानादेवानु-

---

साधनमिति ध्येयम्। भूयोदर्शनग्राह्यत्वे सति ग्राह्यत्वरूपस्य परिशेषस्य व्याप्तौ स्वरूपासिद्धत्वादप्रसिद्धत्वाद्वा हेतुत्वासम्भवाद्व्याचष्टे दीधितिकारः साध्यसाधनेति। साध्यसाधनसम्बन्धग्राहकसापेक्षग्रहकत्वस्य घटादौ निरुक्तसकृद्दर्शनगम्यत्वव्यभिचारादभावद्वयगर्भता। यद्यपि तादृशसम्बन्धग्राहकातिरिक्तानपेक्षयत्किञ्चिद्ग्राहके घटादौ निरुक्तसकृद्दर्शनगम्यत्वाभावात् व्यभिचारः, तादृशातिरिक्तानपेक्षग्रहसामान्यकत्वोक्तावपि साध्यसाधनसम्बन्धविशिष्टद्रव्यत्वादौ तथात्वम्। अत एव तादृशग्राहकातिरिक्तसापेक्षग्रहकान्यत्वोक्तावपि न निस्तारः, तथापि साध्यसाधनसम्बन्धग्राहकत्वव्यापकत्वग्राहकताकत्वस्य विवक्षितत्वाददोषः। न चोपाध्यभावात्मकव्याप्तेः साधनस्वरूपतया साधनग्राहकताव्यापकस्वग्राहकताकत्वमेव सम्यक् साध्यसम्बन्धप्रवेशो व्यर्थ इति वाच्यम्। अनुमितिजनकतावच्छेदकतापर्याप्त्यधिकरणत्वप्रकारेण साध्यसम्बन्धिविशिष्टसाधनस्यैव पक्षत्वात्तद्ग्राहकत्वस्य केवलधूमादिग्राहकसन्निकर्षादौ साधनग्राहकत्वाव्यापकत्वेन निरुक्तहेतोः स्वरूपासिद्धिप्रसङ्गादिति भावः। ननु व्याप्तिग्राहकनिरूपणप्रस्तावे तथा हीत्यादिना व्याप्तिलक्षणाभिधानमर्थान्तरग्रस्तमत आह उपाध्यभावग्राहकस्ये-

मितिः स्यादिति वाच्यम् । उपाधिस्मरणे सत्युपाधित-
द्वयाप्येतरसकलतदुपलम्भकसमवधाने चोपाध्यनुपल-
म्भसहितस्य केवलाधिकरणज्ञानस्यानुमितिहेतुत्वात् व्य-

णीयत्वादसिद्धिं निरस्यति तथा हीति। उपाधिस्मरण इत्यादि। न-
न्वेवमसन्निकृष्टादिहेतुकानुमितिर्न स्यात् उपाधियोग्यानुपलम्भ-
विरहादत आह तद्व्यवहारेति।तथा च तद्व्यवहारस्य हेतुरेवानुमिति

त्यादि । साध्यसाधनसम्बन्धग्राहकातिरिक्तस्येति शेषः । मूले
रासभसम्बन्धतुल्येति। सोपाधित्वज्ञानकालीनत्वेन तुल्यत्वं सम्बन्ध-
ज्ञानस्य द्रष्टव्यम् । दीधितावसन्निकृष्टादीत्यादिपदेनाऽतीन्द्रिय-
परिग्रहः । योग्यानुपलम्भविरहादिति । हेतोरुपाधित्वघटकतया
तदसन्निकर्षदशायामुपाधित्वविशिष्टस्य यावदुपलम्भकसमवधा-
नासम्भवादित्याशयः । न चोपाध्युपलम्भकयावत्समवधानवि-
नाकृत एवोपाध्यनुपलम्भोऽनुमितिहेतुः, सत्यामपि साध्यसमाना-
धिकरणहेतुमत्त्वबुद्धावनुपाधित्वग्राहकसामग्रीविरहदशायामनुमि-
त्यनुत्पादस्य सर्वसिद्धत्वादिति भावः । उपाध्यनुपलम्भस्य नि-
रुपाधित्वव्यवहारहेतुत्वेप्युक्तशङ्कातादवस्थ्यादाह तथा चेति ।
इत्थं च व्यवहारहेतुरेव हेतुर्यस्या इति मध्यमपदलोपिबहुव्रीहि-
णाऽनुमितेर्व्यवहारहेतुहेतुकत्वादित्यर्थः । तच्चेत्यादिकं न्यायमते
न, गुरूणामसंसर्गाग्रहस्यैव व्यवहारहेतुत्वादिति मन्तव्यम्। न-
नूक्तास्वरसात् पूर्वकल्पपरित्यागे व्यवहारहेतुत्वाच्चेति चकारेण
तस्य समुच्चयोऽनुपपन्न इत्यत आह उपाधिस्मरण इत्यादीति।
तत्कारणेति । उपाध्यभावत्वप्रकारकज्ञानकारणेत्यर्थः । तथा च
तयोः प्रयोजकत्वमात्रं चकारः समुच्चिनोतीति नानुपपत्तिः। अनु-
मिति हेतुत्वादिति मूलेपि हेतुशब्दस्य प्रयोजकपरत्वादिति भावः।
केचित्तु ननूपाधिस्मरणसहकृतस्य तदनुपलम्भस्यानुमितिहेतुत्वो-
पेक्षायामुपाधिस्मरणे सत्युपाध्यनुपलम्भादनुमितिरित्येवं गुरुणां

वहारहेतुत्वाच्च । नन्वेवं प्रथमदर्शनेन व्याप्तिनिश्चया-द्विशेषदर्शने सति रासभादिसंशयवत् तत्संशयो न स्यादिति चेत् । व्याप्तिज्ञानानन्तरं किं विद्यमान एवो-पाधिर्मयोपाधित्वेन न ज्ञात इतिशङ्क्या गृहीतव्याप्तावपि

हेतुः तच्चोपाध्यभावत्वेन ज्ञानम् । उपाधिस्मरण इत्यादि तु त-त्कारणप्रदर्शनपरम् । अभावत्वञ्चेदमिह नास्तीति प्रतीतिसाक्षिकः स्वरूपविशेषोऽतिरिक्तः पदार्थो वेद्यन्यदेतत् । एवञ्चोपाध्यभावत्वेन ज्ञानेऽधिकापेक्षां न वारयाम इति भावः । व्याप्तिस्वरूपे संशया-भाव आपद्यते निरुपाधिसम्बन्धरूपव्याप्तित्वेन वा, आद्ये इष्टाप-त्तिः, द्वितीयमपि किमुपाधिस्मरणादिकं विना तत्समवधाने सति

ग्रन्थविरोध इत्यत आह उपाधिस्मरण इत्यादीति । तत्कारणेति । उपाध्यभावत्वप्रकारकज्ञानकारणेत्यर्थः । तथा च तत्र प्रयोजकत्वे पञ्चमीत्याहुः । ननु भावभिन्नत्वरूपस्याभावत्वस्य गुरूणामप्रसिद्ध-त्वादुपाध्यभावत्वप्रकारकज्ञानस्यानुमितिहेतुत्वं दुर्घटमत आह अभावत्वं चेति । नन्वेवमुपाध्यभावविशिष्टसाध्यसहचरितत्वस्यै-वानुमितिजनकतावच्छेदकतापर्याप्त्यधिकरणत्वेन पक्षत्वात्तत्र हे-तोः स्वरूपासिद्धिः तद्ग्रहे च अनुपाधित्वग्राहकस्यैवातिरिक्तस्या-पेक्षणीयत आह एवं चेति । न वारयाम इति । तथा चात्र कल्पे अनुमितिजनकतावच्छेदकत्वेनैव पक्षत्वं न तु तत्पर्याप्तधिकरणत्वे-नेति व्याप्तिस्वरूपस्य निरुक्तहेतुमत्वान्नासिद्धिः । न चैवं सिद्ध-साधनम् । एतद्दोषस्याग्रे सामानाधिकरण्यमात्रस्य तथात्वमित्यादिना दीधितिकृतैवोक्तत्वादिति भावः । नव्यास्तु ननूपाध्यभावत्वप्र-कारकमेव ज्ञानं यद्यनुमितिहेतुस्तदोपाध्यभावत्वविशिष्टस्यैव सा-ध्यसाधनसामानाधिकरण्यस्यानुमितिहेतुतावच्छेदकीभूतव्याप्तित्वा-

संशयः अतस्तत्र भूयोदर्शनेनोपाधिनिरासद्वारा व्याप्त्यभावशङ्काऽपनीयते। यद्वा ज्ञानप्रामाण्यसंशयाद्व्याप्तिसंशयः यथा घटज्ञानसामग्र्यां सत्यां घटज्ञाने सति तत्प्रामाण्यसंशयाहितस्ततसंशयो न त्वग्रिमसंशयानुरोधेन तत्र घटज्ञानमेव न वृत्तमिति कल्प्यते तथेहाप्युपाध्यभावस्य व्याप्तित्वात् तस्य च केवलाधिकरणरूपस्य प्रथमदर्शनेऽपि निश्चितत्वात् व्याप्तिग्राहकान्तरस्याभावाच्च परिशेषेण सकृद्दर्शनस्य व्याप्तिग्राहकत्वात् तन्निश्चये प्रामाण्यसंशयादेव तत्संशयः । न चैवं रासभेऽपि प्रथमं व्याप्तिपरिच्छेदःस्यादिति वाच्य-

---

वा सम्बन्धग्रहे, आद्ये किं विद्यमान इतितथा च तदग्रहमात्रं न तु तदभावत्वेनापि ग्रह इति समानप्रकारकनिश्चयाभावात्तत्संश-

---

त्तत्र सकृद्दर्शनगम्यत्वानुमाने गुरूणां बाधः स्वरूपासिद्धिश्चेत्यत आह एवं चेति । उपाध्यभावत्वस्य प्रामाणिकत्वे चेत्यर्थः। न वारयाम इति । उपाध्यभावत्वमिन्नं प्रकारतया यदनुमितिजनकतावच्छेदकं तत्रैव सकृद्दर्शनगम्यत्वस्य साध्यत्वादिति भाव इति प्राहुः । इष्टापत्तिरिति । अधिकरणस्वरूपव्याप्तेः प्रथममेव निर्णीतत्वादिति भावः । तदग्रहमात्रम् । उपाध्यग्रहमात्रम् । इत्थं च क चिद्विद्यमान एवोपाधिरुपाधित्वेन धूमादौ न ज्ञात इति शङ्कया शङ्कासामग्र्या गृहीतव्याप्तावपि संशय इति किं विद्यमान इत्यादिमूलस्यार्थः। उपाधेरनुपस्थितावुपाध्यभावत्वप्रकारेण निश्चयस्य प्रथमदर्शने दुर्घटत्वात् पूरयति सत्युपाधीति । अत्र प्रथमदर्शनेन नि-

म्। तत्र व्याप्तेरभावात् प्रत्यक्षज्ञाने विषयस्य हेतुत्वात्। क्वचिदसंसर्गाग्रहात् तथाव्यवहारो दोषमाहात्म्यात्। न चात्रापि तथा, आरोपे सति निमित्तानुसरणं न तु निमित्तमस्तीत्यारोप इत्यभ्युपगमात्। केचित्तु साधनवन्निष्ठात्यन्ताभावाप्रतियोगिसाध्यसामानाधिकरण्यं साधनवन्निष्ठान्योऽन्याभावाप्रतियोगिसाध्यवत्कत्वं वा व्याप्तिस्तदुभयमपि योग्यं प्रत्यक्षेण वह्निधूमसम्बन्धानुभवेन

यो नानुपपन्न इति भावः।द्वितीये ज्ञानमामाण्येतिप्रथमेति। सत्युपाधिस्मरणादावित्यादिः। न चात्रापीति। सर्वत्र रासभादावित्यर्थः। अवगत इतिस्वरूपकथनमात्रम्।महानस इति।अस्मिन्नित्यादिः। म-

---

श्चितस्य व्याप्तिस्वरूपस्यैव संशयोपपादकतया यद्वेत्यादिमूलसङ्गमात्पूरणं व्यर्थमित्यस्मद्गुरुचरणाः। मूले क्व चिदित्यादि। क्व चिद्रासभे व्याप्यत्वव्यवहारो दोषमाहात्म्याद्व्याप्यत्वासंसर्गाग्रहादित्यर्थः। अत्रापि तथेति मूलस्य धूमेपि दोषाधीनादसंसर्गाग्रहाद्व्याप्यत्वव्यवहार इति नार्थः। तथा सति सिद्धान्ते न तु निमित्तमस्तीत्यादिना दोषरूपस्य निमित्तस्य सत्त्वोपवर्णनासङ्गतेः। अतो व्याचष्टे सर्वत्र रासभादाविति। व्याप्यत्वेन व्यवहर्तव्ये इव तत्त्वेनाव्यवहर्त्तव्येपि रासभ इत्यर्थः। विषयाभावरूपस्य दोषस्योभयत्रापि तुल्यत्वादसंसर्गाग्रहरूपस्यारोपस्य तत्रापि सम्भवादिति भावः। इत्थं च मूले निमित्तानुसरणमित्यस्य सामग्र्यनुसरणमित्यर्थः। न तु निमित्तमस्तीति न तु दोषाद्यात्मकयत्किञ्चित्कारणमस्तीति कृत्वैवारोपः। तथा च कारणान्तरविरहादारोपस्थानीयोऽसंसर्गाग्रह एव रासभान्तरे नास्तीति न तत्र व्याप्यत्वव्यवहार इति

प्रथममवगतमेव, महानसे योऽत्यन्ताभावोऽन्योन्याभावो वावगतस्तस्य प्रतियोगी न वन्हिर्न वा वन्हिमानित्यनुभवात्, रासभे तथावगमेऽप्यग्रे स बाध्यत इति। तन्न। एवं हि तद्वन्हितद्धूमयोरेव व्याप्तिः स्यात न तु धूमत्ववन्हित्वाच्छेदेन। न च तदनुमानोपयोगिवन्हित्वं वन्हिमत्त्वं वा न प्रतियोगितावच्छेदकमिति प्रथमतो ज्ञातुमशक्यमेवेति मैवम्। प्रकृतसाध्यव्यापकसाधनाव्यापको वा साधनत्वाभिमतेन समं प्रकृतसाध्यसम्बन्धिता-

---

इति वायौ योग्यायोग्योद्भूतरूपसामान्यतद्वतोरिव योग्ये वह्नौ तादृशप्रतियोगित्वसामान्यतद्वतोरप्यसन्तान्योन्याभावयोर्योग्यत्वादिति भावः। न प्रतियोगितावच्छेदकमिति। न धूमसामान्यसमाना-

---

भावः। अवगतत्वस्य व्याप्त्यनन्तर्गतत्वादाह स्वरूपेति। महानसान्तरस्यासन्निकृष्टतादशायां योग्यानुपलम्भविरहान्महानसनिष्ठात्यन्ताभावप्रतियोगित्वसामान्याभावो वह्न्यादौ प्रत्यक्षेण गृहीतुमशक्य इत्यतः पूरयति अस्मिन्नित्यादिरिति। अवगतत्वस्य व्याप्तिघटकत्वे महानससामान्यघटितेपि व्यापकत्वस्य वह्न्यादौ प्रत्यक्षसम्भवादस्मिन्निति पूरणं व्यर्थमतः पश्चादुक्तमप्यवगतत्वं प्रागेव स्वरूपकीर्तनत्वेन व्याख्यातमिति ध्येयम। नन्वतीन्द्रियनिष्ठस्यैतन्महानसन्निष्ठाभावप्रतियोगित्वस्यायोग्यत्वात्तदभावः कथं योग्य इत्यत आह महतीति। वायुपरमाण्वादौ उद्भूतरूपसामान्याभावत्वादिना तादृशसामान्याभावादेरप्रत्यक्षत्वान्महतीत्युक्तम। तादृशेति। एतन्महानसनिष्ठाभावीयेत्यर्थः। ननु प्रतियोगितावच्छेदकत्वसामा-

वच्छेदकं विशेषणं वोपाधिः । उभयथापि तदभावो न व्याप्तिः । सिद्ध्यसिद्धिभ्यां तन्निषेधानुपपत्तेः । किन्तु यावत्स्वव्यभिचारिव्यभिचारिसाध्यसामानाधिकरण्यमनौपाधिकत्वम् । तस्य च प्रथमं ज्ञातुमशक्यत्वात् । किञ्च न वस्तुगत्या व्याप्तेर्ज्ञानं हेतुः किन्तु व्याप्तित्वे-

---

धिकरणतादृशाभावप्रतियोगितासामान्याभावच्छेदकमित्यर्थः । अथ साधनाव्यापकव्याप्यत्वाभावः साध्येऽधिकरणस्वरूपमेव एवं साधननिष्ठसाध्यसम्बन्धे साधनतावच्छेदकातिरिक्तावच्छेद्यत्वाभावोऽपीत्यनुशयानो येन रूपेण ज्ञाता व्याप्तिरनुमितिसङ्गं तद्रूपविशिष्टा न सकृद्दर्शनगम्या सामानाधिकरण्यमात्रस्य च तथाभावं न वारयाम इत्याशयेनाह किञ्चेति । विशेषणज्ञानसाध्यत्वात् तत्सा-

---

न्याभावस्य व्याप्त्यग्रहकत्वात्तद्ग्रहस्य दुःशक्यत्वं न क्षतिकरमतो व्याचष्टे न प्रतियोगितेत्यादि । साधनाव्यापकेति । न च धूमाव्यापकपर्वतत्वादिव्याप्यत्वस्य प्रत्येकवह्नौ सत्त्वादव्याप्तिः, साध्यतावच्छेदके साधनाव्यापकव्याप्यतावच्छेदकत्वाभावस्य विवक्षितत्वात् । अधिकरणस्वरूपमेवेति । तथा च तादृशसाध्यसम्बन्धरूपा व्याप्तिः प्रथमतो गृहीतुं शक्यते एवेति भावः । प्रथमवितर्कितोपाधेरभावरूपां व्याप्तिं परिष्कृत्य पश्चाद्वितर्कितोपाधेरभावात्मिकां व्याप्तिं परिष्कुर्वन्नाह एवमिति । साधनतावच्छेदकातिरिक्तावच्छेद्यत्वाभावोपीति । अधिकरणस्वरूपमेवेति अनुषज्यते । न च साधनतावच्छेदकातिरिक्तेन तत्तद्धूमत्वादिना साध्यसम्बन्धावच्छेदात् वह्निमान् धूमादित्यादावसम्भवः, साधनतावच्छेदकातिरिक्तमात्रावच्छेद्यत्वाभावस्य विवक्षितत्वात् । अनुशयान इति । आहेत्यग्रेऽन्वयः । तथात्वम् । सकृद्दर्शनगम्यत्वम् । नवारयाम इति । तथा च प्रकार-

न । तच्च उपाध्यभावत्वम् । न च उपाधेरज्ञाने तदभावत्वेन ज्ञानं सम्भवति, विशेषणज्ञानसाध्यत्वाद्विशिष्टज्ञानस्य । न च नियमतः प्रथममुपाधिधीरस्ति । यच्चोक्तं [1] प्रतियोगिज्ञानं व्यवहारहेतुः नाभावज्ञान इति। अस्तु तावदेवम्, तथापि तदभावो मा व्यवहारि उपाध्यभावज्ञानाधीनानुमितिः स्यादेव उपाधिज्ञानं विनापि, न चैवम् । वस्तुतस्तु विशेषादर्शने सहचारादिसाधारणधर्मदर्शनाद्व्यभिचारसंशयात् प्रथमदर्शनेन न व्याप्तिनिश्चयः । अथ व्यभिचारसंशयो नाव्यभिचारनिश्चयप्रतिबन्धकः, ग्राह्यसंशयस्य निश्चयाप्रतिबन्धकत्वात्,

---

मग्रीसाध्यत्वाद्वा।न चेति।उपलक्षणमेतत्।उपाधेरयोग्यस्यापि सम्भवात् उपाधिसामान्यतद्वतोर्मूर्त्तत्वादिसामान्यतद्वतोरिवासन्तान्योन्याभावयोरयोग्यतया प्रत्यक्षेण गृहीतुमशक्यत्वात् । न च योग्योपाधिव्यतिरेकग्रह एवानुमानाङ्गम्, अयोग्योपाधिग्रहेऽप्यनुमितिप्र-

---

तयाऽनुमितिजनकतावच्छेदकतापर्याप्त्यधिकरणत्वेन पक्षत्वे बाधः तादृशजनकतावच्छेदककोटिनिविष्टत्वेन पक्षत्वे च सिद्धसाधनमिति भावः । गुरुमते विशेषणज्ञानस्य विशिष्टज्ञानाहेतुत्वात् पूरयति तस्सामग्रीति । एतादिति। उपाधिज्ञानस्य प्रागसत्त्वमित्यर्थः । उपाधिसामान्येति । साधनाव्यापकस्यायोग्यस्यापि सत्त्वात् तद्व्याप्यत्वाभावः साध्ये न योग्य इत्यर्थः । तद्व्यवहारहेतुत्वाच्चेतिग्रन्थेन पर्यवसितस्योपाध्यभावत्वप्रकारकज्ञानहेतुत्वस्य खण्डनासम्भवादाह यथा-

अन्यथा संशयोत्तरं क्वापि निश्चयो न स्यादिति चेत्, न व्यभिचारसंशयः प्रतिबन्धक इति ब्रूमः, किन्तु विशेषादर्शने सति सहचारादिसाधारणधर्मदर्शनात् संशयः स्यात् न तु संशयसामग्रीतो निश्चय इति। किञ्च यद्धीसामग्री यत्र प्रतिबन्धिका विशेषादर्शने तत्र तद्धीरपीति व्यभिचारसंशयोऽपि प्रतिबन्धकः। एवं भूयोदर्शनमपि संशायकं तर्कस्त्वनवस्थाग्रस्त एवेति कथं व्याप्तिग्रहः।

सङ्गात्। यथाश्रुतं दूषयति यच्चोक्तमित्यादिना। व्यभिचारेत्यादि। अत्र प्रत्यक्षे ग्राह्यसंशयस्यापि प्रतिबन्धकत्वमादृत्य व्यभिचारशङ्कायास्तथात्वाभिधानम्। अन्यथा पुनरसाधारणतत्तत्कारणमेलकरूपा सामग्री प्रतिबन्धिका बोध्या। विवेचितञ्चेदं प्रत्यक्षमणि-

---

श्रुतमिति। उपाध्यनुपलम्भसहितस्य केवलाधिकरणज्ञानस्यानुमितिहेतुत्वादिति ग्रन्थतः श्रुतमित्यर्थः। ननु सत्यामपि व्यभिचारशङ्कायामनुमानादिना व्याप्तिनिश्चयोत्पादात्तस्याः प्रतिबन्धकत्वमसङ्गतमत आह प्रत्यक्ष इति। निश्चयात्मक इति शेषः। तेन व्यभिचारसंशयोत्तरं व्याप्तेः सन्देहोत्पादेपि न क्षतिः। ननु संशयोत्पत्तिक्षणे निश्चयानुत्पत्त्यर्थं निश्चयसामान्यं प्रत्येव समानाकारसंशयसामग्रीत्वेन विरोधित्वस्थितौ प्रात्यक्षिकनिश्चयं प्रति संशयस्य तथात्वे मानाभाव इत्याशयेनाह अन्यथा पुनरिति। ग्राह्यसंशयस्याऽविरोधित्वे पुनरित्यर्थः। कालंदिगाद्यन्तर्भावेन सामग्र्याः प्रतिबन्धकत्वे गौरवादाह असाधारणतत्तत्कारणेति। विशेषादर्शनधर्मिज्ञानकोटयुपस्थित्यादिरूप संशयकारणेत्यर्थः। विशेषादर्शनादीनामेकैकसत्त्वेपि निश्चयोत्पादाह मेलकेति। सामग्रीप्रतिबन्धकेति। तदभिप्रायेणैव सा च क्वचिदुपाधि-

अत्रोच्यते । व्यभिचारज्ञानविरहसहकृतं सहचारदर्शनं व्याप्तिग्राहकम् । ज्ञानं निश्चयः शङ्का च । सा च क्व चिदुपाधिसन्देहात् क्व चिद्विशेषादर्शनसहितसाधारणधर्मदर्शनात् । तद्विरहश्च क्व चिद्विपक्षबाधकतर्कात्, क्व चित् स्वतः सिद्ध एव । तर्कस्य व्याप्तिग्रहमूलकत्वेनाऽनवस्थेति चेत् । न । यावदाशङ्कं तर्कानुसरणात् । यत्र च व्याघातेन शङ्कैव नावतरति तत्र तर्कं विनैव व्याप्ति ग्रहः ।

दीधितौ । वक्ष्यते चाऽधिकमुपरिष्टात् । अत्र च यद्यपि साधनगोचरसाध्याभाववद्वृत्तित्वग्रहाभावो हेतुरिति न युक्तम्, केवला-

---

सन्देहादित्यादिना मूलकृता संशयसामग्र्याः प्रदर्शनादिति भावः । ननु विशेषादर्शनकोटुप्यपस्थितिधर्मिज्ञानादिसमुदायस्य निश्चयप्रतिबन्धकत्वं न समवायेन, विशेषादर्शनस्य समवायेन कुत्राप्यसत्त्वात्तादृशसमुदायसत्त्वेपि निर्णयप्रसङ्गात्, अत एव स्वरूपसम्बन्धेनापि न विरोधित्वं धर्मिज्ञानादेस्तेन सम्बन्धेन क्वचिदप्यसत्त्वादत आह विवेचितमिति । प्रामाण्यवाद इति शेषः । तथा च विशेषदर्शनाभावादिविशिष्टविरोधिकोटुप्यपस्थितिरेव संशयसामग्रीपदार्थस्तत्रोक्त इति तादृशकोटुप्यपस्थितित्वेनैव समवायेन निश्चयं प्रति विरोधित्वम्, वैशिष्ट्यञ्च तत्रैकालावच्छेदेनैकात्मवृत्तित्वरूपं निविष्टमतो नातिप्रसङ्ग इति भावः । ननु निर्णयत्वस्य नीलान्यघटत्वादेरिवाऽर्थसमाजग्रस्तत्वान्न कार्यतावच्छेदकत्वमतस्तदवच्छिन्नं प्रति संशयसामग्र्या अपि प्रतिबन्धकत्वं दुर्घटमत आह वक्ष्यते चेति । निश्चयत्वस्य कार्यतानवच्छेदकत्वाद्विशिष्टबुद्धिसामान्यं प्रत्येव ग्राह्याभावनिर्णयत्वेन प्रतिबन्धकत्वमु-

न्वयिनि ग्राह्याप्रसिद्ध्या ग्रहाप्रसिद्धेः । खण्डशः प्रसिद्ध्या क्वचित्तादृशभ्रमसम्भवेऽपि सर्वत्र तथा भ्रमे मानाभावात् । अत एव साध्यतावच्छेदकगोचरसाधनवन्निष्ठाभावप्रतियोगितावच्छेदकत्वग्रहोऽपि प्रत्युक्तः । सकलसाध्यतावच्छेदके तादृशग्रहे मानाभावात् । तथापि साध्यतावच्छेदके तत्पुरुषीयतादृशावच्छेदकत्वग्रहस्य विषयतयाऽभावः तद्विषयत्वाभावो वा तत्पुरुषीयव्याप्तिग्रहे हेतुः ।

भयकोटिविशिष्टधीसामग्रीसद्भावे संशयो न तु निश्चय इत्यादिकं हेत्वाभासादौ वक्ष्यत इत्यर्थः । साधनगोचरेति । साधनविशेष्यकेत्यर्थः । ग्राह्येति । साध्याभाववद्वृत्तित्वरूपस्य ग्राह्यस्याप्रसिद्ध्येत्यर्थः । नन्वभावे साध्यीयत्वावगाही प्रमेयत्वाभाववद्वृत्तिज्ञेयत्वमित्याकारो व्यभिचारग्रहः केवलान्वयिस्थले सम्भवत्येवेत्यत आह खण्डश इति । क्वचित् साधने । सर्वत्रेति । तथा च यत्र साधने साध्याभाववद्वृत्तित्वभ्रमो न जातस्तत्रैव व्यभिचारज्ञानाभावस्य व्याप्तिधीहेतुत्वमसम्भवीति भावः । तादृशग्रहे । साधनवन्निष्ठाभावप्रतियोगितावच्छेदकत्वग्रहे । तथापीति । तत्पुरुषीयहेतुमन्निष्ठाभावप्रतियोगितानवच्छेदकत्वबुद्धौ तादृशावच्छेदकत्वबुद्धेः समानविशेष्यत्वप्रत्यासत्त्या प्रतिबन्धकत्वद्योतनायोक्तं साध्यतावच्छेदक इति । एकस्य पुंसो वह्नित्वे धूमवन्निष्ठाभावप्रतियोगितावच्छेदकत्वग्रहेपि पुरुषान्तरस्य तत्र तादृशानवच्छेदकत्वग्रहस्य सम्पत्त्यर्थमाह तत्पुरुषीयेति । कायव्यूहदशायां सौभरिप्रभृतेरेकशरीरावच्छेदेन तादृशावच्छेदकत्वनिश्चयेप्यन्यशरीरावच्छेदेन तादृशानवच्छेदकत्वग्रहोपगमे पुरुषपदं शरीरार्थकम् । यदि चैकदेहावच्छेदेनैव कस्य चिदात्मनो बाधनिश्चयेप्यन्यस्यात्मनः परपुरप्रवेशन्यायेन विशिष्टधीः प्रामाणकी तदा तत्तच्छरीरावच्छिन्नतत्तत्पुरुषीयेत्येव क्वचिद्विवक्षणीयम् । विषयतयेति । यद्यपि घटत्वं तादृशप्रतियोगितावच्छेदकं वह्नित्वं च प्रमेयमित्येवं ग्रहेपि वह्नित्वं तादृशप्रतियोगितानवच्छेदकमित्येवं व्यापकत्वज्ञानोत्पादाद्विषयतासम्बन्धेन प्रतिबन्धकत्वमसङ्गतम् । न

च तादृशावच्छेदकत्वप्रकारतानिरूपितविशेष्यतासम्बन्धेन तथात्वं वाच्यम्, इत्थमपि वह्नित्वं तादृशप्रतियोगितानवच्छेदकं न वेति संशयोत्तरं वह्नित्वं तादृशानवच्छेदकमिति शाब्दादिज्ञानानुत्पत्तिप्रसङ्गात् निश्चयत्वस्य धर्मिघटितमूर्त्तिकतया सामान्यतः तादृशावच्छेदकत्वनिश्चयत्वेन प्रतिबन्धकत्वस्य वक्तुमशक्यत्वात् । तथापि हेतुमन्निष्ठाभावप्रतियोगितानवच्छेदकत्वप्रकारतानिरूपितविशेष्यतासम्बन्धेन तत्पुरुषीयतादृशानवच्छेदकत्वबुद्धिसामान्यं प्रति तत्पुरुषीयबुद्धिमात्रं प्रत्येव वा घटत्वपटत्वादितत्तत्प्रत्येकधर्मधर्मिकतादृशावच्छेदकत्वनिश्चयनिरूपितघटत्वपटत्वादितत्तत्प्रत्येकधर्मिनिष्ठविशेष्यतासम्बन्धेन तत्पुरुषीयहेतुमन्निष्ठाभावप्रतियोगितावच्छेदकत्वज्ञानत्वेन तत्पुरुषीयज्ञानत्वमात्रेणैव वा प्रतिबन्धकत्वं तादृशतादृशसम्बन्धावच्छिन्नतत्तद्भावकूटस्यैव च हेतुत्वम् । न चैवं प्रतियोगितावच्छेदकसम्बन्धभेदेन कार्यकारणभावानन्त्यम्, अनन्यगतिकतया तथात्वस्येष्टत्वात्।वस्तुतस्तादृशावच्छेदकत्वप्रकारत्वान्यप्रकारत्वानिरूपितविशेष्यतात्वरूपेणानुगतसम्बन्धेनैव तत्पुरुषीयतादृशावच्छेदकत्वज्ञानं प्रतिबन्धकमतः सम्बन्धाननुगम एव नास्ति वह्नित्वं तादृशावच्छेदकं न वेत्यादि संशयस्य तु वह्नित्वनिष्ठमवच्छेदकत्वाभावप्रकारतानिरूपितं यद्विशेष्यत्वं तदेवावच्छेदकत्वप्रकारतानिरूपितमपि न त्ववच्छेदकत्वनिरूपितं विशेष्यतान्तरमिति तादृशसंशयस्यानवच्छेदकत्वग्रहं प्रत्यविरोधित्वम् । अत एव वृक्षः संयोगवान् तदभाववांश्चेति समुच्चयाद्वृक्षः संयोगी न वेत्यादिसंशयस्य भेदः। समुच्चये प्रकारताद्वयनिरूपितैकविशेष्यत्वाभावात् । अत एव प्रत्यक्षमणिदीधितावतिरिक्तविषयतापक्षे मिथोविरुद्धधर्मद्वयप्रकारकैकविषयताप्रतियोगित्वं संशयत्वमाहत्य तद्विघटकत्वेनैव न च प्रकारताभेदे विषयताभेद इति मूलग्रन्थोऽवतारितः । अत एव च लीलावतीप्रकाशेपि विरोधिनानारूपावच्छिन्नैकविषयताप्रतियोगिज्ञानं संशयः समुच्चये तु विरोधिप्रत्येकप्रकारावच्छिन्ना भिन्नैव विशेष्यता न तु विरोधिनानारूपनिरूपितैकेति संशयग्रन्थे स्फुटमभिहितमित्यादिकमन्यत्र विस्तरः।विषयताया वृत्त्यनियामकत्वमते तत्सम्बन्धावच्छिन्नाभावाप्रसिद्धेराह तद्विषयत्वेति । तादृशावच्छेदकत्वनिष्ठप्रकारतानिरूपितयन्नि-

वस्तुतो व्याप्तेः साध्यसाधनभेदभिन्नतया विशिष्यैव कार्यकारणभावः। तथा च यत्र साधनं साध्याभाववदवृत्ति साध्यतावच्छेदकं साधनवन्निष्ठाभावप्रतियोगितावच्छेदकमेकविधमनेकविधं वा व्यभिचारज्ञानं प्रसिद्धं तत्र यथायथं तदभावः पुरुषनिष्ठो व्या-

---

श्रयविशेष्यत्वाभाव इत्यर्थः। विषयताया ज्ञानसमानकालीनतया च नातिप्रसङ्ग इति भावः। नन्वत्रापि कल्पे यस्य पुंसः स्वरूपसम्बन्धेन तादृशावच्छेदकत्वप्रकारकज्ञानमप्रसिद्धं तदीयव्याप्तिग्रहे व्यभिचारज्ञानाभावस्य हेतुत्वालाभः तथा व्यभिचान्तरग्रहेपि व्याप्तिग्रहप्रसङ्गश्चेत्यत आह वस्तुत इति। इत्यादिकमित्यादिपदेन साधनं साध्यवदन्यवृत्तीत्यादेरुपसंग्रहः। यत्रैकविधमेव व्यभिचारज्ञानं प्रसिद्धं तत्र तावद्व्यभिचारज्ञानाभावस्य हेतुत्वासम्भवादाह यथायोगमिति। तथा च यत्र यादृशं प्रसिद्धं तत्र तस्याभावो हेतुरिति भावः। समवायघटितसामानाधिकरण्यप्रत्यासत्त्या हेतुत्वमावेदयितुं पुरुषनिष्ठ इत्युक्तम्। यद्यपि व्यभिचारज्ञानदशायामपि घटाद्यवच्छेदेन तदभावस्य पुरुषे सत्त्वात्तदानीमपि व्याप्तिग्रहापत्तिः, तथापि समवायेन व्याप्तिग्रहं प्रति समवायावच्छिन्नव्यभिचारज्ञानाभावस्य निरवच्छिन्नविशेषणतासम्बन्धेनैव हेतुत्वं वाच्यम् व्यभिचारज्ञानकालीनस्तदभावश्च घटाद्यवच्छेदत्वविशिष्टविशेषणतयैव तत्रात्मनि वर्त्तत इत्यदोषः। यत्तु व्यभिचारज्ञानविशिष्टत्वावच्छिन्नस्यैव समवायसम्बन्धेनाभावो व्याप्तिधीहेतुः तथा चात्मनि घटाद्यवच्छेदेन व्यभिचारज्ञानस्य विरहेपि तद्विशिष्टस्यात्मत्वस्यैव सत्त्वान्नोक्तदोष इति। तन्न। वृक्षादौ मूलाद्यवच्छेदेन कपिसंयोगविशिष्टवृक्षत्वाद्यभावस्येवात्मन्यपि घटाद्यवच्छेदेन व्यभिचारज्ञानविशिष्टात्मत्वाद्यभावस्य सत्त्वात्। विशेषणस्य तत्रासत्त्वे तदवच्छेदेन विशिष्टवत्त्वस्यात्यन्तमसम्भावितत्वात्। केचित्तु समानावच्छेदकत्वप्रत्यासत्त्या व्यभिचारज्ञानाभावः शरीरनिष्ठ एव व्याप्तिधीहेतुः न चैवं यत्र खण्डशरीरोत्पत्तिदशायामवस्थितहस्ताद्यवच्छेदेन व्यभिचारज्ञानं तत्रोत्तरक्षणे खण्डशरीरावच्छेदेन व्याप्तिधीः स्यादुत्पन्नव्यभिचारज्ञानस्यावच्छेदकतासम्बन्धेन खण्डश-

प्तिग्रहहेतुः । अत एवैकविधव्यभिचारज्ञानविरहेऽन्यविधव्यभिचारग्रहाद्व्याप्तिधीविरोधः।एवञ्च क्व चिद्व्यभिचारज्ञानस्याऽप्रसिद्धया तदभावस्याऽहेतुत्वेऽपि न क्षतिः । प्रसिद्धायाः साधनवन्निष्ठाभावप्रतियोगितावच्छेदकत्वादिबुद्धेः समानविषयतया तदभावबोधविरोधित्वानुरोधेन तु तथात्वकल्पनं न वयं वारयामः, यदि तत्तत्प्रकारादिनिवेशेन विशेषे न पर्य्यवस्येदिति दिक् ।

रीरव्यक्तावसत्त्वादिति वाच्यम् । हस्तादेर्ज्ञानावच्छेदकत्वाभावात् चेष्टावत्त्वाविशेषेपि शरीरस्यैव तथात्वात् । अन्यथा चैत्रो जानाति त्यादेरिव हस्तो जानातीत्यादेरपि प्रसङ्गादित्याहुः । तच्चिन्त्यम् पूर्वकल्पे स्वयमस्वरसमाह अत एवेति । नानाविधव्यभिचारज्ञानाभावानां हेतुत्वादेवेत्यर्थः । निरुक्तावच्छेदकत्वग्रहाभावमात्रस्य हेतुत्वे तु व्यभिचारान्तरग्रहदशायामपि व्याप्तिधीः स्यादिति भावः एवं चेति । साध्यसाधनादिभेदेन विशिष्यैव हेतुत्वे चेत्यर्थः । नन्वसाधनं साध्याभाववद्वृत्तीत्यादि व्यभिचारज्ञानाभावस्य पुरुषनिष्ठतया हेतुत्वेपि साध्यतावच्छेदकं हेतुमन्निष्ठाभावप्रतियोगितावच्छेदकमित्यादि व्यभिचारज्ञानाभावस्य पुरुषनिष्ठतया हेतुत्वाभिधानमसङ्गतं वह्नित्वद्रव्यत्वाद्यनन्तसाध्यतावच्छेदकान्तर्भावेणानन्तकार्यकारणभावापत्तेः, किन्तु तत्पुरुषीयहेतुमन्निष्ठाभावप्रतियोगितानवच्छेदकत्वप्रकारकज्ञानं प्रति समानविशेष्यत्वप्रत्यासत्त्या तत्पुरुषीयतादृशावच्छेदकत्वप्रकारकज्ञानस्य विरोधितया विशेष्यतासम्बन्धेन तदभाव एव तत्र हेतुरुचितः पुरुषव्यक्तीनामपि साध्यतया तत्तत्पुरुषत्वस्य त्वयापि विषयविधया निवेश्यत्वेन तत्प्रवेशकृतगौरवस्याप्यसम्भवादत आह प्रसिद्धाया इत्यादि । तदभावबोधेति । तादृशावच्छेदकत्वाभावबोधेत्यर्थः । तथात्वकल्पनं विशेष्यतासम्बन्धेन तादृशावच्छेदकत्वग्रहाभावस्य हेतुत्वकल्पनम् । तत्प्रकारेति । तत्तद्धर्मितावच्छेदकमित्यर्थः । विशेष इति । वह्नित्वादौ जातित्वादिप्रकारेण तादृशावच्छेदकत्वनिर्णयेपि वह्नित्वत्वादिप्रकारेण तादृशानवच्छेदकत्वग्रहात्तेन रूपेण

तत्पुरुषीयावच्छेदकत्वनिश्चयस्य विशेष्यतासम्बन्धेनाभावस्तेन रूपेण तत्पुरुषीयानवच्छेदकत्वज्ञाने कारणं वाच्यम्। तथा च धर्मितावच्छेदकभेदेन कार्यकारणभावानन्त्यं तवाप्यावश्यकमिति तत्पुरुषीयत्वयोर्द्वैधानिवेशेन कारणत्वकल्पने गौरवमिति भावः। नव्यास्तु वह्नित्वजातित्वादिप्रकारेण वह्निजात्यादेः साध्यतास्थले वह्नित्वत्वाद्यवच्छिन्नधर्मिकतादृशावच्छेदकत्वनिश्चयत्वेन वह्नित्वत्वाद्यवच्छिन्नधर्मिकतादृशानवच्छेदकत्वग्रहं प्रति विरोधित्वेपि दण्डित्वकुण्डित्वाद्यवच्छिन्नसाध्यतास्थले निरवच्छिन्नविशेष्यतावच्छेदकत्वसम्बन्धेन तत्पुरुषीयानवच्छेदकत्वज्ञानसामान्यं प्रत्येव दण्डत्वकुण्डत्वादिप्रत्येकधर्मावच्छिन्नविशेष्यकतादृशावच्छेदकत्वनिरूपितविशेष्यतावच्छेदकत्वसम्बन्धेन तत्पुरुषीयावच्छेदकत्वज्ञानत्वेन तत्पुरुषीयज्ञानत्वमात्रेणैव वा प्रतिबन्धकत्वं युक्तम्। अन्यथा दण्डत्वकुण्डत्वाद्यनंतधर्मितावच्छेदकान्तर्भावेण प्रतिबन्धकतावच्छेदकगौरवापत्तेः। न चैवं तादृशतादृशसम्बन्धेन तदवच्छिन्नाभावकूटस्य च हेतुत्वमपेक्ष्य लाघवान्निरवच्छिन्नविशेष्यतावच्छेदकत्वप्रत्यासत्त्या तत्पुरुषीयतादृशानवच्छेदकत्वग्रहं प्रति निरवच्छिन्नविशेष्यतावच्छेदकत्वप्रत्यासत्त्यैव तादृशावच्छेदकत्वग्रहस्य प्रतिबन्धकत्वमुचितं दण्डत्वकुण्डत्वाद्यवच्छिन्नविशेष्यतांशे गौरवादिति वाच्यम्। तथा सति दण्डत्वकुण्डत्वसामानाधिकरण्येनावच्छेदकत्वनिर्णयेपि तत्समानाधिकरण्येनानवच्छेदकत्वग्रहस्यानुत्पप्रसङ्गात्। न च यत्र दण्डः कुण्डं च तादृशप्रतियोगितावच्छेदकमिति ज्ञानस्योत्तरं दण्डांशे तस्य भ्रमत्वग्रहस्तत्र दण्ड इव कुण्डेप्यनवच्छेदकत्वधीः स्यात् अप्रामाण्यज्ञानव्यक्त्यभावाविशिष्टस्यैव तत्पुरुषीयावच्छेदकत्वग्रहस्य समानविशेष्यतावच्छेदकत्वप्रत्यासत्त्या विरोधित्वात्, अन्यथा दण्डेप्यनवच्छेदकत्वधीस्तदानीं न स्यादिति वाच्यम्। दण्डत्वावच्छिन्नविशेष्यकतादृशावच्छेदकत्वनिश्चयनिरूपितविशेष्यतावच्छेदकतासम्बन्धेन तत्पुरुषीयावच्छेदकताज्ञानस्य विरोधितायामेव दण्डांशे भ्रमत्वज्ञानव्यक्तीनामुत्तेजकतया कुण्डत्वाद्यवच्छिन्नविशेष्यकतादृशावच्छेदकनिश्चयविशेष्यतावच्छेदकतासम्बन्धेन विरोधितायां तदप्रामाण्यज्ञानव्यक्तरप्रवेशात्, यत्र यद्धर्मावच्छिन्नविशेष्यकतादृशावच्छेदकत्वनिश्चयविशे-

व्याप्तिश्च धूमादिव्यापकवन्हिसमानाधिकरणवृत्तिधूमत्वादिकम्, तादृशसामानाधिकरण्यमात्रस्य रासभादिसाधारण्यात्। अत्र च व्यापकत्वांशग्रहे व्यभिचाराग्रहः समानाधिकरणवृत्तित्वांशग्रहे च तद्विशेषणतया सामानाधिकरण्यस्य ग्रहो हेतुरिति वक्तव्यम्। साध्यसम्बन्धितावच्छेदकरूपवत्त्वलक्षणव्याप्तिग्रहे विशेषणतया सम्बन्धस्य ग्रहो हेतुरित्यपि केचित्। यत्तु विरुद्धे

ष्यतावच्छेदकत्वसम्बन्धेन विरोधित्वं तत्र तद्धर्मविशिष्टांशे भ्रमत्वग्रहव्यक्तीनामुत्तेजकत्वात्। इत्थमेव च घटादिमत्ताबुद्धि प्रत्यपि बाधबुद्धेस्तदभावव्याप्यवत्तानिश्चयस्य च समानविशेष्यतावच्छेदकत्वप्रत्यासत्या विरोधित्वं परिष्कार्यमिति प्राहुः।

ननु व्याप्तिग्राहकमिति मूलस्य न व्याप्तिग्रहजनकतामात्रमर्थः पटाद्यवगाहिव्याप्तिधीजनके पटादावतिप्रसङ्गात्। नापि व्याप्तिग्रहत्वावच्छिन्नकार्यतानिरूपितकारणतावत्त्वं तथा, व्यभिचारज्ञानविरहे तदबाधात् लाघवेन व्यापकताग्रहत्वावच्छिन्नं प्रत्येव तस्य हेतुत्वात् अतो व्याप्तिविषयिताव्यापकीभूतयत्किञ्चिद्विषयिताकग्रहत्वावच्छिन्नं प्रति कारणत्वमेव तदर्थो वाच्यः स च व्याप्तेर्व्यापकसामानाधिकरण्यरूपत्वे सहचारज्ञानस्यासम्भवीत्यतो व्याप्तिमन्यथानिर्वक्ति व्याप्तिश्चेत्यादिना। साध्यसम्बन्धितेति। ग्राह्याभावानवगाहिनोपि व्यभिचारज्ञानस्य मणिमन्त्रादिन्यायेनात्र विरोधित्वं हेतुवृत्तिधर्मस्य साध्यतावच्छेदकत्वमेव वाऽत्र मते व्यभिचार इति भावः।उक्तव्याप्तिग्रहस्यानुमितावहेतुत्वात्तद्ग्राहकाभिधानमर्थान्तरग्रस्तामित्यस्वरसः कश्चिदित्युक्ता सूचितः। सामान्यत एवेति। अत्र च तदव्यापकत्वग्रहं प्रति तत्सामानाधिकरण्यग्रहत्वेन हेतुत्वं समानविशेष्यत्वं च प्रत्यासत्तेः। तेन विरुद्धाविरुद्धसाधारणैकव्यापकत्वाभावाद्विरुद्धस्थले सहचारग्रहस्य हेतुत्वेपि धूमवन्ह्योर्व्यापकत्वग्रहे तस्य हेतुत्वे मानाभाव इत्यपास्तम्। जलत्वादौ धूमव्यापकत्वग्रहानुरोधेन कल्पितस्य धूमसामानाधिकरण्यग्रहस्य वन्ह्यादौ धूमव्यापकताग्रहा-

सहचारभ्रमेण व्यापकत्वभ्रमात्सामान्यत एव सहचारज्ञानं हेतुरिति। तन्न। असिद्धत्वात्। विरुद्धेऽपि व्यापकत्वसामानाधिकरण्ययोर्ग्राहकसामग्रीक्रमयौगपद्याधीनं ग्रहणक्रमयौगपद्यं न तु मिथः कार्य्यकारणभाव इति। इदं पुनरवधेयम्। यथा विद्यमानमपि वन्हित्वे व्यवहितविप्रकृष्टरासभादिदेशनिष्ठाभावप्रतियोगितावच्छेदकत्वं न गृह्यते अभावदेशविप्रकर्षादिना ग्राहकाभावात्, तथा धूमवन्निष्ठाभावप्रतियोगितावच्छेदकत्वस्य सत्त्वेऽप्यग्रहसम्भवात्। नानुपलब्धेः, प्रतियोगिसत्त्वविरोधित्वादिलक्षणा योग्यतेति न तत्सामान्याभावो लौकिकप्रत्यक्षगम्यः परन्तु कथञ्चिद्विरोधस्फुर-

---

र्थमप्यावश्यकत्वादिति ध्येयम्। असिद्धत्वादिति। व्यापकत्वभ्रमे सहचारभ्रमस्य हेतुताया असिद्धत्वादित्यर्थः। असिद्धिमेव स्पष्टयति विरुद्धेपीति। सामग्रीक्रमेति। सामग्रीक्रमाधीनो ग्रहणस्य क्रमः सामग्रीयौगपद्याद्यधीनं च ग्रहणस्य यौगपद्यमित्यर्थः। नत्विति। अन्यथा व्यापकत्वज्ञानोत्तरमपि क्व चित्सामानाधिकरण्यज्ञानोत्पत्तेः तत्रापि व्यापकत्वज्ञानं हेतुरित्येवं किं न रोचयेदिति भावः। व्यवहितेति। व्यवधानम्। मध्यस्थितकुड्यादिसम्बन्धः। विप्रकर्षो दूरवर्त्तित्वम्। अग्रहसम्भवादित्यस्य नानुपलब्धेर्योग्यतेत्यनेनान्वयः। प्रतियोगिसत्त्वेत्यादि। प्रतियोगिसत्त्वप्रसञ्जितोपलब्धिकत्वरूपेत्यर्थः। तथा च वह्नित्वं यदि धूमाधिकरणयावत्सन्निकर्षे सति धूमवन्निष्ठाभावप्रतियोगितावच्छेदकं स्यात्तादृशावच्छेदकत्वेनोपलभ्येत इत्यापादनस्यैवात्र योग्यतासम्पादकत्वाद्यावतां च धूमवतामेकदा सन्निकर्षविरहान्न सा सम्भवतीति तादृशावच्छेदकत्वाभावो न लौकिकप्रत्यक्षविषय इति भावः। आदिपदादाचार्योक्तायाः प्रतियोगितदव्याप्येतरयावत्तदुपलम्भकसमवधानरूपयोग्यतायाः परिग्रहः। कथं चिच्छब्दादिना। विरोधादीति। धूमत्वत्वादौ तादृशावच्छेदकत्वस्य विरोधादिग्रहवशादित्यर्थः। विरोधोऽसामानाधिकरण्यम्। आदिपदाच्च व्यापकीभूताभाव-

णादिवशाद्धूमत्वादौ गृहीतो धूमवन्निष्ठात्यन्ताभावप्रतियोगितानवच्छेदकत्वाभावो वन्हित्वादावुपनयमर्य्यादया गृह्यते। अत एवानुमानादिना व्यभिचारग्रहेऽपि न व्याप्तिधीः। निर्णयात्मनि साधारणे वा दोषविशेषाजन्योपनीतभाने संशयादिसाधारणस्य निश्चयात्मनो वा विपरीतज्ञानमात्रस्यैव प्रतिबन्धकत्वात् तत्तद्धूमादौ दे-

---

प्रतियोगित्वस्योपग्रहः। तथा च तादृशावच्छेदकत्वासमानाधिकरणतया तादृशावच्छेदकत्वव्यापकाभावप्रतियोगितया वा धूमत्वत्वादिमत्त्वस्य धूमत्वादौ परामर्शाद्धूमत्वे तादृशावच्छेदकत्वाभाव इत्याकारकव्यतिरेकयनुमित्यनन्तरमेव वह्नित्वं तादृशप्रतियोगितानवच्छेदकमित्याकारकप्रत्यक्षमिति भावः। न चैवमुक्तक्रमेण वह्नित्वत्वादिहेतुना तादृशावच्छेदकत्वाभावस्य वह्नित्वेऽपि व्यतिरेकयनुमितिसम्भवात् धूमत्वादिपर्यन्तानुसरणं व्यर्थमिति वाच्यम्। प्रत्यक्षत एव प्रथमतः साध्यतावच्छेदकीभूते वह्नित्वादौ तादृशावच्छेदकत्वाभावग्रहार्थं तदनुसरणादिति। अथानुपलब्धियोग्यताया अननुगतत्वादिहान्यैव सास्त्वित्यत आह अत एवेति। तादृशावच्छेदकत्वाभावस्य लौकिकप्रत्यक्षगम्यत्वाभावादेवेत्यर्थः। निर्णयात्मनि संशयादिसाधारणस्य प्रतिबन्धकत्वादित्यन्वयः। निश्चयत्वावच्छिन्नं प्रत्येव विपरीतज्ञानस्य विरोधित्वे विपरीतनिश्चयोत्तरं संशयोपत्तिरत आह साधारणे वेति। निश्चयात्मन इत्यग्रिमेणान्वयः। शंखो न पीत इत्यादिनिश्चयसत्त्वेपि दुष्टनयनस्य पुंसः शंखः पीत इत्युपनीतभानोत्पत्तेराह दोषविशेषाजन्येति। सत्यपि बाधनिर्णये लौकिकप्रत्यक्षोदयादाह उपनीतेति। अत्रोपनीतान्तं साक्षात्कारत्वानिरूपितविषयत्वोपलक्षकम्, न तु दोषविशेषाजन्यत्वादेः प्रवेशो गौरवात् साक्षात्कारत्वानिरूपिततत्प्रकारताकबुद्धित्वावच्छिन्नं प्रत्येव लाघवेन तदभावनिश्चयत्वेन प्रतिबन्धकत्वात् साक्षात्कारत्वनिरूपिततत्प्रकारकत्वं तत्प्रकारकलौकिकप्रत्यक्षवद्दोषविशेषजन्यप्रत्यक्षेष्यविशिष्टम्, उभयत्रैव साक्षात्करोमीत्यनुभवात् एकशेषस्य कर्तुमशक्यत्वात्। अत एव

शान्तरवृत्तित्वसम्भावनाविरहादिवशात् गृह्यमाणो वन्ह्याद्यभाववदवृत्तित्वाभावो धूमत्वाद्यवच्छेदेन गृह्यते लाघवादित्यपि वदन्ति ॥

लौकिकसन्निकर्षजन्यस्यापि घटादिसंशयस्य तदभावनिर्णयप्रतिध्यत्वं संशयत्वघटकप्रकारताया अपि साक्षात्कारत्वानिरूपितत्वात् घटं सन्देह्मीत्यादिवत् घटं साक्षात्करोमीत्याकारकसंशयानुव्यवसायस्याभावात् इत्यादिकमन्यत्र विस्तरः । साध्याभाववदवृत्तित्वाभावव्याप्तेर्लौकिकप्रत्यक्षमभ्युपगच्छतां मतमाह तत्तद्धूमादाविति । विरहादीत्यादिपदात्सन्निकर्षाद्युपसंग्रहः । ननु धूमान्तरे निर्वह्निवृत्तित्वसम्भावनासत्त्वात् कुतो धूमत्वावच्छेदेन तद्ग्रहणमत आह लाघवादिति । धूमान्तराकल्पनलाघवादित्यर्थः । तथा च तदेवोक्तसम्भावनायाः प्रतिबन्धकमिति भावः । कालान्तरे वन्ह्यभाववदवृत्तित्वेपीदानीं तदनुपलब्धिसम्भवादत्र मतेप्यनुपलब्धेर्योग्यता नास्तीत्यस्वरसो वदन्तीत्युक्ता सूचितः ॥

इति व्याप्तिग्रहोपायप्रकरणं सम्पूर्णम् ।

दीधित्याः तर्कः

हुताशनरासभादिपदार्थसार्थस्याऽन्वयव्यतिरेकयोरन्वयव्यतिरेकौ धूमस्योपलभमानोऽवश्यमेतेषामन्यतमं कारणं धूमस्येत्यवधार्य सन्दिग्धे किमेतानि सर्वाण्येव कारणानि किं वा कानिचि-

जागदीश्याः तर्कः

ननु वह्नौ धूमकारणत्वसंशयनिरासार्थं तर्कानुसरणं व्यर्थं धूमकारणत्वस्य क्वचिदर्थनिर्णये तत्सहचरितधर्मवत्त्वग्रहाभावादेव वन्हौ तत्संशयस्यासम्भवात्, साधारण धर्मवत्ताग्रहस्य संशयहेतुत्वात् । न चेन्धनादौ तर्कं विनैव धूमकारणत्वनिर्णयात्तत्सम्भवः । तथा सति वन्हावपि तद्वदेव धूमकारणत्वग्रहे बाधकाभावादित्यतः सामान्यतः कारणत्वनिर्णयेन साधारणधर्मवताज्ञानं सम्पादयन् संशयस्य सम्भवमाह हुताशनेत्यादिना । अथैतेषामन्यतमो धूमकारणमित्यवधारणस्य तावदन्यतमत्वावच्छेदेन धूमकारणत्वावगाहित्वे तादृशान्यतमत्ववत्ताज्ञानस्यैव व्यावर्त्तकधर्मदर्शनविधया वन्हौ धूमकारणत्वसन्देहविरोधित्वसम्भवात्तर्कानुसरणं विफलमत आह सन्दिग्धे इति । सन्देहाकारमाह किमेतानीति । हुताशनाद्यन्यतमवृत्तिकारणत्वं हुताशनाद्यन्यतमत्वावच्छेद्यं न वेति सन्देहे तात्पर्यम्।तथा चोक्तसन्देहानुरोधादन्यतमत्वसामानाधिकरण्येनैव धूमकारणत्वं पूर्वमवधृतमन्यथा प्रतिबन्धकसत्त्वे तादृशसन्देहायोगादिति भावः । नन्वेतावता सामान्यतः कारणत्वनिश्चयेन धूमकारणत्वसहचरितधर्मवत्ताज्ञानस्य सम्पादनेपि धूमकारणत्वाभावस्वरूपापरकोटिनिश्चयस्य कुत्राप्यसम्भवात्तत्सहचरितधर्मव-

चिन्तामणेः तर्कः।

तथा हि, धूमो यदि वह्न्यसमवहिताजन्यत्वे सति वन्हिसमवहिताजन्यः स्यान्नोत्पन्नः स्यादित्यत्र किं

त्तथा कानिचिच्च नेति, अत्र च यस्य व्यतिरेकेऽपि इतरेभ्यस्तथाविधेभ्यो धूमोत्पत्तिमुपलभते तस्याऽहेतुत्वमेवाधारयति यथा रासभादेः, यस्य व्यतिरेके तादृशापरसकलान्वयेऽपि धूमानुत्पत्तिं पश्यति तस्य कारणत्वमेव निश्चिनुते यथा वन्हेः, तत्र चाऽकारणत्वसन्देहो विरोधितामासादयन्निवर्त्तते येन तर्केण तमाह धूम इत्यादि। अनुसन्धेयश्चावश्यं कार्य्यकारणभावग्रहः, तदधीन-

---

ज्ञानविरहादेव धूमकारणत्वसन्देहासम्भवात्तन्निरासकस्तर्को विफल एवेत्यतो धूमकारणत्वाभावनिर्णयस्य प्रकारमाह तत्रेति। अहेतुत्वमेवेति। तथा च तमन्तर्भाव्यैव कारणत्वाभावसहचरितधर्मवत्त्वग्रहो नानुपपन्न इति भावः। ननूक्तक्रमेण कारणत्वसन्देहस्य सामग्रीं सम्पाद्य तर्कस्य तन्निवर्त्तकत्वोपपादनेपि कारणतानिर्णायकत्वं तर्कस्य दुर्घटं प्रत्यक्षेण कारणत्वग्रहेऽन्वयव्यतिरेकज्ञानस्य हेतुतया तद्विलम्बात् कथं प्रत्यक्षतः कारणताग्रहः स्यादत आह यस्य चेति। तथा चान्वयव्यतिरेकज्ञानमप्यस्तीति भावः। तत्र चेति। धूमकारणत्वनिश्चये चेत्यर्थः। विरोधितामिति। निश्चयात्मकप्रत्यक्षे ग्राह्यसंशयस्यापि प्रतिबन्धकत्वमाहत्येदम्। ननु व्यभिचारशङ्कानिरासकस्तर्को दर्शनीयः स च धूमो यदि वह्निव्यभिचारी स्याद्वह्निजन्यो न स्यादित्याकार एवेति वह्निजन्यत्वग्राहकतर्कस्य प्रदर्शनानौचित्यमत आह अनुसन्धेय

त्वाव्याप्तिबुद्धेः । सामानाधिकरण्येनान्वयव्यतिरेकहात् जायमा-

---

इति । अपेक्षणीय इत्यर्थः । कार्यकारणभावग्रह इत्यस्य वह्निधूमयोरित्यादिः । कार्यकारणभावे इति पाठे तु अनुसन्धेय इत्यस्य निश्चेतव्य इत्यर्थः । तदधीनत्वात् । कार्यकारणभावग्रहाधीनत्वात् अन्यथा धूमस्य वन्हिजन्यत्वानिर्णये बाधग्रहाभावादुक्ततर्क एव नावतरेत् को व्यभिचारशङ्कानिरासद्वारा व्याप्तिग्राहकः स्यात्, तथा च बाधनिर्णयविधया व्यभिचारशङ्कानिवर्त्तकतर्के मूलीभूतस्य वन्हिजन्यत्वनिर्णयस्य सम्पादकतयैव धूमो यदि वन्ह्यसमवहितजन्यत्वे सतीत्यादिको मूलोक्ततर्को व्याप्तिग्रहे उपयुज्यते इति भावः । यत्तु व्यापकसामानाधिकरण्यरूपव्याप्तिग्रहे विशेषणतावच्छेदकीभूतव्यापकतानिर्णयविधया कारणताज्ञानस्य हेतुत्वं कारणत्वस्य व्यापकतागर्भत्वादतः कारणतानिर्णयाधीनत्वं व्याप्तिबुद्धेरिति वदन्ति । तच्चिन्त्यम् । यद्यपि वन्हिजन्यत्वं स्वकारणवह्निकत्वं तच्चानन्यथासिद्धस्वव्यापकवन्हिकत्वमिति तत्रान्यथासिद्धभागो व्यर्थः धूमधर्मिकस्वव्यापकवन्हिकत्वनिर्णयस्यैव व्याप्तिग्रहोपयोगित्वसम्भवात् । किञ्च स्वपदं यदि धूमपरं तदा धूमव्यापकत्वविशिष्टवह्निप्रसिद्ध्यैव व्यभिचारशङ्कानिराससम्भवात्तज्जन्यत्वग्राहकतर्कानुसरणं व्यर्थं यदि च धूमान्यपरं तदा धूम एव मूलशैथिल्यम् तथापि वह्निजन्यत्वं वह्निनिष्ठजनकताप्रतियोगित्वं जनकत्वं तु स्वरूपसम्बन्धविशेषः पदार्थान्तरं वेति नव्यमतेनायं ग्रन्थः । अत एव प्राचां मते स्वत्वस्यानुगतत्वादालोकादिसाधारणमन्यथासिद्ध्यनिरूपकव्यापकतावच्छेदकीभूतवह्नित्वादिधर्मकत्वमेव वन्ह्यादिकारणकत्वं तथा च धूमादौ तादृशधर्मावच्छिन्नसामानाधिकरण्यभानस्य सामग्रीसत्त्वदशायां वह्नौ धूमकारणत्वग्रह एव वह्निधूमयोर्व्याप्तिग्रहस्वरूपः स्वव्यापकसाध्यसामानाधिकरण्यावगाहित्वादिति मूलोक्ततर्कस्य तादृशकारणत्वग्राहकत्वानुरोधेनैव व्याप्तिग्राहकत्वं सम्भवतीत्याशयेनाह समानाधिकरण्येनेति । प्रकारे तृतीया । तथैव सामानाधिकरण्येनैव । गृह्णतः विषयीकुर्वतः । तस्यैव वेति । कारणताग्रहस्यैव वेत्यर्थः । व्याप्तिपरि-

नस्य तथैव हेतुहेतुमद्भावं गृह्णतस्तस्यैव वा व्याप्तिपरिच्छेदकत्वात्। विपर्य्यये तत्कोटिमात्रपर्य्यवसायिनश्च तर्कस्य तदभावकोटिकशङ्कानिवर्त्तकत्वम्। अन्यथा धूमो यदि वन्दितच्छून्यजन्यान्यतरो न स्यात् जन्यो न स्यादित्यादेरपि तथात्वापत्तेः। तथा

च्छेदकत्वात् व्याप्तिविषयत्वात्। वाकारोऽनास्थायाम्। स्वोत्पत्त्यव्यवहितप्राक्कालावच्छिन्नस्वाधिकरणवृत्तिकाभावप्रतियोनितानवच्छेदकत्वरूपाया एव व्यापकतायाः कारणाताशरीरनिविष्टतया तदवच्छिन्नसामानाधिकरण्यपरिच्छेदेपि स्वसमानाधिकरणाभावप्रतियोगितानवच्छेदकधर्मावच्छिन्नसामानाधिकरण्यरूपाया अनुमित्युपयुक्तव्याप्तेः कारणताग्रहेण विषयीकरणादिति ध्येयम्। ननु तद्धर्मावच्छिन्नापादकाताकापत्तित्वेनैव तद्धर्मावच्छिन्नवत्ताबुद्धिं प्रति विरोधित्वाद्विशिष्टापादककस्य मूलोक्ततर्कस्य कुतो वह्निजन्यत्वशङ्कानिवर्त्तकत्वमत आह विपर्यये तन्मात्रकोटिपर्यवसायिनश्चेति। विपर्यये स्वविशेष्यपक्षकापादकाभाववत्त्वानुमाने। तन्मात्रपर्यवसायिन इति। तन्मात्रविधयताकस्यैवेत्यर्थः। तदभावकोटिकशङ्केति। अत्र शङ्कात्वमविवक्षितं तदभाववत्ताज्ञानमात्रस्यैव निवर्तकत्वं बोध्यम्। तथा च तद्धर्मावच्छिन्नापादकताकापत्तित्वमात्रं न तद्धर्मावच्छिन्नवत्ताबुद्धिविरोधितायां तन्त्रमिति भावः। मात्रपदस्य प्रयोजनमाह अन्यथेति। विपर्यये यत्कोटिर्भासते तदभावशङ्कायामेव तर्कस्य प्रतिबन्धकत्वे इत्यर्थः। वह्नितच्छून्येति। वह्निजन्यवह्निशून्यजन्यैतदन्यतरो न स्यादित्यर्थः। न चोक्तान्यतरत्वत्वावच्छिन्नाभावस्याप्रसिद्धिः जन्यमात्रस्यैव वह्निशून्यादृष्टादिजन्यत्वेन जन्यत्वत्वस्यैव लाघवेन तादृशाभावप्रतियोगितावच्छेदकत्वादिति वाच्यम्। प्रतीतिबलादुगुरुधर्मस्यापि प्रतियोगितावच्छेदकत्वस्वीकारात् तथात्वापत्तेरिति। वन्हिजन्यत्वाभावकोटिकशङ्कानिवर्त्तकत्वापत्तेरित्यर्थः। न चात्र विपर्ययेऽन्यतरत्वस्यैव पर्यवसानं न तु वह्निजन्यत्वस्येति कथं तदभावकोटिकशङ्कानिवर्त्तकत्वप्रसक्तिरुक्ततर्कस्येति वाच्यम्। घटपटान्यतरत्वस्य घट-

पर्य्यवसायिता च क्वचिद्विशेषतो व्याप्या, सामान्यतोऽपि क्व चित्पक्षधर्म्मताबलात् । तत् सम्पत्तये चात्र वह्न्यसमवहिताजन्यत्वेन

त्वादिस्वरूपत्ववत् वह्नितच्छून्यजन्यान्यतरत्वस्यापि वह्निजन्यत्वतच्छून्यजन्यत्वस्वरूपतया वह्निजन्यत्वेपि विपर्ययस्य पर्यवसानसम्भवादिति भावः । तथा पर्यवसायिता चेति । विपर्यये तन्मात्रकोटिपर्यवसायिता चेत्यर्थः । विशेषतो व्याप्त्येति । यद्धर्मावच्छिन्नाभावशङ्कायां तर्कस्य विरोधित्वमापाद्याभावे तद्धर्मावच्छिन्नस्य व्याप्यत्वग्रहादेव क्वचिद्विपर्यये तन्मात्रकोटिपर्यवसानं यथा पर्वतो यदि निर्वह्निः स्यान्निर्धूमः स्यादित्यादौ । तत्र ह्यापाद्यस्य निर्धूमत्वस्याभावे धूमे वन्हित्वावच्छिन्नस्य व्याप्तिग्रहादेव विपर्ययानुमाने वन्हिमात्रपर्यवसायित्वमिति भावः । सामान्यतोपीति। यद्धर्मावच्छिन्नाभावशङ्कायां तर्कस्य विरोधित्वमापाद्याभावे तदितरधर्मावच्छिन्नस्य व्याप्तिग्रहादपि पक्षे धर्मताबलादेव क्वचिद्विपर्ययानुमाने तद्धर्मावच्छिन्नस्य पर्यवसानम् । यथा नित्यभिन्नमिदं यदि नित्यान्यत्वे सति कार्यद्रव्यं न स्यात्तद्रव्यं न स्यादित्यादौ । तत्र हि विपर्ययानुमाने द्रव्यत्वेन नित्यान्यत्वविशिष्टस्य कार्यद्रव्यत्वाभावस्याभावः सिद्ध्यन् नित्यान्यत्वाभावस्य बाधाद्विशेष्याभावात्मके कार्यद्रव्यत्वे एव पर्यवस्यति।तथा च धूमो यदीत्यादिमूलोक्ततर्कस्यापि विपर्यये वन्हिजन्यत्वपर्यवसायि तया तदभावशङ्कानिवर्त्तकत्वमक्षतं तद्धर्मावच्छिन्नवत्तासंशये तद्धर्मावच्छिन्नापादककापत्तित्वेनेव फलबलात् विशेष्यवत्ताबुद्धिं प्रत्यपि विशेषणवत्तानिर्णयसहकृतविशिष्टापादकाकापत्तित्वेनैकप्रतिबन्धकत्वकल्पनादिति भावः । तत्सम्पत्तये । पक्षधर्मतासम्पत्तये । अन्यथाऽपाद्याभावेनोत्पन्नत्वेन वह्न्यसमवहिताजन्यत्वविशिष्टस्य वन्हिसमवहिताजन्यत्वस्याभावः सिद्ध्यन् वन्हिसमवहितजन्यत्वरूपविशेष्याभाव एव पर्यवस्यतीति न स्यात् वह्न्यसमवहिताजन्यत्वरूपस्य विशेषणस्याभावमादायापि विशिष्टाभावस्य पर्यवसान सम्भवादिति भावः। ननु विशिष्टाभावस्यातिरिक्तत्वात् वन्ह्यसमवहिताजन्यत्वेन विशेषित एव पक्षे कुतोविपर्ययानुमानस्य वन्हिसमवहितजन्यत्वपर्यवसायित्वमत आह विशेषणेति ।

पक्षो विशेष्यः। विशेषणवत्त्वेनोपस्थिते विशिष्टाभावबुद्धेर्विशेष्याभावमात्रावलम्बितत्वात्। तथोपस्थितिविरोधि चावन्हेरित्यादि शङ्काद्वयमग्रे निरसनीयम्। वस्तुतो वन्ह्यजन्यमपि वन्हिसमवहितजन्यं वन्ह्यसमवहिताजन्यञ्च सम्भवतीति वन्हिजन्यत्वपर्य्यव-

---

विशिष्टाभावस्य विशेष्यविशेषणयोः प्रत्येकाभावाभ्यामनतिरेकादिति भावः। ननूक्तविशेषणवत्तानिश्चये सत्येवोक्ततर्कस्य विशेष्याभावरूपे वन्हिसमवहितजन्यत्वे पर्य्यवसानं स्यात् स एव तु नास्ति वन्हिसमवधानं विनापि धूमो भविष्यतीति शङ्कया प्रतिबन्धादित्यत आह तथोपस्थितीति। वन्ह्यसमवहिताजन्यत्वेन धूमोपस्थितीत्यर्थः। अग्रे अवन्हेरेव भविष्यतीत्यादिग्रन्थेन नियमान्तर्भावानन्तर्भावाभ्यां शङ्काद्वैविध्यम्। न चोक्ततर्कस्य वन्हिसमवहितजन्यत्वग्राहकत्वेपि धूमस्य वन्हिजन्यत्वशङ्कायां बाधकाभाव इति वाच्यम्। वन्ह्यसमवहिताजन्यत्वे सति वन्हिसमवहितजन्यत्वावच्छेदेन वन्हिजन्यत्वस्यालोकादौ पूर्वं गृहीतत्वात्तादृशजन्यत्वग्राहकतर्कस्यापि व्यावर्त्तकधर्मदर्शनसम्पादकतयैव वन्हिजन्यत्वशङ्कानिवर्त्तकत्वादिति भावः। उक्तकल्पे दूषणाभिधानपूर्वकं कल्पान्तरमाह वस्तुत इति। वन्ह्यजन्यमपि वन्हिसमवहितजन्यं वन्ह्यसमवहिताजन्यं सम्भवतीति। तथा च वन्ह्यसमवहिताजन्यत्वे सति वन्हिसमवहितजन्यत्वावच्छेदेन वन्हिजन्यत्वस्याऽसत्त्वात् वन्हिसमवहितजन्यत्वग्राहकस्तर्को व्यावर्त्तकधर्मदर्शनसम्पादकतयापि न धूमधर्मिकवन्हिजन्यत्वशङ्कानिवर्त्तको भवितुमर्हतीति भावः। वन्हिसमवहितजन्यत्वं वन्हिसमवहितजन्यत्वशब्दार्थः। वन्हिजन्यत्वपर्य्यवसितं वन्हिजन्यत्वस्वरूपम्। यद्यपि वन्हिसमवहितवाम् धूमादित्यादिस्थलीयव्याप्तिग्रहोपयुक्तस्य वन्हिसमवहितजन्यत्वस्य ग्राहकत्वाभिप्रायेण वन्हिसमवहिताजन्यत्वमादाय कीकृत्यैव मूलसामञ्जस्ये वन्हिजन्यत्वपर्यवसितोक्तिर्विफला, तथापि अवन्हेरेव भविष्यतीत्याद्युत्तरग्रन्थपर्यालोचनया वन्हिमान् धूमादित्यादिप्रसिद्धस्थलीयव्याप्तिग्रहोपयुक्तस्य वन्हिजन्यत्वस्य ग्राहकतर्क एव मूलस्य तात्पर्य्यावधारणात् तथा व्याख्यातमिति ध्ये-

सितं वन्हिसमवहितजन्यत्वं वाच्यं तथा च घटादौ व्यभिचारवारणाय आपाद्यकोटिप्रतियोगिविशेषणार्थकं सत्यन्तम्। अजन्ये जन्ये च नान्तरीयके व्यभिचारवारणाय जन्य इति। तदर्थस्तु वन्ह्यसमवधानकालीनवन्हितत्समवधानेतरयावत्कारणजन्यत्वं त-

---

यम्। यद्यपि वन्हिसमवहितजन्यत्वस्य वन्हिजन्यत्वपर्य्यवसितत्वेपि धूमो यदि वन्ह्यसमवहिताजन्यत्वे सति वन्हिजन्यो न स्यात्तदा जन्यो न स्यादित्येवं विशिष्टमापादकीकृत्य तर्कः सम्भवत्येव, न च नान्तरीयकवन्हिके व्यभिचारः, वन्हिजन्यत्वाभावमात्रस्यापादकत्वमत इवात्रापि मते वन्ह्यसमवधानकालीनवन्हितत्समवधानेतरयावत्कारणकत्वरूपस्यैव जन्यत्वस्यापाद्यकोटौ निवेश्यत्वेन तद्वारणसम्भवात्। तथापि विशिष्टस्यापादकत्वे विपर्य्यये वन्हिजन्यत्वमात्रपर्य्यवसायित्वार्थं वन्ह्यसमवहिताजन्यत्वस्य पक्षविशेषणस्यानुसर्त्तव्यत्वे गौरवमवन्हेरेव भविष्यतीत्यादिशङ्कायाः प्रकृतापत्त्यप्रतिबन्धकत्वं च स्यात् तादृशपक्षधर्मतासम्पत्तिमात्रप्रतिकूलत्वादतः केवलं वन्हिजन्यत्वाभावमापादकीकृत्याह तथा चेति। जन्यत्वाभावस्वरूपेऽनुयोगिनि विशेषिते घटादौ व्यभिचारतादवस्थ्यमत उक्तं प्रतियोगीति। तथा च धूमो यदि वन्हिजन्यो न स्यात् वन्ह्यसमवहिताजन्यत्वविशिष्टजन्यो न स्यादित्येवमेव तर्क इत्यापाद्यस्यापि घटादौ सत्त्वान्न व्यभिचार इति भावः।तत्र आपाद्यकोट्यन्तर्गतस्य मूलोक्तजन्यपदस्य व्यावृत्तिमाह अजन्य इति। तथा च वन्ह्यजन्ये गगनादौ वन्ह्यसमवहिताजन्यत्वस्य सत्त्वेपि तद्विशिष्टजन्यत्वस्य व्यतिरेकसत्त्वान्न व्यभिचारः इति भावः। जन्ये चेति।चकारव्यत्ययेन वन्हिव्यधिकरणे घटादौ नान्तरीयकवन्हिके चेत्यर्थः।नातो विवक्षितसत्यन्तार्थस्य व्यधिकरणे घटादौ सत्त्वेपि न्यूनतेति भावः।वन्ह्यजन्यत्वे सति वन्हिव्याप्यस्वसामग्रीको नान्तरीयकवन्हिकस्तत्तद्रासभादिस्तथाश्रुतजन्यत्वस्य प्रवेशेनापि व्यभिचारस्यावारणादाह तदर्थस्त्विति तथा च वन्ह्यसमवहिताजन्यत्वविशिष्टजन्यत्वस्य नान्तरीयकतत्तद्रासभादौ सत्त्वेपि वन्ह्यसमवधानकालीनवन्हितत्समवधानेतरयाव-

थाविधयावत्कारणकत्वमिति यावत्तथा च वन्ह्यसमवहिताजन्यत्वे सति वन्ह्यसमवधानकालीनवन्हितत्समवधानेतरयावत्कारणको

त्कारणजन्यत्वविरहान्न व्यभिचारः । जन्यत्वाप्रवेशे लाघवादाह तथाविधेति । वन्ह्यसमवधानकालीनवन्हितत्समवधानेतरेत्यर्थः । यद्यपि धूमेतरसामग्र्यजन्यत्वं सत्यन्तेनाभिधाय मूलोक्तजन्यत्वस्य यथाश्रुतस्य प्रवेशेपि नान्तरीयकवन्हिके व्यभिचारो वारयितुं शक्यते, तथाप्यवन्हेरेव भविष्यतीति शङ्कानयास्तादृशतर्के प्रतिकूलत्वाभावाद्वक्ष्यमाणग्रन्थासङ्गतिभिया तन्नाभिहितम् । सत्यन्तमन्तर्भाव्य समुदितमापाद्यमाह तथा चेति। अत्र च वन्ह्यजन्यतत्समानाधिकरणघटादौ व्यभिचारवारणाय सत्यन्तम्। स्वसमानाधिकरणवन्हिमद्भिन्नस्वाव्यहितप्राक्क्षणको यो यस्तदन्यत्वं तदर्थः। महाप्रस्थानङ्गीकुर्वते वन्हिमदन्यस्वाव्यवहितपूर्वक्षणकान्यत्वस्याप्रसिद्ध्या तदन्यत्वविशिष्टस्य वन्ह्यसमवधानकालीनवन्हितत्समवधानेतरयावत्कारणकत्वरूपस्यापाद्यप्रतियोगिनोऽप्रसिद्धिरतः स्वसमानाधिकरणेति वन्हेर्विशेषणम् । नान्तरीयकवन्हिकस्यापि वन्ह्यसमवधानकालीनकिञ्चित्कारणकत्वात् तत्र व्यभिचारः स्यादत उक्तं यावदिति । तथा च तस्य यावत्कारणं न वन्ह्यसमवधानकालीनं तथात्वे वन्ह्यसमवधानकालेप्युत्पत्तिप्रसङ्गादतो न तत्र व्यभिचारः।वन्ह्यसमवधानकालीनत्वं च स्वसमानाधिकरणवन्हिमदन्यक्षणवृत्तित्वम्।निरुक्तवन्ह्यसमवहिताजन्यत्वविशिष्टस्य वन्हिमद्भिन्नक्षणावृत्तियावत्कारणकत्वस्याप्रसिद्धिः प्रलयेपि ब्रह्माण्डान्तरे वन्हिसत्त्वेन तत्कालीनकर्मादौ प्रसिद्ध्यसम्भवादेकदा सकलब्रह्माण्डनाशोपगमे तु पक्षीभूतपुरोवर्त्तिधूमव्यक्ताविष्टापत्तिरतः स्वसमानाधिकरणेति । स्वसमानाधिकरणवन्हिमदन्यस्वाव्यवहितप्राक्क्षणकान्यत्वविशिष्टस्य स्वसमानाधिकरणवह्निमद्भिन्नक्षणवृत्तियावत्कारणत्वस्याप्रसिद्धत्वादाह वह्नितत्समवधानेतरेति। इदं च यावत्कारणे विशेषणम् । तथा च धूम एवापाद्यस्य प्रतियोगिप्रसिद्धिः । एकैकस्य प्रवेशे तथैवाप्रसिद्धितादवस्थ्यमतो द्वयमुपात्तम् । इत्थञ्च

धूमो यदि वन्हिजन्यो न स्यात्स्वसमानाधिकरणवन्हिमद्भिन्नस्वाव्यवहितप्राक्क्षणकान्यत्वे सति स्वसमानाधिकरणवन्हिमद्भिन्नक्षणवृत्तिवन्हितत्समवधानेतरयावत्कारणको न स्यादिति समुदितार्थनिष्कर्षः। न च यावन्मध्यगतानां तत्तद्धूमावयवतत्तत्संयोगविशेषरूपाणामेव तत्तद्धूमकारणानां तद्वन्ह्यसमवधानकालीनत्वाभावादुक्ततर्के इष्टापत्तिरिति वाच्यम्। दण्डस्य घटजनकतायां भ्रम्यादिकपालद्वयसंयोगपर्यन्तस्यैव वन्हिविशेषस्यापि धूमविशेषजनकतायां तत्तद्धूमावयवतत्संयोगादीनां प्रत्यासत्तितया तत्तद्वन्हिनिष्ठतद्धूमीयकारणताघटकप्रत्यासत्तीतरार्थकेन समवधानेतरपदेनैव वारणादिति दिक्। अत्रेदं तत्वम्। आपादकवत्त्वांशे आहार्यरूपापाद्यव्याप्यवत्तानिश्चयः पक्षे आपाद्याभावत्तानिश्चयश्च द्वयमापत्तेर्हेतुः। एवञ्च धूमवानयं पर्वतो निर्धूमत्वव्याप्यनिर्वन्हित्ववान् स्यादित्येवं निश्चयः पर्वतो निर्धूमः स्यादित्यापत्तौ हेतुः। न च बाधसत्वे विशिष्टबुद्ध्यात्मिकाया आपत्तेरसम्भवः, अनाहार्यविशिष्टबुद्धित्वस्यैव बाधप्रतिबध्यतावच्छेदकत्वात् आपत्तेस्त्वाहार्य्यत्वात्। आपत्त्यन्यविशिष्टबुद्धित्वेनैव बाधधीप्रतिबध्यत्वं तेनापत्तेः क्व चिदनाहार्यत्वेपि न क्षतिरिति तु न युक्तम्। एकविधेयताकापत्तावन्यस्य बाधनिर्णयदशायांमपि प्रकारताप्रसङ्गात्। आपत्तित्वं पुनरत्रेदमापादयामीति प्रतीतिसाक्षिको मानसत्वव्याप्यजातिविशेषः, तर्कत्वमपि तदेव, फलं च तर्कस्यापादकवत्ताबोधप्रतिबन्धः, प्रतिबन्धकता च शुद्धस्यापादकतास्थले तद्धर्मावच्छिन्नवत्ताबुद्धौ तद्धर्मावच्छिन्नापादकताकापत्तित्वेन विशिष्टस्यापादकतास्थले तु विशेष्यवत्ताबुद्धौ विशेषवत्तानिश्चयसहकृतविशिष्टापादकताकापत्तित्वेन विशेषणवत्ताबुद्धौ तु विशेष्यवत्तानिश्चयसहकृतविशिष्टापादकताकापत्तित्वेनापीति नव्याः। स्वारसिकापादकवत्ताशङ्कायास्तर्ककारणीभूतेनापादकाभावव्याप्यापाद्याभाववत्तानिश्चयेनापादकव्यापकतया गृहीतस्यापाद्यस्याभाववत्तारूपनिश्चयेन आहार्य्यापादकवत्ताज्ञानसम्पादकेन तदबाधनिश्चयेनैव वा प्रतिबन्धादाहार्यापादकवत्ताशङ्कायाः प्रतिबन्ध एव तर्कस्य फलम्, भवति ह्यनिष्टप्रदर्शनेनापादकवत्ताबोधेच्छाया विच्छेद इति कारणाभावादाहार्यशङ्कायां अनुत्पाद इति तु मिश्रादिसम्मतः प्राची-

न स्यादिति पर्य्यवसितोऽर्थः। यत्तु नान्तरीयवन्हिके व्यभिचारवारणाय आपादककोटावेव विशेषणं सत्यन्तार्थः। स च वन्ह्यघटितसामग्र्यजन्यत्वमिति। तन्न। प्राक् तदसिद्धेः। अत्रा-

---

नः पन्थाः। स चायं तर्कः पञ्चविधः। आत्माश्रयान्योन्याश्रयचक्रकानवस्थाप्रमाणबाधितार्थकप्रसङ्गभेदादित्याचार्याः। तत्र स्वापेक्षापादककप्रसङ्ग आत्माश्रयः। अपेक्षा च ज्ञप्तावुत्पत्तौ स्थितौ च ग्राह्या। तत्राद्या यथा एतद्घटज्ञानं यद्येतत्घटज्ञानजन्यं स्यादेतद्घटज्ञानभिन्नं स्यादिति। द्वितीया तु घटोयं यद्येतद्घटजन्यः स्यादेतद्घटभिन्नः स्यादिति। तृतीया च अयं घटो यद्येतद्घटवृत्तिः स्यात्तथात्वेनोपलभ्येतेति। स्वापेक्षापेक्षित्वनिबन्धनः प्रसङ्गोऽन्योन्याश्रयः। यथाऽयं घटो यद्येतद्घटजन्यजन्यः स्यादेतद्घटभिन्नः स्यादित्युत्पत्तौ। एवं ज्ञप्तौ स्थितौ च स्वयमुदाहार्यम्। स्वापेक्षणीयापेक्षितसापेक्षत्वनिबन्धनः प्रसङ्गः चक्रकः। पूर्वोक्त एवापादके जन्यपदान्तरमन्तर्भाव्योदाहरणम्। अपेक्षा साक्षात्परम्परासाधारणी ग्राह्या। अनवस्था पुनरप्रामाणिकानन्तप्रवाहमूलप्रसङ्गः। यथा घटत्वं यदि यावद्घटहेतुवृत्ति स्याद्घटाजन्यवृत्ति न स्यादिति। उक्तचतुष्कान्यप्रसङ्गः प्रमाणबाधितार्थकः प्रसङ्गः। सोपि द्विविधः व्याप्तिग्राहको विषयपरिशोधकश्च। तत्राद्यो यथा धूमो यदि वन्हिव्यभिचारी स्याद्वन्हिजन्यो न स्यात्, द्वितीयस्तु पर्वतो यदि निर्वन्हिः स्यान्निर्धूमः स्यादित्यादिः, विषयस्य वन्ह्यादेः शङ्कानिवृत्तिद्वारा निश्चायकत्वेन परिशोधकत्वादित्यलं विस्तरेण। वन्ह्यसमवहिताजन्यत्वस्य सत्यन्तार्थस्य नान्तरीयकवन्हिकेपि सत्त्वादाह स चेति। सत्यन्तार्थश्चेत्यर्थः। तथा च धूमो यदि वन्हिघटितसामग्र्यजन्यत्वे सति वन्हिजन्यो न स्यादुत्पन्नो न स्यादित्येवं तर्कावतार इति भावः। पक्षे वन्ह्यघटितसामग्र्यजन्यत्वनिश्चयं विना यथोक्ततर्कस्य न वन्हिजन्यत्वशङ्कानिवर्तकत्वं विशेषणवत्तानिश्चयसहकृतस्यैव विशिष्टापादककतर्कस्य, विशेष्यवत्तानिश्चयविरोधित्वात् स चात्र न सम्भवति धूमे वन्हिजन्यत्वसंशयदशायां वन्ह्यघटितसा-

धूमोऽवन्हेरेव भविष्यति क्व चिद्वन्हिं विनापि भविष्यति अहेतुक एव वोत्पत्स्यत इति शङ्का स्यात्, सर्वत्र स्वाक्ति-

---

द्या द्वयी शङ्का इष्टापत्तिपर्य्यवसायिनी। तृतीया पुनरापादकाद्यप्रसिद्धिपर्य्यवसायिनी। अवन्हेः वन्हिशून्यात्। तदुपादानमिति करणव्युत्पत्त्या तदीयकार्य्यप्रयोजकताज्ञानपरम्, तादृशान्वयव्य-

---

मग्न्यजन्यत्वस्यापि सन्दिग्धत्वादित्याह प्रागिति। वन्हिजन्यत्वसिद्धेः प्राक् वन्ह्यघटितसामग्र्यजन्यत्वस्यासिद्धेरित्यर्थः। यद्यपि वन्ह्यघटितसामग्रीमेव धूमेतरसामग्रीत्वेन निवेश्योक्ततर्कोपि सम्यगेव धूमेतरसामग्र्यजन्यत्वस्य पक्षीभूतधूमे प्रागपि निश्चेतुं शक्यत्वात्, तथापि तादृशतर्के अवन्हेरेव भविष्यतीत्यादिशङ्कायाः प्रतिकूलत्वाभावाद्वक्ष्यमाणग्रन्थासङ्गतिरतस्तन्नाशङ्कितम्। ननु स्वोक्तवस्तुतस्त्वित्यादिकल्पे वन्ह्यसमवहिताजन्यत्वस्य पक्षाविशेषणत्वात्तथोपस्थितिविरोधितार्थमवन्हेरेवेत्यादिमूलोक्तशङ्काद्वयमसङ्गतमाह अत्रेति। अत्र। सत्यन्तस्यापाद्यकोटिनिविष्टत्वकल्पे। इष्टापत्तीति। वन्ह्यसमवहितजन्यत्वोपगमे वन्ह्यसमवहिताजन्यत्वविशिष्टजन्यत्वाभावरूपस्यापाद्यस्य पक्षे सम्भवितत्वादिति भावः। तृतीया। अहेतुक एवोत्पत्स्यत इत्याशङ्का। आपादकादीति। उत्पत्तिमात्रस्य हेत्वधीनत्वे वन्ह्यधीनजन्यत्वाप्रसिद्ध्या तदभावस्यापादकत्वासम्भवादिति भावः। आदिपदादुक्तयावत्कारणनिरूपितजन्यत्वाप्रसिद्ध्या तदभावात्मकस्यापाद्यस्याप्रसिद्धेः परिग्रहः। अवन्हेरित्यस्य वन्हिभिन्नादित्यर्थकत्वे वन्हिभिन्नाद्भविष्यतीत्याशङ्कायां वन्ह्यसमवहिताजन्यत्वगर्भापाद्ये इष्टापत्तिपर्यवसायित्वं न सम्भवतीत्यतो व्याचष्टे अवन्हेरिति। तथा च न विद्यते वन्हिर्यत्रेति बहुव्रीहिरिति भावः। तदीयेति। तस्योपादानविषयीभूतस्य वन्हेर्यत्कार्यं तद्धूमव्यक्तिरूपं वन्हेस्तत्प्र-

तिरेकानुविधानबोधपरं वा। अग्रेतनमपि स्वक्रियापदं तत्परमेव। कृत्यादेः शङ्कापरिबन्धकत्वे मानाभावात्, कारणताग्रहोत्तरकालीनत्वाच्च। यद्यपि चैतावता धूमत्वावच्छिन्नं प्रति वन्हेर्जनकत्वं नाऽऽयाति तृणारणिमणिन्यायेन वैकल्पिककारणतायामपि तथात्वसम्भवात्, तथापि विशेषाणां कार्य्यकारणभावग्रहस्तर्केण तद्विरो-

---

योजकत्वज्ञानमेव पक्षीभूते तद्धूमे वन्ह्यसमवहितजन्यत्वशङ्कापरिबन्धकं तद्धूमव्यापकत्वगर्भस्य तद्धूमप्रयोजकत्वस्य प्रत्यक्षत एव वन्हौ सुग्रहत्वादिति भावः। ननु तद्धूमप्रयोजकत्वं न तद्धूमजनकत्वं तर्कपूर्वं तन्निश्चयस्यासत्त्वेन शङ्कापरिबन्धकत्वासम्भवात्, नापि तद्धूमव्यापकत्वमात्रं तन्निश्चयेपि वन्ह्यसमवहितजन्यत्वशङ्कोत्पादादत आह तादृशेति। उपादानविषयीभूतवन्ह्यन्वयव्यतिरेकानुविधायित्वज्ञानमेव पक्षीभूततद्धूमे व्यावर्त्तकधर्मदर्शनविधया वन्ह्यसमवहितजन्यत्वशङ्कापरिबन्धकं तादृशान्वयव्यतिरेकानुविधायित्वावच्छेदेन वन्हिजन्यत्वं तु पूर्वं न गृहीतं नान्तरीयकवन्हिके व्यभिचारग्रहादतो न तर्कवैयर्थ्यमिति भावः। तत्परम्। उक्तप्रयोजकत्वादिज्ञानपरम्। स्वस्य क्रिया यस्मादिति व्युत्पत्त्या तल्लाभादिति भावः। कृत्यादेरित्यादिना क्रियासंग्रहः। कामिनाजिज्ञासादेरिव कृत्यादेरपि मणिमन्त्रादिन्यायेन शङ्काविरोधित्वसम्भवादाह कारणतेति। ननूक्ततर्कस्य धूमविशेषपक्षकत्वे तद्धर्मिकवन्हिजन्यत्वशङ्कानिरासद्वारा तत्र धूमे वन्हिजन्यत्वग्राहकत्वेपि धूमान्तरे वन्हिजन्यत्वशङ्कासम्भवाद्धूमत्वावच्छेदेन वन्हिजन्यत्वनिश्चयो न सम्भवति अपेक्षितश्च धूमत्वावच्छेदेन व्याप्तिग्रहे स एवेत्याशयेन शङ्कते यद्यपीति। ननु धर्मान्तरस्यावच्छेदकत्वे बाधाद्वन्हिजन्यत्वग्राहकं प्रमाणमेव धूमत्वस्य तदवच्छेदकत्वं ग्राहयदत आह तृणेति। वैकल्पिककारणतायाम्। वैजात्यावच्छिन्नकार्यतानिरूपितकारणतायाम्। अतस्तृणादेर्वैकल्पिके हेतुताविरहेपि न क्षतिः। तथात्वसम्भवात्। धूमस्य वन्हिजन्यत्वसम्भवात्। तथा च वन्हौ तृणादिप्रत्येकजन्यतास्थले यथेतरधर्मस्यावच्छेदक-

धशङ्कायामपनीतायां जायमानः सामान्यव्यभिचारानिर्णयानुगता-गुरुविशेषरूपान्तरानुपस्थितिलाघवप्रतिसन्धानादिवशात्सामान्यत एव तं परिच्छिनत्ति। प्रामाणिकौ च तथैवान्वयव्यतिरेकौ। फलबलेन लाघवज्ञानादिशून्याया एव सामान्यव्यभिचारशङ्कायाः प्रतिबन्धकत्वं कल्पयते। अपरे तु धूमत्वावच्छिन्नस्य वन्ह्यजन्यत्वे-

---

त्वे बाधविरहाद् वन्हित्वस्य नावच्छेदकत्वसिद्धिः तथा धूमस्य वन्हिजन्यतायामपि धर्मान्तरस्यावच्छेदकत्वे बाधानिश्चयान्न धूमत्वस्य वन्हिजन्यतावच्छेदकत्वसिद्धिरिति भावः। [तथापीति तर्केण विरोधिशङ्कायामपनीतायां जायमानो विशेषणां कार्यकारणभावग्रहश्चेत्यन्वयः] तद्विरोधीति। कार्यकारणभावग्रहविरोधीत्यर्थः। वन्हौ तृणजन्यत्वस्य वन्हित्वावच्छेदेनाग्रहादाह सामान्यव्यभिचारानिश्चयेति। वन्हौ धूमजनकत्वस्य दण्डादौ घटादिजनकत्वस्य द्रव्यत्वावच्छेदेनाऽग्रहादाह अनुगतागुरुविशेषरूपान्तरानुपस्थितीति। तथा च वन्हित्वादेस्तादृशविशेषरूपस्योपस्थित्या न द्रव्यत्वेन हेतुत्वमिति। अत्र तद्वयक्तित्वयोः कपालत्वघटत्वयोर्वा समुपस्थितावपि द्रव्यत्वावच्छिन्नं प्रति मूर्त्तत्वेन समवायिकारणताग्रहार्थमाह अनुगतेति। आरण्यकान्यदण्डत्वादेरनुगतविशेषरूपान्तरस्योपस्थितावपि घटं प्रति दण्डत्वेन हेतुत्वस्य ग्रहादगुरुपदं सामान्यतुल्यशरीरार्थकम्। ज्ञानत्वाद्यनुगतागुरुधर्मस्योपस्थितावपि विशिष्टबुद्धौ विशेषणज्ञानत्वेन हेतुत्वग्रहादुक्तं विशेषेति। ज्ञानत्वं तु न विशेषणज्ञानत्वस्य विशेष इत्यदोषः। नीलादिजन्यत्वस्य पाकाजन्यनीलत्वादिना तृणादिजन्यत्वस्य मण्याद्यजन्यवन्हित्वादिना सामान्यधर्मेणावच्छेदो न गृह्यते किं तु वैजात्यविशेषेणैवात उक्तं लाघवप्रतिसन्धानेति। तथा च तत्र लाघवप्रतिसन्धानविरहादेव नोक्तधर्मावच्छेदेन जन्यत्वग्रहः। लाघवप्रतिसन्धानस्य न सार्वत्रिकत्वमत उक्तम् आदीति। तथा च गौरवज्ञानाभावस्यापेक्षितत्वेन पाकाजन्यनीलत्वादौ गौरवग्रहादेव न तदवच्छेदेन नीलादिजन्यत्वग्रह इति भावः। सामान्यतः। सामान्यधर्मावच्छेदेन।

तम्। कार्यकारणभावम्। परिच्छिनत्ति। अवगाहते। नन्वेकवह्नि-धूमयोरन्वयव्यतिरेकाभ्यामन्ययोरपि वह्निधूमयोः कार्यकारणभा-वग्रहेऽतिप्रसङ्ग इत्यत आह प्रामाणिकाविति। कारणताग्राहकतया प्रमाणसिद्धावित्यर्थः। तथैव। सामान्यत एव। तथा च यत्सामान्या-लिङ्गितयोर्विशेषयोरन्वयव्यतिरेकग्रहस्तत्सामान्यावच्छेदेनैव का-र्यकारणभावग्रह इति सामान्यविशेषभावस्य नियामकत्वान्नाति-प्रसङ्ग इति भावः। ननु धूमत्वरूपेण व्यभिचारशङ्कायाः सत्त्वा-त्कथं तदवच्छेदेन प्रत्यक्षतो वह्निजन्यत्वनिर्णयः स्यादत आह फलेति। लाघवादीत्यादिना विशेषदर्शनादिपरिग्रहः। प्रतिबन्धक-त्वमिति। प्रत्यक्षनिश्चये ग्राह्यसंशयस्यापि प्रतिबन्धकत्वमतेनेदम्। कार्यानुत्पत्तिव्याप्यत्वमेव वात्र प्रतिबन्धकत्वम्। तथा च लाघवा-दिज्ञानस्यापरकोटिविशिष्टधीप्रतिबन्धकत्वान्न कारणत्वनिश्चयानुप-पत्तिरिति भावः। अत्र च दण्डस्य घटजनकतायां चक्रभ्र-म्यादिकपालद्वयसंयोगपर्यन्तमिव वह्नेर्धूमत्वावच्छिन्नं प्रति जनक-तायां रूपविशेषपरावृत्त्यादितत्तद्धूमावयवसंयोगपर्यन्तं प्रत्या-सत्तिः, सम्बन्धाननुगमस्यादोषत्वाच्च न क्षतिरिति प्राञ्चः। के चित्तु धूमसामान्ये वह्नित्वेन हेतुतायां कार्यकारणयोः कालि-की प्रत्यासत्तिर्विशेषसामग्न्यपेक्षणाच्च नातिप्रसङ्ग इति प्राहुः। यत्तु समवायेन धूमत्वावच्छिन्नं प्रति स्वजन्यरूपवदवच्छेद्यसंयो-गसम्बन्धेन वह्निः कारणं धूमसमवायिमात्रे वह्निजन्यरूपविशेष-वत्परमाण्ववच्छेद्यसंयोगस्य सत्त्वाद्धूमद्व्यणुकसमवायिन्यपि स्व-जन्यरूपविशेषवत् परमाण्वन्तरावच्छेद्यसंयोगसम्बन्धेन वह्नेः सं-भवादिति। तच्चिन्त्यम्। इदं त्ववधातव्यम्। अस्तु यथा तथा वह्नि-धूमयोः कार्यकारणभावग्रहः, न चासौ संयोगेन वह्निधूमयोर्व्याप्ति-ग्रहार्थमुपयुज्यत इति। धूमत्वावच्छेदेन वह्निजन्यत्वग्रहार्थं धूमसा-मान्यपक्षकं तर्कमभ्युपगच्छतां मतं दर्शयति अपरेत्यित्यादिवद-न्तीत्यन्तग्रन्थेन। अजन्ये व्यभिचारवारणाय जन्यत्वविशिष्ट-स्येति। जन्यत्वं तु तदर्थस्त्वित्यादिना स्वोक्तरूपं ग्राह्यं नातो ना-न्तरीयकवह्निके व्यभिचारः। यद्यपि वन्ह्यसमवहिताजन्यत्वविशि-ष्टस्य जन्यत्वस्यैव व्यतिरेक आपादयितुं युक्तः मूले जन्यत्वस्यैव विशेष्यविधयोल्लेखात्, तथापि वन्ह्यसमवहिताजन्यत्वस्य विशेष-

न जन्यत्वविशिष्टस्य यथाश्रुतवन्ह्यसमवहिताजन्यत्वस्य व्यतिरेक एवापादनीयः, तच्चोक्तन्यायेन तादृशवन्हियुक्तकारणकलापजन्यत्वग्रहेण तद्व्यतिरेकजन्यत्वशङ्कानिरासात् वन्हिविरहेऽपि निरतिशयस्यैव तादृशसमूहस्य धूमजनकत्वसन्देहस्य च तथाविधात् धूमानुत्पाददर्शनेनैवायोगात्, तादृशस्यैव क्व चिद्वन्हि क्व चिच्चे-

---

णपरत्वे पञ्चास्तच्चेत्यादिना तस्य परामर्शो न स्यात् असति बाधके तच्छब्देन विशेषविधया पूर्वोपस्थितस्यैव परामर्शकताया व्युत्पत्तिसिद्धत्वात् तच्चेत्यपहाय वन्ह्यसमवहिताजन्यत्वं चेत्याभिधाने ग्रन्थगौरवापत्तेरिति ध्येयम् । वन्ह्यसमवहिताजन्यत्वस्य वन्ह्यघटितसामग्र्यजन्यत्वादिरूपत्वे प्राक् तदसिद्धेरत उक्तम् यथाश्रुतस्येति । तथा च वह्नियुक्तकारणकलापं विनाऽनुत्पद्यमानत्वरूपमेव तत्प्रवेश्यमिति भावः । ननु वह्नियुक्तकारणकलापं विना उत्पद्यमानत्वशङ्कासत्त्वाद्धूमत्वावच्छेदेन वन्ह्यसमवहिताजन्यत्वस्यापि प्रागसिद्धेः कथं धूमत्वावच्छेदेनोक्ततर्कावतारस्तदवच्छेदेन बाधनिश्चयाभावादत आह तच्चेति । वह्नियुक्तकारणकलापं विनानुत्पद्यमानत्वञ्च मनसैव सुग्रहमिति परेणान्वयः । उक्तन्यायेनेति । हुताशनरासभेत्याद्युक्तान्वयव्यतिरेकग्रहेणेत्यर्थः । तदुव्यतिरेकजन्यत्वेति । वह्नियुक्तकारणकलापव्यतिरेकोत्पत्तिकत्वशङ्कानिरासादित्यर्थः । सर्वाण्येव पञ्चम्यन्तानि सुग्रहमित्यनेनान्वितानि । ननु वन्हियुक्तकारणकलापस्य वह्निं विना कृतस्यैव धूमजनकत्वशङ्क्या जनिता वह्नियुक्तकारणकलापव्यतिरेकोत्पत्तिकत्वशङ्का स्याद्यद्वह्न्यत्यवहेरेव भविष्यतीत्यत आह वह्निविरहेपीति । निरतिशयस्य । निर्विशेषितस्य वह्निं विना कृतस्येतियावत् । तथाविधात् । वह्निं विना कृतकारणकलापात् । ननु वह्नियुक्तकारणकलापस्यैव एकत्र धूमे वह्निसहकारेण धूमान्तरे च वन्हिभिन्नसहकारेण जनकत्वसम्भावनया वन्हिविशिष्टकारणकलापव्यतिरेकोत्पत्तिकत्वशङ्का दुर्वारा यद्वह्न्यति क्व चिद्वन्हि विनापि

तरदासाद्य जनकत्वसम्भावनायाश्च क्व चिद्धूमानुत्पादप्रयोजकत्वेनावधृतस्य वन्हिविरहस्यैव तथाविधसमूहत्वे धूमानुत्पत्तिसामान्यं प्रति लाघवात्प्रयोजकत्वनिर्णयेनापनयान्मनसैव मुग्रहं वन्हेर्वन्हिसमवहितस्योपादानम्। अत्र च नियमव्यवच्छेद्यस्य वन्ह्यसमवहितानुपादानस्य प्रयोजके तदजन्यत्वज्ञाने परम्परया वन्हिसमवहितोपादानस्य वा प्रयोजके तत्र तात्पर्य्यम्। यत्त्वन्वयव्यतिरेकानुविधायित्वज्ञानमेव विशेषदर्शनतया शङ्कामतिबन्धकं तदेव

भविष्यतीत्यत आह तादृशस्यैवेति। वन्हियुक्तकारणकलापस्यैवेत्यर्थः। आसाद्य। सहकृत्य। लाघवादिति। वन्हिविरहस्य धूमविशेषानुत्पत्तिप्रयोजकत्वे स्थलान्तरीयधूमानुत्पत्तिप्रयोजकत्वस्यान्यत्र कल्पने गौरवात्। तथा च वन्ह्यभावप्रयुक्ताभावप्रतियोग्युत्पत्तिसामान्यकत्वधीरेव विशेषदर्शनविधयोक्तसंशयविरोधिनीति भावः। तदुपादानमित्युत्तरग्रन्थे तच्छब्देन वन्हिसमवहितस्य परामर्शाय धूमार्थं वन्हेरित्यत्र वन्हिपदं व्याचष्टे वन्हेर्वन्हिसमवहितस्येति। वन्हेरित्यस्य तृप्त्यर्थमित्यनेनान्वयभ्रमं निरसितुं दूरस्थमुपादानपदं योजितम्। वन्हिसमवहितोपादानस्याप्रतिबन्धकत्वादाह अत्र चेति। नियमव्यवच्छेद्यस्य। नियमलभ्यस्य। तदुपादानमेवेत्येवकारव्यत्यासेन तस्यैवोपादानमिति योजनया तदितरानुपादानस्य प्राप्तेरित्याशयः। नियमव्यवच्छेद्यस्य नियमतो वन्हेरुपादानमित्यत्र नियमपदव्यवच्छेद्यस्येति वार्थः। तदजन्यत्वज्ञाने। वन्ह्यसमवहिताजन्यत्वज्ञाने। नियमव्यवच्छेद्येत्यादिकुसृष्टिं विनापि वन्ह्यसमवहिताजन्यत्वज्ञानं प्रापयति परम्परयेति। वन्ह्यसमवहिताजन्यत्वस्य ग्रहे सति तद्विशिष्टजन्यत्वहेतुना वन्हिसमवहितजन्यत्वानुमितिस्ततो वन्हिसमवहिते प्रवर्तत इति परम्परया वन्हिसमवहितोपादाने वन्ह्यसमवहिताजन्यत्वज्ञानं प्रयोजकमिति भावः। तत्र। वन्ह्यसमवहिताजन्यत्वज्ञाने। अन्वयव्यतिरेकेति। धूमे वन्हिसमवहितान्वयव्यतिरेकानुविधायित्वज्ञानमेव व्यावर्त्तकधर्मदर्शनविधया वन्ह्यसम-

व्याघातः स्यात् । यदि हि गृहीतान्वयव्यतिरेकं हेतुं विना कार्योत्पत्तिं शङ्केत, तदा स्वयमेव धूमार्थं वह्नेः तृप्त्यर्थं भोजनस्य परप्रतिपत्त्यर्थं शब्दस्य चोपादानं नियमतः कथं कुर्य्यात्, तेन विनापि तत्सम्भवात् । त-

---

तर्कघटकं तदिदमुक्तं यदि गृहीतान्वयव्यतिरेकं हेतुमितीति । तन्न । याद्दच्छिकस्य तदनुविधानस्य व्यभिचारित्वान्नियतस्य चोक्ताभेदसम्पादकत्वादिति वदन्ति । तच्चिन्त्यम् । के चित्तु कार्य्य-

---

वहितजन्यत्वशङ्कानिवर्तकमतस्तदेवोक्ततर्कस्य घटकं सम्पादकमित्यर्थः । अत्रैव मूलसंवादमाह तदिदमिति । याद्दच्छिकस्य । व्यक्तिविशेषवृत्तितया गृहीतस्य । व्यभिचारित्वादिति । धूमविशेषो वन्हिसमवहितान्वयव्यतिरेकानुविधायीति निर्णये सत्यपि धूमत्वावच्छिन्नो वन्ह्यसमवहितजन्यो न वेति संशयोत्पादेन तत्प्रतिबन्धकत्वस्य व्यभिचारित्वादित्यर्थः । ननु धूमत्वावच्छेदेन वन्हिसमवहितान्वयव्यतिरेकानुविधायित्वग्रह एव उक्तसंशये विरोधी वाच्य इत्यत आह नियतस्य चेति । धूमत्वावच्छेदेन गृहीतस्य चेत्यर्थः । उक्तेति । संशयस्य सामग्रीसत्त्वाद्धूमत्त्वावच्छेदेन वन्हिसमवहितान्वयव्यतिरेकानुविधायित्वमेव निश्चेतुमशक्यं कुतस्तत्प्रतिबन्धकं यदि च तच्चोक्तन्यायेनेत्याद्यस्मदुक्तरीत्या तन्निश्चयस्तदा धूमत्वावच्छेदेन वन्ह्यसमवहिताजन्यत्वनिश्चय एव सम्भवतीति विपरीतज्ञानविधया तस्यैवोक्तसंशयविरोधित्वसम्भवे व्यर्थं व्यावर्त्तकधर्मदर्शनपर्यन्तानुसरणमिति भावः । तच्चिन्त्यमिति । लाघवसहकृतेन याद्दशान्वयव्यतिरेकज्ञानेन धूमत्वावच्छिन्ने वन्ह्यसमवहिताजन्यत्वं ग्राह्यं ताद्दशेन धूमत्वावच्छेदेन वन्हिजन्यत्वग्रहस्यैव

स्मात्तत्तदुपादानमेव तादृशशङ्काप्रतिबन्धकम्। शङ्कायां न नियतोपादानं नियतोपादाने च न शङ्का। तदिदमुक्तं तदेव ह्याशङ्क्यते यस्मिन्नाशङ्क्यमाने स्वक्रियाव्या-

---

कारणभावग्रहानन्तरं व्याप्तिग्रहाय व्यधिकरणस्य जनकत्वशङ्का-निरासार्थमयं तर्कः। तथा च धूमो यदि सामानाधिकरण्यातिरिक्तप्रत्यासत्त्या वन्ह्यजन्यत्वे सति सामानाधिकरण्यप्रत्यासत्त्या वन्हिजन्यो न स्यात्। अप्रत्यासन्नस्याऽजनकत्वात्। तादृशाजन्यत्वञ्च प्रत्यासत्त्यन्तरशालिवन्हिसत्त्वेऽपि धूमानुत्पादादिना ग्राह्य-

---

प्रथमं सम्भवात्तर्कवैयर्थ्यमित्यस्वरसश्चिन्ताबीजम्। कार्यकारणभावग्रहानन्तरमिति। इदं वक्ष्यमाणतर्कानुकूलबाधनिश्चयस्य रक्षायै धूमो यदीति। वह्निरूपादौ व्यभिचारस्य वारणाय सत्यन्तम्। तत्रापि वन्ह्यजन्यत्वे सतीत्येतावन्मात्रोक्तौ विशेष्यदलवैयर्थ्यमापाद्याविशेषश्च स्यादतः सामानाधिकरण्यातिरिक्तप्रत्यासत्त्येति। धूमादौ व्यभिचारवारणाय विशेष्यदलम्। तत्रापि सामानाधिकरण्यप्रत्यासत्त्येत्यनुक्तौ सत्यन्तदलवैयर्थ्यमापाद्याविशेषश्च स्यादिति ध्येयम्। वन्ह्यजन्ये घटादौ व्यभिचारवारणायाऽऽपाद्ये वह्निपदप्रवेशः। ननु विनापि प्रत्यासत्तिं वह्निजन्यत्वसम्भवादप्रयोजकत्वमत आह अप्रत्यासन्नस्येति। विशेषणवत्तानिश्चयकालीनस्यैव विशिष्टापादककतर्कस्य विशेष्यवत्त्वशङ्कानिवर्तकत्वात्पक्षे विशेषणवत्त्वं ग्राहयति तादृशाजन्यत्वं चेति। न च धूमे प्रत्यासत्त्यन्तरेण वह्निजन्यत्वाभावनिश्चयसत्त्वे वह्निजन्यत्वग्राहकप्रमाणमेव सामानाधिकरण्यप्रत्यासत्त्याऽवश्यं वन्हिजन्यत्वग्राहकम्। एकविशेषबाधसहकृतस्य सामान्यग्राहकप्रमाणस्य विशेषान्तररूपेण तदग्राहकत्वनियमात् तथा च तदर्थं तर्कानुसरणं व्यर्थमिति वाच्यम्। सामानाधिकरण्यप्रत्यासत्त्या वह्निजन्यत्वसंशायकत्वेप्युक्तनियमसम्भवेन संशयापनोदनार्थं तर्कस्यावश्यकत्वात्। यत्र सामान्यतो वन्हिजन्यत्वग्रहोत्त-

घातो न भवतीति । न हि सम्भवति स्वयं वह्न्यादिकं धूमादिकार्य्यार्थं नियमत उपादत्ते तत्कारणं तन्नेत्याशङ्क्यते चेति । एतेन व्याघातो विरोधः स च सहानवस्थाननियम इति तत्राप्यनवस्थेति निरस्तम् । स्वक्रियाया एव शङ्कापतिबन्धकत्वात् । अत एव "व्याघातो यदि शङ्कास्ति न चेच्छङ्का ततस्तराम् । व्याघातावधिराशङ्का तर्कः शङ्कावधिः कुत" इति खण्डनकारमतमप्यपास्तम् । न हि व्याघातः शङ्काश्रितः किन्तु स्वक्रियैव

मिति । इदमेव च वाचोभङ्ग्या परे परिष्कुर्वन्ति, धूमो यदि वन्ह्यनधिकरणदेशानुत्पत्तिकत्वे सति वन्ह्यधिकरणदेशोत्पत्तिको न स्यात् जन्यो न स्यात्, तादृशानुत्पत्तिकत्वग्रहश्च धूमानुत्पत्तिं प्रति वन्हिसम्बन्धाभावस्य प्रयोजकत्वे ग्राह्ये उपस्थितत्वाल्लाघवाच्च तादृशसम्बन्धाभावस्यैव 'तथात्वावधारणादिति ।

रमेव प्रत्यासत्त्यन्तरेण वन्हिजन्यत्वाभावनिश्चयस्तत्रैव तर्कस्यावश्यमपेक्षणीयत्वाच्च । अत एव ग्रन्थकृतापि कार्यकारणभावग्रहानन्तरमित्युक्तम् । प्रत्यासत्त्यन्तरम् । सामानाधिकरण्यातिरिक्तप्रत्यासत्तिः । ग्राह्यमिति । पक्षे इत्यादिः । परिष्कुर्वन्तीति । वन्हिजन्यत्वाद्यप्रवेशो मूलोक्तापाद्यापरित्यागश्च पूर्वस्मात्परिष्कारः । पूर्वोक्तरीत्या विशेषणवत्त्वनिश्चयस्यापेक्षणीयत्वात्तमुपपादयति तादृशानुत्पत्तिकत्वेति । धूमधर्मिको वन्ह्यनधिकरणदेशानुत्पत्तिकत्वग्रहश्चेत्यर्थः । ननु समानाधिकरणव्यधिकरणसाधारणं किञ्चिदतीन्द्रियं कल्प्यतां यदभावाद्धूमानुत्पत्तिरित्यत आह उपस्थितत्वादिति । अत एवानुप-

शङ्कानिवृत्तिरेवं स्यात्। न चैतादृशतर्कावतारो भूयोदर्शनं विनेति भूयोदर्शनादरः, न तु स स्वत एव प्रयोजकः। अत एव न तदाहितसंस्कारो न मानान्तरम्, त-

---

त्त्विन्त्यम्। मिश्रास्तु परं प्रति व्याप्तिग्रहोपाये प्रदर्श्यमाने व्यभिचारशङ्कानिरासेहतुत्वेनोपदर्शिते तर्के मूलशैथिल्यादिशङ्कोद्भावकं तं प्रति व्याघातोऽयमुपदर्श्यते, मैवं शङ्किष्ठाः, तथा सति तत्तत्कार्यार्थितया तत्र तत्र कारणे तवैव प्रवृत्तयो व्याहन्येरन्, यदाह न हि सम्भवति स्वयं वन्ह्यादिकमितीति प्राहुः।

स्थितकल्पनायां गौरवादाह लाघवाच्चेति। तादृशसम्बन्धाभावस्य। वन्हिसम्बन्धाभावस्य। तथात्वेति। प्रयोजकत्वावधारणादित्यर्थः। यद्यपि धूमविशेषे प्रत्यक्षत एव तादृशानुत्पत्तिकत्वग्रहः सम्भवति, तथापि धूमसामान्यस्य पक्षत्वात्तत्र प्रत्यक्षेण तद्ग्रहासम्भवादुक्तप्रकारावलम्बनमिति ध्येयम्। परं प्रतीति। चार्वाकं प्रतीत्यर्थः। व्यभिचारशङ्कानिरासस्य हेतुत्वेन। प्रयोजकत्वेन। तेन मूलोक्ततर्कस्य साक्षाद्व्यभिचारशङ्कानिवर्त्तकत्वाभावेपि न क्षतिः। मूलशैथिल्यादीत्यादिना वन्ह्यसमवहिताजन्यत्वशङ्कासंग्रहः। शङ्कोद्भावकमिति। अवन्हेरेव भविष्यतीत्यादिग्रन्थेनेत्यादिः। व्याघातः। स्ववचनविरोधः। उपदर्श्यत इति। सर्वत्र स्वक्रियाव्याघात इत्यादिग्रन्थेनेत्यादिः। व्याघातमुपपादयति। मैवमिति। उक्तशङ्कावान्न त्वमित्यर्थः। तथासति। तवैतादृशशङ्कासत्त्वे। तत्तत्कार्यार्थितयेति। धूमाद्यर्थितया वन्ह्यादौ कारणे प्रवृत्तयो व्याहन्येरन्नित्यर्थः। तथा च तदुपादानमेव शङ्कानिवर्त्तकमित्यादिमूलस्यापि तदुपादानमेव शङ्काविरहोन्नायकमित्यर्थ इति भावः। प्राहुरिति। उपादानपदस्य यथाश्रुतार्थरक्षैवाऽत्र प्रकर्षः। इदं चेष्टसाधनतानिश्चयस्य प्रवृत्तिकारणत्वमभ्युपेत्य।

र्कस्याऽप्रमात्वात् । तच्च प्रत्यक्षव्याप्तिज्ञाने हेतुः, तदभावेऽपि शब्दानुमानाभ्यां तद्ग्रहात् । ननु सहचारदर्शनव्यभिचारादर्शनत्वद्व्यभिचारशङ्काविरहानुकूलतर्कयोर्ज्ञानं व्यभिचारिसाधारणमिति न ततोऽपि व्याप्तिनिश्चय इति चेन्न । स्वरूपसतोरेव तयोर्व्याप्तिग्राहकत्वात् । सत्तर्काद्व्याप्तिप्रमा तदाभासात्तदप्रमा विशेषदर्शनसत्यत्वा-

---

तच्चेति । तत् । व्यभिचारादर्शनं व्यभिचारज्ञानसामान्याभावः । योग्यतादिसन्देहेऽपि शब्दादिना अर्थनिश्चयात् तत्तर्कस्वरूपमिति के चित् । ननु वस्तुतो व्याप्तिसत्त्वे तर्काभासात् प्रमाभ्रमयोरुत्पादानुत्पादाभ्यां व्यभिचार इत्यत आह विशेषदर्शनेति । तथा च

वस्तुतश्चार्वाकेण संशयसाधारणज्ञानस्य प्रवर्त्तकत्वस्वीकारात्तत्र प्रवृत्तिरव्याहतेत्याद्यस्वरसः आहुरित्युक्त्वा सूचितः । व्याप्तेर्बुद्धिमात्रे सहचारज्ञानस्य हेतुत्वात्प्रत्यक्षे विशिष्य तद्धेतुत्वाभिधानमसङ्गतमतो व्याचष्टे तदिति । तच्छब्दस्य व्यभिचारनिश्चयाभावपरत्वे तथैवासङ्गतिरत आह व्यभिचारज्ञानेति । विशेषदर्शनाद्यभावविशिष्टेत्यादिः । तेन व्यभिचारस्य संशयदशायां व्याप्तेर्विशेषदर्शनान्निश्चयदशायां च तदप्रामाण्यज्ञानात्प्रत्यक्षेण व्याप्तिनिश्चयेपि न क्षतिः । इदं च प्राचां मतेन, स्वमते तु ग्राह्यसंशयस्याप्रतिबन्धकत्वादिति ध्येयम् । सत्यपि ग्राह्यसंशये संस्कारादिवशेन स्मृत्युपमित्यादिरूपग्राह्यनिश्चयस्योत्पादेन मूले शब्दानुमानमात्रानुसरणमयुक्तमित्याशयेन सामान्यतो हेतुमाह योग्यतादीति । शब्दादिनेत्यादिनाऽनुमानसंस्काराद्युपग्रहः । तर्कस्वरूपमिति । स्वरूपपदं तच्छब्दस्य नपुंसकलिङ्गरक्षायै । के चिदिति । यत्र व्याघातान्न व्यभिचारशङ्का तत्र व्यभिचारात्तर्कस्य व्याप्तिप्रत्यक्षहेतुत्वमेव नेत्यस्वरसः । तर्का-

यथा तस्य बोध्यतदभावतद्विषयत्वे सत्यत्वासत्यत्वे तथा तर्कस्यापीति। अत्र च सत्यत्वादिसम्पादके धर्म्मिणो बोध्यादिमत्त्वे बोध्यादिमद्धर्मिसन्निकर्षे वा तात्पर्य्यम्। लाघवात्, तर्कस्य व्यभिचारेणाहेतुतायाः स्वयमेव दर्शितत्वाच्च। अथ विपरीतज्ञानोत्तरप्रत्यक्षे तन्निवर्त्तकत्वेन विशेषदर्शनस्य हेतुत्वं तच्च तर्कस्यापीति चेत्। अस्तु

भासादिति। धूमो यदि वन्हिव्यभिचारी स्याद्धटः स्यादित्यादितर्कस्य विषयबाधेनाऽसत्तर्कत्वात्तत्रत्यव्याप्तिप्रमायां सत्तर्कस्य व्यतिरेकेण व्याप्तिभ्रमे चाऽसत्तर्कस्यान्वयेन व्यभिचार इत्यर्थः।तस्य। विशेषदर्शनस्य। यथेति। अन्यथा पुरुषत्वव्याप्यवत्ताप्रमात्वादिना विशेषदर्शनस्य पुरुषत्वादिप्रमादौ हेतुत्वे पुरुषत्वव्याप्यद्रव्यत्ववांश्चैत्र इत्यादिविशेषदर्शनादपि प्रमाद्युत्पत्त्या व्यभिचारापातादिति भावः। तथेति। तथा च व्याप्तिप्रमायां व्याप्तिमद्विशेष्यकतर्कत्वेन व्याप्तिभ्रमे च व्याप्यभावद्विशेष्यकतर्कत्वेन हेतुत्वमिति भावः। ननूक्तकार्यकारणभावे गौरवमतो लाघवादाह अत्र चेति। बोध्यादिमत्त्व इति। व्याप्तितदभाववत्त्वे इत्यर्थः। व्याप्त्यसत्त्वदशायामपि व्याप्तेरलौकिकप्रत्यक्षप्रमोत्पादेन व्यभिचारादाह बोध्यादिमदिति। लाघवादिति। व्याप्तिमद्विशेष्यकतर्कत्वादिना हेतुत्वमपेक्ष्य व्याप्त्यादिमत्त्वेन हेतुत्वे लाघवादित्यर्थः। ननु व्याप्तिमत्संनिकर्षत्वापेक्षया व्याप्तिमद्विशेष्यकतर्कत्वस्यैव लघुत्वात् द्वितीयकल्पे लाघवं दुर्घटमत आह तर्कस्येति। दर्शितत्वादिति। यत्र व्याघातादिना शङ्कैव नावतरतीत्यादि मूलग्रन्थेनेत्यादिः। अथेति। तदभाववत्त्वज्ञानोत्तरतन्निश्चयात्मकप्रत्यक्षे तदभाववत्त्वज्ञानविरोधित्वेन विशेषदर्शनस्य हेतुत्वमित्यर्थः। अन्यथा विशेषदर्शनत्वेन तत्र हेतुत्वे संशयोत्तरं व्यावर्त्तकधर्मदर्शनादितस्तादृशप्रत्यक्षं न स्यादिति भावः। तच्चेति। विपरीतज्ञानविरोधित्वं चेत्यर्थः। तर्कस्यापीति। तथा च व्यभिचारभिया तर्कत्वेनाऽहेतुत्वेऽपि व्यभिचारज्ञानोत्तरव्याप्तिनिश्चयात्मकप्रत्यक्षे व्यभिचारज्ञानविरोधित्वेन हेतुतायां न व्यभिचार इति संमुखत एव मूलस्योपपत्तौ किं तात्पर्यवर्णनेनेति भावः। उक्तरूपेण हेतुता-

तावदापाततस्तथा, तथाप्यन्यत्र लक्षणप्रामाण्यादिप्रयोजकादेव तत्र प्रामाण्याद्युपपत्तौ न तस्यापि विशेषतः कारणत्वं गौरवात्। उक्तञ्च विशेषणज्ञानस्य विशिष्टज्ञानकारणत्वमते सर्वत्र विशेष्य-सम्बन्धासम्बन्धविशेषणज्ञानमेव प्रमाभ्रमप्रयोजकमिति वदन्ति।

सत्त्वेपि न विपरीतज्ञानोत्तरनिश्चयात्मकप्रत्यक्षप्रमात्वावच्छिन्नं प्रति विपरीतज्ञानप्रतिबन्धकप्रमात्वादिना हेतुत्वं विपरीतज्ञानानुत्तरवर्त्तिज्ञानीयप्रमात्वादिप्रयोजकादेव विपरीतज्ञानोत्तरवर्त्तिज्ञानेपि प्रमात्वादिसम्भवेन प्रमात्वादिकमन्तर्भाव्योक्तकार्यकारणभावे मानाभावादित्याह अस्त्विति। वस्तुतो विपरीतज्ञानोत्तरनिश्चयात्मकप्रत्यक्षत्वमपि न कार्यतावच्छेदकमर्थसमाजग्रस्तत्वादित्यावेदयितुमुक्तम् आपातत इति। अन्यत्र। विपरीतज्ञानानुत्तरतद्धत्त्वप्रमादिस्थले। तत्र। विपरीतज्ञानोत्तरप्रमादौ। प्रामाण्यादीत्यादिना भ्रमत्वसंग्रहः। तस्यापि। विपरीतज्ञाननिवर्त्तकस्यापि। विशेषतः। प्रमात्वान्तर्भावेण। गौरवादिति। तथा च तर्कस्य प्रमात्वादिकं न व्याप्तिप्रमात्वादिप्रयोजकमतस्तात्पर्यमुपवर्णितमिति भावः। अथान्यत्र तत्तद्व्यक्तित्वादिनैव तत्तत्प्रमाव्यक्तिप्रयोजकत्वमतो न विपरीतज्ञानोत्तरप्रत्यक्षस्य ततः प्रामाण्याद्युपपत्तिरत आह उक्तं चेति। परमते विनापि घटत्वादिज्ञानं प्राथमिकघटत्वादिप्रमोत्पादेन व्यभिचारात्कारणत्वमत इत्युक्तम्। न्यायमत इति तदर्थः। तेन विशेषणज्ञानस्याहेतुत्वेपि न क्षतिः, प्राथमिकायामपि प्रमायामीश्वरीयस्यैव विशेषणज्ञानस्य हेतुत्वसम्भवात्। घटत्वादिप्रमात्वावच्छिन्नं प्रति घटत्वादिज्ञानत्वेनैव हेतुत्वं तत्र च कार्यस्य विशेष्यत्वं कारणस्य स्वविषयाश्रयतादात्म्यं प्रत्यासत्तिरित्येतावतैवातिप्रसङ्गभङ्गाद्विशेष्यसम्बद्धासम्बद्धविशेषणेत्यादेरपि तत्रैव तात्पर्यात्। अन्यथा विशेष्यसम्बद्धत्वस्य केवलान्वयित्वेनाऽव्यावर्त्तकतया कारणतावच्छेदकत्वायोगादिति ध्येयम्। न च नित्यस्य घटत्वादेस्तादृशप्रमायां विशेषणस्यैव तत्त्वेन हेतुत्वमुचितं तद्विषयकज्ञानत्वापेक्षया लघुत्वादिति वाच्यम्। घटत्वादिप्रमाया भाविन्यपि घटादावुत्पत्त्या तदवच्छेदेन

सत्यत्वाभ्यां पुरुषज्ञानमिव । अपरे तु यत्र तर्के व्याप्त्यनुभवो मूलं तत्र तर्कान्तरापेक्षा यत्र तु व्याप्तिस्मरणं हेतुः तत्र न तर्कान्तरापेक्षेति नानवस्था । अस्ति च जातमात्राणामिष्टानिष्टसाधनतानुमितिहेतुव्याप्तिस्मरणं तदानीं व्याप्त्यनुभवकाभावात् । तन्मूलानुभवमूला चाग्रेऽपि व्याप्तिस्मरणपरम्परेति । यत्त्वनादिसिद्धकार्य्यकारणभावविरोधादिमूलाः के चित्तर्का इति । तन्न । तत्र प्रमाणानुयोगेऽनुमान एव पर्य्यवसानात् । न च व्या-

---

तत्र प्रमाणेति । इदमनादिसिद्धत्वज्ञानस्य प्रयोजकत्वमभिप्रेत्य,

---

घटत्वादेस्तादृशप्रमाव्यवहितपूर्ववर्त्तित्वासम्भवेन तत्र घटत्वादेः कारणत्वासम्भवात्। यत्र विशेषणविशेष्ययोर्द्वयोरेव नित्यत्वं तत्र मनस्त्वादिप्रमायां मनस्त्वादेरेव हेतुत्वेपि क्षत्यभावादिति दिक्। स्वमते प्रमात्वादेरार्थसमाजग्रस्तत्वान्न कार्यतावच्छेदकत्वमतो वदन्तीत्युक्तम्। मूले यत्र तर्क इत्यादि । तथा च व्याप्त्यनुभव एव तर्कस्य हेतुत्वं जातमात्रस्य तु व्याप्तिज्ञानं स्मरणमेवेति न व्यभिचार इति भावः । नन्वेवमपि वह्निधूमयोर्व्याप्त्यनुभवकारणस्य तर्कस्य मूलीभूतो व्याप्त्यनुभवस्तर्कान्तरात् एवं तद्धेतुभूतोपि व्याप्त्यनुभवस्तथेत्यनवस्थेत्यत आह तन्मूलानुभवमूलेति । तस्य जातमात्रव्याप्तिस्मरणस्य मूलं योऽनुभवस्तदधीनेत्यर्थः । तथा च जातमात्रव्याप्तिस्मरणहेतोर्जन्मान्तरीयव्याप्त्यनुभवस्यैव वह्निधूमव्याप्तिग्राहकतर्कमूलीभूतव्याप्त्यादिविषयकतया तत एव तादृशतर्कमूलीभूतव्याप्त्यादेः स्मरणमेव नाऽनुभवो येनानवस्थेति भावः।ननु धूमो यदि वह्निव्यभिचारी स्याद्वन्हिजन्यो न स्यादिति तर्केण स्वरूपसत एव कार्यकारणभावग्रहस्य गोत्वं यदि अश्वभेदव्यभिचारि स्यादश्वत्व-

प्तिग्रहान्यथानुपपत्त्यैव तर्कस्यानादिसिद्धव्याप्तिकत्वज्ञानमिति वाच्यम् । अनुपपत्तेरप्यनुमानत्वात् । अन्ये तु विपक्षबाधकतर्कादनौपाधिकत्वग्रह एव तदधीनो व्याप्तिग्रह इति । तदपि न । तर्कस्याऽप्रमाणत्वात् । व्यभिचारादिशङ्कानिरासद्वारा प्रत्यक्षादिसहकारी स इति चेन्न । अनवस्थाभयेन तर्कं विना व्याघातात् । यत्र शङ्काविरहस्तत्र व्याप्तिग्रहे तर्कस्य व्यभिचारात् । यत्तु योग्यानामुपाधीनां योग्यानुपलब्ध्याऽभावग्रहः अयोग्यानान्तु साध्याव्यापकत्वसाधनव्यापकत्वसाधनादभावग्रह इत्यनौपाधिकत्वं सुग्रहमिति । तत्तुच्छम् । अनुमानेन तत्साधनेऽनवस्थानात् प्रमाणान्तरस्याऽभावात् । ये चा-

---

परार्थाभिप्रायेण वा । अनुमानत्वात् । व्याप्तिग्रहाधीनप्रवृत्तिकत्वात् । व्यभिचारशङ्केति । द्वारेण द्वारिणो नान्यथा सिद्धिरिति

विरुद्धं न स्यादिति तर्केण च स्वरूपसत एव विरोधादिग्रहस्यापेक्षणात्तत्र च प्रमाणेत्यादिसिद्धान्तोऽसङ्गत इत्यत आह । दीधितौ इदमिति । तथा चानादिसिद्धत्वप्रकारेण कार्यकारणभावादिग्रहो हेतुरित्यभिप्रेत्याऽनादिसिद्धत्वे प्रमाणमनुसृतमिति भावः । स्वरूपसतः कार्यकारणभावादिग्रहस्यापेक्षणाभिप्रायेण सङ्गमयति परार्थेति । तथा च परं प्रति तर्कमूलत्वेनोपन्यस्ते कार्यकारणभावादौ परेणाप्रामाणिकत्वे उद्भाविते प्रामाणिकत्वरूपमनादिसिद्धत्वमवश्यं तत्र साधनीयं तच्च तदग्राहकहेतोरप्रयोजकत्वान्न सम्भवतीति मूलाशयः । अनुपपत्तेरतिरिक्तप्रमाणत्वमतेपि व्याप्तिग्रहान्तरापेक्षारू-

नुकूलतर्कं विनैव सहचारादिदर्शनमात्रेण व्याप्तिग्रहं वदन्ति, तेषां पक्षेतरत्वस्य साध्यव्यापकत्वग्रहेऽनुमानमात्रमुच्छिद्येत। अनुमानमात्रोच्छेदकत्वादेव पक्षेतरो नोपाधिरिति चेत्। भ्रान्तोऽसि, न हि वयमुपाधित्वेन तस्य दोषत्वमाचक्ष्महे, साध्यव्यापकत्वेन तद्व्यतिरेकात् पक्षे साध्यव्यावर्त्तकतया व्यापकव्यतिरेके व्याप्यव्यतिरेकस्य

भावः। अनुमानमात्र इति। अनिश्चितसाध्यपक्षके सर्वत्र सम्भवित्वात् पक्षे साध्यनिर्णयेऽनुमानवैयर्थ्यात् उपाधित्वेन स्वव्यभिचारेण व्यभिचारोन्नायकत्वेनानुमानमात्रोच्छेदकताज्ञानमेवसाध्यव्यापकताबुद्धिं विरुन्ध्यादित्याशङ्क्याह अपि चेति। करवन्ही-

---

पदोषस्य सम्भवादनुमानपर्यन्तानुधावनमयुक्तमतः साधारण्येन व्याचष्टे अनुमानत्वादिति। ननु व्यभिचारशङ्कानिरासस्यावश्यमपेक्षणीयत्वे तेनैव विपक्षबाधकस्तर्कोऽन्यथासिद्धः कथं कारणमित्यत आह द्वारेण चेति। व्यभिचारसंशयस्य व्याप्तिग्रहाविरोधित्वात्तन्निवर्त्तनाय तर्को व्यर्थ इति मतं निरसितुमाह मूलकारो ये चात्रेति। सहचारदर्शनादीत्यादिपदेन व्यभिचारनिर्णयाभावस्योपग्रहः। व्यापकत्वग्रह इत्यस्य तेनैवोपाधिनेति शेषः। शङ्कते अनुमानमात्रेति। नोपाधिरिति। साध्यव्यभिचारानुमापकव्यभिचारप्रतियोगिन एवोपाधिपदार्थत्वादिति भावः। यत्र पक्षेतरत्वं नोपस्थितं तत्रैवानुमानानुच्छेदादाह दीधितौ सम्भवित्वादिति। पक्षेतरत्वस्योपस्थितौ तत्र साध्यव्यापकत्वग्रहस्य सम्भवित्वादित्यर्थः। तथा च पक्षेतरत्वोपस्थितिकालीनानुमानोच्छेदे मूलतात्पर्यमिति भावः। ननु यत्र पक्षे साध्यनिश्चयदशायां पक्षेतरत्वमुप-

वज्रलेपाच्च । अपि च करवह्निसंयोगः शक्त्यतिरिक्तातीन्द्रियधर्मसमवायी जनकत्वादित्यत्राप्रयोजकत्वान्न साधकम्, तत्र व्याप्तस्य पक्षधर्मत्वे किमप्रयोजकं नाम तस्माद्विपक्षबाधकतर्काभावान्न तत्र व्याप्तिग्रह इत्यप्रयोजकत्वमिति ॥

ति । परमतेन इदम्, स्वमते तु वाय्वादौ स्पर्शादिना रूपादिसाधने शक्त्यतिरिक्तविशेषणाप्रक्षेपेण वा तद्बोध्यम् ॥

स्थितं तत्रैव व्यभिचारात्पक्षेतरत्वे साध्यव्यापकत्वाग्रहान्नानुमानोच्छेद इत्यत आह वैफल्यादिति । पक्ष इति । प्रवृत्त्यादेः पूर्वोत्पन्नसाध्यनिश्चयादेव सम्भवादिति भावः । स्वव्यतिरेकेण साध्यव्यतिरेकोन्नायकत्वरूपस्योपाधित्वस्य प्रतिक्षेपे किं त्वित्याद्युत्तरग्रन्थासङ्गतिरतो व्याचष्टे उपाधित्वेनेति । विरुन्ध्यादिति । वस्तुतः साध्याभाववति वृत्तित्वांशे व्यभिचारसन्देहस्य विरोधित्वं प्रदर्श्य साध्याभाववत्त्वांशे संशयात्मनो व्यभिचारज्ञानस्य व्याप्तिविरोधित्वमुदाहरति मूले अपि चेतीति परमार्थः । स्वमते शक्त्यभावात्साध्याप्रसिद्धेरेवाप्रयोजकत्वं सुवचमतः परमतेनेति । शक्त्यतिरिक्तेति । तथा च करवह्निसंयोगो अतीन्द्रियधर्मसमवायी समवायित्वे सति जनकत्वादित्येवं प्रयोजकं स्वमते बोध्यमिति भावः ॥

इति श्रीजगदीशतर्कालङ्कारविरचितस्तर्कः समाप्तः ॥

चिन्तामणेः व्याप्त्यनुगमः ॥

उक्तव्याप्तिप्रकारेष्वन्योन्याभावगर्भैव व्याप्तिरनुमितिहेतुर्लाघवात्, अतो नाऽननुगमः । अनौपाधिकत्वं

दीधित्याः व्याप्त्यनुगमः ॥

उक्तव्याप्तीति । प्रतियोग्यसामानाधिकरण्यादिविशेषणविरहेण लाघवात् । अथ संयोगाभावस्येव संयोगवद्भेदस्यापि हेतुसामानाधिकरण्यग्रहेऽप्यनुमितिदर्शनात्तत्रापि तदवश्यं निवेशनीयमिति क्व लाघवम् । नन्वेवं प्रतियोग्यसामानाधिकरण्याद्यनुपस्थितौ हेतुसमानाधिकरणाभावप्रतियोगितानवच्छेदकत्वग्रहेऽप्यनुमितिर्न स्यात् । न च प्रतियोगिसमानाधिकरणत्वेनाऽज्ञायमाना यावन्तो हेतुसमानाधिकरणा अभावास्तत्प्रतियोगितावच्छेदकत्वाभावग्रहो हेतुरिति वाच्यम् । तादृशाभावग्रहो हि न हेतुसमाना-

जागदीश्याः व्याप्त्यनुगमः ॥

प्रतियोग्यसमानाधिकरणत्वादीत्यादिपदेन निष्कृष्टार्थस्य हेत्वधिकरणे प्रतियोग्यनधिकरणत्वविशेषणस्य परिग्रहः । तत्रापि । अन्योन्याभावगर्भव्याप्तिग्रहेपि । तदिति । प्रतियोगिनस्तादात्म्येन यः सम्बन्धी तदवृत्तिभिन्नत्वादिरूपं प्रतियोग्यसामानाधिकरण्यादिकं विषयतया प्रवेश्यमित्यर्थः । तटस्थः शङ्कते न-

धिकरणाभावप्रतियोगितावच्छेदकत्वत्वेन रूपेण, प्रतियोगिसमानाधिकरणतादृशाभावप्रतियोगितावच्छेदकत्वग्रहे तदसम्भवात् । नापि प्रातिस्विकरूपेण, जन्मसहस्रेणाप्यसम्भवात् । नापि रूपान्तरेण, वन्हित्वावच्छिन्नप्रतियोगिताकाभावस्य धूमसामाधिकरण्यभ्रमेऽपि वन्हित्वानवच्छिन्नप्रतियोगिताकधूमानधिकरणनिखिलाभावप्रतियोगितानवच्छेदकं वन्हित्वमिति ज्ञानादपि अनुमितिप्रसङ्गात् । न च हेतुसमानाधिकरणत्वेन ज्ञायमाना इति वाच्यम् । वन्हित्वे धूमसमाधिकरणरासभाद्यभावप्रतियोगितावच्छेदकत्वभ्रमेऽप्युक्तरूपेण तथा ग्रहसम्भवात्, धूमाधिकरणान्तरानुपस्थितौ व-

---

न्त्वेवमिति । प्रतियोगिवैयधिकरण्यविषयकत्वान्तर्भावेन हेतुत्वे । उपाध्यायमतमाशङ्क्य निषिध्यति न चेति । हेतुमन्निष्ठघटाद्यभावप्रतियोगितानवच्छेदकं वह्नित्वमित्यादिग्रहादपि वह्निमान्रासभादित्यादावनुमित्यनुत्पत्त्यर्थं यावन्त इति । तादृशाभाव इति । निरुक्तावच्छेदकत्वाभावग्रहो हीत्यर्थः । तदसम्भवात् । हेतुसमानाधिकरणाभावप्रतियोगितानवच्छेदकं संयोगत्वमित्यादिग्रहासम्भवात् । सामान्यघटितविशेषवत्तानिश्चयस्यापि सामान्याभावबुद्धौ विरोधित्वादिति भावः । प्रातिस्विकेति । तत्तदभावप्रतियोगितावच्छेदकत्वत्वरूपेणेत्यर्थः । रूपान्तरेणेति । हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वत्वघटितेनेत्यादिः । तेन मेयत्वादिना तदग्रहान्नातिप्रसङ्गः । भ्रमेपीत्यन्तमिष्टापत्तिव्युदासाय । न चेति । तथा च वह्न्यभावस्यापि हेतुसमानाधिकरणत्वेन ज्ञायमानत्वात्तत्प्रतियोगितानवच्छेदकत्वाग्रहादेव तदा नानुमितिरिति भावः । उक्तरूपेणेति । वह्नित्वानवच्छिन्नधूमवन्निष्ठाभावप्रतियोगितावच्छेदकत्वत्वरूपेणेत्यर्थः । सम्भवादिति । समानप्रकारकत्वेनैव ज्ञानस्य विरोधित्वात् तथा च ततोप्यनुमितिः स्यादिति भावः । ननु प्राचां मते समानविषयत्वेनैव ज्ञानस्य विरोधित्वाद्वह्नित्वे धूमवन्निष्ठरासभाभावप्रतियोगितावच्छेदकत्वग्रहदशायां

न्हित्वे रासभत्वादौ च तादृशभ्रमोत्पादेऽपि रासभादेरिव वन्हेरप्यननुमानाच्च। एवं वन्हित्वावच्छेदेन शुक्लत्वाभावभ्रमदशायां शुक्लप्रतियोगिका वन्हीतरप्रतियोगिताकाश्च ये धूमासमानाधिकरणाभावास्तत्प्रतियोगितानवच्छेदकं वन्हित्वमिति ग्रहेऽपि। मैवम्। प्रतियोग्यसमानाधिकरणहेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वग्रहविरोधिग्रहविषयत्वेन तेषां तादृशावच्छेदकत्वग्रहवि-

---

वह्नित्वानवच्छिन्नधूमवन्निष्ठाभावप्रतियोगितानवच्छेदकं वह्नित्वमितिग्रह एवासम्भवीत्यतो दोषान्तरमाह धूमाधिकरणेति। रासभशून्यधूमाधिकरणानुपस्थितावित्यर्थः। तादृशेति। रासभत्वं धूमवन्निष्ठरासभत्वानवच्छिन्नाभावप्रतियोगितानवच्छेदकं वह्नित्वं धूमवन्निष्ठवह्नित्वानवच्छिन्नाभावप्रतियोगितानवच्छेदकमित्येवं प्रमोत्पादेपीत्यर्थः। रासभशून्यधूमाधिकरणोपस्थितिदशायां रासभत्वे निरुक्तानवच्छेदकत्वं दुर्ग्रहमतोऽनुपस्थितावित्यन्तम्। उक्तज्ञानादनुमितौ कदा चिदिष्टापत्तिं कुर्यादित्यतो दोषान्तरमाह एवमिति। वह्नेः शुक्लत्वग्रहे वह्नयभावस्यापि शुक्लप्रतियोगिकत्वग्रहसम्भवाद्वह्नित्वं धूमवन्निष्ठशुक्लप्रतियोगिकाभावप्रतियोगितानवच्छेदकमित्येवंग्रहो न सम्भवतीति भ्रमदशायामित्यन्तम्। शुक्लप्रतियोगिका इत्यनेन वह्नयभावस्य वह्नीतरप्रतियोगिकेत्यनेन रासभाद्यभावस्य निरुक्तयावदन्तर्गतस्य सङ्ग्रहः। ग्रहेपीति। अननुमानाच्चेत्यनुषज्यते। तथा च तत्राप्यनुमितिः स्यादिति भावः। इदमुपलक्षणम्। ज्ञायमानत्वाज्ञायमानत्वयोः सामान्यतः प्रवेशेऽतिप्रसङ्गः तत्तत्काले तत्तत्पुरुषज्ञायमानत्वप्रवेशे तु प्रतियोगिसामानाधिकरण्यानुपस्थितिकालीनव्याप्तिग्रहासङ्ग्रहः पुरुषकालाद्यननुगमादनुगतहेतुत्वालाभश्चेत्यपि द्रष्टव्यम्। नन्वेवमित्यत्र सिद्धान्तो मैवमिति। तेषामिति। प्रतियोगिव्यधिकरणहेतुमन्निष्ठाभावप्रतियोगितावच्छेदकभेदतत्त्वात्यन्ताभावानामित्यर्थः। ननु तादृशग्रहविरोधिग्रहविषयस्य तत्तदभावस्य यदि ज्ञानमात्रं हेतुस्तदा प्रमेयत्वादिनापि तस्य ज्ञानादनुमित्यापत्तिः त-

रोधित्वेन तद्बुद्धीनां वाऽनुगमात् । विरुणद्धि च सामान्याभा-

त्तद्रूपेण ज्ञानस्य हेतुत्वेऽननुगमतादवस्थ्यमित्यत आह तादृशावच्छेदकत्वेति । तद्बुद्धीनामिति । तादृशावच्छेदकत्वाद्यभावबुद्धीनामित्यर्थः । अत्र च प्रतियोगिव्यधिकरणहेतुमन्निष्ठाभावप्रतियोगितावच्छेदकत्वप्रकारिताव्यापकप्रकारित्वावच्छिन्नं प्रति विरोधित्वमेव प्रवेश्यम् । तेन दैवात् घटवद्भूतलादिविषयकस्य तादृशावच्छेदकत्वग्रहस्य विरोधिघटाभाववद्भूतलज्ञानमादाय नातिप्रसङ्गः घटवद्भूतलविषयितायास्तादृशावच्छेदकत्वविषयित्वाव्यापकत्वात् । यत्तु निरुक्तावच्छेदकत्वमात्रविषयिणीं यां काञ्चिदुक्तज्ञानव्यक्तिमादाय तद्व्यक्तिविरोधित्वेनैवानुगमान्नोक्तदोष इति।तन्न। तथा सति प्रतियोगिवैयधिकरण्यादेः कारणतावच्छेदककोट्यप्रविष्टतया सत्यमित्यादिना वक्ष्यमाणस्यान्योन्याभावगर्भव्याप्तिज्ञानहेतुतालाघवस्याऽसङ्गतत्वापत्तेः । यद्यपि प्रतियोगितानवच्छेदकवह्नित्वाश्रयवान् धूमादित्यादौ प्रतियोगितानवच्छेदकवन्हित्वं प्रतियोगिव्यधिकरणधूमवन्निष्ठाभावप्रतियोगितावच्छेदकमित्याकारकग्रहस्याहार्य्यस्यैव सम्भवात्तद्विरोधित्वाप्रसिद्ध्या तत्रानुगमो दुर्घटः । न च तादृशावच्छेदकत्वग्रहसमानविशेष्यकग्रहविरोधित्वं प्रवेश्यं तथा च विशिष्टवन्हित्वधर्मिकाहार्य्यतादृशावच्छेदकत्वग्रहस्य विशेष्यं यद्वन्हित्वं तद्विशेष्यकस्यानाहार्य्यज्ञानस्य विरोधित्वप्रसिद्ध्या न दोष इति वाच्यम् । तथा सति वन्हित्वं निरुक्तप्रतियोगितानवच्छेदकमित्याकारकज्ञानवतोपि प्रतियोगितानवच्छेदकवन्हित्वप्रकारेणानुमित्यापत्तेः । तथापि प्रतियोगिव्यधिकरणहेतुमन्निष्ठाभावप्रतियोगितावच्छेदकत्वग्रहस्य प्रतिबन्धकतावच्छेदकीभूतप्रकारित्वावच्छिन्नसाध्यतावच्छेदकविशेष्यताकज्ञानत्वेनानुगमान्न दोषः । पटत्वादिधर्मिकतादृशावच्छेदकत्वग्रहं प्रति विरोधितावच्छेदकं यद्धूमवन्निष्ठप्रतियोगिव्यधिकरणाभावप्रतियोगितानवच्छेदकत्वप्रकारित्वं तदादायैव प्रतियोगितानवच्छेदकवन्हित्वविशेष्यकव्यापकतावच्छेदकत्वज्ञानसौलभ्यम् । इदन्तु चिन्त्यते । प्रतियोगिव्यधिकरणहेतुमन्निष्ठाभावप्रतियोगितावच्छेदकत्वग्रहविरोधिज्ञानत्वेन धूमलिङ्गकवन्ह्यनुमितौ न

वबोधोऽपि सामान्यघटितविशेषवत्तावुद्धिम्। सत्तां हि घटो नास्तीति बुद्धौ जात्वपि नीलो घटोऽस्तीति बोधानुदयात्। तत्कस्य हेतोः, तद्विशिष्टप्रतियोगिमत्तावुद्धिं प्रति तदवच्छिन्नप्रतियोगिताकाभाववुद्धेर्विरोधित्वात्। अवगाहते च नीलघटवत्तावुद्धिरपि घटत्वविशिष्टतद्वत्ताम्। अत एवावच्छेदकतत्त्वयोरन्योन्याऽसन्ताभावयो-

---

व्याप्तिज्ञानं हेतुर्मानाभावाद्वन्हिज्ञानत्वादिनैव हेतुत्वसम्भवात्। न चोक्तावच्छेदकत्वग्रहविरोधिधूमवत्पर्वतनिश्चयत्वेनानुगतरूपेण प्रतियोगिवैयधिकरण्यादिविषयकपरामर्शोऽनुमितिहेतुः। धूमव्यापको वन्हिर्धूमवांश्च पर्वत इत्यादिसमूहालम्बनादपि पर्वतो वन्हिमानित्यनुमित्यापत्तेः। किञ्च प्रतियोगिव्यधिकरणत्वमत्र स्वस्वप्रतियोगिव्यधिकरणत्वमवश्यं वाच्यं तथा च स्वत्वस्यैकस्याभावादेकं स्वमादाय प्रतियोगिव्यधिकरणहेतुमन्निष्ठाभावप्रतियोगितावच्छेदकत्वग्रहविरोधित्वेनानुगमे तादृशाभावान्तरप्रतियोगितावच्छेदकत्वग्रहदशायामनुमित्यापत्तिः। किञ्चोक्तग्रहविरोधितावच्छेदकीभूतप्रकारितावान्निश्चयत्वेनैव तत्र हेतुत्वं वाच्यं तथा च तन्निश्चयत्वस्य तत्तत्प्रकारादिगर्भतयाऽननुगमो दुर्वार इति दिक्। हेतुमन्निष्ठाभावप्रतियोगितानवच्छेदकत्वबुद्धावुक्तग्रहविरोधित्वं सङ्गमयति विरुणद्धीति सामान्यघटितेति। तेन द्रव्यसामान्याभावग्रहेऽपि घटवत्त्वादिग्रहोत्पत्त्या न क्षतिः। घटो नास्तीति। भूतल इत्यादिः। पृच्छति तत्कस्य हेतोरिति। उत्तरयति तद्विशिष्टेति। घटत्वविशिष्टवैशिष्ट्यावगाहिबुद्धिं प्रत्येव घटत्वावच्छिन्नाभावनिश्चयत्वेन प्रतिबन्धकत्वं घटवदित्याकारकबुद्धिवच्च नीलघटवदित्याकारकबुद्धिर्घटत्वविशिष्टवैशिष्ट्यावगाहिनीतिभावः। अत एवोक्तक्रमेण विरोधित्वानुगमादेव। अन्यथा अवच्छेदकभेदमात्रप्रवेशेऽवच्छेदकत्वात्यन्ताभावबुद्ध्यसंग्रहापत्तिरिति भावः। ननु प्रतियोगिव्यधिकरणहेतुमन्निष्ठाभावप्रतियोगितावच्छेदकत्वग्रहविरोधित्वं तादृशावच्छेदकत्वाभावव्याप्यवत्त्वग्रहस्यापि तथा तादृशावच्छेदकत्वव्यावर्तकधर्मदर्शनस्यापि एवमभावादौ हेतुसामानाधिक-

रुपसंग्रहः । हेत्वाभासे च वक्ष्यमाणरीतिरिहाप्यनुसन्धेया । यदि च साध्यतावच्छेदकस्याभावप्रतियोगितानवच्छेदकत्वादिग्रहान्नानुमितिः, तदा तादृशावच्छेदकत्वग्रहाविरोधित्वेन विशेषणीयम् । अन्योन्याभावस्याऽव्याप्यवृत्तितापक्षे तु सुतरां विशेषणदानमिति सत्यम्, तथाप्यन्योन्याभावे प्रतियोग्यवृत्तित्वस्यैव विशेषणत्वं

रण्याभावादिग्रहस्यापि इति ततोप्यनुमित्यापत्तिरित्यतआह हेत्वाभासे चेति । तथा च यथा व्याप्तिग्रहविरोधित्वादिरूपेण सव्यभिचारित्वादिलक्षणे विरोधित्वं साध्याप्रसिद्ध्यादावतिव्याप्तिवारणार्थं साध्यतावच्छेदकार्दिमात्रग्रहविरोधित्वान्यत्वेन विशिष्यते तथात्रापि तादृशावच्छेदकत्वग्रहविरोधित्वं तादृशावच्छेदकत्वाभावव्याप्यवत्त्वाद्यवच्छिन्नविरोधिताभिन्नत्वेन विशेषणीयमिति भावः । अनवच्छेदकत्वादीत्यादिपदेन प्रतियोगितानवच्छेदकत्वादेः सङ्ग्रहः । केवलान्वयित्वग्रहस्यानुमितिहेतुतामङ्गीकुर्वतामत्रानुमितिरेवेत्यावेदयितुं यदि चेत्युक्तम् । तादृशावच्छेदकत्वग्रहाविरोधित्वेनेति । तथाविधावच्छेदकत्वग्रहविरोधित्वान्यत्वेनेत्यर्थः । विशेषणीयमिति । निरुक्तविरोधित्वमिति शेषः । तेन प्रतियोगितानवच्छेदकं प्रतियोगिव्यधिकरणहेतुमन्निष्ठाभावप्रतियोगितानवच्छेदकञ्च वह्नित्वमिति समूहालम्बनज्ञानस्य नानुपसङ्ग्रहः । [न चैवमप्यभावो न हेतुसमानाधिकरण इत्यादिज्ञानेऽतिप्रसङ्गः, अभावादौ हेतुसामानाधिकरण्यग्रहाविरोधित्वेनापि विशेषणीयत्वात् ।] वस्तुतो हेतुमन्निष्ठाभावप्रतियोगितावच्छेदकत्वप्रकारिताशून्यज्ञानवृत्तिप्रकारितानवच्छिन्नत्वेनैव प्रतिबध्यत्वं विशेष्यम् तावतैव प्रतियोगितानवच्छेदकं वह्नित्वमित्यादिबुद्धेरपि व्युदासादिति ध्येयम् । विशेषणस्य प्रतियोग्यसमानाधिकरणत्वरूपस्य दानमित्यर्थः । प्रतियोग्यवृत्तित्वस्यैवेत्येवकारेण प्रतियोग्यधिकरणावृत्तित्वस्य गुरोर्व्यवच्छेदः । ननु यत्समानाधिकरणात्यन्ताभावीयविशेषणतावि-शेषावच्छिन्नप्रतियोगितासामान्ये साध्यसमानाधिकरणात्यन्ताभा-

न वा प्रतियोगितावच्छेदकसम्बन्धभेदानुधावनमतो लाघवमिति यथाश्रुतग्रन्थानुरोधिनः । अपरे त्वन्योन्याभावगर्भव्याप्त्योरेकतराग्रहेऽप्यन्यतरज्ञानादनुमितेरानुभविकत्वात्तदुभयज्ञानमेव हेतुः, इन्द्रियसंयोगादिवच्च विशिष्टैव कार्य्यकारणभावान्नव्यभिचारः । यत्तु यद्रूपावच्छिन्नप्रतियोगिताकत्वेनोपस्थितोऽभावो धर्म्मिणि गृह्यमाणः साध्यवत्ताबुद्धिं विरुणद्धि तद्रूपावच्छिन्नप्रतियोगिताकाभावसामानाधिकरण्यावगाहिनो ग्रहस्य विरोधित्वेन

वीयविशेषणताविशेषावच्छिन्नप्रतियोगितानवच्छेदकधर्मावच्छेद्यत्वं नास्ति तत्त्वमित्यन्ताभावगर्भव्याप्तौ निष्कृष्टायां प्रतियोगिवैयधिकरण्याप्रवेशान्नैष दोष इत्यत आह न वेति । तथा च यत्समानाधिकरणान्योन्याभावीयविशेषणताविशेषावच्छिन्नप्रतियोगितानवच्छेदकधर्मावच्छेद्यत्वं नास्ति तत्त्वमित्यन्योन्याभावगर्भव्याप्तौ प्रतियोगितांशे सम्बन्धविशेषाप्रवेशाल्लाघवमुक्तायामत्यन्ताभावगर्भायान्तु विशेषणताविशेषावच्छिन्नत्वेन प्रतियोगितानिवेशाद्गौरवमित्येवमन्योन्याभावगर्भाया हेतुत्वे विनिगमकमिति भावः । अन्योन्याभावत्वमपि यदि तादात्म्यसम्बन्धावच्छिन्नप्रतियोगिताकाभावत्वं न त्वखण्डोपाधिस्तदा तद्घटितव्याप्तावपि सम्बन्धविशेषनिवेशाल्लाघवस्यानवकाशेन वस्तुतोऽत्यन्तान्योन्याभावघटितयोर्द्वयोरपि व्याप्त्योर्नानुमित्युपयोगित्वमिति लघोः साध्यवदन्यावृत्तित्वस्यैवाग्रे तथात्वस्य वक्ष्यमाणत्वादित्याशयेन यथाश्रुतेत्युक्तम् । अपरे मूलग्रन्थाननुरोधिन इत्यर्थः । इन्द्रियेति । तथा च द्रव्यप्रत्यक्षत्वावच्छिन्नं प्रति चक्षुःसंयोगादेर्व्यभिचारेपि द्रव्यचाक्षुषत्वावच्छिन्नं प्रत्येव यथा चक्षुःसंयोगत्वादिना हेतुत्वं तथानुमितित्वावच्छिन्नं प्रत्यत्यन्तान्योन्याभावगर्भव्याप्यवत्तापरामर्शस्य हेतुतायां व्यभिचारसत्त्वेप्यत्यन्ताभावगर्भव्याप्यवत्तापरामर्शनाशकानुमितित्वावच्छिन्नं प्रत्येवात्यन्ताभावगर्भव्याप्तिज्ञानत्वादिना हेतुत्वं वाच्यमिति भावः । तद्रूपेति । तथा च साध्यतावच्छेदकं सा-

व्याप्तिबुद्धयोऽनुगमनीयाः, प्रतिबन्धीतश्च साध्यतद्वदत्यन्तान्योन्याभावग्रहौ साध्यवत्ताबुद्धिम् । केवलान्वयिस्थले च भ्रमरूपस्यैव तद्ग्रहस्य कथञ्चित् प्रसिद्धिरिति । तच्चिन्त्यम् । साध्यतावच्छेदके साधनसमानाधिकरणात्यन्ताभावप्रतियोगितावच्छेदकत्वावगाही साध्यतावच्छेदकावच्छिन्नसाध्यवत्त्वे च साधनसमानाधिकरणान्योन्याभावप्रतियोगितावच्छेदकत्वावगाही यो ग्रहस्तद्विरोधित्वं साध्याभाववदवृत्तित्वसाध्यवदन्यवृत्तित्वोभयावगाहि-

---

ध्यं च . साध्यवत्ताग्रहविरोध्यभावग्रहविषयतावच्छेदकत्वेनानुगमस्य हेतुधर्मिकतदवच्छिन्नाभावसामानाधिकरण्यग्रहविरोधित्वेनैव व्याप्तिधियोऽनुमितिहेतुत्वमिति भावः । तद्ग्रहस्य । साध्यतद्वतोरत्यन्तान्योन्याभावग्रहस्य। कथञ्चित् । अभावान्तरे प्रतियोगितासम्बन्धेन वाच्यत्वाद्यवगाहित्वेन । अत्र साध्यभेदस्य साध्यवदत्यन्ताभावस्य च साध्यवत्ताग्रहविरोधितावच्छेदकरूपावच्छिन्नाभावत्वात्तत्सामानाधिकरण्यग्रहविरोधिनः साध्यभेदासामानाधिकरण्यसाध्यवदत्यन्ताभावासामानाधिकरण्यस्य वा ग्रहे सत्यप्यनुमित्यापत्तिः किञ्च भिन्नविषयकग्रहस्य विरोधित्वे साध्यवद्भेदान्तर्भावेनानुगमो व्यर्थः साध्यात्यन्ताभावसामानाधिकरण्यग्रहविरोधित्वेनैवान्योन्याभावगर्भव्याप्तिज्ञानस्याप्यनुगमसम्भवात् अविरोधित्वे तु साध्यवद्भेदग्रहस्य साध्यवत्ताग्रहाविरोधित्वादुक्तक्रमेणानुगमाशक्यत्वमित्यस्वरसेनाह तच्चिन्त्यमिति । [चिन्तावीजन्तु यत्त्वतत्त्वयोरनुगतत्वेनाननुगमतादवस्थ्यमितिध्येयम् ।] मतान्तरमाह साध्यतावच्छेदकेत्यादिवदन्तीत्यन्तेन । नव्यमते अत्यन्ताभावगर्भव्यापकताज्ञानयोरन्योन्यात्यन्ताभावगर्भव्यापकत्वग्रहौ प्रत्यविरोधित्वादुभयसङ्ग्रहार्थमवगाहिताद्वयोक्तिः । ननु साध्यतावच्छेदके तादृशावच्छेदकत्वावगाही साध्यतावच्छेदकावच्छिन्नसाध्यवत्त्वे च तादृशा-

ग्रहविरोधित्वादिकं वानुगमकं वाच्यम् । प्रसिद्धिः पूर्ववत् । अधिकं हेत्वाभासे वक्ष्यमाणरीत्या बोध्यम् । ग्रन्थस्तूपलक्षणपरो, नौपाधिकत्वमात्रव्यवच्छेदाय । यद्वक्ष्यति अनौपाधिकत्वन्तु तल्लक्षणमितीति वदन्ति । व्यभिचाराज्ञानस्य व्याप्तिधीहेतुत्वात्

न्योन्याभावप्रतियोगितावच्छेदकत्वावगाही यो ग्रहस्तद्विरोधित्वेनानुगमे गौरवमत आह साध्याभावेति । तथा चात्र कल्पे साधनस्यैव विशेष्यतया निवेशो न तु साध्यतावच्छेदकतदवच्छिन्नसाध्ययोर्विशेष्यतया निवेश इति लाघवमिति भावः । के चित्तु साध्यव्यापकताज्ञानं नानुमितिहेतुः साधनभेदेन नानात्वात् किन्तु साध्याभाववदवृत्तित्वस्य साध्यवदन्यावृत्तित्वस्य च द्वयोरेव ज्ञानं हेतुः साधनभेदेप्यभेदात् । तदभ्रमादेव च केवलान्वयिन्यनुमितिरिति नव्यमतमनुसृत्याह साध्याभावेति । साधनधर्मिकेत्यादिः । अत्राप्युभयप्रवेशफलं पूर्ववत् । विरोधित्वादिकमित्यादिना तत्तद्व्यक्त्यभावकूटावगाहिग्रहविरोधित्वादेः परिग्रहः । ननु जातिमान् द्रव्यत्वादित्यादौ हेतुतावच्छेदकसमवायादिसम्बन्धेन साध्याभाववदवृत्तित्वाप्रसिद्ध्या तदवगाहिग्रहविरोधित्वं दुर्वचमतआह प्रसिद्धिरिति । तथा च समवेतत्वे साध्याभाववदीयत्वावगाही भ्रमरूप एव ग्रहो धर्तव्य इति भावः । ननु व्यभिचारव्यावर्तकधर्मवत्त्वज्ञानस्यापि व्यभिचारग्रहविरोधित्वात्तत्रातिप्रसङ्ग इत्यत आह अधिकमिति । तादृशज्ञानव्यावृत्तो विरोधितावशेष एव निवेशनीय इति भावः । ननूक्तक्रमेणात्यन्ताभावगर्भव्याप्तेरनुमितिहेतुत्वे अन्योन्याभावगर्भैव व्याप्तिरित्यादिमूलग्रन्थासङ्गतिरित्यत आह ग्रन्थस्त्विति । अन्योन्याभावगर्भपदस्यानौपाधिकत्वान्यपरत्वादितिभावः । अनौपाधिकत्वमात्रव्यवच्छेदे मूलस्वरसं दर्शयति यदित्यादि । अन्यथाऽनौपाधिकत्वादिकन्तु तल्लक्षणमित्येव ब्रूयादितिभावः । अत्रोक्तग्रहविरोधित्वमात्रेण हेतुत्वेऽनौपाधिकत्वज्ञानस्यापि कारणत्वापत्तिस्तस्यापि सोपाधिकत्वमन्तर्भाव्य यो व्यभिचारग्रहस्तद्विरोधित्वेनोक्तरूपत्वात् । न च

व्याप्तिग्रहप्रतिबन्धकग्रहाविषयत्वेन व्यभिचारस्याभासत्वम् । सोपाधित्वज्ञानन्तु न साक्षाद्व्याप्तिधीविरोधि विरोध्यविषयत्वात्, किन्तु व्यभिचारधीद्वारा । वक्ष्यते चानुमितेस्तत्कारणज्ञानस्य साक्षाद्विरोधिन एवाभासत्वम् । निरुपाधित्वस्य ज्ञानन्तु न व्याप्तिधीहेतुः, मानाभावात्, तथात्वेऽप्युपाधेराभासत्वायोगाच्चेति ।

इदं पुनरिहावधेयम् । यदन्योन्याभावस्याव्याप्यवृत्तित्वे

तादृशग्रहत्वाव्यापकविषयिताशून्यग्रहाविरोधिज्ञानत्वेनैव हेतुत्वं सोपाधित्वविषयिता तु तादृशग्रहत्वाव्यापिकैवेति नातिप्रसङ्ग इति वाच्यम् । ज्ञानभेदेन भिन्नानां सर्वासामेव विषयितानां तादृशग्रहत्वाव्यापकत्वेनैव तच्छून्यग्रहाप्रसिद्धेरुक्तक्रमेण हेतुत्वापेक्षया लाघवेन सोपाधित्वाद्यविषयकं यत्किञ्चिदुक्तग्रहमुपादाय तद्घटितविरोधित्वेनैव हेतुत्वापत्तेः । न चेष्टापत्तिस्तत्रैव ग्रन्थतात्पर्य्यसम्भवादिति वाच्यम् । तथासति तादृशानन्तव्यक्तीरुपादाय प्रत्येकं तत्तद्ग्रहविरोधित्वेनानुमितिहेतुतायामनन्तकार्य्यकारणभावापत्तेर्विरोधितावच्छेदकभेदेनैव विरोधित्वस्यापि भिन्नत्वात्तादृप्येणानुगमासम्भवाच्चेत्यस्वरसाद्वदन्तीत्युक्तम् । अज्ञानरूपासिद्धयुपजीव्यतया व्यभिचारस्य नाभासत्वं किन्तु व्याप्तिधीविरोधित्वेन तद्घोपाधित्वज्ञानस्य नास्तीत्यसौ नाभास इति मूलाभिप्रायं प्रकाशयन्नाह व्यभिचाराज्ञानस्येति । ननूपाधिधर्मिकसाध्यव्यापकत्वादिज्ञानस्य भिन्नधर्मिकतया हेतौ व्याप्तिग्रहविरोधित्वेपि हेतुधर्मिकसोपाधित्वज्ञानस्य व्याप्तिधीविरोधित्वसम्भवान्न ह्यन्यस्येत्यादिमूलमयुक्तमतस्तदपि दूषयति सोपाधित्वेति । न व्याप्तीति । न साक्षाद्व्याप्तिधीविरोधीत्यर्थः । विरोध्यविषयत्वात् । विरोधिविषयताशून्यत्वादित्यर्थः । ननु परस्परविरोधिन एव सोपाधित्वस्य कुतो नाभासत्वमत आह वक्ष्यति हीति । न चानौपाधिकत्व इत्यादिमूलस्य हेत्वनभिधानान्यूनतामपाकर्तुमाह निरुपाधित्वस्येति । तथात्वेपि । निरुपाधित्वधियो व्याप्तिग्राहकत्वेपि । आभासत्वायोगादिति । अनुमितौ तत्कारणप-

प्रतियोग्यवृत्तित्वविशेषिततद्घटितलक्षणस्य संयोगादिसाध्यक-व्यभिचारिण्यतिव्याप्तिः। संयोगान्योन्याभावस्य केवलान्वयित्वात्। अथ व्याप्यवृत्तिसाध्यके स्वव्यापकसाध्यसामानाधिकर-

---

रामर्शे वा तस्याविरोधित्वादिति भावः। तद्घटितेति। हेतुमन्निष्ठाभावघटितेत्यर्थः। केवलान्वयित्वादिति। तथा च तस्य प्रतियोगिवृत्तित्वाद्धेतुसमानाधिकरणो यः प्रतियोग्यवृत्तिर्घटाद्यन्योन्याभावस्तत्प्रतियोगितानवच्छेदकमेव साध्यत्वमतः संयोगि सत्त्वादित्यत्राऽतिव्याप्तिरिति भावः। यद्यपि प्रागुक्तक्रमेण हेतुसमानाधिकरणस्य द्रव्यभेदस्यैव पारिभाषिकप्रतियोगितावच्छेदकं संयोगवत्त्वमतो नातिप्रसङ्गस्तथापि यत्रासद्धेतुविशेषे साध्यताच्छेदकं न प्रतियोगितावच्छेदकं तत्रैव पारिभाषिकावच्छेदकानुप्रवेशो न सर्वत्रेत्यभिप्रेत्य गुरुधर्मस्यापि वा प्रतियोगितावच्छेदकत्वमाहत्येदमुक्तम्। इदन्तु चिन्त्यते। स्वप्रतियोगित्वावच्छिन्नभिन्नं यद्धेत्वधिकरणं तन्निष्ठान्योन्याभावेत्युक्तौ न कोपि दोषः वृक्षे संयोगिभेदसत्त्वेपि तत्प्रतियोगित्वावच्छिन्नभेदविरहादेव संयोगी तत्त्वादित्यादावव्याप्तिविरहाद्वृक्षः संयोगिभेदप्रतियोगी नेत्यप्रत्ययात् प्रतियोगिभेदेपि लाघवेन प्रतियोगित्वस्यैक्यात् सत्त्ववति गुणादौ च संयोगिभेदप्रतियोगितावच्छिन्नस्यापि भेदसत्त्वात्संयोगी सत्त्वादित्यादावतिव्याप्तेरनवकाशात्, अस्तु वा यद्यत्स्वप्रतियोगि तत्तद्व्यक्तित्वावच्छिन्नभेदकूटवद्धेत्वधिकरणवृत्तिरन्योन्याभावो व्याप्तिघटकस्तथापि न क्षतिः संयोगिभेदप्रतियोगितद्वृक्षव्यक्तेरेव भेदस्य तद्वृक्षे विरहेण संयोगी तत्त्वादित्यादावव्याप्तिव्युदासादिति। साध्यादिभेदेन व्याप्तिभेदस्याघट्यकत्वात्सर्वत्रैकनिरुक्त्यभावेपि न क्षतिरित्याशयेन शङ्कते अथेति। स्वव्यापकेति हेतुमन्निष्ठान्योन्याभावप्रतियोगितानवच्छेदकीभूतसाध्यसामानाधिकरण्यमित्यर्थः। स्वव्यापकेतिस्वं प्रकृतसाध्यं-तद्व्यापकतावच्छेदकं तद्धेतुमन्निष्ठान्योन्याभावप्रतियोगितावच्छेदकतानवच्छेदकं यद्रूपमधिकरणतानिरूपकतावच्छेदको धर्मस्तदवच्छिन्नात्यन्ताभावासामानाधिकरण्यमित्यर्थः। तेन नान्योन्याभावगर्भत्वहा-

ण्यमेव व्याप्तिः अव्याप्यवृत्तिसंयोगादिसाध्यके तु स्वव्यापकता-वच्छेदकरूपावच्छिन्नप्रतियोगिताकात्यन्ताभावेन तादृशरूपाविशिष्टा-वच्छिन्नप्रतियोगिताकान्योन्याभावेन वा सममसामानाधिकरण्य-मिति चेत् । स्मृतिसंस्कारजन्यज्ञानविषयत्वादिकेवलान्वयिसा-

---

निः । गगनत्वादेर्निरुक्तव्यापकतावच्छेदकत्वेऽप्यधिकरणतानिरूपक-तावच्छेदकत्वविरहात्तद्रूपपदेनैव वारणमतस्तदवच्छिन्नाभावसामा-नाधिकरण्यस्य धूमादौ सत्त्वेऽपि वह्निमान् धूमादित्यादौ नाव्याप्तिः । उक्तापेक्षया लाघवादाह तादृशरूपविशिष्टेति । साध्यव्यापकता-वच्छेदकरूपावच्छिन्नेत्यर्थः । तथा च साध्यवन्निष्ठान्योन्याभा-वप्रतियोगितानवच्छेदकरूपावच्छिन्नान्योन्याभावासामानाधिकरण्यं फलितम् । न च तादृशपृथिव्याद्यन्योन्याभाववति कालिकसम्बन्धेन धूमादेः सत्त्वाद्वह्निमान् धूमादित्याद्यव्याप्तिः हेतुतावच्छेदकसम्बन्धेन वृत्तित्वे तु सत्तावान् द्रव्यत्वादित्यादावव्याप्तिः सदन्यसमवेतत्वा-प्रसिद्धेरिति वाच्यम्।तादृशरूपावच्छिन्नान्योन्याभावाधिकरणावृत्त्य-धिकरणताकत्वस्य विवक्षितत्वादत एव विशिष्टसत्ताद्रव्यान्यवृ-त्तित्वेऽपि द्रव्यं विशिष्टसत्त्वादित्यादौ नाव्याप्तिः । विशिष्टनि-रूपिताधिकरणत्वस्य द्रव्यान्यवृत्तित्वाभावात् । संयोगी सत्त्वादि-त्यादौ तादृशसाध्यव्यापकतावच्छेदकीभूतद्रव्यत्वावच्छिन्नान्यो-न्याभाववदवृत्तित्वस्यैव सत्ताधिकरणतायां सत्त्वान्नातिप्रसङ्ग इति भावः । स्मृतीत्यादि । स्मृतिविषयत्वं संस्काराविषयत्वं जन्यज्ञानविषयत्वञ्च केवलान्वय्यपि महाप्रलयावच्छेदेन पर-माण्वादावसत्त्वादव्याप्यवृत्त्येव प्रलये परमाण्वादिर्न स्मर्य्यत इत्यादिव्यवहारात् । तथा च तत्तत्साध्यकद्रव्यत्वादिहेतावव्याप्य-वृत्तिसाध्यकस्थलीयलक्षणयोरव्याप्तिः । प्रथमेऽभावत्वादेरेव साध्य-व्यापकतावच्छेदकतया तदवच्छिन्नात्यन्ताभावाप्रसिद्धेः द्वितीये चाभावत्वादेरेव निरुक्तसाध्यव्यापकतावच्छेदकत्वावच्छिन्नान्यो-न्याभावाप्रसिद्धेरिति भावः।उद्बोधकनियम्यायाः स्मृतेः सार्वत्रिकत्वे मानाभावात्संस्काराविषयत्वोपादानम् । नियमतोपेक्षाग्रहविषयत्वे-

ध्यकेषु का गतिः । अथ स्वाधिकरणयत्किञ्चिद्व्यक्तिवृत्तिधर्मा-
नवच्छिन्नप्रतियोगिताकान्योन्याभावप्रतियोगितानवच्छेदकसाध्यव-

न संस्काराविषयस्यापि वस्तुनः सम्भवित्वाज्जन्यज्ञानविषयत्वानु-
धावनम् । सर्वदैव सर्वत्र नित्यज्ञानविषयतासत्त्वाद्द्रव्याप्यवृत्तित्व-
सम्पत्तये जन्यपदम् । कागतिः कथमव्याप्त्युद्धारः । स्वाधिकर-
णेति । स्वं हेतुः । संयोगि सत्त्वादित्यादौ संयोगवत्त्वस्यापि साध-
नाधिकरणद्रव्यवृत्तित्वात्तदवच्छिन्नभेदमादायातिव्याप्तिवारणं न
स्यादतो यत्किञ्चिदिति । तथा च संयोगवत्त्वावच्छिन्नभेदस्यापि सा-
धनवद्गुणवृत्तिधर्मानवच्छिन्नप्रतियोगिताकत्वात्तत्प्रतियोगितावच्छे-
दकमेव साध्यमतो नातिप्रसङ्गः । न च यत्किञ्चित्त्वस्यैकस्याभावा-
त्साधनाधिकरणद्रव्यमन्तर्भाव्यातिव्याप्तिरेवस्थ्यम् । संयोगिभे-
दस्य साधनाधिकरणैकव्यक्तिवृत्तिधर्मावच्छिन्नप्रतियोगिताकत्वेपि
तादृशव्यक्त्यन्तरवृत्तिधर्मानवच्छिन्नप्रतियोगिताकत्वे बाधकाभावा-
त् । साधनाधिकरणतत्तद्व्यक्तिवृत्तिधर्मानवच्छिन्नप्रतियोगिताका-
न्योन्याभावप्रतियोगितावच्छेदकत्वाभावकूटवत्त्वस्यैव निवेष्टत्वाद-
दोषः इति कश्चित् । साधनाधिकरणयत्किञ्चिद्व्यक्त्यवृत्तिध-
र्मावच्छिन्नप्रतियोगिताकत्वोक्तौ संयोगी वृक्षत्वादित्यत्राव्याप्तिः । संयोगवत्त्वावच्छिन्नभेदस्य वृक्षावृत्तिसंयोगेनाप्यव-
च्छिन्नप्रतियोगिताकत्वादतस्तत्परित्यागः । यद्यपि चैवमपि रूपाभाववान् घटत्वादित्यत्राव्याप्तिः, रूपसामान्याभावत्वाव-
च्छिन्नान्योन्याभावात्मकस्य रूपस्यैव समवेतसामान्याभाववत्त्वाव-
च्छिन्नप्रतियोगिताकतया साधनवदवृत्तिधर्मानवच्छिन्नप्रतियो-
गिताकत्वात् । तथापि स्वाधिकरणयत्किञ्चिद्व्यक्तिवृत्तिध-
र्मानवच्छिन्नं यदन्योन्याभावप्रतियोगित्वं तदनवच्छेदकसाध्यवत्त्वे
तात्पर्यम् । साध्यवत्त्वं चात्र [साध्यतावच्छेदकावच्छिन्नाधिकर-
णभेदेपि अभिन्नमेवेति मतेनेदम्, अन्यथा वह्नित्वावच्छिन्नाधिकर-
णत्वस्य प्रतिव्यक्ति भिन्नत्वे तादृशान्योन्याभावप्रतियोगितावच्छे-
दकताभ्रौव्याद्वह्निमान्धूमादित्यादावव्याप्त्यापत्तेः । वस्तुतः] साध्य-
तावच्छेदकधर्मावच्छिन्नसाध्यमात्रं न तु तदवच्छिन्नाधिकरणत्वम्,

त्त्वकत्वम्, यद्धर्मविशिष्टयत्किञ्चिदधिकरणवृत्तिधर्मानवच्छिन्नप्रतियोगिताकान्योन्याभावप्रतियोगितानवच्छेदकसाध्यवत्त्वकत्वे सति तद्धर्मविशिष्टत्वं वा सेति चेत् । अत्र किं यथा कथञ्चित्सम्बन्धेन तदधिकरणवृत्तित्वं विवक्षितं साध्यतावच्छेदकसम्बन्धेन वा, आद्ये गुणः स्पन्दत्वादित्यत्रातिव्याप्तिः, गुणत्वस्य स्वरूपसम्बन्धेन स्पन्दवृत्तितया तद्वत्त्वस्य स्पन्दनिष्ठतादृशान्योन्याभावप्रतियोगितानवच्छेदकत्वात् । द्वितीये समवायेन जातेः साध्यत्वे मेयत्वादावतिव्याप्तिः, जातिमन्मेयव्यक्तिनिष्ठतादृशान्योन्याभावप्रतियोगितायां जातिमत्त्वेनाऽनवच्छेदाज्जातिशून्यमेयव्यक्तौ समवायेन वर्त्तमानस्याऽप्रसिद्धत्वात् । एतेन ग्रहो व्याख्यातः ।

तथा सति दैशिकविशेषणतया हेत्वधिकरणवृत्तित्वनिवेशस्यैव निर्दोषत्वेन वक्ष्यमाणातिव्याप्त्यसङ्गत्यापत्तेरिति ध्येयम् । [न च कालो घटवान् महाकालत्वादित्यादौ तादृशान्योन्याभावाप्रसिद्धिरिति वाच्यम् । विषयितादिसम्बन्धेनावृत्तिगगनादिमतो भेदस्यैव तथात्वादिति भावः ।] नन्विदं संयोगि विशिष्टसत्त्वादित्यादावव्याप्तिः संयोगवत्त्वावच्छिन्नभेदस्य साधनीभूतसत्ताधिकरणभूतगुणवृत्तिधर्मानवच्छिन्नप्रतियोगिताकत्वादत आह तद्धर्मविशिष्टेति । प्रकृतहेतुतावच्छेदकविशिष्टेत्यर्थः। निरुक्तसाध्यवत्त्वकत्वं रासभादिसाधारणमत उक्तं तद्धर्मविशिष्टेति । स्वरूपसम्बन्धेनेति । कालिकसम्बन्धेनेत्यर्थः । तादृशेति । हेत्वधिकरणयत्किञ्चिद्विद्यमानस्पन्दवृत्तिधर्मानवच्छिन्नप्रतियोगिताको यश्चिरातीतघटादिभेदस्तत्प्रतियोगितानवच्छेदकत्वादित्यर्थः । जातिमत्त्वेनेति । तथा च हेत्वधिकरणं यद्घटादिकं तत्समवेतानवच्छिन्नप्रतियोगिताकस्य पटादिभेदस्य प्रतियोगितानवच्छेदकमेवजातिमत्त्वमित्यतिव्याप्तिरिति भावः [ननु साधनवति सामान्यादौ जातिमत्त्वावच्छिन्नभेदसत्त्वान्नातिव्याप्तिरत आह जातिशून्य इति । तथा च सामान्यादौ समवेतत्वाप्रसिद्धयैव तादृशसाधना-

एवं तथात्वेऽत्यन्ताभावगर्भमपि दुर्वचम् । तथा हि, प्रतियोग्यनधिकरणीभूतहेत्वधिकरणनिष्ठात्यन्ताभावेत्यादिगर्भमव्यापकमेव संयोगादिसाध्यकद्रव्यत्वादौ, स्वाधिकरणीभूतयत्किञ्चिद्वृत्त्यवृत्तिप्रतियोगिकात्यन्ताभावप्रतियोगितानवच्छेदकसाध्यतावच्छेदकावच्छिन्नसमानाधिकरणहेतुत्वमित्यत्रापि पूर्ववत् गुणः स्पन्दत्वात् जातिमान्मेयत्वादित्यत्रातिव्याप्तिः, एवं स्वप्रतियोगिनिष्ठाधेयत्वानिरूपकहेत्वधिकरणवृत्त्यत्यन्ताभावप्रतियोगितानवच्छेदकसाध्यतावच्छेदकावच्छिन्नसमानाधिकरणहेतुत्वमित्यत्रापि उत्पत्तिकाला-

---

धिकरणं न लक्षणघटकमिति भावः।] एतेनेति । व्याख्यातो द्रव्यत्वेन] तथा च ग्राह्याप्रसिद्धया ग्रहस्य प्रमात्वं कुत्रापि न स्यादिति भावः । तथात्वे । अन्योन्याभावस्याप्यव्याप्यवृत्तित्वे। अव्यापकमेवेति । संयोगवत्त्वावच्छिन्नभेदस्याप्युत्पत्तिकालावच्छेदेन घटादौ सत्त्वादिति भावः। प्रतियोग्यधिकरणं यद्यत्तत्तद्व्यक्तित्वावच्छिन्नभेदकूटत्वेन हेत्वधिकरणस्य प्रवेशे तु नैष दोष इत्यवधेयम् । स्वाधिकरणेत्यादि । प्रकृतहेत्वधिकरणयत्किञ्चिन्निष्ठाधिकरणतानिरूपकतावच्छेदकधर्मानवच्छिन्नं यदत्यन्ताभावप्रतियोगित्वं तदनवच्छेदकीभूतसाध्यतावच्छेदकधर्मावच्छिन्नसामानाधिकरण्यमित्यर्थः। तेन सत्ताया गुणावृत्तित्वेपि विशिष्टसत्तावाञ्जातेरित्यादौ नातिव्याप्तिर्न वा प्रागुक्तरीत्या रूपसामान्याभाववान् घटत्वादित्यादावव्याप्तिः । पूर्ववदिति । सामान्येन हेत्वधिकरणवृत्तित्वस्योक्तौ गुणः स्पन्दत्वादित्यत्र साध्यतावच्छेदकसम्बन्धेन तथात्वोक्तौ च जातिमान् मेयत्वादित्यत्रातिव्याप्तिरिति भावः।स्वप्रतियोगीति । स्वावच्छेदकधर्मावच्छिन्नाधेयत्वानिरूपकहेत्वधिकरणनिष्ठाभावीयं यत्प्रतियोगित्वं तदनवच्छेदकमित्यर्थः । तेन विशिष्टसत्ताभाववाञ्जातेरित्यादौ नातिव्याप्तिः।आधेयत्वञ्च साध्यतावच्छेदकसम्बन्धावच्छिन्नं ग्राह्यम्।नातो गुणः स्पन्दत्वादित्यादावतिव्याप्तिः।जन्यानामिति।संयोगनिष्ठाधेयत्वानिरूपकत्वोपगमे इत्यन्वयः । द्रव्यत्वस्य हेतुतास्थले

तल्लक्षणम् । नन्वेवमुपाधिरसिद्ध्युपजीव्यत्वेन व्यभिचारवत् हेत्वाभासान्तरं स्यात् न तु व्याप्त्यभावत्वेनासिद्धिरिति चेत् । तज्ज्ञानमुपजीव्यमपि नस्वतो दूषकम्, नाऽन्यस्य साध्यव्यापकत्वसाधनाव्यापकत्वज्ञानमन्यस्य साध्यव्याप्यत्वज्ञाने प्रतिबन्धकम्, अतिप्रसक्तेः।

वच्छेदेन जन्यानां द्रव्याणामजन्यानाञ्च प्रलयावच्छेदेन वा संयोगनिष्ठाधेयत्वानिरूपकत्वोपगमे संयोगसाध्यकद्रव्यत्वे कालपरिमाणे च हेतावव्याप्तिः । कृतं पल्लवितेन ।

अत्र वदन्ति । साध्यसमानाधिकरणतत्सम्बन्धावच्छिन्नाभावप्रतियोगितानवच्छेदकत्वव्यापकस्वसमानाधिकरणतत्सम्बन्धावच्छिन्नाभावप्रतियोगितानवच्छेदकत्वकत्वम्, स्वसमानाधिकरणतत्सम्बन्धावच्छिन्नाभावप्रतियोगितावच्छेदकत्वव्यापकसाध्यसमा-

---

उत्पत्तिप्रलयोभयावच्छेदैव हेतुमतः साध्यनिष्ठाधेयत्वानिरूपकत्वं सम्भवत्यतो यादृशहेतुनाश्रये प्रलयावच्छेदेनैव तद्वतः साध्यनिष्ठाधेयत्वानिरूपकत्वं तदुदाहरति । कालपरिमाणेति । संयोगसाध्यक इत्यनुषज्यते । यावत्साध्यव्यापकसाधनव्यापकत्वरूपानौपाधिकत्वव्याप्तिं निष्कृष्य सिद्धान्तयति साध्यसमानाधिकरणेत्यादिना । अत्र प्रतिपदव्यावृत्तिर्व्याप्तिवाद एव प्रागुक्ता । अनवच्छेदकत्वेत्यत्राभावद्वयप्रवेशे गौरवादाह स्वसमानाधिकरणेत्यादि । तत्सम्बन्धावच्छिन्नेत्यादेरप्रवेशे लाघवादाह स्वसमानाधिकरणा सर्व इत्यादि । यद्धर्मावच्छिन्नसामानाधिकरण्यत्वं हेतुसामानाधिकरण्यवन्निष्ठात्यन्ताभावप्रतियोगितानवच्छेदकं तद्धर्मा-

व्यभिचाराज्ञानस्य तद्धेतुत्वात् तद्धीस्तथा, न चानौपाधिकत्वज्ञानं व्याप्तिज्ञाने हेतुरित्युक्तम्। तथा च व्यभिचारज्ञानद्वारा स दूषकः। एवञ्च परमुखनिरीक्षकतया सिद्धसाधनवन्न पृथक्। न चैवमव्यभिचारस्य व्याप्तित्वे व्यभिचारस्तदभावत्वेनासिद्धिः स्यादिति वाच्यम्। सा-

---

नाधिकरणतत्सम्बन्धावच्छिन्नाभावप्रतियोगितावच्छेदकत्वकत्वं वा, स्वसमानाधिकरणाः सर्वे यद्धर्मावच्छिन्नसमानाधिकरणास्तद्धर्मावलीढसामानाधिकरण्यम्, साध्यसामानाधिकरण्याभावव्यापकता-

---

वच्छिन्नसामानाधिकरण्यमित्यर्थः। व्यापकत्वं विना यावत्त्वस्य दुर्वचत्वादिति ध्येयम्। अत्र सामानाधिकरण्यस्याव्याप्यवृत्तितायाः प्रामाणिकत्वे धूमादिसमानाधिकरणस्य घटाभावादेर्वह्न्याद्यनधिकरणदेशावच्छेदेन वन्हित्वाद्यवच्छिन्नसामानाधिकरण्यविरहाद्वन्हिमान् धूमादित्यादावव्याप्तिः। न च हेतुसमानाधिकरणत्वं निरवच्छिन्नविशेषणतया वाच्यमतो नोक्तदोषः, साधनीभूतधूमाद्यधिकरणावच्छेदेनैव वस्तूनां तत्सामानाधिकरण्यवत्त्वेन निरवच्छिन्नविशेषणतया धूमसामानाधिकरण्यस्यैवाप्रसिद्धेरतो गुर्वपि लक्षणान्तरमाह साध्यसामानाधिकरण्याभावेति। अत्र व्यापकतावच्छेदकं साध्यसामाधिकरण्याभावत्वं निरवच्छिन्नविशेषणताविशेषेण ग्राह्यम्। तेन घटाद्यभावस्य वन्ह्यनधिकरणदेशावच्छेदेन वन्ह्यादिसामानाधिकरण्याभाववत्त्वेपि वान्हिमान् धूमादित्यादौ नाव्याप्तिः। धूमवान् वन्हेरित्यादौ निरवच्छिन्नविशेषणतया साध्यसामानाधिकरण्याभावस्याश्रये तन्तायःपिण्डत्वादौ तत्प्रकारकप्रमाविषयत्वादौ वा हेतुसामानाधिकरण्यस्याभावविरहान्नातिव्याप्तिरिति ध्येयम्। साध्यतेति। तेन घटत्ववान् मेयत्वादित्यादौ कालिकसम्बन्धेन यत्साध्यस्याधिक-

ध्याभाववद्वृत्तित्वं हि व्यभिचारः तदभावश्च नाव्यभिचारः, केवलान्वयिन्यभावात् । किन्तु स्वसमानाधिकरणात्यन्ताभावाप्रतियोगिसामानाधिकरण्यम् । न चानयोः परस्परविरहत्वमिति ॥

वच्छेदकस्वसामानाधिकरण्यसामान्याभावत्वकत्वं वा व्याप्तिः । अत्र च साध्यतावच्छेदकसम्बन्धेन साध्याधिकरणं हेतुतावच्छेदकसम्बन्धेन हेत्वधिकरणं तदवृत्तिद्वयञ्च एकेन सम्बन्धेन विशेषणताविशेषेण वा बोध्यमिति ॥

रणं तदवृत्तिरवृत्तिरेवेति तत्र मेयत्वस्य सामानाधिकरण्याभाववत्त्वान्नातिव्याप्तिरिति । हेतुतेति । तेन रूपवान् घटत्वादित्यादौ साध्यसमानाधिकरणस्य महाकालत्वादेः कालिकसम्बन्धेन यद्घटत्वाद्यधिकरणं तदवृत्तित्वेपि नाव्याप्तिः । ननु द्रव्यं सत्त्वादित्यादावतिव्याप्तिः साध्यवत्कालवृत्तित्वाभावस्यावृत्तिगगनादेरेव सत्त्वेन तत्र हेतुसामानाधिकरण्यस्यापि सत्त्वात् । न च दैशिकविशेषणतासम्बन्धेनैव साध्यवदवृत्तित्वं निवेश्यमिति नोक्तदोषः । तथा सति तादृशवृत्तित्वाभाववति पर्वतत्वादौ समवायादिना हेतुमदवृत्तित्वस्य सत्त्वेन वन्हिमान् धूमादित्यादावव्याप्त्यापत्तेरत आह वृत्तिद्वयञ्चेति । साध्याधिकरणवृत्तित्वं हेत्वधिकरणवृत्तित्वञ्चेत्यर्थः । एकेति । यत्सम्बन्धावच्छिन्नसाध्यवदवृत्तित्वं लक्षणघटकं तत्सम्बन्धावच्छिन्नमेव हेतुमदवृत्तित्वं निवेश्यमित्यर्थः । यत्तदर्थयोरननुगतत्वात्समवायेन तादृशवृत्तिद्वयस्याभावमादाय सत्तावान् मेयत्वादित्यादावतिव्याप्तेराह विशेषणतेति ।

इति श्रीजगदीशभट्टाचार्यविरचितो व्याप्त्यनुगमग्रन्थः समाप्तः ।

चिन्तामणेः सामान्यलक्षणा ।

व्याप्तिग्रहश्च सामान्यलक्षणाप्रत्यासत्त्या सकलधू-
मादिविषयकः । कथमन्यथा पर्वतीयधूमे व्याप्त्यग्रहे त-

दीधित्याः सामान्यलक्षणा ।

प्रसङ्गात् सामान्यलक्षणां व्यवस्थापयितुमाह व्याप्तिग्रह-
श्चेति । के चित्तु समानाधिकरणयोरेव व्याप्तिरिति पक्षे पर्वतीय-
धूमे वन्हिव्याप्तिविशिष्टधीर्न पर्वतीयवन्हिव्याप्तिग्रहं विना स च
न सामान्यलक्षणां विनेति कथितव्याप्तिविशिष्टेत्यादिलक्षणोपो-
द्घातोऽपीत्याहुः । अत्र च सामान्यं लक्षणं स्वरूपं यस्या इत्यर्थे

जागदीश्याः सामान्यलक्षणा ।

व्यवस्थापयितुमित्यस्य सन्निकर्षत्वेनेत्यादिः । तेन ज्ञातसा-
मान्यस्य सामान्यज्ञानस्य वा सर्वसमानत्वान्नाऽसङ्गतिः । समाना-
धिकरणवृत्तिधूमत्वादेर्व्याप्तित्वे धूमान्तरे गृहीतस्य तस्यैवोपनीतत-
या पर्वतीयवन्हेरग्रहेपि तदीयधूमे परामर्शसम्भवादाह सामाना-
धिकरण्ययोरेवेति । पक्षे । मते । स चेति । पर्वतीयवन्हिव्याप्तिग्रह-
श्चेत्यर्थः । लक्षणस्येत्यस्याऽनुमितीत्यादिः । उपोद्घात इति । व्या-
प्तिग्रहस्य प्रकृतस्य सिद्ध्यर्थं चिन्तनीयादित्यर्थः । अपिना प्रसङ्गस्या-
पि तथात्वं सूच्यते । व्यापकसामानाधिकरण्यमात्रं रासभादिसा-

स्मादनुमितिः । सा चेन्द्रियसम्बद्धविशेषणताऽतिरिक्तैव

सामान्यमेव प्रत्यासत्तिः, सामान्यं लक्षणं निरूपकं यस्या इत्यर्थे तु तज्ज्ञानम् । तत्राद्यमाह सा चेन्द्रियेति । इन्द्रियेण सम्बद्धं धूमादि तस्य विशेषणं तद्विशेष्यकज्ञानप्रकारो धूमत्वादिरित्यर्थः । विशेषणतेत्यत्र भावार्थो न विवक्षितः । तत्र विशेषणत्वं यस्या

धारणतया न व्याप्तिः, साधननिष्ठस्य तादृशसामानाधिकरण्यस्य व्याप्तित्वे विशिष्टसत्त्वव्यापकद्रव्यत्वसामानाधिकरण्यवतः सत्त्वमात्रस्य गुणादौ परामर्शात्तत्र द्रव्यत्वानुमित्यापत्तिः, किञ्च अस्तु समानाधिकरणयोरेव व्याप्तिः तथापि द्रव्यत्वादिहेतुकसत्त्वादिसाध्यकानुमिति प्रति व्याप्तिविशिष्टेत्यादिलक्षणेन सङ्गृह्य तदवृत्तिजातिमत्त्वस्य वन्ह्याद्यनुमित्यादावपि नेतव्यत्वान्नोपोद्घातः सम्भवतीत्यस्वरसः केचिदित्युक्ता सूचितः । विशेषणतारूपाया अतिरिक्तरूपायाश्च द्विविधायाः प्रत्यासत्तेर्मूलकृताऽभिधानादुभयत्रैव सामान्यलक्षणाशब्दं व्युत्पादयति अत्र चेति । यद्यपि सामान्यं च तल्लक्षणं चेति कर्मधारयस्यैव सम्यक्त्वे बहुव्रीहिरनुचितः, तथापि कर्मधारये लक्षणपदस्याऽनुपसर्जनत्वे सामान्यलक्षणा प्रत्यासत्तिरिति प्रयोगो न स्यात् प्रत्युत सामान्यलक्षणं प्रत्यासत्तिरित्येव स्यात् लक्षणशब्दस्याऽजहल्लिङ्गत्वादतो बहुव्रीहिराहृत इति भावः । निरूपकमिति । विषयतया निरूपकमित्यर्थः । के चित्तु ननु ज्ञातसामान्यं सामान्यज्ञानं वास्तु सामान्यलक्षणा तस्यास्तु प्रत्यासत्तित्वं कुतः षोढा गणितप्रत्यासत्त्यनन्तर्गतत्वादत उक्तं सा चेति । तथा च तस्या विशेषणतायामेव निवेशात् न गणितानन्तर्भाव इति षड्विधगणनस्य लौकिकप्रत्यासत्तिपरतया सामान्यलक्षणायास्तदनन्तर्भावोऽपि न क्षतिरित्याशयेनोक्तमतिरिक्तैव चेति । गणितषड्विधप्रत्यासत्त्यतिरिक्तैव चेति तदर्थ इति मूलं व्याचक्रुः । नन्वीन्द्रियसम्बद्धविशेषणत्वं यदीन्द्रियसम्बद्धवृत्तित्वं तदा धूमत्वस्येन्द्रिय-

वा। तद्विशेष्यकप्रत्यक्षे तदिन्द्रियसन्निकर्षस्य हेतुत्वेना-
ऽनागतादौ संयोगादेरभावादिति वदन्ति। तदपरे न म-

इति बहुव्रीहिर्वा। सम्बद्धपदस्यैव वा परम्परासम्बन्धस्तत्सम्ब-
न्धविशेष्यकज्ञानप्रकारोऽर्थः। तथा च सैव विशेषणतेत्यर्थः। अत्र
च बहिरिन्द्रियस्य लौकिकः सम्बन्धो ज्ञानस्य तदिन्द्रियजन्यत्वञ्च
नियामकम्। एवञ्चाणुत्वेन यत्किञ्चिदणूपस्थितावपि सकलाणु-

सम्बद्धवाष्पादिधर्मत्वाभावात्तादृप्येण वाष्पप्रहात्सकलधूमप्रत्यक्षं
न स्यादतो व्याचष्टे तद्विशेष्यकेति। तत्प्रकारकतदाश्रयप्रत्यक्षं प्रति
इन्द्रियसम्बद्धविशेष्यकज्ञानप्रकारतापन्नतद्रूपत्वेन हेतुत्वमित्याव-
ष्कर्तुमाह धूमत्वादिरिति। प्रकारतापर्यवसितविशेषणताया धूमत्वा-
दिसामान्यस्वरूपत्वासम्भवादाह विशेषणतेत्यत्रेति। यद्यपि भावा-
र्थस्य विवक्षायामपि न क्षतिः सन्निकृष्टधूमधर्मिकज्ञानप्रकारताप-
न्नधूमत्वादेरिव धूमत्वादिनिष्ठायाः सन्निकृष्टधर्मिकज्ञानप्रकारताया
अपि धूमत्वादिसामान्यनिष्ठप्रकारतारूपस्वाश्रयवत्त्वरूपपरम्परा-
सम्बन्धेन धूमत्वादिप्रकारकधूमत्वाद्याश्रयप्रत्यक्षं प्रति हेतुत्वस्य
सुवचत्वात्तथापि सामान्यस्य हि प्रत्यासत्तित्वं लाघवान्न तु सामा-
न्यतया ज्ञानस्येत्यादिमूलग्रन्थमनुरुध्यैव भावप्रत्ययस्यार्थः परित्य-
क्त इति ध्येयम्। ननु भावार्थविवक्षायां सा चेत्यत्रेत सार्द्धमिन्द्रिय-
सम्बद्धविशेषणपदार्थस्याभेदान्वयो न स्यात्तन्नियामकस्य समान-
विभक्तिकत्वादेस्तत्रासत्त्वात्, सुरूपा देवतेत्यादिवत्कथं चित्समर्थ-
नेपि भावप्रत्ययस्य वैय्यर्थ्यापत्तिरेवेत्यत आह तत्र विशेषणत्वमि-
ति। व्यधिकरणबहुव्रीहेः सर्वत्र व्युत्पन्नैरस्वीकारादाह सम्बद्ध-
पदस्यैव वेति। नन्विन्द्रियसम्बद्धविशेषणत्वं यस्या इति बहुव्रीहौ
तादृशसंस्कारादिप्रकारतामादायातिप्रसङ्गः प्रकारतार्थकस्य विशेष-
णताशब्दस्य ज्ञानप्रकारतापरतायामाधुनिकलक्षणापत्तिरित्यत आह

गोचरो मानसो बोध इति वदन्ति। एतेन धूलीपटले धूमभ्रमे

सम्बद्धपदस्येत्यपि वदन्ति। अत्र चेति। इन्द्रियसम्बद्धविशेष्यक-ज्ञानप्रकारीभूतसामान्यमित्यत्र चेत्यर्थः। तत्तदिन्द्रियजन्यत्वमिति। तत्तदिन्द्रियप्रयोज्यं चाक्षुषत्वादिवैजात्यमित्यर्थः। यथाश्रुते चक्षु-र्जन्यज्ञानत्वादेः कारणतावच्छेदकत्वे गौरवापत्तेरिति ध्येयम्। नि-यामकम्। कारणतावच्छेदकतया प्रयोजकम्। तथा च तत्पुरुषी-यधूमत्वप्रकारकचाक्षुषत्वावच्छिन्नं प्रति तत्पुरुषीयचक्षुःसन्निकृष्ट-धर्मिकतत्पुरुषीयचाक्षुषप्रकारतापन्नधूमत्वं हेतुः। तत्र तु कार्यस्या-लौकिकं मुख्यविशेष्यत्वं कारणस्य तु समवायः प्रत्यासत्तिः। तेन प्राथमिकधूमत्वविशिष्टचाक्षुषे धूमकालीनोयं घट इत्यादिधूमोपनी-तचाक्षुषे वा न व्यभिचारः। एवं घटत्वादिसामान्यमन्तर्भाव्यापि बोध्यम्। कारणतावच्छेदकविशिष्टस्य व्यवहितपूर्वसत्त्वापेक्षणा-च्च न कालान्तरीयचक्षुःसंयोगादिकमादायातिप्रसङ्गः। न च लौ-किकसन्निकर्षस्य नानात्वात् संयोगाद्येकतरस्य निवेशेऽन्यतो जा-यमानप्रत्यक्षस्थले व्यभिचार इति वाच्यम्। चक्षुर्निष्ठलौकिकचा-क्षुषजनकताघटकसम्बन्धत्वेन चक्षुर्लौकिकसन्निकर्षमात्रस्यैव प्रवि-ष्टत्वादिति। के चित्तु चक्षुःसंयुक्तविशेष्यकचाक्षुषाव्यवहितोत्तर-चाक्षुषत्वावच्छिन्नं प्रति तादृशचाक्षुषप्रकारतापन्नधूमत्वेन हेतुत्वं तेन चक्षुर्निष्ठतादृशजनकताया असत्त्वेपि न क्षतिरिति वदन्ति। न चैवमपि पुष्पादौ सौरभत्वभ्रमाज्जायमानस्य चाक्षुषस्य सौरभमु-ख्यविशेष्यकत्वं स्यात्, तथा च बहिरिन्द्रियाणां स्वायोग्यमुख्य-विशेष्यकज्ञानाजनकत्वनियमो भज्येतेति वाच्यम्। सामान्यभेदेन कार्यकारणभावभेदाच्चाक्षुषस्थले सौरभत्वाद्यन्तर्भावेन हेतुत्वस्यैवा-कल्पनाच्चाक्षुषस्य सौरभमुख्यविशेष्यकत्वासम्भवादेवं स्पार्शनादा-वप्यूह्यमिति संक्षेपः। बहिःपर्यन्तस्य फलमाह एवं चेति। प्रथमं सकलाणूपस्थितौ ज्ञानलक्षणैव सम्भवत्यत उक्तं यत्किञ्चिदि-ति। अणूपस्थितावपीत्यपिना घटत्वेन यत्किञ्चिद्घटोपस्थित्यादेः परिग्रहः अतो न न्यूनत्वम्। मानसो बोध इति। तथा चालौकि-कमुख्यविशेष्यतया तत्प्रकारकमानसप्रत्यक्षं प्रति ज्ञानप्रकारताप-

तत्र च वन्हिव्याप्तिग्रहे तत्राऽसता धूमत्वेन धूमेषु व्याप्त्यग्रहाद्धूमदर्शनाद्वन्ह्यनुमितिर्न स्यात् हेत्वभावेन परामर्शानुत्पादात्, किञ्च धर्मिणि दोषवशान्नयनेनाऽगृह्यमाणेन स्मरणप्रकारीभवता सामान्येन गृह्यमाणेन वा लौकिकसन्निकर्षविगमेऽपि चाक्षुषज्ञानापत्तिरिति परास्तम्। सामान्यञ्च सखण्डाखण्डभेदेन द्वेधा। सखण्डे

त्वेनैव हेतुत्वमिति भावः। वदन्तीत्यस्वरसस्तदूबीजं तु लाघवात्तत्तत्प्रकारकज्ञानत्वेन तद्विषयकज्ञानत्वेन वा तत्प्रकारकतदाश्रयप्रत्यक्षे हेतुत्वं न तु तदिन्द्रियजन्यत्वादिकं नियामकम्। इन्द्रियभेदेन कार्यकारणभावकल्पने च गौरवात्तत्तदिन्द्रियकरणकसामान्यवत्त्वबोधसामग्र्याः सहकारित्वोपगमादेवातिप्रसङ्गभङ्गादित्यादिकं नव्यमते व्यक्तीभविष्यति। एतेनेति। परास्तमित्यनेनान्वयः। एतेन। इन्द्रियसम्बद्धविशेष्यकज्ञानप्रकारतापन्नस्य प्रत्यासत्तित्वविवक्षणेन। विशेषणपदस्येन्द्रियसम्बद्धसमवेताद्यात्मकधर्मार्थकत्वे दोषमाह धूलीत्यादि। धूमदर्शनादित्यस्य पक्ष इत्यादिः। हेत्वभावेन। धूमधर्मिकव्याप्तिग्रहात्मकहेतोरभावेन। ज्ञाने तदिन्द्रियजन्यत्वस्याऽनुक्तौ दोषमाह धर्मिणीति। धर्मिणि योग्यसन्निकर्षसत्त्वे धर्मस्य चाक्षुषो दुर्निवार इत्यत उक्तं दोषवशादिति। वाष्पत्वादिभ्रमजनकदोषवशात् धूमत्वाद्यग्रहसम्भवादिति भावः। स्मरणप्रकारीभवतेत्यनेन ज्ञानप्रकारत्वमाविष्कृतम्। सामान्येनेत्यस्य चाक्षुषज्ञानापत्तिरित्यग्रेतनेन सम्बन्धः।लौकिकसम्बन्धस्यानपेक्षणे दोषमाह गृह्यमाणेन वेति। धर्मिणि नयनेन गृह्यमाणेन वा सामान्येनेत्यर्थः। न च लौकिकसन्निकर्षविगमेपि क्षणमात्रं चाक्षुषोत्पत्ताविष्टापत्तिरिति वाच्यम्। तथा सति तादृशचाक्षुषात्मकस्यैव कारणस्य सत्त्वादुत्तरोत्तरं सामान्यजन्यांयाश्चाक्षुषधारायाः प्रसङ्गादिति भावः। ननु सामान्यस्य हि प्रत्यासत्तित्वे घटशून्यत्वादिप्रत्यासत्त्या तदाश्रयप्रत्यक्षं न स्यात् घटशून्यत्वादेः सामान्यत्वाभावादत आह सामान्यं चेति। सामान्यलक्षणेत्यत्र सामान्यपदार्थश्चेत्यर्थः। सखण्डं स्वरूपतो ज्ञानप्रकारीभूताभिन्नम्। अखण्डं स्वरूपतः प्रकारीभू-

चाखण्डमेव परम्परया सम्बद्धं प्रत्यासत्तिः । येन सम्बन्धेन चेन्द्रियसम्बद्धे सामान्यं ज्ञायते तेन सम्बन्धेनाऽधिकरणानां प्रत्यासत्तिरिति । ननु यत्र नानाधिकरणप्रत्यासन्न एकव्यक्तिर्घटादिस्तत्प्रागभावादिर्वाऽनिस्यः प्रत्यासत्तिस्तत्र तदभावदशायां तथा

तम् । द्वेधेति । तथा च तत्र सामान्यपदं धर्ममात्रपरमिति भावः । ननु घटत्वप्रकारेणैकघटवत्ताप्रकारकप्रत्यक्षोत्तरं घटवत्त्वप्रत्यासत्त्या सर्वस्य घटवतः प्रत्यक्षं न स्यादिन्द्रियसम्बद्धविशेष्यकज्ञानप्रकारतापन्नघटव्यक्तेर्घटान्तरवत्यसत्त्वादत आह सखण्डे चेति। क चिदित्यादिः । तेन घटशून्यत्वादिसखण्डस्य स्वयमेव प्रत्यासत्तित्वेऽपि न क्षतिः । परम्परेति । तथा च चक्षुःसन्निकृष्टविशेष्यकचाक्षुषप्रकारतावच्छेदकीभूतघटत्वमेव घटत्वावच्छिन्नप्रकारिताकचाक्षुषं प्रति हेतुः अत्रापि कार्यस्यालौकिकमुख्यविशेष्यत्वं कारणस्य तु स्वाश्रयत्वं प्रत्यासत्तिः । न च पूर्वानुपस्थितघटान्तरस्य तादृशचाक्षुषे प्रकारत्वायोग इति वाच्यम् । घटत्वसामान्यलक्षणया सकलघटस्योपस्थितिदशायामेव तत्सम्भवात्। एवं दण्डिमत्त्वादिसामान्यस्थलेऽपि तादृशचाक्षुषप्रकारतावच्छेदकतावच्छेदकं दण्डत्वादिकमेव कारणमिति द्रष्टव्यम् । एतेन परम्परासम्बन्धेन ज्ञानस्य घटत्वादेः प्रत्यासत्तित्वे घटत्ववदित्येव फलं स्यान्न तु घटवदित्याकारकं स्वप्रकारकप्रत्यक्षं प्रत्येव सामान्यस्य हेतुत्वादिति परास्तम् । ननु चक्षुःसंयुक्तधर्मिणि चक्षुषा समवायेन गृह्यमाणस्य घटत्वादेः कालिकादिसम्बन्धेन कालादावपि सत्त्वात्तन्मुख्यविशेष्यकमपि समवायसम्बन्धावच्छिन्नघटत्वप्रकारकचाक्षुषं स्यादत आह येन चेति । प्रत्यासत्तिः प्रत्यक्षजनिका इतीति।तथा चालौकिकमुख्यविशेष्यतया समवायादिसम्बन्धावच्छिन्नघटत्वादिप्रकारकचाक्षुषं प्रति समवायसम्बन्धावच्छिन्नचाक्षुषप्रकारतापन्नघटत्वादिकं समवायेनैव हेतुरतो नातिप्रसङ्ग इति भावः । अखण्डसामान्यव्यक्त्यभिप्रायेण शङ्कते नन्विति। सामान्यतासम्पत्यर्थमाह नानाधिकरणेति । नानाधिकरणविशेष्यकप्रत्यक्षकारणेत्यर्थः । एतेनैकमात्रवृत्तिधर्मस्यापि स्वाश्रयप्रत्यक्षं प्रति

प्रत्यासत्त्या तज्ज्ञानानुदयप्रसङ्ग इति चेन्न। तत्रापि तत्तद्व्यक्ति-द्वारा प्रत्यासन्नस्य घटत्वादेरेव प्रत्यासत्तित्वात्। एतदस्वरसेनैव वा द्वितीयं पक्षमाह अतिरिक्तैवेति। अतिरिक्ता इन्द्रियसम्बद्धे तादृशसामान्यज्ञानात्मिका अतीताद्यनुरोधात्सामान्यज्ञानं प्रत्यासत्तिः।

हेतुत्वादिदं व्यर्थम्, अन्यथा तादृप्येण वस्त्वन्तरे व्याप्तिभ्रमोत्तरं तद्विशिष्टस्य पक्षधर्मताग्रहादनुमित्यनुदयापत्तेरिति परास्तम्। एकव्यक्तिरित्यनेनाखण्डत्वसूचनम्। पदार्थस्य द्वैविध्याद्भावात्मकं सामान्यमुक्त्वाऽभावात्मकं तदाह तत्प्रागभावादिर्वेति। अनित्य इति। नित्यत्वे तु कार्यकालेपि सत्त्वात्तस्य कारणत्वमव्याहतमेव स्यादिति भावः। तादृशघटादिकं नाखण्डसामान्यं किं तु सखण्डमेवेत्याशयेन सिद्धान्तयति तत्रापीति। न च तद्व्यक्तौ घटत्वाद्यग्रहेपि तद्व्यक्तिप्रकारेण तदाश्रयप्रत्यक्षोत्पत्त्या नेदं युक्तमिति वाच्यम्। जातीतरस्य किञ्चिदवच्छिन्नप्रकारतानियमेन तदघटादेः स्वरूपतः प्रकारत्वायोगात् तच्छक्तित्वस्यापि तद्व्यक्तितादात्म्यविशिष्टसमवायसम्बन्धेन घटत्वादिमत्तायामेव पर्यवसानात्। न च तथापि घटत्वादिसामान्यस्य तदानीं सत्त्वेपि तद्व्यक्तिस्वरूपस्य सम्बन्धस्याऽसत्त्वात्तद्व्यक्तिद्वारा तस्य कारणत्वं दुर्घटमिति वाच्यम्। अलौकिकमुख्यविशेष्यतासम्बन्धेन तदघटव्यक्तित्वावच्छिन्नप्रकारकचाक्षुषं प्रति चक्षुःसम्बद्धविशेष्यकचाक्षुषप्रकारतावच्छेदकीभूततद्व्यक्तित्वस्य स्वाश्रयवन्निष्ठविशेष्यतासम्बन्धेन हेतुत्वात्सर्वत्रान्ततो नित्यज्ञानीयतादृशविशेष्यतामादायैव कारणसत्त्वसम्भवादेतल्लाभार्थमेव तद्व्यक्तिद्वारेत्यत्र द्वारपदोपन्यासादिति भावः। जातीतरस्यापि स्वरूपतः प्रकारत्वोपगमे तु तत्तदनित्यघटादिव्यक्तेर्घटत्वाद्यज्ञानदशायां प्रत्यासत्तित्वं दुर्घटमेवेत्यत आह एतदिति। द्वितीयमिति। सामान्यं लक्षणं विषयताया निरूपकं यस्या इति व्युत्पत्तिलब्धं सामान्यज्ञानात्मकं पक्षमित्यर्थः। षट्पदार्थातिरिक्तस्यानुपगमात् सामान्यातिरिक्तमात्रस्य प्रत्यासत्तित्वे तु सामान्यस्याज्ञानदशायामपि तदाश्रयस्य प्रत्यक्षप्रसङ्गाद्व्याचष्टे इन्द्रियस-

म्बद्ध इति । तादृशेति । तदिन्द्रियजन्येत्यर्थः । तथा च तत्पूरुषीय-घटत्वादिप्रकारकचाक्षुषत्वावच्छिन्नं प्रति तदीयचक्षुःसन्निकृष्टवि-शेष्यकतदीयघटत्वादिप्रकारकचाक्षुषत्वेन हेतुत्वम् । अत्रापि कल्पे कार्यस्यालौकिकमुख्यविशेष्यत्वमेव प्रत्यासत्तिः कारणस्य तु स्वप्र-कारीभूतसामान्याश्रयनिष्ठविशेष्यत्वं तथेति न तत्तदनित्यव्यक्तिम-त्त्वस्यासत्त्वदशायां तया प्रत्यासत्त्या तदाश्रयस्य प्रत्यक्षानुपपत्तिः । यत्तु स्वप्रकारीभूतसामान्यवदन्यावृत्तिभेदवत्त्वमेव सर्वत्र कारण-तावटकः सम्बन्धस्तत्तदनित्यघटादेरसत्त्वदशायामपि तद्वदन्यावृत्ते-स्तत्तत्कपालान्यतरत्वरूपभेदस्य सत्त्वादिति । तन्न । स्मृतिविषय-त्वाद्यनित्यप्रत्यासत्तिस्थले तद्वदन्याप्रसिद्धेः स्मृतिविषयत्वादेः केव-लान्वयित्वादिति ध्येयम् । तत्प्रकारकतदाश्रयप्रत्यक्षे तस्य ज्ञानमा-त्रं हेतुर्न तु ज्ञानस्य तत्तदिन्द्रियजन्यत्वं तत्तदिन्द्रियसम्बद्धविशेष्य-कत्वं वा तन्त्रं चक्षुरादीन्द्रियभेदेन पुरुषाणां द्विधा निवेशेन च हे-तुत्वकल्पने गौरवात् । स्मरणाद्यात्मकसामान्यज्ञानदशायां च तदा-श्रयस्य प्रत्यक्षमन्ततो मानसात्मकमुत्पद्यत एव प्राच्यैरपि क्षणविल-म्बेन तस्योपेयत्वादित्याशयवतां नव्यानां मतमुत्थाययति अतीतेत्या-दिना । [ननु यदि लाघवानुरोधादिन्द्रियसम्बद्धविशेष्यकत्वादेः परित्यागस्तदा सामान्यस्यैव प्रत्यासत्तित्वं युक्तमिति स्वरूपतः सा-मान्यस्य हेतुत्वापेक्षया सामान्यज्ञानहेतुत्वे गौरवात् । न च घटेत-रावृत्तित्वविशिष्टसकलघटवृत्तित्वरूपघटत्वत्वादिना हेतुत्वापेक्षया घटत्वत्वाद्यघटितघटत्वज्ञानस्य हेतुत्वं लघु इति वाच्यम् । घटत्वा-दिसामान्यस्य तत्तद्व्यक्तित्वेनैव हेतुत्वसम्भवात् घटत्वाज्ञानदशायां विशेषणज्ञानविरहेणैवाऽऽपत्त्यसम्भवादित्यत आह अतीताद्यनुरो-धादिति । आदिनाऽनागतादेः परिग्रहः । इदञ्चातीतानागततत्तदनि-त्यव्यक्त्याश्रयप्रत्यक्षानुरोधादिति तदर्थः । तथा चातीतानागतसा-मान्याश्रयप्रत्यक्षे सामान्यस्य व्यभिचारेण हेतुत्वासम्भवान्न तज्ज्ञा-नस्य हेतुत्वमाहतमिति भावः] । अत्र कल्पे तत्प्रकारकप्रत्यक्षत्वा-वच्छिन्नं प्रति निर्विकल्पकादिसाधारणतद्विषयकज्ञानत्वेनैव हेतुत्वं, अत्र च कार्यस्य स्वप्रकारीभूततत्तत्सामान्याश्रयनिष्ठविशेष्यत्वं स-म्बन्धः कारणस्य तु स्वविषयीभूततत्तत्सामान्याश्रयनिष्ठविषयत्वं प्रत्यासत्तिरतो नातिप्रसङ्गः । न चैवं निर्विकल्पकोत्तरं जातस्य घट-

स्वविशिष्टप्रत्यक्षस्यापि यावद्घटविषयकत्वापत्तिः, इष्टत्वात्। सामान्यप्रकारकज्ञानत्वेन हेतुत्वोपगमेपि निर्विकल्पकतृतीयक्षणे यावद्घटावगाहिप्रत्यक्षोत्पत्त्या क्षणविलम्बस्य शपथनिर्णेतव्यत्वात्। न च तद्विषयकत्वतत्प्रकारकत्वयोः समशरीरतया तद्विषयकत्वेनैव हेतुत्वमित्यत्र विनिगमकाभावः, प्राथमिकतद्विशिष्टप्रत्यक्षे सौरभादिविशेष्यकज्ञानोत्तरं जायमाने सुरभि चन्दनमित्यादिप्रत्यक्षे च व्यभिचारादेव तत्प्रकारकज्ञानत्वेन हेतुत्वस्यासम्भवात्। न च स्वप्रकारीभूततत्तत्सामान्याश्रयनिष्ठालौकिकमुख्यविशेष्यतासम्बन्धेन तत्तत्सामान्यप्रकारकप्रत्यक्षं प्रत्येव तत्तत्सामान्यप्रकारकज्ञानत्वेन हेतुत्वं वाच्यमतो नोक्तदोषः, कार्यतावच्छेदकसम्बन्धस्य गुरुत्वापत्तेः, चन्दने सौरभमित्यादिज्ञानोत्तरं जायमानस्य सुरभि चन्दनमित्येवं सौरभाश्रयमुख्यविशेष्यकमानसप्रत्यक्षस्य सौरभप्रकारकज्ञानाजन्यत्वेन तथापि व्यभिचारतादवस्थ्याच्च। न च तद्विषयकज्ञानत्वेन हेतुत्वे घटवदित्यादौ संसर्गविधया संयोगज्ञानादपि संयोगवत्त्वेन तदाश्रयस्य प्रत्यक्षापत्तिरतस्तत्प्रकारकज्ञानत्वेनैव हेतुत्वं युक्तमिति वाच्यम्। संयोगविशिष्टबुद्धिसामान्यं प्रति सांसर्गिकान्यसंयोगाविषयताकज्ञानत्वेन हेतुतया तद्विरहादेव तत्र संयोगवादिति ज्ञानासम्भवात्। सांसर्गिकसाधारणतद्विषयताकज्ञानत्वेन तद्विशिष्टबुद्धौ हेतुतास्वीकारे तु तवापि तत्र संयोगवदित्याकारकज्ञानोत्पादेन तस्य यावत्संयोगाश्रयविषयकत्वोपगमेपि क्षत्यभावात्। वस्तुतस्तु तद्विषयकज्ञानत्वमात्रेण हेतुत्वे समवायेन घटत्वप्रकारकज्ञानात्कालिकसम्बन्धेन तदाश्रयस्य कालादेः प्रत्यक्षापत्त्या तत्सम्बन्धावच्छिन्नतत्प्रकारकतदाश्रयप्रत्यक्षं प्रति तदितरसम्बन्धानवच्छिन्नतन्निष्ठविषयताकज्ञानत्वेनैव हेतुत्वं वाच्यं न तु तत्सम्बन्धावच्छिन्नतत्प्रकारकज्ञानत्वेन, तथा सति सुरभि चन्दनमित्यादिप्रागुक्तमानसोपनीतभाने व्यभिचारभिया तत्तद्बुद्धिभिन्नत्वस्य तत्प्रकारकज्ञानाव्यवहितोत्तरत्वस्य वा कार्यतावच्छेदकानुप्रवेशे महागौरवापत्तेः। न चैकसम्बन्धेन तत्प्रकारकप्रत्यक्षदशायां सम्बन्धान्तरेण तत्प्रकारकप्रत्यक्षे यदि बाधकसम्भवस्तदोत्तरकालं सम्बन्धान्तरेण तदाश्रयस्य प्रत्यक्षे स एव प्रतिबन्धकोऽन्यथा पुनरिष्टमेव तदानीं सम्बन्धान्तरेण तदाश्रयस्य प्रत्यक्षमतस्तद्विषयकज्ञानत्वेनैव लघुना

अपेक्षणीयञ्च तदिन्द्रियकरणकतद्धर्मवत्त्वबोधसामग्र्यन्तरम् । अत एवान्धतमसे सौदामिनीसम्पातजनितेऽपि द्रव्यप्रत्यक्षे चरमं न चाक्षुषो निखिलद्रव्यसाक्षात्कारसन्तान इति तु नव्याः।इयञ्च धर्म-

---

हेतुत्वं युक्तमिति वाच्यम् । समवायेन घटत्वप्रकारकानुमित्यनन्तरं जातस्य तत्सम्बन्धेन घटत्वाश्रयप्रत्यक्षस्य सम्बन्धान्तरेण तदाश्रयविषयकत्वस्य दुर्वारतापत्तेस्तादृशानुमितिदशायां सम्बन्धान्तरेण घटत्वस्य परामर्शाद्यभावादेव तत्सम्बन्धावच्छिन्नघटत्वप्रकारकज्ञानानुत्पत्त्या तत्र बाधकस्याकल्पनादिति ध्येयम् । नन्विन्द्रियभेदेन नानाकार्यकारणभावस्य परित्यागे घटत्वप्रकारेण तदाश्रयस्य प्रत्यक्षमेव क चित्स्पार्शनं क चिच्चाक्षुषं जायत इत्यत्र किं नियामकमत आह अपेक्षणीयं चेति । धूमादौ वाष्पत्वादिभ्रमजनकदोषदशायां चक्षुःकरणकबोधसामग्रीसत्त्वेपि धूमत्वादिप्रकारकं न तदाश्रयस्य चाक्षुषं जायत इत्यतस्तद्धर्मवत्त्वबोधानुसरणम् । सामग्र्यन्तरमिति । तथा च तत्तद्विशेषसामग्रीत एव चाक्षुषस्पार्शनादिनियम इति भावः । कारणान्तरपर्यन्तापेक्षायाः प्रयोजनमाह अत एवेति । अन्धतमसम् । निविडं तमः । सौदामिनीसम्पातः । तडित्संयोगः । आलोकस्य पश्चादसत्त्वलाभाय सौदामिनीपर्यन्तानुसरणम्।चरमम् । विद्युत्सम्पातजन्यचाक्षुषोत्तरम् । द्रव्येति।द्रव्यत्वसामान्यमधिकृत्योक्तम् । अत्र दोषविशेषवशात्तमोधर्मिकस्यैव चक्षुःकरणकद्रव्यत्ववत्तावोधस्य सामग्रीसत्त्वाच्चरमं निखिलद्रव्यस्य चाक्षुषो दुर्निवार एव, परन्तूक्तस्थले घटत्वादिना घटादेश्चाक्षुषसन्तानवारणार्थमेव सामग्र्यपेक्षा वाच्येति तु विभावनीयम् । द्वित्रिचतुःसाक्षात्कारस्योपगमे क्षत्यभावादाह सन्तान इति । तथा च तादृशचाक्षुषधाराऽनुभववाधितेति भावः । अत्र केचित् । चक्षुरादीन्द्रियान्तर्भावेण सामान्यज्ञानस्य अहेतुत्वे सौरभत्वप्रकारेण यत्किञ्चित्सौरभज्ञानोत्तरं जायमानस्य सुरभि चन्दनमित्यादिचाक्षुषस्य पूर्वानुपस्थितयावत्सौरभमुख्यविशेष्यकत्वापत्तिः, सामान्यप्रत्यासत्तेरविशिष्टत्वात्, न चेष्टापत्तिर्बहिरिन्द्रियस्य स्वायोग्यमात्रनिष्ठमुख्यविशेष्यताकज्ञानाज-

नकत्वनियमात् अस्मन्मते सौरभत्वसामान्यज्ञानस्य सौरभत्वप्रकारकतदाश्रयघ्राणजत्वावच्छिन्नं प्रति तादृशमानसत्वावच्छिन्नं प्रत्येव वा विशिष्य हेतुत्वकल्पनान्न तादृशं चाक्षुषमित्याहुः। तन्न। सौरभमुख्यविशेष्यकज्ञानस्यानुमित्युपमितिशाब्दबोधघ्राणजादिस्वरूपस्यैव परमार्थिकतया तन्मुख्यविशेष्यकानुमित्यादिसामग्रीविरहादेव तदानीं तादृशज्ञानोत्पत्त्यसम्भवात् अनुमित्यादिभिन्नस्य तादृशज्ञानस्यालौकिकतयाऽऽपादयितुमशक्यत्वात्। वस्तुतो मुख्यविशेष्यत्वसम्बन्धेन सौरभत्वादिप्रकारकचाक्षुषादिकं प्रति तादात्म्येन सौरभत्वादिना गन्धत्वादिना वा प्रतिबन्धकत्वात्तन्निरासः। तादृशसम्बन्धेन तथाविधचाक्षुषं तु घटादावेव सौरभत्वस्य भ्रमरूपं सुलभम्। न च सौरभत्वप्रकारकेति व्यर्थम्। प्रमेयत्वादिसामान्यप्रत्यासत्त्या तादृप्येण सौरभमुख्यविशेष्यकचाक्षुषस्य सर्वसम्मतत्वात्। तत्र पि चक्षुर्योग्यमात्रविशेष्यकत्वोपगमे तु तन्नोपादेयम्। न चैवं घटाद्युपनीतचाक्षुषस्यापि घटादिमुख्यविशेष्यकत्वं स्यादुक्तकार्यकारणभावस्यैवापादकत्वादिष्टापत्तौ चोपनीतं विशेषणतयैव भासत इत्यस्य विरोध इति वाच्यम्। मुख्यविशेष्यतया द्रव्यचाक्षुषत्वावच्छिन्नं प्रति चक्षुरादिलौकिकसन्निकर्षाभावविशिष्टज्ञानत्वेन विषयतया प्रतिबन्धकत्वादत एव सत्यपि भूतलादिज्ञाने लौकिकसन्निकर्षदशायां तन्मुख्यविशेष्यकं लौकिकप्रत्यक्षमिति ध्येयम्। गन्धादेरचाक्षुषत्वोपपत्तये चाक्षुषादिकं प्रति तादात्म्येनावश्यं गन्धत्वादिना प्रतिबन्धकत्वं वाच्यम् तथा च तत्रैव लौकिकविषयतामात्रं न प्रतिबध्यताघटकसम्बन्धः किं तु मुख्यविशेष्यत्वनिर्विकल्पकविषयत्वयोरन्यतरदेव, सम्बन्धादेरननुगमस्य स्वरूपसम्बन्धेन हेतुतास्थले एव स्वहस्तितत्वात्।प्रकारतान्यविषयत्वं वा तादृशसम्बन्धो वाच्यः।सुरभि चन्दनमित्यादिचाक्षुषे चन्दनांशे प्रकारतैव सौरभत्वांशे विशेष्यता न त्वधिकेत्युक्तप्रतिबन्धकसद्भावादेव चाक्षुषज्ञानं न सौरभमुख्यविशेष्यकमित्यपि वदन्ति। तच्चिन्त्यम्। के चित्तु घटत्वपटत्वादीनां तद्विषयकज्ञानानां वा प्रत्यासत्तित्वे कार्यकारणभावानन्त्यप्रसङ्गात् सर्वत्र नित्यज्ञानव्यक्तिरेव प्रत्यासत्तिः तस्याश्च स्वाश्रयविशेष्यकप्रत्यक्षत्वावच्छिन्नं प्रति तद्बुद्धिव्यक्तित्वेन हेतुत्वं स्वाश्रयविषयकप्रत्यक्षहेतुत्वे तु नित्यज्ञानव्यक्तेः सर्वदा सत्त्वाद्यत्किञ्चि-

विषयकं ज्ञानं धर्मिणां प्रत्यासत्तिरितरा तु यद्विषयकं ज्ञानं तस्य। अत एव सुरभि चन्दनमित्यादौ सौरभत्वादेरपि भानमिति। ततः

त्सन्निकर्षदशायां तद्गोचरनिर्विकल्पकोत्पत्त्या तदुत्तरं सार्वज्ञ्यापत्तिरतः स्वाश्रयविशेष्यकत्वानुसरणम्। स्वाश्रयस्तु विषयतया ग्राह्यः! न च तज्ज्ञानव्यक्त्याश्रयत्वाविशेषाद्घट इत्याकारकप्रत्यक्षकाले पटत्वेन पटस्यापि प्रत्यक्षापत्तिः, पटत्वज्ञानदशायामिष्टापत्तेरन्यथा विशेषणज्ञानविरहादेव तदसम्भवात्। नापि घटत्वेन घटस्य प्रत्यक्षदशायां तादृप्येण पटादेः प्रत्यक्षापत्तिर्घटत्वप्रकारेण पटादिग्रहस्य भ्रमतया तज्जनकदोषविरहादेव तस्याप्यसम्भवात्। अन्यथा घटत्वादिसामान्यज्ञानस्य प्रत्यासत्तितायामपि द्रव्यत्वघटत्वयोरुपस्थितौ द्रव्यत्वेन पटप्रत्यक्षदशायां घटत्वेनापि पटस्य प्रत्यक्षापत्तेर्दुर्वारत्वात्, तादृशदोषसत्त्वे च तथाविधभ्रमस्येष्टत्वात्। न च विनिगमनाविरहाद्गगनाभावादीनां तत्तत्संयोगाभावव्यक्तीनां च तत्तद्व्यक्तित्वेन स्वाश्रयविशेष्यकप्रत्यक्षं प्रति हेतुतापत्तिरिति वाच्यम्। गगनाद्यभावानामन्यथासिद्धत्वात् कार्यमात्रहेतोर्नित्यज्ञानस्य स्वाश्रयप्रत्यक्षेप्यनन्यथासिद्धत्वात् गगनाद्यभावानां तादृप्येण हेतुत्वेपि लाघवसम्भवाच्च। घटत्वादिज्ञानत्वेन हेतुतायां घटत्वादिप्रकारकतदाश्रयप्रत्यक्षत्वस्य कार्यतावच्छेदकत्वे गौरवापत्तेः। सुरभि चन्दनमित्यादेः सौरभत्वाद्यविशेष्यकप्रत्यक्षस्यानुरोधादेव सौरभत्वादेर्ज्ञानलक्षणायाः स्वीकार्यत्वादित्याहुः। ननु सामान्यं यदि न प्रत्यासत्तिः किं तु तज्ज्ञानं तदा ज्ञानलक्षणया सहैतस्याः को भेद इत्यत आह इयं चेति। सामान्यलक्षणा चेत्यर्थः। इतरा। ज्ञानलक्षणा। तस्येति। प्रत्यासत्तिरित्यनुषज्यते। तथा च कार्यकारणभावभेदादेव प्रत्यासत्त्योर्भेदव्यवहार इति भावः। अत एवेति। ज्ञानलक्षणाया अतिरिक्तप्रत्यासत्तित्वस्वीकारादेव। अन्यथा यत्र सौरभत्वजात्युपस्थित्यनन्तरं सुरभिर्गन्ध इतिवत् सुरभि चन्दनमित्याकारकं सौरभत्वप्रकारेण चन्दनस्य भ्रमात्मकं चाक्षुषं तत्र सौरभत्वजातेर्भानं न स्यान्न हि तत्र सुरभिगन्धस्य भानसम्भवो येन सामान्यलक्षणायास्तत्तद्धर्मप्रकारकतदाश्रयप्रत्यक्षं प्रत्येव हेतुतया सौरभत्वप्रत्यासत्तेः

कार्यतावच्छेदकतयैव सौरभत्वजातेर्भानं भविष्यतीति सम्भावनीयम्। चक्षुषो बहिरिन्द्रियत्वेन स्वायोग्यमुख्यविशेष्यकज्ञानाजनकत्वनियमात् पूर्वानुपस्थितस्य सुरभिगन्धस्य तत्र भानासम्भवेनोक्तरीत्या तद्गतजातेरपि तत्र भानासम्भवादिति भावः। इत्यादावित्यादिपदेन भ्रमान्तरस्य तदनुव्यवसायस्य च परिग्रहः। यत्तु ज्ञानस्य तदिन्द्रियजन्यत्वं नियामकमिति पूर्वमतेनायं ग्रन्थस्तथा चाऽसौरभस्मृत्यनन्तरं जायमानायां सुरभि चन्दनमित्याकारकचाक्षुषप्रमायां सामान्यप्रत्यासत्त्या न सौरभत्वस्य भानसम्भवः कारणीभूतस्य सौरभत्वचाक्षुषस्याभावादतो ज्ञानलक्षणा पृथक् प्रत्यासत्तिरिति मतम्। ज्ञानस्य तदिन्द्रियजन्यत्वापेक्षायां सुरभिगन्धस्यापि तत्र भानासम्भवेन सौरभत्वजातिपर्यन्तानुसरणस्य सन्दर्भविरोधापत्तेः। अत्रेदं तत्त्वम्। यद्यपि घटत्वादिप्रत्यक्षे तदलौकिकप्रत्यक्षे वा न तदगोचरज्ञानत्वेन ज्ञानलक्षणाया हेतुत्वं घटत्वादिनिर्विकल्पके प्रमेयत्वादिसामान्यलक्षणाजन्यघटत्वादिप्रत्यक्षे च व्यभिचारात्, तथापि लौकिकालौकिकसाधारणं घटत्वादिप्रकारकप्रत्यक्षमात्रं प्रत्येव घटत्वादिज्ञानत्वेन हेतुत्वम्, अत एव प्राथमिकस्य घटत्वचैत्रत्वादिप्रकारकप्रत्यक्षस्य घटत्वचैत्रत्वादिनिर्विकल्पकं विनानुपपत्तेस्तत्सिद्धिरप्यावश्यकी। पूर्वानुभूतवस्तुमात्रस्यैव तत्तात्वेन घटत्वाद्यात्मकतत्तात्प्रत्यभिज्ञानुरोधेनैव परैरपि उक्तकार्यकारणभावस्याभ्युपेतव्यत्वात्। न चैवं जन्यसविकल्पकस्यैव प्रत्यासत्तित्वमिति प्राचीनगाथाविरोधः, तस्याकिञ्चित्करत्वात् सखण्डघटादेरुपनीतस्थल एव तथा नियमसम्भवाच्च। द्रव्यत्वादिप्रकारेण घटादेरुपनयसत्त्वेपि घटत्वादिप्रकारेण तस्योपनीतप्रत्यक्षानुदयेन घटत्वादिना तत्तद्घटप्रकारकप्रत्यक्षं प्रति घटत्वादिप्रकारेणैव तत्तद्घटाद्युपनयस्य हेतुत्वात्। अत एव घटघटत्वयोर्निर्विकल्पकोत्तरं घटे घटत्वस्येव घटत्वेपि घटस्य न वैशिष्ट्यावगाहि प्रत्यक्षं द्रव्यत्वघटत्वादिप्रकारेणैव घटादीनां विशिष्टबुद्धेः पारमार्थिकतया तद्धेतुभूतस्य घटत्वादिप्रकारेण घटादिज्ञानस्य तदानीमसत्त्वात्। न चैवं निर्विकल्पकोत्तरं विशेष्ये विशेषणमित्यादिक्रमेणापि घटवदित्याकारकप्रत्यक्षं न स्यात्, इष्टत्वात्। जातीतरनिष्ठप्रकारतायाः किञ्चिदवच्छिन्नत्वनियमात्। द्रव्यगुणकर्मणां निरवच्छिन्नप्रकारत्वाननुभवात्। न च निर्वि-

न्यन्ते । तथा हि, धूमत्वावच्छिन्ना व्याप्तिः सन्निकृष्टधू-
मविषये धूमत्वेन प्रत्यक्षेण ज्ञायते ततः स्मृता सा तृ-

स्मृता सेति । धूमसमानाधिकरणात्यन्ताभावाप्रतियोगिवन्हिसमा-
नाधिकरणवृत्तिधूमत्वं वन्हिमदन्यावृत्तित्वं वन्हिसम्बन्धितावच्छे-

---

कल्पकस्य प्रत्यासत्तित्वे स्वविषयीभूतघटाद्युपधानेन तस्य प्रत्यक्षा-
पत्तिः विषयानुपधानेन ज्ञानादिप्रत्यक्षस्यालीकतया विषयोपनायक-
विरहादेव मनःसन्निकृष्टस्यापि तस्यातीन्द्रियत्वोपगमादिति वा-
च्यम्। सत्यपि सन्निकर्षे प्रत्यक्षसामान्यं प्रत्येवाऽदृष्टत्वादिनेव निर्वि-
कल्पकत्वेनापि तादात्म्यसम्बन्धेन विरोधित्वकल्पनादेव निर्विकल्प-
स्याप्रत्यक्षत्वादन्यथा सुखत्वादिनिर्विकल्पकस्य स्वविषयीभूतसुख-
वत्त्वाद्युपधानेन प्रत्यक्षस्य दुर्वारतापत्तेः।सुखत्वस्य निर्विकल्पक एव
सुखत्वेपि लौकिकस्यैव मनःसन्निकर्षस्य सत्त्वात् तदुपधानेन तन्नि-
र्विकल्पकस्य प्रत्यक्षे बाधकाभावादिति । यत्तु घटादिप्रकारकप्रत्यक्षं
प्रत्येव घटादिज्ञानत्वेन हेतुत्वे घटादिविशेष्यकं घटो द्रव्यमित्याकार-
कमानसोपनीतभानं न स्यादिति । तन्न । घटादिधर्मिकद्रव्यत्वाद्यसं-
सर्गाग्रहादिवशादेव मानसधियो घटादिविशेष्यकत्वसम्भवात् । घट
इत्येतावन्मात्राकारस्य बाधनिर्णयाप्रतिबध्यमानसप्रत्यक्षस्याऽसत्त्वे-
पि क्षत्यभावात् । न चैवं घटत्वेन घटादेरनुपस्थितिदशायामपि त-
द्विशेष्यकं मानसप्रत्यक्षं स्यात्तद्धर्मिकासंसर्गाग्रहस्य तदानीमपि
सत्त्वादिति वाच्यम् । घटत्वप्रकारकप्रत्यक्षत्वस्य घटनिष्ठालौकिक-
विशेष्यताकप्रत्यक्षत्वव्यापकतया तदवच्छिन्नं प्रति हेतुभूतस्य घट-
ज्ञानस्य विरहादेवानुपस्थितघटादेर्विशेष्यविधया मानसग्रहासम्भ-
वात् । घटो द्रव्यमित्यादिमानसस्य घटं जानामीत्याद्याकारकत्वनि-
यमात् । अत एवोपनीतं विशेषणतयैव भासत इत्यभिधाय, मानसे
तु नायं नियम इति प्राचीनैरप्युक्तमित्यलं पल्लवितेन । व्याप्तेः सामा-
नाधिकरण्यस्वरूपत्वे परामर्शस्य भ्रमतापत्तिरतो भावार्थमाह धूमे-
त्यादि । लाघवादाह वन्हिमदिति। न च केवलान्वयिन्यव्याप्तिः। व्य-

तीयलिङ्गपरामर्शे पक्षनिष्ठधूमवृत्तितया ज्ञायते ततोऽनुमितिः । तदनभ्युपगमेऽपि सन्निकृष्टधूमविषये धूमत्वेन धूमो वह्निव्याप्य इत्यनुभवस्तथैव व्याप्तिस्मरणं ततो धूमवानयमिति व्याप्तिस्मृतिप्रकारेण धूमत्वेन पक्षवृत्तिधूमज्ञानादनुमितिः, व्याप्त्यनुभवततस्मरणपक्षधर्मताज्ञानानामेकप्रकारकत्वेनानुमितिहेतुत्वात् । गवादिपदेष्वपि शक्त्यनुभवततस्मरणवाक्यार्थानुभवानामेकप्रकारकत्वेन हेतुहेतुमद्भाव इत्यग्रे वक्ष्यते । तत्र योग्यतादिबलादपू-

---

दकरूपवत्त्वं वा व्याप्तिः । एकैव च सा सर्वधूमसाधारणीति भावः । व्याप्तिनानात्वे तु पर्वतीयवन्हेरसन्निकर्षे तत्सामानाधिकरण्यग्रहायोगः अन्यदीयवन्हिसामानाधिकरण्यस्य तत्र भानाङ्गीकारे भ्रमत्वापत्तिरिति द्रष्टव्यम्।गवादिपदेष्वपीति।शक्त्यनुभवशक्यस्मरणे हेतु हेतुमान् वाक्यार्थबोधः।न चैवं जातिशक्तिवादविरोधः,

---

तिरेक्यनुमानस्यैव परैः स्वीकारादिति भावः । केवलान्वयिनः संग्राह्यत्वेपि लघुव्याप्तिमाह साध्यसम्बन्धितेति। अत्रावच्छेदकत्वं स्वरूपसम्बन्धविशेष इति हृदयं तेन प्रागुक्तावच्छेदकत्वघटनाया गौरवानवकाशः । सर्वेति । सामानाधिकरण्योपलक्षितस्य धूमत्वादेः सकलधूमनिष्ठत्वादिति भावः । व्याप्तेर्नानात्व इति । सामानाधिकरण्यस्वरूपतयेत्यादिः । तत्र । पर्वतीयधूमे । अथानुभवस्मरणयोः समानप्रकारतामात्रेण हेतुहेतुमद्भावे पूर्वागृहीतस्यापि स्मरणे भानं स्यादिति स्मृतेरगृहीतग्राहित्वेन तन्मते प्रामाण्यापत्तिरित्यन्यथा योजयति शक्त्यनुभवेति। अत्र शक्यस्मृतेरिव शक्त्यनुभवस्यापि साक्षादेव शाब्दबोधजनकत्वे हेतुपदं यथाश्रुतार्थकमेव, अन्यथा तु प्रयो-

र्वव्यक्तिलाभोऽनुमाने तु पक्षधर्मताबलात् धूमो वह्निव्याप्य इत्यनुभवो न तु सर्वो धूमो वह्निव्याप्य इति, येन सर्वभानार्थं तत्स्वीकारः ।

जातौ व्यक्तौ च शक्तिः परन्तु जातिविषयत्वेनैव ज्ञात्वा शक्तिर्व्यक्तिं स्मारयति चेति । तदर्थादिति अनुभावयति वक्ष्यमाणत्वात् । अतदगुणसंविज्ञानबहुव्रीहिणा पश्वादिलिङादिपदाभिप्रायेण

जकपरं तदबोध्यम् । एवमिति । गोत्वप्रकारेण गोधर्मिकशक्तिग्रहस्य शाब्दधीहेतुत्व इत्यर्थः । धर्मिणि शक्तिसत्त्वेपि तद्विषयकत्वस्य शाब्दधीजनकतानवच्छेदकत्वातत्र शक्यत्वव्यवहार इति कुब्जशक्तिवादिनः श्रीकरस्य मतमनुसृत्य परिहरति जातौ व्यक्तौ चेत्यादि । जातिविषयकत्वेनैवेति । जातिप्रकारकत्वेनैवेत्यर्थः । तेन मूलोक्तस्य समानप्रकारकत्वेन हेतुत्वस्य न विरोधः । अनुभावयति । शाब्दबोधं जनयति । तदर्थात् । जातिशक्तिवादार्थात् । कस्य चिन्मतमाह पश्वादीति । पशुत्वस्य संस्थानाव्यङ्ग्यत्वादुच्चैःश्रवोनिष्ठतया तेजस्त्वेन साङ्गुर्याच्च लोमवल्लाङ्गूलवत्त्वमेव पशुत्वं तस्य चोपाधित्वेन व्यक्त्या समं तुल्यवित्तिवेद्यत्वाभावात्तादृशोपाधिविशिष्टधर्मिण्येव परैः शक्तिस्वीकारादिति भावः । पृथिवीत्वादिप्रत्येकव्याप्त्या यदि नानैव पृथिवीमात्रवृत्तिर्वा पशुत्वजातिः पशुपदशक्या स्यात् पीतसुवर्णस्येवोच्चैःश्रवसोपि तैजसत्त्वप्रवादस्य तेजोभागस्योपष्टम्भकतयाप्युपपत्तेस्तदाह लिङादीति । यजेतेत्यादौ कार्यत्वप्रकारेण घटादौ लिङः शक्तिग्रहाद्यागविषयकं कार्यमित्यन्वयबोधे योग्यतावलात्तादृप्येणापूर्वव्यक्तिलाभस्य परैर्वक्ष्यमाणत्वादिति भावः । कार्ये लिङादिशक्तेस्तार्किकैरनङ्गीकारादेककार्ये शक्तिग्रहादपरकार्यस्य बोधानुपपत्तेस्तैः शङ्कितुमशक्यत्वादाह परेति । पररीत्या न्यायमतेन । न्यायमतेन च समर्थनं चेत्यस्वरसः कश्चिदित्यनेन सूचितः । यद्यपि गोपदस्य नानार्थत्वेन यत्र वाक्यत्वप्रकारेण

पररीत्या वेत्यपि कश्चित्। विशेषणज्ञानसाध्येति। न च पक्षतावच्छेदकज्ञानजन्यतया सिद्धसाधनम्, यद्यद्विशिष्टज्ञानं तत्तद्धीसाध्यमिति सामान्यव्याप्त्यादरात् अभावत्वप्रतियोगित्वयोरप्यनुपस्थितयोरप्रकारत्वात्। वन्हिविशिष्टज्ञानत्वेन तद्वन्हिविशिष्टज्ञान-

---

वाक्यस्येन्द्रियत्वप्रकारेणेन्द्रियस्य वा बोधकङ्गोपदं तत्र वाक्यत्वादेरुपाधितया तद्विशिष्टव्यक्तौ शक्तेः परेषामपि स्वीकाराद्गवादिपदेष्वपीति मूलं तदभिप्रायेणैव साधु सङ्गच्छते, तथापि लाघवेन गोत्वादिशक्तेन गवादिपदेन लक्षणयैव वाक्यत्वादिप्रकारकबोधोपपत्तौ न वाक्यत्वादिविशिष्टे गोपदस्य शक्तिर्गौरवादित्याशयेन ताद्दशाभिप्रायो मूलस्य नोपवर्णितः। अत्र गोपदं गोत्ववदित्याकारकस्य पदविशेष्यकशक्तिज्ञानस्यैव शाब्दधीहेतुत्वाद्गोत्वप्रकारतामादायैव च तत्र समानप्रकारकत्वेन हेतुत्वसम्भवात् यथाश्रुतमेव मूलं सम्यगिति तु मैथिलाः। यद्विशिष्टज्ञानमिति। जन्यं यत्प्रकारकं ज्ञानमित्यर्थः। तेन नित्यज्ञाने न व्यभिचारः। परेषां च व्यर्थविशेषणत्वं न दोषायेति भावः। तद्धीसाध्यत्वं च समवायसम्बन्धावच्छिन्नं ग्राह्यम्, नातः परेषामीश्वरज्ञानजन्यत्वसिद्धावर्थान्तरम्। अथाभावत्वादिज्ञानं विनापि तद्विशिष्टप्रत्यक्षोत्पादाद्व्यभिचार इत्यत आह अभावत्वेति। अन्यथा विनाप्यभावत्वज्ञानमलौकिकस्याभावत्वविशिष्टप्रत्यक्षस्य प्रसङ्गात्, लौकिकान्यतत्प्रकारकज्ञानं प्रति तज्ज्ञानत्वेन हेतुत्वे च गौरवादिति भावः। यत्त्वतत्त्वयोरननुगमादाह वन्हीति। वन्हेर्विलक्षणज्ञानत्वेनेत्यर्थः। वैलक्षण्यं चानुमितित्वं नातः पूर्ववद्व्यभिचारः। अथात्र वन्ह्यन्तरज्ञानजन्यत्वेन सिद्धसाधनम्। न च वन्हित्वेन गुञ्जादेर्धूमव्यापकत्वग्रहोत्तरं जायमानानुमितेर्वन्ह्यन्तरज्ञानजन्यत्ववाधात्तत्रैव प्रकृतवन्हिज्ञानजन्यत्वसिध्यर्थं सामान्यलक्षणा स्यादिति वाच्यम्। गुञ्जायां वन्हित्वग्रहस्य तदधीनानुमितेश्च गुरुमतेऽसम्भवात्तेषामन्यथाख्यात्यभावादत आह तद्वन्हीति। अयं देशो दण्डिमानित्याद्यनुमितौ विशेषणतावच्छेदकीभूतदण्डभानार्थं सामान्यलक्षणापत्तेराह विशिष्टेत्यादि। नन्वेवं विशेषणतावच्छेदकप्र-

अथ वह्निमानयमित्यनुमितिर्विशेषणज्ञानसाध्या विशिष्टज्ञानत्वादिति पर्वतीयवह्निभानार्थं तत्कल्पने धूमेऽपि तथा कत्व चिद्धूमस्यापि व्यापकत्वादिति चेन्न। विशिष्टवैशिष्ट्यज्ञाने विशेषणतावच्छेदकप्रकारकज्ञान-

---

त्वेन वा तज्ज्ञानजन्यत्वसाधनाद्वा विशिष्टवैशिष्ट्यस्यावश्यमभ्युपगमवादः। वस्तुतो विशेषणतावच्छेदकादीनां युगपदिन्द्रियसन्निकर्षात्तादृशप्रत्यक्षम्, अनुमित्यादेस्तु तादृप्येण व्याप्त्यादिग्रहात्। अत एवानेकव्यक्तिकद्रव्यादिविशेषणतावच्छेदककानुमित्या तद्भानार्थं न सामान्यलक्षणादरः। अस्तु वा दण्डीत्यादिप्रत्यक्षे

कारकज्ञानविरहेपि सुरभि चन्दनमित्यादिविशिष्टवैशिष्ट्यधीः स्यादत आह वस्तुन इति। तथा च तादृशबुद्धेः प्रत्यक्षादिनियतत्वेन तदानीं प्रत्यक्षादिसामग्रीविरहादेव न तादृशं ज्ञानमिति भावः। विशेषणतावच्छेदकादीनामित्यादिपदाद्विशेष्यादिसङ्ग्रहः। तादृशं विशिष्टवैशिष्ट्यावगाहि। अनुमित्यादिरित्यति। तादृश इति लिङ्गव्यत्ययेनाऽनुषज्यते। तादृप्येण। विशेषणतावच्छेदकरूपेण। येन रूपेण व्यापकतायाः शक्तेर्वा ग्रहः तेन रूपेणैवानुमितेः शाब्दस्य चोत्पत्तेरिति भावः। अत एव। इन्द्रियसन्निकर्षादेर्नियामकत्वादेव। तद्भानार्थं विशेषणतावच्छेदकभानार्थम्। ननु विशेष्यादिसन्निकर्षेपि दण्डत्वदण्डयोर्निर्विकल्पकोत्तरं दण्डे दण्डत्वस्येव दण्डत्वादौ तद्दण्डादेर्विशिष्टप्रत्यक्षानुत्पत्त्याऽवश्यं दण्डत्वादिना तद्दण्डादेर्विशिष्टबुद्धौ विशेषणतावच्छेदकीभूतदण्डत्वादिना तद्दण्डादेर्भानं हेतुः, एवं दण्डी रक्तो न वेति संशयोत्तरं रक्तदण्डवानिति विलक्षणबोधानुत्पत्त्या तत्र विशेषणतावच्छेदकप्रकारकनिश्चयोऽवश्यं हेतुरत आह अस्तु वेति। स्मृतौ व्यभिचारात्तादृशज्ञानमात्रे हेतुत्वासम्भवादाह प्रत्यक्ष इति विशेषणतावच्छेद-

स्याऽऽवश्यकत्वेन हेतुत्वात्। तच्च वृत्तमेव, न तु विशेषणज्ञानमपि तथा, गौरवात्। गौरयमिति विशिष्टज्ञाने युगपद्विशेष्ये विशेषणे सन्निकर्ष एव कारणं न तु निर्विकल्पकं मानाभावात्। विशिष्टज्ञानत्वमेव मानमिति चेन्न। दृष्टान्ताभावात् दण्डी पुरुष इत्यत्र विशेषणधीजन्यत्वानभ्युपगमात् विशिष्टवैशिष्ट्यज्ञानत्वात्। अपि च प्रमेयत्वेन व्याप्तिं परिच्छिन्दन् सर्वज्ञः स्यात्। तथा च परकीयज्ञानविषये घटत्वं न वेति संशयो न स्यात् प्र-

---

दण्डत्वादिना दण्डसंयोगवानित्यादौ च दण्डसंयोगत्वादिना यत्किञ्चिद्व्यक्तिज्ञानं कारणम्। दृष्टान्ताभावादिति। विशेषणज्ञानत्वेन हेतुत्वस्य विशेष्यज्ञानादेरपि कारणत्वापत्त्या मानाभावेन च निरस्तत्वादिति। एतेनाऽस्तु विशेष्यज्ञानमपि कारणं जन्यतां निर्विकल्पकमपि सामान्यलक्षणया, सर्वज्ञत्वापत्त्या तस्यास्तदजनकत्वे तु तत एव बाधकान्न तत्कारणमिति निरस्तम्।

कांशे धर्मितावच्छेदकासत्त्वसत्त्वाभ्यां विशिष्टवैशिष्ट्यबुद्धेर्द्वैविध्यादाद्यामुदाहृत्य द्वितीयामाह दण्डसंयोगवानिति। यत्किञ्चिदिति। तथा च विशेषणव्यक्तेः पूर्वमभानेऽपि न क्षतिरिति भावः। व्यतिरेकेण घटादेरन्वयेन च गोत्वादिसाध्यकानुमितेर्दृष्टान्तत्वसम्भवादाह विशेषणज्ञानत्वेन हेतुत्वस्येति। निरस्तत्वादित्यग्रेऽन्वयः। विशेष्यज्ञानादीत्यादिपदेन सम्बन्धज्ञानग्रहः। कारणतापत्त्येति। तथा च तद्बुद्धिहाप्यप्रयोजकत्वमिति भावः। विशेष्यधियो हेतुत्वे वक्ष्यमाणेष्टापत्तेराह मानाभावेन चेति। एतेन मानाभावेन। निरस्तमित्य-

मेयत्वेन तदन्यतरनिश्चयात् । प्रमेयत्वेन घटं जानात्येव घटत्वं तस्य न जानाति इति चेन्न । तत् किं घटत्वं न प्रमेयं येन तन्न जानीयात्, सकलघटवृत्तिधर्मस्य प्रमेयत्वेन तदज्ञानासम्भवात् ।

न्वयः । ननु सामान्यलक्षणाजन्यज्ञानेऽसन्निकृष्टघटान्तरस्यापि विशेष्यत्वात्तस्य च प्रागनुपस्थितत्वेन विशेष्यज्ञानस्य हेतुत्वं दुर्घटमत आह जन्यतां चेति।निर्विकल्पकम्।अनुपस्थितस्वाश्रये स्वाप्रकारकम्। तथा च तत्रानुपस्थितघटांशे निर्विकल्पकमेव यावद्घटगोचरं ज्ञानमतो नोक्तदोषः।घटत्वादिसामान्यस्य च स्वेतरप्रकारत्वानिरूपितघटनिष्ठविषयतासम्बन्धेनैव घटत्वप्रकारकप्रत्यक्षं प्रति हेतुत्वं वाच्यमतो विनापि घटत्वस्य ज्ञानं द्रव्यत्वादिसामान्यस्य ज्ञानात् घटस्य प्रत्यक्षोत्पादेपि न व्यभिचार इति भावः । नन्वेवं मेयत्वसामान्यलक्षणया घटत्वपटत्वादिघटपटादिपूर्वानुपस्थितयावद्वस्तुनिर्विकल्पकोत्पत्तावुत्तरकालं घटादौ घटत्वादिनिश्चये बाधकाभावेन तदुत्पत्त्या सार्वज्ञं स्यात् । न चेष्टापत्तिः, तथा सति प्रमेयत्वादिसामान्यप्रत्यासत्तिजन्यज्ञानोत्तरम् 'अयं घटो द्रव्यं न वेत्यादिसंशयानुत्पत्तिप्रसङ्गादत आह सार्वज्ञेति।यत्तु कैश्चिदुक्तं प्रमेयत्वसामान्यलक्षणया घटत्वज्ञानोत्पत्तिकाले तद्वृत्तिधर्मस्यापि निर्विकल्पकज्ञानादुत्तरकालं घटे घटत्वस्येव घटत्वेपि तद्वृत्तिधर्माणामवश्यं भानं सामग्रीसत्त्वात्तथा च घटत्वांशेऽन्याप्रकारकज्ञानासम्भवान्न सार्वज्ञापत्तिरिति । तत्तुच्छम् । घटत्वांशे धर्मान्तरप्रकारकस्यैव तदंशेऽन्याप्रकारकस्यापि ज्ञानस्य सामग्रीसत्त्वेनोत्पत्तिसम्भवात् । जातिमान् घट इत्याकारकप्रत्यक्षानुरोधेन निरवच्छिन्नघटत्वादिप्रकारकज्ञानं प्रति निरवच्छिन्नघटत्वादिविषयताकत्वेन हेतुत्वात् । अन्यथा घटांशे घटत्वमिव घटत्वांशेपि जातिमत्त्वमवगाहमानस्यैव ज्ञानस्योत्पत्त्या जातिमानित्येव धीः स्यात् न तु जातिमान् घट इत्याकारिकेति दिक्। तस्यास्तदजनकत्वे त्विति । सामान्यप्रत्यासत्तेर्निर्विकल्पकाजनकत्वे

उच्यते। यदि सामान्यलक्षणा नास्ति तदाऽनुकूल-तर्कादिकं विना धूमादौ व्यभिचारसंशयो न स्यात्, प्रसिद्धधूमे वह्निसम्बन्धावगमात् कालान्तरीयदेशान्तरीय-धूमस्य मानाभावेनाऽज्ञानात्। सामान्येन तु सकलधूमोपस्थितौ धूमान्तरे विशेषादर्शनेन संशयो युज्यते।

प्रसिद्धधूम इत्यादिधर्मिज्ञानस्य संशयहेतुत्वानङ्गीकारेऽपि संशय एव धर्मिभानार्थं सा स्वीकार्या। धर्मितावच्छेदकप्रकारकज्ञानस्य प्रत्यासत्तित्वाभ्युपगमे त्वविवादात् तद्धर्मप्रकारकज्ञानस्य तद्धर्माश्रयप्रत्यासत्तित्वोपगमात्। अत्र वदन्ति। प्रसिद्धधूमे धूमत्वेन व्याप्ति-

---

त्वित्यर्थः। तत एवेति। सामान्यजन्यज्ञाने व्यभिचारादेव विशेष्यज्ञानं न कारणमित्यर्थः।

ननु धर्मिज्ञानस्य संशयहेतुत्वे मानाभावादसन्निकृष्टधूमादीनामज्ञानेपि तद्धर्मिकः संशयो भविष्यतीति व्यर्थं तज्ज्ञानार्थं प्रत्यासत्तिकल्पनमत आह धर्मीत्यादि। संशय एवेति। सन्देहस्य प्रत्यक्षरूपतया धर्मीन्द्रियसन्निकर्षं विना तद्विषयकत्वासम्भवादिति भावः। ननु संशये धर्मिभानार्थं धर्मितावच्छेदकप्रकारकं कस्य चिदेव ज्ञानं तत्र हेतुरस्तु कृतं सामान्यलक्षणयेत्यत आह धर्मितेति। अविवादादित्यस्य सामान्यप्रत्यासत्तावित्यादिः। अविवादमेव विवृणोति तद्धर्मेत्यादि। प्रकारकेति। यथा च सामान्यप्रकारकत्वेनैव हेतुत्वं न तु तद्विषयकत्वमात्रेण तथोक्तमधस्तात्। धूमत्वेनेति। तदवच्छेदेनेत्यर्थः। तेन इदंधूमत्वावच्छेदेन वह्निव्याप्यवत्तानिश्चयस्य धूमत्वप्रकारकत्वेपि तदुत्तरं धूमो वह्निव्याप्यो न वेति सन्देहः, तादृशनिश्चयेन धूमत्वस्यावच्छेदकत्वावगाहनात्। यत्तु धूमत्वेनेत्यस्य धूमत्वमात्रावच्छिन्नावशेष्यताकेत्यर्थक-

ज्ञानमेतद्धूमत्वेन वा, आद्ये संशयोऽसिद्धः, द्वितीये धूमत्वावच्छेदेन व्याप्तिग्रहस्यैव तद्विरोधितया संशयो नानुपपन्नः, कथमन्यथा पृथिव्यादिरूपे वायुत्वाभावव्याप्यतानिर्णयेऽपि रूपं वायुत्वाभावव्यभिचारि न वेत्यादिसंशयः। न चातिरिक्तसम्भावनया तथा, विशेषतश्चोपस्थितानामतिरिक्तानां विशेषदर्शनाक्रान्ततरा अतिरिक्तान्तरोपस्थितये अवश्यं सा स्वीकरणीयेति वाच्यम्। यतो रूपेषु नातिरिक्तत्वसम्भावना, तेषु विशेषदर्शनात्। नाप्यतिरिक्ते

रणान्नोक्तदोष इति। तत्तुच्छम्। वह्निव्याप्यो धूमः सुन्दर इति धूमत्वसामानाधिकरण्येन व्याप्तिनिश्चयेपि वन्ह्यव्याप्यो धूमः कुरूप इति धूमधर्मिकव्याप्त्यभावज्ञानोदयादवच्छेदकत्वावगाहिन एव ज्ञानस्य प्रतिबन्धकत्वादित्यन्यत्र विस्तर। व्याप्तिज्ञानम्। व्याप्तिनिश्चयः। असिद्ध इति। धूमत्वावच्छेदेन व्याप्तिनिश्चयस्यैव विरोधिनः सत्त्वादिति भावः। तद्विरोधितया धूमो वह्निव्याप्यो न वेति सन्देहविरोधितया। स सन्देहः। नानुपपन्न इत्यस्य प्रसिद्धधूम इत्यादिः। तथा च कृतं सामान्यलक्षणयेति भावः। ननु लाघवात्तदभावनिश्चयत्वेनैव समानविशेष्यत्वप्रत्यासत्त्या तद्वत्तावुद्धिं प्रति विरोधित्वाश्चैवमतस्तत्र प्रतिबन्दिमाह कथमित्यादिना। पृथिव्यादीति। समानधर्मिकस्यैव ज्ञानस्य विरोधित्वे पार्थिवं तैजसं जलीयं च रूपं वायुत्वाभावव्याप्यमित्येवं निर्णये रूपं वायुत्वाभावव्याप्यं न वेति रूपविशेष्यकसंशयो न स्यात् रूपमात्रे विरोधिव्याप्तिनिर्णयादतः समानधर्मावच्छिन्नविशेष्यताकज्ञानस्यैव विरोधित्वं वाच्यमिति भावः। न चेति। वाच्यमित्यग्रेऽन्वयः। सम्भावनयेति। पार्थिवादिरूपभिन्नं रूपं न वेत्याद्याकारसम्भावनयेत्यर्थः। तथा निर्णीतव्याप्तिकेष्वपि रूपेषु व्याप्तिसन्देहः। सम्भावनाविरहविशिष्टस्यैव समानधर्मिकनिश्चयस्य प्रतिबन्धकत्वादिति भावः। नन्वेवं प्रसिद्धधूम एव व्याप्तिनिश्चयेप्येतद्धूमातिरिक्तो धूमो न वेतिसम्भावनयैव धूमो वन्हिव्यभिचारी न वेतिसंशयसम्भवात्कृतं सामान्यलक्षणयेत्यत आह विशेषतश्चेति। तथा

रूपत्वसम्भावना, रूपान्यन्न रूपं द्रव्यादयो रसादयश्च न रूपं प्रसिद्धरूपभिन्नं यद्रूपभिन्नं द्रव्यं रसादि वा तत्सर्वं न रूपं रूपत्वाभाववच्चेत्यादिविशेषदर्शनेन तस्या अप्ययोगात् । तदानीमुक्त-

---

च विशेषतो घटत्वादिरूपेणोपस्थितानां प्रसिद्धधूमभिन्नानां धूमत्वाभाववत्तया निश्चयात्तदतिरिक्तस्याप्रसिद्धधूमस्योपस्थित्यर्थमेव सामान्यलक्षणा वाच्या तां विना सम्भावनाया एवाऽसम्भवादिति भावः । समानधर्मिकज्ञानस्य विरोधित्वे सम्भावनैव न सम्भवति कस्योत्तेजकत्वं स्यादित्याह यत इति । तेषु विशेषदर्शनादिति । रूपेषु पार्थिवादिभिन्नत्वाभावदर्शनादित्यर्थः । अतिरिक्ते । पार्थिवादिरूपातिरिक्ते । रूपान्यन्न रूपमिति प्रात्यक्षिकस्यैव विशेषदर्शनस्याऽऽकारोयम्।उद्देश्यतावच्छेदकविधेययोरैक्येन तादृशशाब्दस्यासम्भवादिति ध्येयम्। सामान्यरूपेणोक्ता विशेषतोपि विशेषदर्शनमाह द्रव्यादय इति । आदिपदेन कर्मत्वादिप्रकारेण कर्मसामान्यादेः परिग्रहः । रसादय इत्यत्राप्यादिपदाद्गन्धत्वादिप्रकारेण गन्धस्पर्शादीनां सङ्ग्रहः । ननु सम्भावनाया यद्विशेष्यतावच्छेदकं तदन्तर्भावेण समानधर्मिकनिर्णयः सम्भावनाविरोधी रूपान्यत् न रूपमित्याकारनिर्णयस्तु न सम्भावनाया विशेष्यतावच्छेदकं यत्प्रसिद्धरूपभिन्नत्वं तदन्तर्भावेण अतः संभावना स्यादेवेति यदि ब्रूयात्तदा तदन्तर्भावेणापि निर्णयमाह प्रसिद्धेत्यादि । प्रसिद्धरूपभिन्नं सर्वं न रूपमितिनिर्णयसत्त्वे रूपं वायुवृति न वेति पर्यवसितो रूपं वायुत्वाभावव्यभिचारि न वेत्याकारः सन्देहो नोत्पद्यत इत्यत उक्तं रूपभिन्नमिति । उद्देश्यतावच्छेदकविधेययोरैक्येन प्रसिद्धरूपभिन्नं यद्रूपभिन्नं सर्वं न रूपमित्याकारस्य शाब्दविशेषदर्शनस्याऽसम्भवादाह द्रव्यं रसादिवेति । अत्रापि प्रसिद्धेत्यादेः सम्बन्धात्प्रसिद्धरूपभिन्नं यद्द्रव्यं रसादि वा तत्सर्वं न रूपमित्यर्थः । तेन सम्भावनाधर्मितावच्छेदकान्तर्भावलाभः । रूपत्वकोटिकसम्भावनायां रूपभेदनिश्चयो न बाधकः भिन्नविषयकत्वात् किं तु रूपत्वाभावनिश्चय एवेत्यभिधानेप्याह रूपत्वाभाववदिति । तस्या इति । प्रसिद्ध-

संशयस्य सर्वजनानुभवसिद्धत्वात् अतिरिक्तसम्भावनाया गौरवेणाप्रयोजकत्वाच्च। तस्मात्तत्रैव धूमे रूपे वा धूमत्वेन रूपत्वावच्छेदेन व्याप्तेरग्रहाद्व्यभिचारसंशयो नायुक्तः। यत्तु सामान्याभावभानार्थं सा स्वीकार्या, तां विना सकलतत्प्रतियोगिज्ञानासम्भवादिति। तन्न। न ह्यभावस्य ज्ञानमात्रे लौकिकप्रत्यक्षे वा प्रतियोगिज्ञानं कारणं तव सामान्यलक्षणया इदन्त्वादिना च भाने व्यभिचारान्मानाभावाच्च। अत एवेदन्त्वादिनोपस्थिते तमसि भावत्वाभावत्वसंशयः, तेजोऽभावत्वेनोपस्थिते तदयोगात्। प्रतियोगिविशेषिततज्ज्ञानन्तु विशिष्टवैशिष्ट्यबोधमर्यादां नातिशेते

रूपातिरिक्ते रूपत्वसम्भावनाया इत्यर्थः। नन्वेतादृशसम्भावनाविरहदशायां रूपं वायुत्वाभावव्यभिचारि न वेति संशयोऽप्यसिद्ध एवेत्यत आह तदानीमिति। तदानीं सम्भावनाविरहदशायाम्। प्रसिद्धरूपे वायुत्वाभावव्याप्यत्वनिर्णये एतादृशानुभवे विप्रतिपन्नं प्रत्याह अतिरिक्तेति। तद्धर्मिकतदभावनिश्चयाभावत्वेन हेतुत्वमपेक्ष्य सम्भावनाविरहविशिष्टतादृशनिश्चयाभावत्वेन हेतुतायां गौरवादित्यर्थः। तत्रैव निर्णीतव्याप्तिक एवामिश्रमतमुपन्यस्य दूषयति यत्त्विति। तां सामान्यलक्षणाम्। तत्प्रतियोगीति। सामान्याभावप्रतियोगीत्यर्थः। अभावबुद्धौ प्रतियोगिज्ञानस्य हेतुतासत्त्व एव सकलप्रतियोगिज्ञानापेक्षा स्यात् सैव तु नास्तीत्याह नहीति। प्रथमे तवेति। तव सामान्यलक्षणावादिनः। द्वितीये इदन्तेति। नन्वभावत्वप्रकारकलौकिकप्रत्यक्षे प्रतियोगिज्ञानं हेतुरत आह मानाभावादिति। अत एव। प्रतियोगिज्ञानं विनाप्यभावप्रत्यक्षादेव। नन्विदं भावो न वेतिसंशयविषयीभूतमिदन्त्वं तेजोऽभावत्वमेव तथा च तत्रापि तेजोरूपप्रतियोगिज्ञानसत्त्वान्न व्यभिचार इत्यत आह तेजोभावत्वेति। तदयोगादिति। भावत्वसंशायायोगादित्यर्थः। तद्धर्मविशिष्टधर्मिकतदभावग्रहं प्रति तादृशज्ञानेच्छाविरहविशिष्टज्ञानमात्रस्य प्रतिबन्धकत्वात्। अन्यथा निर्वह्निर्वह्निमानित्येवमनाहार्यधीप्रसङ्गादि-

सकलप्रतियोगिविषयत्वन्तु तस्यासिद्धम्। प्रतियोगिज्ञानस्य हेतुत्वे-

---

ति भावः। अथाऽभावबुद्धौ प्रतियोगिज्ञानस्याऽहेतुत्वे विनापि घटादिग्रहं घटो नास्तीत्याकारकाभावप्रत्यक्षापत्तिरत आह प्रतियोगीति। तथा चोक्तबुद्धेर्घटत्वविशिष्टवैशिष्ट्यबुद्धित्वात्तत्कारणीभूतस्य घटत्वप्रकारकज्ञानस्य विरहादेव न तस्योत्पाद इति भावः। ननु स्वातन्त्र्येणाभावप्रत्यक्षे प्रतियोगिज्ञानस्याहेतुत्वेपि अभावप्रत्यक्षे सकलप्रतियोगिविषयकत्वरक्षार्थं सन्निकर्षविधयैव तदपेक्षा स्यादत आह सकलेति। तस्य सामान्याभावप्रत्यक्षस्य। अथाभावलौकिकप्रत्यक्षे प्रतियोगितावच्छेदकविशिष्टप्रतियोगिज्ञानस्याहेतुत्वे घटनिर्विकल्पकोत्तरं विशेष्ये विशेषणमितिन्यायेनाभावे घटं घटे च घटत्वमवगाह्य घटाभाव इत्याकारकलौकिकप्रत्यक्षं स्यात्। न चेष्टापत्तिः, अननुभवात् अपसिद्धान्ताच्च। घटत्वप्रकारेण घटविशिष्टबुद्धौ घटत्वप्रकारेण घटज्ञानस्य हेतुत्वोक्त्या कथञ्चित्तन्निरासेपि घटाज्ञानदशायामिन्द्रियसम्बद्धविशेषणतया नेत्याकारस्य घटाभावलौकिकप्रत्यक्षस्य प्रसङ्गो दुर्वारः। अभावप्रत्यक्षं प्रति विशिष्टप्रतियोगिज्ञानस्य हेतुत्वे तु प्रागुपस्थितस्य विशिष्टप्रतियोगिनोऽभावांशे विशेषणीभूय भाने बाधकाभावान्न तादृशं प्रत्यक्षम्। न च घटाभावस्यैव घटत्वावच्छिन्नाभावत्वेन प्रात्यक्षिकभ्रमे घटज्ञानाजन्ये व्यभिचारात्प्रतियोगिज्ञानस्य हेतुत्वं दुर्वचम्, घटत्वावच्छिन्नाभावत्वेन प्रत्यक्षं प्रत्येव घटज्ञानत्वेन हेतुत्वे तु घटाज्ञानदशायां विशेषणताप्रत्यासत्त्या नेत्याकारप्रत्यक्षं दुर्वारमिति वाच्यम्। घटत्वावच्छिन्नप्रकारत्वान्यप्रकारत्वानिरूपिताभावनिष्ठलौकिकविषयताकप्रत्यक्षं प्रत्येव घटत्वादिप्रकारकज्ञानत्वेन हेतुत्वात्तस्य च भ्रमप्रमानिर्विकल्पकसाधारणत्वात्। प्रकारत्वं तु प्रतियोगितासम्बन्धावच्छिन्नं ग्राह्यमतो घटो नास्तीतिप्रत्यक्षस्य स्वरूपसम्बन्धेनाभावत्वप्रकारकत्वेपि नासङ्गतिः। यद्यपि विशिष्टप्रतियोगिज्ञानस्य हेतुत्वपक्षेऽभावो न घटीय इत्यभावे प्रतियोगितासम्बन्धावच्छिन्नघटाभावनिश्चयदशायामिन्द्रियसम्बद्धविशेषणतावशान्नेत्याकारप्रत्यक्षस्य दुर्वारत्वम्। न चाभावत्वसामानाधिकरण्येन यदि घटस्य अभावत्वग्रहस्तदा तस्याविरोधित्वादग्रे

ऽपि प्रतियोगितावच्छेदकविशिष्टयत्किञ्चित्प्रतियोगिज्ञानादेव तत्सम्भवात् यावत्प्रतियोगिज्ञानत्वेन गौरवेणाहेतुत्वात्। न च तद-

---

घटो नास्तीत्येव धीर्जायते प्रतियोगिविशिष्टबुद्धेः सामग्रीसत्त्वात् अभावत्वावच्छेदेन घटाभावग्रहस्तु तदानीमसम्भवी, अभावत्वविशिष्टे प्रतियोगितासम्बन्धेन घटविशिष्टबुद्धिमात्रस्यैव तदवच्छेदेन प्रतियोगितासम्बन्धावच्छिन्नघटाभाववत्ताज्ञानविरोधित्वादित्युभयथापि नेत्याकारप्रत्यक्षापादनं दुर्घटमिति वाच्यम्। तदसम्भवेऽप्यभावत्वावच्छेदेन प्रतियोगितासम्बन्धेन घटवद्वृत्तिधर्मवत्तानिर्णयदशायां विशेषणसन्निकर्षान्नेत्याकारकप्रत्यक्षापत्तेर्वज्रलेपत्वात्। तद्वद्वृत्तिधर्मवत्त्वज्ञानस्यापि तद्वत्ताज्ञानविरोधित्वेनाभावांशे घटवत्ताज्ञानासम्भवात्। तथापि नेत्याकारकप्रत्यक्षस्य घटत्वावच्छिन्नप्रकारत्वान्यप्रकारत्वानिरूपिताभावनिष्ठविषयताकत्ववत् कुम्भत्वपटत्वादितत्तद्धर्मावच्छिन्नप्रकारत्वानिरूपिताभावनिष्ठविषयताकत्वेन तादृशविषयताकाभावप्रत्यक्षत्वावच्छिन्नं प्रति हेतुभूतस्य तत्तद्धर्मप्रकारकज्ञानकूटस्यैकदा विरहादेव न नेत्याकारकप्रत्यक्षम्। वस्तुतो घटत्वपटत्वादिप्रत्येकधर्मावच्छिन्नाभावत्वप्रकारकप्रत्यक्षं प्रत्येव घटत्वपटत्वादिप्रत्येकधर्मप्रकारकज्ञानत्वेन हेतुत्वं तथा च तादृशप्रत्यक्षस्य सामग्रीविरहादेव केवलेन्द्रियसन्निकर्षदशायामभावो न घटीय इत्यादिबाधदशायां वा नाभावस्य प्रत्यक्षं विशेषसामग्रीविरहादित्यत आह प्रतियोगिज्ञानस्य हेतुत्वेपीति। यत्तु घटत्वाद्यवच्छिन्नप्रतियोगितासम्बन्धेन घटत्वादिविशिष्टवैशिष्ट्यावगाह्यभावत्वावच्छिन्नधर्मिताकाभावलौकिकप्रत्यक्षत्वं प्रतियोगितासम्बन्धेन घटत्वादिविशिष्टवैशिष्ट्यावगाहिध्वंसादिलौकिकप्रत्यक्षत्वमिदन्त्वादिप्रकारकाभावप्रत्यक्षत्वं च नानैव इन्द्रियसम्बद्धविशेषणताया एव कार्यतावच्छेदकं वाच्यं न तु प्रतियोगिज्ञानस्य, तावतैव नेत्याकारकप्रत्यक्षस्य वारणसम्भवात्। न चैवं घटाभावो नास्तीत्यभावप्रकारकलौकिकप्रत्यक्षं न स्यात्तादृशाभावस्य द्रव्यत्वेनेन्द्रियसम्बद्धविशेषणतायास्तद्ग्राहकत्वासम्भवादिन्द्रियसंयोगादेर्द्रव्यसाक्षात्कारत्वाद्यवच्छिन्नं प्रत्येव हेतुत्वादिति वाच्यम्,

भावबुद्धौ तज्ज्ञानहेतुत्वात् यावत्प्रतियोगिज्ञानस्य हेतुत्वमर्थायातम्, मानाभावात् ध्वंसप्रागभावायन्ताभावाश्च प्रतियोग्यादिन्रि-

---

द्रव्यप्रत्यक्षत्वादेरिव घटाभावाभावत्वादिप्रकारकद्रव्यप्रत्यक्षत्वस्यापीन्द्रियसंयोगजन्यतावच्छेदकत्वोपगमात् । वस्तुतो नव्यमतेऽभावाभावस्यातिरिक्तत्वाद्विशेषणतैव तदग्राहिकेति साम्प्रदायिकैरुक्तम् । तत्तुच्छम् । तत्तत्पुरुषीयघटत्वाद्यवच्छिन्नं प्रति तत्तत्पुरुषीयचक्षुःसम्बद्धविशेषणतात्वेनेन्द्रियभेदेन चाऽनन्तहेतुताकल्पनामपेक्ष्य घटत्वाद्यवच्छिन्नाभावत्वप्रकारकप्रत्यक्षत्वावच्छिन्नं प्रत्येव लाघवेन सामानाधिकरण्यप्रत्यासत्त्या घटत्वादिप्रकारकज्ञानत्वेन हेतुतायाः युक्तत्वात्, संयोगसंयुक्तसमवायादिभेदेनेन्द्रियसम्बन्धानामप्यननुगमाच्च । यद्यपि प्रसिद्धानामभावलौकिकप्रत्यक्षाणां विशिष्टवैशिष्ट्यावगाहित्वनियमात्तत्तद्विशेषणतावच्छेदकप्रकारकज्ञानावरहादेव तेषां नापत्तिरतिरिक्तस्य च नेत्याकारप्रत्यक्षस्यालौकतया नापत्तिसम्भवनापि पारमार्थिककार्यव्यक्तीनां सामग्र्या एव कार्योत्पत्तिव्याप्यत्वोपगमात् तथा च घटत्वादिविशिष्टवैशिष्ट्यावगाह्यभावप्रत्यक्षत्वादिनानाधर्माणामिन्द्रियसम्बद्धविशेषणतायाः प्रतियोगिज्ञानस्य कार्यतावच्छेदकत्वविरहेपि न क्षतिरिति । तदसत् । यत्र पटाभावे घटत्वावच्छिन्नप्रतियोगिताकत्वादिभ्रमस्य सामग्री नास्ति तत्रेन्द्रियसम्बद्धविशेषणताबलाज्जायमानस्य पारमार्थिकस्य घटो नास्तीतिप्रत्यक्षस्य घटाभाव इव पटाभावेपि लौकिकविषयतासम्बन्धेनोत्पत्तेर्दुर्वारत्वात्तस्य च पटाभावांशे विशिष्टबुद्धिसामग्रीविरहान्नेत्याकारकतायाः अर्थवशसम्पादनीयत्वादिति दिक् । तदभावेति । तस्याभावप्रत्यक्ष इत्यर्थः । तादृशकारणतायां साधकाभावमुक्त्वा व्यभिचाररूपं बाधकमप्याह ध्वंसेत्यादिना । घटध्वंसो हि घटतत्प्रागभावतदत्यन्ताभावानामभावस्तत्सत्त्वे घटतत्प्रागभावादयो न सन्तीति प्रत्ययात् व्यवहाराच्च । एवं घटप्रागभावोपि घटतद्ध्वंसतदत्यन्ताभावानामभावस्तथा घटात्यन्ताभावोपि घटतद्ध्वंसतत्प्रागभावानामभावस्तेषां च एकैकप्रतियोगिज्ञानमात्रादेव ग्रहात्स्फुटतरो व्यभिचार इति भावः । स्वमते ध्वंसप्रागभावयोरत्यन्ताभावेन सम

तयप्रतियोगिकाः द्वयाग्रहेऽप्येकग्रहादेव गृह्यन्त इत्यभ्युपगमाच्च । अन्धकारस्तु तेजोविशेषसामान्याभावो नाभावसमुदायः । यावत्तदभावानामेकत्रासम्भवात्, अननुगमात्, गौरवात्, तेजोविशेषत्वादि-

---

न विरोधो ध्वंसस्य प्रागभावः प्रागभावस्य च ध्वंसोऽतिरिक्त एवेत्यत उक्तमभ्युपगमादिति । प्राचीनैरुपगमादित्यर्थः । इदमुपलक्षणम् । नव्यमते समनियतसंख्यापरिमाणाद्यभावानामेकयादेकमविज्ञायापरप्रतियोगिज्ञानादेव ग्राह्यत्वाच्च तत्रैव स्वमतेपि व्यभिचारो द्रष्टव्यः । ननु स्वपरप्रकाशकतेजःप्रतियोगिकयावत्संसर्गाभावरूपस्यान्धकारस्य ग्रहो न तादृशयावत्तेजोग्रहं विना प्रतियोगिबुद्धेरभावप्रत्यक्षे हेतुत्वात् यावत्तादृशतेजोग्रहश्च न सामान्यलक्षणां विना सम्भवतीति प्राचां मतं दूषयति. अन्धकारस्त्विति । तेजोविशेषेति । महाप्रभात्वावच्छिन्नाभाव इत्यर्थः । उद्भूतानभिभूतरूपवन्महातेजःसामान्याभावस्तु नार्थः । अनुद्भूतत्वाभावाद्यात्मकस्योद्भूतत्वादेरतीन्द्रियतया तदवच्छिन्नधर्मावच्छिन्नाभावस्याऽयोग्यत्वेन प्रत्यक्षायोगात् । नीलत्वशुक्लत्वादिव्यापकमुद्भूतत्वमेकमेव सामान्यं चाक्षुषप्रयोजकं पिशाचनिदाघोष्मादौ न नीलशुक्लाद्यात्मकं रूपं किं तु तद्भिन्नमेव प्रत्यक्षस्य चाक्षुषाद्यन्यतमत्वनियम इव रूपस्य नीलशुक्लाद्यन्यतमत्वनियमे मानाभावादित्यस्मद्गुरुचरणमतानुसरणे तूक्तप्रकारोपि सम्यगिति ध्येयम् । न चालोकसन्निधानेपि घटीयरूपे तम इति चाक्षुषापत्तिः, चक्षुःसंयुक्तसमवेतरूपविशेषणतायास्तादृशप्रभाद्यभावेपि सत्त्वादिति वाच्यम् । तमःसाक्षात्कारं प्रति चक्षुःसंयुक्तविशेषणताया एव हेतुत्वोपगमादिति भावः । एकत्रेति । एकदेशीयतेजोध्वंसप्रागभावव्यक्तीनामन्यदेशे विरहादिति भावः । ननु यावत्त्वं प्रतियोगिविशेषणं तथा च यावन्ति तादृशतेजांसि तत्तद्व्यक्तित्वेतरधर्मानवच्छिन्नतत्तद्व्यक्तिनिष्ठप्रतियोगिताकाभावानामेकदेशवृत्तीनामेव तमस्त्वं वाच्यमत आह अननुगमादिति । निरुक्ताभावानामनुगतैकधर्माभावात्तम इत्यनुगताकारप्रतीतिर्न स्यादिति भावः । ननु यावन्ति तादृशतेजांसि तेषां तथा-

ज्ञानस्य तेजःसामग्र्याश्च विरहेऽपि तेजोविशेषात्यन्ताभावप्रागभावानां प्रत्यक्षानभ्युपगमाच्च। प्रागभावप्रत्ययोऽपि च प्रतियोगिवृत्तित्वघटत्वादिप्रकारकज्ञानसाध्यो न प्रतियोगिज्ञानमपेक्षते। अथ घटो भविष्यतीति प्रत्यक्षं प्रतियोगिविशेषितं प्रागभावमवगाहते। न च प्राचीनास्तत्प्रतियोगिनः, तत्प्रतियोगित्वावगाहने च भ्रम-

---

विधैकप्रतियोगिकाभावविशिष्टेनापरप्रतियोगिताकाभावेन विशिष्टमन्यप्रतियोगिकाभावमुपादाय तेनापि विशिष्टमपरापरप्रतियोगिताकाभावत्वमेवानुगमकं वाच्यमत आह गौरवादिति। अनन्तानामभावानां तमःप्रतीतिविषयत्वकल्पनामपेक्ष्य तेजोविशेषसामान्याभावस्यैव तादृशप्रतीतिविषयतायां लाघवादिति भावः। ननु तेजोविशेषसामान्याभावस्य सन्निकर्षदशायां तत्तत्तेजोभावस्यापि सन्निकृष्टतया तेषामपि तमःप्रतीतिविषयताधौव्यात् कुतो गौरवमत आह तेजोविशेषेति। तेजोविशेषत्वादिज्ञानविरहे तेजोविशेषात्यन्ताभावप्रत्यक्षानुपगमादिति योजना। तथा च विशिष्टप्रतियोग्यनुपस्थितौ तेजस्त्वादिसामान्यलक्षणास्वीकारेपि नाभावसमुदायस्य प्रत्यक्षसम्भव इति व्यर्थं तत्प्रत्यासत्त्येति भावः। तेजःसामग्रीति। तथा च प्रागभावस्य प्रतियोगिसामग्रीव्यङ्ग्यत्वात्तेजःसामग्रीविरहदशायामन्धकारप्रतीतिर्न स्यादिति भावः। ननु भाविप्रतियोगिकप्रागभावव्यक्तिप्रत्यक्षस्य तादृशप्रतियोगिव्यक्तिज्ञानं विनाऽनुत्पादात्तदर्थं सामान्यलक्षणाऽऽवश्यकीत्यत आह प्रागभावेति। तथा च घटप्रागभाव इति प्रत्यक्षस्य विशिष्टवैशिष्ट्यबुद्धितया घटत्वप्रकारकज्ञानमात्रं तत्र हेतुर्न तु प्रतियोगिव्यक्तीनां तत्र प्रवेश इति भावः। ननु घटादिप्रतियोगिविशेषितप्रागभावप्रत्यक्षे घटादेर्भानार्थं तस्यावश्यं सन्निकर्षो वाच्यः स च लौकिकप्रत्यासत्तिबाधादगत्यैव ज्ञानलक्षणासम्पादकत्वेन सामान्यलक्षणायां पर्य्यवस्येदित्याशङ्क्य अथेत्यादिना। इति प्रत्यक्षम्। इत्याकारशब्दप्रयोजकप्रत्यक्षं घटीयप्रागभावो वर्तमान इत्याकारप्रत्यक्षमिति यावत्। यथाश्रुतं घटस्य विशेष्यतयैव भानात् प्रतियोगिविशेषितमित्यादेरसङ्गत्यापत्तेः। भ्रमत्वमि-

त्वम् । नचाऽनागते घटे प्रत्यासत्त्यन्तरमस्ति, अतः सामान्यप्रत्यासत्त्या घटत्वेनानुभूतं स्मृतञ्च तं तदालम्बते । न च चरमकारणरूपसामग्रीव्यङ्ग्यः प्रागभावो वाच्यः, अन्यथा तदप्रसवात्तस्याः

ति । प्रसज्येतेति शेषः । प्रतियोगितासम्बन्धेन तत्तद्घटाभाववति घटत्वादिप्रकारेणापि तादृशसम्बन्धेन तत्तद्घटावगाहिनो ज्ञानस्य भ्रमत्वादिति भावः । स्मृतमिति । यद्यपि घटत्वप्रकारकानुभवस्यैव प्रत्यासत्तित्वात्तदुत्तरं घटो भविष्यतीति प्रत्यक्षमेव भाविघटं विषयीकृत्योत्पत्तुमर्हति, तथाप्युक्तप्रत्यक्षे प्रागभावांशे भाविघटस्य विशेषणतया तस्य ज्ञानं पूर्वमपेक्षितमित्याशयेन स्मृतं चेत्युक्तम् । तत्रापि स्मृतत्वमविवक्षितं किं तु ज्ञानमात्रम् । तेन घटत्वसामान्यलक्षणाजन्यानुभवादपि घटविशेषितप्रागभावप्रत्यक्षस्य क्वचित्सम्भवान्न न्यूनत्वम् । सामान्यलक्षणाप्रत्यासत्तेः स्वाश्रयमुख्यविशेष्यकप्रत्यक्षं प्रत्येव जनकत्वात्तादृशप्रत्यासत्त्या प्रागभावविशेषणत्वेन घटस्य प्रत्यक्षं न सम्भवतीत्यतः स्मृतमित्युक्तमित्यप्याहुः । तं भाविघटम् । तत् घटो भविष्यतीत्याकारकप्रत्यक्षम् । नव्यास्तु प्रतियोगिविशेषितामित्यस्य प्रतियोगिविशेष्यकमित्यर्थः । तच्च प्रत्यक्षविशेषणम् । तेन घटो वर्तमानप्रागभावप्रतियोगीत्याकारकस्यैव प्रत्यक्षस्य लाभः । घटत्वेनानुभूतं स्मृतं चेत्यत्र चकारोपि वाकारार्थः, तेन क्वचित्सामान्यप्रत्यासत्त्या घटत्वेनानुभूतं क्वचिच्च तादृशानुभवबलादघटत्वेन स्मृतमेव भावि घटं घटो भविष्यतीति प्रत्यक्षं सामान्यप्रत्यासत्तिबलादालम्बत इत्यर्थः । तेन घटीयो वर्तमानप्रागभाव इति प्रत्यक्षस्य भाविघटप्रागभाव एव घटत्वप्रकारेण प्रतियोगितया घटान्तरावगाहित्वेपि न भ्रमत्वं प्रतियोगितासम्बन्धेन घटत्वावच्छिन्नाभाववत्येव तादृशसम्बन्धेन घटत्वावच्छिन्नप्रकारताकज्ञानस्य तादृशसम्बन्धेन घटत्वावच्छिन्नस्य भ्रमत्वादिव्युक्तावपि न क्षतिरिति प्राहुः । न चेति । द्वितीयवाच्यमित्यनेनान्वयः । कारणान्तरप्रवेशे गौरवादाह चरमकारणेति । प्रतियोगिन इत्यादिः । अन्यथा । चरमकारणासत्त्वदशायाम् । तस्याः । सामग्र्याः । तथात्वे । प्रागभावव्यङ्ग्यत्वे ।

स्वरूपसत्त्वाः स्वरूपेण वा ज्ञातायास्तथात्वेऽतिप्रसङ्गात् व्याप्यत्वेन गृहीतायास्तथात्वं वाच्यं तथा च तद्धेतुका प्रागभावस्यानुमितिरेव तावत्कालं प्रागभावस्यासत्त्वेन प्रत्यक्षायोगाच्चेति वाच्यम् । यादृशकारणकलापानन्तरं कार्योत्पादो दृष्टस्तदबुद्धेरेव

अतिप्रसङ्गादिति । सामग्र्यां प्रागभावव्यभिचारग्रहदशायामपि तत्प्रत्यक्षप्रसङ्गादित्यर्थः । तत्त्वं प्रागभावव्यञ्जकत्वम् । तद्धेतुका । सामग्रीहेतुका । न च सामग्र्याः प्रागभावव्याप्यत्वग्रहेपि पक्षधर्मतानिश्चयाभावात्कथमनुमितिरिति वाच्यम् । घटप्रागभावव्याप्यघटसामग्र्याः कपालवृत्तित्वसन्देहेपि प्रागभावप्रत्यक्षस्यानुत्पादेन प्रत्यक्षानुरोधेनापि पक्षधर्मतानिश्चयस्यावश्यं वाच्यत्वादिति भावः । अनुमितिरेवेति । तथा च तस्यां पूर्वागृहीतस्यापि घटादेः पक्षधर्मताबलादेव भानमविरुद्धम्, अनुमितौ व्यापकतावच्छेदकप्रकारेण ज्ञानस्यैव तन्त्रत्वादिति भावः । ननु कपालादौ प्रागभावव्याप्यसामग्र्याः परामर्शेपि घटप्रागभावस्य नानुमितिः समानविषये लौकिकप्रत्यक्षसामग्र्या बलवत्त्वादत आह तावत्कालमिति । सामग्र्यां प्रागभावव्याप्त्यादिग्रहकालपर्यन्तमित्यर्थः । असत्त्वेनेति । न च यत्र चरमकारणोत्पत्तिक्षणे तत्पूर्वक्षणे वा प्रागभावव्याप्यतया चरमसामग्र्याः परामर्शस्तत्रोत्तरकालं प्रागभावप्रत्यक्षे बाधकाभावः पूर्वं प्रागभावात्मकविषयस्य सत्त्वादिति वाच्यम् । प्रागभावव्याप्यचरमकारणवत्तायाः स्मृत्यादिसाधारणनिर्णयमात्रस्याऽतिप्रसक्तत्वात्तल्लौकिकनिर्णयस्यैव हेतुतया पूर्वं तदसम्भवादिति भावः । तदबुद्धेरेवेत्येवकारेण व्याप्यत्वादिधीव्युदासः । तथा च कार्योपधायकत्वेन चरमकारणवत्तालौकिकप्रत्यक्षमेव प्रागभावस्य व्यञ्जकमतः स्वरूपतस्तदनुभवे कार्योपधायकतत्स्मरणे वा न प्रागभावप्रत्यक्षम् । एतदभिप्रेत्यैवोक्तं कार्योत्पादो दृष्ट इति। के चित्तु यादृशस्य प्रागभावप्रत्यक्षकारणकलापस्यानन्तरं कार्यीभूतस्य प्रागभावप्रत्यक्षस्योत्पादो दृष्टः प्रमाणसिद्धः तदबुद्धेरेव तादृशकारणकलापान्तर्गतबुद्धिव्यक्तेरेव प्रागभावव्यञ्ज-

व्यञ्जकत्वाभ्युपगमात् अनुयोगितात्रिशेषादिरूपप्रागभावत्वादेः क्व चिदप्रतीतौ तादृप्येणानुमानासम्भवाच्चेति चेत् । भविष्यत्त्वं हि न वर्त्तमानप्रागभावप्रतियोगित्वम्, श्वो भाविन्यद्य भविष्यतीति

कत्वोपगमादित्यर्थः । तथा च प्रागभावव्याप्यत्वाद्यविषयकस्यापि चरमकारणविषयकतज्ज्ञानस्यैव विशिष्य प्रागभावप्रत्यक्षहेतुत्वोपगमान्न तस्याप्यनुमितिरिति भावः । तेन स्वरूपतो ज्ञानादिकमादाय नातिप्रसङ्गलेशोपीत्याहुः । ननु प्रागभावव्याप्यचरमसामग्रीमत्त्वज्ञानमेव प्रागभावग्रहे हेतुः परामर्शस्याऽनुमितिहेतुतायाः कल्पत्वात् न तु कार्योपधायकतया सामग्रीमत्त्वज्ञानं तथा, कारणान्तरकल्पनागौरवात् । एवं चान्यत्र समानविषये प्रत्यक्षसामग्र्या बलवत्त्वेपि अत्र तदकल्पनात् प्रागभावस्यानुमितिरेव जायतामतः प्रत्यक्षासत्त्वेऽनुमानमपि प्रागभावस्य दुर्घटमित्याह अनुयोगितेति । अनुयोगित्वं घटादिनिष्ठप्रतियोगितानिरूपितस्वरूपसम्बन्धविशेषः । आदिपदादखण्डोपाधिरूपस्य प्रागभावरूपत्वस्य परिग्रहः । प्रागभावत्वादेरित्यादिपदात्तदीयव्याप्त्याद्युपग्रहः । तादृप्येण प्रागभावत्वरूपेण । असम्भवादिति । तथा चानायत्यैव तत्प्रत्यक्षमास्थेयमिति भावः । घटो भविष्यतीतिशब्दाभिलप्यमानोर्थ एव यदि भविष्यत्त्वं तदा तस्यातीन्द्रियत्वेन प्रत्यक्षमेव नास्ति कुतस्तत्र प्रतियोगिविषयताया रक्षायै सामान्यलक्षणा स्वीकार्येत्याशयेनाह भविष्यत्त्वं हीति । भविष्यतीति पदाभिलप्यमानं हीत्यर्थः । [गुरवस्तु ननु घटो भविष्यतीतिशब्देनाभिलप्यमानो योऽर्थस्तज्ज्ञानमेव प्रत्यक्षं किं वा कार्यानुत्पाददशायामिह कपाले घटो नास्तीत्याकारकमिहेदानीं घटो नास्तीत्याकारकं वा नाद्य इत्याह भविष्यत्त्वं हीति । द्वितीयादिवितर्कितस्य पश्चादुदूष्यत्वादिति प्राहुः ।] नष्टादावपि भविष्यतीतिप्रयोगापत्तेरत उक्तं वर्तमानेति प्रागभावविशेषणम् । तच्च तत्प्रयोगकालीनत्वम् । श्वो भाविनीति । श्वो भाविघटीयप्रागभावस्याद्यापि वर्तमानत्वात् । न चाद्यादिकालस्य प्रतियोगिन्येवान्वयः, तथा सत्यद्य भाविनि परश्वो भविष्यतीति प्रसङ्गात् अद्य भाविनः परश्वोपि

प्रसङ्गात्। किन्तूत्पत्स्यते भविष्यतीत्यादेः समानार्थकत्वाद्वर्त्तमानप्रागभावप्रतियोग्युत्पत्तिकत्वं वर्त्तमानकालोत्तरकालोत्पत्तिकत्वं वा तत्त्वम्। न चेदमध्यक्षम्, उत्पत्तेरतीन्द्रियत्वात्। इहाऽद्य घटो भविष्यतीत्यादौ च तादृशोत्पत्तेर्देशविशेषः कालविशेषश्चाधिकरणत्वेन प्रतीयते न तु प्रागभावस्योत्पत्तिमतो वा। अत

वृत्तेः। नापि प्रागभावे प्रतियोगिनि चोभयत्र कालादेरन्वयान्नैवमिति युक्तम्। आद्यक्षणे घटो भविष्यतीति प्रयोगानुपपत्तेः। घटतत्प्रागभावयोरेकक्षणावृत्तित्वादिति भावः। उत्पत्तिरवश्यं भविष्यत्त्वघटिकेत्यत्र हेतुः समानार्थकत्वादित्यन्तम्। स्वयं प्रागभावास्वीकारादाह वर्तमानकालेति। अत्रोत्पत्तिरपि ध्वंसघटिता ग्राह्या। इदं निरुक्तभविष्यत्त्वम्। अतीन्द्रियत्वादिति। तथा चानुमानादिनैव तज्ज्ञानं वाच्यमित्यनागतभानार्थं न सामान्यप्रत्यासत्त्यादरः। यद्यपि भविष्यत्त्वस्यातीन्द्रियत्वेपि भाविघटविशेषिततदलौकिकप्रत्यक्षानुरोधेनैव सामान्यप्रत्यासत्तिरावश्यकी तस्य प्राचीनघटावगाहित्वे तु भ्रमत्वापत्तेः, तथापि वक्ष्यमाणक्रमेण शब्दादनुमानाद्वा घटत्वादिप्रकारेण भाविनो घटादेर्ज्ञानोत्पत्त्या विनापि सामान्यलक्षणां भाविघटादेर्भविष्यत्त्वभानं भविष्यतीति सिद्धान्तनिर्गवः। ननूक्तेपि भविष्यत्त्वे कालादेस्तद्घटकप्रागभावान्वयित्वे पूर्वोक्तातिप्रसङ्गतादवस्थ्यमत आह इहेति। इत्यादौ इत्यादिप्रयोगे। तादृशोत्पत्तेः। विद्यमानप्रागभावप्रतियोग्युत्पत्तेः। देशविशेषः कपालादिः। कालविशेषश्च अद्येत्यादिः। अधिकरणत्वेनेति। प्राचां मते भेदार्थकविभक्तिसमवधानस्थले नामार्थधात्वर्थयोरपि भेदेनान्वयस्योपगमात्। अधिकरणताविशेषणत्वेनेति वार्थः। तथा च इहाद्य घटो भविष्यतीत्यादौ वर्तमानप्रागभावप्रतियोगिनी या एतत्कपालादिवृत्तिरद्यादिकालवृत्तिरुत्पत्तिस्तदाश्रयो घट इत्याकारः शाब्दबोधः। उत्पत्तिमतो वेति। अधिकरणत्वेन प्रतीयत इत्यनुषङ्गनीयम्। कालस्य प्रागभावान्वये श्वो भाविन्यद्य भविष्यतीति प्र-

एव कपालनाशजन्यघटनाशस्य घटाद्यात्मकतत्प्रागभाववत्त्वेपि तत्र कपाले नेह घटध्वंसो भविष्यतीति बुद्धिः, न वा भवने श्वः समुत्पद्य प्राङ्गणे परश्वो गमिष्यति मैत्रे प्राङ्गणे परश्वो भविष्यतीति धीः। अत्र च धातुनोत्पत्तिः प्रत्याय्यते प्रत्ययेन च धात्वर्थनिष्ठं

योगप्रसङ्गस्य पूर्वमुक्तत्वाद्देशस्य प्रागभावान्वये दोषमाह अत एवेति। यतो न प्रागभावे देशकालयोरन्वयोऽत एवेत्यर्थः। घटादीत्यादिना घटप्रागभावसंग्रहः। तत्रापि घटध्वंसप्रागभावत्वस्य प्राच्यैः स्वीकारात्। तत्प्रागभावेति। घटनाशप्रागभावेत्यर्थः। तत्र स्वनाशनाश्यघटके कपाले। नेत्यस्य बुद्धिरित्यनेन सम्बन्धः। न च घटध्वंसस्य प्रागभावो न घटादिः किं त्वतिरिक्त एव स च तादृशकपाले नास्तीति नोक्तदोष इति वाच्यम्। प्राचां मतेनोक्तत्वात्, नव्यमतेपि देशविशेषस्योत्पत्तिविशेषणतयैवान्वयस्यानुभविकत्वादिति भावः। उत्पत्तिमति देशकालयोराधिकरण्येनान्वये दोषमाह न वेति। न चोत्पत्तिमति प्रागभावे चोभयत्रैव देशकालयोरन्वयो वक्तव्य इति प्रागभावस्य परश्वःप्राङ्गणयोरसत्त्वान्न दोष इति वाच्यम्। आघक्षणे घटो भविष्यतीति प्रयोगानुपपत्तेः। घटतत्प्रागभावयोरेकक्षणावृत्तित्वादिति भावः। परश्वः प्राङ्गणे गच्छति गते वा मैत्रे तदीयोत्पत्तेर्विद्यमानप्रागभावप्रतियोगित्वमेवाऽसम्भवीत्यत उक्तं गमिष्यतीति। ननु भूधातुस्यतिप्रत्ययाभ्यामुत्पत्तिद्वयोपस्थापनाद्घटो भविष्यतीत्यादौ विद्यमानप्रागभावप्रतियोग्युत्पत्तिमानित्यन्वयबोधेऽनुभवविरोध इत्यतं आह अत्र चेति। गगनं द्रव्यं भवतीत्यादौ द्रव्यात्मकविशेषणसम्बन्धस्यानुभवात् द्रव्यादितादात्म्यमेव भुवः शक्यं समभिव्याहृतद्रव्यादिपदस्य तत्तदर्थे तात्पर्यग्राहकत्वात् तादात्म्यमात्रस्य भूशक्यत्वे नामार्थस्य द्रव्यादेर्धातूपस्थाप्ये तत्र भेदान्वयानुपपत्तेः अस्तुचाऽस्तित्वलक्षणं स्वरूपसत्त्वमेव भुवः शक्यं न तूत्पत्तिगौरवादित्याशयेनोच्यत इत्यपहाय प्रत्याय्यत इत्येवोक्तं प्रतीतिस्तु लक्षणयापि सम्भवतीति भावः। तादृशेति। विद्यमानप्रागभावप्रतियो-

तादृशप्रतियोगित्वं तादृशकालीनत्वं वा। नङ्क्ष्यति नश्यति नष्ट इत्यादौ तु प्रत्ययेन यथायथमनागता वर्त्तमानाऽतीता चोत्पत्तिः

गित्वमित्यर्थः। स्वयं प्रागभावास्वीकाराह तादृशेति। वर्तमानकालोत्तरकालीनत्वं वेत्यर्थः। प्रत्याय्यत इत्यनुषज्यते। प्राञ्चस्तु भूसत्तायामिति शाब्दिकस्मृतेरिहानुशासनात् घटो भविष्यतीत्यादौ धातोः कालसम्बन्धरूपं सत्तामात्रमर्थः तदुत्तरप्रत्ययस्य तु वर्तमानप्रागभावप्रतियोगित्वं कालादिबोधकाद्यादिपदस्थसप्तम्यास्तूत्पत्तिरर्थः शरदि पुष्पन्ति सप्तच्छदा इत्यादौ सप्तम्यास्तदर्थकत्वव्युत्पादनादेव चैतद्देशोत्पत्तिकैतत्कालोत्पत्तिका च या विद्यमानप्रागभावप्रतियोगिनी स्वरूपसत्ता तदाश्रयो घट इत्यन्वयाकार इत्याहुः। तत्पुनरिहाद्य घटो भविष्यतीत्यादावन्वयबोधस्य सकृदेवोत्पत्तिविषयकत्वानुभवात् स्वरूपसत्त्वानुभवाच्च दीर्घातिकृतापेक्षितमिति स्मर्तव्यम्। ननु वर्तमानप्रागभावप्रतियोगितामात्रस्यैव प्रत्ययार्थत्वे सम्प्रतिपत्त्यादेर्भविष्यत्तायामनुशासनविरोधः स्यादतो नशादिधातूत्तरस्यैव स्थितिप्रभृतेर्भविष्यत्तावोधकत्वमुपपादयति नङ्क्ष्यतीति। ननु धातूत्तरप्रत्ययस्योत्पत्त्यर्थकत्वं न कुत्रापि दृष्टचरमतो दृष्टान्तमाह नश्यति नष्ट इत्यादौ चेति। आख्यातकृद्भेदेन दृष्टान्तद्वयोपन्यासः। यथायथं यथाक्रमम्। उत्पत्तिरिति। प्रत्याय्यत इत्यनुषज्यते। अत्र च वर्तमानत्वादौ कल्पितशक्तिकानां प्रत्ययानामुत्पत्तौ लक्षणा शक्यलक्ष्ययोस्तु परस्परमन्वयाद्विशिष्टलाभ इत्यवधातव्यम्। यद्यपि कारकविभक्त्यर्थस्य धात्वर्थान्वयित्वानुरोधेन धातुनैवोत्पत्तिर्नाशश्च प्रत्याय्यत इत्येव वक्तुमुचितम्, तथापि प्रत्ययं विना कृतात् केवलनशधातोरुत्पत्तिविशिष्टनाशस्याप्रतीतेः प्रत्ययसत्त्वे च प्रतीतेरन्वयव्यतिरेकाभ्यां प्रत्ययस्यैवोत्पत्तिरर्थः स्वभाववैचित्र्याच्च प्रत्ययार्थेनापि क्वचित्कारकसप्तम्यर्थस्यान्वय इत्याशयः। एवं च नङ्क्ष्यतीत्यस्य वर्तमानप्रागभावप्रतियोग्युत्पत्तिको यो नाशस्तत्प्रतियोगितावानित्यर्थः, नश्यतीत्यस्य वर्तमानोत्पत्तिको यो नाशस्तत्प्रतियोगितावानित्यर्थः, नष्ट इत्यादौ च वर्तमानध्वंसप्रतियोग्युत्पत्ति-

तस्यामेव च कालविशेषादिविशेषणत्वेनान्वेति । एतेन श्वोभावि-नाशके परश्वो नङ्क्ष्यतीति नष्टे च नश्यतीति च व्यवहारः स्यात् न स्याच्च नाशस्य विद्यमानत्वान्नष्ट इत्यादिव्यवहारः । न च तत्रातीतकालसम्बन्धित्वं वर्त्तमानत्वं वा निष्ठादेरर्थः, चिर-विनष्टेऽपि पूर्वेद्युर्नष्टोऽधुना वेतिव्यवहारप्रसङ्गादिति परास्तम् । कर्त्तरि विहितेनाख्यातेन कृता वा यथायथमाश्रयत्वप्रतियोगित्व-

---

को यो नाशस्तत्प्रतियोगितावानित्यर्थ इति ध्येयम् । तस्यामेवेति । प्रत्ययोपस्थाप्योत्पत्तावेव न तु प्रकृत्यर्थे नाश इत्यर्थः । ननु भविष्य-त्त्वादौ यत् स्यतिप्रभृतेरनुशासनं तत्र विद्यमानप्रागभावप्रतियोगि-त्वादिपरमेवास्तु भविष्यत्त्वादिपदम् आख्यातस्योत्पत्त्यर्थकत्वं व्यर्थ-मत आह एतेनेति । एतेन उत्पत्तावेव कालविशेषादेर्वर्तमानत्वादे-श्चान्वयेन । इदं च परास्तमित्यन्वयि । नङ्क्ष्यतीति व्यवहारः स्या-दिति योजना । श्वोभाविनाशस्य परश्वोपि सत्त्वादिति भावः । नष्टे चेति । चिरोत्पन्ननाशस्य विद्यमानत्वादिति भावः । न स्या-च्चेति । नष्टे इत्यनुषज्यते । इत्यादिरिति । व्यवहार इत्यनुषज्य-ते । आदिपदेन नष्टवानित्यादिसंग्रहः । क्तप्रत्ययार्थातीत-त्वस्य नाशेऽसम्भवादिति भावः । तत्र नष्ट इत्यादौ । अतीतेति । तथा च नाशस्य विद्यमानत्वेपि अतीतकालसम्बन्धित्वान्नष्ट इत्यादिव्यवहारो नानुपपन्न इति भावः । लाघवादाह वर्तमानत्वं वेति । प्रथमे चिरविनष्टेपि पूर्वेद्युर्नष्ट इति स्यात् चिरोत्पन्ननाशव्य-क्तेरतीतकालसम्बन्धित्वपूर्वदिनवृत्तित्वयोः सत्त्वात्, द्वितीये तु चि-रविनष्टेप्यधुना नष्ट इति स्यात्ताहशनाशस्य वर्तमानत्वादधुनातन-त्वाच्चेत्याह चिरविनष्टेपीत्यादिना । ननु घटो भविष्यति नङ्क्ष्य-तीत्यादौ धात्वर्थोत्पत्तिनाशादेः कथं घटादावन्वयः धात्वर्थनामार्थ-योर्भेदेनान्वयस्याऽव्युत्पन्नत्वादत आह कर्तरीति । भविष्यतीत्यादा-वाश्रयत्वरूपं नङ्क्ष्यतीत्यादौ च प्रतियोगित्वरूपं कर्तृत्वमाख्यातेन प्रत्याय्यते भविष्यन्नित्यत्राश्रयरूपो नष्ट इत्यत्र च प्रतियोगिरूपः क-

लक्षणं कर्तृत्वमाश्रयप्रतियोगिरूपश्च कर्त्ताभिधीयते । कार्यानुत्पाददशायाञ्चाभावधीः सामयिकात्यन्ताभावमवगाहते । न च प्रतियोगिसमवायिनि समयावच्छेदेनात्यन्ताभाववृत्तौ मानाभावः, भाविनि नष्टे वा घटे इह कपाले घटो नास्तीति प्रसयात् । न ह्ययं घटप्रतियोगिकमभावमात्रमवगाहते, यत्किञ्चिद्घटवत्यपि तादृशप्रत्ययप्रसङ्गात् । परन्तु घटत्वावच्छिन्नप्रतियोगिताकम् । न च ध्वंसप्रागभावौ तथा सम्भवतो वा न, तत्र कपाले ततः पूर्वं परतश्च

र्त्तौ कृता कथ्यते तथा च प्रकृते धात्वर्थनामार्थयोरन्वयबोध एव नेति भावः । कृतिस्वरूपकर्तृत्वस्याख्यातकृद्द्वयामनभिधानात् घटादिपदोत्तरमनभिहिताधिकारीयतृतीया स्यादित्याशङ्क्याह्युदासाय कर्तृत्वं कर्ता चेति द्वयोरुपन्यासस्तेन मुख्यभाक्तकर्तृत्वमात्रानभिधानस्थल एव तृतीयेति भावः । ननु घटानुत्पाददशायामिह कपाले घटो नास्तीति प्रतियोगिविशेषितप्रागभावप्रत्यक्षानुरोधादेव सामान्यलक्षणा वाच्येत्यत आह कार्यानुत्पादेति । समयावच्छेदेनेति कालिकाव्याप्यवृत्तित्वसूचनाय । अयं घटोनास्तीत्याकारकप्रत्ययः । तादृशेति । घटो नास्तीत्याकारेत्यर्थः । घटान्तरप्रतियोगिकध्वंसप्रागभावयोस्तत्र सत्त्वादिति भावः । यद्यपि घटप्रतियोगिकाभावमात्रावगाहनेपि न सामान्यलक्षणासिद्धिः पूर्वावगतघटव्यक्तीनां ज्ञानादेव तादृशबुद्धिसम्भवात्, तथापि वस्तुगतिमनुरुध्येदम् । प्रतियोगितामकमिति । अभावमवगाहत इत्यनुषञ्जनीयम् । तथेति । घटत्वावच्छिन्नप्रतियोगिताकाविति्यर्थः । ध्वंसप्रागभावयोः सामान्याभावत्वस्वीकारेपि तत्र कपाले न तत्सम्भव इत्याह सम्भवतो वेति । इदमपि वस्तुगतिमनुरुध्य । अन्यथा घटत्वावच्छिन्नध्वंसादेः सत्त्वेपि तत्प्रत्यक्षस्य घटत्वेन यत्किञ्चिद्व्यक्तिज्ञानादेव सम्भवेन तदनुरोधात् सामान्यप्रत्यासत्तेरसिद्धेरिति ध्येयम् । ततः पूर्वमिति । तादृशप्रतीतिपूर्वमित्यर्थः । तत्र कपाले । न च इत्यनुषज्यते । न च भाविनष्ट-

बहूनां घटानां नष्टत्वादुत्पत्स्यमानत्वाच्च । अथैवं कपालादौ कथं घटध्वंसादिशून्यताबुद्धिः अत्यन्ताभावस्य ध्वंसाद्यविरोधित्वादिति चेत् । तत्तदधिकरणस्वरूपादतिरिक्तादेवानुगतादभावाद्वा इहेदानीं घटप्रागभाव इति च प्रत्ययो न लोकानाम् । अथैवं

योरत्यन्ताभावध्वंसादेरपि सामान्याविच्छिन्नप्रतियोगिताकत्वे बाधकाभावः कस्य चिद्घटस्य नाशदशायामेव भाविघटो नष्टः कस्य चिद्घटस्योत्पत्तिदशायां च प्रनष्टघटो भविष्यतीति प्रत्ययापत्तेरेव बाधकत्वादिति भावः । ननु पटात्यन्ताभावस्य पटध्वंसाद्यविरोधित्वे पटध्वंसात्यन्ताभावस्वरूपस्य पटात्यन्ताभावस्य पटध्वंसदशायामपि तन्तौ सत्त्वात् तदानीमपि तन्तौ पटध्वंसो नास्तीति प्रतीतिः स्यात्, अन्यथा तदानीं तन्तौ पटो नास्तीत्यपि प्रतीतिर्न स्यादित्यकामेनापि ध्वंसात्यन्ताभावयोर्विरोधो वाच्य इत्याशयेन शङ्कते अथैवमिति । एवं पटसमवायिन्यपि तदत्यन्ताभावसत्त्वे । कपालादाविति सावधारणम् । तथा च तन्तावपि पटध्वंसदशायां तादृशबुद्धिः स्यादिति भावः । अत्रैव हेतुरत्यन्ताभावस्येत्यादि । त्वन्मते इत्यादिः । तत्तदिति । कपालाद्यात्मकेत्यर्थः । स्वरूपाणामननुगमादभावत्वप्रतीतेर्भ्रमत्वापत्तेः तन्तुस्वरूपाणामतथात्वे पटसमवायित्वदशायां तत्र पटध्वंसशून्यताप्रतीत्यपलापापत्तेश्चाह अतिरिक्तेति । स च पटसत्त्वदशायां तन्तावप्यस्तीति भावः । नन्विहेदानीं घटप्रागभाव इति प्रत्यक्षे भाविनो घटस्य भानार्थं सन्निकर्षसम्पादकतया सामान्यप्रत्यासत्तिरावश्यकीत्यत आह इहेति । न लोकानामिति । तथा च किमनुरोधात्सामान्यलक्षणा स्वीकार्येति भावः । एवमिति । भविष्यति नास्तीत्यादिप्रत्ययानामन्यविषयकत्वे प्रागभावत्वेन प्रतीतेश्चानुपगम इत्यर्थः । प्रागभावस्येव ध्वंसस्याप्यसत्त्वे तदूघटितस्य पूर्वत्वादेः पञ्चाग्निर्वचनमसङ्गतं स्यादतो ध्वंसे प्रमाणोपन्यासपूर्वकं प्रागभावमपाकरोति जात इत्यादिना । उत्पन्नो घटध्वंस इत्याकारबुद्धेरुत्पत्त्यंशे उपनीतभानतया न वस्तुव्यवस्थापकत्वमिति यदि ब्रू-

जातो घट इत्यादिवदुत्पन्नो घटध्वंस इत्यादिविलक्षणप्रत्ययबलेन नाशोऽतिरिच्यतां न तु प्रागभावः, पूर्वत्वतत्पूर्वत्वादिव्यवहारश्चातीतकालवृत्तित्वतदुत्पत्तिकालीनध्वंसप्रतियोगिकालवृत्तित्वादिविषयक एवास्तु, दुःखात्यन्ताभावस्य स्वस्मिन्नुत्तरकालानुवृत्ति

यात्तदा घटादेरप्युत्पत्तिर्न स्यात्तुल्यत्वादित्यावेदयितुं जातो घट इत्यादिवदित्युक्तम्। अतिरिच्यतामिति। अत्यन्ताभावादित्यादिः। नत्विति। प्रागभावशब्दोपि प्राक्कालवृत्त्यभावबोधकतया वाक्यमेव न तु पदमिति भावः। ननु प्रागभावकालावृत्तित्वरूपं सामान्यतः पूर्वत्वं तत्प्रागभावकालवृत्तित्वरूपं च तत्पूर्वत्वं विना प्रागभावं दुर्वचमत आह पूर्वत्वेति। तत्पूर्वत्वादीत्यादिपदेन तदव्यवहितपूर्वत्वसंग्रहः। तच्च तदुत्पत्तिक्षणोत्पत्तिकध्वंसप्रतियोगिकालवृत्तित्वम्। सामान्यतः पूर्वत्वमतीतकालवृत्तित्वम्। तच्च ध्वंसप्रतियोगिकालवृत्तित्वम्। महाप्रलयवारणाय प्रतियोग्यन्तस्यावश्यकत्वादिति भावः। तदुत्पत्तीत्यादि। स्वस्यापि स्वद्वितीयक्षणादिवृत्तिध्वंसप्रतियोगिनि प्रथमादिक्षणे वृत्तेः सर्वस्यैव स्वपूर्वत्वापत्तिरत उक्तं तदुत्पत्तीति। अत्र च तदुत्पत्तिस्तदधिकरणसमयध्वंसानधिकरणसमयमात्रं न तु तत्सम्बन्धोपि निवेश्यो वैयर्थ्यात्। स्वोत्पत्तिकालीनात्यन्ताभावप्रतियोगिस्वद्वितीयक्षणादिवृत्तित्वमपि सर्वस्यास्तीति पूर्वदोषतादवस्थ्यमतो ध्वंसेत्युक्तम्। नष्टघटादिगोचरज्ञानादिव्यक्तीनां स्वोत्पत्तिक्षणवृत्तिध्वंसप्रतियोगिनि घटादौ विषयतया वर्तमानत्वेन स्वपूर्वत्वापत्तिरतः कालेति कालिकसम्बन्धेन वृत्तित्वप्रापकम्। ननु दुःखप्रागभावस्योत्तरकालानुवृत्तिमुद्दिश्य प्रायश्चित्तादौ प्रवृत्त्यन्यथानुपपत्त्यैव प्रागभावः सेत्स्यतीत्यत आह दुःखात्यन्ताभावस्येति। अत्यन्ताभावस्य स्वत एवोत्तरकालानुवृत्तेः सम्भवात् प्रायश्चित्तमनुपयुक्तं स्यादत उक्तं स्वस्मिन्निति। ननूत्तरकालसम्बन्धानियामिकायां तदनुवृत्तौ प्रायश्चित्तं न हेतुस्तस्याः कलुषकारणाधीनत्वात् दुःखात्यन्ताभावस्य तु नित्यत्वान्न तत्र प्रायश्चित्तस्य हेतुत्वं

दुःखसाधनध्वंसं वा समुद्दिश्य क्रियाविशेषे प्रवृत्तिरस्तु । मानान्तरसिद्धं हि प्रयोजनमुद्दिश्य पुमांसः प्रवर्त्तन्ते न तु प्रवृत्त्यैव तत्सिद्धिः, उत्पन्नस्य पुनरुत्पादप्रसङ्गश्च लाघवात्कार्यादेः प्रतिब-

---

सम्भवतीत्यत आह दुःखसाधनेति । तथा च दुःखसाधनीभूतपापनाशं प्रति एव प्रायश्चित्तं हेतुस्तस्य च दुःखात्यन्ताभावसुखतत्साधनान्यत्वेपि द्विष्टाभावत्वेनैवेष्टत्वमिति स्वयमेव बौद्धाधिकारदिप्पण्यां व्यवस्थापितमिति भावः । [ननु यद्यपि इयं प्रवृत्तिः सफला प्रेक्षावत्प्रवृत्तित्वादित्यनुमानस्य दुःखसाधनध्वंसादिफलकतया न तथासिद्धिः, तथापि इयं प्रवृत्तिः प्रागभावभावफला प्रागभावोद्देश्यकप्रवृत्तित्वादित्यनुमानात्फलत्वेन प्रागभावः सिद्ध्येदित्यत आह प्रमाणान्तरेति । मानान्तराभावात्साध्यसाधनयोरप्रसिद्ध्या न तादृशानुमितिरिति भावः ।] नत्विति । प्रवृत्तेः प्रयोजनज्ञानाधीनतया तदन्यथानुपपत्त्या प्रयोजनकल्पनेऽन्योन्याश्रयप्रसङ्गादिति भावः । ननु प्रागभावासत्त्वे जातस्यापि घटस्य द्वितीयादिक्षणे पुनरुत्पादप्रसङ्गः कपालसंयोगाद्यात्मकसामग्र्यास्तदानीमपि सत्त्वात् । न चापाद्यस्य पुनरुत्पादस्याप्रसिद्धिः । एतद्घटद्वितीयक्षणो यद्येतद्घटसामग्रीक्षणः स्यादेतद्घटोत्पत्तिप्राक्क्षणः स्यादित्यापादनसम्भवात् । न चात्र सामग्रीपदेन दण्डचक्रादिमात्राभिधाने सर्वैरेव घटद्वितीयक्षणस्यैव तद्वत्त्वोपगमाद्विपर्ययापर्यवसायित्वं प्रागभावादिघटितकारणकूटस्याभिधाने चापादकाप्रसिद्धिरिति वाच्यम् । स्वकारणांभूतदण्डचक्रादिविशिष्टोयं घटो यदि दण्डचक्राद्यतिरिक्तकारणको न स्यात् जन्यत्वे सति तद्घटोत्पत्त्युत्तरवृत्त्यत्यन्ताभाववान्न स्याद्दण्डचक्रादिजन्यस्य तत्सत्त्वे जननियमादित्यस्य विवक्षितत्वात् । वस्तुतो घटोत्पत्तिक्षणो यदि तद्घटजनकतावच्छेदकधर्मावच्छिन्नाभाववान्न स्यात्तद्घटोत्पत्तिप्राक्क्षणः स्यादित्येवापादनियमतो न कश्चिद्दोष इत्यत आह उत्पन्नेति । तथा च जन्यद्रव्यसामान्यं प्रत्येव द्रव्यादिसामान्याभावत्वेन हेतुत्वादुत्पन्नस्य घटादे-

द्वितीयादिक्षणे पुनर्नोत्पादः । न चैवं तन्तुसंयोगनाशान्महापटनाशोत्तरमवस्थितेभ्यस्तन्तुसंयोगेभ्य एव पटान्तरोत्पाददशायां पुनर्महापटोत्पत्तिवारणार्थं प्रागभावस्य हेतुत्वमावश्यकं द्रव्यसामान्याभावस्य प्राक्सत्त्वात्कार्योत्पत्तिक्षणे कार्येण प्रतिबन्धासम्भवादिति वाच्यम् । तत्र विनष्टतन्तुसंयोगव्यक्तेर्महापटं प्रति विशिष्य हेतुत्वात् तदभावादेव तदानीं महापटोत्पत्त्यसम्भवात् अतिरिक्तस्य प्रागभावधर्मिणः कल्पनामपेक्ष्य कल्पितायास्तन्तुसंयोगव्यक्तेरेव विशिष्य महापटं प्रति हेतुतायाः कल्पनार्हत्वात् । न च तन्तुसंयोगव्यक्तेरिव तत्समनियतसंयोगान्तराणामपि विनिगमनाविरहाद्विशिष्य हेतुत्वापत्तिः । तेषामन्यथासिद्धत्वस्य सर्वसम्मतत्वात् न चैवमपि महापटोत्पत्तिदशायामेवोक्तस्थले भाविखण्डपटोत्पत्तिः स्यात्कार्यस्य पूर्वमसत्त्वेन प्रतिबन्धायोगादिति वाच्यम् । महापटध्वंसस्याप्युत्तरपटं प्रति विशिष्य हेतुत्वादन्यथा प्रागभाववादिनामपि तत्र प्रतीकारानुपपत्तेरिति सङ्क्षेपः । लाघवादिति । न च प्रागभावस्वीकारेपि कार्यस्य प्रतिबन्धकत्वमावश्यकमन्यथा यत्र पटोपष्टब्धतन्तावेव तत्त्वन्तरस्यारम्भकः संयोगस्तत्र पूर्वं पटसत्त्वेपि तन्नाशोत्तरभाविपटस्य पटोपष्टब्धतन्तावुत्पत्तिसङ्गात्तत्प्रागभावस्य सत्त्वात् तथा च लाघवोपन्यासोऽनुचित इति वाच्यम् । तत्रैव पटानुपष्टब्धोदासीनतन्तावुत्तरपटस्य तदानीमुत्पत्तिवारणार्थं पूर्वपटध्वंसस्योत्तरपटं प्रति हेतुतावश्यकत्वे प्रागभाववादिना कार्यस्य क्वापि प्रतिबन्धकत्वाकल्पनात्। अन्यथोदासीनतन्तौ द्रव्यसामान्याभावस्य तदानीमपि सत्त्वात्तत्रोत्तरपटस्य तदानीमुत्पत्तावेकतन्तुकपटस्वीकारापत्तेरिति भावः । कार्यादेरित्यादिपदेन कार्यसमकालोत्पत्तिकध्वंसानां परिग्रहः । तेन निर्विकल्पकव्यक्तीनां तृतीयक्षणे नाशेपि चतुर्थक्षणे पुनर्नोत्पादः । तत्तन्निर्विकल्पकसमकालोत्पन्नध्वंसैः प्रतिबन्धात्।अन्यथा निर्विकल्पककहेतुभूतायाः सन्निकर्षादिव्यक्तेस्तृतीयक्षणेप्यनुवृत्तेश्च चतुर्थक्षणे पुनस्तदुत्पत्तिप्रसङ्गात् । यद्यपि निर्विकल्पकसमकालोत्पन्नानन्तध्वंसव्यक्तीनां तत्तन्निर्विकल्पकं प्रति विशिष्य प्रतिबन्धकत्वकल्पनामपेक्ष्य लाघवादेकः प्रागभाव एव हेतुः कल्पयितुमुचितस्तस्य च कारणत्वेनैव धर्मिग्राहकप्रमाणतः सिद्ध्या नेतरैर्विनिगमनाविरहः । न च तत्तन्निर्विकल्पकसमकालोत्पन्नवस्त्वन्तरप्रागभावव्यक्तीनां । तत्तन्नि-

न्धकत्वेनापि निरसनीयः । तदुत्पत्तिश्च महाप्रलयमनङ्गीकुर्वतां मते स्वाधिकरणसमयध्वंसानधिकरणसमयसम्बन्धः । तदुक्तम् अध्व-

---

र्विकल्पकप्रागभावस्य वा तत्तन्निर्विकल्पकं प्रति हेतुत्वमित्यत्र विनिरगमनाविरहस्तदवस्थ एवेति वाच्यम् । जन्यभावत्वावच्छिन्नं प्रत्येव प्रागभावत्वेन हेतुत्वं तत्र कार्यस्य तादात्म्यं कारणस्य प्रतियोगित्वं सम्बन्ध इत्यनुगतरूपेण हेतुतायामेकवस्तुप्रागभावस्य वस्त्वन्तरहेतुत्वासम्भवात् । तथापि यद्यन्वयव्यतिरेकासिद्धविरोधिनामपि निर्विकल्पकसमकालोत्पन्नध्वंसानां प्रतिबन्धकत्वं परित्यज्य निर्विकल्पकहेतुत्वेन पदार्थान्तरं कल्प्यं तर्हि दाहादावपि मणिमन्त्रादीनां बहूनां प्रतिबन्धकत्वमपेक्ष्य लाघवाद्दाहोपधायकत्वेन वस्त्वन्तरकल्पनाप्रसङ्गस्तस्मात् कल्पितवस्तूनां नियामकत्वासम्भवस्थल एव कारणत्वेन वस्तुसिद्धिरित्याशयः । शेषमशेषमग्रे वक्ष्यामः । सामग्रीक्षणत्वं न कार्योत्पत्तिप्राक्क्षणत्वव्याप्यमप्रयोजकत्वात्, अतिरिक्तप्रागभावकल्पनापत्तिरूपप्रतिकूलतर्कपराहतत्वाच्च । किं तु कार्योत्पत्तिद्वितीयक्षणो यदि सामग्र्यव्यवहितोत्तरक्षणः स्यात् कार्योत्पत्तिमान् स्यादित्येव व्याप्तिस्तत्र च सामग्र्यव्यवहितोत्तरत्वं सामग्रीसमयध्वंसाधिकरणकालध्वंसानधिकरणत्वे सति सामग्रीकालध्वंसाधिकरणत्वरूपं कार्यद्वितीयक्षणादावसिद्धं कार्योत्पादक्षणेनैव व्यवधानादिति कुतस्तेन पुनरुत्पादः प्रसञ्जनीय इत्यादिकं प्रतिबन्धकत्वेनापीत्यपिकारेण ध्वनितम् । ननु तत्पूर्वत्वं तदुत्पत्तिकालीनध्वंसप्रतियोगिकालवृत्तित्वरूपं प्रागुक्तं तत्र चोत्पत्तिस्तदधिकरणावृत्तिप्रागभावप्रतियोगिसमयसम्बन्धरूपैव निविष्टा सा च विना प्रागभावं दुर्वचेत्यत आह तदुत्पत्तिश्चेति । स्वाधिकरणेति । यस्योत्पत्तिर्लक्ष्या तदेव घटादिकं स्वपदेन ग्राह्यम् । तथा च तदधिकरणसमयध्वंसानधिकरणेन सार्द्धं तस्य समयसम्बन्धः कालिकसम्बन्धस्तदुत्पत्तिरित्यर्थः । घटाद्युत्पत्तिक्षणस्यापि विषयित्वव्यभिचारादिसम्बन्धेन घटाद्यधिकरणीभूतं यत्पूर्वोत्पन्नज्ञानादिकं तदध्वंसाधिकरणत्वादुत्पत्तिमात्रेऽसम्भवः स्यादतः कालिकसम्बन्धेन स्वाधिकरणत्वलाभार्थमाद्यं समयपदम् । इह हेतावुपाधिर्नेहोपाधिरित्यादिप्रतीत्या व्यभिचारादिस-

त्सक्षणयोगस्य क्षणयोगो जनिर्मतेति । क्षणः समयः । तदङ्गी-
कारे तु क्व चिदपि यदीयसमयसम्बन्धे यत्समयवृत्तिध्वंसप्रतियो-

म्बन्धस्याप्यधिकरणत्वनियामकतायाः स्वयमेवाग्रे वक्ष्यमाणत्वात् । अस्तु वा नष्टघटादिगोचरस्य ज्ञानादेरुत्पत्तावव्याप्तिवारकं तत् । अन्यथा तादृशज्ञानोत्पत्तिक्षणस्यापि विषयतया तज्ज्ञानाधिकरणीभूतं यन्नष्टघटादि तदूध्वंसाधिकरणत्वेनाव्याप्तिप्रसङ्गात् । घटे ज्ञानमित्यादिव्यवहारबलेन विषयताया वृत्तिनियामकत्वादिति ध्येयम् । तत्तद्घटादिसमयध्वंसानधिकरणीभूतेन तत्तद्घटादिपूर्वोत्पन्नज्ञानादिना विषयत्वादिसम्बन्धस्य पूर्वमपि तत्तद्घटादौ सत्त्वात्तत्रातिव्याप्तिवारणाय द्वितीयसमयपदम् । ननु ध्वंसघटितोत्पत्तिलक्षणे किं मानमित्याशङ्क्यायामाचार्यस्य संवादमाह अध्वस्तेति । न ध्वस्तः क्षणयोगस्तदीयक्षणसम्बन्धो यत्र काले तादृशस्य क्षणयोगः कालिकसम्बन्धस्तस्य जनिरुत्पत्तिरित्यर्थः । तदीयक्षणयोगध्वंसाभावावच्छिन्नस्य वस्तुनः क्षणयोगो जनिरिति वार्थः । क्षणद्वयप्रवेशे वैयर्थ्याद्वयाचष्टे क्षणः समय इति । प्रलयसत्त्वे तदुत्पत्तावव्याप्तिस्तदधिकरणसमयस्य महाकालादेर्ध्वंसाप्रसिद्धेरत उक्तं महाप्रलयानङ्गीकार इति । [अत्र नीलादिविशिष्टघटादेरुत्पत्तिस्तन्नीलादिविशिष्टघटाद्यधिकरणसमयमन्तर्भाव्य निर्वाच्या, तेन पूर्वोत्पन्नघटे पाकान्नीलघटो जातः कर्मणा भूतसंयुक्तो जात इत्यादयो व्यवहारा इति ध्येयम् ।] तदङ्गीकारोमहाप्रलयाङ्गीकारे । क्व चिदित्यादि । अत्र यत्पदं यस्य घटादेरुत्पत्तिर्लक्ष्या तत्परम् । तद्घटीयतृतीयादिक्षणसम्बन्ध एव द्वितीयक्षणवृत्तिध्वंसप्रतियोगित्वाभावात्तद्घटीयद्वितीयादिक्षणसम्बन्धेऽतिव्याप्तिरतः क चिदपीत्युक्तम् । तथा च यदीयसमयसम्बन्धसामान्ये यत्समयवृत्तिध्वंसप्रतियोगित्वं नास्तीत्यर्थलाभात् सामान्यान्तर्गतप्रथमक्षणसम्बन्ध एव द्वितीयक्षणवृत्तिध्वंसप्रतियोगित्वाभावविरहान्न तत्रातिव्याप्तिः । चरमध्वंसीयसमयसम्बन्धसामान्य एव तदुत्पत्तिक्षणवृत्तिध्वंसप्रतियोगित्वाभावाच्च न महाप्रलयोत्पत्तावव्याप्तिः । तत्तद्घटादेः स्वपूर्वोत्पन्नज्ञानादी-

गित्वं नास्ति तस्य तत्समयसम्बन्धः, तदधिकरणक्षणावृत्तित्व-व्याप्यस्ववृत्तिध्वंसप्रतियोगिताकसमयवृत्तित्वं वा । क्षणत्वञ्च

नां विषयत्वादिसम्बन्धस्यापि सामान्यान्तर्गतत्वात् तत्र च तत्त-द्घटाद्युत्पत्तिक्षणवृत्तिध्वंसप्रतियोगित्वस्यैव सत्त्वादुत्पत्तिमात्रेऽसम्भवः स्यादतः प्रथमं समयपदम्।तथा च तदीयकालिकविशेषणता-रूपसमयसम्बन्धसामान्य इत्यर्थः । तेन जन्यमात्रस्यैव समयतया ज्ञानस्यापि तथात्वात् समयपदोक्तावपि ज्ञानविषयत्वादावतिव्याप्तिरिति प्रत्युक्तम् । प्रत्युक्तं च यदीयसमयसामान्य इत्यस्यैव सम्यक्के सम्बन्धपदं व्यर्थमित्यादि दूषणम्।यत्पदार्थेन समयस्यानन्वयेन वैय्यर्थ्यानवकाशादिति ध्येयम् । यत्र घटोत्पत्तिप्राक्क्षणे सर्वं ध्वंसा इत्याकारकं ज्ञानमुत्पन्नं तत्र तज्ज्ञानव्यक्त्या समं घटीयकालिकसम्बन्धस्यापि लक्ष्यत्वात्तत्राव्याप्तिर्घटीयकालिकसम्बन्धसामान्य एव विषयितया तज्ज्ञाने वर्तमानस्य ध्वंसस्य प्रतियोगित्वादतः कालिकसम्बन्धेन वृत्तेर्लाभाय द्वितीयं समयपदम् । यदि च विषयितायावृत्त्यनियामकत्वात्स्ववृत्तिध्वंसप्रतियोगित्वं नास्तीत्युक्तावपि नोक्तदोष इति विभाव्यते, तदायं कालो .घटद्वितीयक्षणवान् घटोत्पत्तिक्षणवत्त्वादित्यत्र हेतौ घटाद्यक्षणसम्बन्धध्वंस उपाधिरिति प्रतीत्या व्यभिचारादिसम्बन्धेन घटोत्पत्तिक्षणेपि घटोत्पत्तिध्वंसस्य सत्त्वादुत्पत्तिमात्रेऽसम्भव एव स्यादतो द्वितीयं समयपदम् । घटादेः स्वपूर्वोत्पन्नज्ञानादिविषयतायामतिव्याप्तेस्तृतीयं समयपदम् । ननु समयसम्बन्धः कालिकविशेषणता सा च यदि समवायादिसम्बन्धवदेकैव नित्या न तु स्वरूपसम्बन्धस्तदा तदीयसम्बन्धसामान्य एव तदीयद्वितीयक्षणवृत्तिध्वंसाप्रतियोगित्वात्तत्रातिव्याप्तिरत आह तदधिकरण इत्यादि । यत्तु महाप्रलयवृत्तिध्वंसप्रतियोगितावावच्छिन्नाभावाप्रसिद्ध्या तदुत्पत्तावव्याप्तिर्ध्वंसप्रतियोगितात्वेन लघुधर्मेणैव तादृशप्रतियोगित्वावच्छेदादतस्तदधिकरणेत्यादीति । तत्तुच्छम् । गुरुधर्मस्य प्रतियोगितानवच्छेदकत्वेऽग्रिमलक्षणेपि तदधिकरणक्षणावृत्तित्वस्याप्रसिद्धिप्रसङ्गात् । तदधिकरणक्षणवृत्तित्वानिष्ठप्रति-

स्ववृत्तिध्वंसप्रतियोग्यनाधारत्वम्, स्ववृत्तिध्वंसप्रतियोगिप्रतियोगि-

---

योगितायाः कालिकसम्बन्धावच्छिन्नतद्वृत्तित्वत्वेनैव लघुधर्मेणा-वच्छेदात्। जन्यमात्रस्यैव कालोपाधित्वात्। समयवृ-त्तिध्वंसप्रतियोगित्वं नास्तीत्यत्र तादृशप्रतियोगित्वाभावकूटस्यैव विवक्षणे गुरुधर्मस्यानवच्छेदकत्वेप्युक्ताव्याप्तेरभावाच्चेति दिक्। स्ववृत्तीति। तथा च यत्समयवृत्तिध्वंसप्रतियोगित्वं यद्व्यक्त्यधिकरणक्षणावृत्तित्वव्याप्यं तेन सार्द्धं तद्व्यक्तेः समयसम्बन्धस्तद्व्यक्तेरुत्पत्तिरित्यर्थः। घटाद्युत्पत्तिकालीनध्वंसप्रतियोगित्वं न घटाद्यधिकरणकालावृत्तित्वव्याप्यं नष्टमात्रस्यैव घटाद्यधिकरणस्थूलकालवृत्तित्वादित्यसम्भववारणाय क्षणपदम्। घटादिद्वितीयादिक्षणवृत्तिध्वंसप्रतियोगित्वस्य चिरातीते घटाद्यधिकरणक्षणावृत्तित्वसामानाधिकरण्यादद्वितीयादिक्षणसम्बन्धेतिव्याप्तिरतो व्याप्यपदम्। यद्यपि चिरविनष्टनिष्ठं द्वितीयादिक्षणवृत्तिध्वंसस्य यत्किञ्चित्प्रतियोगित्वं घटाद्यधिकरणक्षणावृत्तित्वव्याप्यमेव, तथापि तदधिकरणक्षणावृत्तित्वं यत्समयवृत्तिध्वंसप्रतियोगित्वव्यापकं तत्समयसम्बन्धवत्त्वं विवक्षितम्। न च जन्यमात्रस्य कालोपाधित्वात्तदवृत्तित्वं यत्समयवृत्तिध्वंसप्रतियोगित्वव्यापकं तत्समयसम्बन्ध एवोत्पत्तिरस्तु। यथासन्निवेशे वैय्यर्थ्यविरहादिति भावः। चिरातीतज्ञानवृत्तिध्वंसप्रतियोगिनः सर्वस्यैव घटाद्यधिकरणक्षणावृत्तित्वाद्घटादिनिष्ठे तदीयविषयत्वादिसम्बन्धेऽतिव्याप्तिरतः समयसम्बन्धेति। ननु तदधिकरणक्षणावृत्तित्वेत्यत्र क्षणत्वं स्ववृत्तिप्रतियोगिकप्रागभावानधिकरणसमयत्वं तच्च प्रागभावं विना दुर्वचमत आह क्षणत्वं चेति। यत्तु स्वजन्यविभागप्रागभावावच्छिन्नकर्मत्वरूपं क्षणत्वं प्रागभावासत्त्वे दुर्वचमतोऽन्यथा निर्वक्ति क्षणत्वं चेतीति तन्न। प्रलयोत्पत्तावव्याप्तिभिया विभागप्रागभावावच्छिन्नकर्मणः क्षणत्वशङ्कया एवानुत्थानात्। स्ववृत्तीति। स्ववृत्तिर्यो ध्वंसस्तत्प्रतियोग्यधिकरणं यत्तदन्यसमयत्वमर्थः। स्ववृत्तित्वं प्रतियोग्यधिकरणत्वं च कालिकसम्बन्धेन बोध्यम्। तेन क्षणानां यथाकथंचित् सम्बन्धेन स्वस्मिन् वर्तमानस्य स्वोत्तरोत्पन्नध्वंसस्य प्रतियोगिमत्त्वेपि नाव्याप्तिर्न वा स्व-

कयावद्ध्वंसविशिष्टसमयत्वम्, स्ववृत्तियावद्ध्वंसाविशिष्टसमयत्वम्,

---

स्मिन् कालिकतया वर्तमानस्यैव ध्वंसस्य प्रतियोगिनः पूर्वोत्पन्नज्ञानादेर्विषयतयाधिकरणत्वेप्यसम्भवः। नित्यवस्तुव्युदासाय समयपदम्। लक्षणमिदं क्षणिकस्यान्त्यशब्दादेरङ्गीकार एव, अन्यथा क्रियादेः स्ववृत्तिध्वंसप्रतियोग्यधिकरणत्वात् प्रलयान्यक्षणमात्र एवाव्याप्तिप्रसङ्गात् अतस्तदनङ्गीकारेप्याह स्ववृत्तीति। स्ववृत्तिर्यो ध्वंसस्तत्प्रतियोगिप्रतियोगिको यावान्ध्वंसस्तद्विशिष्टसमयत्वमित्यर्थः। तथा च क्षणिकपदार्थासत्त्वेपि स्थिराणामेवान्त्यक्षणावच्छेदेन तादृशयावद्ध्वंसविशिष्टतया क्षणत्वमिति भावः।यावद्ध्वंसविशिष्टसमयत्वं महाप्रलयान्यक्षणमात्रेऽव्याप्तमतः प्रतियोगिकान्तं तदपि ध्वंसविशेषणम्।सृष्टिकालीनक्षणमात्रस्यैव स्वोत्तरोत्पन्नपदार्थात्यन्ताभाववत्त्वात्तत्प्रतियोगिकध्वंसवैशिष्ट्याभावाच्चाव्याप्तिताद्वस्थ्यमतो ध्वंसपर्यन्तम्। अत्र ध्वंसस्य स्ववृत्तित्वं कालिकसम्बन्धेन बोध्यम्। तेन यथाकथञ्चिद्व्यभिचारादिसम्बन्धेन तत्तत्क्षणवृत्तीनां तत्तत्क्षणोत्तरोत्पन्नध्वंसानां कालिकसम्बन्धेन वैशिष्ट्यस्य तत्तत्क्षणेषु विरहेपि नाव्याप्तिः। प्रहरादीनामपि स्ववृत्तिध्वंसप्रतियोगिप्रतियोगिकयत्किञ्चिद्ध्वंसविशिष्टत्वादतिव्याप्तिरतो यावत्पदम्। नष्टघटप्रतियोगिकसंयोगादेरपि स्ववृत्तिध्वंसप्रतियोगिप्रतियोगिकत्वाद्यावत्तद्वैशिष्ट्यस्य च क्व चिदपि क्षणे विरहादसम्भवः स्यादतोऽभावनिरूपितस्य प्रतियोगितविशेषस्य लाभाय चरमध्वंसपदम्। तेनाभावत्वमपेक्ष्य जन्याभावत्वरूपस्य ध्वंसत्वस्य गुरुत्वेपि न क्षतिस्तस्याऽप्रविष्टत्वात् अभावत्वस्येव ध्वंसत्वस्यापि अखण्डत्वमते वैय्यर्थ्यानवकाशाच्च। सर्वे ध्वंसा इति ज्ञानेपि निरुक्तयावद्ध्वंसानां विषयितया वैशिष्ट्यस्य क्षणद्वयावच्छेदेन सत्त्वात्तत्रातिव्याप्तिरतः समयपदं कालिकसम्बन्धेन वैशिष्ट्यलाभाय। यत्तु महाप्रलयावच्छेदेन गगनादेरपि निरुक्तयावद्ध्वंसविशिष्टत्वादतिव्याप्तिरतः समयपदं जन्यार्थकमिति। तन्न। यथाकथञ्चित्सम्बन्धेन स्ववृत्तित्वमादायाव्याप्तिभिया कालिकसम्बन्धेन स्ववृत्तित्वस्य वाच्यतया तत्सम्बन्धेन

स्ववृत्तियावद्भावविशिष्टसमयत्वम्, स्वस्वपूर्ववर्त्तियावत्पदार्थविशिष्टसमयत्वं वा। स्वपूर्वत्वञ्च स्वाधिकरणयावत्कालवृत्तिध्वंसप्रति-

---

गगनवृत्तित्वाप्रसिद्ध्यैव तत्रातिव्याप्त्यसम्भवात्।महाप्रलयावच्छेदेन महाकालस्य तु तादृशयावद्ध्वंसाविशिष्टतया क्षणत्वं न क्षतिकरमिति ध्येयम्। लाघवादाह स्ववृत्तियावदिति । ध्वंसत्वं यदि जन्याभावत्वं नाखण्डोपाधिस्तदा जन्यत्वप्रवेशे वैय्यर्थ्यं प्रागभावानङ्गीकारेणाभावत्वघटितस्यैव सम्यक्त्वादित्याशयेन लक्षणान्तरमाह स्ववृत्तीति । यावद्भावैशिष्ट्यं न कस्यापि क्रियादेरतः स्ववृत्तीति। स्ववृत्तियावत्पदार्थवैशिष्ट्यमपि न कस्य चित्स्थिरस्येत्यव्याप्तिरत उक्तमभावेति । कार्योत्पत्तिक्षणे सामग्रीक्षणो नष्ट इत्यादिव्यवहारोपयिकं विनश्यदवस्थक्रियायाः क्षणत्वमुक्त्वा घटपूर्वं तत्सामग्रीक्षणो जायत इत्यादिव्यवहारोपयुक्तमुत्पत्त्यवच्छिन्नक्रियादीनां क्षणत्वमाह स्वस्वेति । स्ववृत्तिः सन् स्वपूर्ववृत्तिर्यावान् पदार्थस्तद्विशिष्टसमयत्वमित्यर्थः । स्ववृत्तियावत्पदार्थवैशिष्ट्यं स्वपूर्ववृत्तियावत्पदार्थवैशिष्ट्यं वा न कस्यापि स्थिरस्य क्रियादेः सम्भवति स्वोत्तरोत्पन्नस्वपूर्वनष्टयोः स्वस्मिन्नसत्त्वादित्युभयमुपात्तम् । पदार्थेति तु स्वरूपकथनं न तु प्रविष्टं वैय्यर्थ्यात् । न च स्वस्वोत्तरवृत्तियावत्पदार्थविशिष्टत्वमित्येव सम्यक् वक्ष्यमाणस्वपूर्वत्वापेक्षया स्वध्वंसकालीनत्वरूपस्वोत्तरत्वप्रवेशे लाघवादन्त्यक्षणावच्छिन्नस्वक्रियादेरेव तथात्वादिति वाच्यम्। स्वोत्तरवर्तित्वस्याप्रसिद्ध्या प्रलयक्षणाव्याप्तिप्रसङ्गादिति भावः। प्रहरादेरपि स्वस्वपूर्ववर्तियत्किञ्चित्पदार्थविशिष्टत्वात्तद्वारणाय यावदिति। न च यावत्त्वस्यैकस्याभावात्प्रातिस्विकरूपेणोपादाने अनतिप्रसक्तयत्किञ्चित्पदार्थप्रवेशावश्यकत्वे शेषवैय्यर्थ्यमिति वाच्यम् । स्वस्वपूर्ववृत्तिपदार्थत्वव्यापकतावच्छेदकाधिकरणतावत्त्वस्यैव लक्षणत्वाद्यावत्पदेन तादृशव्यापकत्वलाभात् । समयपदं तु स्ववृत्तित्वस्य स्वपूर्ववृत्तित्वस्य तादृशयावत्पदार्थवैशिष्ट्यस्य च कालिकसम्बन्धावच्छिन्नत्वलाभाय । तेन विषयत्वादिसम्बन्धेन स्वनिष्ठस्य चिरातीतज्ञानादेरुत्पत्त्यवच्छिन्नक्रियादौ का-

योगित्वम्, जन्यमात्रस्यैव कालोपाधित्वाददोषः । यो यत्काल-वृत्तिध्वंसप्रतियोग्यवृत्तिस्तस्य तदवृत्तित्वमुत्पत्तिरित्यपि के चिदिति चेत् । नैवमपचयिते किञ्चिदस्माकमिमेकदेशिनो वर्णयन्ति । अथ

लिकसम्बन्धेन वैशिष्ट्यविरहेपि नासम्भवः । न वा क्षणमात्रस्यैव विषयतया स्वपूर्ववर्त्तिनः कालिकसम्बन्धेन च स्थितिक्षणावच्छेदेन स्ववृत्तेर्ज्ञानस्याद्यक्षणावच्छेदेन कालिकतया वैशिष्ट्यविरहेप्यव्याप्तिः । नापि सर्वे पदार्था इति ज्ञानस्याप्युत्पत्त्यवच्छिन्नस्य क्षणत्वाद्विषयितया तदीयवैशिष्ट्यस्य क्षणद्वयावच्छेदेन सत्त्वात्तत्राव्याप्तिरिति । ननु क्षणलक्षणान्तर्गतं स्वपूर्वत्वं स्वोत्पत्तिकालीनध्वंसप्रतियोगित्वं तदन्तर्गता चोत्पत्तिः क्षणघटितेत्यन्योन्याश्रय इत्यत आह स्वपूर्वत्वं चेति । स्वाधिकरणीभूततृतीयादिक्षणवृत्तिध्वंसप्रतियोगि-कालवृत्तेः स्ववृत्तिपदार्थस्याद्यक्षणावच्छेदेन स्वस्मिन् वैशिष्ट्याभावात्प्रलयान्यक्षणमात्राव्याप्तिरतः स्वपूर्वत्वनिरुक्तौ यावदिति कालविशेषणं दत्तम् । ननु क्रियामात्रस्यैव कालोपाधित्वाल्लक्षणमिदं प्रलयक्षणाव्याप्तम् एवं तदुत्पत्तावुत्पत्तिलक्षणेपीत्यत आह जन्येति । मात्रपदं कृत्स्नार्थकम् । तथा च तदानीं क्रियाया अभावेपि चरमध्वंसरूपकालोपाधिमादायैव लक्षणसमर्थनमिति । नित्यस्य कालिकसम्बन्धेनाव्यावर्तकतया जन्यावच्छिन्नस्यैव कालोपाधित्वं वाच्यमतो जन्यस्यैव तथात्वमुचितमित्याशयेन पदार्थमात्रं परित्यज्य जन्यमात्रस्येत्युक्तम् । के चित्तु ननु महाप्रलयावच्छेदेन स्ववृत्तियावद्ध्वंसविशिष्टेत्यादिलक्षणाक्रान्तस्य महाकालस्यापि लक्ष्यत्वात्तत्रेदं लक्षणमव्याप्तं निरुक्ततत्पूर्वत्वाप्रसिद्धेरत आह जन्यमात्रस्येति । तथा चोत्पत्तिघटकक्षणत्वस्य महाकालेऽसत्त्वेपि न क्षतिर्जन्यं कालोपाधिरूपं क्षणमादायैव सर्वत्रोत्पत्तिलक्षणसम्भवादिति भावः इत्याहुः । केषां चिदुत्पत्तिलक्षणमाह यो यदित्यादि । सर्वे ध्वंसा इत्याकारविनश्यदवस्थबुद्ध्या सार्द्धं घटीयकालिकसम्बन्धस्यापि लक्ष्यतया तत्राव्याप्तिस्तादृशबुद्धौ विषयितया वर्तमानस्य ध्वंसस्य प्रतियोगिनि भाविकाले घटस्य वृत्तेरतो ध्वंसस्य कालिकसम्बन्धेन वृत्तिमत्त्वलाभाय कालपदम् । एवं तादृशध्वंसप्र-

पटस्य स्वानधिकरणेषु तन्तुषूत्पत्तिवारणाय सहस्रादीनां तत्तत्तन्तुत्वेन तत्तत्पटजनकत्वं वाच्यं तथा च लाघवादेक एव प्रागभावः कल्प्यते स च स्वाश्रय एव प्रतियोगिजनक इति नातिप्रस-

---

तियोगिवृत्तित्वं तस्य तद्वृत्तित्वमित्यत्र च वृत्तिमत्त्वं कालिकसम्बन्धेन बोध्यम्। तेनातीतविषयकज्ञानस्योत्पत्तौ नाव्याप्तिर्विषयतासम्बन्धेऽतिव्याप्तिर्वा। अत्र तत्तत्समयवृत्तिध्वंसप्रतियोग्यवृत्तित्वे सति तत्तत्समयवृत्तित्वरूपा तत्तत्क्षणोत्पन्नयावद्द्रव्यनामैकैवोत्पत्तिर्न त्वाश्रयभेदेन विभिन्ना, यो यदित्यनयोर्लक्ष्यप्रदर्शनमात्रपरत्वात्। न च ध्वंसप्रतियोगिवृत्तित्वमपेक्ष्य महाप्रलयवृत्तिध्वंसप्रतियोगिवृत्तित्वस्य गुरुत्वात्तदवच्छिन्नाभावाप्रसिद्ध्या महाप्रलयोत्पत्तावव्याप्तिरिति वाच्यम्। प्रागेव दत्तोत्तरत्वादिति ध्येयम्। स्वानधिकरणेष्विति। तन्तुमात्रस्यैव तन्तुत्वेन तत्पटस्वरूपयोग्यत्वात्तदनधिकरणतन्तुष्वपि तत्सामग्रीसत्त्वादिति भावः। न च तत्पटत्वस्य कार्यतानवच्छेदकत्वात्तदवच्छिन्नस्यान्यत्रापत्त्यसम्भवः, पटत्वावच्छिन्नसामग्रीसत्त्वे च पटत्वावच्छिन्नमन्यत्रोत्पद्यत एवेति वाच्यम्। पटमात्रस्यैव तत्तत्पटत्वेन कार्यत्वस्यावश्यकत्वात्। अन्यथा यत्र तन्तुत्रयारब्धपटस्यैकतन्तुनाशाद्विनाशे सत्युत्तरक्षण एव तदारम्भकतन्त्वन्तरस्य नाशस्तत्र तदानीमेवावस्थिततन्तौ पटान्तरोत्पादप्रसङ्गात्। पटत्वावच्छिन्नस्य सामग्रीसत्त्वात्। न चेष्टापत्तिः। एकतन्तुकपटस्यानङ्गीकारात्। न च विनश्यत्तन्तुमादाय पटोत्पादः, कार्यकालावृत्तेः समवायित्वायोगात्। तस्मात्प्रसिद्धतत्तत्पटव्यक्तिं प्रति विशिष्य कल्पितकारणस्य विरहादेव तत्तत्पटसामान्यस्यानुत्पत्तिरतस्तत्तत्पटत्वावच्छिन्नस्यापि स्वानधिकरणेष्वापत्तिसम्भव इति भावः। सहस्रादीनामिति। तदारम्भकेत्यादिः तत्तत्तन्तुत्वेनेत्यादि। न च समवायेन तत्पटं प्रति तादात्म्येन तत्तत्तन्तुत्वेन हेतुत्वे मिथो व्यभिचारः, कालिकसम्बन्धेनैव विशेषतः कार्यकारणभावस्तु न तत्पटानधिकरणतन्तुषु उत्पत्तिवारकः सम्भवतीति वाच्यम्। तत्तत्तन्तुनिरूपितसमवायेन तत्पटं प्रत्येव तादात्म्येन तत्तत्तन्तोर्हेतुत्वात् तादृशसमवायेन

ङ्गः । इत्थञ्चानेकत्र प्रागभावसिद्धौ प्रागभावत्वेन प्रतियोगिजनक-त्वादद्वितन्तुकेऽपि तत्सिद्धिरिति चेत् । त्रिचतुरेष्वेव तन्तुषु उत्प-

---

तत्पटस्यात्र तन्तावसत्त्वेन व्यभिचारासम्भवात् । न चैवं तादृशस-मवायेन स्वाधिकरणतन्तुषु तत्पटस्यानुत्पादेपि समवायमात्रेण त-त्पटोत्पादो दुर्वार इति वाच्यम् । समवायमात्रस्य तादृशकार्यता-नवच्छेदकतया तत्सम्बन्धेनान्यत्र तत्पटोत्पत्त्यसम्भवादिति भावः । यत्तु समवायेन तत्पटत्वावच्छिन्नं प्रत्येव तत्ततन्तुत्वेन हेतुत्वं तावत्तन्तुनिष्ठसहस्रत्वादिसंख्याया एव कारणताघटकसम्बन्धत्वेन व्यभिचारासम्भवादिति । तच्चुच्छम् । यस्य तन्तोर्द्वितीयक्षण एव तन्त्वन्तरसंयोगोत्पत्त्या तृतीयक्षणे सहस्रतन्तुकपटोत्पत्तिस्तत्रैव तन्तौ व्यभिचारतादवस्थ्यात्।सहस्रत्वादिसंख्यायाः समानाधिकरणयाव-देकत्वसापेक्षतया द्रव्यस्योत्पत्तिद्वितीयक्षणे तदसम्भवात्। के चित्तु यावन्तः कार्यतावच्छेदकधर्मावच्छिन्नास्तत्प्रत्येकस्य यत्किञ्चिदाश्र-यनिष्ठाभावप्रतियोगितानवच्छेदकधर्मवत्त्वमेव कारणताघटकं तथा च समवायेन तत्पटत्वावच्छिन्नं प्रत्येव तादात्म्येन तत्तत्तन्तुत्वेन हेतुत्वं सुघटं तत्पटाश्रयीभूततत्तत्तन्तौ तत्तत्तन्तुभेदस्यासत्वात्।एतेन संयोगादिकं प्रत्यपि कर्मादेः कारणत्वं व्याख्यातम् । न चैवं द्विक्षण-स्थायिद्रव्येपि द्वित्वाद्युत्पत्तिः स्यात् द्रव्यान्तरैकत्वमादायोक्तक्रमेण सामग्रीसत्त्वादिति वाच्यम्। इष्टत्वात् । यावत्त्वप्रवेशस्तु वह्नित्वाव-च्छिन्नं प्रत्येव तृणत्वादिना हेतुत्ववारणार्थम्।न चैवं कार्यसमानाधिक-रणवृत्तिधर्मवत्त्वमेव कारणत्वे निवेश्यतामन्यथासिद्ध्यनिरूपकत्वदले-नैव व्यापकतानवच्छेदकान्तरव्युदाससम्भवादिति वाच्यम् । व्य-भिचाराग्रहाप्रतिबध्यतया तस्य कारणतास्वरूपत्वायोगादित्याहुः । ननु कल्पितापि प्रागभावव्यक्तिः कथं नाऽन्यत्र कार्यमर्जयति इत्यत आह स चेति । सामानाधिकरण्यप्रत्यासत्त्यैव तस्य हेतुत्वादिति भावः । नन्वेवमपि द्वितन्तुकपटादौ न तत्सिद्धिः तत्राऽतिरिक्तस्य प्रागभावधर्मिणः कल्पनामपेक्ष्य कल्पितन्तुसंयोगव्यक्तेरेव लाघवेन हेतुत्वौचित्यादत आह इत्थं चेति । कार्योत्पादनियामकतया चेत्य-र्थः । प्रागभावत्वेनेति । तत्तत्प्रागभावव्यक्तिष्वभावत्वासिद्धौ तादृ-

न्येषु संयुक्तेषु च तत्पटोत्पत्तिप्रसङ्गः। तावत्तन्तुवृत्तेः पटस्य कतिपयविरहे कथमुत्पत्तिरिति चेन्न। कार्यानुत्पादस्य विना कारणविरहमनभ्युपगमात् सामग्रीसत्त्वेऽग्रिमक्षणे कार्यसत्त्वस्यावश्यकत्वाच्च। तत्पटप्रागभावाश्रययावत्तन्तुत्वेन तत्पटजनकत्वमिति

प्येण हेतुत्वाभिधानमनुचितमिति तु विभावनीयम्। प्रागभावस्वीकारेऽपि तत्तत्तन्तुव्यक्तीनां तत्तच्चरमतन्तुसंयोगव्यक्तीनां वा तत्पटं प्रति विशिष्य हेतुत्वस्यावश्यकत्वे कृतं प्रागभावकल्पनया इत्याशयेन समाधत्ते त्रिचतुरेष्वेवेति। असमवायिकारणसम्पत्त्यर्थमाह संयुक्तेषु चेति। त्रितन्तुकस्य चतुस्तन्तुकस्य वा पटस्यावश्यमुत्पत्तेः पटसामान्यस्यापत्त्यसम्भवादाह तत्पटेति। सहस्रादितन्तुकपटोत्पत्तिप्रसङ्ग इत्यर्थः। प्रागभावादिघटितायास्तत्पटसामग्र्यास्तदानीमपि सत्त्वादिति भावः। यद्यपि सर्वत्रैव खण्डपटध्वंसस्य महापटहेतुतया त्रिचतुरादितन्तुकपटस्य ध्वंसविरहादेव त्रिचतुस्तन्तुसंयोगदशायां न सहस्रादितन्तुकपटोत्पाद इति चरमतन्तुसंयोगादेस्तत्र विशिष्य हेतुत्वे मानाभावः। न च खण्डपटध्वंसस्येव चरमसंयोगव्यक्तीनामपि विनिगमनाविरहेण तत्र हेतुत्वमिति वाच्यम्। चरमसंयोगोत्पत्त्यनन्तरमेव खण्डपटध्वंसदशायामेव महापटोत्पत्तिप्रसङ्गेन खण्डपटध्वंसस्यावश्यं महापटहेतुत्वात्। तथापि त्रिचतुरादितन्तुकखण्डपटध्वंसस्यैव स्वसमानाधिकरणसहस्रत्वादिसंख्यासम्बन्धेन सहस्रादितन्तुकमहापटं प्रति हेतुत्वादेव स्वानधिकरणतन्तुषु तत्पटानुत्पत्तिसम्भवे प्रागभावकल्पने मानाभाव इत्यत्र तात्पर्यम्। शङ्कते तावदिति। विनेति। तन्तुसंयोगयोस्तन्तुत्वविलक्षणतत्संयोगत्वाभ्यां पटं प्रति हेतुत्वेन तदवच्छिन्नविरहस्यासम्भवादिति भावः। कार्यानुत्पादप्रयोजकस्याभावमुक्त्वा कार्योत्पादप्रयोजकस्य सत्त्वमाह सामग्रीति। पुनः शङ्कते तत्पटेति। यावत्तन्तुत्वेन हेतुत्वासम्भवादाश्रयान्तम्। तत्पटप्रागभावाश्रयस्य कस्य चित्तन्तोः सत्त्वादतिप्रसङ्गतादवस्थ्यमतो यावदिति। प्रवे-

चेत् । अवच्छेदककोटौ प्रागभावस्य प्रवेशाप्रवेशयोः कारणत्वे प्रमाणाभावः । परस्परासंयुक्तेषु कतिपयतन्तुषु तत्पटो जायेत । न च तत्पटप्रागभावव्याप्ययावत्संयोगानामपि जनकत्वम्, कतिपयतन्तुसंयोगेष्वतीतेषु अनागतेषु वा तत्पटानुत्पत्तिप्रसङ्गात् तत्पटप्रागभावमपेक्ष्य स एव घटो लघीयान्, यावत्त्वानिरुक्तेश्च ।

शेत्यादि । प्रवेशे कारणतावच्छेदकतया अन्यथा सिद्धत्वम्, अप्रवेशे तु वस्तुगत्या तत्पटप्रागभावाश्रयाणामेव तन्तूनां तावत्तन्तुत्वेन हेतुत्वेन प्रागभावस्य हेतुत्वे मानाभाव इत्यर्थः । ननु मा भूत्प्रागभावस्य हेतुत्वं कारणतावच्छेदकतयैव तत्सिद्धिर्भविष्यतीत्यत आह परस्परेति । तत्पटप्रागभावाश्रययावत्तन्तूनां तदानीमनपायादिति भावः । तत्पटप्रागभावव्याप्येति । तत्पटप्रागभावानधिकरणावृत्तीत्यर्थः । संयोगस्त्वारम्भको ग्राह्यस्तेन तत्पटप्रागभाववन्मात्रवृत्तीनामनारभकसंयोगान्तराणां तत्पटपूर्वमसत्त्वेपि न क्षतिः । तत्प्रागभावसामानाधिकरण्यस्य तत्पटानाधारतन्तुवृत्तिपटान्तरारम्भकातीतसंयोगसाधारणत्वात् व्याप्यतापर्यन्तानुसरणम् । तन्तुसंयोगेष्विति । पटारम्भकेष्वित्यादिः । ननु तत्पटप्राक्क्षणवृत्तित्वेनापि संयोगानां विशेषणान्नैष दोष इत्यत आह तत्पटेति । तथा च लाघवात्तत्पटव्याप्यतादृशयावत्तन्तुसंयोगत्वेनैव तत्पटं प्रति हेतुत्वसम्भवादवच्छेदकतयापि न प्रागभावसिद्धिरिति भावः । ननु तत्पटस्येव तन्नियतसंख्याविशेषस्यापि उक्तक्रमेणावच्छेदकत्वे विनिगमनाविरहाल्लघुरपि तत्पटो नावच्छेदकः किन्तु तत्प्रागभाव एव धर्मिग्राहकप्रमाणेन तथैव तस्य सिद्धेरत आह यावत्त्वेति । तथा च तादृशसंयोगनिष्ठं यावत्त्वमप्यपेक्षाबुद्धिविषयत्वमेव तच्चापेक्षाबुद्धिव्यक्तीनां भेदाज्ञानेत्यनन्तकार्यकारणभावध्रौव्ये व्यर्थमतिरिक्तप्रागभावस्यावच्छेदकतया कल्पनमिति भावः । अत्र वदन्ति । यत्र क्रमेण तन्तूनां तत्संयोगानां वा जननोत्तरं पटस्योत्पादस्तत्र प्रागेव तत्पटस्योत्पादवारणार्थं चरमस्य तन्तोस्तत्संयोगस्य वा विशिष्य हे-

तुत्वावश्यकत्वे तेन एवोदासीनतन्तुषु तत्पटोत्पत्तिवारणेपि यत्र समस्ततन्तुष्वेकदैवोत्पन्नेषु संयुक्तेषु च पटस्योत्पत्तिस्तत्र तत्पटस्यान्यत्रोत्पादवारणार्थं प्रागभावः कारणतया कल्प्यते तत्तत्तन्तुसंयोगानां विशिष्य हेतुत्वकल्पनया तद्वारणे गौरवात्। न हि तत्रापि तत्पटोत्पत्तेः पूर्वं तत्पटारम्भकतत्तत्तन्तुषु द्रव्यारम्भकसंयोगः, येन तदानीं तत्पटस्योत्पादवारणाय विशिष्य संयोगानां हेतुत्वमावश्यकं स्यात्। न च तत्पटवत्त्वेनैव तादृशपटं प्रति तन्तूनां तादात्म्येन हेतुत्वान्नान्यत्र तस्योत्पाद इति वाच्यम्। कार्यवत्त्वेन कारणतायामन्यथासिद्धेः। अन्यथा द्रव्यचाक्षुषत्वावच्छिन्नं प्रति चाक्षुषवद्द्रव्यत्वादिनैव हेतुत्वसम्भवे उद्भूतरूपादीनामहेतुत्वापत्तेः। समस्तस्वारम्भकतन्तुसंयोगनाशान्नष्टस्यापि पटस्य पुनः स्वारम्भकतन्तुपूत्पत्तिप्रसङ्गेन तत्तदारम्भकसंयोगव्यक्तीनां विशिष्य तत्पटं प्रति हेतुत्वकल्पने महागौरवापत्तेश्च। अस्माकं तु प्रागभावविरहादेव नष्टस्य पुनर्नोत्पादः। यत्तु युगपदुत्पन्नैः संयुक्तैश्च सहस्रतन्तुभिर्जनितस्य पटस्यान्यत्रोत्पत्तिवारणार्थं तावत्तन्तुपर्याप्तायास्तत्पटारम्भकसंयोगसमकालोत्पन्नसङ्ख्याव्यक्तेरेव तत्पटं प्रति विशिष्य हेतुत्वं युक्तं तावतैव तदानीमन्यत्र कालान्तरे वा तावत्तन्तुषु तत्पटस्योत्पादवारणादिति। तत्तुच्छम्। यस्य तन्तोर्द्वितीयक्षण एव तत्त्वन्तरसंयोगोत्पत्त्या तृतीयक्षणे सहस्रतन्तुकपटोत्पत्तिस्तत्रैव तन्तौ व्यभिचारात् सहस्रत्वादिसङ्ख्यायाः समानाधिकरणयावदेकत्वसापेक्षतया द्रव्योत्पत्तिद्वितीयक्षणे तदसम्भवात्। किं च तादृशसंख्याव्यक्तीनां तत्तद्व्यक्तित्वेन तत्पटं प्रति हेतुत्वे अनन्तकार्यकारणभावापत्तिस्तावत्तन्तुपर्याप्ततादृशसंख्यात्वेन हेतुत्वे च महागौरवमतस्तत्पटप्रागभावव्यक्तिरेव तत्पटहेतुतया कल्पयितुमुचिता कारणतयैव धर्मिग्राहकमानसिद्धायाः तस्याः पदार्थान्तरेण सार्द्धं विनिगमनाविरहस्यासम्भवादिति दिक्। [नव्यास्तु प्रागभावाङ्गीकारे चतुर्थक्षणवृत्तिध्वंसप्रतियोगिकाया अपेक्षाबुद्धिव्यक्ते स्तृतीयक्षणेपि ध्वंसः स्यात्। न च द्वितीयप्रत्यक्षसामग्र्याः प्रतिबन्धकत्वं वाच्यम्, तथा सति चतुर्थक्षणेपि ध्वंसो न स्यात्।चक्षुःसन्निकर्षादिरूपद्वित्वनिर्विकल्पकसामग्र्यास्तदानीमपि सत्त्वात्। प्रागभावस्वीकारे तु द्वित्वनिर्विकल्पकात्प्राक् तदभावस्यैव प्रतिब-

एतेन त्रित्वाद्युत्पत्तिर्व्याख्यातेति । परे पुनरिहेदानीं घटध्वंस

न्धकत्वाददोष इत्यपि वदन्ति।] समवायिनो द्रव्यस्यासमवायिकारणानामेकत्वानां निमित्तकारणस्य चापेक्षाबुद्धेरविशेषात् क्व चिदेव तत्तत्त्रित्वादिकं जायते क्व चिन्नेति नियमो न स्यादतो यावति तत्तत्त्रित्वादिप्रागभावस्तावत्येव तत्तत्त्रित्वाद्युत्पत्तिरिति तत्तत्त्रित्वाद्युत्पत्तिनियामकतयैव प्रागभावसिद्धिरिति आचार्यमतं निरस्यति एतेनेति । कस्य चित्समवायिनस्तन्निष्ठैकत्वस्य वा उत्पत्तिदशायामपि तत्तत्त्रित्वाद्युत्पत्तिप्रसङ्गेन चरमस्य समवायिनस्तदेकत्वस्य वा तत्र विशिष्य हेतुताग्रौव्ये तद्विरहादेवान्यत्र तत्त्रित्वाद्युत्पत्त्यसम्भवे प्रागभावे मानाभावेनेत्यर्थः । द्वित्वस्थलेऽतिरिक्तप्रागभावधर्मिणस्तत्रानन्यथासिद्धत्वनियतपूर्ववर्तित्वयोश्च कल्पनामपेक्ष्य समवायिनश्चरमैकत्वस्यैव वानन्यथासिद्धत्वकल्पनं लघीय इति द्वित्वानुरोधान्न प्रागभावः सिध्यतीत्यतस्त्रित्वपर्यन्तानुसरणम् । के चित्तु तत्त्वज्ञानिनः शुकादेः सत्यामपि विहितनिषिद्धक्रियायां धर्माधर्मयोरनुत्पादात्तज्जनकतया तत्त्वज्ञानप्रागभावः सिध्यति । न चोत्पन्नेऽपि तत्त्वज्ञाने तादृशज्ञानान्तरप्रागभावसत्त्वात्तदानीं धर्माद्युत्पत्तिप्रसङ्गः । समानकालावच्छिन्नैकाल्मवृत्तित्वसम्बन्धेन तत्त्वज्ञानशून्यत्वेन प्रागभावस्य विशेषणीयत्वात् । न चैवं निरुक्तप्रत्यासत्त्या तत्त्वज्ञानाभावविशिष्टप्रागभावत्वेनैव हेतुत्वमुपेयं तत्त्वधीप्रागभावत्वप्रवेशे गौरवात् तथा चाद्यतत्त्वज्ञानकालोत्पन्नात्मगुणान्तरप्रागभावानामपि हेतुत्वापत्तिरिति वाच्यम्। तादृप्ये च हेतुतायामिष्टत्वात् । न चोक्तक्रमेण तत्त्वधीप्रागभावस्य हेतुतामपेक्ष्य लाघवात् मिथ्याज्ञानजन्यवासनाया एव धर्मादिहेतुत्वं युक्तमिति वाच्यम् । आत्मधर्मिकगौरत्वस्थूलत्वादिप्रकारकत्वलक्षणस्य मिथ्याज्ञानवासनात्वस्य नानात्वेन गुरुत्वेन च तादृप्येण धर्माद्यजनकत्वात् । न चोक्तक्रमेण तत्त्वज्ञानत्वमपि आत्मधर्मिकदेहान्यत्वादिप्रकारकत्वमेवेति तदवच्छिन्नशून्यप्रागभावत्वेनापि हेतुत्वेऽनुगमो गौरवं चेति वाच्यम् । मानसत्वव्याप्यस्य मुक्तिजनकतावच्छेदकवैजात्यस्यैव तत्त्वज्ञानपदेनोपलक्षणात् । न च मिथ्याज्ञानजन्यवासनाया

इतिवदिहेदानीं घटप्रागभाव इति साधारणमेव लोकानां प्रत्यक्षं कल्पयन्तस्तद्बलेन प्रागभावं सामान्यलक्षणाञ्च व्यवस्थापयन्तो वर्णयन्ति, अव्याप्यवृत्तेः कार्यस्य द्वितीयक्षणे धारावाहिकस्थले च प्राथमिकनिर्विकल्पकस्य चतुर्थक्षणे उत्पत्तिवारणाय एकावच्छेदादिना कार्याभावस्योत्तरज्ञानाभावस्य च कारणत्वं वाच्यम्, तथा च लाघवात् प्रागभावस्य तत्त्वं कल्प्यते । स्वभावाधीनत्वाच्च तत्प्रादेशिकत्वात्प्रदेशनियमः संयोगादीनामिति । अन्ये तु

अपि धर्मादिजनकत्वं भावनात्वव्याप्यवैजात्यविशेषेणैव वक्तव्यमतो न गौरवमिति वाच्यम् । मिथ्याज्ञानोत्तरं तादृशवासनोत्पत्तिदशायामपि धर्माद्युत्पादाद्भावनात्वव्याप्यवैजात्येन हेतुत्वासम्भवादित्याहुः । तेषां धर्माधर्मोत्पादनियामकत्वेन वस्त्वन्तरसिद्धावपि तत्र तत्त्वज्ञानप्रागभावत्वादिसिद्धौ प्रमाणमनुचिन्तनीयम् । ननूक्तक्रमेण सिद्धस्यापि प्रागभावस्य प्रतियोगिहेतुत्वं नागतमत आह वर्णयन्ति-अव्याप्यवृत्तेरित्यादि । द्वितीयक्षणे इति । उत्पत्तिवारणायेत्यन्वयः । तथा चाग्रावच्छेदेनोत्पन्नायाः संयोगव्यक्तेर्द्वितीयादिक्षणे पुनरुत्पादः स्यात्, मूलाद्यवच्छेदेन तदभावस्य सत्त्वात् कार्यस्य प्रतिबन्धकत्वासम्भवात् अग्रावच्छिन्नतत्तत्संयोगं प्रत्यग्रावच्छेद्यत्वविशिष्टतत्तत्संयोगाभावत्वेन हेतुतायां च गौरवात्तत्तत्संयोगं प्रति तत्तत्संयोगप्रागभावत्वेनैव हेतुत्वं युक्तमिति भावः । ननु घटादिसंयोगसामान्यं प्रत्येव समानावच्छेदकत्वप्रत्यासत्त्या घटादिसंयोगसामान्याभावस्य हेतुत्वं वाच्यमतो न गौरवम् । न चैवमपि प्रत्यक्षसिद्धं प्रागभावमादाय विनिगमनाविरहः । तस्य घटसंयोगप्रागभावत्वेन हेतुत्वे घटीयसंयोगान्तरप्रागभावमादायैवोत्पन्नस्यापि तस्य पुनः प्रसङ्गात् तदूघटसंयोगव्यक्तौ तत्तत्संयोगव्यक्तिप्रागभावत्वेन हेतुत्वे चानन्तकार्यकारणभावापत्तिगौरवस्यैव विनिगमकत्वादित्यत आह धारावहनेति । ननु तत्तत्संयोगात्यन्ताभावस्य निरवच्छिन्नविशेषणतयैव तत्तत्संयोगं प्रति हेतुत्वं वाच्यमतः स्थलान्तरमनुसरति धारावहने-

सर्वत्र तत्तत्संख्याविशेषाणां विशिष्य हेतुत्वोपगमेनैव तत्तद्द्रव्योत्पादनियमसम्भवेऽपि युगपदुत्पन्नेषु नित्येषु च त्रित्वाद्युत्पत्ति-

---

तीत्यप्याहुः । धारावहनेत्युक्त्या जनकीभूतात्ममनःसंयोगादिव्यक्तीनां चतुर्थक्षणे सत्त्वमावेदितम् । तेन तत्तत्कारणव्यक्त्यभावप्रयुक्तायाः कार्योत्पत्तेर्नावसरः । सविकल्पकस्य स्वकारणीभूततत्तद्विशेषणज्ञानव्यक्त्यभावादेव चतुर्थक्षणे नोत्पादः सम्भवतीत्यतो निर्विकल्पकपर्यन्तानुसरणम् । आंशिकनिर्विकल्पकस्यापि विशेषणज्ञानसापेक्षत्वात् प्राथमिकेति । तेन सप्रकारकान्यज्ञानलाभः । द्वितीयतृतीयक्षणयोः स्वात्मककार्येण प्रतिबन्धसम्भवाच्चतुर्थक्षण इत्युक्तम् । न च तत्तन्निर्विकल्पकं प्रति तत्तत्समकालोत्पन्नध्वंसविशेषस्यैव प्रतिबन्धकत्वं तदुत्पत्तिकालपर्यन्तस्थायिद्वित्वविशेषस्य वा जनकत्वमस्तु न तु कार्याभावस्योत्तरज्ञानाभावस्य च द्वयोर्हेतुत्वमतो न गौरवमिति वाच्यम् । तादृशध्वंसानां द्वित्वादीनां च बहूना विनिगमकाभावेन तथात्वकल्पनामपेक्ष्य लाघवेनैकस्यैव तन्निर्विकल्पकप्रागभावस्य तन्निर्विकल्पकहेतुत्वेन कल्पनार्हत्वादतीन्द्रियस्य निर्विकल्पकप्रागभावस्य प्रमाणान्तरासिद्धतया तेन सार्द्धं विनिगमकाभावस्य वक्तुमशक्यत्वादिति भावः । ननु तत्तत्संयोगप्रागभावस्य लाघवेन हेतुत्वसिद्धावपि मूलावच्छेदेन जायमानश्येनसंयोगः कुतो नाग्रावच्छेदेन जायते स्वरूपसम्बन्धेन तत्तत्प्रागभावस्योभयावच्छेदेनाविशिष्टत्वादत आह स्वाभावेत्यादि । तथा च प्रागभावस्यावच्छिन्नवृत्तितैव संयोगावच्छिन्नवृत्तितानियामिका समानावच्छेदकत्वप्रत्यासत्त्यैव तस्य प्रतियोगिहेतुत्वादिति भावः । अत्र कल्पयन्त इत्यनेन साधारणप्रत्ययस्यासत्त्वमावेदितम् । वर्णयन्तीत्यनेन च निर्विकल्पकसामान्यं प्रति ज्ञानत्वेनैव प्रतिबन्धकत्वकल्पनया चतुर्थक्षणे पुनर्निर्विकल्पकासम्भवात्तस्य तदुत्तरज्ञानस्य चाभावद्वयं तत्र कारणं न वाच्यमित्यस्वरसः सूचितः । तत्तत्सङ्ख्याविशेषाणामिति । सहस्रतन्तुकपटादौ चरमतन्तुसंयोगोत्पत्तिकालीनस्य सहस्रत्वादिसङ्ख्याविशेषस्यैवाऽन्ततः परमेश्वरीयापेक्षाबुद्धिजन्यस्य सा-

नियामकत्वेन प्रागभावः कल्प्यत इत्याहुः। यत्तु ज्ञानेच्छाकृतीनां

मानाधिकरण्यप्रत्यासत्त्या हेतुत्वाङ्गीकारेणैव स्वानधिकरणतन्तुषु तत्पटस्यानुत्पादसम्भवेपीत्यर्थः। यस्य तन्तोर्द्वितीयक्षण एव तन्त्वन्तरसंयोगोत्पत्त्या तृतीयक्षणे सहस्रतन्तुकपटोत्पत्तिस्तत्रैव तन्तौ व्यभिचारात् सहस्रत्वादिसङ्ख्याया हेतुत्वमसम्भावितम्, एकत्वान्यसङ्ख्यामात्रस्यैव समानाधिकरणयावदेकत्वसापेक्षतया द्रव्योत्पत्तिद्वितीयक्षणे तदसम्भवात् पुरुषकालभेदेन सहस्रत्वादीनामनन्तत्वेनानन्तकार्यकारणभावापत्तिगौरवं चेति द्रव्योत्पादनियामकत्वेनापि प्रागभावः कल्पयितुमुचित एवेत्याशयेनोक्तं सम्भवेपीति। क्रमोत्पन्नस्थले कस्याश्चित्समवायिव्यक्तेस्तदेकत्वस्य वाऽनुत्पत्तिदशायामपि कारणान्तरसत्त्वमादाय प्रागभाववादिनामपि त्रित्वोत्पत्तिप्रसङ्गादुत्पत्स्यमानसमवायिव्यक्तेस्तदेकत्वस्य वा विशिष्य हेतुताभ्युपगमे प्रागभावकल्पनं व्यर्थमतो युगपदुत्पन्नपर्यन्तानुसरणम्। पूर्वोक्तयुक्त्या द्वित्वोत्पादनियामकत्वेन प्रागभावासिद्धेराह त्रित्वादीति। नियामकत्वेनेति। अन्यथा युगपदुत्पन्ननिष्ठत्रित्वादेः स्वानधिकरणेष्वपि द्रव्येषूत्पादप्रसङ्गात्। न चापेक्षाबुद्धिव्यक्तेरेव विशिष्य हेतुत्वान्नातिप्रसङ्गः। स्वाश्रयमादायापेक्षाबुद्धेरपि त्रित्वजनकत्वदर्शनात्। न च तत्तद्व्यक्तिनिष्ठैकत्वान्यसंख्यासामान्यं प्रति तत्तद्व्यक्तिनिष्ठविशेष्यत्वसम्बन्धेनैकत्वप्रकारकत्वेनैवापेक्षाबुद्धेर्जनकत्वं प्रकारान्तरेणानुगमासम्भवात्तथा च तत एवैकनिष्ठत्रित्वादेरन्यत्र द्रव्येऽनुत्पत्तिसम्भव इति वाच्यम्। पुरुषत्रयाणां घटादिभिन्नद्रव्यधर्मिकैकत्वज्ञानत्रयादपि तेषु त्रित्वोत्पत्तिप्रसङ्गेनापेक्षाबुद्धेस्तादृरूप्येणाहेतुत्वादिति भावः। अन्येत्वित्थस्वरसबीजं तु द्रव्यान्तरकर्माधीनस्यैकनिष्ठसंयोगादेरन्यत्रोत्पत्तिवारणार्थमवश्यं तत्तद्द्रव्यसमवेतकार्यत्वावच्छिन्नं प्रति तत्तद्द्रव्यत्वेन हेतुत्वं वाच्यमतस्तदन्यत्वादेवान्यत्र न तदीयत्रित्वाद्युत्पादः किं तत्तत्त्रित्वाद्यन्तर्भावेनानन्तप्रागभावहेतुत्वेन। न च कार्यत्वस्येव कालिकसम्बन्धेन घटत्वपटत्वादिमत्त्वस्यापि विनिगमनाविरहेण कार्यतावच्छेदकेऽनुप्रवेशादनन्तकार्यकारणभावावश्यकत्वमिति वाच्यम्। समवेतत्वका-

कार्यकारणभावग्रहो न तदुपस्थितिं विनेति, न चेच्छाकृतिकाले ज्ञानेच्छासाक्षात्कारौ, योग्यविशेषगुणयौगपद्यस्यात्मनि निषेधात् अतो ज्ञानाद्यन्तरसाक्षात्कार एव ज्ञानत्वादिनेच्छाजनकज्ञानादिकं गृह्णातीत्यभ्युपेयमिति । तन्न । पौर्वापर्यापरिचये धर्मिस्वरूपग्रहेऽपि कारणत्वग्रहासम्भवात् इच्छाकृत्यनुत्पादस्थले ज्ञानेच्छयोः साक्षात्काराज्ज्ञानेच्छासामान्यव्यतिरेकनियतेच्छाकृतिव्यतिरेकग्रहे

लिकोभयसम्बन्धेन तद्द्रव्यवत्त्वावच्छिन्नं प्रत्येव तत्तद्द्रव्यत्वेन हेतुत्वस्योक्तत्वात् नित्यवृत्तिधर्मस्यापि जन्यतावच्छेदकत्वपक्षे तत्तद्व्यक्तिसमवेतत्वावच्छिन्नं प्रत्येव तत्तद्व्यक्तित्वेन हेतुत्वसम्भवाच्चेति द्रष्टव्यम् । मिश्रोक्तं सामान्यप्रत्यासत्तौ युक्त्यन्तरमुपन्यस्य दूषयति यत्त्वित्यादि । ज्ञानेच्छेति।ज्ञानेच्छयोरिच्छाकृत्योश्चेत्यर्थः।तदुपस्थितिमिति । इच्छोपधायकज्ञानस्य कृत्युपधायकेच्छायाश्चोपस्थितिं विनेत्यर्थः । न चेति । इच्छाकाले ज्ञानस्य कृतिकाले चेच्छायाः न साक्षात्कार इत्यर्थः । ज्ञानसंस्कारयोरेकदोत्पादाद्योग्येत्युक्तम् । योग्यत्वं च वेगावृत्तिप्रत्यक्षजातिमत्त्वम् । तेन निर्विकल्पकद्वयस्यापि नैकदोत्पत्तिः । इत्थं च ज्ञानसंयोगयोरुक्तयोग्यतावतोर्यौगपद्येन व्यभिचारः स्यादत उक्तं विशेषेति । रूपरसयोर्योग्यविशेषगुणयोर्घटादौ युगपदुत्पादादुक्तमात्मनीति । विभिन्नावच्छेदेन सुखदुःखयोर्यौगपद्यस्वीकारे एकावच्छेदेनेति पूरणीयम्।के चित्तु विशेषगुणपदं सविषयकविशेषगुणपरं वाच्यम् एवं चात्मपदं शरीरार्थकं तेन कायव्यूहदशायां सौभरीप्रभृतेर्नानाशरीरावच्छेदेन ज्ञानादेर्यौगपद्येपि न क्षतिरित्याहुः । इच्छादिजनकेति । इच्छाद्युपधायकेत्यर्थः । ननु ज्ञानादाविच्छादेः स्वरूपयोग्यत्वस्य फलोपधायकत्वस्य वा ग्रहार्थं ज्ञानत्वादिसामान्यप्रत्यासत्तिरभ्युपेयते तत्र नाद्य इत्याह पौर्वापर्येत्यादिना । ग्रहासम्भवादिति अवश्यमभ्युपेयत्वादित्यत्र हेतुः । इच्छाकृतीति । इच्छानुत्पादस्थले ज्ञानस्य कृत्यनुत्पादस्थले चेच्छायाः साक्षात्कारादित्यर्थः । मनसेति । कारणत्वानाविष्टसमस्तवस्तूपस्थितावित्यादिः ।

मनसा कार्यकारणभावग्रहस्यावश्याभ्युपेयत्वात्। कृत्यनुत्पादस्थले ज्ञानेच्छयोः कृत्यनन्तरमिच्छाकृत्योः समूहालम्बने साक्षात्कारस्य स्मरणेन च ज्ञानानुमानस्य च सम्भवात्। विंशत्यङ्गुल्यवच्छेदेन युगपद्विंशतिप्रयत्नोत्पादवदिच्छाकृतिकाले ज्ञानोत्पादस्याविरोधा-

---

तथा च फलानुपधायक एव ज्ञानादाविच्छादिस्वरूपयोग्यत्वस्यान्वयव्यतिरेकाभ्यां मनसा ग्रहसम्भवादिच्छाद्युपधायकज्ञानादिव्यक्तीनामनुपस्थितावपि न क्षतिरिति भावः। द्वितीयमिप्रेत्याह कृत्यनुत्पादस्थले इति। ज्ञानेच्छयोः समूहालम्बनसाक्षात्कारस्य सम्भवादिति योजना। न चेच्छोत्तरं ज्ञानस्य साक्षात्कारः कार्यसहभावेन विषयस्य हेतुत्वादिति वाच्यम्। अनुमित्याद्युत्तरमपि परामर्शादेरनुव्यवसायात्सर्वत्र विशिष्य विषयस्य तथा हेतुत्वाभावात्। न चेच्छायाः साक्षात्कारस्य ज्ञानत्वांशे निर्विकल्पकतया जनकतावच्छेदकरूपेण फलोपधायकव्यक्तिग्रहासम्भवस्तदवस्थ इति वाच्यम्। अभावत्वादेरिव ज्ञानत्वादेः सविकल्पकैकवेद्यत्वात्। निर्विकल्पोत्तरमौपनयिकस्य ज्ञानस्य ज्ञानत्वविशिष्टज्ञानबोधस्य सम्भवाच्चेति भावः। नन्वेवमपि ज्ञानस्य कृत्युपधायकत्वाग्रहः सामान्यप्रत्यासत्तिं विना दुर्घटः कृतिपर्यन्तं फलोपधायकज्ञानव्यक्तेरसत्त्वेन तदुत्तरं तद्ग्रहासम्भवादत आह स्मरणेन चेति। तथा चेदं स्मरणं ज्ञानजन्यं स्मृतित्वादित्यादिकमेण पक्षधर्मताबलात् कृतिफलोपधायकज्ञानव्यक्तिमनुमाय पश्चात्तत्र कृतिकारणत्वग्रहः करणीय इति भावः। ननु यत्रोपेक्षात्मकेन ज्ञानेन कृतिर्जनिता तत्र तेन स्मरणानुत्पत्त्या स्मृत्या तदनुमानमसम्भवीत्यत आह विंशतीति। व्यासङ्गानुरोधात् ज्ञानयोरेवात्मनि यौगपद्यं नेष्यते न तु विशेषगुणमात्रस्येत्याशयः। न चैक एव प्रयत्नस्तत्र विंशत्यङ्गुल्यवच्छेदेनोत्पद्यते इति वाच्यम्। अङ्गुलिचेष्टानां तारतम्यानुभवेन यत्नवैलक्षण्यस्य आवश्यकत्वादिति भावः। नन्विदं गोपदशक्यतावच्छेदकं गोत्वादित्यत्र तादात्म्येनायं सास्नावान् गोत्वादित्यत्र च समवायेन गोत्वहेतौ गवेतरावृत्तित्वविशिष्टसकलगोवृत्तित्वरूपस्य गोत्वत्वस्य व्याप्यता-

यत्तु पाकादौ चिकीर्षा सुखादौ इच्छा न स्यात् सिद्धे इच्छाविरहात् असिद्धस्याज्ञानात्, तस्मात् सुखत्वादिना ज्ञातेषु सर्वेषु सिद्धं विहायाऽसिद्धे इच्छा भवतीत्यभ्युपेयम् । तन्न । असिद्धस्याज्ञानेऽपि सिद्धगोचरज्ञानादेव इच्छाप्रवृत्तिस्वाभाव्यादसिद्धे तयोरुत्पत्तेः । न चातिप्रसङ्गः, समानप्रकारकत्वेन ज्ञानेच्छाकृतीनां कार्यकारणभावात् । न तु समानविषयत्वेनापि, क्व चिद-

---

च्च । गोत्वे च गोनिष्ठात्यन्ताभावाप्रतियोगित्वेन समवेतत्वेन च विशेषितमविशेषितं वा गवेतरासमवेतत्वं व्याप्यतावच्छेदकं न तु सकलगोवृत्तित्वविशेषितम्, सामान्यलक्षणयापि ग्रहीतुमशक्यत्वात्। न तु समानविषयकत्वेनापीति । स्यादेतत्, समानप्रकारतामात्रस्य

वच्छेदकतया तदन्तर्गतसकलगोग्रहार्थं सामान्यप्रत्यासत्तिरावश्यकीति प्रगल्भमतं निरस्यति गोत्वे चेति । गोपदशक्यतावच्छेदकत्वस्य साध्यतायां समवेतत्वविशिष्टगवेतरासमवेतत्वमात्रं गोरूपादौ व्यभिचारीत्यतो गोनिष्ठेत्यादि । गोनिष्ठाभावस्य प्रतियोगित्वं येन तदन्यत्वमिति व्युत्पत्त्या गोनिष्ठान्योन्याभावप्रतियोगितावच्छेदकान्यत्वे सतीत्यर्थस्तेन गोत्वस्यापि गोनिष्ठविशिष्टोभयाभावादिप्रतियोगित्वेपि न हेत्वप्रसिद्धिः । अवच्छेदकत्वं तु निरवच्छिन्नं समवायसम्बन्धावच्छिन्नं च ग्राह्यमतो नोक्तदोषतादवस्थ्यम् । गगनादौ व्यभिचारवारणार्थमाह समवेतत्वेन चेति। सास्नादेः साध्यतायां गवेतरासमवेतमात्रस्यैव समवायेन हेतुत्वसम्भवादाह अविशेषितं वेति । न त्विति । न तु तत्तदनन्तगोव्यक्तिवृत्तित्वविशेषितमित्यर्थः । अशक्यत्वादिति । तत्तद्व्यक्तित्वेनानन्तगोव्यक्तीनामेकदाऽनुपस्थिते-

प्यकल्पनात् । समानविषयकत्वे सत्यपि समानप्रकारकज्ञानाभावेनेच्छाकृत्योरभावात् तस्यावश्यकत्वेन गौ-

---

प्रयोजकत्वे क्व चिदेव रजतत्वप्रकारिकेच्छा क्व चिन्नेति नियमो न स्यात् । तादृशप्रकाराश्रय एव तदुत्पादोपगमे कथमरजते रजत-

---

रिति भावः। नैय्यायिकः शङ्कते स्यादेतदिति । एतद्दूषणं स्यादित्यर्थः। समानेति । रजतत्वावच्छिन्नधर्मिताकेष्टसाधनताज्ञानत्वेन समवायप्रत्यासत्त्या रजतत्वप्रकारकेच्छां प्रति प्रयोजकत्व इत्यर्थः । रजतत्वप्रकारकेच्छासामान्यं प्रति तत्प्रकारकज्ञानत्वेन हेतुतायां मानाभावेन यथाश्रुतासङ्गतेः रजतानयनत्वादिप्रकारकप्रवृत्तिं प्रत्येव रजतत्वादिप्रकारकत्वेनोपादानप्रत्यक्षस्य हेतुत्वादिति ध्येयम्। रजतत्वादिपदं सुखत्वादेरुपलक्षणम् । सुखादेः स्वतः प्रयोजनतया समानप्रकारकत्वेनैव तत्र ज्ञानेच्छयोः कारणत्वकार्यत्वसम्भवादित्यपि कश्चित्। वस्तुतो यद्धर्मिकेष्टसाधनताज्ञानं तत्रैव यदभावे द्वेषस्तत्रापीच्छा जायत इति सर्वत्र फलान्यगोचरेच्छायां नेष्टसाधनताज्ञानापेक्षेति स्वयमेव बौद्धाधिकारे व्यवस्थापितम्। तथा च यत्र विनश्यदवस्थैव रजताभावधर्मिकद्विष्टसाधनताज्ञानेन रजताभावे द्वेषो जनितस्तत्रोत्तरकालमज्ञानेपि रजते रजतत्वप्रकारेणेच्छापत्तिरतः सामान्यतो रजतत्वप्रकारकेच्छायां रजतत्वप्रकारकज्ञानत्वेनापि हेतुत्वान्तरमावश्यकमतः समानप्रकारतामात्रेणेत्यादिकं यथाश्रुतमेव सम्यगिति प्रतीमः । क चिदेवेति । रजतत्ववत्तया निश्चिते धर्मिणीत्यर्थः । क चित् गृहीतरजतत्वासंसर्गके घटादौ । नियमो न स्यादिति । तथा च रजतत्वप्रकारकज्ञानात् घटादेरपि तत्प्रकारकेच्छापत्तिरिति भावः। ननु तत्पुरुषीयरजतत्वप्रकारकेच्छासामान्यं प्रत्येव तत्पुरुषीयरजतत्वावच्छिन्नधर्मिकेष्टसाधनताज्ञानत्वेन हेतुत्वं तत्र च कार्यस्य विशेष्यत्वं कारणस्य तु स्वप्रकारीभूतरजतत्वाश्रयत्वं प्रत्यासत्तितो घटादौ न

त्वप्रकारिकेच्छा। अनुपस्थिते चाऽसंसर्गाग्रहोऽपि न नियामकः। वस्तुतोऽसंसर्गाग्रहमपेक्ष्य लघीयसस्तद्विषयतामात्रस्यैव नियामकत्वमुचितम्। सामान्यतश्च तादिच्छायां व्यवस्थितहेतुभावस्य तद्विषयकज्ञानस्य तत्प्रकारकत्वमवच्छेदकं कल्प्यते लाघवात्।

रजतत्वप्रकारकेच्छेत्यत आह तादृशप्रकारेति। [ज्ञानप्रकारीभूतरजतत्वाश्रय एवेत्यर्थः।] कथमिति। तथा च शुक्त्यादिधर्मिकरजतत्वप्रकारकेच्छायां व्यभिचारादुक्तक्रमेण हेतुत्वमसम्भवीति भावः। ननु तद्धर्मिकरजतत्वप्रकारकेच्छायां तद्धर्मिकरजतत्वासंसर्गग्रहस्याभावोपि हेतुर्वाच्य इतीच्छायां न विशेष्यानियमः। न च गुरूणां रजतधर्मिकरजतत्वासंसर्गग्रहस्याप्रसिद्ध्या रजतत्वप्रकारेण तत्रेच्छा न स्यात्कारणबाधादिति वाच्यम्। रजतान्यधर्मिकेच्छायामेवोक्तक्रमेण हेतुत्वोपगमात्। रजतत्वासंसर्गसाकाङ्क्षतत्तद्धर्मिकज्ञानाभावस्यैव वा हेतुत्वादतं आह अनुपस्थित इति। तथा च यत्र घटादौ रजतत्वासंसर्गग्रहस्तत्र रजतत्वप्रकारेच्छानुत्पादेप्यनुपस्थितयावद्वस्तुषु तादृशीच्छा दुर्वारा तेषु रजतत्वासंसर्गज्ञानविरहस्य स्वतः सिद्धत्वादिति भावः। एकधर्मिकरजतत्वप्रकारकज्ञानदशायां यत्र यत्र रजतत्वासंसर्गज्ञानस्य विरहः तेषु भाविष्विवाज्ञातेष्वपि जायत एव रजतत्वप्रकारकेच्छेति यदि ब्रूयात्तदाह वस्तुत इति। नियामकत्वमिति। कारणतावच्छेदकीभूयेत्यादिः। इच्छायां धर्मिनियमार्थं तत्तद्धर्मिविशेष्यकरजतत्वप्रकारकेच्छायां तत्तद्धर्मिकरजतत्वासंसर्गग्रहाभावत्वेन कारणत्वमपेक्ष्य तत्तद्धर्मिकेच्छायां तत्तद्धर्मिकेष्टसाधनताज्ञानत्वेनैव लाघवाद्धेतुत्वं युक्तमित्यर्थः। तथा च भाविरजतधर्मिकेच्छाजननार्थमवश्यमपेक्षणीयस्य भाविरजतधर्मिकज्ञानस्य प्रकारान्तरेणासम्भवादवश्यं सामान्यलक्षणा वाच्येति निगर्वः। नन्वेवं द्रव्यत्वेन रजतधर्मिकेष्टसाधनताज्ञानादपि रजतत्वप्रकारेण तत्रेच्छा स्यादत आह सामान्यतश्चेति। संवादिविसंवादीच्छासाधारण्येनेत्यर्थः। तादिच्छायाम्। तद्विषयकेच्छायाम्। तत्प्रकारकत्वमिति। तथा च रजतत्वप्रकारेण तत्तद्धर्मिकेष्टसाधनता-

अस्तु वा समानप्रकारकत्वेन व्यवस्थिते कार्यकारणभावेऽतिप्रसङ्गभङ्गाय सामानाधिकरण्यमिव समानविषयकत्वमपि प्रत्यासत्तिः।

ज्ञानत्वेन रजतत्वप्रकारकतत्तद्धर्मिकेच्छां प्रति हेतुत्वान्नातिप्रसङ्ग इति भावः। नन्वेवं संवादीच्छास्थल एव तत्तदनन्तधर्म्यन्तर्भावेनानन्तकार्यकारणभावापत्तिरतः सामान्यतो रजतधर्मिकरजतत्वप्रकारकेच्छायां रजतत्वप्रकारेण रजतधर्मिकेष्टसाधनताज्ञानत्वेन हेतुत्वमस्तु तथा चाऽतीतरजतगोचरज्ञानादेव भाविरजतव्यक्ताविच्छासम्भवात् कृतं सामान्यलक्षणया, विसंवादीच्छास्थले तु तत्तद्धर्म्यन्तर्भावेनानन्तकार्यकारणभावोऽनन्यगत्यैव सर्वैरभ्युपेतव्य इत्यस्वरसादाह अस्तु वेति। तथा च धर्मिमात्रस्याप्रवेशेनातिलाघवात् तत्पुरुषीयरजतत्वप्रकारकेच्छां प्रति तदीयरजतत्वावच्छिन्नविशेष्यताकेष्टसाधनतानत्वेनैव हेतुत्वमस्तु समानविशेष्यतायाः प्रत्यासत्तित्वादेवैकधर्मिकज्ञानादन्यधर्मिकेच्छानुत्पत्तेः सम्भवादित्यकामेनापि सामान्यलक्षणा स्वीकार्या तां विना भाविरजतादिज्ञानासम्भवेन तत्रेच्छानुत्पत्तिप्रसङ्गादित्याशयः। न चात्रानन्तपुरुषान्तर्भावादनन्तकार्यकारणभावतादवस्थ्यमिति वाच्यम्। रजतत्वप्रकारेण तत्तत्पुरुषधर्मिकविसंवादीच्छानुरोधेन विषयविधया पुरुषव्यक्तीनां निवेशस्य पूर्वकल्पेऽप्यावश्यकत्वादिति भावः। सामानाधिकरण्यमिवेति परमते दृष्टान्तः। तथा च समानप्रकारतामात्रेण हेतुतावादिभिः परैरर्थतैकस्य पुंसो ज्ञानादन्यस्येच्छोत्पादवारणार्थं सामानाधिकरण्यं प्रत्यासत्तिरुच्यते तथैवास्माभिरप्येकधर्मिकज्ञानादन्यधर्मिकेच्छोत्पादवारणार्थं समानविशेष्यत्वं प्रत्यासत्तिः स्वीकृतेति भावः। प्राञ्चस्तु रजतत्वप्रकारकेच्छासामान्यं प्रत्येव रजतत्वावच्छिन्नधर्मिकेष्टसाधनताज्ञानत्वेन हेतुत्वं तत्र च एकस्य पुंसो रजतत्वप्रकारेण ज्ञानादन्यस्य तादृशेच्छापत्त्यर्था यथा सामानाधिकरण्यं प्रत्यासत्तिस्तथैकधर्मिकज्ञानादन्यधर्मिकेच्छोत्पत्तिप्रसङ्गेन समानविशेष्यत्वमपि तथेति यथाश्रुतमेव ग्रन्थमाहुः। तन्न। समानविशेष्यत्वप्रत्यासत्त्या हेतुतायां तत्पुरुषीयत्वस्यावश्यं निवेशनीयत्वात्। अन्यथा रजतत्वेन रजतधर्मिकेष्टसाधनताज्ञानवतोपि पुंसः शुक्तिधर्मिकरजतत्वप्रकारके-

असंसर्गाग्रहादेः कारणतामपेक्ष्य समानविषयत्वस्यावच्छेदककोटिनिवेशोऽपि लघीयान् । कारणयथार्थत्वायथार्थत्वाधीनस्तु कार्यस्य तथाविधो विशेषः । एतेन रजतत्वप्रकारकेच्छायां तत्प्रकारकं ज्ञानं संवादिन्यां तस्यां दोषाभावसहितं विसंवादिन्यान्तूपस्थितारजतगतभेदाग्रहसहितं हेतुरिति परास्तम् । त्वदिशापि

च्छोत्पत्तिप्रसङ्गात् पुरुषान्तरीयरजतत्वप्रकारकज्ञानस्य विशेष्यतासम्बन्धेन शुक्तौ सत्त्वादिति दिक् । स्वत्वस्यानुगतत्वे रजतत्वप्रकारकेच्छासामान्यं प्रत्येव स्वसमानविशेष्यकरजतत्वप्रकारकज्ञानत्वेन हेतुत्वं प्राच्यैरुक्तमपि सम्यक्, विशेष्यनियमार्थमसंसर्गाग्रहादेः कारणत्वकल्पनामपेक्ष्य लाघवादित्याह असंसर्गाग्रहादेरित्यादिना । आदिना भेदाग्रहव्यावर्त्तकधर्माग्रहादेः परिग्रहः । समानविषयत्वस्य । स्वसमानविशेष्यकत्वस्य । अनिवेशोपीत्यपिनाऽनुगतानतिप्रसक्तं स्वत्वमेव दुर्वचमित्यस्वरसः सूचितः । ननु यथार्थरजतत्वप्रकारकेच्छात्वावच्छिन्नं प्रति दोषाद्यभावविशिष्टस्य रजतत्वासंसर्गाग्रहस्य हेतुत्वाद्रजतत्वप्रकारकेच्छासामान्यं प्रत्यपि रजतत्वासंसर्गाग्रहोऽवश्यं हेतुर्यद्विशेषयोरिति न्यायात् कुतस्तत्कारणतामपेक्ष्योक्तं लाघवमत आह कारणेति । कार्यस्य । इच्छादेः । तथा च यथार्थेच्छादिकं प्रत्यपि यथार्थज्ञानादेरेव समानविशेष्यत्वप्रत्यासत्त्या हेतुत्वाद्विशेषतोप्यसंसर्गाग्रहादेर्हेतुत्वमसिद्धमिति भावः । एतेन । समानविशेष्यत्वप्रत्यासत्त्यैवातिप्रसङ्गभङ्गेन । निरस्तमित्यग्रेणान्वयः । तत्प्रकारकज्ञानमिति । तत्प्रकारेणेष्टसाधनताज्ञानमित्यर्थः । हेतुरिति परेणान्वयः । तस्याम् । इच्छायाम् । इदं रजतमिति भ्रमात् शुक्त्यादौ यथार्थेच्छाप्रसङ्गादाह दोषाभावसहितमिति । तत्प्रकारकज्ञानमित्यनुषज्यते । शुक्त्यादौ रजतभेदग्रहे तद्धर्मिकविसंवादीच्छानुत्पत्तेराह विसंवादिन्यां त्विति । तस्यामित्यनुषज्यते । उपस्थितं यद्रजतं तद्धर्मिकरजतभेदाग्रहसहितमित्यर्थः । न चैवं रङ्गे रजतभेदग्रहदशायां शुक्तौ विसंवादीच्छा न स्यादिति वाच्यम् । विसंवादिरजतत्वप्रकारकेच्छात्वेन जन्यता रजतभेदप्रकारकत्वानिरूपितारजतधर्मिताकज्ञानत्वे-

च संवादिन्यामुपस्थितरजतभेदाग्रहस्यैव हेतुत्वौचित्यात् दोषाणां रजतभेदग्रहप्रतिबन्धकानामभावमपेक्ष्य लघुत्वात् । अत्राहुः । सिद्ध एव सुखे सुखत्वेन रूपेणेच्छा लाघवात् तत्प्रकारकेच्छायां

न हेतुत्वं समानविशेष्यत्वं प्रत्यासत्तिरित्यत्र तात्पर्यात् । अथ अन्यथाख्यातिमनङ्गीकुर्वतामस्माकं कूटलिङ्गजनितादिदं रजतमित्याकारकज्ञानद्वयादपि यथार्थरजतेच्छोत्पादात्तत्र यथार्थरजतत्वप्रकारकज्ञानत्वेन हेतुत्वं दुर्घटमत आह त्वाद्दिशापीति । उपस्थितं यद्रजतं तद्धर्मिकरजतभेदग्रहाभावस्येत्यर्थः । न चैवमेकत्र रजतभेदग्रहेपि रजतान्तरे संवादीच्छा न स्यात् रजतधर्मिभेदग्रहसत्त्वादिति वाच्यम् । संवादिरजतत्वप्रकारकेच्छात्वेन कार्यत्वं रजतभेदप्रकारत्वानिरूपितरजतधर्मिताकज्ञानत्वेन रजतभेदनिराकाङ्क्षरजतधर्मिताकज्ञानत्वेन रजतत्वसाकाङ्क्षरजतधर्मिताकज्ञानत्वेन वा हेतुत्वं समानविशेष्यता च प्रत्यासत्तिरित्यत्र तात्पर्यात्।आकाङ्क्षा च परेषां पदार्थान्तरम् । क्व चित् ज्ञानद्वयस्थलेपीतेन रजत एव नेदं रजतमिति भ्रमात्मकज्ञानद्वयादपि न संवादीच्छा न वा कूटलिङ्गकपरामर्शोत्तरोत्पन्नस्य प्रमाख्यानाभिषिक्तस्येदंरजतमितिज्ञानद्वयस्योत्तरं संवादीच्छानुत्पत्तिरिति ध्येयम् । हेतुत्वेति । प्रयोजकत्वेत्यर्थः । तेन भेदाग्रहस्य कारणतावच्छेदकत्वेपि न क्षतिः । औचित्यादिति । अन्यथाख्यातिवादिनां पुनरस्माकं लाघवाद्विशिष्टज्ञानमेव हेतुरित्याशयः । औचित्ये हेतुमाह दोषाणामित्यादि । अभावमपेक्ष्येति । न च भेदग्रहस्येव भेदव्याप्यवत्ताग्रहाणां भेदावच्छेदकवत्ताग्रहाणां चाभावस्य हेतुतायाः कल्पनीयत्वात्तवापि गौरवं समानमिति वाच्यम् । संवादिरजतेच्छां प्रति रजतत्वसाकाङ्क्षरजतधर्मिताकज्ञानत्वेन हेतुत्वमित्युक्तचरमकल्पे भेदव्याप्यवत्ताग्रहस्य हेतुत्वाभावेपि क्षत्यभावादिति भावः । सिद्ध इति । उत्पन्न इत्यर्थः । सुखादाविच्छा न स्यादिति मूलश्रवणादाह सुख इति । ननूत्पन्नसुखे सिद्धत्वनिर्णयेन प्रतिबन्धात्कथमिच्छोत्पत्तिरत आह लाघवादिति । तत्तद्धर्मिकेच्छायां तत्तद्धर्मिकसिद्धत्वनिश्चयत्वेन प्रतिबन्धकत्वे धर्मिभेदेन गौरवा-

तत्प्रकारावच्छेदेन सिद्धत्वज्ञानमेव हि विरोधि न च तत्प्रकृते, तत्सत्त्वे इच्छोत्पत्तेस्त्वयाप्यनङ्गीकारात् । कथमन्यथा चिरप्रोषितस्याऽज्ञातकान्तामरणस्य तत्कान्तावलोकनादाविच्छा जातावलोकनादीनां सिद्धत्वज्ञानात् अतिरिक्तस्य चासत्त्वादिसाधि बहुतरमूहनीयम् । अथ सिद्धत्वनिश्चयाभावापेक्षया लाघवादसिद्धत्वज्ञानमेव हेतुः, न च सिद्धत्वेन ज्ञाते तत्सम्भवतीत्यसिद्धत्वज्ञाना-

---

दित्यर्थः । तत्प्रकारकेच्छायामिति । तद्धर्मविशिष्टोद्देश्यताकेच्छायामित्यर्थः । तेन सुखत्वावच्छेदेन सिद्धत्वग्रहेपि सुखहेतुः पटो जायतामित्यादेः सुखत्वादिप्रकारकेच्छाया उत्पादः । तत्रेच्छायां तादृशपटत्वविशिष्टस्यैवोद्देश्यतया विषयत्वात् । उद्देश्यत्वं पुनरिच्छामीत्यनुभवसाक्षिको विषयताविशेषः। मुख्यविशेष्यतानिरूपिततत्तत्प्रकारताकेच्छायामित्यर्थकरणान्नोक्तदोष इति तु न युक्तम्, सुखत्वावच्छेदेन सिद्धत्वग्रहेप्यहं सुखी स्यामित्याकारकेच्छाप्रसङ्गात् आत्मत्वावच्छेदेन सिद्धत्वनिश्चयदशायामहं सुखी स्यामितीच्छानुत्पादप्रसङ्गाच्चेति ध्येयम् । तत्प्रकारकसिद्धतानिश्चयमात्रस्य विरोधित्वे सिद्धः सुखत्ववांश्च गुण इत्यादिसमूहालम्बनस्थलेपि सुखं जायतामितीच्छा न स्यादत उक्तं तदवच्छेदेनेति । तद्धर्मावच्छिन्नविशेष्यताकेत्यर्थः । अवच्छेदकत्वं तु विशेष्यकोटिप्रविष्टतामात्रेण ग्राह्यम् । तेन सुखं सिद्धमित्याकारकस्येव भोजनसुखं सिद्धमित्याकारकस्यापि निश्चयस्य सत्त्वे सुखं जायतामितीच्छाया नोत्पादः । अत एव प्रीत्या धनलाभेपि धनमात्रार्थिनो नेच्छा किं तु प्रतिग्रहाद्यधीनधनार्थिन एव यत्किञ्चिद्विशेषसिद्धौ सामान्येच्छाविच्छेदादिति शब्दमणावप्युक्तम्। न चैवं सुखसामान्यं सिद्धमित्येवं सुखत्वावच्छेदकतामन्तर्भाव्य निश्चयेपि भोजनसुखं जायतामितीच्छाप्रसङ्गः तादृशसुखत्वावच्छिन्ने सिद्धत्वानिश्चयादिति वाच्यम् । तस्यापि स्वातन्त्र्येण तादृशेच्छाविरोधित्वादिति भावः । ज्ञानमिति । निश्चय इत्यर्थः । न चेत्यादि । तत्सुखत्वावच्छेदेन सिद्धत्वज्ञानं प्रकृते सुखत्वप्रकारकेच्छास्थले नेत्यर्थः । उत्पन्नसुखेषु तत्तद्व्य-

र्थं सामान्यलक्षणेति चेन्न । विशेषरूपावच्छेदेन सिद्धत्वेन ज्ञात-
एव सामान्यरूपेणाऽसिद्धत्वग्रहसम्भवात् । तदेकं ज्ञानं ज्ञानद्वयं

क्तित्वेनैव सिद्धत्वनिश्चयात्सुखत्वमन्तर्भाव्य तत्सुखं सिद्धमित्या-
कारकनिश्चयसत्त्वे तु सुखान्तरत्वप्रकारेण तत्रेच्छेति भावः । ननु
इच्छासामान्यं प्रत्येव समानविशेष्यत्वप्रत्यासत्त्या सिद्धत्वनिश्चय-
स्य प्रतिबन्धकत्वं तत्तदनन्तधर्मितावच्छेदकान्तर्भावेण तथात्वे
गौरवात्तत्कुतः सिद्धसुखादाविच्छेत्यत आह कथमिति । अन्यथा ।
तत्तद्धर्मानन्तर्भावेन विरोधित्वे । नैयायिकः शङ्कते अथेति । यद्यप्य-
प्रामाण्यज्ञानाभावविशिष्टसिद्धत्वनिश्चयाभावत्वेन हेतुत्वमपेक्ष्यासि-
द्धत्वज्ञानस्य तद्धर्मिकतत्तदप्रामाण्यनिश्चयाभावकूटस्य च प्रत्येक-
रूपेण हेतुतायामेव गौरवम्, तथापि सिद्धत्वस्यैव तदव्याप्यवत्त्वस्य
तदवच्छेदकधर्मवत्त्वस्य च ज्ञाने प्रतिबन्धकत्वाकल्पनादेव लाघव-
म्। सिद्धत्वज्ञानीयतत्तदप्रामाण्यसंशयव्यक्तीनां प्रातिस्विकरूपेणाभा-
वरूपस्य प्रतिबन्धकतावच्छेदकीभूतस्य विशेष्यविशेषणभावेनानन्तका-
र्यकारणभावकल्पनामपेक्ष्य च लाघवं ग्राह्यम्। सिद्धत्वस्य ज्ञानान्तर-
मप्रमेत्यादिरूपाप्रामाण्यज्ञानसत्त्वेपि सिद्धत्वनिश्चयेनेच्छाप्रतिबन्धा-
दप्रामाण्यज्ञानसामान्यस्योत्तेजकत्वासम्भवात् । न च तत्तदप्रामा-
ण्यज्ञानाभावकूटविशिष्टसिद्धत्वनिश्चयाभावव्यक्तेरखण्डतद्व्यक्तित्वे-
नैव हेतुत्वादुक्तगौरवानवकाशः । प्रतियोग्यविशेषितत्वाभावस्य हेतु-
त्वे तादृशसिद्धत्वनिश्चयाभावसहचरितस्यानतिप्रसक्तस्याभावान्त-
रस्यापि तत्तद्व्यक्तित्वेन हेतुतापत्तेः विशिष्टाभावस्य विशेष्यविशे-
षणाभावानतिरिक्तत्वेऽखण्डाभावव्यक्तित्वासम्भवाच्चेत्याशयः । अ-
सिद्धत्वज्ञानार्थमित्यस्य कोर्थः किं सुखादावसिद्धत्वप्रकारकज्ञानार्थ-
म्, असिद्धत्वविषयकज्ञानार्थं वा, नाद्य इत्याह विशेषेति। उत्पन्नसुखे-
ष्वेव तत्तद्व्यक्तित्वेन सिद्धत्वनिश्चयेपि सुखत्वेनासिद्धत्वज्ञाने बा-
धकाभावादिति भावः । ननु विशेषतः सिद्धत्वज्ञानदशायां यत्सा-
मान्यतोऽसिद्धत्वज्ञानं तन्न विशिष्टधीः अन्यथाख्यात्यनङ्गीकारादि-
त्यत आह तदिति । एकमिति स्वमते । द्वयं वेति परेषाम् । असि-

वेत्यन्यदेतत् । सामान्यलक्षणासहस्रेणाप्यसिद्धत्वस्य ज्ञातुमशक्यत्वाच्च । वस्तुतस्तु सामान्यलक्षणां विनाप्ययं कालः सुखप्राग्भाववान् सुखोत्पादकालीनध्वंसप्रतियोगी वा कालत्वादेतादृशकालत्वाद्वेत्यनुमानादसिद्धसुखस्य तदसिद्धत्वस्य च ज्ञानं सुलभ-

---

द्धत्वसाकाङ्क्षधर्मिज्ञानस्यैवेच्छाजनकतया ज्ञानद्वयेपि तत्सम्भवादिति भावः । द्वितीये त्वाह सामान्येति । सुखत्वादिसामान्यलक्षणायास्तत्रासामर्थ्यादिति भावः । नन्वेवमिच्छाया अनागतविषयकत्वप्रवादो व्याहन्येतेत्यत आह वस्तुतस्त्विति । वर्तमानकालस्य सुखप्रागभाववत्त्वाद्यनुमितौ वर्तमानकालवृत्तिप्रागभावप्रतियोगित्वादिलक्षणमसिद्धत्वं सुखस्यापि सुग्रहमित्याशयेनाह अयं काल इत्यादि । प्रागभावानभ्युपगमे वर्तमानकालध्वंसाधिकरणकालोत्पत्तिकत्वमेव वासिद्धत्वं वाच्यमतस्तद्ग्रहार्थं साध्यान्तरमाह सुखोत्पादेत्यादि । महाप्रलयमनङ्गीकृत्याह कालत्वादिति । तदङ्गीकारे त्वाह तादृशेति । सुखोत्पत्तिकालीनध्वंसप्रतियोगिकालत्वादित्यर्थः । अनुमानादिति । प्रयोजकत्वे पञ्चमी । तेनोक्तानुमितेः साक्षादसिद्धत्वानवगाहित्वेपि न क्षतिः । तत्सहकारेण मनसैवोत्तरकालमुक्तस्यासिद्धत्वस्य ग्रहसम्भवादिति ध्येयम् । मिश्रास्तु वर्तमानकालवृत्तिप्रागभावप्रतियोगित्वं नासिद्धत्वं चिरोत्पन्नग्रामादौ तदभावनिश्चयेपीच्छानुभवात् किन्तु वर्तमानकालावच्छेदेन स्ववृत्तित्वमेव तथा । सुखादिधर्मिकस्ववृत्तित्वप्रकारकतत्कालीनेच्छां प्रति सुखादिधर्मिकतत्तत्कालावच्छिन्नस्ववृत्तित्वप्रकारकज्ञानत्वेव हेतुत्वात् । अत एव सुखं मे जायतामित्याकारोपीच्छायाः सर्वजनसिद्धः सम्पद्यते । असिद्धत्वज्ञानस्य जन्यतावच्छेदकतयैव सर्वत्रेच्छायां मदंशोपरागात् । स्ववृत्तित्वं तु सुखादौ स्वसमवेतत्वं पाकादौ स्वकृतिविषयत्वं ग्रामादौ स्वीयस्वत्वादिकं यथानुभवमूहनीयम् । सिद्धत्वज्ञानस्य विरोधित्वपक्षे च तत्तत्कालावच्छेदेन स्ववृत्तित्वमेव सिद्धत्वं ग्राह्यमिति प्राहुः । ननु भाविसुखप्रागभावादिव्यक्तेः पूर्वमज्ञानात्कथं तत्साध्यकानुमितिरत आह निपुणेत्यादि । साध्यतावच्छेदकरूपेणैकव्यक्तिज्ञानादेव पक्षधर्मता-

मेव। निपुणतरमुपपादयिष्यते चेदं शब्दमणिदीधितावितिं कृतं पल्लवितेन। घटः स इत्यादिसंशयसमानाकारो हि निश्चयस्तद्विरोधी घटो न वेति संशयः कोटितावच्छेदके घटत्वांशे निष्प्रकारकश्च। न च प्रमेयवानिति प्रत्ययस्तथा। अत एव जातिमानिति

बलात्ताद्रूप्येण साध्यान्तरानुमितेः पाकानुमाने सम्पादयिष्यमाणत्वादिति भावः। अत्र जातिमत्त्वप्रकारेण वन्हेरुपनयदशायां वन्हित्वेन तस्योपनीतप्रत्यक्षानुदयाद्वन्हित्वेन तत्तद्व्यक्त्युपनीतप्रत्यक्षं प्रति वन्हित्वेन तत्तद्व्यक्तेर्ज्ञानमवश्यं हेतुर्वाच्यं तथा च तत्रैवावन्हिस्थले तत्तद्व्यक्तीनां विशिष्योपादानेपि वह्निस्थले वन्हित्वेन यस्य कस्यापि ज्ञानमेव च वन्हित्वेन वन्हुपनीतप्रत्यक्षं प्रति हेतुः कल्प्यते न तु तत्तद्वन्ह्यन्तर्भावेण लाघवादिति वन्हित्वेन कस्यापि ज्ञानसत्त्वे वन्हित्वेन सकलवन्हिप्रत्यक्षं दुर्वारमिति अर्थवशसम्पन्नमेव सामान्यलक्षणायाः प्रत्यासत्तित्वम्। न चैवं वन्हित्वेन तत्तदगुञ्जोपनीतभानं प्रत्यपि वन्हित्वप्रकारकतत्तदगुञ्जाज्ञानत्वेन हेतुत्वमपेक्ष्य लाघवेन सामान्यतो वन्हित्वप्रकारकगुञ्जोपनीतप्रत्यक्षं प्रत्येव वन्हित्वप्रकारकगुञ्जाज्ञानत्वेन हेतुत्वकल्पनमेव युक्तमिति वाच्यम्। वन्हित्वेनैकगुञ्जाज्ञानोत्तरं ताद्रूप्येण गुञ्जान्तरोपनीतभानस्यानुभवविरोधित्वादेव तत्तदनन्तगुञ्जान्तर्भावेण हेतुत्वकल्पनात्. प्रकृते च वन्हित्वेनैकवन्हेरुपनयोत्तरं ताद्रूप्येण वन्ह्यन्तरोपनीतप्रत्यक्षे बाधकाभावादन्यथा बाधकबलादेव सामान्यलक्षणाखण्डनसम्भवे साधकाभावोपन्यासानौचित्यादित्यस्मद्गुरुचरणाः। तच्चिन्त्यम्। ननु प्रमेयत्वप्रकारेण घटत्वज्ञानादुत्पन्नस्य प्रमेयवानितिनिश्चयस्यैव विरोधिघटत्वप्रकारकस्य सत्त्वात्कथं घटो न वेत्याकारः तादात्म्येन घटस्य सन्देह इत्यत आह संशयेति। तद्विरोधी। घटो न वेति संशयविरोधी। निष्प्रकारको निरवच्छिन्नप्रकारताकः। तेन घटत्वांशे सप्रकारकस्यापि स घटः प्रमेयवानितिनिश्चयस्य स घटो न वेत्याकारकसंशयस्य विरोधित्वमक्षतम्। नचैवमयं घटत्ववानितिनिर्णयो घटो न वेतिसंशयविरोधी न स्यात् घटत्वांशे घटत्वस्यैव प्रकारत्वादत आह

रवाच्चेति परसिद्धान्तात् । न च सर्वज्ञत्वे संशयो न स्यादिति दोषः, घटः स इति घटत्वप्रकारकं हि ज्ञानं संशयविरोधि तच्च न वृत्तं स्वसामग्रीविरहात् अतो घटत्वादिसकलविशेषज्ञानेऽपि स घटो न वेति संशय इति ॥

निश्चयेऽपि घटो न वेति संशयः,घटत्ववानितिनिश्चयस्तु घटेतरावृत्तित्वविशिष्टमवगाहमानो घटान्यतासन्देहं विरुणद्धि, पुरुषादृत्तिवक्रकोटरादिनिश्चय इव पुरुषत्वसंशयम् । स्वसामग्रीविरहादिति । घट इति निश्चयं प्रति घटत्वांशे निर्विकल्पकं ज्ञानं कारणं जातित्वादिना घटत्वज्ञानेऽपि तदनुदयात् सामान्यलक्षणायाश्च सामान्यप्रकारकज्ञानजनकत्वनियमात् विशिष्टज्ञानसामग्रीसत्त्वात् ॥

घटत्ववानिति । तथा च तद्वदवृत्तिधर्मवत्ताज्ञानं तदभावव्याप्यवत्ताज्ञानविधयैव तद्वत्त्वज्ञानप्रतिबन्धकमिति भावः । ननु प्रमेयत्वसामान्यलक्षणयैव स्वाश्रयस्य घटत्वादेर्निर्विकल्पकं कुतो न जन्यत इत्यत आह सामान्येति । अन्यथा धर्मान्तरज्ञानादपि स्वाश्रयस्य प्रत्यक्षोदयेन व्यभिचारप्रसङ्गादिति भावः । ननु सामान्यस्थले सामान्यप्रत्यासत्तेर्विशिष्टप्रत्यक्षजनकत्वमेव नास्तीत्यत आह विशिष्टधीसामग्रीति ॥

इति श्रीमहामहोपाध्यायजगदीशतर्कालङ्कारभट्टाचार्यविरचिता सामान्यलक्षणा समाप्ता ।

इति व्याप्तिग्रहग्रन्थः समाप्तः ।

चिन्तामणेः उपाधिनिरूपणम् ।

उपाधिज्ञानादव्यभिचारज्ञाने सति न व्याप्तिनिश्चय इत्युपाधिर्निरूप्यते ।

तत्रोपाधिः साध्यत्वाभिमतव्यापकत्वे सति साध-

दीधित्याः उपाधिनिरूपणम् ।

प्रसङ्गादुपाधिं निरूपयितुमाह उपाधीति । सोपाधौ साध्यत्वसाधनत्वे न सम्भवतः अतोऽभिमते इति । यो यद्व्यापकत्वे सति यद्व्यापकः स तत्रोपाधिरिति निर्गलितोऽर्थः । व्यापक-

जागदीश्याः उपाधिनिरूपणम् ।

प्रसङ्गादिति । व्याप्तिग्रहप्रतिबन्धकग्रहजनकग्रहविषयत्वेन स्मृतस्योपाधेरुपेक्षानर्हत्वादित्यर्थः । नव्यास्तु न व्याप्तिनिश्चय इति मूलस्य परोक्तहेतावित्यादिः तथा च स्वकीयहेतोर्व्याप्तिनिश्चयस्येव परोक्तहेतोः सोपाधित्वनिश्चयस्याऽपि विजयप्रयोजकत्वाद्विजयादिलक्षणैककार्यकारित्वसङ्गत्यैव व्याप्त्यनन्तरमुपाधेर्निरूपणे मूलस्य तात्पर्यमिति प्राहुः । न सम्भवत इति । व्यापकत्वव्याप्यत्वयोरेव साध्यत्वसाधनत्वस्वरूपादिति भावः । ननु साध्यत्वेनाभिमतत्वस्य केवलान्वयित्वात्तदवच्छिन्नं प्रति न कस्याप्युपाधेर्व्यापकत्वं साध्यत्वेनाभिमतधूमादितत्तद्वस्त्वभिधाने तु अभिमतान्तवैयर्थ्यमतः फलितार्थमाह योयदित्यादितत्र तयोः तत्साध्य-

नत्वाभिमताव्यापकः । अनौपाधिकत्वज्ञानञ्च न व्या-

त्वाव्यापकत्वे एकरूपेण विवक्षिते न तूपाधिः । साध्यव्यापकत्वं साध्यनिष्ठव्याप्तिनिरूपकत्वं सा च यावदुपाधिव्यापकव्यापकत्वरूपानौपाधिकत्वज्ञानादेव ग्राह्या, उपाधिव्यापकयावदर्थान्तर्गतस्य चोपाधेः साध्यव्यापकत्वग्रहश्च साध्यनिष्ठव्याप्तिग्रहादित्यन्योन्याश्रय इत्यत आह अनौपाधिकत्वेति । व्यापकत्वं व्या-

---

कतद्धेतुकानुमान इति यावत् । ननु वन्हिमान् धूमादित्यादौ द्रव्यत्वादिप्रकारेण साध्यव्यापकस्य वन्ह्यादेस्तत्तद्वन्हित्वादिप्रकारेण साधनाव्यापकत्वात्तत्रातिव्याप्तिरत आह एकरूपेणेति । तृतीयार्थोऽभेदस्तथा च साध्यवन्निष्ठाभावप्रतियोगितानवच्छेदकस्वरूपं साध्यव्यापकत्वं यद्रूपाभिन्नं साधनवन्निष्ठाभावप्रतियोगितावच्छेदकस्वरूपं साधनाव्यापकत्वमपि तद्रूपाभिन्नं ग्राह्यमित्यर्थः । साध्यवन्निष्ठाभावप्रतियोगित्वाभावरूपमेव मूलोक्तं साध्यव्यापकत्वं यद्रूपावच्छेद्यं साधनवन्निष्ठाभावप्रतियोगित्वरूपं साधनाव्यापकत्वमपि तद्रूपावच्छेद्यं ग्राह्यमित्यर्थः । प्रगल्भमते प्रतियोगित्वस्येव तदभावस्याप्यव्याप्यवृत्तित्वेन धर्मावच्छेद्यत्वसम्भवादित्यप्याहुः । नव्यास्तु यद्व्यापकत्व इति । यदभावव्याप्याभावप्रतियोगित्वे यद्वदवृत्त्यभावप्रतियोगित्वे चेत्यर्थः । रूपेणेत्यत्रावच्छिन्नत्वमेव तृतीयार्थः इति प्राहुः । एकरूपेणेत्युपलक्षणमेकसम्बन्धेनेत्यपि द्रष्टव्यं तेन संयोगेन वन्ह्यादिव्यापकस्य वन्ह्यादेः समवायेन धूमाद्यव्यापकत्वेऽपि नातिव्याप्तिः । साध्यवन्निष्ठाभावाप्रतियोगित्वरूपव्यापकत्वादिप्रवेशेऽन्योन्याश्रयासम्भवाद्व्यापकत्वमन्यथा निर्वक्ति साध्यनिष्ठेति । व्याप्तेर्निरूपकत्वमित्यसमस्तपाठः सम्यक् । व्याप्तिनिरूपकत्वमिति पाठे वृत्तिशब्दैकदेशव्याप्तेः सा चेत्यनेन परामर्शोऽव्युत्पत्तिरिति ध्येयम् । साधनं येषां व्य-

त्तिज्ञाने हेतुरतो व्यापकत्वादिज्ञानेनाऽन्योन्याश्रयः । यद्वा व्यापकत्वं तद्वन्निष्ठात्यन्ताभावाप्रतियोगित्वं तत्प्र-

---

त्तिनिरूपकत्वं सा चाऽनौपाधिकत्वग्रहादृगृहीतव्या तत्प्रविष्टव्याप्ति-ज्ञानमपि अनौपाधिकत्वान्तरग्रहादित्यनवस्थेयत आह अनौपा-धिकत्वेति । अन्योन्याश्रयपदमनवस्थापरमिति सम्प्रदायः । अ-

---

भिचारि तेषां व्यभिचारिणा साध्येन समं सामानाधिकरण्यं यद्य-नौपाधिकत्वं तदा तज्ज्ञानस्य साध्यनिष्ठोपाधिव्याप्तिधीहेतुत्वेऽपि तत्र तादृशव्याप्तेरप्रवेशान्नान्योन्याश्रयः सम्भवतीत्यतः प्रकारा-न्तरेणानौपाधिकत्वं निरुच्याह सा चेति। उपाधिनिरूपिता साध्यनि-ष्ठव्याप्तिश्चेत्यर्थः । साध्यनिष्ठव्याप्तिग्रहादिति । तत्रापि साध्यव्याप-कत्वस्य साध्यनिष्ठव्याप्तिनिरूपत्वस्वरूपस्यैव निवेशादिति भावः । अन्योन्याश्रय इति । धूमादिसाध्यधर्मिकार्द्रेन्धनाद्युपाधिव्याप्तिग्रहं प्रत्यार्द्रेन्धनव्यापकीभूतयावद्व्यापकको धूम इत्याकारकमार्द्रेन्ध-नीयानौपाधिकत्वज्ञानं कारणं वाच्यं तत्रार्द्रेन्धनव्यापकया-वदन्तर्गतमार्द्रेन्धनमपीति तत्रापि धूमनिष्ठव्याप्तिनिरूपकत्वल-क्षणस्य ज्ञानमपेक्षितं तथा चार्द्रेन्धने धूमनिष्ठव्याप्तिनिरूप-त्वग्रहे सत्यनौपाधिकत्वज्ञानसम्पत्त्या धूमधर्मिण्यार्द्रेन्धनीयव्या-प्तिग्रहस्तादृशव्याप्तिग्रहे च विशेषणज्ञानसम्पत्त्या धूमनिष्ठव्या-प्तिनिरूपकत्वरूपं धूमव्यापकत्वमार्द्रेन्धने ग्राह्यमित्यन्योन्या-श्रय इत्यर्थः । प्राचीमतमाह व्यापकत्वमित्यादिना । साध्यनिष्ठ-व्याप्तिनिरूपकत्वमेव चार्द्रेन्धनाद्युपाधेः साध्यव्यापकत्वं सा-ध्यनिष्ठा चोपाधिव्याप्तिरुपाधिव्यापकयावद्द्रव्यत्वरूपस्यानौपा-धिकत्वस्य ज्ञानादुग्राह्या तथा च तन्निविष्टस्योपाधिनिष्ठव्याप्तिनिरूप-कत्वपर्यवसन्नस्योपाधिव्यापकत्वस्य द्रव्यत्वादौ ज्ञानमुपाधौ द्र-व्यत्वादिव्यापकयावद्द्रव्यत्वरूपस्य द्रव्यत्वाद्यनौपाधिकत्वस्य ज्ञानादेव वाच्यमेवं तन्निविष्टस्यापि द्रव्यत्वादिनिष्ठव्याप्तिनिरूप-

तियोगित्वञ्चाव्यापकत्वम् । प्रतियोगित्वञ्च तदधिकर-

व्याप्यवृत्तीनां व्यापकत्वमुपपादयितुमाह प्रतियोगित्वञ्चेति । तदधिकरणानधिकरणत्वं तदधिकरणाधिकरणत्वविरोधि यत् प्रतियोगित्वं प्रतियोगिव्यधिकरणाभावप्रतियोगित्वं तादिह गृहीतव्यम् ।

कत्वपर्यवसन्नस्योपाधेर्द्रव्यत्वादिव्यापकत्वस्य सत्त्वादौ ज्ञानं सत्त्वादिव्यापकयावद्द्रव्यावृत्त्यत्वज्ञानाधीनमित्येवं क्रमेणानवस्थेत्यर्थः । सम्प्रदाय इत्युक्त्याऽन्योन्याश्रयपदस्य मुख्यार्थे क्षतिरस्वरसः सूचितः । ननु व्यापकत्वं यदि व्याप्तिनिरूपकत्वं तदा व्यापकसामानाधिकरण्यरूपायास्तन्निष्ठव्याप्तेरपि व्यापकत्वगर्भत्वादात्माश्रयतादवस्थ्यमेवेत्यस्वरसान्मणिकारो व्यापकत्वमन्यथा निर्वक्ति यद्वेति । अव्याप्यवृत्तीनामिति । तथा च धूमवान् वन्हेरित्यादौ धूमसंयोगस्य उपाधित्वार्थं वन्हिमान् धूमादित्यादौ वन्हिसंयोगादेरुपाधित्ववारणार्थं चायं मूलग्रन्थ इति भावः । ननु तदधिकरणेत्यत्र तच्छब्देन साध्यादिमन्निष्ठाभावस्य परामर्शात् तदधिकरणानधिकरणत्वं साध्यादिमन्निष्ठाभावाधिकरणावृत्तित्वं तथा च तदेव यदि साध्यादिमन्निष्ठाभावप्रतियोगित्वं तदा वृत्तिमन्मात्रस्यैव साध्यादिमन्निष्ठगगनाभावाधिकरणवृत्तित्वात् धूमवान् वन्हेरित्यादौ घटादेरपि साध्याव्यापकत्वमार्द्रेन्धनाद्युपाधेरपि साधनाव्यापकत्वं न स्यादतो लक्षणप्रविष्टस्य स्वरूपसम्बन्धात्मकप्रतियोगित्वस्यैव विशेषणान्तरदानाभिप्रायेण व्याचष्टे तदधिकरणेति । साध्यादिमन्निष्ठस्य स्वनिरूपकाभावस्याधिकरणवृत्तित्वविरोधि यत् प्रतियोगित्वं तदेव साध्यव्यापकत्वादौ गृहीतव्यं निवेशनीयमित्यर्थः । स्वं प्रतियोगित्वम् । तन्निरूपकत्वेनाभावस्य निवेशनादुक्तक्रमेणगगनाद्यभावमादाय न दोषः । ननु तदधिकरणावृत्तित्वमित्यत्र वृत्तिरुपाधेयघटकसम्बन्धेन वाच्या अन्यथा वृत्तिमन्मात्रस्यैव स्वाभावति कथं चित् कालिकादिसम्बन्धेन वर्त्तमानत्वात् पूर्वदोषापत्तेः ।

णानधिकरणत्वमिति वदन्ति । तन्न । साधनपक्षधर्मावच्छिन्नसाध्यव्यापकोपाध्यव्याप्तेः । न च तयोरनुपाधित्वम्, दूषकताबीजसाम्यात्, मित्रातनयत्वेन श्यामत्वसाधने शाकपाकजत्वस्य प्रत्यक्षस्पर्शाश्रयत्वेन वायोः प्रत्यक्षत्वे साध्ये उद्भूतरूपवत्त्वस्य च शास्त्रे प्रयोजकत्वेनोपाधित्वस्वीकाराच्चेति, पक्षेतरेऽतिव्याप्तिश्च । न च व्यतिरेके

प्रतियोगिव्यधिकरणत्वेनाभावो विशेषणीय इति फलितोऽर्थः । साधनेति । अनयोरसङ्गरोऽग्रे दर्शयिष्यते । पक्षेतरेति । पक्ष

तथा च जातिमान् भावत्वादित्यादौ समवायेन सत्त्वाद्युपाधाव-व्याप्तिः । साधनवन्निष्ठसत्त्वाभावाधिकरणसमवेतत्वाप्रसिद्ध्या तद्विरोधिप्रतियोगित्वस्य सत्त्वादावसम्भवेन साधनाव्यापकत्वासम्भवादत आह प्रतियोगिव्यधिकरणाभावेति । तद्वन्निष्ठेत्यादिः । तन्निष्ठाभावप्रतियोगित्वस्य प्रागेव लब्धत्वेन ज्ञानायोगादभावे प्रतियोगिवैयधिकरण्यबोधनमेवैतदग्रन्थस्योद्देश्यमित्याह प्रतियोगिव्यधिकरणत्वेनेति । न चायं महाकालो द्रव्यत्वादित्यादौ कालिकसम्बन्धेन घटाद्युपाधाव्याप्तिः साध्यवत्युपाधिताघटकत्वकालिकसम्बन्धेन प्रतियोगिव्यधिकरणाभावस्याप्रसिद्धेरिति वाच्यम् । सिद्धान्तलक्षणोक्तदिशा गगनाभावस्यैव तथात्वादिति भावः । ननु स श्यामो मित्रातनयत्वादित्यत्र शाकपाकजत्वस्य वायुः प्रत्यक्षः प्रत्यक्षस्पर्शाश्रयत्वादित्यत्र उद्भूतरूपवत्त्वस्य च द्वयोरेव वक्ष्यमाणोपाध्योः साधनावच्छिन्नसाध्यव्यापकत्वसम्भवात् साधनपक्षधर्मावच्छिन्नसाध्यव्यापकयोः पृथगुपादानं विफलमत आह अनयोरिति । अग्रे इति । घटः प्रत्यक्षो विभुत्वादित्यत्र साधनावच्छिन्नसाध्य-

इतरो यस्मादिति बहुव्रीहिः, भावप्रधानश्च निर्देशः। पक्षमितरयति व्यावर्त्तयतीति व्युत्पत्त्या तदवृत्तिधर्म्मवचन इत्यपि कश्चित्। तादात्म्येन धर्म्मिण एव व्यापकत्वमिति तु परमार्थः। अत एवाऽग्रे पर्वतेरान्यत्वादिति साधु सङ्गच्छते। इतरथा तु व्यापकाभावस्येव व्यापकवदन्योन्याभावस्यापि गमकत्वमाश्रित्य स-

---

व्यापकमात्मत्वं पक्षधर्मबहिर्द्रव्यत्वावच्छिन्नसाध्यव्यापकं रूपवत्त्वं च मिथोऽसङ्कीर्णमुपाधिरित्यग्रे स्वयं वाच्यत्वादिति भावः। के चित्तु मूले मित्रातनयत्वेनेत्यस्य काकादावित्यादिः, प्रत्यक्षस्पर्शाश्रयत्वादित्यत्र च प्रत्यक्षस्य स्पर्शो विषयत्वं यत्रेति व्युत्पत्त्या प्रत्यक्षस्पर्शपदं साक्षात्क्रियमाणपरं तथा च मूलकृतैव साधनपक्षधर्मावच्छिन्नसाध्यव्यापकयोरुपाध्योरसङ्करस्थलमुपन्यस्तमिति प्राहुः। पक्षादितर इति तत्पुरुषे सर्वनामकार्य्यप्राप्त्या पक्षेतरस्मिन्निति प्रयोगापत्तेराह पक्ष इतरो यस्मादिति। तथा चानुपसर्जनस्यैव सर्वनामकार्य्यमिति इतरशब्दस्योपसर्जनत्वान्न तदिति भावः। ननु पक्षेतरस्य ज्ञेयत्वादेः सर्वत्रैव साधनवति सत्त्वान्न तस्य साधनाव्यापकत्वमत आह भावप्रधानश्चेति। न चैवं धर्मिशक्तस्येतरपदस्य धर्मपरतामात्रेणैव उपसर्जनतया सर्वनामकार्यासम्भवात् बहुव्रीह्यादरो व्यर्थ इति वाच्यम्। समासे गुणीभूतस्यैव सर्वादेः सर्वनामकार्यानिषेधात्। अन्यथा लघुतरघटत्वावच्छिन्नशक्तिकस्य तदादिपदस्य गुरुतरकम्बुग्रीवादिमत्त्वप्रकारेण लक्षणास्थलेऽपि तस्मिन् घटत्वमित्यादिप्रयोगानापत्तेः तत्राप्युपसर्जनत्वस्याऽविशिष्टत्वादित्यभियुक्ताः। भावप्रधानश्चेत्यत्र भावे प्रधानो वेत्यर्थः इत्यपि के चित्। अत्र पक्षावृत्तिधर्मपरत्वेऽग्रे पर्वतेतरान्यत्वादित्यत्रापि पर्वतावृत्तिधर्मभावबोधनार्थमाधुनिकलक्षणा स्यादित्यस्वरसः कश्चिदित्युक्त्वा सूचितः। नन्वितरपदस्य भावप्रधाननिर्देशत्वे समासलब्धादन्यत्रैवार्थे तस्योपसर्जनत्वात्ततः सर्वनामकार्य्यं दुर्वारमतो भावप्रधाननिर्देशम्परित्यज्यैव प्रकारान्तरमाह तादात्म्येनेति। व्यापकत्वमिति। तथा च तादात्म्येन साध्यव्यापकस्य पक्षेतरस्य तेन सम्बन्धेन साधनाव्यापकत्वात्त-

पर्वतेतरान्यत्वादित्यत्र इतरान्यत्वस्यासिद्धिवारणार्थं पर्वतपदं विशेषणमिति व्यतिरेके व्यर्थविशेषणत्वान्न स उपाधिः, बाधोन्नीतस्याप्यनुपाधितापत्तेः । न चेष्टापत्तिः, इतरान्यत्वस्याप्रसिद्ध्या विशेषणं विना व्याप्त्यग्रहेण

ङ्गमनीयम् । व्यतिरेक इति । यद्यपि व्यापकाभावमुद्रया गमकत्वे तथा वैयर्थ्यं न दोषाय, तथापि वास्तववैयर्थ्यशून्यत्वमेव विशेषणं देयमिति भावः । यत्तु ययोर्व्यतिरेकव्याप्तिस्तयोरेव व्याप्यवृत्तिव्यतिरेकिणोरन्वयव्याप्तिरिति नियमः,

---

स्योपाधित्वं नानुपन्नमिति भावः । पक्षेतरस्य तादात्म्येनोपाधितायां मूलस्वरसमप्याह अत एवेति । सङ्कुचते इति । अन्यथा पर्वतेतरत्वस्य साध्यव्यापकतायामितरत्वाभावादित्येवं तत्र ब्रूयादिति भावः । ननु पर्वतेतरत्वादेरित्याग्रिमग्रन्थदर्शनात् पक्षेतरस्यापि उपाधित्वं मूलस्वरससिद्धमेवेत्यतस्तदनुसारेणापि पर्वतेतरान्यत्वादिति सङ्गमयति इतरथा त्विति । पक्षेतरत्वस्य धर्मस्योपाधित्वाभिप्रायादित्यर्थः । गमकत्वं व्याप्याभावसाधकत्वम् । ननु साध्यव्यापकस्य पक्षेतरत्वस्याभाववत्तानिश्चयाज्ज्ञायमानपक्षधर्मिकसाध्यभावानुमानं प्रति पक्षेतरत्वाभावनिष्ठायां साध्याभावीयव्याप्तौ व्यर्थविशेषणत्वस्यादोषत्वात् व्यतिरेके व्यर्थविशेषणत्वादित्यादिमूलासङ्गतिरित्याशङ्क्याह यद्यपीति । तथा वैयर्थ्यं उपाध्यभावनिष्ठसाध्याभावीयव्याप्तौ व्यर्थविशेषणत्वम् । तथापि वास्तवेति । यद्व्यतिरेकत्वं यद्वदन्यत्वं वा साध्यभावव्याप्यतानवच्छेदकविशेषणाघटितं तत्वे सति साध्यव्यापकसाधनाव्यापकत्वमेवोपाधित्वं वाच्यमिति भावः । विशेषणमदत्त्वैव पक्षेतरत्वं वारयतः प्रगल्भस्य मतमाह यस्त्विति । ययोर्याद्दशधर्मद्वयावच्छिन्नयोः । व्याप्यवृत्तिव्यतिरेकिणोरिति । व्याप्यवृ-

त्तियों व्यतिरेकस्तद्वतोस्तत्प्रतियोगिनोरिति यावत्। तयोरेवेति। तादृशधर्मद्वयावच्छिन्नयोरेवेत्यर्थः। तथा च व्याप्यवृत्त्यभावप्रतियोगितावच्छेदको यो धर्मो व्याप्यवृत्त्यभावप्रतियोगितावच्छेदकीभूतयद्धर्मावच्छिन्नव्याप्यतानिरूपितव्यापकतावच्छेदकः सोऽवश्यं स्वावच्छिन्नाभावत्वावच्छिन्नव्याप्यतानिरूपितव्यापकताच्छेदकीभूततद्धर्मावच्छिन्नाभावत्वक इत्येवं नियमात् पर्वतेतरत्वं न वन्हित्वावच्छिन्नव्याप्यतानिरूपितव्यापकतावच्छेदकं स्वावच्छिन्नाभावत्वावच्छिन्नव्याप्यतानिरूपितव्यापकतावच्छेदकीभूतवन्हित्वावच्छिन्नाभावत्वकत्वाभावादिति क्रमेण व्यापकनिवृत्त्या व्याप्यीभूतस्य साध्यव्यापकतावच्छेदकत्वस्य निवृत्तिः पक्षेतरत्वे साधनीयेति न तस्योपाधित्वम्। तादृशं च स्वं द्रव्यत्ववन्हिसामग्रीत्वादिकमेव सुलभमतो न हेत्वप्रसिद्धिः। अत्र च व्याप्तावेदं संयोगि प्रमेयं वा द्रव्यादित्यादौ द्रव्यत्वाद्यवच्छिन्नव्याप्यतानिरूपितव्यापकतावच्छेदकं स्वावच्छिन्नाभावत्वावच्छिन्नव्याप्यतानिरूपितव्यापकतावच्छेदकीभूतद्रव्यत्वावच्छिन्नाभावत्वकाद्भिन्नं संयोगित्वप्रमेयत्वादौ व्यभिचारस्य वारणाय प्रथमप्रतियोगितावच्छेदकान्तम्। न च विषयत्वादिसम्बन्धेन संयोगत्वाद्यवच्छिन्नाभावस्यापि व्याप्यवृत्तित्वादुक्तव्यभिचारतादवस्थ्यम्। व्यापकताघटकसम्बन्धावच्छिन्नस्यैव प्रतियोगित्वस्यावच्छेदकताया निवेश्यत्वात्। न च रूपाभाववान् घटत्वादित्यादौ जलपरमाणुरूपात्मकस्य व्याप्यवृत्तिव्यतिरेकस्य प्रतियोगितावच्छेदके रूपाभावत्वे स्वावच्छिन्नाभावत्त्वावच्छिन्नव्याप्यतानिरूपितव्यापकतावच्छेदकीभूतघटत्वाभावत्वकत्वाभावाद्व्यभिचार इति वाच्यम्। अभावाभावस्यातिरिक्ततया रूपाभावत्वावच्छिन्नाभावस्यावच्छिन्नवृत्तिकान्यत्वरूपव्याप्यवृत्तित्वदलेनैव वारणात् घटादौ तस्यावच्छिन्नवृत्तिकत्वात्, यद्धर्मावच्छिन्नस्य व्यतिरेकसामान्यं व्याप्यवृत्ति तादृशधर्मस्यैव वा हेतौ निवेश्यत्वादिति। द्रव्यं संयोगादित्यादौ संयोगत्वावच्छिन्नव्याप्यतानिरूपितव्यापकतावच्छेदके द्रव्यत्वत्वादौ व्यभिचारः संयोगत्वावच्छिन्नाभावस्य केवलान्वयित्वेनाभावत्वस्यैव लघोस्तद्व्याप्यतावच्छेदकतया द्रव्यत्वत्वावच्छिन्नाभावत्वस्याऽतथात्वादतो भूतान्तं यद्धर्मविशेषणम्। न च विषयितादिसम्बन्धावच्छिन्नसंयोगसामान्याभावस्य व्याप्यवृत्ति-

इह तु व्यर्थविशेषणतया व्यतिरेके व्याप्त्यभावादन्वयेऽपि न तथा, अतः साध्याव्यापकत्वान्नायमुपाधिरिति भाव इति । तन्न । अहेतुकत्वशरीराहेतुकत्वयोर्व्यभिचारात्, एवमपि संयोगादौ के-

---

त्वादुक्तदोषतादवस्थ्यम्।तत्रापि व्याप्यताघटकसम्बन्धावच्छिन्नस्यैव प्रतियोगित्वस्यावच्छेदकतायाः प्रवेश्यत्वात् । न चोक्तरीत्या पर्वतभेदत्वादिप्रकारेण पक्षेतरत्वस्योपाधित्ववारणेऽपि तद्भेदव्यक्तित्वादिप्रकारेण तस्योपाधित्वं दुर्वारं तद्व्यतिरेकव्याप्तौ व्यर्थविशेषणत्वासम्भवात् तादृरूप्येण साध्यव्यापकत्वे बाधकाभावादिति वाच्यम् । पक्षभेदत्वादिप्रकारेणैव पक्षेतरस्य कथायामुद्भावनात् प्रकारान्तरेण तस्योपाधित्वेऽपि क्षत्यभावादिति।केचित्तु व्याप्यवृत्तिव्यतिरेकिणोर्हेतुसाध्ययोरिति यथासंख्यमन्वयात् यत्र व्यतिरेकप्रतियोगितावच्छेदकत्वे सति व्याप्यवृत्तितानिरूपकयद्धर्मावच्छिन्नव्याप्यतानिरूपितव्यापकतावच्छेदकत्वं तत्र स्वावच्छिन्नाभावत्वावच्छिन्नव्याप्यतानिरूपितव्यापकतावच्छेदकीभूततद्धर्मावच्छिन्नाभावत्वकत्वामत्येव व्याप्तिः । न च संयोगि द्रव्यत्वादित्यत्र संयोगत्वे व्यभिचारः, प्रतियोगिवैयधिकरण्याघटितस्यैव व्यापकत्वस्य हेतौ प्रवेशात् संयोगत्वस्य द्रव्यत्वव्यापकतानवच्छेदकत्वात् । न चैवमप्याकाशाभाववान् द्रव्यत्वादित्यादावाकाशाभावत्वे व्यभिचारः, न व्यमते गगनाभावत्वावच्छिन्नाभावानुपगमेन तस्य व्यतिरेकिप्रतियोगितानवच्छेदकत्वात् वृत्तिमद्व्यतिरेकप्रतियोगितावच्छेदकत्वस्यैव वा प्रवेशात्वादित्याहुः।तच्चिन्त्यम्। व्याप्यवृत्तित्वस्येव व्यतिरेकित्वस्याप्यवश्यं हेत्वन्वयित्वात्, अन्यथैवमपीत्यादिना केवलान्वयिसाध्यके पक्षेतरोपाधित्वसम्पादनस्याग्रे सन्दर्भविरोधापत्तेरिति दिक् । अहेतुकत्वेति । इदं शरीराहेतुकमहेतुकत्वादित्यत्र शरीरपदवैयर्थ्येन व्यतिरेकव्याप्तेरभावेऽप्यन्वयव्याप्तिसत्त्वेन व्यभिचारादित्यर्थः न चोक्तव्याप्तौ भावभिन्नस्यैव व्यतिरेकस्य प्रतियोगितावच्छेदकत्वप्रवेशाददोषः शरीराहेतुकत्वे भावरूपस्यैव व्यतिरेकस्य प्रतियोगित्वादिति वाच्यम् । तथा सति पर्वतेतरान्यत्वस्यापि पर्वत-

तत्सार्थकत्वात् । वस्तुगत्या साध्यव्यापकः पक्षेतर उपाधिरिति चेत्। अस्तु तथा, तथापि पक्षातिरिक्ते साध्य-

---

वलान्वयिनि च साध्ये पक्षेतरातिव्याप्तितादवस्थ्याच्च । वस्तुगत्येति । तथा च पक्षे साध्यवति तादितरत्वं साध्याव्यापकं तद्रहिते च बाधोन्नीतत्वादुपाधिरेवेति भावः । यद्विषयतया ज्ञानस्य प्रतिबन्धकत्वं तदेव प्रकृते उपाधित्वं वाच्यं नान्यदनुपयुक्त-

---

त्वादिस्वरूपस्यैव व्यतिरेकस्य प्रतियोगित्वात् प्रकृतासङ्गतिप्रसङ्गादिति भावः । यद्यपि निर्धूमो निर्वन्हित्वात् इत्यत्रैव धूमाभावाभावत्वावच्छिन्नव्याप्यतायां धूमपदस्याप्रसिद्धिवारकत्वेन व्यर्थविशेषणतया व्यतिरेकव्याप्तिविरहेऽप्यन्वयव्याप्तिसत्त्वेन व्यभिचारसम्भवादहेतुकत्वादिपर्यन्तानुसरणं विफलम् । तथापि तत्रान्वयव्याप्तिविरहेपि न क्षतिः धूमाभावे वन्ह्यभावव्यापकत्वाग्रहेऽपि धूमव्यापकवन्ह्यभाववत्तानिश्चयादेव निर्धूमवत्त्वानुमितेः सम्भवित्वात् । न चोक्तस्थलेऽप्यन्वयव्याप्तेरनभ्युपगमान्न व्यभिचारः शरीरहेतुकत्वव्यापकहेतुकत्वाभाववत्तानिश्चयादेव शरीरहेतुकत्वाभावानुमितिसम्भवादिति वाच्यम् । शरीरपदवैयर्थ्येन शरीरहेतुकत्वत्वस्य व्याप्यतानवच्छेदकत्वादिति भावः । ननूक्तस्थलेऽप्यन्वयव्याप्तेरनभ्युपगमान्न दोष इत्युक्तावप्याह एवमपीति । व्यतिरेकव्याप्तिविरहेण पक्षेतरत्वे व्याप्यवृत्तिव्यतिरेकिसाध्यस्य व्यापकत्वाभावेऽप्यव्याप्यवृत्तेः । केवलान्वयिनश्च साध्यस्य व्यापकतायास्तत्र सत्त्वे बाधकाभावादिति भावः । तद्रहिते साध्यरहिते पक्ष इत्यनुषज्यते।बाधोन्नीतत्वादुन्नीतबाधकत्वात्। अग्न्याहितादित्वाद्विशेषणस्य प्राग्विन्यासः । ननु वस्तुगत्या साध्यव्यापकत्वाभावेन पक्षेतरस्यानुपाधित्वशङ्कायामस्तु तथेत्यादिना तत् दूषकत्वप्रसञ्जनं न बाधकमतो मूलस्याभिप्रायं वर्णयन्नाह यद्विषयतयेति । प्रकृते दूष-

व्यापकताग्रहादुपाधेर्दूषकत्वम् । तच्च तत्राप्यस्ति । अन्यथा पक्षे साध्यसन्देहादनुपाधित्वे उपाधिमात्रमुच्छिद्ये-

---

त्वात् तच्चेदुक्तं रूपं तदा तद्वत्तया पक्षेतरस्यापि ग्रहादनुमितिमात्रोच्छेद इत्यभिप्रायवानाह अस्विति । उपाधिमात्रमिति सत्प्रतिपक्षोन्नायकतया दूषकत्वमिति मते, इतरथा तु पक्षावृत्तेरुच्छेदो

णौपयिकोपाधिनिरूपणप्रस्तावे । नान्यदिति । नेतरभेदाद्यनुमापकमुपाधित्वं वाच्यम् अनुमानदूषणोपाधिजिज्ञासायां तस्यानुपयुक्तत्वादित्यर्थः । उक्तरूपं पक्षातिरिक्ते साध्यव्यापकत्वादिरूपम्।तथा च वस्तुगत्या साध्यव्यापकत्वं प्रकृते उपाधिस्वरूपमेव नेति तदभिधानेऽर्थान्तरमिति भावः । नव्यास्तु ननु शाकपाकजत्वादिकमिव पक्षेतरत्वमपि किञ्चिद्धर्मावच्छिन्नसाध्यव्यापकत्वेन वस्तुगत्योपाधिरित्येव, कथायान्तु नोद्भाव्यते दूषकताबीजविरहादित्याशयेन शङ्कते मूले वस्तुगत्येति । दूषकताबीजसत्त्वात्तस्योपाधित्वेनोद्भावनं दुर्वारमित्याशयेन परिहरति अस्तु तथेत्यादीतिं प्राहुः । मूलेऽन्यथेति। यदि पक्षातिरिक्तविशेषणाप्रवेशेन साध्यव्यापकतामात्रस्यैव ग्रहो दूषकताबीजं तदा पक्षे साध्यसन्देहादनुपाधित्वे उपाधित्वघटकसाध्यसामान्यव्यापकत्वस्यानिश्चये उपाधिमात्रमुपाधित्वनिश्चयः क्वापि न स्यादित्यर्थः । ननु पक्षे साध्यसन्देहदशायामपि पक्षवृत्तित्वेन निश्चितस्यैवोपाधेः साध्यव्यापकत्वनिश्चयसम्भवादुपाधिमात्रोच्छेदासम्भव इत्यत आह दीधितौ सत्प्रतिपक्षेति। उपाधेः पक्षवृत्तित्वनिर्णयदशायां साध्याभावव्याप्यस्य तदभावस्य पक्षेऽनिश्चयेन सत्प्रतिपक्षस्यैवासम्भवादिति भावः । इतरथा व्यभिचारोन्नायकतया दोषत्वमतेापक्षावृत्तेरितिापक्षावृत्तित्वेन निश्चितस्येत्यर्थः । पक्षावृत्तेरप्युपाधेः पक्षेऽभावनिश्चयदशायामुपाधित्वनिश्चयसम्भवेन यथाश्रुता सङ्गतिरिति ध्येयम । ननु विपक्षव्यावर्त्तकविशेषणवत्त्वोक्त्या-

त । विपक्षाव्यावर्त्तकविशेषणशून्यत्वं विशेषणम्, तेन बाधोन्नीतपक्षेतरस्य परिग्रहः तत्र पक्षस्यैव विपक्षत्वात् न तु पर्वतेतरत्वादेरिति चेन्न। न हि वस्तु विपक्षाव्यावर्तकविशेषणशून्यं सर्वत्र प्रमेयत्वादेः सत्त्वात्, तत्रोपात्तेति

बोध्यः । विपक्षेति । विपक्षव्यावर्त्तकधर्म्मान्तरविशिष्टपक्षेतरत्ववारणाय निषेधद्वयगर्भता । विपक्षाव्यावर्त्तकविशेषणानवच्छिन्नसाध्यव्यापकत्वसाधनाव्यापकत्वशालित्वं तद्विवक्षितमित्याशङ्क्य, पक्षेतरत्वस्योपाधित्वमनङ्गीकुर्वतस्तव मतेनातिव्याप्तिरभिहिता,

---

पि पक्षेतरत्ववारणासम्भवात् अभावद्वयप्रवेशो व्यर्थ इत्यत आह विपक्षेति । येन सम्बन्धेन यद्वैशिष्ट्यावच्छिन्नस्यापरस्योपाधिताघटकसम्बन्धेनाधिकरणत्वं यत्किञ्चिद्विपक्षावृत्ति तदेव तेन सम्बन्धेन विपक्षव्यावर्त्तकं यथा धूमस्य साध्यतायामार्द्रेन्धने स्वरूपसम्बन्धेनार्द्रत्वं तेन सम्बन्धेन तद्वैशिष्ट्यावच्छिन्नस्येन्धनादेरुपाधिताघटकसंयोगसम्बन्धेनाधिकरणतायास्तदयोगोलकात्मकविपक्षावृत्तित्वात् पर्वतेतरत्वादौ च पर्वतादिकं न तथा प्रतियोगितासम्बन्धेन पर्वतवैशिष्ट्यावच्छिन्नस्य च पर्वतेतरत्वस्याधिकरणतायाः यावद्विपक्षवृत्तित्वादतः प्रतियोगितासम्बन्धेन विपक्षाव्यावर्त्तकं यत् पर्वतात्मक विशेषणं तेन सम्बन्धेन तद्वत्त्वस्यैव पर्वतेतरत्वे सत्त्वान्न तत्रातिप्रसङ्गः । वन्हिरनुष्णः कृतकत्वादित्यादौ बाधोन्नीतपक्षेतरस्योपग्रहाय यत्किञ्चित्पदम्, अन्यथा वन्हीतरत्वाधिकरणतायाः सौरालोकाद्यात्मकविपक्षवृत्तित्वादसंग्रहापत्तेरिति ध्येयम् । ननु सिद्ध्यसिद्धिव्याघातेनैव शङ्कायाः पर्यवसानात्तथापीत्यादिना दोषान्तरदानं मूलकारस्यासङ्गतमतो व्याघातं निरस्यैव तदवतारयति विपक्षेत्यादि । अत्रावच्छिन्नान्तं साध्यव्यापकत्वमात्रेऽन्वितं न तु साधनाव्यापकत्वेऽपि, व्यर्थत्वात् व्यापकत्व-

विशेषणे सिद्ध्यसिद्धिव्याघातः । तथापि च साध्यव्यापकत्वसाधनाव्यापकत्वे तत्र स्त इति तद्व्यावृत्त्या पक्षे साध्यव्यावृत्तिरतो हेतोर्व्यभिचार एव व्यभिचारे चावश्यमुपाधिरिति पक्षेतर एव तत्रोपाधिः स्यात्, तावन्मात्रस्यैव दूषकत्वाच्च व्यर्थं विशेषणम् । अत एवानुमान-

---

वस्तुतो दूषकताप्रयोजकरूपवत्तस्यानुपाधित्वाभ्युपगमस्तद्वारणाय च विशेषणोपादानं द्वयमपि न युक्तमित्याभिप्रायवानाह तथापीति । तावन्मात्रस्य साध्यव्यतिरेकोन्नयनक्षमसाध्यव्यापकतामात्रस्य

योरेकरूपेण विवक्षितत्वादेवातिप्रसङ्गभङ्गादित्यवधेयम् । इत्याशङ्क्योत्थाऽऽहेति परेणान्वयः । ननु पूर्वं पक्षेतरेतिव्यासेरभिधानात्तस्यालक्ष्यत्वप्राप्तेरिदानीन्तथापीत्यादिना तत्राव्याप्तेरभिधानमसङ्गतमतोऽभिप्रायं पूरयति पक्षेतरत्वस्येत्यादिदूषकतेति । साध्यव्यापकत्वादिमत्तया ज्ञायमानत्वरूपं यद्दूषकताबीजं तद्वत इत्यर्थः । इदं च यो यद्वा साध्यव्यापकत्वादिमत्तया गृह्यते स तदोपाधिरित्येवं क्रमेणोपाधेरपि सत्प्रतिपक्षवदनित्यदोषत्वमभिप्रेत्योक्तम् । इत्थं च मूलस्थं साध्यव्यापकत्वादिपदं तज्ज्ञानपरमेवेति मन्तव्यम् । वारणाय चेति तस्येत्यनुषज्यते । विशेषणेत्यस्य विपक्षाव्यावर्त्तकविशेषणानवच्छिन्नत्वरूपेत्यादिः । तावत्पदेन साध्यव्यापकत्वसाधनाव्यापकतयोः परामर्शे द्वयोः व्यभिचारोन्नयन एवोपयोगात् पक्षेतरव्यभिचारेण साधने साध्यव्यभिचार एवाऽनुमेयस्तथाच तत्रापि पक्षेतरान्तरस्योपाधित्वप्रसक्त्याऽनुमानमात्रोच्छेदे साध्यव्यभिचारोन्नायकत्वरूपं दूषकत्वमेव पक्षेतरस्य न स्यादिति तदुत्तरस्य दूषणासमर्थोत्तरत्वेन जातित्वसम्भवात् अत एवेत्यादिकाग्रिममूलासङ्गतिरतस्तावन्मात्रस्येति मूलमन्यथा व्याचष्टे साध्यव्यतिरेकेत्यादिसाध्यवत्ताग्र-

मात्रोच्छेदकतया जातित्वान्न पक्षेतर उपाधिरित्यपास्तम्। दूषणसमर्थत्वेन जातित्वाभावात्। एतेन पक्षेतरव्यावृत्त्यर्थं प्रकारान्तरमपि निरस्तम्। उपाधित्वाभावेऽपि दूषणसमर्थत्वात्। अथोपाधिः स्वव्यतिरेकेण सत्प्रतिपक्षोत्थापकतया दूषणम्, पक्षेतरत्वव्यतिरेकश्च न साध्याभावसाधकोऽसाधारणत्वात्, न तु व्यभिचारोन्ना-

---

दूषकत्वाद्दोषोन्नयनोपयोगित्वात्। जातित्वादिति। तदुत्तरस्येत्यादिः। उपाधित्वाभावेऽपीति। उपाधित्वानङ्गीकारेऽपीत्यर्थः। दूषकताबीजसत्त्वे तस्योपाधित्वं दूषकताबीजञ्च न व्यभिचारादेरुन्नायकत्वम् अपि तु सत्प्रतिपक्षस्य, तच्च नास्तीयतो न स उपाधिरिति शङ्कते अथेति। व्यभिचारोन्नायकतया। व्यभिचारादयु-

---

ह्प्रतिबन्धोपयुक्तस्येत्यर्थः। व्यापकतामात्रस्येति। व्यापकतामात्रेण ज्ञायमानस्येत्यर्थः। मात्रपदेन विपक्षाव्यावर्त्तकविशेषणानवच्छिन्नत्वव्युदासः। तेन पक्षावृत्तित्वविशेषितसाध्यव्यापकताज्ञानस्यैव सत्प्रतिपक्षसत्त्वेपि न क्षतिः।दूषकत्वं दोषजनकत्वं तच्च न साध्यव्यापकस्यातो व्याचष्टे दूषकत्वादिति। दूषणासमर्थोत्तरस्यैव जातित्वात् पक्षेतरे तदसम्भवादाह तदुत्तरस्येत्यादिरिति।मूले प्रकारान्तरबाधानुन्नीतपक्षेतरान्यत्वादिविशेषणं पूर्वपक्षिणाऽनुपदमेव पक्षेतरस्योपाधित्वस्वीकारादुपाधित्वाभावेऽपीत्यसङ्गतमतो व्याचष्टे उपाधित्वानङ्गीकारेऽपीति। त्वयेत्यादिः। न च दूषणसमर्थत्वे बाधानुन्नीतस्यापि पक्षेतरस्योपाधित्वमिष्यत एव सिद्धान्तिभिरपीति वाच्यम्। तथासत्युपाध्यन्तरवत्तस्यापि कथायामुद्भाव्यतापत्तेरिति भावः। ननु दूषणसमर्थत्वेन पक्षेतरस्यालक्ष्यतया तद्धारणार्थं व्यतिरेकेऽसाधार-

यकतया दूषणम्, यथा हि साध्यव्यापकोपाध्यव्याप्यतया* हेतोः साध्याव्याप्यत्वं तथा साध्यव्याप्यहेत्वव्यापकतयोपाधेर्न साध्यव्यापकत्वमपि सिध्येत् व्याप्तिग्राहकस्योभयत्रापि साम्येन विनिगमकाविरहात्, तस्माद्यथा साध्यव्याप्येन हेतुना साध्यं साधनीयं तथा साध्यव्यापको-

---

ज्ञायकतया । अव्याप्यतया । अव्याप्यत्वादिना। अव्याप्यत्वम् ।

ण्याभावे सतीति विशेषणदानाभिप्रायकमथेत्यादिमूलमसङ्गतमतोऽन्यथा अवतारयति दूषकताबीजेति । तस्य पक्षेतरस्य उपाधित्वं स्यादिति शेषः । व्यभिचारादिरित्यादिना साध्यव्याप्यत्वस्योपग्रहः। सत्प्रतिपक्षस्येत्यादि।उन्नायकत्वमिति पूर्वेणान्वयः।न स इति।तथा चालक्ष्यस्य तस्य वारणार्थं विशेषणं युक्तमेवेति भावः।व्यभिचारोन्नायकतया दूषकत्वस्याभावं प्रतिज्ञाय यथा हीत्यादिनाग्रे व्याप्यत्वाभावोन्नायकत्वकथनं सन्दर्भविरुद्धमतो व्याचष्टे व्यभिचारादुन्नायकतयेति। तथा चादिपदेनाव्याप्यत्वस्यापि लाभान्नाग्रिमग्रन्थसङ्गतिरिति भावः । मूले साध्यव्यापकोपाध्यव्याप्यत्वेनेति।साध्यव्यापकतया निश्चितोपाधेरव्याप्यत्वेनेत्यर्थः । एवं साध्यव्याप्यहेत्वव्यापकत्वेनेत्यस्यापि साध्यव्याप्यतया निश्चितहेतोरव्यापकत्वेनेत्यर्थः । सिद्ध्येदिति । तथा च यथोपाधौ पूर्वोत्पन्नेन साध्यव्यापकत्वनिश्चयेन प्रतिबन्धान्न साध्याव्यापकत्वसिद्धिस्तथा हेतोरपि पूर्वोत्पन्नेन साध्यव्याप्यत्वनिश्चयेन प्रतिबन्धान्न व्यभिचारस्य धीरिति तदुन्नायकत्वमुपाधेर्दुर्घटमित्याशयः।ननु पूर्वमुपाधेरेव साध्यव्यापकत्वं निश्चितं न तु हेतोरपि साध्यव्याप्यत्वमतो व्यभिचारबुद्धौ बाधकाभाव इत्यत आह व्याप्तिग्राहकस्येति।गगनादौ व्यभिचारादुपाध्यव्याप्यत्वेन साध्यव्यभिचारोन्नायनमसम्भवीत्यतो व्याचष्टे दीधितिकारः अव्याप्यत्वादिनेति। तथा चादिपदेनोपाधिव्यभिचारेणैव साध्यव्यभिचारित्वमुन्नेयमिति

पाधिव्यावृत्त्या साध्याभावोऽपि साधनीयो व्याप्तिग्रहतौ-
ल्यादिति दूषकताबीजम्, सोऽयं सत्प्रतिपक्ष एवेति ।
मैवम् । एवं हि सत्प्रतिपक्ष उपाध्युद्भावनं न स्यात्
सत्प्रतिपक्षान्तरवत् । किञ्चैवं बाधोन्नीतोऽपि पक्षेतरो

अव्याप्यत्वादि । सत्प्रतिपक्षान्तरवादिति। व्याप्तिपक्षधर्मतारूपबल-
सत्त्वेनैकेनापि बहूनां प्रतिरोधसम्भवाद् बहुत्वस्याऽबलत्वात् । यच्च
प्रमाणतत्त्वबोधादौ बहुत्वमपि बलमुक्तम् तन्न सत्प्रतिपक्षतायाम्,
किन्त्वेकत्राङ्गभङ्गप्रसक्तौ । बहुषु तत्कल्पनागौरवमेकत्र च ला-
घवमिति तर्कोत्थापकतयेति, नोपाधेः सत्प्रतिपक्षोत्थापकतया तत्र
दूषणत्वसम्भव इति भावः । एवं सत्प्रतिपक्षोन्नायकतया दूषकत्वे।

भावः। व्यभिचारोन्नयनपक्षस्यापि दूष्यत्वेनोपक्रान्तत्वात्तदनभिधान-
न्यूनतामपाकर्तुं व्याचष्टे अव्याप्यत्वादीति । तथा चादिशब्देन सा-
ध्यव्यभिचारस्य लाभान्न न्यूनतेति भावः । यद्यप्युपाध्यव्याप्यत्वे-
त्यादावव्याप्यपदं सर्वत्र व्यभिचारार्थकमित्येव व्याख्यातुमुचितं
साध्यव्यभिचारोन्नायकत्वखण्डनतैव मूलसङ्गतेस्तावतापि सत्प्र-
तिपक्षोन्नायकत्वमात्रेण दूषकतां परिशेषयितुमेतावान् प्रयास इति
ध्येयम् । ननु बहुतरस्य विरोधिपरामर्शस्य साध्यानुमितिविरोधि-
तया बहुत्वरूपबलसम्पत्त्यर्थमेव प्रतिपक्षस्थलेऽपि प्रतिपक्षान्तरमु-
द्भावयितुमुचितमेवेत्यत आह व्याप्तीति।बहुत्वस्याबलत्वादिति।प्रति-
पक्षबहुत्वस्यानुमितिविरोधितायामनुपयुक्तत्वादित्यर्थः। नन्वेवं प्रत्य-
साकं सम्यंचो बहवश्च हेतव (?) इत्यादिप्राचीनग्रन्थविरोध इत्यत
आह यद्यपीति।बलमुपयोगि।एकत्राङ्गभङ्गप्रसक्ताविति । साध्यतदभाव-
साधकयोः परामर्शयोरेकत्र अङ्गस्यानुमित्युपयुक्तस्य परामर्शधर्मिक-
भ्रमत्वज्ञानस्या भावस्य भङ्गो विरहो भ्रमत्वज्ञानमिति यावत्, तस्य

नोपाधिः स्यात्, व्यतिरेकेऽसाधारण्यात् । ननु बाधे नोपाधिनियमः धूमेन ह्रदे वह्निसाधने तदभावात्, न तु हेतुमति पक्षे बाधे पक्षेतरोपाधिनियमः प्रत्यक्षे वह्नौ कृ-

---

बाधस्यानिश्चयेऽसाधारण्यान्निश्चये च वैयर्थ्यात् मा भूत् सोऽप्युपाधिरित्यभिप्रायेण शङ्कते नन्विति । हेतुमतीति । न चासङ्कीर्णबा-

---

प्रसक्तौ कर्त्तव्यतायां बहुषु परामर्शेषु तत्कल्पने भ्रमत्वरूपस्याङ्गभङ्गस्य कल्पनागौरवं तत्तद्बहुतरभ्रमेषु विशिष्य दोषाणां हेतुत्वापत्त्या गौरवमेकत्र च परामर्शे तत्कल्पने लाघवं दोषाणामल्पहेतुत्वकल्पनयेत्येवं तर्कोत्थापकतयैव बहुत्वं बलमुक्तमित्यर्थः।तथा च यत्रैतादृशतर्को नावतरति तत्रैव प्रतिपक्षे प्रतिपक्षान्तरवदुपाध्युद्भावनं न स्यादिति मूलकृतामाशयस्तेन प्रतिपक्षस्थले प्रतिपक्षान्तरस्यानुद्भाव्यत्वे तद्बहुत्वस्यालीकतया कुतस्तस्याङ्गभङ्गोपयुक्तलाघवाद्युत्थापकत्वमित्यपास्तम्। किञ्चैवमित्यत्रैवमित्यस्य सत्प्रतिपक्षे उपाधेरनुद्भाव्यत्वे इति नार्थस्तस्य बाधोन्नीतानुपाधित्वाप्रयोजकत्वादतोऽन्यथा व्याचष्टे एवमिति। ननु बाधसत्त्वे पक्षे एव तदितरत्वाभावस्य साध्याभावसहचारग्रहसम्भवात् व्यतिरेकेऽसाधारण्यादित्यसङ्गतमत आह बाधकस्यानिश्चय इति । ननु बाधस्य निश्चयदशायामेव बाधस्थलीयः पक्षेतर उपाधिर्वाच्य इत्यत आह निश्चये चेति । बाधस्येत्यनुषज्यते। वैयर्थ्यादिति। बाधनिश्चयादेवानुमितिप्रतिबन्धसम्भवादिति भावः। ननु वन्हिरनुष्णः कृतकत्त्वादित्यादिबाधस्थले व्यतिरेकेऽसाधारण्यभिया वन्हीतरत्त्वादिरूपस्य पक्षेतरस्यानुपाधित्वेऽपि तेजोभिन्नत्वादेरुपाधित्वे बाधकाभावात् सामान्यत एव बाधे नोपाधिनियम इत्याशङ्क्यनमनुचितमत आह माभूत् सोपीति।बाधस्थलीयः पक्षेतरोऽपीत्यर्थः। तथा च नोपाधिनियम इत्यस्य न पक्षेतरोपाधिनियम इत्यर्थः। अन्यथा बाधोन्नायकतया वन्हिसामग्र्यादेस्तत्रोपाधित्वसम्भवादिति भावः। धूमेनेत्यादिकं व्यभिचारोन्नायकतावादिमतेन । मूले हेतुमतीत्यादि ।

तकत्वेनाऽनुष्णत्वे साध्येऽतेजस्त्वादेरुपाधित्वसम्भवादिति चेत् । न । तेजोमात्रपक्षत्वेऽतेजस्त्वं विनान्यस्य

धस्थले व्यभिचारः, प्रतियोगिव्यधिकरणसाध्याभावस्यैव प्रकृते बाधत्वात् तदनभ्युपगमाद्वा । अतेजस्त्वं विनेति । तत्समशीलं विना शुद्धसाध्यव्यापकस्योपाधेरभावादित्यर्थः । तेन भास्वररूपशून्यत्वादे रूपवत्त्वावच्छिन्नसाध्यव्यापकगुरुत्वादेश्च सत्त्वेऽप्यदोषः । न चैतद्व्यतिरेको नासाधारणः पक्षे साध्यस्यासिद्धौ सपक्षाभावात् सिद्धौ तु तत्रैव सपक्षे वर्त्तमानत्वादिति वाच्यम् । पक्ष-

---

यो यद्धर्मावच्छिन्नप्रतियोगिताकबाधवत्पक्षवृत्तिः स स्वहेतुकतद्धर्मावच्छिन्नसाध्यकोपाधित्ववत्पक्षेतरत्वक इत्यर्थः । तत्र बाधपदस्य साध्याभावमात्रपरत्वमभिप्रेत्य शङ्कते दीधितिकारो न चेति।असङ्कीर्णबाधे व्यभिचाराद्यसङ्कीर्णबाधो।तथा च वृक्षः कपिसंयोगी तत्त्वादित्यादावुत्पत्तिकालावच्छिन्नघटो गन्धवान् पृथिवीत्वादित्यादौ च हेतुमति पक्षे साध्याभावसत्त्वेऽपि पक्षेतरस्यानुपाधित्वादुक्तव्याप्तौ व्यभिचार इत्यर्थः । प्रकृते उक्तनियमोबाधत्वात् बाधपदार्थत्वात्।तथा च हेत्वभावादेव न व्यभिचारः । प्रकृते साध्यसामान्याभावमात्रस्य बाधसत्त्वेऽपि न क्षतिरित्याशयेनाह तदिति । असङ्कीर्णबाधानभ्युपगमाद्वेत्यर्थः।मूले वृक्षे न संयोगः उत्पत्तिकाले घटे गन्ध इत्यादि प्रतीतेर्मूलादौ संयोगाद्यवच्छेदकत्वाभावावगाहितयैवोपत्तेरिति लीलावतीकारमते सामान्यत एवाभावाभावयोर्विरोधात् कपिसंयोगादिमति तदत्यन्ताभावस्यासत्त्वादिति भावः । समशीलमिति । असाधारणोभूतस्वव्यतिरेकत्वधर्मेणातेजस्त्वसदृशमित्यर्थः । शून्यत्वादेरित्यादिना तेजस्त्वाभावाद्युपग्रहः गुरुत्वादिरित्यादिना रसवत्त्वाद्युपग्रहःअदोषो अतेजस्त्वंविनेत्यादिमूलस्य योग्यत्वविरहःसपक्षव्यावृत्तत्वमसाधारण्यमित्याशयेन शङ्कते न चेति । वाच्यमिति परेणान्वयः । एतद्व्यतिरेकोऽतेजस्त्वादिव्यतिरेकः । सामान्यसाध्य-

उपाधेरभावात् । किञ्च पर्वतावयववृत्त्यन्यत्वं पर्वतेतर-द्रव्यत्वं ह्रदपर्वतसंयोगानाधारत्वं ह्रदपर्वतान्यत्वादिक-

---

मात्रवृत्तिरसाधारण इत्यभिप्रायात् जलादावुष्णत्वभ्रमदशायां त-थात्वमित्यपरे । ग्रीष्मोष्मणि तेजस्त्वाग्रहदशायामप्रतीतिसाध्यतद्-भावसहचाररूपत्वमसाधारण्यमित्यन्ये । असाधारणे हि साध्यसह-चारग्रहप्रतिबन्धेन व्याप्तिग्रहप्रतिबन्धः व्यतिरेकव्याप्त्यादरे तु साध्यतद्भावयोर्द्वयोरपि तदविशेषात् सत्प्रतिपक्षो दूषकताबीज-म् । न चेहाद्यो व्यतिरेकित्वात्, न द्वितीयः सत्प्रतिपक्षे तदन-

---

स्योष्णत्वाभावस्यासिद्धावनिश्चये । सिद्धौ त्विति । पक्षे साध्य स्येत्यनुषज्यते । तत्रैव पक्षस्वरूप एवेत्यर्थः । पक्षमात्रवृत्तित्वं पक्षेतरा-वृत्तित्वं तच्च सपक्षाप्रसिद्धावपि न क्षतिकरम् । सपक्षत्वं न नि-श्चितसाध्यवत्त्वं गौरवात् किन्तु साध्यवत्तानिश्चयविशेष्यत्वमात्रं तच्च नात्रासिद्धमित्यपरेषां मत आह जलादाविति । तथात्वमसाधा-रणत्वम् । वन्ह्यादावुष्णत्वप्रत्यक्षदशायां तेजस्त्वस्यापि प्रत्यक्षस-म्भवात् ग्रीष्मोष्मपर्यन्तानुसरणम्।अप्रतीतेति।साध्यतद्भावसहचरि-तत्वेनानिश्चितत्वरूपेत्यर्थः । जलादावुष्णत्वभ्रमस्य ग्रीष्मोष्मणि वा तेजस्त्वाग्रहस्य दशायामतेजस्त्वव्यतिरेकस्यासाधारणत्वेऽपि न क्षतिस्तदसत्त्वदशायामेवातेजस्त्वादेरुपाधित्वसम्भवेन हेतुमति प-क्षे बाधइत्यादि नियमस्याभङ्गादित्यस्वरसोऽपरेऽन्ये इति चोक्त्वा सूचितः । व्याप्तिग्रहेत्यस्यान्वयेत्यादिः । प्रतिबन्धो दूषकताबीजमित्य-ग्रेऽन्वयः।ननु पर्वतो वन्ह्यभाववान्पर्वतेतरत्वाभावात् इत्यत्रासाधा-रणहेतौ अन्वयव्याप्तेरग्रहेऽपि व्यतिरेकव्याप्तिग्रहे बाधकाभाव इत्यत आह व्यतिरेकेति । तदविशेषात् । असाधारणहेतौ व्यतिरेकव्याप्ति-ग्रहाविशेषात्। न चेहेति।पक्षेतरत्वव्यतिरेकेण साध्याभावसाधने अ-न्वयव्याप्त्यग्रहो न क्षतिकर इत्यर्थः । व्यतिरेकित्वात् व्यतिरेक-

मुपाधिः स्यादेव व्यतिरेकेऽसाधारण्याभावात् व्यतिरेकिणा सत्प्रतिपक्षसम्भवाच्च । न चासाधारण्यम् । तस्यापि सत्प्रतिपक्षोत्थापकतया दोषत्वात् । तस्मादुभयोरपि व्याप्तिग्राहकसाम्ये विरोधान्न व्याप्तिनिश्चयः, किन्तूभयत्र व्यभिचारसंशयः । तथा च व्यभिचारसंशयाधायकत्वेनोपाधेर्दूषकत्वं तच्च पक्षेतरेप्यस्ति, तदुक्तमुपाधेरेव व्यभिचारशङ्केति । भवतु वोक्तन्यायेन सकलानुमान-

---

वकाशात्, अतः पक्षेतरोऽपि सत्प्रतिपक्षोन्नायकतयोपाधिरेवेत्याह व्यतिरेकिणेत्यादिना । नन्वेवं प्रागुक्तरीत्या व्यभिचाराद्युन्नायकत्वस्य सत्प्रतिपक्षेऽनुद्भावनीयत्वापत्त्या च सत्प्रतिपक्षोन्नायकत्वस्य दूषकतायामबीजत्वे उपाधिर्दूषणमेव न स्यात् बीजाभावात् अत आह तस्मादिति । तदुक्तमुपाधेर्व्यभिचारशङ्केति। भवतु वा

व्याप्तिग्रहस्योपादेयत्वात् । न द्वितीय इति । इहेत्यनुषज्यते।वन्हिव्यापकतया गृहीतस्य पक्षेतरत्वस्य व्यतिरेकात् यथा वन्ह्यभावः साध्यते तथा वन्ह्यभावव्यापकतयागृहीतस्य व्यतिरेकाद्वन्ह्यभावस्याप्यभावो वह्निः साध्यतामिति सत्प्रतिपक्षो दूषणमित्यर्थः । तदनवकाशात् सत्प्रतिपक्षानवकाशात् । पर्वतो वन्हिमान् धूमादिति स्थापनयैव तस्य प्राप्तत्वादिति भावः।प्रागुक्तरीत्या यथा हीत्याद्युक्तक्रमेणाव्यभिचाराद्युन्नायकत्वस्येति। दूषकतायामबीजत्वादित्यग्रन्थयः। उपाधिः साध्यव्यापकत्वेन गृहीतः । दूषणमेव न स्यादिति । स्वरूपासिद्ध्याद्युन्नायकत्वं साध्यव्यापकताग्रहस्याकिञ्चित्करत्वादिति भावः। उपाधिभिन्नादपि साधारणादिधर्माद्व्यभिचारसंशयस्योत्पादात् दूषकत्वबीजान्तराप्रतिक्षेपकत्वाच्च एवकारव्यत्यासेन मूल-

भङ्गभिया पक्षेतरोऽनुपाधिः, तथापि लक्षणमतिव्यापकम् । नापि साध्यसमव्याप्तत्वे सति साधनाव्यापकत्वमुपाधित्वम् । दूषकताबीजस्य व्यभिचारोन्नयनस्य सत्प्रतिपक्षस्य वा साम्येन विषमव्याप्तस्याप्युपाधित्वात्, दू-

---

पक्षेतरो नोपाधिः उपादीयताञ्च तद्व्यावृत्तये विपक्षाव्यावर्त्तकेत्यादिकं विशेषणं तथापि लक्षणमतिव्यापकमेव अणवो जन्याणवो वा सकर्तृकाः कार्यत्वादित्यादावनणुत्वादौ । ननु व्यभिचाराद्युन्नायकतामात्रेणोपाधित्वे व्यापकव्यभिचारित्वादावतिप्रसङ्ग इत्यत आह तथेति । तथा । तेन रूपेण । स्वव्यभिचारेण स्वव्यतिरेकेण वा दूषकतायां व्यभिचारस्य सत्प्रतिपक्षस्य वोन्नायकतायामतिप्रसञ्जनभञ्जिकायां साध्यव्याप्यत्वस्य व्यर्थत्वाद् साधनाव्यापकधर्मस्योपाधित्वे साध्यान्वयव्यतिरेकोन्नायकान्वयव्य-

---

ग्रन्थमाह तदुक्तमित्यादि । ननु पक्षेतरत्वस्योपाधित्वानुपगमे प्रागुक्तविपक्षाव्यावर्त्तकेत्यादिविशेषणेनैव तद्वारणसम्भवाद्भवतु वेत्यादिमूलासङ्गतिरतः कतिपयपदानि यथास्थानं पूरयन्नेव तदर्थमाह भवतु वेत्यादि । अणुत्वावच्छेदेन पक्षतायां परमाणोः साध्याभाववत्त्वानिश्चयेन विपक्षत्वासम्भवात्तद्व्यावर्त्तकत्वमणुविशेषणस्य न स्यादतः पक्षान्तरमाह जन्याणवो वेति।ननु चकारादेव दूषणसमुच्चयस्य लाभात्तथापदं विफलमतः, तस्य साफल्यं कर्तुमवतारयति नन्वितितेन रूपेणेत्यस्यैव विवरणम् स्वव्यतिरेकेणेत्यादिअतिप्रसङ्गभञ्जिकायामिति। व्यापकव्यभिचारित्वादेः स्वव्यभिचारित्वादिना साध्यव्यभिचाराद्युन्नायकत्वाभावादिति भावः । ननु साध्यप्रयोजको धर्म इत्यस्योपाधिलक्षणपरत्वे साधनव्यापकेऽतिव्याप्तिरत आह

षकतायां साध्यव्याप्यत्वस्याप्रयोजकत्वाच्च । अथ साध्यप्रयोजको धर्म उपाधिः । प्रयोजकत्वञ्चन न्यूनाधिकदेशवृत्तेः, तस्मिन् सत्यभवतस्तेन विनापि भवतस्तदप्रयोजकत्वात् । अन्यथा पक्षेतरस्याप्युपाधित्वप्रसङ्ग इति चेत् । न। दूषणौपयिकं हि प्रयोजकत्वमिह विवक्षितं तच्च साध्यव्यापकत्वे सति साधनाव्यापकत्वमेवेति तदेव प्रयोजकं नत्वधिकं व्यर्थत्वात् । ननूपाधिः स उ-

---

तिरेकशालित्वरूपं साध्यप्रयोजकत्वं नियामकम्, अन्यथातिप्रसङ्गादित्याशङ्कते अथेति । अभवतोऽसतः । भवतः सतः । व्यर्थत्वादिति । न चैवं पक्षेतरत्वेऽतिप्रसङ्गः, तवापि पक्षेतरसाध्यवत्त्वादावतिप्रसङ्गात् । विषमव्याप्तस्यानुपाधित्वे योगाभावं नियामकमाशङ्कते नन्विति । उप समीपवर्त्तिनि आदधाति स्वीयं धर्म-

---

साधनेति । उपाधित्वे उपाधिपदशक्यत्वेऽघटत्वादिसाध्येति। साध्यस्यान्वयव्यतिरेकयोरुन्नायकौयावन्वयव्यतिरेकौ तत्प्रतियोगित्वरूपमित्यर्थः । अन्यथा साध्यव्यापत्वादिमात्रस्य प्रयोजकत्वेऽतिप्रसङ्गात् । विषमव्यापकस्य पक्षेतरत्वादेरप्युपाधित्वापातात्। तथा च प्रागुक्तं साध्यसमव्याप्तहेत्वित्यादिलक्षणं सम्यगेवेत्याशयः । गुणवत्त्वाद्युपाधेः सत्त्वेप्यजायमानस्य द्रव्यत्वादिसाध्यस्य तत्प्रयोज्यत्वादभूधातोरुत्पत्तिपरत्वासम्भवादाह अभवतोऽसत इति । तेन विनोत्पाद्यमानस्यैव तदप्रयोज्यत्वे घटत्वादिकं विना सतोऽपि द्रव्यत्वादिसाध्यस्य घटत्वादिप्रयोज्यता स्यादत आह भवतः सत इति । एवं साध्यव्यापकतादिमात्रस्य प्रयोजकत्वे। पक्षेतरसाध्यवत्त्वेति । साध्यान्वयव्यतिरेकोन्नायकत्वे व्यतिरेकशालित्व-

च्यते यद्धर्मोऽन्यत्र प्रतिबिम्बते, यथा जपाकुसुमं स्फटिकलौहित्य उपाधिः । तथा चोपाधिवृत्तिव्याप्यत्वं हेतुत्वाभिमते चकास्ति तेनासावुपाधिः । न च व्याप्यत्वमात्रेण दूषकत्वमिति साध्यव्यापकतापीष्यते । तथा च समव्याप्त एवोपाधिरिति चेत् । तत् किं विषमव्याप्तस्य दूषकताबीजाभावान्नोपाधिशब्दवाच्यत्वं तथात्वेऽप्युपाधिपदप्रवृत्तिनिमित्ताभावाद्वा । नाद्यः, तस्यापि

मित्युपाधिः । यद्धर्मबोधकशब्दसमभिव्याहारेण चोपाधिपदं प्रयुज्यते तद्धर्मसंक्रामकत्वं तद्बोधयति । यथा स्फटिकलौहित्ये

स्य तत्राप्यनपायादिति भावः ।अनुपाधित्वे उपाधिपदाप्रतिपाद्यत्वे । योगाभावमिति।यौगिकार्थस्याभावमित्यर्थः । अन्यधर्मिकस्वधर्मप्रतिबिम्बजनकत्वस्य यौगिकत्वं व्यक्तीकरोति उपेति। समीपवर्त्तिनि स्वभिन्ने आदधाति संक्रमयति आरोपयतीति यावत् । स्वीयमिति। आधानमात्रशक्तस्यापि धातोः स्वीयधर्माधानपरत्वमिति भावः । ननु विषमव्यापकस्यापि कथं चित् स्वनिष्ठधर्मान्तरसंक्रामकत्वेनैव योगार्थसम्भवात्कुतस्तद्धारणमत आह यद्धर्मेति । तद्धर्मसंक्रामकत्वं तद्धर्मभ्रमजनकत्वम्, तद्धर्मबीजनकत्वमात्रस्य तत्त्वे जपालौहित्ये जपोपाधिरित्यपि प्रयोगापत्तेरिति ध्येयम्।तत् उपाधित्वम्।यथेति। स्फटिके लौहित्ये जपाकुसुममुपाधिरित्यसमस्त एव पाठः ।तत्रहि सप्तम्यो-स्तादात्म्यमर्थस्तेन स्वान्यधर्मिकस्वधर्मसंक्रामकरूपान्योपाधिपदार्थस्यैकदेशे अन्यस्मिन् स्फटिकतादात्म्यस्य यद्धर्मे लौहित्यतादात्म्यस्य व्युत्पत्तिवैचित्र्येणान्वयात् स्फटिकात्मको यः स्वान्यस्तद्धर्मिकलौहित्यात्मकस्वधर्मजनकजपाकुसुममित्याकारको बोधः । स्फटिकलौहित्य इति समस्तपाठे तु स्फटिकपदं तद्वति तथा गृह्यमाण-

व्यभिचाराद्युन्नायकत्वात् । नापरः, न हि लोके समव्याप्त एवान्यत्र स्वधर्मप्रतिबिम्बजनक एवोपाधिपदप्रयोगः लाभाद्युपाधिना कृतमित्यादौ लाभादावुपाधिपदप्रयोगात् । किञ्च न शास्त्रे लौकिकव्यवहारार्थमुपाधिव्युत्पादनं किन्त्वनुमानदूषणार्थं तच्च साध्यव्यापकत्वे सति साधनाव्यापकत्वमात्रमिति शास्त्रे तत्रैवोपाधिपदप्रयोगः। अन्ये तु यदभावो व्यभिचारविरोधी स उपाधिः । न

जवाकुसुममुपाधिरित्यत्र लौहित्यसंक्रामकत्वम्, प्रयुज्यते च शास्त्रे व्याप्यत्वबोधकशब्दसमभिव्याहारेण तत्, यथात्र साधने असावुपाधिरित्यतो व्याप्तिसंक्रामकत्वलाभः । यदभाव इति । अस्ति तावदिह हेतावुपाधिर्नेह हेतावुपाधिरिति प्रतीतिर्व्यवहारश्च, तावा-

---

परं तथा च स्वान्यधर्मकस्य स्फटिकवृत्तितया गृह्यमाणालौहित्यात्मकधर्मस्य जनकञ्जपाकुसुममित्येवं तत्रान्वयबोध इति ध्येयम् । लौहित्यसंक्रामकत्वमिति । तदबोधयतीति पूर्वेणान्वयः ।तत् उपाधिपदम् । अत इतिसाधनशब्दस्य व्याप्यधर्मितया इदमात्मकस्वाभिन्नधर्मिकव्याप्यत्वात्मकस्वधर्मसंक्रामकोयमित्यन्वयस्य उक्तवाक्यार्थत्वादिति भावः । ननु समव्याप्तस्य उपाधेरुपाधिताघटकसंयोगादिसम्बन्धेनाभावस्य साध्यव्यभिचारिविरोधित्वाभावाद्यथाश्रुतमूलमसङ्गतमत आह अस्ति तावदिति । इह हेतावुपाधिरिति प्रतीतेः सामानाधिकरण्यसम्बन्धेन हेतावुपाधिमत्त्वं विषय इति यदि ब्रूयात्तदा तादृशसम्बन्धेनाप्युपाध्यभावस्य व्यभिचाराविरोधित्वात् असङ्गतिस्तादृशाभाववति साध्यासमानाधिकरणे व्यभिचारादत आह नेहोपाधिरिति। हेतावित्यनुषज्यते ।तथा चोक्तप्रतीतेः सामाना-

लम्ब्य चेदं लक्षणवाक्यम्। तत्र यदि साधने उपाधिव्यभिचाराव्यभिचारौ तदव्याप्यत्वव्याप्यत्वे वा यदि वा तेन सम्बन्धेन

धिकरण्यसम्बन्धेन उपाध्यभावविषयकत्वे सद्धेतावपि नोपाधिरिति प्रतीतिर्न स्यात् साध्यसमव्यापकपर्य्यवसन्नस्योपाधेस्तत्त्वेन सम्बन्धेन तत्र सत्त्वादतो वस्त्वन्तरमेव तादृशप्रतीतिविषयो वाच्य इति तस्यैवाभावो यदभावपदेन बोधनीय इति भावः। साधनार्थस्य बोधने प्रतीतिमात्रं न नियामकं प्रतीतस्यापि घटादिभेदस्य घटत्वेत्यादिवाक्येबोधनात् किन्तु तत्तदर्थे प्रामाणिकं प्रयुक्तत्वमेवेत्यतः प्रयोगमप्याहव्यवहारश्चेति। तौ यथोक्तप्रतीति व्यवहारौ। आलम्ब्यादूषकत्वमन्तर्भाव्य। ननूक्तयोः प्रतीतिव्यवहारयोर्विषय एवेह बाधित इति आह तत्रेति। व्यभिचाराव्यभिचारावितिं। तदालम्बनमिति परेणान्वयः। इहोपाधिर्नेहोपाधिरिति प्रतीत्योर्व्यवहारयोर्वा विषयाविति तदर्थः। उपाधिपदस्य निरूढलक्षणया उपाधिव्यभिचारपरत्वमिति भावः। ननु व्यभिचाराव्यभिचारयोरुक्तप्रतीतिविषयत्वे वह्नेः साध्यतायां गगनहेतौ एकसामग्र्युपाधिरिति प्रतीतिर्न स्यात् प्रत्युत तत्र न कोऽप्युपाधिरित्यपि व्यवहारो न स्यात् तत्र साध्यसमव्यापकपर्य्यवसन्नस्य ज्ञेयत्वाद्युपाधेर्व्यभिचाराप्रसिद्धेः अतः कल्पान्तरमाह तदव्याप्यत्वव्याप्यत्वे वेति।स्वव्यापकोपाधिकत्वकूटतदभावौ वेत्यर्थः। इहोपाधिरित्यादि प्रतीतावुपाधिव्यभिचाराव्याप्यत्वयोः प्रकारतया भानस्यानुभवबाधितत्वादाह यदि वेति।तेनेत्यादि। स्वव्यभिचारव्यभिचारत्वेन स्वाव्याप्यत्वेन वा सम्बन्धेन साधनवृत्तित्वतदभावाविति्यर्थः। सर्वत्रैव विशेषणस्याभावो नत्रा बोध्य इति मतेनेदमन्यथा नेहोपाधिरित्यस्य तादृशसम्बन्धावच्छिन्नोपाध्यभावः साधनवृत्तिरित्यप्यर्थो द्रष्टव्यः।इत्थं च वन्हिमान्धूमात् वाच्यं ज्ञेयत्वात् इत्यादौ सर्वत्र सद्धेतौ साध्यसमव्यापकरूपस्योपाधेर्व्यधिकरणेनैव व्यभिचारित्वादिसम्बन्धेनाभावमादाय निरुपाधित्वव्यवहार इति भावः।उभयथापीति।व्यभिचारादेः प्रकारतया संसर्गमर्य्यादया वा भानेऽपीत्यर्थः। न क्षतिरिति।उपाधिताघटकसम्बन्धेन उपाध्यभावस्य साध्यव्यभिचारविरोधित्वेपि न

च विषमव्याप्तस्याभावो व्यभिचारं विरुणद्धि, तस्याभावेऽपि व्यभिचारात्, अस्ति ह्यनित्यत्वव्यापकं प्रमेयत्वं तद्व्याप्यञ्च गुणत्वम् । न चानित्यत्वगुणत्वयोर्व्याप्तिरस्ति, समव्याप्तिकस्य च व्यतिरेकस्तथा । न हि साध्यव्यापकव्याप्यीभूतस्य व्याप्यं यत्तत् साध्यं व्यभिचरति व्यभिचारे चान्ततः साध्यमेवोपाधिः । अभेदेऽपि

तद्वृत्त्यवृत्तौ एव तदालम्बनमुभयथापि नेह क्षतिः यदभावशब्देनापि तथैव वक्तुं शक्यत्वात् । तदभावस्य च व्यभिचारविरोधित्वं तत्सत्त्वेऽवश्यं व्यभिचारविरहस्तद्विरहिणि धर्मे चावश्यं व्यभिचारकत्वं तत्सत्त्वेऽवश्यं व्यभिचारविरहः व्यभिचारविरहिणि धर्मे चावश्यं तत्सत्त्वमिति वा, ईदृशश्च विरोधो न विषमव्यापकाभावस्य, तत्सत्त्वेऽपि व्यापक एव व्यभिचारसत्त्वात् । नापि

तत्रोपाधिलक्षणाव्याप्तिरित्यर्थः । तथैवेति । नेहोपाधिरित्यत्र उपाधिपदस्योपाधिव्यभिचारादिपरत्वे यदभावाः इत्यत्रापि यत्पदस्य लक्षणया यद्व्यभिचारादिबोधकत्वसम्भवादिहोपाधिरित्यादि प्रत्यक्षानुरोधेन व्यभिचारादिसम्बन्धस्यापि वृत्तिनियामकतया तत्सम्बन्धावच्छिन्नप्रतियोगिताको यस्याभाव इत्यन्वये बाधकाभावाच्चेति भावः।ननु साध्यव्यभिचारविरोधित्वं साध्यव्यभिचारप्रतिबन्धकत्वं तच्च न साध्यसमव्याप्तस्य उपाधेर्व्यभिचाराभावेऽस्तीत्यत आह तदभावस्य चेति । निरुक्तयदभावसत्त्वे धूमवान् वन्हेरित्यादौ विषमव्यापकस्यार्द्रेन्धनवत्त्वादेरभाव इति साध्य एव साध्यव्यभिचारविरहस्य सत्त्वात्तत्रातिव्याप्तिरतोवश्यमित्युक्तम् । तथा चार्द्रेन्धनत्व व्यभिचारः । साध्यस्य विषयव्याप्ते महानसत्त्वादावतिव्याप्तेर्वा-

विषमव्याप्याभावस्य, साध्य एव तद्विरहेऽपि व्यभिचाराभावात् ।

रणार्थमाह तद्विरहिणीति।निरुक्तयदभावस्य विरहिणि निरुक्तयद्वतीति फलितार्थः।विषमव्याप्तस्य महानसत्त्वादेः व्यभिचाराद्यभावविरहिण्यपि जलादावेव साध्यस्य व्यभिचारसत्त्वात् यथाश्रुतेन तद्वारणासम्भवादवश्यपदम् । समव्याप्तस्याप्युपाधेरव्याप्यत्वाभावविरहिण्यवृत्तिगगनादौ साध्यव्यभिचारासत्त्वादव्याप्यत्वगर्भलक्षणस्यासम्भवः स्यादतस्तद्वारणाय धर्मपदम् । [साध्यव्यभिचारान्वयव्यतिरेकनियताव्यतिरेकशालित्वलक्षणं साध्यव्यभिचारविरोधित्वमुक्ता साध्यव्यभिचाराभावनियतत्वलक्षणं तदाह तत्सत्त्व इत्यादिना।तत्रापि साध्यव्यभिचारविरहिणि गगनादावुपाध्यव्याप्यत्वाभावस्यासत्त्वादव्याप्यत्वगर्भलक्षणस्यासम्भवः स्यादतो धर्मपदम् ।] न च प्रमेयत्वादेः साध्यस्य व्यभिचाराप्रसिद्ध्या तद्गर्भस्योपाधेरप्यलीकतया तदभावरूपस्यानौपाधिकत्वस्य प्रमेयं वाच्यत्वादित्यादौ दुर्वाच्यत्वमिति वाच्यम्। व्यभिचारसम्बन्धावच्छिन्नयदभावः साध्यस्य व्यभिचारसम्बन्धाभावेन समनियतस्तत्रैव व्यभिचारगर्भनिरुक्तेस्तात्पर्य्यात् प्रमेयत्वादेरपि व्यधिकरणेनैव धस्त्वन्तरीयव्यभिचारसम्बन्धेनाभावस्य प्रसिद्धत्वात्। उपाध्यभावव्याप्तिवादिनां गुरूणां केवलान्वय्यनुमानस्यासत्त्वात् तन्नौपाधिकत्वस्य दुर्वचत्वेऽपि न क्षतिरित्यपि केचित् । गुरुचरणास्तु निरुक्तदलद्वयोपलक्षितस्य साध्यसमव्याप्तस्यैव व्यभिचारादिसम्बन्धेनाभावोऽनौपाधिकत्वव्याप्तिर्लाघवात् न तु निरुक्तदलद्वयघटितस्योपाधेरभावः सा च केवलान्वयिन्यपि सम्भवत्येव, अत एव तत्रैव समव्याप्तिघटकस्य साध्यव्यापकत्वांशस्य वैयर्थ्यं मणिकृता दास्यते। ननु विरोधघटकदलद्वय इत्यग्रिमग्रन्थविरोधः, तस्यापि विरोधोपलक्षकदलद्वयार्थकत्वादिति प्राहुः । निरुक्तविरोधस्याद्यदलेन विषमव्यापकवारणमित्याह न विषमेति । व्यापक एवेति।विषमव्यापक आर्द्रेन्धन एवेत्यर्थः । द्वितीयदलेन विषमव्याप्यस्य वारणमप्याह नापि विषमव्याप्याभावस्येति। ईदृशो विरोध इति पूर्वेणान्वयः।तद्विरहे इति । विषमव्याप्याभावस्य विरहे इत्यर्थः । पूर्वकल्पोक्तविधान-

तादृशधर्मस्य चोक्तसम्बन्धेनोक्ततत्सम्बन्धस्य वा यत्र वृत्तिस्तत्रा-
यमुपाधिः स एव च सोपाधिः। अत एव तदभावलक्षणमनौपा-
धिकत्वं व्याप्तिरिति गीयते। विरोधघटकदलद्वये च एकैकस्य
व्याप्तिशरीरघटकता दूषकता वा न स्यादित्युभयोपादानमिति

सारेणेदं द्वितीयकल्पे तु व्यभिचाराभाववति साध्यादावेव तदभा-
वस्यासत्त्वादिति द्रष्टव्यम्। ननु वन्हिमान् धूमादित्यादिसङ्के-
तौ निरुक्तरूपवतो वन्हिसामग्र्यादेरुपाधितापसङ्गे कुतोऽनौपाधि-
कता तदिष्टापत्तौ च सङ्केतोर्निरुपाधित्वभङ्गप्रसङ्ग इत्यत आह ताद-
शधर्मस्येति। यदभावो व्यभिचारविरोधीतस्य चेत्यर्थः। उक्तसम्ब-
न्धेन वृत्तिरित्यन्वयः। व्यभिचारादिसम्बन्धस्य वृत्तिनियामकत्वे
विप्रतिपन्नं प्रत्याह उक्तसम्बन्धस्य वेति। उक्तो व्यभिचारादिरूपो य-
स्तदीयसम्बन्धस्तस्य वेत्यर्थः। अत एवेति। उक्तरूपेणोपाधिनिर्वच-
नादेवेत्यर्थः। अन्यथा साध्यव्यापकत्वे सति साधनाव्यापकस्यो-
पाधित्वे सङ्केतुस्थले तादृशवस्तुनः सिद्ध्यसिद्धिभ्यां व्याघातात्
तदभावलक्षणमनौपाधिकत्वं दुर्वचमेव स्यादिति भावः। ननु
विरोधघटकदलद्वयोरेकैकमेव लक्षणे प्रवेश्यतां दलान्तरव्यावृत्तस्य
लक्ष्यत्वेऽपि क्षत्यभावादत आह विरोधेति। व्यभिचारविरहिधर्मेऽव-
श्यं यदभावसत्त्वं स एव उपाधिस्तदा धूमादिसाध्यस्य विषमव्या-
पकीभूतो द्रव्यत्वादिरुपाधिः स्यात्तथा च व्यभिचारादिसम्ब
न्धेन तदभावस्य वन्ह्याद्यसङ्केतुसाधारणत्वादुक्तोपाधेरनौपाधि-
कत्वव्याप्तौ प्रतियोगिविधया घटकत्वं न स्यादित्याह व्याप्ति-
शरीरघटकतेति। यदभावसत्त्वेऽवश्यं व्यभिचारविरहः स
एव यदुपाधिस्तदा वन्हिमान् धूमादित्यादौ साध्यस्य वि-
षमव्याप्येऽपि महानसत्त्वादिरुपाधिः स्यात्तथा च साध्याव्या-
पकतया व्यभिचाराग्रहनयनासामर्थ्ये तत्रानुमानप्रतिबन्धकत्वं न
स्यादित्याह दूषकता वेति। ननु धूमवान् वन्हेरित्यादौ धूमगगनान्य-
तरत्वप्रकारेण गगनमप्युपाधिः स्याद्व्यभिचारादिसम्बन्धेन तादृश-

सर्वं सुस्थम् । यदि च समव्याप्ताकाशोभयमात्रवृत्तिधर्मेणाकाशस्योपाधित्वं वारणीयं तदा यत्पदं वृत्तिमत्परं बोध्यम् । अत्र च व्यभिचारस्य घटकत्वेऽग्रे प्रमेयत्वपदं व्यतिरेकिधर्मोपलक्षकम् ।

रूपावच्छिन्नाभावस्यापि साध्यव्यभिचारविरोधित्वादत आह यदि चेति । तादृप्येणाकाशस्योपाधित्वेऽपि न क्षतिरित्याशयेन यदिकार उक्तः । यत्पदमिति । तथा च यदूपेण वृत्तिमतो यस्य निरुक्तसम्बन्धेनाभावः साध्यव्यभिचारस्य विरोधी स तादृप्येणोपाधिरिति भावः । यदूपावच्छिन्नाभावो व्यभिचारविरोधी वृत्तिमत्त्वे सति तदूपत्ववन्तु ज्यायःप्रतिव्यक्त्युपाधीनामनिवेशादिति ध्येयम् । वृत्तिमत्परमित्यस्योपाधिताघटकसम्बन्धेन सम्बन्धिपरमित्यर्थः । तेन गगनादेः कालिकसम्बन्धेन वृत्तिमत्त्वेऽपि न क्षतिः, न वा शब्दादिसाध्यकद्रव्यत्वादिहेतौ तादात्म्येन गगनाद्युपाधावव्याप्तिः । ननु विषमव्यापकस्य प्रमेयत्वादेर्व्यभिचारस्यालीकतया तदभावोऽप्यलीक इति तत्तत्साध्यव्यभिचारविरोधित्वखन्डनस्य अस्ति हीत्यादिनाऽग्रे मूलकारोक्तस्यासङ्गतिरत आह अत्र चेति।घटकत्व इत्यस्य प्रकारविधयेत्यादिः, अतो व्यभिचारादिसम्बन्धेनोपाध्यभावस्य लक्षणघटकत्वे व्यधिकरणेनैव व्यभिचारित्वसम्बन्धेन प्रमेयत्वस्याप्यभावसम्भवादासङ्गतिः । व्यतिरेकिधर्मेति । मनोभिन्नत्वादिधर्मस्य प्रमाया एव प्रकृते प्रमेयत्वघटकत्वादिति भावः । इदं तु बोध्यम् । उक्तनिरुक्तौ साध्योपाध्योर्द्वयोरपि व्यभिचारित्वं न हेतुतावच्छेदकसम्बन्धेन निवेश्यं धूमवान् वन्हेरित्यादौ धूमवद्घटत्वान्यतरत्वस्य विषमव्यापकस्याप्युपाधितापत्तेर्निर्धूमसंयुक्तत्वाभावस्य तदभाववत्संयुक्तत्वाभावसमनियतत्वात् किन्तु स्वरूपसम्बन्धेनैव तदूग्राह्यम् । तथा च घटत्ववृत्ति धर्म एव व्यभिचारान्न तदुभयव्यभिचाराभावयोः समनियम इत्यदोषः । न चैवमनित्यत्वव्यापकं प्रमेयत्वं तद्व्याप्यं च गुणत्वमित्यग्रिममूलविरोधः,गुणत्वजातेः स्वरूपसम्बन्धेनावर्त्तमानत्वादिति वाच्यम् । तत्र गुणत्वपदस्य गुणीभूतत्व पतयेश्वरभिन्नत्वरूपस्य गुणीभूतत्वस्य स्वरूपसम्बन्धेन वर्त्तमा-

व्याप्यव्यापकत्वात् साधनाव्यापकत्वादिति स्वीचक्रुः । तन्न । तवापि ह्यव्यभिचारे साध्यव्याप्यव्याप्यत्वं तन्त्रमावश्यकत्वाल्लाघवाच्च न तु साध्यव्यापकव्याप्यत्वमपि,

---

अथैतादृशोपाध्यभावस्य व्याप्तिलक्षणत्वे यत्र व्यभिचारिणि नैतत्सम्भवस्तत्रातिव्याप्तिः तस्यासन्तमसत्त्वेनाभावानिरूपणे तु तत्रत्यसद्धेतावव्याप्तिरत आह व्यभिचारे चेति । यस्य यद्व्यभिचारस्य यदव्याप्यत्वस्य वा अभावः साध्यव्यापके व्यभिचारविरो-

---

नत्वात् । यत्तु उपाध्यभाववति येन येन सम्बन्धेनावृत्तित्वं साध्यभाववति अपि तेन तेनैव सम्बन्धेनावृत्तित्वस्य समनियमो वक्तव्य इति नातिव्याप्तिरिति । तत्तुच्छम् । तथासति समनियमपर्य्यन्तानुसरणवैयर्थ्यापत्तेः । महानसत्वाद्यभाववति पर्वतीयसंयोगेनावर्त्तमानस्य धूमाद्यभाववति तादृशसंयोगेन वर्त्तमानत्वाप्रसिद्धैव साध्यन्यूनवृत्तिमहानसत्वादावतिव्याप्तिविरहेण उपाधिव्यभिचाराभावे साध्यव्यभिचाराभावव्यापकत्वान्तस्य निष्प्रयोजनत्वादिति ध्येयम्। यत्रेत्यादि। यत्र साध्ये निरुक्तस्योपाधेः सम्भवस्तत्र साध्यव्यभिचारिणि हेतावतिव्याप्तिरिति व्युत्क्रमेणान्वयः । अयमेतद्वृत्तियावद्धर्मवान् प्रमेयत्वादित्यादौ साध्यभिन्नस्योपाधेः असत्त्वादिति भावः । ननूपाधेरसत्त्वे तदभावोऽप्यलीक एव अभावस्य सत्प्रतियोगिकत्वनियमात्तत् कथमतिव्याप्तिरत आह तस्येति । उक्तस्थलीयोपाधेरित्यर्थः । तत्रत्यसद्धेताविति । तादृशसाध्यकसद्धेतावित्यर्थः । अयमेतद्वृत्तियावद्धर्मवानेतत्त्वादित्यादिसद्धेतावुपाध्यप्रसिद्ध्या तदभावलक्षणानौपाधिकत्वाव्याप्तिरिति भावः । प्रगल्भानां मतमाह यस्येत्यादिना । यस्येत्यस्यैव व्याख्यानं यद्व्यभिचारस्येति । केवलान्वयिसाध्यकेऽप्यनौपाधिकत्वव्याप्तेः प्रतियोगिप्रसिद्ध्यर्थमाह यदव्याप्यत्वस्य वेति । विषमव्याप्तस्य वारणार्थं साध्यव्या-

भवतैव व्यभिचारस्य दर्शितत्वात् । न च साध्यव्याप्य-व्याप्यत्वमेवानौपाधिकत्वं साध्यव्याप्यमित्यत्रापि ह्यनौ-पाधिकत्वं तदेव वाच्यं तथा चानवस्थेति । अनौपाधि-कत्वे च व्याप्तिलक्षणे यावदितिपदं साध्यव्यापके विशे-

---

पक इति। साध्यव्यापकनिष्ठ इति तदर्थः। विषमव्यापकस्यार्द्रेन्धना-देर्वारणाय व्यभिचारविरोधीति। साध्यव्यभिचाराभावव्याप्य इ-त्यर्थः। सद्धेतौ साध्यसमव्याप्तस्य व्युदासार्थं साधनाव्यापक इति। अत्रोदक्षरत्वं सद्धेतावेवाहशोपाध्यप्रसिद्ध्या व्याप्तेस्तदभावात्मकत्वं च दुर्वचमित्यस्वरसो वदन्तीत्युक्ता सूचितः।मिश्राणां मतमाह यद्व्य-भिचारित्वाभाव इति। सद्धेतौ साध्यसमव्याप्तस्य वारणाय साधन इति। सद्धेतौ साध्यव्यभिचाराभावस्य सत्त्वेन इष्टापत्त्या तदापाद-नस्यासम्भवात् सोपाधौ साध्यसमव्याप्तस्य महानसत्त्वादेर्वारणा-याह साध्यव्यापक इति। न च बाधभ्रमदशायां धूमादावपि वन्हि-सामग्र्यादेरव्यभिचारेण वन्ह्यादिव्यभिचाराभावस्यापत्तिस-म्भवादतिप्रसङ्गः। वस्तुगत्या साधननिष्ठस्य यद्व्याभिचारित्वस्य सामान्याभावः साध्यव्यभिचारित्वाभावव्याप्यः स साध्यव्यापक उपाधिरित्यत्र तात्पर्य्यादिति। अत्रापि पूर्वकल्पवदस्वरसः के चिदि-त्युक्ता सूचितः। यदभाव इत्यादिमूलेन साध्याव्यभिचारित्वग्राहक-स्यानौपाधिकत्वस्य प्रतियोगी निरूप्यते अनुमानदूषणमुपाधिर्वा क-थ्यते तत्र नाद्य इत्याह मूले तवापीति। साध्यव्याप्यव्याप्यत्वं साध्य-व्याप्यस्याव्याप्यत्वसम्बन्धेनाभाववत्त्वं तन्त्रं गमकमावश्यकत्वात् साध्यसमव्याप्तव्याप्यत्वे साध्यव्याप्तत्वस्यापि प्रविष्टत्वात्। तथा चोक्तलक्षणे विषमव्याप्तस्य महानसत्त्वादेर्वारकविशेषणं व्यर्थमिति भावः। ननु साध्यव्याप्यव्याप्यतामात्रस्य तन्त्रत्वे साध्यव्यापकव्या-प्यतामात्रमपि कथं न तन्त्रमुच्यत इत्यत उक्तं न त्विति। दर्शितत्वात्। अस्ति ह्यनित्यमित्यादिग्रन्थेन दर्शितत्वादित्यर्थः। ननु नोपादेयमेव महानसत्त्वादेर्वारकविशेषणमित्यभिप्रेत्य शङ्कते न चेति। ननु यदि

षणं दत्तमेव, किञ्च यस्मिन् सत्यनुमितिर्न भवति तदेव तत्र दूषणं न तु यद्व्यतिरेके भवत्येवेत्येतद्गर्भम्, विरुद्धत्वादेरप्यदोषत्वापत्तेः । नापि पक्षधर्मावच्छिन्नसा-

---

धी स साधनाव्यापक उपाधिरित्यपि वदन्ति । यद्व्यभिचारित्वाभावः साधने साध्यव्यभिचाराभावापादकः स साध्यव्यापक उपाधिरित्यपि केचित् । न तु यद्व्यतिरेक इति । यद्व्यातिरेकेऽनुमितिप्रयोजकं रूपं व्याप्त्याद्यन्यतमं भवत्येव यथा असिद्धिव्यतिरेके सिद्धिरित्यर्थः । विरुद्धत्वादेरिति । विपक्षमात्रगामित्वसपक्षविपक्षगामित्वलक्षणविरोधव्यभिचारयोरेकैकविरहेऽपि व्याप्तेरनियमादित्यर्थः । यत्र पक्षे हेतुमति च साध्यं हेतुश्च पक्षावृत्तिस्त-

---

साध्यव्याप्यत्वमनवस्थादूषितं साध्यव्यापकव्याप्यत्वं च सोपाधिसाधारणं तत् किमनौपाधिकत्वं दुर्वचमत आह अनौपाधिकत्वे चेति।साध्यव्यापकत्वेति।साध्यस्य व्यापकत्वं यदवृत्तीति व्युत्पत्त्या साध्यव्यापक इत्यर्थः । क्वचित्तथैव पाठः।दत्तमेवेति। साध्यव्यापकयावद्व्यापकं यस्य तत्त्वं वा तदिति व्याप्तिपूर्वपक्षग्रन्थ इति शेषः । द्वितीयेत्वाह किञ्चेति।सतीत्यस्य ज्ञात इत्यादिः । अनुमितिः पक्षे साध्यस्य साध्यसमव्याप्तस्य चानुमितिः साध्यसमव्याप्तस्याव्याप्यत्वसम्बन्धेन व्यतिरेके सत्यनुमिति विरहाद्भवत्येवेत्यस्य कर्तृपदन्दीधितिकारः पूरयति अनुमितिप्रयोजकेति । विरुद्धव्यतिरेकस्थलेऽप्यनुमितिप्रयोजकस्य साध्यसामानाधिकरण्यस्यैव सद्भावादग्रिमग्रन्थासङ्गतिरतस्तादृशरूपं विशिष्याह व्याप्त्याद्यन्यतममिति । आदिपदेन पक्षधर्मत्वाबाधितत्वासत्प्रतिपक्षितत्वादीनामुपसङ्ग्रहः । असिद्धिरपक्षधर्मत्वं विपक्षमात्रगामित्वम । साध्यवदवृत्तित्वम्।विपक्षगामित्वं विरुद्धेतिप्रसक्तमतः सपक्षेति । प्राच्यैर्विरुद्धस्य व्यभिचारि-

त्रैकः पक्षावृत्तिर्हेतुसमानाधिकरणः अपरश्च पक्षनिष्ठः साध्यवति हेत्वसमानाधिकरणः हेत्वसमानाधिकरण एव वा उपाधिस्तत्र सा-

---

त्वानुपगमादिति ध्येयम् । अनियमादिति।वन्हिमानित्यादौ व्यभिचारादिति भावः । परामर्शत्वादेरिवोपाधित्वस्यापि पक्षसाध्यसाधनभेदेन विभिन्नत्वादेकविधपक्षसाधनादिस्थल एव साधनपक्षधर्मावच्छिन्नसाध्यव्यापकयोरुपाध्योरसाङ्कर्यमनुगतरूपेणाह यत्रेत्यादिना गगनं प्रत्यक्षं स्पर्शवत्त्वादित्यादौ साधनावच्छिन्नसाध्यव्यापकस्य रूपवत्त्वादेः पक्षधर्मबहिर्द्रव्यत्वावच्छिन्नसाध्यव्यापकत्वान्न तयोरसाङ्कर्यमत उक्तं पक्ष इति।घटः प्रत्यक्षो मनस्त्वादित्यादौ साधनावच्छिन्नसाध्यव्यापकाप्रसिद्ध्या पक्षधर्मावच्छिन्नसाध्यव्यापकीभूतरूपवत्त्वादौ तदसाङ्कर्ये दुर्वचमत उक्तं हेतुमतीति । घटः प्रत्यक्षो बहिर्द्रव्यत्वादित्यादौ साधनावच्छिन्नसाध्यव्यापकस्य रूपवत्त्वादेः पक्षधर्मावच्छिन्नसाध्यव्यापकत्वान्न तयोरसाङ्कर्ये सम्भवत्यत उक्तं हेतुश्च पक्षावृत्तिरिति । एकः साधनावच्छिन्नसाध्यव्यापकः । उपाधिरित्यग्रेन्वयः । घटः प्रत्यक्षोनित्यद्रव्यत्वादित्यादौ पक्षधर्मद्रव्यत्वावच्छिन्नस्य साध्यव्यापकस्य गगनभिन्नत्वाद्युपाधेः साधनावच्छिन्नसाध्यव्यापकत्वात्तयोरसाङ्कर्यमसम्भवीत्यत उक्तं पक्षावृत्तिरिति । साधनावच्छिन्नसाध्यव्यापकत्वं साधनसामानाधिकरण्यं विनाऽनुपपन्नमतस्तत्सत्त्वमाह हेतुसमानाधिकरण इति।अपरः पक्षधर्मावच्छिन्नसाध्यव्यापकः । पक्षधर्मावच्छिन्नस्य व्यापकत्वं पक्षवृत्तित्वं विनानुपपन्नमतस्तत्सत्त्वमाह पक्षनिष्ठ इति।अत्रापि घटः प्रत्यक्षो नित्यद्रव्यत्वादित्यादौ गगनान्यत्वाद्युपाधेरुभयथा व्यापकत्वान्न तयोरसाङ्कर्यं सम्भवत्यत उक्तं साध्यवति हेत्वसमानाधिकरण इति । पक्षधर्मबहिर्द्रव्यत्वावच्छिन्नसाध्यव्यापकस्योद्भूतरूपवत्त्वाद्युपाधेः साधनसमानाधिकरणत्वेऽपि तत्र साधनावच्छिन्नसाध्यव्यापकीभूतस्यात्मत्वोपाधेरसाङ्कर्यमावेदयितुं साध्यवतीत्युक्तम् । उक्तस्थले प्रत्यक्षस्पर्शाश्रयत्वमेव पक्षधर्मावच्छिन्नसाध्यव्यापकोपाधिमुपादाया साङ्कर्यसम्भवात् साध्यवतीत्यस्यानुपादानेऽपि न क्षतिरित्याशयेनाह हेत्वसमानाधिकरण एवेति।तत्रेति

ध्यव्यापकत्वे सति साधनाव्यापकत्वमुपाधित्वम्, साधनावच्छिन्नसाध्यव्यापकोपाध्यव्यापनात् । शब्दोऽभिधेयः प्रमेयत्वादित्यत्राऽश्रावणत्वस्योपाधित्वापत्तेश्च । शब्दधर्मगुणत्वावच्छिन्नाभिधेयत्वं यत्र रूपादौ तत्राऽश्रावणत्वं व्यापकं पक्षे प्रमेयत्वस्य साधनस्याव्यापकं हि तत् ।

धनपक्षधर्मावच्छिन्नसाध्यव्याप्कयोरसङ्करो बोध्यः । यथा घटः प्रत्यक्षो नित्यद्रव्यत्वाद्विभुत्वाद्वेत्यादौ साधनावच्छिन्नसाध्यव्यापकमात्मत्वं पक्षधर्मावच्छिन्नसाध्यव्यापकमुद्भूतरूपवत्त्वं प्रत्यक्षस्पर्शाश्रयत्वं वा मिथोऽसङ्कीर्णमुपाधिः । अश्रावणत्वेति । घटो मेयो द्रव्यत्वादित्यादौ गन्धवत्त्वाद्यवच्छिन्नसाध्यव्यापकपृथिवीत्वादावतिव्याप्तिर्द्रष्टव्या । न वानेन रूपेण ज्ञातस्य दूषकत्वमित्याह आ-

---

तयोरित्यर्थः।त्रुटेर्नित्यत्वमते तत्रैव व्यभिचारात् नित्यद्रव्यत्वावच्छिन्नसाध्यव्यापकत्वं नात्मत्वस्य सम्भवत्यतो हेत्वन्तरमाह विभुत्वाद्वेति। प्रथमहेतोरुद्भूतरूपवत्त्वं साध्यवत्येव हेत्वसमानाधिकरणमतस्तमुपाधिमाह प्रत्यक्षस्पर्शवत्त्वमिति।मिथोऽसङ्कीर्णमिति ।साधनपक्षधर्मावच्छिन्नसाध्यव्यापकयोर्मिथो भेदवदित्यर्थः।अत्राश्रावणत्वे ज्ञानातिव्याप्तेरेव मूलकृताभिधानात् स्वयं वस्त्वतिव्याप्तिस्थलमाह घट इति। यद्यपि श्रावणस्य श्रावणविशेषणवत्त्वस्यान्योन्याभाव एवाश्रावणत्वमित्यभिधाय मूलस्यैव वास्तवातिव्याप्तिपरत्वं सुवचम्, तथापि पक्षे साधनस्याव्यापकं तदित्यग्रिममूलविरोधात्तदनुक्तमिति ध्येयम। आर्द्रेन्धनादेः पक्षवृत्तिपर्वतात्वद्यवच्छिन्नधूमादिसाध्यव्यापकत्वसम्भवादन्यथा व्याचष्टे न वेति । इत्थं च पक्षनियतेत्यादिमूलस्य पक्षादिपदव्यत्यासेन पक्षधर्मनियतत्वाभावादित्यर्थः । वस्तुतः पक्ष-

आर्द्रेन्धनवत्त्वादावुपाधौ पक्षनियतताद्दशधर्माभावाच्च । अथ साधनावच्छिन्नसाध्यव्यापकत्वे सति साधनाव्यापक उपाधिः । तेन ध्वंसस्य जन्यत्वेन ध्वंसप्रतियोगित्वे साध्ये साधनावच्छिन्नसाध्यव्यापकं भावत्वमुपाधिः श्यामत्वे शाकपाकजत्वमुपाधिरिति । तन्न । पक्षधर्मावच्छि-

---

र्द्रेन्धनेति । पक्षधर्मेति । विरुद्धस्थलीयोपाध्यव्याप्तिरपि द्रष्टव्या । साधनावच्छिन्नेति । स्वावच्छिन्नेत्यर्थात्साधनवतीति विशेषणाद्वा न व्यभिचारः । ननु शुद्धसाध्याव्यापकस्थल एवासिद्धिशङ्कानिरा-

---

धर्मावच्छिन्नसाध्यव्यापकत्वं पक्षधर्मविशिष्टसाध्यत्वावच्छिन्नं प्रति व्यापकत्वं तच्च शुद्धसाध्यव्यापकस्यार्द्रेन्धनादेरसम्भवि व्यर्थविशेषणत्वेन पर्वतत्वादिविशिष्टधूमत्वेनार्द्रेन्धनादिव्याप्यत्वानवच्छेदादत आर्द्रेन्धनवत्त्वाद्युपाधिस्थले पक्षनियतः पक्षनिष्ठो यस्तादृशः साध्यगतव्याप्त्यवच्छेदको धर्मस्तदभावादित्यर्थकं यथाश्रुतमेव मूलं सम्यगिति प्रतीमः । परे तु ननु पक्षमात्रवृत्तिधर्मावच्छिन्नसाध्याव्यापकत्वविवक्षयैव शब्दोऽभिधेय इत्यादावश्रावणत्वस्योपाधित्वं वारणीयं गुणत्वस्य शब्दमात्रावृत्तित्वेन तदवच्छिन्नव्यापकत्वस्य लक्षणाघटकत्वादित्याशङ्क्यार्द्रेन्धनेत्यादिमूलम्, तथा च ह्रदो धूमवान् वह्नेरित्यादावार्द्रेन्धनाद्युपाधावव्याप्तिस्तत्र पक्षनियतधर्मावच्छिन्नसाध्यस्याप्रसिद्धेरित्याहुः। विरुद्धेति।गोत्ववानश्वत्वादित्यादौ साधनावच्छिन्नसाध्याप्रसिद्ध्या तत्रत्यसास्नावत्त्वाद्युपाधावव्याप्तिरित्यर्थः । मित्रातनयत्वं श्यामत्वासाधकं मित्रातनयत्वावच्छिन्नश्यामत्वव्यापकव्यभिचारित्वादित्यस्य काकत्वादौ व्यभिचारित्वादाह स्वावच्छिन्नेति । स्वस्यानननुगतत्वादाह साधनवतीति । विशेषणेति । तथा च मित्रातनयत्ववति मित्रातनयत्वावच्छिन्नश्यामत्वव्यापकव्यभि-

न्नसाध्यव्यापकोपाध्यव्यापनात्, जलं प्रमेयं रसवत्त्वादित्यत्र रसवत्त्वावच्छिन्नसाध्यव्यापकपृथिवीत्वस्योपाधित्वप्रसङ्गात्, सोपाधित्वादसाधकमित्यत्र साधनावच्छिन्नसा-

---

सायावच्छेदकांशोऽपि निवेशनीयोऽखण्डाभावस्य घटकतया च न वैयर्थ्यम्। येन रूपेणोपाधिता विशेषणवति तद्रूपावच्छिन्नव्यभिचारस्यैव वा हेतुत्वं शुद्धसाध्यव्यापकस्थले तु साध्यव्यापकव्य-

---

चारित्वादित्येव हेतुः स च न काकत्वादावतो न व्यभिचारः। असिद्धिशङ्कोति व्यभिचारिहेतोः शुद्धसाध्यव्यापकव्यभिचारित्वनियमेऽपि तादृशव्यापकव्यभिचारित्वस्य हेतावनिश्चयदशायां स्वरूपासिद्धिशङ्कावारणाय साधनपक्षधर्मादिरूपोऽवच्छेदकांशो निवेश्य इत्यर्थः। ननु तथाऽप्यसिद्ध्यादिवारकविशेषणस्य व्याप्तिग्रहानौपयिकत्वेन व्यर्थत्वमेवेत्यत आह अखण्डेति। श्यामत्वव्यापकत्वमपेक्ष्य मित्रातनयत्वाद्यवच्छिन्नश्यामत्वव्यापकत्वरूपस्याऽखण्डाभावस्यातिरिक्तत्वेन तदघटकतया मित्रातनयत्वाद्यवच्छिन्नत्वस्य न वैयर्थ्यमित्यर्थः। स्वसमानाधिकरणव्याप्यतावच्छेदकान्तरघटितस्यैव हेतोर्व्यर्थविशेषणकत्वादिति भावः। ननु साधनाद्यवच्छिन्नसाध्यव्यापकव्यभिचारित्वं न तादृशसाध्यव्यापकतावच्छेदकधर्मसामान्याभावावच्छिन्नाभाववद्वृत्तित्वं तादृशसाध्यव्यापकतावच्छेदकं यत्प्रमेयत्वादिकं सर्वत्रैव तदवच्छिन्नस्य सत्त्वेनाप्रसिद्ध्यादिप्रसङ्गात्, किन्तु येन रूपेण तादृशसाध्यव्यापकत्वं तद्रूपावच्छिन्नाभाववद्वृत्तित्वमेव तथा, तथा च तत्र तादृशसाध्यव्यापकतावच्छेदकत्वांशप्रवेशो व्यर्थ इत्यत आह येन रूपेणेति। उपाधितावच्छिन्नसाध्यव्यापकता। विशेषणवतीति। यद्विशेषणावच्छिन्नस्य साध्यस्य व्यापकत्वमुपाधिस्तद्विशेषणवतीत्यर्थः। काकत्वादौ व्यभिचारस्य वारणार्थमिदम्, तथा च मित्रातनयत्वं श्यामत्वा-

भिचारो व्यापकतावच्छेदकार्द्रेन्धनत्वाद्यवच्छिन्नव्यभिचारो वा हेतुरुपन्यसनीयः । प्रायशस्तद्धर्मवति तद्धर्मविशिष्टसाध्यव्यापकव्यभिचारित्वस्य हेतुत्वेऽपि न वैयर्थ्यम्, अखण्डाभावस्यातिरिक्तत्वात् । वस्तुतस्तूपाधिना असाधकत्वासाधनेऽपि न क्षतिः, उद्भावितयावद्दोषैरेव तत्साधनीयमिति नियमाभावात् तदुद्भीतव्यभिचारेण तत्साधनसम्भवात् । सन्दिग्धोपाधिसमशीलः सन्दिग्धो

साधकं मित्रातनयत्ववति शाकपाकजत्वव्यभिचारित्वादित्यादिक्रमेणैवासाधकत्वमनुमेयमिति भावः । प्रागुक्तस्य शुद्धसाध्याव्यापकस्थले एवेत्येवकारस्य व्यवच्छेद्यं स्फुटीकरोति शुद्धसाध्येत्यादिना । तत्रासिद्धिशङ्काया विरहेण तदुद्धारकस्य साधनावच्छिन्नत्वांशस्य निष्फलत्वादिति भावः । अत्रापि शुद्धसाध्यव्यापकव्यभिचारित्वं यदि तादृशसाध्यव्यापकतावच्छेदकधर्मसामान्याभावावच्छिन्नाभाववदवृत्तित्वं तर्हि अप्रसिद्धिरतो येन रूपेण शुद्धसाध्यव्यापकत्वं तदवच्छिन्नाभाववदवृत्तित्वमेव तथा वाच्यमित्याशयेन व्याप्यतावच्छेदकत्वांशमुपलक्षणीकृत्याह साध्यव्यापकतावच्छेदकेत्यादि । धूमवान् वन्हेरित्यादौ शुद्धसाध्यव्यापकस्थले महानसायःपिण्डान्यतरत्ववति तादृशान्यतरत्वावच्छिन्नधूमव्यापकव्यभिचारित्वादेर्हेतुतायामपि न वैयर्थ्यमित्याह प्रायश इति । तद्धूमवान् वन्हेरित्यादौ तद्धूमव्यापकताया एव धर्मान्तरावच्छिन्नतद्धूमव्यापकतास्वरूपत्वादखण्डाभावघटकतया तत्र वैयर्थ्यव्युदासस्यासम्भवात् प्रायश इत्युक्तम् । अखण्डेति महानसायःपिण्डान्यतरत्वावच्छिन्नधूमव्यापकतारूपस्याखण्डाभावस्य धूमसामान्यव्यापकतातोऽतिरिक्तत्वादित्यर्थः । हेत्वाभासेनैव परहेतोरसाधकत्वसाधनस्य जल्पाकसम्प्रदायसिद्धत्वादुपाधिना तत्साधनमेव नास्ति कुत्र वैयर्थ्यमित्यभिप्रायवानाह वस्तुत इति । असाधकत्वमनुमित्यौपयिकयत्किञ्चिद्दूषणाहितत्वं दोषो निग्रहस्थानं तेनोपाधेर्हेतुदोषत्वाभावेऽपि न क्षतिः तत असाधकत्वम् केन तर्हि असाधकत्वं साधनीयमत आह तदुद्भीतेति । उपाध्युद्भीतेत्यर्थः । नन्वेवं सन्दिग्धव्यभिचार-

ध्यव्यापकव्यभिचारित्वे साधनावच्छिन्नेत्यस्य व्यर्थत्वप्रसङ्गाच्च । किञ्च पक्षद्वयेऽपि विशिष्टसाध्यव्यभिचारं विशिष्टसाध्यव्यतिरेकं वा प्रसाध्य पश्चात् केवलसाध्यव्यभिचारः केवलसाध्यव्यतिरेको वा साधनीयस्तथा चार्थान्तरम्, केवलसाध्ये हि विवादो न तु विशिष्टे।अथ प्रकृतसाध्यव्यभिचारसिद्ध्यर्थं विशिष्टसाध्यव्यभिचारः साध्य इति चेन्न । अप्राप्तकालत्वात् । प्रथमं साध्यव्यभिचार एवोद्भाव्यस्तत्रासिद्धावुपाधिरिति चेत् । तर्हि

व्यभिचार इत्यत आह किञ्चेति । केवलेति । तथा च केवलस्यैव साध्यस्य व्यभिचारो व्यतिरेको वा जिज्ञासितो विरोधित्वात् न तु विशिष्टस्य,अविरोधित्वादिति भावः।उद्भाव्यो विशेषणाव्यभि-

---

स्थानेऽसाधकत्वानुमानं न स्यात् साध्यव्यभिचारात्मकहेतोः पक्षधर्मत्वानिश्चयादत आह सन्दिग्धेति। भवतां सन्दिग्धोपाधिकत्वमिव ममापि सन्दिग्धव्यभिचारकत्वमेव तत्रासाधकत्वानुमापकं वाच्यं नाऽनुमेयं वा तत्रासाधकमिति भावः। मूले पक्षद्वयेपीति। व्यभिचारोन्नयनपक्षे सत्प्रतिपक्षोन्नयनपक्षे चेत्यर्थः । साधनावच्छिन्नसाध्यव्यापकत्वगर्भलक्षणपक्षे पक्षधर्मावच्छिन्नसाध्यव्यापकत्वगर्भलक्षणपक्षे चेति वार्थः । अर्थान्तरत्वसम्पादनायोपात्तस्य केवलसाध्ये विवाद इत्यस्याऽऽशयं प्रकाशयति तथा चेति। विरोधित्वादिति। शुद्धसाध्यस्य व्याप्तिग्रहे विशिष्टबुद्धौ वा विरोधित्वादित्यर्थः । न तु विशिष्टस्येति। साध्यस्य व्यभिचारो व्यतिरेको वा जिज्ञासित इत्यनुषज्यते। अविरोधित्वादिति । प्रतिज्ञातस्य शुद्धसाध्यस्य सिद्ध्यर्थं हेतोरुपन्यासे सत्यत्र दोषं वदेति क्रमेण स्वोक्तहेतौ शुद्धसाध्यानु-

प्रकृतानुमाने नोपाधिर्दूषणं स्यात् । किञ्च साध्यव्यभिचारहेतुत्वेन पक्षधर्मावच्छिन्नसाध्यव्यापकव्यभिचार एवोपन्यसनीयो नोपाधिः । स्यादेतत्, पर्यवसितसाध्य-

---

चारित्वे सति विशिष्टसाध्यव्यभिचारेण साधनीयः । तत्र विशिष्टसाध्यव्यभिचारेऽसिद्धावुद्भावितायां तदसिद्धये उपाधिरुद्भाव्य इति । तदीति । प्रकृतानुमितिविरोधिशुद्धसाध्यव्यभिचारासाधकत्वादिति भावः । अथ वक्ष्यमाणरीत्याऽवच्छिन्नसाध्यव्यापकेनाप्युपाधिना आहत्यैव साध्यव्यभिचारः साधनीय इयत आह किञ्चेति । पक्षधर्मावच्छिन्नेत्यादिकमुपाधिमात्रव्यभिचारोपलक्षकं न

मितिविरोधिदोषस्यैवाकाङ्क्षितत्वादिति भावः । तदसिद्धावित्यग्रिमग्रन्थस्य तच्छब्देन विशिष्टसाध्यव्यभिचारस्य परामर्शार्थमुद्भाव्यपदं व्याचष्टे विशेषणेत्यादि । विशिष्टसाध्यव्यभिचारमात्रस्य शुद्धसाध्यव्यभिचाराव्याप्यत्वात् सत्यन्तम्, तच्चोपलक्षणम्, क चिद्विशेषणवतीत्यपि द्रष्टव्यं तेन न श्यामः प्रमेयत्वादित्यादौ प्रमेयत्वस्य मित्रातनयत्वाव्यभिचारविरहेपि न क्षतिः। प्रमेयत्वं श्यामत्वव्यभिचारि मित्रातनयत्ववति तद्विशिष्टश्यामत्वव्यभिचारित्वादित्येवमेव तत्र शुद्धसाध्यव्यभिचारस्योद्भाव्यत्वादिति ध्येयम् । काकत्वादौ व्यभिचारेण विशेषणाव्यभिचारित्वादिविशिष्टस्य विशिष्टसाध्यव्यभिचारस्य विशिष्टसाध्यव्यापकोपाधिना साधयितुमशक्यत्वात्तत्रेत्यनेन केवलं विशिष्टसाध्यव्यभिचारमेव परामृशति तत्रेति । वास्तवासिद्धेरसत्त्वात् पूरयति उद्भावितायामिति । एतत्सिद्धये विशिष्टसाध्यव्यभिचारित्वसिद्धये । उपाध्युद्भावनस्यैवाप्राप्तकालत्वं प्रक्रान्तमतस्तस्यैव तथात्वं निरसितुं पूरयति उद्भाव्य इति । वक्ष्माणरीत्येति । हेतुः शुद्धसाध्य-

व्यापकत्वे सति साधनाव्यापक उपाधिः । पर्यवसितं साध्यं पक्षधर्मताबललभ्यं यथा शब्दोऽनित्यत्वातिरिक्त-शब्दधर्मातिरिक्तधर्मवान् मेयत्वादित्यत्र पर्यवसितं यत्सा-

---

प्राधान्येनोपाधिर्व्याप्त्यादिविरहेणाहेतुत्वात् । पर्य्यवसितेति । अत्र लक्ष्यतानियामकं दूषकताबीजं सत्प्रतिपक्षोन्नायकत्वम् । व्यभिचारोन्नायकत्वस्य तत्त्वे साध्यवत्पक्षावृत्तौ व्यभिचारोन्नायकेऽव्याप्तेः वक्ष्यमाणकृतकत्वोपाधेरदूषकत्वापत्तेश्च । न हि तद्व्यभिचारेण हेतौ शुद्धसाध्यव्यभिचारः शक्योन्नयनो बाधानवतारदशायां तादृशव्यभिचाराप्रसिद्धेः । न च पर्य्यवसितसाध्यव्यभि-

---

व्यभिचारी विशेषणवति विशिष्टसाध्यव्यापकोपाधिव्यभिचारित्वादित्येवं सिद्धान्तग्रन्थवक्ष्यमाणक्रमेणेत्यर्थः । आह प्रथमतः । तथा च शुद्धसाध्यानुमान एवोपाधिर्दूषणमिति भावः । उपाध्यन्तरस्यापि व्यभिचारस्यैव साध्यव्यभिचारोन्नायकत्वान्न्यूनतां निरसितुमाह पक्षेत्यादि । ननूपाधिव्यभिचारस्य उपन्यासे विशेषणविधयोपाधेरप्युपन्यासान्नोपाधिरित्यसङ्गतमतो मध्ये पूरयन्नाह न प्राधान्येनोपाधिरिति । केवलोपाधेरनुपन्यस्यत्वे हेतुमाह व्याप्त्यादीति । आदिना पक्षधर्मत्वोपग्रहः । यद्यपि व्यभिचारसम्बन्धेनैवोपाधेः साध्यव्यभिचारव्याप्यत्वं हेतुनिष्ठत्वं च सुघटं तथापि प्राच्यैर्वृत्त्यनियामकसम्बन्धेन व्याप्त्येरस्वीकारादिदमुक्तम् । साध्यवदिति । पर्वतो धूमवान् वन्हेरित्यादौ महानसत्त्वाद्युपाधावित्यर्थः । तत्र पक्षधर्मताबललभ्यसाध्यस्य पक्ष एव सत्त्वेन तदव्यापकत्वादिति भावः । ननु पक्षधर्मताबललभ्यत्वं यदि साध्यवत्त्वप्रमाविशेष्यत्वानधिकरणीभूतसाधनाधिकरणावृत्तिधर्मावच्छिन्नत्वमुच्यते तदा नोक्तदोषस्तथाहि पिण्डमहानसान्यतरत्वादिनैव तादृशधर्मेणावच्छिन्नस्य साध्यस्य व्यापकताया महानस-

ध्यम् अनित्यत्वं तस्य व्यापकं कृतकत्वमुपाधिः । यदि च तथैव कृतकत्वमपि शब्दे साध्यते तदा अनित्यत्वमुपाधिः । तदुक्तं वाद्युक्तसाध्यनियमच्युतोऽपि कथकैरुपाधिरुद्भाव्यः पर्य्यवसितं नियमयन् दूषकताबीजसाम्रा-

---

चारः साध्यव्याप्यताबोधविरोधीति । न चैवमपि कथं तत्र सद्धेतावुपाधिसम्भवः, मीमांसकमतेन तदभिधानाद् शब्दयोर्भावप्रधानत्वाद्वा । पक्षतावच्छेदकादेरुपाधितावारणाय पक्षावृत्तित्वे सतीति विशेषणीयम् । यदि चेति । एतच्च स्वतन्त्रकृतकत्वसाधनदशायां

स्वादौ सत्त्वादत आह वक्ष्यमाणेति।बाधानवतारेति।तदवतारदशायां च तेनैवानुमितिप्रतिबन्धसम्भवादुपाधिवैफल्यमिति भावः । अप्रसिद्धेरिति। पक्षातिरिक्ते सर्वत्रैव प्रकृतसाध्यवत्त्वनिश्चयादिति भावः। ननु तत्र पर्यवसितसाध्यस्यानित्यत्वस्यैव व्यभिचारः कृतकत्वोपाधिनोन्नेय इति अत आह न चेति।तथा च तदुन्नयनेऽर्थान्तरापत्तिरिति भावः । अत्र पक्षीभूतशब्दे विशिष्य प्रकृतसाध्याभावानिर्णयेऽपि प्रमेयत्वमनित्यत्वातिरिक्तशब्दधर्मातिरिक्तधर्मावच्छिन्नाभाववद्वृत्तीत्येवं सामान्यतः प्रकृतसाध्यव्यभिचारनिर्णयस्याऽऽप्तवाक्यादिनाप्यन्ततः सम्भवादुव्यभिचारोन्नायकत्वस्य लक्ष्यताप्रयोजकत्वेऽपि न क्षतिरित्यस्मद्गुरुचरणाः । एवमपीति। सत्प्रतिपक्षोन्नायकत्वस्यैव लक्ष्यत्वेऽपीत्यर्थः । तत्र सद्धेतौ शब्दोऽनित्यत्वातिरिक्तेत्यादौ । मीमांसकेति । तन्मते शब्दस्य नित्यत्वेन पक्ष एव प्रमेयत्वस्य सत्त्वेन साध्यव्यभिचारित्वादिति भावः । ननु नैयायिकस्य रत्नकोषकृतः परमतेन स्वनिरुक्तेरुदाहरणं नोचितमत आह शब्दयोरिति । द्वित्वमविवक्षितम् । यदि चेत्यादि मूलस्थशब्दपदस्यापि शब्दत्वपरत्वादिति ध्येयम् । ननु महानसन्धूमवद्धन्हेरित्यादौ महानसत्त्वादा-

उपादिति । अनेन पक्षधर्मसाधनावच्छिन्नसाध्यव्यापको-पाधिः संगृह्यते तादृशसाध्यस्य पर्य्यवसितत्वादिति । तन्न । एवं हि द्व्यणुकस्य सावयवत्वे सिद्धे द्व्यणुकम-नित्यद्रव्यासमवेतं जन्यमहत्त्वानधिकरणद्रव्यत्वादित्यत्र नित्यद्रव्यसमवेतत्वं पर्य्यवसितं साध्यं तस्य व्यापकं

बोध्यम् । अनित्यत्वसाधनोपयोगितया तु कृतकत्वसाधने द्वयोरपि सान्दिग्धत्वेनैकतरव्यतिरेकस्यान्यतरव्यतिरेकासाधकत्वात् । एवं हीत्यादि । असमवेतत्वेन द्रव्यासमवेतत्वेन वा अर्थान्तरवारणाय

वतिव्याप्तिस्तस्यापि पक्षधर्मताबललभ्यमहानसीयधूमस्य व्यापकत्वा-दत आह पक्षतावच्छेदकादीति। आदिना तत्रैव व्यञ्जनवत्त्वाद्युपग्रहः। पक्षावृत्तित्वं स्वानधिकरणपक्षकत्वं तेन घटत्वं रूपवत् सत्त्वा-दित्यादौ पक्षसमवेतत्वाप्रसिद्धावपि न समवायेन द्रव्यत्वाद्यु-पाधावव्याप्तिः । वस्तुतः साधनाव्यापकत्वमित्यत्र मूले साध्यते-ऽस्मिन्निति व्युत्पत्त्या साधनपदं प्रकृतपक्षपरं तथा च तादात्म्येन तदव्यापकत्वविरहादेव पक्षतावच्छेदकादौ नातिव्याप्तिः । अन्यथा यथाश्रुतस्य साधनाव्यापकत्वस्यापि लक्षणघटकत्वे जलं वह्निमद्धू-मादित्यादौ वह्निसामग्र्याद्युपाधावव्याप्त्यापत्तेः इति ध्येयम् । स्व-तन्त्रेति । पक्षस्य प्रमाणान्तरेणानित्यत्वाभावनिश्चयकालीनेत्यर्थः । अ-नित्यत्वेति । अनित्यत्वानुमितिविरोधिन्यां कृतकत्वस्याभावेनानित्य-त्वस्यानुमितौ स्वरूपासिद्धिप्रदर्शकतया कृतकत्वसाधने हीत्यर्थः । द्वयोः । अनित्यत्वकृतकत्वयोः । असाधकत्वादिति । हेतोः पक्षधर्मत्वा-निश्चयादिति भावः । अत्र विनाशित्वलक्षणानित्यत्वसाधनोपयोगितया कृतकत्वसाधने सदातनान्यत्वलक्षणमनित्यत्वमुपाधिः सम्भवत्येव पक्षे

सावयवत्व इति । साध्ये द्रव्यपदं नित्यद्रव्यवृत्तितायाः स्फुटतरसिद्ध्यर्थम् । द्रव्यसमवेतेऽनित्यद्रव्यासमवेतत्वस्य नित्यद्रव्यसमवेतत्वमादाय पर्य्यवसानात् । हेतौ च जन्यपदं परमाणुनित्यत्वासिद्दिदशायामाकाशादौ व्याप्तिग्रहाय । विशिष्टाभावस्यातिरिक्तत्वान्न वैयर्थ्यम् । नित्यमहत्त्वव्यावृत्तानित्यावन्महत्त्ववृत्तिजातिपरिचयाय तदिति तु न । तादृशजातौ मानाभानात् वैभवापेक्ष-

---

तद्व्यतिरेकस्य निश्चेतुं शक्यत्वादित्यस्मद्गुरुचरणाः।ननु समवेतत्वे सिद्धे इत्येवोच्यतां तावतैवासमवेतत्वमादायार्थान्तरस्य वारणादत आह द्रव्येति।सावयवत्वञ्चेह न समवेतद्रव्यत्वं किन्तु द्रव्यसमवेतत्वं तथा सत्येव नित्यद्रव्यसमवेतत्वस्य पर्य्यवसितसाध्यत्वसम्भवादिति ध्येयम् । स्फुटतरेति। प्रकृतानुमानेनैव सिद्ध्यर्थमित्यर्थः । एकविशेषस्य बाधनिश्चयदशायामिव तत्सामग्रीदशायामपि साध्यविधयेव पक्षतावच्छेदकविधयापि सामान्यप्रकारकानुमितिसामग्री जनयत्येव विशेषान्तरप्रकारिकामनुमितिं तथा चानित्यसमवेतत्वं न द्रव्यसमवेतत्वस्य विशेषणं किन्त्वनित्यद्रव्यसमवेतत्वमेवेति तद्बाधसामग्रीसम्पत्त्यर्थमेव साध्ये द्रव्यपदमन्यथा तदनुक्तौ द्रव्यसमवेतत्वे सत्यनित्यसमवेतत्वहेतुनाऽनुमानान्तरेणैव नित्यद्रव्यसमवेतत्वसिद्धिः स्यादिति भावः । उक्तक्रमेण सामान्यधीसामग्र्या विशेषधीजनकत्वे फलं प्रमाणयति द्रव्यसमवेत इत्यादिना।पर्य्यवसानादनुमानात्।द्व्यणुकस्य सावयवत्वासिद्ध्यैव परमाणुः सिद्ध इति तन्नित्यत्वासिद्ध्यनुसरणम् । ननु परमाणोर्नित्यत्वासिद्दिदशायामपि मनस्येव महत्त्वानधिकरणद्रव्यत्वस्य हेतोरनित्यद्रव्यासमवेतत्वव्याप्तिग्रहो भवितेत्यत आह विशिष्टेति। महत्त्वाधिकरणान्यत्वमपेक्ष्य जन्यमहत्त्वाधिकरणान्यत्वस्यातिरिक्तत्वात् तद्गर्भहेतौ न जन्यपदस्य वैयर्थ्यमित्यर्थः।मतान्तरं निरसितुमुपन्यस्यति नित्येत्यादिना।तत् जन्यपदम्।ननु परममहत्त्वादपकृष्ट त्रुटिघटादीनां महत्त्वमिति व्यवहारबलादेव तादृश्येकजातिः सेत्स्यतीत्यत आह वैभवेति । अननुगतेति। घटत्रुट्यादिप्रत्येकमहत्त्वनिष्ठतयाऽनुभवसिद्धैस्तत्तज्जातिभिरित्यर्थः ।

कापकर्षव्यवहारस्यानुगतजातिभिरेव सम्भवात् तुल्यन्यायतया त्रसरेणुमहत्त्वापेक्षिकोत्कर्षेणैकजात्या सङ्करप्रसङ्गाच्च । निःस्पर्शेति । साध्योपाध्योर्व्याप्तिदार्ढ्यप्रदर्शनाय द्रव्यपदम् । गमकता तु तेन विनापि । पर्यवसितसाध्यसमव्याप्त एवोपाधिरिति मतेनेदमित्यपि कश्चित् । ननु भवतां शुद्धसाध्यव्यापकस्पर्शवदसमवेतत्वं

अर्थानुगतव्यवहारस्यानुगतधर्मनियम्यत्वान्नानाजातिभिस्तदसम्भव इत्यत आह तुल्येति। त्रुटिमहत्त्वादुत्कृष्टं गगनघटादेर्महत्त्वमित्यपि व्यवहारमत्त्वादिति भावः। सङ्करेति । परमहत्त्वापेक्षिकोत्कर्षस्य त्रुटिमहत्त्वापेक्षिकोत्कर्षस्य च गगनमहत्त्वे त्रुटिमहत्त्वे च परस्परपरीहारेण वर्त्तमानस्यैकस्य घटत्वादिमहत्त्वे सत्त्वादिति भावः । वैभवावृत्तिमहत्त्वनिष्ठजातिकूटपरिचयार्थं जन्यपदमित्युक्तौ तु न कश्चिद्दोष इति ध्येयम् । व्याप्तिदार्ढ्यायेति । व्याप्तिग्राहकतर्कप्रदर्शनायेत्यर्थः । परमाणोर्नित्यत्वासिद्धिदशायां निःस्पर्शद्रव्यसमवेतत्वमात्रस्य नित्यद्रव्यसमवेतत्वाभेदग्रहात्तस्यैव प्रकृतोपाधौ साध्यव्यापकताग्राहकत्वात् निःस्पर्शद्रव्यसमवेतत्वं यदि नित्यद्रव्यसमवेतत्वस्याव्यापकं न स्यात्तदा तदभिन्नं न स्यादित्येवं तर्कसम्भवात्। नहि निःस्पर्शसमवेतत्वमात्रं नित्यद्रव्यसमवेतत्वाभिन्नं गुणसमवेतत्वादौ व्यभिचारात् येन तन्मात्रस्य प्रकृतसाध्याभिन्नत्वग्रहस्तद्व्यापकताग्राहकस्तर्कः स्यादिति भावः । गमकता त्विति । स्वाभावेन साध्याभावोन्नयनौपयिकरूपवत्त्वात्तु द्रव्यपदं विनापीत्यर्थः। द्व्यणुकं नित्यद्रव्यासमवेतं निःस्पर्शसमवेतत्वाभावादित्येवं साध्याभावोन्नयनसम्भवादिति भावः। मिश्रस्य मतमाह पर्यवसितेत्यादि । इदमुपाधिस्थद्रव्यपदम्। अन्यथा निःस्पर्शसमवेतत्वस्य रूपत्वादौ नित्यद्रव्यसमवेतत्वव्यभिचारेण तत्समानियतत्वानुपपत्तेः इति भावः । दूषकतायामनुपयोगादुपाधेः साध्यव्यापकत्वं न लक्ष्यतात्रयोजकमित्यस्वरसः कश्चिदित्युक्त्वा सूचितः। भवतां शुद्धसाध्यव्यापकस्यैव उपाधित्वमङ्गीकुर्वताम्। शुद्धसाध्यस्य अनित्यद्रव्यासमवेतत्वस्य व्यापकमित्यर्थः। अनवस्थेति। द्व्यणुकावयवस्याप्यवयवकल्पने तदवयवस्याप्यवयवान्तरं स्यादित्यवय-

साधनाव्यापकञ्च । किञ्च पक्षधर्मताबललभ्यसाध्यसिद्धौ निष्फलमुपाधिः तदसिद्धौ च कस्य व्यापकः, न हि सोपाधौ पक्षधर्मताबलात् साध्यं सिध्यति यस्य व्यापक उपाधिः स्यादिति ।

कथं नोपाधिः, अनवस्थाभिया कस्य चिन्निरवयवस्य स्पर्शवतः सिद्धौ तत्समवेतद्रव्ये साध्याव्यापकत्वादिति चेत्, तुल्यं ममापीयत आह किञ्चेति । सोपाधौ । सोपाधितया निश्चिते । ननु लभ्यत्वं लाभयोग्यत्वं पक्षे यादृशं साध्यं सेत्स्यधुमर्हति तद्व्यापकत्वे सति पक्षावृत्तित्वं पक्षे साध्यसिद्धिविरोधिव्यापकताशालित्वमिति यावत्, स्वव्यतिरेकेण पक्षे साध्यसिद्धिविरोध्युद्भावक-

---

वपरम्परायामनवस्थापत्त्या निरवयवस्यापि कस्य चिदारम्भकत्वानुरोधेन स्पर्शवतः सिद्धौ तत्समवेत एव द्रव्यादौ शुद्धसाध्याव्यापकत्वात् स्पर्शवदसमवेतत्वं नोपाधिरिति प्रश्नवाक्येनान्वयः । तुल्यमिति । ममापि तादृश्येव निरवयवस्पर्शवति यत् समवेतं तत्रैव निःस्पर्शद्रव्यसमवेतत्वस्य नित्यद्रव्यसमवेतत्वाव्यापकत्वान्न पर्य्यवसितसाध्यव्यापकत्वमित्यर्थः । सोपाधावप्युपाधेरज्ञानदशायां पक्षधर्मताबलात् साध्यं सिद्ध्यत्येवातो व्याचष्टे सोपाधाविति।सोपाधित्वसंशयस्य प्रतिपक्षाक्षमत्वान्निश्चयानुसरणम् । योग्यतां विवृणोति पक्षे यादृशमिति । अर्हत्वस्य दुर्वचत्वादाह पक्षे साध्यसिद्धीति । यादृशव्यापकत्वावच्छिन्नाभाववत्तया पक्षस्य निश्चयः पक्षधर्मिकप्रकृतसाध्यवत्त्वबुद्धिप्रतिबन्धकः सा पक्षे साध्यासिद्धिविरोधिनी व्यापकता तद्वत्त्वमर्थः। ननु विशेषणवति पक्षे विशिष्टसाध्यव्यापकत्वावच्छिन्नाभावस्य निश्चयो न शुद्धसाध्यवत्ताग्रहविरोधी विरोध्यविषयकत्वात् प्रतिबन्धकत्वान्तरकल्पने च मानाभा-

त्वमिति तु निर्गलितोऽर्थः । भवति च शब्दधर्मातिरिक्तधर्मरहिते शब्देऽनित्यत्वाभावसिद्धिर्यथोक्तसाध्यसिद्धिविरोधिनी तथा साधनादिमति साधनाद्यवच्छिन्नसाध्याभावसिद्धिरपि । वस्तुतस्तु पक्षधर्मावच्छिन्नसाध्यव्यापकत्वे सति पक्षावृत्तित्वमेवोपाधित्वम् । सिध्यति च विशेषणवति विशिष्टसाध्यव्यापकव्यतिरेकेण शुद्धसाध्यव्यतिरेकः । तादृशश्च साधनव्यापकः संग्राह्यो व्यभिचारोन्नायक इव पक्षवृत्तिरितरेषाम् । अपरेषां सत्प्रतिपक्षोन्नयनक्षमस्य साधनव्यापकस्येवाऽस्माकमपि व्यभिचारोन्नायकस्य पक्षवृत्तेरसंग्रहो न दोषाय। परेषां साधनभेदादिवास्माकमपि पक्षभेदादुपाधिभेद इति चेत्, अत्र वक्ष्यते ग्रन्थकृतैव ।

वादत आह स्वव्यतिरेकेणेति । यथोक्तेति । अनित्यत्वातिरिक्तशब्दधर्मातिरिक्तधर्मात्मकेत्यर्थः।विरोधिनीति।सामान्याभावस्य विशेषाभावकूटात्मकत्वादित्यभिमानः । सिद्धिरपीति।यथोक्तसाध्यसिद्धिविरोधिनीत्यनुषज्यते।विशेषणवति विशिष्टाभावस्य विशेष्याभावात्मकत्वादिति भावः । नन्विदमयुक्तं सामान्याभावविशिष्टाभावयोर्भिन्नत्वाद्यथोक्तसाध्याभावत्वावच्छिन्नवत्तानिश्चयत्वेनैव शुद्धसाध्यवत्ताबुद्धिं प्रति विरोधित्वाच्चात आह वस्तुतस्त्विति।ननु पक्षधर्मावच्छिन्नसाध्यव्यापकत्वं न दूषणक्षमं तदवच्छिन्नाभावेन व्यभिचारितया शुद्धसाध्यव्यतिरेकस्य साधयितुमशक्यत्वादत आह सिध्यति चेति । ह्रदो वन्हिमान् धूमादित्यादिस्थले वह्निसामग्र्यादावतिव्याप्तिं लक्ष्यतया निरस्यति तादृशश्चेति । उक्तलक्षणाक्रान्तश्चेत्यर्थः । इतरेषां व्यभिचारोन्नायकत्वेन दूषकत्ववादिनाम्।पर्वतो धूमवान् वन्हेरित्यादावार्द्रेन्धनाद्यव्याप्तिमलक्ष्यतया निरस्यति अपरेषामिति । अस्माकं सत्प्रतिपक्षोन्नायकत्ववादिनाम्।नन्वेवमेकस्मिन्नेव साधने पक्षभेदादुपाधिरनेकः स्यादत आह परेषामिति । उपाधिभेदः उपाधिपदप्रवृत्तिनिमित्तोपाधिभेदः । अत्र प्रकृतनिरुक्तौ ग्रन्थकृतैवेति । सम्मति-

अत्रोच्यते । यद्व्यभिचारित्वेन साधनस्य साध्य-व्यभिचारित्वं स उपाधिः । लक्षणन्तु पर्य्यवसितसा-

---

लक्ष्यतावच्छेदकमाह यद्व्यभिचारित्वेनेत्यादि।उन्नीयत इति शेषः। उन्नायकत्वं तद्योग्यता सा च व्याप्तिपक्षधर्म्मतेति।तथा च यद्व्यभिचारो यद्धर्म्मावच्छिन्नाभावाधिकरणीभूतयत्किञ्चिदधिकरणवृत्तित्वं

रिति शेषः। क चित् साधनाव्यापकोप्युपाधिर्यत्र पक्षावृत्तिर्हेतुरित्यग्रिममूलस्यात्रैव तात्पर्य्यादिति भावः ।

ननु यद्व्यभिचारित्वेनेत्यादिमूलस्य लक्षणपरत्वे लक्षणत्वित्यादग्रिमग्रन्थविरोध इत्यत आह लक्ष्यतेति। साध्यव्यभिचारस्योपाधिव्यभिचारेण तज्ज्ञानेन वा जन्यत्वासम्भवात् तृतीयार्थासङ्गतेराह उन्नीयत इति ।तथा च साधने यद्व्यभिचारहेतुकानुमितिविषयः साध्यव्यभिचारः स तत्रोपाधिरित्यर्थः। इदं च जन्यत्वमात्रं ज्ञानजन्यत्वमात्रं वा प्रकृते तृतीयार्थ इति प्राचां मतानुसारणेति। स्वमते तु पञ्चम्या इव ज्ञानज्ञाप्यत्वं प्रकृते तृतीयाया अर्थ इत्येव वक्तुमुचितमिति ध्येयम।साध्याव्यापकस्यापि व्यभिचारेण व्याप्त्यादिभ्रमवशात् साध्यव्यभिचारस्योन्नयनात्तत्रातिव्याप्तेराह उन्नायकं चेति।योग्यतां निर्वक्ति सा चेति।तथा च यद्व्यभिचारः साध्यव्यभिचारव्याप्यः साधनवृत्तिश्च तत्त्वमर्थः। अथात्र किञ्चिद्विशिष्टस्य केवलस्य वा यद्व्यभिचारस्य साध्यव्यभिचारव्याप्यत्वमभिमतम् प्रथमे रूपवान् द्रव्यत्वादित्यादौ पृथिवीत्वाभावादेरुपाधितापत्तिस्तद्व्यभिचारस्यापि जलसमवेतनित्यत्वादिविशिष्टस्य साध्यव्यभिचारव्याप्यत्वात्, द्वितीये तु शाकपाकजत्वाद्यव्याप्तिस्तद्व्यभिचारमात्रस्य साध्यव्यभिचाराव्याप्यत्वादत आह तथा चेति। तद्धर्मावच्छिन्नेति यत्सम्बन्धावच्छिन्नत्वस्याप्युपलक्षकम। यत्किञ्चिदधिकरणवृत्तित्वं यत्किञ्चिदधिकरणवृत्तित्वसामान्यम।क चि-

साध्यव्यभिचारव्याप्यं साधनवृत्ति च तद्धर्म्मावच्छिन्नं तत्रोपाधिरित्यर्थः । तेनार्द्रेन्धनाभाववद्वृत्तित्वेन वन्हौ धूमव्यभिचारसाधनेऽप्यार्द्रेन्धनं द्रव्यत्वादिना न तत्रोपाधिः । तद्रूपावच्छिन्नाभाववद्वृत्तित्वस्य वन्ह्यवृत्तित्वात् । शुद्धसाध्यव्यापके तदभाववन्मात्रवृत्तित्वं साध्यव्यभिचारव्याप्यम् अवच्छिन्नसाध्यव्यापके त्ववच्छेदकाधिकरणीभूततदभावाधिकरणवृत्तित्वमित्युभयत्रापि सङ्गतिः । द्रव्यत्वेन रूपवत्त्वेन साध्ये सत्ताद्रव्यत्वजलत्वमात्रविशेष्यिका या धीस्तद्विशेष्यत्वे जलसमवेतनित्यत्वे वा सति पृथिवीत्ववद्वृत्तित्वादित्यादिना प्रकारेण व्यभिचारोन्नयनसमर्थोऽपि पृथिवीत्वाभावादिर्नोपाधिः । न हि पृथिवीत्वात्मकतदभावाधिकरणं तादृशं कि-

---

तथैव पाठः।तद्धर्मावच्छिन्नमिति । तत्सम्बन्धेनेत्यपि बोध्यम् । तत्र साध्यसाधनयोः।यद्धर्मावच्छिन्नेत्यस्य फलमाह तेनेति।तत्र धूमसाध्यकवन्हौ तद्रूपेति।न च संयोगेन वन्हेः साधनत्वे द्रव्यत्वावच्छिन्नाभाववत्संयुक्तत्वस्याप्रसिद्धिरेव वक्तुमुचिता न तु वन्ह्यवृत्तित्वमिति वाच्यम्।समवायेन वन्हेः साधनत्वाद्यभिप्रायेणैव तदभिधानात् वन्हिमदीयसंयोगेनार्द्रेन्धनस्योपाधित्वे संयोगेन वन्हेः साधनतायामपि क्षत्यभावाच्चासामान्यपदस्य व्यावृत्तिमाह द्रव्यत्वेनेति । सत्तेत्यादि । तत्र दृष्टान्तार्थं सत्तायाः पक्षधर्मत्वार्थं द्रव्यत्वस्य पृथिवीवृत्तित्वांशसार्थकत्वार्थं जलत्वस्य निवेशः । सत्त्वादित्रितयविशेष्यकधीविशेष्यत्वं पृथिवीत्वादेरपीत्यतो मात्रपदम्। सत्तादित्रितयभिन्नाविषयकत्वं बुद्धेरप्रसिद्धमतो विशेष्यकेति । सत्तादित्रितयविशेष्यकधीविषयत्वं प्रकारतया घटादेरपि इति तत्र व्यभिचारस्य वारणार्थं विशेष्यत्व इति।अत्र च सत्तादित्रितयभिन्नाविशेष्यकधीविशेष्यत्वे तात्पर्य्यं न तु मात्रार्थघटकस्य सत्तादित्रितयविशेष्यकत्वस्यापि निवेशो व्यर्थत्वादिति ध्येयम् । सत्तादित्रितयमात्रविशेष्यकधियः सन्धिग्धत्वादाह जलेति । असमवेतान्तेन घटत्वादेर्नित्यपदेन च जलघटसंयोगादेर्निरासः । पृथिवीत्वाभावादिरित्यादिना गन्धाभावा-

श्चिदस्ति यदवृत्तित्वसामान्यं साध्यव्यभिचारव्याप्यम्, पृथिवीत्वादावेव व्यभिचारात् । न च व्यभिचारोन्नायकतामात्रेण प्रकृतोपाधितानिर्वाहः अपि तु कथकानां तान्त्रिकाणाञ्च तथाविधव्यवहारविषयत्वेन, तदवच्छेदकञ्च यथोक्तं रूपं व्याप्यत्वासिद्ध्युन्नायकत्वादिकं सम्भवदपि न तथा, गौरवात् । अत एवेदं जलमाकाशादित्यत्र स्वाव्याप्यत्वेन जलत्वाव्याप्यत्वोन्नायकस्यापि द्रव्यत्वादेरसंग्रहो न दोषाय । अथैवं स्वव्यभिचारेण व्यभिचारोन्नायकत्वमेव तथास्तु लाघवात् तच्चोक्तोपाधावप्यस्तीति

ग्रुपग्रहः। [अनुपाधिबीजमाह न हीति।पृथिवीत्वात्मकेति । तत् पृथित्वाभावादितथा च पृथिवीत्वाभिन्नो यः पृथिवीत्वाभावाभावस्तदधिकरणे तादृशयत्किञ्चिदस्तीत्यर्थः]। व्यापके साध्ये व्याप्यभावस्यैव विरहेऽनुपाधित्वस्य सिद्धान्तसिद्धत्वादिति ध्येयम् । ननु साध्यव्यभिचारोन्नायकत्वादुक्तस्थले पृथिवीत्वाभावादिर्भवत्येव उपाधिरत आह न चेति । प्रकृतेति । प्रकृतं जलकथोद्भाव्यं यदुपाधित्वं तस्य निर्वाह इत्यर्थः । तथाविधव्यवहारेति । शक्त्योपाधिव्यवहारेत्यर्थः । तदवच्छेदकं कथकादेरुपाधिव्यवहारविषयतावच्छेदकम्। यथोक्तम् । यद्धर्मावच्छिन्नाभावाधिकरणीभूत इत्याद्युक्तम् । नन्विदं जलमाकाशादित्यादौ द्रव्यत्वादावपि कथकादेरुपाधिव्यवहाराद्यथोक्तरूपस्य च तत्रासत्त्वात् यदव्याप्यत्वेन साधनस्य साध्याव्याप्यत्वमुन्नेयं तत्त्वमेवोपाधिपदशक्यतावच्छेदकं युक्तमत आह व्याप्यत्वासिद्धीति । न तथा न शक्त्योपाधिव्यवहारविषयतावच्छेदकम्। गौरवादिति । व्यभिचारमपेक्ष्य अव्यभिचरितसामानाधिकरण्याभावरूपाया व्याप्यत्वासिद्धेर्गुरुत्वादित्यर्थः। न दोषायेति।लक्षणथापि कथकादेस्तत्रोपाधिव्यवहारसम्भवादिति भावः । एवं गुरोः शक्यतानवच्छेदकत्वे । स्वव्यभिचारेणेति । साधन इत्यादिः तथा च कश्चिदेव यद्व्यभिचारः साध्यव्यभिचारव्याप्यः सन् साधनवृत्तिस्तस्वमर्थः । लाघवादिति। यत्किञ्चित्पदसामान्यपदयोरप्रवेशे लाघवा-

चेत्, एवं तर्हि साध्याभावसाधनोभयाधिकरणवृत्त्यभावप्रतियोगित्वमेव तथास्वातिलाघवात् अस्तु च सहार्थतृतीयाश्रयणेनास्यापि स एव फलितोऽर्थः । तद्रूपमात्रज्ञाने तेषां नोपाधिव्यवहार इति चेत्, तुल्यं त्वदुक्तेऽपि।अत एव शुद्धसाध्याव्यापकस्थले साध्ये व्याप्यतावच्छेदकं नियमतस्तादृशं धर्म्ममनुसरन्ति ते यद्वति साध्यव्यभिचारानियमो भवत्युपाधिव्यभिचारस्य।वस्तुतस्तु यदभावेन यद्वद्वदन्यत्वेन वा साधनवति साध्याभाव उन्नीयते स उपा-

---

दित्यर्थः । उक्तोपाधौ पृथिवीत्वाभावाद्युपाधौ । द्रव्यत्वनिष्ठाया एव तद्व्यभिचारव्यक्तेः साध्यव्यभिचारव्याप्यत्वादिति भावः । अतिलाघवादिति । साध्यव्यभिचारव्याप्यत्वाद्यप्रवेशेनातिलाघवादित्यर्थः । तच्च न पृथिवीत्वाभावाद्युपाधेरिति भावः । ननु साध्यव्यभिचारव्याप्यत्वाद्यघटितस्य लघोः सत्त्वे मूलक्षता कथन्तन्नोक्तमत आह अस्तु चेति।सहार्थेति । तथा च साधनगतयद्व्यभिचारेण सहितोऽवच्छेदकत्वसम्बन्धेन समानाधिकरणः साध्यव्यभिचारस्तत्त्वमित्यर्थः । अस्यापि यद्व्यभिचारित्वेनेत्यादिमूलस्यापि।स एव साध्यव्यभिचारव्याप्यत्वाद्यघटित एव। तेन साध्याभावसाधनोभयाधिकरणवृत्त्यभावप्रतियोगित्वस्य सहार्थतृतीयालभ्यत्वासम्भवेपि नासङ्गतिरिति ध्येयम।शङ्कते तद्रूपेति। सहार्थतृतीयादिलब्धरूपमात्रज्ञानेऽपीत्यर्थः।तेषां कथकादीनाम्।त्वदुक्तेपीति।यस्य कस्य चिद्व्यभिचारः साध्यव्यभिचारव्याप्यः सन् साधनवृत्तिस्तत्त्वज्ञानेपि कथकादीनामुपाधिव्यवहारविरहादित्यर्थः । रूपवान् द्रव्यत्वादित्यादौ पृथिवीत्वाभावादेरनुपाधित्वे कथकानां स्वरसमप्याह अत एवेति।कथं चित् साध्यव्यभिचारोन्नायकमात्रस्यानुपाधित्वादेवेत्यर्थः । ते कथकादयः यद्वतीति।यद्वृत्युपाधिव्यभिचारसामान्यस्य साध्यव्यभिचारनियम इत्यर्थः। रूपनिष्ठं च यत् पृथिवीत्वाभावादिव्याप्यतावच्छेदकं जलवैशिष्ट्यादिकं तद्वति पृथवीत्वाभावादिर्व्यभिचार एवा प्रासिद्ध इति भावः।ननु घटैकत्वभिन्नं गुणत्वादित्यादौ घटैकत्वभेदस्योपाधितापत्तिः तद-

धिर्लाघवात्। अत एव जलत्वतेजस्त्वयोर्न तदुभयत्वेन क्वचिदप्यु-

भावाधिकरणसमवेतत्वसामान्यस्यैव साध्यव्याप्यत्वादेवं गुणवान् विशिष्टसत्त्वात् इत्यादिसद्धेतौ सत्त्वादिरप्युपाधिः स्यात् गुणाद्यन्यत्वविशिष्टसत्तायाः अपि गुणत्वाभाववदवृत्तित्वेन तद्व्यभिचारित्वाद न आह वस्तुतस्त्विति। यदभावेनेति। अत्राप्युन्नयनं तद्योग्यता तेन यदभावः साध्याभावव्याप्यः सन् साधनवदवृत्तिस्तत्त्वमित्येव फलितम्। न च वन्हिमान्धूमादित्यादौ महानसत्त्वाद्यतिव्याप्तिस्तदभावस्यापि जलत्वावाशिष्टत्वादिना साध्याभावव्याप्यस्य साधनवत्पर्वतादिनिष्ठत्वात् यदभावत्वमात्रेण साध्याभावव्याप्यत्वोक्तौ च निर्वन्हित्ववान् द्रव्यत्वादित्यादौ निर्धूमत्वाद्युपाधावव्याप्तिर्धूमत्वापेक्षया गुरुत्वेन निर्धूमत्वाभावत्वस्य व्याप्यतानवच्छेदकत्वादेवं द्रव्यं सत्त्वादित्यादौ संयोगाद्युपाधावव्याप्तिस्तदभावत्वेन द्रव्यत्वाद्यभावत्वव्याप्तिविरहादिति वाच्यम्। प्रकृतसाधनवान् यद्धर्मावच्छिन्नाभावनिष्ठायाः साध्याभावव्याप्यतायाः अवच्छेदकधर्मावच्छिन्नवांस्तद्धर्मवांस्तत्रोपाधिरित्यत्र तात्पर्यात्। संयोगाद्यभावे च द्रव्यत्वाद्यभावव्याप्यतावच्छेदकं यद्गुणत्वादिवैशिष्ट्यं तदवच्छिन्नसत्तायाः साधनवति गुणादौ सत्त्वादेर्वं द्रव्यं सत्त्वादित्यादौ संयोगाद्युपाधेः संग्रहात्। साध्याभावश्च प्रतियोगिव्यधिकरणो ग्राह्यः साध्येनाभाव इति व्युत्पत्त्या साध्यवत्त्वावच्छिन्नभेद एव वा निवेश्यः साध्याभावो वा साध्यविरोध्यभावः, तेन संयोगी द्रव्यत्वादित्यादौ नाविभागादावतिव्याप्तिः। ननु सत्तावान् मेयत्वादित्यादौ जलत्वतेजस्त्वयोरुभयत्वेनोपाधितापत्तिः तादृशाभयत्वावच्छिन्नाभावनिष्ठायाः सत्ताभावव्याप्यतायाः यदवच्छेदकं जातिवृत्तित्वादिवैशिष्ट्यं साधनवतः सामान्यादेस्तदवच्छिन्नवत्त्वादत आह यद्वदन्यत्वेन वेति। अत्रापि साधनवान् यद्धर्मावच्छिन्नवदन्यत्वनिष्ठायाः साध्याभावव्याप्यतायाः अवच्छेदकीभूतद्धर्मावच्छिन्नवांस्तद्धर्मवत्त्वमर्थः तेन वान्हिमान्धूमादित्यादौ महानसत्त्ववदन्यत्वादेरपि जलत्वादिविशिष्टत्वेन साध्याभावव्याप्यत्वेऽपि न महानसत्त्वादावतिव्याप्तिः यद्धर्मवत्त्वेन साध्याभावव्याप्यत्वमित्युक्तौ निर्वन्हिर्द्रव्यत्वादित्यादौ धूमवदन्यत्वाद्युपाधावव्याप्ति-

पाधित्वम् । यद्व्यभिचारित्वेनैवास्यापि स एवार्थः । तथा हि, यद्व्यभिचारित्वेन हेतुमद्वृत्तित्वाविधया साधनस्य पक्षतावच्छेदकीभूतस्य साध्याभावरूपसाध्यवत्पक्षवृत्तित्वं सिद्ध्यतीति । अत्र च साध्यसमानाधिकरणत्वेनावच्छिन्नो धर्मी साध्यासमानाधिकरणार्द्रेन्धना-

---

प्रसङ्गात् धूमत्वाद्यपेक्षया गुरुत्वेन धूमवद्भिन्नभेदत्वादेः व्याप्यतानवच्छेदकत्वादिति ध्येयम् । लाघवादिति । साध्योपाध्योरभावयोरधिकरणत्वाप्रवेशे लाघवादित्यर्थः । अत एवेति । यद्व्यभिचारित्वेन इत्यादेरुक्तत्वादेवेत्यर्थः । न च धूमवान् महानसत्वादित्यादौ जलत्वविशिष्टजातित्वादिप्रकारेण द्रव्यत्वादेरुपाधित्ववारणाय उपाधितावच्छेदकधर्मस्य साध्याधिकरणवृत्तित्वाधिकरणताकत्वपर्य्यवसितेन साध्यसमानाधिकरणवृत्तित्वेनाग्रे विशेषणीयत्वात्, अत एव जलत्वतेजस्त्वोभयत्वप्रकारेण तदुभयोर्नेउपाधित्वमिति वाच्यम् । वक्ष्यमाणस्य साध्यसमानाधिकरणवृत्तित्वस्य साध्याधिकरणयत्किञ्चिन्निष्ठभेदप्रतियोगितावच्छेदकतानवच्छेदकत्व एव तात्पर्यात्तस्य च धूमादेः साध्यताश्रये जलत्वविशिष्टजातित्वादावसत्त्वाज्जलत्वतेजस्त्वोभयत्वादावनपायाच्चेति भावः । केचित्तु वक्ष्यमाणस्य साध्यसमानाधिकरणवृत्तित्वस्य साध्यवन्निष्ठत्वावच्छिन्नवत्ताकत्वपर्य्यवसानेपि न क्षतिः । साध्यसाधनभेदेनैवोपाधिताघटकसम्बन्धभेदेनाप्युपाधिलक्षणस्य विभिन्नत्वाज्जात्यादिसाध्यकप्रमेयत्वादिहेतुकस्थले समवायसम्बन्धेन उपाधिलक्षणस्य समवायसम्बन्धावच्छिन्नवदन्यत्वेन साधनवति साध्याभाव उन्नीयते इत्येतावन्मात्रस्यैव सम्यक्त्वेन तत्रोक्तविशेषणस्याप्रवेशेन लाघवात् समवेतमात्रस्यैव तत्रोपाधित्वेन तद्विशेषणधारणीयस्यासत्त्वात् । अत एव क्वचिदपीत्यभिधाय यत्र न तादृशविशेषणं तादृशस्थलविशेषो ग्रन्थकृतैवानिराकृत्यैव वाविष्कृत इति प्राहुः । तथाहीत्यादि । साधनवान् साध्याभाववान् उपाध्यभावादित्यत्र हेतुभूतो य उपाध्यभावस्तद्वत्पक्षवृत्तित्वविधयोपाधिव्यभिचारित्वेन साध्ये पक्षतावच्छेदकीभूतस्य साधनस्य साध्याभावरूपं यत्साध्यं तद्वत्पक्षवृत्तित्वं साध्यव्याभिचाररूपं सिद्ध्यतीत्यर्थः । लिङ्गोपहित-

दिव्यक्तेरार्द्रेन्धनत्वादिनोपाधित्वे पुनरवच्छेदकधर्म्म एव साध्यसमानाधिकरणवृत्तित्वेन विशेषणीयः । तेन जलह्रदत्वाभावाधिकरणायोगोलकवृत्तित्वस्य धूमव्यभिचारव्याप्यस्य वह्निवृत्तित्वेऽपि जलह्रदत्वादौ नातिप्रसङ्गः, न वा द्रव्यत्वेन तेजस्त्वसाधने शीतस्पर्शजलत्वाद्यात्मकस्वाभावेन तद्वदवृत्तित्वेन वा द्रव्ये द्रव्यत्वे वा साध्याभावस्य व्यभिचारस्य वा साधके स्पर्शाभावजात्यभावादौ। द्रव्यत्वादिना तु कम्बुग्रीवादिमत्त्वादौ साध्ये स्वव्यभिचारेण

भानमतेनेदम् । अत्र चेतिपदेषु लक्षणेष्वित्यर्थः । अवच्छिन्नो धर्मीति। यद्धर्मवत्त्वमुपाधिलक्षणं तद्धर्मावच्छिन्नसाध्यसमानाधिकरणत्वेन विशेषणीय इत्यर्थः।साध्यासमानाधिकरणस्येति।धूमवान् वन्हेरित्यादौ धूमाद्यसमानाधिकरणस्येत्यर्थः । अवच्छेदकधर्म एवेति । यद्धर्मवत्त्वमुपाधित्वं तद्धर्म एवेत्यर्थः । साध्यसमानाधिकरणवृत्तित्वं साध्याधिकरणयत्किञ्चिन्निष्ठभेदप्रतियोगितावच्छेदकतानवच्छेदकत्वं तेन जलत्वविशिष्टसत्तात्वस्य धूमादिसमानाधिकरणवृत्तित्वेऽपि धूमादेः साध्यताक्षतेन तादृप्येण सत्तादेरुपाधित्वम्। वन्हिव्यभिचारित्वेऽपीति प्रथमव्याख्यानुसारेण । द्वितीयव्याख्यायां मेघायोगोलकवृत्तित्वाविशिष्टत्वेन धूमाभावव्याप्यस्य जलह्रदत्वाद्यभावस्य वन्हिमदयोगोलकवृत्तित्वेऽपीति द्रष्टव्यम् । शुद्धेन विशिष्टेन वा यदभावत्वं तदभावमात्रवृत्तित्वेन साध्यव्यभिचारव्याप्यधर्मेण वा साध्याभावव्याप्यत्वं स उपाधिरित्यभिधानेप्यतिव्याप्तिमाह न वेति । स्वाभावेनेति । द्रव्ये साध्याभावस्य साधक इति योजना। तद्वदवृत्तित्वेन वेति । शीतस्पर्शाद्यात्मकस्वाभाववदवृत्तित्वेन वेत्यर्थः । द्रव्यत्वे साध्यव्यभिचारस्य साधक इति योजना । स्पर्शाभावस्य वन्ह्यादितेजसि उत्पत्तिकालावच्छेदेन साध्यसमानाधिकरणतया उपाधित्वादाह जात्यभावादाविति। नातिप्रसङ्ग इति पूर्वेणान्वयः। कम्बुग्रीवादिमान् द्रव्यत्वादित्यादौ घटत्वादिकमेवोपाधिर्न तु तद्गर्भं घटत्वादिव्यभिचारित्वं तद्व्यभिचारेण साध्यव्यभिचाराद्यनुमाने व्यर्थविशेषणत्वादिति

ध्यव्यापकत्वे सति साधनाव्यापकत्वम्। यद्धर्मावच्छेदेन साध्यं प्रसिद्धं तदवच्छिन्नं पर्य्यवसितं साध्यम्। स च धर्मः क्व चित् साधनमेव क्व चिद्द्रव्यत्वादि क्व चिन्महानसत्त्वादि । तथा हि, समव्याप्तस्य विषमव्याप्तस्य

स्वाभावेन वा हेतौ तद्वति वा व्यभिचारस्य साध्याभावस्य वा साधकं घटत्वादिव्यभिचारित्वमुपाधिरेव । घटत्वादेस्तदभावस्य वा गमकत्वेऽपि धूमप्रागभाववदवैयर्थ्यम् । न चाभावस्यानुपाधितापत्तिः प्रतियोगिनस्तद्वद्वृत्तित्वस्यैव वा हेतुत्वादिति वाच्यम् । तस्याप्रवेशेऽपि वस्तुतो यस्तदभावस्तस्य तद्वद्वृत्तित्वस्य च हेतुत्वानपायात् । तदभावाभाववद्वृत्तित्वेनोपस्थितावपि तद्वद्वृत्तित्वेनानुपस्थितेर्व्यभिचारसाधने न वैयर्थ्यमित्यपि वदन्ति । लक्षणमाह पर्य्यवसितेत्यादि । पर्य्यवसितपदार्थमाह यद्धर्मेति । यद्ध-

---

कैश्चिदुक्तं तन्निरस्यति । द्रव्यत्वेनेति । घटत्वादेरिति । साध्यव्यभिचारित्वे साध्ये घटत्वादेः साध्याभावे च साध्ये घटत्वाद्यभावस्य गमकत्वसम्भवेपीत्यर्थः। न चेति। वाच्यमित्यत्रान्वयः। प्रतियोगिन इति।साध्याभावे साध्य इत्यादिः।साध्यव्यभिचारस्य साध्यतायान्त्वाह तद्वद्वृत्तित्वस्यैव वेति । प्रतियोगिमद्वृत्तित्वस्यैव वेत्यर्थः। अयोगोलकत्वाभावाभावत्वे तादृशाभाववद्वृत्तित्वापेक्षया लाघवेनायोगोलकत्वत्वायोगोलकवृत्तित्वत्वादिनैव धूमाभावधूमव्यभिचारादिव्याप्यतावच्छेदादिति भावः । तस्य अयोगोलकत्वाभावाद्युपाधेः । तदभावस्तदीयोऽभावोऽयोगोलकत्वादिरूपः। उक्ताशङ्कायां केषां चित् समाधानमुपन्यस्यति तदभावेति। अयोगोलकत्वाद्यभावाभाववद्वृत्तित्वत्वेनोपस्थितावपीत्यर्थः । तदभावाभावत्वेनोपस्थितौ तत्त्वे-

र्म्मवतीत्यर्थः। नन्वेवं सद्धेतौ सपक्षैकदेशवृत्तित्वभङ्गप्रसङ्गः। अथ यद्धर्म्मावच्छेदेन साधनवति साध्यं प्रसिद्धं तद्धर्म्मावच्छिन्नसाध्यव्यापकत्वं साध्यसाधनसम्बन्धव्यापकत्वमिति यावत्। विरुद्धमात्रे चोपाधिविरहेऽपि न क्षतिः। लक्ष्यतावच्छेदके च साध्य-

---

नोपस्थितिरावश्यकीति स्वाभावेन साध्याभावसाधने वैयर्थ्यस्य दुर्वारत्वादाह व्यभिचारसाधन इति। महाकालान्यो घटादित्यादौ कालिकसम्बन्धेन हेतौ ततसम्बन्धावच्छिन्नवृत्तित्वमात्रस्यैव साध्यव्यभिचारव्याप्यतया तत्रोपाधेस्तदभावस्य वा प्रवेशाविरहादुक्तं समाधानं न सम्यगित्यस्वरसो वदन्तीत्युक्ता सूचितः। मूलस्थलक्षणपदस्य दूषणौपयिकधर्मपरतया मिथ्यैर्व्याख्यानमफलमित्यावेदयितुमाह लक्षणमाहेति। यद्धर्मावच्छेदेन साध्यं प्रसिद्धं तदवच्छिन्नस्य पर्य्यवसितसाध्यपदार्थत्वे मित्रातनयत्वाद्यवच्छिन्नमात्रं प्रति शाकपाकजत्वादेरव्यापकत्वादव्याप्तिरत आह पर्य्यवसितपदार्थमिति। तथा च मित्रातनयत्वाद्यवच्छिन्नं प्रत्यव्यापकत्वेऽपि तदवच्छिन्नश्यामत्वादिकं प्रति व्यापकत्वान्न तत्राव्याप्तिरिति भावः। स श्यामो मित्रातनयत्वादित्यादौ साध्यस्य साधनाद्यवच्छेद्यत्वं न स्वरूपसम्बन्धविशेषः प्रमाणाभावात् नाप्यन्यूनवृत्तित्वादि बाधदतो व्याचष्टे यद्धर्मवतीति। एवं यद्धर्मविशिष्टतामात्रस्य प्रवेशे। सपक्षेति। वन्हिमान् धूमादित्यादौ व्यञ्जनवत्त्वाद्युपाधावतिव्याप्तिरित्यर्थः, तस्यापि महानसत्वाद्यवच्छिन्नसाध्यव्यापकत्वादिति भावः। प्रगल्भमतमाशङ्कते अथेति। यद्धर्मावच्छेदेनेति। अत्रावच्छेदकत्वमन्यूनवृत्तित्वं तथा च साधनविशिष्टसाध्यव्यापको यो धर्मस्तदवच्छिन्नसाध्यव्यापकत्वमर्थः। मित्रातनयत्वादेः शुद्धसाध्यव्यापकत्वात् साधनस्य प्रवेशः। सद्धेतुस्थले तु महानसत्वादिकं न धूमादिविशिष्टवन्ह्यादिव्यापकमतो न तत्र व्यञ्जनवत्त्वादावतिप्रसङ्ग इति भावः। साधनविशिष्टसाध्यव्यापकीभूतधर्मावच्छिन्नसाध्यव्यापकत्वापेक्षया लाघवादाह साध्यसाधनसम्बन्धेति। सम्बन्धः सामानाधिकरण्यं तस्य च व्याप्यत्वं निरूपकतासंसर्गेण

समानाधिकरणत्वेन साधनं तादृशवृत्तित्वेन वा साधनतावच्छेदकं विशेषणीयम् साधनव्यापकीभूतधर्म्मावच्छिन्नसाध्यव्यापकत्वं वा विवक्षितम् । विरुद्धेऽपि साधनव्यापकेनान्ततोऽन्यतरत्वादिनावच्छिन्नस्य साध्यस्य व्यापकत्वमस्त्येवोपाधीनाम् । प्रमेयत्वादिना च वाय्वादौ प्रत्यक्षत्वे साध्ये उद्भूतरूपवत्त्वादिकं नोपाधिः, लक्ष्यतावच्छेदकवाक्यस्य प्रयोजकत्ववाचितृतीयाबलाद्यद्व्यभिचारस्थले साधनस्य साध्यव्यभिचारित्वनियम इत्यर्थे पर्य्यवसानात् । मैवम् । जनकत्वेन वन्हौ कार्य्यानुकूलेच्छात्मकशक्तिसाधने व-

---

बोध्यम् । साध्यसाधनयोः सम्बन्धाप्रसिद्ध्या विरुद्धस्थलीयोपाधावव्याप्तिमलक्ष्यतया निराकुरुते विरुद्धेति । न क्षतिः नाव्याप्तिः । गोत्ववानश्वत्वादित्यादौ सास्नावत्त्वादौ प्रागुक्तलक्ष्यतावच्छेदकधर्मस्यातिव्याप्तिरत आह लक्ष्यतेति । साध्यसमानाधिकरणत्वेनेति । नन्वेवं घटत्ववान् रूपादित्यादौ पृथिवीत्वाद्युपाधौ निरुक्तलक्षतावच्छेदकस्याव्याप्तिर्घटत्वाधिकरणवृत्तिरूपादौ पृथिवीत्वाद्युपाधिव्यभिचारविरहादत आह तादृशेति । साध्यसमानाधिकरणवृत्तित्वेनेत्यर्थः । न चैवमपि घटत्ववान् जलत्वविशिष्टद्रव्यत्वादित्यादौ पृथिवीत्वादावतिप्रसङ्गः स्वावच्छिन्नवदवृत्तिसाध्यवत्ताकत्वेन साधनतावच्छेदकस्य विशेषणीयत्वादिति भावः । विरुद्धस्थलीयोपाधेर्लक्ष्यत्वमाहत्याप्याह साधनव्यापकीभूतेति । यद्धर्मावच्छेदेन साध्यं प्रसिद्धमित्यत्र व्युत्पत्त्या मूले केवलसाध्यपदेन साधनस्य लाभादिति भावः । गोत्ववानश्वत्वादित्यादौ तत्सास्नाव्यक्तेरुपाधित्वमुपपादयितुमाह अन्तत इति । अन्यतरत्वादिनेति । अश्वतदूगवान्यतरत्वादिनेत्यर्थः । नन्वेवं वायुः प्रत्यक्षः प्रमेयत्वादित्यादौ उद्भूतरूपादावव्याप्तिः आत्मादौ तस्य निरुक्तसाध्यव्यापकत्वादत आह प्रमेयत्वादिनेति । ननूक्ते हेतावुद्भूतरूपस्यालक्ष्यत्वे तत्र प्रागुक्तलक्ष्यतावच्छेदकस्यातिव्याप्तिरत आह लक्ष्यतेति । यद्व्यभिचारस्थल इति । साधननिष्ठो यद्व्यभिचारो अव-

हिरिन्द्रियाप्रत्यक्षत्वस्योपाधेर्ग्रन्थकृतैवोद्भावयिष्यमाणत्वात् तस्य च गुरुत्वात्मकसाध्यस्य साधनस्य चाधिकरणे घटादाववृत्तेरुक्तरूपाभावात्, एवंविधबहुलग्रन्थविरोधात् दूषकताबीजस्य तत्रापि सम्भवाच्च । अत्राहुः । यद्धर्म्मावच्छिन्नसाध्यव्यापकत्वं तद्धर्म्मावच्छिन्नसाधनाव्यापकत्वम् अवच्छेदकत्वञ्च सामानाधिकरण्येन ।

च्छेदकत्वेन निरूपकत्वेन वा सम्बन्धेन साध्यव्यभिचारव्याप्य इत्यर्थः । तथा चात्मादौ प्रमेयत्वस्य रूपव्यभिचारसत्त्वेऽपि प्रत्यक्षत्वे व्यभिचारासत्त्वात् न तत्रातिप्रसङ्ग इति भावः । जनकत्वेनेति । वह्निः कार्यानुकूलाद्विष्ठातीन्द्रियधर्मसमवायी जनकत्वादित्यत्रेत्यर्थः । तस्य बहिरिन्द्रियाप्रत्यक्षत्वोपाधेः । गुरुत्वाद्यात्मकेति । गुरुत्वादेः पतनादिकार्यानुकूलातीन्द्रियधर्मत्वेन साध्यतावच्छेदकाक्रान्तत्वादिति भावः । उक्तरूपेति । साधनव्यापकीभूतधर्मावच्छिन्नसाध्यव्यापकत्वाभावादित्यर्थः । गुरुभिन्नत्वावच्छिन्नसाध्यव्यापकत्वेनैवास्माकं तस्य लक्ष्यत्वात् स्थितिस्थापके प्रमाणाभावात् भावे वा पृथिवीमात्रवृत्तित्वोपगमादिति भावः । ननु तत्र जनकत्वपदस्य दाहजनकत्वरूपविशेषजनतापरत्वात् घटादौ तादृशसाधनधरत्वाभावान्नोक्तदोष इत्यत आह एवंविधेति । जलपरमाणुर्जन्यरूपवान् रूपवत्त्वादित्यत्र परमाणुत्वावच्छिन्नसाध्यव्यापकं पृथिवीत्वमुपाधिः इति रूपग्रन्थे गुणप्रकाशकृतोक्तं तस्य साधनव्यापकधर्मावच्छिन्नसाध्यव्यापकत्वेन तद्ग्रन्थविरोधादित्यर्थः । ननु वायुः प्रत्यक्षः प्रमेयत्वादित्यत्रोद्भूतरूपमिवोक्तस्थलेऽपि सास्नोपाधिरत आह दूषकतेति । तत्रापीति । उद्भूतरूपवत्त्वादावपीत्यर्थः । तथा च तदनुपाधित्वस्वीकारो निर्युक्तिक इति भावः । यद्धर्मेति । जनकत्वेन कार्यानुकूलाद्विष्ठातीन्द्रियधर्मावच्छिन्नभाने चात्मवन्ह्यन्यतरत्वावच्छिन्नसाध्यव्यापकस्यैव बहिरिन्द्रियाप्रत्यक्षत्वस्य तादृशान्यतरत्वावच्छिन्नसाधनाव्यापकत्वान्न तत्राव्याप्तिरिति भावः । ननु रूपवान् पृथिवीत्वादित्यत्र तद्घटोत्पत्तिकालावच्छिन्नसाध्यव्यापकस्य तद्घटान्यत्वस्य तादृशकालावच्छिन्नसाधनाव्यापकत्वात्तत्रातिव्याप्तिः । न

न च तद्घटोत्पत्तिकालीनत्वसामानाधिकरण्यविशिष्टरूपवति तद्घटेऽवर्त्तमानमपि तद्घटान्यत्वं तद्व्यापकं येन पृथिवीत्वेन रूपे साध्ये तद्घटोत्पत्तिकालावच्छिन्नरूपव्यापकतयोपाधिः स्यात् स्वानाधिकरणीभूतसाधनाधिकरणवृत्तिधर्म्मावच्छिन्नसाध्यव्यापकत्वं वा । यद्यपि शुद्धसाध्यव्यापकस्थलेऽवच्छिन्नसाध्यत्वेन न व्याप्यता, तथापि तद्धर्म्माधिकरणीभूतसाध्याधिकरणनिष्ठान्योऽन्याभावप्र-

---

च घटोत्पत्तिकालावच्छिन्नपृथिवीत्वाप्रसिद्ध्या नातिव्याप्तिप्रसङ्गः, पृथिवीत्वपदस्य तत्प्रकारकस्मृतिविशेषविशेष्यत्वपरत्वादत आह अवच्छेदकत्वं चेति । तथा च सामानाधिकरण्यसम्बन्धेन यद्विशिष्टसाध्यव्यापकं तादृशसम्बन्धेन तद्विशिष्टसाधनाव्यापकत्वं फलितार्थः । स चोक्तस्थले तद्घटान्यत्वे नास्तीत्याह न चेति । तद्व्यापकं तद्घटोत्पत्तिकालीनत्वसमानाधिकरणरूपस्य व्यापकमित्यर्थः । यत्त्वतत्त्वयोरननुगतत्वादेकस्यैवोपाधेर्धर्मभेदेन लक्षणनानात्वापत्तेरत आह स्वेति । स्वावच्छिन्नानधिकरणीभूतसाधनाधिकरणवृत्तिधर्मावच्छिन्नसाध्यव्यापकतावच्छेदकधर्मवत्त्वमर्थः । तेन द्रव्यं जातिमत्त्वादित्यादौ गुणान्यत्वविशिष्टसत्त्वादित्यादौ नाव्याप्तिः । वन्हिमान्धूमादित्यादौ व्यञ्जनवत्त्वादेरपि साधनाधिकरणवृत्तिमहानसत्त्वावच्छिन्नसाध्यव्यापकत्वादतिव्याप्तिरत उद्भूतान्तं साधनाधिकरणस्य विशेषणम् । स्वानधिकरणवृत्तिजलमहानसान्यतरत्वादिधर्मेणावच्छिन्नसाध्यव्यापकत्वं व्यञ्जनवत्त्वादावस्त्येवेति सामानाधिकरण्यस्य निवेशः । तद्धर्मेति । यद्धर्मावच्छिन्नसाध्यव्यापकत्वं निर्वाच्यं तद्धर्माधिकरणीभूतेत्यर्थः । अनवच्छेदकत्वादित्यादिना यद्रूपावाशिष्टत्वावाच्छिन्नभेदस्य प्रतियोगितावच्छेदकत्वं निरुक्तसाध्यवन्निष्ठान्योन्याभावप्रतियोगितावच्छेदकत्वाद्भिन्नं तद्रूपवत्त्वस्योपग्रहः । तेन नानाव्यक्तिगुणाद्युपाधेश्चालनीन्यायेन साध्यवन्निष्ठान्योन्याभावप्रतियोगितावच्छेदकत्वेऽपि न तस्यासंग्रहः । न वा महाकालः प्रमेयत्वादित्यादौ महाकालनिरूपितविशेषणतया घटाद्युपाधौ तादृशसम्बन्धावच्छि-

तियोगितानवच्छेदकत्वादिरूपतद्व्यापकत्वमक्षतमेव । गुणत्वादिना प्रत्यक्षत्वे साध्ये उद्भूतरूपवत्त्वं द्व्यणुकजन्यत्वाद्यवच्छिन्नसाध्यव्यापकं भवत्येवोपाधिः । एवञ्च यत्रैव स्वानधिकरणे साधनस्य साध्यव्यभिचारो यत्र च स्वाधिकरणे साध्यं तदुभयमात्रवृत्तिर्यो

स्यायाः साध्यवन्निष्ठान्योन्याभावप्रतियोगितायाः अवच्छेदकत्वाप्रसिद्ध्यावप्यव्याप्तिः । ननु प्रगल्भमते प्रत्यक्षो गुणत्वादित्यादावुद्भूतरूपवत्त्वस्य साधनव्यापकीभूतधर्मावच्छिन्नसाध्यव्यापकत्वविरहान्नोपाधित्वं तदुक्तनिरुक्तिद्वयस्य तदूद्व्यणुकजन्यत्वाद्यवच्छिन्नसाध्यव्यापकतामादाय तत्राप्तिव्याप्तिरत आह गुणत्वादिनेति । द्व्यणुकजन्यत्वादीत्यादिना द्रव्यत्वान्यतरत्वाद्युपग्रहः । भवत्येवेति । प्रमेयत्वेनेव गुणत्वेनापि प्रत्यक्षत्वे साध्ये तस्य व्यभिचाराद्युन्नायकत्वसम्भवादिति भावः । सर्वत्रैवावच्छिन्नसाध्यव्यापकस्थलेऽनुगतोक्त्या व्यभिचारानुमापकं हेतुमाह एवं चेति । यत्र स्वाधिकरणे साधनं तन्मात्रवृत्तिधर्मवत्युपाधिव्यभिचारस्याप्रसिद्धेरत उक्तं यत्र स्वानधिकरणे साधनस्य साध्यव्यभिचार इति। स्वपदमुपाधिपरम्। वायुः प्रत्यक्षो द्रव्यत्वादित्यादौ यत्र स्वाधिकरणे साध्यं यत्र च साधनस्य साध्यव्यभिचारस्तदुभयमात्रवृत्तिधर्मः पार्थिवाणुघटान्यतरत्वादिरपीति तदवृत्तिरूपवत्त्वोपाधेर्व्यभिचाराप्रसिद्धेः स्वानधिकरण इत्युक्तम् । यत्र स्वानधिकरणे सत्त्वादेः प्रकृतसाध्यव्यभिचारो यत्र च स्वाधिकरणे साध्यं तदुभयमात्रवृत्तिधर्मो गुणघटान्यतरत्वादिरपीति तद्वति रूपवत्त्वोपाधिव्यभिचारस्य साधनीभूतद्रव्यत्वे स्वरूपासिद्धत्वात् साधनीभूतस्येत्युक्तम् । यत्र स्वानधिकरणे साधनं यत्र च स्वाधिकरणे साध्यं तदुभयमात्रवृत्तिर्जीवघटान्यतरत्वोपाधिरपीति तदवृत्तिरूपवत्त्वोपाधिव्यभिचारस्य साध्यव्यभिचारव्याप्यत्वाभावात् साध्यव्यभिचार इत्युक्तम्। यत्र स्वानधिकरणे साधनस्य साध्यव्यभिचारस्तन्मात्रवृत्तिर्वायुत्वादिरपीति तद्वति रूपवत्त्वोपाधिव्यभिचारस्य न साध्यव्यभिचारानुमापकत्वं वायुत्ववति वृत्तिमत्त्वादित्यस्यैव सम्यक्त्वे रूपव्यभिचारित्वघटकस्य रूपाभाववद्-

धर्म्मस्तद्वति तद्व्यभिचारेण साधने साध्यव्यभिचारः साधनवति वा तद्धर्म्मवत्त्वे सति तदभाववत्त्वेन साध्याभावः साधनीयः। साध्यासमानाधिकरणस्य साध्यव्यापकाभावस्य वाधिकरणं य-

---

शस्य व्यर्थत्वादत उक्तं यत्र च स्वाधिकरणे साध्यमितियत्र च स्वानधिकरणे साधनस्य साध्यव्यभिचारो यत्र च साध्यं तदुभयमात्रवृत्तिर्गगनजीवान्यतरत्वादिरपीति तद्वति रूपवत्त्वोपाधिव्यभिचारस्य साध्यव्यभिचाराव्याप्यत्वात् स्वाधिकरण इत्युक्तम्। यत्र स्वानधिकरणे साधनस्य साध्यव्यभिचारो यच्च स्वाधिकरणं तदुभयमात्रवृत्तिर्गगनप्राणान्यतरत्वादिरपीति तद्वति रूपवत्त्वव्यभिचारो न प्रत्यक्षत्वव्यभिचारस्यानुमापकस्तादृशान्यतरत्ववति वृत्तिमत्त्वस्यैव सम्यक्त्वे रूपाभाववद्देशस्य वैयर्थ्यादत उक्तं साध्यमितितदुभयवृत्तित्वं प्रमेयत्वादेरपीति तद्वति रूपव्यभिचारित्वं न प्रत्यक्षत्वव्यभिचारव्याप्यमतो मात्रपदम्। तथा च तादृशो धर्मः प्रकृते वायुघटान्यतरत्वादिरेव द्रष्टव्य इति भावः। व्यभिचारेणेति। अवच्छिन्नसाध्यव्यापकीभूतोपाधिव्यभिचारेणेत्यर्थः। तदभाववत्त्वेन निरुक्तोपाध्यभाववत्त्वेनाननु स्वत्वस्याननुगतत्वात् स्वानधिकरणीभूतसाधनाधिकरणवृत्तिधर्मावच्छिन्नसाध्यव्यापकत्वं नैकविधसाध्यसाधनसकलोपाधिसाधारणमतो लक्षणान्तरमाह साध्यासमानाधिकरणस्येतिअधिकरणं यत् साधनवदित्यग्रेऽन्वयः। तदुपादानं च वन्हिमान्धूमादित्यादिसद्धेतौ घटत्वादिना घटत्वादेरुपाधित्ववारणार्थमान च साध्यासमानाधिकरणत्ववत्त्वमपेक्ष्य लघुना साध्यवदन्यत्वेनैव साधनवद्विशिष्यतां तावतैव सद्धेतावुपाधिसम्भवादिति वाच्यम्। उपाधिशरीरग्रह एव व्यभिचारभाने पश्चादुपाधिना व्यभिचारानुमित्यनापत्तेः अन्योन्याभावस्य अव्याप्यवृत्तित्वमते कपिसंयोगी एतद्वृक्षत्वादित्यादिसद्धेतौ घटादेरुपाधित्वस्य दुर्वारत्वापत्तेश्चेति भावः। उपाधित्वज्ञानोत्तरमेव साधनवद्धर्मिकसाध्याभाववत्त्वपर्य्यवसितसाध्यव्यभिचारज्ञानस्य सम्पत्त्यर्थं गुर्वपि विशेषणान्तरं निवेशयन्नाह साध्यव्यापकाभावस्य वेति। प्रकृतसाध्य-

त्साधनवत्तन्निष्ठप्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिव्यधिकरणात्यन्ताभावप्रतियोगितावच्छेदकसाध्यसमानाधिकरणवृत्तिधर्म्मवत्त्वमुपाधित्वम् । एवञ्च साध्यसमानाधिकरणत्वेनैव साध्यवदवृत्तिवारणसम्भवे पर्य्यवसितसाध्यव्यापकत्वाभिधानन्तु व्यापकाभावेन व्याप्याभावस्यावश्यम्भावप्रदर्शनार्थम् । तत्साध्यकत-

---

व्यापकतावच्छेदकावच्छिन्नाभावस्यैवेत्यर्थः । धूमवान् वह्नेरित्यादौ निरुक्तसाधनवन्निष्ठस्याभावस्य प्रतियोगितावच्छेदकत्वं वन्हिसंयोगत्वादेरपीति तादृप्येण वन्हिसंयोगादेस्तत्रोपाधित्वापत्तिरत उक्तं प्रतियोगिव्यधिकरणेति । द्रव्यं जातिमत्त्वादित्यादौ विशिष्टसत्तात्वेन सत्त्वस्योपाधित्वसम्पत्तये प्रतियोगितावच्छेदकावच्छिन्नेति । न च निरुक्तसाधनवन्निष्ठप्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिव्यधिकरणाभावप्रतियोगितावच्छेदकत्वं यदि स्वावच्छिन्नाधिकरणीभूतनिरुक्तसाधनवन्निष्ठाभावप्रतियोगितावच्छेदकत्वं तदा तस्य स्वत्वगर्भत्वान्न सकलोपाधिसाधारण्यमिति वाच्यम् । निरुक्तसाधनवद्यत्किञ्चिद्वृत्त्यधिकरणतानिरूपकतावच्छेदकत्वस्य तन्निष्ठप्रतियोगितावच्छेदकावच्छिन्नव्यधिकरणाभावप्रतियोगितावच्छेदकत्वेन विवक्षणादिति भावः।सोपाधिस्थल एव साध्यविरुद्धस्य जलत्वादेर्जलत्वत्वादिनोपाधित्ववारणाय साध्यसमानाधिकरणवृत्तीति। साध्यवन्निष्ठाधिकरणतानिरूपकतावच्छेदकार्थकम् तेन धूमवान् वह्नेरित्यादौ जलत्वविशिष्टसत्तात्वादिना सत्तादेरुपाधित्वव्युदासः । साध्यवन्निष्ठस्वावच्छिन्नाधिकरणताकन्तु न तदर्थः, स्वत्वानुगमतादवस्थ्यापातादिति ध्येयम् ।ननु मूलोक्तसाधनाव्यापकत्वदलस्यैव निरुक्तार्थकत्वे तत्रत्यपर्यवसितसाध्यव्यापकत्वदलं व्यर्थमत आह पर्यवसितेत्यादि । व्यापकाभाव इत्यस्य साधनवतीत्यादिस्तेन सत्प्रतिपक्षोद्धायकत्वमभिप्रेत्य निरुक्तसाधनाव्यापकत्वदलस्य वैयर्थ्यं कैश्चिदुक्तं प्रत्युक्तम्।पूर्वलक्षणत्यागबीजं स्वयमेवाह तत्साध्यकेति। तादृशसाध्यसाधनकैकसम्बन्धावच्छिन्नसकलोपाध्यनुगतमित्यर्थः ।

त्साधनकसकलोपाधिसाधारणञ्चेदं साध्यव्यापकत्वसाधनाव्यापकत्वावच्छेदकरूपानतिरिक्तवृत्तिसाध्यसमानाधिकरणयत्किञ्चिद्धर्म्मव्यापकतावच्छेदकरूपवत्त्वमुपाधित्वम् । अवच्छिन्नसाध्यव्यापकोपाधौ चान्ततः साध्योपाधिशून्या साधनवती या व्यक्तिस्तदवृत्तित्वमेव तादृशं रूपमित्यपि वदन्ति । रूपादिसाध्यक-

---

उक्तनिरुक्तौ साध्यव्यापकत्वाद्यप्रवेशेन मूलोदक्षरत्वादाह साध्यव्यापकेत्यादि । सद्धेतुस्थले महानसत्त्वादेरुपाधित्ववारणार्थमनतिरिक्तवृत्त्यन्तं रूपविशेषणम् । तत्रापि साध्यव्यापकत्वाव्यापकत्वे तदवच्छेदकत्वञ्च दैशिकविशेषणतया ग्राह्यं नातः सम्बन्धभेदेन तान्यादाय दोषः । नन्वेवं द्रव्यञ्जातेरित्यादौ साधनव्यापकसत्तादावतिव्याप्तिर्गुणाद्यवृत्तित्वरूपतादृशधर्मस्य विशेषणतासम्बन्धेनाभाववति सत्त्वादीनामवृत्तेरिति वाच्यम् । तदनतिरिक्तवृत्तिपदेन तदवच्छिन्नाभाववद्वृत्त्यधिकरणतानिरूपकतावच्छेदकत्वस्योक्तत्वात् । न च जातिमान् भावत्वादित्यादौ सत्ताद्युपाधावव्याप्तिः सामान्यादिवृत्तित्वावच्छिन्नाभाववति समवायेनाधिकरणत्वाप्रसिद्धेरिति वाच्यम् । तदभाववद्वृत्त्यधिकरणतासामान्यनिरूपकतावच्छेदकताया उपाधितावटकसम्बन्धावच्छिन्नाधिकरणतानिरूपकतावच्छेदकत्वीयस्वरूपसम्बन्धेनाभावस्य विवक्षितत्वादिति ध्येयम् । अयोगोलकावृत्तित्वादेर्निरुक्तानतिरिक्तवृत्तिजलत्वविशिष्टार्द्रेन्धनत्वादिना ऽऽर्द्रेधनादेरुपाधित्ववारणायाह साध्यसमानाधिकरणेत्यादि । साध्याधिकरणयत्किञ्चिन्निष्ठाभावप्रतियोगितानवच्छेदकत्वं साध्यवन्निष्ठाधिकरणतानिरूपकतावच्छेदकत्वं वा तदर्थः।लक्ष्येषु लक्षणं योजयितुमाह अवच्छिन्नसाध्यव्यापकोपाधौ चेति।चकारात् शुद्धसाध्यव्यापकस्योपग्रहः।सर्वत्र साध्यविशिष्टत्वस्य एव तादृशरूपस्य सुलभत्वात् उक्तमन्तत इति। तदवृत्तित्वमित्यस्य विशेषणतयेत्यादिः । तादृशं रूपमिति। विशेषणतया साध्यव्यापकत्वसाधनाव्यापकतावच्छेदकं रूपमित्यर्थः । ननु रूपवान्द्रव्यत्वादित्यादौ पृथिवीत्वाभावादेर्लक्ष्यत्वे स-

द्रव्यत्वादिहेतौ पृथिवीत्वाभावादेरुपाधितापत्ते तु स्वविशिष्टसाध्यानधिकरणीभूतसाधनाधिकरणवृत्तिधर्म्मावच्छिन्नसाध्यव्यापकत्वे सति साधनाव्यापकत्वम् । अत्र च पूर्वदलप्रविष्टा या साधनव्यक्तिस्तद्व्यापकत्वं बोध्यं तेन रूपादिना गुरुत्वादौ साध्ये पृथिवीत्वाभावादौ नातिप्रसङ्गः । विवेचयिष्यते चेदमुपरिष्टात् । साध्यासमानाधिकरणधर्म्मस्य साध्यव्यापकाभावस्य वा समाना-

---

र्घाण्येवोक्तलक्षणानि तत्राव्याप्तानीत्यत आह रूपादीति । शाकपाकजत्वाद्युपग्रहार्थमवच्छिन्नान्तं साध्यविशेषणम्।तत्राप्युपाधिशरीरस्य व्यभिचाराघटितत्वरक्षार्थं स्वविशिष्टपदम्।साध्यतावच्छेदकसम्बन्धगर्भस्य स्ववैशिष्ट्यस्य तत्सम्बन्धेनाधिकरणस्य च प्राप्त्यर्थं साध्यपदम्। स्वविशिष्टसाध्यानधिकरणवृत्तिना महानसजलान्यतरत्वेनावच्छिन्नसाध्यव्यापकव्यञ्जनवत्त्वादावव्याप्तेर्वारणाय साधनाधिकरणपदम्। असद्धेतौ प्रमेयत्वादेर्वारणायाह साधनाव्यापकत्वमिति । रूपवान् द्रव्यत्वादित्यादौ च पृथिवीत्वाद्यभावस्य स्वविशिष्टसाध्यानधिकरणीभूतवायुवृत्तिपृथिव्यन्यत्वावच्छिन्नसाध्यव्यापकत्वात् न तस्यासंग्रह इति भावः । पूर्वदलेति । स्वविशिष्टेत्यादिदलप्रविष्टेत्यर्थः । आदिपदाद्गन्धवद्रसवत्त्वादित्यादौ, सौरभान्यत्वाद्युपग्रहः। नन्विदं गुरु रूपादित्यादौ पृथिवीत्वाद्यभाव उपाधिरेव किन्न स्यादत आह विवेचयिष्यते इति।इदं उक्तस्थले पृथिवीत्वाभावस्यानुपाधित्वम्।तद्व्यभिचारिणि पार्थिवरूपे गुरुत्वव्यभिचाराभावेन दूषकताबीजविरहान्नायमुपाधिरिति यद्वेत्यादिमूलस्य सार्वभौमीयव्याख्यायां वक्ष्यमाणत्वादिति भावः। उक्तनिरुक्तेः स्वत्वगर्भत्वेनानुगतत्वाभावात् पृथिवीत्वाभावादिसंग्राहकमनुगतलक्षणान्तरमाह साध्यासमानाधिकरणधर्मस्येति । साधनाधिकरणं यत्साधनमित्यग्रेऽन्वयः । साधनवति साध्याभावानुमापकधर्ममन्तर्भाव्य उपाधित्वं निरुच्य साधने साध्यव्यभिचारानुमापकधर्मान्तर्भावेण तदाह साध्यव्यापकाभावस्य वेति। धूमवान् वन्हेरित्यादौ वन्हिसंयोगा-

धिकरणं यत्साधनं तद्वन्निष्ठप्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिव्यधिकरणात्यन्ताभावप्रतियोगितावच्छेदकसाध्यसमानाधिकरणवृत्तिधर्म्मवत्त्वं वा। एवञ्चावगते साधनवति साधने वा साध्यासमानाधिकरणधर्म्मादिना तत्सामानाधिकरण्येन वा साध्याभावो व्यभिचारो वा शक्यते ज्ञातुमिति तु ध्येयम्। उपाधिशरीरभानस्य साधननिष्ठसाध्यव्यभिचारादिविषयत्वसहिष्णुतायान्तु साध्यव्यभिचारित्वेन साध्याव्याप्यत्वेन वा साधनं विशेषणीय-

---

देर्वारणाय प्रतियोगिव्यधिकरणपदमत्रापि प्रतियोगितावच्छेदकावच्छिन्नपरम्। द्रव्यज्ञातेरित्यादौ विशिष्टसत्त्वस्य उपाधित्वसम्पत्तये, निरुक्तसाधनवति निरवच्छिन्नवृत्तिकाभावस्य प्रतियोगितावच्छेदकं निरुक्तसाधनवद्यत्किञ्चिद्द्रव्यत्त्ववृत्त्यधिकरणतानिरूपकतावच्छेदकं वा प्रतियोगितावच्छेदकान्तस्यार्थः, तेन प्रतियोगिव्यधिकरणत्वस्य स्वत्वगर्भत्वेनाननुगतत्वेपि न क्षतिः। साध्यसमानाधिकरणवृत्तित्वं साध्यवन्निष्ठाधिकरणतानिरूपकतावच्छेदकत्वं तेन गन्धवत् द्रव्यत्वादित्यादौ जलत्वविशिष्टत्वादिना सत्तादेर्नोपाधित्वमिति ध्येयम्। साधनवति साध्यासमानाधिकरणधर्मादिना साध्याभावः शक्यते ज्ञातुमित्यन्वयः। धर्मादिनेत्यादिना साध्यव्यापकाभावस्येत्यग्रहः। साधने साध्यव्यभिचारस्यानुमापकमाह तदिति। साध्यसमानाधिकरणस्य साध्यव्यापकाभावस्य वा समानाधिकरणत्वेनेत्यर्थः। शक्यते ज्ञातुमिति। उपाधित्वज्ञानस्यैव साध्यव्यभिचाराद्यनुमापकहेतुज्ञानत्वादिति भावः। व्यभिचारादित्यादिना साध्याव्याप्यत्वस्योपग्रहः। सहिष्णुतायामिति। उपाधित्वग्रहोत्तरमेव साध्यव्यभिचारादेर्भानमित्येवं नियमे विद्वेषसहिष्णुता। साध्यव्यभिचारित्वेन साध्यवदन्यवृत्तित्वावच्छिन्नवत्ताकधर्मवत्त्वेन यथाश्रुते द्रव्यं विशिष्टसत्त्वादित्यादिसद्धेतौ गुणवत्त्वाद्यतिव्याप्तेः साध्याव्याप्यत्वेन स्वाव्यापकसाध्यकत्वेन वा शाब्दाव्यवस्थायामुभयथैव व्याप्तिधियः प्रतिबन्धकत्वासम्भवादिति। विशेषणीय-

म्। मिश्रास्तु यद्व्यभिचारित्वेनेत्याद्येव लक्षणम्, पर्य्यवसितेत्यादिकन्तु व्यभिचारोन्नायकताप्रयोजकरूपप्रदर्शनम्, तत्र पूर्वं प्रतीकं व्याप्तेः, द्वितीयञ्च पक्षधर्म्मतायाः प्रदर्शनार्थम्। एवञ्चायमेतत्साधननिष्ठसाध्यव्यभिचारोन्नायकव्यभिचारप्रतियोगीसर्थके अयमत्र हेतावुपाधिरित्युक्ते कथमस्य व्यभिचारोन्नायकत्वमित्याकाङ्क्षायां व्यभिचारोन्नयनमपि साधु सङ्गच्छत इत्याहुः। नवीनास्तु संयोगवदन्यत्वेन द्रव्यत्वाभावस्येव संयोगाभावस्याभावेन संयोगेन द्रव्यत्वाभावाभावस्य द्रव्यत्वस्य साधनसम्भवादेकशेषस्य दुष्करत्वात्तस्याप्युपाधित्वम्, लक्षणन्तु साधनवति साध्याभावोन्नायकव्यतिरेकप्रतियोगितावच्छेदकरूपवत्त्वं प्रतियोगित्वञ्च तदभा-

---

मिति। तथा च साध्यव्यभिचारि यत् साधनं तद्वन्निष्ठाभावप्रतियोगितावच्छेदकेत्यादिरीत्या एवोपाधित्वं निर्वाच्यमिति भावः।लक्षणमुपाधिपदशक्यम्। व्यभिचारोन्नायकेति। व्यभिचारोन्नयनौपयिकेत्यर्थः। मूलस्थलक्षणपदस्य दूषणौपयिकपरत्वादिति भावः। तत्रेति। पूर्वं साध्यव्यापकत्वरूपम्। प्रतीकं भागम्। व्याप्तेः प्रदर्शनार्थमाहुरित्यन्वयः। तेन प्रतीकशब्दस्य नियतपुंस्त्वेऽपि न क्षतिः। द्वितीयं साधनाव्यापकत्वम्। पक्षधर्मताया इति। उपाधेः साधनाव्यापकत्वे साधनस्य तद्व्यभिचारित्वध्रौव्यादिति भावः। एतादिति। एतत्साधनधर्मिकसाध्यव्यभिचारोन्नयनस्वरूपयोग्यस्वव्यभिचारक इत्यर्थः। अस्य एतद्व्यभिचारस्य। आहुरित्यत्र लक्षणपदस्योदक्षरत्वमस्वरसः। संयोगवदन्यत्वेन इत्यस्य सत्त्ववतीत्यादिः। तथा च द्रव्यं सत्त्वादित्यत्र संयोगस्येव द्रव्यत्वाभाववान् सत्त्वादित्यत्रापि संयोगाभावस्य साधनवति स्वाभावेन साध्याभावोन्नायकत्वादुपाधित्वमतस्तत्र प्रागुक्तं सर्वमेव लक्षणमव्याप्तमिति भावः। ननु साध्याभावस्य उन्नायकत्वं तदुन्नयनौपयिकव्याप्त्यादिमत्त्वं तथा च द्रव्यं सत्त्वादित्यादौ संयोगादावव्याप्तिस्तदभावस्य द्रव्यादौ व्यभिचारेण द्रव्यत्वाभावाव्याप्यत्वात्। न च गुणत्वादि-

वा साध्यव्यापकस्य व्यभिचारेण साधनस्य साध्यव्यभिचारः स्फुट एव, व्यापकव्यभिचारिणस्तदव्याप्यव्यभिचारानियमात् । साधनावच्छिन्नपक्षधर्मावच्छिन्नसाध्यव्यापकयोर्व्यभिचारित्वेन साधनस्य साध्यव्यभिचारित्वमेव । यथा ध्वंसस्याऽनित्यत्वे साध्ये भावत्वस्य, वायोः प्रत्यक्षत्वे साध्ये उद्भूतरूपवत्त्वस्य च। विशेषणाव्यभिचारिणि साधने विशिष्टव्यभिचारस्य विशेष्यव्यभिचारित्वनियमात् । अत एव नार्थान्तरम्, विशेषणाव्यभिचारित्वेन ज्ञाते साधने विशिष्टव्यभिचारः

वत्वं व्युत्पादितञ्च प्रतियोगितावच्छेदकस्यैवान्योन्याभावाभावत्वं शेषं पूर्ववदिति । विशेषणाव्यभिचारित्वेनेत्यादि । सामान्यतो दृ-

---

विशिष्टस्यैव संयोगाभावस्य द्रव्यत्वाभावव्याप्यत्वान्नाव्याप्तिः । साध्यवद्वृत्तिधर्मवैशिष्ट्यानवच्छिन्नो यदभावः साध्याभावव्याप्यस्तत्त्वस्यैव वाच्यत्वादन्यथा धूमवान् वन्हेरित्यादौ वन्हिसंयोगादावतिव्याप्त्यापत्तेः । तदभावस्यापि अयःपिण्डत्वादिविशिष्टस्य धूमाभावादिव्याप्यत्वादत आह प्रतियोगित्वं चेति । तथा च द्रव्यत्वाभावस्य निरुक्तव्याप्यं यत् संयोगवदन्यत्वं तदभावत्वावच्छेदकं संयोगत्वमादाय द्रव्यं सत्त्वादित्यत्र संयोगस्योपग्रहइति भावः । नन्विदं जलं स्पर्शादित्यत्र घटत्वाद्यात्मकस्वाभावेन साधनवति साध्याभावोन्नायकजातिसामान्याभावादावुक्तलक्षणातिव्याप्तिरत आह शेषमिति । तथा च साध्यसमानाधिकरणवृत्तित्वादिना निरुक्तप्रतियोगितावच्छेदकस्य विशेषणीयत्वान्नोक्तदोष इति भावः ।

ष्टमेवैकविशेषबाधे भावयति विशेषान्तरप्रकारिकामनुमितिम्, न चा-

अत्र वदन्ति । निरुक्तव्यतिरेकप्रतियोगित्वं यदि तादृशव्यतिरेकाभाववत्त्वं तदा द्रव्यं सत्त्वादित्यत्र संयोगवतस्तादात्म्यसम्बन्धेनोपाधित्वं न स्यात् द्रव्यत्त्वाभावोऽनायकस्य संयोगवदन्यत्वस्याभावतायाः संयोगवत्यसत्त्वात्, किञ्च साध्याभावव्याप्यस्य व्यतिरेकस्याभावत्वावच्छेदकत्वं न स्वरूपसम्बन्धविशेषः प्रमाणाभावान्नाप्यनतिरिक्तवृत्तित्वं द्रव्यं सत्त्वादित्यादौ द्रव्यत्वाद्यभावव्याप्यस्य विशिष्टसत्त्वाभावस्याभावत्त्वानतिरिक्तवृत्तिसत्तात्वादिना सत्तादेरुपाधितापत्तेः। न च साध्याभावव्याप्यव्यतिरेकस्याभावत्वं यद्धर्मावच्छिन्नस्य व्यापकतावच्छेदकं तद्धर्मवत्त्वस्य विवक्षणान्नोक्तदोषः।तथा सति साध्याभावव्याप्यस्य व्यतिरेकस्य स्वरूपसम्बन्धात्मकं यत्प्रतियोगित्वं तदवच्छेदकं यद्धर्मावच्छिन्नस्य व्यापकतावच्छेदकं तद्रूपवत्त्वमित्यस्यैव सम्यक्त्वादभावविरहत्वलक्षणप्रतियोगित्वानुसरणवैयर्थ्यापत्तेः, धूमवान् वन्हेरित्यादौ धूमाभावव्याप्यस्यायःपिण्डीयवन्हिसंयोगस्याभावत्वे संयोगत्वसत्तात्वाद्यवच्छिन्नत्वव्यापकतावच्छेदकतासत्त्वात् संयोगत्वादिना संयोगादेरुपाधितापाताच्च । तस्माद्यद्धर्मावच्छिन्नाभावस्य यद्धर्मावच्छिन्नवदन्यत्वस्य च साध्यवदवृत्तिधर्मवैशिष्ट्यानवच्छिन्नं साध्याभावव्याप्यत्वं तयोरन्यतरधर्मवत्त्वे ग्रन्थतात्पर्य्यमित्यस्मद्गुरुचरणाः। वस्तुतस्तु साधनवन्निष्ठो यः साध्याभावव्याप्यव्यतिरेकस्तस्य स्वरूपसम्बन्धरूपप्रतियोगितावच्छेदकधर्मवत्त्वमेव उपाधित्वं तच्च द्रव्यं सत्त्वादित्यादौ गुणवृत्तित्वादिविशिष्टस्य संयोगाभावस्य प्रतियोगित्वमादायैव संयोगाद्युपाधौ गतम्। न चैवं धूमवान् वन्हेरित्यादावप्ययोगोलकत्वादिविशिष्टस्य संयोगाद्यभावस्य प्रतियोगित्वमादाय संयोगस्य उपाधितापत्तिरिति वाच्यम् । द्रव्यत्त्वाभाववान् सत्त्वादित्यादौ संयोगाभावस्येव तत्रापि साधनव्यापकस्य संयोगस्योपाधितायामिष्टत्वात् तस्यापि साधनवति साध्यव्यतिरेकोऽनायकत्वेनैकशेषस्य दुष्करत्वात्, साधनव्यापकेषु तान्त्रिकाणामुपाधिव्यवहाराभावेन तस्याऽलक्ष्यत्वे द्रव्यत्वशून्यं सत्त्वादित्यादौ संयोगाभावस्याप्यलक्ष्यतापत्तेरिति युक्तमुत्पश्यामः।ननु साधनविशिष्ट-

सिद्ध्यन् विशेष्यसाध्यव्यभिचारमादायैव सिध्यति पक्षधर्मताबलात्, अन्यथा प्रतीतेरपर्य्यवसानात्। न च पक्षधर्मताबलात् प्रकृतसिद्धावर्थान्तरम्। यद्वा प्रत्यक्षस्पर्शाश्रयत्वं प्रत्यक्षत्वव्यभिचारि द्रव्यत्वाद्व्यभिचारित्वे

तिरिच्यते विशिष्टाभावो विशेषणविशेष्याभावाभ्यामिति मतेनेदम्। स्वमतेनाह यद्वेति। प्रत्यक्षस्पर्शाश्रयत्वमित्यादि प्रत्यक्षसंख्यापरिमाणत्वाद्युपाध्यभिप्रायेण यथाश्रुतमेव साधु। आ-

---

साध्यव्यभिचारित्वेन व्यापकताग्रहे तादृप्येणैव अनुमितिः स्यात् सा च न शुद्धसाध्यव्याप्तिधीविरोधीनीत्यत आह सामान्यतो दृष्टमिति। नानावृत्तिधर्मावच्छिन्नसाध्यकानुमानमित्यर्थः।अनुमितिमित्यादि मतेनेदमित्यन्तमेको ग्रन्थः।तथा च साधनं शुद्धसाध्याभाववद्वृत्तित्वातिरिक्तविशिष्टसाध्याभाववद्वृत्तित्वस्याभाववदित्येकविशेषबाधनिश्चयात् शुद्धसाध्यव्यभिचारात्मकविशिष्टसाध्यव्यभिचारवदित्यनुमितिर्भवितेति शुद्धसाध्यव्यभिचारसिद्धिरिति भावः। ननु साधनस्य साध्याभाववद्वृत्तित्वं न व्यभिचारः द्रव्यं विशिष्टसत्त्वादित्यादावतिप्रसङ्गात् किन्तु साधनवतः साध्याभाववत्त्वं तथा च हेतुमान् साधनावच्छिन्नसाध्याभाववान् तादृशसाध्यव्यापकाभाववत्त्वादित्यत्रैवोक्तानुमानस्य पर्य्यवसानात्तेन साधनवति विशिष्टसाध्यस्याभावसिद्धावपि शुद्धसाध्यस्याभावासिद्धेरर्थान्तरं तदवस्थमत आह न चेति। तथा च शुद्धसाध्याभावभिन्नस्य विशिष्टसाध्याभावस्य बाधबलादेव तत्रापि विशिष्टसाध्याभावः सिद्ध्यन् शुद्धसाध्याभावमादाय पर्य्यवस्यतीति नार्थान्तरमिति भावः। मतेन विशिष्टाभावस्य स्वयं वक्ष्यमाणातिरिक्तत्वमतेन। तत्र विशिष्टाभावस्य विशेषणाद्यभाववत्त्वविरहेनैकविशेषबाधासम्भवादिति भावः।

सति द्रव्यप्रत्यक्षत्वव्यापकव्यभिचारित्वान्महत्त्ववत् तथा

त्मकैत्वादेरपि प्रत्यक्षत्वाङ्गीकारात् । उद्भूतरूपादिपरत्वे च साध्ये हेतौ च प्रत्यक्षपदं बहिरिन्द्रियप्रत्यक्षपरं द्रव्यपदे वा बहिर्द्रव्यपरे महत्त्वपदञ्च जन्यमहत्त्वपरमिति । व्यापकव्यभिचारित्वञ्च व्यापकतावच्छेदकरूपावच्छिन्नाभाववद्वृत्तित्वम् । न च द्रव्यपदवैयर्थ्यम् । विशिष्टाभावस्यातिरिक्तत्वात् । द्रव्यत्वाव्यभिचा-

---

उद्भूतरूपस्य द्रव्यप्रत्यक्षत्वाव्यापकत्वात् तदुपाध्यभिप्रायकत्वासम्भवादाह प्रत्यक्षेति । प्रत्यक्षसंख्यावत्त्वप्रत्यक्षपरिमाणवत्त्वाद्युपाध्यभिप्रायेणेत्यर्थः । आदिना प्रत्यक्षैकत्वाद्युपग्रहः । यथाश्रुतं प्रत्यक्षादिपदस्य मुख्यार्थकत्वेन । ननु प्रत्यक्षसंख्यादिमत्त्वेमपि न द्रव्यप्रत्यक्षत्वव्यापकमात्मनि व्यभिचारादत आह आत्मैकत्वादेरिति । आदिनात्ममहत्त्वस्योपग्रहः । योग्यमात्रवृत्तिगुणस्यैव योग्यतया टीकाकृता स्वीकारात्तदतीन्द्रियत्वोपगमस्यानौचित्यादिति भावः साध्य इति । अन्यथा सुखादौ प्रत्यक्षत्वव्यभिचारस्यासत्त्वेन लक्ष्यैवोक्तसाध्यव्यभिचारापत्तेरिति भावः । हेताविति । अन्यथोद्भूतरूपस्य द्रव्यप्रत्यक्षत्वाव्यापकत्वेन हेतुविशेषणासिद्धेरिति भावः । ननु प्रत्यक्षस्पर्शाश्रयत्वेन वायौ प्रत्यक्षतामात्रस्यानुमाने बहिरिन्द्रियप्रत्यक्षत्वव्यभिचारानुमितेरविरोधित्वादुक्तक्रमेण व्याख्या न युक्तेत्यत आह द्रव्यपदे वेति । तथा च सुखादेर्बहिर्द्रव्यत्वाव्यभिचारित्वविरहान्न तत्र व्यभिचारो न वा द्रव्यप्रत्यक्षत्वव्यापकताया उद्भूतरूपवत्त्वादावसत्त्वेपि हेत्वप्रसिद्धिरिति भावः । आत्मादिमहत्त्वस्य बहिर्द्रव्यत्वव्यभिचारितया दृष्टान्तत्वायोगादाह महत्त्वपदमिति । महत्त्वप्रकारेणैव जन्यमहत्त्वतात्पर्यकमित्यर्थः । द्रव्यप्रत्यक्षत्वादिव्यापकप्रतियोगिकव्यभिचारस्य प्रत्यक्षत्वाव्यभिचारिणि घटत्वादौ व्यभिचारित्वादाह व्यापकेति । द्रव्यप्रत्यक्षस्येत्यादिः । द्रव्यपदेति । द्र-

मित्रातनयत्वं श्यामत्वव्यभिचारि मित्रातनयत्वाव्यभिचारित्वे सति श्याममित्रातनयत्वव्यापकव्यभिचारित्वात् अघटत्ववत् । अव्यभिचारश्च तत्समानाधिकर-

---

रित्वे सति उद्भूतरूपादिव्यभिचार एव हेतुः व्यापकत्वोपन्यासस्तु तर्कप्रदर्शनायेति तत्त्वम् । द्रव्यत्वाव्यभिचारो द्रव्यत्वाभाववदवृत्तित्वम् । मित्रातनयत्वमिति । अनुमानमिदमुपाधेः प्रमा-

---

व्यप्रत्यक्षत्वव्यापकव्यभिचारित्वत्वमपेक्ष्य लघोः प्रत्यक्षत्वव्यापकव्यभिचारत्वस्यैव व्याप्यतावच्छेदकत्वादिति भावः । तस्यागे च सत्त्यन्तस्यापि वैयर्थ्यं बोध्यम् । विशेष्यदलविरहादेव सुखादौ व्यभिचारायोगात्।विशिष्टेति। द्रव्यप्रत्यक्षत्ववन्निष्ठाभावप्रतियोगितानवच्छेदकत्वस्य प्रत्यक्षत्ववन्निष्ठाभावप्रतियोगितावच्छेदकत्वाभावतो भिन्नत्वादित्यर्थः । तथा च निरुक्तस्य स्वसमानाधिकरणव्याप्यतावच्छेदकान्तराघटितत्वान्न वैयर्थ्यमिति भावः । ननु द्रव्यप्रत्यक्षत्वादिव्यापकतावच्छेदकधर्मसामान्यावच्छिन्नाभाववद्वृत्तित्वमप्रसिद्धं सर्वत्रैव तादृशप्रमेयत्वाद्यवच्छिन्नस्य सत्त्वात् प्रसिद्धं वा प्रत्यक्षस्पर्शाश्रयत्वे स्वरूपासिद्धमत आह द्रव्यत्वेति । बहिर्द्रव्यत्वाव्यभिचारित्वे सतीत्यर्थः।हेतुः, प्रत्यक्षत्वव्यभिचारस्य साध्यतायाम् ।नन्वेवं व्यापकत्वस्योपन्यासो मूलकारस्य विफल इत्यत आह व्यापकत्वेति।तर्केति। व्यापकव्यभिचारिणो व्याप्यव्यभिचारित्वनियमादप्रयोजकत्वशङ्काव्युदासायेत्यर्थः।द्रव्यत्वस्य व्यभिचारो यदि वक्ष्यमाणरीत्या तद्व्याकत्वं तदा तदभावस्य प्रत्यक्षस्पर्शाश्रयत्वस्वरूपासिद्धिरतो व्याचष्टे द्रव्यत्वाव्यभिचार इति। ननु साधनाव्यापकतया सन्दिह्यमानस्यैव शाकपाकजत्वस्य सन्दिग्धोपाधितयाग्रे मणिकृतैव वक्ष्यमाणत्वात् कथं व्यभिचारानुमापकत्वं हेतौ तद्व्यभिचारस्य सन्दिग्धत्वादत आह अनुमानमिति । प्रमाणान्तरेण आप्तवाक्यादिना व्यतिरेकेण

णान्तरेण साधनाव्यापकतानिर्णयदशायाम् । ननु तदव्यभिचारित्वं तदसन्ताभाववद्वृत्तित्वं तथा च साधनविकलोऽयं साध्यवान् दृष्टान्त इयत आह अव्यभिचारश्चेति।नन्वेवं विशेष्यवैयर्थ्यम्। धूमप्रागभाववद्वह्निभेदादवैयर्थ्यमिति चेत्, तथापि मित्रातनयत्वव्यापकत्वविशेषितं वृत्तिमत्त्वमेव गमकमिति चेन्न । यत्किञ्चित्तदधिकरणनिष्ठासन्ताभावाप्रतियोगित्वस्य फलतः सामानाधिकरण्यपर्य्यवसितस्योक्तत्वात् । तथा चायमर्थः । मित्रातनयत्वाधिकरणयद्व्यक्तिनिष्ठासन्ताभावाप्रतियोगित्वं तत्र शाकपाकजत्वव्यभिचारित्वात् मित्रातनये शाकपाकजव्यभिचारित्वादिति यावत्। तेन श्यामत्वादौ न व्यभिचारः । अव्यभिचारश्चेति । तथा च

दृष्टान्तत्वं निराकर्तुमाह साध्यवानिति । शेषस्य विशेष्यदलस्य वैयर्थ्यम् । मित्रातनयत्वव्यापकत्वेनैव श्यामत्वव्यभिचारस्य साधनासम्भवादिति भावः । शङ्कते धूमेति । वृत्तिमत्त्वमेवेति । तथा च मित्रातनयत्वविशिष्टश्यामत्वव्यापकाभाववद्धूमवैयर्थ्यमिति भावः । यत्किञ्चिदिति । मित्रातनयत्वाधिकरणयत्किञ्चिन्निष्ठेत्यर्थः । लाघवादाह फलत इति । यत्किञ्चिन्मित्रातनयत्वनिष्ठाभावप्रतियोगित्वस्य मित्रातनयत्वसामानाधिकरण्यनियतत्वादिति भावः । नन्वेवं श्याममित्रातनयकाकयोः संयोगद्वित्वादौ व्यभिचार इयत आह तथा चेति । यद्व्यक्तिनिष्ठाभावाप्रतियोगित्वं यद्व्यक्तिवृत्तित्वव्याप्युपलक्षकम्, नातः प्रक्रान्तविरोधः । शाकपाकजत्वेति । अत्रापि व्यापकत्वांशस्य तर्कप्रदर्शनायैवोक्तत्वादिति भावः । तत्रेत्यस्य विशिष्योपादाने मित्रातनयत्वाधिकरणेत्यादेर्वैयर्थ्यादाह मित्रातनय इति । निरूपितत्वं सप्तम्यर्थः । शाकपाकजत्वाभाववन्मित्रातनयवृत्तित्वे वा तात्पर्यम् । श्यामत्वादावित्यतदगुणबहुव्रीहिणा प्रागुक्तसंयोगादिपरम् । मित्रातनयत्वस्य तद्व्यापकव्यभिचारित्वाभावेन तदन्यश्यामत्वस्य च मित्रातनयत्वासमानाधिकर-

णात्यन्ताभावाप्रतियोगित्वं तच्चाभेदेऽपि । यद्वा यः साधनव्यभिचारी साध्यव्यभिचारोन्नायकः स उपाधिः ।

बहुव्रीहिः । यद्यद्धर्माव्यभिचारित्वे सति तद्धर्मावच्छिन्नयत्साध्यव्यापकव्यभिचारि यत्तत्साध्यव्यभिचारीति सामान्यव्याप्तेरघटत्वं दृष्टान्त इत्यप्याहुः । मेयत्वादावपि विशेषणवति विशिष्टसाध्यव्यापकोपाधिव्यभिचारेण शुद्धसाध्यव्यभिचारः साधनीयः । एवं विशिष्टसाध्यव्यापकस्यापि साक्षात् शुद्धसाध्यव्यभिचारोन्नायकतयोपाधित्वं समर्थ्य साक्षात्परम्परासाधारणतदुन्नायकतामात्रेण तथात्वं व्यवस्थापयति यद्वेत्यादिना । अत्र पूर्ववद्विरुद्धवारणाय साध्यसमानाधिकरणेति बोध्यम् । व्यभिचारोन्नायकत्वञ्च यत्र

णत्वेन श्यामरूपे हेतुसत्त्वादेव व्यभिचारायोगादिति ध्येयम् । प्राचां मतं दर्शयितुं पुनर्धत्ते अव्यभिचारश्चेति । तत्समानाधिकरणाभावस्य प्रतियोगित्वमिति तत्पुरुषे विशेष्यांशवैयर्थ्यादाह तथा चेति । तन्मित्रातनयत्वं समानाधिकरणाभावाप्रतियोगि यस्येति विग्रहेण स्वसमानाधिकरणाभावाप्रतियोगिमित्रातनयत्वकत्वमित्यर्थः । तथा च मित्रातनयनिष्ठश्यामत्वादौ व्यभिचारवारणार्थमेव विशेष्यदलमिति भावः । नन्वेवमघटत्वे दृष्टान्तासिद्धिः तस्य स्वव्यापकामित्रातनयत्वकत्वाभावादत आह यदिति । तथा च स्वव्यापकघटभिन्नत्वकत्वे सति घटभिन्नत्वावच्छिन्नत्वश्यामत्वव्यापकस्य घटावृत्तिश्यामत्वसामग्रीमत्त्वस्य व्यभिचारित्वं श्यामत्वव्यभिचारित्वं चाघटत्वे वर्त्तत इति न तस्य दृष्टान्तत्वव्याकोप इति भावः । यत्त्वतत्त्वादेः पक्षदृष्टान्तसाधारणस्यासत्त्वान्नेदं युक्तमित्यस्वरस्वरसादाहुरित्युक्तम् ।स्वव्याख्यातस्य साध्यव्यभिचारानु-

कुत्र चित् । एवञ्च पृथिवीत्वादिना गुरुत्वादौ साध्ये द्रव्यत्वादौ व्यभिचारोन्नायकस्य रूपवत्त्वादेर्वारणाय साधनव्यभिचारीति बहुव्रीहिः । न चैवमपि गुरुत्वादिसाध्यके रसवत्त्वादिहेतौ द्रव्यत्वं गुरुत्वादिव्यभिचारि जलभिन्ने पृथिवीत्वादिव्यभिचारित्वादिति व्यभिचारोन्नायके पृथिवीत्वादावतिप्रसङ्गः । साधननिष्ठं यद्व्यभिचारित्वं साध्यव्यभिचारोन्नायकं तत्त्वस्योक्तत्वात् उक्ति-

---

मापकस्य सर्वत्र हेतौ सत्त्वमाविष्करोति प्रमेयत्वादावपीति । अन्यथा स श्यामः प्रमेयत्वादित्यादौ मित्रातनयत्वाव्यभिचारित्वे सति तदवच्छिन्नश्यामत्वव्यापकशाकपाकजत्वव्यभिचारित्वस्यैव मूलोक्तस्य प्रमेयत्वादिहेतावसत्त्वेन तत्र तेन श्यामत्वादिव्यभिचारानुमानानुपपत्तेरिति भावः । तच्च साक्षात् परम्परया चेत्यग्रिममूलानुसारेण यद्वेत्यादिकमवतारयति एवमिति । तथात्वमुपाधित्वम् । पूर्ववादिति । इदन्तेजो द्रव्यत्वादित्यादौ जात्यभावादेर्वारणायेत्यर्थः । साधने साध्यव्यभिचारोन्नायकत्वस्योक्तौ साधनव्यभिचारित्वस्य व्यर्थतापत्तेराह यत्र कुत्र चिदिति । तथा च साध्यव्यभिचारस्योन्नायत्वं तत्स्वरूपयोग्यत्वं तच्च साध्यव्यभिचारव्याप्यस्वाभावाधिकरणीभूतयत्किञ्चिद्व्यक्तिवृत्तित्वसामान्यकत्वमिति भावः । रूपवत्त्वादेरिति । तदभावाधिकरणीभूतवायुवृत्तित्वसामान्यस्य गुरुत्वव्यभिचारव्याप्यत्वात् इति भावः । प्रमेयत्वादिसाधनस्य व्यभिचाराप्रसिद्धेः प्रकृते पृथिवीत्वव्यभिचारस्य रूपवत्त्वे सत्त्वाच्चाह बहुव्रीहिरिति । साधनं व्यभिचारि यस्य स्वव्यभिचारिसाधनक इत्यर्थः । स्नेहादौ व्यभिचारवारणार्थं जलभिन्न इति । साधननिष्ठमिति । तथा च रसवत्त्वनिष्ठपृथिवीत्वव्यभिचारित्वं न गुरुत्वव्यभिचारव्याप्यं माधुर्य्यादौ व्यभिचारादतस्तत्र पृथिवीत्वादौ न प्रसङ्गः । नन्वेवं यद्व्यभिचारित्वेन साधनस्य साध्यव्यभिचारित्वमुन्नीयते इति प्रागुक्तेनाभेद इत्यत आह उक्तीति । पूर्वं यद्व्यभिचारः साध्यव्यभिचारव्यापकत्वे सति साधनवृत्तित्वमित्युक्तमिदानीं साधनवृत्तित्वे सति साध्यव्यभिचारित्वव्याप्यो

वैचित्र्याच्च पूर्वस्माद्भेदः । के चित्तु व्यभिचारोन्नायकत्वमिह तद्व्याप्यकोटिप्रविष्टतामात्रेण । इत्यञ्च जलत्वेन करकात्वे साध्ये जलत्वं करकात्वव्यभिचारि स्नेहव्यापकत्वात् घटेन वा घटत्वे साध्ये घटो घटत्वव्यभिचारी जन्यद्रव्यत्वादिति व्यभिचारोन्नयनसमर्थस्य स्नेहस्य द्रव्यत्वस्य च वारणाय साधनव्यभिचारीति । अयं घटः सत्त्वादित्यादौ सत्त्वं घटत्वव्यभिचारि शब्दादिवृत्तित्वादिति व्यभिचारोन्नायकस्य शब्दादेर्वारणाय साध्यसमानाधिकरणेत्यपि वक्तव्यम् । एवञ्च रूपेण गुरुत्वादौ साध्ये रूपं गुरुत्वादिव्यभिचारि जलभिन्ने पृथिवीत्वाभाववदवृत्तित्वादिति व्यभिचारोन्नायकस्य गुरुत्वव्यभिचारितैजसरूपनिष्ठ-

---

यद्व्यभिचारस्तत्त्वमित्युक्तिवैचित्र्याद्विशेष्यविशेषणभावभेदात् पूर्वतो भेद इत्यर्थः । के चित्तु साध्यसमानाधिकरणत्वं स्वातन्त्र्येण विशेषणं दत्तमिह तु स्वसमानाधिकरणवृत्तिसाध्यतावच्छेदकधर्मावच्छिन्नस्य व्यभिचारोन्नायकत्वं निवेशितमित्येवोक्तिवैचित्र्यमत एव प्रागेव विरुद्धवारणाय साध्यसमानाधिकरणेति बोध्यमित्युक्तम्, साध्यांशे स्वसमानाधिकरणेति बोध्यमिति तस्यार्थ इत्याहुः । सार्वभौममतमुपन्यस्यति के चित्त्विति । तद्व्याप्यकोटीति । साध्यव्यभिचारव्यापकतावच्छेदकघटकत्वेनेत्यर्थः । न च वन्हिव्यभिचारव्याप्यस्य महानसवृत्तितेजस्त्वस्य घटकतया प्रसिद्धानुमाने महानसत्त्वादेरुपाधितापत्तिः, अग्र निरस्यत्त्वादिति भावः । स्नेहव्यापकत्वादित्यस्य व्यभिचारोन्नायकस्य स्नेहस्य वारणाय इत्यग्रेन्वयः । साधनस्य व्यभिचारीत्येवं तत्पुरुषेणापि स्नेहस्य वारणसम्भवादबहुव्रीह्यनुसरणस्य फलमाह घटेन वेति । जन्यद्रव्यत्वादिति । जन्यपदं गगनादौ द्रव्यत्वपदं च घटीयरूपादौ व्यभिचारस्य वारणाय । शब्दादिना ज्ञानेच्छाद्युपग्रहः । गुरुत्वसाध्यकरूपादिहेतौ पृथिवीत्वाभावादेरलक्ष्यत्वप्रयोजकं रूपमाविष्करोति व्यभिचारोन्नायकेत्यादिना । यत्राधिकरण

तत्त्वञ्च साक्षात् परम्परया वेति नार्थान्तरम् । किञ्च अर्थान्तरस्य पुरुषदोषत्वादाभासान्तरस्य तत्राभावादुपा-

---

व्यभिचाराप्रतियोगिनः पृथिवीत्वाभावस्य वारणाय यत्राधिकरणे साधनाव्यापकत्वं तत्र व्यभिचारोन्नायकत्वं वक्तव्यम् । यथा कथञ्चित्स्वव्यभिचारेण व्यभिचारोन्नायकमात्रस्य तु लक्ष्यत्वे यत्साधनव्यक्त्यव्यापकत्वं तद्वयक्तौ व्यभिचारोन्नायकं वाच्यमित्याहुः । नन्वस्तु पारिभाषिकमुपाधित्वं तथापि साक्षाद्व्यभिचारानुन्नायकतया दोषत्वाभावेन तदुद्भावने अर्थान्तरं स्यादेवेत्यत आह किञ्चेति । आभासान्तरस्य तदानीं जायमानस्य । तथा च

इति । साधनाधिकरणीभूतयद्व्यक्तिनिष्ठाभावप्रतियोगित्वं तद्व्यक्त्यवच्छेद्यस्य साध्यव्यभिचारस्य व्याप्यतावच्छेदकीभूतधर्मनिष्ठत्वं वक्तव्यमित्यर्थः । ननु रूपवान्द्रव्यत्वादित्यादौ पृथिवीत्वाद्यभावाव्याप्तं पृथिव्यवच्छेद्यस्य रूपादिव्यभिचारस्याप्रसिद्धेरत आह यथाकथं चिदिति । साध्यव्यभिचारिसाधननिष्ठव्यभिचारप्रतियोगिमात्रस्येत्यर्थः । तद्व्यक्तौ व्यभिचारोन्नायकमिति । तन्निष्ठायाः साध्यव्यभिचारव्याप्यतावच्छेदकधर्मावच्छिन्नवत्तायाः निरूपकतावच्छेदकप्रविष्टमित्यर्थः । आहुरिति । प्रथमे यत्राधिकरणे साधनाव्यापकत्वं तद्व्यक्त्यवच्छिन्नस्य साध्यव्यभिचारस्य द्वितीये च यत् साधनव्यक्त्यव्यापकत्वं तन्निष्ठस्य व्यापकव्यभिचारस्य यथाकथं चित्सम्बन्धित्वमात्रेणैव सामञ्जस्ये व्यापकतावच्छेदककोटिप्रविष्टत्वप्रवेशानौचित्यमत्राऽस्वरसबीजम् । पारिभाषिकमेवेत्येवकारेण स्वनिष्ठव्याप्तिसंक्रामकत्वस्य व्युदासः । तस्य शुद्धसाध्यव्यापकस्य । उद्भावन इत्यर्थः । सोपाधाबाभासान्तरस्य व्यभिचारादेरावश्यकत्वात् पूरयति तदानीं जाव-

पाधिरेव भावत्वादिकं दोषः। न चैवं शब्दोऽभिधेयः प्रमेयत्वादित्यत्राश्रावणत्वं जलं प्रमेयं रसवत्त्वादित्यत्र

तस्यावश्याभ्युपेयदोषभावत्वे तदुद्भावने नार्थान्तरमिति भावः। अत्र वदन्ति। साध्योपन्यासानन्तरं तत्साधकस्येव साधनोपन्यासानन्तरं तद्दोषस्य व्यभिचारादेराकाङ्क्षितत्वात् तमनुद्भाव्य साक्षात्तत्साधकस्य शुद्धसाध्यव्यापकस्योपाधरुद्भावन एवाप्राप्तकालत्वम्, कैव कथा परम्परया तत्साधकस्यावच्छिन्नसाध्यव्यापकस्य। अन्यथा तत्साधनपरम्पराया अपि प्रथममुपन्यासे तथात्वं न स्यात्। न च निग्रहस्थानत्वेन विशेषः, प्रतिज्ञाहान्यादितो हेत्वाभासाच्च बहिर्भूतस्य तथात्वायोगात्। न च विभाजकसूत्रस्थले हे-

---

मानस्येति। तदानीं न्यायप्रयोगदशायामात्तं साध्यव्यभिचारादिकम्। अप्राप्तकालत्वं तदानीमनाकाङ्क्षितस्याभिधानत्वम्। साध्यव्यभिचारोद्भावनोत्तरमाकाङ्क्षितत्वेनार्थान्तरत्वायोगादिति भावः। कैव कथा सुतराम्। अवच्छिन्नसाध्यव्यापकस्येति उद्भावन इत्यनुषज्यते। अन्यथा तदानीमनाकाङ्क्षितस्यापि उद्भावने। तत्साधकपरम्परायामिति। जन्यत्वादौ साध्यव्यभिचारस्य उत्थायकत्वं यद्भावत्वाद्युपाधिव्यभिचारित्वं तदुत्थायकस्य ध्वंसवृत्तित्वादेरपि प्रथमतः कथायामुपन्यासे तथात्वमप्राप्तकालत्वं न स्यादित्यर्थः। अथाप्राप्तकालतामासादयन्नपि प्रथममुपाधिमुपन्यस्यति निग्रहस्थानत्वान्न तदुत्थायकत्वपरम्परेत्यत आह न चेति। प्रतिज्ञाहान्यादिः पुरुषस्य हेत्वाभासस्तु प्रमाणस्यैव निग्राहक इति तयोर्भेदेनोपन्यासः। तथात्वायोगादितिप्रतिज्ञाहान्यादिद्वाविंशतेरेव मुनिना निग्रहस्थानतयोक्तत्वादिति भावः। विभाजकेति। प्रतिज्ञाहानिः प्रतिज्ञाविरोधः प्रतिज्ञासन्न्यासो हेत्वन्तरं न्यूनमधिकमर्थान्तरं

पृथिवीत्वमुपाधिः स्यात्, केवलान्वयित्वसाधकप्रमाणेन तत्र साध्यसिद्धेरुपाधेर्विशिष्टाव्यापकत्वात् । न च पक्षे-

---

त्वाभासाश्चेति चकारेणानुक्तसमुच्चयपरेण साक्षात्परम्परया वानुमितिदोषोन्नायकस्य संग्रहः । तथा सति व्यभिचारस्येवाश्रयासिद्ध्यादेरप्युन्नायकस्य तदुभयोन्नायकपरम्परायाश्च तथात्वापातात् । न चाप्राप्तकालतामासादयन्नपि प्रथममुपाध्युपन्यासः कथकसम्प्रदायानुरोधादेव कर्त्तव्यः, तादृशसम्प्रदायमननुरुन्धानस्य तदुद्भावकं पराभवतः शपथनिवारणीयतापत्तेः । तस्मात्प्रथमं शुद्धसाध्यव्यभिचार एवोद्भाव्यस्तत्र कथन्तायां तद्धेतुत्वेन शुद्धसाध्यव्यापकोपाधिव्यभिचारः विशेषणाव्यभिचारित्वे सति विशिष्टसाध्यव्यापकस्योपाधेर्विशिष्टसाध्यस्य वा व्यभिचारः तत्र च

निरर्थकमपार्थकमविज्ञातार्थमप्राप्तकालं पुनरुक्तमनुभाषणमज्ञानमप्रतिभा विक्षेपो मतानुज्ञा पर्य्यनुयोज्योपेक्षणं निरनुयोज्यानुयोगोऽपसिद्धान्तो हेत्वाभासाश्च निग्रहस्थानमिति विभाजकसूत्रस्थलेत्यर्थः । अनुमितिदोषेति सामान्यतोऽभिधानं प्रतिपक्षोन्नायकस्याप्युपन्यासार्थम् । असिद्ध्यादेरित्यस्य स्वरूपेत्यादिः । व्याख्यत्वासिद्धस्योन्नायकोद्भावनस्य मणिकृताप्यग्रे स्वीकर्त्तव्यत्वात् । तदुभयं व्यभिचार स्वरूपासिद्ध्युभयम् । तथात्वापातात् प्रथमनुद्भाव्यत्वापातात् । अत्र दृष्टान्तस्य साधनैक्यस्य दुरुपादित्वेनैव चकारसमुच्चय इत्युक्तौ चोक्तदोष इति चिन्त्यम् । तदुद्भावकं प्रथममुपाध्युद्भावकम् । कथन्तया हेत्वाकाङ्क्षायाम् । व्याप्यकोपाधिव्यभिचार उद्भाव्य इति पूर्वेणान्वयः । शुद्धसाध्यव्यापकोपाधिमनुसृत्याह विशेषणेति । उपाधेरिति । व्यभिचार उद्भाव्य इत्यग्रिमपूर्वाभ्यामन्वयः । विशिष्टसाध्यस्य वेति । विशेषणाव्यभिचारित्वे सतीत्यनुषज्यते । विशेष्ये विशिष्टसाध्यव्यभिचारित्वे । ला-

तरे स्वव्याघातकत्वेनानुपाधावतिव्याप्तिः, तत्रानुकूल-तर्काभावेन साध्यव्यापकत्वानिश्चयात् । सहचारदर्शना-देस्तेन विना संशायकत्वादित्युक्तम् बाधोन्नीते चानु-

---

विशेष्ये विशिष्टसाध्यव्यापकोपाधिव्यभिचार इति । वक्ष्यते च व्यभिचारादेरिव तद्बाध्यत्वत्वादेरपि ज्ञानं व्याप्तिग्रहप्रतिबन्धकम्। तथा च साध्यव्यभिचारव्याप्योपाधिव्यभिचारवानयमिति बोद्धावनीयमिति । साध्यव्यापकत्वानिश्चयात्। उपाधित्वौपयिक-तदनिश्चयात् । अनुकूलतर्कादिना तादृशव्यापकत्वनिश्चये तु बाधोन्नीतवद्धत्वेव निश्चितोपाधिः । न च स्वव्याघातकत्वोन्नायक-मुपाधिः, तद्धि न सर्वानुमानसाधारण्यम्, अनुकूलतर्कादिनि-श्चितव्याप्तिके हेतौ तदभावात् । नापि तद्बाधकारेण व्यभिचारा-नुमानेऽपि पक्षेतरान्तरस्योपाधित्वसम्भवः, अनुकूलतर्कादिना त-

---

धवादाह वक्ष्यते चेति।वस्तुतोऽयं हेतुरमुकेन सोपाधिरित्येवोद्भाव्यं व्यभिचारसम्बन्धेनोपाधिमत्त्वावच्छेदेन साध्यव्यभिचारित्वस्य पूर्वगृहीतत्वेन सोपाधित्वेन निश्चयस्यापि व्यावर्त्तकधर्मादर्शनविभया व्याप्तिधीविरोधित्वसम्भवादित्यस्मद्गुरुचरणाः । शाकपाक-जत्वादेरिव पक्षेतरत्वस्यापि यत्किञ्चिद्धर्मावच्छिन्नसाध्यव्यापक-त्वसम्भवादाह उपाधित्वौपयिकेति । स्वानधिकरणीभूतसाधनाधि-करणवृत्तिधर्मावच्छिन्नसाध्यव्यापकत्वानिश्चयादित्यर्थः । अयं पक्षे-तरः उपाधित्वेन निश्चितःकथितनिरुक्तेस्तत्रासत्त्वेनोपाधित्वायोगात्। अत्र स्वपदमनुमानपदस्य व्यभिचारानुमानस्य उपाधित्वस्य वा बोध-कम्। तत्र नाद्य इत्याह तद्धीति।स्वव्याघातार्थकत्वं हीत्यर्थः।तदभावा-दिति।पक्षेतरस्य सर्वत्रानुमाने उपाधित्वनिश्चयायोगादित्यर्थः । द्वि-तीये नापीति। तस्य पक्षेतरत्वस्य। व्यभिचारेणेत्यर्थः। सम्भव इत्यस्य

कूलतर्कोऽस्त्येवेति । एवं पर्वतावयववृत्त्यन्यत्वादेरपि नोपाधित्वं पक्षमात्रव्यावर्त्तकविशेषणवत्त्वात् । अत

स्य साध्यव्यापकत्वनिश्चये व्यापकव्यभिचारिणि व्याप्यव्यभिचारावश्यम्भावेन तदयोगात्। अत एव पक्षेतरस्योपाधित्वे सर्वत्रैव तादृशोपाधिसम्भवेनानुमानमात्रविलोपे व्यभिचारानुमापकत्वगर्भस्योपाधित्वस्याव्याघात इति परास्तम् । कथकसम्प्रदायानुरोधात् बाधानुन्नीतः पक्षेतरो नोपाधित्वेन कथायामुद्भाव्य इति तु वदन्ति । पक्षमात्रेति । यद्यपि पर्वतावयवरूपादेरपि व्यावर्त्तकं तत्, तथापि तस्य व्यावृत्तिर्नोपाधितायामुपयुज्यते अपि तु पक्षस्यैवेति तन्मात्रव्यावर्त्तकत्वमुक्तम् । इदञ्चानुपाधितायां न बीजं परिभाषामात्रत्वात् किन्त्वनुकूलतर्काभावेन तादृशसाध्यव्याप-

---

तद्धीति पूर्वेणान्वयः।तस्य पक्षे तरत्वस्य । तदयोगादिति।व्यभिचारानुमाने पक्षेतरान्तस्योपाधित्वनिश्चयायोगादित्यर्थः । अन्त्ये अत एवेति।तर्कादिनाहेतोः साध्यव्यापकताग्रहदशायामुपाधित्वानिश्चयादेवेत्यर्थः । परास्तमित्यग्रेन्वयः। नन्वेवं साध्यव्यापकस्य वस्त्वन्तरस्येव पक्षेतरस्यापि साध्यव्यापकत्वनिश्चयदशायां कथायामुद्भावनापत्तिरत आह कथकेति । वदन्ति सिद्धान्तिनः । दृष्टान्तादेः साधनवैकल्यादिवत्तदुद्भावनस्यापि निग्रहस्थानान्तरत्वादित्यभिप्रायः । तस्य पर्वतावयरूपस्य उपाधितायां उपाधिताघटकसाधनाव्यापकतायाम् । नोपयुज्यत इति । तादृशरूपाद्यन्यत्वस्य धूमादिसाधनाव्यापकत्वात् । तथा चोपाधितौपयिकपक्षमात्रवृत्तिगर्भत्वादिति मूलार्थः । इदं पक्षमात्रव्यावर्त्तकविशेषणवत्त्वम् । न बीजमिति । तज्ज्ञानस्योपाधित्वग्रहविरोधित्वादिति भावः । तादृशेति । उपाधित्वौपयिकेत्यर्थः । वस्तुतो मात्रपदव्यत्या-

एव धूमे आर्द्रेन्धनप्रभववन्हिमत्त्वं द्रव्यबहिरिन्द्रियप्रत्यक्षत्वे उद्भूतरूपवत्त्वं मित्रातनयश्यामत्वे शाकपाकज-

---

कत्वानिश्चय इति द्रष्टव्यम्। अत एव व्यापकताग्राहकप्रमाणसम्भवादेव। आर्द्रेन्धनेति। अथात्र स्वतन्त्रान्वयव्यतिरेकाभ्यामार्द्रेन्धनत्वादिनैव कारणत्वं न पुनरार्द्रेन्धनप्रभववन्हित्वेनेति चेत्, किं ज्ञातः, न हि कारणतावच्छेदकमेव व्यापकतावच्छेदकं तादृशाभावप्रतियोगितानवच्छेदकस्यैव तत्त्वात्। तदवच्छिन्नप्रतियोगिताकाभावस्य चातिरिक्ततया तद्वदवृत्तित्वेन साध्यव्यभिचारसाधने वैयर्थ्याभावात्। सत्यपि चार्द्रेन्धने तत्संयुक्ते च वन्हौ दाहप्रतिबन्धकसत्त्वे धूमानुत्पादात् क्लृप्ततत्कारणाभावस्य वन्हेर्विशेषरूपेण कारणत्वकल्पनयैवोपपत्तावक्लृप्ततत्कारणभावानां दाहप्रति-

---

सेन पक्षव्यावर्त्तकविशेषणमात्रवत्त्वादित्येवं मूलस्यैव साध्यव्यापकत्वनिश्चये तात्पर्य्यमित्येवं युक्तमुत्पश्यामः। अत्र धूमे। आर्द्रेन्धनत्वादिनेति। अत्रार्द्रेन्धनत्वयोर्विशेषणविशेष्यभावव्यत्यासेन कारणताद्वयस्यावश्यकत्वे अवच्छेदकलाघवाज्जलत्वेन्धनत्वाभ्यामेव रूपाभ्यां हेतुताद्वयं युक्तमित्याशयेनादि पदमुपात्तम्। तादृशेति। तन्निष्ठेत्यर्थः। क्व चित्तु तथैव पाठः। नन्वार्द्रेन्धनप्रभववन्हिव्यभिचारित्वेन साध्यव्यभिचारस्यानुमाने प्रभवान्तविशेषणस्य व्यर्थत्वान्नार्द्रेन्धनप्रभववन्हित्वेनोपाधित्वमत आह तदवच्छिन्नेति। [आर्द्रेन्धनप्रभववन्हित्वावच्छिन्नाभावस्य वन्हित्वावच्छिन्नाभावातिरिक्ततयेत्यर्थः। तादृशवन्हित्वेन धूमहेतुत्ववादिनां मत आह सत्यपीत्यादिना धूमानुत्पादादिति। धूमानुत्पादिनि धूमोत्पादप्रसङ्गादित्यर्थः।] आर्द्रेन्धनप्रभववन्हित्वेनैव कारणत्वमित्यग्रेऽन्वयः। ननु दाहप्रतिबन्धकाभावानामपि धूमहेतुत्वान्नोक्तदोष इत्यत आह क्लृप्तेति।

त्वं जन्यानित्यत्वे भावत्वमुपाधिः, तदुत्कर्षेण साध्योत्क-

बन्धकाभावानां तत्कारणत्वकल्पनानौचित्यात् । एकस्यामार्द्रेन्धनव्यक्तौ प्रतिबद्धायां तत्रैव व्यक्त्यन्तराद्धूमोत्पादात्तत्तदिन्धनजन्यधूमं प्रति तत्तदभावानां कारणत्वस्य वाच्यत्वेऽतिगौरवाच्च । महति चार्द्रेन्धने तत्प्रभवे चाणीयसि वन्हौ महति वन्ह्यन्तरे विद्यमानेऽप्यार्द्रेन्धनप्रभवमहावन्हेरनुत्पाददशायां प्रकृष्टधूमानुत्पादादार्द्रेन्धनप्रभववन्हित्वेन कारणत्वमित्यपि वदन्ति । तदुत्कर्षेणेति ।

न वा दाहप्रतिबन्धकाभावस्य धूमहेतुत्वं सम्भवतीत्यत आह एकस्यामिति । एकवन्हिव्यक्त्यन्तर्भावेणार्द्रेन्धनव्यक्तौ मन्त्रादिना प्रतिबन्धकतायां सत्यान्तरैवार्द्रेन्धनव्यक्तौ वन्हिव्यक्त्यन्तरादधूमोत्पादादित्यर्थः । प्रभवं मा दहत्वित्यभिप्रायेण तार्णवन्हिर्मा दहत्वित्याशयेनापि मन्त्राभिलापस्य दाहविरोधित्वसम्भवादिति भावः । ननु धूमसामान्यं प्रति न दाहप्रतिबन्धकानां मन्त्रादीनामन्त्रत्वावच्छिन्नाभावत्वेन हेतुत्वं येनैकवन्ह्यन्तर्भावेण तदार्द्रेन्धनव्यक्तौ मन्त्रसत्त्वे वन्ह्यन्तरादपि तत्र धूमो न स्यात् तत्तदिन्धनजन्यधूमं प्रति तत्तदिन्धनदाहप्रागभावत्वेन प्रतिबन्धकत्वं वाच्यमतो वन्ह्यन्तरात्तदिन्धनस्य दाहोत्तरं तत्र धूमोत्पत्तौ बाधकाभाव इत्यत आह तत्तदिन्धनेति । तत्तदभावानां तत्तदिन्धनदाहप्रागभावत्वावच्छिन्नाभावानाम् । ननु धूमसामान्यं प्रत्येव दाहोत्पत्त्यार्द्रेन्धनत्वेन हेतुत्वं वाच्यं न्यायनये अवयविन्यपि पाकेन रूपान्तरपर्य्यवसितदाहस्योत्पादादतो नोक्तगौरवमित्यत आह महति चेति । प्रकृष्टधूमं प्रत्यार्द्रेन्धनस्य वन्हेर्वा महत्त्वं न प्रयोजकं किन्त्वार्द्रेन्धनप्रभववन्हेरेवातो यद्विशेषयोरिति न्यायादधूमसामान्यं प्रत्यप्यार्द्रेन्धनजवन्हित्वेनैव हेतुत्वमित्यर्थः । प्रकृष्टधूमत्वं न जातिप्रभेदो मानाभावात् परन्तु महत्त्ववदधूमत्वमेव नीलघटत्वादिवदर्थसमाजप्रसक्तत्वान्न जन्यतावच्छेदकमित्याद्यस्वरसो वदन्तीत्युक्त्वा सुचि-

र्षात् अनन्यथासिद्धान्वयव्यतिरेकतो वैद्यकात् कारण-
तावगमेन घटोन्मज्जनप्रसङ्गेन साध्यव्यापकतानिश्च-

आर्द्रेन्धनप्रभववन्हिसामान्यं विना धूमसामान्यस्य प्रकृष्टतादृशवन्हि विना प्रकृष्टधूमस्यानुत्पादनियमादार्द्रेन्धनप्रभववन्हेरेव धूमोपधायकत्वं तत्रार्द्रेन्धनप्रभववन्हित्वं कारणतावच्छेदकमर्थवशसम्पन्नं नान्तरीयकमेव वास्तु फलतो न कश्चिद्विशेष इति भावः । अनन्यथेति । तादृशान्वयव्यतिरेकाभ्यामुद्भूतरूपस्य तद्वतो द्रव्यस्यैव वा

तः । कारणतावच्छेदकमिति प्राचांमते । स्वमते त्वाह अर्थवशसंम्पन्नमिति । वन्हित्वार्द्रेन्धनत्वयोर्धूमकारणतावच्छेदकयोर्दैवात्सम्पन्नं कारणतानवच्छेदकमित्यर्थः । फलतः फले धूमव्यापकत्वग्रहे । न कश्चिदिति । उभयथापि व्यापकतावच्छेदकत्वानपायादिति भावः । उद्भूतरूपस्येति नव्यमते । प्राचांमते त्वाह ततो द्रव्यस्य वेति । ननूक्तमतयोः किं तत्त्वमत आह तत्त्वमिति । सामान्यतः प्रत्यक्षविषयत्वेन तत्तद्विशेषविषयकप्रत्यक्षे वा तत्तद्व्यक्तित्वेन विषयस्य हेतुत्वं नतु बहिर्द्रव्यप्रत्यक्षं प्रत्युद्भूतरूपत्वेन प्रमाणाभावात्, परन्त्वात्मादेश्चाक्षुषादिवारणाय प्रथमकल्पे समवायेनैव उद्भूतरूपत्वेन तत्रहेतुत्वं रूपत्वापेक्षया तस्य लघुत्वात् द्वितीयकल्पे न तदपि, चाक्षुषत्वादिकमन्तर्भाव्य विषयस्य हेतुत्वविरहादेवानति प्रसङ्गादिति भावः । अनुद्भूतरूपे मानाभावात् उद्भूतेति रूपविशेषणं व्यर्थमत आह तत्त्वं पुनरित्यादि इत्यपि कश्चित् । मूले घटोन्मज्जनेनिाघटादिध्वंसो यदि विनाश्यभावः स्यात् स्वोत्तरोत्पत्तिकक्षणवृत्तिप्रतियोगिकः स्यात् घटप्रागभाववदिति एवं घटाद्युन्मज्जनप्रसङ्गेन ध्वंसस्य विनाशित्वनिरासे सति भावत्वोपाधिर्जन्यत्वावच्छिन्नविनाशित्वव्यापकतानिश्चयादित्यर्थः । तत्रोक्ततर्कस्याप्रयोजकत्वमाशङ्क्याह दीधितिकारो ध्वंसेत्यादि।तथा च ध्वंसानधिकरणत्वे सति घटप्रागभा-

यात्, तत् किं कार्य्यकारणयोरेव व्याप्तिः तथा च बहुधा व्याकुलीस्यादिति चेन्न । तदुपजीव्याऽन्येषामप्यनुकूलतर्केण व्याप्तिग्रहात्। यत्र साध्योपाध्योर्हेतुसाध्ययोर्वा

कारणत्वम् उभयथापि व्यापकत्वमुद्भूतरूपत्वेन तत्त्वं पुनरुपपर्णितमेव । घटोन्मज्जनेति । ध्वंसप्रागभावानधिकरणकालस्य प्रतियोग्यधिकरणत्वनियमात् । न च प्रागभावस्य ध्वंसप्रतियोगिध्वंस इव तद्ध्वंसोऽपि प्रतियोगिनो ध्वंस इति वाच्यम्।अप्रामाणिकध्वंसतत्कारणधाराकल्पनातो ध्वंसानन्तत्वकल्पनाया एवोचितत्वादिति भावः । कार्य्यकारणयोरेव । कार्य्यकारणभावग्राह-

---

वानधिकरणकालत्वमेव घटध्वंसोत्तरक्षणस्य घटवत्तायां त्वन्मते प्रयोजकमिति भावः । अत्र स्वरूपासिद्धिमाशङ्क्य न च प्रागभावस्य ध्वंसप्रतियोगिध्वंस इति । तद्ध्वंसोऽपि ध्वंसस्य ध्वंसोपि प्रतियोगिनो ध्वंस इत्यर्थः । तथा च घटध्वंसोत्तरक्षणस्य घटप्रतियोगिकध्वंसानधिकरणत्वमेवासिद्धमिति भावः । अप्रामाणिकेति । ध्वंसो नष्ट इत्याद्यप्रत्ययादप्रामाणिकानां ध्वंसप्रतियोगिकध्वंसानां कल्पनमेवं तेषां क्षणिकत्वधारणाय तत्कारणधारायाः कल्पनमपेक्ष्य लाघवात् ध्वंसस्याविनाशित्वकल्पनाया एवौचित्यादित्यर्थः । यद्यपि ध्वंससामान्यं प्रत्येव जन्यत्वेन प्रतियोगिनां हेतुत्वमेव ध्वंसस्य विनाशित्वे मानं फलमुखगौरवस्यादोषत्वाच्च क्षणिकत्ववारणाय तत्कारणधाराकल्पनं न क्षतिकरं स्वप्रतियोग्यधिकरणतादात्म्यसम्बन्धेन ध्वंसस्य तादृशसम्बन्धावच्छिन्नध्वंसत्वेन प्रतियोगिन एव वा ध्वंससामान्यं प्रति हेतुत्वोपगमे तु क्षणिकत्वं ध्वंसानां तथापि द्रव्यनाशं प्रति हेतुतया कल्प्यानामसमवायिनाशानां ध्वंसस्थले विरहात् विशेषसामग्रीसहिताया एव च सामान्यसामग्र्याः कार्यजनकत्वान्न ध्वंसस्य विना-

व्याप्तिग्राहकसाम्यान्नैकत्र व्याप्तिनिश्चयस्तत्र सन्दिग्धोपाधित्वं व्यभिचारसंशयोपधायकत्वात् । यदा च तादृश्येकत्रानुकूलतर्कावतारस्तदा हेतुत्वमुपाधित्वं वा निश्चितम् । पक्षेतरस्य स्वव्याघातकत्वेन हेतुव्यभिचारसंशायकत्वमतो न सन्दिग्धोपाधिरपि सः । यत्तु पक्षेतरस्य यथा साध्यव्यापकत्वं तथा साध्याभावव्यापकत्वमपि ग्राहकसाम्यात् । तथा चोभयव्यापकनिवृत्त्या सा-

---

कप्रमाणक्रोडीकृतयोरेव । पक्षेतरस्येत्यादि । ननु सन्दिग्धोपाध्यन्तरवत्पक्षेतरोऽपि व्यभिचाशङ्कामादधानः केन वारणीयः, स्वव्याघातकत्वञ्च निराकृतमेव । अथात्र कश्चिदुपाधिर्भविष्यनीति शङ्का शङ्कापिशाचीत्वात् यथा न व्यभिचारशङ्काधायिका तथा पक्षेतरस्योपाधित्वशङ्कापि । तदाहितापि व्यभिचारशङ्का पक्षव्यभिचारशङ्केव न प्रतिबन्धिका । अन्यथा निरुपाधिकसहचारभ-

---

श इति तत्त्वम । शाकपाकजत्वाद्युपाधेः श्यामत्वादावकारणत्वात् किञ्चेत्याशङ्कानुपपत्तेराह कार्येति । तादृशप्रमाणक्रोडीकृतत्वमिह कार्य्यकारणतत्त्वतदवच्छेदकानामन्यतमत्वमिति वदन्ति । निराकृतमेवेति । अनुकूलतर्केण हेतोः साध्यव्याप्यतात्रहस्थल एवानुमानानुच्छेदादिति । कश्चिदुपाधिरुपाधिपदार्थः । शङ्कापिशाचीत्वं व्यभिचारशङ्कास्वरूपयोग्यत्वम । शङ्कापीति । न व्यभिचारशङ्काधायिकेति पूर्वेणान्वयः । व्यभिचारे व्याप्यवत्तासंशयत्वेनैव तत्संशयस्वरूपयोग्यत्वादाह तदाहितेति । न प्रतिबन्धिकेति । पक्षीयान्यत्वस्येव पक्षेतरोपाधित्वसंशयजन्यत्वस्यापि प्रतिबन्धकत्वावच्छेदकनिवेशेत्यत्वा-

ध्यतदभावाभ्यां पक्षे निवर्त्तितव्यम्, न चैवं । तथा च पक्षेतर. साध्यव्यापकतासंशयेन सन्दिग्धः कथं परं दूषयेदिति । तन्न । तथापि हि साध्यव्यापकता पक्षमालम्ब्य हेतुव्यभिचारसंशयाधायकत्वेन दूषणं स्यादेव । ननु यत्रोपाधिस्तत्रानुकूलतर्को यदि नास्ति तदा तदभावेनैव व्याप्तेरग्रहः । अथास्ति, तदा साध्यव्याप्याव्यापकत्वेनोपाधिः साध्याव्यापकत्वनिश्चयान्नोपाधिरित्यु-

---

ङ्गप्रसङ्गमात्रबलप्रवृत्तानामनुमानानां विलयप्रसङ्गादिति चेन्न । सन्दिग्धोपाध्यन्तरसाधारणव्यभिचारशङ्काधानप्रयोजकरूपतया पक्षेतरेण तदाधाने प्रयोजनक्षतेः प्रतिबन्धकत्वासम्भवात् व्यभिचारज्ञानत्वेन च प्रतिबन्धकतायां कारणविशेषजन्यत्वाजन्यत्वादिकं न निविशते गौरवात् मानाभावाच्च । कथमन्यथा करवन्हिसंयोगः

दिति भावः । अन्यथेति । पक्षेतरोपाधित्वशङ्कायाः साध्यव्यभिचारसंशयबोधकत्वे तत्संशयाहितव्यभिचारशङ्कायाः साध्यव्याप्तिविरोधित्वेनेत्यर्थः । प्रथमे दूषणमाह सन्दिग्धेत्यादिना । तदाधाने व्यभिचारसंशयस्याधाने कर्त्तव्ये । प्रयोजनक्षतेः उक्तानुमानभङ्गापत्तेः विरोधित्वासम्भवादित्यर्थः । तदुक्तं वृद्धैर्न हि प्रयोजनक्षतिभिया सामग्री कार्य्यं नाजयतीति। द्वितीये दूषणमाह व्यभिचारज्ञानत्वेन चेति।कारणविशेषेति । जन्यत्वान्तं दृष्टान्तार्थम् । तथा च पक्षेतरान्योपाधित्वसंशयजन्यत्वमिव पक्षेतरोपाधित्वसंशयाजन्यत्वं न विरोधितावच्छेदकमित्यर्थः। आदिना पक्षीयान्यत्वस्योपग्रहः।सति प्रमाणे गौरवस्याप्यनास्थेयत्वादाह मानेति । पक्षीयव्यभिचारशङ्कायाः प्रतिबन्धकत्वाभावे बाधकमाह कथमन्यथेति । कर-

भयथापि नोपाधिर्दूषणम् । न च व्याप्त्यभावठंयाप्य-

सर्वः संयोगो वा प्रत्यक्षसंयोगधर्म्मातिरिक्तधर्म्मसमवायी समवायित्वादित्यादितो न शक्त्यादिसिद्धिः।निरुपाधित्वेऽपि अप्रयोजकत्वादिति चेन्न । निरुपाधित्वस्यैव प्रयोजकत्वात् तथात्वेऽपि चाप्रयोजकत्वे निरुपाधित्वाभिमतानामितरेषामपि तथात्वात् । अत्र च कुत्र पक्षातिरिक्ते व्यभिचारशङ्का कश्चायं व्यामोहो यद्व्याप्तिग्राहकदृढतरप्रमाणविरहिणां निरुपाधित्वमिति । यतस्तत्र तत्रान्ततः पक्षसपक्षैकदेशवृत्तिधर्म्मावच्छिन्नसाध्यव्यापकानां सपक्षैकदेशवृ-

---

वन्ह्योः संयोगस्य पक्षत्वे संयोगान्तर एव साध्यव्यभिचारस्य निश्चयः संशयो वा भविष्यतीत्यतः पक्षान्तरमाह सर्वः संयोगो वेति । हेतोर्व्यभिचारित्वसम्पत्त्यर्थमतिरिक्तान्तं तत्रापि संयोगधर्मातिरिक्तधर्मत्वस्य संयोगेषु बाधादप्यप्रयोजकत्वसम्भवात्तदुपादानार्थं प्रत्यक्षत्वेन संयोगधर्मो विशेषितः । शक्त्यादित्यादिना रूपादिगतानुद्भूतत्वाद्युपग्रहः । शङ्कते निरुपाधित्वेऽपीति। अप्रयोजकत्वान्न शक्त्यादिसिद्धिरिति प्रश्नवाक्येनान्वयः । निरुपाधित्वस्यैवेति । पक्षवृत्तिरित्यादिः । तथात्वेऽपि पक्षधर्मस्य निरुपाधित्वेऽपि । इतरेषां ज्ञेयं प्रमेयं वाच्यत्वादित्यादीनाम् । तथात्वात् तथात्वापातात् । क चित्तथैव पाठः । ननूक्तस्थले पक्षातिरिक्त एव व्यभिचारसंशयादप्रयोजकत्वमत आह अत्र चेति । संयोगपक्षकोक्तहेतौ चेत्यर्थः । पक्षेतरस्य सन्दिग्धोपाधित्वे निरुपाधिसहचारबलमात्रप्रवृत्तत्वमनुमानस्य भज्येतेति यदुक्तं तदसहिष्णुराह कश्चायमिति । व्याप्तिग्राहकप्रमाणस्य दृढतरत्वं व्यभिचारशङ्काविरोधिसहकृतत्वम् । अन्ततः पक्षेतरस्य उपाधित्वानुपगमेऽपि । पक्षसपक्षेति । पर्वतमहानसान्यतरत्वावच्छिन्नसाध्यव्यापकानां व्यञ्जनवत्त्वादीनामुपाधित्वं सन्दिग्धोपाधित्वं सम्भवतीत्यर्थः । नन्वेवं क्षितिः

मुभयमत उपाधिरपि तदभावोन्नयनेन दोष इति वाच्य-
म् । उपाधेरात्मलाभार्थमनुकूलतर्काभावोपजीवकत्वेन
तस्यैव दोषत्वादिति चेन्न । सोपाधावेकत्र साध्यतदभा-
वसम्बन्धस्य विरुद्धत्वादवच्छेदभेदेन तदुभयसम्बन्धो
वाच्यः तथा च साधने साध्यसम्बन्धितावच्छेदकरूपम-

त्तिधर्म्माणामुपाधित्वं सम्भाव्यते । इत्थञ्च यथा नातिप्रसङ्गस्तथा तत्र तत्र वक्ष्याम इति सत्यम् । कथकसम्प्रदायानुरोधात् कथायां सन्दिग्धोपाधित्वेन पक्षेतरो नोद्भाव्य इत्येवम्परो ग्रन्थ इत्याहुः । सोपाधावेकत्रेत्यादि । उपलक्षणमेतत् । व्यभिचारिण्युपाधेरवश्य-म्भावमात्रे तात्पर्य्यम् । उपजीव्योपजीवकभावो हि न कार्य्य-

---

सकर्तृका कार्य्यत्वादित्यादितो नेश्वरादिसिद्धिः स्यात्तत्रापि क्षिती-तरस्य घटत्वादेरपि सन्दिग्धोपाधित्वसम्भवादत आह इत्थमिति। अतिप्रसङ्गो निरुपाधित्वहेतोः सन्दिग्धोपाधित्वप्रसङ्गः । तत्र तत्रेतिअनुकूलतर्केण हेतोः साध्यव्याप्यत्वग्रहे तदव्यापकत्वेन घ-टत्वादेः साध्याव्यापकत्वनिश्चयादेव न तत्र सन्दिग्धोपाधित्वमिति भावः । आहुर्न्यायविदः। साध्यतदभावयोरेकत्र विरोधे मानाभावात् साध्यसम्बन्धितावच्छेदकवत्त्वस्यानुमानादूषकत्वेन तादृशोपाधेः प्रकृतानुपयोगादाह उपलक्षणमिति। उपलक्ष्यमाह व्यभिचारिणीति। ननूपाधेरवश्यंभावेऽप्युपजीव्यत्वादनुकूलतर्काभाव एव दोषस्त-दुक्तमुपाधेरेवात्मलाभार्थमित्यादीत्यत आह उपजीव्येति । असम्भवादिति । आर्द्रेन्धनाद्युपाधिं प्रत्यनुकूलतर्काभावस्याजनकत्वात् इति भावः । अकिञ्चित्कर उपाधेर्दूषकत्वाखण्डकः । व्यापकत्वे व्याप्यस्यादूषकत्वेऽनुकूलतर्कविरहोऽप्यदूषणं स्यात्तद्व्यापकान्त-

नुकूलतर्कभावोपजीवनमन्तरेणोपाधिरावश्यकस्तथानुकूलतर्काभावोऽप्यावश्यक इति उभयोरपि विनिगमकाभावादूषकत्वम्। अन्ये तु यद्व्यावृत्त्या यस्य साधनस्य

कारणभावोऽसम्भवात् व्याप्यव्यापकभावस्त्वकिञ्चित्कर एव, विशेषतस्तु ज्ञायमानदूषकतायाम्। एकमविज्ञायाप्यन्यतरज्ञानाच्च न ज्ञाप्यज्ञापकभावः। न चानुकूलतर्काविरहादेव व्याप्तेरग्रहे कृतमुपाधिज्ञानेन, विनाप्यनुकूलतर्कं व्यभिचाराग्रहे व्याप्तिग्रहसम्भवादिति भावः। यद्व्यावृत्त्येति। अत्र पक्ष इति पूरणात् पक्षनिष्ठसाध्यव्यावृत्त्युन्नायकव्यावृत्तिप्रतियोगित्वमर्थः। सत्प्रतिपक्षोन्नाय-

---

स्यापि सत्त्वादिति भावः। विशेषतः सुतराम्। बाधादेर्व्यापकत्वेऽपि तस्यैव जायमानस्य बुद्ध्यादिविरोधित्वादिति भावः। एकमिति। उपाधिमज्ञात्वा तर्काभावस्येव तमज्ञात्वाप्युपाधिज्ञानादित्यर्थः। शङ्कते न चेति। दूषयति विनापीति। व्याप्तिग्रहसम्भवादिति। तथा च तदानीमेवोपाधिज्ञानस्य दूषकत्वं वाच्यमिति भावः। यथाश्रुतस्य पर्वतो वन्हिमान्धूमादित्यादौ साधने साध्यव्यावर्त्तके वन्हिसामग्न्यादावतिव्याप्त्यापत्तेराह अत्रेति। अत्र लक्षणवाक्ये अर्थ इत्यनेनान्वयः। पक्षनिष्ठेति। अत्राप्युन्नायकत्वं तद्योग्यता तथा च स्वाभावनिष्ठसाध्याभावव्याप्यतावच्छेदकधर्मावच्छिन्नवत्पक्षकत्वमर्थः। पक्षतावच्छेदकावच्छेदेन साध्यसिद्धेरुद्देश्यत्वस्थले निरुक्तधर्मावच्छिन्नवत्पक्षसामान्यकत्वं वाच्यमतो द्रव्यत्वादिना सामानाधिकरण्येन वन्ह्यादेः साध्यतायां तत्सामग्न्यादौ नातिप्रसङ्गः। व्यभिचारोन्नायकस्य लक्ष्यत्वे पर्वतो धूमवान् वन्हेरित्यादौ आर्द्रेन्धनाद्यव्याप्तिर्जले वन्हिमद्धूमादित्यादौ वन्हिसामग्न्यादावतिव्याप्तिश्च स्यादत आह सदिति। सत्प्रतिपक्षोन्नायकत्वं तदुन्नयनौपयिकरूपवत्त्वं तच्च

साध्यं निवर्त्तते स धर्मस्तत्र हेतावुपाधिः । स च धर्मो यस्याभावात् पक्षे साध्यसाधनसम्बन्धाभावः । यथा आर्द्रेन्धनवत्त्वम् । व्यावर्त्तते हि तद्व्यावृत्त्या धूमवत्त्वम-

---

कत्वञ्चात्र दूषकतावीजं तत्र चाप्रयोजकत्वात् साधनाव्यापकत्वं नोक्तं साधनस्य सोपाधित्वव्युत्पादनायैव केवलं यस्य साधनस्येति । यद्वा साधनस्येत्यनन्तरमधिकरण इति पूरणात् साधनवन्निष्ठसाध्यव्यावृत्त्युन्नायकव्यावृत्तिप्रतियोगित्वमर्थः । तथा च यद्व्यभिचारित्वेनेत्यादिरुपवर्णितार्थनिष्कर्ष एवायम् । शुद्धस्य साधनावच्छिन्नस्य च साध्यस्य व्यापकानामुपाधीनां पक्षे क्व चित् साधनवति वा साध्याभावस्यैकमुन्नयनप्रकारमाह स चेत्यादि । साधन-

---

पक्षधर्मावच्छिन्नसाध्यव्यापकत्वे सति पक्षावृत्तित्वं दूषकतावीजं नातो लक्ष्यतावच्छेदकलक्षणयोरभेदः । तत्र सत्प्रतिपक्षोन्नयने । अप्रयोजकत्वादित्युपलक्षणम्, ह्रदो वन्हिमान् धूमादित्यादौ वन्हिसामग्र्यादावव्याप्तिकरत्वाच्चेत्यपि द्रष्टव्यम् । नन्वेवं मूले यस्य साधनस्येत्यभिधानं विफलमत आह साधनस्येति । सोपाधित्वं येन केनापि सम्बन्धेन निरुक्तोपाधिमत्त्वं केवलं लक्षणाघटकमान च साध्यतेऽस्मिन्निति व्युत्पत्त्या साधनपदस्य पक्षपरत्वमेव कुतो नोक्तमिति वाच्यम् । तत्र हेतोरित्यग्रिममूलविरोधापत्तेः इति भावः । साधनस्य लक्षणाघटकत्वे तत्सन्देहेन तदुपादानस्य सन्दर्भविरोधापत्तेराह यद्वेति । साधनवन्निष्ठेति । नन्वेतस्य लक्षणत्वे वस्तुतस्त्विति पूर्वोक्तस्य यद्व्यभिचारित्वेनेत्यादिलक्ष्यतावच्छेदकवाक्यार्थस्याभेदापत्तिरत आह तथा चेति। उपदर्शितो योऽर्थनिष्कर्षस्तन्मात्रमिदं न तु लक्षणमपि येन लक्ष्यतावच्छेदकाभेदः स्यादिति भावः । साध्यसाधनसम्बन्धाभावस्य लक्षणाघटकत्वात् स

योगोलके । अत एव तत्र साध्यसाधनसम्बन्धाभावः पक्षे । एवं भावत्वव्यावृत्त्या ध्वंसे जन्यत्वानित्यत्वयोः सम्बन्धो निवर्त्तमानः पक्षधर्मताबलादनित्यत्वाभावमादाय सिध्यति । तथा वायावुद्भूतरूपवत्त्वं निवर्त्तमानं

वत्त्वेन ज्ञायमाने पक्षे साध्यसाधनसम्बन्धाभावः सिद्ध्यन् पक्षधर्म्मताबलात्साध्याभावमादायैव पर्य्यवस्यति । ननु शुद्धसाध्याभावोन्नायकस्यार्द्रेन्धनवत्त्वादेः कथं साध्यसाधनसम्बन्धाभावोन्नायकत्वमत आह आर्द्रेन्धनेति । अत एवेति । साध्याभावसत्त्वे साध्यसाधनसम्बन्धाभावस्यावश्यकत्वात्तदुन्नायकत्वमक्षतमिति भावः । द्रव्यत्वे इति द्रव्यत्वस्य हेतुत्वाभिप्रायेण । अयञ्च प्रायशः स-

---

चेत्यादेस्तदर्थयोजकत्वासम्भवादाह शुद्धस्येत्यादि । यथार्द्रेन्धनवत्त्वमित्यादिमूलानुरोधात् शुद्धसाध्यं निवेशितम् । प्रथमव्याख्यामनुसृत्याह पक्ष इति । द्वितीयामनुसृत्याह क्वचित् साधनवति वेति । साधनवत्त्वसामानाधिकरण्येन साध्याभावोन्नयनस्य सूचनाय क्वचिदुक्तिस्तावतैव व्यभिचारधियः सम्पत्तेः । एकमनुगतम् । साध्यविशिष्टसाधनवत्त्वाभावे साध्ये साध्याभावस्य सिद्धिमुपपादयति साधनवत्त्वेनेति । ज्ञायमाने पक्षे निश्चीयमाने । पक्षधर्मतेति । साध्याभावस्य तदुभयसम्बन्धाभावस्य बाधबलादित्यर्थः । साध्याभावमादायेति । तत्प्रकारितानियतानुमितिविधेयभावादित्यर्थः । आर्द्रेन्धनेतीति । इत्थं च मूले यथेत्यादिः पक्ष इत्यन्त एको ग्रन्थः । अत एवेत्यस्य धूमव्यावृत्तिसत्त्वादवेत्यर्थमनुसृत्याह साध्याभावेति । साध्यसामान्याभावसत्त्व इत्यर्थः । वायुः प्रत्यक्षः प्रत्यक्षस्पर्शाश्रयत्वादित्यत्र द्रव्यत्वविशिष्टप्रत्यक्षत्वाभावस्य साध्यसाधनाभावभिन्नत्वा दाह द्रव्यत्वेति । बाहिर्द्र-

बहिर्द्रव्यत्वे सति प्रत्यक्षत्वं निवर्त्तयत् प्रत्यक्षत्वाभावमादाय सिद्ध्यति। तथा चोभयत्रापि पक्षे साध्याभावसि-

---

म्भवतीत्यभिहितो वस्तुतः प्रकारभेदेऽपि न क्षतिः। तथा च शुद्धसाध्यव्यापकोपाधिस्थले शुद्धसाध्याभावः अवच्छिन्नतद्व्यापकस्थले त्ववच्छेदकत्वावच्छिन्नसाध्याभावोऽवच्छेदकत्वविशेषितेन चोपाधिविरहेण शुद्धसाध्याभावः साधनीयः। अत एव गगनादौ स्पर्शवत्त्वेन प्रमेयत्वेन च प्रत्यक्षत्वे साध्ये बहिर्द्रव्यत्वावच्छिन्नसाध्यव्यापकस्योद्भूतरूपस्य तादृशसाध्याभावोन्नयनहेतुत्वमिति। पक्षे यद्व्यावृत्त्या यस्य साधनस्य सम्बन्धि यत्साधनविशिष्टं साध्यं निवर्त्तते इत्यर्थस्तु यथाश्रुतग्रन्थस्वरसासिद्धः। तत्र दूषकताबीजं यदि सत्प्रतिपक्षोन्नायकत्वं तदा साधनानुप्रवेशो व्यर्थः, जलं द्रव्यं गन्धवत्त्वादित्यादौ पृथिवीत्वादावतिव्याप्तिश्च।

व्यत्वार्थकेत्यादिः। ननु घटो गोत्ववान् अश्ववत्त्वात् इत्यादौ साध्यसाधनसम्बन्धाप्रसिद्ध्या तद्व्यतिरेकोन्नायकत्वं सास्नाशरीरवत्त्वाद्युपाधेरसम्भवीत्यत आह अयं चेति। प्रकार इति शेषः। प्रकारभेदमेव दर्शयति तथा चेत्यादिना। अवच्छिन्नसाध्याभावः साधनीय इत्यग्रेऽन्वयः। विशिष्टाभावस्यातिरिक्तत्वे पक्षधर्मताबलस्यासम्भवादाह अवच्छेदकत्वेति। अत एव उक्तप्रकारस्यानावश्यकत्वादेव। अन्यथा गगनं प्रत्यक्षं स्पर्शवत्त्वात् इत्यत्रोद्भूतरूपाभावेन पक्षे साध्यसाधनसम्बन्धाभावः सिद्ध्यन्नपि न साध्याभावपर्य्यवसायी साधनाभावस्यापि पक्षे सत्त्वात् गगनं प्रत्यक्षं प्रमेयत्वादित्यत्र च तादृशरूपाभावेन साध्यसाधनसम्बन्धाभावः सिद्ध्यत्येव न सुखादौ व्यभिचारित्वादित्यादिखण्डनार्थः। दूषकताबीजं लक्ष्यतायोजकमव्यर्थत्वमुक्त्वा विरुद्धार्थकत्वमप्याह जलमिति। जलस्य द्रव्यत्वेऽपि गन्धवत्त्वविशिष्ट-

द्धया साध्यसाधनसम्बन्धाभावोऽस्तीति । अत एव बाधानुन्नीतपक्षेतरस्यानुपाधित्वं स्वव्याघातकत्वेन तद्व्यतिरेकस्य साध्याव्यावर्त्तकत्वादिति । यत्तूपाधिमात्रस्य

अथासिद्ध्युन्नायकत्वं तदा साध्यानुप्रवेशो निरर्थकः, जलं गन्धवद द्रव्यत्वादित्यादौ पृथिवीत्वादावतिप्रसङ्गश्च । अथ यथासम्भवमसिद्धेः सत्प्रतिपक्षस्य चोन्नायकत्वं तदा वायुः स्नेहवान् गन्धवत्त्वादित्यादौ जलत्वादावव्याप्तिः । साधनविशिष्टसाध्याप्रसिद्धेः । साध्यसाधनवत्त्वप्रकारकबोधविरोधिबुद्धिकाभावोन्नायकत्वमर्थः । विरुणद्धि चैकैकाभावबुद्धिरुभयवत्ताबोधम् । विरुद्धस्थले तु भ्रमादिरूपतथाविधबोधप्रसिद्धया समन्वय इत्यपि

व्यत्वाभावसत्त्वादिति भावः । असिद्धयुन्नायकत्वं स्वरूपासिद्धयुन्नायकत्वम्।दूषकताबीजमित्यनुषज्यते।व्यर्थ इति। यथासन्निवेशे वैयर्थ्याभावादाह जलमिति।जलस्य हेतुमत्त्वेऽपि साध्यविशिष्टतदसत्त्वादिति भावः । यथासम्भवमिति । साध्यत्वसाधनतान्यतरावच्छेदकधर्मावच्छिन्नाभावोन्नायकत्वमित्यर्थः । पूर्ववदन्वयः। जलत्वादीत्यादिना पृथिवीत्वाद्युपग्रहः।साध्यसाधनसम्बन्धाभावपदस्य प्रकारान्तरेणार्थमुपवर्णयतां मतमाह साध्यसाधनवत्त्वेति । साध्यसाधनवत्त्वबोधस्य विरोधिनी बुद्धिर्यस्य तादृशाभावस्योन्नायकत्वं किञ्चिद्धर्मिकसाध्यसाधनवत्ताबुद्धिसामान्यं प्रति प्रकारता दूषकताबीजमित्यन्वयः । प्रतिबन्धकतावच्छेदकीभूताभावस्योन्नायकत्वमिति यावत् । एतेन साध्यसाधनवत्त्वबुद्धौ प्रकारीभूतस्य वस्त्वन्तरस्याभावोन्नायके नातिप्रसङ्गः।भ्रमादीत्यादिना स्वस्वाश्रयधर्मिकप्रमायाः परिग्रहः । अत्र घटो गुणः प्रमेयत्वादित्यत्र जात्यभावादावतिव्याप्तिः घटत्वाद्यात्मकस्य तदभावस्य पक्षे साध्याभावोन्नायकत्वात, साध्यसमानाधिकरणत्वविशेषणे च घटो गुणः स्नेहवत्त्वादित्यत्रासिद्धयु-

वदन्ति । यत्तु साध्यावृत्तित्वे सति साधनावृत्तिर्यस्तच्छून्यत्वेन साध्यसाधनेऽनुगमस्य तदभावोन्नायकत्वं वाच्यमिति । तन्न । यत्र भिन्नभिन्नसम्बन्धेन साध्यसाधनभावस्तत्र सद्धेतुके हेतुतासम्पादकेन सम्बन्धेन साध्यस्य साध्यतासम्पादकेन च हेतोरन्यत्रापि च यथाकथञ्चित्तत्सम्बन्धेनोभयस्याभावोन्नायकेऽतिव्याप्तेः । किंञ्च तादृशधर्मशून्यत्वेन रूपान्तरेण वा तदभावस्योन्नायकत्वम-

---

न्नायके जलत्वादावव्याप्तिस्तस्य साध्यविरुद्धत्वात् । न च स्वाश्रयनिष्ठाधिकरणतानिरूपकतावच्छेदकधर्मावच्छिन्नप्रतियोगिताकत्वेन निरुक्तप्रतियोगितावच्छेदकीभूताभावो विशेषणीय इति नोक्तातिव्याप्तिः स्वपदस्य लक्ष्यपरत्वादिति वाच्यम् । कालिकादिसम्बन्धावच्छिन्नाया गुणत्वाद्यधिकरणतायाः जातित्वेऽपि सत्त्वात्, साध्यताघटकसम्बन्धावच्छिन्नाधिकरणत्वनिवेशे च जलं रूपवत् द्रव्यभिन्नत्वादित्यादावसिद्धयुन्नायके निर्गुणत्वादावव्याप्तेः समवायेन द्रव्यभेदत्वावच्छिन्नाधिकरणत्वाप्रसिद्धेः, एवं घटत्वाभाववान् घटत्वादित्यादौ साध्यसाधनवत्त्वबोधस्याहार्यतया तद्विरोधित्वाप्रसिद्ध्या तत्रत्योपाधावव्याप्तिरित्याद्यस्वरसो वदन्तीत्युक्त्वा सूचितः।यत्त्विति।अत्र वृत्तिः शून्यत्वं च स्वरूपसम्बन्धेन ग्राह्यम। शून्यत्वेनेत्युपलक्षणं साध्यसाधनवन्ताविति।आकारधीप्रकारत्वेनाप्यनुगमो बोध्यः।निरुक्तधर्मशून्यस्य साध्यताघटकेन हेतुताघटकेन येन केन चिद्धा सम्बन्धेनावच्छिन्नस्याभावस्योन्नायकत्वं निवेशितं सर्वमप्ययुक्तमिति क्रमेणाह यत्रेति। तत्र पर्वतो वन्हिमान्तदीयरूपादित्यादौ। अन्यत्रैकसम्बन्धेन साध्यहेतुस्थले। अपिना विभिन्नसम्बन्धेन हेतुसाध्यस्थलस्य समुच्चयः। ननु साध्यतावच्छेदकसम्बन्धावच्छिन्नसाध्याभावान्यत्वे सति साधनताघटकसम्बन्धानवच्छिन्नसाधनाभावान्यत्वेन निरुक्तधर्मशून्याभावस्य विशेषणान्नोक्तदोष इत्यत आह किं चेति। निरुक्ताभावप्रतियोगितावच्छेदकस्य सम्बन्धस्य वितर्केण दोषमुक्त्वा धर्मस्य वितर्केण तमाह किञ्चेतीत्यपि

भिमतम्, नाद्यः, साध्यसाधनान्यतरवति तदसम्भवात् । नान्त्यः, धूमेन पर्वते वन्हौ साध्ये महानसीयवन्हित्वाद्यवच्छिन्नाभावोन्नायकमहानसत्त्वादावतिव्याप्तेः । यच्च पक्षावृत्तित्वे सति ये साधनवदवृत्तयस्तच्छून्यत्वेन पक्षसाधनवन्ताविति प्रमाविशेष्यत्वेन वा द्रावनुगतीकृत्य तत्र साध्यव्यावर्त्तकत्वमर्थमाहुः । तत्र यदि सत्प्रतिपक्षव्यभिचारयोरन्यतरमात्रोन्नायकत्वं दूषकतावीजं तदा द्वयोरनुगमनमफलम् । अथ यथासम्भवमुभयोन्नायकत्वं तदा अवृत्तिहेतुके सत्प्रतिपक्षोन्नायकेऽव्याप्तिः । यदपि च पक्षतावच्छेदके साधने च न वर्त्तते यत्तच्छून्यस्य पक्षतावच्छेदकसाधने इति प्र-

---

कश्चित् । वन्हित्वादीत्यादिना हेतुतावच्छेदकीभूतधूमत्वस्योपग्रहः । साध्यतावच्छेदकधर्मानवच्छिन्नसाध्याभावान्यत्वे सति साधनतावच्छेदकधर्मानवच्छिन्नसाधनाभावान्यत्वेनापि निरुक्ताभावस्य विशेषणे तु नायमपि दोष इति ध्येयम् । यच्चेति । अत्रापि वृत्तिः शून्यत्वं च विशेषणतया बोध्यम् । लाघवादाह पक्षेति । साधनवत्त्वभ्रमविशेष्ये ह्रदादौ साध्यव्यावर्त्तकस्य वन्हिसामान्यादेः प्रसिद्धानुमानवारणाय प्रमानुसरणम् न चैवं काञ्चनह्रदो वन्हिमान् काञ्चनधूमादित्यादौ वन्हिसामान्यादावव्याप्तिः प्रकृतपक्षादेः प्रमात्वाप्रसिद्धेरिति वाच्यम् । ह्रदादेरेव पक्षादिपदेन कर्त्तव्यत्वात् शब्दानुगमस्याकिञ्चित्करत्वादिति भावः । द्वयोः पक्षसाधनवतोः । अफलमिति । प्रत्येकान्तर्भावेणैव निरुक्तेः सम्यक्त्वात् । इदं च प्रथमकल्पे, द्वितीयकल्पे तु प्रमायास्तद्वयक्तित्वेन निर्वेशान्नैष दोषः।उभयं ज्ञायकत्वं साधनवत्पक्षोभयधर्मिकसाध्यवत्तावुद्धिसामान्यविरोध्युन्नायकत्वम्। अव्याप्तिरिति । ह्रदो वन्हिमान् गगनादित्यादौ साधनवतोऽप्रसिद्धेरिति भावः।उक्ताव्याप्तिं निरस्यतां मतमाह यदपीति।विशिष्टसत्तावान् गुणो विशिष्टसत्त्वादित्यादिसद्धेतुस्थले पक्षतावच्छेदकावृत्तिधर्मशून्यस्य सत्त्वस्याधिकरणे गुणादौ साध्यव्यावर्त्तके द्रव्यत्वादावतिव्याप्ते-

तीतिविशेष्यस्य वाऽऽश्रये साध्यव्यावर्त्तकत्वमर्थमाहुः । तत्रापि किं येन सम्बन्धेन हेतुता तेन, अथ येन पक्षतावच्छेदकं पक्षे वर्त्तते तेन, उत येन केन चित्तादृधर्मश्रये साध्यव्यावर्त्तकत्वमभिमतम् । नाद्यः, जलं वन्हिमद्धूमादित्वादौ जलपक्षकवन्हिसाध्यके संयोगसम्बन्धेन साधने धूमादौ वन्हिसामग्र्यादावव्याप्तेः । पक्षतावच्छेदकस्य संयोगेनावृत्तेः संयोगेन धूमवतश्च वन्हिमत्त्वनियमात् । न द्वितीयः, घटो जातिमान् मेयत्वादित्वादौ समवायित्वादावव्याप्तेः, वन्हिमत्पर्वतपक्षके पर्वतो वन्हिमान् धूमादित्वत्र धूमावयवे वन्हिव्यावर्त्तके वन्हिसामग्र्यादावतिव्याप्तेश्च । अत एव

राह पक्षतावच्छेदकसाधनेति । प्रतीतिरत्र प्रमा ग्राह्या तेन पर्वतत्वधूमाविनिभ्रमविशेष्यस्य बाष्पाश्रये वन्ह्यादव्यावर्त्तके तत्सामग्र्यादौ नातिप्रसङ्गः । तेनेति । पक्षतावच्छेदकताघटकेनेति फलितार्थस्तेन कर्म जन्यं पतनत्वादित्यादौ कालिकसम्बन्धेन पक्षनिष्ठस्य कर्मत्वादेस्तत्सम्बन्धेनाश्रये महाकालादौ साध्यव्यावर्त्तकस्यानित्यत्वादेर्नोपाधित्वप्रसङ्गः । नाद्यः कल्पः। एवमग्रेऽपि । ननु तत्र निरुक्तधर्मस्याश्रये धूमवत्येव वन्हिव्यावर्त्तकत्वान्नाव्याप्तिरत आह संयोगेन धूमवतश्चेति । अव्याप्तेरिति । समवायेन निरुक्तधर्मवतः पक्षस्य जातिमत्त्वनियमादिति भावः । ननु पक्षतावच्छेदकहेतुताघटकसम्बन्धयोरन्यतरेण निरुक्तधर्माश्रयत्वस्य वक्तव्यत्वान्नाव्याप्तिरत आह वन्हिमदिति । निर्वन्हिपर्वतस्यं पक्षत्वे वन्हिसामग्र्यादेलक्ष्यतया वन्हिमत्पर्वतानुसरणम् । अत एव उक्तातिव्याप्तेरेव । इतरो यथाकथंचित्सम्बन्धेन तादृशधर्माश्रयत्वगर्भः । इत्यादीति । साधनवत्त्वपक्षतावच्छेदकवत्त्वयोरन्यतरस्य स्वरूपसम्बन्धेनाश्रये साध्यव्यावर्त्तकत्वात् प्रतिपक्षोन्नायके गगनादिहेतुकोपाधौ अव्याप्तेरिति भावः । ननु यद्व्यभिचारेणेत्यादिना त्वदुक्तस्य व्यभिचारोन्नायकत्वगर्भलक्षणस्य ज्ञानं नानुमानविरोधीत्यनुयोगस्य तुल्यत्वमत

लक्षणं व्यतिरेकिधर्मत्वम् । पक्षेतरोऽपि क्व चि-
दुपाधिः । तत्तदुपाधेस्तु तत्तत्साध्यव्यापकत्वे सति
तत्तत्साधनाव्यापकत्वम् । न च धूमवह्निसम्बन्धो-
पाधिः पक्षेतरत्वं स्यादिति वाच्यम् । आपाद्याप्रसि-
द्धेरिति । तन्न । अनुमितिप्रतिबन्धकज्ञानविषयतावच्छे-
दकमुपाधित्वमिह निरूप्यं तच्च न व्यतिरेकित्वमतिप्रस-
ङ्गात् विशेषलक्षणे वह्निधूमसम्बन्धे पक्षेतरत्वस्योपाधि-

नेतरोऽपीत्यादि स्वयमूहनीयमिति कृतं पल्लवितेन । आपाद्या-
प्रसिद्धेः । आपाद्यस्य वन्हिव्यापकत्वे सति धूमाव्यापकत्वस्या-
प्रसिद्धेः । अनुमितीति । अस्मदुक्तं व्यभिचारोन्नायकत्वं तदुन्नयं-
नस्वरूपयोग्यत्वं तद्व्याप्यपक्षधर्मतारूपं पर्य्यवसितसाध्यव्यापक-
त्वादिकञ्चानुमितिप्रतिबन्धकज्ञानविषयतावच्छेदकमेवेति भावः ।
ननु सामान्यलक्षणमितरव्यावृत्त्यौपयिकं विशेषलक्षणन्तु दूषक-
तायामुपयुज्यत इत्यत आह विशेषेति । यथाश्रुतेऽवच्छिन्नसाध्य-
व्यापकोपाध्यव्याप्त्या यत्किञ्चिद्धर्मावच्छिन्नसाध्यव्यापकत्वमेव व-
क्तव्यं तथा च वन्हिना धूमस्य धूमेन वन्हेर्वा साधने पक्षेतरस्य
तद्रूपज्ञानादनुमितिप्रतिबन्धापत्तिरित्यर्थः । व्यवहारौपयिकत्वे च

आह अस्मादिति । अनुमिति प्रतिबन्धकत्वं तत्प्रतिकूलत्वं तच्च सा-
क्षात्परम्परया वेत्यन्यदेतत्।दूषकतायां व्यभिचारोन्नायकत्वरूपायाम।
पर्वतेतरत्वादेः शुद्धसाध्यव्यापकत्वायोगादाह यथाश्रुत इति । ननु
पर्वतो धूमवान् वन्हेरित्यत्र पक्षेतरत्वमुपाधिर्भवत्येव परन्तु कथायां न

तत्रोपाधिव्यवहारापत्तिः पर्य्यवसितेत्याद्यभिधाने चास्मन्नयप्रवेश इति भावः। व्यवहारौपयिकं स्वव्यभिचारेण साध्यव्यभिचारोन्नायकत्वम्। लक्षणन्तु तत्तत्साध्यसमानाधिकरणत्वे सति तत्तत्साधनाव्यापकत्वं साध्यसाधनभेदाद्भिन्नमेव। वस्तुतो व्यभिचारिणः साधनस्यैवानुप्रवेशाच्च नातिप्रसङ्गः। न च रूपेण गुरुत्वे साध्ये पृथिवीत्वाभावादेरुपाधितापत्तिः गुरुत्वव्यभिचारिरूपव्यक्तेस्तद्व्याप्यत्वात् तदव्याप्यरूपव्यक्तेश्च गुरुत्वाव्यभिचारादिति। दूषणतौपयिकन्तु यथासम्भवमननुगतमेवेति मतमिदं परे

प्रयुज्यते इत्यत आह धूमेन वन्हेर्वेति।तद्रूपेति।किञ्चिद्धर्मावच्छिन्नसाध्यव्यापकत्वज्ञानादित्यर्थः। प्रतिबन्धापत्तिरिति।तथा चोपाधित्वप्रसङ्गाच्चेतिमूलस्यानुमितिविरोधित्वप्रसङ्गादित्यर्थः। ननु विशेषणलक्षणमपि तत्तद्धेतुसाध्यकोपाधिव्यवहारौपयिकमेव वाच्यं न तु दूषणौपयिकमत आह व्यवहारेति। तत्र धूमादिना वन्ह्यादेः साधने उपाधित्वव्यवहारापत्तिः। पक्षेतरत्वस्येत्यनुषज्यते। ननु यद्धर्मावच्छिन्नसाध्यस्य व्यापकत्वं तदवच्छिन्नस्यैव साधनस्याव्यापकत्वं दूषणस्य व्यवहारस्यचौपयिकमुपाधित्वं वाच्यमत आह पर्य्यवसितेति।पर्य्यवसितेत्यादेरर्थाभिधाने चेत्यर्थः।यत्त्वित्यादिकं परिष्कुर्वतां मतमाह व्यवहारौपयिकमिति। व्यतिरेकिधर्मत्वमात्रग्रहे कथकानामुपाधिव्यवहाराभावादाह स्वेति।व्यभिचारपदे व्यतिरेकपरे। तथा च साधनवति साध्यव्यतिरेकोन्नायकव्यतिरेकप्रतियोगित्वरूपव्यतिरेकिविशेष एव व्यतिरेकिपदस्य तात्पर्य्यमिति भावः। लक्षणमितरभेदकम्।साध्यव्यापकत्वं शाकपाकजत्वादावसम्भवीति तद्बलम्परिष्कृत्याह तत्तु साध्यासामानाधिकरणत्व इति। द्रव्यं रूपादित्यादौ घटत्वादेर्वारणायाह वस्तुत इति। वस्तुगत्या साध्यव्यभिचारि यत् साधनं तस्य तद्व्यक्तित्वेन निवेशादित्यर्थः। तद्व्याप्यत्वात् पृथिवीत्वाभावव्याप्यत्वात्। तथा च तद्व्यक्त्यव्यापकत्वं न पृथिवीभावस्येत्यर्थः। अननुगतमेवेति। क चित् शुद्ध-

परिष्कुर्वन्ति । तन्न साधीयः । तथा हि, साध्यसाधनव्यक्तिस्वरूपगर्भं नोपाधित्वमपि तु साध्यतावच्छेदकसाधनतावच्छेदकधर्मगर्भं तत्तद्गुणत्वेन सकलगुणव्यक्तिषु सोपाधेरपि द्रव्यत्वस्य गुणत्वेन सकलगुणेष्वेव निरुपाधित्वात् । गुणत्वेन गुणे साध्ये सत्त्वेन रूपेण सोपाधेरपि सत्ताया गुणकर्मान्यत्वविशिष्टसत्त्वेन निरुपाधित्वात् । तथा च तद्रूपावच्छिन्ने साध्ये तद्रूपावच्छिन्ने साधने च क उपाधिरित्यत्र तद्रूपावच्छिन्नसाध्यसमानाधिकरणत्वे सति तद्रूपावच्छिन्नसाधनाव्यापकत्वमनुगतं लक्षणं वाच्यं न तु तद्रूपावच्छिन्नतत्तत्साधनव्यक्त्यव्यापकत्वमनुगमात् । तथा च गुरुत्वत्वावच्छिन्नसमानाधिकरणस्य रूपत्वावच्छिन्नाव्यापकस्य पृथिवीत्वाभावादेरुपाधित्वं दुर्वारं व्यभिचारित्वेन साधनविशेषणन्तूप-

---

साध्यव्यापकत्वे सति साधनाव्यापकत्वं क चिद्यावच्छिन्नसाध्यव्यापकत्वे सत्यवच्छेदकीभूतधर्मावच्छिन्नसाधनाव्यापकत्वमित्यर्थः । साध्यसाधनेति । यद्यपि साध्यव्यक्तिस्वरूपगर्भत्वस्यानुक्तत्वात् खण्डनमभुक्तवान्तप्रायम् । तथापि दृष्टान्तोवधया तदुक्तम् गुणव्यक्तिषु साध्यासु सत्ताया हेतोः क उपाधिरित्यस्य किमुपाधीतरभेदकमित्यर्थः । ननुसाध्यसमानाधिकरणत्वे सति तद्व्यभिचारिसाधनाव्यापकत्वं वाच्यमतो नाननुगम इत्यत आह व्यभिचारित्वेनेति । तथा च तदुक्तावस्मन्मतप्रवेश इति भावः । अत्रेतरभेदानुमापकानामननुगमस्यादोषत्वान्नेदं युक्तं न वाननुगमेऽपि गुरुत्वसाध्यकरूपहेतुकोपाधितरेभ्यो भिद्यते गुरुत्वसमानाधिकरणत्वे सति तैजसरूपाव्यापकत्वात् इत्येवं क्रमेणानुगतस्यैव तत्तद्रूपाव्यापकत्वस्य इतरभेदानुमापकत्वसम्भवादित्यस्मद्गुरुचरणाः । साधनव्यापकस्य व्यभिचारोन्नायकत्वासम्भवादाह उपाधिलक्षण इति । दूषकतायां प्रतिपक्षोत्थापकत्वरूपायां विफलत्वमुक्त्वा क्षतिकरत्वमप्याह अव्याप्तीति । ह्रदो वन्हिमान् धूमादित्यादौ वन्हिसामग्र्यादावव्याप्तिकर-

त्वप्रसङ्गाच्च।के चित्तु साधनव्यापकोऽप्युपाधिः क्व चिद्यत्र पक्षावृत्तिर्हेतुः । यथा करका पृथिवी कठिनसंयोगात् इत्यत्रानुष्णाशीतस्पर्शवत्त्वम् । न च तत्र स्वरूपासिद्धिरेव दोषः, सर्वत्रोपाधेर्दूषणान्तरसङ्करादित्याहुः ।

दर्शितमेवेति सङ्क्षेपः । उपाधिलक्षणे साधनाव्यापकत्वं न विशेषणं दूषकतायामनुपयोगात् अव्याप्तिपरत्वाच्चेति । सत्प्रतिपक्षोन्नायकत्वेनोपाधेर्दूषकतावादिनामभिप्रायं प्रकाशयति के चित्त्विति । साध्यतावच्छेदकावच्छिन्नं साध्यञ्च नोपाधिः परं प्रत्युद्भाव्यः साध्याविशिष्टत्वात् पक्षे साधनस्य निश्चयेऽनुमानस्य वैयर्थ्यात् अनिश्चये च तस्यायोगात् । सन्दिग्धोपाधित्वेनापि न

त्वाच्चेत्यर्थः । नव्यास्तु के चिदित्यादिमूलं स्वरूपासिद्ध्युन्नायकतावादिनामेव मतप्रकाशकं न चाऽपिकारविरोधस्तेन शुद्धसाधनाव्यापकस्य समुच्चायनात्तन्मते पक्षावृत्तित्वे सति पक्षधर्मावच्छिन्नसाधनाव्यापकत्वस्यैव उपाधित्वादिति प्राहुः । साध्यस्य रूपान्तरेण उपाधितयोद्भावनादाह साध्यतावच्छेदकेति । तादृशरूपावच्छिन्नसाध्येष्युपाधिलक्षणसत्त्वादाह परं प्रत्युद्भाव्य इति । [रूपवान् द्रव्यत्वादित्यादौ पृथिवीत्वाभावादेरिव सर्वत्रासद्धेतौ साध्यस्यापि तान्त्रिकाणामुपाधित्वेनाव्यवहार्य्यत्वात्तदपि नोपाधिपदार्थः । तथा च सर्वत्र लक्षणे धर्मिणि साध्यान्यत्वस्योपाधितावच्छेदके वा साध्यतावच्छेदकान्यत्वस्य विशेषणीयत्वादिति तु परमार्थः ।] साध्याविशिष्टत्वस्य दूषकतावीजमाह पक्ष इति । व्यभिचारानुमानस्येत्यादिः । साधनस्य व्यभिचारात्मकस्याऽनुमानवैयर्थ्यादिति । तत्कर्त्तव्यस्य व्यभिचारनिश्चयस्य प्रागेव सत्त्वादिति भावः । अनिश्चये चेति । साध्यस्येत्यनुषज्यते । तस्य अनुमानस्य । अयोगादिति । पक्षधर्मतानिश्च-

साध्यञ्च नोपाधिः, व्यभिचारसाधने साध्याविशिष्टत्वात् अनुमितिमात्रोच्छेदप्रसङ्गाच्च ।

स चायं द्विविधः। निश्चितः सन्दिग्धश्च।साध्यव्यापकत्वेन साधनाव्यापकत्वेन च निश्चितो व्यभिचारनिश्चयाधायकत्वेन निश्चितोपाधिः।यथा वह्निमत्त्वेन धूमवत्त्वे साध्ये आर्द्रेन्धनप्रभवत्वम्।यत्र साधनाव्यापकत्वसन्देहः साध्यव्यापकत्वसंशयो वा तदुभयसन्देहो वा तत्र हेतुव्यभिचारसंशायकत्वेन सन्दिग्धोपाधिः । यथा मित्रातनयत्वेन श्यामत्वे साध्ये शाकाद्याहारपरिणतिजत्वम् ।

तदुद्भावनमित्याह अनुमितीति । हेतौ साध्यव्यभिचारः सन्दिग्धश्चेत् कृतं सन्दिग्धोपाधिना असन्दिग्धश्चेत्कथं तस्य सन्दिग्धोपाधित्वमिति तु तत्त्वम् ।

हेतुव्यभिचारेति । व्याप्यसंशयस्य व्यापकसंशयहेतुत्वादिति भावः । न च तत्र मानाभावः, कोटिस्मरणादित एव तदुपपत्तेः, क्व चित्तदनुविधानस्यापि व्याप्यतदभावयोर्व्यापकतदभावसाहचर्य्यस्य गृहीतत्वेन ततस्मरण एवोपक्षीणत्वात् तदग्रहे तु तत्संशयाद्व्यापकसंशयस्याप्यभावादिति वाच्यम् ।

यस्य तद्धेतुत्वादिति भावःतर्कादिना हेतोः साध्यव्याप्यतानिश्चयस्थले अनुमित्युच्छेदायांगादाह हेताविति । तस्य साध्यव्यभिचारसंशयाजनत्वादिति भावः ॥

इत्युपाधिलक्षणनिरूपणम् ।

न च तेनैव हेतुना शाकपाकजत्वमपि साध्यम । तत्र श्यामत्वस्योपाधित्वादुभयस्यापि साधने अर्थान्तरं श्यामत्वमात्रे विवादो न तूभयत्र । न चैवं धूमाद्वन्ह्यनुमानेऽपि वह्निसामग्र्युपाधिः स्यात्, तत्र वह्निनेव तत्सा-

---

महानसे हुताशनो न जलह्रदे इति स्मरतां पर्वतादिकमपि पश्यतां धूमादिसंशयभावाभावाभ्यां हुताशनसंशयभावाभावदर्शनात्तस्यापि तद्धेतुत्वात् । अत एवोत्कटकोटिकाद्व्याप्यस्य संशयाद्व्यापकस्याप्युत्कटकोटिकः संशयः, कारणोत्कर्षेणैव कार्य्योत्कर्षात् । समाने-

---

अथोपाधिविभागः ।

न चेति । वाच्यमित्यग्रेऽन्वयः । तत्र व्याप्यवत्तासन्देहस्य व्यापकसन्देहहेतुत्वे। तत्स्मरण इति । व्यापकतदभावयोः स्मरण एव हेतुत्वादित्यर्थः । तदग्रहे । उक्तसाहचर्यस्याग्रहे । महानस इत्यादिना कोटिद्वयस्मरणं पर्वतादिकमित्यादिना च धर्मिज्ञानतत्सन्निकर्षयोः सत्त्वमावेदितम् । तस्य व्याप्यवत्तासंशयस्य । तद्धेतुत्वात् व्यापकवत्तासन्देहहेतुत्वात् । निरुक्तान्वयव्यतिरेकयोर्विवादग्रस्तत्वादाह अत एवेति । कारणेति । तथा च यद्विशेषयोरिति न्यायोप्यत्र प्रमाणमिति भावः । इदमप्यापाततः, तत्कोटिसहचरितधर्मवत्तया गृहीतधर्मिकत्वपर्यवसितस्य तत्कोटयुत्कटत्वस्य कार्यतानवच्छेदकत्वात् अत एव वदन्तीत्यपि वक्ष्यते । नन्वेवं समानेत्यादिविरोधस्तेन भाष्यकृन्मते पञ्चधा टीकाकृन्मते च त्रिधा संशयस्य विभजनादत आह समानेत्यादि । समानेकधर्मोपपत्तेर्विप्रतिपत्तेरुपलब्ध्यनुपलब्ध्यव्यवस्थातश्च विशेषापेक्षो विमर्शः संशय इति प्रथमाध्याये सूत्रं तत्र विरुद्धकोट्यो-

मग्न्यापि समं धूमस्यानौपाधिकत्वनिश्चयात् । अत्र तु मित्रातनयत्वव्याप्यश्यामसामग्न्या स्थातव्यमित्यत्र कार्यकारणभावादीनां व्याप्तिग्राहकाणामभावात् । अत एव साध्यसामग्न्या सह हेतोरपि यत्र व्याप्तिग्राहकमस्ति तत्र सामग्री नोपाधिः यत्र तु तन्नास्ति तत्र साप्युपाधि-

---

स्यादि सूत्रन्तूपलक्षणपरं तत्रस्थश्चकारो वा अनुक्तसमुच्चयार्थ इति वदन्ति । कोटिद्वयसहचरितधर्म्मवत्तया धर्मिज्ञानं हेतुः, धर्म्मस्य चैकत्वं ज्ञानस्य च निश्चयत्वं नोपयुज्यते, गौरवात् । अवगाहते च लिङ्गसन्देहो लैङ्गिकतदभावसहचरितौ लिङ्गतदभावौ धर्मिणि । तथा च साधारणधर्म एव तस्यान्तर्भाव इति तु नव्याः । लिङ्गतदभावयोः प्रत्येकमेकैककोटिसाधारण्येऽपि मिलितयोरसा-

---

रेव विमर्शः संशय इति लक्षणं स च समानधर्मस्य उपपत्तितोऽनेकधर्मस्योपपत्तितो विप्रतिपत्तेः प्रमात्वसन्देहपर्य्यवसन्नोपलब्ध्यव्यवस्थातो भ्रमत्वसंशयपर्य्यवसितानुपलब्ध्यव्यवस्थातश्च यो विशेषः कोट्युपस्थितिः तदपेक्षतया पञ्चविध इति भाष्यकृतःपूर्वत्रिकमन्तर्भाव्य संशयस्त्रिविध एव विशेषणस्योपलब्धिर्बाधानुपलब्धिर्विशेषदर्शनरूपव्यवस्थाविरहश्च विशिष्टधीसामान्यहेतुतया संशयस्थलेऽप्यपेक्षणीय इत्येतावन्मात्रबोधनाय उपलब्ध्यादित्रिकस्योपादानमिति तु टीकाकृदादिस्वरससिद्धः संशयसूत्रस्यार्थः । तत्रस्थः समानेत्यादिसूत्रस्थःसप्तम्याः प्रायेणकृतीत्यलुकि रूपमिदम्।कोटिद्वयेति । तत्सहचरितधर्मवत्ताज्ञानत्वतदभावसहचरितधर्मवत्ताज्ञानत्वाभ्यामेव ततसंशयत्वावच्छिन्नं प्रति हेतुत्वमित्यर्थः।गौरवादिति।तत्तदभावसहचरितैकधर्मवत्तानिश्चयत्वेनापि हेतुतायां तत्तदभावसह-

धारणत्वं सत्प्रतिपक्षस्थले विरुद्धयोरिव हेत्वोरिति टीकाकारानुयायिनः। इत्थञ्च साधनाव्यापकत्वसन्देहे साध्यव्यापकव्यभिचारसन्देहात् साध्यव्यभिचारसन्देहो हेतौ स्फुट एव साध्यव्यापकत्वसन्देहे तु साधनाव्यापकव्याप्यत्वसन्देहात्साध्ये साधनाव्यापककत्वसन्देहो बोध्यः। उपाधेः साध्यव्यापकत्वसन्देहेनाहितात्साधने साध्यव्यापकव्यभिचारसन्देहात्साध्यव्यभिचारसन्देहः। इत्थमेव च दलद्वये संशयस्थले व्यभिचारसंशयस्यो-

---

चरितत्वयोर्विशेषणविशेष्यभावभेदेन हेतुताद्वयस्यावश्यकत्त्वादिति भावः। लैङ्गिकम्।साध्यम्।लिङ्गतदभावाविति।साध्यसहचरितं लिङ्गं तदभावसहचरितञ्च लिङ्गाभावमित्यर्थः। साधारणेति। साधारणधर्मवत्ताज्ञान एवेत्यर्थः। सर्वत्र व्याप्यवत्तासंशयस्य व्यापकसहचरितत्वेन लिङ्गाभावावगाहित्वेऽपि व्यापकाभावसहचरितत्वेन तदभावावगाहित्वे प्रमाणाभावात्तदानीं च व्यापकसंशयस्यानुभविकत्त्वान्नेदं युक्तमित्यस्वरसो नव्या इत्युक्त्या व्यञ्जितः। असाधारण्यं प्रत्येककोटिमद्वयावृत्तत्वम्।टीकाकारेति।तैः साध्यतदभावव्याप्यवत्तानिश्चययोः साध्यसंशये साधनत्वोपगमादिति भावः।व्याप्यवत्तासंशयेन व्याप्यतदभावयोर्मिलितत्वेनाग्रहणान्नेदं युक्तमिति ध्येयम्।इत्थं चेति।व्याप्यसंशयस्य व्यापकसंशयहेतुत्वे चेत्यर्थः। स्फुट एवेति। साध्यव्यापकव्यभिचारस्य साध्यव्यभिचारव्याप्यत्वादिति भावः। साध्य इति। साधनाव्यापकव्याप्यत्वस्य साधनाव्यापकत्वव्याप्यत्वादिति भावः। मिश्रमतमाह उपाधेरिति। भूतले घटस्य निश्चयेऽपि घटो नीलो न वेति संशयोत्तरं भूतलं नीलघटवन्न वेत्याकारकसंशयवत् साधनस्योपाधिव्यभिचारित्वनिश्चयेऽप्युपाधिः साध्यव्यापको न वेति संशयोत्तरं हेतुः साध्यव्यापकोपाधिव्यभिचारी न वेत्याकारसंशयस्य औचित्यावर्जितत्वादिति भावः। इत्थमेवेति। उपाधेःसाधनाव्यापकत्वसन्देहेनाहितात् साधनाव्यापकव्याप्यत्वसन्देहादेव तत्र साध्ये साधनाव्यापकत्वसन्देहस्य उपेयत्त्वादिति भावः। संशयमात्रस्याभावकोटौ विशिष्टवैशिष्ट्यावगाहित्वनियमादुक्तरीत्या संशय

रित्यभिसन्धाय सामग्री च क्व चिन्नोपाधिर्न तु सर्वत्र इत्युक्तम् । यथा तुल्ययोगक्षेमयोरुपाधेर्व्यापकतासन्देहे ईश्वरानुमाने शरीरजन्यत्वाणुत्वादिः यथा च शाकपाकजत्वस्य साध्यव्यापकतासन्देहे मित्रातनयत्वे । यत्तु उपाधिसन्देहो नोपाधिर्न वा हेत्वाभासान्तरमिति तदुद्भावने निरनुयोज्यानुयोगइति । तन्न । सन्दिग्धानैका-

---

क्तिसम्भव इत्यपि वदन्ति । उभयेति । एकांशेऽपरस्य एकविशिष्टापरसाध्यतायान्तु एकैकस्योपाधित्वमिति तु तत्त्वम् । ईश्वरेति । वस्तुतः सङ्केतावपि तत्त्वाग्रहदशायामुपाधिसन्देहेन व्यभिचारसन्देह इति भावः । सन्दिग्धेति । न चानैकान्तिकत्वसन्देहः प्रतिबन्धको न तु तज्ज्ञानमिति तदर्थं तदुद्भावनमफलमिति वाच्यम् । अनैकान्तिकत्वसंशयात् मम व्याप्तिग्रहो

एवासिद्ध इत्याशयेनाह वदन्तीति। अर्थान्तरस्य पुरुषदोषत्वादनुमानदोषमाह एकांश इति। स श्यामत्ववान् शाकपाकजत्ववांश्च मित्रातनयत्वादित्यनुमाने श्यामत्वांशे शाकपाकजत्वस्य तदंशे च श्यामत्वस्योपाधित्वमित्यर्थः । ननु सः श्यामत्वविशिष्टशाकपाकजत्ववान् मित्रानयत्वादित्यनुमानस्यैकमात्रसाध्यकत्वान्न तत्रैकांशेऽपरस्योपाधित्वसम्भव इत्यत आह एकविशिष्टेति।एकैकस्येति । श्यामत्वस्य शाकपाकजत्वस्य वेत्यर्थः।ननु क्षितिः सकर्तृका कार्य्यत्वादिति ईश्वरानुमानस्य सङ्केतुत्वात् कथं सन्दिग्धोपाधित्वमत आह वस्तुतः सङ्केतावपीति । वस्तुगत्या सङ्केतावपीत्यर्थः । तत्त्वस्य सङ्केतुत्वस्य। अग्रहदशायाम् । तदर्थमिति।अनैकान्तिकत्वसन्देहस्य ज्ञानार्थमित्यर्थः । तस्य अनैकान्तिकत्वसन्देहस्य। उद्भावनमफलमदोषः । मा-

न्तिकत्वद्व्यभिचारसंशयाधायकत्वेन दूषणत्वादुपाधेरिव व्यभिचारनिश्चयाधायकतया ।

मा भूदित्यभिप्रायेण प्राचां हेतुदोषत्वेनासाधकतासाधकतया जिज्ञासादिद्वारा परम्परया सन्देहोपयोगित्वेन च तदुद्भावनस्य साम्प्रदायिकत्वात् ॥

भूदिति नास्तीत्यर्थकम्।अभिप्रायेणेति।तदुद्भावनस्य सांप्रदायिकत्वादित्यग्रेऽन्वयः । ननु व्याप्यग्रहज्ञानस्याप्यफलत्वान्नेदं युक्तमत आह प्राचामिति।असाधकतासाधकतया हेतुदोषत्वेनेत्यन्वयः।अथानुमित्यौपयिकधर्मशून्यत्वमसाधकत्वं तत्साधकत्वं च न साध्यव्यभिचारतया सन्दिह्यमानत्वं सद्धेतावपि तत्सत्वात् अत आह जिज्ञासादिद्वारेवेति। अयं हेतुः सन्दिग्धव्यभिचार इत्युद्भावनोत्तरं कुत इति जिज्ञासायां व्यभिचारस्य साधारणधर्मादिकं प्रदर्श्य व्याभिचारसंशयस्य कल्पनादिति भावः । वस्तुतो दुष्टान्तस्य साधनवैकल्यमिव हेत्वाभासभिन्नमपि सन्दिग्धानैकान्तिकत्वं निग्रहस्थानत्वादेवोद्भाव्यते निग्रहसूत्रस्थचकारेण तस्यापि समुच्चितत्वादिति युक्तमुत्पश्यामः। अयं हेतुर्व्यभिचारी न वा सोपाधिर्न वेत्येवमेव सन्दिग्धानैकान्तिकत्वादेरुद्भावनं कार्य्यमयं हेतुर्व्यभिचारीत्यादिकमिव निश्चितव्यभिचारादेः इति तु परमार्थः ॥

इत्युपाधिविभागः ।

इदानीमुपाधेर्दूषकताबीजं निरूप्यते ।

नाप्यस्य व्यतिरेकद्वारा सत्प्रतिपक्षत्वेन दूषकत्वम्, तदा हि सत्प्रतिपक्षे सत्प्रतिपक्षान्तरवदुपाधेरुद्भावनं न स्यात् । न च प्रतिपक्षबाहुल्येनाधिकबलार्थमुद्भावनम्, शतमप्यन्धानां न पश्यतीति न्यायात् एकेनापि बहूनां प्रतिबन्धाच्च । व्याप्तिपक्षधर्मतेति बलं तच्च तुल्यमत्र न तु भूयस्त्वमपि, एकस्मादनुमितिदर्शनात् सन्दिग्धोपाधेरदूषकतापाताच्च । तद्व्यतिरेकस्य पक्षे सन्दिग्धत्वात् । अपि चैवं बाधोन्नीतपक्षेतरस्योपाधित्वं न

उपाधित्वस्य संशये निश्चये च जायमानं यज्ज्ञानमनुमितिं विरुणद्धि तदेवास्य दूषकताबीजमित्यभिप्रायेणाह सन्दिग्धेति। तद्व्यतिरेकस्य क्व चिद्व्याप्यत्वेन क्व चिच्च पक्षधर्मत्वेन सन्दिग्धत्वात् बाधोन्नीतेति । ननु बाधेऽवतीर्णे तत एव हेतोरसाधकत्वात् कृतमुपाधिना, न वासाधारण्यं पक्षस्यैव सपक्षत्वात्, अनवतीर्णे तु

अथोपाधिदूषकताबीजचिन्तनम् ।

ननु सत्प्रतिपक्षोन्नायकतयोपाधेर्दूषकत्ववादिनां मते सन्दिग्धोपाधेरदूषकतायामिष्टापत्तिरत आह उपाधित्वस्येति । अनुमितिं पक्षे साध्यस्य हेतौ च साध्यव्याप्यत्वस्यावगाहिनीम् । लिङ्गोपधानमतेन वेदम् । अस्य उपाधेः । न्यूनतापरिहाराय मध्ये पूरयति क्व चिद्व्याप्यत्वेनेति।यत्रोपाधेः साध्यव्यापकत्वसन्देहस्तत्र तद्भावस्यापि साध्याभावव्याप्यत्वेन सन्दिग्धत्वादिति

स्यात्, व्यतिरेकेऽसाधारण्यात्। पक्षधर्मश्चोपाधिर्न स्यात्। यथा घटोऽनित्यो द्रव्यत्वादित्यत्र कार्य्यत्वं अन्धकारो द्रव्यं स्वातन्त्र्येण प्रतीयमानत्वादित्यत्राश्रावणत्वं तद्व्यतिरेकस्य पक्षावृत्तित्वात्। न च नायमुपाधिः, तल्लक्षणसत्त्वात्। अन्यथा दूषकत्वसम्भवाच्च। किञ्च

नोपाधित्वं पक्षेतरान्तरवत् साध्यव्यापकताया एवाग्रहात्, अनुकूलतर्कादिना कथञ्चित्तद्ग्रहे च नासाधारण्यं व्यतिरेकितयान्वयव्याप्त्यग्रहस्य सत्प्रतिपक्षरूपतया च सत्प्रतिपक्षान्तरस्याकिञ्चित्करत्वादित्यरुचेराह पक्षधर्मश्चेति। पक्षे तद्ग्रहदशायां तदभावग्रहासम्भवादिति भावः। व्याप्तिविरहरूपतां निरस्य व्याप्तिज्ञा-

---

भावः। तत एव बाधावतारादेव। कृतमिति।तथा च तदानीमुपाधेर्दूषकत्वेऽपि न क्षतिरिति भावः। वस्तुगतिमनुरुध्याह न वेति। असाधारण्यं पक्षमात्रवृत्तित्वम्। अनवतीर्णे तु बाध इत्यनुषज्यते। पक्षेतरान्तं पर्वतेतरत्वादि। ग्रह इति। साध्यव्यापकताया इत्यनुषज्यते। नासाधारण्यं क्षतिकरमिति शेषः।ननु पक्षेतरत्वाद्यभावस्य पक्षमात्रवृत्तित्वेन तत्र साध्याभावान्वयव्याप्त्यग्रहादुपाधित्वक्षतिरेवेत्यत आह व्यतिरेकितयेति। साध्यव्यापकीभूतस्वव्यतिरेकत्वतया दूषकतायामिति शेषः। अनुकूलेति। उपाध्यभावे साध्याभावान्वयव्याप्त्यग्रहस्याकिञ्चित्करत्वादित्यन्वयः। नन्वेवं साध्यस्येव तदभावस्यापि व्यापकत्वं पक्षेतरस्य ग्राह्यं सहचारादेस्तुल्यत्वात् तथा च साध्यस्येव तदभावस्यापि प्रतिपक्षोन्नायकत्वं तस्य दुर्वारमत आह सत्प्रतिपक्षरूपतया चेति।पक्षवृत्तेरपि तद्वृत्तित्वभ्रमदशायां प्रतिपक्षोन्नायकत्वसम्भवादाह पक्ष इति। तद्ग्रहदशायां व्याप्यत्वासिद्धत्वं यदि व्याप्तिविरहत्वं तदा पूर्वमताभेद इत्याशङ्क्य निरस्यन्नवतारयति व्याप्तिविरहेति। अनौ-

साध्यठयाप्याठयापकत्वेनोपाधेः साध्याव्यापकत्वे तद्व्यतिरेकेण कथं सत्प्रतिपक्षः, न ह्यव्यापकठयतिरेकादव्याप्यव्यतिरेक। नापि व्याप्तिविरहरूपतया, असिद्धत्वेनानौपाधिकत्वस्य व्याप्तित्वनिरासात्।नाप्यनौपाधिकत्वज्ञानस्य व्याप्तिधीहेतुत्वस्य तत्त्वेन व्याप्तिज्ञानकारणविघटकतया व्याप्यत्वासिद्धावन्तर्भावः। न ह्यन्यस्य साध्यव्यापकत्वसाधनाव्यापकत्वज्ञानमन्यव्याप्तिज्ञानं प्रति प्र-

---

नाभावद्वारकतां निरस्यति नापीति । अनौपाधिकत्वज्ञानस्य औपाधिकत्वज्ञानाभावस्य । कारणविघटकतया कारणाभावरूपतादृशज्ञानविषयतया । अनौपाधिकत्वज्ञानस्य कारणत्वं नान्वयव्यतिरेकसिद्धम् परन्तु सोपाधित्वज्ञानस्य प्रतिबन्धकताया विना कारणीभूतज्ञानविघटनमसम्भवित्वेन कल्पनीयं सैव त्वसिद्धेति दू-

---

पाधिकत्वज्ञानस्येति मूलं यद्यनौपाधिकत्वज्ञानगोचरपरं तदानीमग्रिममूलस्य तदनास्कन्दकत्वेनासङ्गतिरतो व्याचष्टे अनौपाधिकत्वज्ञानस्येति । अत्र च सर्वत्र यथा मूलं सोपाधिकत्वपदमुपाधिपरं विनयादिभ्यष्ठगिति स्वार्थे तद्विधानात् तथा सत्येव न ह्यन्यस्येत्यादिमूलस्य विभिन्नधर्मितापरत्वे प्राप्ते व्याप्तिज्ञाने कारणस्य औपाधिकत्वज्ञानाभावस्य विघटकत्वं प्रतिबन्धकधीविषयत्वमप्रसिद्धं तादृशज्ञानाभावस्य नित्यत्वेनाप्रतिबद्धत्वादतो व्याचष्टे कारणाभावेति।उपाधिज्ञानाभावात्मकं यद्व्याप्तिग्रहकारणं तद्भावरूपौपाधिकत्वज्ञानविषयतयेत्यर्थः । अनौपाधिकत्वज्ञानस्येति मूलस्यानौपाधिकत्वज्ञानार्थकत्ववादिनां मत आह अनौपाधिकत्वेत्यादिनासोपाधित्वज्ञानस्येति । उपाधित्वज्ञानस्येति तदुक्तः पाठः । तथासत्येव भिन्नधर्मिकतामित्यग्रिमग्रन्थसङ्गतेरिति ध्ये-

तिबन्धकमित्युक्तम् । न च साध्यव्यापकाव्याप्यत्वज्ञाने विद्यमाने साधनस्य साध्यव्यापकज्ञानं नोत्पत्तुमर्हतीति वाच्यम् । न हि साध्यव्यापकव्याप्यत्वज्ञानं व्याप्तिज्ञानकारणं येन तत्प्रतिबन्धकं स्यात् । किन्तु साध्यव्यापकव्यभिचारित्वेन साध्यव्यभिचारित्वज्ञानद्वारा । नापि व्यभिचारान्नायकत्वेन, यथा हि साध्यव्यापकव्यभिचारितया साधनस्य साध्यव्यभिचारित्वमनुमेयं तथा साध्यव्याप्यव्यभिचारित्वेन साध्यव्यभिचारित्वमुपाधेरप्यनुमेयं व्याप्तिग्राहकसाम्यात् । नापि

षणतात्पर्य्याद्यथाश्रुतमेव साधीय इत्यपि वदन्ति । व्याप्यत्वासिद्धेर्व्याप्यत्वाज्ञानेऽन्तर्भावस्तद्द्वारा दूषकत्वं भिन्नधर्मिकत्वं परिहरन्नाह न चेति । न हीति। विरोधिविषयकत्वाभावेन साक्षात्प्रतिबन्धकत्वासम्भवादिति भावः । साध्यव्याप्यव्यभिचारित्वेन साध्य-

---

यम् । सैव सोपाधित्वज्ञानस्य प्रतिबन्धकतैव । तात्पर्यादिति । न हीत्यादिग्रन्थस्येत्यादिः । यथाश्रुतमेव कारणविघटकपदं साधीयः व्याप्तिविरहरूपायामसिद्धावन्तर्भावस्यासम्भवादुव्याचष्टे व्याप्यत्वासिद्धेरिति । व्याप्यत्वाज्ञानेऽन्तर्भावो यदि निविष्टस्तदोपाधेस्तदसम्भवि प्रकृतानानुयोगश्चेति अतः फलितार्थमाह तदुद्धारेति । भिन्नधर्मिकत्वमिति । अन्यस्येत्यादिमूलेन तस्याप्राप्तत्वादिति भावः । ननु साध्यव्याप्यत्वबुद्धेः कारणविघटकमपि साध्यव्यापकव्याप्यत्वज्ञानं साक्षादेव 'तत्प्रतिबन्धकं भवत्वत आह विरोधीति । साध्यव्याप्यस्य व्यभिचारित्वं साध्येऽपि

साध्यव्यापकाव्याप्यत्वेन व्याप्तिविरहोन्नायकतया, साध्यव्याप्याव्यापकत्वेनोपाधेरेव साध्याव्यापकत्वसाधनात् । तस्मादुपाधिर्हेत्वाभासान्तरमिति ।

उच्यते । आर्द्रेन्धनवत्त्वादेस्तर्कादिना साध्यव्यापकत्वसाधनाव्यापकत्वे निश्चिते दूषकताबीजचिन्तनम् । यदि हि साध्यसाधनसहचारदर्शनेनोपाधौ साध्यव्यापकत्वनिश्चय एव नास्ति, तदोपाधित्वनिश्चयाभावात् दूषकतैव नास्तीति क्व बहिर्भावान्तर्भावचिन्ता । किञ्च सत्प्रतिपक्षतया व्याप्यत्वासिद्धतया स्वातन्त्र्येण वा यदि दोषत्वं सर्व्वथा साध्यव्यापकतानिश्चयो वाच्यः । तेन विना ते-

---

व्यभिचारित्वमित्युभयत्रैव बहुव्रीहिः । तस्मादित्यादेरदूषणं वेति शेषः ॥

दूषकताबीजचिन्तनमिति निश्चयदशायामधिकृत्य । यन्निश्चयद्वारोपाधित्वनिश्चयस्य दूषकत्वं तत्संशयद्वारा तत्संशयस्यापि

न च तत्र साध्यव्यभिचारित्वं न वोपाधेः साध्यव्यभिचारित्वज्ञानं साध्याव्यापकत्वधीपरिपन्थीत्यत आह साध्यव्याप्येति । तथा च स्वव्यभिचारिसाध्यव्यापकत्वेन स्वव्यभिचारिसाध्यकत्वमनुमेयमित्येव मूलार्थः । तत्राव्यापकस्यापि व्यभिचारपदार्थत्वात्तत्पुरुषेऽपि न क्षतिरिति वदन्ति । उपाधेर्हेत्वभावत्वाविरहाद्धेत्वाभासविशेषद्वयं सम्भवीत्यत आह तस्मादित्यादेरिति ।

साध्याव्यापकत्वसंशयदशायामप्युपाधेः साध्यव्यभिचारसंशायकत्वं दूषकताबीजमतो व्यापकत्वेन निश्चित इति मूलस्यासङ्गतेराह नि-

षामभावात् । तस्मादुपाधिनिश्चयाद्व्यभिचारनिश्चयः तत्संशयात्तत्संशय इति व्यभिचारज्ञानद्वारा साध्यव्यापकाव्याप्यत्वेन व्याप्तिविरहोन्नायकतया वोपाधेर्दूषकत्वम् ।

तथात्वमिति भावः । व्यभिचारज्ञानद्वारेति । मानसे व्यभिचारनिश्चये उपाधिज्ञानं विशेषदर्शनरूपत्वेनोपयुज्यते, व्यभिचारानुमानं पुनरग्रे वक्ष्यति । व्याप्तीति । साध्यसम्बन्धितावच्छेदकरूपविरहः साधनतावच्छेदके साध्यसम्बन्धितानवच्छेदकरूपत्वपर्य्यवसन्नः साध्यवदन्यावृत्तित्वविशिष्टसाध्यवदवृत्तित्वविरहो वोन्नेयः, न तु स्वसमानाधिकरणात्यन्ताभावप्रतियोगिसाध्यकत्वम् ।

अयमिति।तत्संशयस्य उपाधित्वसंशयस्याव्यभिचारज्ञानद्वारेत्यस्य व्यभिचारानुमितिद्वारेत्यर्थे यद्येत्याद्यग्रिममूलेन पौनरुक्त्यापत्तेराह मानस इति। विशेषदर्शनतया अव्यभिचारधीनिवर्त्तकतया । स्वव्यापकसाध्यसामानाधिकरण्यरूपाया व्याप्तेर्विरहो यदि साध्यते तदा स्वपदस्य प्रकृतहेतुपरत्वे साध्याप्रसिद्धिः हेत्वन्तरपरत्वे च प्रकृतहेतौ तादृशभावग्रहस्य व्याप्तिग्रहाविरोधित्वादसङ्गतिरत आह साध्यसम्बन्धितेति। सत्तादौ द्रव्यत्वादिसम्बन्धितावच्छेदकस्य विशिष्टसत्तात्वादेः सत्त्वादाह साधनतावच्छेदक इति। साध्यसम्बन्धितायां अवच्छेदकत्वं यदि स्वरूपसम्बन्धविशेषस्तदेदम्, यदि च साध्यसम्बन्धित्वाभावव्यापकस्वावच्छिन्नसम्बन्धित्वाभावकधर्मत्वं तदा स्वपदस्य प्रकृतसाधनतावच्छेदकपरत्वे पूर्ववत्तद्विरहसाधने अप्रसिद्धिरत आह साध्यवदन्येति । अत्रापि साधनतावच्छेदके साध्यवदन्यवृत्त्यधिकरणतावच्छेदकत्वस्य विरहे तात्पर्य्यम्, यथाश्रुतस्य द्रव्यं विशिष्टसत्त्वादित्यादिसद्धेतुसाधारणत्वादेतद्रूपं रूपत्वादित्यादौ हेतुतावटकसमवायेन साध्यवदन्यावृत्तित्वे सति साध्यवदवृत्तित्वरूपाया व्याप्तेरसिद्धत्वेन तदभावस्य साधयितुमशक्य-

यद्वा साध्यव्यापकाभाववद्वृत्तितया साध्यव्यभिचारि-

स्वत्वस्यानुगतस्याभावेन तत्तत्साधनत्वपर्य्यवसाने साध्यप्रसिद्धिमात्रेणैव कृतार्थत्वात् । साध्यव्यापकोपाधिव्यभिचारित्वेन हेतौ साध्यव्यभिचारित्वं साधनाव्यापकोपाधिव्याप्यत्वेन साध्ये साधनाव्यापकत्वमनुमेयमिति तु नव्याः । व्यतिरेकिणि साधने व्याप्तिविरहस्य व्यभिचारस्य चोन्नयने उपाधिः साधनाभाववद्वृत्तित्वम् । व्यभिचारास्फुटतादशायामुपाध्यनुसरणाद्यत्राधिकरणे हेतोः साध्यव्यभिचारित्वं तदीयधर्मे नास्य साध्या-

---

त्वादिति ध्येयम् । साध्यकत्वमिति । उन्नेयमिति लिङ्व्यत्ययेन पूर्वमनुषज्यते । तत्तदितिअत्र साधने निरुक्तसाध्याव्याप्यत्वं साधनीयं तत्साधनपर्य्यवसान इत्यर्थः । साधनान्तरमन्तर्भाव्य तज्ज्ञानस्य प्रकृतसाधनव्याप्तिग्रहाविरोधित्वादिति भावः । हेतौ साध्यव्यभिचारित्वमिति । उपाध्यभाववद्वृत्तितावच्छेदकत्वेन हेतुतावच्छेदके साध्याभाववद्वृत्तितावच्छेदकत्वं हेतुमति वा उपाध्यभावेन साध्याभाववत्त्वमनुमेयमिति तत्फलितार्थः । उपाधिव्याप्यत्वेनेति । अत्रापि साध्यतावच्छेदके साधनाव्यापकतावच्छेदकत्वं साधनाव्यापकोपाधिव्याप्यतावच्छेदकत्वेनानुमेयमित्यत्र तात्पर्यम् । धूमवान् वाच्यत्वादित्यादौ उपाधिना व्यभिचाराद्यन्नयने साधनाभावस्याप्रसिद्ध्या तद्वद्वृत्तित्वस्योपाधित्वासम्भवात् पूर्वं पूरयति व्यतिरेकिणि साधन इति । साध्यव्यभिचारमात्रस्य साध्यत्वेऽवृत्तिगगनादावित्याग्रिममूलासङ्गतेराह व्याप्तिविरहस्येति । उपाध्यव्याप्यत्वेन साध्याव्याप्यत्वमात्रस्य साधने संयोगादौ हेतौ साधनव्यापकत्वादित्यग्रिममूलासङ्गतिः उपाध्यव्याप्यगगनादौ संयोगाभाववद्वृत्तित्वविरहादत आह व्यभिचारस्य चेति।न चार्द्रेन्धनादिव्यभिचारित्वेन वन्ह्यादौ धूमादिव्यभिचारित्वानुमाने साधनीभूतवन्ह्याद्यभाववद्वृत्तित्वं कथमुपाधिःअयःपिण्डत्वादौ व्यभिचारेण साध्यव्यापक-

त्वमुन्नेयम् । न च साधनाभाववद्वृत्तित्वमुपाधिरिति वाच्यम् । उपाधिमात्रोच्छेदप्रसङ्गात् सत्प्रतिपक्षे पूर्ववत् साधनव्यतिरेकवत् अवृत्तिगगनादौ साध्याव्यापकत्वात् संयोगादौ हेतौ साधनव्यापकत्वाच्च ।

व्यापकत्वग्रहः । उपाधिमात्रेति । तेनापि व्यभिचारानुमाने तत्रापि तथाविधोपाधिसम्भवादिति भावः । वस्तुतस्तु व्यापकव्यभिचारिणो व्याप्याव्यभिचारित्वे व्याप्यव्यापकभावव्याघातापत्त्या हेतोः साध्यव्याप्यत्वेन साधनाभाववद्वृत्तित्वस्य साध्यव्यापकत्वान्नोपाधित्वमिति तत्त्वम् । अवृत्तीति व्याप्यत्वाभावसाधनाभिप्रायेण । साधनाव्याप्यत्वस्योपाधित्वे च नैष दोषः । साधनेति यथाश्रुताभिप्रायेण । प्रतियोगिव्यधिकरणसाधनाभाववद्वृत्तित्वस्य साधनवदन्यवृत्तित्वस्य चोक्तौ तथात्वासम्भवात् । एवञ्च सत्प्रतिपक्षे निश्चितोपाधिवत्सन्दिग्धोपाधिरुद्भाव्यः । न च तत्कर्त्तव्य-

---

त्वाग्रहादत आह व्यभिचारास्फुटतेति । अस्य साधनाभाववद्वृत्तित्वस्य । तेनापीति । साधनाभाववद्वृत्तित्वेनापि स्वव्यभिचारादिना साध्यव्यभिचारादेर्व्यभिचाराद्यनयने साधनव्यभिचारव्यभिचारादेरुपाधित्वसम्भवादित्यर्थः । ननु यत्र निरुपाधिना व्यभिचाराद्यनयनस्थले नोपाध्यन्तरकरणं तत्रैव नोपाधिमात्रस्योच्छेद इत्यत आह वस्तुतस्त्विति । हेतोः साध्यव्याप्यत्वेनेति । उपाधिव्यभिचारित्वादिरूपस्य हेतोः साध्याव्यभिचारित्वादिरूपसाध्यव्याप्यत्वनिश्चयेनेत्यर्थः । व्यभिचारस्य साध्यत्वेऽवृत्तौ तदसत्त्वान्न तदवच्छेदेन साध्यव्यापकत्वमत आह व्याप्यत्वाभावेति । एष गगनादौ साध्यव्यापकत्वरूपः लाघवादाह साधनवदन्येति तथात्वेति । साधनव्यापकत्वसम्भवादित्यर्थः । प्रसङ्गादाह एवं चेति । व्यभिचारधीद्वा-

स्य व्यभिचारसन्देहस्य प्रतिहेतुसमाजादेव सिद्धेः किं तेनेति वाच्यम् । परस्परप्रतिबन्धेनैवानुमित्यनुत्पादे तत्र व्यभिचारसन्देहस्यावश्यमुत्पत्तौ मानाभावात् । उपाधिसन्देहाद्वैशिष्ट्यैकत्र व्यभिचारसन्देहेन तुल्यबलत्वाभावात् । न चाऽतुल्यबलेन सत्प्रतिपक्षो व्यभिचारादिशङ्काधानं वा, स्वरसतः सन्दिग्धव्यभिचारादिनापि तथात्वप्रसङ्गादिति।अत्र च क्व चिदुपाधेस्तुल्यबलत्वे सत्प्रतिपक्षो-

---

रा दूषकत्वे चेत्यर्थः । प्रतिहेतुसमाजादिति। विरोधिपरामर्शयोर्मिथो हेतुद्वये व्यभिचारसंशये हेतुत्वादन्यथा तत्र साध्यद्वयोरनुमित्यापत्तेरिति भावः । प्रतिपक्षस्थले साध्यद्वयोरनुमित्यनुत्पादस्यान्यथैवोपपत्त्या तत्र हेत्वोः व्यभिचारसंशये मानाभाव इत्याशयेनाह परस्परेति । तत्र प्रतिपक्षस्थले उपनीतव्याप्तिनिश्चयेन प्रतिबन्धाच्चेत्यपि द्रष्टव्यम् । नन्वेवमुद्भावितोपाधिसन्देहसमुत्थोऽपि व्यभिचारसन्देहो विफलस्तत्कार्य्यस्यानुमित्युत्पादस्य विरोधिपरामर्शाभ्यामेव सम्पादनादत आह उपाधिसन्देहादिति । एकत्रेति । तथा च तुल्यबलत्वाभावसम्पत्त्यर्थमेव तत्र सन्दिग्धोपाधिरुद्भाव्य इति भावः । ननु तुल्यबलत्वाभावस्यापि निष्फलत्वात् सम्पत्तिरनुचितेत्याह न चेति । सत्प्रतिपक्ष इति। भ्रमत्वज्ञानाद्यनास्कन्दिताभ्यामिव सोपाधित्वभ्रहाभावविशिष्टाभ्यामेव विरोधिपरामर्शाभ्यां मिथोऽनुमितिप्रतिबन्धेन सत्प्रतिपक्षो यथातथाविधाभ्यामेव विरोधिपरामर्शाभ्यां हेत्वोर्व्यभिचारशङ्काधानमित्यर्थः। बलरूपस्य सादृश्यस्य वाचित्वादिति भावः। स्वरसतो लौकिकप्रत्यक्षादिना तथात्वेति । प्रतिपक्षादिप्रसङ्गादित्यर्थः । व्यभिचारिव्याप्यद्वयोः ग्राहकत्वेनैव उपाधेर्दूषकताया मणिकृदुक्तत्वान्मूलस्य न्यूनत्वमपाकर्तुमाह अत्र चेति। तुल्यबलत्व इति । साध्यव्याप्यवत्तापरामर्शवत्प्रबलतत्समानकालीनसाध्याभावव्याप्यत्वाभाववत्तापरामर्शविषयत्व इत्यर्थः । सत्प्रतिपक्षेति । साध्यवत्तानुमितिविरोधीत्यर्थः । अधिकबलत्व इति । भ्रमत्वज्ञानास्कन्दितसाध्यपरामर्शकालीननिश्चितप्रामाण्यकादिसाध्याभावव्याप्यत्वाभाववत्तापरामर्श-

अथोपाध्याभासाः । असाधारणविपर्ययो यथान्वयव्यतिरेकिणि साध्ये बाधोन्नीतान्यपक्षेतरत्वम् । अप्रसिद्धसाध्यविपर्ययो यथा केवलान्वयिनि साध्ये पक्षेतरत्वादिः ।

ज्ञायकतया तर्कादिसाचिव्यादधिकबलत्वे च बाधोज्ञायकतयापि दूषकत्वं व्याप्त्यादिप्रतिसन्धाने तदुभयनस्य ततोऽनुमितिप्रतिरोधस्य च दुर्वारत्वात्, परन्तु सार्वत्रिकत्वं न तस्येति ध्येयम्।

असाधारणविपर्य्यय इति । इदं सत्प्रतिपक्षोज्ञायकत्वमभिप्रेत्य । यद्यपि व्यतिरेकिणा सत्प्रतिपक्षत्वे सदप्रतिपक्षे सदप्रतिपक्षान्तर-

---

विषयत्व इत्यर्थः । व्याप्त्यादीति । उपाध्यभावे साध्याभावव्याप्त्यादिप्रतिसन्धान इत्यर्थः । आदिना पक्षधर्मत्वोपग्रहः । तदुभयनस्य बाधोन्नयनस्य । तत इति । उपाध्यभावे साध्याभावव्याप्त्यादिप्रतिसन्धानत इत्यर्थः । अनुमितीति । साध्यस्येत्यादिः । न सार्वत्रिकत्वमिति । उपाधेः पक्षवृत्तित्वनिश्चयस्थले साध्याव्यापकत्वसन्देहस्थले च तदसम्भवादिति भावः ।

इति दूषकताबीजचिन्तनम् ।

अथोपाध्याभासनिरूपणम् ।

इदम् । स्वव्यभिचारेण साध्यव्यभिचारोज्ञायकतायामुपाधिव्यतिरेकस्य पक्षमात्रवृत्तित्वम् । अत्र धूमवान् वन्हेरित्यादौ साधनवान् साध्याभाववान् तस्मायःपिण्डान्यत्वाभावादित्येवं क्रमेण व्यभिचारोज्ञायकस्याप्ययःपिण्डान्यत्वाभावादेरसाधारणविपर्य्ययत्वसम्भवान्नेदं युक्तमिति चिन्त्यम्। व्यतिरेकिणा साध्यव्यापकीभू-

बाधितसाध्यविपर्ययो यथा वन्हिरुष्णस्तेजस्त्वादित्यत्राकृतकत्वम्। पक्षाव्यापकविपर्ययो यथा क्षित्यादिकं सकर्तृकं कार्यत्वादित्यत्राणुव्यतिरिक्तत्वम् । अत्राणुव्यतिरेकस्य क्षित्यादेरेकदेशवृत्त्या भागासिद्धेः । पूर्व्वसाधनव्यतिरेको यथा शर्करारसोऽनित्योऽनित्यवृत्तिगुणत्वात्, रसो नित्यो रसनेन्द्रियजन्यनिर्विकल्पकविषयत्वात् रसत्ववदित्यादौ ।

स्यादोषत्वान्नासाधारण्यं दोषाय, तथापि सत्प्रतिपक्षोन्नयनौपयिकसाध्यव्यापकत्वग्राहकप्रमाणाभावे तात्पर्य्यम् । तदयं निष्कर्षः । यत्र यदोषोन्नायकतया दूषणत्वमुपाधेस्तत्र तदुन्नयनौपयिकरूपवैकल्यमेवाभासत्वे प्रयोजकम् । एवञ्च यत्र स्थापनायां पक्षतावच्छेदकसामानाधिकरण्येन साध्यसिद्धिरुद्देश्या तत्र पक्षाव्यापकविपर्य्ययस्याभासत्वं तद्विरहेण पक्षैकदेशे सत्प्रतिपक्षेऽप्येकदेशान्तरे

तोपाध्यभावत्वेनाप्रतिपक्षान्तरस्येति।साध्याभावव्यापकतया गृहीतोपाध्यभावत्वत्वस्येत्यर्थः।अदोषत्वात् तत्त्वेनानुद्भाव्यत्वात्।नन्वेतस्य व्यभिचारोन्नायकतापक्षेप्युपाध्याभासतायामविशिष्टत्वात्तदनुक्त्या मूलस्य न्यूनत्वमत आह तदयमिति । पक्षतावच्छेदकसामानाधिकरण्येनेति । पक्षतावच्छेदकरूपेणैकधर्मणीत्यर्थः । पक्षैकदेश इति । पक्षतावच्छेदकाश्रयैकधर्मिणीत्यर्थः । तदेकदेशान्तरे पक्षतावच्छेदकाश्रयीभूतधर्म्यन्तरे । पक्षतावच्छेदकावच्छेदेनेति । पक्षतावच्छेदकस्याश्रये यावतीत्यर्थः । तथात्वं साध्यसिद्धेरुद्देश्यत्वम । तादृशस्य पक्षाव्यावर्त्तकविपर्य्ययकस्य। विरोधित्वादिति। सर्वामदं समानधर्मिकस्यैव तदभावव्याप्यवत्तानिश्चयस्य तद्वत्तावुद्धिं प्रति विरो-

पूर्वसाधनतायाः प्रयोगानुरोधित्वेनाव्यवस्थितत्वात् कदाचिन्नित्यत्वसाधनव्यतिरेकस्योपाधित्वं कदाचिदनित्यत्वसाधनव्यतिरेकित्वस्येति वस्तुव्यवस्था न स्यात्, उपाधेर्निर्दोषत्वाच्च। न हि यद्येन सोपाधिसम्बद्धं तत्तेनानुपाधित्वसम्बद्धं सम्भवति। न तु सत्प्रतिपक्षोच्छेदः पूर्वसाधनव्यतिरेकस्यानुपाधित्वे बीजम्। स्थापनाया यत्राभासत्वं तत्र पूर्वसाधनव्यतिरेकस्य साध्याव्यापकत्वेनानुपाधित्वात्। न च पूर्वहेतोस्तत एवासाधकत्वात् सत्प्रतिपक्षत्वैयर्थ्यं तत्रे-

---

साध्यासिद्धेरप्रत्यूहत्वात्। यत्र तु पक्षतावच्छेदकावच्छेदेन तथा तत्र तादृशस्योपाधित्वमेव, एकदेशे प्रतिपक्षस्यापि तादृशसिद्धिविरोधित्वात्। साध्यविपर्ययस्यासत्त्वमनुपाधित्वे प्रयोजकं न त्वज्ञातम्, अज्ञातस्यापि, तस्य व्यापकव्यतिरेकेण सिद्धिसम्भवात्। अथ सिद्धसाध्यविपर्ययत्वेन चाभासत्वं व्यभिचारोन्नायकतया दूषकत्वपक्षे विनापि साध्यप्रसिद्धिं प्रत्येकपदार्थप्रसिद्धयैव घटो नाभिधेय इत्यादिप्रतिज्ञापत्तेः। व्युत्पादयिष्यते च तत्र प्रतिज्ञाविरहः, व्यापकाभावेनाप्रसिद्धयैव व्याप्याभावस्य सिद्धयभ्युपगमात्। पूर्वसाधनव्यतिरेकत्वन्तु नोपाधित्वेन नाप्यनुपाधित्वेन नियतम्,

---

धित्वमिति प्राचां मते, नव्यमते तु पक्षैकदेशे सत्प्रतिपक्षेऽपीत्यस्य पक्षतावच्छेदकसामानाधिकरण्येन साध्यव्यापकोपाध्यभाववत्त्वनिश्चयेपीत्यर्थः। तदेकदेशान्तर इत्यस्यापि पक्षतावच्छेदकसामानाधिकरण्येनेत्यर्थः इति ध्येयम्। अप्रसिद्धसाध्यविपर्यय इत्यत्र सा-

ति वाच्यम्। अगृह्यमाणविशेषदशायां सत्प्रतिपक्षसम्भवात्। पूर्वसाधनव्याप्यव्यतिरेको यथा अकर्तृकत्वानुमाने नित्यत्वादिः। पक्षविपक्षान्यतरान्यो यथा प्रसिद्धानुमाने पर्वतजलह्रदान्यतरान्यत्वम्। पक्षेतरसाध्याभावो यथात्रैव पर्वतेतराग्निमत्त्वम्। न चात्र व्यर्थविशेषणत्वं दु-

---

वन्हिना धूमस्य स्थापनायां प्रतिहेतावार्द्रेन्धनाभावे वन्ह्यभावस्योपाधितायां धूमाभावस्य चार्द्रेन्धनाभावेन स्थापनायां प्रतिहेतौ वन्हावार्द्रेन्धनस्यानुपाधितायाश्च प्रसङ्गात्। परन्तु पूर्वसाधनव्यतिरेकस्य प्रतिहेतावुपाधित्वेनोद्भावने सत्प्रतिपक्षमात्रमुच्छिद्येत सर्वत्रैव तत्सम्भवात्। आभासत्वेऽपि स्थापनाया विशेषाग्रहदशायामेव सत्प्रतिपक्षोपन्यासात्। वस्तुतः साध्याव्यापकस्यापि पूर्वसाधनव्यतिरेकस्य तदानीं तत्त्वेनाग्रहादुपन्याससम्भवात्। अ-

---

व्यविपर्य्ययस्याऽप्रसिद्धत्वसमत्वमेव न त्वज्ञातत्वमित्याह साध्येति। तस्य साध्यविपर्य्ययस्य। व्यापकेति। साध्यव्यापकव्यतिरेकेणेत्यर्थः। साध्यव्यावृत्त्युन्नायकव्यावृत्तिप्रतियोगित्वरूपस्य उपाधित्वस्य आभासत्वादेव तस्योपाध्याभासत्त्वादिति भावः।नोपाधित्वेनेति दृष्टान्तार्थम्, तदनुपाधित्वस्यैव मूलोक्तत्वेन दूष्यत्वादिति ध्येयम्। प्रथमे हेतुमाह वन्हित्वेनेति। उपाधिताया इति। प्रसङ्गादित्यग्रेन्वयः। द्वितीये हेतुमाह धूमाभावस्य चेति। उच्छिद्येत अदूषकं स्यात्। तत्सम्भवादिति। ननु धूमवान् वन्हेरित्यस्य प्रतिहेतौ निर्धूमः आर्द्रेन्धनाभावादित्यत्रैव पूर्वसाधनव्यतिरेकस्य नोपाधित्वेनोद्भाव्यत्वं तत्रायःपिण्डादौ व्यभिचारेणाभावस्य निर्धूमत्वाव्यापकत्वादत आह आभासत्वेपीति। विशेषाग्रहेति। व्यभिचाराग्रहदशा-

षणम् । तत्त्वेप्युपाधेराभासत्वात् । तत्तुल्यश्च यथात्रैव पर्वतेतरेन्धनवत्त्वम् । एवं वन्हिसामग्र्यादिकमूह्यम् ॥

तो बलवत्तरानुकूलतर्कं विना पूर्वसाधनव्यतिरेको नोपाधित्वेनोद्भाव्य इति कथकसमयवशादेवाऽसावुपाधित्वेन नोपन्यस्यत इति । यथा कर्त्तृत्वेति । कादाचित्कत्वेन सकर्त्तृकत्वस्थापनायामजन्यत्वे प्रतिहेताविति यर्थः ॥

याभित्यर्थः । वस्तुतः वस्तुगत्या । तत्त्वेन साध्यव्यापकत्वेन । बलवत्तरेत्यादिकं कथकसमयस्याकारः । समयो निर्बन्धः । असौ पूर्वसाधनव्यतिरेकः । पूर्वसाधनव्यतिरेकस्योपाधितायां मूलकृता स्थापनाद्यनुक्तेराह कादाचित्कत्वेनेति । इदं सकर्तृकं कादाचित्कत्वादित्यस्य प्रतिहेताविदं सकर्तृकं जन्यत्वादित्येव पूर्वसाधनकादाचित्कत्वस्य व्याप्यं यदनित्यत्वं तद्व्यतिरेकरूपं नित्यत्वादिकं नोपाधिरित्यर्थः ॥

इति श्रीजगदीशतर्कालङ्कारविरचितायां दीधितिटीकायामुपाध्याभासनिरूपणं समाप्तम् ।
उपाधिवादः समाप्तः ॥

चिन्तामणेः पक्षता ।

व्याप्त्यनन्तरं पक्षधर्मता निरूप्यते ।
तत्र न तावत् सन्दिग्धसाध्यधर्मत्वं पक्षत्वम् । सन्देहो हि न विशेषणम्, परामर्शपूर्वं लिङ्गदर्शनव्याप्तिस्मरणादिना तस्य नाशात्। नोपलक्षणम्, अव्यावर्त्तकतापत्तेः।

दीधित्याः पक्षता ।

अनुमितिलक्षणैककार्य्यानुकूलतासङ्गत्या पक्षधर्मतां निरूपयितुमाह व्याप्तीति । सन्दिग्धेति । यत्र साध्यस्य यादृशसम्बन्धाव

जागदीश्याः पक्षता ।

अनुमितिलक्षणेति । अनुमितिस्वरूपेत्यर्थः । व्याप्तिज्ञानजन्याया अनुमितेः किमन्यत्कारणमिति जिज्ञासयैव पक्षतानिरूपणादिति भावः । अत्रानुकूलत्वं जनकजनकतावच्छेदकसाधारणप्रयोजकत्वमात्रं तेन व्याप्तेरनुमित्यहेतुत्वेपि न क्षतिः । यत्तु जनकतावच्छेदकत्वमेवात्रानुकूलत्वं व्याप्तिवत्पक्षताया अपि करणव्यापारतया सिद्धहेतुभावस्य परामर्शस्य जनकतायामवच्छेदकत्वादिति मतम् । तत्तुच्छम्। पक्षता न कारणमिति तु भ्रम इत्याद्युत्तरग्रन्थविरोधापत्तेः।पक्षधर्मतामिति पक्षे धर्मत्वं यस्या इति व्युत्पत्त्या पक्षतामित्यर्थः। पक्षस्य धर्मत्वं

धर्मविशेषः पक्षत्वमिति वा देवतादिशब्द इव तलः स्वार्थिकत्वात्। व्याप्तीतीति। न च प्रकृतग्रंथस्वरसंवलितस्यैव पाठस्य धर्तुमुचितत्वाद्व्याप्त्येत्येव धारणं युक्तमिति वाच्यम्। अप्रयोजकत्वात् व्याप्तिनिरूपणानन्तरमित्येवं मूलपाठमनुसृत्य वा तथोपन्यासादिति भावः। ननु सन्दिग्धसाध्यधर्मत्वमितिमूलस्य यदि सन्देहविषयीभूतसाध्यवत्त्वमर्थस्तदा विनष्टवन्ह्यादेर्जलादावनुमितिर्न स्यात्तत्र तादृशसाध्याभावेन पक्षताविरहादतः साध्यसंशयस्यैव पक्षतात्वमाह यत्रेत्यादिना। यद्धर्मिकयत्सम्बन्धावच्छिन्नयत्प्रकारकनिश्चयत्वेन यत्संशयं प्रति निवर्त्तकत्वं स सन्देहस्तत्पक्षकताद्विधेयकानुमितौ हेतुभूता पक्षतेत्यर्थः। तेन वन्हिधर्मिकघटादिनिर्णयात्मकस्य पर्वतधर्मिकवन्हिमत्त्वनिश्चयस्य निवर्तनीयोपि वन्हौ घटादिसन्देहो न पर्वतपक्षकवन्ह्यनुमितौ पक्षता तत्र वन्हिमत्त्वनिश्चयत्वेनाप्रतिबन्धकत्वादिति भावः। अत्र पक्षधर्मिकसाध्यवत्तानिश्चयनिवर्तनीयत्वमात्रं बाधनिश्चयेऽतिव्याप्तमतः संशयपदम्। न च बाधनिश्चयस्य पक्षतात्वे न क्षतिः विशिष्टबुद्धिसामान्यं प्रत्येव बाधनिश्चयस्य विरोधित्वादेव तत्रानुमित्यसम्भवादिति वाच्यम्। सन्दिग्धाप्रामाण्यकबाधनिश्चयसत्त्वे सिद्धचात्मकादपि परामर्शादनुमित्यापत्तेः तादृशबाधनिश्चयस्य विशिष्टबुद्ध्यप्रतिबन्धकत्वात्। यद्यपि निर्वन्हिः पर्वतो रूपवान्न वेत्यादिसन्देहात्मकस्य बाधनिश्चयस्य पर्वतधर्मिकवन्हिमत्तानिश्चयनिवर्त्यत्वं संशयत्वं चास्तीति वन्हिसाध्यकपक्षतालक्षणस्य तत्रातिव्याप्तिः, पक्षे साध्यसंशयत्वोक्तौ च नानुगमवार्त्तापि। तथापि संशयत्वमत्र तादृशनिश्चयाप्रतिबन्धकत्वं तथा च पक्षधर्मिकसाध्यवत्तानिश्चयनिवर्त्यत्वे सति तादृशनिश्चयप्रतिबन्धकतावच्छेदकविषयिताशून्यज्ञानत्वं फलितार्थः। तेन गृहीताप्रामाण्यकबाधनिश्चयस्य पक्षधर्मिकसाध्यवत्त्वज्ञाननिवर्त्तकत्वाभावेपि तन्निवर्त्तकतावच्छेदकविषयिताकत्वादेव व्युदासः। यद्यपि चैवमपि वन्हिव्याप्यसाध्यकानुमितौ वन्हिमान्न वेतिसंशयः पक्षता स्यात्, तस्यापि पक्षधर्मिकवन्हिव्याप्यवत्त्वरूपसाध्यनिर्णयनिवर्त्यत्वात् तादृशनिश्चयाप्रतिबन्धकत्वाच्च। न चेष्टापत्तिः, पर्वतो वन्हिमान्न वेतिसंशयोत्तरं पर्वतो वन्हिव्याप्यवानित्येवं साध्यनिर्णयेपि वन्हिव्याप्यसाध्यकानुमित्यापत्तेः। तथापि प्रकृतपक्षविषयितावहिर्भूतसाध्यविषयिताघटितध-

र्भावच्छिन्नं यत्प्रकृतपक्षधर्मिकप्रकृतसाध्यवत्तानिश्चयनिवर्त्यत्वं तन्निवेशितमित्यदोषः। पर्वतो वन्हिमान्न वेतिसंशयस्य च वन्हिव्याप्यवत्तानिश्चयनिवर्त्यत्वेपि तादृशनिवर्त्यतायाः पर्वतधर्मिकवन्ह्यभावप्रकारत्वेनैवावच्छेद्यतया वन्हिव्याप्यवत्त्वरूपसाध्यवत्त्वविषयितानवच्छेद्यत्वात्। न च तथापि बहिर्भूतान्तदलं व्यर्थमिति वाच्यम्। वन्हिव्याप्यवत्सधर्मा पर्वतो वन्हिमान्न वेति संशयस्य तादृशपर्वतत्वावच्छिन्नपक्षकवन्हिव्याप्यसाध्यकानुमितौ पक्षतात्वव्युदासकत्वात्। वस्तुतस्तु पक्षविषयताबहिर्भूतेत्याद्यपहाय साध्याभावत्वावच्छिन्नप्रकारित्वसाध्याविशेष्यकत्वान्यतरावच्छिन्नमेव साध्यनिश्चयनिवर्त्यत्वं वाच्यम्। तेन वन्हौ पक्षे वन्हेः साध्यतायां वन्हिर्वन्हिमान्न वेतिसंशयस्य पक्षविषयताबहिर्भावेण साध्यविषयत्वाप्रसिद्धावपि न तत्राव्याप्तिः। न चैवं ह्रदादौ वन्ह्यभावस्यानुमाने ह्रदो वन्हिमान्न वेतिसंशयः पक्षता न स्यात् तन्निष्ठायाः साध्यवत्तानिश्चयप्रतिबध्यतायाः वन्हिमत्ताविषयकत्वेनैवावच्छेद्यतया साध्याभावत्वावच्छिन्नप्रकारित्वानवच्छेद्यत्वादिति वाच्यम्। इष्टत्वात् ह्रदो वन्ह्यभाववान् न वेत्याकारकसंशयस्यैव पक्षतात्वात्। साध्यपक्षभेदेन पक्षतायाः नानात्वाद्व्याप्यवत्तासाध्यकपक्षतालक्षण एव साध्याविषयित्वघटितधर्मावच्छिन्नप्रतिबद्ध्यतायाः प्रवेश्यत्वादिति वदन्ति। [वन्हिव्याप्ये वन्हिव्याप्यस्य साध्यतायां वन्हिव्याप्यो वन्हिव्याप्यवान्न वेतिसंशयस्य पक्षतात्वहान्यापत्तेः तादृशनिष्ठायास्तादृशपक्षधर्मिकतादृशसाध्यवत्तानिश्चयनिवर्त्यतायाः पक्षीभूतसाध्यविशेष्यकत्वावच्छेद्यत्वादिति ध्येयम्] के चित्तु संशयत्वमत्र प्रकृतपक्षविषयतानिरूपितप्रकृतसाध्यनिष्ठविषयताकत्वमतो वन्हिव्याप्यसाध्यकानुमितौ वन्हिमत्त्वसंशयस्य निर्वन्हित्वसाध्यकानुमितौ महानसीयवन्हिमत्त्वसंशयस्य न पक्षतात्वं तस्य तादृशसाध्यपक्षोभयवैशिष्ट्यावगाहित्वाभावात्। एवं च पक्षधर्मिकसाध्यवत्तानिश्चयस्यापि तादृशत्वात्तद्वारणाय निवर्त्यान्त्यमित्याहुः। तन्न। साध्यं पक्षवृत्ति न वा साध्यं पक्षनिष्ठाभावप्रतियोगि न वेत्यादिसन्देहस्यापि लक्ष्यतया तत्राव्याप्तत्वात्। तेषां पक्षसाध्योभयवैशिष्ट्यानवगाहित्वात्। पर्वतो वन्हिव्याप्यवानित्येवं साध्यनिश्चयनिवर्त्तनीयस्य पर्वतो निर्वन्हिर्वन्हिव्याप्यस्तु पर्वतवान्न वेतिसमूहालम्बनस्य

गाहिनिर्णयनिवर्त्यो यः संशयस्तत्र स तादृशसम्बन्धेन साध्यानुमितौ पक्षेतरार्थः।तेन न पक्षसाध्यविशेष्यकसंशयाननुगमो न वा सम्बन्धान्तरेण सन्देहेऽपि निर्णीतसम्बन्धेन पक्षत्वम्, न वा तमःप्रभृ-

---

वन्हिव्याप्यसाध्यकानुमितौ पक्षतात्वप्रसङ्गाच्च तस्यापि वन्हिव्याप्यात्मकसाध्यपक्षोभयवैशिष्ट्यावगाहित्वात्। आधेयत्वसम्बन्धावच्छिन्नसाध्यविषयितायाः प्रवेशे तु पक्षः साध्यवान्न वेत्यादिसंशयस्यासंग्रहापत्तेरिति दिक्। यत्तु साध्यवत्तानिश्चयनिवर्त्यसंशयत्वमित्यत्र संशयत्वं साध्याभावनिश्चयनिवर्त्यत्वरूपं सर्वत्र ग्राह्यमतो नोक्तदोषाणामवकाश इति। तत्तुच्छम्। पर्वतत्वावच्छेदेन वन्हेः साध्यतास्थले वन्ह्यभाववत्पर्वतसधर्मा वन्हिमत्पर्वतो द्रव्यं न वेति संशयस्य पक्षतात्वापत्तेः तादृशसंशयस्य पर्वतत्वावच्छेदेन वन्हिज्ञानश्रयस्य तदवच्छेदेन वन्ह्यभावनिश्चयस्यापि प्रतिबद्ध्यत्वादिति दिक्। इदन्तु चिन्त्यम्।अन्यत्रास्तु यथातथापि वन्हिव्याप्यवति वन्हेः साध्यतास्थले तद्धर्मिकतादृशसाध्यवत्तानिश्चयप्रतिबद्ध्यसंशयस्याप्रसिद्ध्या कुत्र लक्षणं नेयं वन्हिव्याप्यवान्वन्हिमान्न वेत्यादिसंशयस्याहार्यत्वेनाप्रतिबध्यत्वादिति। ननु पक्षधर्मिकसाध्यसंशयत्वं साध्यधर्मिकपक्षवृत्तित्वसंशयत्वादिकं वा लघुलक्षणं कुतः परित्यक्तमत आह तेनेति। यादृशसम्बन्धावगाहित्वस्य फलमाह न वेति। मूलस्थस्य साध्यधर्मत्वमित्यस्य परित्यागे बीजमाह न वा तम इत्यादि। सन्दिग्धसाध्यधर्मत्वमितिमूलस्य सन्दिग्धं साध्ये धर्मत्वं यस्येति व्युत्पत्त्या यद्वृत्तित्वं साध्ये सन्दिग्धमिति यावत्, किं वा सन्दिग्धः साध्यधर्मो यत्रेति व्युत्पत्त्या यथाश्रुतार्थः, तत्र प्रथमे पक्षीभूततमःसमवेतत्वस्य द्वितीये च धर्मात्मकगगनसाध्यस्याप्रसिद्ध्या इदमपि लक्षणं दुष्टमित्याशयेन तमसः पक्षतया गगनस्य साध्यतयोल्लेखः। अत्र च मते पक्षे साध्यवत्तासंशयोत्तरं सिद्ध्यात्मकपरामर्शादप्यनुमितिर्भवत्येवेति बोध्यम्। न चोक्तलक्षणस्य साध्यसंशयमात्रपरत्वेऽग्रिममूले तस्य विशेषणत्वादिविरुद्धपस्यासङ्गतिः, तत्र विशेषणोपलक्षणपदयोः साक्षात्परम्पराका-

नापि साधकबाधकप्रमाणाभावः। उभयाभावस्य प्रत्येक-सत्त्वेऽपि सत्त्वात्। नाप्यभावद्वयं तथा, बाधकप्रमाणाभावस्य व्यर्थत्वात् ह्रदादेः पक्षत्वेऽपि बाधहेत्वसिद्ध्यादेरावश्यकत्वेनानुमित्यनुत्पादात्। नापि साधकप्रमाणाभावः, श्रोतव्यो मन्तव्य इति श्रुत्या समानविषयकश्रवणानन्तरं मननबोधनात् प्रत्यक्षदृष्टेऽप्यनुमानदर्शनात् एकलिङ्गावगतेऽपि लिङ्गान्तरेण तदनुमानाच्च। मन्तव्यश्चोपपत्तिभिरिति स्मरणात्। अथ सिषाधयिषितसाध्यधर्म्मा धर्म्मी पक्षः तथा हि, मुमुक्षोः शब्दादात्मावगमेऽपि मननस्य मोक्षोपायत्वेन सिद्धिविशेषानुमितिच्छयात्मानुमानम्।

तिषु समवायेनाकाशादिसाधने तद्वैकल्यम्। संशययोग्यतां निरस्यति नापीति। साधकबाधकमाने सिद्धिबाधौ। केवलान्वयिनि च पक्षनिष्ठाभावप्रतियोगित्वधीरेव सुलभो बाधः। ननु तत्रापि पुनर-

---

रणपरत्वात्। सन्दिग्धं साध्यं यत्र तद्धर्मत्वं तत्सम्बन्धित्वमिति व्युत्पत्त्या लब्धं स्वविशेष्यकसाध्यसंशयसम्बन्धित्वरूपं यथाश्रुतार्थमादायैव विशेषणत्वोपलक्षणत्वयोरप्रे विकल्प इत्यप्याहुः। तद्वैकल्यम् पक्षतावैकल्यम्। ननु योग्यतायाश्चानिरूपणादिति ग्रन्थेनाऽग्रेऽनुमित्साया इव संशयस्यापि योग्यताया निरसयितुमुचितत्वात् तदनिरसनान्मूलस्य न्यूनत्वमत आह संशयेति। सिद्धिबाधयोर्जनकस्य व्याप्तिज्ञानमनोयोगादेः सर्वत्रैवानुमितेः पूर्वं सत्त्वाद्बाधश्चष्टे साधकेत्यादि। तथा च साधकेन बाधकेन जनितं यन्मानमिति मूलेऽन्वयः। ननु पक्षधर्मिकसाध्याभावनिश्चयात्मनो बाधस्य केव-

अत एव प्रत्यक्षपरिकलितमप्यर्थमनुमानेन बुभुत्सन्ते तर्करसिकाः न हि करिणि दृष्टे चीत्कारेण तमनुमिमतेऽनुमातार इति वाचस्पतिवचनयोरविरोधः, अनुमित्साताद्विरहाभ्यां तदुपपत्तेरिति चेन्न । सन्देहवत्परामर्शपूर्वं सिषाधयिषाया अप्यभावात् योग्यतायाश्चानिरूपणात्

नुमित्सा ततः परामर्शान्तरं स्मरणात्मकाद्वा परामर्शादनुमितीष्टसाधनताविषयकादनुमित्सा ततोऽनुमितिरिति फलबलात्कल्पनीय-

---

लान्वयिन्यप्रसिद्धिरत आह केवलान्वयिनि चेति । पर्वतो न वाच्यत्ववानित्याकारकः पटाद्यभावे प्रतियोगितासम्बन्धेन वाच्यत्वाद्यवगाह्यपि बाधः खण्डशः प्रसिद्ध्या तत्र सम्भवतीत्यावेदयितुं सुलभ इत्युक्तम् । न चैवं नानाविधानां बाधबुद्धीनामनुगमासम्भवः, प्रातिस्विकरूपेण तेषां निवेशे तु नाप्यभावद्वयमिति मूलासङ्गतिर्बाधाभावस्यानेकत्वादिति वाच्यम् । पक्षधर्मैकसाध्यवत्ताज्ञानविरोधिनिर्णयत्वेन तासामनुगमादिति भावः । मूले प्रत्यक्षपरिकलितमितिप्रत्यक्षपरिकलितत्वविशिष्टविषयको योऽनुमानजन्यो बोधस्तदिच्छावन्त इत्यर्थः।तेनोपजातप्रत्यक्षविषयत्वदशायामेवानुमितिविषयत्वलाभान्न वचनयोर्विरोधस्यासङ्गतिरिति ध्येयम् । तत्रापि । अनुमित्सानाशस्थलेपि । पुनरिति । उत्पन्नपरामर्शानन्तरमित्यर्थः । ननु पुनरनुमित्सार्थमनुमितीष्टसाधनताज्ञानस्य पूर्वमपेक्षणात्तेनैव प्राक्तनपरामर्शनाशात्कुतस्तत्रानुमितिः स्यादत आह ततः परामर्शान्तरमिति। ततोनुमितिरित्यन्वयः । इष्टसाधनताज्ञानपरामर्शयोः पृथक्कल्पने गौरवादाह स्मरणात्मकेति । विशिष्टानुभवं प्रत्येव विशेषणज्ञानस्य साक्षाद्धेतुतया तादृशविशिष्टपरामर्शार्थं विशेषणज्ञानकल्पने गौरवमपि नास्तीत्यावेदयितुं स्मरणात्मकाद्वेत्यु-

सिषाधयिषाविरहेऽपि घनगर्जितेन मेघानुमानात् स्वकारणाधीनतृतीयलिङ्गपरामर्शबलेनानपेक्षितानुमानदर्शनाच्चेति ॥

मित्यत आह सिषाधयिषेति । न चानुमितिजनिकेच्छैव पक्षता सा च क्व चित्स्वनिष्ठैव सर्वत्रेश्वरनिष्ठैव सुलभेति वाच्यम् । तस्या नित्यत्वेन सिद्धौ सत्यामपि पक्षतापसङ्गात् । न च तस्यास्तदानीं न तज्जनकत्वम् । तद्धि न तद्योग्यता, अनपायात् । न च तदुपधानम्, अनुमितेः पूर्वं

क्तम् । न चोक्तपरामर्शानन्तरमनुमित्सादशायामनुमितिप्रसङ्गः सामग्रीसत्त्वादिति वाच्यम् । सिषाधयिषारूपायाः पक्षतायाः प्रागसत्त्वादिच्छासामग्र्या एव प्रतिबन्धकत्वाच्चेति भावः । कल्पनीयामिति । न चैतावतापि प्रत्यक्षादिभिन्नं वन्हिज्ञानं जायतां वन्ह्यनुमितिर्जायतामित्यादिरूपाणामनुमित्सान्यक्तीनामनुगतरूपविरहात्कारणत्वासम्भव इति वाच्यम् । यद्यदनुमित्सासत्त्व एव यत्पक्षकयत्साध्यकानुमितिस्तत्तदनुमित्साविरहकूटत्वावच्छिन्नाभावत्वेनैव तत्पक्षकतत्साध्यकानुमितावनुमित्साया हेतुत्वसम्भवादिति भावः । यत्तु यत्पक्षकयत्साध्यकानुमितिनिवर्त्यानुमित्सात्वेनैव तत्पक्षकतत्साध्यकानुमितौ हेतुत्वमिति । तन्न । तादृशानुमितित्वावच्छिन्नप्रतिबन्धकतानिरूपितप्रतिबद्ध्यत्वस्योक्तावशाब्दज्ञानं जायतामित्याकारानुमित्साया असंग्रहापत्तेः तस्यामशाब्दज्ञानत्वेन प्रतिबन्धकत्वात् । प्रकृतपक्षसाध्यकानुमितिनिष्ठप्रतिबन्धकतामात्रस्योक्तौ च समूहालम्बनतादृशानुमितिप्रतिबद्ध्यतामादाय घटाद्यनुमित्सायामतिव्याप्त्यापत्तेरिति ध्येयम् । मिश्रमतमाशङ्क्य निषेधयति न चेति । वाच्यमित्यन्वयः । अनुमितिजनकेति । तत्पक्षकयत्पक्षकतत्साध्यकानुमितौ तादृशानुमितिजनिकेच्छैव पक्षतेत्यर्थः । विषयितया धात्वर्थान्वयिन एव सनः समानकर्तृत्वस्य त-

तदभावात्। न च तत्सामग्रीसमवधानम्, कारणमात्रस्य पक्षताकुक्षिनिक्षेपप्रसङ्गाच्छेषवैयर्थ्यात् तदानीं सामग्रीविरहप्रयोजकव्यतिरेकप्रतियोगिनः कारणस्य वक्तव्यत्वापाताच्च॥

न्त्रत्वादिति भावः। सुलभेति। तथा च घनगर्जिताद्यनुमितौ न व्यभिचार इति भावः। तस्या ईश्वरेच्छायाःतदानीं सिद्धिदशायाम्।न तज्जनकत्वं न तादृशानुमितिजनकत्वम्। तद्धि तादृशानुमितिजनकत्वं हि। अनपायात् स्वरूपतः सत्त्वात्। न च तत्पुरुषीयतादृशानुमितिं प्रति तत्पुरुषीयतादृशानुमित्यव्यवहितप्राक् क्षणवृत्तिज्ञानविशिष्टेच्छात्वेन हेतुत्वात्तदानीं स्वरूपयोग्यत्वमेव नास्तीति वाच्यम्।कार्याव्यवहितपूर्ववर्त्तित्वादिना हेतुत्वस्याग्रे सार्वभौमनिरुक्तौ निरस्यत्वादिति भावः। तदुपधानं तादृशानुमितिविशिष्टत्वम्।तदभावादिति।तथा च सत्यामपि सिद्धावनुमितिर्न स्यात्प्रत्युतैकानुमित्यनन्तरमेवानुमित्यन्तरं स्यादिति भावः। तत्सामग्रीति। तत्पुरुषीयतत्पक्षकतत्साध्यकानुमितिसामग्रीविशिष्टत्वमेव तादृशानुमितिजनकत्वमित्यर्थः। प्रसङ्गादिति। तथा च परामर्शादिकं हेतुर्न स्यात् अवच्छेदकत्वादिति भावः। इष्टापत्तौ बाधकमाह शेषेति। तादृशानुमितिसामग्रीविशिष्टत्वेनैव हेतुत्वसम्भवादिच्छाभागस्य वैयर्थ्यादित्यर्थः। न चात्र सामग्रीपदेनेच्छेतरकारणस्तोम एव धर्त्तव्यस्तथा च सिद्धिकालीनपरामर्शस्यापि तादृशस्तोमविशिष्टत्वात्तस्तोमितिवारणार्थमेवेच्छाभागः प्रवेशनीयः इति वाच्यम्। सिद्धिदशायामिच्छान्यस्यानुमितिकारणस्तोमस्यासत्त्वात्। अन्यथा तादृशस्तोमविशिष्टाया भगवदिच्छायास्तदानीमपि सत्त्वादिच्छानिवेशेऽपि तन्नानुमितेर्दुर्वारतापत्तेः। घनगर्जिताद्यनुरोधेन तादृशेच्छायाः सामानाधिकरण्यप्रत्यासत्त्या हेतुत्वासम्भवादिति भावः। नन्वीच्छाभागो न देयः तादृशानुमितिसामग्रीविशिष्टत्वेनैव हेतुत्वं वाच्यं तथैवानुमित्सायाः सर्वत्र हेतुत्वसम्भवादित्यत आह तदानीमिति। सिद्धिदशायां यत्कारणाभावप्रयुक्तः सामग्रीविरहः तत्कारणस्येत्यर्थः। वक्तव्यतापातादिति। तथा चावश्यकत्त्वात्सैव पक्षता युक्तेति भावः॥

इति पक्षतापूर्वपक्षः।

उच्यते । सिषाधयिषाविरहसहकृतसाधकप्रमाणाभावो यत्रास्ति स पक्षः । तेन सिषाधयिषाविरहसहकृतं साधकप्रमाणं यत्रास्ति स न पक्षः । यत्र साधकप्रमाणे सत्यसति वा सिषाधयिषा यत्र वोभयाभावस्तत्र विशिष्टाभावात् पक्षत्वम् । यद्यपि पक्षत्वस्य केवलान्वयित्वात् नास्य भेदकत्वम्, तथापि पक्षपदप्रवृत्तिनिमित्तमुक्तम् ॥

सिषाधयिषेति । यत्रानुमित्सानन्तरं साध्यतद्व्याप्यवत्त्वविशिष्टपक्षस्मरणम् अनुमितीष्टसाधनताविषयकताद्दशस्मरणाद्वा अनुमित्सा अनुमित्सापूर्वकालोत्पन्नविशेषणस्म-

---

थअ पक्षतासिद्धान्तः ।

ननु क्रमोत्पन्नानां सिद्धीच्छापरामर्शानां युगपदसत्त्वात्सहकृतान्तदलं व्यर्थमत आह यत्रेति । पक्षस्मरणमिति । तदनन्तरं चानुमितिरित्यत्रेऽन्वयः । विशिष्टानुभवं प्रत्येव विशेषणज्ञानस्य हेतुत्वात्तदपेक्ष्य गौरवं नास्तीत्याशयेन स्मरणपर्यन्तानुधावनम् । अत्रानुमित्सार्थमनुमितीष्टसाधनताज्ञानान्तरं कल्प्यमतो लाघवादाह अनुमितीत्यादि । तादृशस्मरणादिति । साध्यतद्व्याप्यविशिष्टपक्षस्मरणादित्यर्थः । अनुमित्सेति । तदनन्तरं चानुमितिरित्यत्रेणान्वयः । स्मृत्यात्मकसिद्धौ सहकृतान्तविशेषणस्य प्रयोजनमुक्त्वाऽनुभवात्मकसिद्धौ तदाह पूर्वकालेत्यादिना । ज्ञानेच्छयोरयौगपद्यादनुमित्साजन्मक्षणे विशेषणस्मरणस्यासम्भवादुत्तरक्षणे तत्स्मरणे तु परामर्शादशायामनुमित्सानाशात्तत्र पक्षतैव नोपेयत इत्यत उक्तं पूर्वकालोत्पन्नेति । अनुमित्सापूर्वकालोत्पन्नेत्यर्थः । अनुमित्सायाः पूर्वं प-

रणाद्वा अनुमित्साकालोत्पन्नेन्द्रियसन्निकर्षसहितात्साध्यतद्व्याप्यविशिष्टपक्षप्रत्यक्षं तदनन्तरञ्चानुमितिस्तत्र पक्षतासम्पत्तये सहकृतान्तं साधकमानविशेषणम् । सिषाधयिषा च तत्साध्यविशिष्टतत्पक्षविषयकत्वप्रकारिका अनुमितिविषयिणीच्छा।यत्किञ्चिद्वोचरं ज्ञानं जायतामितीच्छायामपि सिद्धिसत्त्वेऽनुमित्यनुत्पादात्

क्षसन्निकर्षेऽनुमित्सामवधूय वन्ह्यादिसाध्यकतद्व्याप्यवत्त्वेन पर्वतादेः प्रत्यक्षमेव स्यादबहिरर्थलौकिकप्रत्यक्षसामग्र्याः सर्वतो बलवत्त्वादनुमित्सानन्तरं सन्निकर्षे च परामर्शदशायां नानुमित्सायाः सत्त्वमत उक्तमनुमित्साकालेति । इदमुपलक्षणम् । यत्रानुमितीष्टसाधनताविषयकस्य साध्यतद्व्याप्यविशिष्टपक्षस्य प्रत्यक्षानन्तरमनुमित्सा तत्रापि पक्षतासम्पत्त्यर्थं सहकृतान्तं बोध्यम् । पक्षतासम्पत्तय इति। न चानुमित्सादशायामपि घटाद्यवच्छेदेन तदभावस्यात्मनि सत्त्वात्पक्षताभङ्गप्रसङ्गः, देशानवच्छिन्नविशेषणतयैव सामानाधिकरण्यरूपस्यानुमित्साविरहवैशिष्ट्यस्योक्तत्वादिति भावः । ननु सिद्धिगोचरेच्छामात्रस्य सिषाधयिषात्वे द्रव्यत्वेन द्रव्यज्ञानं जायतामितीच्छायामपि सिद्ध्यात्मकपरामर्शाद्वन्ह्यनुमितिः स्यादत आह सिषाधयिषेति । तत्साध्येति । प्रकृतसाध्यविधेयतानिरूपितप्रकृतपक्षविषयताकत्वप्रकारिकेत्यर्थः । तेन वन्हिविशिष्टह्रदाद्यप्रसिद्धावपि ह्रदो वन्हिमानित्याद्यनुमितौ न पक्षताहानिः, न वा पाषाणमयत्वेन पर्वते तेजस्त्वेन वन्ह्यनुमितिर्जायतामितीच्छायामपि सिद्धिदशायां पर्वतो वन्हिमानित्यनुमितिः तदिच्छायाः पर्वतत्वावच्छिन्नविशेष्यतानिरूपितवन्हित्वावच्छिन्नाधेयताद्यनवगाहित्वादिति भावः । वन्हिमत्त्वेन पर्वतस्य प्रत्यक्षं जायतामितीच्छावारणार्थमाह अनुमितिविषयिणीति । यत्किञ्चिदित्यादि । द्रव्यत्वेन द्रव्यगोचरज्ञानं जायतामितीच्छायामपि वन्हेः सिद्ध्यात्मकपरामर्शादनुमित्यनुत्पादादित्यर्थः । तेन ज्ञानं जायतामितीच्छोत्तरं सिद्ध्युत्पादे वक्ष्यमाणस्वविषयासिद्ध्यनुपहितत्वविशेषणादेव तदिच्छावारणं सिद्ध्युत्तरं च तादृशेच्छा न भवत्येव ज्ञानमात्रस्यैव ज्ञानत्वप्रकारकेच्छाविरोधित्वा-

अनुमितित्वाप्रकारिकायामपि प्रत्यक्षाद्यतिरिक्तं पर्वते वन्हिज्ञानं जायतामितीच्छायां प्रत्यक्षाद्यनन्तरमनुमित्युत्पादाच्च यादृशयादृशेच्छासत्त्वे सिद्धौ सत्यामनुमितिस्तत्तदिच्छाभावसमुदायस्य विशेष-

---

दिति प्रत्युक्तम्। नन्वनुमितिविषयत्वेनानुमित्साव्यक्तीनां प्रवेशे गौरवादनुमितित्वप्रकारिकेच्छैव प्रवेश्यतामत आह अनुमितित्वेति। सिद्ध्यात्मकपरामर्शोत्तरं पर्वते वन्हिज्ञानं जायतामितीच्छैव नोत्पद्यते सिद्धिविरोधित्वात् सिद्ध्यात्मकपरामर्शपूर्वकालोत्पन्नायास्तादृशेच्छाया नानुमितावुपयोगः स्वविषयसिद्ध्यनुपहितत्वाभावादतः प्रत्यक्षाद्यतिरिक्तमित्युक्तम्। अनुमित्युत्पादाच्चेति। तथा च व्यभिचाराल्लाघवमत्किञ्चित्करमिति भावः। ननु यत्र वन्हिमत्त्वेन पर्वतस्य प्रत्यक्षं जायतामितीच्छैव प्रत्यक्षत्वेनानुमितिमवगाह्य वृत्ता तत्रापि सिद्धौ सत्यामनुमित्यापत्तिः किं च प्रकृतसाध्यविधेयतानिरूपितप्रकृतपक्षविषयताकत्वप्रकारकेच्छाया एवोत्तेजकत्वे वन्हिभिन्नान्यविधेयकानुमितिर्जायतां प्रत्यक्षादिभिन्नं वन्हिविधेयकं ज्ञानं जायतामितीच्छायामपि सिद्ध्यात्मकपरामर्शादनुमितिर्न स्यात् तथा च तादृशतादृशेच्छानामप्युत्तेजकत्वं वाच्यमित्यननुगम इत्यत आह यादृशेति। सिद्ध्यसमानकालीनानामनुमितिप्राक्क्षणावस्थायिसिषाधयिषाणामुत्तेजकविधया पक्षतायां प्रवेशो व्यर्थः कारणतावच्छेदकगौरवापादकश्च स्यादतः सिद्धौ सत्यामित्युक्तम्। अत्रैकाकारानुमित्साव्यक्तीनामनुगतरूपेणोत्तेजकत्वलाभार्थं यादृशेत्युक्तमिति प्राञ्चः। वस्तुतो यद्यदिच्छाव्यक्तिसत्त्वे इत्येव वक्तव्यम्। अन्यथा यत्र सिद्ध्यात्मको वन्हिमात्रपरामर्शस्तत्रानुमितिर्जायतामितीच्छायामपि वन्ह्यनुमित्युत्पादादनुमितित्वप्रकारकेच्छात्वेनाप्युत्तेजकतया यत्र सिद्ध्यात्मको वन्हिपरामर्श एव सिद्ध्यनात्मकद्रव्यत्वादिसाध्यकः परामर्शस्तत्रानुमितिर्जायतामितीच्छादशायां वन्ह्यनुमित्यापत्तेः, एवं पर्वतमात्रपक्षकात्सिद्ध्यात्मकपरामर्शाद्यत्र वन्ह्यनुमितिर्जायतामितीच्छायां पर्वते वन्ह्यनुमितिस्तत्र वन्ह्यनुमितित्वप्रकारकेच्छात्वेनोत्तेजकत्वे यत्र पर्वते महानसे च वन्हिव्याप्यवत्त्वपरामर्श एव पर्वते सिद्ध्यात्मकः तत्रापि वन्ह्यनुमितिर्जायतामित्याकारकेच्छायां पर्वते

णत्वादिच्छायां अननुगमेऽपि न क्षतिः। धूमेनानुमिनुयामितीच्छा-

धन्यानुमित्यापत्तेः। न चेष्टापत्तिः। अनुभवविरोधात्। प्रकारान्तरेण स्वविषयपर्य्यवसानसम्भवेनानुमित्सानामवगतार्थगोचरज्ञानानर्ज्जकत्वात्, अस्माकं तु समूहालम्बनस्थलीयतत्तद्व्यक्तीनामुत्तेजककोटावप्रविष्टत्वान्न दोष इति। परन्तु तत्पक्षकतल्लिङ्गकानुमितित्वावच्छिन्नं प्रत्येव पक्षतायाः कारणत्वमिति कल्पे तल्लिङ्गकतत्पक्षकतत्साध्यकानुमितित्वप्रकारकेच्छात्वाद्यवच्छिन्नाभावोऽनुगतरूपेणैव पक्षतायां लाघवान्निवेशनीयो न तु तत्तदिच्छाव्यक्तीनामभावसमुदाय इत्याशयेनैव यादृशयादृशेच्छेत्युक्तमिति ध्येयम्। इच्छाभावसमुदायस्येति। इदमुपलक्षणम्। सिद्धिधर्मिकयद्यदप्रामाण्यज्ञानसत्त्वे सिद्धिदशायामनुमितिस्तत्तदप्रामाण्यज्ञानाभावसमुदायस्यापि सिद्धौ विशेषणत्वं बोध्यम्, अत एव मिश्रैरनुमितिग्रन्थेऽप्रामाण्यज्ञानास्कन्दितायाः सिद्धेरप्रतिबन्धकत्वमुक्तम्। न क्षतिरिति। यद्यपि एवमपि तत्तदिच्छाविरहव्यक्तीनां विशेष्यविशेषणभावे विनिगमनाविरहेणानन्तकार्यकारणभावः। न चैकेच्छाविरहविशिष्टो योऽपरेच्छाविरहस्तद्विशिष्टसिद्धित्वेन प्रतिबन्धकत्वे सामानाधिकरण्यात्मकवैशिष्ट्यस्य द्विधा प्रवेशे गौरवमतस्तावतीनामिच्छाविरहव्यक्तीनामेकत्र द्वयमितिरीत्या युगपदेव सिद्धिविशेषणत्वं लाघवादिति वाच्यम्। सिद्धौ तावदिच्छाविरहवैशिष्ट्येऽपि सिद्ध्यंशे प्रत्येकं तत्तदभावसामानाधिकरण्यस्य वैशिष्ट्यविधया प्रवेशात्सिद्धौ तावदभाववैशिष्ट्यस्यैव तत्तदेकैकेच्छाभावेऽपराभाववैशिष्ट्यप्रवेशे गौरवानवकाशात्। तथापि सिद्धौ तत्तदभावानां युगपद्विशेषणत्वे वैशिष्ट्यरूपसामानाधिकरण्ये वृत्तित्वांशस्य सकृदेव प्रवेशाल्लाघवं प्रत्येकाभावेऽभावान्तरवैशिष्ट्यस्य सम्बन्धत्वे तु वैशिष्ट्यघटकवृत्तित्वस्य बहुशः प्रवेशे गौरवमतो युगपदेव तावतीनामभावव्यक्तीनां सिद्धिविशेषणत्वं युक्तम्। किं च सिद्धौ तावदभावस्य युगपद्विशेषणत्वे विशेषणतासम्बन्धावच्छिन्नाधिकरणसमवेतत्वमेवानुगतः सम्बन्धः, तच्च त्वेकाभावेऽपराभाववैशिष्ट्यं विशेषणताविशेषावच्छिन्नाधिकरणे विशेषणतया वृत्तित्वं सिद्धावभावान्त-

यामालोकपरामर्शादसत्यामपि सिद्धौ यदि नानुमितिस्तदान्यमात्रलिङ्गकानुमितीच्छा कामिनीजिज्ञासादिवत् पृथक् प्रतिबन्धिका,

---

वैशिष्ट्यं तु विशेषणताविशेषावच्छिन्नाधिकरणे समवेतत्वमित्यनुगतवैशिष्ट्यासम्भवादेव नैकाभावविशिष्टाप्राभावविशिष्टसिद्धित्वेन प्रतिबन्धकत्वं किन्तु तावदभावविशिष्टसिद्धित्वेनैवेति दिक्। स्वतन्त्रास्तु तत्तद्विच्छाविरहकूटत्वविशिष्टसिद्धित्वावच्छिन्नाभावस्याखण्डस्य तत्तद्व्यक्तित्वेनैव हेतुत्वं तत्तद्व्यक्तित्वं च तादात्म्येन सैव व्यक्तिरित्यदोषः। चिन्तामणिकृन्मते विशिष्टाभावस्यातिरिक्तत्वात्। न च कारणतामात्रस्य धर्मावच्छेद्यत्वे मानाभावादेवावच्छेदकं विनैवाखण्डतादृशसिद्धयभावव्यक्तेरनुमितिकारणत्वमिति प्रलापो ग्राह्यः, व्यापकतागर्भायाः कारणतायाः अवच्छेदकस्य नानाव्यक्तिस्थले इवैकव्यक्तिस्थलेऽपि सम्भवेन वारयितुमशक्यत्वात्, पदार्थान्तररूपायास्तु कारणतायाः अवच्छेदकस्य नानाधिकरणेष्वपि परित्यागप्रसङ्गादित्याहुः। तच्चिन्त्यम्। के चित्तु पक्षधर्मिकसाध्यावधेयकानुमितित्वप्रकारकेच्छात्वेनैवानुगतरूपेणोत्तेजकत्वे लाघवात् इच्छान्तरस्थले च तादृशेच्छोत्पत्त्यैवानुमितिसामग्र्या एव कारणीभूतस्य विशिष्टाभावस्य सम्पत्तेरिति प्राहुः। आलोकपरामर्शादिति। आलोकमात्रपरामर्शादित्यर्थः। तदान्यमात्रेति। धूमेनालोकेन च पर्वते वन्ह्यनुमितिर्जायतामितीच्छायामपि धूमलिङ्गकानुमित्यर्थं मात्रपदम्। तथा च धूमलिङ्गकानुमित्साविरहविशिष्टैवालोकलिङ्गकानुमित्सा धूमलिङ्गकानुमितौ प्रतिबन्धिकेत्यर्थः। अत्र यद्यपि धूमलिङ्गकानुमितित्वप्रकारकेच्छात्वेनैवोत्तेजकत्वे धूमेन द्रव्यत्वस्यालोकेन च वन्हेः पर्वतेनुमितिर्जायतामितीच्छायामपि वन्हिव्याप्यधूममात्रपरामर्शाद्धूमलिङ्गकानुमित्यापत्तेः, धूमलिङ्गकवन्ह्यनुमितित्वप्रकारकेच्छात्वेन तथात्वे तु धूमेन महानसादावालोकेन च पर्वते वन्ह्यनुमितिर्जायतामितीच्छायामपि धूममात्रपरामर्शात्पर्वते वन्ह्यनुमित्यापत्तेः। न च पर्वतपक्षकधूमलिङ्गकवन्ह्यनुमितौ तादृशानुमितित्वप्रकारकेच्छाविरहविशिष्टालोकलिङ्गकेच्छात्वेनैव प्रतिबन्धकत्वम्, धूमेनालोकेन चानुमितिर्जायतामितीच्छायामपि धूममात्रस्य परामर्शाद्धूम-

लिङ्गकानुमित्यभावापत्तेः तदिच्छायाः पर्वतपक्षकवन्ह्यनुमितित्वप्रकारकत्वाभावात्। तथापि यद्यदिच्छाव्यक्तिदशायामालोकलिङ्गकानुमितीच्छाव्यक्तिसत्त्वेपि पर्वतधर्मिकधूमलिङ्गकवन्ह्यनुमितिः प्रामाणिकी तत्तदिच्छाविरहकूटविशिष्टालोकलिङ्गकानुमितित्वप्रकारकेच्छात्वेनैव तादृशधूमलिङ्गकानुमितिप्रतिबन्धकत्वं वाच्यमत एवालोकालिङ्गिका सती या धूमलिङ्गिका पर्वते वन्ह्यनुमितिः सा जायतामितीच्छासत्त्वे पर्वतधर्मिकधूममात्रपरामर्शान्न वन्ह्यनुमितिस्तदिच्छाव्यक्तेरुत्तेजकानन्तर्गतत्वात्। न च यत्र धूममात्रपरामर्शोत्तरं धूमालोकोभयलिङ्गकानुमितिर्जायतामितीच्छा ततस्तदुभयलिङ्गकपरामर्शोत्पत्त्यानुमितिस्तत्र तदुभयलिङ्गकपरामर्शोत्पत्तिक्षणे धूमलिङ्गकानुमितिः स्यादग्निमानुमित्यनुरोधेन तदिच्छाव्यक्तेरुत्तेजकत्वादिति वाच्यम्। तत्र समूहालम्बनपरामर्शव्यक्तिविशिष्टतत्तदिच्छाव्यक्तित्वेनैवोत्तेजककोटौ निवेश्यत्वात्। इत्थं चालोकेन महानसे वन्ह्यनुमितिर्जायतामितीच्छासत्त्वेपि धूमपरामर्शात्पर्वते वन्ह्यनुमितिरप्रत्यूहैव तदिच्छाव्यक्तेरपि स्वस्मिन्नुत्तेजकत्वात्। अत एवालोकेन वन्ह्यनुमितिर्जायतामितीच्छोत्तरं धूमालोकयोः समूहालम्बनपरामर्शात्पर्वते वन्ह्यनुमितिर्न स्यात्तस्या अपि धूमपरामर्शव्यवहितोत्तरत्वेन धूमलिङ्गकानुमितित्वात्तादृशानुमितिविरोध्यालोकलिङ्गकानुमित्सायाः सत्त्वादिति परास्तम्। तदिच्छाव्यक्तेरप्युत्तेजकत्वात्तत्र धूमलिङ्गकत्वप्रकारकेच्छात्वेनोत्तेजकत्वासम्भवस्यानुपदमुक्तत्वात्। यत्तु पर्वतधर्मिकवन्ह्यनुमितिसामान्यं प्रत्यालोकादिलिङ्गकपरामर्शाभावविशिष्टालोकादिमात्रलिङ्गकानुमित्सात्वेन प्रतिबन्धकत्वं वाच्यं न तु धूमादितत्तल्लिङ्गकानुमितित्वावच्छिन्नं प्रति तदन्यलिङ्गकानुमित्सात्वेन प्रतिबन्धकत्वम्, कार्यतावच्छेदकगौरवापत्तेः। तथा चोक्तस्थले आलोकलिङ्गकपरामर्शसत्त्वेन तल्लिङ्गकानुमित्सा नानुमितिप्रतिबन्धिका। न च मात्रपदवैयर्थ्यम्, धूमपरामर्शोत्तरमालोकेन धूमेन वा वन्ह्यनुमितिर्जायतामितीच्छादशायामनुमित्यर्थं तदुपादानादिति। तन्न। धूमपरामर्शदशायामालोकेन भस्मना च वन्ह्यनुमितिर्जायतामितीच्छासत्त्वेप्यनुमितिप्रसङ्गात्। आलोकपरामर्शाभावविशिष्टाया अपि तादृशेच्छाया आलोकलिङ्गकत्वमात्राप्रकारकत्वात्। न चालोकलिङ्गकपरामर्शाभावविशिष्टेन

यदि च तत्रानुमितिस्तदा सिद्धिसत्त्वे तत्रानुमितेर्व्वारणाय तल्लिङ्गकानुमितीच्छा तदन्यमात्रालिङ्गकानुमितीच्छातिरिक्तानुमितीच्छा

धूमलिङ्गकत्वाप्रकारकालोकलिङ्गकानुमित्सात्वेन पर्वतधर्मिकवन्ह्यनुमितिसामान्यं प्रति विरोधित्वान्नैष दोष इति वाच्यम। भस्मलिङ्गकपरामर्शोत्तरमप्यालोकेन धूमेन च वन्ह्यनुमितिर्जायतामितीच्छासत्त्वे वन्ह्यनुमितिप्रसङ्गात्। तादृशेच्छायां धूमलिङ्गकत्वप्रकारकत्वनाविरोधित्वात् तस्मात्तल्लिङ्गकानुमितित्वावच्छिन्नं प्रति प्रागुक्तक्रमेण तत्तदन्यमात्रलिङ्गकानुमित्सात्वेन प्रतिबन्धकत्वमेव सम्यगिति दिक्। यदि चं तत्रेति। अन्यसाध्यकानुमित्सायां इवान्यलिङ्गकानुमित्सायां अपि स्वतः प्रतिबन्धकत्वे मानाभावादिति भावः। तत्रेति। सिद्ध्यात्मकालोकपरामर्शोत्तरं धूमेनानुमिनुयामितीच्छादशायामनुमितिवारणायेत्यर्थः। न च तत्तदनुमित्साव्यक्तीनामुत्तेजककोटौ प्रवेशादेव न तत्रानुमितिरिति वाच्यम। यत्र सिद्ध्यात्मकालोकपरामर्शोत्तरं धूमलिङ्गकानुमित्सा ततः क्रमेण सिद्ध्यात्मकधूमपरामर्शाद्वन्ह्यनुमितिस्तत्र धूमपरामर्शोत्पत्तिक्षणे वन्ह्यनुमित्यापत्तेः। पर्वतपक्षकवन्ह्यनुमितौ तदिच्छाव्यक्तेरप्युत्तेजकत्वात्। अन्यथा तत्रैव सिद्ध्यात्मकधूमपरामर्शाद्वन्ह्यनुमितिर्न स्यादिति भावः। यद्यपि वक्ष्यमाणस्वविषयसिद्ध्यनुपहितत्वविशेषणेनैव धूमादिलिङ्गकतत्तत्परामर्शविशिष्टाया एव तत्तदिच्छाव्यक्तेरुत्तेजकतायां न कोपि दोषः प्रागुक्तस्थले धूमपरामर्शविशिष्टानुमित्साव्यक्तिविरहसहकृतसिद्धिसत्त्वादेव धूमपरामर्शोत्पत्तिदशायामपि अनुमित्यापत्तेरसम्भवात्। तथापि मिश्रादिसंमतमेकावच्छेदेन पक्षतापरामर्शोभयजन्यत्वमनुमितेः सम्पादयितुमनुमित्सामेवान्यथा निर्वक्ति तल्लिङ्गकानुमित्सेति। वाच्येति परेणान्वयः। ननु तल्लिङ्गकानुमितित्वप्रकारकेच्छाव्यक्तीनामुत्तेजकत्वे वन्ह्यनुमितिर्जायतामितीच्छायां सिद्ध्यात्मकालोकपरामर्शादालोकलिङ्गकानुमितिर्न स्यात्तदिच्छाव्यक्तेरालोकलिङ्गकत्वाप्रकारकत्वादत आह तदन्यमात्रेति। धूमालोकाभ्यां वन्ह्यनुमितिर्जायतामितीच्छादशायां सिद्ध्यात्मकालोकपरामर्शादनुमित्यर्थं मा

वा वाच्या । लिङ्गविशेषेणापि च नियन्त्रितं पक्षत्वम् । तल्लिङ्ग-कानुमितौ सिद्धिकालीना तल्लिङ्गकानुमितीच्छाविरहविशिष्टान्य-

---

अपदम्। तथा च तल्लिङ्गकानुमितित्वाप्रकारकत्वे सति या यत्किञ्चि-ल्लिङ्गकानुमितित्वप्रकारिकेच्छा तदतिरिक्तानुमित्सा सिषाधयिषाप-देन वाच्येत्यर्थः । तेन प्रमेयलिङ्गकानुमितिस्थले तदन्यलिङ्गाप्रसि-द्धावपि न क्षतिः । अत्र तदन्यमात्रलिङ्गकानुमित्सातिरिक्तत्वं न वि-शेषणं किं तूत्तेजकीभूतत्तदिच्छाव्यक्तीनां परिचायकमिति मन्तव्य-म् । ननु तल्लिङ्गकानुमित्साविरहविशिष्टसिद्धिसत्त्वेऽप्यन्यलिङ्गकानु-मित्सान्यलिङ्गकपरामर्शोत्तरं प्रकृतपक्षसाध्यानुमितेरुत्पादेन व्यभि-चारात्कुतः पक्षताया अनुमितिहेतुत्वमित्यत आह लिङ्गेति । लिङ्ग-विशेषनियन्त्रितं लिङ्गविशेषावच्छिन्नकार्यतेकम् । तथा च यद्यद-नुमित्साव्यक्तिसत्त्वे सिद्धिदशायां तल्लिङ्गकतत्पक्षकतत्साध्यकानु-मितिर्जायते तत्तदिच्छाव्यक्तिविरहविशिष्टसिद्ध्यभावस्तल्लिङ्गकत-त्साध्यकानुमितित्वावच्छिन्नं प्रत्येव हेतुरतो न व्यभिचार इति भावः। अन्यलिङ्गकानुमित्सायास्तल्लिङ्गकानुमितौ स्वातन्त्र्येण विरोधित्वे प-क्षताया लिङ्गविशेषानियन्त्रितत्वेपि न क्षतिरित्याह तल्लिङ्गकानुमि-ताविति । सिद्धयभावदशायामन्यलिङ्गकेच्छासत्त्वेपि तल्लिङ्गकानु-मित्युत्पत्तेराह सिद्धिकालीनेति । सिद्धिविशिष्टेत्यर्थः । तल्लिङ्ग-कानुमित्सासत्त्वेऽन्यलिङ्गकानुमित्सायास्तल्लिङ्गकानुमित्यप्रतिबन्धक-त्वादाह तल्लिङ्गकानुमितीच्छाविशेषविरहकूटविशिष्टेति । तल्लिङ्ग-कानुमितित्वं तल्लिङ्गकपरामर्शाव्यवहितोत्तरानुमितित्वं तथा चा-लोकलिङ्गकानुमित्सादशायां धूमालोकयोः सिद्ध्यात्मकपरामर्शोत्तरं पर्वते वन्ह्यनुमितिर्न स्यात् तस्या अपि निरुक्तधूमलिङ्गकत्वेनालोक-लिङ्गकानुमित्साप्रतिबद्धत्वादतो विशेषपदम् । तेन वस्तुगत्या त-ल्लिङ्गकानुमितिगोचरयद्यदिच्छाव्यक्तिसत्त्वेऽन्यलिङ्गकानुमित्साका-ले तल्लिङ्गकानुमितिर्जायते तत्तदिच्छाविरहकूटविशिष्टान्यलिङ्गका-नुमित्सात्वेनैव तल्लिङ्गकानुमितौ प्रतिबन्धकत्वमुक्तस्थले चालोक-लिङ्गकानुमित्साव्यक्तेरपि वस्तुगत्या धूमलिङ्गकानुमितिगोचर-तया तदिच्छाव्यक्तेरुत्तेजककोटौ निविष्टत्वान्न दोषः । विशेषपदा-

लिङ्गकानुमितीच्छैव वा प्रतिबन्धिका । साधकमानं साध्यवत्त्वनिश्चयः । पाषाणमयत्वादिना पर्वते तेजस्त्वादिना च वन्हेः सि-

---

सत्त्वपक्षेपि तल्लिङ्गकानुमित्साविशिष्टत्वस्योक्त एवार्थो ग्राह्यः । अत्रापि वैशिष्ट्यमेकसमयावच्छेदेनैकात्मवृत्तित्वम् । तेन पुरुषान्तरीयतल्लिङ्गकानुमितीच्छामादायान्यलिङ्गकानुमित्सादशायां नानुमितेरुत्पादः । न च तल्लिङ्गकानुमित्साभिन्नतदन्यलिङ्गकानुमित्सैव प्रतिबन्धिकास्तु तल्लिङ्गकानुमित्साविरहविशिष्टत्वप्रवेशे गौरवादिति वाच्यम् । यत्र सिद्ध्यात्मकापेक्षाबुद्ध्यात्मकधूमपरामर्शोत्तरं क्रमेणालोकलिङ्गकानुमितित्वप्रकारेण धूमलिङ्गकानुमितित्वप्रकारेण चेच्छाद्वयी तत्र चतुर्थक्षणे धूमलिङ्गकानुमित्यनुत्पादापत्तेः धूमलिङ्गकानुमित्साभिन्नाया एवालोकलिङ्गकानुमित्सायाः सत्त्वादिति भावः। अन्यलिङ्गकानुमित्सैव वेति वाकारोऽनास्थायाम् । पूर्वकल्पोक्तस्य तल्लिङ्गकानुमित्साविरहविशिष्टसिद्ध्यभावत्वेन तल्लिङ्गकानुमितिहेतुत्वस्य लाघवेन तदपेक्ष्य एतत्कल्पस्य गुरुत्वात्तत्पक्षसाध्यकानुमितौ सामान्यतः सिषाधयिषाविरहविशिष्टसिद्ध्यभावत्वेन कारणान्तरस्याप्यत्र कल्पे वक्तव्यत्वादन्यथा सिद्ध्यात्मकपरामर्शमात्रादनुमित्यापत्तेस्तादवस्थ्यादिति ध्येयम्।ननु साधकमानं सिद्धिजनकं मानं तथा च परामर्शमात्रादप्यनुमितिर्न स्यात्तस्यैव तादृशसाधकमानत्वादतो व्याचष्टे साध्यवत्त्वनिश्चय इति । साध्यवत्त्वसंशयेप्यनुमित्युत्पादाच्चिश्चय इत्युक्तम् । यद्यपि साध्यवत्त्वनिश्चयत्वं यदि साध्यसामान्याभावाप्रकारकत्वे सति साध्यप्रकारकत्वं तदा पर्वतः कपिलवन्हिमान्न वेति सन्देहदशायां पर्वतो वन्हिमानित्यनुमितिर्न स्यात्तादृशसन्देहस्यापि वन्हिसामान्याभावाप्रकारकत्वे सति वन्हिप्रकारकत्वात् । न च येन रूपेण साध्यता तन्मात्रावच्छिन्नप्रकारकत्वं निश्चयत्वघटकमतः कपिलवन्हित्वावच्छिन्नप्रकारताकसन्देहस्य वन्हित्वमात्रावच्छिन्नप्रकारताकत्वाभावान्न दोष इति वाच्यम् । पर्वतः कपिलवन्हिमानिति निश्चयदशायामपि पर्वतो वन्हिमानित्यनुमित्यापत्तेस्तादृशनिश्चयस्य वन्हित्वमात्रावच्छिन्नप्रकारकत्वाभावात् । न चेष्टापत्तिः, अनुभवविरोधात् । अत एव गवाश्रितत्व

द्धावपि पर्वतत्वेन तत्र वन्हित्वेन च तस्यानुमितेर्द्धर्म्मित्वसाध्यत्वयोरवच्छेदकावनुपवेशनीयौ । यदि च पर्वतत्वसामानाधिकरण्ये-

---

साध्ये सकलगवाश्रितत्वं न हेतुरविशिष्टसाध्यवत्त्वानुमितौ विशिष्टसाध्यवत्ताग्रहस्यापि विरोधितया पक्षधर्मताग्रहदशायां सिद्धसाधनादिति शक्तिवादे मिश्रैरप्युक्तम् । यदि च साध्यप्रतियोगिकाभावाप्रकारकत्वे सति साध्यप्रकारकत्वमेव साध्यनिश्चयत्वं तदारुणवन्हिशून्यः पर्वतो वन्हिमानित्येवं निश्चयेपि पर्वतो वन्हिमानित्यनुमित्यापत्तिः उक्तनिश्चयस्य वन्हिप्रतियोगिकाभावप्रकारकत्वेनाविरोधित्वात् । तथापि वन्हित्वावच्छिन्नविधेयकानुमितिं प्रति वन्हिसामान्याभावाप्रकारकवन्हित्वावच्छिन्नप्रकारकत्वेन कपिलवन्ह्यभावाप्रकारककपिलवन्हित्वावच्छिन्नप्रकारकत्वादिना च प्रत्येकधर्मेणैव प्रतिबन्धकत्वात् तत्तत्सिद्ध्यभावकूटस्यैव पक्षतात्वं विरोधिसाध्यनिश्चयानामनुगतैकधर्माभावात् । वस्तुतस्तु साध्यतावच्छेदकावच्छिन्नप्रकारतान्यप्रकारत्वानिरूपितप्रकृतपक्षनिष्ठविशेष्यताकज्ञानत्वमेव साध्यनिश्चयत्वं वाच्यं पर्वतः कपिलवन्हिमान्न वेत्यादिसंशये तु पर्वतनिष्ठविशेष्यत्वं वन्हित्वावच्छिन्नप्रकारत्वभिन्नेन कपिलवन्ह्यभावत्वावच्छिन्नप्रकारत्वेन निरूपितमतस्तद्व्युदासः । संशये विशेष्यतामात्रस्यैव प्रकारताद्वयनिरूपितत्वात् एवं च निर्वह्निर्वह्निमांश्च पर्वत इत्यादिसमुच्चयस्यापि साध्यनिश्चयत्वसम्भवात्तत्सत्त्वेपि न वन्ह्यनुमितिः । समुच्चयस्थले प्रकारताद्वयनिरूपितविशेष्यताद्वयोपगमात् । भूतलं घटवत्पटवच्चेत्यादिस्थले भूतलस्य द्विधा भानवदत्रापि पर्वतस्य प्रकारताद्वयांशे द्वैविध्येन भानादित्यत्र विस्तरः । तत्र पर्वते । तस्य वन्हेः । धर्मित्वेति । न चैवं वन्हिमान् वन्हिमानित्येवमप्यनुमितिः स्याद्धर्मितावच्छेदकमनन्तर्भाव्य वन्हिमत्तानिश्चयस्याविरोधित्वादिति वाच्यम् । इष्टत्वात् । वन्हिमत्पक्षकवन्हिसाध्यकानुमितिमन्तर्भाव्य पक्षताया हेतुत्वाकल्पनेन तदापत्त्यसम्भवाच्च । अत्र धर्मितेत्युपलक्षणम् । एकसम्बन्धेन साध्यवत्त्वनिश्चयेपि सम्बन्धान्तरेण साध्यानुमितेरुत्पादात्सम्बन्धविशेषोप्यनुसरणीयः । पर्वतत्वस्यावच्छेदकत्वं विषयीकृत्यैकत्र पर्वते साध्यसिद्धावप्यन्यत्र पर्वते

नैकत्र साध्यसिद्धावपि विनानुमित्सामन्यत्र तादृशानुमितिरानुभविकी तदा धर्म्मिविशेषोऽपि निवेश्यो नान्यथा। पक्षतावच्छेद-

---

स्वर्वदैवानुत्पत्तेः पर्वतत्वसामानाधिकरण्येनेत्युक्तम्। अवच्छेदकत्वमविषयीकृत्य पर्वतत्वप्रकारेणेति तदर्थः। तादृशानुमितिः पर्वतत्वसामानाधिकरण्येन साध्यानुमितिः। धर्मिविशेषोपीति। तथा च पर्वतत्वप्रकारेण तत्पर्वतधर्मिकवन्ह्याद्यनुमितौ पर्वतत्वप्रकारेण तत्पर्वतधर्मिकवन्ह्यादिनिश्चयत्वेनैव प्रतिबन्धकत्वं वाच्यमिति भावः। इदमुपलक्षणम्। साध्यतावच्छेदकरूपेणैकसाध्यव्यक्तेः सिद्धावपि विनानुमित्सामन्यसाध्यव्यक्तेरनुमितेरानुभविकत्वे साध्यविशेषोपीत्यपि द्रष्टव्यम्। नान्यथेति। धर्म्यन्तरेऽनुमित्यनुत्पादे तु धर्मिविशेषोपि न निवेश्य इत्यर्थः। अथ तत्पुरुषीयवन्ह्यादिविधेयकानुमितिं प्रति तदीयानुमित्साविरहविशिष्टतदीयवन्ह्यादिमत्तानिश्चयत्वेनैव समानविशेष्यताप्रत्यासत्त्या प्रतिबन्धकत्वं न तु सामानाधिकरण्यप्रत्यासत्त्या तथात्वम्। तथासति पर्वतत्वादिविशिष्टविशेष्यकवन्ह्यादिप्रकारकानुमितौ पर्वतत्वादिविशिष्टविशेष्यकवन्ह्यादिमत्तानिश्चयत्वेन विरोधित्वे धर्मितावच्छेदकविधया पर्वतत्वमहानसत्त्वाद्यनेकधर्मान्तर्भावेणाऽनन्तकार्यकारणभावकल्पनापत्तेः। न च तवापि पुरुषभेदेनानन्तकार्यकारणभावः। तत्पुरुषस्यापि क्व चित्पक्षतया तद्भेदेन कार्यकारणभावनानात्वस्य त्वयाप्यङ्गीकर्त्तव्यत्वात्। तथा चार्थवशसम्पन्न एवावश्यं धर्मिविशेषस्य निवेश इति चेन्न। पाषाणमयत्वेन पर्वते वन्हिनिश्चयेपि पर्वतत्वेन तत्र वन्ह्यनुमित्युत्पत्तेः समानविशेष्यतया प्रतिबन्धकत्वासम्भवात्। न चैकधर्मावच्छिन्नविशेष्यत्वमेव प्रत्यासत्तिरित्यदोषः, पाषाणमयत्वस्याप्येकधर्मतया तदवच्छिन्नविशेष्यत्वस्याप्यव्यावर्तकत्वात्। तत्तद्धर्मावच्छिन्नविशेष्यतात्वेन प्रत्यासत्तितायां तु तत्तद्धर्मघटितसम्बन्धभेदेन कार्यकारणभावानन्त्यम्, अत्रापि तत्पुरुषस्यावच्छेदकधर्मविधया प्रवेशे गौरवं पुनरधिकं विनिगमनाविरहेण प्रकारताप्रत्यासत्त्या प्रतिबध्यप्रतिबन्धकभावकल्पनापत्तिश्च। वस्तुतः समानविशेष्यतया विरोधित्वे यत्र

कस्य सामानाधिकरण्येन साध्यसिद्धावपि तदवच्छेदेनानुमितिदर्शनात् पक्षतावच्छेदकावच्छेदेनानुमितिं प्रति तदवच्छेदेन सि-

---

पर्वतत्वचत्वरत्वाभ्यां पर्वतचत्वरयोरेव साध्यवत्तानिश्चयात्मकः साध्यव्याप्यवत्तापरामर्शस्तदनन्तरं च पर्वतांशे साध्यवत्तानिश्चयस्याप्रामाण्यज्ञानं पर्वतधर्मिकानुमितिर्जायतामितीच्छा वा तत्रोत्तरकाले पर्वते इव चत्वरेऽपि साध्यानुमितिः स्यात् अप्रामाण्यज्ञानाभावविशिष्टस्यानुमित्साविरहविशिष्टस्य च साध्यनिश्चयत्व विशेष्यतासम्बन्धेन चत्वरे विरहात्, तादृशाप्रामाण्यज्ञानव्यक्तेरनुमित्साव्यक्तेर्वानुतेजकत्वे पर्वतेऽप्यनुमित्यनुपपत्तेरिति दिक् । पक्षतेत्यादि । पक्षतावच्छेदकीभूतपर्वतत्वावच्छेदधर्मावच्छेद्यत्वमविषयीकृत्य साध्यसिद्धावपीत्यर्थः । तदवच्छेदेनेति । पक्षतावच्छेदकीभूतपर्वतत्वावच्छेद्यत्वं विषयीकृत्यानुमितेर्दर्शनादित्यर्थः।तदवच्छेदेन सिद्धेरिति।पर्वतत्वावच्छेद्यत्वावगाहिसिद्धेरित्यर्थः । विरोधित्वमित्यग्रेन्वयः।तथा च पर्वतत्वावच्छेद्यत्वावगाहिपर्वतधर्मिकवन्हिविधेयकानुमितिं प्रति पर्वतत्वावच्छेद्यत्वावगाहिपर्वतधर्मिकवन्हिमत्तानिश्चयत्वेन प्रतिबन्धकत्वम् । तत्र च पर्वतविशेष्यकत्वं पर्वतत्वविशिष्टविशेष्यकत्वमात्रं तेन पर्वतत्वावच्छेदेन वन्हिनिश्चयेपि पर्वतो वन्हिमानित्याकारिकाया इव नीलपर्वतो वन्हिमानित्याकारिकाया अप्यनुमितेर्नोत्पत्तिः । पर्वतत्वावच्छेद्यत्वं न स्वरूपसम्बन्धविशेषो मानाभावात् किं तु पर्वतत्वव्यापकसम्बन्धप्रतियोगित्वं तदपि संसर्गमर्यादयैव भासते पर्वतो वन्हिमानित्याकारकानुमितौ पर्वतत्वव्यापकवन्हिसंयोगत्वेनैव संयोगस्य सम्बन्धाविधया भानस्वीकारात् । न च पक्षतावच्छेदकव्यापकत्वमेव तदवच्छेद्यत्वमस्तु साध्यप्रवेशो व्यर्थ इति वाच्यम् । पर्वतत्वावच्छेदेन तद्रूपवत्त्वानुमितेः प्रमात्वापत्तेः । समवायस्यैकत्वात् पर्वतत्वव्यापकसमवायेन पर्वतस्य तद्रूपव्यक्तिमत्त्वात् । न च पर्वतत्वव्यापकवन्हिसंयोगेन वन्हेः साधनव्यापकत्वाग्रहात् तादृशसम्बन्धेन वन्ह्यनुमित्यसम्भव इति वाच्यम् । एकविशेषबाधसहकाराद्व्यापकतानवच्छेदकप्रकारेणेव निरुक्तसिद्ध्यभावरूपपक्षतासहकाराद्व्या-

द्धेस्तत्सामानाधिकरण्यमात्रेणानुमिति प्रति तु सिद्धिमात्रस्य विरो-

---

पकतानवच्छेदकसम्बन्धेनापि साध्यानुमितेः सामान्यपरामर्शादेव सम्भवात् । न च पर्वतधर्मिकवन्ह्यनुमितिमात्रं प्रत्येव पर्वतत्वावच्छेद्यत्वावगाहिनिश्चयस्य विरोधित्वात् प्रतिबध्यकोटौ पर्वतत्वावच्छेद्यत्वप्रवेशो व्यर्थ इति वाच्यम् । पर्वतत्वावच्छेदेन सिद्ध्युत्तरं तदवच्छेदेनानुमित्सया पर्वतत्वावच्छेदेनेव तत्सामानाधिकरण्येनाप्यनुमित्यापत्तेः । यत्तु पर्वतत्वावच्छेद्यत्वमवच्छेद्यतासम्बन्धेन पर्वतत्वादिकं वा साध्यांशे प्रकारतयैवानुमितौ भासते तथा च पर्वतः पर्वतत्वावच्छेद्यवन्हिमानित्येव पर्वतत्ववद्वन्हिमानित्येव वानुमितिरिति प्राचीनाः । तच्चिन्त्यम् । शिखरावच्छेदेन पर्वतो वन्हिमानित्यनुमितौ तु पक्षतावच्छेदकीभूतशिखरावच्छिन्नत्वं स्वरूपसम्बन्धरूपमेव भासते न तु व्यापकत्वलक्षणमननुभवात्, एवं च तत्र शिखरावच्छेद्यवन्हिसंयोगेन वन्ह्यनुमितौ शिखरावच्छेद्यवन्हिसंयोगेनैव वन्हिनिश्चयो विरोधी न तु संयोगमात्रेणेत्यवधेयम् । सामानाधिकरण्यमात्रेणेति । पक्षतावच्छेदकरूपेण पक्षे साध्यानुमितित्वमेव तत्सामानाधिकरण्येनानुमितित्वं तच्च पक्षतावच्छेदकावच्छेदेनानुमितावप्यस्तीत्यतो मात्रपदम् । सिद्धिमात्रस्येति । तत्र पक्षतावच्छेदकसामानाधिकरण्यमात्रेणानुमितित्वं न तदवच्छेद्यत्वानवगाह्यनुमितित्वं पर्वतत्वावच्छेदेन तत्सामानाधिकरण्येन च परामर्शद्वयात्पर्वतत्वावच्छेद्यत्वावगाहितदनवगाह्यानुमित्योर्युगपदुत्पादप्रसङ्गात् सामग्रीसत्त्वात् । किं तु यद्रूपेण साध्यतावच्छेदकसम्बन्धत्वं तादृशधर्ममात्रावच्छिन्नसंसर्गताकपक्षधर्मिकसाध्यानुमितित्वमनिरुक्तपक्षे च संयोगनिष्ठद्वित्वविधसंसर्गताकसमूहालम्बनानुमितिस्वीकारात् । तथा च संयोगत्वमात्रावच्छिन्नसंसर्गताकपर्वतधर्मिकवन्हिविधेयकानुमितिं प्रति संयोगत्वविशिष्टसंसर्गताकपर्वतधर्मिकवन्हिमत्तानिश्चयत्वेनैकरूपेण सिद्धिर्हेयं प्रतिबन्धकं पर्वतत्वावच्छेदेनानुमितौ तु संयोगनिष्ठसंसर्गता न संयोगत्वमात्रावच्छिन्ना किं तु पर्वतत्वावच्छेद्यवन्हिसंयोगत्वावच्छिन्नैवेति पर्वतत्वसामानाधिकरण्येन सिद्धिसत्त्वेपि तदुत्पत्तिः । न चैवं संयोगमात्रेण वन्हिनिश्चयेपि पर्व-

धित्वम् । इत्थञ्च लिङ्गभेदन्यायोऽनुसरणीयः । साध्यविशेष्यक-सिद्ध्यनन्तरं पक्षविशेष्यकानुमितेः प्रामाणिकत्वे तां प्रति पक्षवि-शेष्यकैव सिद्धिर्विरोधिनी । एवञ्च पक्षविशेष्यकसिद्ध्यनन्तरमपि साध्यविशेष्यकानुमितिर्जायते, तुल्यन्यायात् समानाकारायाः

तीयसंयोगेन वन्ह्यनुमितिः स्यात् न स्याच्च पर्वतीयत्वविशिष्टसंयोगेन वन्हिनिश्चयेपि संयोगमात्रेण पर्वते वन्ह्यनुमितिरिति वाच्यम् । इष्ट-त्वात् । सामान्यघटितविशेषप्रकारेणैव तादृशसम्बन्धेनापि सिद्धेः सामान्यानुमितिविरोधित्वात् । एवमनयैव दिशा अन्यत्रापि प्रतिब-न्धकत्वमूह्यमिति सङ्क्षेपः । इत्थं चेति । पक्षतावच्छेदकावच्छेदेन सिद्ध्युत्तरं तत्सामानाधिकरण्यमात्रेणानुमित्सायामपि तदवच्छेदे-नानुमित्यनुत्पत्तेस्तादृशानुमितौ पक्षतावच्छेदकावच्छेदेनानुमित्सै-वोत्तेजिका वाच्या एवं पक्षतावच्छेदकसामानाधिकरण्यमात्रेण सि-द्ध्युत्तरं तदवच्छेदेनानुमित्सायामपि तत्सामानाधिकरण्येनानुमित्यनु-त्पत्तेस्तादृशानुमितौ पक्षतावच्छेदकसामानाधिकरण्यमात्रेणानुमित्सै-वोत्तेजिका वाच्येति लिङ्गविशेषनियन्त्रितमिवानुमितिविशेषेणापि नियन्त्रितं पक्षत्वम् । यद्वा तत्पक्षकतत्साध्यकानुमितिं प्रत्येव सा-मान्यतः पक्षता हेतुः पक्षतावच्छेदकावच्छेदेनानुमितौ तु तदवच्छि-न्नसिद्धिकालीना तत्सामानाधिकरण्यमात्रेणानुमित्सा पृथक् प्रति-बन्धिका पक्षतावच्छेदकसामानाधिकरण्यमात्रेणानुमितावपि सामा-नाधिकरण्येन सिद्धिकालीना तदवच्छेदेनानुमित्सा पृथक् प्रतिबन्धि-का वाच्या । यदि चासत्यामपि समानाकारकसिद्धौ पक्षतावच्छेद-कावच्छेद्यत्वावगाह्यनुमित्सायां सत्यां तत्सामानाधिकरण्यावगाह्य-नुमितेर्नोत्पादस्तदा सिद्धिकालीनत्वं प्रतिबन्धकत्वे न प्रवेश्यमिति भावः । साध्यविशेष्यकेति । विनानुमित्सामित्यादिः । तां प्रतीति । पक्षविशेष्यकानुमितिं प्रतीत्यर्थः । समानाकारेति । तथा च संयोग-सम्बन्धावच्छिन्नाधेयतासम्बन्धेन पर्वतनिष्ठप्रकारतानिरूपितवन्हि-त्वावच्छिन्नविधेयताकानुमितिं प्रति तादृशसम्बन्धावच्छिन्नपर्वत-निष्ठप्रकारतानिरूपितवन्हित्वावच्छिन्नविशेष्यताकनिश्चयत्वेन विरो-

सिद्धेः प्रतिबन्धकत्वे पर्य्यवसानात्। तादृशानुमितिं प्रति सिद्धिमात्रं विरोधि साध्यप्रसिद्धिरेव वा। अत एव प्रसिद्धसाध्यकस्थले पक्षविशेष्यकैवानुमितिरनुभूयत इति। अत्र च व्याप्तिस्मरणा-

---

धित्वं विधेयत्वं तु न प्रकारतानियतं किं तु पर्वते वन्हिः पर्वतो वन्हिमानित्याद्यनुमितौ पर्वते वन्हिमनुमिनोमि न तु वन्हौ पर्वतमि यनुभवसाक्षिको विषयताविशेषः क चिद्विशेष्यवृत्तिरपीति नासिद्धिः। अत एव गुणानां गुणत्वमित्यत्र विशेष्यीभूतस्यापि गुणत्वस्य विधेयत्वमुक्तमुपाध्यायैरिति ध्येयम्। ननु पक्षविशेष्यकसिद्ध्युत्तरं साध्यविशेष्यकानुमितिर्न क्वाप्यनुभवसिद्धेत्यत आह तादृशेति। पक्षनिष्ठप्रकारतानिरूपितसाध्यविशेष्यकानुमितिं प्रतीत्यर्थः। सिद्धिमात्रमिति। साध्यविशेष्यिका पक्षविशेष्यिका च सिद्धिर्विरोधिनीत्यर्थः। पर्वतो वन्हिमानिति निश्चयोत्तरं वन्हौ पर्वतव्याप्यवत्तापरामर्शाद्वन्हिः पर्वते इत्यनुमितौ च वन्हेर्न विधेयत्वं किं तु पर्वतस्यैव तथात्वं यद्व्याप्यवत्ताज्ञानजन्यत्वमनुमितेस्तदंश एव विधेयताख्यविषयतास्वीकारादिति भावः। नन्वेवं प्रसिद्धसाध्यकपरामर्शात्सर्वत्रैव पक्षसाध्योभयविशेष्यकानुमितिः स्यात् पक्षतादृयसत्त्वेनोभयधर्मावच्छिन्नसामग्रीसत्त्वादित्यस्वरसाल्लाघवाच्च साध्यज्ञानत्वेनैव साध्यविशेष्यकानुमितिं प्रति विरोधित्वमाह साध्यप्रसिद्धिरेवेति। एवकारेणानुमित्साया उत्तेजकत्वस्यापि प्रतिक्षेपः सूचितः। साध्यज्ञानमात्रस्य विरोधितायामनुभवमपि प्रमाणमाह अत एवेति। साध्यविशेष्यकानुमितौ तज्ज्ञानमात्रस्य विरोधित्वादेवेत्यर्थः। इत्थं च धूमव्यापकवन्ह्यभाववान्ह्रद इत्यादिव्यतिरेकपरामर्शजन्याया ह्रदे धूमाभाव इत्याद्यभावसाध्यकानुमितेरेव साध्यविशेष्यकत्वात्तत्रैव साध्यज्ञानं विरोधीति मन्तव्यम्। वन्ह्यादिभावसाध्यकस्थले तु विशेष्यविधया वन्ह्यादिविधेयकानुमितेरलीकतया तां प्रति साध्यज्ञानत्वेन विरोधित्वासम्भवादिति ध्येयम्। विशेष्यत्वाख्यविधेयतावच्छेदकत्वसम्बन्धेनानुमितिसामान्यं प्रत्येव वा प्रकारतासंसर्गेण ज्ञानमात्रस्य प्रतिबन्धकत्वं वाच्यम्। न चैवमपि गोत्वाभावो गोत्वव्यापकसास्ना-

दिना पूर्वानुमित्सानाशे परामर्शकाले च सिद्धिसत्त्वेऽनुमित्सान्तरोत्पत्त्यैवानुमितिस्तथैव कारणीभूतस्य विशिष्टाभावस्य सम्पत्तिरित्युपाध्यायाः।अन्ये तु द्वित्रिक्षणान्तरितायामप्यनुमित्सायामनुमितिदर्शनान् अनुमित्सायोग्यता वाच्या, सा च न स्वोत्प-

---

शून्य इत्याकारकपरामर्शादगोत्वाभावे गोत्वं नेत्येवं पक्षनिष्ठप्रकारतानिरूपितसाध्यविधेयकानुमितिर्न स्यात्परामर्शस्यैव साध्यज्ञानत्वेन विरोधित्वादिति वाच्यम् । इष्टत्वात् । गोत्वभावो न गोत्ववानित्येवं पक्षनिष्ठविशेष्यतानिरूपितसाध्यविधेयकानुमितेरेव तत्रोत्पादात्। साध्यतावच्छेदकधर्मावच्छिन्नपक्षनिष्ठप्रकारतानिरूपितसाध्यविधेयकानुमितित्वेनैव वा प्रतिबध्यत्वं वाच्यमित्यपि कश्चित् । वस्तुतस्तु अप्रसिद्धसाध्यकपरामर्शस्य विशेष्यविधया साध्यविधेयकानुमितित्वावच्छिन्नं प्रत्येव हेतुत्वम्, अन्यथा गोत्वाभावव्याप्यवत्त्वप्रकारकपरामर्शजन्यायां विशेष्यविधया गोत्वाभावविधेयकानुमितौ व्यभिचारापत्तिः। तथा चोक्तस्थले गोत्वाभावो न गोत्ववानित्यपि नानुमितिः विशेषणविधया गोत्वाभावविधेयकानुमितौ गोत्वव्यापकाभाववत्तापरामर्शस्याहेतुत्वात् तथाविधगोत्वाभावानुमितिहेतोर्गोत्वाभावान्वयव्याप्यवत्तापरामर्शस्य विरहेण कारणबाधाच्च । [प्रसिद्धाप्रसिद्धसाध्यकोभयपरामर्शयोः प्रसिद्धाप्रसिद्धसाध्यकोभयानुमित्यनुगतधर्मावच्छिन्नं प्रत्यनुगतरूपेण हेतुत्वस्य दुर्वचत्वात्] इत्यन्यत्र विस्तरः । व्याप्तिस्मरणादिनेति । यत्रानुमित्सोत्तरं व्याप्तिस्मरणं ततः सिद्ध्यात्मकपरामर्शस्तत्रेत्यर्थः । तथैव तथासत्येव । विशिष्टाभावस्येति । अनुमित्साविरहविशिष्टसिद्ध्यभावस्येत्यर्थः । मिश्रमतमाह अन्ये त्विति । अनुमित्सायामिति । सिद्धिदशायामिति शेषः । वाच्येति । सिषाधयिषापदेनेत्यादिः । स्वोत्पत्तीत्यादि । स्वपदं तत्तदनुमित्सापरम् । तथा च तत्तदनुमित्सोत्पत्त्यनन्तरत्वविशिष्टतत्तदनुमित्साविषयसिद्धिप्रागभावो योग्यतेत्यर्थः।सिद्धिकालीनयद्यदनुमित्साव्यक्तिदशायामुत्तरकालमनुमितिर्भविता तत्तदनुमित्साव्यक्तिविषयीभूतसिद्धिप्रागभावस्य वर्तमानसिद्ध्यन्तरदशायामपि स-

क्त्यनन्तरं स्वविषयसिद्ध्यनुत्पादः, अनुमित्सानन्तरमन्तराऽनुमित्य-
नुत्पादे दिवसादिविलम्बेनेन्द्रियादिना निर्णीतेऽपि साध्ये लिङ्गप-
रामर्शादनुमितिप्रसङ्गात्, किं त्वनुमित्सानन्तरं लिङ्गदर्शनादिक्रमेण

स्यात्तदानीमनुमितेर्वारणाय विशिष्टान्तम् । तत्तदनुमित्सोत्तरत्वविशिष्टत्वविवक्षणे तत्तदनुमित्सासमकालेऽनुमितिर्न स्यादतस्तदुत्पत्तीति तत्तदनुमित्सोत्पत्त्यनन्तरत्वं तु न तत्तदनुमित्सोत्पत्तिक्षणध्वंसविशिष्टत्वं तथासत्यनुमित्सोत्पत्त्यनन्तरक्षणेऽनुमित्यपलापापत्तेः । साध्यविषोत्पत्तिक्षणेऽनुमित्सोत्पत्तिध्वंसविशिष्टस्य तद्विषयसिद्धिप्रागभावस्यासत्त्वात् । किं तु तत्तदनुमित्साप्रागभावविरहविशिष्टत्वं वैशिष्ट्यं चैककालावच्छेदेनैकात्मवृत्तित्वमिति नातिप्रसङ्गः । तत्तदनुमित्साप्रागभावविरहविशिष्टत्वमात्रोक्तावनुमित्सोत्तरमनुमित्युत्पादे पुनरनुमित्यापत्तिरतस्तदनुमित्साविषयसिद्धिप्रागभावपर्यन्तानुधावनम् । न च सिद्धिकालीनानुमित्सया स्वविषयीभूतैकानुमित्युत्पाददशायामपि दिनान्तरभाविस्वविषयीभूतानुमित्यन्तरप्रागभावसत्त्वादुत्तरकालमनुमित्यन्तरापत्तिरिति वाच्यम् । तत्तदनुमित्साप्रागभावविरहविशिष्टस्य तत्तदनुमित्साविषयीभूतसिद्धिप्रागभावकूटस्य विवक्षितत्वात् । उक्तस्थले चोत्पन्नानुमितेरेव प्रागभावस्यासत्त्वादिति भावः । इन्द्रियादिनेति । अनुमानतः साध्यनिर्णये तु स्वविषयसिद्ध्यनुत्पाद एव न स्यादिति भावः । यद्यपि स्वपदेनानुमित्युपधायकतत्तदनुमित्साव्यक्तीनामुपग्रहे दिवसान्तरीयानुमित्साव्यक्तेर्योग्यतायामप्रवेशान्नैष दोषः, तथापि वन्ह्यनुमितित्वप्रकारेणातीतानुमितिगोचरेच्छया सिद्धिकाले वन्ह्यनुमितिर्न स्यात्तद्विषयानुमितिप्रागभावकूटस्य तदानीमसत्त्वात् । तत्तदनुमित्साव्यक्तिपूर्वक्षणावृत्तित्वेन तत्तदनुमित्साविषयसिद्धीनां तत्तदनुमित्साकालीनत्वेन वा तत्तदनुमित्साविषयसिद्धिप्रागभावानां विवक्षया कथं चिदुपपादनेऽप्यनुमितिद्वयं जायतामितीच्छायामनुमितिद्वयं न स्यात्तदनुमित्साविषयीभूतानुमितिप्रागभावकूटस्य प्रथमानुमित्युत्पत्तिदशायामसत्त्वात् तादृशानुमित्साया अपि

यावता कालेनोत्सर्गतः परामर्शो जायते तावानेव कालः। फलबलेन तथा कल्पनात्। अथ वानुमित्सोत्पत्त्यनन्तरमनुमित्सानाशेऽपि सिद्धौ सत्यां यावत्कालमध्येऽनुमितिर्जायते तावानेव कालोऽनुमित्सयोपलक्षितः। यदि च सिद्ध्यनन्तरं तन्नाशेऽपि द्वित्रिक्षणमध्ये विनानुमित्सामनुमित्युत्पादोऽनुभवसिद्धस्तदा सिद्ध्यापि तावानेव समय उपलक्षणीयः। विशिष्य क्षणनियमस्त्ववहितैः करणीय इति वदन्ति। अत्र च यत्र साध्यनिर्णयेच्छानन्तरं पूर्वोक्तन्यायेन

मिश्रैरुत्तेजकत्वोपगमादित्यादि दूषणं द्रष्टव्यम्। उत्सर्गतः बाधकं विना। तेनानुमित्सोत्तरं यत्र परामर्शविरोधिज्ञानापसरणक्रमेण चिरकालोत्तरं परामर्शोत्पादस्तत्र सिद्धिदशायां न योग्यता अत एव वक्ष्यति फलबलेनेति। तावानेव काल इति। सेत्यनुषज्यते। नन्वेतादृशकालस्योत्तेजकत्वे किं मानमत आह फलेति। ननु यत्रानुमित्सोत्तरं परामर्शस्तत्रत्यकालानामुपादाने यत्र सिद्ध्यात्मकपरामर्शोत्तरमनुमित्सा तत्रानुमितिर्न स्यात्तत्रत्यकालानामनुत्तेजकत्वादत आह अथ वेति। उपलक्षित इति। तथा चानुमित्सानाशाधिकरणतत्तत्कालोऽनुमित्सा च द्वयमप्युत्तेजकमित्याशयः। तावानेवेति। सिद्धिनाशोत्तरमपि यावत्कालमध्येऽनुमितिर्नोत्पद्यते तावान्काल इत्यर्थः। ननु क्रियात्मकानां यावत्समयानामभावस्य सर्वदैवात्मनि सत्त्वान्नोक्तयोग्यताविवक्षयाप्यनुमित्सानाशोत्तरमनुमितेः सम्भव इत्यत आह विशिष्येति। तथा च जन्यमात्रस्य कालोपाधितया आत्मसमवेतं तत्तज्ज्ञानादिकमेव तादृशसमयो वाच्य इत्यदोषः। अवहितैरिति भावे क्तः। तेनावधानैरित्यर्थः। सकर्मकस्यावपूर्वकस्य धाधातोः पचत्यादेरिव कर्तरि क्तस्याऽव्युत्पन्नत्वादिति ध्येयम्। अनुमित्साव्यक्तीनामिव तन्नाशाधिकरणक्षणानामप्युत्तेजकविधया पक्षतायां निवेशे गौरवं विनाऽनुमित्सामनुमित्युत्पादस्य सन्दिग्धत्वादित्यस्वरसो वदन्तीत्युक्त्या सूचितः। उत्तानास्तु द्वे द्रव्ये इत्यादिलौकिकप्रत्यक्षान्यथानुपपत्त्याऽपेक्षाबुद्धीनामिवानुमित्सानाशोत्तरसिद्धिद-

साध्यतद्व्याप्यविशिष्टपक्षस्य प्रत्यक्षं स्मरणं वा यत्र वा साध्यतद्व्याप्यधर्मतादृशव्याप्यधर्म्मान्तरविशिष्टपक्षस्य तत्पक्षकसाध्यतद्व्याप्यवत्त्वानुमित्योरिष्टसाधनायाश्चैकं स्मरणं ततस्तयोरनुमित्सा ततः साध्यतद्व्याप्यवत्त्वानुमितिस्तत्र तदनन्तरमनुमितिप्रसङ्गः योग्यताविवक्षणे तु सुतरामेवेति तदिच्छाविषयसिद्ध्यनुपहितत्वं तद्विशे-

---

शोत्पन्नतत्तदनुमित्यन्यथानुपपत्त्या प्रागुत्पन्नसिषाधयिषाव्यक्तीनामेव त्रिचतुःक्षणावस्थायित्वं कल्पयितुमुचितं विरोधिविशेषगुणानां नाश्यनाशकभावस्य विशेषत एव विश्रामात् द्वितीयक्षणे विनाशसामग्र्यनावश्यकत्वादिति प्राहुः । साध्यनिर्णयेति । साध्यनिर्णयत्वप्रकारकेच्छानन्तरमित्यर्थः । पूर्वोक्तन्यायेन अनुमित्साप्रागुत्पन्नविशेषणज्ञानादिक्रमेण । प्रत्यक्षमिति । तत्र तदनन्तरमनुमितिप्रसङ्ग इति परेणान्वयः । तथाविधप्रत्यक्षस्य विशिष्टानुभवतया तज्जनकविशेषणज्ञानादिकल्पने गौरवादाह स्मरणं वेति । ननु यद्यदिच्छासत्त्वे सिद्धिदशायामनुमितिर्जायते तत्तदिच्छाव्यक्तीनामेवोत्तेजकतया पक्षतायामन्तर्भावात्साध्यनिश्चयत्वप्रकारकेच्छायाः क्वापि पक्षतायामनिवेशान्नातिप्रसङ्ग इत्यत आह यत्र वेति । यत्र साध्यवान् साध्यव्याप्यवान् साध्यव्याप्यधर्मव्याप्यवाँश्च पक्षः पक्षे साध्यानुमितिस्तद्व्याप्यवत्तानुमितिश्चेष्टसाधनमित्येकं स्मरणमित्यर्थः । अत्रानुमित्सादशायामनुमितेर्वारणार्थं साध्यवत्त्वं निवेशितं मानसत्त्वावच्छिन्नं प्रत्येवेच्छासामग्र्याः प्रतिबन्धकत्वमते तत्रानुमितेर्वारणासम्भवात् । साध्यव्याप्यवत्त्वस्य तद्व्याप्यधर्मान्तरवत्त्वस्य च निवेशोनुमित्सोत्तरं साध्यतद्व्याप्यवत्त्वयोरनुमित्यर्थम्, अन्यथा परामर्शविरहेणोत्तरकालं साध्यानुमित्यापत्त्यसम्भवात्, इष्टसाधनत्वं पुनरनुमित्साया: सामग्रीसम्पत्त्यर्थं निवेशितमिति द्रष्टव्यम् । तयोरिति । साध्यतद्व्याप्ययोरित्यर्थः । अनुमितिप्रसङ्गः । तत्तदिच्छाव्यक्तिसत्त्वे सिद्धिदशायामनुमित्युत्पादेन तस्या अप्युत्तेजकत्वादिति भावः । मिश्रमतेप्याह योग्यतेति । सुतरामिति । तत्रानुमितिप्रसङ्ग इत्यन्वयः । अनु-

षणम् । पक्षसाध्यभेदेन च पक्षतायाः भेदात् पृथक् पृथगेव कार्य्य-कारणभावः । तथा च यत्र सिद्धयनन्तरं कदाप्यनुमितिर्न जाता तत्र सिद्धयभावमात्रं कारणं न तु तत्रेच्छानिवेशोऽपि, गौरवात्

मित्सानाशेप्यनुमितिमङ्गीकर्तुरनुमित्सासम्भवे सुतरां तदापत्तिसम्भवादिति भावः । तदिच्छेति । यद्यदिच्छाव्यक्तिरुत्तेजिका स्वविषयसिद्धयभावविशिष्टत्वं तद्विशेषणमित्यर्थः । यद्यपि एवमपि यत्रोक्तस्थल एव साध्यानुमितिद्वयेष्टसाधनतागोचरस्मरणात्साध्यानुमितिद्वयप्रकारानुमित्सा तत्रैकानुमित्यनन्तरं साध्यानुमित्यन्तरं न स्यात् प्रथमानुमित्युत्पादेनैवानुमित्सायाः स्वविषयसिद्धयुपहितत्वात् । तादृशेच्छायामुकविशेषणाप्रक्षेपेपि यत्र प्रात्यक्षिकसिद्धयुत्तरं वन्ह्यनुमितित्वप्रकारेणैव वन्हिप्रत्यक्षगोचरा विसंवादिनीच्छा तत्र वन्ह्यनुमितिर्न स्यात् अनुमित्सायाः स्वविषयीभूतप्रात्यक्षिकसिद्धयुपहितत्वेन तदनुपहितत्वविशिष्टानुमित्साविरहसहकृतायाः सिद्धेः सत्त्वात् । न च येन रूपेण सिद्धेस्तादृशेच्छाविषयत्वं तद्रूपावच्छिन्नसिद्धयभाववैशिष्ट्यं विवक्षितं तथा च वन्ह्यनुमितित्वावच्छिन्नाभाववैशिष्ट्यस्य तदिच्छाव्यक्तौ सत्त्वान्न दोष इति वाच्यम् । यत्र पक्षे यस्य साध्यस्य प्रत्यक्षं कदा चिदपि न जातं तत्पक्षकतत्साध्यकप्रत्यक्षाद्यतिरिक्तं ज्ञानं जायतामितीच्छाया अनुत्तेजकत्वापत्तेः येन रूपेण यत्रेच्छाविषयत्वं तादृशस्य तत्पक्षकतत्साध्यवत्ताप्रत्यक्षभिन्नज्ञानत्वस्याखण्डस्याऽप्रसिद्धेः । तथाप्युत्तेजकीभूतयद्यदिच्छाव्यक्तौ यादृशयादृशसिद्धिः प्रतिबन्धिका तादृशतादृशसिद्धयनुपहितत्वं तत्तदिच्छाविशेषणम् । तेन यत्पक्षकयत्साध्यकप्रत्यक्षमप्रसिद्धं तत्रापि तादृशप्रत्यक्षभिन्नज्ञानत्वप्रकारकेच्छायां तत्पक्षसाध्यकानुमितिरेव प्रतिबन्धिकास्तीति तदनुपहितत्वमेव तदिच्छायां विशेषणमित्यदोषः । ननु यत्पक्षसाध्यकानुमित्सा कस्यापि नोत्पन्ना तत्र सिद्धयभावत्वमपेक्ष्य निरुक्तसिद्धयभावत्वेन हेतुत्वं गौरवग्रस्तमत आह पक्षसाध्येत्यादि । यत्रेति । ययोः पक्षसाध्ययोरित्यर्थः । सिद्धयभावमात्रमिति । गौरवस्य प्रामाणिकत्वमपाकरोति

प्रयोजनाभावाच्च । तेन यत्पक्षकयत्साध्यकानुमितौ कस्यापीच्छा न जाता तत्रोक्तिसाधारण्यमात्रसम्पादनायेश्वरेच्छानिवेशनाया-सो नोपादेयः । यत्तु सिषाधयिषाविरहविशिष्टस्वक्षणाव्यवहितो-त्तरक्षणोत्पत्तिकानुमितिकभिन्ना या सिद्धिः सिषाधयिषाविरह-

---

प्रयोजनेति । इदमुपलक्षणम् । यत्र पक्षे साध्यवत्ताज्ञानोत्तरं कदा-प्यनुमितिर्नोत्पन्ना तत्र साध्यवत्ताज्ञानाभावमात्रं कारणं निश्चय-त्वमपि न निवेशनीयम् । एवं यत्रैकविधानुमित्साया उत्तरमनुमि-तिस्तत्र तादृशानुमित्सैव पक्षता तथा यत्पक्षसाध्यकपरामर्शकाली-नसिद्धिदशायामवश्यमनुमित्सा तत्र पक्षता नानुमितिहेतुरिति द्रष्ट-व्यम् । यत्तु यत्पक्षसाध्यकानुमितिस्थले परामर्शदशायां नियमतः सिद्धयभावस्तत्र सिद्ध्यभावोपि न हेतुरिति । तन्मन्दम् । तादृश-स्थले मानाभावात् । योगिनामेव परामर्शदशायामवश्यं सिद्धिसं-भवेन तदभावस्याहेतुत्वे तेषामेव सर्वदानुमितिप्रसङ्गादिति ध्येयम् । मिश्रमतमाक्षिपन्नाह तेनेति । सर्वत्र पक्षतायामनुमित्सानिवेशस्य निष्प्रयोजनकत्वेनेत्यर्थः । धात्वर्थसमानकर्तृकेच्छायामेव सनो विधा-नादनुमितिगोचरायां अपीश्वरेच्छाया अनुमातृनिष्ठत्वाभावेन सि-षाधयिषाशब्देन बोधयितुमशक्यत्वादायास इत्युक्तम् । सिषाधयि-षानाशेपि द्वित्रिक्षणाभ्यन्तरे सिद्धिसत्त्वेऽनुमितेः सम्पादकं सार्वभौ-मोक्तप्रकारमुपन्यस्यति यत्त्विति । सिषाधयिषाविरहविशिष्टो यः स्वक्षणः तदव्यवहितोत्तरक्षणोत्पत्तिकानुमितिको यो यस्तद्भिन्ना या सिषाधयिषाविरहविशिष्टा सिद्धिस्तस्या अभावः पक्षता इत्यर्थः।अ-त्रानुमित्सानाशकालोत्पन्नसिद्ध्यात्मकपरामर्शादनुमित्युत्पत्त्यर्थं भि-न्नांतं सिद्धिविशेषणम्।सिद्धिमात्रस्यैव प्रायशः स्वक्षणोत्तरयत्किंचि-त्क्षणोत्पत्तिकानुमितिकतया तद्भिन्नायाश्चरमसिद्धेरभावस्येदानीं सिद्ध्यात्मकपरामर्शस्थलेपि सत्त्वादनुमित्यापत्तिरत उक्तमव्यवहिते-ति । सिषाधयिषाविरहविशिष्टस्वक्षणाव्यवहितोत्तरत्वं च सिषाध-यिषाविरहविशिष्टस्वक्षणध्वंसाधिकरणकालध्वंसानधिकरणत्वे स-

ति तादृशस्वसमयध्वंसाधिकरणत्वम् । तत्र स्वसमयध्वंसाधिकरणकालध्वंसानधिकरणत्वे सति तादृशसमयध्वंसाधिकरणत्वमित्युक्तौ यत्र क्रमेणानुमित्सासिद्धिपरामर्शानुमितयस्तत्र सिद्ध्युत्पत्तिकालपर्यंतस्थायिनमनुमित्सापूर्वकालोत्पन्नस्थूलकालोपाधिमादाय परामर्शक्षणेपि पक्षताविरहप्रसङ्गः सिद्ध्यधिकरणतादृशोपाधेरनुमित्सापूर्वकालाद्यवच्छेदेन सिषाधयिषाविरहविशिष्टतयाऽनुमित्साविरहविशिष्टनिरुक्तस्वसमयाव्यवहितोत्तरत्वस्य परामर्शक्षण एव पर्य्यवसानात्तदानीं चानुमित्यनुत्पत्त्या तत्सिद्धेरपि निरुक्तानुमितिकभिन्नतया अनुमितेः प्रतिबन्धकत्वापत्तेः प्रथमक्षणपदम्। तथा च तत्र सिषाधयिषाविरहविशिष्टः स्वक्षणः परामर्शोत्पत्तिक्षण एवेति तदव्यवहितोत्तरोत्पत्तिकानुमितिकत्वान्न सा सिद्धिर्विरोधिनीत्यदोषः। सत्यन्तमात्रोक्तौ च सिद्धिमात्रस्यैव प्रायशः स्वक्षणध्वंसाधिकरणकालध्वंसानधिकरणीभूतस्वपूर्वकालोत्पत्तिकानुमितिकतया तद्भिन्नसिद्धेरप्रसिद्धिः स्यादतः स्वसमयध्वंसाधिकरणत्वदलम् । यत्र क्रमेण सिद्धिपरामर्शौ तत्रानुमितिप्रसङ्गः परामर्शपर्यन्तस्थायिनः प्रहरादिरूपस्थूलकालोपाधेर्निरुक्तस्वक्षणाव्यवहितोत्तरतया सिद्धिपूर्वदण्डाद्यवच्छेदेनानुमित्युत्पत्तिमत्तया च सिद्धेः स्वक्षणाव्यवहितोत्तरकालोत्पत्तिकानुमितिकत्वेनाविरोधित्वादतो द्वितीयक्षणपदम् । न च स्थूलकालोपाधेरेव स्ववृत्तित्वावद्ध्वंसविशिष्टतादशायां क्षणत्वादुक्तदोषतादवस्थ्यम् । यदुपाध्यवच्छिन्नस्याव्यवहितोत्तरक्षणत्वं तदवच्छेदेनानुमित्युत्पत्तिमत्त्वस्य विवक्षितत्वात् क्षणिकान्त्यशब्दानामतिरिक्तपदार्थस्य वा क्षणत्वमते यथाश्रुतार्थस्यैव सम्यक्त्वाच्च । उत्पत्तिपदानुक्तौ एकानुमित्युत्पत्त्यन्तरमनुमित्यन्तरापत्तिः पूर्वानुमितेः स्वक्षणाव्यवहितोत्तरक्षणवृत्तिस्वात्मकानुमितिकत्वेन तदन्यसिद्धेरभावादतस्तदुपात्तम्। न च स्वक्षणाव्यवहितोत्तरक्षणवृत्तिस्वेतरानुमितिकत्वमेव प्रवेश्यतामुत्पत्तेः स्वेतरत्वापेक्षया गुरुत्वादिति वाच्यम् । यत्र साध्यस्यानुमितिद्वयं जायतामितीच्छया प्रथमं साध्यतदव्याप्ययोरपेक्षाबुद्ध्यात्मिका एकानुमितिः ततः साध्यानुमित्यन्तरं तत्र साध्यानुमित्यन्तरप्रसङ्गात् । अनुमितिस्तु स्वसमानाधिकरणप्रकृतपक्षसाध्यविषयिणी ग्राह्या । नातः पुरुषान्तरीयानुमित्यादिकमादायातिप्रसङ्गः । स्वक्ष-

विशिष्टायास्तस्या अभावः पक्षता । अथ तृतीयक्षणव्यवधायक-द्वितीयक्षण एवाव्यवहितत्वपर्य्यवसानाद्यत्राविरलक्रमेण सिद्धिसिषाधयिषानुमितयस्तत्र द्वितीयक्षणे पक्षतासम्पत्तये द्वितीयसिषाधयिषाविरहो विशेषणमस्तु सिद्धेः, प्राथमिकस्तु स्वक्षणस्य किमर्थमिति चेत् । यत्र क्रमेण सिषाधयिषाप्रात्यक्षिकसिद्धिपरामर्शानुमितयस्तत्र तृतीयक्षणे पक्षतासम्पत्त्यर्थमिति। तन्न । यत्रानुमित्सा-

---

णाव्यवहितोत्तरक्षणोत्पत्तिकानुमितिकभिन्नस्य प्रागुत्पन्नस्य व्याप्तिस्मरणादेः परामर्शमात्रस्थले सत्त्वात्तत्र पक्षतासम्पत्त्यर्थं सिद्धिपदमिति भावः । ग्रन्थलाघवार्थमन्तिमस्य सिषाधयिषाविरहपदस्य व्यावृत्तिमभिदधान एव प्रथमस्य प्रयोजनं पृच्छति अथेति । तृतीयक्षणेति । तृतीयक्षणस्य व्यवधायकेत्यर्थः । सिद्धीति । परामर्शात्मकसिद्धीत्यर्थः । सम्पत्तय इति।अन्यथा स्वक्षणाव्यवहितोत्तरक्षणोत्पत्तिकानुमितिकभिन्नसिद्धेः सत्त्वात्तत्र पक्षता न स्यादिति भावः । द्वितीयो द्वितीयसिषाधयिषापदेन प्रत्याय्यः । सिषाधयिषाविरहस्यैकत्वेन द्वितीयत्वायोगात्।एवमग्रेपि।प्राथमिकस्त्विति । सिषाधयिषाविरहं इत्यनुषज्यते।स्वक्षणस्येति।विशेषणमित्यनुषज्यते । यद्यपि सिषाधयिषाविरहविशिष्टं यत्स्वं तदधिकरणक्षणाव्यवहितोत्तरेत्यादिक्रमेण स्वस्यापि विशेषणत्वमनुमित्साविरहस्य सम्भवति, तथापि स्वस्मिन् सिषाधयिषाविरहवैशिष्ट्यस्य सामानाधिकरण्यरूपस्य प्रवेशे गौरवात् इत्याशयेन स्वक्षणस्येत्युक्तम् । यत्रेत्यादि।सिषाधयिषासिद्ध्योर्व्युत्क्रमेणानुमितिप्राक्काले सिद्धिसामान्याभाव एव सम्भवत्यतः क्रमेणेत्युक्तम् । सिद्धेरनुमित्यात्मकत्वेऽनुमित्साया: स्वविषयसिद्ध्युत्पादेन चरितार्थतयोत्तरकालमनुमितिर्न कस्यापि संमता इति व्यर्थं तत्र पक्षतासम्पादनमतः प्रात्यक्षिकपदं पक्षतासम्पत्त्यर्थमिति । अन्यथा तत्र स्वक्षणाव्यवहितोत्तरक्षणोत्पत्तिकभिन्नायाः सिषाधयिषाविरहविशिष्टसिद्धेः सत्त्वादनुमितिर्न स्यादिति । इत्थं च तत्र सिद्धेः सिषाधयिषाविरहविशिष्टस्वक्षणाव्यवहितोत्तरक्षणोत्प-

नाशकाले प्रात्यक्षिकी सिद्धिरथ च परामर्शानुमिती तत्र पक्षताविरहप्रङ्गात् । अथ प्रथमक्षणमपेक्ष्य द्वितीयस्येव द्वितीयमपेक्ष्य तृतीयस्याप्यव्यवहितोत्तरत्वं स्वध्वंसाधिकरणकालध्वंसानधिकर-

---

त्तिकानुमितिकत्वात्तदन्यसिद्ध्यभावस्य सत्त्वान्न पक्षताहानिः । न च सिषाधयिषाविशिष्टस्यापि सिद्धिक्षणस्य घटाद्यवच्छेदेन सिषाधयिषाविरहवत्त्वादुक्तदोषतादवस्थ्यम् । स्वावच्छेदकशरीरावच्छेदेन स्वक्षणे सिषाधयिषाविरहवैशिष्ट्यस्य विवक्षितत्वादिति भावः । यत्र सिषाधयिषाघटादीच्छासिद्ध्यात्मकपरामर्शानुमितयः क्रमेण जाताः तत्रेच्छाविरहविशिष्टस्वक्षणाव्यवहितोत्तरक्षणोत्पत्तिकानुमितिकाभिन्नायाः सिषाधयिषाविशिष्टायाः सिद्धेः सत्त्वात् अनुमितिर्न स्यादत इच्छामपहाय सिषाधयिषापर्यन्तमनुश्रुतम् । एवं घटेच्छासिद्ध्यात्मकपरामर्शानुमितिवारणाय द्वितीयसिषाधयिषायाः प्रवेश इति भावः । प्रसङ्गादिति । द्वित्रिक्षणाद्यन्तरितानुमित्सास्थलेप्यनुमितिस्वीकारेण इष्टापत्त्यसम्भवादिति भावः । उक्तदोषं निरासितुमाशङ्कते अथेति । प्रथममित्यादि । तथा च स्वसमयध्वंसाधिकरणसमयध्वंसाधिकरणसमयध्वंसानधिकरणत्वे सति स्वसमयध्वंसाधिकरणत्वमेवाव्यवहितोत्तरत्वं वाच्यं तच्च तृतीयक्षणेऽनुमित्युत्पादेप्यस्तीति न पक्षताहानिः । स्वक्षणेत्यत्र क्षणपदं समयमात्रपरं क्षणत्वपर्यन्तस्य निष्फलत्वादिति भावः । लाघवादाह स्वध्वंसेत्यादि । स्वोत्तरप्रहराद्युत्पन्नानुमितिकासिद्धिदशायां पक्षतावारणाय सत्यन्तदलम् । सिद्धिद्वितीयक्षणस्यापि विषयितासम्बन्धेन सिद्धिध्वंसाधिकरणीभूतातीतज्ञानादेर्ध्वंसाधिकरणत्वात् कालपदम् । स्वपूर्वप्रहराद्युत्पन्नानुमितिकसिद्धिदशायां तद्वारणाय स्वाधिकरणेत्यादिविशेष्यदलम् । कालपदोपादानात्कालिकसम्बन्धेनाधिकरणत्वलाभस्तेन सिद्धेः पूर्वप्रहरादेर्विषयिताया सिद्ध्यधिकरणीभूतस्यातीतज्ञानादेर्ध्वंसाधिकरणत्वेपि नोक्तदोषः । स्वाधिकरणत्वमात्रोक्तौ सिद्धिप्राक्कालवारणसम्भवेप्यनुमित्युत्तरमनुमितेर्वारणार्थं स्वाधिकरणकालध्वंसाधिकरणत्वपर्यन्तोपन्यासः, अन्यथाऽनुमित्यात्मकसिद्धेः

णत्वे सति स्वाधिकरणकालध्वंसाधिकरणत्वं वा तादृशाव्यवहितोत्तरत्वं वाच्यं तथा च यत्र क्रमेण सिद्धिसिषाधयिषानुमितयस्तत्र प्रथमे पक्षतावारणाय उत्तरक्षणस्य विशेषणं प्रथमं विशिष्टान्तं द्वितीयन्तु सिद्धेस्तत्रैव द्वितीयक्षणे पक्षतासम्पत्तये, यदि पुन-

---

स्वध्वंसाधिकरणकालध्वंसानधिकरणत्वे सति स्वाधिकरणीभूतो यः स्वोत्पादक्षणस्तदुत्पत्तिकानुमितिकत्वेन तद्भिन्नसिद्ध्यभावस्य सत्त्वादनुमित्यन्तरापत्तेः। एवं स्वाधिकरणत्वमात्रस्य विशेष्यत्वे यत्रानुमित्सानाशक्षणे इत्याद्युक्तदोषनिरासोपि न स्यादिति ध्येयम्। नन्वेवं प्रागुक्तसिद्धिद्वयस्य द्वित्रिक्षणसाधारणनिरुक्तस्वक्षणाव्यवहितोत्तरक्षणोत्पत्तिकानुमितिकतया तदन्यसिद्ध्यभावस्वरूपायाः पक्षतायाः सहजत एव सत्त्वात् सिषाधयिषाविरहद्वयोपादानं व्यर्थमत आह तथा चेति। वारणायेति। तत्रत्यसिद्धेः स्वक्षणाव्यवहितोत्तरक्षणोत्पत्तिकानुमितिकत्वेपि सिषाधयिषाविरहविशिष्टो यः स्वक्षणाव्यवहितोत्तरक्षणस्तदुत्पत्तिकानुमितिकसिद्ध्यन्तरभिन्नतया विरोधित्वादिति भावः। स्वक्षणस्य विशेषणत्वे तद्दोषतादवस्थ्यादाह उत्तरक्षणस्येति। अनुमित्युत्तरक्षणपर्य्यन्तस्थायिस्थूलकालोपाधेरपि निरुक्तस्वाव्यवहितोत्तरकालत्वादेकानुमित्यनन्तरमन्यानुमितेर्वारणार्थं द्वितीयक्षणपदस्यावश्यकत्वादुत्तरकालस्येति नोक्तम्। द्वितीयं त्विति। विशिष्टान्तमित्यनुषज्यते। सिद्धेरिति। विशेषणमित्यनुषज्यते। सम्पत्तये इति। अन्यथानुमित्साशून्यस्वाव्यवहितोत्तरक्षणोत्पत्तिकानुमितिकाभिन्नसिद्धेः सत्त्वात्तृतीयक्षणेऽनुमितिर्न स्यादिति भावः। न चैवं यत्र परामर्शात्मकसिद्धेरव्यवहितक्षणे तद्धर्मिकसाध्यवत्त्वांशेऽप्रामाण्यग्रहानन्तरं चानुमितिः तत्र तादृशाप्रामाण्यग्रहोत्पत्तिक्षणेऽनुमित्यापत्तेः तत्र सिद्धिव्यक्तेः सिषाधयिषाविरहविशिष्टो यः स्वक्षणाव्यवहितोत्तरक्षणः तदुत्पत्तित्वेन तदन्यसिद्धेः प्रागसत्त्वादिति वाच्यम्। अप्रामाण्यग्रहाभावविशिष्टतत्तत्सिद्धिव्यक्तित्वेनापि पक्षताबहिर्भावेणानुमितिविरोधित्वान्तरस्य वक्तव्यत्वादिति भावः। यद्यपि तृतीयक्षणसाधारणाव्यवहितोत्तरत्वकल्पे स्वाव्यव-

रिच्छाजनिका सामग्री प्रतिबन्धात्सनुमिति तदानुमित्यव्यवहितपूर्ववर्त्तिसिद्धिभिन्नसिद्ध्यभावमात्रं पक्षतेति चेत् । तादृशसिद्धीनां

हितोत्तरक्षणोत्पत्तिकानुमितिकभिन्नाभावस्यैव सम्यक्त्वात्सिद्धिपदं व्यर्थं परामर्शहेतुभूतस्य व्याप्तिस्मरणादेर्निरुक्ताव्यवहितोत्तरक्षणोत्पत्तिकानुमितितयैवाप्रतिबन्धकत्वात्, एवं च सिषाधयिषाविरहद्वयोपादानमप्यफलं यत्र क्रमेण सिद्धिसिषाधयिषानुमितयस्तत्रानुमित्साजनकस्य फलेच्छादेरेव स्वाव्यवहितोत्तरक्षणोत्पत्तिकानुमितिकभिन्नस्य सत्त्वादनुमित्सोत्पत्तिक्षणेऽनुमित्यसम्भवात्। न च जातिध्वंसाद्यप्रसिद्ध्या निरुक्तस्वाव्यवहितोत्तरक्षणोत्पत्तिकानुमितिकभिन्नस्यात्मत्वादेः सत्त्वात्परामर्शमात्रादप्यनुमितिर्न स्यादतः सिद्धिपदमिति वाच्यम् । एतावतापि तादृशानुमितिकभिन्नसाविषयकाभावस्यैव सम्यक्त्वे साध्यवत्त्वनिश्चयात्मिकायाः सिद्धेः प्रवेशानौचित्यात् तथापि स्वत्वस्यानुगतत्वात्तादृशानुमितिकव्यक्तीनां तत्तद्व्यक्तित्वेन भेदा निवेश्याः तत्र स्वपदेन सिद्धिव्यक्तय एव धर्तव्या न तु व्यक्त्यन्तराणि तावद्भेदप्रवेशे गौरवात् तथा च स्वाव्यवहितोत्तरक्षणोत्पत्तिकानुमितिकसिद्धिभिन्नस्य परामर्शादेः सत्त्वेऽप्यनुमितिर्न स्यादतः सिद्धिपदम् । न चैवं कार्य्योत्पादस्य कारणतावच्छेदकावच्छेदकघटकत्वेन वा कार्य्योत्पादादिकं कारणतावच्छेदककोटौ निविशते इत्यग्रिमग्रन्थस्याऽभुक्तवान्तत्वापत्तिः, तत्रत्यादिपदेन स्वक्षणाव्यवहितोत्तरक्षणोत्पत्तिकानुमितिकतत्तद्व्यक्तिप्रतियोगिकभेदकूटस्याप्युपग्रहात्। तथा च क्रमिकसिद्धिसिषाधयिषानुमितिस्थले प्रथमक्षणे पक्षतावारणार्थं विशिष्टान्तस्यात्तरक्षणविशेषणत्वमौव्ये द्वितीयमपि विशिष्टान्तं तत्रैव द्वितीयक्षणे पक्षतारक्षणार्थमावश्यकमित्यस्मद्गुरुचरणाः।यत्तु स्वाव्यवहितोत्तरक्षणोत्पत्तिकानुमितिकभिन्नसाविषयकाभावस्य पक्षतात्वे परामर्शादेरनुमितिहेतुता न स्यादित्येककारणपरिशेषापत्तिभिया सिद्धिपदमिति । तन्मदम् । यत्र जागरणाद्यक्षणे स्मरणात्मकपरामर्शादनुमितिस्तत्र परामर्शोत्पत्तिदशायामेव तदापत्तिप्रसङ्गेन परामर्शादरनुमितिहेतुत्वस्यावश्यकत्वात् तत्रत्यप-

रामर्शपूर्ववर्त्तिनां निखिलसविषयकानां स्वाव्यवहितोत्तरक्षणोत्पत्तिकानुमितिकत्वेनाविरोधित्वादिति। के चित्तु अपेक्षाबुद्ध्यात्मकपरामर्शचतुर्थक्षणेऽनुमित्यर्थं सिद्धिपदमन्यथा तादृशपरामर्शस्यैव निरुक्तानुमितिकभिन्नसविषयकत्वेनाप्रतिबन्धकत्वापत्तेरित्याहुः। तन्मन्दम्। चतुर्थक्षणे द्वित्वादिप्रत्यक्षस्यानुत्पादेन तादृशपरामर्शस्यापेक्षाबुद्धित्वे मानाभावात्। अन्यथानुमित्सोत्तरं सिद्ध्यात्मकस्यैवापेक्षाबुद्ध्यात्मकपरामर्शस्य चतुर्थक्षणे सिद्धिनिवेशेप्यनुमित्यभावप्रसङ्गात्। ननु यत्र क्रमेण सिद्धिसिषाधयिषानुमितयस्तत्र प्रथमक्षणे पक्षतासत्त्वेपीच्छासामग्र्याः प्रतिबन्धकत्वादेवानुत्पत्तिसम्भवात्प्रथमविशिष्टान्तदलं व्यर्थमत एव द्वितीयमपि तथेत्यत आह यदि पुनरिति। सर्वत्रेच्छाजनकीभूतज्ञानस्येच्छोत्पत्तिदशायां साक्षात्कारप्रसङ्गेन मानसत्वावच्छिन्नं प्रत्यक्षसामान्यं वा प्रतीच्छासामग्र्याः प्रतिबन्धकत्वेप्यनुमिति प्रति तस्यास्तथात्वे मानाभावात्। न चेच्छासामग्रीदशायां स्मृतिशाब्दबोधाद्यनुदयाल्लाघवेन जन्यज्ञानत्वावच्छिन्नं प्रत्येव तस्याः प्रतिबन्धकत्वमतस्तत्सत्त्वेऽनुमित्यसम्भव इति वाच्यम्। सत्यामपीच्छासामग्र्यां पश्येयं स्पर्शेयं शृणुयां शाब्दयामीत्यादीच्छादशायां जन्यज्ञानोत्पादेन चाक्षुषत्वस्पार्शनत्वश्रावणत्वशाब्दत्वादिप्रकारकेच्छाविरहविशिष्टेच्छासामग्रीत्वेन चाक्षुषत्वस्पार्शनत्वशाब्दत्वादिप्रत्येकधर्मावच्छिन्नं प्रत्येव प्रतिबन्धकतयाऽनुमितिमन्तर्भाव्येच्छासामग्र्याः प्रतिबन्धकत्वाकल्पनात्। जन्यज्ञानत्वावच्छिन्नं प्रति तत्तदिच्छाविरहकूटविशिष्टेच्छासामग्रीत्वेन विरोधितायामिच्छासामग्रीसत्त्वेपि पश्येयमितीच्छातश्चाक्षुषस्येव स्पार्शनस्य शाब्दबोधादेर्वा प्रसङ्गात् जन्यज्ञानत्वस्याविशिष्टत्वात्। तथा चानुमितावेच्छासामग्र्या इवेच्छायामप्यनुमितिसामग्र्या विरोधित्वं सुवचं विनिगमकाभावेनैकशेषस्य दुष्करत्वादित्याशयेन यदीत्युक्तम्। [यत्तु अनुमितिसामग्र्यपेक्षयेच्छासामग्री लघुरिति सैवानुमितौ प्रतिबन्धिका न त्विच्छायामनुमितिसामग्री गुरुत्वादिति। तत्तुच्छम्। तथासत्यनुमित्साविरहविशिष्टाया एवेच्छासामग्र्या अनुमितिविरोधित्वं वाच्यमन्यथाऽनुमित्साकालीनायामपीच्छासामग्र्यामनुमित्यभावापत्तेः। एवं चानुमित्साकालीनानुमितिसामग्रीदशायामिच्छानुत्पत्त्यर्थमिच्छासामान्यं प्रति त्वयानुमित्साकालीनानु-

मितिसामग्रीत्वेनावश्यं विरोधित्वं वाच्यमित्यनुमितिसामग्र्या गुरुत्वस्याकिञ्चित्करत्वादिति ध्येयम् ।] यद्यपि स्वाव्यवहितोत्तरक्षणोत्पत्तिकानुमितिकसिद्धिभिन्नसिद्ध्यभावस्यैव प्रक्रान्तत्वात्तदुपादानुमुचितं गौरवस्य वक्ष्यमाणलक्षणेऽपि अविशिष्टत्वात्, तथापि कार्योत्पादस्येव कार्याव्यवहितपूर्वत्वस्यापि कारणतावच्छेदकत्वं निरसितुं तदन्तर्भावेण पक्षतां निर्वक्ति अनुमित्यव्यवहितेति । प्रकृतपक्षसाध्यकस्वसमानाधिकरणतत्तदनुमित्यव्यवहितपूर्ववर्त्तिसिद्धिभिन्नसिद्ध्यभावः प्रकृतसाध्यकानुमितौ पक्षतेत्यर्थः । प्रकृतपक्षसाध्यकानुमितिप्रागभावाधिकरणसमयप्रागभावानधिकरणत्वघटितस्य सामान्यतस्तादृशानुमित्यव्यवहितपूर्वत्वस्याप्रसिद्धत्वात्तत्तदिति । न च प्रकृतपक्षसाध्यकानुमित्युत्पत्तिकालोत्पत्तिकध्वंसप्रतियोगित्वरूपं सामान्यतस्तादृशानुमित्यव्यवहितपूर्वत्वं सुवचमिति वाच्यम् । तस्याप्युत्पत्त्यन्तर्गतस्वत्वघटितत्वेन विशेषतो विश्रामात्।इत्थं च स्वसमानाधिकरणतत्तदनुमित्यव्यवहितपूर्ववर्त्तित्वावच्छिन्नभेदकूटस्य घटकतया तत्र स्वपूर्ववर्त्तिसिद्धिकालीनानुमितिव्यक्तीनां निवेशः कार्यो न तु सिद्ध्यसमानकालीनानुमितिव्यक्तयोपि निवेश्याः प्रयोजनाभावाद्गौरवाच्चेत्यावेदयितुं प्रथमं सिद्धिपदम् । यत्तु प्रकृतपक्षसाध्यकस्वसमानाधिकरणानुमितिसामान्याव्यवहितपूर्ववर्त्तित्वस्याप्रसिद्धया तन्निवेशासम्भवात् वस्तुगत्या तादृशानुमित्यव्यवहितपूर्ववर्ति यद्यत्स्वं तत्तद्भेदकूटस्यैव निवेश्यतया तत्र च सिद्धिभिन्नस्य मनःसंयोगादेः प्रतियोगिविधया प्रवेशे गौरवादतः सिद्धिपदमिति मतम् । तत्तुच्छम् । तथा सति कार्याव्यवहितपूर्वत्वस्यानिविष्टतयाऽग्रे तत्कारणतावच्छेदकत्वखण्डनस्योन्मत्तप्रलपितत्वापत्तेः । द्वितीयं तु सिद्धिपदं तादृशसिद्धिभिन्नस्य परामर्शमात्रस्य सत्त्वेप्यनुमितेरुत्पत्त्यर्थमन्यथा तस्यैव प्रतिबन्धकत्वापत्तेरिति भावः । प्रथमकल्पं दूषयति तादृशेत्यादि । तत्तद्व्यक्तित्वेनेत्यस्य सिषाधयिषाविरहविशिष्टेत्यादिः । तथा च सिषाधयिषाविरहविशिष्टतत्तत्सिद्धित्वावच्छिन्नाभावेत्यर्थः । यथाश्रुते यत्र क्रमेण सिद्ध्यात्मकपरामर्शसिषाधयिषानुमितयस्तत्र सिषाधयिषाविरहविशिष्टो यः स्वक्षणाव्यवहितोत्तरक्षणस्तदुत्पत्तिकानुमितिकभिन्नसिद्धेः सिषाधयिषादशायां सत्त्वादनुमित्यनापत्तेः इत्थं च सकलसिद्धावित्याद्य-

तत्तद्व्यक्तित्वेन वाभावः कारणं निरुक्तरूपविशिष्टत्वेन वा। नाद्यः, अनन्तकार्य्यकारणभावप्रसङ्गात् तादृशसकलसिद्धौ अनुमित्साविरहविशेषणदानस्य वैयर्थ्यात् तत्तत्समयसम्बन्धव्यक्तीनां तत्तत्समयावच्छिन्नतत्तन्मनोयोगादीनां वा प्रतिबन्धकत्वप्रसङ्गाच्च । ना-

---

ग्रिमग्रन्थोपि सङ्गच्छत इति ध्येयम् । निरुक्तरूपेति । सिषाधयिषाविरहविशिष्टस्वक्षणाव्यवहितोत्तरक्षणोत्पत्तिकानुमितिकसिद्धिभिन्नसिषाधयिषाविरहविशिष्टसिद्धित्वेनैवेत्यर्थः । अनन्तेति । अवच्छेदकभेदेनैव कारणत्वस्य नानात्वात् । न च तत्तत्सिद्ध्यभावकूटत्वेनैकरूपेणैव हेतुत्वम्, अपेक्षाबुद्धिविशेषविषयत्वरूपस्य कूटत्वस्यापेक्षाबुद्धिव्यक्तीनां भेदेन नानात्वसम्भवादिति भावः। ननु प्रामाणिकानन्त्यं न दोषायेत्यत आह तादृशेति । परामर्शदशायां यस्यां सिद्धौ नानुमित्सावैशिष्ट्यं तत्तत्सिद्धिव्यक्तावनुमित्साविरहविशेषणस्य व्यर्थत्वादित्यर्थः । परामर्शसमानकालीनसिद्धिव्यक्तीनामभावस्य हेतुत्वे मानाभावाच्चेत्यपि द्रष्टव्यम् । ननु सर्वस्यां सिद्धौ न देयमेव तद्विशेषणमत आह तत्तत्समयेति । सिद्ध्यधिकरणतत्तत्क्षणेन समं सम्बन्धव्यक्तीनामित्यर्थः । ननु तत्तत्समयसम्बन्धस्य विरोधित्वे सिद्धिमत इव पुरुषान्तरस्याप्यनुमितिर्न स्यात्तादृशसम्बन्धस्याविशिष्टत्वादत आह तत्तत्समयावच्छिन्नेति । सिद्धिकालीनतत्तन्मनोयोगव्यक्तीनां स्थिरतया सिद्धिविगमेप्यनुमितिर्न स्यादतोऽवच्छिन्नान्तम् । सिद्धिमत इव जनान्तरस्यापि तत्तत्समयावच्छिन्नमनोयोगसत्त्वात्तस्याप्यनुमितिर्न स्यादतस्तत्तदिति मनोयोगस्य विशेषणम् । मनोविशेषणत्वे तु तत्तत्समयावच्छिन्नतन्मनःप्रतियोगिकसंयोगस्यापि पुरुषान्तरे सम्भवात् सिद्धिमत इव तस्याप्यनुमित्यनापत्तिरिति भावः । न च तत्तत्सिद्धित्वेन प्रतिबन्धकत्वमपेक्ष्य तत्तत्समयावच्छिन्नतन्मनोयोगत्वेन प्रतिबन्धकत्वं गौरवादेव परित्याज्यमिति वाच्यम् । त्वया सकलसिद्धावनुमित्साविरहवैशिष्ट्यस्येव मयापि सर्वस्मिन्मनोयोगे तत्तत्समयावच्छिन्नत्वस्यानुपादेयतयोभयत्रापि दूषणस-

न्त्यः, सत्यपि परामर्शादौ कस्याश्चित्सिद्धेरनन्तरमनुमितिः कस्याश्चिन्नेत्यत्र नियामकाभावात् । न वा कारणतावच्छेदकावच्छिन्नसमाजाधीनकार्य्योत्पादादिकं कारणतावच्छेदककोटौ निविशते, तथा सति उत्पत्तिकालावच्छिन्नत्वविशेषितेन स्वक्षणाव्यवहितो-

---

माधानयोश्च साम्यादिति भावः । कस्याश्चिन्नेति । सिद्धेरनन्तरमनुमितिरित्यनुषज्यते । नियामकाभावादिति । नियामकालाभादित्यर्थः । विशिष्टाभावस्य विशेष्याद्यभावरूपतया निरुक्ताभावस्य विशेष्यीभूतसिषाधयिषाविरहविशिष्टसिद्धेरभावस्वरूपत्वे तादृशसिद्धिसत्त्वे कदाप्यनुमितिर्न स्यात्, स्वक्षणाव्यवहितोत्तरक्षणोत्पत्तिकानुमितिकभिन्नत्वरूपविशेषणाभावरूपत्वे तु विवक्षितविवेकेनानुमित्युत्पादस्यैवानुमित्युत्पादप्रयोजकत्वे पर्य्यवसानादात्माश्रयादिति भावः । ननु मणिकारमते विशिष्टाभावस्यातिरिक्ततया तस्य सत्त्वासत्त्वमेवानुमितेरुत्पादानुत्पादनियामकं वाच्यमत आह न वेति । कारणसमाजाधीनं तत्तद्धर्मावच्छिन्नकार्यस्योत्पादादिकं तत्तद्धर्मावच्छिन्नकार्यस्य कारणतावच्छेदककोटौ न निविशते गुरुधर्मेणेव तादृप्येणापि जनकतायामन्यथासिद्धत्वादित्यर्थः । तेन ज्ञानोत्पत्त्यादिविशिष्टबुद्धौ ज्ञानोत्पत्त्यादिज्ञानत्वेन हेतुतायां कार्योत्पादस्यावच्छेदकत्वेपि ज्ञानोत्पत्तिविशिष्टबुद्ध्युत्पत्तित्वेनाऽप्रवेशान्न दोषः । आदिपदात्कार्याव्यवहितपूर्वत्वादेः स्वक्षणाव्यवहितोत्तरक्षणानुत्पन्नकार्यैकान्यत्वस्य च परिग्रहः । कार्योत्पादादिघटितधर्मेण हेतुत्वे प्रतिबन्दिमाह तथासतीति । स्वक्षणाव्यहितोत्तरक्षणोत्पत्तिकस्वसमानाधिकरणानुमितिर्यस्य तादृशसविषयकत्वेनेत्यर्थः । कारणत्वं स्यादित्यत्रेणान्वयः । स्वक्षणाव्यवहितोत्तरतादृशानुमितिकस्य परामर्शस्यैव सत्त्वादनुमित्युत्तरमनुमितेर्वारणाय उत्पत्तिकालावच्छिन्नेति । स्वोत्पत्तिक्षणावच्छिन्नेति तदर्थः । उत्पत्त्यवच्छिन्नस्य घटादिज्ञानस्योत्तरमप्यनुमितिः स्यादतः स्वक्षणाव्यवहितोत्तरक्षणोत्पत्तिकेति । स्वक्षणेत्यत्र क्षणः समयमात्रं न तु क्षणत्वं निवेश्यं वैय्य-

त्तरक्षणोत्पत्तिकस्वसमानाधिकरणानुमितिकसविषयत्वेन, स्वसमानाधिकरणानुमित्यव्यवहितपूर्वक्षणोत्पन्नसाविषयत्वेन, स्वक्षणाव्य-

---

र्थात् । अनुमितेरपि स्वसमयाव्यवहितोत्तरीभूतस्वस्थितिक्षणपर्यन्तस्थायिप्रहराद्युत्पत्तिकानुमितिकतया ततोप्यनुमित्यन्तरापत्तिरतो द्वितीयं क्षणपदम् । अनुमितेरपि स्वक्षणाव्यवहितोत्तरक्षणवृत्तिस्वात्मकानुमितिकत्वात्तदुत्तरमनुमित्यन्तरस्य वारणाय उत्पत्तिपदमान च स्वक्षणाव्यवहितोत्तरक्षणवृत्तिस्वेतरानुमितिकत्वमेव तदर्थं उच्यतामिति वाच्यम् । यत्र साध्यानुमितिद्वयं जायतामितीच्छया साध्यतद्व्याप्ययोरपेक्षाबुद्ध्यात्मकानुमित्युत्तरं साध्यमात्रस्यानुमितिस्तत्र साध्यस्यानुमित्यन्तरप्रसङ्गात् पूर्वानुमितेः त्रिक्षणस्थायित्वात्, तत्रोत्पत्तिः आद्यक्षणसम्बन्धः आद्यक्षणसम्बन्धत्वं च स्वाधिकरणसमयध्वंसनाधिकरणत्वमात्रं न तु स्वाधिकरणत्वमपि प्रवेश्यं वैय्यर्थ्यादिति द्रष्टव्यम् । स्वक्षणाव्यवहितोत्तरक्षणोत्पत्तिकपुरुषान्तरानुमितिकाद्घटादिज्ञानादनुमितेर्वारणाय स्वसमानाधिकरणेति । एकत्र पुंसि तादृशानुमितिकस्य द्वित्वस्य पुरुषान्तरेपि सत्त्वात्तत्रानुमितेर्वारणाय सविषयकेति । सिद्ध्यात्मकपरामर्शानुमित्सानुमितीनां क्रमिकत्वस्थले तादृशज्ञानासम्भवात् ज्ञानत्वापेक्षया गुर्वपि सविषयकत्वं निवेशितमान चैतस्य स्वत्वद्वयघटित्वादुक्तरूपेण हेतुतायां गौरवमिति वाच्यम् । स्वक्षणाव्यवहितोत्तरक्षणोत्पत्तिकानुमितिसामानाधिकरण्ये तात्पर्यादिति भावः । कार्योत्पादस्य कारणतावच्छेदकत्वे प्रतिबन्दिमुक्त्वा कार्य्याव्यवहितपूर्वत्वस्य तथात्वे प्रतिबन्दिमाह स्वसमानेत्यादि । अत्र तादृशानुमित्यव्यवहितपूर्वत्वं न तादृशानुमितिप्रागभावाधिकरणसमयप्रागभावानधिकरणत्वे सति तादृशानुमितिप्रागभावाधिकरणत्वरूपमप्रसिद्धत्वात् किं तु तादृशानुमितिक्षणोत्पन्नध्वंसप्रतियोगित्वं तथा च सिद्धिमात्रादनुमित्यापत्तिस्तस्यापि स्वसमानाधिकरणानुमित्युत्पत्तिक्षणोत्पन्नध्वंसप्रतियोगिप्रहरादिकालोत्पन्नत्वादतः क्षणपदम् । यत्र परामर्शेन स्वनाशक्षणेऽनु-

वहितोत्तरक्षणानुत्पत्तिकस्वसमानाधिकरणानुमितिकभिन्नसविषय-
स्वेन वा, किं वा स्वसमानाधिकरणानुमित्यव्यवहितपूर्वक्षणवर्त्तित्व-

---

मितिर्जन्यते तत्र द्वितीयक्षणेप्यनुमित्यापत्तिः परामर्शस्यैव स्वसमा-
नाधिकरणानुमित्यव्यवहितप्राक्क्षणावृत्तेरुत्पत्त्यवच्छिन्नस्य सत्त्वादु-
क्तमुत्पन्नेति। न च स्वत्वस्यानननुगतत्वादुक्तरूपेण हेतुत्वमसम्भवी-
ति वाच्यम्। यत्त्वतत्त्वादेरिव स्वत्वस्याप्यनुगतत्वमङ्गीकृत्यैव दूष-
णोपक्रमात्। अन्यथा तद्व्यक्तित्वेन स्वपदार्थस्य प्रवेशे कार्योत्पा-
दादेर्गुरुत्वादेव कारणतायामप्रवेशसम्भवेनान्यथासिद्धिमुद्रया तदी-
यावच्छेदकत्वखण्डनस्योन्मत्तप्रलपितत्वापत्तेरिति भावः। आदि-
पदलब्धस्य स्वक्षणाव्यवहितोत्तरक्षणानुपन्नकार्यकान्यत्वस्य कार-
णतावच्छेदकत्वप्रवेशे बाधकमाह स्वक्षणेत्यादि। स्वक्षणाव्यवहि-
तोत्तरक्षणानुत्पत्तिकस्वसमानाधिकरणानुमितिर्येषां तदन्यसविषय-
कत्वेनेत्यर्थः। अत्राप्युत्पत्त्यवच्छिन्नत्वविशेषणं प्रवेशनीयमिति ना-
तिप्रसङ्गः। के चित्तु प्रागुक्तस्योत्पत्तिघटकस्वत्वघटितत्वेनानुगत-
त्वाभावादुक्तं स्वक्षणेत्यादि। न चैकानुमित्युत्तरमनुमित्यन्तरस्य
धारणार्थमस्यापि स्वोत्पत्तिकालावच्छिन्नत्वेन विशेषणीयत्वादननु-
गमतादवस्थ्यम्। स्वोत्पत्तिकालावच्छिन्नत्वेन स्वानुत्पत्तिक्षणाव-
च्छेद्यत्वाभावकूटत्वस्य विवक्षितत्वादित्याहुः। तत्तुच्छम्। अनु-
गतस्वत्वमङ्गीकृत्यैव दोषोपक्रमात्। अन्यथा कार्योत्पत्त्याद्युपलक्षि-
तायास्तद्व्यक्तेरेव कारणतावच्छेदकत्वे कार्योत्पादादेरवच्छेदकत्व-
खण्डनस्यासङ्गतत्वापत्तेः पश्चाद्वक्ष्यमाणस्यापि स्वत्वगर्भत्वेन स-
न्दर्भविरोधापत्तेश्चेति दिक्। ननु सविषयकमात्रस्यैव प्रायशः स्वक्ष-
णाव्यवहितोत्तरक्षणानुत्पत्तिकस्वसमानाधिकरणयत्किञ्चिदनुमिति-
व्यक्तिकतया तदन्यसविषयकस्य संसारिण्यभावात् परामर्शमात्रा-
दप्यनुमितिर्न स्यात्। तादृशक्षणानुत्पत्तिकस्वसमानाधिकरणानुमि-
तिसामान्यकभिन्नसविषयत्वेन कारणत्वे महागौरवमत आह किं
वेति। यत्तूक्तरूपेण हेतुतायामनुमितिसामान्योपधायकत्वं परामर्श-
स्य न स्याद्विनश्यदवस्थपरामर्शादनुमितिस्थले कथितरूपावच्छिन्नस्य

विशिष्टज्ञानत्वादिना कारणत्वं स्यात् । अव्यवहितोत्तरश्च द्वितीय एव क्षण इति नातिप्रसङ्गः । न चादिमेषु परामर्शस्थितिक्षणे यत्र विरोधिसिद्ध्यादिविनाशस्तत्रोत्तरक्षणेऽनुमितिर्न स्यात् परामर्शस्यातथात्वादिति वाच्यम् । अनुमितिसामग्र्या विरोधिन्या विरहेण तदानीमुत्पन्नादनुव्यवसायादेरन्ततः संस्काराद्वा तत्सम्भवात्।

तस्यासत्त्वादत आह किं वेत्यादिकमिति । तन्न । स्वक्षणाव्यवहितोत्तरक्षणोत्पत्तिकस्वसमानाधिकरणानुमितिकसविषयकत्वेन हेतुत्वोक्त्या पूर्वमेव परामर्शस्यानुमित्युपधायकतानियमस्य त्यक्तत्वात् तदाशङ्कने सन्दर्भविरोधापत्तेः । अत्रानुमितिपूर्ववर्त्तिनो ज्ञानस्यानुमितिदशायामपि सत्त्वादुत्तरकालमनुमितेर्वारणाय तादृशपूर्ववर्त्तित्वविशिष्टेत्युक्तं तथा च तदवच्छिन्नस्य प्रागसत्त्वान्न दोषः । ज्ञानत्वादिनेत्यादिना सविषयत्वभावनात्वादेः परिग्रहः । ननु प्रथमकल्पे तृतीयक्षणसाधारणस्य प्रागुक्ताव्यवहितोत्तरत्वस्य प्रवेशे व्याप्तिज्ञानमात्रादनुमितिः स्यात्तस्यापि परामर्शसम्पत्त्या स्वाव्यवहिततृतीयक्षणोत्पत्तिकानुमितिकत्वादत आह स्वाव्यवहितोत्तरश्चेति । तथा च स्वाधिकरणसमयध्वंसाधिकरणसमयध्वंसानधिकरणत्वगर्भमेवाव्यवहितोत्तरत्वं निवेश्यमिति भावः । न चेति । वाच्यमित्यन्वयः । पूर्वोत्पन्नस्यैव परामर्शस्य स्थितिक्षणेनुमित्यव्यवहितपूर्वत्वविशिष्टस्य सम्भवात् किं वेत्यादिकल्पे दोषासम्भवादादिमेषु त्रिष्वित्युक्तम् । अतथात्वादिति । स्वक्षणाव्यवहितोत्तरक्षणोत्पत्तिकानुमितिकत्वाभावात् स्वसमानाधिकरणाव्यवहितपूर्वक्षणोत्पन्नत्वाभावात् स्वक्षणाव्यवहितोत्तरक्षणानुत्पत्तिकस्वसमानाधिकरणानुमितिकभिन्नसविषयकत्वाभावाच्चेत्यर्थः । तदानीं विरोधिसिद्ध्यादेर्नाशदशायाम् । अनुव्यवसायादेरित्यस्य पंचम्यन्तस्य सम्भवादित्यनेन योजना । अनुव्यवसायादितोऽनुमितिसंभवादित्यर्थः । आदिना बाह्यप्रत्यक्षान्तराद्युपसंग्रहः । ननु यत्र परामर्शविषयिण्या कामिनीजिज्ञासया परामर्शमात्रमुत्पाद्य नष्टं परामर्शोत्तरक्षणे तया प्रतिबन्धात् ज्ञानमात्रस्यैवानुत्पत्त्या पश्चादनुमितिर्न स्यादत आह अन्ततः संस्कारेति। अ-

संस्कारजन्यत्वेन स्मृतित्वस्य प्रागेव निरासात् । स्याद्वा स्वसमानाधिकरणानुमित्यव्यवहितपूर्वत्वानधिकरणवृत्तित्वविशिष्टत्वेन वा स्वसमानाधिकरणानुमित्युत्पत्त्यनधिकरणसमयाव्यवहितपूर्वक्षणवृ-

---

न्ततो जीवनयोनिकृतेरसत्त्वेन च यत्र सर्वांश एवेपेक्षात्मक उक्तपरामर्शस्तत्र संस्कारस्यासम्भवस्तादृशस्थले मानाभावात् । अनुमित्यात्मककार्येणानुमितसंस्कारस्यान्यथानुपपत्त्याऽनुपेक्षात्मकस्यैव तत्र कल्पनादितोप्यस्वरसाद्वा किं वेत्यादिकल्पस्यादृतत्वादिति भावः । ननु तादृशानुमितेः संस्कारजन्यत्वे स्मृतित्वापत्तिरत आह संस्कारजन्येति । जन्यत्वं समवायेन ग्राह्यं नातः संस्कारध्वंसे व्यभिचारः । प्रागेवशब्दः सुतरामर्थे निपातितः । निरासादिति । प्रत्यभिज्ञायां व्यभिचारादप्रयोजकत्वाच्च संस्कारजन्यत्वे स्मृतित्वानियमादिति भावः । ननूक्तप्रतिबंदिभयाद्भावनिष्ठकारणतायां अवच्छेदकविधया कार्योत्पादादिकमनिवेश्यतामभावरूपायाः पक्षतायाः कारणतायां तन्निवेशे न किं चिदपि बाधकमतस्तत्रापि प्रतिबंदिमाह स्याद्वेति । तथासतीत्यनुषज्यते । ज्ञानमात्रस्यैव प्रायशो व्यधिकरणानुमित्यव्यवहितपूर्ववृत्तित्वात्तदन्यस्य प्रलयादेरभावः परामर्शविधुरेप्यात्मन्यस्तीति तत्रानुमितेर्वारणाय स्वसमानाधिकरणान्तम् । अनुमितिश्च पक्षसाध्यादिविशेषनियन्त्रिता ग्राह्या, तेनैकसाध्यानुमितिदशायां सिद्ध्यादिसत्त्वेपि नान्यसाध्यकानुमितेरुत्पादः । तदुत्पत्तिक्षणोत्पत्तिकध्वंसप्रतियोगित्वलक्षणस्य वक्ष्यमाणाव्यवहितपूर्वत्वस्यानुमितिस्थूलकालेपि सत्त्वात्तदवृत्तिसिद्धिसत्त्वेप्यनुमित्यापत्तेरतः क्षणेति । ननु यत्र सामग्रीवशात् साध्यतद्वच्चाप्ययोरनुमित्यात्मकपरामर्शः ततः साध्यस्यानुमित्यन्तरज्ञायतामितीच्छा ततोऽनुमित्यन्तरं तत्रानुमित्साकालेप्यनुमित्यापत्तिः पूर्वोत्पन्नानां सर्वेषामेव तदात्मगुणानां तादृशानुमित्यव्यवहितपूर्वक्षणवर्त्तित्वेनाविरोधित्वादत आह स्वसमानेति । तथा चोक्तस्थले प्रथमानुमितिक्षणस्यैव तादृशाव्यवहितपूर्वत्वानधिकरणतया तदवृत्तित्वविशिष्टस्य परामर्शादेरेव विरोधिनः सत्त्वान्न दोष इति भावः । अनुमित्युत्पत्तिपर्यन्तस्यायिस्थूलकालो-

त्तित्वविशिष्टत्वेन वा प्रतिबन्धकत्वम् । तदव्यवहितपूर्वत्वञ्च तदुत्पत्तिक्षणोत्पत्तिकध्वंसप्रतियोगित्वम् । न चात्र प्रथमे यत्र

पाधेरपि तादृशानुमित्यव्यवहितपूर्वत्वानधिकरणतया तदवृत्तित्वविशिष्टस्य परामर्शमात्रस्य सत्त्वेप्यनुमितिर्न स्यादतः क्षणपदम् । ननु तादृशानुमित्यव्यवहितपूर्वत्वं तादृशानुमित्युत्पत्तिक्षणोत्पत्तिकध्वंसप्रतियोगित्वरूपमेवाग्रे वक्ष्यते न तु तादृशानुमित्युत्पत्तिकालोत्पत्तिकध्वंसप्रतियोगित्वरूपं तथासति सर्वेषामेव क्षणानां तादृशानुमित्युत्पत्त्यधिकरणीभूतस्थूलकालोत्पन्नध्वंसप्रतियोगितया निरुक्ताव्यवहितपूर्वत्वानधिकरणत्वस्यैव दुर्लभत्वापत्तेः।एवं च तादृशानुमित्युत्पत्तिक्षणोत्पत्तिकध्वंसप्रतियोगित्वानधिकरणक्षणवृत्तित्वविशिष्टत्वेन प्रतिबन्धकत्वमपेक्ष्य तादृशानुमित्युत्पत्त्यनधिकरणसमयोत्पत्तिकध्वंसप्रतियोगिक्षणवृत्तित्वविशिष्टत्वेन विरोधित्वं युक्तं क्षणद्वयाप्रवेशेन पूर्वतो लाघवादित्याशयेनाह स्वसमानेति । अत्र तादृशसमयाव्यवहितपूर्वत्वं तादृशसमयोत्पत्तिकध्वंसप्रतियोगित्वमात्रं न तु तादृशसमयोत्पत्तिकालोत्पत्तिकध्वंसप्रतियोगित्वमाद्योत्पत्तेर्वैयर्थ्यान्निष्फलत्वाच्च । समयपदं त्वव्यवहितपूर्वत्वघटकोत्पत्तेः कालिकसम्बन्धेन वृत्तित्वलाभार्थमन्यथानुमितिपूर्वक्षणस्यापि तादृशानुमित्युत्पत्त्यनधिकरणबुद्ध्यादौ विषयित्वादिसम्बन्धेन वर्तमानोत्पत्तिको यो ध्वंसस्तत्प्रतियोगित्वेन तत्क्षणवृत्तित्वविशिष्टस्य परामर्शादेः प्रतिबन्धकतया स्वकालेप्यनुमित्यनापत्तेरिति ध्येयम् । नन्वनुमित्यव्यवहितपूर्वत्वं तदुत्पत्तिकध्वंसप्रतियोगित्वं तथा चातिपूर्वक्षणस्यापि अनुमित्युत्पत्त्यनधिकरणस्थूलकालोत्पत्तिकध्वंसप्रतियोगित्वात्तद्वृत्तित्वविशिष्टस्यापि सिद्ध्यादेरप्रतिबन्धकत्वापत्तिरत आह तदव्यवहितेति । तादृशानुमित्यव्यवहितपूर्वत्वं चेत्यर्थः । शेषकल्पे निरुक्ताव्यवहितपूर्वत्वस्याप्रविष्टतया सामान्यतोव्यवहितपूर्वत्वस्य निरूपणानौचित्यादिति ध्येयम् । न च जन्याभावत्वलक्षणध्वंसत्वस्य प्रवेशे वैयर्थ्यमभावान्तराणामुत्पत्तिविरहेणैव निरासादिति वाच्यम्।ध्वंसत्वनिरूपकप्रतियोगित्वलाभार्थं तदुपादानात्। अन्यथा सर्वेषामेव क्षणानामनुमित्यु-

सिद्ध्यात्मकपरामर्शानन्तरं सिषाधयिषाया उत्पत्तिकाले तत्पुरुषीयस्य कस्यापि धर्म्मस्य न विनाशोऽनन्तरं पुनरनुमितिः तत्र तदुत्पत्तिसमयेऽपि सा स्यात् तत्पूर्वकालीनानां सर्वेषां तादृश-

---

त्पत्तिक्षणोत्पत्तिकस्वभेदात्मकध्वंसांतरप्रतियोगितयातिप्रसंगापत्तेः ध्वंसत्वस्याखंडत्वमते वैयर्थ्याशंकानुत्पादाच्चेति भावः । न चेतिवाक्यमित्यन्वयः । अत्र उक्तेषु मध्येप्रथम इति । अन्त्ययोस्तु कल्पयोस्तादृशानामित्यव्यवहितपूर्वत्वानधिकरणवृत्तित्वविशिष्टेन स्वसमानाधिकरणानुमित्युत्पत्त्यनधिकरणसमयाव्यवहितपूर्वक्षणवृत्तित्वविशिष्टेन च परामर्शेनैव प्रतिबन्धादनुमित्सोत्पादकालेऽनुमितेर्न संभव इति भावः । सिद्धेरसत्त्वेऽनुमित्सामवधूयानुमितिरेवोत्पद्यते परामर्शपूर्वं सिद्धिसत्त्वे च सैव तादृशाव्यवहितपूर्ववर्त्तिभिन्ना विरोधिनी भावना इत्यतः सिद्ध्यात्मकेत्युक्तम् । प्रतिक्षणमवश्यं कस्यचिद्विनाशोपगमात् तत्पुरुषीयस्येत्युक्तम् । तदुत्पादसमयेऽनुमित्सोत्पादसमयोसा अनुमितिः । तादृशपूर्ववर्तित्वेन स्वसमानाधिकरणानुमित्यव्यवहितपूर्वक्षणवर्त्तित्वेन । यद्यप्यनुमित्साया अप्युपायेच्छात्वात्तत्कारणीभूतफलेच्छाया एवानुमितिप्रागवृत्तिभिन्नायास्तस्वादनुमित्सोत्पत्तिकालेनुमितेरसम्भवः । तथापि सुखात्मकानुमितिर्जायतामित्याकारिकैवात्र सिषाधयिषा बोध्या सा च फलेच्छात्वादेव न फलेच्छान्तरमपेक्ष्यते इत्यदोषः । परामर्शोप्यत्र स्मरणात्मको ग्राह्यः । अन्यथा विशिष्टानुभवत्वे तदर्थमपेक्षणीयस्य विशेषणज्ञानादेस्तादृशपूर्ववर्त्तिभिन्नत्वेन विरोधित्वसम्भवात् । न च स्मरणात्मकपरामर्शहेतोः संस्कारस्यैव फलनाश्यस्य तादृशपूर्ववर्त्तिभिन्नत्वसम्भवः, समूहालम्बनसंस्कारजन्यपरामर्शस्य चरमफलत्वाभावेन संस्कारानाशकत्वादिति वदन्ति । यत्तु सिद्ध्यात्मकपरामर्शोऽत्रानुमितिरूप एव ग्राह्यस्तथा च फलेच्छादेरपि स्वसमानाधिकरणानुमित्यव्यवहितपूर्ववर्त्तित्वादेव प्रतिबन्धकत्वासम्भवात् । अत एव च पुनरनुमितिरित्यत्र पुनःपदेन सिद्ध्यात्मकपरामर्शस्यानुमितित्वं ग्रथकृतैव व्यंजितम् । न च सिद्ध्यात्मकानुमितिस-

पूर्ववर्त्तित्वेनाविरोधित्वादिति वाच्यम् । अनवरतपरिस्पन्दमानापरिमितपवनादिपरमाणुचेतनसंयोगसन्तानान्तःपातिव्यक्तीनामविरतमेवोपरमात् फलानुत्पादबलेनापि तादृशकल्पनासम्भवात् कारणान्तरकल्पने गौरवाच्च । अन्वयव्यभिचारसन्देहस्य च कारणत्वग्रहाविरोधित्वात् । उपादीयन्तां वा तत्तदात्मसमयविशेषम-

---

स्वेऽनुमित्सैव दुर्घटा, अनुमित्यन्तरत्वप्रकारेण तत्सम्भवादिति मतम्। तत्तुच्छम्। अनवरतेत्याद्युत्तरग्रन्थासंगतेः क्षणिकपदार्थानभ्युपगमेन संयोगादीनामपि तादृशपूर्ववृत्तित्वेन प्रतिबन्धकत्वायोगादिति । यद्यपि स्वावच्छिन्नसमानाधिकरणानुमित्यव्यवहितपूर्ववर्तितानवच्छेदकधर्मविशिष्टत्वेन प्रतिबन्धकत्वविवक्षयाप्युक्तासिद्धार्थयिषोत्पत्तिकालेनुमितेर्वारणं सम्भवतीति स्वोत्पत्तिक्षणावच्छिन्नतत्तत्सिद्धिव्यक्तित्वस्यैव तादृशपूर्ववर्त्तितानवच्छेदकतया तद्विशिष्टायाः सिद्धेः अनुमित्सापूर्वं सत्त्वात्, तथापि यथाश्रुतमेव समाधिसौकर्यादाह अनवरतेति । अनवरतम् अनुक्षणम् । परिस्पन्दमाना येऽपरिमिताः पवनादिपरमाणवस्तैः सार्द्धं यः चेतनसंयोगसन्तानस्तदन्तर्गतसंयोगव्यक्तीनामनुक्षणमेव नाशादित्यर्थः । तथा च परामर्शपर्यंतस्थायिन्यः परमाणुतत्तत्संयोगव्यक्तय एव तत्रानुमितिप्रतिबंधिका इति भावः । ननु तत्र कारणाभावप्रयुक्तः फलानुत्पादः कारणान्तरमेवाक्षिपेदित्यत आह कारणान्तरेति।ननूक्तक्रमेण कारणतानिश्चये सति तादृशसंयोगोपरमः कल्पनीयः कारणतानिश्चय एव तत्प्राक् न सम्भवत्यन्वयव्यभिचारसंदेहेन प्रतिबन्धादत आह अन्वयेति । संदेहस्येति प्रकृताभिप्रायेण । अविरोधित्वादिति । ग्राह्याभावानवगाहित्वादिति भावः । ननु यत्र पक्षः साध्यवान् साध्यव्याप्यवान् साध्यानुमित्यन्तरं चेष्टसाधनमित्याकारकानुमितेः पश्चात्साध्यानुमित्सा ततः साध्यानुमित्यन्तरं तत्रानुमित्साकालेनुमित्यनुत्पादेनान्वयव्यभिचारनिश्चयात्कारणान्तरमवश्यं कल्पनीयं क्षणिकपदार्थानभ्युपगमादनुमित्सापूर्ववर्त्तिनां सर्वेषामेव स्वसमानाधिकरणप्रथमानुमित्यव्यवहितप्राक्क्षणवृत्तित्वेन तद्भिन्नत्वाभावा-

म्बन्धा एव तादृशपूर्ववर्त्तिभिन्नाः, भवेद्वा तत्तत्पुरुषीयानुमितिं प्रति तत्तदीयानुमित्यव्यवहितपूर्वक्षणत्वादिना तादृशक्षणवर्त्तित्वविशिष्टत्वादिना वा कारणत्वं तथा चोपमानादेः प्रमाणान्तरत्वं भज्येत सर्वत्रानुमितिसामग्रीसम्भवात्, विलीयेत च परामर्शत्वादि-

---

दित्यस्वरसादाह उपादीयन्तामिति। प्रतिबन्धकतयेति शेषः। तथा च प्रथमानुमित्युत्पत्तिक्षणसम्बन्धा एव अनुमित्यव्यवहितपूर्वक्षणवर्त्तिभिन्नत्वेनानुमितिप्रतिबन्धका इति भावः। तत्तदात्मसमवयसम्बन्धानामतिरिक्तत्वमतेनेदम्। ननु स्याद्धेत्वाद्युक्तप्रकारत्रयमपि स्वस्वगर्भत्वादननुगतमतस्तादृष्येण प्रतिबन्धकतायां नैककारणपरिशेषापत्तिरत आह भवेद्वेति। अत्र च तत्पुरुषीयानुमित्यव्यवहितपूर्वक्षणत्वं स्वप्रागभावावच्छिन्नकालिकसम्बन्धेन तादृशानुमित्याश्रयशब्दत्वं वाच्यमतो नाननुगमाद्यवकाशः। न च तादृशशब्दस्यानुमितिक्षणेपि सत्त्वात् पुनरनुमित्यापत्तिः, कार्यसहभावेनैव तस्य हेतुत्वात्तादृशशब्दविशिष्टत्वं वा वक्तव्यं वैशिष्ट्यं च स्ववृत्तित्वस्ववृत्तिध्वंसप्रतियोगित्वोभयसम्बन्धेन ग्राह्यम्। शब्दस्य चतुःक्षणस्थायित्वमते तमपहाय सुखदुःखादीनां द्विक्षणस्थायिगुणानामन्यतममेव निवेशनीयमित्यभिनवः पन्थाः। पूर्वक्षणत्वादिनेत्यादिना तादृशपूर्वत्वानधिकरणक्षणाभावत्वादेरुपग्रहः। परामर्शादेः कारणत्वरक्षामनुसृत्याह तादृशेति। अत्र तत्तत्पुरुषीयानुमितिं प्रति तत्तत्पुरुषीयानुमित्यव्यवहितपूर्वक्षणवृत्तित्वविशिष्टत्वेन हेतुतायां कालिकमेव व्यापकत्वं प्रविष्टमतः पुरुषान्तरे तत्पुरुषीयानुमितिर्नोपादनीया। विशिष्टत्वादिनेत्यादिपदेन तादृशपूर्वत्वानधिकरणवृत्तित्वविशिष्टाभावत्वादेः परिग्रहः। मनूक्तरूपेण कारणतायामिष्टापत्तौ को दोष इत्यत आह तथा चेति। उपमानादेरित्यादिना शब्दस्य परिग्रहः। सर्वत्रेति। उक्तक्रमेणेत्यादिः। व्याप्त्याद्यप्रतिसन्धानदशायामुत्पन्नयोरुपमितिशाब्दयोः कारणबाधेनानुमितित्वासम्भवादेव तत्कारणयोरुपमानशब्दयोः प्रमाणान्तरत्वमिष्यते प्रागुक्तरूपैरनुमितिहेतुत्वे कारण-

ना कारणत्वं बाधकत्वादिना च प्रतिबन्धकत्वम् । अनयैव रीत्या कार्य्यान्तरेष्वपि कल्प्तानां कारणानां प्रतिबन्धकानाञ्चातथात्वमकल्प्तानाञ्च तथात्वं प्रसज्येत । अत एव न द्वितीयोऽपि प्रकारः,

---

बाधासम्भवांत्तयोरप्यनुमान एवान्तर्भावः । ननु यत्रोपमित्यादिस्थले नानुमिनोमि. किं तूपमिनोमीत्यादिरेवानुव्यवसायस्तत्रैवोपमित्यव्यवहितपूर्वक्षणस्यानुमित्यव्यवहितपूर्वत्वाभावात्कथं सर्वत्रोक्तानुमितिसामग्री अन्यथोपमित्यादिकं प्रत्युपमित्यव्यवहितपूर्वक्षणत्वादिना हेतुत्वकल्पनात्सर्वत्रैवोपमितिसामग्रीसम्भवादनुमानस्य प्रमाणान्तरत्वं भग्नमित्येव किं न रोचयेदित्यत आह विलीयेत चेति । परामर्शत्वादिनेति । व्याप्यपक्षोभयवैशिष्ट्यावगाहिनिश्चयत्वेन व्याप्यवत्पक्षनिश्चयत्वेन वानुमितौ हेतुत्वं न स्यादित्यर्थः । प्रागुक्तसविषयकत्वादिनैव परामर्शस्य तथात्वनिर्वाहादिति भावः । बाधत्वादिनेत्यादिपदेन सत्प्रतिपक्षोपसंग्रहः । प्रागुक्ताव्यवहितपूर्ववर्त्तिभिन्नत्वेनैव बाधादेः प्रतिबन्धकत्वसम्भवादिति भावः । न च बाधादेर्विशिष्टबुद्धिसामान्यं प्रत्येव विरोधित्वादनुमितित्वावच्छिन्नं प्रति बाधत्वादिना प्रतिबन्धकत्वं प्रसक्तमेव नेति वाच्यम् । सति बाधे विशिष्टबोधेच्छायां साक्षात्कारिण्या इवानुमित्यादिरूपाया अपि विशिष्टबुद्धेरुत्पत्तिभियानुमितित्वावच्छिन्नं प्रत्येव बाधत्वादिना पृथक् विरोधित्वस्यावश्यकत्वादिति भावः । कार्यान्तरेषु शाब्दबोधदाहादिषु । अतथात्वमकारणत्वमप्रतिबन्धकत्वं च । प्रसज्यत इत्यन्वयः । एवं तथात्वमित्यत्रापि । तथा च शाब्दबोधत्वावच्छिन्नं प्रति स्वसमानाधिकरणशाब्दाव्यवहितप्राक्क्षणोत्पन्नसविषयकत्वेन हेतुत्वे विनश्यदवस्थस्य पदार्थोपस्थित्यादेः शाब्दधीहेतुत्वं न स्यात् प्रत्युत शाब्दधीप्राक्क्षणोत्पन्नसंस्कारादेरपि तत्र हेतुता स्यात् । एवं स्वसमानाधिकरणदाहाव्यवहितप्राक्क्षणवृत्तिभिन्नत्वेनैव मण्यौषधादेर्दाहप्रतिबन्धकत्वे कदा चिदुपहितदाहानां मण्यादीनां दाहप्रतिबन्धकत्वं न स्यात् प्रत्युत तादृप्येणोदासीनस्यापि घटादेर्दाहविरोधित्वं स्यादित्यर्थ । अत एव कार्याव्यवहितपूर्वत्वादेः कारणतानवच्छे-

वैयर्थ्याच्च सिद्धेः । सिषाधयिषाविरहविशिष्टस्य सिद्ध्यनुमानाति-रिक्तसाधकमानयोरन्यतरस्याभावः कारणमिति तु के चित् । तन्न । साधकमानं हि सिद्धिस्वरूपयोग्यं तदुपहितं तत्सामग्री वा । नाद्यः, चक्षुरादिमत्त्वे विनानुमितीच्छामनुमित्यभावप्रसङ्गा-त्।न द्वितीयः, सिद्धेः पूर्वं तदुपहितत्वाभावेन प्रत्यक्षसामग्रीसत्त्वेऽ-

---

दकत्वादेव । द्वितीय इति । तादृशानुमित्यव्यवहितपूर्ववर्त्तिसि-द्धिभिन्नसिद्ध्यभावमात्रं पक्षतेतिग्रन्थोक्तकल्प इत्यर्थः। द्वितीयप्रकारे दोषान्तरमप्याह वैयर्थ्याच्चेति । स्वसमानाधिकरणतत्तदनुमित्यव्य-वहितपूर्ववर्त्तित्वविशिष्टप्रतियोगिकभेदकूटस्य प्रवेशे गौरवात् स्व-प्रागभाववन्निष्ठस्वसामानाधिकरण्यसम्बन्धेन प्रकृतसाध्यकानुमिति-विशिष्टत्वलक्षणमेव तादृशानुमित्यव्यवहितपूर्ववर्त्तित्वं द्वितीयप्रकारे लाघवान्निवेश्यं तथा च तदवच्छिन्नभिन्नसिद्ध्यभावस्यैव सम्यक्त्वेन प्रथमं सिद्धिपदं विफलम्, अखण्डाभावघटकत्वेपि तादृप्येण हेतुता-यां गौरवादिति भावः । यज्ञपत्युपाध्यायमतं दर्शयति सिषाधयि-षेत्यादि । केवलपरामर्शसत्त्वेप्यनुमितिर्न स्यात् तस्यैवानुमित्साविर-हविशिष्टसाधकमानस्य सत्त्वादतोऽनुमानातिरिक्तपदम् । अत्र प्र-त्यक्षमानमेव निवेशयितुं युक्तं न त्वनुमितिभिन्नसिद्धिजनकमानं स-मानविषये शाब्दादिसामग्रीसम्भवेऽनुमितेरेवोत्पादादत एव एकप-दार्थस्यापरपदार्थसंसर्गेऽप्यप्यर्थमेवत्वस्य योग्यतात्वे संसर्गस्यानु-मितिरेव स्यात् न तु शाब्दधीरिति योग्यताग्रन्थे मणिकारैरप्युक्त-मिति वदन्ति । अन्यतरस्येति । इत्थं च साधकं सिद्धिमानं च सि-द्ध्यात्मकमिति जनकं प्रमाणमित्युभयमेव मूलस्थसाधकमानशब्दस्या-र्थ इति भावः । उपहितमिति । तया सिद्ध्या उपहितं विशिष्टं पक्ष-तावच्छेदकसामानाधिकरण्येन सिद्धिविशिष्टं सत्तादृशसिद्धिजन-कमिति यावत् । तत्सामग्री अनुमित्यन्यसिद्धेः सामग्री । चक्षुरा-दीत्यादिना पदज्ञानादेरुपग्रहः । ननु सिद्ध्यनुपधानदशायां सिद्धि-जनकस्य प्रत्यक्षसामग्न्यादेः पृथगेवानुमितिविरोधित्वं वाच्यं स्वज-न्यैकसिद्ध्युपहितप्रत्यक्षसामग्न्या सिद्ध्यन्तरजननदशायामनुमिते-

प्यनुमित्यापत्तेः अनुमानातिरिक्तेत्यस्य वैयर्थ्याच्च। न तृतीयः, अनुमितिसामग्र्यभावत्वेन प्रत्यक्षकारणत्वम् अनुमितसाविरहविशिष्टप्रत्यक्षसामग्र्यभावत्वेन चानुमितिकारणत्वमित्यन्योन्याश्रयात्। स्थाणुत्वाभावव्याप्यदर्शनक्षणे प्रतियोग्यारोपविरहेणाभावप्रत्यक्षसामग्रीविरहात् पक्षतासत्त्वे स्थाणुत्वारोपक्षणे तदभावानुमित्यापत्तेरित्यपि कश्चित्। वस्तुतस्तु स्वतन्त्रान्वयव्यतिरेकशा-

---

र्थारणार्थमेव निरुक्तसाधकमानस्य पक्षतायां प्रवेश्यत्वादत आह अनुमानेति। वैय्यर्थेति। साधकमानस्य परामर्शादेरनुमितेः पूर्वं तद्वैशिष्ट्याभावादेव विरोधित्वासम्भवादिति भावः। अनुमितिभिन्नसिद्धिप्राक्क्षणावच्छिन्नत्वमेव तादृशसिद्ध्युपहितत्वमित्युक्तौ नातिप्रसङ्गः न वा वैय्यर्थ्यमिति ध्येयम्। अनुमितिसामग्र्यभावत्वेनेति। अन्यथा वन्ह्यादेः सन्निकर्षदशायामनुमित्सयाप्यनुमितिर्न स्यादिति भावः। प्रत्यक्षसामग्र्यभावत्वेनेति। अन्यथा समानविषये सत्यामपि प्रत्यक्षसामग्र्यामनुमित्युत्पादप्रसङ्गादिति भावः। अन्योन्याश्रयादिति। अनुमितिसामग्र्यभावत्वेन प्रत्यक्षहेतुताग्रहोत्तरमेव प्रत्यक्षसामग्रीमवगत्य तदभावत्वेनानुमितिहेतुत्वं ग्राह्यमनुमितिसामग्रीज्ञानं चानुमितिं प्रति प्रत्यक्षसामग्र्यभावत्वेन हेतुताग्रहं विनेत्यन्योन्याश्रयादुक्तरूपेण कार्यकारणभावग्रहासम्भवादित्यर्थः। अथानुमितिसामग्र्यभावातिरिक्तं प्रत्यक्षहेतुस्तोममेव प्रत्यक्षसामग्रीपदेनोपादाय सिद्धितदन्यतरत्वावच्छिन्नाभावस्य पक्षताविधयानुमितिहेतुत्वमतो नान्योन्याश्रय इत्यत आह स्थाणुत्वेति। आरोपक्षणेति। अनुमितिमात्रस्यैवानुत्पत्तिभिया सिद्धिप्रत्यक्षसामग्र्यन्यतराभावस्य कार्यसहवर्त्तित्वेन हेतुत्वासम्भवादिति भावः। प्रतियोग्यारोपातिरिक्तस्य प्रत्यक्षकारणस्तोमस्यैव प्रत्यक्षसामग्रीपदेनाभिधानात्प्रतियोग्यारोपस्याभावप्रत्यक्षं प्रति हेतुत्वे मानाभावाच्चेदं न युक्तमित्यस्वरसेन कश्चिदित्युक्तम्। स्वयं दूषणमाह वस्तुतस्त्विति। ननु स्वातन्त्र्यमन्यथासिद्धत्वं तच्च प्रत्यक्षाभावस्यान्वय-

लित्वान्नियमेन प्रथममुपस्थितत्वाल्लाघवाच्च प्रत्येकमेव तथात्वमन्यथा बाधादेरप्यत्रैवान्तर्भावप्रसङ्गात् । न चानुमितसाविरहस्य प्रत्येकं विशेषणत्वे गौरवम् । शाब्दसिद्धौ सत्यामशाब्दं ज्ञानं जा-

---

व्यतिरेकयोर्विवादग्रस्तमत आह नियमेनेति । अन्यतरत्वेन प्रतियोगिज्ञानात्पूर्वं प्रत्येकप्रतियोगिज्ञानध्रौव्येन प्रत्येकाभावस्यैव प्रथमोपस्थितत्वादित्यर्थः । ननु प्रत्येकाभावाग्रहेपि शाब्दादिनान्यतरत्वावच्छिन्नाभावस्य ग्रहसम्भवान्नेदं युक्तमत आह लाघवादिति । प्रत्येकाभावत्वेन हेतुतायामवच्छेदकलाघवादित्यर्थः । प्रत्येकमनुमित्साविरहविशिष्टसिद्ध्यभावत्वेन तथाविधप्रत्यक्षसामग्र्यभावत्वेन च । तथात्वम् । अनुमितिहेतुत्वामित्यर्थः । ननु प्रत्येकाभावत्वेन हेतुताद्वयमपेक्ष्यान्यतराभावत्वेन गुरुणाप्येकमेव हेतुत्वं कल्पनार्हमत आह अन्यथेति । अत्र पक्षतायाम् । बाधादेरित्यादिना सत्प्रतिपक्षसंग्रहः । तथा चानुमित्साविरहविशिष्टसिद्धेस्तथाविधप्रत्यक्षसामग्र्या बाधसत्प्रतिपक्षादेश्चान्यतमत्वावच्छिन्नाभावत्वेनैवानुमितिहेतुता स्यादबाधाद्यभावस्य पृथक्कारणत्वे गौरवादित्यर्थः । न च विशिष्टबुद्धिसामान्यं प्रत्येव बाधसत्प्रतिपक्षयोर्विरोधित्वात् पक्षताकुक्षौ तन्निवेशानौचित्यमिति वाच्यम् । सति बाधादिनिर्णये बुभुत्सादशायां विशिष्टप्रत्यक्षवत्तादृशानुमित्यादिप्रसङ्गेन विशिष्टानुमितित्वावच्छिन्नं प्रत्यपि बाधादेर्विरोधित्वस्यावश्यकत्वात् । वस्तुतोऽन्तर्भावप्रसंगादिति ग्रंथस्यान्यतरत्वेन प्रतिबन्धकतायामन्तर्भावप्रसंगादित्यर्थः । तथा च विशिष्टबुद्धिसामान्ये विशिष्टानुमितित्वाद्यवच्छिन्ने वा बाधसत्प्रतिपक्षान्यतरत्वावच्छिन्नाभावत्वेन हेतुताप्रसंग एव ग्रन्थतात्पर्यमन्यथा तद्विधेयकानुमितित्वावच्छिन्नं प्रत्येव सिद्धिप्रत्यक्षसामग्र्यास्तत्प्रकाकानुमितित्वावच्छिन्नं प्रत्येव बाधसत्प्रतिपक्षयोर्विरोधित्वात्तावदन्यतमत्वावच्छिन्नाभावत्वेन पक्षतायामनुगतानुमितिहेतुत्वासम्भवादिति ध्येयम् । यद्वा बाधस्य विशिष्टधीसामान्यविरोधितया साध्यविधेयकानुमितिं प्रति पक्षतायां हेतुतायां तदन्तर्भावे-

यतामितीच्छायामनुमितेरुत्पादात् सिद्धावनुमितिविषयेच्छाविरहस्य प्रत्यक्षसामग्रीसत्त्वे च तादृशेच्छायामनुमित्यनुत्पादात् साधकमाने अनुमितित्वादिप्रकारकेच्छाविरहस्य पृथगेव विशेषणता-

---

ण गौरवमाशंक्यैव दीधितिकृता बाधादेरित्यत्रादिपदमुपात्तम् । तने तत्तल्लिङ्गकपरामर्शाभावकालीनतत्तल्लिङ्गकानुमित्साव्यक्तीनां परामर्शधर्मिकतत्तदप्रामाण्यज्ञानव्यक्तीनां चोपग्रहः । पक्षधर्मिकसाध्यविधेयकानुमितित्वावच्छिन्नं प्रत्येव सिद्धिप्रत्यक्षसामग्रीनिरुक्ततत्तल्लिङ्गकपरामर्शधर्मिकतत्तदप्रामाण्यज्ञानव्यक्तीनां चान्यतमाभावत्वेन पक्षतायाः कारणत्वे बाधकाभावादिति भावः। अथ वा ननु सिद्धिप्रत्यक्षसामग्र्योरन्यतरत्त्वावच्छिन्नाभावस्याखण्डस्य तत्तद्व्यक्तित्वेनैव साध्यविधेयकानुमितिहेतुत्वं वाच्यमतः प्रत्येकाभावत्वेन हेतुतायां न लाघवावकाश इत्यतस्तत्प्रतिबन्दिमाह अन्यथेति । यद्यखण्डाभावस्य तत्तद्व्यक्तित्वेन हेतुत्वं तर्हि बाधादेरपि पक्षतायामन्तर्भावः स्यात् सिद्धिप्रत्यक्षसामग्रीबाधादीनामन्यतमत्वावच्छिन्नाभावस्याखण्डस्य तत्तद्व्यक्तित्वेन साध्यविधेयकानुमितित्वावच्छिन्नं प्रति हेतुत्वे बाधकाभावात्प्रतियोग्यविशेषितरूपेणाभावस्य हेतुतायामन्यथासिद्ध्या तत्परित्यागस्तु सिद्धिप्रत्यक्षसामग्र्योरन्यतरत्वावच्छिन्नाभावस्याखण्डस्यापि हेतुतायां समान इत्यपि माहशामपरः पन्थाः। अथाभावद्वयस्य हेतुत्वेऽनुमित्साविरहस्य द्विर्निवेशाद्गौरवमन्यतराभावस्य हेतुतायां तु सिद्धिप्रत्यक्षसामग्र्यन्यतरत्वेनानुमित्साविरहस्य सकृदेव तस्य विशेषणत्वाल्लाघवमित्याशङ्क्य निषेधति न चेति । अन्यतराभावस्य हेतुत्वपक्षेप्यनुमित्साविरहो द्विर्निवेश्य इत्याह शाब्दसिद्धाविति । शाब्दान्यसिद्धिदशायामशाब्दज्ञानत्वप्रकारिकेच्छैव नोत्पद्यत इत्यतः शाब्दसिद्धाविति । विरहस्येति । पृथग्विशेषणताया इत्यत्रेऽन्वयः। अनुत्पादादिति । अनुषङ्गवशादनुमितेरनुत्पादादित्यर्थः । प्रकारान्तरेणासम्भवात्स्वविषयसिद्धिकाया एव सिषाधयिषाया अनुमितेर्निर्वाहकत्वादिति भावः । अ-

यास्त्वयापि वाच्यत्वात्स्वनिवर्तकप्रत्यक्षादिसामग्रीसमवहितान्य-त्वादिना च तादृशेच्छयोरनुगमेऽतीव गौरवम् । अन्यतरत्वघटक-योरन्योन्याभावयोर्मिथो विशेषणविशेष्यभावे विनिगमकाभावश्च ।

नुमितित्वादीत्यादिपदं प्रत्यक्षातिरिक्तज्ञानत्वादिप्रकारकेच्छासंग्रहार्थम् । पृथगिति । न च यद्यदिच्छासत्त्वे सिद्धिप्रत्यक्षसामग्र्योरन्यतरदशायामनुमितिः तत्तदिच्छाव्यक्तत्वभावकूटविशिष्टस्य सिद्धिप्रत्यक्षसामग्र्योरन्यतरस्याभावः पक्षता तथा च प्रत्यक्षसामग्रीकालीनाया अशाब्दज्ञानं जायतामितीच्छाव्यक्तेरुत्तेजककोटावप्रवेशादेव तदानीमनुमित्युत्पादासम्भवादनुमित्सायाः सकृदेव विशेषणत्वं सम्भवतीति वाच्यम् । सिद्धिप्रत्यक्षसामग्र्यन्यतरस्थलीयतत्तदिच्छाव्यक्तीनामभावसमुदायस्यैकत्र निवेशे तेषां विशेषणविशेष्यभावे विनिगमनाविरहेण महागौरवात्तदपेक्षया सिद्धिस्थलीयतत्तदिच्छाविरहविशिष्टसिद्ध्यभावत्वेनैव लाघवेन हेतुत्वस्यौचित्यादिति भावः । स्वनिवर्तकेति । स्वनिवर्तकं यत्प्रत्यक्षादि तत्सामग्रीसमवहिना येच्छा तदन्यत्वेनेत्यर्थः । तथा च प्रत्यक्षसामग्रीकालीनाया अशाब्दज्ञानं जायतामितीच्छायाः स्वनिवर्तकप्रत्यक्षसामग्रीसमवहितत्वान्नोत्तेजकत्वमिति स्वनिवर्तकानुमितिसामग्रीसमवहिताया अनुमित्सायाः उत्तेजकत्वरक्षार्थं प्रत्यक्षादीत्युक्तम् । आदिना च शाब्दोपमित्यादेः सङ्ग्रहः । अन्यत्वादिनेत्यादिपदेन सिद्धिप्रत्यक्षसामग्र्यन्यतरदशायां यद्यदिच्छाव्यक्तिसत्त्वे चानुमितिस्तावदन्यतमत्वरूपस्यैवेच्छानुगमकधर्मस्योपग्रहः । ननु प्रत्येकाभावयोः कारणताद्वयमपेक्ष्यातिगुरुणाप्युक्तान्यतराभावत्वेनैकमेव कारणत्वं युक्तं बाधसत्प्रतिपक्षान्यतराभावत्वेन हेतुनास्वीकारेऽपि क्षतिविरहादत आह अन्यतरत्वघटकयोरिति । सिद्धिभेदविशिष्टं यत्प्रत्यक्षसामग्रीभिन्नं तदन्यत्वं प्रत्यक्षसामग्रीभेदविशिष्टं यत्सिद्धिभिन्नं तदन्यत्वं वा सिद्धिप्रत्यक्षसामग्र्यन्यतरत्वमित्यत्र विनिगमकाभावस्तथा चानुमित्साविरहविशिष्टतादृशप्रत्येकावच्छिन्नाभावत्वेन हेतुतायामवच्छेदकभेदेन कारण-

आत्मनिष्ठश्च समवायेन सिद्धेरभावः । भिन्नभिन्नेन च सम्बन्धेन तत्तदसाधारणकारणरूपायास्तत्सामग्र्याः मणिविशिष्टस्य वह्नेरिवेतरेतरविशिष्टस्य मनोयोगादेः प्रतिबन्धकत्वायोगात् । तथा च क-

---

तादृश्यं युक्तमिति भावः । ननु प्रतियोगिविनाकृतैव सिद्धिप्रत्यक्षसामग्र्यन्यतरत्वरूपाखण्डभेदव्यक्तिः पक्षतायां निविष्टा तत्र च विशेषणविशेष्यभावव्यत्यासशंकापि नास्ति। न च प्रतियोगिविनाकृताखण्डभेदव्यक्तिमुपादाय पक्षतानिर्वचने प्रतियोग्यविशेषितेनापि सिद्धिप्रत्यक्षसामग्रीगगनाद्यन्यतमत्वेन सिद्धिप्रत्यक्षसामग्र्यनुमितिपूर्ववर्तिभिन्नतत्तज्ज्ञानादिघटितान्यतमत्वेन तावदच्छिन्नाभावा अप्यनुमितौ हेतवः स्युः । तथा च परामर्शत्वादिनानुमितौ हेतुत्वं न स्यादित्युक्तप्रायमिति वाच्यम् । सिद्धिमात्राभावस्य पक्षतात्वेपि तादृशाभावानां हेतुताप्रसङ्गस्यान्यथासिद्ध्या निरसनीयत्वात् त्वन्मते गुरुधर्मावच्छिन्नाभावत्वेनेव मन्मतेपि गुरुधर्मावच्छिन्नप्रतियोगिताकस्याप्यखण्डाभावस्य तत्तद्व्यक्तित्वेन हेतुतायामन्यथासिद्धिसम्भवादत आह आत्मनिष्ठेति। भिन्नभिन्नेनेति स्वजनकादृष्टत्वादिना कालिकादिस्वरूपेण वेत्यर्थः । कालादिघटितसामग्र्याः प्रतिबन्धकत्वे गौरवादाह तत्तदसाधारणेति । चक्षुःसंयोगाद्यात्मकायाः प्रत्यक्षसामग्र्या इत्यर्थः । अभावः कारणमिति प्राक्तनेनान्वयः । ननु प्रत्यक्षासाधारणकारणसमवहितमनोयोगसिद्ध्यन्यतरयोः समवायसम्बन्धावच्छिन्नाभाव एव हेतुर्वाच्य इत्यत आह मणिविशिष्टस्येति । मनोयोगादेरित्यादिना ज्ञानाद्युपग्रहः । अयोसादिति । एकत्र जनकत्वप्रतिबन्धकत्वयोर्विरोधादिति भावः । यद्यप्यात्ममनोयोगत्वेनानुमितिजनकस्यापि निरुक्तान्यतरत्वेन तत्प्रतिबन्धकत्वेपि न क्षतिः एकरूपेणैव तयोर्विरोधात् मणित्वापेक्षया गुरुत्वेनैव मणिविशिष्टवह्नित्वेन दाहप्रतिबन्धकत्वाकल्पनात्, तथापि विशिष्टाभावस्य विशेषणाद्यभावातिरिक्तत्वादखण्डतत्तद्व्यक्तित्वेन हेतुत्वासम्भवात् उक्तान्यतरत्वावच्छिन्नाभावत्वेन च हेतुत्वेऽन्यतरत्वांशे विशेषणविशेष्यभावव्यत्यासेन गुरुतरकार्यकारणभावद्वयापत्तेः सिद्धि-

थमनुगतरूपेण तयोरभावः कारणम् । एवं सिद्धेः सिषाधयिषा-विरहेण वैशिष्ट्यमेककालावच्छेदेनैकात्मवृत्तित्वं प्रत्यक्षादिकारण-चक्षुःसंयोगादेस्त्वन्यादृशमिति सामग्रीविशेषाभावस्य हेतुत्वेपि

प्रत्यक्षसामग्र्योः प्रत्येकाभावत्वेनैव हेतुत्वमित्येव मूलं युक्तमिति ध्येयम् । तथा चेति । प्रतिबन्धकतावच्छेदकसम्बन्धाननुगमे चेत्यर्थः । तयोः सिद्धिप्रत्यक्षसामग्र्योः । प्रतियोगितावच्छेदकसम्बन्ध-भेदादिवत्तदवच्छेदकताघटकसम्बन्धभेदाद्प्यनुगतरूपेण हेतुत्वास-म्भवं दर्शयितुमाह एवमिति।एकप्रहराद्यवच्छेदेनैकात्मनि सिषाधयि-षाविरहविशिष्टसिद्धेस्सत्त्वेप्यनुमित्सादशायां पक्षतासम्पत्त्यर्थमेक-कालेति कालपदं क्षणपरमिति।यद्यपि पूर्वक्षणाद्यवच्छेदेनैवानुमित्सा-विरहविशिष्टायाः सिद्धेरनुमित्सादशायामपि सत्त्वात्तदानीं पक्षता न स्यात् । न चानुमित्साविरहेणोपलक्षितायाः सिद्धेः सिषाधयिषा-दशायां सत्त्वेपि न तद्विरहवैशिष्ट्यावच्छिन्नसिद्धेः सत्त्वं तदानीं विशेषणाभावादिति वाच्यम् । तथासत्येकक्षणावच्छेदेनेत्यस्य वैय्य-र्थ्यापत्तेः,तथापि सामयिकात्यन्ताभावानां तत्तत्समयावच्छिन्नमेवा-धिकरणत्वं स्वरूपाख्यसम्बन्धो न त्वधिकरणत्वमात्रं तथासति प्र-तियोगिसत्त्वदशायामपि तदधिकरणे तदभावापत्तेः तदीयसम्बन्ध-प्रयुक्तत्वात्तद्धस्वस्येत्याशयेनैकक्षणावच्छेदेनेत्युक्तम् । अत एव रूपव-त्तानियामकसम्बन्धो न शुद्धसमवायः वाय्वादेरपि रूपवत्तापत्तेः किं तु तत्तद्घटकनिरूपितसमवाय एवेति सिद्धान्तः । यदि चाभा-वस्य स्वयमेव स्वरूपसम्बन्धः स च प्रतियोगिसत्त्वदशायामधिक-रणे न वर्त्तते प्रतियोगिन एव विरोधित्वात् वृत्तिमत इव वृत्तेरप्यव्या-प्यवृत्तित्वात् सामयिकत्वमभावस्य न समयघटितस्वरूपसम्बन्धेन वृत्तिमत्त्वं परं तु समयविशेषावच्छेदेन स्वरूपसम्बन्धेन वृत्तिमत्त्वं गोत्वाद्यभावानां तु वृत्तिर्न समयावच्छिन्ना मानाभावात् भावाभाव-योरेकधर्मिणि सत्तायामेव विरोधभङ्गनार्थमवच्छेदकस्वीकारात् इ-दानीमश्वे गोत्वं नास्तीत्यादिप्रतीतौ चाधिकरणत्वेनैव समयस्य भा-नादिति विभाव्यते, तदैकात्मवृत्तित्वलक्षणस्य वैशिष्ट्यस्य साम-

लाघवात् सिद्ध्यभाव एव पक्षव्यवहारनिमित्तम् । एतदेवाभिसन्धाय प्रवृत्तिनिमित्तमुक्तमिति वक्ष्यति । फलानुपहितसिद्धीच्छाविरहविशिष्टसिद्ध्यभावापेक्षया बाधाभावस्य लघुत्वेऽपि सिद्धसा-

---

यिकत्वप्रदर्शनार्थमेवैकक्षणावच्छेदेनेत्युक्तं न तु वैशिष्ट्येऽपि तदन्तर्भाव इत्यस्मद्गुरुचरणाः । अन्यादृशं स्वाश्रयनिष्ठादृष्टजन्यत्वादिरूपम् । न चानुमित्साविरहविशिष्टसिद्धेरनुमित्साविरहविशिष्टप्रत्यक्षसामग्न्याश्चान्यतरत्वावच्छिन्नाभावत्वेन हेतुत्वाद्द्विविधस्य वैशिष्ट्यस्य प्रवेशेऽपि नानुगम इति वाच्यम् । प्राक्क्षणावच्छेदेन सिषाधयिषाविरहविशिष्टा या सिद्धिः प्रत्यक्षसामग्री वा तस्याः सिषाधयिषाविशिष्टतादशायामपि निरुक्तान्यतरत्वेन प्रतिबन्धकत्वादुत्तरक्षणेऽनुमित्यनापत्तेः । न च सिषाधयिषाविशिष्टतादशायां सिद्धेः सिषाधयिषाविरहविशिष्टान्यत्वमेव भेदस्याव्याप्यवृत्तित्वात् तथा च तदानीं निरुक्तान्यतरत्वावच्छिन्नं नास्त्येवेति वाच्यम् । तथासत्युक्तान्यतराभावत्वेन हेतुत्वे गुरुतरकार्यकारणभावद्वयापत्तितादवस्थ्यात् विशिष्टाभावस्याखण्डस्य प्रमाणाभावेन निरस्तत्वादिति भावः । ननु यद्यनुमित्साविरहविशिष्टप्रत्यक्षादिसामग्न्यभावोऽपि पृथगनुमितिहेतुस्तदा मूलस्थसाधकमानपदेनापि सामग्रीविशेष एवाभिधीयतां यथाश्रुतानुरोधात्र तु साध्यवत्तानिश्चय इत्यत आह सामग्रीविशेषेति । लाघवादिति । अनुमानातिरिक्तसिद्धिसामग्रीमपेक्ष्य सिद्धेः प्रवेशे लाघवादित्यर्थः । तथा च पक्षपदप्रवृत्तिनिमित्तनिर्वचनानुरोधादेव साधकमानपदेन साध्यनिश्चयो व्याख्यात इति भावः । प्रवृत्तिनिमित्तनिर्वचने मूलस्वरसमाह एतदेवेति । अन्यथाऽनुमितिकरणमिदमित्येव ब्रूयात्तावतापि यद्यपीत्याद्युक्तशङ्काव्युदाससम्भवादिति भावः । नन्वेवमुत्तेजकाप्रवेशेनातिलाघवाद्बाधनिश्चयाभाव एव पक्षपदप्रवृत्तिनिमित्तमस्त्वित्यत आह फलानुपहितेति । स्वविषयसिद्ध्यनुपहिततत्तदनुमित्साविरहविशिष्टेत्यर्थः । विशिष्टबुद्धिसामान्यं प्रत्येव बुभुत्साविरहविशिष्टबाधनिश्चयाभावत्वेन हेतुत्वमतेऽपि लाघ-

धनस्थले पक्षव्यवहारविरहेण तादृशसिद्ध्यभावस्यावश्यकत्वे बा-
धाभावो न निविशते गौरवात् विशिष्टसिद्ध्यभावस्य चात्मनि-
ष्ठस्यैवानुमितिहेतुत्वेऽपि तस्य परम्परासम्बन्धादेव पर्वतादौ पक्ष-
व्यवहार इति ध्येयम् । एकस्य पुंसोऽनुमित्सासत्त्वेऽपि अन्यस्य
तद्विरहिणः प्रत्यक्षादिसामग्रीसत्त्वेऽनुमितेरनुत्पादात् तत्पुरुषीया-
नुमितिं प्रति तत्तत्पुरुषीयानुमित्साविरहकालीनतत्तत्पुरुषीयसि-

---

धमाविष्कर्तुमनुपहितान्तानुसरणम् । न निविशत इत्यस्य पक्षपद-
शक्यतायामित्यादिः । ननु सिद्ध्यभावस्य पक्षतात्वंपि सि-
द्धिदशायां पर्वतादौ पक्षव्यवहारो दुर्वारः समवायावच्छिन्नसि-
द्ध्यभावस्य विशेषणतायाः पर्वते सत्त्वात् । न च तदीयसिद्धिविशे-
ष्यत्वाभाव एव तं प्रति पक्षव्यवहारनिमित्तम्, तस्यानुमित्यहेतुत्वा-
त् अनुमितिहेतोरेव पक्षतायाः प्रवृत्तिनिमित्तत्वात् पक्षतानुमितिहेतु-
रित्यादिव्यवहारादित्यत आह विशिष्टेति।अनुमित्साविरहविशिष्टेत्य-
र्थः । परम्परासम्बन्धादिति । तथा च यदा यत्र पुंसि निरुक्तसि-
द्ध्यभावस्तत्कालावच्छेदेन तत्पुरुषीयस्वप्रतियोगिविशेष्यत्वाभावरू-
पपरम्परासम्बन्धेन निरुक्तसिद्ध्यभाववत्त्वं तत्कालावच्छेदेन तत्पु-
रुषं प्रति पक्षव्यवहारनिमित्तमिति भावः । ननु सिषाधयिषाविरह-
विशिष्टप्रत्यक्षादिसामग्र्यभावस्य पृथगपि हेतुत्वं दुर्घटं पुमन्तराव-
च्छेदेनानुमित्साविरहविशिष्टायाः प्रत्यक्षसामग्र्याः सत्त्वदशाया-
मनुमित्सासत्त्वेऽनुमित्यपलापापत्तेः । न चानुमित्साकालीनात्यन्तमे-
व सामग्रीविशेषणम् । तथासति पुमन्तरेऽनुमित्सादशायां तद्विधुर-
स्यापि पुंसः प्रत्यक्षसामग्रीसत्त्वेऽप्यनुमित्यापत्तेः अतः पुरुषविशे-
षान्तर्भावेण सामग्र्यभावहेतुत्वं निर्वक्ति एकस्येत्यादिना । तद्विर-
हिणः अनुमित्साविरहिणः । तत्पुरुषीयेत्यादि । अत्र तत्पुरुषीयत्वं
तत्पुरुषावच्छिन्नत्वं तदप्यनुमित्साविरहस्यैव विशेषणं तेन तत्पुरुषा-
वच्छेदेनानुमित्साविरहकालीनो यस्तत्पुरुषीयप्रत्यक्षसामग्रीविशेष-
स्तद्विरहः पर्य्यवस्यति । यथाश्रुते तत्पुरुषीयत्वस्यानुमित्साविशेषण-

द्धिसामग्रीविशेषविरहोऽनन्यगतिकत्वेन हेतुरुपेतव्य इति वदन्ति।

त्वे तत्पुरुषीयानुमित्सादृशायामपि घटावच्छेदेन तदभावसत्त्वात्तदानीन्तनप्रत्यक्षसामग्र्या अपि तदीयानुमितिप्रतिबन्धकत्वापत्तेः। पक्षतायामिवाऽत्राप्यनुमित्साव्यक्तयो विशिष्य निवेश्याः। तेन वस्त्वन्तरस्यापि परामर्शदशायामनुमितित्वादिप्रकारकेच्छासत्त्वेपि सन्निकृष्टस्य वन्ह्यादेर्नानुमितिर्न वा वन्हेरनुमित्साप्रत्यक्षेच्छयोः सत्त्वदशायामुभयसामग्रीसमवधानेऽनुमितिसत्त्वानुमित्साव्यक्तेरुत्तेजककोटावप्रवेशात्। प्रत्यक्षबुभुत्साविरहविशिष्टाया एवानुमित्सायाः उत्तेजकत्वाददोष इत्यपि वदन्ति। सिद्धिसामग्रीमात्रस्याप्रतिबन्धकत्वादुक्तं विशेषेति। तेन प्रत्यक्षात्मकसिद्धिसामग्रीलाभः। यद्यपि सिद्ध्यात्मकप्रत्यक्षस्यापि सामग्रीमात्रं न प्रतिबन्धकं प्रसिद्धसाध्यकस्थले सर्वत्रैव साध्यवत्त्वोपनीतभानसामग्रीसम्भवात्। यापि लौकिकप्रत्यक्षसामग्री तथा, वंशे सर्पत्वव्याप्यवत्तानिश्चयदशायां मण्डूकवसाञ्जनादिबलात् सर्पत्वाद्यलौकिकप्रत्यक्षानुत्पत्तिप्रसङ्गात्। तथापि साक्षात्कारत्वनिरूपितसाध्यनिष्ठप्रकारताकप्रत्यक्षसामग्री प्रवेश्या। तादृशी च प्रकारता लौकिक इव दोषविशेषजन्येपि साध्यस्य प्रत्यक्षे वर्त्तत एव उभयत्रैव सर्पं साक्षात्करोमीत्यनुभवादित्यन्यत्र विस्तृतम्। न चैवं साध्यस्य निर्विकल्पकसामग्र्याः प्रतिबन्धकत्वं न स्यात्, इष्टत्वात् तस्याः पृथक् प्रतिबन्धकत्वोपगमेपि क्षत्यभावाच्च। अनन्यगतिकत्वेति। न चैवं तत्पक्षसाध्यकानुमितिं प्रत्यनुमित्साविरहविशेषितेन तद्धर्मिकसाक्षात्कारत्वनिरूपिततत्प्रकारताकत्वेनैव विरोधित्वं तथा च तदभावस्य कार्यसहभावेन हेतुत्वादेव न तद्धर्मत्वप्रत्यक्षोत्पत्तिकाले तादृशानुमितिरित्यन्यथा गतिरस्त्येवेति वाच्यम्। यत्र पर्वतत्वसामानाधिकरण्येन वन्हिमत्ताप्रत्यक्षोत्पादः तत्रोत्तरकालं पर्वतत्वावच्छेदेनापि वन्ह्यनुमितेरनुत्पादप्रसङ्गात्। न च पर्वतत्वावच्छेदेन वन्ह्यादिसाक्षात्कारत्वेनैव विरोधित्वमिति वाच्यम्। तथासति पर्वतत्वसामानाधिकरण्येन साध्यवत्ताप्रत्यक्षसामग्रीसत्त्वेप्यनुमित्यापत्तेः। व-

अथ सिद्ध्युत्तरानुमितौ सिषाधयिषा हेतुरस्तु । न चैवं मण्यादि-स्थलीयदाहं प्रत्युत्तेजकस्य हेतुत्वापत्तिः, उत्तेजकानामननुगतत्वात् । तावदभावविशिष्टमण्याद्यभावस्य चानुगतत्वादिति चेत् । इहापि दर्शितोऽननुगमः । सिषाधयिषायाः सिद्ध्युत्तरानुमितित्वस्यानुगतानौपसक्तं दुर्वचम्, सिद्धिस्थितिकालीनां स्वेतरसिद्धि-

---

स्तुतो यत्रानुमित्सानन्तरं साध्यतद्धर्म्याप्यवत्त्वयोः प्रात्यक्षिकपक्षधर्मिकनिश्चयादनुमितिस्तत्र कार्योत्पत्तिकाले अनुमित्साविरहविशिष्टसाध्यवत्ताप्रत्यक्षाभावस्यासत्त्वात्तत्कार्यसहभावेन तदभावस्य हेतुत्वं दुर्घटमेवेति ध्येयम् । अननुगतत्वादिति । मणिमन्त्रौषधीनामुत्तेजकत्वस्यैकस्याभावादिति भावः । इहापि अनुमितिस्थलेपि । दर्शित इति । अनुमिनुयां प्रत्यक्षादिभिन्नं ज्ञानं जायतामित्यादिनानाविधेच्छाया उत्तेजकत्वस्य प्रदर्शितत्वादिति भावः । ननु यत्पक्षकयत्साध्यकानुमितिस्थले सिद्धिदशायामेकविधैवानुमित्सा तत्र तस्यास्तादृश्येण हेतुतायामनुगम एव सिद्धिदशायां यद्यदनुमित्सासत्त्वेऽनुमितिस्तत्तदनुमित्साविरहकूटत्वावच्छिन्नाभावत्वेनैवानुगतरूपेण वा सिद्धयुत्तरानुमितिसामान्ये हेतुत्वं वाच्यमत आह सिद्ध्युत्तरेति । सिद्धिसामान्याव्यवहितोत्तरत्वमप्रसिद्धं तत्तत्सिद्ध्युत्तरानुमितित्वमननुगतं सिद्ध्युत्तरत्वमात्रं चातिप्रसक्तमिति भावः । सिद्धिस्थितिकालीनामिति । स्ववृत्तिप्रागभावप्रतियोगित्वकालिकोभयसम्बन्धेन सिद्धिविशिष्टामित्यर्थः । प्रागभावासत्त्वमतेप्याह स्वेतरेति । स्ववृत्तिभेदप्रतियोगित्वकालिकोभयसम्बन्धेन सिद्धिविशिष्टामित्यर्थः । तेन स्वत्वानुगमेप्यदोषः । विनापीति । सिद्धिनाशकालोत्पन्नानुमितीनां सिद्धिस्थितिकालीनत्वाभावेनानुमित्सायास्तत्राप्रयोजकत्वादिति भावः । ननु तदानीमपि कस्य चित्सिद्धिसत्त्वेन सिद्धिनाशकालोत्पन्नानुमितेरपि स्वेतरसिद्धिकालोत्पत्तिकत्वमेवेत्यनुमित्सां विना तस्याः कथमुत्पादः स्यादत आह एकस्येति । अनुत्पादेति । तदनुमितेरप्यन्यदीयसिद्ध्युत्तरोत्पत्तिकत्वेनानुमि-

कालीनां वानुमितिं प्रति हेतुत्वकल्पने च विनापि सिषाधयिषां सिद्धिनाशकालेऽनुमित्युत्पादो दुर्वारः। एकस्य च पुंसः सिद्धिसत्त्वेऽन्यस्य सिषाधयिषाशून्यस्यानुमित्यनुत्पादप्रसङ्गः तत्तत्पुरुषीयतादृशानुमितिं प्रति सिषाधयिषाया हेतुत्वेऽनन्तकार्य्यकारणभावप्रसङ्गः। अपि च सिद्धौ सत्यां विनापि सिषाधयिषां सामान्यसामग्रीतोऽनुमितिसामान्योत्पत्तिप्रसङ्गात्। न हीदृशविशेषसामग्रीं विना सामान्यसामग्र्या अनुमितिजनकत्वं नास्ति, न चान्यत्रापि तद्विशेषसामग्र्यन्तरमस्तीति। तत्कल्पने चातिगौरव-

---

स्साप्रयोज्यत्वादिति भावः। अनन्तेति। तत्पुरुषीयखेतरसिद्धिकालीनतत्पुरुषीयानुमितिं प्रति तत्पुरुषीयानुमित्साया इव तत्पुरुषीयानुमितिसामान्यं प्रत्यपि विनश्यदवस्थिततदीयतत्तत्सिद्ध्यभावत्वरूपेण हेतुत्वस्यावश्यकतया पृथक्पुरुषीयानुमितिस्थल एवानन्तहेतुहेतुमद्भावप्रसङ्ग इत्यर्थः। तेन सिद्धिनाशदशायामपि तस्यानुमित्युत्पादस्यानुद्धारान्न्यूनत्वमित्यपास्तम्। ननु सिद्ध्यव्यवहितोत्तरानुमितित्वावच्छिन्नं प्रत्येव सिषाधयिषायाः कारणत्वं वाच्यं तदव्यवहितोत्तरत्वं च स्ववृत्तिप्रागभावप्रतियोगित्वसामानाधिकरण्योभयसम्बन्धेन सिद्धिविशिष्टायाः कृतेः सामानाधिकरण्यरूपं ग्राह्यमतो नोक्तदोषावकाश इत्यत आह अपि चेति। सामान्यसामग्रीत इति। सिद्ध्यभावस्थलीयानुमितौ क्लृप्तहेतुताकपरामर्शाद्यात्मककारणस्तोमादित्यर्थः। ननु विशेषसामग्रीसहिताया एव सामान्यसामग्र्याः कार्यजनकत्वात् प्रकृते चानुमित्सा[परामर्शमात्रादप्यनुमित्युदयात् तथा चोक्तनियमाभावात्सिद्धया]त्मकविशेषसामग्रीविरहात्कुतोनुमित्यापत्तिरत आह न हीति। ईदृशेति। अनुमित्साघटितेत्यर्थः। नास्तीति। विनानुमित्सां परामर्शमात्रादप्यनुमित्युदयात्। तथा चोक्तनियमाभावात् सिद्ध्यभावस्थेव सिद्धिस्थलेऽपि विशेषसामग्रीं विनैव सामान्यसामग्रीमात्रादनुमितिः स्यादेवेति भावः। अन्यत्र सिद्ध्यनुत्तरानुमितौ। ननु सिद्ध्युत्तरानु-

म । इह जायमाना सा सिद्ध्युत्तरैव स्यात् सा च न जायते कारणाभावादिति चेत् । समाजनिष्ठानुमितिसामान्यन्तु स्यादेव,

---

मितावनुमित्साया इव तदनुत्तरानुमितावपि सिद्धिसामान्याभावस्य हेतुत्वं वाच्यं तथा च परामर्शादिसामान्यसामग्रीसत्त्वेपि सिद्धिदशायां निरुक्तविशेषसामग्रीविरहादेव नानुमितिरत आह तदिति। सिद्ध्यनुत्तरानुमितौ सिद्ध्यभावरूपसामग्र्यन्तरकल्पने चेत्यर्थः । अतिगौरवमिति । विशेषसामग्र्यंशकल्पनामपेक्ष्यानुमितिसामान्ये एकस्यैव विशिष्टसिद्ध्यभावस्य हेतुत्वे लाघवादिति भावः। न च सिद्ध्यनुत्तरवर्त्तितत्तदनुमितिव्यक्तिष्वव्यवश्यं तत्तत्परामर्शादिव्यक्तेर्विशिष्य हेतुत्वमुपेयम् अन्यथा परामर्शादेः सामान्यकारणस्याविशिष्टत्वात्तत्रैकानुमित्युत्पत्तदशायां भाव्यनुमित्यन्तरापत्तेः । तथा च तत्तत्परामर्शाद्यात्मकविशेषसामग्रीविरहादेव सिद्धिदशायामनुमित्यापत्त्यसम्भव इति वाच्यम् । यत्र क्रमेण सिद्धिपरामर्शसिद्धिनाशानुमितयस्तत्रत्यायां चानुमितिव्यक्तेः सिद्धिनाशोत्पाददशायामापादनीयत्वात्तत्तद्व्यक्तिहेतोः परामर्शस्य प्रागपि सत्त्वात्। न च तथाविधानुमितिव्यक्तिषु तत्तत्सिद्धिनाशक्षणस्य तत्क्षणोत्पन्नज्ञानादेर्वा विशिष्य हेतुत्वकल्पनात्तदभावादेव न तादृशानुमितिरिति वाच्यम् । क्षणादीनां विशिष्य हेतुतायामन्यथासिद्धत्वात् । अन्यथा सर्वत्रैव तत्तत्क्षणसम्बन्धानां विशिष्य हेतुतयैव सामञ्जस्ये विशेषतः कारणान्तरस्य क्वापि कल्पनं न स्यात् अनन्ततत्तत्क्षणव्यक्तीनां तत्रोत्पन्नज्ञानादीनां वा विशेषतो हेतुत्वकल्पनामपेक्ष्य विशिष्टसिद्ध्यभावस्यैकस्यैवानुमितिसामान्यहेतुत्वकल्पनाया एव लाघवेनौचित्यादिति भावः । नव्यास्तु तत्तदनुमित्साविरहविशिष्टसिद्ध्यभावत्वेन हेतुतायां तत्तदनुमित्साविरहाणां विशेष्यविशेषणभावेन गुरुत्वादनन्तत्वाच्च तदपेक्षया यादृशयादृशेच्छासत्त्वे सिद्धिसत्त्वेऽनुमितिस्तादृशतादृशेच्छात्वेन सिद्ध्यनुत्तरानुमितिं प्रति च सिद्धिसामान्याभावत्वेन कारणत्वकल्पनैव लघीयसीति प्राहुः । तन्चिन्त्यम् । शङ्कते इहेति । सिद्धिस्थल इत्यर्थः । सा अनुमितिः । तत्कारणस्येत्य-

कार्य्योत्पादविरहस्य विना कारणाभावमसम्भवात् करणव्यापारत्वेनावश्यककारणभावस्य परामर्शस्य कारणतावच्छेदिका पक्षता न कारणमिति तु भ्रमः प्रतिबन्धकान्ताभाववदन्वयव्यतिरेकशालित्वेन हेतुत्वात् । अन्यथा यथासम्भवं निमित्तकारणस्य समवा-

---

स्यानुमित्सात्मकेत्यादिः । सा सिदध्युत्तरत्वावच्छिन्नानुमितिः । प्रगल्भमतं निरस्यंति कारणेत्यादिना । ननु पक्षतावशिष्टपरामर्शत्वेन परामर्शविशिष्टपक्षतात्वेनापि विनिगमकाभावेन हेतुत्वापत्त्या द्वयोरेव लाघवात्स्वातन्त्र्येण हेतुत्वमत उक्तं कारणेति । तथा चानुमितिकारणस्य व्याप्तिधियः सव्यापारत्वनियमाद्व्याप्तावविधयैव परामर्शस्य हेतुत्वमावश्यकं पक्षतायास्तु व्यापारत्वासम्भवात्तदनुरोधेनापि न हेतुत्वमित्यत्र स्फुटं विनिगमकमिति भावः । न च स्वमते मनस एवानुमितिकरणत्वात्तत्संयोग एव जन्यमात्रे व्यापार इत्यनुमितौ पक्षतावशिष्टपरामर्शस्यैव परामर्शविशिष्टनिरुक्तसिद्ध्यभावत्वेन पक्षताया अपि हेतुतायां विनिगमकाभाव एवेति वाच्यम् । परामर्शविशिष्टपक्षताया हेतुत्वस्य दुर्वचत्वात् । तत्र हि परामर्शो न सिद्धिविशेषणं तथासति परामर्शविशिष्टाया निरुक्तसिद्धेरभावत्वेन हेतुत्वे परामर्शशून्यस्यापि पुंसोनुमित्यापत्तेः । तस्यापि परामर्शविशिष्टसिद्धेरभाववत्त्वात् । न च परामर्शविशिष्टो यो निरुक्तसिद्ध्यभावस्तत्त्वेन हेतुत्वं मिथो वैशिष्ट्यापन्नयोः सिद्धिपरामर्शयोरभावांशे विशेषणीभूयावच्छेदकत्वाभावाद्व्यासज्यवृत्त्यवच्छेदकत्वानङ्गीकारात् । अन्यथा निरुक्तसिद्ध्यभावत्वपरामर्शयोरेव व्यासज्यवृत्त्यवच्छेदकत्वेन सामञ्जस्ये तयोर्विशेष्यविशेषणभावे विनिगमनाविरहोद्भावनस्योन्मत्तप्रलपितत्वापत्तेः । पक्षतावशिष्टपरामर्शस्य तु वैशिष्ट्यापन्नस्य वावच्छेदकतया तादृप्येण हेतुतायां बाधकाभावादिति ध्येयम् । प्रतिबन्धकान्तरं बाधनिश्चयादेः । ननु कारणतावच्छेदकविशिष्टसत्त्वस्यैव कार्योत्पत्तिनियामकत्वात् तत्रैवान्वयव्यतिरेकावुपक्षीणावत आह अन्यथेति । अन्वयादिसत्त्वेप्यहेतुत्वे इत्यर्थः । ध्वंसादिकार्यस्य समवायिकारणत्वाप्रसिद्ध्या तन्निमित्तकारणस्य तदव-

यिकारणत्वाद्यवच्छेदकत्वप्रसङ्गात्। अथानुमितिसाधारणसिद्धेः प्रतिबन्धकत्वे तदभावस्य मण्याद्यभाववत् प्रतिबन्धकाभावत्वेन कार्य्यकालवृत्तेरेव हेतुत्वात् अनुमितिकाले च तदसम्भवात् सा नोत्पद्येतेति चेन्न। यस्य मण्याद्यभावादेः कार्य्यसमकालतयान्वयव्य-

---

च्छेदकत्वासम्भवादाह यथासम्भवमिति। समवायिकारणादित्यादिनाऽसमवायिकारणत्वस्योपग्रहः। तथा च घटादिकार्यस्य प्रतिनियतदेशत्वरक्षायै तत्तत्कपालद्वयसंयोगादेर्घटहेतुत्वमावश्यकमिति तत्रैव दण्डत्वादिकमवच्छेदकं स्यादित्यर्थः। कारणत्वे बाधकसत्त्वात्कारणतावच्छेदिकैव पक्षतेत्यभिप्रायेण साध्यसन्देहः सिषाधयिषैव वा पक्षतेत्याशयेनाशङ्कते अथेति। कार्यकालवृत्तेरेवेति। अन्यथा पूर्वकाले मण्याद्यभावसत्त्वान्मण्युत्पत्तिकालेपि दाहापत्तिरिति भावः। प्राचां मतेन इदम्। स्वमते तु मण्याद्युत्पत्तिदशायां मणिसामग्न्याः प्रतिबन्धकत्वादेव न दाहः। अन्यथा संयोगेन मण्यभावस्य मण्युत्पत्तिदशायामपि सत्त्वात्तस्य कार्यसहभावेन हेतुत्वोपगमेप्यप्रतीकारादिति ध्येयम्। न च कार्यसहवर्त्तित्वस्य कारणतावच्छेदकत्वे तदवच्छिन्नस्य चेत्प्रतिबन्धकाभावस्य पूर्वसत्त्वमपेक्षितं तदा सत्यपि मण्यभावे दाहादिकार्यं न स्यात् पूर्वकाले दाहाद्युपहितस्य तस्याभावात् कार्यसहवर्त्तित्वोपलक्षितस्य पूर्वसत्त्वापेक्षणे मण्याद्युत्पत्तिदशायामपि दाहादिकार्यप्रसङ्गः कदा चिद्दाहादिसहवर्त्तित्व एव मण्याद्यभावस्य मण्याद्युत्पत्तेः पूर्वं सत्त्वादिति वाच्यम्। कार्यसहवर्त्तित्वस्य कारणतानवच्छेदकत्वात्। मण्याद्यभावत्वेनैव हेतुत्वात् प्रतिबन्धकाद्यभावविशेषितेन स्वाव्यवहितोत्तरक्षणत्वादिसम्बन्धेनैव सामग्न्याः कार्योत्पत्तिव्याप्यत्वान्न प्रतिबन्धकोत्पत्तिकाले कार्योत्पत्तिप्रसङ्गः। समवायिकारणस्यापीत्थमेव कार्यसहभावेन हेतुत्वं विवेचनीयमिति दिक्। तत्तद्देशीयतत्तद्दाहादिकं प्रति तत्तद्दाहाद्युत्पत्तिकालावच्छेदेन तत्तद्देशवर्त्तिमण्याद्यभावत्वेन हेतुत्वं कारणतावच्छेदकस्य पूर्वसत्त्वानपेक्षणाच्च तत्तद्दाहोत्पत्तेरसत्त्वेपि न क्षतिरित्यनयैव दिशा स-

तिरेकित्वं तस्यैव तथात्वेन हेतुत्वं न तु सर्वस्य गौरवात् । अन्यथा समवायिकारणस्य कार्य्यसहभूतस्यैव हेतुत्वात् कारणमात्रस्य तथात्वप्रसक्तौ प्राभाकरा एव विजयेरन्निति । प्राभाकरास्तु विनाप्यनुमित्सां क्व चित् परामर्शानुमितिप्रवाहस्याविरललग्नस्यानुभविकत्वात् कालभेदकल्पनायाञ्च मानाभावात् मानाभावाच्च पक्षता नानुमितिहेतुः परार्थानुमाने तु सिद्धसाधनमर्थान्तरविधया दूषणमित्याहुः ॥

मवायादिकारणस्यापि हेतुत्वं निरूपणीयमित्यपि वदन्ति । तदसम्भवादिति । निरुक्तसिद्ध्यभावस्यासम्भवादित्यर्थः । सा अनुमितिः । तथात्वेन कार्यकालवृत्तित्वेन । सर्वस्येति । तथात्वेन हेतुत्वमित्यन्वयः । ननु प्रतिबन्धकाभावस्य तादृप्येण हेतुताऽप्यप्यत्वाद्गौरवं प्रामाणिकमत आह अन्यथेति । सहभूतस्यैवेति । अन्यथा घटादेर्नाशोत्पत्तिदशायामप्यन्यदीयकर्मणा तत्र संयोगाद्युत्पत्तौ क्षणिककार्यस्वीकारापत्तिरिति भावः । तथात्वप्रसक्तौ कार्यसहभावेन हेतुत्वप्रसक्तौ । विजयेरन्निति । प्राभाकरैः कारणमात्रस्यैव कार्यसहभावेन हेतुत्वस्वीकारात् । अन्यथा कार्यकाले सतोपि प्रतियोगिनः पूर्ववर्त्तित्वमात्रेणैव हेतुत्वसम्भवात्तेषामप्यतिरिक्तध्वंसकल्पनापत्तेरिति भावः । एकपरामर्शादनुमितिद्वयोत्पादेपि प्रवाहासम्भवादाह क्व चिदिति । तथा च यत्र पूर्वपूर्वानुमितिदशायां परामर्शान्तरस्य सामग्रीसम्भवस्तत्रैव परामर्शानुमित्योः प्रवाहसम्भव इति भावः । आनुभविकत्वादिति । पक्षता नानुमितिहेतुरित्यग्रेन्वयः । ननूक्तस्थले क्रमिको नानुमितिप्रवाहः किं त्वेकानुमितिनाशोत्तरमपरानुमित्युत्पत्त्यैव स इत्यत आह कालभेदेति । ननु यत्र विषये क्रमेणानुमितिप्रवाहो नानुभवसिद्धस्तत्साध्यकानुमितावेव पक्षता हेतुरस्त्वित्यत आह मानाभावाच्चेति । ननु सिद्धेरनुमित्यविरोधित्वे परार्थानुमानस्थले तदुद्भावनं न स्यात् प्रमाणादोषत्वादत आह परार्थेति । अर्थान्तरेति । तथा च निश्चिते वस्तुनि जिज्ञासाविरहादनाकाङ्क्षिताभिधानेन पुरुषदोषतयैव तदुद्भावनं न तु प्रमाणदोषतयेति भावः ।

अत्रेदमालोचनीयम् । समानविषयकप्रत्यक्षसामग्रीदशायामनुमित्यनुत्पादाद्वन्ह्यादिप्रत्यक्षजनकतत्तदसाधारणकारणव्यक्तीनामेव वन्ह्याद्यनुमितिविरोधित्वं वाच्यं कालादिसाधारणसामग्न्यास्तथात्वे गौरवात् तथा च वन्हिचक्षुःसंयोगादिव्यक्तीनामिव वन्ह्याद्यात्मकविशेषणाद्यवगाहितया वह्निमत्ताप्रत्यक्षहेतूनां पर्वतो वह्निमानित्यादिसिद्धिव्यक्तीनामपि तादृशानुमितिविरोधित्वमावश्यकं विनिगमकाभावात् एवं च तत्रैव पर्वतो वन्हिमानित्याकारकनिश्चयत्वेनैवानुगतरूपेण तत्तत्सिद्धिव्यक्तीनां तादृशानुमितिविरोधित्वं कल्प्यते लाघवात् न तु तत्तत्सिद्धिव्यक्तित्वेन, गौरवादित्यवश्यं पक्षतानुमितिहेतुः। न चैवमतिलाघवेन साध्यनिश्चयत्वमपेक्ष्य साध्यवत्ताज्ञानत्वेन विरोधित्वमस्तु पक्षे साध्यसन्देहानन्तरं तत्र साध्यवत्तानुमितेरानुभविकतया निश्चयत्वप्रवेशस्य प्रामाणिकत्वे तु सिद्धिसत्त्वे प्रत्यक्षसामग्रीदशायामनुमित्यनुत्पत्तेरनुभवसिद्धतया प्रत्यक्षसामग्न्यन्तर्गततत्तत्सिद्धिव्यक्तित्वेनैव गुर्वापि प्रतिबन्धकत्वं प्रामाणिकमिति वाच्यम् । साध्यवत्तया पक्षज्ञानत्वेन संशयसाधारणधर्मेण प्रतिबन्धकत्वे भ्रमत्वनिश्चयत्वस्योत्तेजकत्वापत्तिगौरवात्तदपेक्ष्य भ्रमत्वज्ञानानास्कन्दितसाध्यवत्तानिश्चयत्वेन प्रतिबन्धकतायामेव विपरीतलाघवात् । किं च सिद्धिकालीनेषु साध्यव्याप्यवत्तापरामर्शसहस्रेषु व्याप्यत्वाद्यंशे भ्रमत्वादिज्ञानदशायां न साध्यानुमितिस्तत्र तादृशानुमितिं प्रति विशेषतस्तत्तद्भ्रमत्वज्ञानत्वेनानन्तप्रतिबन्धकत्वकल्पने गौरवात् पक्षधर्मिकसाध्यवत्तानिश्चयत्वेनैवानुगतरूपेण तत्तत्सिद्धिव्यक्तीनां विरोधित्वं कल्प्यते लाघवात् भ्रमत्वज्ञानानामनुगतरूपेण विरोधित्वासम्भवस्य बहुशोन्यत्र प्रतिपादितत्वात् । एवं च सत्यामनुमित्सायां सिद्धिसत्त्वेप्यनुमित्युत्पादस्य परेषामप्यानुभविकत्वादनुमित्सायास्तत्रोत्तेजकत्वमपीत्यवश्यं पक्षतानुमितिहेतुः । न च वह्नेः सिद्ध्यात्मकपरामर्शसहस्रमेव यत्र दण्डो रक्त इत्यादिविशेषणतावच्छेदकप्रकारकं रक्तत्वांशे भ्रमत्वज्ञानास्कंदितं वृत्तं तत्रोत्तरकालं रक्तत्वादिविशिष्टवैशिष्ट्यस्य प्रत्यक्षादेर्वारणार्थं तत्तद्भ्रमत्वज्ञानव्यक्तीनां तादृशविशिष्टवैशिष्ट्यावगाहिज्ञानप्रतिबन्धकत्वकल्पनायां तवापि गौरवमस्माकं तु सिद्धेरविरोधित्वात्तत्र वन्ह्यनुमितेरेवोत्पादेनान्यत्र कृतेन भिन्नविषयकानुमितिसामग्र्याः प्रति बन्धकत्वेनैव तत्र

रक्तत्वविशिष्टवैशिष्ट्यप्रत्यक्षमिति वाच्यम् । यत्साध्यकसिद्धिपरामर्शदशायां न वस्त्वन्तरेपि कदापि भ्रमत्वाद्यासञ्जनं तत्रैवोक्तक्रमेण पक्षताया हेतुत्वव्यवस्थापनादित्याहुः। यत्तु पक्षताया अनुमित्यहेतुत्वे सिद्धयात्मकपरामर्शदशायां भिन्नविषयकप्रत्यक्षबुभुत्सासत्त्वेऽनुमितेर्वारणाय तत्तद्बुभुत्सायामनुमिति विरोधित्वकल्पने गौरवं स्यादतः पक्षता हेतुरिति । तत्तुच्छम् । पक्षतायाः कारणत्वे तत्तदनुमित्साविरहकूटविशिष्टसिद्धित्वेन प्रतिबन्धकतायामेव तत्तदनुमित्साविरहव्यक्तीनां विशेष्यविशेषणभावव्यत्यासेनानन्तविरोधित्वकल्पनाया विपरीतगौरवात् । अत एव पक्षताया अनुमित्यहेतुत्वे कथितस्थल एव भिन्नविषयकप्रत्यक्षादेरुत्पत्तये तत्तद्बुभुत्साविरहविशिष्टानुमितिसामग्रीत्वेनैव तादृशप्रत्यक्षादौ प्रतिबन्धकत्वं कल्प्यमिति तत्र बुभुत्साव्यक्तीनामुत्तेजकत्वकल्पने गौरवं स्यादित्यपि प्रत्युक्तम् । भिन्नविषयकप्रत्यक्षादिकं प्रति तत्तद्बुभुत्साविरहविशिष्टपरामर्शत्वेन विरोधित्वमपेक्ष्य निरुक्तपक्षताविशिष्टपरामर्शत्वपर्यवसितेनानुमितिसामग्रीत्वेन विरोधित्वकल्पनायामेव गौरवात् । यदपि सिद्धेरनुमित्यविरोधित्वे पर्वतो वन्हिव्याप्यवानित्यनुमितेः साक्षात्कारो न स्यात् तस्या एव भिन्नविषयकानुमितिसामग्रीत्वेन प्रत्यक्षविरोधित्वादिति । तदपि तुच्छम् । पर्वतो वन्हिमान् वन्हिव्याप्यवांश्चेत्याद्यनुमितेरिवोक्तानुमितेरप्यसाक्षात्कारेपीष्टापत्तौ क्षतिविरहादित्यास्तां विस्तरः ॥

इति श्रीजगदीशतर्कालङ्कारविरचिता
पक्षतासिद्धान्तटीका
समाप्ता ।
समाप्तः पक्षताग्रन्थः ।

चिन्तामणेः परामर्शः ।

पक्षधर्मस्य व्याप्तिविशिष्टज्ञानमनुमितिहेतुः । ननु व्याप्यत्वावच्छेदकप्रकारेण व्याप्तिस्मरणं पक्षधर्म्मताज्ञानं तथा लाघवात् परामर्शहेतुत्वेनावश्यकत्वाच्च एवच्च

दीधित्याः परामर्शः ।

लक्षणोपोद्घातेन विशिष्टज्ञानस्य कारणत्वं व्यवस्थापयति पक्षेत्यादि । व्याप्तिस्मरणेति । स्मरणत्वमविवक्षितम्, अव्यापकत्वात् । लाघवात् प्रथमोपस्थितत्वलाघवात् । कल्पनालाघवमाह परामर्शेति । परामर्शहेतुत्वादिनाप्यनुमितेः पूर्वं तादृशज्ञानमवश्यं

जागदीश्याः परामर्शः ।

लक्षणेति । व्याप्यपक्षोभयवैशिष्ट्यावगाहिनिश्चयत्वावच्छिन्नकारणत्वगर्भस्यानुमितिलक्षणस्य तादृशनिश्चयत्वेनानुमितिहेतुत्वं विनाऽसम्भवादिति भावः । पक्षधर्मिकव्याप्यवत्तानिश्चयत्वावच्छिन्नहेतुत्वघटितलक्षणस्योपोद्घातस्तु न युक्तः, लिङ्गधर्मिकपरामर्शसम्पादकस्य अथयथातत्त्वेत्याद्यग्रिममूलस्य सन्दर्भविरोधापत्तेः । अविवक्षायां हेतुमाह अव्यापकत्वादिति । यत्र व्याप्त्यनुभवादेवानुमि-

धूमो वह्निव्याप्यो धूमवांश्चायमिति ज्ञानद्वयादेवानुमिति-
रस्तु । न चानुमिति प्रति व्याप्यत्वज्ञानमेव हेतुर्लाघ-

वन्तव्यं तथा चातिरिक्तधर्मिणस्तत्रानन्यथासिद्धत्वेनियतपूर्ववर्त्ति-
त्वयोश्च कल्पनामपेक्ष्य उभयवादिसिद्धनियतपूर्ववर्त्तिनोऽनन्यथा-
सिद्धत्वमात्रकल्पना लघीयसीति । ननु धूमत्वावच्छेदेन व्याप्तेरा-
लोकत्वेन च पक्षधर्म्मतायाः ग्रहेऽप्यनुमितिः स्यादित्यत आह ए-
वमिति । यद्धर्म्मावच्छेदेन व्याप्तिज्ञानं तेनैव रूपेण पक्षधर्म्मताज्ञानं
हेतुरिति नातिप्रसङ्गः । ज्ञानद्वयादिति द्वित्वमविवक्षितम् । लाघ-

---

वमित्यत्रैव व्याप्तिस्मरणस्यासत्त्वादिति भावः । अवच्छेदकलाघव-
स्यासम्भवादाह प्रथमेति । यद्यपि प्रथमोत्पन्नस्यापि व्याप्तिज्ञानद्व-
यस्य क चिच्चरममुपस्थितिश्चरमोत्पन्नस्यापि विशिष्टज्ञानस्य क
चित्प्रथममुपस्थितिस्तु सम्भवतीत्यकिञ्चित्करमेव कारणतायां का-
चित्कं प्रथमोपस्थितित्वम् । तथाप्येतदक्षरसेनैव मूलोक्तकल्पनाला-
घवं वाच्यमित्याशयः । ननु ज्ञानद्वयं न परामर्शहेतुः पक्षधर्मताज्ञान-
स्य सर्वत्राऽतथात्वात् तथा च परामर्शहेतुत्वेनेत्यादिमूलासङ्गतिरतो
भावार्थमाह परामर्शहेतुत्वेत्यादि । तादृशज्ञानं व्याप्यतावच्छेदकप्र-
कारेण व्याप्तेः पक्षधर्मतायाश्च ज्ञानम् । कल्पनालाघवं व्याकरोति
तथा चेति । अतिरिक्तस्य विशिष्टज्ञानरूपस्य धर्मिण इति । कल्पना-
मपेक्ष्येति शेषः । आलोकत्वेनेति । पक्षधर्मताग्रहस्य व्याप्यतावच्-
छेदकप्रकारकत्वसम्पत्तये द्वयत्वादेः परित्यागः । यद्धर्मावच्छेदे-
नेति । न च येन रूपेण व्याप्तिज्ञानमित्येव सम्यक् कृतमवच्छेदक-
त्वप्रवेशेनेति वाच्यम् । यत्र धूमत्वसामानाधिकरण्येन व्यभिचारस्य
व्याप्तेश्च ग्रहोत्तरं धूमत्वेन पक्षधर्मताधीस्तत्राप्यनुमितिप्रसङ्गात् ।
अवच्छेदकत्वप्रवेशे तु धूमत्वसामानाधिकरण्येन व्यभिचारग्रहे त-

वात् उपजीव्यत्वाच्चेति वाच्यम्। तस्यानुमितेः पूर्वमसिद्धौ

वात् अवच्छेदकलाघवात् । आवश्यकत्वात् व्याप्यतावच्छेदकप्रकारकव्याप्तिज्ञानस्य हेतुत्वे व्याप्तिज्ञानहेतुतायां आवश्यकत्वात् । क चिदुपजीव्यत्वादिति पाठः । उपजीव्यत्वञ्च व्याप्तिज्ञानं विना यद्धर्म्मावच्छेदेन व्याप्तिज्ञानं तत्प्रकारकपक्षधर्म्मताज्ञानस्यासम्भवात् । एवञ्च सिद्धे व्याप्तिज्ञाने हेतावतिप्रसङ्गभङ्गाय पक्षधर्म्मताविषयत्वमवच्छेदकं कल्प्यते लाघवात् न तु कारणान्तरं गौरवादिति भावः । सिद्धस्य व्याप्तिज्ञानस्य न पक्षधर्म्मताविषयत्वमित्याशयेनाह तस्येति । यद्वा व्याप्यत्वज्ञानमिति व्याप्यत्वप्रकारकं पक्षधर्म्मताज्ञानमित्यर्थः । ननु विशिष्टज्ञानान्यथानुपपत्त्या

दवच्छेदेन व्याप्तिग्रहानुत्पत्त्यैवाऽनुमित्यसम्भवादिति भावः । तेनैव रूपेणेति । धूमत्वावच्छेदेन व्याप्तिनिश्चयदशायां नीलधूमत्वादिप्रकारेण पक्षधर्मताग्रहादनुमितेरुत्पादात्तदवच्छेदेनेत्यस्य परित्यागः । वन्हिव्याप्यो धूमो धूमवांश्च पर्वत इत्येकज्ञानादप्यनुमितेः परैरङ्गीकारादाह द्वित्वमिति । कल्पनालाघवस्यासम्भवादाह अवच्छेदकेति । व्याप्यतावच्छेदकप्रकारकव्याप्तिज्ञानत्वमपेक्ष्य व्याप्तिज्ञानत्वस्यावच्छेदकस्य शरीरलाघवादित्यर्थः । असम्भवादिति । तथा च स्वनियततादृशज्ञानसत्ताकत्वमेव व्याप्तिज्ञानस्य तादृशज्ञानोपजीव्यत्वमिति भावः । नन्वेतावता व्याप्तिज्ञानस्यानुमितिहेतुत्वप्राप्तावपि परामर्शस्य किमायातमत आह एवं चेति । अतिप्रसङ्गभङ्गायेति । व्याप्तिज्ञानमात्रादनुमित्युत्पत्तिवारणायेत्यर्थः । कारणान्तरमिति । गृह्यमाणव्याप्यतावच्छेदकताकधर्मप्रकारकपक्षधर्मताज्ञानरूपं कारणमित्यर्थः । अनुमितेः पूर्वं व्याप्तिज्ञानस्य सर्वजनसिद्धत्वात्तस्येत्यादिमूलासङ्गतेराह सिद्धस्येति ।

युगपदुपस्थित्यभावात्। अथ यथा तत्ताविशिष्टस्मरणे सतीन्द्रियसन्निकृष्टे स एवायमित्यभेदप्रत्ययो भवति तथेन्द्रियसन्निकृष्टे धूमे वह्निव्याप्यधूमस्मरणे धूमत्वासाधारणधर्मदर्शनाद्व्याप्योऽयमित्यभेदप्रत्ययः स्यात् साम-

---

ज्ञानद्वयस्यावश्यं वाच्यतया तस्यैव हेतुत्वं युक्तं तदिदमुक्तमावश्यकत्वादिति आह उपजीव्यत्वादिति। विशिष्टज्ञानान्यथानुपपत्त्या तत्कल्पने विशिष्टज्ञानस्योपजीव्यत्वादित्यर्थः। स्वसंवेदनसिद्धमेव ज्ञानद्वयम्, आवश्यकत्वञ्च तस्योभयवादिसिद्धमित्याशयेनाह तस्येति। असिद्धिं परिजिहीर्षुराशङ्क-

---

अनुमितेः पूर्वमुभयवादिसिद्धस्येत्यर्थः। विनैव भावार्थं संमुखत एव परामर्शस्य हेतुताभिप्रायेण व्याचष्टे यद्वेति। व्याप्यत्वप्रकारकेति। मूले व्याप्यत्वज्ञानमित्यत्र व्याप्ये व्याप्यत्वच्छिन्नप्रकारताकपरत्वादिति भावः। नन्विति। यद्यपि पक्षधर्मताग्रहो न विशिष्टपरामर्शमात्रे हेतुः व्यभिचारादतस्तदन्यथानुपपत्त्या न ज्ञानद्वयमावश्यकम्, तथापि धूमवान् पर्वत इत्याकारकपक्षधर्मताज्ञानस्यापि क्वचिद्विशेषणज्ञानविधया परामर्शहेतुत्वात्तदभिप्रायेणेदम्। तस्यैव ज्ञानद्वयस्यैव। उक्तं नन्वित्यादिमूलग्रन्थे। विशिष्टज्ञानेति। तथा च विशिष्टज्ञाने ज्ञानद्वयस्य कल्पकत्वमेवोपजीव्यत्वमिति भावः। ननु परैर्यदि विशिष्टज्ञानान्यथानुपपत्त्यैव ज्ञानद्वयं स्वीकृतं तदा तस्येत्यादिदोषासङ्गतिः अनुमितेः पूर्वं तैरपि विशिष्टज्ञानस्याभ्युपेयत्वादाह स्वसंवेदनेति। स्वात्मकं यत्संवेदनं तत्सिद्धं तेन प्रमितम्। तथा च स्वप्रकाशरूपं ज्ञानद्वयमेव तत्र प्रमाणं न तु विशिष्टज्ञानानुपपत्त्या तदभ्युपेयमिति भावः। नन्वेवं परामर्शहेतुत्वेनावश्यकत्वादित्यादि-

ग्रया वृत्तत्वादिति स एवानुमितिहेतुरिति चेत् । ना प्रत्यक्षसामग्रीतोऽनुमितिसामग्रया बलवत्त्वात् अनुमितिरेवोत्पद्यते न तु व्याप्याभेदप्रत्ययः । अन्यथा तत्रापि पराशर्यानन्तरं परामर्शान्तरं तदनुव्यवसायो वा भवेन्न-

---

ते अथेति । अयं पक्षवृत्तिः । हेतुरिति । लाघवादिति शेषः । अनुमितिसामग्रया इति । स्मृतिहेतुतावादिनां नव्यानां नये दूषणमिदम् । न तु संस्कारकारणतावादिनां प्राचामिति ।

ना प्रागुक्तमावश्यकत्वं विरुद्धयेतेत्यत आह आवश्यकत्वं चेति । तथा च न्यायमतानुसारेणैव परामर्शहेतुत्वेनेत्युक्तमिति भावः । असिद्धिमिति । अनुमितेः पूर्वं विशिष्टज्ञानस्यासिद्धिमित्यर्थः । मूले धूमत्वासाधारणधर्मदर्शनं धूमत्वरूपव्याप्यतावच्छेदकधर्मदर्शनम् । तच्च व्याप्तिसंशयनिरासद्वारोपयुक्तम् । अभेदप्रत्यय इति । वस्तुगत्या यो व्याप्यस्याभेदो व्याप्यत्वं तत्प्रत्यय इत्यर्थः । पक्षधर्मांशे व्याप्तिप्रकारकज्ञानस्यैव परामर्शत्वाद्व्याप्याभेदप्रकारकस्याभेदसम्बन्धेन व्याप्यप्रकारकस्य वा ज्ञानस्याऽतथात्वेन यथाश्रुतार्थासङ्गतेरिति ध्येयम् । व्याप्योयमिति ज्ञानस्य पक्षधर्मत्वाविषयकत्वे परामर्शत्वानिर्वाहात् स एवेत्याद्युत्तरग्रन्थासङ्गतिरसिद्धितादवस्थ्यं चातो व्याचष्टे पक्षवृत्तिरिति । पक्षीयो धूम इत्यर्थः । संसर्गमर्यादया पक्षवैशिष्ट्यावगाहिज्ञानस्यैवानुमितिहेतुत्वादिति ध्येयम् । न्यूनतां परिहरति लाघवादिति । अवच्छेदकलाघवादिति तदर्थः । ननु यत्र धूमः पर्वतवृत्तिरितिज्ञानसहकारेण वन्हिव्याप्तिगोचरोद्बुद्धसंस्कारप्रत्यासत्त्या पर्वतवृत्तिधूमो वन्हिव्याप्य इत्याकारकं प्रत्यक्षं तत्रैव पूर्वं व्याप्तिज्ञानाभावेनानुमितिसामग्र्यसम्भवात्परामर्शो न दुर्घट इत्यत आह स्मृतिहेतुतावादिनामिति । संस्कारो

त्वनुमितिः । अथ धूमो वह्निव्याप्य इति स्मरतः पर्वतीयधूमेन्द्रियसन्निकर्षे प्रथमत एव व्याप्तिधूमत्वयोर्वैशिष्ट्यं

अथेत्यादि । अत्र यत्र प्रथमं पक्षाग्रहे गृहीतधूमे स्मृतव्याप्तिवैशिष्ट्यभानमनन्तरञ्च गृहीते पक्षे तादृशविशिष्टधीस्तत्रेत्यपि द्रष्टव्यम् । प्रथमत इति विशिष्टज्ञानात् पूर्वमनुमितिसामग्रीविरहप्रदर्शनाय । एवञ्च सिद्धे पूर्ववर्त्तिनि विशिष्टज्ञाने तस्यैव तत्त्वेन हे-

---

न प्रत्यासत्तिः तथासति विशेषणगोचरानुद्बुद्धसंस्कारादपि तद्विशिष्टप्रत्यक्षापत्तेः, किं तु ज्ञानमेव तथेति नव्यानां मते धूमः पर्वतवृत्तिरितिज्ञानसहकृताद्वह्निव्याप्यो धूम इति स्मरणादेव यदा परामर्शः सम्भावनीयः तदैवानुमितेः सामग्रीसम्भवादनुमितिरेव जायते न पुनः परामर्श इति भावः । मूले पर्वतीयधूम इत्यस्य पर्वतवृत्तितया गृहीतधूम इत्यर्थः । तेन प्रथमं व्याप्तिधूमत्वयोर्द्वयोर्वैशिष्ट्यभानेपि पक्षधर्मत्वाभानान्न विशिष्टपरामर्शलाभः । व्याप्तिविशिष्टवैशिष्ट्यावगाहिनः पर्वतो वह्निव्याप्यधूमवानिति ज्ञानस्यैवानुमितिहेतुत्वमिति मते मूलोक्तस्खलासंकीर्णं यत्तदप्युपदर्शयति यत्र प्रथममिति । पक्षाग्रह इति । पूर्वं तदग्रहे तु यदैव धूमे व्याप्तिवैशिष्ट्यधीस्तदैव पक्षवृत्तित्वस्यापि ग्रहसम्भवान्न मूलोक्तस्खलासंकरः स्यादिति भावः।गृहीते पक्ष इति।पक्षविशेष्यकेपि प्रत्यक्षात्मकपरामर्शे पक्षज्ञानं हेतुः संयोगाद्यात्मकस्य पक्षवृत्तित्वस्य प्रत्यक्षे यावदाश्रयप्रत्यक्षस्य हेतुत्वादित्यभिप्रेत्य गृहीत इत्युक्तम् । ननूत्तरकाले धूमत्वादिवैशिष्ट्यभानव्यवच्छेदस्य प्रकृतानुपयुक्तत्वात्प्रथमत एव इत्युक्तिर्निष्फलेत्यत आह प्रथमत इतीति । ननूक्तरीत्याऽनुमितेः पूर्वं परामर्शसम्भवेप्यनुमितौ न तत्त्वेन हेतुत्वं किं तु ज्ञानद्वयस्यैव तथात्वं प्रागुक्तकल्पनालाघवादत आह एवं चेति । तत्त्वेन व्याप्तिविशिष्टपक्षधर्मताज्ञानत्वेन।गुर्विति कल्पनाक्रियान्वयि।तथा च गुरुतरं धर्मद्व-

यत्र भासते विशेषणज्ञानस्य पूर्वं वृत्तत्वात् तत्र यत्र चाप्तवाक्याद्वन्हिव्याप्यधूमवानयमिति ज्ञानं ततोभयत्रापि लाघवात् पक्षधर्मव्याप्यत्वज्ञानस्य हेतुत्वकल्पनादन्यत्रापि तथेति चेत्। न। इन्द्रियासन्निकृष्टेऽतीन्द्रिये च

तुत्वं गुरुधर्म्मद्वयावच्छेदेनान्यथासिद्धत्वकल्पनामपेक्ष्य लघ्वेकरूपावच्छेदेन नियमानन्यथासिद्धिकल्पनाया एव न्याय्यत्वात्। गृह्यमाणव्याप्यत्वावच्छेदकताकधर्म्मप्रकारकपक्षधर्म्मताज्ञानत्वेन पक्षधर्म्मताग्रहप्रकारीभवद्धर्मावच्छिन्नव्याप्तिज्ञानत्वेन वैकरूपेण कारणत्वे

यावच्छेदेन यदन्यथासिद्धत्वकल्पनं तदपेक्ष्येत्यर्थः।तेन धूमत्वेन व्याप्तिज्ञानत्वं धूमत्वेन पक्षधर्मताज्ञानत्वं च यदवच्छेदकधर्मद्वयं तस्य व्याप्तिविशिष्टपक्षधर्मताज्ञानत्वापेक्षया लघुत्वेपि नासङ्गतिः।कल्पनायाश्च गुरुत्वं कारणताद्वयोपपादकतया बोध्यम्। एवमुत्तरत्र लाघवमप्येककारणतासम्पादकत्वेनैव द्रष्टव्यम्। यत्तु परैरपि धूमत्वावच्छेदेन व्याप्तिज्ञानत्वेन हेतुत्वं वाच्यमतस्तत्रावच्छेदकत्वप्रवेशेन विशिष्टज्ञानत्वापेक्षया गौरवमिति।तत्तुच्छम्।तावतापि धर्मद्वये गुरुत्वोपदर्शनासङ्गतेः। धूमत्वावच्छेदेन व्याप्तिज्ञानत्वेन हेतुतावादिनां मतेपि धूमत्वप्रकारकपक्षधर्मताज्ञानत्वेनैव हेतुतया विशिष्टज्ञानत्वापेक्षया गुरुधर्मघटितं यद्धर्मद्वयं तदवच्छेदेनेत्यर्थकरणान्नायमपि दोष इत्याहुः। ननु धर्मद्वयावच्छेदेन हेतुत्वकल्पने यदि गौरवं तदैकरूपेणैव ज्ञानद्वयस्य हेतुत्वमस्तु अतस्तदपि दूषयति गृह्यमाणेति। न च व्याप्तिग्रहप्रकारीभूतधर्मप्रकारकपक्षधर्मताज्ञानत्वेनेत्येव सम्यक् अवच्छेदकत्वप्रवेशो व्यर्थ इति वाच्यम्। यत्र धूमत्वसामानाधिकरण्येन व्याप्तेर्व्यभिचारस्य च ग्रहोत्तरं धूमत्वेन पक्षधर्मताग्रहस्तत्रानुमितेर्वार-

लिङ्गे प्रत्यक्षविशिष्टज्ञानसामग्रीविरहात्तेन विनानुमित्यनुत्पादापत्तेः । अस्मदुक्तसामग्र्याश्च तत्रापि सत्त्वात् ।

चातिगौरवात् विनिगमनाविरहाच्च । तवापि च नियतपूर्ववर्त्तित्वं कल्पयमित्याह यत्र चेति। तेन विनेति।तथा च व्यभिचारात्कारणत्वं बाधितमिति भावः । स्वतो व्यभिचारं निरस्यति अस्मदुक्तेति। अनवस्थानादिति।न च धूमान्तरसन्निकर्षे तद्व्यक्तिवृत्तिधूमत्वं वन्हि-

---

णाय तन्निवेशात् । एवमुत्तरत्रापीति भावः । अतिगौरवादिति । गृह्यमाणव्याप्यत्वच्छेदकत्वादिप्रवेशेन विशिष्टज्ञानत्वापेक्षयोक्तधर्मस्य गुरुत्वादिति भावः । ननु विशिष्टज्ञानस्य व्याप्यपक्षोभयवैशिष्ट्यावगाहिनिश्चयत्वेनैव विनिगमनाविरहात्पक्षव्याप्योभयवैशिष्ट्यावगाहिनिश्चयत्वेनापि हेतुत्वं वाच्यं तथा च कारणताद्वयापत्तिरतो गुरुतरयोरपि गृह्यमाणेत्याद्युक्तधर्मद्वययोरेकेनैव हेतुता लघीयसीत्यत आह विनिगमनेति । गृह्यमाणेत्यादिनोक्तधर्मद्वययोरपि प्रत्येकरूपेण हेतुत्वे विनिगमनाभावाच्चेत्यर्थः । तथा चावच्छेदकभेदेन कारणताद्वयं तवाप्यावश्यकमतो लघुरूपाभ्यामेव तथात्वं युक्तमिति भावः । तव मीमांसकस्य । कल्प्यमिति । तथा चानन्यथासिद्धत्ववत् पूर्ववर्तित्वस्याप्युभयमत एव कल्प्यत्वेन लघुधर्मावच्छेदेनैव कल्पनौचित्यादिति भावः । व्यभिचारादिति । न च न्यायमतेपि धूमलिङ्गकपरामर्शाव्यवहितोत्तरानुमितिं प्रति धूमलिङ्गकपरामर्शत्वेन हेतुताया वाच्यत्वादसन्निकृष्टधूमस्थलीयानुमितेरतादृशत्वेन कथं व्यभिचार इति वाच्यम् । आलोकाद्यन्यलिङ्गकानुमितिसामान्यं प्रत्येव न्यायमते धूमलिङ्गकपरामर्शत्वेन हेतुत्वमित्याशयेन तत्र व्यभिचारस्योपन्यासात् । वस्तुतस्त्वव्यवहितोत्तरत्वस्य स्वत्वादिगर्भत्वेनानुगतस्य दुर्वचनत्वात्तदन्तर्भावेन धूमलिङ्गकवन्ह्यनुमितिसामान्यं प्रत्यनुगतरूपेण न परामर्शस्य हेतुत्वं किं तु यस्य पुंसो धूमेनैव

न चानुमानात् तत्र परामर्शः, अनवस्थानात्। अथ यथा स देवदत्तो गौरो न वा परमाणू रूपाधिकरणं न वेति संशयो बहिरस्वतन्त्रेणापि मनसा कोटिस्मरणविशेषादर्शनादिसहकारिवशाज्जन्यते यथा वा निद्रासहकारेण बाह्यस्वप्नानुभवः तथेहापि ज्ञानान्तरोपनीतविशेष्ये व्याप्तिस्मरणसहकृतेन मनसा परामर्शो जन्यते तदनन्तरमनुमितिदर्शनादिति चेत्। न। व्याप्तिस्मरणादेः प्रमा-

---

व्याप्तिव्याप्यमिति लिङ्गविशेष्यकपरामर्शाद्व्याप्त्यनुमितिसम्भवः धूममात्रासन्निकर्षेऽपि तत्र वन्ह्यनुमानात् तद्व्यक्तिवृत्तित्वधूमत्ववै-

---

हेतुना वन्ह्यनुमितिस्तदीयवन्ह्यनुमितिसामान्यं प्रत्येव तत्पुरुषीयधूमलिङ्गकपरामर्शत्वेनानुगतरूपेण हेतुत्वं नैयायिकैर्वाच्यमित्याशयेन तादृशपुरुषस्यासन्निकृष्टधूमलिङ्गकानुमितौ धूमलिङ्गकपरामर्शस्य व्यभिचारो दर्शितः। विशेषसामग्रीसहिताया एव सामान्यसामग्न्याः कार्यजनकत्वमिति नियमस्य चाऽव्यभिचारे तात्पर्यमिति युक्तमुत्पश्यामः। स्वतः स्वमते। निरस्यति, मीमांसकः। यत्र धूमे वन्हिव्याप्यत्वं पर्वते च धूमवत्तामात्रं प्रागनुभूतं न तु वन्हिव्याप्यधूमवत्त्वं तत्र न पर्वतो वन्हिव्याप्यधूमवानित्येवं स्मृतिः कारणस्य विशिष्टानुभवस्य बाधात् किं तु धूमो वन्हिव्याप्यो धूमवांश्च पर्वत इत्येवं स्मरणमिति तत्रानुमितौ ज्ञानद्वयस्य सत्त्वान्न व्यभिचारः। धूमान्तरेति। इदं च विशेष्यीभूतस्य धूमत्वस्य सन्निकर्षसम्पत्तये। तद्व्यक्तिवृत्तीति। असन्निकृष्टो यः पर्वतादिः तदीयधूमवृत्तित्यर्थः। व्याप्त्यनुमितीति। तत्पर्वतवृत्तिधूमो वन्हिव्याप्य इत्यनुमितिसम्भव इत्यर्थः। तथा चो-

णान्तरतापत्तेः । तदेव हि प्रमाणान्तरं यदसाधारणं स-

शिष्टयग्राहकविरहाच्च, असाधारणमिति शरीरादिंव्युदासः, आलोकादिवारणाय प्रमाणान्तरासहकारीति वाच्यम् । तदपि प्रमाणा-

---

त्कानुमित्यात्मकात् धूमविशेष्यकपरामर्शादेवासन्निकृष्टधूमस्थले पर्वतो वन्हिमानित्यनुमितिर्भविष्यतीति भावः । धूममात्रेति । तथा च विशेष्ये सन्निकर्षाभावाद्धूमत्वधर्मिकस्य वन्हिव्याप्तिव्याप्यत्वानुभवस्यासम्भवाद्धूमविशेष्यकोनुमित्यात्मकः परामर्शोप्यसन्निकृष्टधूमस्थले दुर्घट इति भावः । सत्यपि धूमान्तरस्य सन्निकर्षे तत्पर्वतीयधूमवृत्तिधूमत्वं वन्हिव्याप्तिव्याप्यमिति प्रत्यक्षस्यासम्भवः । तत्पर्वतीयधूमस्यासन्निकृष्टतया तत्पर्वतीयधूमवृत्तित्वस्याऽयोग्यतया प्रत्यक्षविषयत्वायोगादित्याह तद्व्यक्तिवृत्तित्वेति । शरीरादीत्यादिपदादात्मादीनां संग्रहः । व्युदास इति। अन्यथा मानसान्यप्रमाफलोपहितकारणत्वपर्यवसितस्य प्रमाणान्तरत्वरूपापाद्यस्य शरीरादावसत्त्वेनोक्ततर्कस्य मूलशैथिल्यापत्तेरिति भावः । असाधारणत्वं चात्राऽनुभवत्वाव्यापकज्ञानवृत्तिजात्यवच्छिन्नकार्यतानिरूपितकारणताश्रयत्वम् । कारणता चात्र विषयत्वाद्यनवच्छिन्ना ग्राह्या । तेन साक्षात्कारत्वावच्छिन्नं प्रति विषयविधया शरीरादेर्हेतुत्वेपि नोक्तदोषः । चक्षुरादेस्तु चाक्षुषत्वादिरूपतादृशजात्यवच्छिन्नं प्रत्येव चक्षुरादिना जनकतया न तत्र दृष्टान्तासिद्धिः । ज्ञानवृत्तीत्युपादानात्संयोगत्वाद्यवच्छिन्नं प्रति द्रव्यत्वादिना हेतुत्वेपि शरीरादेर्व्युदासः । न चानुभवत्वव्याप्यजात्यवच्छिन्नकार्यत्वं प्रवेश्यैव तद्धारणसम्भवः । संस्कारवारकस्य प्रमां जनयतीतिमूलस्थप्रमापदस्य वैयर्थ्यापत्त्या तदप्रवेशादिति भावः। चैत्रादिशरीरजन्यतावच्छेदकजातेः प्रामाणिकत्वे पुनरेकदोत्पन्ननानाज्ञानवृत्तित्वेन जातिर्विशेषणीया । आलोकादीति । चाक्षुषादौ व्यापारद्वारा कारणत्वेप्यालोकादेर्न तत्र कारणत्वमात्मवदतस्तत्र व्यभिचारवारणायेत्यर्थः । प्रमाणान्तरेति ।

हकारि समासाद्य मनो बहिर्गोचरां प्रमां जनयति यथे-

न चैवं शरीरस्यापि स्वेतरप्रमाणसहकारितयोक्तविशेषणादेव व्युदाससम्भवात् असाधारणपदस्य वैयर्थ्यमिति वाच्यम्। स्ववृत्तिधर्मावच्छिन्नया प्रमाकरणतया निरूपितं यत्कार्यत्वं तदवच्छेदकीभूतमानसावृत्तिजात्यवच्छिन्नकार्यतानिरूपितकारणताशून्यत्वस्यैव प्रमाणान्तरासहकारीत्यनेन विवक्षितत्वात्। तस्य च शरीरादावप्यनपायात्। अत्र च चक्षुरादेरपि जन्यतावच्छेदकीभूतचाक्षुषत्वाद्यवच्छिन्नं प्रत्येव जनकतया दृष्टान्तासिद्धिरतो भूतान्तं जातिविशेषणम्। न चोक्तासिद्धिवारणाय स्वेतरप्रमाणजन्यतावच्छेदकत्वेनैव जातिर्विशेष्यतामिति वाच्यम्। सर्वेषामेव चक्षुषां स्वेतरचक्षुरन्तरजन्यतावच्छेदकीभूतं यच्चाक्षुषत्वं तदवच्छिन्नं प्रति जनकतया दृष्टान्तासिद्धितादवस्थ्यापत्तेः। मानसावृत्तिपदं त्वापादकस्य पराभ्युपगतत्वसम्पत्त्यर्थम्। अन्यथा व्याप्त्यलौकिकसाक्षात्कारत्वावच्छिन्नं प्रत्येव व्याप्तिस्मरणादेर्हेतुतायां नैयायिकैरभ्युपगमेन निरुक्तकारणताशून्यत्वस्य तत्रासम्भवादिति ध्येयम्। स्मृत्युपधायकसंस्कारस्यापि निरुक्तासाधारणतया प्रमाणान्तरासहकारितया च तत्र व्यभिचारवारणाय मूले प्रमामिति। आत्मसुखादिसन्निकर्षे व्यभिचारवारणाय बहिर्गोचरेति। इत्थं चेदं व्याप्तिस्मरणं यद्यनुभवत्वाव्यापकज्ञानवृत्तिजात्यवच्छिन्नकार्यतानिरूपितविषयत्वावच्छिन्नकारणताश्रयत्वे सति स्ववृत्तिधर्मावच्छिन्नप्रमाकरणतानिरूपितकार्यतावच्छेदकीभूतमानसज्ञानावृत्तिजात्यवच्छिन्नकार्यताप्रतियोगिककारणताशून्यत्वे च सति बहिर्गोचरप्रमोत्पादकं स्यात्तदावश्यं मानसान्यप्रमायाः फलोपहितकारणं स्यात् चक्षुरादिवदिति समुदितार्थः। न चानुमित्यादिकरणतामादायेष्टापत्तिरिति वाच्यम्। यन्निरुक्तकारणताशून्यत्वे सति बहिर्गोचरयादृशयादृशप्रमोत्पादकं तदवश्यं मानसान्यतादृशतादृशप्रमायाः फलोपहितकरणमिति व्याप्त्या मानसान्यपरामर्शकारणत्वस्यापत्तावनिष्टापत्त्यसम्भवादिति ध्येयम्। आलोकादेरपि चाक्षुषादिकरणत्वमतस्तत्रापाद्यस्वादापाद-

न्तरं भवत्येव प्रत्यक्षादिप्रमाकरणत्वेन च विभागान्न तद्व्याघात इत्यपि कश्चित्। यद्वा असाधारणमसमवहितं तथा च यज्जातीय-प्रमायां मनोन्यकरणेनासमवहितं सत् यद्बहिर्विषयकप्रमोत्पादकं यज्जातीयप्रमासामग्रीविरहे वा यत्प्रमोत्पादकं तत्तद्विजातीयप्रमाहे-

---

कत्वकोटौ तद्धारकप्रमाणान्तरासहकारीतिविशेषणं न देयमिति मतं द्-र्शयति तदपीति। आलोकादिकमपीत्यर्थः। नन्वेवं प्रमाणस्य चतु-र्थो विभागोऽनुपपन्न इत्यत आह प्रत्यक्षेति। तद्व्याघातः विभाग-व्याघातः। प्रमावैजात्यस्यैव प्रमाणान्तरत्वनियामकत्वमनुसृत्य प्रका-रान्तरेण व्याचष्टे यद्वेति। व्याप्तिस्मरणस्यापि मनःप्रभृतिसमवहि-तत्वादाह तथा चेति। यत्प्रमाया इत्युक्तावेकचाक्षुषादिव्यक्तिकर-णासमवहिते चाक्षुषान्तरजनके चक्षुरादौ व्यभिचारः स्यादतो य-ज्जातीयेति। यज्जातीयस्य मनोन्यकरणेनासमवहितमित्युक्तौ स्मृति-जातीयस्य मनोन्यकरणेनासमवहिते चक्षुरादौ प्रमोत्पादके व्यभि-चारः तद्विजातीयप्रमाहेतुरित्यस्य तत्प्रमाविजातीयप्रमाहेतुरित्य-र्थकत्वादतः प्रमाया इति। अनुमितिजातीयप्रमायाः करणेन मनसैव समवहितत्वाच्चक्षुरादौ दृष्टान्तासिद्धिः पक्षीभूते व्याप्तिस्मरणे चा-पादकत्वतायाः पराभ्युपगमासिद्धिश्च स्यादत उक्तं मनोन्येति। म-नोन्यकारणेत्युक्तावपि तथैव दोषात्करणपर्यन्तानुसरणम्। प्रत्यक्ष-जातीयप्रमाया मनोन्यकरणेनासमवहिते सुखादिसन्निकर्षे प्रत्यक्षवि-जातीयप्रमाया अजनकत्वात्तत्र व्यभिचारः स्यादतो बहिर्विषयके-ति। अनुमित्यादिजातीयप्रमायाः मनोन्यकरणेनासमवहितस्मृत्युप-धायकसंस्कारेऽनुमित्यादिविजातीयप्रमित्यजनके व्यभिचारवारणाय प्रमोत्पादकमिति। अत्र च यो यज्जातीयप्रमायाः मनोन्यकरणेनासम-वहितः सन् बहिर्विषयकयादृशप्रमित्युत्पादकः स तद्विजातीयतादृश-प्रमाहेतुरित्येवव्याप्तयर्थो बोध्यः। तेन प्रत्यक्षजातीयप्रमाया मनोन्यक-रणेनासमवहितस्य परामर्शात्मकप्रमोत्पादकस्य च पक्षीभूतव्याप्ति-स्मरणस्य प्रत्यक्षविजातीयानुमितिप्रमाहेतुत्वमादाय नेष्टापत्तिरिति ध्येयम्। ननु सुषुप्त्यनुरोधेन ज्ञानसामान्यं प्रत्येव त्वयो हेतुत्वात्प्रत्य-

तुरित्येव व्याप्तिः।ततः सिद्धायां विलक्षणप्रमायां विलक्षणे च तत्करणे कल्पनीये आवश्यकत्वादबाधकाभावाच्च तस्यैव तथात्वं पर्यवस्यतीति। संशयस्वप्नौ च न विशिष्टानुभवरूपौ, येनोपनयादिवशादबाह्यविषयानुभवजनने क्लृप्तशक्तिकेन मनसा दोषवशादप्रमेव तदभावादिवशात् प्रमापि जनयितव्येत्याशङ्क्येत, किन्तु

क्षजातीयप्रमाया मनोन्यकरणेन त्वचा समवहितत्वात्पक्षीभूतव्याप्तिस्मृतावापादकासिद्धिरतः कल्पान्तरमाह यज्जातीयेति। अत्रापि पूर्ववन्निष्कर्षो बोध्यः। ननूक्तव्याप्तिबलाद्व्याप्तिस्मरणस्य विजातीयप्रमाहेतुत्वमिष्यत एव। न च तावतैव प्रमाणान्तरत्वप्रसंगः, तस्य प्रमाकरणत्वगर्भत्वादत आह तत इतिततो व्याप्तिस्मरणात्। सिद्धायाम् अभ्युपेतायां विजातीयप्रमायामित्यर्थः। आवश्यकत्वात् करणान्तरकल्पने उपनयहेतुत्वस्यावश्यकत्वात्। बाधकाभावात् व्यापाराभावरूपं यद्बाधकमापाद्यकोटौ फलायोगव्यवच्छिन्नकारणत्वरूपकरणत्वस्य प्रविष्टत्वेन तदभावादित्यर्थः। तस्यैव व्याप्तिस्मरणस्यैव। तथात्वं करणत्वम्। पर्यवस्यतीति। तथा च प्रत्यक्षादिविजातीयप्रमाहेतुत्वोपगमेनैव विजातीयप्रमायाः फलायोगव्यवच्छिन्नकारणत्वलक्षणकरणत्वमापादनीयमतो न त्वया व्याप्तिस्मरणस्य प्रत्यक्षविजातीयप्रमाहेतुत्वमभ्युपेतव्यमिति भावः। ननु संशयस्वप्नयोर्विशिष्टसाक्षात्कारत्वानुरोधादुपनयस्य प्रत्यासत्तित्वधौव्ये दोषाद्यभावदशोत्पन्नयोः संशयस्वप्नयोः प्रमात्वं न दुर्घटमतो मूलस्याशयमुपवर्णयति संशयेत्यादिना। न विशिष्टेति। न च घटधर्मिकस्यायं घटो न वेतिसंशयस्य घटत्वांशे विद्यमानदुःखावगाहिनश्चाहं दुःखीत्यादिस्वप्नस्य दुःखांशे विशिष्टानुभवत्वसम्भवादिदमसङ्गतमिति वाच्यम्। तावतापि संशयस्वप्नसामान्ययोर्विशिष्टानुभवत्वासम्भवादुक्तसंशयस्वप्नयोर्लौकिकसन्निकर्षादेवोत्पत्त्या क्वचिदप्युपनयस्य प्रत्यासत्तित्वाकल्पनात्। यत्तु शयानोहं दुःखीत्यादिस्वप्नस्य विशिष्टानुभवत्वेपि न प्रमात्वं स्वप्नवहनाडीमनःसंयोगस्यैव दोषतया सर्वत्र भ्रमसामग्रीसम्भवा-

न्द्रियादि । संशयस्वप्नौ तु न प्रमे इति न निद्रादेः प्रमाणान्तरत्वम् । न च तत्रापि कथं स धूमो वह्निव्याप्य इति व्यवहारः तदानीं तद्व्याप्यत्वानुभावकाभावादिति वाच्यम् । तत्र स्मृतधूमे धूमत्वेन वह्निव्याप्यत्वानुमानात् । न च तन्मते धूमत्वेन व्याप्त्यनुभवः सम्भवति।

धर्म्मिज्ञानकोटिस्मरणादिरूपः, धर्म्मिज्ञानं पुनरनुभवरूपं यथासम्भवमक्षादेः स्मरणञ्च संस्कारादित्याशयेनाह संशयेति । व्याप्यत्वानुमानादिति । धूमत्वादौ वन्ह्यादिव्याप्तिव्याप्यत्वं जानतो धूमत्वत्वादिना तद्वत्त्वनिश्चयदशायामन्यथा त्वसंसर्गाग्रहादेवेति । अ-

---

दिति मतम्।तच्चिन्त्यम् । तदभावादिवशादितिदोषाभावादित्यर्थः । प्रमापीत्यस्य संशयस्वप्नात्मकेत्यादिः । कोटिस्मरणादीत्यादिना भेदाग्रहादेः परिग्रहः । धर्मिज्ञानमिति । साधारणादिधर्मवद्धर्मिज्ञानजन्या कोटिस्मृतिरेव संशयहेतुरिति प्राचां मते कोट्यनुभवस्य संशयानिर्वाहकत्वात्कोटिस्मरणपर्यन्तमनुसृतम् । अक्षादेरिति पञ्चमी । क्व चिदक्षादिन्द्रियात् प्रत्यक्षात्मकं क्व चिच्च व्याप्तिज्ञानादितोनुमित्यात्मकं धर्मिज्ञानमित्यर्थः । स्मरणं चेति । धर्मिज्ञानमित्यन्वितम् । तद्वत्त्वेति । धूमत्ववत्त्वेत्यर्थः । अन्यथा धूमत्वादौ वन्ह्यादिव्याप्तिव्याप्यत्वाद्यग्रहदशायाम्। असंसर्गाग्रहादेवेति । स धूमो वन्हिव्याप्य इति व्यवहार इति मूलस्थेनाऽन्वयः। न चैवं व्याप्यतावच्छेदकप्रकारेणैव व्याप्तिग्रहस्य बाधात्तत्र पर्वतो वन्हिमानित्यनुमितिर्न स्यात्, इष्टत्वात् । व्याप्यत्वासंसर्गाग्रहस्थले लैङ्गिकासंसर्गाग्रहस्यैव परैः स्वीकारादिति भावः । अथातीन्द्रियस्थले विशिष्टज्ञा-

अत एव यो वह्निव्याप्यवान् सोऽवश्यं वह्निमान् इति व्याप्तिज्ञानवतोऽनुमितिर्नान्यथा। अथ पर्वतीयधूमे धूमत्वेन ज्ञाते वह्निव्याप्योऽयं न वेति संशयेऽप्यनुमितिः स्यादिति चेन्न। धूमो वह्निव्याप्य इति स्मरणे विद्यमाने

तीन्द्रियादौ लिङ्गे व्याप्यत्वप्रकारकज्ञानस्यासम्भवेऽप्यनुमितेः सर्वानुभवसिद्धतया तस्य कारणत्वे बाधिते परिशेषाद्गुरोरपि व्याप्यतावच्छेदकप्रकारकज्ञानस्य हेतुत्वे सिद्धे शाब्दव्याप्यवत्ताबोधस्थलेऽपि तत्कल्पयते कारणं विना कार्योत्पत्तेरसम्भवात् तेन च विना तत्रानुमितेरसिद्धत्वान्न तस्यापि हेतुताबाधः तवातीन्द्रियलिङ्गादौ सर्वानुभवसिद्धाया अप्यनुमितेः सर्वथैवापलापः मम तु क्व चित्कालविलम्बादिमात्रकल्पनमिसाशयवानाह अत ए-

---

नस्येव व्याप्यवानिति शाब्दस्थले व्याप्यतावच्छेदकप्रकारकज्ञानस्यापि व्यभिचारसाम्येन लघुतरं विशिष्टज्ञानमपेक्ष्य गुरोर्व्याप्यतावच्छेदकप्रकारकज्ञानस्यैवातएवेत्यादिना हेतुत्वव्यवस्थापनं न युक्तमतो मूलकारस्याशयमुपवर्णयति अतीन्द्रियादाविति। तत् व्याप्यतावच्छेदकप्रकारकज्ञानम्। ननु यत्र विनैव व्याप्यतावच्छेदकप्रकारकज्ञानं व्याप्यवानित्येव परामर्शादनुमितिस्तत्र ज्ञानद्वयस्यापि व्यभिचारेण कारणत्वं बाधितमत आह न चेति। तेन व्याप्यतावच्छेदकप्रकारकज्ञानेन। तत्र व्याप्यवानितिशाब्दस्थले। ननु यत्र केवलं वह्निव्याप्यवानित्येव शाब्दधीर्न तु व्याप्यतावच्छेदकप्रकारिका तत्र त्वयेव मयाप्यसन्निकृष्टधूमस्थलेनुमितिरपलपनीयैवेति कुतो विशिष्टज्ञानस्य करणत्वबाध इत्यत आह नवेति।सर्वथैवेति।उपनयस्य प्रत्यासत्तित्वविरहात्कालादिविलम्बेनापि विशिष्टज्ञानासम्भवादिति

धूमत्वज्ञानस्य विशेषदर्शनत्वेन संशयाभावात् । अन्यथा परामर्शोऽपि कुतो न स्यात् संशयेन प्रतिबन्धादिति चेत्तुल्यम् । न च सामान्यनिश्चयस्य सामान्यसंशयनिवर्तकत्वाद्धूमसामान्ये एव संशयो माभूत् विशेषसंशयश्च विशेषनिश्चयनिवर्तनीय इति धूमविशेषसंशयनिरासार्थं पृथग्व्याप्तिनिश्चयो वाच्य इति वाच्यम् । यत्र हि

वेति । तुल्यमित्यभ्युपगमवादः।यत्र यदवच्छिन्नोयथा हि तदभावेन

भावः । क्व चित् व्याप्यवानितिशाब्दस्थले । कालविलम्बेति । तत्रैव व्याप्यतावच्छेदकप्रकारज्ञानस्य सम्पत्तेरिति भावः । मात्रेति । न त्वनुमितेरपलाप इत्यर्थः। मूले नान्यथेति। न केवलं वन्हिव्याप्यवानिति ज्ञानादनुमितिरित्यर्थः। वन्हिव्याप्योयं न वेतिसंशये पर्वतीयधूमो वन्हिव्याप्यो न वेति संशये सतीत्यर्थः । धूमत्वज्ञानस्येति । धूमो वन्हिव्याप्य इति स्मरणस्यैव विशेषदर्शनत्वेन विरोधिसामग्रीसत्त्वेन संशयाविरोधितया संशयानुत्पत्तेरित्यर्थः । अन्यथा विरोध्यनुमितिसामग्रीसत्त्वेपि संशयोत्पादे । परामर्शोपीति । संशयस्येव तस्यापि सामग्रीसम्भवादिति भावः । शङ्कते संशयेन प्रतिबन्धादिति । परामर्शो न स्यादित्यनुषज्यते । ननु परमतेनुमितिसामग्न्याः सत्त्वादेव तथा विशेषदर्शनेन च प्रतिबन्धात्संशय एव नोत्पद्यते कुतस्तस्यानुमितिप्रतिबन्धकत्वमुक्तमत आह दीधितौ अभ्युपगमेति । अत एवाग्रे वस्तुतस्त्वित्यादिना मूलेनोक्तस्थलेनुमितिरेव भवति न तु संशय इत्यपि वक्ष्यत इति भावः । मूले धूमविशेषसंशयेति । पर्वतीयधूमत्वावच्छिन्नविशेष्यकव्याप्तिसंशयस्य निरासार्थं पर्वतीयधूमो वन्हिव्याप्य इत्यपि निश्चयो वाच्य इत्यर्थः । धूमत्वादिरूपेण धूमे व्याप्तिनिश्चयेपि द्रव्यत्वादिप्रकारेण तत्रैव व्याप्तिसंश-

तदभावव्याप्यतया गृहीतेन वा विशिष्टेन तत्संशयः तथा यदवच्छेदेन तद्व्यावर्त्तकधर्म्मदर्शनं तद्विशिष्टेऽपि अनुभवबलाद्व्यावर्त्तकश्च तदभावो यदवच्छेदेन वा तदभावोऽवगतो यो वा तदभावव्याप्यत्वेन गृहीतः। यथा स्थाणुत्वाभावस्य पुरुषत्वावच्छेदेन ग्रहे

यस्योत्पादाद्व्याचष्टे यदवच्छिन्न इति। व्यावर्त्तकधर्मदर्शनविरोधित्वं दृष्टान्तेन द्रढयति यथा हीति। तदभावेन तदीयतया गृहीताभावेन। विशिष्ट इत्यग्रेऽन्वयः। तथा च निर्वान्हिर्वन्हिमान्न वा निर्वन्हित्वव्याप्यवान् वहिमान्न वेति वा यथा न संशय इत्यर्थः। तथा च तदभावादिविशिष्टधर्मिकतद्वत्तावुद्धिं प्रति सामान्यतस्तद्बुभुत्साविरहविशिष्टज्ञानत्वेन प्रतिबन्धकत्वस्य तादृशतद्वत्तानिश्चयव्यक्तिं प्रति तत्तद्बुभुत्साव्यक्तित्वेन विशेषतः करणत्वस्य वा कल्पनात्। अत एव सत्यामपि बुभुत्सायां निर्वन्हित्वविशिष्टे वन्हिमत्त्वनिश्चयवन्न तत्संशयोत्पाद इति ध्येयम्। तद्विशिष्टेपीति। न तत्संशय इत्यन्वयः। अत्र हेतुमाह अनुभवबलादिति। ननु धूमत्वावच्छेदेन व्याप्तिनिश्चयस्य व्यावर्तकधर्मदर्शनविधया व्याप्तिसंशयविरोधित्वं मूलोक्तमसङ्गतं तदभावावच्छेदकधर्मस्यैव व्यावर्त्तकधर्मत्वादत आह व्यावर्त्तकश्चेति। प्रकारविधया विशिष्टधीप्रतिबन्धकतावच्छेदकधर्मस्यैव व्यावर्त्तकपदार्थत्वादिति भावः। क्रमेणोदाहरति यथेति। प्रथमे स्थाणुत्वाभावस्य पुरुषत्वावच्छेदेन ग्रहे पुरुषः स्थाणुर्न वेति न संशय इति योजना। द्वितीये स्थाणुत्वाभावस्य पुरुषत्वावच्छेदेन ग्रहे पुरुषत्वस्य चेदन्त्वावच्छेदेन ग्रहेऽयं स्थाणुर्न वेति न संशय इत्यन्वयः। अत्र च इदन्त्वावच्छिन्नधर्मिकस्थाणुत्वसंशयं प्रति पुरुषत्वावच्छिन्नविशेष्यकस्थाणुत्वाभावनिश्चयविशिष्टेदन्त्वावच्छिन्नधर्मिकपुरुषत्वनिश्चयत्वेनैव प्रतिबन्धकत्वम्। वैशिष्ट्यं च तत्र एकक्षणावच्छेदेनैकात्मवृत्तित्वमतो नातिप्रसङ्गः। न चैवं पुरुषो न स्थाणुरित्याकारकोदबुद्धसंस्कारविशिष्टोयं पुरुष इत्याकारकनिश्चयस्य सत्त्वेप्ययं स्थाणुर्न वेति संशयः स्यादिति वाच्यम्। पुरुषत्वावच्छिन्नविशेष्यकस्थाणुत्वाभावोदबुद्धसंस्कारविशिष्टेदन्त्वा-

वच्छिन्नविशेष्यकपुरुषत्वनिश्चयत्वेनापि इदंधर्मिकस्थाणुत्वसंशयप्रतिबन्धकत्वान्तरस्वीकारात् । अत्राप्युदूबोधकस्यैकस्याभावेन प्रत्येकव्यक्तिविश्रान्तिभ्रौव्ये स्थाणुत्वाभावोदूबोधकीभूततत्तद्व्यक्तिविशिष्टेदन्धर्मिकपुरुषत्वनिश्चयत्वेनैव प्रतिबन्धकत्वं फलितम् । अन्ये तु इदन्त्वविशिष्टधर्मिकस्थाणुत्ववत्ताबुद्धिं प्रति स्थाणुत्वाभावत्वावच्छिन्नप्रकारतानिरूपितविशेष्यतावच्छेदकत्वविशिष्टप्रकारतानिरूपितेदन्त्वावच्छिन्नविशेष्यकज्ञानत्वेनैव प्रतिबन्धकत्वं वाच्यम्, चैत्रो न स्थाणुरयं च चैत्रः मैत्रो न स्थाणुरयं च मैत्रः मनुष्यो न स्थाणुरयं च मनुष्य इत्यादिसकलवित्तिसाधारणत्वात् । निरुक्तावच्छेदकत्वविशिष्टत्वे तु स्वनिरूपकज्ञानसमानाधिकरणज्ञानीयत्वस्वसमानाधिकरणज्ञानीयत्वस्वसामानाधिकरण्योभयसम्बन्धेन प्रकारतायां बोध्यम् । तेन पुमन्तरस्य मनुष्यत्वावच्छेदेन स्वस्य वा चैत्रत्वावच्छेदेन स्थाणुत्वाभावनिश्चयदशायामिदन्त्वावच्छेदेन मनुष्यत्वं जानतोपि पुरुषस्यायं स्थाणुरिति भ्रमस्योत्पादः । विशेष्यताद्वयमेव चात्र मानाप्रकारत्वानिरूपितं ग्राह्यमतो मनुष्यत्वावच्छेदेन स्थाणुत्वाभावस्येदन्त्वावच्छेदेन वा मनुष्यत्वस्य संशयदशायामप्ययं स्थाणुरित्याकारको बोधः । संशयस्थलीयविशेष्यताद्वयस्य कोटिद्वयप्रकारतानिरूपितत्वात् । विशेष्यतावच्छेदकत्वं प्रकारत्वं च द्वयमपि निरवच्छिन्नं ग्राह्यमतः शरीरत्वव्याप्यजातिमत्त्वावच्छेदेन स्थाणुत्वाभावस्य निश्चयदशायामयं चैत्र इति ग्रहे चैत्रत्वावच्छेदेन स्थाणुत्वाभावनिश्चयदशायां चायं शरीरत्वव्याप्यजातिमानितिग्रहेप्ययं स्थाणुर्न वेत्याकारकग्रहस्योत्पाद इत्याहुः । तच्चिन्त्यम् । अन्ये पुनरवच्छेदकत्वसंसर्गेण स्थाणुत्वाभावविशिष्टस्यैव पुरुषत्वस्येदन्त्वावच्छेदेन निर्णयस्तद्विशिष्टे स्थाणुत्वसंशयविरोधी तथा च स्थाणुत्वाभावीयपुरुषत्ववानयमित्याकारकनिर्णय एव तदभावावच्छेदकधर्मवत्ताज्ञानविधया इदंधर्मिकसंशयप्रतिबन्धक इत्याहुः । तन्न । पुरुषमात्रं न स्थाणुः अयं च पुरुष इत्यादिबुद्धेरनन्तरमप्ययं स्थाणुर्न वेत्यादिसंशयस्योत्पादप्रसङ्गात् । न चेष्टापत्तिः, अनुभवविरोधात् । न च व्याप्यदर्शनसामग्रीवत् विरोधिसामग्रीत्वेनैव तादृशबुद्धीनां स्वातन्त्र्येण विरोधित्वम्, सर्वत्र विरोधिनिश्चयस्योत्पादानियमेन तत्सामग्रीत्वासम्भवादिति दिक् । तृतीये स्थाणुत्वाभाव-

यद्व्यावर्तकधर्मदर्शनं तत्र न तत्संशयः यच्च सामान्ये विशेषे वेति। वस्तुतस्तु धूमत्वपुरस्कारेण व्याप्तिस्मरणे पक्षधर्मताज्ञाने चानुमितिर्भवत्येव। ननु भावोऽभावो वा

पुरुषत्वस्य स्थाणुत्वाभावव्याप्यत्वेन गृहीतस्य करादेर्वा इदन्तावच्छेदेन ग्रहे पुरुषोऽयं स्थाणुर्न वेति न संशयः। तदभावादिवच्च तद्वदन्योन्याभावादिस्तादात्म्येन संशये च तदन्योन्याभावादिरपि द्रष्टव्यः। एवं न तद्भ्रमोऽपि, विशेषदर्शनस्य विपरीतज्ञानमात्रविरोधित्वादित्यग्रे व्यक्तीभविष्यति। नन्विच्छा-

---

व्याप्यतया गृहीतस्य करादेः इदन्त्वावच्छेदेन ग्रहेऽयं स्थाणुर्न वेति न संशय इति योजना। ननु घटादिविशिष्टबुद्धिं प्रति तद्भेदादिनिश्चयस्यापि विरोधितया तदभावादित्रयमात्रस्य व्यावर्तकधर्मत्वनाभिधानमसङ्गतमत आह तदभावादिवदिति। तद्वदन्योन्याभावादिरित्यादिपदेन यदवच्छेदेन तद्भेदो गृहीतो यो वा तद्भेदव्याप्यः तयोरुपसंग्रहः। संयोगादिना घटादिसंशये घटान्योन्याभावस्याविरोधित्वादाह तादात्म्येनेति। ननु संशयत्वस्यार्थसमाजग्रस्ततया तदवच्छिन्नं प्रति व्यावर्तकधर्मदर्शनस्य विरोधित्वं मूलोक्तमसङ्गतमत आह एवमिति। एवं व्यावर्तकधर्मदर्शनसत्त्व इत्यर्थः। भ्रमपदं दोषविशेषाद्यजन्यनिश्चयपरम्। विपरीतज्ञानेत्यस्य दोषविशेषाद्यजन्येत्यादिमूलेऽनुमितिर्भवत्येवेत्यस्यानुमितिरेव भवतीत्यर्थः। उभयथापि प्रमेयमितिअस्योभयथापि प्रमेयत्वव्याप्यवादित्यर्थः। अत्र व्याप्तिः साध्यसम्बन्धितावच्छेदकरूपवत्त्वरूपैवाभिप्रेता व्यापकसामानाधिकरण्यरूपव्याप्त्यभिप्राये तस्याः साधनतावच्छेदकगर्भतया भावत्वाद्यनिश्चयदशायां स्वमतेपि तत्रानुमित्यसम्भवादिति ध्येय-

उभयथापि प्रमेयमित्यत्र भावत्वाभावत्वयोर्व्याप्यत्वाव-
च्छेदकयोरग्रहादनुमानं न स्यात् तदन्यान्यत्वरूपस्या-
न्यतरत्वस्य लिङ्गत्वाभावादिति चेत् । न । भावत्वाभा-

दि । इदं नीलत्वेन प्रतीयमानम्, भावोऽभावो वा । भावत्वाभा-
वत्वयोस्तत्त्वयोरित्यर्थः । लिङ्गत्वाभावात् अप्रसिद्धत्वेन तत्त्वासम्भ-
वात् । भावत्वाभावत्वेत्यादिकं केवलान्वय्यनुमानमतिरिक्तञ्चाभा-

---

म । भावाभावयोर्विशेष्यत्वे प्रमेयपदस्य पुंस्त्वापत्तिरित्यतो विशेष्यं
पूरयति इदमितितेजोविशेषाभाववत्त्वस्याभावत्वव्याप्यतया तद्रूपेद-
न्त्वादिविशिष्टेऽभावत्वसंशयायोगादाह नीलत्वेनेति । नीलत्वस्यापि
भावत्वव्याप्यतया तद्रूपविशिष्टे तत्संशयायोगादुक्तं प्रतीयमानमि-
ति । ननु भावत्वाभावत्वयोर्व्याप्यतावच्छेदकत्वे तत्प्रकार-
कपक्षधर्मताबुद्धेरविरोधित्वाद्भावो न वेत्यादिसंशयप्रदर्शनम-
युक्तमतो व्याचष्टे तत्त्वयोरिति । भावत्वाभावत्वयोरि-
त्यर्थः । वस्तुतो भावत्वाभावत्वयोर्वर्तमानौ यौ व्याप्यतावच्छेदकौ तयोरग्रहादित्यन्वयाद्यथाश्रुतमेव मूलं ज्यायः । यद्यपि तादात्म्येन भावाभावयोरेव व्याप्यत्वाभिप्रायेण भावत्वाभावत्वयोरिति यथाश्रुतमेव सङ्गच्छते, तथापि प्राचीनमते तादात्म्येन व्याप्तेर्विवादग्रस्तत्वादित्थं व्याख्यातमिति ध्येयम् । लिङ्गत्वाभावादित्यत्र हेतुमाह अप्रसिद्धेति । भावाभावभिन्नस्य वस्तुनोऽप्रसिद्ध्या तदन्यत्वस्य लिङ्गत्वासम्भवादित्यर्थः । ननु परेषां साध्यवदन्यावृत्तित्वज्ञानबाधेन प्रमेयत्वसाध्यकानुमित्यनङ्गीकारात्तदुपयुक्तहेतुसम्पादनमयुक्तं तथा भावभिन्नत्वरूपस्याभावत्वस्याप्रसिद्ध्या तद्घटितस्य हेतोरप्रसिद्धिरपीत्यत आह भावत्वेति । धर्ममात्र एव प्रमेयत्वादिसाध्यव्याप्तिसम्भवाद्भावत्वाभावत्वान्यतरपर्यन्तानुसरणं मूलकृतो विफ-

वत्वान्यान्यधर्मवत्त्वस्य तत्र लिङ्गत्वात् । एवं धूमालोकान्यतरत्वमपि लिङ्गम् । अथ यद्व्यतिरेकज्ञानं यदुत्पत्तिप्रतिबन्धकं तत्तन्निश्चयसाध्यं यथा च पक्षधर्मस्य व्याप्यभेदज्ञानमनुमितिप्रतिबन्धकम् अतो व्याप्याभेदज्ञानं तद्धेतुः सिध्यतीति चेन्न । धूमत्वपुरस्कारेण व्याप्तिस्मरणे पक्षधर्मताज्ञाने च सति विशेषदर्शनान्न धूमे व्याप्यभेदज्ञानं किन्तु अनुमितेरेवोत्पत्तिः तत्सामग्रीसत्त्वात् अतो व्याप्यभेदज्ञानं नानुमितिप्रतिबन्धकं येन

वमभ्युपेत्य, केवलान्वयिनः साध्यस्य धर्ममात्रमेव व्याप्यमिति तु द्रष्टव्यम् । एवमिति । लिङ्गं व्याप्यत्वे साध्ये लिङ्गतावच्छेदकं वा वन्हौ । यद्व्यतिरेकेति । यत्संशयव्यतिरेकनिश्चयाविलम्ब

लमित्याह केवलान्वयिन इति । वन्हौ साध्ये धूमालोकान्यतरत्वस्य व्यभिचारित्वाद्व्याचष्टे लिङ्गं व्याप्यत्व इति । धूमत्वादिसन्देहदशायां वन्हिव्याप्यत्वे साध्ये धूमालोकान्यतरत्वमेव लिङ्गमित्यर्थः । व्याप्यतावच्छेदकप्रकारकनिश्चयस्यैव प्रकृते परनिष्पादनीयत्वादाह लिङ्गतावच्छेदकं वेति । ननु मूलोक्तव्याप्तौ यथाश्रुते वैयधिकरण्यं घटाद्यभावनिश्चयप्रतिबद्ध्यघटादिविशिष्टज्ञाने घटादिनिश्चयाजन्यत्वात् व्यभिचारश्चेत्यत आह यत्संशयेत्यादि । या धीर्यद्व्यतिरेकज्ञानसामान्यप्रतिबद्ध्या सा तन्निश्चयत्वावच्छिन्नजन्येत्येव व्याप्तिः । ग्राह्यसंशयस्याप्रतिबन्धकत्वादेव घटादिविशिष्टबुद्धौ व्यभिचाराभावादतः पक्षधर्मधर्मिकव्याप्याभेदग्रहसामान्यप्रतिबद्ध्यत्वेनानुमितौ तद्धर्मिकव्याप्याभेदनिश्चयत्वावच्छिन्नजन्यत्वं साधनीयमिति भा-

व्याप्याभेदज्ञानं तद्धेतुः स्यात् । न च धूमत्वप्रकारेण व्याप्तिस्मरणपक्षधर्मताग्रहे इयं धूमव्यक्तिर्वह्निव्याप्या नेति भ्राम्यतोऽनुमित्यापत्तिरतो विशिष्टज्ञानं हेतुरिति वाच्यम् । धूमत्वस्य विशेषस्य दर्शनेन तादृशभ्रमानुत्पत्तेः तत्रानुमितिसङ्गावादेव अन्यथा निश्चयसामग्र्यां

व्याख्यातत्त्वमेतत् । यद्वा तद्व्यतिरेकनिश्चये कार्य्यानुत्पत्तौ तद्व्यतिरेकनिश्चयाभावस्य कारणतामपेक्ष्य तन्निश्चयस्यैव कारणत्वं युक्तं लाघवादित्यभिप्रायकमिदम् । अत एव ल्युट्प्रकरणे नियतपूर्वभावतया भेदग्रहाभाव एवानुमितिहेतुरित्यभिप्रेत्याऽस्तु वेत्यादि वक्ष्यति । सामान्यतो विशेषदर्शनात् सामान्यतो भ्रमो न स्यात् विशेषतस्तु स्यादेवेत्यभिप्रायिकामाशङ्कां निरस्यति न चेति । अस्तु

त्वः । ननूक्तभेदग्रहसामान्यप्रतिबद्ध्यत्वं यदि तादृशभेदग्रहत्वावच्छिन्नाभावजन्यत्वं तदा स्वरूपासिद्धिः, विशिष्टज्ञानहेतुमते भेदाग्रहस्यान्यथासिद्धत्वात्, यदि च तादृशाभावनियतोत्पत्तिकत्वं तदा घटादिज्ञानविशेषे व्यभिचारः इत्यतो वक्ष्यमाणास्वरसाच्चाह यद्वेति । यद्व्यतिरेकनिश्चय इति । व्याप्तिव्यतिरेकसंशये कार्योत्पादस्य प्रागेव स्वहस्तितत्वात्सामान्यतोऽभिधातुं न शक्य इति निश्चय इत्युक्तम् । अत एव उक्तग्रन्थस्य लाघवाभिप्रायकत्वादेव । वक्ष्यतीति । अन्यथा व्याप्तितात्पर्यकत्वे तामनिराकृत्य भेदाग्रहहेतुत्वाभिधानमसङ्गतं स्यादिति भावः । इत्यभिप्रायिकामिति । अन्यथा अथेत्यादिशङ्कानिरासेनैवोक्तशङ्काया निरस्तत्वात्तदुत्थानासङ्गतेरिति भावः । मूले भ्रमानन्तरमित्यत्र भ्रमादनन्तरमित्यपि क चित्पाठः । अत्र ल्यब्लोपे पञ्चम्या भ्रममुपश्लेषेति अर्थः । ननु गृह्यमाणव्याप्त्यवच्छेद-

सत्यां भ्रमानन्तरं परामर्श एव कुतो न भवति। अस्तु वा व्याप्यतया पक्षधर्मतया चावगतस्य भेदाग्रह एवानुमितिहेतुः परामर्शहेतुतया तस्यावश्यकत्वात्। अत एवासन्निकृष्टधूमज्ञानादप्यनुमितिः। न चैवं गौरवम्, तदा विशिष्टज्ञानानुपस्थितेः। न च जनकज्ञानाविरोधिनो ज्ञानस्याप्रतिबन्धकत्वात् भेदग्रहो न प्रतिबन्धक इति वाच्यम्। अभेदज्ञानस्याजनकत्वात् त्वयापि लि-

---

वैरभ्युपगमवादः। न चेत्यादि। अभेदज्ञानस्याहेतुत्वे भेदग्रहो न प्रतिबन्धको भवितुमर्हतीत्यर्थः। अभेदेति। तथा चातथाभूतस्यापि

कप्रकारेण पक्षधर्मतानिश्चयदशायामनुमितेरुत्पत्तिस्वीकारात् विशेषतो भेदग्रहस्य प्रतिबन्धकत्वमयुक्तमित्यत आह अभ्युपगमेति। न च भेदाग्रहस्यानुमितिहेतुत्वोपगमे ह्रदवृत्तित्वाव्याद्देर्वन्हिव्याप्यभेदाग्रहदशायां ह्रदो वन्हिमानित्यन्यथाख्यातिप्रसङ्गः। पक्षसाध्यादिभेदेन भेदाग्रहस्यापि नानात्वाद्वन्हिह्रदान्तर्भावेन व्याप्यभेदाग्रहस्यानुमितौ हेतुत्वाकल्पनादेव ह्रदो वन्हिमानित्यन्यथाख्यात्यापत्त्यसम्भवादिति भावः। न चेत्यादिमूलस्य भेदाज्ञानं नानुमितिप्रतिबन्धकमनुमितिजनकज्ञानाविरोधित्वादित्यनुमानपरत्वे स्वमते स्वरूपासिद्धिः स्यादत आह अभेदज्ञानस्याहेतुत्व इति। तथा च भेदज्ञानमनुमितिजनकज्ञानविघटकमनुमितिप्रतिबन्धकज्ञानत्वादिति सामान्यतो व्याप्तयनुमाने मूलतात्पर्यमिति भावः। मूलेऽजनकत्वादित्यस्यासन्निकृष्टादिस्थले परामर्शासत्त्वेनेत्यादिः। दीधितौ अतथाभूतस्य जनकज्ञानाविघटकस्य। तथा चोक्तानुमाने बाध

ङ्गपरामर्शे तादृशस्य प्रतिबन्धकत्वस्वीकाराच्च । अथ गोत्वं मधुरत्वावान्तरजातिर्वा लिङ्गं न स्यात् तद्गतधर्मान्तरस्याभावात् अत एव तस्य विलक्षणत्वात् इति चेन्न । व्यक्तेरेव तत्र प्रकारत्वात् । नहि गौर्गोत्वमिति

प्रतिबन्धकत्वमनायस्या वक्तव्यमिति भावः । अतथाभूतत्वस्य सन्दिग्धत्वे व्यभिचारमाह त्वयापीति । विशेषणान्तरदाने चाप्रयोजकत्वमिति भावः । गोत्वे गोपदशक्यतावच्छेदकत्वमविशेषितं विशेषितं वा तदस्तीत्यतो मधुरत्वेति । मधुरत्वव्याप्यो धर्मो जातिरखण्डोपाधिर्वेति फलतो न विशेषः । गौरितिज्ञाने गोत्वप्रकारक-

---

इति भावः । सन्दिग्धत्व इति । यद्यसन्निकृष्टादिस्थले परामर्शादिसम्भवस्तदा स एव जनक इति तद्विरोधितामादायैव साध्यं स्थास्यतीति क्रमेण जनकज्ञानाविरोधित्वस्य संदिग्धत्व इत्यर्थः । विशेषणान्तरेति । ग्राह्याभावानवगाहित्वविशेषणेत्यर्थः । अप्रयोजकत्वमिति । व्यभिचारप्रतिसन्धानादित्यादिः । शक्यतावच्छेदकत्वमिति । न्यायमतेनेदम्, तन्मते तु गोपदशक्यत्वमेव तथा बोध्यम । पशुत्वादेः साध्यत्वे स्वर्गादौ व्यभिचाराद्गोपदशक्यतावच्छेदकत्वेन हेतुत्वासम्भवादाह विशेषितमिति । प्राणिवृत्तित्वादिविशेषितमित्यर्थः । तत् व्याप्यतावच्छेदकम् । मधुरत्वेतीति । मधुरविशेषेत्यादिकं न पदम् । रसवृत्तित्वादिविशिष्टं तदादिपदशक्यतावच्छेदकं च रसत्वादेः साध्यतायां गुणत्वादिकमादाय गुणादौ व्यभिचारीति भावः । गुणगतजातेः परैरनङ्गीकारादाह मधुरत्वव्याप्य इति । फलत इति । उभयथापि तद्गतधर्मान्तराभावताक्षतेः । एवं च मूले जाति-

ज्ञानयोरविशेषः। अन्यथा गोत्वमितिज्ञानस्य निर्विकल्पकत्वापत्त्या व्याप्यत्वग्रहे परामर्शे चानुपयोगात् गवेतरावृत्तित्वे सति सकलगोवृत्तित्वं गोत्वत्वमित्यनुभवा-

---

त्वं विशेषमाशङ्क्याह अन्यथेति। व्यक्तेः प्रकारत्वेऽपि लिङ्गतावच्छेदकत्वासम्भवादाह गवेतरेति। गोत्वत्वस्यात्राप्रवेशान्नात्माश्रयः।अत्र च यथासम्भवं गवेतरासमवेतत्वादिकमेवोपादेयं का-

---

पदमनुगतधर्मपरमिति भावः। विशेषमिति। गोत्वमिति ज्ञानाद्भेदकमित्यर्थः। मूलेऽनुपयोगादिति। सम्बन्धितावच्छेदकरूपेण एकसम्बन्धिज्ञानस्यापरसम्बन्धिस्मारकत्वात् न्यायमते व्याप्तेः हेतुतावच्छेदकगर्भत्वाच्चेति। दीधितावसम्भवादिति। इदं च व्याप्यत्वमिव तदवच्छेदकत्वमपि वृत्तिनियामकेनैव सम्बन्धेनेति प्राचां मतेन, तेनाश्रयताविशेषेण गवादिव्यक्तेस्तादात्म्येन गोत्वादिव्यक्तेरेव वा गोत्वादिनिष्ठव्याप्तेरवच्छेदकत्वसम्भवेपि न क्षतिः। ननु सकलगोवृत्तित्वं गोत्वव्यापकत्वमेव वक्तव्यमन्यस्य दुर्वचत्वात् तत्र च गोत्वत्वेन गोत्वप्रवेशादात्माश्रय इत्यत आह गोत्वस्येति। तथा च गोनिष्ठात्यन्ताभावाप्रतियोगित्वादिकमेव तथा वाच्यं तत्र गोत्वस्य स्वरूपतः प्रवेशान्नोक्तदोष इति भावः। ननु सास्नावान् गोत्वादित्यादौ गोत्वत्वघटकस्य सकलगोवृत्तित्वादेर्वैयर्थ्यान्न तद्रूप्येण हेतुत्वं सम्भवतीत्यत आह अत्र चेति। यथासम्भवमिति। सास्नायाः साध्यत्वे गवेतरासमवेतमात्रं जातित्वादौ साध्ये तादात्म्येन सकलगोसमवेतमात्रं हेतुः कार्यमतो न वैयर्थ्यम्। मूलोक्तविशिष्टं गोपदशक्यतावच्छेदकत्वे साध्ये तादात्म्यसम्बन्धेन हेत्वभिप्रायेण। अन्यथा गवेतरासमवेतगोरूपादौ सकलगोसमवेतद्रव्यत्वादौ च व्यभिचारापत्तेरिति भाव। ननु गवेतरासमवेतस्य वाच्यत्वादेः सास्नाशून्येपि

च । न चैवमनवस्था, तदितरावृत्तित्वे सति तद्वृत्तित्वस्यानुभवेनापलापासम्भवात् ॥

लादौ व्यभिचारवारणाय समवायेन सम्बन्धेन हेतुत्वस्यावश्यवाच्यत्वेनाभावादिसाधारण्येऽप्यदोषात् व्यतिरेकेऽपि रूपान्तरेण सम्बन्धान्तरेण च गोत्वाभावस्यापि व्यभिचारितया गवेतरासमवेतस्य तत्त्वेन समवायसम्बन्धेनाभावस्यैव गमकत्वात् ॥

सत्त्वात् व्यभिचारेण तावन्मात्रस्य न हेतुत्वं सम्भवतीत्यत आह कालादाविति । अवश्यमिति । अन्यथा विशिष्टस्यापि कालिकविशेषणतासम्बन्धेन कालादौ सत्त्वात् तदुपादानेपि व्यभिचारतादवस्थ्यादिति भावः । गोत्वेन सास्नादिसाधने सकलगोसमवेतत्वांशस्य वैयर्थ्येपि गोत्वाभावेन सास्नादिव्यतिरेकसाधने हेतुभूताभावप्रतियोगिकोटौ तदवश्यं निवेश्यमन्यथा गवेतरासमवेतस्य वाच्यत्वादेः सर्वत्र सत्त्वाद्गवेतरासमवेतत्वावच्छिन्नाभावस्याप्रसिद्धेरिति मतं निरस्यति व्यतिरेकेपीति । रूपान्तरम् उभयत्वादिसम्बन्धान्तरं संयोगादि । यद्वा ननु व्यतिरेकव्याप्तेर्गमकत्वपक्षे वन्हिमान् नीलधूमादित्यादौ नीलत्वादेरिव सास्नावान् गोत्वादित्यत्रापि सकलगोसमवेतत्वस्य न वैय्यर्थ्यमखण्डाभावघटकत्वादत आह व्यतिरेकेपीति । व्यभिचारित्वं साध्याभावाव्यापकत्वम् । गमकत्वादिति । तथा च समवायेन गोत्वाभावस्य प्रतियोगितावच्छेदकं गवेतरासमवेतत्वमात्रमित्यखण्डाभावघटकत्वमपि तस्य नेति भावः । अयमालोक इत्यादिमूलमपि पूर्ववत्साध्यसम्बन्धितावच्छेकरूपवत्त्वव्याप्तिमभिप्रेत्य, धूमत्वादिसन्देहदशायां तद्घटितस्य व्यापकसामानाधिकरण्यस्य निश्चयासम्भवाति ध्येयम् ॥

इति परामर्शपूर्वपक्षः ।

अत्रोच्यते । अयमालोको धूमो वा उभयथापि वह्निव्याप्य इति ज्ञानं ततोऽनुमितिः । न च धूमत्वेनालोकत्वेन वा तत्र निश्चयः । अथ तदन्यान्यत्वमेव तत्र लिङ्गम् । न च तदज्ञानदशायामनुमितिदर्शनात् न तथेति वाच्यम् । धूमालोकान्यान्यत्वज्ञानं विना तवापि तत्र व्याप्यत्वानिश्चयेन तदर्थं तद्बोधावश्यकत्वादिति चेन्न । न हि धूमालोकान्यान्यत्वं धूमान्यान्यत्वं वा

लिङ्गं लिङ्गतावच्छेदकम् । तथा च न व्यभिचारः । न तथा न तेन व्यभिचारवारणम् । न हीति । धूमान्यान्यत्वमिति दृष्टान्ता-

---

अथ परामर्शसिद्धान्तः ।

धूमालोकान्यतरत्वस्य वन्हिव्यभिचारित्वादत आह लिङ्गतावच्छेकमिति । अग्रेतनतथाशब्देन व्यभिचारवारणं परामर्शयितुं पूरयति तथा च न व्यभिचार इति । व्याप्यतावच्छेदकप्रकारकनिश्चयस्यानुमितौ न व्यभिचार इत्यर्थः । आलोकत्वाद्यनवच्छिन्नलिङ्गकानुमितिं प्रत्येव धूमत्वाद्यवच्छेदेन व्याप्तिनिश्चयः कारणमित्याशयेनेदम् । धूमत्वाद्यवच्छिन्नलिङ्गकानुमितिं प्रत्येव तदवच्छेदेन व्याप्तिनिश्चयस्य हेतुत्वे प्रकृतानुमितेरतथात्वेन व्यभिचारशङ्कायां अप्यसम्भवात् । विशेषसामग्रीसहितायां एव सामान्यसामग्र्याः कार्यजनकत्वनियमस्यैव वा प्रकृते व्यभिचारो बोध्यः । अन्यतरत्वस्याज्ञानदशायामनुमित्युत्पादेन तस्य

व्याप्यतावच्छेदकं गौरवात् व्यभिचारावारकविशेषणवत्त्वाच्च। किन्तु धूमत्वादिकम्, तच्च तत्र सन्दिग्धमेव। ननु तदन्यान्यद्वह्निव्याप्यमेव व्यभिचाराभावेन व्याप्तिविरहसाधनस्य बाधितत्वात्, पुरुषस्तु तत्र नीलधूमवत्त्वादित्यत्रेवाऽधिकेन निगृह्यते न तु व्याप्यत्वासिद्ध्येति चेन्न। तदन्यान्यत् धूमालोकस्वरूपमेव तच्च व्याप्यमिति सत्यम्। न च वस्तुगत्या व्याप्यज्ञानादनुमितिः, अतिप्रसङ्गात्, किन्तु व्याप्यतावच्छेदकप्रकारकज्ञानात्। न

र्थम्। न चैकधर्मस्यावच्छेदकत्वापेक्षया धर्मद्वयस्य तत्त्व एव गौरवमिति वाच्यम्। तादृशैकधर्मघटकानेकभेदादिघटकतया धर्मद्वयस्यैव प्रथमोपस्थितत्वेन चावच्छेदकत्वौचित्यात्। अन्यथा वह्न्यादीनामपि व्याप्यतया तावदन्यतमत्वस्यैवावच्छेदकत्वं स्यात्।

व्याप्तयनवच्छेदकत्वे धूमत्वमप्यवच्छेदकं न स्यात्तदज्ञानेप्यालोकादिना वह्न्यनुमानादतो व्याचष्टे न तेनेति। धूमत्वादिसन्देहदशोत्पन्नानुमितौ व्याप्यतावच्छेदकप्रकारकनिश्चयस्य व्यभिचारवारणं नेत्यर्थः। अनूक्तोपालम्भं परिहरति दृष्टान्तार्थमिति। तथा च मूले वाशब्द इवार्थ इति भावः। तटस्थः शङ्कते न चेतिायथाश्रुते गुरूणां धूमत्वस्यानवच्छेदकत्वे तदवच्छेदेन व्याप्तिज्ञानदशायामनुमित्यपलापापत्तेरिति ध्येयम्। एकधर्मः धूमालोकान्यतरत्वरूपः। धर्मद्वयं धूमत्वालोकत्वरूपम्। तत्त्वे व्याप्यतावच्छेदकत्वे। घटकतयेति। तथा च धर्मद्वयस्यावच्छेदककोटिप्रवेशावश्यकत्वे तन्मात्र एवाव-

च तदन्यान्यत्वं वह्निव्याप्यतावच्छेदकमित्युक्तम्। न चैवं तदन्यान्यत्वाद्वह्निव्याप्यत्वमपि तत्र नानुमेयं व्यर्थविशेषणत्वादिति वाच्यम्। प्रत्यक्षं हि तदन्यान्यत्वविशेषदर्शनाद्व्याप्यत्वज्ञानं जनयति विशेषणज्ञानविशेषणविशेष्यसम्बन्धविशेषणविशेष्येन्द्रियसन्निकर्षतदसंसर्गाग्रहविशेषदर्शनानां सत्त्वेन वह्निव्याप्यत्वप्रत्यक्षसत्त्वात्। न चैवं न प्रत्यक्षेऽपि तदन्यान्यत्वज्ञानं सहकारीति वाच्यम्। अन्वयव्यतिरेकाभ्यां गुरोरपि तस्य विशेषदर्शनत्वेन प्रत्यक्षसहकारित्वात्। तस्मात्तदन्यान्य-

---

अन्वयेति। विशेषदर्शनं हि विपरीतज्ञानविरोधिया प्रत्यक्ष उपयुज्यते तत्त्वज्ञान्यतरत्वदर्शनस्यापि व्यावर्त्तकधर्मदर्शनत्वेनाक्षतम्।

च्छेदकत्वं कल्प्यते लाघवादिति भावः। अन्यथा अनुगतैकधर्मसत्त्वे एव लघुनानाधर्मस्यानवच्छेदकत्वे। स्यादिति। तथा च धूमालोकान्यतरत्वमुपादाय व्यभिचारणं व्याहन्येतेति भावः। व्याप्यवत्तानिश्चयस्यैव विशेषदर्शनत्वाद्वह्निव्याप्तिव्याप्यत्वेनान्यतरत्वदर्शनस्योपयोगित्वमसम्भवि व्यर्थविशेषणत्वादन्यतरत्वे वह्निव्याप्तिव्याप्यत्वाग्रहादत आह विशेषदर्शनं हीति। स्वमते कारणत्वाभावादुक्तमुपयुज्यत इति तत्त्वम् विपरीतज्ञानविरोधित्वम्। व्यावर्त्तकेति। यद्धर्मावच्छेदेन यदसंसर्गाग्रहस्तद्धर्मवत्तानिश्चयस्यापि व्यावर्तकधर्मदर्शनत्वस्य परैः स्वीकृतत्वात्। अन्यथेन्धनत्वावच्छेदेन सौरभासंसर्गाग्रहदशोत्पन्नस्येदमिन्धनमितिज्ञानस्य सत्त्वेपि इदं सुरभि न वेति सन्देहप्रसङ्गात्। अनुमितौ तु व्याप्यसंसर्गाग्रहस्य हेतुत्वे द्र-

स्वज्ञानं तत्र व्याप्यताज्ञानोपक्षीणं न तु साक्षादनुमिति-हेतुरिति । किञ्च वह्निव्याप्यवानयमितिशाब्दज्ञाने व्याप्यत्वज्ञानं कारणमित्यन्यत्रापि तथा । अथ वह्निव्याप्यत्वमपि वह्निव्याप्यतावच्छेदकम्, तथा हि, वह्निनिरूपिता धूमादिप्रत्येकवृत्तिरेव व्याप्तिर्व्याप्तित्वेन सकलधू-

---

अत्र च तदन्यान्यत्वस्यातिरिक्तत्वे धूमत्वत्वादेस्तदवृत्तित्वात् धूमत्वादिरूपत्वेऽपि च धूमत्वत्वादेरप्रवेशाल्लिङ्गत्वेऽपि न वैयर्थ्यमित्यपि द्रष्टव्यम् । एवञ्चान्यतरत्वस्य व्याप्यत्वावच्छेदकत्वे स्थिते तदवच्छेदेन तद्ग्रहोपगमे तवाप्यन्यथाख्यातिस्वीकारप्रसङ्गः।अस्तु वा गुरुरपि धर्मोऽवच्छेदकस्तथापि शुद्धव्याप्तिप्रकारकज्ञानस्थले व्यभिचारान्न तस्य हेतुत्वमित्याह किञ्चेति । वन्हीत्यादि । व्याप्ते-

---

व्यत्वावच्छेदेन वन्हिव्याप्यत्वासंसर्गाग्रहदशायां द्रव्यत्ववज्जलमिति ज्ञानात् जलं वन्हिमदित्यन्यथाख्यात्यापत्तेरिति भावः। अथायं वन्हिव्याप्यो धूमालोकान्यतरत्वात् इत्यनुमाने व्यर्थविशेषणत्वाभावादन्यतरत्वस्य विशेषदर्शनविधयोपयोगित्वानुधावनं मौलमनुचितमतस्तदपि समुचितमिति अत्रेति । अतिरिक्तत्वे धूमत्वाद्यतिरिक्तत्वे। तदवृत्तित्वादिति । तदन्यान्यत्वावृत्तित्वादित्यर्थः । तथा च भिन्नधर्मत्वान्न वैयर्थ्यम्।धूमत्वादिरूपत्वेपीत्यपिकारोऽनाख्यायाम् । आलोके धूमे चानुगतप्रत्ययानुरोधेन धूमालोकान्यतरत्वस्यातिरिक्तस्यैव युक्तत्वात् । अन्यथाऽतिरिक्ताभावमात्रासिद्धिप्रसङ्गात् इति ध्येयम् । अन्यतरत्वस्य व्याप्यत्वावच्छेदकत्वेपि तदवच्छेदेन व्याप्तिग्रहादनुमितौ बाधकाभावः इत्यत आह एवं चेति । शुद्धेति । साध्यवदन्यावृत्तित्वरूपस्य साध्यसम्बन्धितावच्छेदकरूपवत्त्वस्य वा धूमत्वाद्यघटितव्याप्यत्वस्य ज्ञानस्थले इत्यर्थः । व्यभिचारादिति । पूर्ववद्वह्या-

मादिवृत्तिव्याप्यत्वच्छेदिका आश्रयभेदेनावच्छेदकभेदेन च व्याप्तिभेदादिति चेन्न । सकलधूमादिवृत्तिव्याप्तौ मानाभावात् । यत्र वह्निव्याप्यस्तत्र वह्निरिति व्याप्तिबुद्धौ शाब्दव्याप्यत्वबुद्धौ च प्रत्येकवृत्तिव्याप्त्याश्रयत्वस्यैव विषयत्वात् प्रत्येकवृत्तिव्याप्तिज्ञानं विना तदबोधाभावा-

---

र्व्याप्यत्वावच्छेदकत्वादिति भावः । मानाभावादिति । वस्तुतो विशेषव्याप्यवच्छिन्ना महाव्याप्तिरतिरिच्यताम् किं तेन, न हि वस्तुतो व्याप्यत्वावच्छेदकप्रकारकं पक्षधर्म्मताज्ञानं हेतुरतिप्रसङ्गात् परन्तु यदवच्छेदेन व्याप्तिर्गृह्यते तत्प्रकारकम् । न च तदानीं व्याप्यत्वावच्छेदेन व्याप्तिर्गृह्यते, न च तदग्रहेऽनुमितिरपलपनीया, मानाभावात् कल्पयत्वाविशेषे लघुरूपावच्छिन्नस्यैव नियतपूर्ववृ-

---

ख्येयम् । तस्य व्याप्यतावच्छेदकप्रकारकज्ञानस्य । ननु शाब्दस्थले व्याप्यत्वावच्छेदेन व्याप्तिग्रहादेवानुमितिरिति प्राक् परैरुक्तमतो न व्यभिचार इत्यत आह व्याप्तेरिति । तथा चाभेदेनैवावच्छेद्यावच्छेदकभावविरहाद्व्याप्यत्वावच्छेदेन व्याप्तिग्रहस्वीकारे परेषामन्यथाख्यातिप्रसङ्ग इति भावः । ननु वन्हिमदन्यावृत्तित्वावच्छिन्नव्यापकीभूतवन्हिसामानाधिकरण्यरूपाया एव महाव्याप्तेः सर्वसिद्धत्वान्मानाभावादित्यसङ्गतमत आह वस्तुत इति । वन्हिमदन्यावृत्तित्वरूपविशेषव्याप्यवच्छिन्ना वन्हेर्महाव्याप्तिर्धूमादिप्रत्येकघटितव्याप्तितोऽतिरिच्यतामित्यर्थः । अतिप्रसङ्गात् धूमवान् पर्वत इत्याकारकज्ञानमात्रादप्यनुमितिप्रसङ्गात् । तत्प्रकारकमिति । पक्षधर्मताज्ञानं हेतुरिति पूर्वेणान्वयः । तदानीं शाब्दपरामर्शदशायाम् । तदग्रहे व्याप्यत्वावच्छेदेन व्याप्यत्वाग्रहे । कल्पयत्वेति मम अतीन्द्रियादिस्थले

त्तितायाः कल्पयितुं युक्तत्वात् । एतेन व्याप्तिग्रहविषयधर्ममात्रवृत्तिधर्मप्रकारकं पक्षधर्मताज्ञानं हेतुरित्यपास्तम् । सामान्यलक्षणानङ्गीकारे धूमत्वादेरपि तथात्वायोगात् वन्हिव्याप्यं सर्वं प्रमेयं धूमवान् पर्वत इति ज्ञानादप्यनुमितिप्रसङ्गाच्च । व्याप्तिसमानाधिकरणत्वेन तादृशधर्मभानोक्तौ च सा धूमव्यक्तिर्वन्हिव्याप्येति ज्ञा-

---

विशिष्टज्ञानस्येव तवापि शाब्दपरामर्शस्थले व्याप्यतावच्छेदकप्रकारकज्ञानस्य कल्प्यत्वेऽवच्छेदकलाघवमाहत्य व्याप्तिप्रकारकनिश्चयत्वेनैव हेतुत्वस्य युक्तत्वादित्यर्थः । शाब्दपरामर्शसंग्राहकं प्रकारान्तरमाशङ्क्य निराचष्टे न चेति । एतेनेत्यपि क चित्पाठः । स च न सन्दर्भशुद्धः । धूमो वन्हिव्याप्यवदित्याकारकव्याप्तिग्रहस्य विशेष्यवृत्तित्वं द्रव्यत्वादेरपीति तत्प्रकारकपक्षधर्मताज्ञानादनुमितेर्वारणार्थं मात्रपदम् । न च विशिष्टसत्त्वं द्रव्यत्वव्याप्यं सत्त्ववच्च द्रव्यमित्यादिज्ञानादनुमित्यापत्तिः । विशिष्टसत्त्वे साध्यवदन्यावृत्तित्वरूपायां व्याप्तेरसत्त्वे परमते तत्र व्याप्तिग्रहविशेष्यत्वस्यैवासम्भवात् । तथात्वायोगादिति । व्याप्तिग्रहविशेष्यमात्रवृत्तित्वायोगादित्यर्थः । सामान्यलक्षणाविरहेणासन्निकृष्टधूमादेः प्रत्यक्षासम्भवात् । तथा च वन्हिव्याप्यो धूमो धूमवांश्च पर्वत इत्यादिप्रत्यक्षस्थलीयानुमितौ व्यभिचारः । दूषणान्तरमाह वन्हिव्याप्यमिति । यद्वा ननु सामान्यलक्षणावादिनां नैयायिकानामुक्तरूपेण हेतुत्वं सम्भवत्यत आह वन्हिव्याप्यमित्यादि । वन्हिव्याप्यत्वेनालोकस्य भाने धूमत्वस्य व्याप्तिग्रहविशेष्यवृत्तित्वमेव न सम्भवतीत्यतः सर्वमित्युक्तम् । वन्हिव्याप्यसर्वयोः परस्परमुद्देश्यविधेयभावे बाध इत्यतो वन्हिव्याप्ये सर्वस्मिन् धर्मान्तरं विदधाति प्रमेयमिति । व्याप्तीति । व्याप्तिग्रहधर्मितावच्छेदकविधया तादृशधर्मस्य भानोक्तावित्यर्थः । तेन धूमो वन्हिव्याप्य इत्यादिज्ञाने व्याप्तिसमानाधिकरणत्वस्याप्रकारत्वेपि न क्षतिः । धूमत्वावच्छेदेन व्याप्तिग्रहे तत्रानुमितापत्तिरतन्नदनवच्छेदकत्वसूचनायोक्तं सा धूमव्यक्तिरिति । पक्षावृत्तिधूमव्यक्तिरित्यर्थः । उक्तज्ञानादिति । वन्हिव्याप्यं सर्वं प्र-

नसहितादुक्तज्ञानात्तत्प्रसङ्गो वन्हिव्याप्यवानिति शाब्दज्ञानासंग्रहः। अत एव व्याप्यत्वभानांशे प्रकारतया यस्तादृशो धर्मो भासते तत्प्रकारकं पक्षधर्मताज्ञानं हेतुः, वन्हिव्याप्यवानियत्र च वन्हिव्याप्यत्वमेव तथा धूमवानियादौ च धूमत्वादिकम्, धूमसमानाधिकरणेयादिव्याप्तिज्ञाने तस्यापि प्रकारकत्वादिति परास्तम्। धूमसमानाधिकरणवन्हिव्याप्यं सर्वं प्रमेयं धूमवानयं प्रमेयत्वव्याप्यं सर्वमभिधेयं समानाधिकरणवांश्चायमित्यादिज्ञानादप्यनुमितापत्तिः। न च धूमत्वादेरतिरिक्तवृत्तित्वग्रहे स एव प्रतिब-

---

मेयमित्याद्युक्तज्ञानादनुमितिप्रसङ्ग इत्यर्थः। ननु व्याप्यनतिरिक्तवृत्तित्वेन तादृशधर्मस्य भानं वाच्यं तथा च सा धूमव्यक्तिर्वन्हिव्याप्येत्यत्र धूमत्वस्य तदनवगाहनान्नातिप्रसङ्ग इत्यत आह वन्हिव्याप्यवानिति। तेन व्याप्तिसामानाधिकरण्यादेः कुत्राप्यविषयीकरणादिति भावः।अत एव वक्ष्यमाणदोषादेव। परास्तमित्यत्रेतनेनान्वयः। व्याप्यत्वभानांश इति। व्यभिचारधीविरोधितावच्छेदकप्रकारितान्तर्भूतप्रकारताशालीत्यर्थः। तेन व्यापकसामानाधिकरण्यसाध्यवदन्यावृत्तित्वरूपद्वयोरेव व्याप्तयोः प्रवेशान्नाग्रिमग्रन्थासङ्गतिरिति ध्येयम्। तादृशः व्याप्तिग्रहविशेष्यमात्रवृत्तिः। तेन वन्हिव्याप्यो धूमो वन्हिसमानाधिकरणवांश्च पर्वत इत्यादिबुद्धेर्व्युदासः। तथा निरुक्तधर्मः। तस्यापीति। धूमत्वादेरपीत्यर्थः। धूमेत्यादि। व्याप्यत्वभानांशे धूमत्वस्य प्रकारतासम्पत्त्यर्थं धूमसमानाधिकरणवन्हित्वेन साध्यत्वानुसरणम्। व्याप्तिस्त्वत्र साध्यवदन्यावृत्तित्वरूपैव प्रविष्टा धूमव्यापकवन्हिसामानाधिकरण्यरूपव्याप्तेः प्रवेशेऽनुमिताविष्टापत्तिः। अत एव व्यापकसामानाधिकरण्यरूपव्याप्तिं निवेश्यापि दोषमाह प्रमेयत्वव्याप्यमित्यादि। समानाधिकरणत्वं न वन्हिव्याप्तिग्रहविशेष्यमात्रवृत्ति इत्यतो वन्हिव्याप्यं सर्वमित्यपहाय प्रमेयत्वव्याप्यमित्युक्तम्। इत्यादीत्यादिपदादवृत्तिमांश्चायं वन्हिव्याप्यं सर्वं प्रमेयं वन्हिमांश्चायमित्यादेरुपग्रहः। अतिरिक्तवृत्तित्वेति। व्या-

न्यकस्तदग्रहे त्वनुमितिविघटापत्तिरिति वाच्यम् । एवंविधेष्टापत्त्यैव सर्वत्र प्रतीकारे विशेषणानुसरणवैयर्थ्यात् व्यभिचाराग्रहपक्षधर्मताज्ञानयोरेव हेतुत्वस्य सुवचत्वात्। किञ्च पुरुषान्तरस्य तस्यैव वा कालान्तरे वर्त्तमानं व्याप्तिग्रहमादायातिप्रसङ्गस्य भङ्गाय स्वसमानकालीनस्वसमानाधिकरणव्याप्तिग्रहविषयधर्ममात्रवृत्तिधर्मप्रकारकं पक्षधर्मताज्ञानं वाच्यं तथा च स्वत्वस्याननुगतत्वात्कारणतावच्छेदकस्य तत्तद्व्यक्तिमात्रपर्य्यवसायित्वे मिथो व्यभिचारः तत्तत्पक्षधर्मताज्ञानत्वेनैव हेतुत्वसम्भवेऽधिकवैयर्थ्यञ्च । एतेन गृह्यमाणव्याप्यवच्छेदकताकेत्याद्युपदर्शितप्रकारद्वयमपि प्रत्युक्तं वेदितव्यम् । एवं यद्धर्मावच्छेदेन व्याप्तिज्ञानं तद्धर्मप्रकारकं पक्षध-

---

त्रयभावववृत्तित्वेत्यर्थः। विशेषणं व्याप्तिग्रहविशेष्यमात्रवृत्तीत्यादिकम् । ननु विशेष्यतावच्छेदकविधया व्याप्यत्वभानांशे प्रकारीभूतो यस्तादृशधर्मस्तत्प्रकारकमेव पक्षधर्मताज्ञानं हेतुर्वाच्यम् उक्तस्थलद्वये च धूमत्वादिकं व्याप्तिघटकमपि न विशेष्यतावच्छेदकविधयैव प्रकारीभूतमतो नातिप्रसङ्ग इत्यत आह किं चेति । अतिप्रसङ्गभङ्गेति । पक्षधर्मताज्ञानमात्रदशायामनुमितेर्वारणायेत्यर्थः । स्वसमानाधिकरणेत्यादौ स्वपदं तत्तत्पक्षधर्मताज्ञानपरम् । तत्पक्षकतत्साध्यकानुमितित्वावच्छिन्नं प्रति हेतुत्वे मिथो व्यभिचारः, तत्तदनुमितिं प्रति हेतुत्वे पुनराह तत्तदिति । अधिकं व्याप्तिग्रहविशेष्यमात्रवृत्तिधर्मप्रकारकत्वादिकम् । एतेनेति । उक्तयुक्त्या स्वसमानकालीनत्वादिप्रवेशादननुगतत्वेनेत्यर्थः । निरस्तमित्यग्रिमेणान्वयः । प्रकारद्वयमिति । पक्षधर्मताग्रहप्रकारीभूतधर्मावच्छिन्नविशेष्यताकव्याप्तिज्ञानमादाय द्वित्वमवसेयम् । प्रत्युक्तमिति । अत्रापि स्वसमानकालीनत्वादेरवश्यं प्रवेशनीयतया अननुगतत्वादिति भावः । ननु तद्धर्मावच्छिन्नविशेष्यकव्याप्तिज्ञानविशिष्टतद्धर्मावच्छिन्नप्रकारकपक्षधर्मताज्ञानत्वेनैव हेतुत्वं वाच्यं वैशिष्ट्यं चात्र एककालावच्छेदेने-

र्मताज्ञानं हेतुरित्यपि परास्तम् । तद्धर्मविश्रान्तमूर्त्तिकत्वेनाप्यननुगतत्वाच्च । यत्रेच्छा तत्साधनताज्ञानस्येच्छाहेतुत्वेऽपि समानमिति चेत् । सत्यम्, प्रतिवक्ष्यते हि तत्र लघुगुरुरूपाभ्यां युगपदुपस्थि-

---

कात्मवृत्तित्वमतो नातिप्रसङ्गो न वाऽननुगम इत्यत आह तद्धर्मेति । यत्त्वतत्त्वयोरित्यादिः । तथा च तव हेतुतावच्छेदकीभूतं धूमत्वादिकमन्तर्भाव्यानन्तकार्यकारणभावकल्पने गौरवमस्माकं तु तत्तत्साध्यव्यभिचारधीविरोधितावच्छेदकीभूतप्रकारित्वावच्छिन्नतत्पक्षधर्मतानिश्चयत्वेनैवानुगतरूपेण तादृशनिश्चयोत्तरतत्पक्षसाध्यकानुमितिसामान्यं प्रति हेतुत्वमित्याशयः । नन्वेवं कालान्तरीयपुरुषान्तरीयफलेच्छाविषयतामादायातिप्रसङ्गादुपायेच्छां प्रति इष्टसाधनताज्ञानत्वेन हेतुत्वं तवापि दुर्घटमित्याशयेन शङ्कते यत्रेति । प्रतिवक्ष्यत इति । फलेच्छायाः फलसाधनताज्ञानस्य च द्वयोरेव सामानाधिकरण्यप्रत्यासत्त्योपायेच्छां प्रति हेतुत्वं न त्विच्छाविषयफलसाधनताज्ञानत्वेन हेतुत्वं येनातिप्रसङ्गः स्यादिति भावः । इदमत्रावधेयम । भोजनेच्छासामान्यं प्रति न तृप्तीच्छात्वेन हेतुत्वं दुःखनिवृत्तीच्छया जनितायां व्यभिचारात् किन्तु तृप्तीच्छाविशिष्टतृप्तिसाधनताज्ञानोत्तरभोजनेच्छादिकं प्रत्येव तृप्तीच्छात्वेन भोजनधर्मिकतृप्तिसाधनताज्ञानत्वेन च द्वयोर्हेतुत्वं सुखादेरिवेच्छाया अपि विजातीयमात्रारम्भकत्वस्य मिश्राद्युक्तस्य प्रामाणिकत्वे तादृशभोजनेच्छां प्रति तृप्तीच्छाविशिष्टतृप्तिसाधनताज्ञानत्वेनैव हेतुत्वं वाच्यम् । के चित्तु भोजनधर्मिकतृप्तिसाधनतादिधीजन्यभोजनेच्छात्वाद्यवच्छिन्नं प्रत्येव तृप्तीच्छात्वेन हेतुत्वम् । न च तृप्तिसाधनताधीजन्यतावच्छेदकधर्मस्यापरिचयात्तृप्तीच्छाजन्यभोजनेच्छात्वस्य तथात्वे चान्योन्याश्रय इति वाच्यम । भोजनत्वप्रकारकतत्तादिच्छां प्रति तृप्तिसाधनत्वावगाहितत्तज्ज्ञानत्वेन विशेषतो हेतुत्वं गृहीत्वा पश्चात्तज्जन्यतासम्बन्धेन तृप्तिसाधनताज्ञानविशिष्टस्य भोजनेच्छात्वस्य तृप्तीच्छाजन्यतावच्छेदकत्वात् । तत्तज्जन्यव्यक्तीनामननुगमेपि सम्बन्धविधया तासां प्रवे-

त्। अपि च यत्र धूमत्वव्याप्त्योर्वैशिष्ट्यं प्रथममेव प्रत्यक्षेण युगपत्पक्षधर्मे भासते तत्र लाघवात् व्याप्यत्व-

---

तौ लघुरूपावच्छेदेनैव कारणत्वं कल्प्यते लाघवात् नियमादेरेकतररूपावच्छेदेनाप्यकल्पत्वात् इत्याशयवानाह अपि चेति। ननु स्वसमानाधिकरणाभावेत्यादिव्याप्तौ स्वपदार्थस्यैकस्याभावेन धूमादिकमेव विशिष्य उपादेयं तत्र च धूमसमानाधिकरणाभावप्रतियोगितानवच्छेदकवन्हित्वावच्छिन्नवन्हिसमानाधिकरणेन्धनवानयमिति ज्ञानादप्यनुमितिप्रसङ्गेन तादृशवन्हिसमानाधिकरणधूमत्वं

शे क्षत्यभावात्। स्वरूपसम्बन्धेन हेतुहेतुमद्भावस्थले सम्बन्धाननुगमस्य सर्वैरेव स्वीकारादिति। यत्तु फलसाधनताया अपि उपायेच्छाविषयत्वाद्भोजनधर्मिकतृप्तिसाधनताज्ञानत्वेन तृप्तिसाधनताप्रकारतानिरूपितभोजनत्वावच्छिन्नोद्देश्यताकेच्छात्वेन हेतुहेतुमद्भावं गृहीत्वा पश्चात्तृप्तिसाधनताधीजन्यभोजनत्वावच्छिन्नं प्रति तृप्तीच्छात्वेन हेतुत्वं ग्राह्यमिति। तत्तुच्छम्। उपायेच्छायाः फलसाधनताविषयकत्वे मानाभावात्। तृप्तिसाधनं भोजनं जायतामित्याकारकेच्छानुभवस्य सन्दिग्धत्वात्। अत एवेच्छायाः स्वजनकज्ञानयावत्प्रकारप्रकारवत्त्वनियमस्योपायेच्छायामिष्टसाधनत्वाप्रकारतया व्यभिचारः शब्दालोके मिश्रैरप्युक्तः। न च प्रकारान्तरेण जन्यत्वस्य दुर्वचत्वात्तृप्त्यादीष्टसाधनताज्ञानजन्यतावच्छेदकतयैवोपायेच्छायां तृप्त्यादीष्टसाधनताविषयकत्वसिद्धिः। विनिगमनाविरहेण कल्पतत्तदनन्तपदार्थविषयकत्वस्याप्यवच्छेदकत्वापत्तेरिष्टसाधनत्वापेक्षया लघुनः कस्य चिद्धर्मान्तरस्यैव जन्यतावच्छेदकतया कल्पयितुमुचितत्वाच्चेति दिक्। नियमादेरित्यादिपदादन्यथासिद्धत्वसंग्रहः। तादृशेति। धूमव्यापकेत्यर्थः। हेतुत्वं युक्तमिति शेषः। उप-

व्याप्तिस्तत्प्रकारकमेव च पक्षधर्म्मताज्ञानमननुगतमपि हेतुरिति वक्तव्यम्, तथा च यद्धर्मविशिष्टसमानाधिकरणाभावप्रतियोगितानवच्छेदकत्वं साध्यतावच्छेदके गृह्यते तत्प्रकारकपक्षधर्मताज्ञानत्वेनैव हेतुत्वम् । अयं वन्हिव्याप्यवान् धूमो वन्हिव्याप्योऽयं धूमवान् वन्हिर्धूमव्यापकोऽयं धूमवानित्यादिसकलवित्तिव्यापकत्वात् । न तूपदर्शितव्याप्तिप्रकारकज्ञानत्वेन, अव्यापकत्वात्। किञ्चान्यथाख्यातिवादिभिर्धूमादिसमानाधिकरणात्यन्ताभावाप्रतियोगिगगनसमानाधिकरणधूमादिमानयमिति ज्ञानादनुमित्यङ्गीकारादखण्डव्याप्तेश्चाप्रसिद्धतया प्रकारकत्वासम्भवात् साध्ये साधनव्यापकत्वग्राहकमधिकरणादौ च साध्यीयत्वाद्यवगाहि पक्षे च तादृशसाधनवत्त्वावगाहि यज्ज्ञानं तत्त्वेन कारणत्वं वाच्यम्, तथा च लाघवात्तादृशव्यापकत्वपक्षधर्मत्वावगाहितयोरेव कारणतावच्छेदक-

---

दर्शितेति । धूमव्यापकवन्हिसमानाधिकरणधूमत्वादिरूपेणेत्यर्थः । अव्यापकत्वादिति । धूमव्यापको वन्हिर्धूमवांश्चायमित्यादिज्ञानाव्यापकत्वादित्यर्थः । अखण्डव्याप्तेरिति । इदमुपलक्षणम् । धूमलिङ्गकवन्ह्याद्यनुमितिस्थलेऽखण्डव्याप्तिसत्त्वेपि तदविषयकाद्वन्हित्वधूमत्वादिरूपेण गुञ्जावाष्पादिविषयकपरामर्शादनुमित्युत्पादेनापि खण्डशो निरुक्तिः कर्तव्येति ध्येयम् । साधनव्यापकत्वग्राहकमिति । व्यापकत्वावगाहीत्यर्थः । अधिकरणादावित्यादिपदेन साधनस्य साध्यीयत्वादीत्यादिपदेन चाधिकरणवृत्तित्वस्य सङ्ग्रहः । लाघवादिति । साध्यसामानाधिकरण्यविषयत्वाप्रवेशे लाघवादित्यर्थः । इदं तु विशेष्ये विशेषणमित्यादिक्रमेणोत्पन्नपरामर्शादप्यनुमितिरिति मतेन। अन्यथा व्याप्तिविशिष्टहेतुवैशिष्ट्यनिरूपितविलक्षणविषयतायाविशेषस्य कारणतावच्छेदकत्वे गौरवासंभवादिति ध्येयम् । तथा अवृत्तिगगनादिहेतुकानुमितिस्थले गगनव्यापकाप्रसिद्ध्या तदवगाहित्वस्य कारणतावच्छेदकत्वमसम्भवीत्यत आह अवृत्तीति । खण्डश इति ।

त्त्वमवृत्तिहेत्वनुरोधेन व्यापकत्वस्यापि खण्डशो निरुक्तिस्तेषां परमतिरिच्यते, यथा च सामानाधिकरण्यज्ञानस्य हेतुत्वेऽपि न क्षतिस्तथा वक्ष्यते इति चेन्न । गृह्यमाणव्याप्यतावच्छेदकताकेत्यादिप्रकारद्वयोक्तदूषणग्रस्तत्वात् वन्ह्यसन्ताभाववदवृत्तिधर्मवानयमित्यादिज्ञानादप्यनुमित्युदयाच्च व्यभिचारज्ञानविरोधिज्ञानविषयत्वे-

---

तथा चाधिकरणे साधनीयत्वाद्यवगाहि अभावे साधनाधिकरणवृत्तित्वावगाहीत्यादिक्रमेणैव साधनव्यापकत्वावगाहित्वं निर्वाच्यमिति भावः । तेषामन्यथाख्यातिवादिनाम् । अस्माकं तु कारणबाधात्तत्रानुमितिरेव नोत्पद्यते किं तु पक्षे साध्यस्य असंसर्गाग्रहमात्रमिति भावः । ननु सामानाधिकरण्यबुद्धेरहेतुत्वे साध्यसमानाधिकरणत्वेन पक्षे हेतुमत्त्वग्रहेप्यनुमितिः स्यादत आह तथा चेति । वक्ष्यत इति । साध्यवत्तावुद्धिमात्रं प्रत्येव साध्यसमानाधिकरणधर्मवत्तानिश्चयत्वेन विरोधित्वात्तदानीं साध्यस्य प्रत्यक्षवदनुमित्यसम्भवादिति भावः । यद्धर्मविशिष्टव्यापकत्वं साध्ये गृह्यते तत्प्रकारकपक्षधर्मताज्ञानत्वेन हेतुत्वमिति प्रथमकल्पे दूषणमाह गृह्यमाणेत्यादि।अतिप्रसङ्गभङ्गाय तत्कालीनत्ववत्तत्पुरुषीयत्वेन व्यापकताग्रहस्य प्रवेश्यत्वादननुगम इत्यर्थः। साध्ये हेतुव्यापकत्वावगाहिपक्षधर्मिकहेतुमत्त्वनिश्चयत्वेन कारणत्वमिति किञ्चेत्याद्युक्तद्वितीयकल्पे नोक्तदोषः सम्भवतीत्यतः कल्पद्वयसाधारणं दोषमाह वन्ह्यभावेति।वन्ह्यभाववदवृत्तित्वं गगनादावतिप्रसक्तमतो धर्मपदं वृत्तिमदर्थकम् । ननु केवलान्वय्यनुरोधेन व्यापकसामानाधिकरण्यज्ञानस्यैव त्वन्मते अनुमितिहेतुत्वादुक्तस्थले अनुमितिरसिद्धैवेत्यत आह व्यभिचारेति। अत्र वदन्ति । वस्तुगत्या यो वन्ह्यादिव्यभिचारधीविरोधिधीविषयः तत्प्रकारकपक्षधर्मतानिश्चयत्वेन न वन्ह्याद्यनुमितिहेतुत्वं वन्हिसमानाधिकरणवान् पर्वत इत्यादिज्ञानतोपि वन्ह्याद्यनुमित्यापत्तेः । यादृशविशिष्टविषयकत्वेन वन्ह्यादिव्यभिचारग्रहविरोधित्वं तत्प्रकारकत्वोक्तौ च व्यापकसामानाधिकरण्यग्रहासङ्गहः । वन्हिधर्मि-

कधूमव्यापकतानिश्चयत्वेनैव धूमधर्मिकव्यभिचारग्रहविरोधितया साध्यसामानाधिकरण्यस्य तत्राप्रवेशात् समानाकारकज्ञानस्यैव विरोधितया व्यापकताज्ञानस्यापि व्यभिचारग्रहप्रतिबन्धकत्वासम्भवाच्च । तस्माद्धूमलिङ्गकवन्हिसाध्यकानुमितित्वावच्छिन्नं प्रति वन्हिधर्मिकधूमव्यापकतानिश्चयत्वेनैव हेतुत्वम्। एवं सकलसाध्यसाधारणपर्वतपक्षकधूमलिङ्गकानुमितित्वावच्छिन्नं प्रति पर्वतविशेष्यकधूमवत्तानिश्चयत्वेनापि कारणत्वान्तरं वाच्यमतो वन्हिव्याप्यधूमवान् पर्वतो वन्हिर्धूमव्यापको धूमवांश्च पर्वत इत्यादिसकलविचित्तिभ्य एव पर्वतो वन्हिमानित्यनुमितिः । न चोक्तहेतुद्वयकल्पनामपेक्ष्य लाघवात्पर्वतपक्षकवन्हिसाध्यकधूमलिङ्गकवन्ह्यनुमितित्वावच्छिन्नं प्रत्येव वन्हिव्याप्यधूमवत्पर्वतनिश्चयत्वेनैकरूपेण हेतुत्वं युक्तमिति वाच्यम् । 'पर्वतपक्षकत्वधूमलिङ्गकत्ववन्हिसाध्यकत्वादित्रयस्य विशेषणविशेष्यभावभेदेन गुरुतरकार्यकारणभावषट्कप्रसङ्गात् । न च वन्हिधर्मिकधूमव्यापकतानिश्चयत्वघटकस्य दलद्वयस्य परस्परविशेषणविशेष्यभावापन्नस्य तथाविधवन्हिसाध्यकधूमलिङ्गकत्वघटकीभूतदलद्वयावच्छिन्नं प्रति प्रत्येकं हेतुतावच्छेदकत्वात्कारणताचतुष्टयमेवं धूमवत्तानिश्चयत्वघटकदलद्वयस्यापि पर्वतपक्षकधूमलिङ्गकत्वघटकतादृशदलद्वयावच्छिन्नं प्रति प्रत्येकं कारणतावच्छेदकतयापि कारणताचतुष्टयमिति मिलित्वा कार्यकारणभावाष्टकापत्त्या तवैव गौरवमिति वाच्यम् । एवमनुधावने पर्वतपक्षकवन्हिसाध्यकधूमलिङ्गकानुमितित्वघटकस्य पर्वतपक्षकत्वादित्रयस्य विशेषणविशेष्यभावभेदेन षड्विधतया तत्प्रत्येकावच्छिन्नं प्रति वन्हिव्याप्यधूमवत्तानिश्चयत्वघटकदलद्वयस्य मिथो विशेषणविशेष्यभावापन्नस्य हेतुतावच्छेदकत्वसम्भवेन गुरुतरकार्यकारणभावद्वादशधापत्त्या तवैव मतत्यातिगौरवग्रस्तत्वात् । किं च पर्वतधर्मिकवन्हिव्याप्यधूमवत्तानिश्चयत्वेन हेतुत्वे परामर्शस्य धूमव्यापकत्वांशे पक्षे धूमवत्त्वांशे च भ्रमत्वग्रहदशायामिव हेतौ व्याप्यत्वांशे भ्रमत्वग्रहदशायां पक्षे व्याप्तिविशिष्टधूमवत्त्वांशे भ्रमत्वग्रहदशायां चानुमितेरस्वीकार्यतया व्याप्यत्वांशे भ्रमत्वज्ञानाभावस्य व्याप्तिविशिष्टधूमवत्त्वांशे भ्रमत्वज्ञानाभावस्य च तादृशानुमितिं प्रति हेतुत्वमपि महागौरवग्रस्तम् । न च पर्वतधर्मिकवन्हिव्याप्त्यनवच्छिन्नधूमप्रकारक-

नैव व्याप्तीनामनुगमात् । नन्वत्र कारणे कार्य्यमेव प्रमाणं तच्च कार्य्यकारणभावग्रहे सति स्यात् स एव तु न सम्भवति गौरव-

---

ज्ञानत्वावच्छेदेन पर्वतांशे भ्रमत्वग्रहदशायां मीमांसकैरप्यनुमितेर्वारणाय तादृशभ्रमत्वज्ञानाभावस्य हेतुताया वाच्यत्वादिदं गौरवं तन्मतेपि समानमिति वाच्यम् । तादृशभ्रमत्वज्ञानस्यानुमित्यप्रतिबन्धकत्वात् । अन्यथा पक्षधर्मताज्ञानस्य व्याप्त्यनवच्छिन्नधूमप्रकारकत्वसन्देहदशायामप्युक्तभ्रमत्वज्ञानस्यानुमितिविरोधितापत्तेः । न चोक्तभ्रमत्वग्रहकालीनस्य पक्षधर्मताज्ञानधर्मिकव्याप्त्यनवच्छिन्नधूमप्रकारकत्वज्ञानस्यैव तथाप्यनुमितिप्रतिबन्धकतया परेषां मते साम्यमिति वाच्यम् । तादृशस्य भ्रमत्वत्वावच्छेदकधर्मवत्ताग्रहस्यानुमितिप्रतिबन्धकताया नैयायिकैरप्यवश्यं स्वीकार्यत्वात् । अन्यथा पर्वतधर्मिकवन्हिव्याप्यधूमवत्ताज्ञानत्वावच्छेदेन पर्वतांशे वन्हिव्याप्यधूमभ्रमत्वग्रहदशायां तत्तत्परामर्शधर्मिकस्य वन्हिव्याप्यधूमवत्ताज्ञानत्वज्ञानस्य सत्त्वेप्यनुमितिप्रसङ्गात्।न चानुगतधूमलिङ्गकत्वस्य दुर्वचनतया धूमलिङ्गकवन्हिसाध्यकानुमितित्वावच्छिन्नं प्रति वन्हिसाध्यकधूमव्यापकत्वानिश्चयत्वेन हेतुत्वासम्भवः तदसत्त्वे परामर्शहेतुतावादिनां तत्तदनुमितिव्यक्तौ तत्तत्परामर्शव्यक्तित्वेन हेतुत्वस्य वक्तव्यतया अवच्छेदकलाघवासम्भवेन यत्रानुमितेः पूर्वं विशिष्टपरामर्शो नानुभवसिद्धः तत्र ज्ञानद्वयस्यैव विशिष्य हेतुतायां दुर्वारत्वादिति । अत्रोच्यते । माभूत् सर्वत्रानुमितौ परामर्शोनुगतरूपेण हेतुः, तथापि यस्य पुंसः पर्वते वन्ह्यनुमितिर्नालोकादिहेतुका किं तु धूमलिङ्गिकैव तत्पुरुषीयवन्हिसाध्यकानुमितित्वावच्छिन्नं प्रति तत्पुरुषीयवन्हिव्याप्यधूमवत्पर्वतनिश्चयत्वेनैकरूपेण परामर्शस्य हेतुत्वं तादृशस्थलमादायैव न्यायमीमांसकयोर्विचार उद्भावनीयः । वस्तुतो धूमलिङ्गकपरामर्शोव्यवहितोत्तरत्वमनुगतं प्राग्व्यवस्थापितमतस्तदवच्छिन्नं प्रत्येव वन्हिव्याप्यधूमवत्तानिश्चयत्वेन लाघवाद्धेतुत्वमिति भावः । अत्रेत्यादि । यत्र परामर्शो नानुभवसिद्धः तत्रानुमित्यात्मकं कार्यमेव स्वकारणे परामर्शेनुमानविधया

ज्ञानेन प्रतिबन्धादित्यत आह कारणताग्रहेति । कारणतानिर्णयं विना तत्फलस्य धर्म्मर्यन्तरानिर्णयस्याभावेन तद्घटितगौरवस्यानिर्णयादित्यर्थः । सम्भाव्यते तावदिदं धर्म्मर्यन्तरकल्पनं विना कारणत्वस्यैवाशक्यनिर्वाहत्वादिति चेत् । सम्भाव्यतां न तु तत्प्रतिबन्धकम्, सामान्यतः कार्य्यकारणभावग्रहस्य प्रायशो विलयप्रसङ्गात् । तत्र तत्र क्लृप्तनियतपूर्ववर्त्तितावच्छेदकरूपान्तरविरहे-

---

प्रमाणमित्यर्थः । सति स्यादितिअन्यथा साऽनुमितिः विशिष्टज्ञानपूर्वकाऽनुमितित्वात् इत्यादेरप्रयोजकत्वसम्भवादिति भावः । स एव कार्यकारणभावग्रह एव । गौरवेतिधर्मिकल्पनारूपेत्यादिःतत्फलस्य कारणताग्रहफलस्य । तद्घटितेति । धर्म्मर्यन्तरघटितेत्यर्थः । ननु परामर्शत्वं यद्यनुमितिजनकतावच्छेदकं स्यात् क्लृप्तपरामर्शातिरिक्तवृत्ति स्यादित्येवं क्रमेण गौरवसम्भावनैव परामर्शत्वेन हेतुत्वग्रहे विरोधिन्यस्तु तस्यां धर्म्मर्यन्तरोपस्थितेरनपेक्षत्वेन सिद्ध्यसिद्धिभ्यां व्याघातायोगादित्याशयेन शङ्कते सम्भाव्यते तावदिदमिति । आपाद्यते तावदिदं धर्म्मर्यन्तरकल्पनागौरवमित्यर्थः । ननूक्तसम्भावनायामप्रयोजकत्वमत आह धर्म्मर्यन्तरमिति । कारणतावच्छेदकत्वहेतुकापत्तिमात्रं न कारणत्वग्रहप्रतिबन्धकं तथासति वन्हित्वं यदि धूमजनकतावच्छेदकं स्यात्तदा क्लृप्तवन्ह्यतिरिक्तवृत्ति स्यादित्यादिसम्भावनया प्रतिबन्धात् वन्हित्वादिनापि धूमादिजनकताग्रहो न स्यादित्याशयेन परिहरति सम्भाव्यतामिति । तत् सम्भावनम् । यत्र विजातीयघटादौ चैत्रत्वादिना हेतुत्वं तत्र बाल्यादिभेदेन भिन्नचैत्रव्यक्तीनां प्रत्यक्षेण सर्वसिद्धत्वादुक्तरूपेणातिरिक्तसम्भावनैव तत्र न सम्भवतीत्यत उक्तं प्रायश इति । ननु वन्हित्वादौ धूमादिजनकतावच्छेदकत्वहेतुकापत्तिमात्रं न तादृशावच्छेदकत्वज्ञानविरोधि किं तु लाघवादिप्रतिसन्धानविशिष्टमेव तथेत्याशयेन शङ्कते तत्र तत्रेति । वन्हिधूमादिस्थले वन्हित्वादिकं विहाय धूमत्वाद्यवच्छिन्नं प्रति नियतपूर्ववर्तितावच्छेदकीभूतलघुरूपान्तराभावादेव तादृश्येण

ज्ञानत्वमेव कारणतावच्छेदकम् । न चैवमतिरिक्तविशिष्टज्ञानकारणत्वे गौरवं दोषाय, सप्रमाणकत्वात् कारणताग्रहदशायां फलमुखगौरवस्य सिद्ध्यसिद्धिभ्यामदोषत्वात् । न चासन्निकृष्टे धूमे तदभावः, भवन्मतानुमितिहेतुव्याप्तिस्मरणधूमत्वज्ञानसहितेन मनसा तदुत्पादात् । यथा परमाणुर्निरवयवद्रव्यं नित्यपरिमाणवत्त्वात् आकाशवदित्यादौ प्रत्येकानुमानोपनीतातीन्द्रियसाध्यसाधनयोराकाशवृत्तितया स्मरणे व्याभिचाराज्ञाने मनसा व्याप्त्यनुभवः । अनुमानयोः प्रत्येकतदुभयसह-

---

णागत्या गौरवमप्यास्थीयते इति चेत्, इहापि तद्विरहस्यासकृदावेदितत्वादिति कृतं पल्लवितेनेति । व्यभिचारनिर्णयेन कारणत्वग्रहासम्भवं निरस्यति न चेति । अनुमानयोरिति । अनुमितैक-

---

कारणतायामुक्तसम्भावना न विरोधिनी तादृशधर्मान्तरसत्त्वप्रतिसन्धानसहितायां एव निरुक्तसम्भावनायाः प्रतिबन्धकत्वादिति भावः । इहापीति । गृह्यमाणव्याप्त्यवच्छेदकताकेत्यादिरूपस्य तत्तत्कालादिघटितत्वेन प्रागेव दूषितत्वादिति भावः । न चेत्यादिमूलस्य गौरवाभिप्रायकत्वे न चैवमतिरिक्तेत्यादिप्रागुक्तग्रन्थेन पौनरुक्त्यमत आह व्याभचारेति । लाघवादिप्रतिसन्धानशून्याया एव व्यभिचारशङ्कायाः कारणत्वग्रहविरोधित्वान्निर्णयेनेत्युक्तम् । ननु प्रत्येकानुमानयोः सहचाराग्राहकत्वेपि नित्यद्रव्यत्वादिना गगनादौ नित्यपरिमाणवत्त्वमनुमाय नित्यपरिमाणवद्गगनं निरवयवद्रव्यं विभुत्वादि-

चाराविषयत्वेन व्याप्त्यग्राहकत्वात्। न चातीन्द्रियव्याप्यत्वमतीन्द्रियेऽनुमेयम्, तत्रापि व्याप्तिग्राहकाभावात्। न च तदुपनयसहितस्य मनसो बहिरर्थप्रमाहेतुत्वे उपनयस्य प्रमाणान्तरत्वम्, इन्द्रियादेः सन्निकर्षवदुपनयस्य नियतव्यापाराभावेन प्रमायामकरणत्वात्। सहकारिता च तदभावेऽपि भवति। बहिरिन्द्रियलिङ्गसादृश्यादिव्यापारं विनापि चिन्तोपनीतपदार्थानां बाधकानवतारे मनसा संसर्गानुभवस्य सकलजनसिद्धत्वात्।कथमन्यथा

साध्यविशिष्टे साध्यान्तरानुमित्या सहचारग्रहोपगमेऽपि नियमांशग्रहासम्भवादिति भावः।नियतव्यापारेति।एकसम्बन्धिज्ञानाधीनसम्ब-

---

त्यनुमानमेव साध्यसाधनसहचाराग्राहकमत आह अनुमितेति। अनुमितं यदेकसाध्यं नित्यपरिमाणवत्त्वादि तद्विशिष्टे धर्मिणि साध्यान्तरस्य निरवयवद्रव्यत्वादेरनुमित्यैवेत्यर्थः। पक्षतावच्छेदकीभूतहेतोः सामानाधिकरण्यस्य संसर्गमर्यादया साध्ये भानेप्यनुमित्युपयुक्तं सामानाधिकरण्यप्रकारं ज्ञानमसिद्धमेवेत्यावेदयितुमुक्तमुपगमेपीति। वस्तुतस्तदुपगमेपि प्रकृते न निर्वाह इति भावः। मूले नियतव्यापाराभावेनेति। तथा च बहिर्गोचरप्रमायां नियतव्यापारवत्त्वमेव मानसान्यप्रमाकरणत्वे तन्त्रं न तु निरुक्तबहिर्गोचरप्रमोत्पादकत्वमात्रं तथा च पूर्वोक्तापत्तावप्रयोजकत्वमत एवाह सहकारिता चेति। प्रथमव्याख्यातापत्त्यनुसारेण दीधितौ एकेति। चरमव्याख्यानुसरणे तु नियतव्यापाराभावेनेत्यादिमूलस्य प्रत्यक्षजातीयप्रमासामग्रीविरहनियतप्रमोत्पादकत्वाभावेन तद्विजातीयप्रमित्यकरणत्वा-

कविकाव्यादिकमिति । स्यादेतत्, पक्षधर्मस्य व्याप्यताज्ञानं नेन्द्रियेण, वह्नेरसन्निकर्षे तन्नियतसामानाधिकरण्यस्य व्याप्यत्वस्यायोग्यत्वात् । न च धूमत्वेन सकलधूमव्याप्यतावगमात् धूमविशेषे संस्कारात् स्मरणाद्वो-

---

न्ध्यन्तरस्मरणादितः क चिद्विशिष्टज्ञानोत्पत्तावपि नियतत्वेन न तस्य व्यापारत्वं यं जनयित्वैव यस्य यज्जनकत्वं तस्यैव तत्र तद्व्यापारत्वादित्यर्थः । वस्तुतस्तु तदुपनयव्यक्त्यादेस्तत्प्रमाव्यक्ति प्रति कारणत्वेऽपि न क्षतिः, प्रमावैजात्यस्यैवात्र प्रमाणान्तरनिमित्तत्वात् । न चात्रापि प्रमावैजात्यम्, अनुपलम्भबाधितत्वात् मानाभावा-

---

दित्यर्थः । स चाग्रिमदीधितौ व्यक्तीभविष्यति । क चिदिति । यत्र हेतुस्मरणोत्तरं तत्सम्बन्धिव्याप्तिपक्षधर्मतयोः स्मृत्योपनीतभानात्मकः परामर्शः तत्रेत्यर्थः । अनियतत्वेनेति । हेतुव्याप्तिपक्षधर्मत्वानां समूहालम्बनस्मृत्यापि क चित्परामर्शोत्पादादिति भावः । तस्य सम्बन्ध्यन्तरस्मरणस्य । तद्व्यापारत्वात् तद्व्यापारशब्दार्थत्वात् । ननु तत्तद्बुद्धिव्यक्तिमुत्पाद्यैव तत्तदुपनयव्यक्तेः परामर्शजनकत्वात् नियतव्यापारवत्त्वं दुर्वारमतस्तादृशव्यापारवत्त्वेनैव प्रमाणान्तरत्वमापादनीयमत आह वस्तुतस्त्विति । न क्षतिः न व्याप्त्युपनयस्य प्रमाणान्तरत्वापत्तिः । प्रमावैजात्यस्यैवेत्येवकारेण यदसाधारणं सहकारीत्यादेः प्रतिक्षेपः । अत्र करणे । निमित्तत्वात् नियामकत्वात् । तथा च प्रत्यक्षविजातीयप्रमायां नियतव्यापारवत्त्वमेव मानसान्यप्रमाकरणत्वरूपप्रमाणान्तरत्वे न तन्त्रं न तु बहिर्गोचरप्रमायां नियतव्यापारवत्तामात्रमित्युक्तक्रमेणाप्यापत्तावप्रयोजकत्वमिति भावः । अत्राप्यसन्निकृष्टादिलिङ्गकानुमितिजनकज्ञानेपि प्रमावैजात्यं प्रत्यक्षाद्यवृत्तिजातिमत्त्वम् । ननु वैजात्यस्य प्रामाणिकत्वे तद्वनुपल-

पनीतव्याप्यभेदग्रहः प्रत्यभिज्ञाने तत्ताविशिष्टस्येवेति वाच्यम्। एवं हि धूमवत्त्वेन वह्निमत्त्वज्ञानात् धूमव-

---

त्व। उपनयस्य च विशिष्टज्ञाने विशेषणज्ञानत्वेन प्रत्यक्षे च सन्निकर्षविधयोपयोगितया जात्यव्यवस्थापकत्वात्। अत एवबाह्यान्तरप्रत्यभिज्ञासादृश्याभावादिप्रत्यक्षाणां तत्ताप्रतियोग्यादिविषयत्वमन्यथा जातिसङ्करप्रसङ्गात् ज्ञानद्वयकल्पने च स्थैर्य्यमात्र-

---

म्भस्तृणारणिमण्यादिप्रयोज्यजातिवत् भविष्यतीत्यत आह मानाभावाच्चेति। ननूपनयजन्यतावच्छेदकतयैव वैजात्यं सेत्स्यतीत्यत आह उपनयस्य चेति। उपनयस्य कारणताविशेषणज्ञानतया सन्निकर्षतया चोभयथापि वैजात्यं कार्यतावच्छेदकं नेति भावः। अत एव उपनयस्य जात्यव्यवस्थापकत्वादेव। उपनयस्य बहिरिन्द्रिये मानसेन सहकारित्वसूचनाय बाह्याभ्यन्तरेति। उपनयजन्यतावच्छेदकजातेश्चाक्षुषत्वमानसत्वव्याप्यतानिराकरणाय तदित्यपि कश्चित्। विशेष्यांशे उपनयस्यासामर्थ्यात्तदंशे साक्षात्करोमीत्यनुव्यवसायाच्च प्रत्यक्षाणामित्युक्तम्। बाह्यप्रत्यभिज्ञा सोयं घट इत्याकारा अभ्यन्तरप्रत्यभिज्ञा योहमद्राक्षं सोहं स्पृशामीत्याकारा। तत्तेति प्रत्यभिज्ञायाः, प्रतियोगीति सादृश्याभावयोः, प्रत्यक्षस्य। अन्यथेति। सर्वांशे लौकिकप्रत्यक्षे यत्र चाक्षुषत्वं तत्र नोपनयप्रयोज्यजातिर्यत्र च स्पार्शनाद्युपनीतभाने तादृशी जातिर्न तत्र चाक्षुषत्वमेकत्र च स एवायं सुरभि चन्दनमित्यादिचाक्षुषे तयोः सङ्कर इत्यर्थः। चाक्षुषत्वादिव्याप्यनानावैजात्यानामुपनयजन्यतावच्छेदकत्वस्वीकारे च गौरवं प्रत्यक्षत्वस्यैव तथात्वसम्भवादिति भावः। ननु स एवायं सुरभि चन्दनमित्यादौ विशेष्यविशेषणयोर्विभिन्नमेव ज्ञानद्वयं वाच्यमत एव तत्र तत्ताप्युपनीतभाने चाक्षुषत्वादेरसत्त्वान्न तेनोपनयप्रयोज्यजातेः सांकर्यमत आह ज्ञानद्वये-

द्विशेषे पर्वते संस्कारवशात् प्रत्यक्षेण व्याप्तिज्ञानापेक्षेण वह्निमद्भेदग्रहो वह्निमत्त्व(संसर्ग)ग्रहो वास्तु किमनुमानेन, पृथक् वह्निमत्त्वस्मरणं तत्र नास्ति किन्तु व्याप्त्यवच्छेतकतयेति चेन्न । वह्निमान्न वेति संशयानुरोधेन स्वत-

---

मुच्छिद्येत व्यवस्थापितञ्च विशिष्टज्ञानस्य व्यवहारहेतुत्वम् । न च प्रमाणान्तरासहकृतोपनयजन्यतावच्छेदकतया वैजात्यसिद्धिः, इतरासहकृतत्वेनाजनकत्वात् असिद्धेश्च उपनयात्मकसन्निकर्षवशेन मनसा प्रत्यक्षजननस्यैवोपगमात् । पृथगिति । न चैवं धारावाहि-

---

ति । पूर्वापरकालीनयोरभेदरूपं स्थैर्यं प्रत्यभिज्ञायाः ज्ञानद्वयत्वपक्षे न सिध्येदित्यर्थः । तथा च तदनुरोधेन प्रत्यभिज्ञायां विशिष्टज्ञानत्वे तत्रैव साङ्कर्यमावश्यकमिति भावः । नन्वयं स एव तन्मात्रवृत्तिधर्मवत्त्वादित्याद्यनुमानमेव लाघवादिसहकृतं स्थैर्यनियामकमावश्यकं भविष्यतीत्यत आह व्यवस्थापितं चेति । अन्यथाख्यातौ व्यवस्थापितमित्यर्थः । व्यवहारः इच्छाप्रवृत्त्यादिः । तथा च लाघवात्सुरभिचन्दनत्वादिप्रकारकेच्छादौ तादृज्ञानत्वेन हेतुत्वात्तादृशचाक्षुषविशिष्टज्ञान एव साङ्कर्यमावश्यकमिति भावः । प्रमाणान्तरेति । प्रत्यक्षादिसामग्र्यभावविशिष्टेत्यर्थः । अजनकत्वादिति । लाघवादुपनयत्वमात्रेणैव तथात्वादिति भावः । ननु मयापि उपनयत्वमात्रेणैव विजातीयज्ञानं प्रति हेतुत्वं वाच्यम् । न चैवं लौकिकप्रत्यक्षादिसामग्रीदशायामपि तादृशज्ञानापत्तिः, प्रत्यक्षसामग्र्यभावस्यापि तत्र हेतुत्वादत आह असिद्धेश्चेति । सर्वांशोपनीतभानस्थले प्रत्यक्षादिसामग्रीविरहस्यासिद्धेश्चेत्यर्थः । असिद्धिं विवृणोति उपनयेति । यद्यपि सर्वांशे उपनीतभानस्य प्रत्यक्षत्वे मानाभावः तद्वद्यज्ञलौकिकसन्निकर्षजन्यत्वस्य तत्राभावात् । तथापि तत्प्रकारकप्रत्यक्ष-

न्त्रवन्हिमत्त्वस्मरणात् । न च विशिष्टज्ञाने स्वतन्त्र-विशेषणज्ञानत्वेन हेतुत्वम्, गौरवात् । अथ यो यत्र विशिष्य पूर्वमवगतः स तत्र संस्कारवशाद्यथार्थप्रत्यक्षे भासते यथा तत्तात्प्रत्यभिज्ञाने, न च पर्वते विशिष्य

कोच्छेदः, इतरमात्राविशेषणत्वेनोपस्थितेरेव तन्त्रत्वात् । कोटि-स्मरणस्य संशयेन तस्य च व्याप्तिस्मरणादिना नाशात् विशेषद-र्शनकाले च संशयायोगादाह न चेति । गौरवादिति । न चैवम-भावविशेषणत्वेनोपस्थितस्यापि भावस्य ग्रहापत्तिः । अभावग्रा-

---

त्वावच्छिन्नं प्रत्येव तद्विषयकज्ञानत्वेन हेतुत्वादुपनयजन्यत्वमेव तादृशज्ञानस्य प्रत्यक्षत्वसाधकमेतदेव सूचयितुं सन्निकर्षवशेनेत्यु-क्तम् । न च सर्वांशोपनीतभान एव मानाभावः, आत्माद्यंश एवान्त-तो लौकिकत्वसम्भवादिति वाच्यम् । कामिनीजिज्ञासादिना प्रतिब-न्धवशादात्मादेरग्रहसम्भवादिति दिक् । एवमिति । स्वतन्त्रविशेषण-ज्ञानत्वेन हेतुत्वे इत्यर्थः । इतरेति । तथा च तद्विशेष्यकतद्विशिष्टबु-द्धौ तदितरमात्रविशेष्यतानिरूपिततद्विषयताकज्ञानत्वेन हेतुत्वं तच्च धारावाहिकस्थलेपि अक्षतं तत्र द्वितीयादिज्ञानविशेष्यीभूतधर्मि-विशेषणतयैव प्राथमिकादिज्ञानविशेषणस्य घटत्वादेर्भानात् । न च मात्रपदं व्यर्थम् । उभयविशेषणतया गृहीतस्य घटत्वादेः पश्चादेक-त्र विशिष्टबुद्धेः संपत्त्यर्थं तदुपादानादिति भावः । संशयेनेति । ना-शादित्यन्वितम् । तस्य चेति । संशयस्य चेत्यर्थः । ननूत्पन्नसंशय-स्य नाशेपि संशयान्तरोत्पत्त्यैव स्वतन्त्रविशेषणज्ञानं स्थास्यतीत्य-त आह विशेषदर्शनेति । प्रामाणिकं गौरवमित्याशयेन शङ्कते न चैव-मिति । भावस्य प्रतियोगिनः । सामग्र्या इति । न च भावविशि-ष्टबुद्धावभावनिश्चयाभावस्य कार्यसहवर्तित्वेन हेतुत्वोपगमादेव

पुरा वन्हिरवगतः, यत्र चन्दने सौरभमुपलब्धं तत्र संस्कारवशाच्चक्षुषा सुरभि चन्दनमिति ज्ञानमन्यथानुमितिरिति चेत् । तर्हि पक्षधर्मधूमेऽपि न पुरा विशिष्य व्याप्तिरवगतेति कथं संस्कारवशात्तद्गतव्याप्तिबोधः प्रत्यक्षेण । न च सहचारदर्शनजन्यसंस्कारसहितेनेन्द्रियेण व्यभिचारज्ञानाभावे सति महानसीयधूमवत्पर्वतीयधूमे

इकसामग्र्या बलवत्या प्रतिबन्धात् । अभावाविशेषणत्वेनोपस्थितिस्तन्त्रमित्यपि कश्चित् । वस्तुतः स्वतन्त्राविशेषणज्ञानस्य विशिष्टधीहेतुत्वेऽनुमित्यर्थमेव त्वयापि तत्स्वीकरणीयं न हि विशिष्टप्रत्यक्षं प्रत्येव तथात्वं मानाभावात् । तर्हीत्यादि । वस्तुतो यत्र क्वचिदपि गृहीतस्य धर्मिणि साधारणधर्मदर्शनात् स्मृतस्य संशयादिसाधारणी विशिष्टधीः, इयांस्तु विशेषो यत्कोटिद्वयसहचरितधर्मा-

---

तदानीं भावविशिष्टबुद्ध्यसम्भवात्सामग्र्याः प्रतिबन्धकत्वे मानाभाव इति वाच्यम् । यत्र स्वधर्मिकाप्रामाण्यग्रहोत्तरमभावस्य निश्चयोत्पत्तौ उत्तरकालं भावविशिष्टबुद्धिस्तत्राप्रामाण्यज्ञानाभावविशिष्टाभावनिश्चयत्वावच्छिन्नाभावस्य कार्योत्पाददशायामसत्त्वात्तादृप्येणाभावनिश्चयाभावस्य भावबुद्धौ हेतुत्वासम्भवादिति भावः । यत्र स्वातन्त्र्येणाभावस्योपस्थितावप्यभावस्यैव विशिष्टधीरग्रे भविता तत्र भावबुद्ध्यनुत्पत्त्यर्थमभावप्रत्यक्षसामग्र्याः प्रतिबन्धकत्वध्रौव्येऽभावाविशेषणत्वेनोपस्थितेर्हेतुत्वं विफलमित्यस्वरसः कश्चिदित्यनेन सूचितः । व्याघातमप्याह वस्तुत इति । मानाभावादिति । न च विशिष्टज्ञानत्वं विशिष्टानुभवत्वं वाऽनुमित्यादिस्थले सन्दिग्धव्यभिचा-

दर्शनात् कोटिद्वयस्मरणे संशयोऽन्यथा त्वेककोटिनिश्चय इति । एतेन धूमत्वादिना पक्षधर्मे व्याप्तिमनुमाय वन्ह्याद्यनुमितिरिति परास्तम् । धूमत्वाद्यनुपस्थित्या धूमत्वादेर्वन्हिव्याप्तिव्याप्यत्वाग्रहे वन्ह्यननुमितिप्रसङ्गाच्च । एतेन यद्धर्मावच्छेदेन यद्वत्त्वं गृहीतमुपनयवशात् तद्धर्मविशिष्ट एव तद्भासते, धूमवत्त्वावच्छेदेन च वन्हिमत्त्वग्रहाद्धूमवानेव वन्हिमानिति बुद्धिः स्यात् न तु पर्वतो वन्हिमानित्यपि परास्तम् । मानाभावात् चन्दनत्वाद्यवच्छेदेन गृहीतस्य सौरभादेः पुरोवर्त्तिनि चन्दनत्वादिदर्शनादिदं सुरभि इत्या-

---

रितया न तज्जन्यतावच्छेदकमिति वाच्यम् । अभावविशिष्टबुद्धिप्रतिबन्धकवशाद्यत्र घटाभावत्वप्रकारकस्मरणोत्तरं घटस्यैव भूतलादौ विशिष्टप्रत्यक्षं तत्र तादृशप्रत्यक्षत्वस्यापि सन्दिग्धव्यभिचारत्वादिति भावः । ननु पक्षधर्मधूमे व्याप्तेर्न स्मृतिः किं तु धूमत्वहेतुकानुमितिरेवेति यदि ब्रूयात्तदोक्तप्रतिबन्ध्यभावादाह वस्तुत इति । दर्शनादिति । पञ्चम्यर्थौ हेतुत्वम् । तच्चोदबोधकविधया कोटिस्मृतिं प्रति बोध्यम् । तेन साधारणधर्मवत्ताज्ञानस्य तज्जन्यस्मृतेर्वा संशयत्वावच्छिन्नं प्रत्यहेतुत्वेपि न क्षतिः । साधारणीत्युक्त्या संशयत्वस्य निश्चयत्वस्य चोपनयजन्यतावच्छेदकत्वं प्रतिक्षिप्तम् । अतएवान्यथैव संशयनिश्चयौ सम्पादयति इयांस्त्विति । एतेन यो यत्रेत्यादेरुपेक्षितत्वेन । यो यत्रेत्यादिनियमस्य प्रामाणिकत्वे पुनराह धूमत्वेति । तथा च तर्हीत्याद्युक्तप्रतिबन्दिस्तदवस्थैवेति भावः । अत एवेति । निरस्तमित्यग्रेतनेनान्वयः । तद्धर्मविशिष्ट एवेति । तद्धर्मविशिष्टविशेष्यकतदुपनीतप्रत्यक्षं प्रति तद्धर्मावच्छिन्नविशेष्यकतद्वत्त्वधीजन्यतदुपनयत्वेनैव हेतुत्वमतः पूर्वं धूमान्तर एव धूमत्वरूपेण व्याप्तिग्रहेपि तादृप्येण पक्षधर्मधूमे व्याप्त्युपनीतभाने बाधकाभाव इति भावः । मानाभावादिति उक्तक्रमेण हेतुतायां मानाभावादित्यर्थः । ननु व्यापकस्यानन्यथासिद्धत्वे कारणत्वमर्थायातमत आह चन्दनेति । व्यभिचाराच्चेति । तथा च न व्यापकत्वमिति

व्याप्त्यवगमो वन्हेस्तु न प्रत्यक्षसामग्री सन्निकर्षाभावादिति वाच्यम् । हेतुसाध्यसाक्षात्कारं विना प्रत्यक्षेण व्याप्त्यग्रहात् । न च पर्वते वह्निसाक्षात्कारः, न च पक्षधर्मस्य साध्यसामानाधिकरण्यविशेषो व्याप्तिः पक्षे साध्यग्रहं विनेत्युक्तम् । उच्यते । विशेषणज्ञानं तस्य

दिबुद्धौ व्यभिचाराच्च । यदि चावच्छेदकधर्मवैशिष्ट्यमपि तत्र भासत इति नियमोपि तत्र प्रामाणिकस्तदा धूमवानयं पर्वतो वन्हिमानित्येव धीरस्तु, न हि लिङ्गोपधानभाने बाधकमन्यत्साधकावरहात् । हेतुसाध्येति । सम्बन्धिद्वयनिरूप्यपदार्थप्रत्यक्षं प्रति सम्बन्धिद्वयप्रत्यक्षस्य हेतुतायाः संयोगादिस्थले त्वयैव क्लृप्तत्वात् तदनादरेऽपि साध्यघटितमूर्त्तिकव्याप्तिप्रत्यक्षस्य साध्यप्रत्यक्षसामग्रीं विनाऽसम्भवादिति भावः । विशेषणेत्यादि । विशेषणविशेष्यसम्बन्धस्तदंशे प्रमात्वे

भावः । मूले सन्निकर्षाभावादिति । चक्षुर्योग्यविद्यमानद्रव्यचाक्षुषसामान्यं प्रत्येव चक्षुःसंयोगत्वेन हेतुत्वादिति भावः । सप्तम्बन्धिकपदार्थप्रत्यक्षे सम्बन्धप्रत्यक्षत्वेन हेतुतायाः परैरनङ्गीकारादाह क्रोधितौ सम्बन्धिद्वयेति । त्वया नैयायिकेन । तथा च तन्मतमनुसृत्यैवेदं दूषणं दत्तमिति भावः । मूले न च पर्वते वन्हिसाक्षात्कार इति । सम्भवतीति भावः । न च पक्षधर्मस्येत्यादिमूलमभिप्रेत्याह तदनादरेणेति । तथा च पक्षे साध्यग्रहं विनेति मूलस्य पक्षीयसाध्यमविषयीकृत्य तत्सामानाधिकरण्यरूपा व्याप्तिर्गृहीतुं न शक्यत इत्यर्थः । भ्रमात्मकविशिष्टबुद्धेर्विशेष्यविशेषणसम्बन्धं विनाप्युत्पत्त्या व्यभिचारादाह तदंशे प्रमात्व इति । विशेषणांशे प्रमा-

विशेष्ये सम्बन्धस्तयोरसंसर्गाग्रहो विशेषदर्शनं विशेषणविशेष्येन्द्रियसन्निकर्षो गौरयमित्यादियथार्थविशिष्टप्रत्यक्षकारणम्। अस्ति चात्रापि व्याप्तिस्मरणं स्मृतव्याप्तेः पक्षवृत्तिधूमे सत्त्वम्। एकैव हि सा व्याप्तिः तयो-

---

लौकिकत्वे वा, विशेषदर्शनञ्च विपरीतज्ञानप्रतिबन्धकतया क्व चित्सहचरितधर्म्मदर्शनत्वेन विशेषणस्मारकतया विशेषणस्य च ज्ञानसत्त्वेऽप्यतिरिक्तसन्निकर्षस्तदंशे लौकिकतायामुपयुज्यते। एकैव हीति। वस्तुतो व्याप्तिभेदेऽपि न क्षतिः सामान्यतो व्याप्तित्वेन गृहीतानां सकलव्याप्तीनां तथैव स्मरणसम्भवात् वन्हेरसन्निकर्षादिति। ननूपनयात्मकसन्निकर्षेणैव नयनेन निरूप्यतां हुताशनो न हि बहिरिन्द्रियेण द्रव्यस्याधेयतया तद्धर्म्मस्य वा ग्रहे तत्संयोगो हेतुः

त्व इत्यर्थः। उपयुज्यत इति परेणान्वयः। स्वमते प्रमात्वस्य कार्यतानवच्छेदकत्वाद्दण्डत्वयमासीदित्यादिप्रमायां व्यभिचाराच्चाह लौकिकत्वे वेति। सम्बन्धस्येत्यादिः। विनापि विशेषदर्शनं विशिष्टप्रमोत्पत्त्या व्यभिचारादाह विशेषदर्शनं चेति। व्यावर्त्तकधर्मदर्शनं चेत्यर्थः। क चित्। व्यावर्त्तकत्वाद्यग्रहस्थले। ननु प्रागुक्तस्य विशेषणज्ञानस्यैव सन्निकर्षविधयाप्युपयोगसम्भवात्तदीयसन्निकर्षस्य पुनरुपादानं विफलमत आह विशेषणस्येति। ज्ञानसत्त्वेपीति। संस्कारस्येव निर्विकल्पकस्याप्ययोग्यत्वादेव स्वविषयोपधानेन प्रत्यक्षासम्भवाद्गौरित्यादिप्रत्यक्षे गोत्वनिर्विकल्पकस्य प्रत्यासत्तित्वेपि क्षत्यभावात् इत्याशयः। सामान्यतः सामान्यलक्षणया। व्याप्तित्वेन व्यापकसामानाधिकरण्यत्वेन। तथैव व्याप्तित्वेनैव। नन्वाधेयतासम्बन्धावच्छिन्नद्रव्यविषयताके तादृशातिरिक्तसंसर्गानवच्छिन्नद्रव्य-

रसंसर्गाग्रहो धूमत्वविशेषदर्शने व्याप्तिविशिष्टधूमेन्द्रियसन्निकर्षश्च व्याप्तिविशिष्टज्ञानकारणम् । न च वह्निविशिष्टज्ञानसामग्री, वह्नेरसन्निकर्षात । कश्चित्तु धूमत्वे

दण्डी पुरुषो नास्तीत्यादौ व्यभिचारात । कथमन्यथा पक्षधर्मे वन्हिमत्त्वगर्भिता व्याप्तिरेव गृह्यते । न चाधेयतया मुख्यविशेष्ये

विषयताके वा चाक्षुषादौ चक्षुःसंयोगत्वादिना हेतुत्वात्कथं चक्षुरसंयुक्तस्य पर्वतीयवन्हेश्चक्षुषा निरूपणमित्याशङ्क्य निषेधति न हि बहिरित्यादि । घटवद्भूतलमित्यादिमानसोपनीतभाने व्यभिचारादाह बहिरिति । गुणादौ चक्षुःसंयोगविरहेपि आधेयतया चाक्षुषोत्पादाद्द्रव्यस्येत्युक्तम् । घटो नास्तीत्याकारकघटचाक्षुषे व्यभिचारादुक्तमाधेयतयेति । ननु पर्वतो वन्हिमानित्यनुमितौ वन्हेर्नाधेयतया भानं किं तु पर्वतस्यैव वन्हेराधिकरणतयेत्युक्तकार्यकारणभावो न वन्हेरुपनीतभाने बाधक इत्यत आह तद्धर्त्वस्य वेति । द्रव्यवत्त्वस्य वेत्यर्थः । अत्राप्याधारतातिरिक्तसम्बन्धानवच्छिन्नद्रव्यविषयताकचाक्षुषादिकं प्रति चक्षुःसंयोगत्वादिना हेतुत्वे तात्पर्यान्न द्रव्यस्य निर्विकल्पार्थं कारणान्तरापेक्षेति ध्येयम् । व्यभिचारादिति । चक्षुरसंयुक्तस्यापि दण्डस्याधारतया पुरुषे भानादिति भावः । ननु दण्डी पुरुष इत्यत्र मत्वर्थे सम्बन्ध एव दण्डः प्रतियोगितया प्रकारो न तु पुरुषेप्याधारतयेति यदि ब्रूयात्तदाऽपि व्यभिचारमाह कथमिति । अन्यथा उक्तक्रमेण हेतुत्वसत्त्वे । वन्हिमत्त्वगर्भितेति । तथा च पर्वतीयधूमधर्मिकव्याप्तिग्रहे साध्यसामानाधिकरण्यकोटौ वन्हेराधिकरणांश एवाधारतया प्रकारत्वात्तत्रावश्यं व्यभिचार इति भावः । न चेति । वाच्यमिति परेणान्वयः । आधेयतया आधेयत्वनियामकसंयोगसम्बन्धेन । यथाश्रुते पर्वतो वन्हिमानित्याकारकबुद्धावाधेयत्वस्याविषयत्वादलक्षकतापत्तेः । साक्षाद्द्रव्यग्रहे साक्षात्कारा-

परम्परासम्बन्धेन वह्निव्याप्यत्वं पूर्वगृहीतं तथा च संस्कारोपनीतं वह्निव्याप्यत्वं परम्परासम्बन्धेन पक्षवृ-

---

साक्षात् द्रव्यग्रहे तत्संयोगो हेतुः अभेदारोपे च नाधेयतया रजतादिकं प्रकारो दण्डाद्यात्मकतत्तावगाहिप्रमाभिज्ञायाश्च तत्तावद्भेदो भासत इति न दण्डादेः साक्षात्प्रकारतेति वाच्यम्। मानाभावात्। धूमवान् वह्निमानिति सामान्यलक्षणया ग्रहे व्यभिचारात् तत्तासंसर्गस्यापि प्रमाभिज्ञायां भानसम्भवात् प्रकृतेऽपि वह्निमद्

त्मकद्रव्यग्रहे। तेन पर्वतस्य वह्निमत्तया स्मरणे गुणवत्तया वा प्रत्यक्षे न व्यभिचारः। एवं च मुख्यविशेष्यतानिरूपिताधेयत्वसंसर्गावच्छिन्नद्रव्यनिष्ठप्रकारतासम्बन्धेन प्रत्यक्षं प्रति समवायेनेन्द्रियसंयोगस्य हेतुत्वाद्वन्ह्यादौ तद्विरहादेव प्रत्यक्षासम्भव इति भावः। आधेयतयेत्यस्य फलमाह अभेदेति। अभेदसंसर्गेण रजताद्यारोप इत्यर्थः। तथा चेदं रजतमित्यादिभ्रमे रजतादिद्रव्यस्य मुख्यविशेष्ये प्रकारत्वेऽप्याधेयतानियामकसंयोगादिसम्बन्धेनाप्रकारत्वान्न तत्र व्यभिचार इति भावः। मुख्यविशेष्य इत्यस्य फलमाह दण्डाद्यात्मकेति। न साक्षादिति। दण्डादेर्न मुख्यविशेष्यतानिरूपितप्रकारतेत्यर्थः। दण्डादिमतः पदार्थान्तरे प्रकारत्वेन मुख्यविशेष्यत्वाभावादिति भावः। मानाभावादिति। लाघवान्निर्विकल्पकसाधारणं द्रव्यलौकिकप्रत्यक्षं प्रत्येवेन्द्रियसंयोगस्य हेतुत्वादिति भावः। उक्तक्रमेण हेतुतायां साधकाभावमुक्त्वा बाधकमप्याह धूमवानित्यादि। यद्यपि वह्निमानित्येव सामान्यजन्यप्रत्यक्षे व्यभिचारः सम्भवति, तथापि किञ्चिद्धर्मावच्छिन्नमुख्यविशेष्यतानिरूपितद्रव्यप्रकारताकप्रत्यक्षं प्रतीन्द्रियसंयोगस्य हेतुत्वोक्तावपि व्यभिचारसम्पत्त्यर्थं धूमवत्त्वस्य धर्मितावच्छेदकतयोल्लेखः। सामान्यप्रत्यासत्तौ विवादाद्वाह तत्तासंसर्गस्येति। मुख्यविशेष्य इत्यादिः। तथा च यत्र प्रत्य-

त्तिधूमत्वे प्रत्यभिज्ञायते तद्वृत्तित्वेन पूर्वमनुभवात् एवञ्च धूमत्वव्याप्यत्वपरामर्शादेवानुमितिरिति प्राह ।

भेदग्रहेणैव कृतार्थत्वाच्च । एतेन तत्ताकारानुपनीततादृशद्रव्यग्रहे स हेतुरिति निरस्तम् । चैत्रपदवाच्योऽयमित्यादिवत् दण्ड्ययमासीदयं दण्डीत्यादिग्रहस्यानुभविकत्वात् तत्तात्वस्यातिरिक्तस्याभा-

---

भिज्ञायां दण्डाद्यात्मकतत्तैव धर्मिणि साक्षात्प्रकारस्तत्र व्यभिचार इति भावः । यद्यनुभवसिद्धमपि प्रत्यभिज्ञायास्तत्ताप्रकारकत्वमपलप्यते, अपलप्यतां तर्हि परामर्शाज्जायमानस्यापि पर्वतो वह्निमानित्यादिज्ञानस्य धर्म्यंशे वन्हिप्रकारत्वम् । वन्हिमद्भेदावगाहिप्रत्यक्षत्वेनैव तस्य वन्ह्यर्थिप्रवृत्त्युपयोगित्वसम्भवात् । तथा चोक्तक्रमेणेन्द्रियसंयोगस्य हेतुत्वेप्यनुमितिर्नाधिका प्रमेत्याशयेनाह प्रकृतेपीति। एतेनेति । पर्वतो वन्हिमानित्यादिबुद्धेर्वन्हिमद्भेदप्रत्यक्षत्वेन कृतार्थत्वेनेत्यर्थः । तत्ताकारानुपनीतेति । तत्तात्वप्रकारतानवच्छिन्नेत्यर्थः । तादृशेति । मुख्यविशेष्यतानिरूपिताधेयत्वसंसर्गावच्छिन्नद्रव्यनिष्ठप्रकारताकसाक्षात्कार इत्यर्थः । दण्डी पुरुषो नास्तीत्यादौ दण्डप्रत्यक्षे व्यभिचारवारणार्थं मुख्यविशेष्यतानिवेशस्यावश्यकत्वादिति भावः । सः इन्द्रियसंयोगः । ननु परामर्शाज्जायमानस्य पर्वतो वन्हिमानित्यादिज्ञानस्य पर्वतांशे वन्हिप्रकारकत्वं न प्रवृत्त्यर्थं कल्प्यते, येन वन्हिमद्भेदावगाहित्वेनापि प्रवृत्त्युपयोगिता स्यात् । किं त्वनुभवसिद्धमेव तस्य तथात्वे । तथा च वन्हौ उक्तकारणबाधादेव तस्य न प्रत्यक्षत्वमित्यनुमितिरधिकैव प्रमेत्यत आह चैत्रपदेति । तथा च चक्षुराद्ययोग्यस्य चैत्रादिपदस्येव चक्षुराद्यसंयुक्तस्यापि दण्डादेश्चाक्षुषादिप्रत्यक्षोदयात्तत्रैव व्यभिचारान्नोक्तक्रमेणेन्द्रियसंयोगस्य हेतुत्वम्, येन कारणबाधाद्वन्हेरुपनीतप्रत्यक्षं न स्यादिति भावः । अतीतत्वाद्यनवच्छिन्नतादृशद्रव्यप्रकारताकप्रत्यक्षं प्रत्येवेन्द्रियसंयोगस्य

भवतु तावदेवं तथापि जातिरेव लिङ्गं स्यात् न तु व्यक्तिः । तथा च सर्वोपसंहारेण व्यक्तौ व्याप्तिग्रहार्थं

वात् । तच्छब्दप्रयोगजननाभावस्य च निमित्तान्तरविरहप्रयुक्तस्य जन्यतानवच्छेदकत्वात् तज्जननयोग्यतायाः प्रकृतेऽपीष्टत्वात् । अत एव बहिरिन्द्रियग्राह्यविद्यमानद्रव्यस्य तेन ग्रहे तत्संयोगो हेतु-

---

हेतुत्वमुक्त्वा कदा चिद्दण्ड्ययमासीत् इत्यत्र प्रत्यक्षे व्यभिचारवारणसम्भवादाह अयं दण्डीत्यादि । ननु परेषामिदं रजतमित्यादिवदयं दण्डीत्यादिकमप्यगृहीतभेदं ज्ञानद्वयमेव निरुक्तकारणविरहेण विशिष्टप्रत्यक्षत्वायोगादिति यदि ब्रूयात्तदाप्याह तत्तात्वस्येति । अतिरिक्तस्य पूर्वानुभूतद्रव्याद्यतिरिक्तस्य । तथा च तत्ताकारानुपनीतद्रव्यप्रकारकप्रत्यक्षत्वं कार्यतावच्छेदकमेवाऽप्रसिद्धमिति भावः। ननु तच्छब्दप्रयोगानुपधायकनिरुक्तद्रव्यप्रत्यक्ष एवेन्द्रियसंयोगस्य हेतुत्वं वाच्यं तावतैव द्रव्यात्मकतत्ताप्रत्यभिज्ञायां व्यभिचारवारणादत आह तच्छब्देति । निमित्तान्तरेति । तच्छब्दप्रयोगधर्मिकेष्टसाधनत्वादिज्ञानविरहप्रयुक्तस्येत्यर्थः । अनवच्छेदकत्वादिति । अन्यथा नीलानुपधायकघटत्वादेरपि कार्यतावच्छेदकत्वापत्तेरिति भावः । ननु तच्छब्दप्रयोगजननस्वरूपायोग्य एव निरुक्तद्रव्यप्रत्यक्षे चक्षुःसंयोगत्वादिना हेतुत्वं वाच्यं स्वरूपयोग्यत्वाभावस्य कारणान्तरविरहाप्रयुक्तत्वेन जन्यतावच्छेदकत्वसम्भवादत आह तज्जननेति । प्रकृतेऽपि परामर्शजनिते पर्वतो वन्हिमानित्यादिज्ञानेपि । तथा च निरुक्तेन्द्रियसंयोगकार्यतानवच्छेदकाक्रान्तत्वात् विनापीन्द्रियसंयोगमुपनीतचाक्षुषाद्यात्मकस्य तादृशज्ञानस्योत्पादे बाधकाभाव इति भावः । अत एवेति । द्रव्याद्यात्मकतत्ताप्रत्यभिज्ञानादौ व्यभिचारादेवेत्यर्थः । चक्षुःसंयोगाद्यजन्ये पिशाचोपहतं गृहमित्यादिचाक्षुषे व्यभिचारवारणाय बहिरिन्द्रियग्राह्येति । [उपहनन-

सामान्यलक्षणप्रत्यासत्त्युपादानमफलं स्यात् । दृश्यते

रिति परास्तम् । नयनादिना रजतादेरभावग्रहाभेदारोपादौ व्यभिचाराच्च । अथैवं व्यवहितदण्डे पुंसि न कथं नायनो दण्डीति निश्चय इति चेत् । क्व चित्तत्सहचरितधर्मादर्शनात् तदस्मरणात्, क्व चिच्च साधारणधर्मदर्शनादिना संशयस्यैव जननात् । सति

सम्बन्धेन पिशाचप्रकारकता अन्यथोपहननस्याद्रव्यत्वादसङ्गतेः] मान्धातृचक्षुःसंयोगाजन्ये मान्धातुरियं भूमिरित्यादिचाक्षुषे तद्वारणाय विद्यमानेति । गुणादिचाक्षुषे व्यभिचारवारणाय द्रव्येति । चक्षुर्ग्राह्यस्यैव विद्यमानद्रव्यस्य प्रभादेः स्पार्शनादिग्रहे चक्षुःसंयोगस्य हेतुत्वात्तेनेति । तत्तात्वस्यातीतमात्रवृत्तित्वमते प्रत्यभिज्ञायां व्यभिचारायोगादाह नयनादिनेति । ननु प्रतियोगित्वसंसर्गानवच्छिन्नद्रव्यचाक्षुषादौ चक्षुरादिसंयोगस्य हेतुत्वान्नोक्तस्थले व्यभिचार इत्यत आह अभेदारोपेति । आदिना अयं चैत्रस्य पुत्र इत्यादिचैत्राद्युपनीतचाक्षुषोपग्रहः । एवं तदिन्द्रियग्राह्य इत्यादेरनादरे । व्यवहितेत्यनेन विद्यमानत्वचक्षुःसंयोगाभावयोः सूचनम् । तदस्मरणादिति । तादृशदण्डास्मरणादित्यर्थः । न नायनः । निश्चय इति पूर्वेणान्वयः । एवमग्रेपि । दर्शनादिनेत्यादिना विशेषादर्शनाद्युपग्रहः । संशयस्यैवेति । तदभावविशिष्टबुद्धेः सामग्रीसद्भावे तदभावाप्रकारकस्य तन्निश्चयस्यायोगादिति भावः । ननु यत्र विशेषदर्शनादिना तदभावविशिष्टधीप्रतिरोधस्तत्रैवोपस्थितस्य व्यवहितदण्डस्यायं दण्डीति चाक्षुषो निश्चयः स्यादित्यत्राह सति चेति । उक्तक्रमेण हेतुत्वोपेक्षणं परिष्करोति युक्तं चैतदिति । अन्यथा तादृशकार्यकारणभावाङ्गीकारे । दण्डी न वेति संशयोपि चक्षुर्योग्यविद्यमानदण्डस्य चाक्षुष इति दण्डचक्षुःसंयोगाभावे सोपि न स्यादिति भावः । न हीति । असौ दण्डी न वेति संशयः । तस्य विद्यमानदण्डस्य । विशिष्टाविलक्षणा चाक्षुषात्मिका बुद्धिः । नेति । न हीत्यर्थः । यथाश्रुते चक्षुर्योग्यतादृश-

च विशेषदर्शनादाविष्टत्वात् । युक्तश्चैतत्, कथमन्यथा दण्डी न वेत्यादिकः संशयः । न हि नासौ तद्विशिष्टबुद्धिः । न तन्निश्चय इति चेत् । किं तेन, उक्तं हि संशयत्वं निश्चयत्वञ्च न जन्यतावच्छेदकमिति । अस्तु वा तथा, तथापि विशेषस्यादर्शनात् संशयस्येव तदर्शनान्निश्चयस्यापि सम्भवात् । मा भूद्वा नायनादिरयं हुताशनादिनिर्णयो मानसस्तु स्यात् तत्र तादृशनियमस्यासन्तं

द्रव्यचाक्षुषसामान्यं प्रत्येव चक्षुःसंयोगस्य हेतुतायाः प्रस्तुतत्वात् द्रव्यप्रकारकबुद्धेरुपन्यासानर्हत्वात् इति ध्येयम् । तादृशद्रव्यगोचरचाक्षुषनिश्चयत्वावच्छिन्नं प्रत्येव चक्षुःसंयोगहेतुत्वं वाच्यमित्याशयेन शङ्कते न तन्निश्चय इति । असावित्यनुषज्यते । उक्तम् प्रत्यक्षमणिदीधितौ । संशयत्वमिति इष्टान्तार्थम् । न जन्यतेति । तद्विशिष्टधीसामग्रीदशायामेव तदभावविशिष्टधीसामग्र्यभावसत्त्वे तन्निश्चयसम्भवात्तदभावाप्रकारकत्वघटितस्य तन्निश्चयत्वस्य जन्यतानवच्छेदकत्वात् । अन्यथा घटाप्रकारकपटवत्ताज्ञानत्वस्यापि तथात्वापत्तेरिति भावः । तदभावप्रकारकस्यापि तद्वत्तासमुच्चयस्य निश्चयत्वात्तस्याखण्डत्वमभ्युपेत्याह अस्तु वेति प्राञ्चः । वस्तुतो नन्विदं दण्डवन्न वेति संशयदशायामिदं रक्तदण्डवदिति प्रात्यक्षिकनिश्चयानुत्पत्त्या प्रत्यक्षतान्निश्चयत्वावच्छिन्नं प्रत्यवश्यं विशेषदर्शनाद्यभावविशिष्टतदभावज्ञानत्वेन प्रतिबन्धकत्वं वाच्यमतो निश्चयत्वं जन्यतावच्छेदकमेवेत्यत आह अस्तु वेति युक्तमुत्पश्यामः । तथा निश्चयत्वं जन्यतावच्छेदकम् । दर्शनादिति । विशेषस्येत्यनुषज्यते । सम्भवादिति । तथा च तत्राप्युक्तहेतुतायां व्यभिचार इति भावः । ननु परामर्शजनितस्य पर्वतो वन्हिमानित्यादिज्ञानस्य चाक्षुषत्वादिसम्भवेनापि अनुभवबलादानीयमानया अनुमितित्वजात्या सङ्करादाह माभूद्वेति । अयं परामर्शजन्यः । तत्र द्रव्यमानसे। तादृशनियमस्य मनःसंयोगजन्यत्वनियमस्य । अत्यन्तमिति । घटादिमानसे व्यभिचारादिति भावः । न चानुमितेः साक्षात्कारत्वे तत्तदनुमित्य-

बाधितत्वादिति । उच्यते । अस्ति तावदनुमिनोमीत्यनुव्यवसाय-साक्षिको ज्ञानविशेषो यत्र कारणमन्वयव्यतिरेकाभ्यां व्याप्यपरामर्शः । मानसप्रत्यक्षविशेषोऽसाविति चेत्, कुतोऽस्य प्रत्यक्षत्वम् । अनुभवत्वादिति चेत्, किमेवमनुभवत्वमन्यत्प्रत्यक्षत्वात् । स्मृत्य-

---

न्यसाक्षात्कारत्वावच्छिन्नभेदानां तत्तदनुमितिसाधारण्यार्थमतिरिक्तानां कल्पनायां गौरवं स्यात्, अस्माकं तु साक्षात्कारत्वसमनियतानां तत्तदनुमित्यन्यत्वविशिष्टसाक्षात्कारत्वानां गुरुत्वादेव तदवच्छिन्नप्रतियोगिताकभेदानामसम्भवः, घटादौ कलशस्य साक्षात्कारत्वावच्छिन्नप्रतियोगिताकभेदस्यैव वा तादृशसाक्षात्कारत्वावच्छिन्नभेदत्वमतो लाघवमिति वाच्यम् । अनुमितेः प्रत्यक्षान्यत्वमतेपि तत्तदनुमित्यन्यत्वविशिष्टसाक्षात्कारान्यत्वावच्छिन्नभेदानां तत्तदनुमितिसाधारण्यार्थमतिरिक्तानां कल्पनाप्रसङ्गात् । अस्मन्मते तु साक्षात्कारभिन्नत्वसमनियतानां तत्तदनुमित्यन्यत्वविशिष्टसाक्षात्कारान्यत्वानां गुरुत्वादेव तदवच्छिन्नप्रतियोगिताकाभावस्याप्रसिद्धत्वात् साक्षात्कारान्यत्वावच्छिन्नभेदस्यैव लाघवेन तादृशसाक्षात्कारान्यत्वावच्छिन्नभेदत्वसम्भवाच्चेति ध्येयम् । अथानुमानस्य प्रमाणान्तरत्वं प्रमितिवैजात्याभावाद्वा खण्ड्यते, चाक्षुषादेरिवानुमितेरपि साक्षात्काराविशेषतया तत्करणस्य प्रत्यक्षप्रमाणेन्तर्भावाद्वा, नाद्य इत्याह अस्ति तावदिति । ज्ञानविशेषः अनुमितित्वाख्यवैजात्यवान् । यत्र कारणमिति । तथा च परामर्शजन्यतावच्छेदकतयापि तादृशवैजात्यसिद्धिरिति भावः । द्वितीयमभिप्रेत्य शङ्कते मानसप्रत्यक्षेति । तथा चानुभवसिद्धत्वेन दुरपन्हवमनुमितित्वं मानसप्रत्यक्षत्वव्याप्यमेवास्तु इति तदाश्रयकरणं प्रत्यक्षप्रमाणमेवास्तामिति भावः । अनुभवत्वादिति । तुल्यन्यायतयाऽनुमितेरिव शब्दोपमित्यादावपि मानसप्रत्यक्षत्वादिति भावः । एवम् अनुभवमात्रस्यैव प्रत्यक्षत्वे । अनुभवत्वमनुभवत्वशब्दार्थः । अन्यत्प्रत्यक्षत्वादिति । तुल्यव्यक्तिवृत्तिजातिद्वयास्वीकारात्प्रत्यक्षत्वमेवानुभवत्वम् । तथा च प्रत्यक्षत्वेनैवानुमितेः प्रत्यक्षत्वसाधने साध्याविशेष इति भावः । अ-

न्यज्ञानत्वमिति चेन्न । अप्रयोजकत्वात् अनुमितौ साक्षात्कारित्वग्रहप्रसङ्गाच्च । तद्व्यञ्जकलौकिकसन्निकर्षादिजन्यत्वविरहान्न तथेति चेत्,स्वात्मानुमितौ तस्यापि सम्भवात् वन्हिमनुमिनोमि न तु साक्षात्करोमीत्यबाधितसाक्षात्त्वाभावग्रहाच्च । अगत्या तु सौ-

---

सिद्धिं परिहरन्नाह स्मृत्यन्यज्ञानत्वमिति । अनुभवत्वमित्यनुषज्यते । स्मृत्यन्यत्वं घटादौ ज्ञानत्वं च स्मृतौ प्रत्यक्षत्वव्यभिचारीत्यतो विशिष्टमुपात्तम् । अप्रयोजकत्वादिति । अनुकूलतर्कं विना पक्षे तत्समे वा व्यभिचारसन्देहस्यापि व्याप्तिधीविरोधित्वात् । अन्यथा वायू रूपवान् स्पर्शवत्त्वादित्यादेरपि प्रामाण्यापत्तेरिति भावः । ननु सत्यपि व्यभिचारसन्देहेऽनुमानादिना व्याप्तिग्रहसम्भवान्नाप्रयोजकत्वमित्यत आह अनुमितावितिं । शङ्कते तद्व्यञ्जकेति । साक्षात्कारत्वव्यञ्जक इत्यर्थः । न तथा नानुमितौ साक्षात्कारत्वग्रहः । स्वात्मेति । परात्मनः संयोगस्य लौकिकसन्निकर्षत्वाभावात्स्वपदम् । तस्य लौकिकसन्निकर्षजन्यत्वस्य । तथा । अहं सुखीत्याद्यनुमितौ साक्षात्कारत्वग्रहः स्यात् तस्याप्यात्ममन संयोगात्मकसन्निकर्षजन्यत्वादिति । न चैवं ममैतद्ज्ञानमित्यादिस्वाम्योपनीतमानसप्रत्यक्षेपि साक्षात्कारत्वं गृह्येतेति वाच्यम् । इष्टत्वात् । मानसमात्रस्यैव बाधकं विना स्वात्मांशे लौकिकत्वादिति भावः । ननूपनीतप्रत्यक्षानुरोधात्तत्प्रकारकप्रत्यक्षं प्रति तज्ज्ञानत्वेनाहेयं हेतुत्वं तथा च सामग्रीवशादेव वन्ह्याद्यनुमितिमात्रस्य वन्ह्यादिप्रत्यक्षत्वसिद्धौ विशेष्यतया साक्षात्कारत्वप्रकारकप्रत्यक्षं प्रति तादात्म्येनानुमितित्वादिना प्रतिबन्धकत्वमप्यनायत्या कल्प्यमतो नानुमितौ साक्षात्कारत्वस्य ग्रह इत्यस्वरसादाह वन्हिमिति । यद्वा ननु ज्ञानसामान्यं प्रति स्वरूपायोग्यस्यैव लौकिकसंनिकर्षस्य जन्यत्वं साक्षात्कारत्वव्यञ्जकम् अहं सुखीत्यादौ च मनःसंयुक्तसमवाय एव तादृशसन्निकर्ष इति न तत्र साक्षात्कारत्वग्रहानुपपत्तिरत आह वन्हिमिति । साक्षात्त्वाभावेति । साक्षात्त्वत्वावच्छिन्नाभावग्रहाच्चेत्यर्थः । तथा चानुमितेः साक्षात्त्वे प्रतियोगिमत्त्वाद्वन्हिविधेयकानुमि-

रभं न पश्यामीत्यादावन्यथात्वकल्पनं सामान्यलक्षणानङ्गीकर्तृनये चाप्रसिद्धवन्ह्यादिव्यक्तिकानुमितौ न प्रत्यक्षत्वसम्भावनापि सन्नि-

---

तौ साक्षात्कारत्वत्वावच्छिन्नाभाववत्ताधीः प्रमा न स्यादिति भावः। ननु सुरभि चन्दनमित्यादिसौरभचाक्षुषदशायामुत्पन्नस्य सौरभं न पश्यामीत्याकारकसौरभदर्शनत्वावच्छिन्नाभाववत्ताग्रहस्य यथा न प्रमात्वं विषयबाधात् किं तु भ्रमत्वमेव तथा वन्ह्यनुमितिदशायामुत्पन्नस्य वन्हिं न साक्षात्करोमीतिग्रहस्यापि विषयबाधेन भ्रमत्वादबाधितत्वमेवासिद्धमतं आह अगत्येति। अन्यथात्वं भ्रमत्वम्। तथा च सुरभि चन्दनमित्याकारकविशिष्टज्ञानस्य चन्दनं पश्यामीत्यनुव्यवसायबलात् चन्दनांशे दर्शनत्वसिद्धौ सौरभांशेपि दर्शनत्वस्य सत्त्वात्तत्सामान्याभाववत्ताबुद्धेरवश्यं भ्रमत्वं विषयबाधात् पर्वतो वन्हिमानित्यनुमितेः क्वाप्यंशे साक्षात्करोमीत्यनुव्यवसायविरहात् वन्हिं न साक्षात्करोमीतिबुद्धिर्बाधकं विना प्रमैवेति भावः। अथानुमितेरुत्तरं न साक्षात्करोमीत्यनुभवो नास्त्येव साक्षात्कारसामान्याभावस्यायोग्यत्वाद्वन्हिं न साक्षात्करोमीत्यनुभवस्तु वन्हेर्लौकिकसाक्षात्काराभावविषयकत्वेनोपपन्नो नानुमितेरुपनीतभानत्वे बाधकः। शब्दो गगनवृत्तिरित्याद्यनुमितेरुत्तरं गगनं न साक्षात्करोमीतिप्रत्ययस्तु लौकिकतया गगनशून्यमेव साक्षात्कारमवगाहते। तेन गगनादेर्लौकिकविषयत्वाप्रसिद्धावपि न क्षतिः। सौरभं न पश्यामीत्यादिबुद्धावप्युक्तक्रमानुसरणे तु सापि प्रमैव इत्यत आह सामान्येति। तदङ्गीकारे तयैव प्रत्यासत्त्या तदधीनज्ञानलक्षणया वा पक्षीयवन्हिव्यक्तेः पर्वतो वन्हिमानित्यनुमितावुपनीतभानं स्यात् तदसत्त्वे च सन्निकर्षाभावादेव प्रत्यक्षत्वाभावसिद्धावनुमितिः प्रमान्तरम्। न च तवापि कथं तत्राप्रसिद्धवन्हिविशिष्टानुमितिः, अज्ञातस्य विशेषणत्वायोगादिति वाच्यम्। स्मृतौ व्यभिचारेण विशिष्टज्ञानमात्रे विशेषणधियः कारणत्वाभावात् ज्ञानलक्षणानुरोधेन विशिष्टप्रत्यक्षं प्रत्येव तस्यास्तथात्वादिति भावः। व्याख्यातम्। अतिरिक्तप्रमात्वेन। तथा च तत्रापि न साक्षात्करो-

कर्षासम्भवात्। एतेन शाब्दादिकं व्याख्यातम्। व्यपस्थापयिष्यते तावदप्रसिद्धाभावसाध्यकानुमितिर्न च साक्षात्कारिणी तत्रोपनयस्यासम्भवात्, एवञ्च प्रसिद्धसाध्यकानुमितेरपि न साक्षात्त्वं जातिसङ्करप्रसङ्गादित्यपि के चित्। तत्र भेदत्वादिनोपस्थिते ज-

---

मि किं तु शृणोमि उपमिनोमीत्यनुव्यवसायबलादतिरिक्तप्रमासिद्धौ तत्करणमपि शब्दादिकमतिरिक्तप्रमाणमित्यर्थः। शृधातोः प्रवृत्तिनिमित्तं प्रत्यक्षत्वावान्तरं श्रावणत्वमिव तद्विरुद्धं शाब्दत्वमपि आत्मा श्रोतव्यो मन्तव्य इति वैदिकप्रयोगात् एतद्वाक्यादयमर्थः श्रुत इत्यादिलोकव्यवहाराच्चेति ध्येयम्। केषां चिन्मतमाह व्यवस्थेत्यादिना। जलत्वव्यापकस्नेहाभाववती पृथिवीतिव्यतिरेकिपरामर्शात् पृथिव्यां जलभेद इत्याकारानुमितिर्जायते सा न प्रत्यक्षं जलभेदस्य प्रागनुपस्थित्या उपनयासम्भवादिति भावः। न च तादृशानुमितेरुपस्थितपदार्थान्तरांश एव सामग्रीसत्त्वादुपनीतप्रत्यक्षत्वं सुघटमिति वाच्यम्। अनुमितेः प्रत्यक्षत्वमतेपि साध्यवत्तया पक्षमात्रस्य तद्विषयत्वानुभवाद्विषयान्तरप्रत्यक्षेऽनुमितिसामग्र्याः प्रतिबन्धकत्वस्य कल्पनीयत्वात्। अन्यथा उपस्थितयावद्वस्त्ववगाहित्वेऽनुमितेर्विषयशतभारमन्थरत्वापत्तेरिति भावः। अथाप्रसिद्धसाध्यकायाः प्रत्यक्षत्वाभावेपि प्रसिद्धसाध्यकाया अनुमितेस्तथात्वे बाधकाभाव इत्यत आह एवं चेति। जातीति। साक्षात्त्वं विना अनुमितित्वमप्रसिद्धसाध्यकानुमितावनुमितित्वं विना साक्षात्त्वं घटादिप्रत्यक्षे वर्तत इति मिथो व्यभिचारिणोस्तयोरेकत्र प्रसिद्धसाध्यकानुमितौ सङ्कर इत्यर्थः। मतमिदं दूषयति तत्रेत्यादिना। तत्र पृथिव्यां जलभेद इत्याद्यप्रसिद्धसाध्यकानुमितौ। भेदत्वादिनेति। जलभेदत्वादिना प्रागनुपस्थित्या तदवच्छिन्नोपनीतभानासम्भवेपि भेदत्वसामान्यलक्षणया उपस्थिते भेदे जलत्वाद्यवच्छिन्नप्रतियोगिकत्वसम्बन्धेन जलादेरुपनीतभानमित्यर्थः। न चैवं विशेष्ये विशेषणमित्यादिक्रमेण पृथिवी जलभेदवतीत्येव तत्रानुमितिः स्यात् तथा चाप्रसिद्धसाध्यकस्थले साध्यविशेष्यिकैवानुमितिरिति प्रवादो भज्ये-

च परम्परासम्बन्धज्ञानं विना जातिव्याप्तिमविदुषोऽपि धूमाद्वह्न्यनुमानम्, न हि व्याप्यतावच्छेदकतया भासमानस्यावश्यं व्याप्यताग्रहः, मानाभावात् । तस्मात् पक्षधर्मे व्याप्तिविशिष्टज्ञानं तदनन्तरं विशिष्टवैशिष्ट्यज्ञानं

लादिप्रतियोगित्वग्रह इत्यपरे । मानाभावादिति । तन्निष्ठावच्छेदकान्तरग्रहमन्तरेणासम्भवाच्चेत्यपि द्रष्टव्यम् । उपसंहरति तस्मादि-

---

तेति वाच्यम् । अप्रसिद्धसाध्यकपरामर्शस्य विशेष्यविधया साध्यविधेयकानुमितित्वावच्छिन्नं प्रत्येव हेतुत्वात्ततः साध्यविशेषणकानुमित्यसम्भवात् । अन्यथा जलभेदसाध्यकान्वयपरामर्शादपि तद्विशेषणकानुमित्युत्पत्त्या व्यभिचारप्रसङ्गादित्यादेरन्यत्रोक्तत्वादिति भावः । अप्रसिद्धसाध्यकबुद्धेर्व्यतिरेकव्याप्तिधीजन्यत्वेनार्थापत्तित्वस्याग्रे व्यवस्थाप्यत्वात् तदनुरोधेनानुमानप्रामाण्यसाधनं तदुपनीतभानसम्पादनया पुनरनुमानप्रामाण्यखण्डनं च द्वयमप्युन्मत्तप्रलपितमित्याशयेन के चिदित्यपरे इति चोक्तम् । वस्तुतोऽनुमितेर्मानसत्वे वस्त्वन्तरस्य चाक्षुषज्ञानसामग्रीदशायां वन्हेर्मानसान्तर इवानुमितिरपि नोत्पद्येत लाघवेन मानससामान्यं प्रत्येव चाक्षुषसामग्र्याः प्रतिबन्धकत्वात् अनुमित्यन्यमानसत्त्वावच्छिन्नं प्रति तथात्वे गौरवात् । एवं वन्ह्याद्यनुमितेः प्रत्यक्षत्वे पूर्वोपस्थितयावद्वस्तूनामेव तत्र भानं स्यादुपनयसन्निकर्षसत्त्वात् इष्टापत्तौ चानुभवविरोधः । तत्तद्धर्मिकतत्तद्विधेयकानुमितिसामग्र्यास्तादृशतादृशविधेयतान्यविधेयताकप्रत्यक्षं प्रति विरोधित्वान्तरकल्पने च विभिन्नसाध्ययोः समूहालम्बनानुमितिर्न स्यादित्यनुमितिः प्रमान्तरमेवेति तत्त्वम् । ननु प्रकारान्तरेणानुमित्यनिर्वाह एव व्याप्यतावच्छेदकस्यापि धूमत्वादेर्व्याप्यताग्रहे भानं भविष्यतीत्यत आह तन्निष्ठेति । धूमत्वादिनिष्ठेत्यर्थः । तथा च धूमत्वसमानाधिकरणाभावेत्यादिव्याप्तेर्धूम-

पक्षे वा तृतीयलिङ्गपरामर्शः । अन्ये तु स्वसमानाधि-

ति । वाशब्दोऽनास्थायाम् । उभयथापि प्रकृताक्षतेः । वस्तुतो व्याप्यपक्षयोर्वैशिष्ट्यावगाहिज्ञानत्वेन हेतुत्वं विनिगमनाविरहेणा-

---

त्वत्वादिघटितत्वात्तदनुपस्थितौ निरवच्छिन्नधूमत्वप्रकारेण धूमज्ञानदशायां वन्ह्यनुमितिर्न स्याज्जात्यतिरिक्तस्यैवावच्छिन्नप्रकारतानियमेनाभावे निरवच्छिन्नस्यैव धूमत्वस्य सामानाधिकरण्यधीसम्भवेपि धूमत्वव्यापकीभूतसाध्यसमानाधिकरणतद्वत्तापरामर्शस्य तन्निष्ठधर्मान्तरोपस्थित्यधीनत्वात्तदंशेपि स्वरूपतो धूमत्वस्य निवेशे धूमत्वत्वेन व्यभिचारग्रहेपि धूमत्वहेतुकपरामर्शसम्पत्त्याऽनुमितिप्रसङ्गादिति भावः । लिङ्गविशेष्यकपरामर्शस्य हेतुतायां दोषाभावाद्वाशब्दस्यास्वरससूचकत्वासम्भवादाह वाशब्द इति । उभयथा व्याप्यधर्मिकपक्षधर्मतानिश्चयत्वेन पक्षधर्मिकव्याप्यवत्तानिश्चयत्वेन वा हेतुतायाम् । प्रकृतस्य विशिष्टज्ञानहेतुताव्यवस्थापनस्याक्षतेरित्यर्थः । लिङ्गविशेष्यकस्य पक्षविशेष्यकस्य च द्वयोरेव परामर्शयोरनुमितिहेतुत्वसम्भवात्समुच्चयपरोयं वाशब्द इत्यभिप्रेत्याह वस्तुत इति । व्याप्यपक्षवैशिष्ट्यावगाहिज्ञानत्वेन तादृशवैशिष्ट्यावगाहिनिश्चयत्वावच्छेदेन । तथा च व्याप्यपक्षोभयवैशिष्ट्यावगाहिनां सर्वेषामेव निश्चयानां हेतुत्वमित्यर्थः । कारणतावच्छेदकं तु लिङ्गधर्मिकपरामर्शत्वं पक्षधर्मिकपरामर्शत्वं च द्वयमेव, तादृशतादृशपरामर्शोत्तरानुमितित्वस्यैव कार्यतावच्छेदकत्वेन व्यभिचारासम्भवाद्व्याप्यपक्षोभयवैशिष्ट्यावगाहिनिश्चयत्वस्य लघुनो अनुगतस्य दुर्वचत्वात्ताद्रूप्येणानुमितिप्रत्यहेतुत्वेपि नासङ्गतिरिति ध्येयम् । ननु पक्षविशेष्यकव्याप्यवत्तानिश्चयत्वेनैवानुमितिहेतुत्वात् लिङ्गधर्मिकपरामर्शो न हेतुरत आह विनिगमनेति । व्याप्यधर्मिकपक्षधर्मतानिश्चयत्वेनैव हेतुत्वात्पक्षधर्मिकपरामर्शो न हेतुरित्यत्र विनिगमकाभावेनेत्यर्थः । न च लिङ्ग-

करणात्यन्ताभावाप्रतियोगित्वं व्यापकत्वं तत्सामानाधिकरण्यञ्च व्याप्यत्वं तथा च लाघवात् व्यापकताज्ञानमनुमितिहेतुः, साध्यस्य पक्षधर्मत्वव्यापकताज्ञानञ्च परामर्शः न तु साध्यव्याप्तस्य पक्षधर्मताज्ञानं साध्यत्वा-

---

न्यतरविशेषणविशेष्यभावस्यातन्त्रत्वात् । लाघवादिति । अथा-व्याप्यवृत्तेर्व्यापकत्वसम्पत्तयेऽभावस्य प्रतियोग्यसामानाधिकर-

---

विशेष्यकपरामर्शस्य हेतुत्वे क चिदुपनयोपि लिङ्गविशेष्यकः प्रयुज्येतेति वाच्यम् । कथकसम्प्रदायानुरोधात्पक्षविशेष्यकस्यैव तस्योपन्यासात् । अन्यथा व्याप्तिप्रकारकत्वाविशेषात् सर्वो धूमवान् वन्हिमानित्युदाहरणं स्यादिति भावः । वस्तुतो यत्र साध्यव्याप्यग्रहजनकत्वापेक्षया लघुतरं पर्वतत्वादिकं पक्षतावच्छेदकं तत्र लिङ्गविशेष्यक एव परामर्शोनुमितौ हेतुः पर्वतधर्मिकवन्हिव्याप्यवत्त्वनिश्चयत्वापेक्षया वन्हिव्याप्यवत्त्वावच्छिन्नधर्मिकपर्वतप्रकारकनिश्चयत्वस्य गुरुतरव्याप्याभावाप्रकारकत्वाप्रवेशेन लघुतया तादृप्यैणैव हेतुत्वौचित्यात् । यत्र तु सकलवृत्तिप्रमेयत्वाश्रयचैत्रादिसमानकालीनपर्वतत्वादिरूपं पक्षतावच्छेदकमेव वन्ह्यादिसाध्यव्याप्यहेतुमत्त्वापेक्षया गुरुतरं तत्र तदवच्छिन्नविशेष्यकसाध्यव्याप्यवत्तानिश्चयत्वेनैव पक्षविशेष्यकः परामर्शो हेतुः तादृशविशिष्टपर्वतत्वाद्यवच्छिन्नप्रकारतानिश्चयत्वापेक्षया साध्यव्याप्यवत्त्वनिश्चयत्वस्य लघुत्वात् । तदघटितस्यैव कारणतावच्छेदकत्वात् । तथा च व्यवस्थितविकल्प एव मूलोक्तवाशब्दः, यदि न तत्प्रकारतातिरिक्तप्रकारत्वानिरूपितविशेष्यताकत्वरूपं निश्चयत्वमिति युक्तमुत्पश्यामः । मिश्रोक्तमाशङ्क्य ते अथेति । अव्याप्यवृत्तेरिति । कपिसंयोगी एतत्त्वादित्यादौ संयोगादेरेतत्त्वादिव्यापकत्वसम्पत्तय इत्यर्थः । स्वप्रतियोग्य-

ण्यं वाच्यं तच्च स्वप्रतियोग्यनधिकरणवृत्तित्वम् एवञ्चावृत्तिगगनादेर्धर्ममात्रव्यापकत्वं स्यात् तादृशघटत्वाद्यभावाप्रतियोगित्वात् तदधिकरणाप्रसिद्ध्या च तदभावस्य स्वप्रतियोग्यनधिकरणवृत्तित्वासम्भवात् तथा च तद्वृत्तये व्यापके हेतुसामानाधिकरण्यं वाच्यम्।न चैवं हेतोर्व्यापकसामानाधिकरण्यापेक्षया लाघवमिति चेत्। अस्तु तावदेवमापाततः, तथापि वृत्तिमत्त्वमात्रमुपादेयम्। न चैवं

नधिकरणवृत्तित्वं च हेत्वधिकरणे ग्राह्यम्। नातः कपिसंयोगाभावस्य प्रतियोग्यनधिकरणवृत्तित्वेपि कपिसंयोगादेरेतत्त्वाद्यव्यापकत्वम्। तादृशेति। स्वप्रतियोग्यनधिकरणहेतुमन्निष्ठेत्यर्थः। तदधिकरणाप्रसिद्ध्या गगनाद्यधिकरणाप्रसिद्ध्या। न च स्वप्रतियोगिसमानाधिकरणा यावन्तस्तदन्यत्वरूपस्य प्रतियोग्यसामानाधिकरण्यस्य प्रवेशात् संयोगादौ व्यापकत्वस्य गगनादौ तदभावस्य सम्भवः गगनाभावस्यापि तादृशभिन्नत्वादिति वाच्यम्। संयोगादेः सत्तादिव्यापकतापत्तेः। संयोगाभावस्य प्रतियोगिसमानाधिकरणतया तदन्यस्य सत्त्ववन्निष्ठघटाभावस्य प्रतियोगितायाः संयोगे विरहात्। न च स्वप्रतियोग्यधिकरणयावद्धेत्वधिकरणको यस्तदन्यत्वमभावस्य वक्तव्यमित्यदोषः। तदापि व्यापकत्वादातिरिक्तस्य यावत्त्वस्य दुर्वचत्वादिति भावः। तद्वृत्तये गगनादेर्व्यापकत्वव्यावृत्तये। न चैवमिति। व्याप्तौ हेतुनिष्ठसाध्यसामानाधिकरण्यस्येव व्यापकतायामपि साध्यनिष्ठहेतुसामानाधिकरण्यस्य प्रवेशान्न लाघवमित्यर्थः। वृत्तिमत्त्वमात्रमिति। येन सम्बन्धेन साध्यता तेनैव वृत्तिमत्त्वमुपादेयम्। तेन समवायादिना वृत्तिमतोपि रूपादेः संयोगादिना न कस्यापि व्यापकत्वम्। वस्तुतः साध्यतावच्छेदकसम्बन्धेन स्वावच्छिन्नाधिकरणताकत्वं तादृशसम्बन्धिताकत्वमेव वा व्यापकतावच्छेदकस्य वक्तव्यम्। नातः समवायेन वृत्तिमतोरपि विरुद्धघटत्वपटत्वयोस्तादृशोभयत्वेन कस्यापि व्यापकत्वमिति ध्येयम्। सिद्धान्तलक्षणोक्तखण्डशःप्रसिद्ध्या गगनाभावस्यापि प्र-

हेतोः साध्यसामानाधिकरण्यस्य संशये व्यतिरेकनिश्चये वा अनुमित्यापत्तिरिति वाच्यम् । संशये इष्टत्वात्, व्यतिरेकनिश्चये च पक्षधर्मत्वाग्रहे परामर्शविरहात्, तद्ग्रहे च साध्यसमानाधिकरणधर्मान्तरग्रहस्येव तस्यापि विरोधित्वात् । अन्यथा त्विष्टत्वात् । पर्वतो वन्हिव्याप्यधूमवान् पाषाणमयः पाषाणमयावृत्तिश्च वन्हिरिति ज्ञानेन च तुल्ययोगक्षेमं पर्वतवृत्तिधूमव्यापको वन्हिर्धूमवद्-

---

तियोगिव्यधिकरणत्वादापातत इति उक्तम् । एवं सामानाधिकरण्यज्ञानस्याहेतुत्वे । अनुमित्यापत्तिरिति । व्यापकतानिश्चयस्य तदानीमपि सम्भवादिति भावः । परामर्शविरहादिति । पर्वतवृत्तिधूमव्यापको वन्हिरित्येवं परामर्शाभावादित्यर्थः । ननु यत्रोक्तव्यापकतापरामर्शकाले वन्ह्यसमानाधिकरणधूमवान् पर्वत इत्याकारकः साधने साध्यसामानाधिकरण्याभावनिश्चयस्तत्राप्यनुमितिः स्यादत आह तद्ग्रह इति । साध्यासमानाधिकरणत्वेन हेत्वोः पक्षधर्मताग्रह इत्यर्थः । धर्मान्तरेति । साध्यवत्ताबुद्धिं प्रति साध्याभावस्येव साध्यासमानाधिकरणधर्मवत्ताया अपि निश्चयस्य विरोधितायाः प्रत्यक्षादौ कल्पत्वादिति भावः । अन्यथेति । यदि साध्यासमानाधिकरणतया धर्मान्तरवत्ताधीर्न प्रतिबन्धिका तदा तादृप्येण हेतुमत्ता-निश्चयेपि साध्यवत्तानुमितेरिष्टत्वादित्यर्थः । ननु पर्वतवृत्तिधूमव्यापको वन्हिर्धूमवदवृत्तिरित्येवं निश्चयात्पर्वतो वन्हिमानित्यनुमितेरनुपत्त्या साध्यसाधनयोः सामानाधिकरण्यज्ञानं हेतुरत आह पर्वतो वन्हीत्यादि । तुल्येति । तथा च व्याप्यवत्तापरामर्शवादिनो यदि तादृशज्ञानादप्यनुमितिस्तदा ममाप्युक्तज्ञानादनुमितावित्यापत्तिः । यदि च पक्षे यद्धर्मवत्तानिश्चयः साध्ये तद्धर्मवदवृत्तित्वनिश्चयः स्वातन्त्र्येणानुमितिविरोधि तदा ममापि तुल्यं हेतोः पाषाणमयत्वादितुल्यत्वादिति भावः । तत्र व्यापकतापरामर्शवादिनां मते विरोधोऽसाधारण्यं वा न हेत्वाभासः, तद्बुद्धेरनुमितितत्कारणज्ञानान्यतराविरोधित्वादिति द्रष्टव्यम् ।

वृत्तिश्चेति ज्ञानम् । न च साध्याप्रतियोगिकत्वसमानाधिकरण-यावदत्यन्ताभावकत्वं साध्याप्रतियोगिकत्वावच्छेदकत्वसमानाधिकरणात्यन्ताभावत्वकत्वं वा व्याप्तिः, साध्यप्रतियोगित्वञ्च केवलान्वयिनि साध्यस्यान्योन्याभावे सम्बन्धविशेषावच्छिन्नात्यन्ताभावे वा प्रसिद्धमिति वाच्यम् । गौरवात् व्यापकत्वाद्यनन्तर्भावेन यावत्त्वस्य दर्वचत्वात् प्रमाणाभावेन स्वरूपसम्बन्धविशेषरूपत्वा-

---

न चेति । वाच्यमित्यग्रेऽन्वयः । स्वं हेतुः । तथा च यत्समानाधिकरणा यावदत्यन्ताभावाः साध्यतावच्छेदकधर्मावच्छिन्नप्रतियोगिताकभिन्नास्तत्त्वमित्यर्थः । साध्यतावच्छेदकसम्बन्धेनाभावस्य लाभार्थमत्यन्तपदम् । तेन धूमवन्निष्ठस्य समवायावच्छिन्नवन्ह्यभावस्य वन्हित्वावच्छिन्नप्रतियोगिताकत्वेऽपि नाव्याप्तिः । स्वाधिकरणवृत्तित्वं च निरवच्छिन्नं ग्राह्यम् । नातः कपिसंयोग्येतत्त्वादित्यादावप्रसङ्गः । व्यापकत्वादिपर्यवसन्नस्य यावत्त्वस्याप्रवेशेन लघुलक्षणान्तरमाह साध्याप्रतियोगिकत्वेति । अत्रावच्छेदकत्वं स्वरूपसम्बन्धविशेष इत्यभिमानः । ननु वाच्यं ज्ञेयत्वादित्यादौ साध्यतावच्छेदकधर्मावच्छिन्नप्रतियोगित्वाप्रसिद्धिरत आह साध्येति । प्रमेयसाध्यके साध्यतावच्छेदकप्रमेयत्वावच्छिन्नप्रतियोगिताकान्योन्याभावासम्भवादाह सम्बन्धविशेषेति । संयोगादिसम्बन्धेन प्रमेयत्वाद्यवच्छिन्नात्यन्ताभाव इत्यर्थः । उभयत्र दूषणमाह गौरवादिति । यावत्त्वादिप्रवेशेन उक्तव्याप्तेर्व्यापकत्वापेक्षया गुरुत्वादित्यर्थः । प्रथमस्य गौरवं विवृणोति व्यापकत्वादीति । यावत्त्वं यद्यनेकत्वं तदा व्यभिचारिसाधारण्यमित्यशेषत्वरूपं तद्वाच्यं तच्च व्यापकत्वं पर्यवसन्नमिति भावः । व्यापकत्वादीत्यादिना अपेक्षाबुद्धिविशेषविषयत्वाद्युपग्रहः । द्वितीयस्य तु गुरुत्वं व्याकरोति प्रमाणाभावेनेति । ननु धूमादेरपि वन्हिसमानाधिकरणघटाद्यभावाप्रतियोगित्वात्तद्व्यापकत्वापत्त्या हेतुमन्निष्ठाभावीययावत्प्रतियोगित्वाभाव एव व्यापकत्वं वाच्यमिति तत्रापि यावत्त्वप्रवेशान्न लाघवमत आह व्यापकतायां

प्यवत्पक्षधर्मताज्ञानं वा, गौरवात् । अत एव यो यो धू-

सम्भवेनावच्छेदकत्वस्यानतिरिक्तवृत्तित्वपर्य्यवसायित्वाच्च । व्यापकतायाश्च प्रतियोगित्वादेः सामान्याभावस्योक्तत्वात् । सम्बन्धादिनिष्ठसाध्यप्रतियोगित्वव्यक्तेरभावस्य व्यभिचारिसाधनसमानाधिकरणयावदन्ताभाववृत्तितया त्वयापि तस्यावश्यं वाच्यत्वात् साधनसमानाधिकरणात्यन्ताभावप्रतियोगितानवच्छेदकधर्मवत्त्वरूपव्यापकत्वज्ञानमपेक्ष्य साध्यवदन्यावृत्तित्वज्ञानस्य लघुत्वात् । तद्धेतुतावादिनं निरस्यति अत एवेत्यादिना । वीप्सासमभिव्याहारादिवशादुद्देश्यधर्मवदवृत्तेरत्यन्ताभावस्याऽन्योन्याभावस्य वा

चेति । प्रतियोगित्वादेरिति । हेतुमन्निष्ठाभावप्रतियोगित्वावच्छेदकत्वमर्थः । आदिना तादृशप्रतियोगितावच्छेदकत्वादेरुपग्रहः । न च संयोग्येतत्त्वादित्याद्यनुरोधेन स्वप्रतियोग्यनधिकरणहेतुमन्निष्ठाभावाप्रतियोगित्वादिकमेव व्यापकत्वं तस्य च स्वत्वगर्भत्वान्न सामान्याभावत्वसम्भव इति वाच्यम् । निरवच्छिन्नहेत्वधिकरणवृत्तिताकाभावाप्रतियोगित्वादेरेव तथात्वमित्यभिप्रायात् । व्याप्यवृत्तेर्व्यापकतायां प्रतियोगिवैयधिकरण्याप्रवेशात्तदभिप्रायेण इदमित्यप्याहुः । ननु तादृशव्याप्तौ यावत्त्वादेरिव तवापि व्यापकतायां सामान्याभावावच्छिन्नप्रतियोगिताकत्वस्य प्रवेशात्साम्यमेव द्वयोरत आह सम्बन्धादीति । आदिपदाद्येन सम्बन्धेन साध्यता तदन्यसम्बन्धावच्छिन्नसाध्याभावस्योपग्रहः । तस्य साध्यप्रतियोगित्वसामान्याभावस्य । तथा च न साम्यमिति भावः । अन्यथेत्याद्यग्रिममूलसङ्गत्यर्थमवतारयति लघुत्वादिति । साध्यवदन्यावृत्तित्वस्य साधनभेदेऽप्यभेदेन व्यापकत्वापेक्षया लघुत्वादित्यर्थः । उदाहरणस्य व्यापकताबोधकत्वं व्युत्पादयति वीप्सेति । आदिना स वह्निमानित्यत्र त-

मवान् सोऽग्निमानित्युदाहरणवाक्ये साध्यायोगव्यवच्छे-

प्रतियोगित्वाभावो विधेयधर्मे तद्वति वा भासते न तु विधेयधर्मतद्वतोरत्यन्तान्योन्याभावानधिकरणत्वमुद्देश्यधर्मवति, यद्यदभिधेयं तत्तत्प्रमेयमित्यादावसम्भवादिति भावः। साध्येतिअयो-

---

त्पदोपसन्दानस्योपग्रहः। उद्देश्यस्य धूमवदादेर्यो धर्मः उद्देश्यतावच्छेदकीभूतो धूमादिस्तद्वदवृत्तेरित्यर्थः। लाघवादाह अन्योन्याभावस्येति। अत्र समभिव्याहारवशादित्युक्तेः उपसर्गादेरिव वीप्सादेस्तात्पर्यग्राहकतामात्रं विधेयवाचकवन्ह्यादिपद एव धूमादिव्यापकवन्ह्यादौ लक्षणा तेन धूमादिव्यापकवन्हिमानित्याकारक एव उदाहरणवाक्यादूबोध इति सम्प्रदायः। अभावे प्रतियोगितावच्छेदकत्वादौ च प्रत्येकमेव वीप्सायाः शक्तिर्नामार्थयोरपि च धूमवदभावयोरेकपदार्थयोरपि चाभावप्रतियोगितावच्छेदकत्वयोः पदार्थैकदेशेपि वन्हित्वादाववच्छेदकत्वाद्यभावस्य व्युत्पत्तिवैचित्र्येणान्वयः। अत एव विशिष्टव्यापकत्वस्य प्रागनुपस्थितावप्यन्वयबोध इत्यपि वदन्ति। ननु कल्प्यत्वाविशेषादुद्देश्यतावच्छेदकधर्मवत्येव विधेयधर्मवदन्यत्वावरहो वीप्सया बोध्यतां तावतैवोदाहरणस्य साध्यवदन्यावृत्तित्वप्रदर्शकत्वसम्भवादत आह नन्विति। उद्देश्यधर्मवति भासत इति पूर्वेणान्वयः। असम्भवादिति। प्रमेयत्वतद्वतोरत्यन्ताभावान्योन्याभावाप्रसिद्धेरिति भावः। यद्यप्युद्देश्यधर्मवति विधेयधर्मात्यन्ताभावानधिकरणत्वभानेपि साध्यवदन्यावृत्तित्वस्याऽलाभात्तन्निरसनमप्रकृतमतथापि लघुनः साध्याभाववदवृत्तित्वस्य ज्ञानं यथा न हेतुः यद्यदभिधेयमित्युदाहरणेनोद्देश्यधर्मवति विधेयधर्मात्यन्ताभावाप्रसिद्ध्या तदनधिकरणत्वप्रत्ययासम्भवात् तथा साध्यवदन्यावृत्तित्वस्यापि धीर्नानुमितिहेतुः उक्तस्थल एव विधेयधर्मवदन्योन्याभावाप्रसिद्ध्या तदनधिकरणत्वप्रत्ययायोगात् इति दृष्टान्तविधया तन्निरसितम्। न च विधेयधर्मवतां यावतां भेद-

देन धूमव्यापकता वन्हेरुपदर्श्यते । अन्यथा वन्हिमानेव धूमवानित्यन्ययोगव्यवच्छेदेनोदाहरणशरीरं स्यात् । दोषोऽपि व्यभिचारादिर्न पक्षधर्मव्यापकं साध्यमित्येवोद्धाव्यः । अथ पर्वतवृत्तिधूमव्यापको वह्निरितिपरामर्शो यदि तदा पर्वतीयधूमं प्रति व्यापकतायाः पर्वतधूमसामानाधिकरण्यनैयत्यात् पर्वतवह्निः परामर्शविषय एवेति किमनुमेयमिति चेत् । तर्हि पर्वतीयधूमे नियतसाध्यसामानाधिकरण्यस्य व्याप्यत्वस्य भानं साध्यसामानाधिक-

---

गोऽभावप्रतियोगित्वं तथा च साध्ये साधनवन्निष्ठाभावप्रतियोगित्वव्यवच्छेदेनेत्यर्थः । स्यादिति । न स्याच्च केवलान्वय्यनुमानमित्यपि द्रष्टव्यम् । न पक्षेति । एतच्च विरोधस्यातिस्फुटत्वमभि-

---

कूटात्यन्ताभाव एव वीप्सादिसमभिव्याहारादुद्देश्यतावच्छेदकविशिष्टे भासत इति प्रकृतेपि स्वसमानाधिकरण एव प्रसिद्धस्य प्रमेयव्यक्तीनां प्रत्येकभेदस्यात्यन्ताभावोऽभिधेयत्वावच्छिन्ने भासतामिति वाच्यम् । तावतापि साध्यवत्त्वावच्छिन्नान्योन्याभाववदवृत्तित्वस्य प्रत्ययासम्भवात् । साध्यवद्भेदकूटस्य तादृशव्याप्तघटकत्वादिति भावः । हेतुव्यापकतायां साध्ययोगस्य व्यवच्छेदाप्रवेशादसङ्गतेराह अयोग इति । ननु साध्यवदन्यावृत्तित्वं बोधयदपि वन्हिमान् धूमवानित्यादिवाक्यं नोदाहरणं किं तु कथकसंप्रदायानुरोधेन यो यो धूमवान् सोऽग्निमानित्येवोदाहरणशरीरम्, अन्यथा त्वन्मतेपि सर्वं धूमवद्वन्हिमदित्याद्यपि वाक्यं व्यापकत्वबोधकतयोदाहरणं स्यादत आह न स्याच्चेति । केवलान्वय्यनुमानमिति ।

ण्यभाननियतमिति व्याप्यत्वभानेऽपि तुल्यम् । यदि च स्मृता व्याप्तिर्धूमेऽवगम्यते तदा व्यापकत्वेऽपि समानम् । वस्तुतस्तु व्यापकत्वं तद्वन्निष्ठात्यन्ताभावाप्रतियोगित्वं न तु धूमसामानाधिकरण्यं व्याप्यत्वन्तु सामानाधिकरण्यविशेष इति तत्रैवानुमितिरफला स्यात् । न चैवं परामर्शस्य चाक्षुषत्वं न स्याद्व्यापकस्य विशेष्यस्येन्द्रियासन्निकर्षादिति वाच्यम् । इष्टत्वात् । असन्निकृष्टधूमादावित्व मानस एव हि सर्वत्र परामर्शः, चक्षुरन्वयव्यतिरेकानुविधानञ्च पक्षवृत्तिधूमोपनयोपक्षीण-

---

सन्नाय।साध्याभाववद्वृत्तित्वबुद्धेरपि व्यापकताधीविरोधित्वादिति वदन्ति । मानस एवेति प्रायिकत्वाभिप्रायेण । तेन क्व चिच्छब्दादिना क्व चिच्च साध्येन्द्रियसन्निकर्षात् परामर्शेऽपि न क्षतिः, पक्षसाध्यसम्बन्धस्याग्रहात् ग्रहेऽप्यनुमित्साया अनुमि-

---

साध्यस्य केवलान्वयित्वग्रहदशायामनुमानं न स्यादिति भावः । अतिस्फुटत्वमिति । वन्हावव्यापकत्वनिश्चयस्य तद्धर्मिकव्यापकताधीप्रतिबन्धकत्वस्यानुभविकत्वमभिसन्धायेत्यर्थः । वदन्ति प्राञ्चः । प्रायिकत्वेति । एवकारस्य प्रायार्थकत्वाभिप्रायेणेत्यर्थः । तथा च सर्वत्र प्रायशो मानसः परामर्श इति मूलार्थःनियमार्थकत्वे बाधकमाह तेनेति । परामर्शे साध्यधर्मिके । ननु साध्येन्द्रियसन्निकर्षदशायां पक्षेपि साध्यवत्त्वस्य निर्णयसम्भवात्कथमनुमितिरत आह पक्ष इति । ननु जनकज्ञानोपसर्जनस्य जन्यपरोक्षज्ञाने प्राधान्येन भानं नेति नियमो वक्तव्य इत्याशङ्क्याह मूले अन्यथेति । उक्तनियमसत्त्वे इ-

म् । अथ जनकज्ञाने उपसर्ज्जनतया भातस्य पक्षस्य पर्वतादेरनुमितौ प्राधान्येन भानं न स्यात्, न हि जनकज्ञाने उपसर्जनतयावगतं जन्यज्ञानं प्राधान्येन भासते, तथादर्शनात् । न चानुमितेस्तथात्वमसिद्धम्, पर्वतोऽयं वह्निमानित्यनुमितेर्लोकसिद्धत्वादिति चेन्न । पुरुषस्य दण्ड इति ज्ञानानन्तरं दण्डी पुरुष इतिज्ञानजन्यज्ञानदर्शनात् । अन्यथा तवापि कथं पक्षविशेष्यकत्वनियमः । न हि कारणीभूतज्ञाने यद्विशेष्यतया भासते तत्कार्य्यीभूतेऽपि तथा, इह भूतले घटो नास्तीति ज्ञानजन्ये घटाभाववद्भूतलमितिज्ञाने तत्र च व्यभिचारात् । तस्मात् पक्षवृत्तिलिङ्गपरामर्शस्यायं स्वभावो यत्स्वाश्रयविशेष्यिकामनुमितिं जनयति नाऽतथाभूताम्, एवं ममापि तुल्यमिति ।

तिसम्भवात् । व्यभिचारादितिन च यत्र यत्रयदुभयवैशिष्ट्याव-

त्यर्थः । त्वन्मतेपि लिङ्गविशेष्यकपरामर्शस्याप्यनुमितिजनकतया तत्रोपसर्जनस्य पक्षस्यानुमितौ प्राधान्येन भानासम्भवादिति भावः । ननु जनकज्ञानविशेष्यस्यैव जन्यीभूतज्ञानविशेष्यत्वादनुमितेः पक्षविशेष्यकत्वानुरोधेन लिङ्गविशेष्यकः परामर्शो हेतुरेव नेति कथं तदादाय व्यभिचार इत्यत आह न हीति । तत्र चेति । पुरुषस्य दण्ड इत्याद्युक्तस्थले चेत्यर्थः । तथा च लिङ्गधर्मिकपरामर्शस्य हेतु-

गाहि ज्ञानं कारणं तत्र तदेकतरोपसर्जनस्यान्यतरस्य जन्यज्ञाने प्राधान्येन न भानमिति वाच्यम्। मानाभावात्। अत्र चेदमवधेयम्, पक्षधर्मसमानाधिकरणाभावप्रतियोगित्वत्वेनाभावज्ञानं वह्न्यादावभ्रान्तमसम्भवि, तादृशप्रतियोगित्वप्रतियोगिताकाभावावगाहि चातिप्रसक्तम्, पक्षधर्मधूमसमानाधिकरणाभावप्रतियोगित्वत्वेनच तज्ज्ञानं न व्यापकम्, येन रूपेण पक्षधर्मताग्रहस्तद्रूपावच्छि-

---

तायामुक्तव्याप्तिर्न बाधिकेति भावः। उक्तव्याप्तिं परिष्कृत्य शङ्कते दीधितिकारो न चेति। तत्र कारणतायाम्। सप्तम्यर्थः प्रविष्टत्वम्। तच्चोपसर्जनत्वान्वितमातेन तदन्यधर्मिकतत्प्रकारकनिश्चयत्वावच्छिन्नकारणतानिरूपितं ज्ञाननिष्ठकार्यत्वं च तद्विशेष्यकत्वावच्छिन्नं नेत्यत्र तात्पर्यात् लिङ्गधर्मिकसमूहालम्बनानुमितौ न व्यभिचारः। पक्षस्य हेतुतास्थले तत्प्रकारकनिश्चयत्वावच्छिन्नकारणताकानुमितौ पक्षस्य विशेष्यतया भानात्तदन्यधर्मिकत्वानुसरणमिति ध्येयम्। मूले स्वाश्रयः पक्षः। दीधितौ अत्र व्यापकतापरामर्शस्य हेतुत्वे। अभ्रान्तमिति। पक्षधर्मस्येन्धनादेः जलादावपि सत्त्वेन वन्ह्यादौ तत्समानाधिकरणाभावप्रतियोगित्वस्यैव सत्त्वादिति भावः। केवलान्वयिसाध्ये सम्भवत्येवाभ्रान्तं तादृशज्ञानमतो वन्हावित्युक्तम्। अतिप्रसक्तमिति। धूमादेः पक्षधर्मवन्ह्यादिसमानाधिकरणाभावीयघटादिनिष्ठप्रतियोगित्वाभावग्रहेपि पक्षे धूमाद्यनुमित्यापादकमित्यर्थः। न व्यापकमिति। यत्र वन्हौ धूमसामान्यव्यापकत्वं धूमे च पक्षवृत्तित्वं गृहीतं तत्र पक्षवृत्तिधूमान्तर्भावेन व्यापकत्वाग्रहेपि अनुमित्युपगमादिति भावः। अत्र धूमे पर्वतवृत्तित्वमुपलक्षणीकृत्य साध्ये धूमसामान्यव्यापकत्वावगाहिनः पक्षवृत्तिधूमव्यापको वन्हिरित्येवं विशिष्टवैशिष्ट्यावगाहिज्ञानस्य हेतुत्वं सुवचमेव। अत एव जातित्वमुपलक्षणीकृत्य जात्यवच्छिन्नाभावस्य प्रमात्मको ग्रहः पटादौ संमतः। अत एव वन्ह्यादौ स्वर्गादौ च वैजात्यस्य स्वरूपतोऽनुपस्थितौ वन्हित्वादिसमानाधिकरणजातित्व-

स्वव्यापकताज्ञानञ्च मीमांसकमतनिरासेनैव निरस्तमितिस्वर्गकामो यजेतेत्यादावन्वयबोधं शब्दमणिदीधितौ विवेचयिष्यामः ।

मुपलक्षणीकृत्य वन्हित्वादिसमानाधिकरणजात्यवच्छिन्ननियतपूर्ववर्तितावच्छेदकत्वरूपं वन्ह्यादिकारणतावच्छेदकत्वं तृणारणिमणित्वादौ सुग्रहमित्याशयेन तृणादौ वन्हित्वादिसामानाधिकरण्येन हेतुताग्रह इति मिश्रैरुक्तमिति तु विभावनीयम् । मीमांसकेति । तथा च पुमन्तरीयं तत्पुंस एव वा कालान्तरीयं च पक्षधर्मताज्ञानमादायातिप्रसङ्गात् तत्पुरुषीयत्वादिप्रवेशेऽनन्तकार्यकारणभावापत्तिरिति भावः । अत्रोक्तदोषभयात्स्वव्यापकसाध्यस्य सम्बन्धमात्रमेवास्तु व्याप्तिः तथा च साधनवन्निष्ठाभावाप्रतियोगिसाध्यसम्बन्धहेतुमान् पक्ष इत्येवं परामर्शे साध्यसामानाधिकरण्यभानानियमात्तद्धियो हेतुत्वे मानाभावः साधनांशे तादृशसाध्यप्रकारतामात्रस्यापेक्षणीयत्वादिति चिन्तनीयम् । ननूक्तक्रमेण स्वर्गकामो यजेतेत्यादावप्यन्यथासिद्ध्यनिरूपकस्वर्गव्यापकतावच्छेदकधर्मवत्तोपर्यवसितस्य स्वर्गसाधनत्वस्य यागादावभ्रान्तं ज्ञानमसम्भवि स्यात् यागत्वाश्वमेधत्वादेः स्वर्गवन्निष्ठाभावप्रतियोगितावच्छेदकत्वादत आह स्वर्गकामेत्यादि । स्वर्गसाधनं याग इत्याकारको न तत्र बोधः किं तु यागसाध्यस्वर्गको याग इत्याकारक एव । तत्र यागवदन्यावृत्तित्वघटितं यागसाध्यत्वं स्वर्गत्वसामानाधिकरण्येनैव भासत इति न कापि क्षतिः । आश्रयेऽन्यवृत्तित्वे अभावे च खण्डशो विधिशक्त्यैव मिथो तद्विशिष्टलाभसम्भवादिति भावः । के चित्तु स्वर्गप्रतियोगिकाभावप्रयोजकाभावप्रतियोगितावच्छेदकधर्मवत्त्वलक्षणं स्वर्गसाधनत्वमेव विध्यर्थः । तच्च विजातीयस्वर्गत्वावच्छिन्नाभावस्यैव स्वर्गप्रतियोगिताकाभावत्वेन रूपेण यागत्वावच्छिन्नाभावप्रयुक्तत्वं सुग्रहम् । प्रयुक्तत्वं च स्वरूपसम्बन्धविशेषः कारणतावच्छेदकावच्छिन्नाभावनिरूपितः कार्यतावच्छेदकावच्छिन्नाभावनिष्ठ एवेति नातिप्रसङ्गः । प्रयुक्तत्ववत्कारणत्वस्याप्यखण्डत्वे तु नानुपपत्तिलेशोपि स्वर्गकारणतावान् याग इत्येवविधेर्बोधसम्भवात्, अतिरिक्तस्यापि

एवं लिङ्गपरामर्श एव कारणं न तु परामृश्यमाणं लिङ्गम्। अथ परामर्शमात्रं न हेतुरपि तु लिङ्गपरामर्शः तथा च लिङ्गमपि हेतुः विशिष्टकारणताग्राहकमानेन बाधकं विना विशेषणस्यापि हेतुत्वग्रहात्। न च लिङ्गं परामर्शपरिचायकत्वेनान्यथासिद्धम्, परिचये विशेषणान्तराभावेन लिङ्गमेव विशेषकं तथा चानन्यथासिद्धत्वात् तदपि हेतुः। अन्यथा परिचायकतया संयोगेनान्यथासिद्धमिन्द्रियमपि करणं न स्यात्। अपि च धूमवान्

परिचायकत्वं परिचेयव्यावर्त्तकत्वं तच्च नोपलक्षणतयेत्याह परिचेय इति। विशेषणतया तत्त्वे पुनराह तथा चेति। अवच्छेदकतामात्रेण चान्यथासिद्धावाह अन्यथेति। अपि चेत्यादि। या

कारणत्वस्याप्यन्यथासिद्धिनिरूपकनियतपूर्ववर्त्तितावच्छेदकधर्मव्याप्यतया वैजात्यादेः कल्पनीयत्वादिति प्राहुः॥

मूले लिङ्गमपीति। विशेष्येण परामर्शेनान्वयि यत्कारणत्वं तदन्वितत्वे सत्येव लिङ्गस्य विशेषणत्वसम्भवादिति भावः। ननु परिचायकत्वं यदि परिचयजनकत्वं तदा विशेषान्तराभावादित्यग्रिममूलासङ्गतिरतो व्याचष्टे परिचयेति। यद्यपि परिचायकत्वं व्यावर्त्तकत्वमित्येव वक्तुमुचितम्, तथापि विषयितया व्यावर्तकत्वलाभार्थं परिचेयपदम्। नोपलक्षणतया न व्यावर्त्तकधर्मान्तरोपस्थापकतया। तथा च काकवत्त्वादिकं यथा तृणत्वाद्युपस्थापकतया गृहादिव्यावर्त्तकं न तथा लिङ्गं धर्मान्तरोपस्थितिद्वारा परामर्शस्य व्यावर्तकं परामर्शे तादृशलक्षणान्तराभावादित्यर्थः। तत्त्वे व्यावर्तकत्वे।

वन्हिमानिति धूमसमानकालवन्हिविषया धूमविशेषणिकानुमितिः ज्ञायमानविशेषणजन्या विशेषणसमानकालतया विशेष्यविषयेऽशाब्दविशिष्टज्ञानत्वात् दण्डी पुरुष इति प्रत्ययवत् । अत एव ज्ञायमानविशेषणजन्यत्वेन

यद्विशेषणसमानकालीनत्वेन तादृशी बुद्धिः सा ज्ञायमानतद्विशेषणजन्येति सामान्यव्याप्तौ पक्षधर्मतासम्पत्तये धूमविशेषणिकेत्यादि । तादूप्यस्यानुभविकत्वप्रदर्शनाय च धूमवानित्यादि। ज्ञायमानेति च तज्ज्ञानस्यापि जनकत्वलाभाय । साध्यविशिष्टानुमितेः साध्याजन्यत्वाद्विशेषणसमानकालतयेति। धूमकालीनवन्हिमान् धूमध्वंसादित्यनुमितेः धूमजन्यत्वात् विशेष्येति।विशेष्ये विशेषणभा-

---

अन्यथेति मूलस्य विशेषणत्वेपि अन्यथासिद्धत्वे इति नार्थः स्फुटतरविरोधात् अतः प्रकारान्तरेणावतारयति अवच्छेदकतामात्रेणेति । कारणतावच्छेदकतामात्रेणेत्यर्थः । यथाश्रुते पक्षतावच्छेदकपर्वतत्वादिजन्यतामादायार्थान्तरत्वापत्तेः सामान्यमुखीं व्याप्तिमाश्रित्य पदव्यावृत्तिमाह यदित्यादि । तादृशी बुद्धिः विशेष्यविषयकाऽशाब्दबुद्धिः । सामान्यव्याप्ताविति । तथा च धूमस्वरूपं विशेषणमादाय हेतुसत्त्वात्तज्जन्यत्वसिध्यैव नार्थान्तरमिति भावः । ननु धूमवति धूमसमानकालतया वन्ह्यवगाह्यनुमितित्वेनैव पक्षतासम्भवादधूमवान् वन्हिमानित्याकारप्रदर्शनं व्यर्थमत आह तादूप्यस्येति । विशेषणीभूतधूमस्य समानकालीनतया वन्ह्यवगाहित्वस्येत्यर्थः । धूमवान्पर्वतो वन्हिमानित्यनुमितेरनुव्यवसायेन तस्यां तादृशवन्ह्यवगाहित्वस्य ग्रहादिति भावः । ननु तद्विशेषणजन्येत्युक्त्यैव लिङ्गजन्यत्वासिद्धौ ज्ञायमानत्वांशो व्यर्थ इत्यत आह ज्ञायमानेति चेति । ननु

विशेषणकालवृत्तितया विशेष्यभाननैयत्यं यथा दण्डी

वापन्नं यत्समानकालीनत्वेन धर्मान्तरवैशिष्ट्यावगाहीत्यर्थः । तदानीं धूमवान् पर्वतो धूमकालीनवन्हिमान् धूमध्वंसवत्त्वादिसादौ च विशेषणे विशेषणतापन्नस्यैव धूमस्य समानकालत्वं वन्हौ

या यद्विशेषणिकाऽशाब्दविशिष्टबुद्धिः सा तज्जन्येत्येवव्याप्तिरस्तु कृतं समानकालीनत्वादिप्रवेशेनेत्यत आह साध्यविशिष्टेति । तथा चानुमितेः साध्यसमानकालीत्वानवगाहित्वादेव न व्यभिचार इति भावः । इत्यनुमितेः एवं प्रयोगस्थलीयानुमितेः । अनुमितेरुक्ताकारत्वाभावात् । तथा च धूमध्वंसवान्पर्वतो धूमकालीनवन्हिमानित्येवं धूमध्वंसहेतुकानुमितौ धूमसमानकालीनत्वावगाह्यशाब्दविशिष्टबुद्धित्वस्य हेतोः सत्त्वादधूमजन्यत्वरूपस्य साध्यस्य चासत्त्वाद्व्यभिचारः स्यादतो विशेष्यपदमिति भावः । यथाश्रुते व्यभिचारतादवस्थ्याद्व्याचष्टे विशेष्ये विशेषणभावेति । तथा चोक्तानुमितौ विशेष्ये पर्वते विशेषणतापन्नो न धूम इति तत्समानकालीनत्वावगाहिन्यामपि तस्यां न व्यभिचार इति भावः । धर्मान्तरेति स्वरूपकथनं न तु तु विवक्षितं वैयर्थ्यात् । सम्बन्धभेदेनैकस्यैव लिङ्गसाध्यभावेनाऽनुमितावुक्तक्रमेण लिङ्गजन्यत्वस्याऽननुमानप्रसङ्गाच्चेति ध्येयम् । ननु तदानीं धूमवान्पर्वतो धूमकालीनवन्हिमानित्याकारानुमितिर्विशेष्ये विशेषणीभूतस्य धूमस्य समानकालीनत्वेन धर्मान्तरस्य वन्हेर्वैशिष्ट्यावगाहिन्या अपि धूमध्वंसलिङ्गकत्वेन धूमाजन्यत्वाद्व्यभिचार इत्यत आह तदानीं धूमवत्पर्वते इत्यादि । सतः पक्षतावच्छेदकस्य अनुमितिहेतुत्वमिति मतेपि व्यभिचारसम्पत्त्यर्थं तदानीमित्युक्तम् । तेन विद्यमानध्वंसप्रतियोगिधूमवत्पर्वतत्वेन पक्षत्वात्तदवच्छेदकीभूतधूमस्यासत्त्वलाभः । विशेषण इति । साध्ये विशेषणीभूतो यः कालः तद्विशेषणतापन्नस्यैवेत्यर्थः । तथात्वापन्नस्य विशेष्ये विश-

भासते न तु विशेष्ये तथात्वापन्नस्य, अनुभवसिद्धो ह्ययं विशिष्टवैशिष्ट्यबुद्धीनां विशेषणताविशेषः। विशेषणं धर्मितावच्छेदकं विशेष्यञ्च विधेयम्। तथा च विधेयतावच्छेदकावच्छिन्नं यद्धर्मविशिष्टे तत्समानकालीनत्वेनावगाहते या अशाब्दी बुद्धिः सा तद्धर्मजन्येति पर्य्यवसितोऽर्थः। धूमकालीनवन्हिमानसादौ च विधेयतावच्छेदकधूमकालीनवन्हित्वावच्छिन्नं न धूमकालीनत्वेन भासते परन्तु वन्हित्वावच्छिन्नम्, धूमवानयं धूमकालीनवन्हिमान् पर्वतो वन्हिमानालोकादित्यादौ च न धूमवत्त्वविशिष्टे धूमकालीनवन्हिमत्त्वं भासते, किन्तु यादृशविशिष्टपक्षतावच्छेदकवति वन्हिमत्त्वं

षणत्वापन्नस्य। धूमस्य समानकालीनत्वं वन्हौ भासत इति पूर्वेणान्वयः। यद्यपि विशेष्ये विशेषणत्वापन्नो यो धूमः तस्यैव समानकालीनत्वेन वन्ह्यवगाहित्वादुक्तानुमितौ धूमाजन्यायां व्यभिचारतादवस्थ्यम्, तथाप्यापन्नपदमहिम्ना या विशेष्यनिरूपितयद्धर्मनिष्ठविशेषणताप्रयुक्ततद्धर्मसमानकालीनत्वावगाहिताकशाब्दभिन्नबुद्धिः सा तद्धिशेषणजन्येत्यत्र तात्पर्यम्। उक्तानुमितौ च पर्वते धूमस्य यद्धिशेषणत्वं तत्प्रयुक्तं न धूमसमानकालीत्वावगाहित्वं किं तु साध्यांशे विशेषणताप्रयुक्तमेवेति न व्यभिचारः। ननु धूमवान्पर्वतो वन्हिमानित्यनुमितावपि विशेष्ये धूमस्य यद्धिशेषणत्वं तत्प्रयुक्तं न धूमसमानकालीनत्वावगाहित्वमित्यसिद्धिरत आह अनुभवसिद्ध इति। अयं विशेष्ये विशेषणताप्रयुक्तः विषयताविशेषः समानकालीनत्वावगाहिताख्यः। तादृशविषयत्वानुभवे विप्रतिपत्तेः कल्पान्तरमाह विशेषणमित्यादिना। विधेयतावच्छेदकावच्छिन्नमित्यस्य फलमाह धूमकालीनेत्यादि। विधेयतेति। विधेयतावच्छेदकं यद्धूमकालीनवन्हित्वं न तदवच्छिन्नं भासते किं तु वन्हित्वावच्छिन्नं तथा च तदानीं धूमवत्पर्वतो धूमकालीनवन्हिमानित्यनुमितौ धूमाजन्यायां

पुरुष इतिप्रत्यक्षे, तेन धूमसमानकालीनवह्निसिद्धिः । अन्यथा तत्तद्धूमकालवृत्तित्वन्ह्यनुमानं स्यात् । समय-विशेषमन्तर्भाव्य व्याप्त्यग्रहात् । किञ्च लिङ्गकरण-

---

सम्बन्धमर्य्यादया यत्समानकालीनत्वमवगाहत इत्यपि वदन्ति । अथ वा विशिष्टत्वं व्यावृत्तत्वं तच्च तत्समानकालीनत्वग्रहाजन्यत्वं विशेषणविशेष्यपदे च धर्मद्वयमात्रोपदर्शके तथा चैकस्मिन् धर्मे

व्यभिचारवारणार्थं तदिति भावः।यद्धर्मविशिष्ट इत्यस्य फलमाह धूमवानयमित्यादिना । धूमवत्त्वविशिष्टे धूमवत्त्वविशेष्यांश इत्यर्थः । उद्देश्यतावच्छेदककुक्षिनिक्षिप्तवस्तूनां परस्परमुद्देश्यविधेयभाव-विरहादिति भावः । किं त्विति । हेतुभूतालोकविशिष्टे यद्धूमवदभिन्नधूमकालीनवन्हिमत्पर्वतत्वरूपं पक्षतावच्छेदकं तद्वत्येव वन्हिमत्त्वं भासत इत्यर्थः । तथा च धूमाजन्यायां तादृशानुमितौ व्यभिचार-वारणार्थं यद्धर्मविशिष्टपदम्।यद्धर्मनिष्ठविशेष्यतावच्छेदकताकत्वं तदर्थः । कथितस्थले तु धूमो न विशेष्यतावच्छेदकः साक्षाद्धर्मिणि प्रकारतापन्नस्यैव तथात्वात् किं तु विशेष्यतावच्छेदककुक्षिनिक्षिप्त एव धूमः । अत एव ग्रन्थकृतापि तादृशविशिष्टपक्षतावच्छेदकवती-त्युक्तम् । यद्धर्ममात्रावच्छिन्नविशेष्यकत्वं तु नार्थः । पक्षभूतानुमितौ स्वरूपासिद्धिप्रसङ्गात् धूमविशिष्टपर्वतत्वस्यैव तत्तद्धर्मितावच्छेद-कत्वादिति ध्येयम् । धूमकालीनवन्हिमानित्याद्यनुमितौ व्यभिचार-वारकं प्रकारान्तरमाह सम्बन्धेत्यादि । धूमवान्पर्वतो धूमवद्वन्हि-मान् धूमध्वंसादित्यादौ समानकालीनत्वसंसर्गेण धूमविशिष्टवन्ह्या-द्यसाध्यकानुमितौ धूमाजन्यत्वेन व्यभिचारो वदन्तीत्युक्त्वा सूचि-तः । ननु धूमवान्पर्वतो वन्हिमानालोकादित्यादौ धूमसमानकाली-नवन्हिभिन्नवन्ह्यभाववानित्यादिबाधनिश्चयसहकारेण जनितायां धू-मसमानकालीनवन्हिविधेयकानुमितौ धूमाजन्यायां व्यभिचारः

यद्धर्मसमानकालत्वग्रहाजन्या या अशाब्दी तद्धर्मसमानकालीनत्वबुद्धिः सा ज्ञायमानतद्धर्मजन्येत्यर्थः । एवं न क्वापि व्यभिचारशङ्का । साध्यस्य पक्षतावच्छेदकसमानकालीनत्वं क्वापि नानुमितिविषयो मानाभावात् । नवीननये तु कालादेः पक्षतावच्छेदकत्वे तदवच्छिन्नत्वं साध्यस्य भासत इत्यन्यदेतत् । दण्डी पुरुषो गच्छ-

---

किं च विधेयतावच्छेदकत्वमात्रस्यातिप्रसक्तत्वात्स्वविधेयतावच्छेदकत्वाद्यन्तर्भावेणाननुगमोपीत्यत आह अथ वेति । भेदात्मनो व्यावृत्तत्वस्य व्यभिचारावारकत्वादाह तच्चेति । विशेषणत्वादेः प्रवेशवैयर्थ्यादाह विशेषणेति । ननु धूमकालीनः पर्वतो वन्हिमानित्याद्यनुमितेर्लिङ्गकालीनत्वग्रहाजन्यत्वविरहादसिद्धिरित्यत आह तथा चेति। तथा च या तत्र तत्कालीनत्वग्रहाजन्यत्वे सति तत्र तत्समानकालीनत्वावगाह्यशाब्दबुद्धिः सा तद्धर्मजन्येत्यर्थः । कथितानुमितावपि वन्हौ यो धूमकालीनत्वग्रहस्तदजन्यत्वसत्त्वान्नासिद्धिः।न च द्वितीयस्य तत्रेत्यस्य वैयर्थ्यम्, धूमाजन्यायां धूमकालीनः पर्वतो वन्हिमानालोकादित्यादिस्थलीयानुमितौ व्यभिचारवारकत्वात्।न चैवमपि धूमकालीनवन्हिमत्सधर्मा पर्वतो वन्हिमान् धूमादित्यादिस्थलीयानुमितावसिद्धितादवस्थ्यम्, तस्या अपि वन्हौ धूमसमानकालीनत्वग्रहेण जनितत्वादिति वाच्यम् । तत्र हेत्वन्तरेणैव लिङ्गजन्यत्वस्यानुमातव्यत्वादिति भावः । ननु पक्षतावच्छेदकीभूतपर्वतत्वादिसमानकालीनत्वेन साध्यावगाह्यनुमितौ पर्वतत्वाजन्यत्वाद्व्यभिचार इत्यत आह साध्यस्येति । ननु गन्धप्रागभावावच्छिन्नो घटो गन्धवानित्यादिस्थलीयानुमितौ पक्षतावच्छेदकीभूतस्यापि गन्धप्रागभावस्य समानकालीनत्वं गन्धे भासत एव, अन्यथा तत्रासंकीर्णबाधप्रदर्शनानुपपत्तेःअतस्तत्रैव गन्धप्रागभावाजन्यायां व्यभिचार एवेत्यत आह नवीनेति । गन्धप्रागभावो न तत्र पक्षतावच्छेदकः किं तु तत्कालः, तदवच्छिन्नत्वमपि स्वरूपसम्बन्धात्मकमेव तत्रानुमितौ भासते न तु तत्कालवृत्तितामात्रं येन चरमव्याख्यायामप्युक्तानुमितौ गन्धप्रागभावाजन्यायां व्यभिचारः स्यादिति भावः । पक्षतावच्छे-

तीयादिशाब्दधीवारणाय अशाब्देति।तुल्यन्यायतयोपनीतभानवारणाय तदन्यत्वमपि वाच्यमित्यपि वदन्ति। एतन्नये चातीतत्वाग्रहेऽप्यतीतादिलिङ्गज्ञानान्नानुमितिरिति नातीतलिङ्गकालीनत्वाव-

---

दकावच्छेदेन साध्यस्यानुमितौ नाचार्यसंमतिरतो नवीनेत्युक्तम्। न च कालिकसम्बन्धेन धूमविशिष्टे काले तेनैव सम्बन्धेन वन्हेः साध्यत्वे धूमवत्कालो वन्हिमान् तत्कालत्वादित्यादिस्थलीयानुमितेर्वन्हौ धूमसमानकालीनत्वावगाहिन्यां धूमाजन्यत्वाद्व्यभिचार एवेति वाच्यम्। वस्तुगत्या धूमवन्ह्योरेककालवृत्तित्वभानेप्युक्तानुमित्या धूमकालवृत्तितात्वरूपेण वन्हौ तत्समानकालीनत्वानवगाहनात्।पर्वतो वन्हिमान् धूमादित्यादिस्थलीयानुमितौ धूमसमानकालीनत्वं तादृप्येणैव वन्हौ संसर्गमर्यादया भासते धूमवान्पर्वतो वन्हिमानित्याकारकानुमितौ धूमकालीनवन्हीयसंयोगेनैव वन्हेः पर्वतांशे प्रकारत्वादिति भावः। वारणायेति। अन्यथा दण्डसमानकालीनत्वेन गमनवत्तावगाहिनि शाब्दबोधे दण्डाजन्यत्वाद्व्यभिचारः स्यादिति भावः। तुल्येत्यादि। एकधर्मविशिष्टे धर्मान्तरवैशिष्ट्यावगाहिबोधत्वावच्छेदेनैव धर्मितावच्छेदकसमानकालीनतया विधेयभानस्यानुभविकत्वात्। अनुभवार्थकज्ञानपदेन तादृशस्मृतौ व्यभिचारवारणेपि तादृशोपनीतप्रत्यक्षे व्यभिचारवारणार्थमुपनीतप्रत्यक्षान्यत्वमपि हेतौ देयमित्यर्थः। तन्नाप्युपमितेस्तादृशावगाहित्वाभावादतिरिक्तायास्तस्या असत्त्वाद्वा तदन्यत्वं नोपात्तमिति ध्येयम्। अथातीतलिङ्गिकायां धूमकालीनत्वावगाह्यनुमितौ धूमाजन्यत्वादुक्तव्याप्तौ व्यभिचार इत्यत आह एतन्नय इति। आचार्याणां मत इत्यर्थः। अतीतत्वाग्रह इति। तदग्रहे तूपस्थितधूमध्वंसादिलिङ्गिकैव तत्रानुमितिर्भविता तस्यां च धूमकालीनत्वस्य कारणबाधादभानेन निरुक्तहेत्वभावादेव न व्यभिचार इति भावः। नानुमितिरिति। तत्समानकालीनत्वग्रहाजन्यतत्समानकालीनत्वावगाह्यनुमितौ परामृष्यमाणलिङ्गत्वेन हेतुत्वादिति भावः। अतीतलिङ्गिकायां तत्समानकालीनत्वावगाह्यनुमितौ व्यभिचारवारकं कस्य चिन्म-

माह्यनुमितौ व्यभिचारः। कालोऽत्र वर्त्तमानो विवक्षितः। तद्वैशिष्ट्यांशे च प्रमात्वं वाच्यं वर्त्तमानत्वं वा तादृशधर्मविशेषणमित्यपि कश्चित्। के चित्तु विशेषणं विशेष्यतावच्छेदकं तथा च वर्त्तमानविशेष्यतावच्छेदकसमानकालीनतया धर्मान्तरवैशिष्ट्यावगाह्यशाब्दज्ञानत्वादित्यर्थः। सतश्च पक्षतावच्छेदकस्य हेतुत्वमिष्टमेव, समानका-

---

तमाह काल इति। अत्र समानकालीनत्वे। तथा चातीतलिङ्गकालीनत्वावगाहिन्यामनुमितौ वर्तमानकालानवगाहनात् निरुक्तहेत्वभावादेव न तत्र व्यभिचारः।ननु वर्तमानस्यैव कालस्य यत्रातीतलिङ्गाधिकरणतया तत्र भानं तादृशानुमितौ तथापि व्यभिचार एवेत्यत आह तद्वैशिष्ट्यांशे चेति। तयोर्लिङ्गवर्तमानकालयोर्वैशिष्ट्यांशे चेत्यर्थः। काले वर्तमानत्वं तद्वैशिष्ट्यांशे च प्रमात्वमित्युभयापेक्षया लाघवादाह वर्तमानत्वं वेति। तथा च वर्तमानयद्धर्मसमानकालीनत्वावगाहिनी या तादृशी बुद्धिः सा तद्धर्मजन्येत्येव व्याप्तिरिति भावः। तल्लिङ्गिसमानकालीनत्वावगाह्यनुमितौ परामृश्यमाणतल्लिङ्गत्वेन हेतुत्वादतीतलिङ्गिका तादृशानुमितिरेवासिद्धेति व्यर्थं विशेषणमित्यस्वरसः कश्चित्युक्त्या सूचितः। मिश्रव्याख्यां परिष्कृत्याह के चित्त्वित्यादिना। सतोपिं साध्यविशेषस्यानुमितावहेतुत्वादाह विशेष्यतावच्छेदकमिति। मुख्यविशेष्यतानिरूपितावच्छेदकमित्यर्थः। तेन पर्वतो धूमकालीनवन्हिमानालोकादित्यादिस्थलीयानुमितेः कालीनत्वादिविशेष्यतावच्छेदकीभूतवन्हित्वाद्यजन्यत्वेपि न व्यभिचारः। एतन्नयेऽतीतलिङ्गज्ञानादप्यनुमित्युत्पादात्तत्र व्यभिचारवारणाय वर्तमानत्वं धर्मविशेषणमित्याशयेनाह तथा चेति। ननु पर्वतः पर्वतत्वकालीनवन्हिमानित्यादिस्थलीयानुमितेर्विशेष्यतावच्छेदकीभूतपर्वतत्वाजन्यत्वात् व्यभिचार इत्यत आह सतश्चेति। वर्तमानस्येत्यर्थः। नन्वेवं या यद्विशेष्यतावच्छेदकविशिष्टधर्मान्तरावगाह्यशाब्दबुद्धिः सा तद्विशेष्यतावच्छेदकजन्येत्येव व्याप्तिरस्तु समानकालीनत्वप्रवेशो व्यर्थ इत्यत आह समानेति।

स्वपक्षे परामर्श एव तद्व्यापारः परामर्शस्य तु न व्यापारान्तरमस्ति चरमकारणत्वादिति न तत् करणम् ।

अत्रोच्यते । अतीतानागतधूमादिज्ञानेऽप्यनुमितिद

लीनत्वानुसरणन्तु तादृप्यविषयत्वे प्रतिज्ञायमानविशेष्यतावच्छेदकजन्यत्वस्य प्रयोजकत्वसूचनायेत्याहुः । परामर्श एवेति । न च कारणतावच्छेदकस्य तस्य न व्यापारता परामृश्यमाणत्वेन परामर्शाजननादिति वाच्यम् । व्यापारं प्रति रूपान्तरेण हेतुत्वेऽपि फलम्प्रति तादृप्येण हेतुतायां विरोधाभावात् । लिङ्गत्वेनैवानुमितिहेतुता परामर्शस्तु व्यापारमात्रमित्यपि के चित् ।

तादृप्यविषयत्वे तादृशसमानकालीनत्वविषयत्वेऽप्रतिज्ञायमानयद्विशेष्यतावच्छेदकजन्यत्वं तस्य प्रयोजकत्वलाभाय इत्यर्थः । तथा च तन्नोपादेयमेव हेताविति भावः । अनुमितेः पक्षतावच्छेदकजन्यत्वं नाचार्यसंमतमन्यथाऽनुमितिविषयत्वाविशेषाद्वर्तमानसाध्यतावच्छेदकादिजन्यत्वमपि तत्र स्यादिति विशेष्यतावच्छेदकादिप्रवेशोपि हेतौ व्यर्थः स्यात् । या वर्तमानयद्धर्मावगाह्यशाब्दबुद्धिः सा तद्धर्मजन्येत्यस्यैव सम्यक्त्वादित्यस्वरसः के चिदित्युक्त्या सूचितः । परामृश्यमाणत्वेनेति । फलं प्रति यद्रूपेण करणत्वं व्यापारं प्रत्यपि तद्रूपेणैव करणस्य हेतुत्वादिति भावः । रूपान्तरेण विषयित्वादिरूपेण । तादृप्येणेति । परामृश्यमाणलिङ्गत्वेनेत्यर्थः । फलव्यापारौ प्रत्येकरूपेण करणस्य हेतुत्वमुपपादयितुमाह लिङ्गत्वेनैवेति । व्यापारमात्रमिति । मात्रपदेन कारणतावच्छेदकत्वव्युदासः । केचिदित्यस्वरसः । तद्बीजं तु परामर्शं प्रत्यपि लिङ्गत्वेन न हेतुत्वं सामान्यतः प्रत्यक्षे विषयत्वेन तत्तद्व्यक्तिगोचरप्रत्यक्षे तत्तद्व्यक्तित्वेन वा हेतुत्वात्तादृप्येण चानुमितौ हेतुत्वं व्यभिचारीत्येकरूपेण फलव्यापारौ प्रति हेतुत्वमसम्भावितमेवेत्यादि ।

र्शनान्न लिङ्गं तद्धेतुः व्यापारपूर्ववर्त्तितयोरभावात् । न च विद्यमानं लिङ्गान्तरमेव तद्धेतुः । तदा तस्यापरामर्शात् परामर्शविषयस्य कारणताग्राहकाभावात् । भावि नि पक्षे व्यक्त्यैक्यमेव वा यत्र लिङ्गं तत्र लिङ्गान्त-

---

परामर्शविषयस्येतिविनिगमनाविरहो विशेषणत्वं वा तस्य हेतुत्वे बीजं न चेदमज्ञायमानेऽस्तीति भावः । न च विशिष्टस्य कारणत्वं गृह्णत प्रमाणं विशेषणतावच्छेदकावच्छेदेनापि तत्परिच्छिनत्ति तथा चापरामृष्यमाणस्यापि लिङ्गत्वेन हेतुत्वमविरुद्धमिति वाच्यम् । यतो हि लिङ्गत्वं न साध्यव्याप्यत्वादिकं तदप्रसिद्धावपि गगनाद्यनुमानात् । नापि परामर्शविषयतावच्छेदकमात्रं तथा सति वस्तुमात्रस्यैवानुमितिहेतुतापत्तेः । न चेदं प्रामाणिकम्, तथान्वयव्यति-

---

विनिगमनेति । लिङ्गपरामर्शत्वेनेव परामृश्यमाणत्वेनापि हेतुतायां विनिगमकाभावः लिङ्गपरामर्शस्य विषयतया विशेषणत्वं वा लिङ्गस्यानुमितिहेतुतायां बीजं तच्चाज्ञायमाने न सम्भवतीति प्रमाणाभावादेव न तस्यानुमितिहेतुत्वमिति भावः । न चेति । वाच्यमित्यग्रेऽन्वयः । विशिष्टस्य लिङ्गविशिष्टपरामर्शस्य । लिङ्गत्वेनेति । तस्यैव परामर्शविशेषणतावच्छेदकत्वादिति भावः । व्याप्यत्वादीत्यादिना पक्षवृत्तित्वोपग्रहः । तदप्रसिद्धाविति । वृत्तितानियामकसम्बन्धेन साध्यतायां गगनादिसाध्यनिरूपितव्याप्तेर्गुणादिपक्षके संयोगेन हेतुतायां च पक्षवृत्तित्वस्याप्रसिद्धावित्यर्थः । वस्तुमात्रस्येति । परामर्शविषयतावच्छेदकस्याभाववत्त्वाधिकरणत्वादेः केवलान्वयित्वादिति भावः । इदं वस्तुमात्रस्यानुमितिहेतुत्वम् । तथेति । परामर्शविषयतावच्छे-

रेकादिविरहात्। अन्यथेच्छाशाब्दबोधादिकं प्रतीष्टसाधनत्वाकाङ्क्षादिकुक्षिनिक्षिप्तस्य जगत एव हेतुतापत्तेः। न वा वास्तवो विनिगमनाविरहोऽपिप्रमेयत्वादिना ज्ञातादपि लिङ्गादनुमित्यापत्तेः। व्याप्तिपक्षधर्मत्वेन ज्ञानमानत्वोक्तौ च लाघवात्तादृशज्ञानत्वेनैव हेतुत्वात्। किञ्च कालान्तरीयतादृशज्ञानविषयादपि लिङ्गादनुमितिप्रसङ्गः कारणतावच्छेदकावलीढकारणसत्त्वस्यैव कार्य्योत्पत्तिनियामकत्वान्न तु तद्विशिष्टसत्त्वस्यैव, गौरवात्। इतोऽपि च प्रति-

---

दकीभूतेनाऽभाववत्त्वादिनानुमितौ स्वतन्त्रान्वयाद्यनुविधानाभावादिति भावः। ननु विनापि स्वतन्त्रान्वयविधानं लिङ्गविशिष्टपरामर्शहेतुत्वमेव तद्विशेषणतावच्छेदकीभूतेनाभाववत्त्वादिना हेतुताग्राहकमित्यत आह अन्यथेति। इच्छादाविष्टसाधनत्वादेर्यथासङ्ख्यमन्वयः। कुक्षिनिविष्टस्य तदघटकीभूताभावत्वावच्छिन्नस्य। ननूक्तदोषाल्लिङ्गपरामर्शहेतुताग्राहकप्रमाणेन विशेषणीभूतस्य लिङ्गस्य हेतुत्वाग्रहेऽपि धूमादिलिङ्गकानुमितौ धूमादिलिङ्गकपरामर्शत्वेनेव विनिगमनाविरहेण परामृश्यमाणधूमत्वादिनापि हेतुत्वमायास्यत्येवेत्यत आह न वेति। व्याप्तीति। व्याप्तिप्रकारकपक्षधर्मतानिश्चयविषयत्वेनेत्यर्थः। तादृशज्ञानत्वेन व्याप्तिप्रकारकपक्षधर्मतानिश्चयत्वेन। तद्विषयत्वस्यापि प्रवेशे गौरवादिति भावः। ननु पक्षनिष्ठविशेष्यतानिरूपितव्याप्त्यवच्छिन्नप्रकारतासम्बन्धेनैव ज्ञानविशिष्टत्वेन हेतुत्वाद्विनिगमनाविरह एव, प्रमेयत्वादिप्रकारस्यापि तादृशसम्बन्धेन हेतुत्वाभावादेवातिप्रसङ्गाभावादत आह किं चेति। कालान्तरीयं यद्व्याप्तिविशिष्टपक्षधर्मताज्ञानं तद्विषयीभूतादपि लिङ्गादित्यर्थः। ननु कारणतावच्छेदकधर्मावच्छिन्नपूर्वसत्त्वस्य कार्योत्पत्तौ तन्त्रत्वात्तदानीं तु तादृशज्ञानविषयतापन्नस्य लिङ्गस्याभावान्नानुमितिरत आह कारणेति। अवलीढमुपलक्षितम्। तद्विशिष्टस्येति। कारणतावच्छेदकविशिष्टसत्त्वस्येत्यर्थः। कार्योत्पत्तिनियामकत्वमिति विभक्तिपरिणतेनाऽन्वयः। गौरवादिति। दण्डादिसत्त्वापेक्षया दण्डत्वा-

बन्धकाभावादीनां न कारणतावच्छेदकत्वम्, परामर्शविशिष्टसत्त्वस्य चात्र प्रयोजकत्वाभिधाने लाघवादावश्यकत्वाच्च परामर्शस्यैव तथात्वं तत्र च नातिप्रसङ्गशङ्कापि। अथैवं संयुक्तेन्द्रियादीन्द्रियसंयोगाद्योः कारणतायामपीदमेव विनिगमकं स्यादिति चेत्.

दिविशिष्टसत्त्वस्य घटाद्युत्पत्तिनियामकत्वे गौरवादित्यर्थः। स्वरूपसम्बन्धात्मनो नियामकत्वस्य बाधकं विना लघुन्येव विश्रामादिति भावः। इतोपि चेति। कारणतावच्छेदकोपलक्षितपूर्वसत्त्वस्यैव कार्योपधाने तन्त्रत्वादपि चेत्यर्थः। अन्यथा मण्यादिसत्त्वदशायां मण्याद्यभावविशिष्टवन्हित्वावच्छिन्नस्यासत्त्वादेव दाहानुत्पत्तिसम्भवात् मण्याद्यभावत्वेन दाहादिहेतुत्वं न स्यादिति मुरारिमिश्र एव विजयी स्यादिति भावः। इतोपीत्यपिकारान्मण्याद्यभावविशिष्टवन्हित्वेनेव विनिगमनाविरहाद्वन्हिविशिष्टमण्याद्यभावत्वेन हेतुतापत्तिरतो वन्हित्वमण्यभावत्वाभ्यां स्वतन्त्रान्वयव्यतिरेकेण तादृशलघुधर्माभ्यां दाहादिहेतुत्वसिद्धौ न प्रतिबन्धकाभावस्य कारणतावच्छेदकत्वमित्यादिकमावेदितम्। प्रतिबन्धकाभावादीत्यादिना नैमित्तिककारणस्योपग्रहः। तेन घटादिकार्यसमवायित्वान्यथानुपपत्त्या लब्धघटादिकारणताकस्य कपालादेर्न दण्डाविशिष्टकपालत्वादिना घटादिहेतुत्वं दण्डाद्युपलक्षितादपि तद्विगमदशायां केवलकपालाद्घटाद्यापत्तेरिति ध्येयम्। ननु कारणतावच्छेदकविशिष्टसत्त्वस्यैव कार्योत्पत्तौ नियामकत्वं वाच्यम्, अन्यथा कार्योत्पत्तेः पूर्वं तदवच्छिन्नस्याभावस्य सत्त्वे तेन रूपेण कारणत्वमेव दुर्वचं स्यात् अवच्छेदकधर्मस्य कार्याव्यवहितपूर्ववर्त्तितानवच्छेदकत्वादत आह परामर्शविशिष्टेति। अत्राऽनुमितौ। लाघवादिति। परामृश्यमाणत्वापेक्षया परामर्शत्वस्यावच्छेदकत्वे लाघवादित्यर्थः। सति व्यभिचारे लाघवस्याकिञ्चित्करत्वादाह आवश्यकत्वादिति। विशिष्टसत्त्वस्थले विशेषणसत्त्वस्यावश्यकत्वादित्यर्थः। तथा चाव्यभिचारित्वं तवाप्यनुमतमिति भावः। तथात्वमनुमितिहेतुत्वम्। यत्सत्त्वं कार्योत्पत्तिनियामकं तस्यैव कारणत्वादिति भावः। तत्र चेति। परामर्शत्वा-

स्यादेव यदि न स्यातामिन्द्रियादेः स्वतन्त्रान्वयव्यतिरेकौ, स्याच्च व्यापारेण व्यापारिणोऽव्यवधानम्, न चानुमितिमात्रे तौ लिङ्गस्य, न चातीन्द्रियस्यापि तस्य परामर्शो व्यापार इति ।

वच्छिन्नस्यानुमितेः पूर्वमपेक्षणादिति भावः । परामर्शधर्मिकाप्रामाण्यज्ञानाभावस्य स्वतन्त्रान्वयव्यतिरेकाभ्यां पृथगेवानुमितिहेतुत्वात्पूर्वक्षणावच्छेदेनागृहीताप्रामाण्यकादपि धूमत्वेन गृह्यमाणपरामर्शान्नानुमितिरिति भावः । अथैवमिति । एवं कारणतावच्छेदकलाघवस्यादरे । इदमेवेति । संयुक्तचक्षुष्ट्वादिना चाक्षुषादिकं प्रति हेतुतायामेकद्रव्यसंयुक्तादपि चक्षुरादितो द्रव्यान्तरस्य प्रत्यक्षवारणाय तत्तद्द्रव्यसंयुक्तत्वविशिष्टचक्षुष्ट्वादिना तत्तद्द्रव्यचाक्षुषं प्रति हेतुत्वे गौरवात् द्रव्यचाक्षुषसामान्यं प्रत्येव सामानाधिकरण्यप्रत्यासत्त्या चक्षुस्संयोगत्वेन हेतुतायां लाघवमेव नियामकं स्यादित्यर्थः । तथा च चक्षुरादिसंयोगत्वेनैव संयुक्तचक्षुष्ट्वादिनापि विनिगमनाविरहाच्चाक्षुषादिहेतुत्वं स्यादिति चाक्षुषत्वाद्यवच्छिन्नं प्रति चक्षुष्ट्वादिना चक्षुःसंयोगत्वाद्यवच्छिन्नं प्रति चक्षुष्ट्वादिना द्रव्यत्वादिना वा हेतुत्वमिति प्रवादो भज्येतेति भावः । संयोगाद्योरित्यादिपदेन घटादिकं प्रति कपालतत्संयोगाद्योः परिग्रहः । विनिगमनाविरहो न चक्षुरादेः कारणत्वसाधकः किं तु अन्वयाद्यनुविधानमेवेत्यभिप्रेत्याह स्यादेवेत्यादि । अन्वयव्यतिरेकयोः स्वातन्त्र्यं कारणप्रमापकत्वम् । ननु चक्षुःसंयोगाद्यन्वयाद्यनुविधानोपक्षीणमेव चक्षुरादेः अन्वयाद्यनुविधानं न तु स्वातन्त्र्येणापि, चक्षुर्नाशकालेपि चक्षुःसंयोगसत्त्वे प्रत्यक्षोत्पादे क्षतिविरहादत आह स्याच्चेति । तथा च चक्षुरादिसंयोगस्य प्रत्यक्षहेतुत्वे चक्षुरादेस्तत्र हेतुत्वं व्यापारेण व्यापारिणो अन्यथासिद्धभावात् । हेतुता च चाक्षुषत्वावच्छिन्नं प्रति चक्षुष्ट्वादिना संयोगत्वाद्यवच्छिन्नं प्रति चक्षुष्ट्वादिना द्रव्यत्वादिना वेत्यन्यदेतदिति भावः । व्यवधानमन्यथासिद्धत्वम् । नन्वेवं चाक्षुषादौ चक्षुरादेरिव अनुमितावपि लिङ्गस्य स्वतन्त्रान्वयव्यतिरेकाभ्यामेव हेतुत्वमायास्यतीत्यत आह न चेति । धूमाद्यसत्त्वेपि

अपि च चैत्रेण परामृष्यमाणाल्लिङ्गादपरामृशतोऽपि मैत्रस्यानुमितापत्तिः । तत्पुरुषीयानुमितिं प्रति तत्तत्पुरुषपरामृष्यमाणलिङ्गत्वेन हेतुत्वे चानन्तकार्य्यकारणभावप्रसङ्गः । इच्छाकृतिसुखदुःखस्मरणविशिष्टज्ञानशाब्दबोधादिषु ज्ञानेच्छाधर्माधर्मनिर्णयविशेषणभानपदार्थज्ञानादीनामिवानुमितौ परामर्शस्याप्येकार्थप्रसासत्त्या हेतुत्वान्नातिप्रसङ्गशङ्कापीति कृतं पल्लवितेन । एकान्योन्याभावविशिष्टापरान्योन्याभावादिर्वर्त्तमान एव

तल्लिङ्गकानुमित्युत्पत्त्या व्यभिचारादनुमितिमात्रे लिङ्गस्य न स्वतन्त्रान्वयव्यतिरेकावित्यर्थः । नन्वेवं नित्यलिङ्गकानुमितिं प्रत्येवास्तु परामृश्यमाणलिङ्गस्य हेतुत्वमन्वयाद्यनुविधानसत्त्वादत आह न चेति । तस्य लिङ्गस्य । तथा च यद्यतीन्द्रियलिङ्गस्य मनस्त्वादेः परामर्शो व्यापारः स्यात्तदा तेन व्यापारेणान्यथासिद्ध्यसम्भवात्तादृशलिङ्गस्यानुमितिहेतुत्वं स्यात्, न चैवम्, लौकिकप्रत्यक्षस्यैव विषयजन्यत्वादतः परामर्शेनैवान्यथासिद्धं तत्रापि लिङ्गं न हेतुरिति भावः । ननु कार्योत्पत्तेर्नियामकत्वं न स्वरूपसम्बन्धविशेषः किं तु तद्व्यापकत्वं तच्च लिङ्गपरामर्शसत्त्वस्येव गुरोरपि परामर्शविशिष्टलिङ्गसत्त्वस्याक्षतमतः कारणतावच्छेदकविशिष्टसत्त्वस्यैव कार्योत्पत्तिनियामकत्वस्वीकारेण कालान्तरीयपरामर्शविषयाल्लिङ्गादनुमित्यापत्तिवारणाल्लिङ्गपरामर्शत्वेनेव परामृश्यमाणलिङ्गत्वेनापि हेतुतायां वास्तवो विनिगमनाविरह इत्यतो लिङ्गस्याजनकत्वे विनिगमकान्तरमाह अपि चेति । ननु तवाप्येकस्य पुंसः परामर्शादन्यस्यानुमित्यनुत्पत्त्या तत्पुरुषीयानुमितिं प्रति तत्पुरुषीयपरामर्शत्वेन हेतुत्वात्कार्यकारणभावानन्त्यमेवेत्यत आह इच्छेत्यादि । इच्छादिषु सप्तसु ज्ञानादिसप्तानां यथासङ्ख्यं हेतुतान्वयः । एकार्थेति । यदा यत्रानुमितिः तत्प्राक्क्षणावच्छेदेन तत्र परामर्श इत्येव व्यापकताघटितायां कारणतायां कार्यकारणयोः समवाय एव सम्बन्धविधया प्रविष्ट इति यत्र कारणताघटकसम्बन्धेन कारण

राभावाच्च। यदि च वर्त्तमानमेव तत्र लिङ्गं तदा वर्त्तमानवह्न्यनुमानोपपत्तिः। अथ भावि भूतं वा धूमादि न लिङ्गं किन्तु तत्प्रागभावस्तद्ध्वंसश्च वर्त्तमान एव, त-

---

सर्वत्र हेतुः सम्भवतीयत आह यदि चेति। किन्तु तत्प्रागभाव इति। तस्य च विरोधिकालावच्छेदेन व्याप्यत्वग्रहान्न तत्कालीनसाध्यसिद्धिरिति भावः। अपि चैवाद्यभ्युपगमवादः। नियतसामानाधिकरण्यरूपाया व्याप्तेः प्रागभावादौ दुरपवादत्वात्। धूमप्रागभावत्वादिकं नावच्छेदकमिति चेत्। किञ्चातः, न चैत-

---

न्तत्र तस्यैव कार्यताघटकसम्बन्धेन कार्योपधायकत्वान्नैकस्य पुंसः परामर्शदशायामपरस्यानुमित्यापत्तिरित्यर्थः। साध्यवद्भिन्नभेदस्य केवलान्वयिसाध्यकेऽप्रसिद्धत्वाद्व्यतिरेकिसाध्यके च प्रसिद्धस्यापि साध्यात्मकस्य तस्य सर्वत्रानुमितौ वर्त्तमानत्वायोगाद्धेत्वन्तरं दर्शयति एकेति। एकान्योन्याभावाविशिष्टाः येऽपरेषामन्योन्याभावास्तदादिरित्यर्थः। तथा च भाविन्यपि पर्वते ह्रदान्यत्वे सति घटाद्यन्यत्वमेव विद्यमानं लिङ्गं वन्ह्यादेः साधकं भविष्यतीति भावः। आदिना ह्रदत्वाद्यत्यन्ताभावविशिष्टस्य घटत्वाद्यत्यन्ताभावस्योपग्रहः। ननु वर्तमानस्य धूमप्रागभावादेर्हेतुत्वे तत्कालीनत्वेन वन्ह्याद्यनुमानापत्तेस्तस्य लिङ्गत्वाभिधानमसङ्गतमत आह तस्य चेति। प्रागभावस्य ध्वंसस्य चेत्यर्थः। विरोधीति। यत्र धूमप्रागभावस्तत्र धूमप्रागभावानधिकरणकालावच्छेदेनैव वन्हिरित्यादिक्रमेण व्याप्तिग्रहादित्यर्थः। दुरपन्हवत्वादिति। साध्यनियमस्य तत्सामानाधिकरण्यस्य च द्वयोरेव प्रागभावे सत्त्वादिति भावः। शङ्कते धूमप्रागभावत्वादिकमिति। किं चात इति। प्रागभावत्वस्य व्याप्त्यनवच्छेदकत्वेपि प्रागभावे व्याप्तिपक्षधर्मतयोः परामर्शसम्भवादिति भावः। वस्तुगतिमनुरुध्याह न चैतदपीति। धूमप्रागभावत्वादेर्व्याप्त्यनवच्छेदक-

योरपि वह्निसमानदेशत्वनियमादिति चेन्न । अतीतमाविदिनवृत्तितया निश्चितात् वर्त्तमानतया सन्दिग्धात् धूमादनुमितौ हि न प्रागभावध्वंसौ लिङ्गे, तयोः सन्दिग्धत्वात् । नापि धूमः, तस्यावर्त्तमानत्वात् । किञ्च भूतभाविवर्त्तमानत्वाविषयात् पर्वते इति ज्ञानाद्यत्नानु-

---

दपि, व्याप्तेरवच्छिन्नत्वनियमात् परिशेषेण तस्यैव तथात्वात् । अन्यथा धूमादिवृत्तिव्याप्तीनामपि धूमत्वादिकमवच्छेदकं न स्यात् । अथ स्वव्यापकसमानाधिकरणं व्याप्यं व्यापकत्वञ्च तद्धर्मविशिष्टसमानाधिकरणाभावप्रतियोगित्वत्वाद्यवच्छिन्नप्रतियोगिताकाभाववत्त्वादिकं स च विशेषणं धर्मो व्याप्यवच्छेदकः । न च धूमप्रागभावसमानाधिकरणाभावप्रतियोगितात्वादिकं प्रतियोगितावच्छेदकम्, गौरवादपि तु धूमसमानाधिकरणाभावप्रतियोगितात्वादिकमेव लाघवात् । एवञ्च न धूमप्रागभावो व्याप्यो न वा तत्त्वं

त्वमपि नेत्यर्थः। तस्यैवेति । धूमप्रागभावत्वस्यैवावच्छेदकत्वादिति भावः । अन्यथा व्याप्तेरवच्छेद्यत्वानियमे । प्रतियोगित्वत्वादीत्यादिना तादृशप्रतियोगितावच्छेदकत्वाद्युपग्रहः । स चेति । यद्धर्मविशिष्टसमानाधिकरणाभावप्रतियोगितात्वावच्छिन्नाभावो व्यापकत्वं स एव च विशेषणीभूतो धर्मो व्याप्यवच्छेदक इत्यर्थः । प्रतियोगितात्वादिकमिति । प्रतियोगितावच्छेदकमिति पूर्वेणान्वयः । यद्यप्यव्याप्यवृत्तिवह्निसंयोगादेर्धूमादिव्यापकत्वोपपत्तये स्वानधिकरणहेतुमन्निष्ठाभावप्रतियोगित्वाद्यभावकूटत्वस्वमेव व्यापकत्वं स्वत्वस्याननुगतत्वेन सामान्याभावासम्भवात् तच्च धूमप्रागभावस्य हेतुत्वेपि सुवचम्, तथापि व्याप्यवृत्तिसाध्यकस्थलाभिप्रायेणेदम् ।

मानं तत्र का गतिः । सर्वत्र प्रागभावाद्यन्यतमत्वं धूमाद्यत्यन्ताभावाभावत्वं वा लिङ्गमिति चेत् । न । व्यर्थविशेषणत्वेन तेषामलिङ्गत्वात् । अन्यतमत्वाद्यज्ञानेपि धूमज्ञानादनुमितिसत्त्वाच्च । अपि च न धूमप्रागभावादि लिङ्गं न वा तद्धीरनुमितिकारणम्, प्रागभावादीनां व्यर्थत्वात् आवश्यकधूमज्ञानादेवानुमितिसम्भवाच्च

व्याप्यवच्छेदकम् । अत एव प्रमेयधूमत्वादिकमपि नावच्छेदकमिति चेत् । गतं तर्हि जातिसमनियतोपाधिगुणादीनां व्याप्यत्वेन, लाघवेन गोजलादिनिष्ठाभावप्रतियोगितात्वादेरवच्छेदकत्वात् न तु सास्नास्नेहादिमन्निष्ठाभावप्रतियोगितात्वादेर्गौरवात् । प्रस्थितश्च गोत्वादिवृत्तिधर्माणामवच्छेदकत्वेन, आपतितश्च ते नीलधम-

---

तत्र वैय्यधिकरण्याप्रवेशादिति ध्येयम् । लाघवादिति । प्रागभावाप्रवेशेन लाघवादित्यर्थः । एवं चेति । धूमप्रागभावव्यापकत्वाप्रसिद्ध्यैव स्वव्यापकसामानाधिकरण्यरूपव्याप्तेस्तत्रासम्भवादिति भावः । तत्त्वं धूमप्रागभावत्वम् । अत एवेति । धूमवच्छिष्ठाभावप्रतियोगित्वत्वाद्यपेक्षया प्रमेयधूमवन्निष्ठाभावप्रतियोगित्वत्वादेर्गुरुत्वात्तदवच्छिन्नाभावाप्रसिद्ध्यैव प्रमेयधूमत्वादिकं न व्याप्यवच्छेदकमित्यर्थः । एकजातिव्याप्यस्यापरजातिव्यापकस्य च रूपादेरुक्तक्रमेण व्याप्यताव्युदासस्यासम्भवात्समनियतेत्युक्तम् । गुणादीत्यादिपदेन वन्हित्वादिसमनियतस्योर्ध्वज्वलनादिकर्मणः परिग्रहः । तथा च द्रव्यं सास्नावत्त्वात्स्नेहादूर्ध्वज्वलनाद्वेत्यादौ सास्नादिकं साध्याव्याप्यं न स्यादिति भावः । व्याप्यत्वाभावं व्युत्पादयति लाघवेनेत्यादि । जलादीत्यादिना वह्न्याद्युपग्रहः । अवच्छेदकत्वात् व्याप्य-

किञ्च लिङ्गं नानुमितिमात्रे हेतुः लिङ्गं विनापि धूली-पटलात् लिङ्गभ्रमेणानुमित्युत्पत्तेः, नापि लिङ्गं प्रमानुमितौ, परामर्शोऽनुमितिमात्रं हेतुः तद्विशेषप्रमात्वाभ्यामेवानुमितितथात्वात्, यत्सामान्ये यत्सामान्यं प्रयोजकं तद्विशेषे तद्विशेषस्य प्रयोजकत्वात् । अथ प-

---

समानाधिकरणाभावप्रतियोगित्वाद्यभावस्यातिरिक्तत्वात् । प्रमेयधूमत्वादिना वन्ह्याद्यव्यापकत्वार्थमिव स्नेहत्वादिना व्याप्यत्वार्थमपि लघुगुरुसाधारणस्यावच्छेदकत्वस्योपादाने कुतस्तद्व्युदास

ताप्रतियोगितावच्छेदकत्वात् । स्नेहादीत्यादिनोर्ध्वज्वलनाद्युपग्रहः । सखण्डानामव्याप्यतामभिधायाऽखण्डानामपि तामाह प्रस्थितं चेति । गोनिष्ठाभावप्रतियोगित्वत्वापेक्षया गोत्वत्वविशिष्टवन्निष्ठाभावप्रतियोगित्वत्वादेर्गुरुतया तदवच्छिन्नाभावाप्रसिद्ध्या द्रव्यं गोत्वादित्यादौ गोत्वत्वादिकमपि व्याप्यतावच्छेदकं न स्यादित्यर्थः । उक्तक्रमेण व्याप्यतावच्छेदकनिरुक्तावव्याप्तिमुक्त्वाऽतिव्याप्तिमाह आपतितं चेति । स्वयं नीलधूमत्वस्य व्याप्यत्वावच्छेदकत्वोपगमादाह ते इति । अतिरिक्तत्वादिति । तस्य नीलधूमादावपि सत्त्वेन धूमवन्निष्ठाभावप्रतियोगित्वत्वावच्छिन्नाभावतोऽतिरिक्तत्वादित्यर्थः । तथा चोक्तक्रमेण नीलधूमत्वे गौरवासम्भवादतिप्रसङ्ग इति भावः । ननु प्रमेयधूमत्वादिरूपेण वन्ह्याद्यव्यापकत्वरक्षायै गुरोरपि प्रमेयधूमत्वादेर्यथा प्रतियोगितावच्छेदकत्वं स्वीकृतं तथा प्रमेयधूमत्वादिप्रकारेण व्याप्यत्वरक्षार्थमपि स्नेहवन्निष्ठाभावप्रतियोगित्वत्वादेस्तथात्वं स्वीकार्यमतः स्नेहादौ नाव्याप्यत्वमत आह प्रमेयधूमत्वादिनेति । उपादाने उपगमे । कुत इति । तस्य धूमप्रागभावत्वनील-

रामर्शस्य प्रमात्वं त्रिद्यमानालिङ्गविषयत्वं तथा चायातं लिङ्गस्य प्रमानुमितिहेतुत्वमिति चेन्न । भाविना भूतेन वा यदाकदाचिद्विद्यमानेनापि लिङ्गेन परामर्शप्रमात्वसम्भवान्नानुमितिपूर्वसमये तत्प्रमात्वानुरोधेन लिङ्गस्य सत्त्वं कारणत्वं वा धूमकालीनवन्ह्यनुमानञ्च यदा यत्र धूमस्तदा तत्र वह्निरिति व्याप्तिज्ञानादेव । अथ वा धू-

---

इति । तथा चेति । तत्रैव क्लृप्तसामान्यकारणस्य विशेषरूपेण हेतुत्वं यत्र कल्प्यकारणतावच्छेदकमपेक्ष्य न गौरवम्, अन्यथा विशेषकारणकलापविलयप्रसङ्गादिति भावः । धूमकालीनेत्यादि । सामानाधिकरण्ये कालविशेषस्यापि सम्बन्धघटकतया प्रविष्टत्वा-

---

धूमत्वादेः कुतो व्याप्यतावच्छेदकत्वव्युदासः धूमप्रागभावादिमन्निष्ठाभावप्रतियोगित्वत्वादेरपि गुरोः प्रतियोगितावच्छेदकत्वसम्भवादिति भावः। ननु यत्सामान्य इत्यादिन्यायेनानुमितिसामान्यहेतोः परामर्शस्यैव प्रमापरामर्शत्वेन प्रमानुमितौ विशिष्य हेतुत्वोक्त्या लिङ्गस्य तत्र कारणत्वखण्डनात्पुनः तदाशङ्कनं सन्दर्भविरुद्धमतो भावमाह तत्रैवेति । न गौरवमिति । तथा च लिङ्गत्वापेक्षया गुरुत्वादेव यथार्थलिङ्गपरामर्शत्वेन प्रमानुमितौ न हेतुत्वसम्भव इति भावः । अन्यथेति । सामान्यतः लक्षत्वादेव विशेषतः कारणत्वे कार्यसामान्यहेतोः कालादेरनुमित्यादिकं प्रति परामर्शादिविशिष्टकालत्वादिना हेतुत्वापत्त्या परामर्शादिकमप्यनुमितौ हेतुर्न स्यादित्यर्थः । ननु यदा यत्रेत्यादिव्याप्तौ सामान्यतः कालनिवेशात्कथं धूमकालीनत्वेन वन्हेः सिद्धिरत आह सामानाधिकरण्य इति । नियतेत्यादिः । तथा च यत्र धूमस्तत्र धूमकालीनवन्हिसंयोगेन वन्हि-

मकालः पक्षतावच्छेदकः पक्षतावच्छेदकधर्मसमानाधिकरणश्च पक्षधर्मबलात् साध्यं सिध्यतीति धूमकालीनवह्निसिद्धिः । यत्तु व्यापाराभावान्न परामर्शः करणमिति, तथैव, किन्तु व्याप्तिज्ञानं करणं परामर्शो व्यापारः । न

दिग्यर्थः । यदा यत्रेति कालिकदैशिकव्याप्तिद्वयज्ञानात्कालदेशयोः साध्यं सिध्यदसति बाधके लाघवादेकमेव सिध्यतीत्यपि वदन्ति । पक्षतावच्छेदकेति । पक्षतावच्छेदककालाद्यवच्छिन्नमित्यर्थः । किन्तु व्याप्तीति । न च स्मरणात्मकपरामर्शस्थले तदसम्भवः, तत्र व्याप्तिविशिष्टानुभवस्य संस्कारद्वारा परामर्शहेतुत्वात्

रित्येवं व्याप्तौ धूमकालीनवन्हिसंयोगेनैव साध्यस्य वन्हेः प्रविष्टत्वात् तादृशसम्बन्धेन पर्वतो वन्हिमानित्यनुमितिः सम्बन्धविधयैव धूमकालीनत्वं वन्हेरवगाहते निरुक्तसम्बन्धेन वन्हेः साध्यतालाभार्थमेव यदायत्रेत्युभयोर्मूलेऽभिधानादिति भावः । मतान्तरं दर्शयति यदा यत्रेत्यादि । यदा धूमस्तदा वन्हिर्यत्र धूमस्तत्र वन्हिरित्येवं व्याप्तिद्वयज्ञानाज्जायमानायां पर्वतो धूमकालश्च वन्हिमानित्यनुमितौ पर्वते धूमकाले चैक एव वन्हिर्भासत एवेत्यर्थः । वस्तुगत्या धूमकालीनस्यैव वन्हेः पर्वते भानेपि अपेक्षितस्य धूमकालीनत्वेन वन्हिज्ञानस्यासम्पादनाद्वदन्तीत्युक्तम् । पक्षतावच्छेदकोपलक्षिते पक्षे साध्यसिद्धावपि धूमकालीनत्वेन वन्हेः सिद्ध्ययोगात् व्याचष्टे पक्षतेति । कालादीत्यादिना देशोपग्रहः । एतावताप्याचार्यसम्मतं धूमादिकालवृत्तित्वेन वन्ह्याद्यवगाहित्वं नानुमितेः सम्पादितम् । धूमकालस्य पक्षतावच्छेदकत्वे तदवच्छेद्यत्वस्यानुमितौ भानसम्भवेपि धूमसमानकालीनत्वभानासम्भवाद्धूमसमानकालीनवन्हेर्बाधाद्यवतारदशायामेव धूमसमानकालत्वेन वन्ह्याद्यनुमानं द्रष्टव्यमिति नव्याः ।

च परामर्शस्य संस्कारो व्यापारः, परामर्शस्य च चरमकारणत्वेन संस्कारोत्पादनसमयेऽनुमित्युत्पादनात् । नापि

फलाजनकव्यापारस्य फलजनकव्यापारजनकत्वे विरोधाभावात् । न च विशिष्टपरामर्शत्वेन न कारणत्वं व्याप्तिज्ञानत्वेन च न तद्विशिष्टस्मृतिहेतुत्वं न वा विशिष्टस्मृतित्वेनानुमितिहेतुत्वमिति वाच्यम् । व्याप्तिविषयकज्ञानत्वस्मृतित्वाभ्यां विशिष्टविषयकत्वा-

---

तदसम्भवः व्याप्तिज्ञानस्य करणत्वासम्भवः । ननु फलाजनकस्य तदीयव्यापाराजनकत्वनियमादनुमित्यजनकस्य संस्कारादेः कथं तद्व्यापारीभूतपरामर्शजनकत्वमत आह फलाजनकेति । विरोधाभावादिति । घटाद्यजनकस्यापि कपालादिकर्मणः तद्व्यापारीभूतकपालसंयोगादिजनकत्वादुक्तव्याप्तेर्व्यभिचारादिति भावः । न चेतिवाक्यमित्यत्रेन्वयः । न करणत्वं नानुमितिकरणत्वम् । तथा च व्यापारजनकतावच्छेदकरूपेण फलजनकस्यैव करणत्वात् स्मरणात्मकपरामर्शजनकतावच्छेदकेन व्याप्यवत्तानिश्चयत्वेनैवानुमितावहेतुत्वात्स्मृत्यात्मकपरामर्शस्थले व्याप्तिविशिष्टानुभवस्यानुमितिकरणत्वासम्भवादिति भावः । ननु व्यापारीभूतस्मरणात्मकपरामर्शस्य व्याप्तिविशिष्टबुद्धित्वात्तज्जनकतावच्छेदकीभूतेन व्याप्तिज्ञानत्वेनैवानुमितिकरणत्वान्नोक्तदोष इत्यत आह व्याप्तिज्ञानत्वेन चेति । ज्ञानोपरमेऽपि व्याप्तिविशिष्टविषयोपधानेनेच्छाकृत्योः साक्षात्कारात् व्याप्तिविषयकत्वेनैव व्याप्तिविशिष्टज्ञानं प्रति हेतुत्वात् । न चानुमितावपि तादृष्येणैव करणत्वम्, इच्छादावप्यतिप्रसक्तत्वादिति भावः । स्वनिष्ठकरणजन्यतावच्छेदकरूपेण फलजनकस्यैव व्यापारत्वात् पूर्वोत्पन्नव्याप्तिविशिष्टस्मृतित्वेनानुमितावजनकत्वात् स्मरणात्मकपरामर्शस्य न व्याप्तिविशिष्टानुभवव्यापारत्वसम्भव इत्याशयेनाह न चेति । उक्तनियमयोरप्रयोजकत्वमित्यभिप्रेत्य दूषयति व्याप्तिविष-

भ्यां वा हेतुहेतुमद्भावेऽपि व्यापारव्यापारिभावाविरोधात् । न हि द्वारद्वारिणोः फलजनकत्वं येन रूपेण तेन रूपेण तयोर्मिथो हेतुहेतुमद्भावेऽपि नियमः, मानाभावात् इन्द्रियतत्संयोगपदज्ञानपदार्थोपस्थित्यादिषु प्रत्यक्षशाब्दादिकरणव्यापारेषु व्यभिचाराच्च । न चैवं धारावहनस्थले पूर्वपूर्वेषां विशेषणज्ञानानामुत्तरोत्तरतद्द्वारा शिष्टप्रत्यक्षं प्रति करणत्वापत्तिः, यं जनयित्वैव यस्य यज्ज-

---

यकेत्यादि । एकधर्मिकव्याप्तिज्ञानात् अन्यधर्मिकव्याप्तिस्मरणानुत्पत्त्या धर्मिनिवेशस्यावश्यकत्वं व्याप्तिज्ञानत्वव्याप्तिस्मृतित्वाभ्यां कार्यकारणभावे मानाभावादाह विशिष्टविषयकेति । धूमादिधर्मिकव्याप्तिविशिष्टज्ञानत्वतद्धर्मिकव्याप्त्यादिस्मृतित्वाभ्यां चेत्यर्थः । व्यापारेति । स्मरणात्मकपरामर्शतज्जनकव्याप्यवत्त्वानुभवयोरनुमितौ व्यापारव्यापारीभावेऽपि विरोधाभावादित्यर्थः । अप्रयोजकत्वं स्पष्टयति न हीति । तयोर्व्यापारव्यापारिणोः । ननूक्तनियमे बाधकाभाव एव मानमत आह इन्द्रियेति । चक्षुःसंयोगाद्यात्मकव्यापारं प्रति द्रव्यत्वेन हेतुभूतस्य चक्षुरादेस्तज्जनकतानवच्छेदकीभूतचक्षुष्ट्वादिना चाक्षुषाद्यात्मकफलं प्रति करणत्वात् संयोगत्वेन चक्षुरादिकरणजन्यस्य चक्षुःसंयोगादेस्तज्जन्यतानवच्छेदकीभूतेन चक्षुःसंयोगत्वादिना चाक्षुषाद्यात्मकफलं प्रति कारणत्वात् । एवं पदार्थोपस्थित्यादिव्यापारं प्रति सम्बन्धिज्ञानत्वेन हेतोः पदज्ञानस्य तज्जनकतानवच्छेदकीभूतपदज्ञानत्वेन शाब्दात्मकफलं प्रति करणत्वात् सम्बन्धिस्मृतित्वेन पदज्ञानात्मककरणजन्यायाः पदार्थोपस्थित्यादेस्तज्जन्यतानवच्छेदकीभूतपदजन्यपदार्थोपस्थितित्वेन शाब्दात्मकफलं प्रति व्यापारत्वाच्च उक्तव्याप्तौ व्यभिचार एव बाधक इत्यर्थः । एवमुक्तनियमास्तत्वे । द्वारेति । उत्तरोत्तरविशेषणधीद्वारेत्यर्थः । अस्माकं तु प्रथमधीजन्यतावच्छेदकीभूतेन विशिष्टज्ञानत्वेन तृतीयज्ञानं प्रति मध्यमस्याहेतुत्वान्न तस्य तत्र तद्व्यापारत्वमतस्तद्द्वारा प्रथमस्य न तृतीये करणत्वमिति भावः । यमिति । यद्धर्मावच्छिन्नं जनयित्वैव

तर्कः, व्याप्तिग्राहकस्य विषयपरिशोधकस्य वा तस्य तदजन्यत्वादिति ॥

नकत्वं तस्यैव तत्र व्यापारत्वात् । यत्तु तथानियमेऽपि न क्षतिर्विशिष्टस्मृतेरपि व्याप्तिविशिष्टज्ञानतया विशेषणव्याप्तिविषयकेण पूर्वानुभवेन संस्कारेण वा जननाद्व्याप्तिविषयत्वेनैव करणत्वादिति । तन्न । जन्यत्वविशेषितेन संशयसाधारणेन व्याप्तिविशिष्ट-

---

यद्धर्मावच्छिन्नस्य फलतावच्छेदकीभूतयद्धर्मावच्छिन्नोत्पादकत्वं तद्धर्मावच्छिन्नस्यैव तादृशफले तद्वच्छिन्नस्य व्यापारत्वादित्यर्थः । तेन प्रथमज्ञानव्यक्तेर्द्वितीयव्यक्तिं जनयित्वैव तृतीयव्यक्त्युत्पादकत्वेपि न क्षतिः।न चैवं मन इवात्मापि जन्यज्ञानसामान्ये मनोयोगद्वारा करणं स्यात्, इष्टत्वात्।अत एवात्मानमात्मना वेत्तीत्यादौ आत्मनैव मया कृतमित्यादौ च करणे तृतीयापीति भावः । तथा नियमेपीति । व्यापारजनकतावच्छेदकरूपेण फलजनकस्यैव करणत्वं करणजन्यतावच्छेदकरूपेण फलजनकस्यैव व्यापारत्वमित्येवं नियमेपीत्यर्थः । विशिष्टेति । व्याप्यवत्तया पक्षस्मृतेरपीत्यर्थः । विशिष्टबुद्धिसामान्यं प्रत्येव संस्कारसमवायान्यतरसम्बन्धेन विशेषणज्ञानत्वेन हेतुत्वमभिप्रेत्याह पूर्वानुभवेनेति । संस्कारादिसाधारणसविषयकत्वेनैव समवायसम्बन्धेन लाघवाद्विशिष्टधीहेतुत्वमित्यभिप्रेत्याह संस्कारेणेति । जननादिति । तथा च स्मरणात्मकपरामर्शस्थले व्यापारजनकतावच्छेदकेन व्याप्तिविषयकत्वेन पूर्वानुभवस्यानुमित्यात्मकफलजनकत्वान्न तस्य करणत्वहानिः । नन्वेवं व्याप्तिज्ञानत्वेन करणत्वं न स्यादत आह व्याप्तिविषयकत्वेनैवेति । तथा च तत्रेष्टापत्तिरिति भावः । एतावतापि करणजन्यतावच्छेदकरूपेण फलजनकस्यैव व्यापारत्वनियमो नोपपादित इत्याशयेनाह तन्नेति । व्याप्तिविशिष्टबुद्धित्वस्य नित्यवृत्तित्वेन कार्यतानवच्छेदकत्वात् जन्यत्वविशे-

ज्ञानत्वेन तज्जन्यत्वात्, नित्यसाधारणेन च व्याप्तिविशिष्टवैशिष्ट्यावगाहिपक्षनिश्चयत्वेनानुमितिहेतुत्वात् । यदि च विशिष्टव्याप्तेः प्रथममनुपस्थितावपि विशेष्ये विशेषणं तत्रापि विशेषणमिति रीत्या परामर्शादनुमितिस्तदा नियतपूर्वोपस्थितिकपदार्थोपस्थितेरेव करणत्वं वाच्यम् । यत्तु परामर्शजनकत्वेन तत्तद्विशेषणज्ञानानां करणत्वमिति । तच्च । अन्यम्प्रति पूर्ववर्त्तित्वं गृहीत्वैव तथात्वग्रहेणान्यथासिद्धत्वात् । न च तत्र फलाननुगुणमन्यं प्रतीति

शिष्टेनेत्युक्तम् । अनुमितिजनकतावच्छेदकीभूतस्य निश्चयत्वस्याप्रवेशं स्फोरयन्नाह संशयसाधारणेति । तज्जन्यत्वात् विशेषणीभूतव्याप्तिविषयकधीजन्यत्वात् । करणजन्यतावच्छेदकीभूतस्य जन्यव्याप्तिविशिष्टज्ञानत्वस्याप्रवेशं सूचयितुमाह नित्यसाधारणेति । समवायिकारणस्थल एव नित्यस्येत्यादिव्याप्तेः सम्प्रदायसिद्धत्वात्तादृशनिश्चयवतोपीश्वरस्य हेत्वन्तरविलम्बादेवानुमित्यनुत्पत्तेरिति भावः । धूमव्यापकतावच्छेदकेन तद्भिन्नेन वा वह्नित्वेनावच्छिन्नस्य समानाधिकरणं धूम इत्याकारकस्य विशेष्ये विशेषणमिति रीत्या उत्पन्नस्य व्याप्तिज्ञानस्यानुमित्यजनकत्वाद्व्याप्तिघटकीभूतप्रतिपदार्थमन्तर्भाव्य निश्चयत्वस्य जनकतावच्छेदकत्वे वाऽतिगौरवाद्व्याप्तिविशिष्टवैशिष्ट्यावगाहिपरामर्शत्वेनैव स्वमतेऽनुमितिहेतुत्वमतो यदि चेत्युक्तम् । नियतेति । परामर्शपूर्वं नियतोपस्थितस्याभावत्वादेर्ज्ञानमेव करणमित्यर्थः । मिश्रमतं निरसितुमाह यस्त्विति । परामर्शजनकत्वेनेति । व्यभिचारधीविरोधितावच्छेदकविषयतानिरूपकपक्षधर्मतानिश्चयजनकत्वेनेत्यर्थः । तेन विशेष्ये विशेषणं विशिष्टे वैशिष्ट्यमित्युभयसाधारणपरामर्शत्वस्यासत्त्वेपि न क्षतिः । अन्यमित्यादि । फलादन्यं प्रति पूर्ववृत्तित्वं गृहीत्वा फलजनकत्वग्रहे तादृप्येण फलं प्रति अन्यथासिद्धत्वादित्यर्थः । तत्रान्यथासिद्धौ । वाच्यं निवेशनीयम् । तथा च परामर्शस्यानुमित्यात्मकफलानुगुणतया तत्पूर्ववर्त्तित्वग्रहेप्यनुमितौ न तादृप्येणान्यथासिद्धिरिति भा-

वाच्यम्, गौरवात् । न चैवं भ्रमिजनकत्वलक्षणं दृढत्वमपि दण्डे घटजनकतावच्छेदकं न स्यात्, इष्टत्वात् दण्डत्वेनैव तथात्वात् । क्व चिद्घटानुत्पादो भ्रमिरूपद्वारविरहात् क्षुद्रचक्रभ्रमिजननसमर्थान्महाचक्रसमवहिताद्दण्डाद्घटानुत्पत्तौ तत्प्रयोजकतायां आवश्यकत्वात् भ्रमिविशिष्टत्वेन च जनकत्वे चक्रादीनामपि पृथक्कारणत्वं न स्यात्, न स्याच्च घटार्थितया दण्डे निष्कम्पा प्रवृत्तिः, प्रथमं

धः । एवं फलाननुगुणं प्रतीत्यस्याप्रविष्टत्वे । इष्टत्वादिति । तर्हि किं दण्डस्य घटजनकत्वं निरवच्छिन्नमेव, तथात्वे चापसिद्धान्त इत्यत आह दण्डत्वेनैवेति । ननु भ्रम्यजनकादपि दण्डाद्घटोत्पत्तिः स्यादत आह क्व चिदिति । ननु भ्रमेरपि स्वातन्त्र्येण हेतुत्वमपेक्ष्य दण्डस्यैव भ्रमिजनकत्वेन हेतुत्वं लाघवादुचितमत आह क्षुद्रेति । समर्थादित्यन्तेन कारणतावच्छेदकीभूतभ्रमिजनकत्वस्य महाचक्रेत्यादिना भ्रम्यनुपधायकत्वस्य सूचनम् । तत्प्रयोजकतायां इति । भ्रम्यभावस्य प्रयोजकतायां इत्यर्थः । ननु उपधायकतासम्बन्धेन भ्रमिविशिष्टदण्डत्वेनैव घटहेतुत्वात् कारणतावच्छेदकपूर्वसत्त्वस्यापि कार्योत्पादकत्वान्न भ्रमेः स्वातन्त्र्येण हेतुत्वं वाच्यमत आह भ्रमिविशिष्टत्वेनेति । भ्रमिविशिष्टत्वान्तर्भावेणेत्यर्थः । चक्रादीनामपीति । तेषामपि भ्रम्युपधायकत्वरूपेणैव घटहेतुत्वसम्भवे चक्रत्वादिना हेतुत्वं न स्यादित्यर्थः । ननु मास्तु चक्रत्वादिना हेतुत्वमतः किमायातमत आह न स्याच्चेति । निष्कम्पेत्युपलक्षणम् । घटार्थिप्रवृत्तिसामान्यं प्रत्येव घटजनकतावच्छेदकधर्मात्मकतत्स्वरूपयोग्यतानिश्चयस्योपादानधर्मिकस्यापेक्षणीयत्वात् । फलोपधायकत्वसन्देहस्थल एव कुष्यादौ सकम्पप्रवृत्तेरुपगमादिति ध्येयम् । ननु स्वर्णत्वपाषाणत्ववंशत्वकाष्ठत्वादिभिः साङ्कर्याद्दण्डत्वजात्या घटहेतुत्वासम्भवो यदि च घटजनकतावच्छेदकतया सिद्धं स्वर्णत्वादिव्यापकमेव दण्डत्वं स्वर्णद्व्यणुकादितश्च घटानुत्पादो भ्रमिरूपव्यापारविरहादेवेत्युच्यते, तदा नानाविध-

भ्रमेरुपधानानिर्णयात् । अस्तु वा भ्रमिप्रयोजकोऽवयवसंयोगविशेषादिरेव तथा, प्रथमोपस्थितत्वादावश्यकत्वाच्च । अन्यथा घटजनकत्वेनैव भ्रमिजनकतां किमिति न रोचयेः । अत एव सौवर्णवैणवादिदण्डेष्वनुगतदण्डत्वविरहेऽपि न क्षतिः । किञ्चैवं प्रवृत्तिप्रतीष्टसाधनताज्ञानजनकत्वेन शब्दादीनां शाब्दबोधं प्रति च त-

---

धानामेव दण्डानां द्रव्यत्वेन मूर्तत्वेन वा घटहेतुत्वसम्भवाद्दण्डत्वजातौ मानाभावः गगनमनःप्रभृतिभ्यो घटानुत्पादस्यापि भ्रम्यात्मकद्वारविरहादेव वक्तुं शक्यत्वादत आह अस्तु वेति । अत्र संयोगविशेषो न काठिनसंस्थानवत्त्वं वेगवद्वायुविशेषादपि चक्रभ्रमेरुत्पत्तेः, किं तु चक्रभ्रमिप्रयोजकतया सिद्धवैजात्यान्तरविशिष्टसंस्थानवत्त्वमेव तथा वाच्यम् । तथा च परम्परासम्बन्धेन तादृशसंस्थानवत्त्वस्य कारणतावच्छेदकत्वमपेक्ष्य लाघवाद्विलक्षणैकत्ववत्तायाः एव समवायेन जनकतावच्छेदकत्वमुचितम् । अत एव संस्थानगतवैजात्यस्य कर्मजत्वादिभिरभिघातत्वादिभिर्वा साङ्कर्येणासिद्धावपि न क्षतिरित्याशयेनाह आदिरिति । तथा घटजनकतावच्छेदकः । प्रथमेति । भ्रमिजनकत्वस्य तज्जनकतावच्छेदकवैजात्यधीग्राह्यत्वनियमादिति भावः । न च द्विस्त्रिसंवलितैरेव तृणादिभिः चक्रभ्रमिरुत्पाद्यते तेषामेकस्मादपि चक्रभ्रमेर्घटस्य चोत्पत्तिप्रसङ्गः तदीयेष्वेकत्वे संस्थाने वा भ्रमिप्रयोजकवैजात्यसत्त्वादिति वाच्यम् । असंवलिततत्तत्संयोगव्यक्तीनामपि भ्रम्यादिप्रतिबन्धकत्वकल्पनादिति भावः । यद्यन्यथासिद्धिनिरूपकेणापि भ्रमिजनकत्वेन घटहेतुत्वं तदा भ्रमिहेतुत्वमपि घटजनकत्वरूपेणैव स्यात् तथा चान्योन्याश्रयापत्तिरित्यभिप्रेत्याह अन्यथेति । अत एवेत्यस्य स्वर्णत्वकाष्ठत्वादिभिः साङ्कर्यादिति शेषः । वैणवादीत्यादिना पाषाणदण्डस्योपग्रहः । ननु भ्रमेः फलानुगुणतया तज्जनकत्वेन घटहेतुत्वेऽपि घटस्य भ्रम्यननुगुणत्वात्तज्जनकत्वेन भ्रमिहेतुतायामन्यथासिद्धिरेव बाधिकेत्यत आह किं चेति । एवं परामर्शजनकत्वेन व्याप्तयादिज्ञानस्यानुमितिहेतुत्वे । शब्दादीनामिति । हेतुत्वप्रसङ्ग इत्यग्रेऽन्वयः । एवमग्रे-

ज्जनकाकाङ्क्षादिज्ञानजनकत्वेनानुमानसंस्कारतत्तद्विशेषणज्ञानादीनां कार्य्यान्तरं प्रति च तज्जनकतत्तत्पदार्थकारणानां तत्तत्पदार्थकारणत्वेन हेतुत्वप्रसङ्गः । तज्जनकत्वेन हेतुत्वे तत्त्वेनैव हेतुत्वं प्रथमोपस्थितत्वादावश्यकत्वाल्लाघवाच्चेति चेत् । किमिदं प्रकृते पाणिपिहितम् । इदं पुनरिहावधेयम् । विशिष्टविषयकत्वेन कारणत्वे केवलविशेषणादिविषयत्वेन न हेतुत्वं तदवच्छिन्नका-

---

पि । तज्जनकेति । शाब्दधीजनकं यदाकाङ्क्षादिज्ञानं तज्जनकत्वेनेत्यर्थः । तद्विशेषणेति । आकाङ्क्षादिनिविष्टविशेषणज्ञानादीनामित्यर्थः । कार्यान्तरं घटादि । तथा च घटादिजनको यः कपालादिस्तज्जनकत्वेन कपालिकादीनामपि घटादिजनकत्वप्रसङ्ग इत्यर्थः । नियतपूर्ववर्तितावच्छेदकस्यान्यथासिद्ध्यनिरूपकत्वेन कारणतावच्छेदकत्वनियमादिति भावः । शङ्कते तज्जनकत्वेनेति । आकाङ्क्षाज्ञानादिजनकत्वेन शाब्दादिबोधहेतुत्वे आकाङ्क्षादिज्ञानत्वेनैव शाब्दादिहेतुत्वं युक्तमित्यर्थः । बहुशो व्यभिचारेण प्रथमोपस्थितत्वस्य वस्तुव्यवस्थापकत्वानियतत्वादाह आवश्यकत्वादिति । आकाङ्क्षाज्ञानाद्युत्पत्तिदशायां शाब्दबोधानुत्पत्त्या शाब्दबोधादिकं प्रति आकाङ्क्षाज्ञानत्वादिना हेतुत्वस्यावश्यकत्वाच्चेत्यर्थः । ननु स्वजन्याकाङ्क्षाज्ञानादिसम्बन्धेनैव आकाङ्क्षादिजनकस्य शाब्दबोधादिजनकत्वान्नाकाङ्क्षाज्ञानादेर्हेतुत्वमावश्यकमत आह लाघवाच्चेति । आकाङ्क्षाज्ञानादिजनकत्वेन हेतुतामपेक्ष्य आकाङ्क्षाज्ञानत्वादिना हेतुतायामवच्छेदकलाघवाच्चेत्यर्थः । इदं प्रथमोपस्थितत्वादि । प्रकृत इति । अनुमितावपि परामर्शहेतुत्वेन जनकत्वे प्रथमोपस्थितत्वादित्युक्त्वा परामर्शत्वेनैव हेतुत्वौचित्यादिति भावः । व्याप्तिज्ञानत्वेन करणत्वं खण्डयितुमाह इदं पुनरिति । विशिष्टविषयेति । व्याप्तिविशिष्टवैशिष्ट्यावगाहिनिश्चयत्वेनानुमितिहेतुत्वे तद्व्याप्यकीभूतेन व्याप्त्यादिज्ञानत्वेन तत्र न हेतुत्वं तथा च सुतरां तादृप्येण कारणत्वाभावो हेतुत्वगर्भत्वात्तस्येति भावः । तदवच्छिन्नेति । यद्धर्मावच्छिन्नकार्य-

र्यजनकतावच्छेदकान्तराव्यापकरूपेणैव तदवच्छिन्नं प्रति जनकत्वात्।दर्शयिष्यते हि तथान्यथासिद्धत्वम्।अन्यथा घटत्वाद्यवच्छिन्नं प्रति कपालतत्संयोगादीनां जन्यत्वविशेषितेन शुद्धेन वा द्रव्यत्वगुणत्वादिना विशिष्टवैशिष्ट्यबोधं प्रति च विशेषणतावच्छेदक-

---

तानिरूपितकारणतायाः स्वभिन्नयदवच्छेदकं तदव्यापकरूपेणैव तद्धर्मावच्छिन्नं प्रति हेतुत्वादित्यर्थः। विजातीयरक्तत्वावच्छिन्नजनकतावच्छेदकस्य पद्मरागत्वस्य व्यापकेनापि पृथिवीत्वेन रक्तत्वावच्छिन्नं प्रति जनकत्वात्तदवच्छिन्नेत्युक्तम्। न चैवं व्याप्तिज्ञानजन्यतायाः धूमलिङ्गकवन्ह्यनुमितित्वेन व्याप्तिविशिष्टवैशिष्ट्यपरामर्शजन्यतायाः पर्वतधर्मिकधूमलिङ्गकवन्ह्यनुमितित्वेनावच्छेदादेकधर्मावच्छिन्नं प्रति व्याप्तिज्ञानत्वेन विशिष्टपरामर्शत्वेन चाहेतुत्वादाशङ्क्यैव निष्फलेति वाच्यम्। धूमधर्मिकव्याप्तिज्ञानत्वेन व्यापारीभूतपरामर्शप्रत्यासत्त्या अनुमितिकारणतायां पर्वतमहानसादिप्रत्येकधर्मिकधूमलिङ्गकवन्ह्यनुमितित्वादेरेव कार्यतावच्छेदकत्वात्।अन्यथा पक्षभेदेन परामर्शस्यानुगतत्वात्पर्वतमहानसादिप्रत्येकधर्मिकधूमलिङ्गकवन्हिव्याप्यवत्तापरामर्शप्रत्यासत्त्या धूमलिङ्गकवन्ह्यनुमितित्वावच्छिन्नं प्रति धूमधर्मिकवन्हिव्याप्तिविशिष्टज्ञानत्वेन हेतुत्वेऽन्यपक्षकतादृशानुमितौ व्यभिचारादिति भावः। उक्तक्रमेणाहेतुत्वे बीजमाह दर्शयिष्यते इति। तथा तदवच्छिन्नजनकतावच्छेदकान्तरव्यापकधर्मेण नित्यस्येत्यादिव्याप्तिमङ्गीकृत्याह जन्यत्वविशिष्टेनेति। अन्यथा मनःप्रभृतिद्रव्यात्तदीयपरिमाणादिगुणाच्च घटादेरवश्यंभावापत्तेरिति भावः। तद्व्याप्तिमनङ्गीकृत्याह शुद्धेन वेति। गुणत्वादीत्यादिना मूर्तत्वसंयोगत्वादेः परिग्रहः। नन्वेतावता वरं द्रव्यत्वेन हेतुतायामवच्छेदकान्तरव्यापकरूपेणान्यथासिद्धिः कल्प्यतां ज्ञानहेतुतायां तु कुत इत्याह विशिष्टवैशिष्ट्येति। अथास्तु घटत्वादिविशिष्टवैशिष्ट्यबोधं प्रति घटत्वादिप्रकारकज्ञानत्वेनैव घटादिज्ञानत्वेनापि हेतुर्न कोपि दोष इत्यत आह अनुमितीत्यादि। परामर्शस्याकाङ्क्षाकृतिसाध्यत्वादीनां ज्ञानस्य च विषयीभूतो विशिष्टोऽविशिष्टो वा

विषयत्वेन हेतुत्वप्रसङ्गात् अनुमितिशाब्दबोधचिकीर्षादिकं प्रति च परामर्शाकाङ्क्षाकृतिसाध्यत्वादिज्ञानविषयविशिष्टाविशिष्टतत्तत्पदार्थविषयत्वेन हेतुत्वे अनन्तकार्य्यकारणभावप्रसङ्गाच्च। न चात्र करणान्तरासम्भवादगत्या परामर्शजनकज्ञानस्य तथात्वं कल्प्यते, चिकीर्षा प्रयपि कृतिसाध्यताज्ञानजनकज्ञानस्य तथात्वापत्तेः। तत्र मन एव करणमिति चेत्, इहापि तदेवास्तु। मनोऽसाधारणकरणकज्ञानत्वेन मानसत्वापत्तिरिति चेत्, चिकीर्षादिसाधारणतत्करणकत्वस्यैव ज्ञानत्वविशेषितस्यापि तस्याप्रयोजकत्वात्। किं तर्हि मानसत्वे प्रयोजकमिति चेत्। किन्नाम प्रयोजकम्, कारणञ्चेन्न

तत्तत्पदार्थो धूमधूमत्वादिः तद्विषयकत्वेन यथाक्रममनुमित्यादौ हेतुत्वमित्यर्थः। तथा च एकधर्मावच्छिन्नं प्रत्येवानन्तधर्मैरेकस्यानन्तहेतुत्वापत्त्याऽवश्यमवच्छेदकान्तरव्यापकरूपेणान्यथासिद्धिरास्थेयेति भावः। अत्र अनुमितौ। तथात्वं जनकतावच्छेदकान्तरव्यापकेनापि व्याप्त्यादिज्ञानत्वेन हेतुत्वम्। शाब्दज्ञाने च पदार्थोपस्थितिद्वारा ज्ञानत्वेनैव करणत्वसम्भवान्नाकाङ्क्षादिघटकतत्तत्पदार्थज्ञानत्वेन हेतुत्वमुक्तक्रमेणान्यथासिद्धेरिति भावः। तथात्वापत्तेः। कृत्यादिज्ञानत्वेन हेतुत्वापत्तेः। शङ्कते तत्रेति। चिकीर्षायामित्यर्थः। इहापीति। धूमलिङ्गकपर्वतधर्मिकवह्न्यनुमितित्वावच्छिन्नं प्रति तथाविधपरामर्शप्रत्यासत्त्यानुमितिसामान्यं प्रत्येवात्मनःसंयोगप्रत्यासत्त्या वा मन एव करणमस्त्वित्यर्थः। शङ्कते मनोऽसाधारणेति। चाक्षुषादावपि मनःकरणत्वादसाधारणेति। मनस्त्वावच्छिन्नकरणतानिरूपितजन्यज्ञानत्वावच्छिन्नकार्यतावज्ज्ञानत्वेनेत्यर्थः। तत्करणत्वस्य मनोसाधारणत्वस्य। अप्रयोजकत्वादिति। मानसत्त्वाप्रयोजकत्वादित्यर्थः। पृच्छति किं तर्हीति। खण्डनदिशा निरस्यति किं नामेति। न किंचिदिति। मानसत्त्वजातेर्नित्यत्वेन तस्याः कारणासम्भवादिति भावः। तत् प्रत्यक्षम्। प्रत्यक्षे विषयस्य हेतुत्वादिति भावः। शङ्कते कारणाभेद इति। मानसानुमित्योः कारणाभेदे कथं तयोर्वैजात्यमि-

किञ्चित्, कार्य्यञ्चेत्तत्प्रत्यक्षम्, व्यापकञ्चेत्तत्प्रमेयत्वादि, व्याप्यञ्चेत्तत्सामग्रीजन्यत्वादि, तदवच्छिन्नोत्पत्तिनियामकञ्चेत्तत्सामग्री । कारणाभेदे कथं कार्य्यवैजात्यमिति चेत् । सामग्रीवैलक्षण्यात् । यथा मनःकरणकानामेव चिकीर्षासुखादीनां यथावाग्निकरणकानां पाकजानाम् । कथं तर्हि प्रमाणविभाग इति चेत्, करणविशेषकक्रियावैजात्यविशेषादिति विभाव्यताम् । अपरे तु व्याप्तिज्ञानत्वेन विशिष्टपरामर्शत्वेन वा नानुमितिमात्रं प्रति हेतुता साध्यादिभेदेन व्याप्तेर्भेदात्, किन्तु पक्षज्ञानत्वेनाभावज्ञानत्वेन ज्ञानत्वेन वा । पक्षोऽपि धर्मिमात्रं पक्षतायां अप्यननुगमात् । तत्तत्प-

---

त्यर्थः । यथेति । अत्राऽऽन्तरबाह्यभेदेन दृष्टान्तद्वैविध्यम् । पाकजानां रूपादीनाम् । कथं तर्हीति । प्रत्यक्षकरणस्यैव मनसोऽनुमितिकरणत्वे प्रत्यक्षानुमानयोः कथं विभिन्नप्रमाणत्वेन व्यवहार इत्यर्थः । धर्म्यभेदेपि विभिन्नजातीयप्रमाकरणताप्रयुक्तस्तादृशो व्यवहारो नानुपपन्न इत्याशयेनाह करणविशेषकेति । क्रियावैजात्यम् अनुमितित्वप्रत्यक्षत्वादि । अनुमितित्वावच्छिन्नं प्रत्येव व्याप्तिज्ञानस्याभावज्ञानसामान्यप्रत्यासत्त्या करणत्वात् तस्य चानुमितित्वावच्छिन्नजनकतावच्छेदकान्तराव्यापकत्वान्नोक्तक्रमेणान्यथासिद्धिरनुमितिसामान्ये विशिष्टपरामर्शत्वादिना हेतुत्वस्य व्यभिचारेणासम्भवादित्याशयेन मतान्तरं दर्शयति परे त्विति । धर्मित्वपर्यवसायिनोपि प्रत्यक्षत्वस्याभावत्वापेक्षया गुरुत्वादाह अभावज्ञानत्वेनेति । अतिलाघवादाह ज्ञानत्वेन वेति । न चैवं सत्त्वगुणत्वादिनाप्यनुमितिकरणत्वापत्तिस्तुल्यशरीरत्वेपि नियता, जनकगगनादिसाधारणतया तादृश्येणान्यथासिद्धेरिति भावः । पक्षतायां अपीति । साध्यादिभेदेनेत्यनुषज्यते । नन्वेवमपि वन्ह्यनुमितित्वावच्छिन्नं प्रति वन्हिव्याप्तिज्ञानत्वेन करणत्वं न स्यात् तादृशानुमितिजनकतावच्छेदकस्य वन्हिव्याप्यवत्तानिश्चयत्वस्य व्यापकतया वन्हिव्याप्तिज्ञानत्वेऽन्यथासिद्धेरत आह तत्तत्पक्षतावच्छेदकेति । आवश्यकत्व इति । अन्य-

क्षतावच्छेदकविशिष्टवन्ह्यनुमितिं प्रति तत्तद्विशिष्टे वन्हिव्याप्यवत्तापरामर्शत्वेन हेतुतायां आवश्यकत्वे वन्ह्यनुमितिमात्रं प्रत्यपि न तादृशपरामर्शत्वेन हेतुता गौरवात्, किन्तु वन्हिव्याप्तिज्ञानत्वेन लाघवात् । वस्तुतो वन्हिज्ञानत्वेनैव तथा अतिलाघवात् । एवं वन्ह्यभावानुमितिं प्रत्यपि । एतेनानुमितिसन्तरं व्याख्यातमिति वदन्ति । कृतं पल्लवितेनेति ॥

थानुमितौ धर्मिनियमो न स्यादिति भावः । तादृशपरामर्शत्वेन वन्हिव्याप्यवत्तानिश्चयत्वमात्रेण हेतुत्वादिभेदेन वन्हिव्याप्तेरननुगतत्वादाह वस्तुत इति । तथात्वं हेतुत्वम् । अतिलाघवादिति । कार्यकारणयोस्तद्धेतुकत्वादिप्रवेशेन व्यभिचारवारणेपि वन्हिव्याप्तिज्ञानत्वमपेक्ष्य वन्हिज्ञानहेतुतायामवच्छेदकलाघवादित्यर्थः । अत एवाह एवमिति । प्रत्यपीति । वन्हिज्ञानत्वेनैव तथात्वमिति पूर्वेणान्वयः । वन्ह्यभावज्ञानत्वमपेक्ष्य वन्हिज्ञानत्वस्य लघुत्वात्प्राचामभावत्वस्याखण्डस्य विरहेणाभावत्वमात्रस्य वन्हिज्ञानत्वापेक्षया गुरुत्वादिति भावः । व्याख्यातमिति । द्रव्यत्वाद्यनुमितावपि द्रव्यत्वादिज्ञानत्वेन हेतुत्वं न तु व्याप्तिज्ञानत्वेनेत्यर्थः ॥

इति श्रीजगदीशभट्टाचार्यतर्कालङ्कारविरचिता
परामर्शदीधितिटीका समाप्ता ॥

चिन्तामणेः केवलान्वय्यनुमानम् ।

तच्चानुमानं त्रिविधं केवलान्वयिकेवलव्यतिरेक्य-न्वयव्यतिरेकिभेदात् । तत्रासद्विपक्षं केवलान्वयि । तथा

दीधित्याः केवलान्वय्यनुमानम् ।

केवलान्वयीत्यादि । केवलान्वयिसाध्यकादीत्यर्थः । तत्र तेषु मध्ये असद्विपक्षम् असत्ताभावाप्रतियोगिसाध्यकं केवलान्वयि ।

जागदीश्याः केवलान्वय्यनुमानम् ।

केवलान्वयिहेतोस्तद्धर्मिकव्यभिज्ञानस्य वा विभजने वाच्यं घटत्वात् इत्यादौ घटत्वादिहेतोस्तज्ज्ञानस्य वा असंग्रहापत्तिः अत आह केवलान्वयिसाध्यकेति । यद्यपि केवलान्वय्यादिभेदादित्यत्र केवलान्वयितया परिभाषितत्वरूपं केवलान्वयित्वं वाच्यत्वादिसाध्यकघटत्वादेरपि अक्षतमेव अतः केवलान्वयिसाध्यकादीति व्याख्यानमफलम्, तथापि हेतुनिष्ठस्यैव केवलान्वयित्वपदार्थस्य प्रकान्वत्वे पश्चादुच्यत इत्यादिना साध्यनिष्ठस्य केवलान्वयित्वस्याभिधानं मूलकृतः सन्दर्भविरुद्धं स्यात् अतः साध्यनिष्ठस्यैव केवलान्वयित्वस्य उपक्रमार्थम् इत्थं व्याख्यातमिति ध्येयम् ।

तत्र केवलान्वयिनि इति योजनायां सप्तम्यर्थाधेयत्वस्य बा-

एवमगृहीतान्वयव्यतिरेकिसाध्यकं केवलव्यतिरेकि, गृहीतान्वयव्यतिरेकिसाध्यकमन्वयव्यतिरेकि ।

व्याप्तिग्राहकसहचारभेदाद्भेदे त्वन्वयसहचारमात्रगृहीतव्याप्तिकत्वं केवलान्वयित्वम् । तच्च प्रकृतव्याप्तिग्राहकज्ञानविषयस-

---

धितत्वात् सप्तम्या निर्द्धारणार्थकत्वं व्यनक्ति तेष्विति । असद्विपक्षमिति मूलं विपक्षस्य सिद्ध्यसिद्धिभ्यां व्याहतम् अत आह असदिति । अत्यन्तेति । अत्यन्ताभावाप्रतियोगिसाध्यकानुमितिकरणमित्यर्थः । तेन लिङ्गस्य तज्ज्ञानस्य मनसो वा अनुमितिकरणत्वेऽपि न क्षतिः । केवलान्वयीतिपदन्तु मूलस्थमेव योजितं न तु स्वातन्त्र्येणोक्तं मूलस्थस्य तस्य वैयर्थ्यापत्तेः । यद्यपि तत्र केवलान्वयिसाध्यके असद्विपक्षम् अत्यन्ताभावाप्रतियोगि केवलान्वयीति व्याख्यानं सम्भवति निर्द्धारण इवान्तर्गतत्वेऽपि सप्तमीप्रयोगात्, तथापि द्वन्द्वस्थानामेकं परित्यज्य अपरस्य परामर्शकत्वं तदादिशब्दस्य अव्युत्पन्नमित्याशयेन एतत् परित्यक्तमिति भावः । न्यूनतां परिहरति एवमिति । प्रकृतहेतुधर्मिकसाध्यसहचाराग्रहाजन्यायाः प्रकृतहेतुकव्यतिरेकिसाध्यकानुमितेः करणत्वं प्रकृतहेतुसाध्यककेवलव्यतिरेकित्वमित्यर्थः । न च साध्यविशेषणस्य व्यतिरेकीत्यस्य वैयर्थ्यम्, अन्वयसहचाराग्रहदशायाम् इदं वाच्यम् ज्ञेयत्वात् इत्यादौ अतिव्याप्तेः तदानीमपि तस्य केवलान्वयित्वात् । व्यतिरेकित्वञ्च अत्र अवच्छिन्नवृत्तिकान्यस्य व्यतिरेकस्य प्रतियोगित्वं भेदप्रतियोगितावच्छेदकत्वं वा, नातः साध्यसहचाराग्रहदशायां संयोगाभावादिसाध्यकवाच्यत्वादिहेतुककेवलान्वयिनि अतिव्याप्तिः । गृहीतेति । प्रकृतहेतुधर्मिकसाध्यसहचाराग्रहजन्यव्याप्तिज्ञानजन्यप्रकृतहेतुकव्यतिरेकिसाध्यकानुमितिकरणत्वं प्रकृतहेतुसाध्यकान्वयव्यतिरेकित्वमित्यर्थः तत्रापि केवलान्वयिवारणार्थं व्यतिरेकित्वेन साध्यं विशेषितम् ।

दशाविशेषे वन्हिसाध्यकधूमादिहेतोरपि केवलान्वयित्वमङ्गीकुर्वतामाचार्य्याणां मतमाह व्याप्तिग्राहकेति । सहचारभेदादिति । ल्यब्लोपे पञ्चमी । तेन तादृशसहचारभेदमन्तर्भाव्य भेदे

हचारत्वव्यापकान्वयसहचारत्वकत्वं तादृशसहचारत्वव्यापकप्रकृत-व्याप्तिघटकसहचारत्वकत्वं वा ।

विभजने इत्यर्थः । उभयसहचारगृहीतव्याप्तिकस्य अन्वयव्यतिरेकिणो व्युदासाय मात्रपदम् । तथा च साध्याभावगोचरस्वाभावसहचारग्रहाजन्यप्रकृतसाध्यव्याप्तिग्रहविशेष्यत्वमर्थः । तेन इन्द्रियादेरपि व्याप्तिग्राहकत्वात् नाप्रसिद्धिः, न वा अन्यदीयव्यतिरेकसहचारविषयकप्रकृतसाध्यसाधनान्वयसहचारगृहीतव्याप्तिकेऽव्याप्तिः । साध्यभावत्वादिकञ्च वैज्ञानिकं ग्राह्यं न तु वास्तवम्, तेन इदं वाच्यं ज्ञेयत्वात् इत्यादौ साध्याभावादेरप्रसिद्धावपि [दशाविशेषे] नाव्याप्तिः । ननु वन्हिमान् धूमात् इत्यादौ अन्वयेन व्याप्तिग्रहस्यापि भागवतेनैव व्यतिरेकसहचारग्रहेण जननात् अव्याप्तिः [ननु इदानीं फलोपहितजन्यत्वं न निवेशितम्, अन्यथा भागवतज्ञाननिरूपितफलोपहितजन्यत्वाप्रसिद्ध्या भागवतव्यतिरेकसहचारज्ञानजन्यत्वमादाय अव्याप्तिदानस्य अनौचित्यात् । एवञ्च प्रयेयत्वादिसाध्यकस्थलेऽपि भ्रमात्मकव्यतिरेकसहचारज्ञानजन्यप्रसादर्थाः सम्भव एव प्रसज्यते कथमव्याप्तिरिति चेन्न । स्वाव्यवहितपूर्ववृत्तिव्यतिरेकसहचारज्ञानजन्यत्वरूपफलोपहितजन्यत्वाभावो विवक्षणीयः । एवञ्च यत्र केवलान्वयिसाध्यके व्यतिरेकसहचारभ्रमोऽप्रसिद्धः तत्र लक्षणगमनात् नासम्भव इति कश्चित् । तन्न । तादृशस्थलस्य प्रमाणत्वेऽपि व्यतिरेकसहचारत्वस्य अव्यावर्त्तकतया प्रकृतसाध्याभावगोचरस्वाभावसहचारग्रहाजन्यत्वस्यैव निवेशितत्वेन तादृशज्ञानाप्रसिद्ध्या तत्रापि लक्षणसमन्वयासम्भवादव्याप्तिः ।] तादृशसहचारग्रहत्वावच्छिन्नजनकताकत्वाभावस्य प्रवेशे च व्यतिरेकसहचारगृहीतव्याप्तिकेऽतिव्याप्तितादवस्थ्यम् । व्यभिचारधीविरोधिज्ञानत्वादिनैव आचार्य्यमते अन्वयव्यतिरेकसहचारज्ञानयोर्व्याप्तिधीजनकत्वात् । एवं तत्पुरुषीयतादृशव्यतिरेकसहचारग्रहाजन्यत्वस्य [प्रकृतव्याप्तिज्ञानसमानाधिकरणव्यतिरेकसहचारग्रहाजन्यत्वस्य च]प्रवेशे यत्र केवलान्वयिनि साध्याभावा-

दिग्रहोऽप्रसिद्धः सर्वत्र भ्रमे मानाभावात् तत्राव्याप्तिरत आह तच्चेति। इहापि प्रकृतत्वं ग्रहविशेषणम्। तथा च स्वजनकज्ञानविषयसहचारत्वव्यापकान्वयसहचारत्वकप्रकृतव्याप्तिज्ञानविशेष्यत्वमित्यर्थः। तेन धूमादिनिष्ठवन्ह्याद्यन्वयव्याप्तेरेव कदा चिदुभयसहचारेणापि ग्रहात् अन्वयसहचारत्वस्य व्याप्तिग्राहकसहचारत्वाव्यापकत्वेऽपि नासम्भवः। स्वपदेन विशेषतोऽन्वयसहचारमात्रग्रहकालीनव्याप्तिग्रहव्यक्तीनामेव फलतः सङ्ग्रहात् अन्वयव्यतिरेकिण्यपि तादृशसहचारत्वसमानाधिकरणमन्वयसहचारत्वमतो व्यापकेति। यद्यपि प्रकृतव्याप्तिग्राहकज्ञानविषयसहचारत्वं घटादिसहचारस्यापीति तत्र साध्यान्वयसहचारत्वाभावादव्याप्तिः। सहचारपदेन अन्वयव्यतिरेकसहचारयोरन्यतरत्वेनोपादाने च वाच्यम् ज्ञेयत्वात् इत्यादावव्याप्तिः। तत्र व्यतिरेकसहचाराप्रसिद्धेः। न च प्रकृतव्याप्तिग्राहकज्ञानविषयसहचारत्वस्य प्रकृतव्याप्तिज्ञानत्वावच्छिन्नकार्य्यतानिरूपितकारणतायां विषयविधयाऽवच्छेदकीभूतसहचारत्वमर्थः तच्च न घटादिसहचारेऽस्तीत्यदोष इति वाच्यम्। सहचारविशिष्टबुद्धित्वावच्छिन्नं प्रत्येव सहचारज्ञानत्वेन हेतुतया व्याप्तिज्ञानत्वावच्छिन्नं प्रति तादृप्येण हेतुत्वाभावात्। अन्यथा व्यतिरेकसहचारस्यापि तादृशत्वादसम्भवापत्तेः। गगनवान् धूमात् इत्यादौ साध्यसहचारभ्रमाधीने अन्वय्यनुमाने अव्याप्तिप्रसङ्गात्। अन्वयव्यतिरेकिसाधारणस्य सहचारत्वस्य दुर्वचत्वाच्च। तथापि प्रकृतहेतुधर्मिकप्रकृतसाध्यव्याप्यतावगाहियज्ज्ञानजनकीभूतज्ञाननिष्ठप्रकृतहेतुधर्मिकसाध्यसामानाधिकरण्यावगाहित्वसाध्याभावधर्मिकहेत्वभावसामानाधिकरण्यावगाहित्वयोरन्यतरस्य तादात्म्येन व्यापकं हेतुधर्मिकप्रकृतसाध्यसहचारविषयित्वं तज्ज्ञानत्वं तज्ज्ञानविषयत्वविशिष्टप्रकृतहेतुत्वं वा प्रकृतहेतुसाध्यककेवलान्वय्यनुमानत्वं विवक्षितम्। साध्यभावत्वादिकञ्च इह वैज्ञानिकं ग्राह्यम्। तेन वाच्यं ज्ञेयत्वात् इत्यादौ साध्याभावस्य अलीकत्वेऽपि [दशाविशेषे] नाव्याप्तिः। न च अवगाहीत्यन्तदलवैयर्थ्यम्, साध्यसामानाधिकरण्यविशिष्टहेतुमत्तादिग्रहे अतिव्याप्तेर्वारकत्वात्। तादृशज्ञानजनकत्वञ्च इह फलोपहितं ग्राह्यम्, तेन साध्याभावधर्मिकहेत्वभावसहचरितत्वज्ञानस्य व्याप्तिज्ञानसामान्यं प्रत्येव विशेषण-

गृहीतव्याप्तिभेदाद्भेदे तु प्रकृतहेतुकप्रकृतसाध्यानुमितिहेतुज्ञानविषयव्याप्तित्वव्यापकप्रकृतसाध्यव्याप्तित्वकत्वं तत्त्वम्। जलं निर्गन्धं

ज्ञानविधया स्वरूपयोग्यत्वेऽपि नासम्भवः। न च यत्त्वतत्त्वयोर्विशेषत एव विश्रामादननुगमः। प्राचीनमते स्वत्वस्येव तयोरनुगमात्। प्रकृतव्याप्त्यवगाहिस्वजनकज्ञाननिष्ठतादृशान्यतरविषयितात्वव्यापकान्वयसहचारविषयितात्वकप्रकृतव्याप्तिज्ञानत्वं तत्त्वमित्यस्यापि सुवचत्वाच्च। यदि च अनुमित्यजनकव्याप्तिज्ञानस्य न लक्ष्यत्वं तदा प्रकृतहेतुकप्रकृतसाध्यकानुमितिफलोपहितकरणत्वेनापि तज्ज्ञान.विशेषणीयमिति सङ्क्षेपः। ननु यत्र पूर्वं साध्यसहचारस्य नोपस्थितिः किन्तु तदघटकसाध्यादिप्रत्येकवस्तूपस्थित्यैव विशेष्ये विशेषणमित्यादिरीत्या अन्वयव्याप्तिधीः, तत्र उक्तलक्षणाव्याप्तिः, अतः प्रकारान्तरमाह तादृशसहचारत्वेति। प्रकृतव्याप्तिग्रहानुकूलसहचारत्वेत्यर्थः। तथा च उक्तस्थलेऽपि व्यापकताघटकमभावस्य हेतुसहचरितत्वमवश्यं प्राग्ग्राह्यमिति तत्र लक्षणसमन्वयः। तत्रापि प्रकृतहेतुसाध्यकान्वयव्याप्त्यवगाहियज्ज्ञानजनकज्ञानवृत्तिविषयितात्वव्यापकं व्यतिरेकसहचारावगाहितान्यत्वं तज्ज्ञानविषयतावैशिष्ट्यप्रकृतहेतुलिङ्गत्वं केवलान्वयित्वमित्यत्र तात्पर्य्यम्। अतो न पूर्वलक्षणोक्तदोषाणामवकाश इति ध्येयम्।

अन्वयव्यतिरेकव्याप्त्योर्द्वयोरेव ज्ञानमनुमितिहेतुर्न तु व्यतिरेकसहचारान्वयसहचाराभ्यामेव अन्वयव्याप्तिमवगत्यैवानुमितिरिति चिन्तामणिकृतां मतमालम्ब्याह गृहीतेति। प्रकृतेत्यादि। प्रकृतहेतुप्रकारकनिश्चयोत्तरप्रकृतसाध्यकानुमितित्वघटितधर्मावच्छिन्नस्वनिष्ठकार्य्यतानिरूपितकारणतावच्छेदकीभूतप्रकारितात्वव्यापकप्रकृतसाध्यान्वयव्याप्तिप्रकारितात्वकानुमितिकरणत्वमित्यर्थः। तेनोभयसाधारणस्य एकस्य व्याप्तित्वस्य असत्त्वेऽपि न क्षतिः, न वा द्रव्यं सत्त्वात् इत्यादौ अखण्डव्याप्तेरप्रसिद्ध्या तादृशकेवलान्वय्यनुमानेऽव्याप्तिः। व्याप्तिघटकपदार्थानां परस्परोपश्लेषेण प्रकारितायास्तत्र अनपायादिति ध्येयम्। अत्र च स्वपदमनुमितिपरम्।

पृथिवीत्वव्यापकाभावप्रतियोगिमत्त्वादिसादौ हेतुतावच्छेदिका च व्याप्तिर्न प्रकृतसाध्यानुमित्यौपयिकी तद्विशिष्टपक्षधर्मताज्ञानेऽपि व्याप्यन्तरबोधं विना निर्गन्धत्वानुमित्यनुपपादिति नाव्याप्तिः ।

तज्जनकत्वमिह स्वरूपयोग्यतामात्रं न तु फलोपहितं ग्राह्यं वैयर्थ्यात् स्वपदेन अन्वयव्याप्तिज्ञानस्थलीयानुमितिव्यक्तीनामेव धूमत्वेन व्यतिरेकपरामर्शमादाय असम्भवायोगादिति ध्येयम् । व्यापकत्वोपादानादन्वयव्यतिरेकिण्युदासः । अत्र वन्हौ साध्ये तद्धूमत्वेन धूमहेतुकव्यतिरेकिण एव धूमत्वेन धूमहेतुककेवलान्वयित्वात् तत्राव्याप्तिः । वन्हिसाध्यकधूमव्यक्तिहेतुकानुमित्यौपयिकव्यतिरेकव्याप्तेः वन्हिसाध्यकान्वयव्याप्तित्वाभावात् अतो हेतौ प्रकृतपदम् । तथा च तद्धूमत्वावच्छिन्नव्यतिरेकव्याप्तेर्धूमत्वावच्छिन्नप्रकारकनिश्चयोत्तरानुमितित्वघटितधर्मावच्छिन्नं प्रति अनुकूलत्वविरहात् नाव्याप्तिः । साध्यांशे प्रकृतपदव्यावृत्तिस्तु ग्रन्थकृतैव वक्ष्यते । न च यत्र हेतुतावच्छेदकबहिर्भावेण वन्हिमदन्यावृत्तिमान् पर्वत इति व्याप्तिज्ञानादेवानुमितिः तादृशान्वयिनि अव्याप्तिरिति वाच्यम् । व्यापकसामानाधिकरण्यरूपान्वयव्याप्तिज्ञानस्यैव अन्वयनुमितिहेतुत्वमिति प्राचां मतेनैव लक्षणकरणात् । ननु प्रकृतहेतुप्रकारकनिश्चयोत्तरानुमितित्वघटितधर्मावच्छिन्नकार्य्यता एव प्रवेश्यतां प्रकृतसाध्यकत्वनिवेशो व्यर्थ इत्यत आह जलं निर्गन्धमित्यादि।न प्रकृतेति । न निर्गन्धत्वानुमितित्वावच्छिन्नस्य प्रकारविधया कारणतावच्छेदिकेत्यर्थः । विषयपदेन तादृशौपयिकत्वस्य विवक्षितत्वादितिभावः । तदौपयिकत्वाभावमेव विवृणोति तद्विशिष्टेति । पृथिवीत्वव्यापकाभावप्रतियोगित्वरूपव्यतिरेकव्याप्तिविशिष्टेत्यर्थः । व्याप्यन्तरबोधमिति । पृथिवीत्वव्यापकाभावप्रतियोगित्वलक्षणहेतुव्यापकनिर्गन्धत्वसामानाधिकरण्यरूपान्वयव्याप्तिबोधं विनेत्यर्थः । तथा च पृथिवीत्वव्यापकाभावप्रतियोगिमत्त्वनिश्चयोत्तरानुमितित्वघटितपृथिवीत्वाभावानुमितित्वावच्छिन्नस्य जनकतावच्छेदिकायाः पृथिवीत्वव्यापकीभूताभावप्रतियोगित्वरूपायाः पृथिवीत्वाभावीयव्यतिरेकव्याप्ते-

वन्ह्यभाववान् वन्हिव्यापकाभावप्रतियोगिमत्त्वादिसादावन्वय-व्याप्तेरवच्छेदिका व्यतिरेकव्याप्तिर्न तु सैवेति नाप्रसङ्गः । अत एवेतरव्यापकाभावप्रतियोगित्वेनाभावप्रतियोगित्वेन वा यल्लिङ्ग-

---

र्निर्गन्धत्वरूपप्रकृतसाध्यान्वयव्याप्तित्वाभावात् तत्राव्याप्तेर्वारणार्थमेव प्रकृतसाध्यकत्वस्य प्रवेश इति भावः । इदमुपलक्षणम् । साध्यस्य प्रकृतत्वानुक्तौ वन्हित्वेन वन्हेः साध्यतायां व्यतिरेक्यात्मके द्रव्यत्वेन वन्हेः साध्यतायामन्वयिनि धूमलिङ्गकानुमानेऽपि अव्याप्तिः स्यात् । प्रकृतहेतुभूतधूमप्रकारकनिश्चयोत्तरवन्हिसाध्यकानुमितित्वावच्छिन्नं प्रति अनुकूलाया धूमनिष्ठवन्हीयव्यतिरेकव्याप्तेः द्रव्यत्वावच्छिन्नसाध्यकान्वयव्याप्तित्वाभावादिति द्रष्टव्यम् । ननु एवमपि वन्ह्यभाववान् वन्हिव्यापकीभूताभावप्रतियोगिमत्त्वात् इत्यन्वयिन्यव्याप्तिः, तत्र हेतुतावच्छेदकीभूताया वन्ह्यभावीयव्यतिरेकव्याप्तेरपि वन्हिव्यापकाभावप्रतियोगिरूपप्रकृतहेतुप्रकारकनिश्चयोत्तरवन्ह्यभावरूपसाध्यानुमितित्वावच्छिन्नं प्रति अनुकूलत्वात् तस्यामेव वन्ह्यभावीयान्वयव्याप्तित्वाभावात् इत्याशङ्क्य तत्रान्वयव्याप्तेः प्रकृतसाध्यकप्रकृतहेतुकानुमित्यौपयिकत्वविरहात् लक्ष्यत्वमेव नास्ति, काव्याप्तिप्रसङ्ग इत्याशयेन समाधत्ते वन्ह्यभाववानित्यादि।अन्वयव्याप्तेरवच्छेदिका अन्वयव्याप्तिर्घटिका।व्यतिरेकव्याप्तिरित्यत्र प्रकृतसाध्यानुमित्यौपयिकी इत्यनुषज्यते । न तु सैव न तु पुनरन्वयव्याप्तिरेव । प्रकृतसाध्यकानुमित्यौपयिकीत्यर्थः । अयं भावः । वन्हिव्यापकीभूताभावप्रतियोगिमत्तानिश्चयोत्तरवन्ह्यभावसाध्यकानुमितित्वावच्छिन्नं प्रति वन्हिव्यापकाभावप्रतियोगिमत्तानिश्चयत्वेनैव हेतुत्वं लाघवात् । न तु स्वव्यापकवन्ह्यभावसमानाधिकरणतादृशप्रतियोगिमत्तानिश्चयत्वेन, गौरवादिति तादृशहेतुसाध्यकानुमानस्य केवलव्यतिरेकितया न लक्ष्यत्वम् । यत्रानुमितौ अन्वयव्याप्तिप्रकारकनिश्चयत्वेन हेतुत्वं तत्करणस्यैव केवलान्वयित्वादिति ।नाप्रसङ्ग इत्यस्य दूषणमिति शेषःलक्ष्ये अप्रसङ्गो दूषणं भवेत् न चैतल्लक्ष्यमिति भावः । गृहीतव्याप्तिभेदेन अनुमानभेदे प्राचां संवादमाह अत एवेति । लिङ्गतावच्छेदकस्य लिङ्गस्य यज्ज्ञाने इतर-

ज्ञानं न प्रकृतसाध्यानुमितिहेतुस्तत्केवलान्वयीत्यपि वदन्ति । एवं केवलव्यतिरेकित्वादिकमपि निर्वाच्यम् ।

व्यापकाभावप्रतियोगित्वप्रकारकत्वानवच्छिन्नं प्रकृतहेतुसाध्यकानुमितिजनकत्वम्, [यज्ज्ञानीयेतरव्यापकाभावप्रतियोगित्वानवच्छिन्नलिङ्गतावच्छेदकावच्छिन्नविशेष्यता तादृशानुमितिजनकतावच्छेदिकेति यावत्] तत् केवलान्वयीत्यर्थः । तेन जलं निर्गन्धं पृथिवीस्वव्यापकाभावप्रतियोगिमत्त्वात् इत्यादौ अन्वयानि नाव्याप्तिः । ननु इतरव्यापकाभाव इत्यत्र इतरत्वावच्छिन्नव्यापकत्वप्रवेशेऽप्रसिद्धिः, गगनाभावादौ कथञ्चित् तत्प्रसिद्धावपि केवलव्यतिरेकिणि अतिव्याप्तिः, तत्र वह्न्यभावव्यापकाभावप्रतियोगित्वप्रकारेणैव धूमज्ञानस्य अनुमितिहेतुतया इतरत्वावच्छिन्नव्यापकाभावप्रतियोगिमत्त्वज्ञानत्वेनऽहेतुत्वात् इत्यतो लाघवाच्च आह अभावप्रतियोगित्वेनेति । अत्रापि लिङ्गतावच्छेदकविशिष्टस्य यज्ज्ञानं प्रकृतानुमितौ अभावप्रतियोगित्वप्रकारकत्वानवच्छिन्नं हेतुरित्यर्थः । नातः प्रागुक्तदोषः । एवमिति । सहचारभेदात् भेदे व्यतिरेकसहचारमात्रगृहीतान्वयव्याप्तिकत्वं केवलव्यतिरेकित्वम् । यत्रान्वयव्याप्तिघटकप्रत्येकवस्तूनामुपस्थितौ सत्यां विशेष्ये विशेषणमितिन्यायेनैव अन्वयव्याप्तिधीः न तु साध्यसामानाधिकरण्यत्वप्रकारकज्ञानमपि प्रागपेक्षितम् तत्रैव अन्वयसहचारज्ञानाजन्यस्य व्यतिरेकसहचारधीजन्यान्वयव्याप्तिग्रहस्य सम्भवात् । एवमुभयसहचारगृहीतान्वयव्याप्तिकत्वम् अन्वयव्यतिरेकित्वं बोध्यम् । गृहीतव्याप्तिभेदात् भेदे तु प्रकृतहेतुकप्रकृतसाध्यकानुमित्यौपयिकव्याप्तित्वव्यापकव्यतिरेकव्याप्तित्व त्वं प्रकृतहेतुकप्रकृतसाध्यकान्वयपरामर्शजन्यप्रकृतहेतुकप्रकृतसाध्यकव्यतिरेकपरामर्शजन्यप्रकृतसाध्यकानुमितिकरणत्वं वा । यत्र स्थलविशेषे साध्यसाधनयोरन्वयपरामर्शो न प्रसिद्धः तत्र तदजन्यत्वं नोपादेयम् । अन्वयव्यतिरेकित्वन्तु प्रकृतहेतुकप्रकृतसाध्यकान्वयव्यतिरेकोभयपरामर्शजन्यप्रकृतहेतुकप्रकृतसाध्यकानुमितिकरणत्वम् । न च यत्र वन्हिव्याप्यधूमवान् वन्ह्यभावव्यापकीभूता-

हि, केवलान्वयिनोऽभिधेयत्वस्य न विपक्षः, अभिधानेऽनभिधाने च विपक्षत्वव्याघातात् । अथ यथा आकाशशब्दाच्छब्दाश्रयत्वमनभिधेयमप्युपतिष्ठते तथाऽभिधेयत्वविपक्षस्यानभिधेयत्वेऽपि पदादुपस्थितिः स्यात्, एवञ्चाभिधेयत्वं कुतोऽपि व्यावृत्तं धर्मत्वात् गोत्ववदिति चेन्न । व्यावृत्तत्वस्याऽव्यावृत्तत्वे व्यावृत्तत्वमेव

अभिधेयत्वं शब्दशक्यत्वम्। विपक्षत्वव्याघातो विपक्षत्वासिद्धिः। ननु

भावप्रतियोगिमांश्च पर्वत इति ज्ञानात् वन्ह्यनुमितिः तत्रान्वयव्यतिरेकिणि धूमेऽव्याप्तिः, धूमत्वविशिष्टव्यतिरेकव्याप्तेरपरामृष्टत्वेन तत्रानुमितेः प्रकृतहेतुकव्यतिरेकपरामर्शाजन्यत्वात्, व्यतिरेकपरामर्शादिशि हेतोः प्रकृतत्वाप्रवेशे च वन्हिसाध्यकाभ्यां धूमस्यान्वयेन आलोकस्य च व्यतिरेकेण परामर्शाभ्यां यत्र वन्ह्यनुमितिः तत्रापि धूमस्यान्वयव्यतिरेकित्वापत्तिरिति वाच्यम्। वन्ह्यभावव्यापकाभावप्रतियोगितामात्रस्य अतिप्रसक्तत्वात् तादृशप्रतियोगितावच्छेदकीभूतधूमत्वादेरेव व्यतिरेकव्याप्तितया तदवच्छिन्नस्य परामर्शे प्रकृतहेतोरवश्यं प्रविष्टत्वात्, पक्षधर्मांशे प्रकृतहेतुतावच्छेदकातिरिक्तानवच्छिन्नविशेष्यताकव्यतिरेकव्याप्तिप्रकारिताशालिज्ञानस्यैव वा व्यतिरेकपरामर्शपदेन विवक्षितत्वात्। तादृशी हि प्रकारिता व्यतिरेकव्याप्त्यंशे विशेष्यतावच्छेदकस्य विरहे हेतुतावच्छेदकस्यैव वा तत्त्वे निर्वहतीति अतः सर्वसामञ्जस्यादिति ध्येयम्।

अथाभिधेयत्वं यदि शब्दोपस्थाप्यत्वं तदा शब्दाश्रयत्वमनभिधेयमपीति आद्यमूलासङ्गतिः अतो व्याचष्टे शब्दशक्यत्वमिति। अथ अभिधेयत्वाभाववत्त्वरूपस्य तद्विपक्षत्वस्य व्याघातो विरहः स च प्रतियोग्यप्रसिद्धत्वात् दुर्घट इत्यत आह विपक्षत्वेति। ननु

केवलान्वयि, व्यावृत्तत्वे यत एव व्यावृत्तं व्यावृत्तत्वं तदेव केवलान्वयीति धर्मत्वस्यानैकान्तिकत्वात् । एव-

---

व्यावृत्तत्वमन्योन्याभावप्रतियोगितावच्छेदकत्वं तच्च लघुगुरुसाधारणं गगनादिनिष्ठान्योन्याभावप्रतियोगितावच्छेदकञ्चेति न व्यभिचार इत्यत आह एवमितीतनन्वभावप्रतियोगित्वादिकमभावादिव्यक्तिभे-

---

वृत्तिमत्त्वविशिष्टस्य अत्यन्ताभावप्रतियोगित्वस्य व्यापकं यद्व्यावृत्तत्वं तदभावेनैव वृत्तिमतोऽभिधेयत्वस्य अत्यन्ताभावाप्रतियोगित्वरूपकेवलान्वयित्वं साधनीयमत एवाह मूले एवञ्चेति । तथा च अत्यन्ताभावप्रतियोगित्वव्यापकस्य व्यावृत्तत्वस्य अभावोऽभिधेयत्वे स्वरूपासिद्ध एवेति भावः । यथाश्रुते अत्यन्ताभावाप्रतियोगित्वरूपकेवलान्वयित्वाखण्डकत्वेन व्यावृत्तत्वानुमाने अर्थान्तरत्वापत्तेः । गोत्ववदित्यत्र च गोत्वं व्यतिरेकेण दृष्टान्तः । अन्यथा स्वरूपसम्बन्धेन व्यावृत्तत्वस्यैव तत्सम्बन्धावच्छिन्नकेवलान्वयित्वखण्डकतया तस्य गोत्वजातौ असत्त्वेन अन्वयदृष्टान्तत्वासम्भवात् । वाक्यत्वं वा प्रकृते गोत्वं वाक्यस्यापि गोशब्दशक्यत्वादिति ध्येयम् । ननु धर्मत्वहेतोरनैकान्तिकत्वे कथितक्रमेण अभिधेयत्वस्य व्यावृत्तत्वस्यैव वा केवलान्वयित्वसम्भवात् अत्यन्ताभावप्रतियोगित्वादेर्लक्ष्यान्तरस्यानुसरणं मूलकृतामयुक्तम् अतस्तदवतरणिकामाह दीधितौ नन्विति।अथान्योन्याभावप्रतियोगितावच्छेदकत्वरूपं व्यावृत्तत्वं प्रमेयधूमत्वादौ नास्तीति तत्रैव धर्मत्वं निरुक्तव्यावृत्तत्वव्यभिचारीत्यत आह तच्चेति । व्यावृत्तत्वं यतो व्यावृत्तं तत् केवलान्वयीति धर्मत्वं तत्रैव अनैकान्तिकम् इति यदुक्तं तदपाकुर्वन्नाह गगनादीति । तथा च व्यावृत्तत्वं गगनादिभ्य एव व्यावृत्तं भविष्यति तेषाञ्च धर्मत्वरूपहेत्वभावादेव न तत्र अनैकान्तिकत्वशङ्कापि स्थास्यतीति भावः । न व्यभिचार इति । तथा च उक्तानुमानस्य अप्रत्यूहत्वात् नाभिधेयत्वव्यावृत्तत्वयोः केवलान्वयित्वं सम्भवतीति कु-

मत्यन्ताभावप्रतियोगित्वस्यात्यन्ताभावाप्रतियोगित्वे अत्यन्ताभावप्रतियोगित्वमेव केवलान्वयि, अत्यन्ताभावप्रतियोगित्वे यन्निष्ठात्यन्ताभावप्रतियोग्यत्यन्ताभावप्रतियोगित्वं तदेव केवलान्वयि । न चात्यन्ताभावप्रतियोगित्वं व्यावृत्तत्वञ्च नानेति वाच्यम् । अनुगतप्रतीतिबलेन गोत्ववत्तयोः सिद्धेः । तत्र न तावदव्याप्यवृत्त्यत्यन्ताभावः केवलान्वयी, तस्य प्रतियोग्यवच्छिन्नेप्यत्यन्ताभावात् अत्यन्ताभावाप्रतियोगिनश्च केवलान्वयित्वात्, नाप्याश्रयनाशजन्यगुणनाशात्यन्ताभावः, तस्य नाशस्य सर्वत्रात्यन्ताभावादिति वाच्यम् । यत्र हि प्र-

---

दाश्चानैव अनुगतव्यवहारस्तु कथञ्चिद्विशेषणतावच्छेदकधर्मानुगमात् एवञ्च लक्ष्याप्रसिद्धया लक्षणासम्भव इत्याशङ्क्य तत्रेत्यादि । यत्र हीत्याद्यभ्युपगमवादः । वस्तुतो भूतलादिदेशे समये च तस्य व-

---

त्वैव लक्ष्यान्तरमनुसृतमिति भावः । ननु लक्ष्याप्रसिद्ध्या लक्षणासम्भवपरस्य न तावदित्यादिमूलस्यासङ्गतिः, अत्यन्ताभावप्रतियोगित्वादेरेव लक्ष्यस्य व्यवस्थापितत्वात् अतस्तस्य लक्ष्यत्वं विघटयन्नाह नन्विति । प्रतियोगित्वादिकमित्यादिना व्यावृत्तत्वस्योपग्रहः । अभावादीत्यादिना प्रतियोगिव्यक्तीनामुपग्रहः । तेन यावत्त्वावच्छिन्नाभावस्यैकत्वेऽपि तस्य प्रतियोगित्वं नैकं येन तत् केवलान्वयि स्यादिति ध्येयम । अनुगतेति । अभावप्रतियोगीत्यादिव्यवहारो विशेषणतावच्छेदकस्य अभावत्वादेरनुगमादित्यर्थः । अनुगतगोचरव्यव-

तियोगिप्रागभावो वर्त्तते तत्र न तदत्यन्ताभावो वर्त्तते तथा च नाशस्य प्रागभावो यत्र नाशप्रतियोगिसमानदेशे वर्त्तते तत्र कथं नाशात्यन्ताभावो वर्त्तताम्।तर्हि नाशस्य तत्र वृत्तिः स्यादिति चेन्न। पूर्वं तत्र नाशप्रागभावस्यैव सत्त्वादुत्तरकाले आश्रयस्यैवाभावात् । नाप्याकाशात्यन्ताभावः केवलान्वयी, तस्यापि प्रतियोगिरूपात्यन्ताभावप्रतियोगित्वात् । अभावात्यन्ताभावस्य भाव-

---

त्तमानत्वादाकाशाभावतुल्यत्वाच्च । अभावाभावस्येति सावधारणम् । भावत्वात् । यदाहुराचार्य्याः, स्वाभावविरहात्मत्वं वस्तुनः

हार एव नास्ति अभावत्वादेरपि तत्तत्स्वरूपसम्बन्धरूपत्वादित्याशयेनोक्तं कथञ्चिदिति । एवञ्चेति । अत्यन्ताभावप्रतियोगित्वादेर्नानात्वे चेत्यर्थः । इत्याशङ्क्य इति । एवञ्च मूले तत्र इत्यस्य अत्यन्ताभावप्रतियोगित्वादीनां नानात्व इत्यर्थ इति ध्येयम् । अत्यन्ताभावस्य प्रागभावेन समं विरोधस्य नव्यैरुपेक्षितत्वादाह यत्र हीत्यादीति। तत् किं तादृशनाशात्यन्ताभावः केवलान्वयीत्यतः स्वयं दूषणमाह वस्तुत इति । तस्येति । तादृशगुणनाशस्येत्यर्थः । तथा च इह भूतले घटनाशाद् गुणो नष्ट इत्यादिप्रतीत्या भूतलादावेव तादृशगुणनाशात्यन्ताभावस्य असत्त्वात् कुतस्तस्य केवलान्वयित्वमिति भावः।वर्त्तमानत्वादित्यस्य नापि तादृशगुणनाशात्यन्ताभावः केवलान्वयीति मूलेनान्वयः, नातः पञ्चम्यसङ्गतेः।ननु उक्तप्रतीतेरवच्छेदकत्वाख्यपरम्पराकालिकसम्बन्धाभ्यामेव देशकालयोर्नाशवत्त्वावगाहित्वेनोपपत्तौ दैशिकविशेषणतया देशकालयोस्तादृशगुणनाशवत्त्वे मानाभावः, तथा च दैशिकसम्बन्धावच्छिन्नप्रतियोगिताकस्तादृशगुणनाशस्य

स्वात् । अथाभावात्यन्ताभावो न प्रतियोगिरूपस्तथास-त्यन्योन्याभावात्यन्ताभावः प्रतियोगिरूप इति प्रतियोगिसमानदेशोऽन्योन्याभावो न स्यादिति चेन्न। अत्यन्ताभावात्यन्ताभावः प्रतियोग्येव अन्योन्याभावात्यन्ताभावस्तु प्रतियोगिवृत्तिरसाधारणो धर्म इति ।

प्रतियोगितेति । प्रतियोग्येवेति । प्रागभावादेरत्यन्ताभावाभावरूपत्वनयेऽपि न क्षतिः । तन्मतेऽत्यन्ताभावस्यापि तदभावरूपतया तस्यापि प्रतियोगित्वात् । असाधारण इति । प्रतियोगितावच्छेदक इति तु तत्त्वम् ।

अत्यन्ताभावः स्यास्यत्येव अत आह आकाशेति । तस्येत्यनुषज्यते । तथा च आकाशात्यन्ताभावस्य इव प्रतियोगिस्वरूपात्यन्ताभावस्यैव प्रतियोगित्वं तादृशगुणनाशात्यन्ताभावेऽपि स्यास्यतीति तस्य केवलान्वयित्वं दुर्घटमिति भावः । यत्र यदभावस्य अभावत्वं तत्र तदभावप्रतियोगित्वम् इत्येवं नियमात् नाकाशस्य स्वाभावाभावत्वसिद्धिरत आह सावधारणमिति तथा च अभावाभावस्यैव भावत्वादित्यन्वयात् भावत्वान्यथानुपपत्त्यैव गगनस्य स्वाभावाभावत्वसिद्धिरिति भावः । ननु अभावाभावस्यैवेति यथाश्रुतं प्रमेयत्वादौ व्यभिचारि, यो यदभावप्रतियोगी स तदभावाभाव इति भावत्वान्तर्भावेण व्याप्तौ चाप्रयोजकत्वं भावपदवैयर्थ्यश्च अतो व्याचष्टे प्रतियोगित्वादिति । प्रतियोगित्वेन व्यवह्रियमाणत्वादित्यर्थः । नातः साध्याविशेषः । तदभावप्रतियोगित्वस्य तदभावाभावत्वव्याप्यतायां मानमाह यदाहुरिति । प्रतियोगिता प्रतियोगित्वव्यवहारप्रयोजकधर्मः । अत्यन्ताभावात्यन्ताभावः प्रतियोग्येव इत्यसङ्गतम्, प्रतियोगिभि-

अथान्योन्याभावसाधारणः प्रतियोगितावच्छेदकसम्बन्ध एवाभावाभावः स च क्व चित्तादात्म्यं क्व चिच्च संयोगादिरिति चेत् । यद्वत्त्वे हि ज्ञाते यद्वत्त्वं न प्रतीयते तदभाववत्त्वञ्च व्यवह्रियते तस्यैव तदभावात्मकत्वमुपेयते प्रतियोगितदभाववत्त्वबुद्धयोश्च मिथस्तथात्वमानुभविकम् । न च तत्सम्बन्धवत्त्वञ्च तद्विषयः । सम्बन्धसम्बन्धवत्ताबुद्धिवत् क्व

न्नयोर्ध्वंसप्रागभावयोरपि अत्यन्ताभावाभावत्वस्य प्राचीनैः स्वीकारात् अत आह प्रागभावेति।तदभावरूपतया प्रागभावात्यन्ताभावरूपतया । तस्यापि प्रागभावादेरपि । प्रतियोगित्वादिति । तथा च प्रतियोगित्वरूपेणैव प्रागभावादेरपि उपग्रहात् नैवकारार्थबाध इति भावः । एवं सत्त्वानतिरिक्तस्य विशिष्टसत्त्वस्यातिप्रसक्त्या द्रव्यत्वस्यैव विशिष्टसत्ताभावाभावत्वस्वीकारेपि नैवकारार्थबाधः विशिष्टसत्ताभावस्यैव द्रव्यत्वाभावतया द्रव्यत्वस्यापि विशिष्टसत्ताभावप्रतियोगित्वादित्यपि द्रष्टव्यम् । असाधारणस्यापि कम्बुग्रीवादिमत्त्वप्रभृतेर्घटादिभेदात्यन्ताभावत्वविरहादाह प्रतियोगितावच्छेदकेति । यद्यपि सर्वत्र अभावस्याभावः प्रतियोग्येव तस्यापि प्रतियोगितावच्छेदकसम्बन्धेनैव अभावविरोधित्वात् घटाद्यन्योन्याभाववत्यपि संयोगादिसम्बन्धेन प्रतियोगिनो घटादेः सत्त्वे बाधकाभावः इत्यपि सुवचम्, तथापि घटे घटभेदो नास्ति इत्याधाराधेयभावप्रतीतेः नादात्म्यसम्बन्धेन कर्त्तुमशक्यत्वात्, बहूनां प्रतियोगिनामन्योन्याभावाभावत्वकल्पनामपेक्ष्य लाघवेन एकस्य प्रतियोगितावच्छेदकस्यैव तथात्वौचित्यात् नैष प्रकारः सम्भवतीति भावः ।

मिश्रोक्तमाशङ्क्य ते अर्थेति । स चेति । प्रतियोगितावच्छेदकश्चेत्यर्थः । क्व चित् भेदस्थले । क्व चित् अत्यन्ताभावस्थले । न प्रतीयते इति । तस्यैव इत्यग्रिमान्वयि । ननु तद्वत्ताप्रतीतिविरोधिन एव तदभावात्मकत्वे तद्वत्ताप्यस्यापि तदभावाभावत्वापत्तिः अत आह तदभाववत्त्वञ्चेति । प्रतियोगितदभावयोरिति।भेदप्रतियोगितावच्छेदकयोरपि उपलक्षकम् । तथात्वं विरोधित्वम् । तत्सम्बन्धवत्त्वं

धित्सम्बन्धबुद्धिर्विशेषदर्शनतयोपयुज्यते। न च स्वतः, मानाभावात्। अथ सम्बन्धान्तरावच्छिन्नाभाववति सम्बन्धान्तरेण प्रतियोगिनो वृत्तेर्न तदभावविरोधित्वमिति चेत्। प्रतियोगितावच्छेदकसम्बन्धस्याभाववति सम्बन्धान्तरेण वृत्तेर्न तथात्वम्। सम्बन्धविशेषेण च विरोधित्वं तुल्यमेव। अनवस्थाप्रसक्तये च स्वप्रतियोगितावच्छेदकसम्बन्धत्वेनाभावत्वकल्पने क्वानुगमसम्भाव-

---

प्रतियोगितावच्छेदकसम्बन्धवत्त्वम्। तद्विषयः प्रतियोगिमत्ताबोधप्रकारः। तत्र सम्बन्धस्य संसर्गविधयैव भानादिति भावः। अथ अभावव्यावृत्तत्वेन ज्ञातस्य प्रतियोगिसम्बन्धवत्त्वस्यापि अभाववत्ताबोधविरोधित्वमस्त्येव अत आह सम्बन्धसम्बन्धवदिति। तथा च तद्व्यावृत्तत्वाद्यविषयकं यद्बोधरूपज्ञानं अभाववत्ताबोधप्रतिबन्धकं तस्यैव अभावविरहत्वं परेणापि वाच्यम्। अन्यथा तन्मतेनापि प्रतियोगिसम्बन्धियिसम्बन्धस्य अभावविरहत्वापत्तेः। न चेदं प्रतियोगिसम्बन्धेऽस्तीति भावः। उपयुज्यत इत्यस्य अभावधीप्रतिबन्ध इत्यादिः। न स्वतः न सम्बन्धवत्ताबुद्धित्वेन। तस्य प्रतियोगिनः। प्रतिबन्दिमुद्रया निराचष्टे प्रतियोगितेति। न तथात्वं नाभावविरोधित्वम्। तथा च घटाद्यभावप्रतियोगितावच्छेदकीभूतसंयोगादिसम्बन्धस्य कालिकसम्बन्धेन स्पन्दादौ वर्त्तमानत्वात् संयोगादिसम्बन्धावच्छिन्नघटाद्यभावोऽपि स्पन्दादौ न तिष्ठेदिति भावः। यदि च प्रतियोगितावच्छेदकसम्बन्धस्य संसर्गतानियामकसम्बन्धेन अभावविरोधित्वमुच्यते तदा मयापि प्रतियोगितावच्छेदकसम्बन्धेनैव प्रतियोगिनस्तथात्वं वाच्यमित्याह सम्बन्धविशेषेण चेति। अन्योन्याभावात्यन्ताभावसाधारणेत्युक्तिलब्धमनुगतत्वं निरस्यति अनतीति। यथाकथञ्चित् प्रतियोगितावच्छेदकसम्बन्धमात्रस्यैव तथात्वे संयोगेन घटाद्यभावः कपालादौ न स्यात्, अभावान्तरप्रतियोगितावच्छेदकीभूतस्यैव घटसमवायस्य तत्र सत्त्वात् अतः स्वप्रतियोगितावच्छेदकसम्बन्धस्यैव तथात्वं वाच्यमिति क्वाऽनुगम इत्यर्थः।

नापीति। व्यधिकरणसम्बन्धस्यापि प्रतियोगितावच्छेदकत्वात्तद्व्यवसन्ताभावविलयप्रसङ्गो भवताम्, तदभावाविलोपप्रसङ्गो वेति।

ननु प्राचां मते स्वत्वमनुगतमेव इत्युक्तावपि आह व्यधिकरणेति। संयोगसम्बन्धावच्छिन्नघटाद्यभावस्थले प्रतियोगिनिरूपितस्यैव संयोगस्य प्रतियोगितावच्छेदकसम्बन्धत्वमावश्यकत्वात् न तु प्रतियोग्यनिरूपितस्य, मानाभावादित्युक्तौ नैष दोषः सम्भवतीति व्यधिकरणपर्य्यन्तानुसरणम्। तद्व्यधिकरणसंयोगवति। तत्सम्बन्धावच्छिन्नरूपाद्यभावस्य विलयप्रसङ्ग इति भावः। अभावविरोधिनः प्रतियोगितावच्छेदकसम्बन्धस्य तत्र सत्त्वादिति भावः। ननु प्रतियोगिनिरूपितस्यैव प्रतियोगितावच्छेदकसम्बन्धस्य तथात्वं वाच्यम्, न तु प्रतियोगिनिरूपितो व्यधिकरणसम्बन्धोऽस्तीति अतो न तदवच्छिन्नाभावस्य विलय इत्यत आह भवतामिति। तदभावेति। व्यधिकरणसम्बन्धावच्छिन्नाभावस्याभावः त्वन्मते न स्यात् प्रतियोगिनिरूपितताद्दशसम्बन्धस्य अप्रसिद्धत्वात्। अस्माकन्तु गगनस्य स्वाभावविरहत्ववत् प्रतियोगिन एव ताद्दशाभावविरहत्वं तथाविधाभावस्य अनभ्युपगम एव नेति भावः। न च प्रतियोगिनः स्वाभावविरहत्वेन संयोगसम्बन्धावच्छिन्नघटाभावः कपाले नास्तीति प्रमा स्यात् घटात्मकताद्दशघटाभावविरहस्य समवायेनैव कपाले सत्त्वात् इति वाच्यम्। कपालस्य समवायेन घटत्वावच्छिन्नवत्त्वेऽपि समवायेन संयोगसम्बन्धावच्छिन्नघटाभावाभावत्वावच्छिन्नवत्त्वाप्रसिद्ध्यैव तादृप्येण प्रमात्वासम्भवात्। संयोगादिसम्बन्धेनैव ताद्दशघटाभावाभावत्वावच्छिन्नाधिकरणतायाः पारमार्थिकत्वात् तद्धर्मप्रकारेण प्रमात्वस्य तद्धर्मावच्छिन्नवद्विशेष्यकत्वघटितत्वात्। अन्यथा विशिष्टसत्तायाः सत्तानतिरिक्तत्वेन गुणो विशिष्टसत्तावान् इत्यादिप्रतीतेः प्रमात्वापत्तेरिति ध्येयम्।

इति केवलान्वय्यनुमानपूर्वपक्षः।

उच्यते । वृत्तिमदत्यन्ताभावाप्रतियोगित्वं केवलान्वयित्वम्।आकाशात्यन्ताभावो यद्यपि प्रतियोगिरूपात्यन्ताभावप्रतियोगी तथापि स न वृत्तिमानित्याकाशात्यन्ताभाव एव केवलान्वयी।तथा प्रमेयत्वाभिधेयत्वादि केवलान्वयि । वृत्तिमतोऽत्यन्ताभावस्याप्रतियोगित्वात् ।

लक्षणम्परिष्कुरुते वृत्तिमदेत्यादि । आकाशस्य तदभावाभावत्वमित्यभ्युपगममात्रम् । भाववति तदभावासत्त्वप्रतीत्या हि भावस्य स्वाभावाभावत्वं कल्प्यते, न चेह तथा, अभावप्रतियोगित्वं स्वरूपसम्बन्ध एवेत्युक्तमधस्तात्, अभावप्रतियोगित्वञ्चाप्रयोजकम् । एवञ्च यत्सम्बन्धावच्छिन्नप्रतियोगिताकाभावाप्रतियोगित्वं यस्य तस्य तेन सम्बन्धेन केवलान्वयित्वमिति सूचयितुं वृत्तिमदिति ।

परिष्कुरुते इति । लक्ष्याप्रसिद्धिनिबन्धनस्य असम्भवस्य विशेषणान्तरप्रक्षेपेण वारणमेवास्य परिष्कारः । न चेह तथेति । न चाकाशवति आकाशाभावस्य असत्त्वप्रतीतिः, आकाशवत एवाप्रसिद्धत्वादित्यर्थः । अन्यथा प्रमेयत्वाद्यभावत्वमपि गगनादेः स्यादविशेषादिति भावः । ननु प्रतियोगित्वान्यथानुपपत्त्यैव गगनस्य स्वाभावाभावत्वं सेत्स्यतीत्यत आह अभावप्रतियोगित्वमिति । उक्तमिति । अभावविरहत्वस्य प्रतियोगितात्वे भेदप्रतियोगितस्वावच्छेदकयोरतिव्याप्त्यापत्तेरिति भावः । ननु यो यदत्यन्ताभावस्य प्रतियोगी सोऽवश्यं तदत्यन्ताभावस्याभाव इति सामान्यव्याप्त्या गगनाभावप्रतियोगित्वहेतुनैव गगनस्य स्वाभावाभावत्वं साधनीयमत आह अभावप्रतियोगित्वमिति । अत्यन्ताभावप्रतियोगित्वमित्यर्थः । तेन भेदस्य प्रतियोगिनि न व्यभिचारः । अप्रयोजकमिति । यत्तद-

अत एव ज्ञानस्य ज्ञानत्वस्य च समवायेन ज्ञानविषयत्वादेश्च व्यधिकरणसमवायादिना सम्बन्धेनाभावप्रतियोगित्वेऽपि विषयतया

र्थयोरननुगतत्वेन सामान्यव्याप्तेरसत्त्वादिति भावः । तत् किं वृत्तिमत्पदमफलमेव इत्याशङ्क्यायामाह एवञ्चेति । तथा च उद्धर्त्तो हि ग्रन्थ इत्यादिन्यायात् सम्बन्धविशेषावच्छिन्नप्रतियोगितालाभार्थमेव वृत्तिमत्पदमिति भावः । नव्याः पुनराकाशाभावो यद्यपि विशिष्टस्वाभावात्मकस्वप्रतियोगिस्वरूपाभावस्य प्रतियोगी, तथापि विशिष्टाभावात्मकस्वप्रतियोगिस्वरूपाभावो न वृत्तिमान् न प्रतियोग्यनधिकरणे वृत्तिमान् वृत्तिमत्पदेन प्रतियोग्यनधिकरणवृत्तिमत्त्वस्यैव उक्तत्वात् इत्येवं क्रमेण मूलव्याख्याने गगनस्य स्वाभावाभावत्वविरहेऽपि न मूलासङ्गतिरित्याहुः । सम्बन्धनिवेशस्य फलमाह अत एवेति । ज्ञानस्य समवायसम्बन्धेन अभावप्रतियोगित्वेऽपि विषयतया केवलान्वयित्वमिति योजना । अत्र ज्ञानं सर्वगोचरं ग्राह्यम । तत्तन्मात्रविषयकज्ञानस्य विषयतासम्बन्धेन सर्वत्र असत्त्वात् तस्य अलक्ष्यत्वादिति ध्येयम् । साक्षात्सम्बन्धेन केवलान्वयित्वमुक्त्वा परम्परासम्बन्धेन तमाह ज्ञानत्वस्येति । समवायेन अभावप्रतियोगित्वेऽपि स्वाश्रयविषयत्वरूपपरम्परासम्बन्धेन केवलान्वयित्वमित्यन्वयः । स्वाश्रयविषयत्वादिसम्बन्धस्य वृत्त्यनियामकतया तादृशसम्बन्धावच्छिन्नप्रतियोगित्वाप्रसिद्ध्या तत्सम्बन्धेन ज्ञानत्वादेः केवलान्वयित्वासम्भवमनुसृत्याह ज्ञानविषयत्वादेश्चेति । आदिना गगनाद्यभावस्य सङ्ग्रहः । तेन विषयभेदेन विषयताया अननुगतत्वेन अलक्ष्यत्वेऽपि न क्षतिः । वक्ष्यमाणावच्छेदकगर्भलक्षणाभिप्रायेण ज्ञानविषयत्वस्य उपादानमित्यपि कश्चित् । व्यधिकरणेत्युपलक्षणम । समानाधिकरणकालिकादिसम्बन्धेनापि गगनादौ ज्ञानविषयत्वादेरभावसत्त्वे बाधकाभाव इत्यपि द्रष्टव्यम । [वस्तुतो ननु केवलान्वयितावटकान्यसमानाधिकरणसंसर्गानवच्छिन्नाया एव प्रतियोगिताया निवेश्यत्वान्न समवायेन ज्ञानादेरभावमादायाऽव्याप्तिरत आह ज्ञानविषयत्वादेश्चेति । आदिना ज्ञानज्ञानत्वाद्युपग्रहः ।]

परम्परासम्बन्धेन स्वरूपसम्बन्धेन च केवलान्वयित्वम्। संयोगाद्यभावोपसंग्रहाय च प्रतियोग्यसमानाधिकरणत्वेनाभावो विशेष्यः। आकाशाभावोऽपि च यथा प्रतियोग्यसमानाधिकरणस्तथोक्तमधस्तात्। वृत्तिमतस्तादृशाभावाप्रतियोगित्वमिति वार्थः।

संयोगाद्यभावेति। यद्यपि प्रमेयत्वादेरपि वैशिष्ट्याद्यवच्छिन्नाभावप्रतियोगित्वात् असम्भववारणाय इत्येव वक्तुमुचितम्, तथापि विशेष्यादिमति विशिष्टाभावादेर्न विशेष्यादिप्रतियोगित्वमिति प्राचां मतेन वैशिष्ट्याद्यनवच्छिन्नप्रतियोगित्वनिवेशाभिप्रायेण वा संयोगाद्यभावानुसरणम्। प्रतियोग्येति। प्रतियोग्यनधिकरणवृत्तित्वेनेत्यर्थः। तथा च स्वावच्छेदकसम्बन्धेन स्वाश्रयानधिकरणवृत्त्यभावीयतत्सम्बन्धावच्छिन्नप्रतियोगित्वाभाव एव तत्सम्बन्धेन केवलान्वयित्वमिति फलितम्। तेन घटाद्यभावस्यैव घटादिविशिष्टवाच्यत्वाद्यभावत्वमतेऽपि न प्रतियोग्यनधिकरणवृत्त्यभावस्याप्रसिद्धिः स्वपदस्य अग्रिमप्रतियोगित्वपरत्वादिति ध्येयम्। ननु गगनस्याधिकरणस्य अप्रसिद्ध्या तदभावस्य प्रतियोगिवैयधिकरण्यविरहात् तादृशघटाद्यभावस्य अप्रतियोगित्वं गगनस्यापीति तत्राव्याप्तिः, स्वरूपसम्बन्धात्मनः प्रतियोगित्वस्य प्रतियोगिभेदेन भिन्नतया द्रव्यसामान्याभावीयस्यापि गगननिष्ठप्रतियोगित्वस्य अतथात्वात् तदाश्रयस्य गगनस्याधिकरणस्य अप्रसिद्धेः, अभावविरहत्वरूपप्रतियोगित्वस्य लक्षणघटकत्वे गगनादेर्द्रव्यसामान्याभावाभावत्वविरहेण तत्प्रतियोगित्वासम्भवाच्च इत्यत आह आकाशाभावोऽपीति। तथा च तादृशसम्बन्धसामान्ये यद्यत्प्रतियोगिताश्रयप्रतियोगिकत्वयत्किञ्चिदधिकरणानुयोगिकत्वोभयाभावः तत्तत्प्रतियोगित्वाभावकूटत्वं तादृशसम्बन्धेन केवलान्वयित्वं वाच्यम्। गगनस्य तु तादृशप्रतियोगितासत्त्वात् न केनापि सम्बन्धेन तस्य केवलान्वयित्वमिति भावः। उभयाभावस्य अप्रवेशेन लाघवं वृत्तिमत्पदस्य सार्थक्यञ्च कुर्वन्नाह वृत्तिमत इति। तादृशेति। प्रतियोगिव्यधिकरणेत्यर्थः। तथा च यथाश्रुतमेव प्रतियोगिवैयधिकरण्यं निवेश-

व्याप्यवृत्तित्वार्थकं वृत्तिमत्पदमभावविशेषणमित्यपि कश्चित् । तादात्म्येनाभिधेयस्य केवलान्वयित्वसम्पत्तये व्याप्तिग्रहखिलमालोकनीयम् ।

नीयम् । वृत्तिमत्त्वविरहादेव च गगनादौ नातिप्रसङ्गः । वृत्तिमत्त्वञ्च केवलान्वयिताघटकसम्बन्धेन ग्राह्यम् । तेन समवायेन वृत्तिमतोऽपि घटत्वादेः संयोगसम्बन्धावच्छिन्नप्रतियोगिव्यधिकरणाभावाप्रतियोगित्वेऽपि न तस्य संयोगेन केवलान्वयित्वम् । यदि च ज्ञानत्वादेः स्वाश्रयविषयत्वादिसम्बन्धेन इव स्ववृत्तिप्रमेयत्ववत्त्वादिसम्बन्धेनापि केवलान्वयित्वम् एकशेषस्य दुःशक्यत्वात् तथा च तादृशसम्बन्धेन प्रतियोगिव्यधिकरणाभावाप्रसिद्ध्या तत्राव्याप्तिरिति विभाव्यते, तदा यत्सम्बन्धावच्छिन्नयद्वन्निष्ठप्रतियोगिव्यधिकरणाभावस्य प्रतियोगित्वाभाववत्त्वावच्छेदेन प्रतियोगिव्यधिकरणाभावप्रतियोगित्वाभाववत्त्वं तत् सम्बन्धेन तत् केवलान्वयीति वाच्यम् । प्रतियोगिताद्वयञ्च तत्र विशेषणताविशेषावच्छिन्नं ग्राह्यमतो न कश्चिद्दोष इति ध्येयम् । व्याप्यवृत्तित्वेति । तथा च गगनाद्यभावो व्याप्यवृत्तिरेवेति गगने नातिप्रसङ्गः । संयोगरूपश्च अभावो न तथेति तत्प्रतियोगित्वेऽपि संयोगाद्यभावे न अप्रसङ्ग इति भावः । अत्र व्याप्यवृत्तित्वं यदि अवच्छिन्नवृत्तिकान्यत्वं तदा संयोगस्य केवलान्वयित्वापत्तिः तदभावस्य अवच्छिन्नवृत्तिकत्वात् । न च निरवच्छिन्नवृत्तिकत्वमेव व्याप्यवृत्तित्वं वाच्यम् । अवच्छेदकत्वादिसम्बन्धेनैव मूलादौ निरवच्छिन्नवृत्तिकस्य संयोगादेः प्रतियोगित्वेन संयोगाद्यभावाव्याप्तितादवस्थ्यात् । न च विशेषणताविशेषेण निरवच्छिन्नवृत्तिकत्वं तथा, घटाद्यभावस्यापि केवलान्वयित्वापत्तेः घटादिरूपस्य तदभावस्य विशेषणतया वृत्तित्वविरहात् । एवं द्वित्वावच्छिन्नस्यैव प्रमेयत्वादेरभावस्य व्याप्यवृत्तित्वात् तत्प्रतियोगित्वेन असम्भवश्च स्यात् इत्यस्वरसः कश्चिदित्युक्त्वा सूचितः । ननु वृत्त्यनियामकेन स्वविषयतादात्म्येन प्रतियोगिव्यधिकरणत्वाप्रसिद्ध्या तेन सम्बन्धेन नित्यज्ञानादेरभिधेयस्य कुतः केवलान्वयित्वमत आह तादात्म्येनेति । स्वविषयतादात्म्येनेत्यर्थः ।

ननु प्रमेयत्वं प्रमाविषयत्वं तच्च न केवलान्वयि, प्रमाया विषयत्वस्य चाननुगमादिति वाच्यम्। प्रमात्वमेव हि परम्परासम्बन्धात् घटादौ प्रमेयत्वमनुगतं प्रमाजातीय-

---

प्रमाजातीयेति । तथा च तादृशाभावप्रतियोगितानवच्छेदकधर्मवत्त्वमर्थः । इत्थञ्च प्रतियोगितावच्छेदकावच्छिन्नासामानाधिकरण्यमेवाभावविशेषणं तेन द्रव्यगुणभेदयोर्द्वित्वादिना न

यथाश्रुते अभिधेयमात्रस्य एव तत्तद्व्यक्तित्वावच्छिन्नभेदप्रतियोगितया तादात्म्येन कस्यापि अभिधेयस्य न यावद्वृत्तित्वं कुत्राऽव्याप्तिशङ्का स्यादिति ध्येयम् । नव्यास्तु तथा च इत्यग्रिमग्रन्थोत्तरमेव अयं पाठः, तत्र अनवच्छेदकगर्भलक्षणे अभिधेयत्वादिप्रकारेण वस्तुमात्रस्यैव तादात्म्येन केवलान्वयित्वसम्भवादिति प्राहुः । अखिलमिति । प्रतियोग्यसमानाधिकरणेत्यत्र प्रतियोग्यसम्बन्धित्वं वृत्तिमत इत्यत्र च सम्बन्धितामात्रं निवेश्यम् अत्यन्ताभावत्वादिकञ्च न प्रवेश्यमिति भावः ।

मूले प्रमाजातीयेति । घटत्वाद्येकतरप्रमामुपादाय भ्रमसामान्याभिन्नत्वेन तत्सजातीयस्य ज्ञानस्य विषयत्वमेव प्रमेयत्वं वाच्यमित्यर्थः । प्रमाजातीयत्वोक्त्यापि न प्रतियोगित्वगर्भलक्षणस्य प्रतीकारः, विषयत्वस्य नानात्वात् अतः प्रमाजातीयत्वेन अनुगमं कुर्वाणस्य मूलकृतोऽनवच्छेदकत्वगर्भलक्षणे तात्पर्य्यमवधार्य्य व्याचष्टे तथा चेति । अत्र गुरुधर्मस्यापि प्रतियोगितावच्छेदकत्वोपगमात् न प्रमेयधूमत्वादिप्रकारेण धूमादेः केवलान्वयित्वम्, सिद्धान्तलक्षणोक्तरीत्या प्रतियोगितावच्छेदकानतिरिक्तवृत्तित्वमेव वा तदवच्छेदकत्वं वाच्यम् । इत्थञ्चेति । अवच्छेदकत्वनिवेशे चेत्यर्थः । तेनेति । अन्यथा द्रव्यभेदगुणभेदोभयत्वावच्छिन्नाभावस्य प्रतियो-

विषयत्वं वा। तथापि केवलान्वयिनि संशयाभावात् कथमनुमितिः, प्रमेयत्वमत्र वर्त्तते न वेति संशयश्च न प्रमेयपक्षकः किन्तु प्रमेयत्वपक्षको भिन्नविषयकः, प्रमेयत्वपक्षके चास्तित्वसाध्यस्यान्वयव्यतिरेकित्वं तथा च घटः प्रमेयो न वेति संशयो मृग्यते स च नास्त्येव।

केवलान्वायित्वम्। न चैवं विरुद्धयोर्धर्मयोर्द्वित्वेन केवलान्वयित्वापत्तिः तदवच्छिन्नाधिकरणाप्रसिद्ध्या तदवच्छिन्नाभावे प्रतियोग्यसामानाधिकरण्यस्यासम्भवादिति वाच्यम्। तादृशधर्मावच्छिन्नस्य यत्किञ्चिदधिकरणवृत्तिताया विवक्षितत्वात्। क्व चिदपि तादृशोभयवत्त्वाप्रतीतेस्तस्याऽतथात्वात्। सन्दिग्धसाध्यत्वं पक्षत्वमित्याशयेनाशङ्कते तथापीति। अस्तित्वसाध्यस्य घटवृत्तित्व-

---

सिसमानाधिकरणत्वात् तदसामानाधिकरणस्य अभावान्तरस्य प्रतियोगितानवच्छेदकमेव तादृशोभयत्वमिति तद्रूप्येणापि केवलान्वयित्वं स्यात् इति भावः। वृत्तिमत इत्यादिद्वितीयमतमालम्बय शङ्कते न चेति। वाच्यमित्यग्रेऽन्वयः। एवमिति। प्रतियोगितावच्छेदकावच्छिन्नस्य असामानाधिकरण्यप्रवेश इत्यर्थः। यथाश्रुते तु विरुद्धयोर्द्वयोरपि प्रतियोग्यनधिकरणवृत्तिप्रत्येकाभावप्रतियोगित्वेनैव अतिव्याप्तयसम्भवात् इति भावः। तादृशधर्मावच्छिन्नस्येति। निरुक्तप्रतियोगितानवच्छेदकधर्मावच्छिन्नस्येत्यर्थः। विवक्षितत्वादित्यस्य वृत्तिमत्पदेन इत्यादिः। तस्य। विरुद्धगोत्वाश्वत्वाद्युभयत्वस्य। अतथात्वात् यत्किञ्चिद्व्यक्तिनिरूपितवृत्तितानवच्छेदकत्वात्। वस्तुतः अत्रापि यत्सम्बन्धेन यद्रूपावच्छिन्नस्य अधिकरणे वर्त्तमानस्य अभावस्य दैशिकविशेषणतावच्छिन्नप्रतियोगितानवच्छेद-

अथ पक्षः साध्यवान्न वा पक्षे साध्यमस्ति न वेति संशयौ समानविषयकावेव, तदस्यास्त्यस्मिन्निति मतुपो विधानादिति चेन्न।विशेषणविशेष्यभावभेदेनार्थभेदात्।मैवम। य एव हि संशयः पक्षे साध्यसिद्धिविरोधी स एवानुमानाङ्गमावश्यकत्वात् लाघवाच्च न तु समानविषयकत्वमपि तत्र तन्त्रं गौरवात्। प्रमेयत्वं घटनिष्ठात्यन्ताभावप्रतियोगि न वेति संशयश्च घटः प्रमेय इति साध्य-

---

साध्यस्य । साध्यसिद्धिविरोधी साध्यसिद्धिनिवर्त्यः । विशेषण-

कसामान्यं दैशिकविशेषणतावच्छिन्नप्रतियोगितानवच्छेदकं तत्सम्बन्धेन तद्रूपावच्छिन्नं केवलान्वयीत्येव वक्तव्यम्। अन्यथा स्ववृत्तिप्रमेयत्ववत्त्वादिसम्बन्धेन प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिवैयधिकरण्याप्रसिद्ध्या तादृशसम्बन्धेन केवलान्वयिनि ज्ञानत्वादौ उक्तलक्षणस्य अव्याप्तिप्रसङ्गादित्यवधेयम् । ननु संशयस्य अनुमित्यनुपयुक्तत्वात् तथापीत्यादिमूलासङ्गतिः अत आह सन्दिग्धेति । तथा च सिद्धिदशायामनुमितेर्वारणाय पक्षताविधयैव संशयस्योपयोग इत्याशङ्क्याह तुरभिप्रायः । कालसम्बन्धित्वरूपस्य अस्तित्वस्य केवलान्वयितया तत्साध्यकस्य अन्वयव्यतिरेकित्वं मूलोक्तमसङ्गतमतो व्याचष्टे घटास्तित्वेति । [घटवृत्तितेति तदर्थः ।] साध्यसंशयस्य निश्चयं प्रति अविरोधित्वात् व्याचष्टे साध्यसिद्धीति । तथा च मूले साध्यसिद्धेर्यो विरोधः प्रतिबन्धस्तद्वानित्यर्थः । न तु साध्यसिद्धिर्विरोधिनी यस्येति बहुव्रीहिः, परपदे पुंस्त्वायोगात् नित्यं कप्रत्ययापाताच्च । साध्यसिद्धिपदञ्च साध्यधर्मिकपक्षवृत्तित्वनिश्चयपरम्, नातः केवलान्वयिनि साध्याभावाप्रसिद्ध्या साध्या-

सिद्धिविरोधी भवत्येव। यद्वा संशययोग्यतैवानुमानाङ्गं संशयस्य तदानीं विनाशात्। न च सापि साधकबाधकप्रमाणाभावः प्रमेयत्वाभावासिद्धौ तत्प्रमाणासिद्धेस्तदभावासिद्धिरिति वाच्यम्। पक्षनिष्ठात्यन्ताभावाप्रतियोगित्वज्ञानस्यैव साध्यसाधकत्वेन तदभावस्यैव योग्यतात्वात्।

विशेष्यभावभेदेऽपि विरोधिविषयतामात्रेण प्रतिबन्धकत्वमनुभवबलादास्थीयते न हीदं साध्यवदत्र वा साध्यमित्येकतरनिश्चयेऽत्र साध्यं न वा इदं साध्यवन्न वेति अन्यतरः सन्देह इति। पक्षनिष्ठेत्यादि। पक्षनिष्ठाभावप्रतियोगित्वज्ञानविरोधिज्ञानस्य साध्यसा-

---

भावाप्रकारकसाध्यप्रकारकज्ञानपर्य्यवसितायाः साध्यसिद्धेः पुनरप्रसिद्धितादवस्थ्यमिति भावः। वस्तुतः साध्यनिष्ठप्रकारत्वान्यप्रकारत्वानिरूपितपक्षनिष्ठविशेष्यताकत्वमेव साध्यनिश्चयत्वं वाच्यम्। अन्यथा वाच्यं पक्षीकृत्य ज्ञेयस्य तादात्म्येन साध्यतायां तादृशसम्बन्धेन वाच्यवृत्तित्वाभावस्य अप्रसिद्ध्या कथितक्रमेण अप्रसिद्धितादवस्थ्यात्। [न चैवं साध्यतादितरोभयप्रकारतानिरूपितपक्षनिष्ठविशेष्यताकत्वरूपसाध्यसंशयत्वस्यैव निरुक्तौ सामञ्जस्ये साध्यनिश्चयनिवर्त्यत्वेन अनुगमोक्तिर्विफलेति वाच्यम्। पक्षः साध्यवान्न वेति संशयवत्साध्यं पक्षनिष्ठाभावप्रतियोगि न वेत्यादिसंशयादनुमित्युत्पादेन तदर्थमेवाऽगत्याऽभिधानादिति भावः।] ननु साध्यं पक्षवृत्ति न वा इत्यादि संशयस्य असंग्रहः भिन्नप्रकारकतया तस्य साध्यवत्त्वनिश्चयानिवर्त्यत्वात् अतः प्राचां मतेनोपगृह्णाति विशेषणेत्यादि। भेदेऽपीत्यपिना प्रमेयत्वं पक्षवृत्त्यभावप्रतियोगि न वा इत्यादिमूलोक्तस्थले विषयभेदस्यापि संग्रहः। विरो-

प्रमेयत्वमत्यन्ताभावप्रतियोगीति भ्राम्यतः संशय इत्यन्ये । नन्वेकरूपविकलमिदं कथं गमकं तत्त्वे वा व्यतिरेकविकलवत् रूपान्तरविकलमपि गमकं स्यादिति चेन्न । अन्वयव्यतिरेकव्याप्त्योरन्यतरनिश्चयेनानुमित्यनु-

---

धकत्वेन कथञ्चित्साध्यसिद्ध्यनुगुणत्वेन पक्षनिष्ठाभावप्रतियोगित्वज्ञानाभावस्य वा साध्यस्य साधकत्वेन तदभावस्य तस्य साध्ये पक्षनिष्ठाभावप्रतियोगित्वज्ञानस्य साध्ये पक्षनिष्ठाभावप्रतियोगित्वावगाहिज्ञानत्वेन साध्यविशिष्टपक्षज्ञानविरोधित्वेन वा रूपेणा-

---

धीति । विरोधिना तत्तत्संशयानुपपत्तिप्रयोजिका या विषयता तन्मात्रेणेत्यर्थः । न तु विरोधिना विषयतामात्रेणेत्यर्थः । तथा सति प्रमेयत्वं पक्षवृत्ति न वा पक्षवृत्त्यभावप्रतियोगि न वा इत्यादिसंशयस्य पक्षः प्रमेयत्ववान् इत्यादिनिश्चयानिवर्त्यत्वे प्रकृतासङ्गतिप्रसङ्गादिति ध्येयम् । पक्षनिष्ठाभावाप्रतियोगित्वज्ञानं न साध्यसाधकं अबाधितत्वबुद्धेरनुमित्यहेतुत्वात्, हेतुत्वेऽपि तदभावो न योग्यता इत्युभयथापि पक्षनिष्ठेत्यादिमूलासङ्गतिः अतो व्याचष्टे पक्षेत्यादि । अग्रे तदभावस्य इत्यत्र तच्छब्देन पक्षवृत्त्यभावप्रतियोगित्वज्ञानस्यैव परामर्शे सामञ्जस्यम् अतो विरोधित्वलक्षणं नञर्थमन्तर्भाव्य आह प्रतियोगित्वज्ञानविरोधिज्ञानस्येति । कथञ्चित् बाधापनयनद्वारा । इदञ्च भावाभावकृतं विरोधित्वमनुसृत्य । वस्तुतः साध्यधर्मिकपक्षनिष्ठाभावप्रतियोगित्वज्ञानविरोधिनः परामर्शस्यैव साध्यसाधकत्वसम्भवात् यथाश्रुतमेव ज्यायः । साध्यसाधकत्वं यथाश्रुतमेव विवक्षिष्यविरोधार्थकस्यापि नञो ज्ञानविरोधित्वप्रकारेण बोधकतायाम् आधुनिकलक्षणापत्तेः पक्षान्तरमाह पक्षनिष्ठेति । तथा च घटाऽनधिकरणमित्यादिप्रयोग इव अप्रतियोगित्वज्ञानेत्यत्रापि नञ्व्यत्या-

भवात् युगपदुभयव्याप्त्युपस्थितौ विनिगमकाभावेन उभयोरपि प्रयोजकत्वे व्यतिरेकोपासना व्यतिरेकश्च विपक्षवृत्तित्वशङ्कानिवृत्तिद्वारा व्यतिरेकव्याप्तावुपयुज्यते अत्र तु विपक्षाभावेन शङ्कैव नोदेति ॥

भावस्य योग्यतात्वात् । व्यतिरेकः विपक्षे हेतोरभावः । व्यतिरेकव्याप्तौ साध्याभावहेत्वभावयोर्यौ व्यतिरेकौ साध्यहेतू तयोर्व्याप्तौ ।

सात् ज्ञानपदेनान्वय इति भावः । द्वितीयकल्पे तदात्मकस्य अभावस्य इत्यर्थसम्भवेऽपि उभयकल्पसाधारण्यार्थं प्रक्रान्तमेव पक्षनिष्ठाभावप्रतियोगित्वज्ञानं तच्छब्देन परामर्शयन्नाह तस्येत्यादिना । धर्मान्तरे तादृशप्रतियोगित्वज्ञानदशायामपि साध्यानुमित्युत्पत्तेः साध्य इति पूरितम् । तादृशप्रतियोगित्वज्ञानप्रतियोगिताकाभावमात्रस्य तादृशप्रतियोगित्वज्ञानदशायामपि सत्त्वादाह तादृशप्रतियोगित्वावगाहिज्ञानत्वेनेति । तादृशनिश्चयत्वेनेत्यर्थः । तेन तादृशप्रतियोगित्वसन्देहदशायां न योग्यताहानिः । ननु एवं पक्षः साध्याभाववान् इत्यादिनिर्णयदशायामपि उक्तक्रमेण संशययोग्यता स्यात्, तथा च तदापि अनुमित्यापत्तिः अत आह साध्यविशिष्टेति । अभावमात्रात्मकस्य व्यतिरेकस्य विपक्षगामित्वशङ्कानिवर्त्तकत्वासम्भवात् व्यतिरेकश्च इत्यादिमूलासङ्गतिः अतो व्याचष्टे विपक्षे हेतोरभाव इति । ननु क्वचित् विपक्षे हेतोरभावग्रहेऽपि विपक्षवृत्तित्वशङ्कोत्पादात् विपक्षत्वावच्छेदेन हेत्वभाववत्त्वं वाच्यं तच्च व्यतिरेकव्याप्तिपर्य्यवसितं न स्वात्मिकायां व्यतिरेकव्याप्तौ उपयुज्यते इति मूलासङ्गतिः अतो व्याचष्टे साध्याभावहेत्वभावयोरिति । तथा च व्यतिरेकव्याप्तेः स्वस्मिन् अनुपयुक्तत्वेऽपि साध्यान्वयव्याप्तौ व्यभिचारशङ्कानिरासद्वारा उपयोगः भिन्नप्रकारकस्यापि ज्ञानस्य विरो-

अत्र वदन्ति । साध्याभाववदवृत्तित्वमेव व्याप्तिः, लाघवात् प्रायशः साधनभेदेऽप्यभेदाच्च । यत्सम्बन्धावच्छिन्नसाध्याभाव-

---

त्वोपगमादिति भावः । के चित्तु व्यतिरेको यदि अभावमात्रं व्यतिरेकव्याप्तिर्वा उभयथापि तदवुद्धेर्न विपक्षवृत्तित्वशङ्कानिवर्त्तकत्वं भिन्नप्रकारकत्वात् अतो व्याख्यातं विपक्षे हेतोरभाव इति । हेतोर्विपक्षवृत्तित्वाभाव इति तदर्थः । व्यभिचारशङ्काया न व्यतिरेकव्याप्तिविरोधित्वं भिन्नप्रकारकत्वात् अतस्तन्निराशद्वारा विपक्षवृत्तित्वाभावस्य सुतरां व्यतिरेकव्याप्तौ उपयोगो न सम्भवति अतो व्याचष्टे साध्याभावहेत्वभावयोरितीत्याहुः । तच्चिन्त्यम् । अत्रेति । शङ्का इयं नव्यनैयायिकानां न तु गुरूणाम्, तैरनौपाधिकत्वस्य व्याप्तित्वस्वीकारात् । अत एव गुरूणां व्याप्यतावच्छेदकप्रकारकज्ञानस्यैव अनुमितिहेतुतया प्रायशः साधनभेदेऽपि इत्याद्यग्रिमग्रन्थासङ्गतिरित्यपि परास्तमित्यपि ध्येयम् ।

साध्येति । अत्र साध्याभावस्य अधिकरणत्वं निरवच्छिन्नं ग्राह्यम । तेन कपिसंयोगादिसाध्यकस्य एतदवृक्षत्वादेर्नासंग्रहः । तदपि वा केवलान्वयिनां पथि प्रस्थाप्यमित्यवधाव्यतम् । व्याप्तिरिति । प्रकारतया अनुमितिजनकतावच्छेदकमित्यर्थः । व्याप्तिर्व्याप्तेः शक्यम्, केवलान्वयिनि तु न व्याप्यव्यवहारोऽपीत्यपि कश्चित् । लाघवादिति । पक्षधर्मिकसाध्याभाववदवृत्तिमत्तानिश्चयोत्तरानुमितित्वावच्छिन्नं प्रति तादृशनिश्चयत्वेन हेतुतायामवच्छेदकलाघवादित्यर्थः । पक्षधर्मिकस्वव्यापकसाध्यसमानाधिकरणहेतुमत्तानिश्चयोत्तरानुमितित्वावच्छिन्नं प्रति तादृशहेतुमत्तानिश्चयत्वेन कारणतायान्तु पूर्वापेक्षया अवच्छेदकगौरवादिति भावः । साध्याभाववदवृत्तित्वावच्छिन्नप्रकारकनिश्चयत्वेन एकरूपेण धूमालोकादिनानालिङ्गकपरामर्शस्य तादृशनिश्चयोत्तरानुमितित्वावच्छिन्नं प्रति हेतुत्वम् अतः साधनविशेषाप्रवेशप्रयुक्तलाघवमप्यस्ति इत्याह प्रायश इति । साध्याभाववदवृत्तित्वं न साध्याभाववति सम्बन्धसामान्येन अवर्त्तमानत्वम्, तदग्रहेऽपि पक्षः साध्याभाववदसंयुक्तवान् साध्य-

वृति हेतोरवृत्तित्वं गृह्यते तेन सम्बन्धेन साध्यसिद्धिः फलम्, सा-

---

भाववदसमवेतवान् इत्यादिज्ञानादेव साध्यानुमितेरानुभविकत्वात्, एवञ्च विभिन्नसम्बन्धेन हेतुतास्थले साध्याभाववदवृत्तित्वमप्यस्माकं नाना इत्याशयेन प्रायश इत्युक्तम् । न च साध्याभाववदवृत्तित्वज्ञानस्य साधनविशेषमन्तर्भाव्य अहेतुत्वे वन्ह्यभाववदसंयुक्तधूमवान् पर्वत इत्यादिपरामर्शस्य धूमवत्त्वांशे भ्रमत्वग्रहेऽपि ततः पर्वतो वन्हिमान् इत्यनुमितिः स्यादिति वाच्यम् । इष्टत्वात् । यादृशवस्तुविषयकत्वेन अनुमितिहेतुत्वं तदघटितभ्रमत्वग्रहस्यैव अनुमितिप्रतिकूलत्वात् । अन्यथा धूमसामान्यव्यापकवन्हिसमानाधिकरणनीलधूमवान् पर्वत इत्यादिपरामर्शस्य नीलांशे भ्रमत्वग्रहदशायां तन्मतेऽपि तादृशपरामर्शात् अनुमित्युत्पत्तिप्रसङ्गात् । यादृशी विषयिताव्यक्तिः अनुमितिजनकतावच्छेदिका तद्घटकपदार्थगर्भाप्रामाण्यज्ञानस्यैव उत्तेजकतया निरुक्ताप्रामाण्यज्ञानस्यापि अनुमितिविरोधित्वसम्भवाच्च । तत्रत्यायाः साध्याभाववदवृत्तिधूमत्वावच्छिन्नविषयतायाः एव तादृशवृत्तित्वावच्छिन्नविषयतात्वादिति ध्येयम् । यद्यपि धूमलिङ्गकवन्ह्यनुमितित्वावच्छिन्नं प्रति आलोकलिङ्गकानुमित्सायाः प्रतिबन्धकतया तदभाववदशायां वन्ह्यभाववदवृत्तिमान् पर्वत इत्येवं निश्चयादपि धूमलिङ्गकवन्ह्यनुमितिप्रसङ्गः । पक्षधर्मिकसाध्याभाववदवृत्तिधूमवत्तानिश्चयोत्तरानुमितेरेव धूमलिङ्गकानुमितित्वेन तत्र तादृशानुमित्यनुत्पादस्य सर्वसिद्धत्वात् । तथा च तद्वारणाय पक्षधर्मिकसाध्याभाववदवृत्तिधूमादिमत्तानिश्चयत्वेन तादृशनिश्चयोत्तरानुमितित्वावच्छिन्नं प्रति हेतुत्वं वाच्यमिति साध्याभाववदवृत्तित्वज्ञानस्य हेतुत्वमतेऽपि साधनभेदेन भिन्न एव कार्य्यकारणभावः । तथापि तल्लिङ्गकानुमितौ तदन्यलिङ्गकानुमित्सायाः कामिनीजिज्ञासादिवत् स्वातन्त्र्येण प्रतिबन्धकत्वे मानाभाव इति मतेनेदम् । पक्षता च गुरूणामिव नव्यानां नानुमितिहेतुः । यत्तु आलोकलिङ्गकेच्छासत्त्वेऽपि धूमालोकोभयपरामर्शदशायां धूमलिङ्गकानुमितेरुत्पादात् आलोकलिङ्गकपरामर्शाभावविशिष्टाया एव आलोकलिङ्गकानुमित्सायाः धूमलिङ्गकानुमितिविरोधित्वं वाच्य-

ध्याभाववति येन सम्बन्धेन हेतोरवृत्तित्वं गृह्यते तेन सम्बन्धेन पक्षधर्मताधीः कारणमिति नातिप्रसङ्गः। आकाशादेस्तथात्वेऽपि पक्षधर्मताज्ञानविरहान्नानुमितिः। निविशतां वा तेन साध्यसामानाधिकरण्यं वृत्तिमत्त्वं वा। अथ साध्याभाववदवृत्तित्वं तदवृत्तिभिन्नत्वादिरूपं व्यभिचारज्ञानविरोधिज्ञानविषयत्वेनानुगमनीयं तच्च व्यापकसामानाधिकरण्यसाधारणमिति चेत्। स्यादेवं यदि

म, तथा च पर्वतधर्मिकवन्ह्यनुमितिसामान्यं प्रति धूमालोकभस्मादिप्रत्येकलिङ्गकपरामर्शाभावविशिष्टधूमालोकभस्मादिप्रत्येकलिङ्गकानुमित्यात्वेन प्रतिबन्धकत्वमेव सम्यक् इति धूमलिङ्गकत्वस्य कार्य्यतानवच्छेदकत्वात् तदवच्छिन्नस्य आपादनमेव दुर्घटमिति। तच्चिन्त्यम्। ननु व्यापकसामानाधिकरण्यव्याप्तेः प्रयोजकत्वे तत्र हेतोर्यादृशः सम्बन्धः प्रविष्टः तेन पक्षधर्मताज्ञानात् तत्र साध्यस्य यादृशः सम्बन्धो निविष्टः तेनैव पक्षे साध्यस्यानुमितिः, तथैव हेतुत्वकल्पनात् त्वन्मते त्वनियमः स्यात् अत आह यत्सम्बन्धेति। नातिप्रसङ्गः। नैकसम्बन्धेन निरुक्तव्याप्त्यादिग्रहात् अपरसम्बन्धेन साध्यानुमितिप्रसङ्गः। ननु यदि उक्तप्रकारिकैव व्याप्तिः तदा गगनादौ तत्प्रमातोऽपि व्याप्तिग्रहाधीनं फलं स्यात् इत्याशङ्क्य फलं यदि अनुमितिः तदा कारणान्तरविलम्बादेव न तत्सम्भव इत्याह आकाशादेरिति। पक्षधर्मतेति। अत्र आकाशस्य तत्त्वेन पक्षधर्मत्वाग्रहेऽपि साध्याभाववदवृत्तित्वेन पक्षधर्मत्वग्रहसम्भवात् अयुक्तमेतत्। साधनविशेषान्तर्भावेण व्याप्तिग्रहस्य हेतुतायाः साधनभेदेऽपि इत्यादिना परित्यक्तत्वादिति चिन्त्यम्। व्याप्यव्यवहारस्य फलत्वे तु आह निविशतामिति। तथा च साध्यसामानाधिकरण्यविशिष्टमेव तत् व्याप्यताव्यवहारौपयिकम् अतो न गगनादौ वन्ह्यादिव्याप्यताव्यवहार इति भावः। लाघवादाह वृत्तिमत्त्वं वेति। साध्याभाववति येन सम्बन्धेन अवृत्तित्वं तेनैव वृत्तिमत्त्वं बोध्यम्। तेन समवायादिना वृत्तिमति द्रव्यत्वादौ संयोगादिना न वन्ह्यादि-

व्यापकताज्ञानं व्यभिचारबुद्धिं विरुन्ध्यात्, न चैवम्, वन्ह्यभाववद्वृत्तिर्धूम इति ज्ञाने हि वन्हित्वं स्वरूपेण प्रतियोगित्वं तदवच्छेदकत्वञ्च सम्बन्धमर्य्यादया भासते धूमसमानाधिकरणाभावप्रतियोगितानवच्छेदकं वन्हित्वमिह तत्र च वन्हित्वत्वेन वन्हित्वे प्रतियोगितात्वविशिष्टतदवच्छेदकत्वत्वाविशिष्टाभाव इति विषयविरोधविरहात्। विशिष्टस्य वन्हित्वस्यावच्छेदकत्वेन प्रकारान्तरानुसरणे

व्याप्यत्वव्यवहारः। अत्र एवं सति घटत्वादेः साध्यतायां पर्य्याप्तिसम्बन्धेन घटपटोभयत्वादेर्व्याप्यत्वं स्यात्, पूर्वकल्पे तु तादृशसम्बन्धेन साध्यसामानाधिकरण्य विरहादेव व्याप्यत्वासम्भवात् तस्मात् वाकारोऽनाश्वायामिति तत्त्वम्। शङ्कते अथेति। भिन्नत्वादीत्यादिना साध्याभाववदवृत्तित्वात्यन्ताभावसङ्ग्रहः। व्यभिचारेति। व्यभिचारधीविरोधितावच्छेदकधर्मघटितत्वेनेत्यर्थः। तेन व्यापकतार्धियो विरोधिताखण्डकस्य यदीत्यादुत्तरग्रन्थस्य नासङ्गतिः। अनुगमनीयमिति। यद्यपि तादृशभिन्नत्वादिप्रकारकनिश्चयस्य शेखोत्तरानुमितित्वावच्छिन्नं प्रत्येव हेतुत्वात् अननुगमेऽपि न क्षतिः, तथापि अत्यन्तान्योन्याभावगर्भमन्तर्भाव्य कारणताद्वयकल्पनामपेक्ष्य लाघवात् साध्यव्यभिचारधीविरोधिधीविषयप्रकारकपक्षधर्मतानिश्चयत्वेन तादृशानुमितित्वावच्छिन्नं प्रति एकमेव कारणत्वं युक्तमित्याशयेनेदम्। तच्च तादृशज्ञानविषयत्वञ्च। न चैवमिति च्छेदः। वन्ह्यभावेत्यादिविषयविरोधविरहादित्यन्तम् अविरोधित्वे हेतुः। स्वरूपेण धर्मान्तराविशेष्यत्वेन भासत इत्यन्वयः। तदवच्छेदकत्वञ्चेति। वन्हित्वस्यावच्छेदकत्वञ्चेत्यर्थः। निर्वन्हित्वबुद्धौ वन्हित्वावच्छिन्नप्रतियोगितात्वेन संसर्गतायां तेषामनुप्रवेशादिति भावः। तदवच्छेदकत्वत्वेति। प्रतियोगितावच्छेदकत्वत्वेत्यर्थः। विषयविरोधविरहादिति। समानप्रकारताकबुद्धेरेव प्रतिबन्धकत्वादिति भावः। विशिष्टस्य महानसीयत्वादिविशिष्टस्य। प्रकारान्तरेति। हेतुमन्निष्ठाभावप्रतियोगितात्वावच्छेदेन यादृशधर्मावच्छेद्यत्वाभावः तादृशधर्मावच्छिन्नसामानाधिकरण्यं

च सुतराम् । मणिमन्त्रादिन्यायेन च प्रतिबन्धकतायां मानाभा-

व्याप्तिरित्यनुसरणे चेत्यर्थः, न तु हेतुमन्निष्ठाभावप्रतियोगितावच्छेदकतापर्य्याप्त्यधिकरणान्यत्वानुसरणे इत्यर्थः । तथा सति महानसीयवन्हिमान् धूमात् इत्यादौ महानसीयत्ववन्हित्वोभयोरेव तादृशावच्छेदकत्वपर्य्याप्त्यधिकरणतया तदुभयभिन्नेन महानसीयत्वविशिष्टवन्हित्वप्रकारेण धूमादिव्यापकतायाः दुरुद्धरत्वापत्तेः । महानसीयवन्हित्वावच्छिन्नाभावस्यापि वन्हित्वावच्छिन्नाभावतया तद्धद्वृत्तित्वज्ञानस्यापि व्यापकताज्ञानप्रतिबन्धकत्वापत्त्या वन्हित्वपर्य्याप्तावच्छेदकताकवन्हिनिष्ठप्रतियोगिताकाभाववद्वृत्तित्वस्यैव व्यभिचारतया तज्ज्ञानस्य विषयविरोधसम्भवाच्चेति ध्येयम् । यद्वा प्रकारान्तरानुसरणे इत्यस्य साध्यतावच्छेदकतादितरोभयानवच्छेद्या या हेतुमन्निष्ठाभावप्रतियोगिता तदनवच्छेदकत्वस्य निवेश इत्यर्थः । निर्वन्हिवृत्तिर्धूम इत्यादिव्यभिचारज्ञाने वन्हित्वान्यधर्मानवच्छिन्नप्रतियोगितात्वेनैव प्रतियोगितायाः संसर्गतया भानसम्भवात् इति भावः । सुतरामिति । विषयविरोधविरहादिति पूर्वेणान्वयः । धूमवन्निष्ठाभावप्रतियोगितात्वावच्छेदेन वन्हित्वावच्छेद्यत्वाभाववुद्धौ निरुक्तप्रतियोगिताधर्मिकवन्हित्वाद्यवच्छेद्यत्वग्रहस्यैव विरोधित्वादिति भावः । के चित्तु प्रकारान्तरेति, हेतुमन्निष्ठाभावप्रतियोगितावच्छेदकतापर्य्याप्त्यधिकरणघटितान्यत्वाद्यनुसरण इत्यर्थः । सुतरामिति, निर्वन्हिवृत्तिर्धूम इत्यादिप्रतीतौ वन्हित्वान्यधर्मानवच्छिन्नप्रतियोगितात्वेनैव संसर्गतया वन्हित्वादौ अवच्छेदकतापर्य्याप्तेरप्रवेशादित्यभिप्राय इत्याहुः । तच्चिन्त्यम् । मणिमन्त्रादिन्यायः स्वातन्त्र्यम् । मानाभावादिति । इदमुपलक्षणम् । निरुक्तव्यभिचारधीविरोधिधीविषयत्वस्य साध्याभाववदवृत्तित्वविशिष्टहेतुकालीनत्वादौ अतिप्रसक्तत्वात् यत्प्रकारकनिश्चयत्वेन व्यभिचारधीविरोधित्वं तत्प्रकारकपक्षधर्मतानिश्चयत्वेनैव हेतुत्वं वाच्यम्, न चेदं व्यापकसामानाधिकरण्येऽप्यस्ति, व्यभिचारबुद्धिं प्रति व्यापकतानिश्चयत्वेन विरोधित्वस्य आवश्यकतया व्यापकसामानाधिकरण्यनिश्चयत्वेनापि तथात्वे मानाभावादित्यपि द्रष्टव्यम्।

वात् । व्यापकताज्ञानादेवानुमितिरिति च नानुभविकं न वा यौक्तिकम्, ज्ञानत्वत्वादिना ज्ञानत्वादेर्व्यापकतावच्छेदकत्वग्रहे ज्ञानादिमानिवानुमितेरयोगात् । अन्यथा जातित्वेनानुभवत्वव्यापक-

---

वस्तुतः साध्याभाववद्वृत्तित्वात्यन्ताभावबोधस्य अनुमितिहेतुत्वं न तु साध्याभाववद्वृत्तिभिन्नत्वज्ञानस्य तथात्वम् । साध्याभाववद्वृत्तित्ववतां धर्मिणां कारणतावच्छेदकेऽनुप्रवेशे गौरवात् । अत एव साध्यवदन्यावृत्तित्वस्यापि ज्ञानं न हेतुः । साध्यवतां धर्मिणां प्रवेशेन साध्याभाववद्वृत्तित्वाभावापेक्षया गुरुत्वात् इत्यनुगम एव नोचित इति ध्येयम्।ननु यत्र साध्याभावाद्यनुपस्थितावपि व्यापकतागोचरज्ञानादेवानुमितिः तत्र व्यभिचारात् साध्याभाववद्वृत्तित्वज्ञानस्य हेतुत्वं सम्भवत्येव नेत्यत आह व्यापकतेति । कलशकारणं विना कार्य्योत्पत्त्यसम्भवात् एतादृशस्थल एव मानाभाव इति भावः । यत्तु ननु व्यापकसामानाधिकरण्यस्य गुरुत्वेऽपि लघोर्व्यापकत्वधियः कारणतायां बाधकाभावात् केवलान्वयिखण्डनं दुर्घटमित्याशङ्क्य व्यापकतेत्यादिग्रन्थावतारणम्।तच्चुच्छम् । व्यापकत्वस्य साधनभेदाज्ञानात्वेन तदपेक्षया साध्याभाववद्वृत्तित्वे लाघवस्य प्रागेव दर्शितत्वेन सन्दर्भविरोधापत्तेः।व्यापकतावगाहिज्ञानस्य हेतुत्वेसाधकाभावमुक्ता बाधकमप्याह न वा यौक्तिकमिति।अयोगादितियद्रूपावच्छिन्ने व्यापकतावच्छेदकत्वधीः तद्रूपावच्छिन्नप्रकारेणैव साध्यस्यानुमितेस्त्वयापि वाच्यत्वादित्याशयः । अत एवाह अन्यथेतियद्रूपावच्छिन्ने व्यापकतावच्छेदकत्वं गृह्यते।तद्रूपावच्छिन्नप्रकारेणापि साध्यस्यानुमितौ भाने इत्यर्थः।ननु तन्मात्रवृत्तिधर्मावच्छिन्नविशेष्यकव्यापकतावच्छेदकत्वग्रहस्य स्वरूपतस्तद्रूपावच्छिन्नविधेयकानुमितिहेतुत्वात् जातित्वेन व्यापकतावच्छेदकत्वग्रहात् न ज्ञानवान् इत्यनुमितिर्भविता जातित्वस्य ज्ञानत्वमात्रावृत्तित्वात् किन्तु ज्ञानत्वं व्यापकतावच्छेदकम् इत्याकारकग्रहादेव इत्यत आह अनुभवत्वेति । अनुभवत्वव्यापकजातित्वं सत्तादौ गुणत्वव्याप्यजातित्वञ्च रूपत्वादौ अतिप्रसक्तम् अतो जातित्वस्य ज्ञानत्वमात्रवृत्तित्वरक्षार्थं विशेषण-

गुणत्वव्याप्यजातित्वादिना वा तथात्वग्रहेऽपि तत्प्रसङ्गात् । एतेन केवलान्वयिसाध्यकत्वज्ञानमेवाऽनुमितिहेतुरित्यपि परास्तम् । सर्व-

---

द्वयम् । तथात्वग्रहे व्यापकतावच्छेदकत्वग्रहे । तत्प्रसङ्गादिति । ज्ञानवान् इत्यनुमितिप्रसङ्गादित्यर्थः । यद्यपि स्वरूपतस्तद्धर्मविशेष्यकं व्यापकतावच्छेदकत्वज्ञानं स्वरूपतस्तद्धर्मावच्छिन्नविधेयकानुमितौ कारणं ज्ञानत्वत्वावच्छिन्नधर्मिकञ्च व्यापकतावच्छेदकत्वज्ञानं ज्ञानत्वत्वविशिष्टज्ञानत्वावच्छिन्नविधेयताकानुमितौ हेतुरित्युक्तौ न दोषः । न च एवं ज्ञानत्वत्वेन व्यापकतानवच्छेदकत्वग्रहदशायामपि ज्ञानवान् इत्यनुमितिप्रसङ्गः स्वरूपतो ज्ञानत्वधर्मिकव्यापकतावच्छेदकत्वग्रहस्य तदानीमपि सम्भवादिति वाच्यम् । त्वन्मते निर्धन्हिवृत्तिर्धूम इत्याकारकव्यभिचारधियः सत्त्वेऽपि वन्ह्यभाववद्वृत्तिमान् पर्वत इत्याकारकज्ञानदशायामिव अस्माकमपि उक्तज्ञानदशायामनुमितेरिष्टत्वात् । ज्ञानत्वत्वावच्छिन्नधर्मिकव्यापकतानवच्छेदकत्वग्रहस्य तु ज्ञानत्वत्वविशिष्टज्ञानत्वावच्छिन्नविधेयताकानुमितावेव विरोधित्वसम्भवात् । तथापि व्यापकताज्ञानस्य हेतुत्वे चैत्रीयज्ञानवान् महानसीयवन्हिमान् इत्याद्यनुमित्यनुपपत्तिः । चैत्रीयज्ञानत्वादेरखण्डत्वाभावेन स्वरूपतस्तद्विशेष्यकव्यापकतावच्छेदकत्वज्ञानसम्भवात् चैत्रीयज्ञानत्वत्वेन व्यापकतावच्छेदकत्वग्रहे चैत्रीयज्ञानत्ववद्वान् इत्येवानुमितिप्रसङ्गादिति ध्येयम् । यादृशरूपावच्छिन्नाधिकरणतात्वे हेतुव्यापकतावच्छेदकत्वधीः तादृशरूपावच्छिन्नविधेयताकैव अनुमितिः फलम् अतो न कोऽपि दोषः । प्रतियोगिवैयधिकरण्यस्य व्यापकतायां निवेशमपेक्ष्य साध्याधिकरणतायास्तदघटितहेतुव्यापकत्वस्य व्याप्तौ प्रवेशेन लाघवादित्यपि वदन्ति । एतेनेति । एकरूपेण केवलान्वयित्वग्रहात् अन्यरूपेण अनुमित्युत्पत्तौ अतिप्रसङ्गेन इत्यर्थः । ननु गगनाभावत्वत्वादिना केवलान्वयित्वग्रहः ; गगनाभावत्वादिप्रकारेण अनुमितौ हेतुर्वाच्यः गगनाभावत्वत्वविशिष्टगगनाभावत्वप्रकारेण अनुमितौ गगनाभावत्वत्वाश्रयत्वप्रकारेणैव केवलान्वयित्वग्रहस्य हेतुत्वात् नैकदा अवच्छिन्नानवच्छिन्नगगनाभावत्वप्रकारताकानुमितिप्रसङ्ग इति यदि

जनानुभवसिद्धानुमितिभावे धूमादिदर्शनानन्तरं जायमाने गृह्यमाणव्यतिरेकवन्ह्यादिज्ञानेऽसम्भवाच्च । प्रमेयत्वादेश्च घटादिवृत्तित्वं केवलान्वयित्वेन कथञ्चित्तदवृत्तिधर्मव्यापकत्वेन वानुमेयं न ज्ञेयत्वादिहेतुका तदनुमितिरानुभविकी ।

ब्रूयात् तदाप्याह सर्वजनेति । गृह्यमाणव्यतिरेकेति तदानीं केवलान्वयित्वाग्रहसम्पत्तये, तत एव तत्रानुमितिसम्भवादिति भावः । ननु एवं प्रमेयत्वादेरभावाप्रतियोगित्वग्रहदशायां घटादौ तद्वैशिष्ट्यावगाह्यनुमितिर्न स्यात् कारणबाधात् अत आह प्रमेयत्वादेश्चेति । तथा च तदानीं प्रमेयत्वादिसाध्यकानुमितिरसिद्धैवेति भावः । ज्ञेयत्वादौ घटादिवृत्तित्वाग्रहदशायां सहचाराग्रहासम्भवात् केवलान्वयित्वेन घटादिवृत्तित्वानुमानासम्भवादाह कथञ्चिदिति । तथा च तदवृत्तियत्किञ्चिद्धर्मव्यापकत्वेन समं साध्यस्य सहचारो जात्यन्यत्वादावेव सुलभ इति तदवृत्तिधर्मत्वावच्छिन्नव्यापकत्वस्य हेतुत्वे तद्दोषतादवस्थ्यमतः कथञ्चिदित्युक्तम् । के चित्तु तदवृत्तिधर्मव्यापकत्वं तन्मात्रवृत्तिधर्मव्यापकत्वम् अन्यथा केवलान्वयन्तरे घटादिवृत्तित्वाग्रहदशायां सहचाराज्ञानाभावात् तद्दोषतादवस्थ्यम्, तथा च हेतुग्रहदशायां साध्यस्यापि प्रायशो ग्रहसम्भवात् सिद्धसाधनम् अतः कथञ्चिदित्युक्तम् । तथा च तदवृत्तित्वाग्रहदशायामेव अनुमितिरिति भाव इत्याहुः । तदनुमितिः प्रमेयत्वसाध्यकानुमितिः । अत्रेदमवधेयम्-व्यापकसामानाधिकरण्यस्य हेतुत्वेऽपि वाच्यत्वस्य व्यतिरेकित्वभ्रमदशायां तदभाववदवृत्तित्वस्य ग्रहात् तत्साध्यकानुमितिसम्भवेन केवलान्वयिसाध्यकानुमितिखण्डनं दुर्घटं तार्किकैरन्यथाख्यात्यभ्युपगमात् । न च वाच्यत्वादेः केवलान्वयित्वग्रहदशायां वाच्यत्वाभाववदवृत्तित्वग्रहासम्भवात् तदानीं वाच्यत्वाद्यनुमित्यनुत्पाद एव केवलान्वयिखण्डनस्यार्थ इति वाच्यम् । भिन्नप्रकारकज्ञानस्य अविरोधितया साध्ये वृत्तिमदभावप्रतियोगित्वरूपकेवलान्वयित्वस्य ग्रहे सत्यपि प्रतियोगितासंसर्गेण अभावे साध्यवैशिष्ट्यावगाहिनः साध्याभाव-

यदवृत्तिर्हेतुरित्याकारकज्ञानस्य उत्पत्तौ बाधकाभावात्, न च अभावे धर्मिणि साध्यतावच्छेदकावच्छिन्नप्रतियोगित्वसंसर्गेण साध्यीयत्वाभावग्रहदशायां साध्याभाववदवृत्तित्वग्रहासम्भवात् तदानीं वाच्यत्वाद्यनुमित्यनुत्पाद एव केवलान्वयिखण्डनशब्दार्थ इति साम्प्रतम् । अभावत्वसामानाधिकरण्येन तादृशाभावग्रहेऽपि अभावधर्मिकस्य तादृशप्रतियोगितासम्बन्धेन साध्यीयत्वग्रहस्य सम्भवात् अभावत्वावच्छेदेन तादृशसाध्यीयत्वाभावग्रहस्य च प्रमात्मकस्य दुर्घटत्वात् संयोगादिसम्बन्धेन वाच्यत्वाद्यभाव एव तादृशसाध्यीयत्वाभावस्य असत्त्वात् । वस्तुतस्तु अभावत्वविषयतामनन्तर्भाव्य साध्यतावच्छेदकावच्छिन्नप्रतियोगितासंसर्गेण यः साध्यीयस्तद्वदवृत्तित्वज्ञानमेव लाघवात् कारणमित्यभावत्वावच्छेदेन प्रतियोगितासम्बन्धेन साध्यीयत्वाभावभ्रमे सत्यपि तादृशज्ञानोत्पत्तौ बाधकाभावः धर्मितावच्छेदकविशेषान्तर्भावेणैव बाधबुद्धेर्विरोधित्वात् । यत्तु साध्यतावच्छेदकधर्मेण साध्यतावच्छेदकसम्बन्धेन च अवच्छिन्नं यत् प्रतियोगित्वमखण्डं तत्सम्बन्धेन अभावे साध्यवैशिष्ट्यावगाहिन एव साध्याभाववदवृत्तित्वज्ञानस्य अनुमितिहेतुत्वं लाघवात् न तु साध्यतावच्छेदकधर्मावच्छेद्यत्वं प्रतियोगित्वञ्च विशेष्यविशेषणभावापन्नमवगाहमानस्य साध्याभाववदवृत्तित्वज्ञानस्य तथात्वं गौरवात् । तथा च स्वरूपसम्बन्धेन वाच्यत्वत्वाद्यवच्छिन्नप्रतियोगिताव्यक्तेरलीकतया तत्सम्बन्धेन अभावे वाच्यत्ववैशिष्ट्यावगाहिवाच्यत्वाद्यभाववदवृत्ति ज्ञेयत्वमित्याकारकज्ञानस्यापि अलीकत्वम्, असतः संसर्गस्यापि ख्यातिनिरासात् अतः कारणस्यैव बाधात् केवलान्वयिसाध्यकानुमानस्य खण्डनमिति । तन्न । घटादिपक्षकवाच्यत्वाद्यनुमितेरानुभविकत्वेन वाच्यत्वत्वाद्यवच्छिन्नत्वं प्रतियोगित्वे प्रतियोगित्वञ्च अभावांशे संसर्गमर्य्यादया विषयीकुर्वाणस्यैव वाच्यत्वाभाववदवृत्तित्वज्ञानस्य अन्यथाख्यातिरूपस्य तत्र हेतुत्वसम्भवेन कारणबाधस्य असम्भवात् । साध्यादिभेदेन अनुमितिव्याप्तिज्ञानयोः कार्य्यकारणभावभेदात् वन्ह्याद्यनुमितौ वन्हित्वाद्यवच्छिन्नाखण्डप्रतियोगितासम्बन्धेन वन्हीयाभाववदवृत्तित्वज्ञानत्वेनैव हेतुतालाघवस्य वाच्यत्वादिसाध्यकस्थले अकिञ्चित्करत्वात् । तस्मात् केवलान्वयिनो वाच्यत्वादेः साध्यविषयानुमि-

एवं साध्याभावव्यापकाभावप्रतियोगित्वमपि नानुमित्यौपयिकं गौरवात् व्यभिचारज्ञानाविरोधित्वाच्च । वन्ह्यभावसमानाधिकरणाभावप्रतियोगी धूमाभाव इति ज्ञानं धूमाभावाभावत्वेन तत्र वन्ह्यभावसामानाधिकरण्यबुद्धिं कदाचिद्विरुन्ध्यात् न तु धूमत्वेन, भिन्नप्रकारकत्वात् । व्यति-

---

त्यनुभवाभाव एव केवलान्वयिखण्डनपदार्थः । तदुक्तं दीधितिकारैः न तु ज्ञेयत्वादिहेतुका तदनुमितिरानुभविकीति । एतेन साध्यादिभेदेन व्याप्तिज्ञानानुमित्योः कार्य्यकारणभावभेदात् वन्हिविधेयकानुमितौ वन्ह्यभाववदवृत्तित्वज्ञानस्य हेतुत्वेऽपि ज्ञेयत्वादिलिङ्गकवाच्यत्वादिसाध्यकानुमितौ ज्ञेयत्वादिव्यापकवाच्यत्वादिसामानाधिकरण्यधियः कारणत्वे बाधकाभावः, कार्य्यकारणभावान्तरापत्तिभिया तदुपेक्षणे द्रव्यत्वादेरपि अनुमितिर्न स्यात्, द्रव्यत्वादिविधेयकानुमितिं प्रति द्रव्यत्वाद्यभाववदवृत्तित्वज्ञानस्य कारणतान्तरकल्पनायां गौरवात् इत्यस्यापि सुवचत्वात् इत्यपि निरस्तम् । द्रव्यत्वादिविधेयकानुमितेरानुभविकत्वेन तत्र कारणान्तरकल्पनस्य प्रामाणिकत्वात् । वाच्यत्वादिविधेयकानुमितेस्तु निष्प्रामाणिकत्वात् तत्र विशेषतोऽपि व्यापकसामानाधिकरण्यधियः कारणत्वस्य उन्मत्तमात्रकल्प्यत्वात् । अन्यथा निर्वन्हिधर्मिकवन्हिविधेयकानुमितिमपि अङ्गीकृत्य तत्रापि निर्वन्हिधर्मिकवन्हिव्याप्यधूमवत्तादिपरामर्शस्य हेतुतायाः कल्पनापत्तेरिति दिक् ।

केवलान्वयिनं निरस्य केवलव्यतिरेकिणं निरस्यति एवमिति । गौरवादित्यस्य साध्याभाववदवृत्तित्वज्ञानापेक्षया इत्यादिः । ननु साध्यवदन्यावृत्तित्वज्ञानस्येव व्यतिरेकव्याप्तिग्रहस्यापि व्यभिचारधीविरोधित्वेन अनुमितिहेतुत्वं साधनीयम् अत आह व्यभिचारेति । अविरोधं व्युत्पादयति वन्ह्यभावेति । वन्ह्यभाववति धूमाभावो नास्तीति धीः अभावे धूमाभावप्रतियोगिकत्वावगाहिनी धूमाभावेऽपि वन्ह्यभाववदवृत्त्यभावप्रतियोगित्वमवगाहते इति तस्या एव विरोधिविषयकत्वमात्रेण व्यतिरेकव्याप्तिग्रहे कदाचित् प्रतिब-

रेकव्याप्तिग्रहाधीना च धीर्नानुमितिस्तत्त्वेनाननुभवात् कल्पन-कारणाभावात् सामग्रीभेदकल्पनायाश्चानुभवैकाधीनत्वात् । किन्तु विजातीया । तत्करणमपि प्रमाणान्तरमर्थापत्तिरेव । कल्पनप्रमाण-द्वयसमाहारसमशीलञ्च युगपदन्वयव्यतिरेकिधर्मद्वयप्रतिसन्धानम् । अथ निर्णीते विना सिद्धीच्छामर्थापत्तेरनुत्पादात् पक्षताजन्यत्वात्

न्धकत्वमुचितम् । वस्तुतस्तु तदप्ययुक्तम्, संसर्गविधया प्रतियोगि-त्वग्रहे प्रतियोगित्वाभावप्रकारिकाया व्यतिरेकव्याप्तिधियो विरो-धित्वासम्भवात् । वन्ह्यभाववति धूम इत्येवं व्यभिचारग्रहे तु व्य-तिरेकव्याप्तिग्रहस्य विरोधित्वं सुदूरपराहतम् । वस्तुगत्या धूमाभा-वाभावात्मकस्य धूमस्य विषयत्वेऽपि धूमाभावाभावत्वेन अप्रकार-त्वादित्याखण्डनार्थः । ननु व्यतिरेकव्याप्तिग्रहोत्तरं जायमानबुद्धेः प्रत्यक्षादिभिन्नानुभवत्वेन अनुमितित्वसिद्धौ अनायत्या व्यतिरेक-व्याप्तिज्ञानस्य हेतुत्वं सेत्स्यतीति अतस्तत्रैव बाधकमाह व्यतिरेके-त्यादि । तत्त्वेन अनुमितित्वेन । क्रमिकानुमितिव्यक्तिपूर्वपूर्वानुमितौ परमते स्वमतेऽपि प्रवृत्तिजनकानुमितौ च व्यभिचारात् हेत्वन्तरमाह कल्पनेति । सामग्रीति । क्व चित् साध्याभाववदवृत्तित्वज्ञानं क्व चित् व्यतिरेकव्याप्तेर्ज्ञानं हेतुरित्येवं कल्पनायाः फली-भूतज्ञाने अनुमितित्वानुभवाधीनत्वात् तस्य च प्रकृते अभावा-दिति भावः । विजातीयेति । धीरित्यनुषज्यते । वैजात्यम् अ-र्थापयामि नानुमिनोमि इत्यनुभवादेव सिद्धम् । व्यतिरेकव्याप्तिग्रह-स्य जन्यतावच्छेदकत्वेनैव तत्सिद्धिः प्रत्यक्षादिभिन्नानुभवत्वस्य तथात्वे गौरवादित्यपि वदन्ति । नन्वेवं साध्याभाववदवृत्तित्वस्य व्यतिरेकव्याप्तेश्च युगपत् परामर्शे अनुमित्यर्थापत्त्योः सङ्करः स्यात् अत आह कल्पनमाणेति । तथा च प्रत्यक्षानुमित्योर्युगपत् सामग्री-समवधाने यथानुभवसिद्धं तदेकतरसामग्र्या अपरप्रतिबन्धकत्वं तथैव प्रकृतेऽपि वाच्यम् । यद्वा परैः ज्ञानद्वययौगपद्यस्य अङ्गीका-रात् विजातीयज्ञानद्वयमेव तत्र उत्पद्यते इत्याशयः । नातः प्रतिब-ध्यप्रतिबन्धकभावान्तरकल्पनागौरवमपीति भावः ।

साध्यनुमितिर्लाघवेन पक्षताजन्यत्वस्यैवानुमितित्वे प्रयोजकत्वात् । न चैवं पक्षताप्रत्यक्षस्यापि तथात्वापत्तिः, इच्छासत्त्वेऽपि कालान्तरे प्रदेशान्तरे वा तद्विरहसत्त्वेनैककालीनत्वाद्यतीन्द्रियघटितप्रतियोगित्वेन तस्या अतीन्द्रियत्वादिति चेन्न । अनुमितावेव पक्षतायाः हेतुत्वस्य निरस्तत्वात् साध्यादिभेदेनाननुगतत्वात् तज्जन्यत्वस्याऽप्रयोजकत्वाच्च । प्रयोजकत्वञ्च न जनकत्वमसम्भवात् न

तत्रानुमितित्वमाशङ्क्य अथेति । निर्णीत इति । सिद्धिसत्त्व इत्यर्थः । अनुत्पादादिति पक्षताजन्यत्वे हेतुः । सापि अर्थापत्तिरपि । लाघवेनेति । अन्वयपरामर्शसहितपक्षताजन्यत्वापेक्षया इत्यादिः । एवं पक्षताजन्यत्वमात्रस्य प्रयोजकत्वे । समवायसम्बन्धावच्छिन्नस्यैव पक्षताजन्यत्वस्य प्रयोजकत्वोक्त्या पक्षताजन्यत्वस्य वारणसम्भवेऽपि वस्तुगतिमनुरुध्य समाधत्ते इच्छासत्त्वेऽपीति । देशान्तरे इच्छाशून्यात्मनि । तस्याः पक्षतायाः । निरस्तत्वादिति । प्रमाणाभावेनेत्यादिः । तथा च दृष्टान्तासिद्धिरिति भावः । ननु सिद्धिकालीनायाः प्रत्यक्षादिसामग्र्यास्तद्व्यक्तित्वेन अनुमितौ प्रतिबन्धकत्वकल्पनापेक्षया लाघवादेव सिद्ध्यभावरूपपक्षतायास्तद्धेतुत्वं सेत्स्यतीति अत आह साध्यादीति । आदिना सिषाधयिषोपग्रहः तथा च साध्यादिभेदादिव अनुमितित्वार्थापत्तित्वादिप्रकारकसिषाधयिषाया भेदादपि पक्षताभेदात् अनुमितित्वादिप्रकारकेच्छाविरहघटितपक्षताजन्यत्वं यदि प्रयोजकं तदा हेत्वभावादर्थापत्तौ स्वरूपासिद्धिः, अर्थापत्तित्वादिप्रकारकेच्छाविरहघटितजन्यत्वस्य प्रयोजकत्वे च अनुमितौ दृष्टान्तासिद्धिरिति भावः । ननु प्रत्यक्षाद्यतिरिक्तसाध्यज्ञानत्वप्रकारकेच्छाविरहविशिष्टसिद्धित्वघटितधर्मावच्छिन्नाभावत्वेन निरुक्तपक्षताद्वयमनुगमय्य तज्जन्यत्वमेव अनुमितित्वे प्रयोजकं वाच्यम् अतो नोक्तदोष इत्यतः प्रयोजकत्वपदार्थं वितर्क्य दूषयति प्रयोजकत्वञ्चेति । वस्तुतोऽर्थापत्तित्वावच्छेदेन तत्सामानाधिकरण्येन वा अनुमितित्वस्य साधने पक्षताजन्यत्वं प्रयोजकम्, तत्र नाद्य इत्याह साध्यादीति, तथा च भागासिद्धिरिति,

व्याप्यत्वं मानाभावादित्यादेरसकृदावेदितत्वाच्च । एतेन व्याप्ति-ज्ञानादिजन्यत्वमनुमितित्वे प्रयोजकमित्यपि परास्तम् । साध्याभाव-व्यापकाभावप्रतियोगिधर्मत्वेन साध्यव्याप्यत्वानुमानात् प्रसिद्ध-साध्यकैवानुमितिरित्यपि के चित् । अथ वन्ह्याद्यभाववति धूमादेः समवायेन तन्तुत्वाद्यभाववति च पटादेः संयोगेन वर्त्तमानत्वात् साध्याभाववति संयोगेन समवायादिना वर्त्तमानत्वस्य विशि-ष्यैवाभावो वाच्यः तथा च जलं जातिमत् गुणवत्त्वात् गुणवच्च घटादेरित्यादिकं विलीयेत जातिगुणाभाववतोः समवेतत्वसंयोगि-

---

द्वितीये तु आह प्रयोजकत्वञ्चेत्यादीति, युक्तमुत्पश्यामः।प्राञ्चस्तु सा-ध्यादीत्यादिपदेन पक्षाद्युपग्रहः। तेन साध्यपक्षभेदात् पक्षताया ना-नात्वात् न तज्जन्यता अनुमितित्वप्रयोजिका समव्याप्तस्यैव प्रयोज-कत्वस्थितेरित्याशयः। ननु व्याप्यमात्रे प्रयोजकत्वमास्थेयं तत्तत्प-क्षसाध्यकानुमितित्वे वा तत्तत्पक्षसाध्यकपक्षताजन्यत्वं प्रयोजकं वाच्यम् इत्यत उक्तं प्रयोजकत्वञ्चेतीत्यप्याहुःअसम्भवादिति । अनु-मितित्वजातेर्नित्यत्वादिति भावः । इत्यादेरित्यादिपदेन व्यापकत्वमि-त्यादेः सूचनम्।एतेन उक्तदिशा प्रयोजकत्वस्य निरस्तत्वेन।व्याप्तिज्ञा-नेति । अन्वयव्यतिरेकान्यतरव्याप्तयवगाहिज्ञानजन्यत्वमित्यर्थः । ते-न न व्याप्तयननुगमनिबन्धनः स्वरूपासिद्ध्यादिः । अर्थापत्तामीत्य-नुभवस्य व्यतिरेकिपरामर्शप्रयोज्यानुमितित्वावगाहित्वमङ्गीकुर्वतां व्यतिरेकव्याप्तिस्थलेऽपि अनुमितिमेव क्षणविलम्बेन कल्पयतां सि-द्धान्तिनां मतमाह साध्यभावेत्यादि । साध्यव्याप्यत्वस्य वृत्तिम-त्त्वगर्भत्वे गगनादौ व्यभिचारवारणार्थं धर्मपदम्, अन्यथा तु उपर-ञ्जकं तदूबोध्यम । जलादौ धूमव्यापकाभावप्रतियोगिजलत्वादिप-रामर्शात् अप्रसिद्धस्य धूमाद्यभावस्य अर्थापत्तौ उक्तगत्यसम्भवात् प्रसिद्धसाध्यकैव इत्युक्तम् । स एवं क्षणविलम्ब एव केचिदित्यत्र अस्वरसः । समवायेनेति । वर्त्तमानत्वादित्यन्वयि । गुणवदिति । य-द्यपि जातिसाध्यक एव संयोगेन घटादिहेतौ अप्रसिद्धिः सम्भवति,

त्वयोरप्रसिद्धेरिति चेत्, उपदर्शयैनमपि केवलान्वयिनः सरणिं स्वीकुरु वा स्वाधिकरणावृत्तिसाध्याभावादिकत्वमेव व्याप्तिम्, स्वत्वा-

---

तथापि सम्बन्धविशेषेण वृत्तिमत्त्वमात्राप्रसिद्धिनिबन्धनानुमानविलयप्रदर्शनाय गुणवदिति साध्यान्तरमित्युक्तम्। पूर्वत्र तु समवेतत्वापेक्षया जातित्वस्य गुरुतया तदवच्छिन्नाभावस्य अप्रसिद्ध्यापि विलयसम्भवादिति द्रष्टव्यम्। उपदर्शयेति। तथा च तत्र जात्यादौ जलादिवृत्तित्वानुमानमेव प्रमात्मकव्याप्तिज्ञानादिति भावः। स्वाधिकरणेति। तथा च जात्यादिसामान्याभावस्य हेतुभूतगुणादिमद्वृत्तित्वात् नोक्तदोष इति भावः। ननु स्वाधिकरणावृत्तिसाध्याभावकत्वव्याप्तौ स्वाधिकरणवृत्तित्वं न सम्बन्धसामान्येन वक्तव्यम्, जातिमान् द्रव्यत्वात् इत्यादौ अव्याप्तेः द्रव्यत्ववति काले जात्यभावस्य कालिकसम्बन्धेन वृत्तेः। नापि विशेषणतया, घटभिन्नं द्रव्यत्वात् इत्यादौ अतिव्याप्तेः। साध्याभावस्य घटत्वादेर्विशेषणतया वृत्तित्वविरहात् अभावीयस्वरूपसम्बन्धेन भावस्य वृत्तौ मानाभावात्। घटत्वाभावो घटे नास्ति इति बुद्धेः कल्पितसमवायेनैव सम्भवात्। न चाभावत्वप्रतीतेः प्रमात्वानुरोधेन स्वमते अभावाभावस्य अतिरिक्तत्वात् न दोष इति वाच्यम्। तथापि घटत्वाभावस्य कालिकसम्बन्धावच्छिन्नाभावे साध्ये गगनत्वादिहेतौ अव्याप्तिप्रसङ्गात्। घटत्वाभावरूपस्य साध्याभावस्य विशेषणतया गगनवृत्तित्वात्। अत एव न प्रकृतसाध्यवत्ताबोधविरोधिनाघटकसम्बन्धेनापि अधिकरणवृत्तित्वनिवेशो युक्तः। कालिकसम्बन्धेन गगनवृत्तित्वाप्रसिद्ध्या कथितस्थल एव अव्याप्तितादवस्थ्यात्, सत्त्वाभाववत्ताबुद्धिविरोधिताघटकसमवायसम्बन्धेन जातिवृत्तित्वाप्रसिद्ध्या इदं सत्ताशून्यं जातित्वात् इत्यादौ अव्याप्तेश्च। किञ्च द्रव्यसामान्याभाववान् जातिसामान्याभाववान् वा घटसत्तान्यतरत्वात् इत्यादौ अतिव्याप्तिः। गगनाद्यात्मकस्य साध्याभावस्य हेत्वधिकरणावृत्तित्वात्। न च साध्याभावत्वावच्छेदेन स्वाधिकरणवृत्तित्वाभावो विवक्षितः। स्वाधिकरणत्वावच्छेदेन साध्यवत्त्वलक्षणव्यापकसाध्यसामानाधिकरण्य-

ननुगमस्य प्रागेव स्वहस्तितत्वादिति । एतेन नीलेतररूपवान् नीलासमवेतत्वे सति गोत्वादित्वादिकं विलीयेत, विशेष्यस्य व्यभिचारित्वात् विशिष्टस्य चानतिरिक्तत्वादिति परास्तम् । साध्या-

---

मपेक्ष्यापि गुरुत्वादिति चेन्न । उक्ताक्षरसेनैव साध्याभावकत्वादीत्यादिपदस्य उपन्यस्तत्वात् । तेन [साध्यवत्त्वप्रकारकप्रमाविशेष्यत्वसामान्याभावस्य] साध्याधिकरणत्वसामान्याभावस्य साध्यसमानाधिकरणसामान्याभावस्य वा लाभः । तथा च [स्वाधिकरणावृत्तिसाध्यवत्त्वप्रकारकप्रमाविशेष्यत्वसामान्याभावकत्वं] स्वाधिकरणावृत्तिसाध्याधिकरणतासामान्याभावकत्वं स्वाधिकरणावृत्तिसाध्यसमानाधिकरणसामान्याभावकत्वं वा पर्य्यवसितम् । तत्र स्वाधिकरणवृत्तित्वं साध्यासामानाधिकरण्यं तदवच्छिन्नाभावश्च विशेषणताविशेषेणैव वाच्यम् । अतो न कश्चिद्दोषः । साध्याभाववदवृत्त्यधिकरणतानिरूपकतावच्छेदकधर्मवत्त्वे तात्पर्य्यम् इत्यपि कश्चिदिति कृतं पल्लवितेन । [यत्तु सत्ताभाववान् जातित्वादित्यादौ साध्याभाववदवृत्तित्वज्ञानमेव हेतुः साधनभेदेन व्याप्त्यननुगमात् अत एव दीधितिकृता स्वीकृतं वा तत्रेत्युक्तम्, यत्र साध्याभाववदवृत्तित्वं तत्रेत्यर्थात्, तथा च यत्र यत्प्रसिद्धं तत्र तदभाव एव हेतुरिति । तन्न । एवमपि यत्राभावत्वविशिष्टघटाभावस्य कालिकसम्बन्धेनाभावे साध्ये आत्मत्वं हेतुस्तत्राभावत्वविशिष्टघटाभावस्य साध्यवत्ताग्रहविरोधितानियामकेन कालिकसम्बन्धेनाधिकरणे ध्वंसे हेतुतावच्छेदकसमवायेन वृत्तित्वस्य हेत्वधिकरणे कालिकसम्बन्धेन वृत्तित्वस्य चाऽप्रसिद्ध्या उभयथाप्यव्याप्तेः ।] ननु एवं स्वत्वप्रवेशे हेतुभेदात् अनन्तकार्य्यकारणभावापत्तिः अत आह स्वत्वेति । प्रागेव स्वव्यापकसाध्यसामानाधिकरण्यधियो हेतुत्वस्वीकारदशायामेव । स्वहस्तितत्वादित्यस्य भवद्भिरित्यादिः । अस्माभिस्तु हेतुमनन्तर्भाव्य साध्याभाववदवृत्तित्वज्ञानस्यैव हेतुत्वं स्वीक्रियते इति भावः । एतेन स्वाधिकरणावृत्तीत्यादिक्रमेणैव व्याख्यानेनिर्वचनेन । परास्तमित्यत्रेऽन्वयः । नीलरूपवान् नीलसमवेतत्वे

भावस्य विशिष्टहेत्वधिकरणावृत्तित्वात् परम्परासम्बन्धेन विशेषणविशेष्यसम्बन्धस्यैव वा तत्र हेतुत्वादिति॥

सति गोत्वात् इत्यस्यैव सम्यक्के साध्यसाधनकोटौ अभावप्रवेशो विफल इति चिन्तनीयम् । विशिष्टस्य गोत्वस्य । व्यभिचारित्वात् नीलगवादौ । विशिष्टहेत्विति परमते । स्वमते तु विशिष्टगोत्वादेः केवलान्वयिनः पथि प्रस्थाप्यत्वमेव इत्याशयेनाह परम्परेति । विशेष्यविशेषणयोः प्रत्येकाधिकरणताद्वयमेव विशिष्टवस्त्वप्रतीतेर्विषयः अत एव प्रत्येकाधिकरणत्वस्य अभावनिश्चयेऽपि न विशिष्टवस्त्वबुद्धिरिति प्राचां मते विशिष्टनिरूपिताधिकरणत्वाप्रसिद्धौ आह परम्परेत्यादीत्यपि वदन्ति । परम्परा च अत्र स्वाश्रयाधिकरणत्वम् अवच्छेदकत्वाख्यस्वरूपसम्बन्धो वा बोध्यः । तत्रेति । यत्र विशिष्टस्य व्याप्यत्वव्यवहारः तत्र विशेषणविशेष्यसम्बन्धस्यैव व्याप्यत्वग्रहादनुमितिरिति भावः॥

इति श्रीजगदीशतर्कालङ्कारकृता केवलान्वयनुमान
दीधितिटीका समाप्ता ।

चिन्तामणेः व्यतिरेक्यनुमानम् ।

केवलव्यतिरेकी त्वसत्सपक्षो यत्र व्यतिरेकसहचारेण व्याप्तिग्रहः । ननु व्यतिरेकी नानुमानं व्याप्तिपक्षधर्मताज्ञानस्य तत्कारणत्वात् अत्र व्यतिरेकसहचारात् तत्र व्याप्तिरन्वयस्य पक्षधर्मता । न च व्याप्तपक्षधर्मत्वं साध्याभावव्यापकाभावप्रतियोगिसत्त्वमुभयमप्यनुमितिप्रयोजकमिति वाच्यम् । अननुगमात् । न चान्यतरत्वं तथा, एकप्रमाणपरिशेषापत्तेः । न च तृ-

दीधित्याः व्यतिरेक्यनुमानम् ।

व्याप्तिग्रह इति साधारणोक्तिः । तव केवलान्वयिन्यभावा-

जागदीश्याः व्यतिरेक्यनुमानम् ।

ननु यत्र व्यतिरेकसहचारेण व्याप्तिग्रह इत्यत्र व्याप्तिपदस्य व्यतिरेकव्याप्तिमात्रपरत्वे व्यतिरेकसहचारेणेत्यस्य वैयर्थ्यम्, अन्वयव्याप्तिमात्रपरत्वे च नन्वित्याद्यग्रिमशङ्कानुत्थापनापत्तिः अत आह साधारणेति । तथा च व्याप्तिग्रहपदमनुमितिकारणज्ञानपरमतो ग्रन्थद्वयोपपत्तिरिति भावः।साधारणोक्तिरिति पाठे अन्वयव्यतिरे-

णारणिमणिन्यायेनानुमितिविशेषे तद्धेतुत्वमिति वाच्यम् । व्यतिरेकिसाध्येऽनुमितित्वासिद्धेः उभयसिद्धक्लृप्ततत्कारणस्याभावात् । न च साध्याभावव्यापकाभावप्रतियोगित्वमेवानुमितिप्रयोजकमिति वाच्यम् । गौरवात् केवलान्वयिन्यभावाच्च । अथ साध्याभावव्यापकाभावप्रतियोगित्वेन साध्यव्याप्यत्वमनुमेयम्, एवं व्यतिरेकव्याप्त्यान्वयव्याप्तिमनुमाय यत्रानुमितिः स एव व्यतिरेकीत्युच्यते । तन्न । अन्वयव्याप्तेर्गमकत्वे व्यतिरेकव्याप्त्युपन्यासस्यार्थान्तरतापत्तेः । अन्वयव्याप्त्यनुकूलतया च तदुपन्यासे अन्वयव्याप्तिमनुपन्यस्य तदुपन्यासस्याप्राप्तकालत्वमिति । उच्यते । निरुपाधिव्यतिरेकसहचारेणान्वयव्याप्तिरेव गृह्यते, प्रतियोग्यनुयोगि-

---

च्च साध्यव्याप्यत्वं तद्भिन्नावृत्तित्वादिरूपमन्ततः साध्य एव प्रसिद्धम् । निरुपाधीति । उपाधिज्ञानाहितव्यभिचारनिरासाय

किवारणाय व्यतिरेकसहचारेणैवेत्यवधारणमन्तर्भाव्योक्तिरित्यन्वयः । व्याप्तिग्रहपदमनुमितिजनकज्ञानपरमेव तत्रापीति भावः । मीमांसकैः केवलान्वय्यनुमानास्वीकारादव्याप्तयभिधानं तन्मते विरुद्धमतस्तवपदं पूरयित्वा समाधत्ते तव केवलान्वयिन्यभावाच्चेति । तथा च न्यायमतानुसारेणैव तन्मतमास्कन्दितमिति भावः । स्वव्यापकसाध्यसामानाधिकरण्यरूपान्वयव्याप्तेः साध्यत्वे तदप्रसिद्ध्या साध्यप्रसिद्धिः प्रसिद्धौ वाऽनुमानवैफल्यमतो व्याचष्टे सा-

भावस्य नियामकत्वात् अन्वयव्यतिरेकिवत् । नन्वेवं व्याप्तिग्रह एव पृथिवी इतरभिन्नेति भाषितम्, नियतसामानाधिकरण्यरूपत्वाद्व्याप्तेरिति । सत्यम्, गन्धवत्त्वावच्छेदेनेतरभेदस्य साध्यत्वात् । अत एवाचार्य्यः पक्षतावच्छेदकस्य न हेतुत्वमनुमेने । पृथिवीत्वमितरभेदव्याप्यमितिप्रतीतावपि सर्वा पृथिवी इतरभिन्नेति पृथिवीवि-

---

पृथिवीत्वमिति । पृथिवीत्वमितरभेदव्याप्यमित्यत्र हि पृथिवीत्वत्वविशिष्टे पृथिवीत्वे इतरभेदसामानाधिकरण्यं भासते पृथिवी इतरभिन्नेत्यत्र शुद्धपृथिवीत्वविशिष्टे तदवच्छेदेनेतरभेद इति न सिद्धसाधनमित्यर्थः । सर्वेति च पृथिवीत्वस्यावच्छेदकत्वस्फोरणाय । अत्र च पृथिवीत्वत्वं पृथिवीतरासमवेतत्वमात्रं न तु पृथिवीवृत्तित्वघटितमित्यतोऽपि नोपनयवैयर्थ्यम् । अथान्वयव्याप्तिघटकतावच्छेदकत्वमिति । अन्तत इति साध्यव्याप्यान्तरस्याऽप्रतिसन्धानदशामधिकृत्य । निरुपाधित्वज्ञानस्य व्याप्तिग्रहं प्रत्यहेतुत्वादाह निरुपाधीत्यादि । पृथिवीविशेष्यकेत्यभिधानात्समानाकारसिद्धेरनुमितिविरोधित्वं मूलाभिप्रेतमित्याशयेन प्रकृतसिद्धेरनुमितिसमानाकारत्वमेव नास्तीति व्युत्पादयति पृथिवीत्वमित्यादिना । तदवच्छेदेन पृथिवीत्वावच्छेदेन । इतरभेदो भासत इति पूर्वेणाऽन्वयः । पृथिवीत्वेन पक्षतायामप्युक्तदिशा सिद्धसाधनासम्भवात्सर्वेति पक्षविशेषणं प्रथमत आह सर्वेति चेति । तथा चानुमितौ न सर्वत्वं प्रकार इति भावः । ननु पृथिवीत्वत्वं पृथिवीतरावृत्तित्वे सति सकलपृथिवीवृत्तित्वं तथा च तावतैव पृथिवीत्वहेतोः पक्षधर्मतालाभादुपनयस्य कथास्थले वैयर्थ्यभिया तादृशपृथिवीत्वं हेतुरेव ने-

त्पदार्थोपस्थित्यादिकं विना न तद्ग्रहसम्भवः, तत्सत्त्वे च तत एव व्याप्तिग्रहसम्भवे व्यतिरेकसहचारज्ञानस्य हेतुत्वे मानाभावः । न च व्यभिचारशङ्कानिवर्त्तकत्वेनैवान्वयव्यतिरेकसहचारग्रहयोरुपयोगित्वम्, तद्ग्रहेऽपि शङ्कातादवस्थ्यात्, अधिकरणविशेषे च तन्निवृत्तौ साध्यवत्त्वसाधनाभाववत्त्वयोरन्यतरग्रहस्यैव तन्त्रत्वात्, व्यतिरेकव्याप्त्युपन्यासेऽर्थान्तरादितादवस्थ्याच्च । यत्तु सहचार-

---

स्येतमाह अत्र चेति । न त्विति । व्यतिरेकव्याप्तेर्गमकत्वमभ्युपेत्य कदा चिद्वैयर्थ्यवारणेप्यनतिप्रयोजनकत्वादिति भावः । सकलपृथिवीवृत्तित्वस्य हेतौ प्रवेशेपि न क्षतिः यद्रूपावच्छिन्ने व्याप्तिर्गृहीता तद्रूपावच्छिन्नस्य पक्षधर्मताया उपनयादेव लाभात्साकल्यस्य व्यापकतानतिरेकेण पृथिवीत्वव्यापकत्वपर्यवसन्नसकलपृथिवीवृत्तित्वे पक्षधर्मत्वस्याप्रवेशाच्चेत्यावेदयितुमापकार उक्तः । पदार्थोपस्थित्यादीत्यादिना बाधविरहाद्युपग्रहः । तत्सत्त्वे तावत्पदार्थोपस्थित्यादिसत्त्वे । तद्ग्रहेपीति । जलादौ धूमाभाववन्ह्यभावयोः सहचारग्रहेपि तप्तायःपिण्डे व्यभिचारसंशयादिति भावः । ननु यदधिकरणव्यक्तौ सहचारधीस्तदन्तर्भावेण व्यभिचारग्रहं प्रति तस्य विरोधित्वं वाच्यमत आह अधिकरणविशेषे चेति । साधनसाध्याभावान्यतरवत्तया निर्णीताधिकरणे चेत्यर्थः । तन्निवृत्तौ व्यभिचारशङ्कानिवृत्तौ । साध्यवत्त्वेति । साधनवत्त्वेन निश्चितेऽधिकरणे साध्यवत्त्वग्रहस्य साध्याभाववत्तया निश्चितेऽधिकरणे च साधनाभाववत्त्वग्रहस्यैव व्यभिचारशङ्कानिवर्तकत्वादित्यर्थः । ननु व्यतिरेकसहचारज्ञानत्वेन व्यभिचारधीविरोधिज्ञानत्वेन च व्यतिरेकसहचारग्रहस्यान्वयव्याप्तिबुद्धावहेतुत्वेपि विशेषणज्ञानविधया हेतुत्वमस्त्येव तथा चान्वयसहचारग्रहाजन्यव्यतिरेकसहचारग्रहजन्यानुमितित्वरूपं केवलव्यतिरेकित्वं सुवचमेव, न चान्वयसहचारग्रहाजन्यत्वमन्वयव्याप्तिग्रहस्य न सम्भवतीति वाच्यम् । यत्रान्वयव्याप्तिघटकवस्तूनां प्रत्येकोपस्थितौ विशेष्ये विशेषणमिति न्यायेनान्वयव्याप्तिधीस्तत्रैवान्वयंसहचारत्व-

शेष्यकबुद्धेर्व्यतिरेकिसाध्यत्वाच्च । यद्वा व्यतिरेकव्याप्ते-

---

मात्रलाभायैव सर्वत्रोदाहरणोपन्यास इति । तन्न । अर्थान्तराद्यापत्तेर्दुर्वारत्वात् यच्छब्दादिवैयर्थ्याच्च । व्युत्पादयिष्यते च तस्य व्याप्तिबोधकत्वम् । न चान्वयिन इव व्यतिरेकिणोऽप्युदाहरणात् स्वरससिद्धान्वयव्याप्तिधीरानुभविकी, येन तदर्थमपि प्रकारान्तरमास्थेयमत आह यद्वेति । साध्याभावेति । नन्विच्छादौ साध्ये आत्मत्वादेर्व्यतिरेकित्वं न स्यात्, स्याच्च संयोगादेरात्मत्वे तथा-

---

प्रकारकग्रहाजन्यत्वसम्भवात् तादृशव्याप्तिग्रहस्याप्यनुमितिहेतुतायाः प्राचीनसम्मतत्वादित्यस्वरसादाह व्यतिरेकेति । अर्थान्तरेति । अन्वयव्याप्तिज्ञानस्यैवानुमितिहेतुत्वं व्यतिरेकव्याप्तिग्रहस्य तत्राऽनुपयुक्तत्वादिति भावः । मिश्रमतमुपन्यस्यति यत्विति । सहचारमात्रपदेन व्याप्तिव्युदासः । सर्वत्र अन्वयिनि व्यतिरेकिणि च । अर्थान्तरादीति । सहचारग्रहस्य कारणीभूतान्वयव्याप्तिग्राहकतया कथञ्चिदनुमितावुपयुक्तत्वेपि तदानीमनाकाङ्क्षितत्वात्प्रथमतस्तदुपन्यासेऽप्राप्तकालत्वमावश्यकमित्याशयेन आदिपदमुपात्तम् । अर्थान्तरादिरूपं निग्रहस्थानमुक्त्वा अधिकरूपं तदाह यच्छब्दादीति । यत्तदादिशब्दं विनैव सहचारलाभसम्भवादिति भावः । अथाधिकस्यापि यदादिशब्दस्य कथकसम्प्रदायानुरोधेन प्रयोगान्न वैय्यर्थ्यम्, अन्यथा लाघवात्साध्यव्याप्यो हेतुरित्येवोदाहरणशरीरं तन्मतेपि स्यादत आह व्युत्पादयिष्यत इति । तस्य उदाहरणस्य । वीप्सितपदानां व्याप्तावनुशिष्टत्वात्तद्बोधने बाधकाभाव इति भावः । अथान्वयिन इव व्यतिरेकिणोप्युदाहरणस्य लक्षणयान्वयव्याप्तिबोधकत्वात्तदुपन्यासे अर्थान्तरत्वादेर्नावकाश इत्यत आह न चेति । स्वरससिद्धेतिातथात्वे निरूढलक्षणयाप्युपपत्तिः स्यात् तस्याः शक्तितुल्यत्वात्, आधुनिकलक्षणया प्रयोगस्य तु जल्पे असम्भवात्, अन्यथा विवादस्य पर्यवसानापत्तेरिति भावः । तदर्थमपि अन्वयव्याप्तिबोधार्थमपि । प्र-

कारान्तरं लक्षणादिकल्पनम्।न स्यादिति।इच्छाद्यभावस्य तद्व्यापकत्वादिति भावः।आत्मत्वे साध्य इतीति पूर्वेणान्वयः।संयोगादेरिति। यद्यपि समवायेन संयोगस्य हेतुत्वे अतिव्याप्तिशङ्कापि नास्ति समवायावच्छिन्नसंयोगाभावस्य साध्याभाववद्घटादिनिष्ठसंयोगस्वरूपाभावप्रतियोगित्वेन साध्याभावव्यापकत्वाभावात् । तथापि व्यधिकरणसम्बन्धेन हेतुतायामिदमतिप्रसङ्गाभिधानं द्रष्टव्यम्। स्वरूपादिसम्बन्धावच्छिन्नसंयोगसामान्याभावस्य आत्मत्वाद्यभावव्यापकत्वनियमात्संयोगादेरित्यादिपदेन अवृत्तिगगनादेः संग्रहः । न च यत्सम्बन्धेन साध्याभावव्यापकीभूताभावस्य प्रतियोगित्वं तत्सम्बन्धेन वृत्तिमत्त्वमात्रविवक्षयैव व्यधिकरणसम्बन्धेन संयोगादिहेताववृत्तिगगनादिहेतौ च अतिव्याप्तिवारणसम्भवादग्रे साधनवैयधिकरण्यप्रवेशो व्यर्थ इति वाच्यम् । तथासति गुणत्वादौ साध्ये विषयित्वादिसम्बन्धेन घटत्वादिहेतावव्याप्तिप्रसङ्गात् । विषयित्वादिसम्बन्धस्य वृत्त्यनियामकत्वात् तत्सम्बन्धावच्छिन्नप्रतियोगित्वाप्रसिद्धेः । साधनाभावे हेत्वसामानाधिकरण्योक्तौ तु सम्बन्धान्तरेण हेत्वभावमादायैव लक्षणसम्भवः।वस्तुतः साध्याभावव्यापकत्वमवश्यं प्रतियोगिवैयधिकरण्यघटितं वाच्यम् । अन्यथा धूमाभावाभावस्यापि साध्याभाववति कालिकसम्बन्धेन वर्तमानत्वात् वन्हिमान् धूमादित्यादावव्याप्तिप्रसङ्गात् । न च साध्याभावव्यापकतायां साध्याभाववन्निष्ठत्वमभावस्य दैशिकविशेषणतयोपादेयमतो नैष दोषः । द्रव्यं सत्त्वादित्यादावतिव्याप्त्यापत्तेः। सत्त्वाद्यभावानां साध्याभाववति दैशिकविशेषणतया वर्तमानस्याभावाभावस्य प्रतियोगित्वात् । तथा चात्मत्वादिसाध्यके समवायेनापि संयोगादिहेतावतिव्याप्तिः सम्भवत्येव, संयोगादेः स्वरूपसम्बन्धेन प्रतियोगिव्यधिकरणसाध्याभाववन्निष्ठत्वाभावात् तादृशाभावान्तरस्य च प्रतियोगितायाः संयोगाभावे विरहादिति नव्याः । यत्तु द्रव्यभिन्नं संयोगवदन्यत्वादित्यत्र संयोगस्वरूपस्य संयोगवदन्यत्वाभावस्य द्रव्यभिन्नत्वाभावव्यापकत्वसिद्ध्यर्थं साध्याभावव्यापकत्वमवश्यं प्रतियोगिवैयधिकरण्यघटितमतः समवायावच्छिन्नसंयोगाभावस्यापि तदघटितात्मत्वाभावव्यापकत्वमस्त्येवेति संयोगादिहेतावतिव्याप्त्युपन्यासः सहजत एव सम्यगिति।तत्तुच्छम् । उत्पत्ति-

त्वमिति चेन्न । साध्यतावच्छेदकावच्छिन्नसाधनासमानाधिकरणत्वेन साध्याभावस्य साधनतावच्छेदकावच्छिन्नसाधनासमानाधिकरणत्वेन च साधनाभावस्य विशेषितत्वात्। संयोगाभावे साध्ये विभागाभावः केवलान्वयी । प्रतियोगिवैयधिकरण्यावच्छिन्ने च तत्र स तादृशो व्यतिरेक्यपि । व्याप्यव्यापकभावश्च साध्याभावत्व-

---

कालावच्छेदेनापि घटादौ संयोगवदन्यत्वाभावोपगमात् तस्य संयोगात्मकत्वाभावात् । अन्यथा संयोगवदन्यत्वस्यैव तदानीं घटादौ सत्त्वेन व्यभिचारित्वापातादिति दिक् । साध्यतावच्छेदकेत्यादि । प्रतियोग्यसामानाधिकरण्यस्य प्रतियोग्यंशे यत्किञ्चित्त्वयाकत्वविकल्पग्रस्तत्वात्तदपहाय साध्यहेत्वोरेवाऽसामानाधिकरण्यं निवेशितम्। तत्र च सत्त्वासमानाधिकरणसाध्याभावव्यापकीभूताभावप्रतियोगितया विशिष्टसत्तावान् जातेरित्यादावतिव्याप्तेः, द्रव्यं विशिष्टसत्त्वादित्यादौ च सत्त्वासामानाधिकरण्यविशिष्टहेत्वभावस्य साध्याभावव्यापकत्वविरहाद्व्याप्तेश्च साध्यत्वसाधनत्वयोरवच्छेदकावनुप्रवेशितौ । इदं त्ववधातव्यम् । अव्याप्यवृत्तिसाध्यकादिस्थले साध्यासामानाधिकरण्यव्यापकीभूतसाधनासमानाधिकरणत्वकत्वं न तु साध्याभावसाधनाभावयोः प्रवेशः, वैयर्थ्यात् । साध्यासमानाधिकरणत्वस्य व्यापकत्वस्य च स्वरूपसम्बन्धेनलाभार्थमेव तदुपादानात् । न चैवं साध्याभावत्वादिकं चेत्युत्तरग्रन्थविरोधः, व्याप्यवृत्तिसाध्यकस्थले केवलसाध्याभावमात्रस्यैव निवेशनीयतया तदभिप्रायेणैव तद्ग्रन्थावतारात् । साध्याधिकरणत्वाभावव्यापकस्वाधिकरणत्वाभावकत्वे तात्पर्यान्नोक्तग्रन्थविरोधः इत्यपि कश्चित् । ननु संयोगाभाववान् विभागाभावादित्यादावव्याप्तिः साध्यासमानाधिकरणसाध्याभावाद्यप्रसिद्धेरतस्तस्याः अलक्ष्यत्वमाह संयोगाभाव इति । तत्र संयोगाभावे साध्ये इत्यनुषज्यते । सः विभागाभावः । तादृशः प्रतियोगिवैयधिकरण्यविशिष्टः । व्यतिरेक्यपीति । संयोगाभावासामानाधिकरण्याप्रसिद्धावपि संयोगादिवैयधिकरण्यावच्छिन्नसंयोगाद्यभा-

रेवान्वयेन गम्यगमकभावः, साध्याभावव्यापकसाधनाभावाभावेन साधनेन साध्याभावाभावस्य साध्यस्य साधनात् व्यापकाभावेन व्याप्याभावस्यावश्यम्भावात् ।

साधनाभावत्वाभ्यां बोध्यः,तेन न व्यभिचारिण्यतिप्रसङ्गः। साध्याभावत्वादिकञ्च वैज्ञानिकं न तु वास्तवम् । तेन मेयत्वाभिधेयत्वयोर्व्यतिरेकव्याप्तिभ्रमादनुमानम् । व्यापकीयत्वेनाभावस्य ज्ञानाद्व्याप्यीयत्वेनाभावस्य सिद्धिं पुनरप्रसिद्धसाध्यकसाधारणीमाह व्यापकाभावेनेत्यादिना । अभावौ अभाववत्त्वनिश्चयौ। अवश्य-

---

वस्यासामानाधिकरण्यं घटत्वादावेव सुलभमिति भावः । न च संयोगवैयधिकरण्यावच्छिन्नसंयोगाभावे साध्ये विभागवैयधिकरण्यावच्छिन्नतदभावस्य द्विक्षणावस्थायिन्यविभक्तद्रव्य एव व्यभिचारित्वमिति वाच्यम् । तादृशद्रव्यसत्त्वे प्रमाणाभावात् । भावे वा संयोगविभागपदयोस्तद्विशेषपरत्वादेव व्यभिचारविरहात् । केचित्तु तत्र विभागाभावे संयोगाभाव इत्येवं व्याख्ययोक्तदोषं परिजह्रुः। ननु जातिवृत्तित्वविशिष्टद्रव्यत्वाभावं प्रति सत्त्वाभावत्वेन द्रव्यत्वाभावत्वविशिष्टं प्रति च मेयत्वादिना सत्त्वाभावस्य व्यापकत्वात् द्रव्यं सत्त्वादित्यादावतिव्याप्तिरत आह व्याप्येति। तेनेति । साध्याभावव्यापकाभावेत्याद्याकारकविशिष्टविषयताकज्ञानस्यैव हेतुत्वादिति भावः। ननु व्यापकाभावेन व्याप्याभावस्यावश्यंभावो व्यापकाभावस्य व्याप्याभावनियतत्वं तस्य च प्रदर्शनं व्यतिरेकव्याप्तिज्ञानाधीनानुमितावनुपयुक्तमतः प्रकारान्तरेण ग्रन्थमवतारयति व्यापकीयत्वेनेति। अप्रसिद्धेति। पूर्वोक्तस्तु हेत्वभावे साध्याभावत्वावच्छिन्नस्य व्यापकत्वग्रहः साध्यघटितमूर्तिकतया नाप्रसिद्धसाध्यकस्थले सम्भवतीति भावः । ननु व्यापकाभावनिश्चयस्य व्याप्याभा-

अथैवं न सानुमितिः, क्लृप्तहेतुलिङ्गपरामर्शाभावात्, अन्यथाऽननुगम इति चेन्न । अनुमितिमात्रे व्याप्तिज्ञा-

---

म्भावश्चाऽसति प्रतिबन्धके । अत्र च यद्रूपावच्छिन्नं प्रति व्यापकता गृह्यते तद्रूपावच्छिन्नीयत्वेनाभावसिद्धिः फलम्, येन रूपेण व्यापकता गृह्यते तद्रूपावच्छिन्नीयत्वेन व्यापकत्वविशिष्टतत्तद्रूपावच्छिन्नीयत्वेन चाभाववत्ताज्ञानं हेतुरिति मन्तव्यम् । व्यापकप्रतियोगिकस्याभावस्यातिप्रसक्तत्वात् व्यापकत्वावच्छिन्नप्रतियोगिताकस्य च सम्बन्धविशेषावच्छिन्नस्य सम्भवतोऽप्यसार्वत्रिक-

---

धनिश्चयं प्रति हेतुत्वे तद्ग्राहकतदीयान्वयव्यतिरेकौ वक्तुमुचितौ न तु तद्विषयीभूतयोरवश्यम्भाव इत्यतस्तत्परतया व्याचष्टे अभावनिश्चयाविति । तथा च व्यापकीयतयाऽभावनिश्चयेन व्याप्यीयतयाऽभावनिश्चयस्यावश्यकत्वादिति मूलार्थः । न च धूमव्यापकवन्ह्यभाववान् ह्रदइत्यादौ पूर्वमनुपस्थितस्य धूमाभावस्य पक्षे निश्चयासम्भवः, तत्रापि विशेष्ये विशेषणमिति न्यायेनैव ह्रदो धूमाभाववानितिनिश्चयस्य सम्भवात् । अत एवाग्रेपि तदभिप्रायेणैव निर्धूमोयमित्याकारिकामनुमितिं वक्ष्यतीति ध्येयम् । सत्यपि व्यापकाभावस्य निश्चये तदप्रामाण्यग्रहदशायां बाधाद्यवतारदशायां वा व्याप्याभावस्य सिध्यनुपपत्तेराह अवश्यंभावश्चेति । तद्रूपावच्छिन्नीयत्वेनेति । अभाववत्ताज्ञानमित्यन्वयः । तज्ज्ञानद्वयसाधारणरूपेण कारणत्वमुक्त्वा तत्र मीमांसकमतोक्तदूषणाद्विशिष्टज्ञानस्य हेतुत्वे लाघवाच्चाह व्यापकत्वविशिष्टेति । व्यापकत्वावच्छेदकतद्रूपावच्छिन्नीयत्वेनेत्यर्थः तेन प्रमेयत्वाद्यवच्छिन्नं यद्धूमव्यापकत्वं तद्विशिष्टजलत्वावच्छिन्नाभाववत्यपि पर्वतादौ न धूमाभावस्यानुमितिरिति ध्येयम् । व्यापकाभावत्वमुपेक्ष्य व्यापकत्वविशिष्टतत्तद्रूपावच्छिन्नाभावत्वप्रवेशस्य

नस्य प्रयोजकत्वात् । न चैवमतिप्रसङ्गः, अनुमितिसामान्यसामग्र्यां सत्यामप्यनुमितिविशेषसामग्रीविरहादनु-

---

त्वात् । कारणानुगमः परं परिचिन्तनीयः । एवञ्च वन्हिर्धूमव्यापको वन्ह्यभाववांश्चायमिति ज्ञानाद्धूमव्यापकवन्ह्यभाववानयमिति ज्ञानाद्वा निर्धूमोऽयमिति धीरिति धूमव्यापकतावच्छेदकावच्छिन्नप्रतियोगिताकाभाववानयमिति ज्ञानादित्यपि कश्चित् । व्याप्तिज्ञानस्येति । अत्र व्याप्तिपदेनान्वयव्यतिरेकव्यापकताग्रहनिय-

---

फलमाह व्यापकप्रतियोगिकेति । अतिप्रसक्तत्वादिति । व्यापकत्वेऽपि द्वित्वाद्यवच्छिन्नव्यापकाभावसत्त्वाद्व्याप्यवत्तानिश्चयदशायामपि व्याप्याभावस्यानुमित्यापत्तेरिति भावः । सम्बन्धविशेषेति । स्वरूपाद्यतिरिक्तसम्बन्धावच्छिन्नस्येत्यर्थः । स्वरूपसम्बन्धेन धूमादिव्यापकत्वावच्छिन्नाभावाप्रसिद्धावपि संयोगादिना धूमादिव्यापकत्वावच्छिन्नाभावस्य गुणादावेव सम्भवात्तत्र निर्धूमत्वाद्यनुमितेरुत्पादनेऽपि ह्रदादौ निर्धूमत्वाद्यनुमितिर्न स्यात् प्रमेयत्वादिना धूमव्यापकस्य जलादेः संयोगेन तत्र सत्त्वादिति भावः । नन्वेवं धूमव्यापकवन्ह्यभाववान् धूमव्यापकद्रव्यत्वाभाववानित्यादिनानाबुद्धीनां निर्धूमत्वानुमितावनुगतरूपाभावेन हेतुत्वं दुर्ग्रहमत आह कारणेति । तथा च तादृशज्ञानाव्यवहितोत्तरत्वादेः कार्यतावच्छेदकेनुप्रवेशाददोष इति भावः । प्रथमं पक्षमनुसत्याह वन्हिरित्यादि । व्यापकत्वविशिष्टतद्रूपावच्छिन्नेत्यादिद्वितीयकल्पमनुसृत्याह धूमव्यापकेत्यादि । धूमव्यापकतावच्छेदकवन्हित्वावच्छिन्नाभाववानयमित्यर्थः । निर्धूमोयमितीति । धूमाभावत्वेन प्रागनुपस्थितावपि पक्षांशेऽभावस्य तत्र च धूमस्य विशेष्ये विशेषणमिति न्यायेन प्रकारत्वसम्भवादिति भावः । ज्ञानादिति । निर्धूमोयमिति धीरित्य-

मित्यनुत्पत्तेः, विशेषसामग्रीसापेक्षाया एव सामान्यसामग्र्या जनकत्वात् । अन्वयिव्यतिरेकिविशेषद्वयसामग्री च नास्त्येव ॥

तद्विषयताकोऽर्थोऽभिमतः । पक्षस्य पक्षतावच्छेदकस्य वा ज्ञानमनुमितिमात्रे हेतुरित्यपि वदन्ति । अन्वयीति । अन्वयिनि तादृप्येण वन्हित्वादिना, व्यतिरेकिणि तु इतरप्रतियोगिकत्वेन वन्ह्यभावादि-

---

नुषज्यते । अत्र व्यापकतावच्छेदकत्वं यदि प्रतियोगितावच्छेदककोटौ निविष्टं तदा पक्षे धूमव्यापकतावच्छेदकीभूतप्रमेयत्वावच्छिन्नवत्तानिश्चयदशायां निर्धूमत्वानुमित्यनुत्पत्तिप्रसङ्गः, तदनिवेशे च कारणाननुगमतादवस्थ्यमित्याद्यस्वरसः कश्चिदित्युक्त्वा सूचितः । अन्वयव्यतिरेकोभयव्याप्त्यनुगतस्य व्याप्तित्वस्य दुर्वचत्वादाह अत्रेति । तथा चाभावत्वज्ञानत्वादिनाऽनुमितिसामान्ये हेतुत्वमिति भावः । अनुमितिमात्रे पक्षधर्मतैव प्रयोजिकेति व्याप्तिवादोक्तमनुरुद्ध्याह पक्षस्येति । स्वधर्मिण इत्यर्थः । अनुमितिधर्मिणो नानात्वादाह पक्षतावच्छेदकस्य वेति । तथा चानुमितिसामान्यं प्रति स्वधर्मितावच्छेदकावगाहिज्ञानत्वेन हेतुत्वमिति भावः । स्वत्वस्याऽनुगतत्वाभावादभावज्ञानत्वेन हेतुत्वापेक्षया गौरवाच्च नेदं युक्तमित्याशयेन वदन्तीत्युक्तम् । ननु वन्ह्याद्यनुमितावन्वयव्यतिरेकव्याप्तिज्ञानयोः प्रत्येकस्य कार्यतावच्छेदकत्वं दुर्वचमिति तयोर्विशेषसामग्रीत्वमेव दुर्घटमत आह अन्वयिनीति । तादृप्येणेत्यस्य विवरणं वन्हित्वादिनेति । सिद्धिरिति परेणान्वयः । आदिना वन्हित्वावच्छिन्नाभावत्वादेः परिग्रहः । इतरत् वन्ह्यभावादि । तत्प्रतियोगिकत्वमात्रेण । न तु वन्ह्यभावत्वावच्छिन्नाभावत्वादिनेत्यर्थः । इतरेत्यादेर्विवरणं वन्ह्यभावनिषेधतयेति । अनुभवसिद्ध इति । तथा च स्वव्यापकवह्निसमानाधिकरणधूमवान् स्वव्यापकनिर्वन्हित्वावि-

निषेधतया सिद्धिरित्यनुभवसिद्धः कार्य्यगतो विशेषः कारणविशेष-जन्यतावच्छेदकम्। अत एव तत्र तत्र सर्वत्र व्यतिरेकिणि तस्मान्न तथेत्येव निगमनशरीरम्। अन्वयिना वन्ह्यभावेन धूमाभावसिद्धौ धूमाभावत्वं प्रकारः व्यतिरेकिणि तु तत्सिद्धौ प्रत्यक्ष इव प्रतियोगितया धूमः प्रकार इति वदन्ति। इत्थञ्च ह्रदो धूमाभाववान्न वा पर्वतो वन्हिमान् न वेत्यादिजिज्ञासायां विप्रतिपत्तावुद्देश्यायाः साध्यतावच्छेदकरूपेण साध्यवत्त्वप्रतीतेरनुपयोगिना व्यति-

---

रहसमानाधिकरणधूमवानित्यन्वयव्याप्तिग्रहस्य वन्हित्ववन्ह्यभावसामान्यविरहत्वावच्छिन्नविधेयकानुमितित्वं कार्यतावच्छेदकम्, आलोकाद्यन्यलिङ्गकस्यापि जन्यतावच्छेदकेऽनुप्रवेशसत्त्वाच्च नालोकादिलिङ्गकतादृशानुमितौ व्यभिचार इति भावः। वन्ह्यभावव्यापकीभूताभावप्रतियोगिधूमवानित्यादिव्यतिरेकव्याप्तिग्रहस्याभावांशे वन्ह्यभावप्रतियोगिकत्वावगाह्यभावत्वावच्छिन्नविधेयताकानुमितित्वमेवालोकाद्यन्यलिङ्गकत्वविशेषितं कार्यतावच्छेदकं वन्ह्यभावसामान्याभावत्वेनानुपस्थितावपि तादृशव्यतिरेकव्याप्तिज्ञानाद्विशेष्ये विशेषणमिति न्यायेनैव वन्ह्यभावाभाववानित्यनुमितेरुपगमादिति भावः। कारणविशेषेति। अन्वयव्याप्तिज्ञानादिरूपकारणेत्यर्थः। अत एव। कार्यतोक्तविशेषसत्त्वादेव। तत्र प्राचीनग्रन्थे। शरीरमिति। निगमनस्य साध्यांशेऽनुमितिसमानाकारत्वनियमादिति भावः। भावसाध्यकेऽन्वयव्यतिरेकव्याप्तिज्ञानयोः प्रत्येकस्य कार्यतावच्छेदकत्वं निरुक्ताऽभावसाध्यके तन्निर्वक्तुमाह अन्वयिनेति। स्वव्यापकधूमाभावसमानाधिकरणतया निश्चितेनेत्यर्थः। धूमाभावत्वमिति। तथा च धूमाभावत्वावच्छिन्नविधेयकानुमितित्वमेव स्वव्यापकधूमाभावसमानाधिकरणनिर्वन्हित्ववत्तानिश्चयस्य कार्यतावच्छेदकं जलत्वाद्यन्यलिङ्गकत्वस्य प्रवेश्यतया च नतल्लिङ्गकनिर्धूमत्वानुमितौ व्यभिचार इति भावः। व्यतिरेकिणीति। धूमव्यापकीभूतवन्ह्याद्यभाववत्ताग्रह इत्यर्थः। तत्सिद्धौ धूमाभावस्य

रेक्युदाहरणादेः कथमवतार इति विभावनीयम् । के चित्तु अन्वयव्याप्तिज्ञानानन्तरत्वादिकमेवानन्यगतिकतया जन्यतावच्छेदकमित्याहुः । अन्यतरत्वेन तादृशपरामर्शयोः कारणत्वमित्यपि कश्चित् ॥

सिद्धौ । धूमः प्रकार इति । तथा चाभावांशे धूमावगाह्यभावत्वावच्छिन्नविधेयताकानुमितित्वमेव धूमव्यापकवन्ह्यभाववत्तानिश्चयस्य जन्यतावच्छेदकं धूमसामग्रीशून्यत्वाद्यलिङ्गकत्वस्य निवेश्यत्वाच्च न तल्लिङ्गके व्यतिरेकिणि व्यभिचार इति भावः । उक्तक्रमेण जन्यतावच्छेदकत्वोपगमे दूषणमाह इत्थं चेति । अभावसाध्यकमुक्त्वा भावसाध्यकव्यतिरेकिण्याह पर्वत इति । अनुपयोगिन इति । प्रतिज्ञायां यद्रूपावच्छिन्नं साध्यवत्त्वं पक्षस्थावगतं तद्रूपावच्छिन्नविधेयताकानुमित्यनुकूलव्याप्तिरेव तदोदाहर्तव्यतया धूमाभावत्वाद्यवच्छिन्नविधेयताकानुमितौ यत्र धूमस्तत्र वन्हिरित्यादिव्यतिरेकव्याप्तेरनुपयुक्तत्वादुक्तस्थले तादृशव्यतिरेकव्याप्तेरुपन्यासो न स्यादित्यर्थः । तादृशव्याप्तेरभावांशे धूमप्रतियोगिकत्वावगाह्यभावत्वावच्छिन्नविधेयताकानुमितिं प्रत्येव हेतुत्वस्योक्तत्वादिति भावः । अनन्यगतिकतयेति । तथा च धूमव्यापकवन्ह्यभाववानित्यादिनिश्चयोत्तरमनुमितित्वावच्छिन्नं प्रत्येव तादृशनिश्चयत्वेन हेतुत्वादुक्तस्थलेपि व्यतिरेकव्याप्तिज्ञानाद्धूमाभावत्वावाच्छिन्नविधेयताकैवानुमितिरतो नोदाहरणस्यानुपपत्तिरिति भावः । अन्यतरत्वेनेति । अत्रान्वयेन व्यतिरेकेण वा यावद्भ्यः परामर्शेभ्यो यत्पक्षकयत्साध्यकानुमितेरुत्पादस्तावतां परामर्शानामन्यतमत्वेन तत्पक्षकतत्साध्यकानुमितित्वावच्छिन्नं प्रति कारणत्वमित्यत्र तात्पर्यम्, तेन परामर्शानां हेतुभेदेन भिन्नतया एकलिङ्गकपरामर्शस्योपादानेऽन्यलिङ्गकानुमितौ व्यभिचारः, तल्लिङ्गकत्वस्य कार्यतावच्छेदकेऽनुप्रवेशे तु पूर्वमताभेद इति निरस्तमित्यास्तां विस्तरः ॥

इति श्रीजगदीशतर्कालङ्कारविरचिता व्यतिरेक्यनुमान दीधितिटीका समाप्ता ॥

ननु पृथिवी इतरेभ्यो भिद्यते पृथिवीत्वादिति व्यतिरेकिणि साध्यमसिद्धं तथा च न व्यतिरेकिनिरूपणं न वा पक्षत्वं न वा लिङ्गजन्यसाध्यविशिष्टतज्ज्ञानं तेषां साध्यज्ञानजन्यत्वात् । अथ साध्यं प्रसिद्धं तदा यत्र प्रसिद्धं तत्र हेतोरवगमेऽन्वयित्वम्, अनवगमे असाधारण्यम् । किञ्च इतरभेदो न स्वरूपम,

---

मथुरानाथकृतं व्यतिरेकिरहस्यम् ।

नान्विति । साध्यं साध्यतावच्छेदकविशिष्टसाध्यम् । न वा पक्षत्वमिति । तस्य साध्यसन्देहरूपत्वात् साध्यसिषाधयिषाघटितत्वाद्धेति भावः । साध्यविशिष्टतज्ज्ञानमिति । साध्यतावच्छेदकावच्छिन्नविशिष्टतज्ज्ञानमित्यर्थः । साध्यज्ञानेति । साध्यतावच्छेदकप्रकारकसाध्यज्ञानेत्यर्थः । न च प्रतियोगितावच्छेदकप्रकारप्रतियोगिज्ञानस्याभावधीहेतुतया साध्यतावच्छेदकविशिष्टसाध्यप्रसिद्धि विना व्यतिरेकज्ञानासम्भवेऽपीतरभेदस्य च खण्डशः, प्रसिद्धिसत्त्वेन विशेष्ये विशेषणमिति रीत्या साध्यतावच्छेदकप्रकारकसाध्यविशिष्टज्ञानसम्भव इति वाच्यम् । साध्यतावच्छेदकरूपेण साध्यज्ञानं विना तेन रूपेण साध्यप्रकारकानुमितिर्न जायत इति सर्व्वानुभवसिद्धत्वात् । अत एव साध्यतावच्छेदकरूपेण साध्यप्रकारकानुमितेर्विशिष्टनिरूपितवैशिष्ट्यविषयताशालितानियम इति सिद्धान्त इति भावः । अन्वयित्वमिति । अन्वयसहचारज्ञानादेव व्याप्तिज्ञानमित्यर्थः,

---

(१) दीधितिकृता नास्त्येवेत्यन्तस्यैव व्यतिरेकिमूलस्य व्याख्यानात्तदनुसारेण जागदीश्या अप्येतदवधिकतया, मूलस्य च व्याख्यासापेक्षतया सकलसहृदयसंवेद्यं मथुरानाथतर्कवागीशकृतमवन्यं रहस्याख्यव्याख्यानमेवेतः परमर्थापत्तिविचारान्तं निवेशितम् ।

अधिकरणप्रतियोगिनोः पृथिवीजलाद्योरनुमानात् प्रागेव सिद्धेः । नापि वैधर्म्यं जलादिनिष्ठात्यन्ताभावप्रतियोगित्वम्, तद्धि पृथिवीत्वादिकं तच्च सिद्धमेव। न च जलादिनिष्ठात्यन्ताभावप्रतियोगित्वेन पृथिवीत्वं न सिद्धमिति वाच्यम् । जलादौ पृथिवीत्वात्यन्ताभावग्रहदशायां पृथिवीत्वेऽपि तत्प्रतियोगित्वग्रहात् । अन्योन्याभावस्तु भेदो यद्यपि साध्यं सम्भवति वैधर्म्यज्ञानसाध्यत्वादन्योऽन्याभावग्रहस्य, तथापि जलादिप्रतियोगिकान्योन्याभावस्याप्रसिद्धिः । न च जलादिप्रत्येकान्योन्याभावः साध्यः, असाधारण्यप्रसङ्गात् । अथ पृथिवी तेजोभिन्ना

किं गुरुतरव्यतिरेकसहचारज्ञानस्य हेतुत्वेनेति भावः । इदमुपलक्षणम्, प्रागुक्तव्यतिरेकलक्षणस्याप्यसम्भव इत्यपि बोध्यम्।ननु अनवगमेऽपि वस्तुगत्या नासाधारण्यं किन्तु तदग्रह एवेत्यस्वरसादाह किञ्चेति।स्वरूपम्।अधिकरणप्रतियोगिनोः स्वरूपम् । प्रागेव सिद्धेरिति । इदमापाततःस्वरूपसिद्धावपि इतरभेदत्वेन पृथिव्यां तदसिद्धेः वस्तुतोऽनुगतधीबलात् अन्योन्याभावस्यातिरिक्तस्यावश्यकत्वे तत एव प्रतीतिव्यवहारयोरुपपत्तेश्च स्वरूपस्याभेदत्वकल्पने गौरवान्मानाभावाच्चेत्येव तत्त्वम्।वैधर्म्यमित्यस्यैव विवरणं जलादीति।तद्धीति।तादृशप्रतियोगित्वं हीत्यर्थः।प्रतियोगित्वस्य प्रतियोगिरूपत्वादिति भावः । जलादाविति।व्यतिरेकव्याप्तिग्रहार्थं तस्यावश्यकत्वादिति भावः । ननु अन्योन्याभावरूपो भेदः साध्य इत्यत आह अन्योन्याभावस्त्विति । वैधर्म्येति । प्रकृते च पृथिवीत्वमेव वैधर्म्यमिति भावः । तथापीति । जलादिप्रतियोगिकपृथिवीतरत्वावच्छिन्नप्रतियोगिताकसामान्यान्योन्याभावस्याप्रसिद्धिरित्यर्थः । जलादिप्रत्येकेति ।

न वेति संशयेन तेजोभिन्नत्वेऽवगते पृथिवी तेजोभिन्ना सती जलादिद्वादशभिन्ना न वेति संशये तेजोभिन्नत्वे सति जलादिद्वादशभिन्नत्वं प्रसिद्धं तदेव साध्यम्, एकविशेषणविशिष्टे विशेषणान्तरबुद्धेरेव विशिष्टवैशिष्ट्यज्ञानत्वात्, एवञ्च संशयप्रसिद्धं साध्यमादाय व्यतिरेकादिनिरूपणम्। यद्वा पृथिवीजलभिन्ना न वेत्यादि प्र-

---

जलत्वाद्यवच्छिन्नप्रतियोगिकेत्यर्थः। असाधारण्येति। जलभेदवत्तया निश्चिते वाय्वादौ पृथिवीत्वस्य वर्त्तमानत्वादिति भावः। क्वचिच्च अतिप्रसङ्गादिति पाठः। तत्र वाय्वादावतिप्रसक्तत्वादित्यर्थः, तथाचासाधारण्यमिति भावः। तेजोभिन्ना न वेति। तेजोभिन्नत्वञ्च जलादौ प्रसिद्धमिति भावः। तेजोभिन्नत्वेऽवगते तेजोभिन्नत्वप्रकारेण पृथिव्यामवगतायामित्यर्थः। एतेनाग्रिमसंशयोपयुक्तधर्मितावच्छेदकविशिष्टधर्मिज्ञानं सम्पादितम्। पृथिवी तेजोभिन्ना पृथिवी जलादिद्वादशभेदवती न वेत्यर्थः। अत्र द्वादशभेदाः कोटयः। जलादिभिन्नत्वमिति। जलादिद्वादशभिन्नत्वमित्यर्थः। ननु तेजोभिन्नत्वविशिष्टजलादिद्वादशभिन्नत्वं कथमुक्तसंशयेन प्रसिद्धं तेन विशिष्टबुद्धेरुलस्य तेजोभिन्नत्वस्य जलादिद्वादशभिन्नत्वस्य चावगाहनेऽपि विशिष्टस्य पूर्वमप्रसिद्धेरित्यत आह एकेति। तथा चोक्तसंशयस्यापि विशिष्टवैशिष्ट्यज्ञानरूपतया विशेष्यतावच्छेदकीभूतं तेजोभिन्नत्वं सामानाधिकरण्यसंसर्गेण विधेये जलादिद्वादशभिन्नत्वे प्रकारीभूय भासते विशिष्टवैशिष्ट्यबोधे विशेष्यतावच्छेदकस्य सामानाधिकरण्यसंसर्गेण विधेये प्रकारत्वनियमादितिं भावः। व्यतिरेकादीति। आदिना पक्षे साध्यतावच्छेदकावच्छिन्नसाध्यवैशिष्ट्यस्य परिग्रहः।तदिदं तेजोभिन्नत्वविशिष्टजलादिद्वादशभेदाः साध्या इत्यभिप्रेत्योक्तम्।तेजोभिन्नत्वविशिष्टजलभेदः तद्विशिष्टो वायुभेद इति क्रमेण परस्परविशिष्टभेदः साध्य इत्यभिप्रेत्याह यद्वेति।पृथिवी जलभिन्ना न वेत्या-

त्येकं त्रयोदशसंशयविषयाणां त्रयोदशान्योन्याभावानां समुदायः पृथिव्यामवगतो व्यतिरेकादिनिरूपकः। न चैवं पृथिव्यामेव साध्यप्रसिद्धेर्व्यतिरेकिवैयर्थ्यम्, साध्यनिश्चयार्थं व्यतिरेकिप्रवृत्तेः। न चासाधारण्यम्, समुदितान्योन्याभावानां साध्यत्वे सपक्षाभावादिति चेत्। न। साध्यनिश्चये हि साध्यव्यतिरेकनिश्चयो भवत्येव साध्यसन्देहे तद्व्यतिरेकसंशयस्य वज्रलेपत्वात्, तथा च संशय-

---

दीति। आदौ पृथिवी जलभिन्ना न वेति संशयः ततो जलभिन्ना पृथिवी तेजोभिन्ना न वेति संशयेन जलभिन्नत्वविशिष्टतेजोभिन्नत्वे प्रसिद्धे जलभिन्नत्वविशिष्टतेजोभेदवती पृथिवी वायुभेदवती न वेति संशय इति क्रमेण त्रयोदशसंशयविषयेत्यर्थः। समुदाय इति। समुदायः ऐकाधिकरण्यम्। ऐकाधिकरण्यविशिष्टत्रयोदशान्योन्याभावा इत्यन्वयः पृथिव्यामवगत इति। पृथिव्यां प्रसिद्धाः सन्तो व्यतिरेकादिनिरूपका इत्यर्थः। साध्यनिश्चयार्थमिति। पृथिव्यां साध्यप्रसिद्धेः संशयरूपत्वादिति भावः। समुदितेति। एकाधिकरण्यावच्छिन्नेत्यर्थः। तद्व्यतिरेकसंशयस्येति। तथा च जलादावपि साध्यव्यतिरेकसन्देहात् कथं तत्र व्यतिरेकव्याप्तिनिश्चयः स्यादिति भावः। इदमापाततः। पृथिव्यां साध्यसन्देहसत्त्वेन तत्र व्यतिरेकनिश्चयासम्भवेऽपि जलादौ तद्व्यतिरेकनिश्चये बाधकाभावात्, न ह्येकत्र सन्देहे सर्वत्र सन्देहः, पृथिव्यां रूपादिसन्देहेऽपि वायौ तदभावनिश्चयस्यानुभविकत्वात्, जले जलभेदाभावग्रहसत्त्वेन विशेषदर्शनसत्त्वाच्च एकदेशविरहनिश्चयस्यापि समुदायसंशयविरोधित्वात्। न च प्रतियोगिमत्तानिश्चयस्याभावनिश्चयहेतुत्वात् कथं जले तद्व्यतिरेकनिश्चय इति वाच्यम्। तादृशकार्यकारणभावान्तरे मानाभावात् लाघवेन प्रतियोगितावच्छेदकनिश्चयमात्रस्याभावप्रत्यक्षहेतुत्वात्। अथ ज-

रूपासाध्यसिद्धिरिति शिष्यबन्धनम् । एतेन पृथिवी जलादिभ्यो भिन्नेति विप्रतिपत्तिरूपवादिवाक्यादाकाङ्क्षादिमतोऽपूर्वार्थप्रतिपादकात् साध्यप्रसिद्धिरिति परास्तम्। वाक्यादेव पृथिव्यां साध्यसिद्धेर्व्यतिरेकिवैयर्थ्यात् । न च तद्बुद्धौ वादिवाक्यजन्यत्वेनाप्रामाण्यसंशयात् नि-

---

लादौ साध्याभावनिश्चयः कथं स्यात्, मनोभेदस्यापि प्रविष्टत्वेनायोग्यतया प्रत्यक्षासम्भवात् । न च जलं तेजोभिन्नत्वविशिष्टजलादिद्वादशभेदाभाववत् जलभेदाभाववत्त्वादित्यनुमानात् तत्सिद्धिरिति वाच्यम् । एतस्यापि व्यतिरेकरूपत्वेन तादृशद्वादशभेदाभावाभावस्य क्वाप्यनिश्चितत्वेन व्यतिरेकव्याप्तिनिश्चयासम्भवादिति चेत् । न । साध्याभावोपस्थितिजलेन्द्रियसन्निकर्षयोः सत्त्वेनोपनीतनिश्चये बाधकाभावादिति । वस्तुतस्तु पृथिवी तेजोभिन्ना न वेति संशयानन्तरं तेजोभिन्ना पृथिवी जलादिद्वादशाभिन्ना न वेति संशयो हि तेजोभिन्नत्वांशे संशयाकार एव भविष्यति संशयसामग्रीसत्त्वात्, तथा चापसिद्धान्तः धर्मितावच्छेदकांशे संशयाकारसंशयस्याऽस्माभिरनङ्गीकारात् । अत एव धर्मिणि धर्मितावच्छेदकप्रकारकनिश्चयो गुरुरपि प्राचीनः संशये हेतुरुच्यते । किञ्च विशिष्टवैशिष्ट्यबोधे विशेष्यतावच्छेदकं सामानाधिकरण्यसंसर्गेण विधेये प्रकारीभूय भासते इत्यत्र मानाभावः । किन्तु विशेष्यतावच्छेदकविशिष्टे विधयवैशिष्ट्यमात्रं तद्विषयः तथा च कथमुक्तसंशयेन साध्यतावच्छेदकप्रकारेण विशिष्टसाध्यप्रसिद्धिरित्येवं दूषणं सारम् । एतेनेति जलादिभ्योभिन्नेतीतिविप्रतिपत्तिरूपेति । प्रतिवाद्यभिमतसाध्याविरोधिकोटिप्रतिपादकेत्यर्थः । वादिवाक्यादिति । वाद्युक्तप्रतिज्ञावाक्यादित्यर्थः ।अपूर्वार्थप्रतिपादकादिति । पूर्वाप्रतीतस्यापि विशिष्टार्थस्य विशेष्ये विशेषणमिति रीत्या प्रतिपादकादित्यर्थः।व्यतिरेकिवैयर्थ्यादिति । व्यतिरेकिणो व्यतिरेकसह-

श्रयेऽपि संशय इति तन्निश्चयार्थं व्यतिरेकीति वाच्यम्। तर्हि संशयप्रसिद्धं साध्यं तस्य च न व्यतिरेकनिश्चायकत्वमित्युक्तत्वात्, स्वार्थानुमाने तदभावाच्च ॥

अथ केवलव्यतिरेक्यनुमानसिद्धान्तः ।

उच्यते। घटादावेवेतरसकलभेदस्य प्रत्यक्षतः प्रसिद्धिः घटो न जलादिरिति प्रतीतेः । नन्वयमन्योन्याभा-

---

चारज्ञानजन्यव्याप्तिज्ञानस्य तत्रानुमितिजनकत्वाभ्युपगमवैयर्थ्यादित्यर्थः।संशयः।तदुत्तरं संशयः स्यादित्यर्थः।तन्निश्चयार्थम्।अगृहीताप्रामाण्यकतन्निश्चयार्थम्।व्यतिरेकी व्यतिरेकिणो यथोक्तव्याप्तिज्ञानस्य तत्रानुमितिजनकत्वाभ्युपगमः । संशयप्रसिद्धमिति। अप्रामाण्यसंशयाक्रान्तनिश्चयविषयीभूतमित्यर्थः।तस्य च तादृशनिश्चयस्य च। उक्तत्वात् सकलप्रामाणिकैरुक्तत्वात्।तदभावाच्चेति। वादिवाक्यात् साध्यप्रसिद्धेरसम्भवाच्चेत्यर्थः ॥

इति श्रीमथुरानाथतर्कवागीश—विरचिते तत्त्वचिन्तामणिरहस्ये अनुमानाख्यद्वितीयखण्डरहस्ये केवलव्यतिरेक्यनुमानपूर्वपक्षरहस्यम् ।

इतरसकलभेदस्येति। पृथिवीतरत्वावच्छिन्नप्रतियोगिताकभेदस्येत्यर्थः।न जलादिरिति। न पृथिवीतर इत्यर्थः। यद्यपि पृथिवीतरत्वस्य पृथिवीसामान्यभेदरूपस्य भेदविशेषणतया अतीन्द्रियपृथिवीघटितत्वात्तदवच्छिन्नान्योन्याभावो घटादौ कथं लौकिकप्रत्यक्षगम्यः, अन्यथा गुरुतरघटान्योन्याभावोऽपि लौकिकप्रत्यक्षगम्यः स्यात्। तथापि स्वावच्छिन्नप्रतियोगिताकत्वसम्बन्धेन पृथिवीत्ववद्भेद एव पृथिवीतरत्वं तत्र च पृथिव्या न प्रवेश इति भावः। इदमुपलक्षणम्।

वो न प्रत्यक्षः अतीन्द्रियप्रतियोगिकाभावत्वात् परमाणुसंसर्गाभाववत् योग्यानुपलब्धेरभावग्राहकत्वात् नय-

---

पृथिवीतरत्वरूपेण पृथिवीतरस्य भेदत्वरूपेण भेदस्य च खण्डशः प्रसिद्धत्वेन विशेष्ये विशेषणमिति न्यायेन पृथिवीतरभेद इति निरधिकरणकसिद्धिसम्भव इत्यपि बोध्यम् । अयोग्यधर्मानवच्छिन्नयोग्यमात्रवृत्तिप्रतियोगिताकत्वमभावप्रत्यक्षे तन्त्रमिति प्राचीनमते शङ्कते नन्विति।अतीन्द्रियप्रतियोगिकाभावत्वादिति । अतीन्द्रियप्रतियोगिकत्वेन पृथिवीतरत्वस्यापि अतीन्द्रियतया अतीन्द्रियधर्मावच्छिन्नप्रतियोगिताकत्वाच्चेत्यपि द्रष्टव्यम्।परमाणुसंसर्गाभाववदिति। परमाण्वन्योन्याभाववच्चेत्यपि बोध्यम् । ननु परमाणुसंसर्गाभावादेरपि घटादौ न कथं लौकिकाध्यक्षगम्यत्वं तत्र तदधिकरणविशेष्यकप्रतियोगितावच्छेदकसम्बन्धसंसर्गकप्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिमत्त्वोपलम्भसामान्याभावस्यैव तत्तदधिकरणेऽभावग्राहकत्वात्तस्य च तत्रापि सम्भवादित्यत आह योग्यानुपलब्धेरिति । तत्तदिन्द्रिययोग्यतासहिताया एव निरुक्तानुपलब्धेस्तत्तदिन्द्रियजाभावलौकिकप्रत्यक्षजनकत्वादित्यर्थः । तत्तदिन्द्रिययोग्यधर्मावच्छिन्नतत्तदिन्द्रिययोग्यमात्रवृत्तिप्रतियोगिताकाभावत्वमेव चाभावस्य तत्तदिन्द्रिययोग्यत्वं तच्च विषयनिष्ठतया अभावत्वावच्छिन्नलौकिकविषयतासम्बन्धेन चाक्षुषादिरूपतत्तदिन्द्रियजाभावप्रत्यक्षोत्पत्तौ हेतुः परमाणुसंसर्गाभावादेः प्रत्यक्षानुत्पत्त्या तथैव कल्पनात् । गुरुतरत्वविशिष्टघटत्वाद्यवच्छिन्नप्रतियोगिताकगुरुतरघटाभावादेः चाक्षुषादिलौकिकसाक्षात्कारवारणाय अवच्छिन्नान्तं प्रतियोगितावि शेषणं, घटत्वत्वपटत्वत्वादेः प्रतियोगितावच्छेदकधर्मस्यातीन्द्रियतया गुरुतरघटाभावादिवत्तादृशधर्मावच्छिन्नप्रतियोगिताकजात्यभावमात्रस्यैवाप्रत्यक्षत्वं सर्वसिद्धमेव।दीधितिकृतापि पदार्थखण्डने तथा लिखनात् अन्यथा सिद्धान्तेऽप्यगतेः, किन्तु घटत्वपटत्वादिजातीनां तत्तद्व्यक्तित्वावच्छिन्नप्रतियोगिताकाभाव एव लौकिकप्रत्यक्षगम्यः जात्यभावप्रत्यक्षत्वप्रतिपादकः प्राचां ग्रन्थो-

नोन्मीलनानन्तरं स्तम्भः पिशाचो न भवतीति प्रतीतेर्बाधकबलेन वायुर्वातीति वल्लिङ्गग्रहोपक्षीणत्वादिति चेत् । न । यो ह्यनुपलम्भोऽधिकरणे प्रतियोगिमत्त्वविरोधी सोऽभावं ग्राहयति न तु योग्यानुपलब्धिमात्रम्, अन्यथा वायौ रूपाभावप्रतीतिवत् जलपरमाणौ पृथि-

---

ऽपि तादृशजात्यभावपरः इत्यतो न तद्विरोधोऽपि । जातिनिष्ठतत्तद्व्यक्तित्वञ्च तादात्म्यसम्बन्धेन तत्तज्जातिरेवेति तद्योग्यमेव । तत्तद्गन्धतत्तद्रसवत्त्वाद्यवच्छिन्नप्रतियोगिताकतत्तद्द्रव्यव्यक्त्यभावस्य घ्राणजरासनादिसाक्षात्कारवारणाय वायौ रूपसामान्याभावस्य चाक्षुषसाक्षात्कारवारणाय च वृत्त्यन्तं प्रतियोगिताविशेषणम्। तत्तद्गन्धवत्त्वतत्तद्रसवत्त्वाद्यवच्छिन्नप्रतियोगिताकतत्तद्द्रव्यव्यक्त्यभावस्य चाक्षुषतावारणाय प्रथमं तत्तत्पदम् । द्वितीयतत्तत्पदञ्च तादृशस्यैवाभावस्य घ्राणजरासनादिप्रत्यक्षतापत्तितादवस्थ्यवारणायेति भावः । नन्वेवं नयनोन्मीलनानन्तरं स्तम्भः पिशाचो न भवतीति प्रत्ययो न स्यादित्यत आह नयनेति। लिङ्गग्रहोपक्षीणत्वादिति। लिङ्गग्रहजन्यत्वादित्यर्थः । नयनोन्मीलनानुविधानन्तु लिङ्गग्रहार्थमिति भावः । निरुक्तयोग्यत्वस्य व्यतिरेकव्यभिचारान्न कारणत्वसम्भव इत्याह यो ह्यनुपलम्भ इति । हि यस्मात् यः देशः अनुपलम्भः प्रतियोगितावच्छेदकसम्बन्धसंसर्गकप्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिमत्तानिश्चयाभावविशिष्टः न विद्यते उपलम्भो यत्र इति व्युत्पत्तेः । अधिकरण इति निर्द्धारणे सप्तमी।तथा;चाधिकरणेषु मध्ये निरुक्तनिश्चयाभावविशिष्टो यो देशः प्रतियोगिमत्त्वविरोधी प्रतियोगितावच्छेदकसम्बन्धसंसर्गकाधिकरणत्वसम्बन्धेन प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिमत्तया आपादितसाक्षात्कारकः, सः देशः अभावं ग्राहयति अतीन्द्रियप्रतियोगिकस्याप्यभावस्य लौकिकसाक्षात्कारविषयो भवति । यथा योग्यद्रव्यवृत्तिगुणकर्मसामा-

बीत्वाभावप्रत्ययप्रसङ्गात् अधिकरणे प्रतियोगिसत्त्वञ्च

न्यादिकं रूपसामान्याभावस्य, घटादिः स्नेहसामान्याभावस्य, उद्भूतरूपवान् परमाणुर्महत्त्वसामान्याभावस्य, महान् वायुरुद्भूतरूपसामान्याभावस्य च लौकिकप्रत्यक्षविषयः। अयं गुणादिर्यदि चक्षुःसंयुक्तमहत्त्ववदुद्भूतरूपवत्समवेतत्वे सति रूपवान् स्यात् चाक्षुषवान् स्यात्, घटो यदि महत्त्वोद्भूतरूपवत्त्वे चक्षुरादिसंयुक्तत्वे च सति स्नेहवान् स्यात् चाक्षुषवान् स्यात् पृथिवीपरमाणुर्यदि उद्भूतरूपवत्त्वे चक्षुरादिसंयुक्तत्वे च सति महत्त्ववान् स्यात् चाक्षुषवान् स्यात् महान्वायुर्यदि महत्त्वे सति चक्षुरादिसंयुक्तत्वे च सत्युद्भूतरूपवान् स्यात् चाक्षुषवान् स्यात् इत्यापादने मूलशैथिल्यविरहादित्यर्थः। न त्वितितु शब्दः अत इत्यर्थे। नातो निरुक्तयोग्यतासहितैव निरुक्तानुपलब्धिरभावलौकिकप्रत्यक्षे कारणं व्यतिरेकव्यभिचारादित्यर्थः। ननु योग्यद्रव्यवृत्तिगुणकर्मसामान्यादिषु रूपसामान्याभावादीनां लौकिकप्रत्यक्षमेवासिद्धं परमाणुसंसर्गाभावलौकिकप्रत्यक्षवारणाय लाघवान्निरुक्तयोग्यताया एवाभावनिष्ठतया अभावलौकिकप्रत्यक्षकारणत्वकल्पनादन्यथा तत्र तेषां लौकिकप्रत्यक्षाभ्युपगमे मनोद्रव्यादावपि तेषां लौकिकप्रत्यक्षापत्तिवारणाय यत्राधिकरणे तादृशापादनं न सम्भवति अनन्ततत्तदधिकरणभेदस्याधिकरणनिष्ठतया वक्ष्यमाणक्रमेण तत्तदभावलौकिकप्रत्यक्षकारणत्वकल्पने महागौरवापत्तिरित्यत आह अन्यथेति। निरुक्तयोग्यताया एवाभावलौकिकप्रत्यक्षकारणत्वे इत्यर्थः। रूपाभावप्रतीतिवदिति। रूपाभावपदं महत्त्वसमानाधिकरणोद्भूतरूपाभावपरं घटादिवृत्तितत्तद्रूपाभावपरं वा। पूर्वपक्षिनये तस्यातीन्द्रियप्रतियोगिकत्वेनाप्रत्यक्षत्वात् सिद्धान्तिनयेऽपि वायौ तत्प्रत्यक्षानभ्युपगमात्। पृथिवीत्वाभावप्रत्ययेति। तत्तद्व्यक्तित्वावच्छिन्नप्रतियोगिताकपृथिवीत्वाभावलौकिकचाक्षुषप्रसङ्गादित्यर्थः। निरुक्तयोग्यतायास्तादृशपृथिवीत्वाभावे सत्त्वात्। ननु परमाणौ पृथिवीत्वाभावलौकिकचाक्षुषः किं परमाण्वंशेऽलौकिकरूप आपाद्यते स्थूलजले पृथिवीत्वाभावेन समं लौकिकसन्नि-

कर्षदशायां परमाण्वंशे उपनीतभानाद्यात्मकस्य पृथिवीत्वाभावलौकिकचाक्षुषस्येष्टत्वात् । न च परमाणुघटितचक्षुःसन्निकर्षेण पृथिवीत्वाभावलौकिकचाक्षुष आपाद्यते इति वाच्यम् । चक्षुःसंयुक्तमहदुद्भूतरूपवद्विशेषणतायाः पृथिवीत्वाद्यभावग्राहकतया तद्घटितसन्निकर्षेण तच्चाक्षुषासम्भवात्, परमाणुसन्निकर्षदशायां पृथिवीत्वशून्ययोग्यपदार्थान्तरसन्निकर्षस्यावश्यकतया तदानीं पृथिवीत्वाभावसाक्षात्कारस्यावश्यकत्वेन तत्र परमाणुघटितसन्निकर्षजन्यत्वाभावस्य शपथनिर्णेयत्वाच्चेति चेत् । न । परमाण्वाद्यंशे उपनीतभानात्मकोऽपि परमाण्वादिवैशिष्ट्यावगाहिपृथिवीत्वाद्यभावलौकिकचाक्षुषो न भवति इति सिद्धान्तात् । परमाणौ पृथिवीत्वाभावसाक्षात्कारो न भवति वायौ रूपसामान्याभावसाक्षात्कारो न भवतीत्यादिसकलप्रामाणिकसिद्धान्तप्रवादान्यथानुपपत्त्या तथैव सिद्धान्तस्य निर्णीतत्वादेवं सर्वत्र । न चैवं सिद्धान्ते स्थूलजले पृथिवीत्वाभावप्रत्यक्षानन्तरं पृथिवीत्वाभावसामान्यलक्षणप्रत्यासत्त्या पृथिवीत्वाभावप्रकारेण परमाणोश्चाक्षुषो न स्यात् इति वाच्यम् । तत्र पृथिवीत्वाभावनिष्ठालौकिकप्रकारतानिरूपितविषयतायाः एव परमाणावभ्युपगमात् तन्निष्ठलौकिकप्रकारतानिरूपितविषयतायास्तु सन्निकृष्टस्थूलजलमात्रवृत्तित्वादिति भावः।एतच्चोपलक्षणम्। निरुक्ततत्तदिन्द्रिययोग्यत्वं तत्तदिन्द्रियजन्यलौकिकसाक्षात्कारविषयत्वं तत्तदिन्द्रियजन्यलौकिकसाक्षात्काराप्रतिबन्धकत्वं वा । नाद्यः, भूतलादौ घटादिसामान्याभावस्याप्यचाक्षुषतापत्तेः दैवात् त्वगादिमात्रगृहीतघटादिव्यक्तेरपि तत्प्रतियोगिकुक्षिनिक्षिप्तत्वात् । न द्वितीयः, प्रतिबन्धकत्वाननुगमेनाऽननुगमतादवस्थ्यात् तत्तद्गन्धवत्त्वतत्तद्रसवत्त्वावच्छिन्नतत्तद्द्रव्यव्यक्त्यभावस्यापि घ्राणजरासनादिप्रत्यक्षविषयतापत्तेः । द्रव्यस्य घ्राणजादिप्रत्यक्षप्रतिबन्धकत्वे मानाभावात् गन्धतत्समवेतघ्राणजादिकं प्रति घ्राणसंयुक्तसमवायघ्राणसंयुक्तसमवेतसमवायादेर्हेतुतयैव द्रव्यस्य घ्राणजप्रत्यक्षापादनासम्भवात् । ननु समानेन्द्रियजन्यप्रतियोगितावच्छेदकविशिष्टप्रतियोग्याहार्य्यारोपस्याभावलौकिकप्रत्यक्षहेतुतया तदभावादेव जलपरमाणौ न पृथिवीत्वाभावलौकिकप्रत्यक्षं परमाणोरयोग्यतया तत्र चक्षुषा पृथिवीत्वारोपासम्भवादित्यत आह अधिकरण इ-

तिजलपरमाणावित्यर्थः। प्रतियोगिसत्त्वञ्च पृथिवीत्वाभावस्य प्रतियोगिसत्त्वञ्च पृथिवीत्वाभावस्य प्रतियोगिसत्वमपि। तर्कितं विशेष्यतया सम्भवदाहार्य्यारोपकमानन्वेवं तव नयेऽपि योग्याधिकरणमादाय लौकिकसन्निकर्षदशायामुपनीतपरमाणुप्रकारको न कुतः पृथिवीत्वाभावलौकिकचाक्षुषः, कुतो वा वायौ रूपं नास्ति वायौ स्नेहो नास्तीत्याद्युपनीतवायुप्रकारको रूपसामान्याभावस्नेहसामान्याभावयोर्न लौकिकचाक्षुषः, कुतो वा परमाणौ महत्त्वं नास्तीति मनसि महत्त्वं नास्तीत्युपनीतपरमाणुमनःप्रकारको न महत्त्वाभावलौकिकचाक्षुषः, कुतो वा मनसि पवनीयपरमाणौ वा नोद्भूतरूपाभावस्य लौकिकचाक्षुषः अभावानां योग्यत्वात् अन्यथा अन्यत्रापि तल्लौकिकचाक्षुषानुपपत्तेः विना च कारणाभावं कार्याभावानभ्युपगमात्। अथ यस्मिन्नधिकरणे पक्षवृत्तिधर्मविशेषितेन प्रतियोगिग्राहकतावच्छेदकावच्छिन्नातिरिक्तविशेषितेन च तत्संसर्गकाधिकरणत्वसम्बन्धेन तद्धर्मावच्छिन्नत्वेन हेतुत्वात्तदिन्द्रियजन्यसाक्षात्कारवत्त्वमापादयितुं शक्यते तदधिकरण एव तत्सम्बन्धावच्छिन्नप्रतियोगिताकाभावनिष्ठलौकिकविषयतासम्बन्धेन तादिन्द्रियजन्यतादृशाभावप्रत्यक्षमुत्पद्यते न तु अन्यत्राधिकरणे इति नियमः। यत्राधिकरणे तादृशापादनादिकं न सम्भवति तत्तदधिकरणभिन्नत्वस्वरूपस्याधिकरणयोग्यत्वस्याधिकरणनिष्ठतया तादृशविषयतासम्बन्धेन तत्तदिन्द्रियजन्यतत्तत्सम्बन्धावच्छिन्नाभावप्रत्यक्षोत्पत्तौ हेतुत्वात्। इत्थञ्च परमाण्वादावेव तादृशपृथिवीत्वादिमत्त्वे च चाक्षुषत्वापादनासम्भवान्न तत्र चक्षुरादिना तदभावस्य योग्यस्यापि ग्रहः किन्तु योग्यजलादावेव तद्ग्रहः। घटादौ समवायसम्बन्धावच्छिन्नप्रतियोगिताकस्नेहादिसामान्याभावस्तु चक्षुरादिना गृह्यत एव, घटो यदि चक्षुरादिसंयुक्तत्वे सति महत्त्वोद्भूतरूपवत्त्वे च सति स्नेहवान् स्यात् चाक्षुषवान् स्यात् इत्यापादनस्य मूलशिथिलत्वविरहात्। व्यर्थविशेषणत्वेष्टापत्त्योः सम्भवेऽपि मूलशैथिल्यविरहादेवापादनादियोग्यतानपायात् आपत्त्यादेः सर्वत्रासम्भवात् व्याप्त्यादिभ्रमजन्यापाद्यव्यतिरेकादिभ्रमजन्यापत्त्यादेरतिप्रसक्तत्वाच्च योग्यताया एव यथोक्तनियमघटकत्वात्। सा च प्रकृते व्याप्तिमात्रम्। नन्विष्टापत्त्यादिविरहेऽपीति चेत्त-

तर्कितं यदि हि स्तम्भः पिशाचः स्यात् स्तम्भवदुपलभ्येत न पिशाचानुपलम्भः स्यात् । न च पृथिवीजलाद्विद्यते जलावृत्तिधर्मवत्त्वात् तेजोवत् एवमन्येभ्योऽपि भेदसिद्धौ द्वादशभिन्नेति विशेषणं दत्त्वा समवायभेदसाधनादन्वयिन एव पृथिव्यां त्रयोदशभेदसिद्धिरिति किं व्यतिरेकिणेति वाच्यम् । जलादिभिन्ना सती समवाय-

---

र्हि चक्षुरादिना वाय्वादौ तद्व्यक्तित्वावच्छिन्नप्रतियोगिताकस्तम्भत्वात्यन्ताभावप्रत्यक्षमपि न स्यात् वाय्वादौ स्तम्भत्ववत्त्वेन साक्षात् साक्षात्कारवत्त्वापादनासम्भवात् गृहादिधारकस्यैव स्तम्भपदवाच्यतया चक्षुःसंयुक्तत्वे पिशाचात्मकस्तम्भे मूलशैथिल्यादित्यतआह यदि हीति । स्तम्भः पिशाचः स्यात्, चक्षुःसंयुक्तः कश्चित् पिशाचः स्तम्भः स्यात्। स्तम्भवदुपलभ्येतेति।सोऽपि पिशाचः पिशाचस्तम्भान्तरवच्चाक्षुषः स्यादित्यर्थः । स्तम्भत्वस्य महत्त्वोद्भूतरूपवत्त्वनियतत्वादिति भावः । न पिशाचानुपलम्भः स्यात्, न सर्व्वः पिशाचो लौकिकसाक्षात्काराविषयः स्यात् । पिशाचत्वं लौकिकसाक्षात्काराविषयत्वव्याप्यं न स्यादिति यावत् । तथा च पिशाचत्वस्य लौकिकसाक्षात्काराविषयत्वव्याप्यत्वान्यथानुपपत्त्या स्तम्भत्वं न पिशाचवृत्तीति यथोक्तनियमे न किमपि बाधकमिति भावः । वस्तुतस्तु पनसाम्रादिस्तम्भसाधारणस्य स्तम्भत्वस्य पिशाचवृत्तित्वे पनसत्वाम्रत्वपिशाचत्वमादाय साङ्कर्य्यापत्तेः किन्तु स्तम्भत्व माम्रत्वपनसत्वादिव्याप्यं नाना, तच्च न पिशाचवृत्ति पिशाचोऽपि यदि स्तम्भस्तदा तद्व्याप्यस्तम्भत्वं पिशाचत्ववदतीन्द्रियमेव तदत्यन्ताभावो न क्वापि लौकिकाध्यक्षगम्य इति यथोक्तनियमे न किमपि बाधकमित्येव तत्त्वम् । यथोक्तनियमस्य प्रवृत्त्यवयवव्यावृत्तिरस्मत्कृते सिद्धान्तरहस्ये अभावग्राहकयोग्यताविचारे अनुसन्धेया । द्वादशभिन्नेति विशेषणमिति।

भिन्नेति बुद्धावपि त्रयोदशभिन्नेति बुद्धेर्व्यतिरेकिसाध्यत्वात्। न च घटस्यापि पक्षत्वादंशतः सिद्धसाधनम्, सर्वा पृथिवीतरभिन्नेत्युद्देश्यप्रतीतेरभावात्, पक्षतावच्छेदकनानात्वे हि तत्, अत एवानित्ये वाङ्मनसे इत्यत्र

द्वादशभेदान् पक्षे विशेषणीकृत्येत्यर्थः। समवायभेदसाधनादिति। समवायावृत्तिधर्मवत्त्वादिरूपसमवायभेदसाधकाद्धेतोरित्यर्थः। अन्वयिन एवेति। अन्वयसहचारज्ञानजन्यव्याप्तिज्ञानादेवेत्यर्थः। भेदसिद्धिरिति। अस्त्विति शेषः। किं व्यतिरेकिणेतीति। किं व्यतिरेकसहचारज्ञानजन्यव्याप्तिज्ञानस्यानुमितिकरणत्वेनेत्यर्थः। जलादिभिन्ना सतीति। विशिष्टाधिकरणकवैशिष्ट्यबुद्धौ सामानाधिकरण्यसम्बन्धेन विशेष्यतावच्छेदकस्य विधेये प्रकारत्वादित्यभिमानः। त्रयोदशभिन्नेतीति। पृथिवीतरत्वावच्छिन्नप्रतियोगिकभेदप्रकारकबुद्धेरित्यर्थः। व्यतिरेकिसाध्यत्वात्, व्यतिरेकिण एव साध्यत्वात्। एवकाराद्यथोक्तहेतुकान्वयिव्यवच्छेदः। सर्वा पृथिवीति। पृथिवीत्वस्यावच्छेदकत्वस्फोरणाय सर्वपदम्। इत्युद्देश्यप्रतीतेः इत्याकारकफलीभूतानुमितिसमानाकारप्रतीतेः। पृथिवीत्वावच्छेदेन पृथिवीत्वधर्मितावच्छेदककपृथिवीतरभेदप्रकारकप्रतीतेरिति यावत्। तथा च तद्धर्मावच्छेदेन तद्धर्मधर्मितावच्छेदककानुमितिं प्रति तद्धर्मावच्छेदेन तद्धर्मधर्मितावच्छेदककसिद्धेरेव प्रतिबन्धकतया घटत्वावच्छेदेन घटे सिद्धिसत्त्वेऽपि पृथिवीत्वावच्छेदेन पृथिवीत्वधर्मितावच्छेदककानुमितौ अविरोध इति भावः। ननु तद्धर्मावच्छेदेन तद्धर्मावच्छिन्नविशेष्यकानुमितिं प्रति तदन्यधर्मावच्छेदेन तदन्यधर्मावच्छिन्नस्वसमानविशेष्यताकसिद्धिरपि प्रतिबन्धिका अनित्ये वाङ्मनसे वाङ्मनोऽन्यतरत्वादित्यादौ वाक्यतावच्छेदेन वाक्यत्वावच्छिन्नविशेष्यकसिद्धेरपि मनस्त्वावच्छेदेन मनस्त्वावच्छिन्नविशेष्यकसमूहालम्बनानुमितिप्रतिबन्धकत्वात्, तथा च घटत्वावच्छेदेन घटत्वावच्छिन्नविशेष्यकसिद्धिसत्त्वे पृथिवीत्वाव-

नित्या वागितिबुद्धेरुद्देश्यायाः सिद्धत्वादंशतः सिद्धसाधनम्, अन्यथानुमानमात्रोच्छेदात् पक्षस्य सिद्धस्यैव साध्यत्वात् । न च घटः कथं पक्षः साध्यनिश्चयेन संशयसिषाधयिषयोरभावादिति वाच्यम् । सर्वा पृथिवी इतरभिन्ना न वेति संशयस्य तत्प्रकारकसिषाधयिषायाश्च सामान्यतो घटविषयत्वात् घटत्वेन विशेषदर्शनं सिद्धिर्वा।

च्छेदेन घटत्वावच्छिन्नविशेष्यकसिद्धिसत्त्वे पृथिवीत्वावच्छेदेन पृथिवीत्वरूपेण घटे कथमनुमितिरित्यत आह पक्षतावच्छेदकनानात्वे हीति । तद्धर्मावच्छेदेन तद्धर्मावच्छिन्नविशेष्यकत्वे सति तदन्यधर्मावच्छेदेन तदन्यधर्मावच्छिन्नविशेष्यकानुमितौ हीत्यर्थः । तत् तदन्यधर्मावच्छेदेन तदन्यधर्मावच्छिन्नस्वसमानविशेष्यकसिद्धेः प्रतिबन्धकत्वम् । उद्देश्यायाः उद्देश्यानुमितिविशेष्यतावच्छेदकावच्छिन्नविशेष्यिकायाः । उद्देश्यानुमितिश्च मनस्त्वावच्छिन्नविशेष्यकसमूहालम्बनानुमितिः । सिद्धत्वात् । सत्त्वात् । अंशतः सिद्धसाधनम् अंशतः सिद्धेरेवोपधायकं साधनं वाक्यत्वमनस्त्वावच्छिन्नविशेष्यकसमूहालम्बनानुमितेरनुपधायकं साधनमिति यावत् । ननु लाघवात्तद्धर्मिकसिद्धित्वेनैव तद्धर्मिकानुमितिसामान्यं प्रति प्रतिबन्धकता धर्मिविशेषान्तर्भावस्यावश्यकत्वादित्यत आह अन्यथेति ! यदि तद्धर्मिकसिद्धित्वेनैव तद्धर्मिकानुमितिसामान्यं प्रति विरोधित्वं तदेत्यर्थः । अनुमानमात्रेति । हेतुसाध्यसहचारघटकतया अधिकरणत्वरूपेण निखिलसाध्याधिकरणे साध्यवत्त्वविषयकव्याप्तिज्ञानजन्यानुमितिमात्रोच्छेदापातादित्यर्थः।पक्षस्येति । सप्तम्यर्थे षष्ठी।सिद्धस्यैव सहचारघटकतया निश्चितस्यैव । साध्यत्वात् तादृशानुमितौ विधेयत्वात् । न चेति । सन्देहसिषाधयिषयोरन्तरस्य पक्षतात्ववा-

अतस्तेन रूपेण संशयसिषाधयिषे न स्तः पृथिवीत्वेन ते भवतः एव, धूमवान् वह्निमानिति धूमवत्त्वेन वह्निनिश्चयेऽपि पर्वते वह्निसंशयवत्। यद्वा सर्वत्वेन रूपेण न पक्षता सर्वत्राविप्रतिपत्तेः घटाद्येकदेशे इतरभेदस्य प्रत्यक्षसिद्धत्वात् तथा चैकदेशे विप्रतिपत्तौ सामान्ये इतरभेदसाधने अर्थान्तरम्, किन्तु सामान्येन पृथिवीत्वेन यावदेव विप्रतिपत्तिविषयस्तावतामेव पक्षता विशेष्यानुगमात्। तर्हि पृथिवी इतराभिन्ना पृथिवीत्वाद्घटवदित्यन्वयिनैवेतरभेदस्य सिद्धत्वात् किं व्यतिरेकिणा, घट-

---

दिनां प्राचां नय इति शेषः। पक्षः अनुमित्युद्देश्यः। सर्वा पृथिवीति। सकलपृथिव्या विशेष्यत्वस्फोरणाय सर्वपदम्। पृथिवीत्वरूपेण सकलपृथिवीविशेष्यकेतरभेदसंशयस्येत्यर्थः। तत्प्रकारकेति। पृथिवीत्वावच्छिन्नसकलपृथिवीविशेष्यकसिद्धित्वप्रकारकसिषाधयिषायाश्चेत्यर्थः। सामान्यतः पृथिवीत्वरूपेणानुघटे विशेषदर्शनसिद्धिसत्त्वेन कथं संशयसिषाधयिषयोस्तद्विषयत्वं ज्ञानादेः स्वरूपसत एव स्वविषयकेच्छाविरोधित्वादित्यत आह घटत्वेनेति। सिद्धिर्वेति। अत इति पर्वते पर्वतत्वविशिष्टे। इदमुपलक्षणम्। प्रत्यक्षतः सिद्धिसत्त्वेऽपि अनुमितित्वादिरूपेण संशयसिषाधयिषयोर्बाधकाभावाच्च। समानधर्मिकनिश्चयस्यैव संशयविरोधित्वमते समाधत्ते यद्वेति। सर्वत्वेनेति। तस्याः पृथिव्या न पक्षतेत्यर्थः। अविप्रतिपत्तेः असंशयात्। विप्रतिपत्तौ संशये। सामान्य इति। सन्देहाविशिष्येऽपीति शेषः। इतरभेदसाधने इतरभेदानुमित्यभ्युपगमे। अर्थान्तरं सिद्धान्तान्तरम्। अपसिद्धान्त इति यावत् तद्धर्मिकानुमितौ तद्धर्मिकसंशयस्यैव प्राचीनमते पक्षतात्वादिति भावः।

साधारणपक्षत्वेऽप्यभेदानुमानवत् पक्षस्यापि दृष्टान्तत्वाविरोधात् पक्षान्यत्वं हि तत्रातन्त्रं, किन्तु साध्यवत्तया निश्चितत्वं प्रयोजकम्। न च पृथिवीत्वाग्रहे पूर्वं गृहीतं यत्र साध्यं पश्चात् स्मर्य्यते तत्र हेतुसाध्यसामानाधिकरण्याग्रहाद्व्यतिरेक्यवतारं इति वाच्यम्। हेतोरेव पक्षतावच्छेदकत्वेन घटे पृथिवीत्वग्रहदशायामितरभेदसामानाधिकरण्यग्रहावश्यम्भावादिति चेत्। सत्यम्, अ-

---

अविप्रतिपत्तेरिति यथाश्रुतन्तु न सङ्गच्छते, स्वार्थानुमाने विप्रतिपत्त्यभावेन विप्रतिपत्त्यभावस्य पक्षतात्वाभावाप्रयोजकत्वात्। सामान्येति। सकलपृथिवीनिष्ठेनेत्यर्थः। विप्रतिपत्तिविषयः संशयविषयः। पक्षता पृथिवीत्वेनानुमित्युद्देश्यता। अननुगमादिति। सर्व्वत्रेतरभेदस्यानिश्चयादित्यर्थः। शङ्कते तर्हीत्यादिना चेदित्यन्तेन। किं व्यतिरेकिणेति। किं व्यतिरेकव्याप्त्युपन्यासेनेत्यर्थः। अत एवाग्रे व्याप्त्युपन्यासस्येति संगच्छते। पूर्व्वमतेऽप्यनुमितित्वमुपपादयति अभेदानुमानवदिति। अयं घटः पूर्व्वानुभूतघटाभिन्नः तद्घटवृत्तिविलक्षणसंस्थानवत्त्वादित्यादिस्थैर्य्यसाधकाभेदानुमानवदित्यर्थः। पृथिवीत्वाग्रह इति। यत्र स्थले पूर्व्वं गृहीतं साध्यमुद्बोधकमहिम्ना पृथिवीत्वाग्रहे पश्चात् स्मर्य्यते इत्यर्थः। साध्यस्य प्रत्यक्षतादशायां पृथिवीत्वस्यापि प्रत्यक्षमावश्यकमतः स्मरणपर्यन्तानुधावनम्। व्यतिरेक्यवतारः व्यतिरेक्यव्याप्त्युपन्यासः। घट इति। इदञ्च घटसाधारणपक्षतादशायामित्युक्तमन्यथा तु अन्यस्मिन् पक्षे बोध्यम्। पृथिवीत्वग्रहेति। पक्षतावच्छेदकप्रकारेण पक्षज्ञानस्यावश्यकत्वात् इति भावः। इतरभेदेति। तथा च पक्षस्यैव अन्वयिदृष्टान्तत्वं सम्भवतीति भावः। न च प्रत्यक्षतः पृथिवीत्वग्रहदशायामितरभेदग्रहो नावश्यकः प्रतियोगिज्ञानस्य तदा अभावादिति वाच्यम्। व्यतिरेकव्याप्तिघटकत्वेन तज्ज्ञानस्य तदानीमावश्यकत्वादिति

न्वयितुल्यतया व्यतिरेकिणोऽपि सामर्थ्यादन्वयाप्रतिसन्धानदशायां व्यतिरेक्युपन्यासस्यापर्य्यनुयोज्यत्वात् तदुक्तम् । आस्तां तावदयं सुहृदुपदेशः, केवलव्यतिरेकिलक्षणं तावन्निर्व्यूढम् । अथ वा जलादीनां त्रयोदशान्योन्याभावाः त्रयोदशसु प्रसिद्धाः पृथिव्यां साध्यन्ते, अत एवाकाशे व्यतिरेकिणा जलादिमिलितप्रतियोगिकान्योन्याभावाप्रतीतावपि त्रयोदशान्योन्याभावाः साध्या इति

भावः । अन्वयितुल्यतयेति । यथा अन्वयव्याप्तिज्ञानस्य व्यतिरेकव्याप्तिज्ञानविरहस्थलेऽनुमितिजनकत्वमनुभवसिद्धं तथा अन्वयव्याप्तिज्ञानविरहस्थले व्यतिरेकव्याप्तिज्ञानस्यानुमितिजनकताया अनुभवसिद्धत्वेत्यर्थः । अन्वयाप्रतिसन्धानेति । अन्वयानुपन्यासदशायामित्यर्थः । तदुपन्यासदशायान्तु अधिकेन निग्रहात् पर्य्यनुयोगो भवत्येव इति भावः । अयमिति । अन्वयिनैव इतरभेदसिद्धौ किं व्यतिरेकव्याप्त्युपन्यासेनेति सुहृदुपदेश इत्यर्थः । एतदाशङ्कायां असद्युक्तिकत्वादिति भावः । केवलव्यतिरेकिलक्षणमिति केवलव्यतिरेकस्वरूपमित्यर्थः । निर्व्यूढमिति । अन्वयाप्रतिसन्धानदशायामपि व्यतिरेकव्याप्तिज्ञानादनुमितेरनुभवसिद्धत्वेन तस्यापि हेतुत्वादिति भावः । प्रसिद्धाः प्रत्येकवैधर्म्यलिङ्गकानुमित्यादिना प्रसिद्धाः । पृथिव्यां साध्यन्त इति । पृथिव्यां त्रयोदशत्वरूपेण साध्यन्ते इत्यर्थः । प्रत्येकरूपेण साध्यत्वे अग्रे नान्वयित्वासाधारण्ये इत्यसङ्गतेः । न च त्रयोदशान्योन्याभावानां प्रातिस्विकरूपेण त्रयोदशप्रसिद्धत्वेऽपि साध्यतावच्छेदकत्रयोदशत्वप्रकारेण सिद्ध्यभावात् कथमनुमितिरिति वाच्यम् । भिन्नभिन्नाधिकरणस्थानामप्यभावानां त्रयोदशत्वादिना ज्ञानसम्भवात् भिन्नाधिकरणस्थघटयोर्द्वौ घटादिरिति प्रतीतिवत् । जलादिमिलि-

नान्वयित्वासाधारण्ये । यद्वा जलं तेजःप्रभृतिद्वादशभिन्नप्रतियोगिकान्योन्याभाववत् द्रव्यत्वात्तेजोवदित्यनुमानात्त्रयोदशभिन्नस्य सामान्यतः सिद्धौ पृथिव्यां त्रयोदशभिन्नत्वं साध्यम् । न चान्वयित्वमसाधारण्यं वा, पक्षादन्यत्र साध्याप्रसिद्धेः । वस्तुगत्या पृथिव्यामेव साध्यसिद्धेः किं व्यतिरेकिणेति चेत् । न । पृथिवी त्रयोदशभिन्नेति व्यतिरेकिणं विना अप्रतीतेः । नन्वेवं पृथिवी जलादित्रयोदशभिन्नप्रतियोगिकान्योन्याभाववती द्रव्यत्वादिति पृथिवीभिन्नतद्भिन्नादिसिद्धिः स्यादिति चेत् । न । अप्रयोजकत्वात् प्रकृते चानुभूयमानजलादिवैधर्म्यस्य पृथिवीत्वशब्दाश्रयत्वादेः अतिरिक्तं विनानुप-

---

तेति। आकाशेतरत्वावच्छिन्नप्रतियोगिताकान्योन्याभावानुमित्यसम्भवेऽपीत्यर्थः । आकाशस्यैकव्यक्तित्वेन तत्रैकदेशे साध्यप्रसिद्ध्यसम्भवादिति भावः । त्रयोदशभेदानां त्रयोदशप्रत्येकं प्रसिद्धिमुक्त्वा एकत्रैव तेषां प्रसिद्धिमाह जलमिति । तेजःप्रभृतिद्वादशभिन्ननिष्ठभेदप्रतियोगीत्यर्थः । यथाश्रुते पृथिव्यां साधनीयस्य त्रयोदशभेदस्यास्मादसिद्धेः जलभेदस्यैवासिद्धत्वात् । इदञ्च प्रमाणान्तरेण पृथिव्यां द्वादशभिन्नत्वस्य प्रसिद्धिदशायां बोध्यम । त्रयोदशभिन्नत्वमिति । त्रयोदशत्वरूपेणेत्यर्थः । शङ्कते वस्तुगत्येति। पृथिवी त्रयोदशभिन्नेतीति । पृथिवी जलादित्रयोदशभिन्नत्यर्थः । प्रकृते चेति । यद्वा जलमित्यत्रेत्यर्थः । अनुभूयमानेति। तेजःप्रभृतिद्वादशभिन्नपृथिव्यादौ अनुभूयमानस्येत्यर्थः । पृथिवीत्वेति तेजःप्रभृतिद्वादशभिन्नपृथिवीनिष्ठान्योभावानुमानमधिकृत्य । शब्दाश्रयत्वेति ।

पत्तेः। नन्वितरभेदो यद्यन्योन्याभावस्तदा भावाद्भेदो न सिद्ध्येत अभावस्याभावान्तराभावात्, यदि च तेन समं स्वरूपभेद एव साध्यः तदाननुगमादनुमानाप्रवृत्तिः, भावो न भवतीत्यबाधितप्रतीतिबलादभावस्यापि अन्योन्याभावोऽस्तीति के चित्; तन्न, अपसिद्धान्तात्। अनतिप्रसक्ताधिकरणस्वरूपमात्रेणैवाभावप्रतीत्युपपत्तौ चाधिकाभावे मानाभावाच्च इति चेत्। न। इतरभावान्योन्याभावस्य साध्यत्वात्। न चैवमभावादत्रिवेकतादवस्थ्यं, तेन समं स्वरूपभेदस्यान्वयिना व्यतिरेकिणा वा साध्यत्वात्।

आकांक्षेतरभेदानुमानस्थले तेजःप्रभृतिद्वादशभिन्नाकाशनिष्ठान्योन्याभावानुमानमधिकृत्येति। अतिरिक्तामिति। पृथिव्यादेर्जलाद्यतिरिक्तत्वं विनेत्यर्थः। त्रयोदशत्वरूपेण त्रयोदशभेदाः साध्या इति द्वितीयकल्पे शङ्कते नन्विति। इतरत्वावच्छिन्नप्रतियोगिताकसामान्याभावस्य साध्यत्वे एतदाशङ्कायां असङ्गतेः तस्याभावाभावप्रतियोगिकस्यैकत्वादिति मन्तव्यम्। अभावान्तरेति। अधिकरणातिरिक्तभेदेत्यर्थः। स्वरूपभेद इति। अधिकरणस्वरूपभेदइत्यर्थः। अननुगमादिति। अधिकरणानामनन्तत्वेन चतुर्दशत्वरूपेण साध्यत्वासम्भवादित्यर्थः। अत्र कस्यचित् समाधानमाशङ्कते अबाधितेति। अभावत्वांशे अबाधितप्रत्ययेत्यर्थः। अस्ति अतिरिक्तोऽस्ति। अयमेकदेशिनं प्रति नापसिद्धान्त इत्यत आह अनतिप्रसक्तेति। मानाभावादिति। न चाभावत्वांशे अबाधितोक्तप्रत्यय एव मानमिति वाच्यम्। इदमिदं भवतीति प्रतीतिसाक्षिकस्याभावत्वस्य भावे स्वीकारात् अतिरिक्तधर्मिकल्पनामपेक्ष्य लाघ-

अन्ये तु पृथिवीत्वभिन्नधर्मात्यन्ताभाव एव साध्यः जलत्वादिप्रतियोगिकास्तावन्तोऽत्यन्ताभावा वा तत्तदसाधारणतत्तद्धर्मात्यन्ताभावयोगो वा एते चाभावा जलत्वं न घटादौ घटादिजलात्यन्ताभाववदिति प्रत्यक्षादेः क्व चित्तत्तद्वैधर्म्यादेव प्रसिद्धा इति नाप्रसिद्धिः । तावतामभावानां वैशिष्ट्यं न प्रसिद्धमिति चेत् । किमेतावता, न हि तावद्वैशिष्ट्यमत्र साध्यते, किन्तु जलत्वादीनां यावन्तोऽभावा इह साध्यास्ते च तत्र तत्र प्रसिद्धा एव तावद्वैशिष्ट्यधीस्तु फलम, अन्यथा सिद्ध-

---

वादिति भावः । स्वरूपभेदस्येति । अभावत्वावच्छिन्नप्रतियोगिताकभेदत्वरूपेणेत्यर्थः । अन्वयिनेति । भावत्वहेतुकान्वयिनेत्यर्थः । व्यतिरेकिणेति । पृथिवीत्वादिहेतुकव्यतिरेकिणेत्यर्थः । न चासाधारण्यम्, अन्यत्र साध्यानिर्णयदशायामनुमानप्रवृत्तेः । इदमुपलक्षणम् । अभावत्वावच्छिन्नप्रतियोगिताकभेदवत्त्वे सति जलादित्रयोदशान्योन्याभावस्य साध्यत्वे प्रथमानुमानेनाप्यभावभेदः सिध्यतीति मन्तव्यम् ।

पृथिवीत्वाभिन्नेति । पृथित्वासमानाधिकरणेत्यर्थः । नन्वत्राप्यसिद्धिरित्यस्वरसेनाह जलत्वादीति । तावन्तः त्रयोदशेत्यर्थः । तत्तदसाधारणेति । जलाद्यसाधारणेत्यर्थः । योग इति पक्षधर्मताबललभ्यसाध्यसम्बन्धाभिधानं न तु सम्बन्धपर्यन्तं साधनं, तथा सति न हि तावद्वैशिष्ट्यमित्यग्रिमग्रन्थविरोधात् । न चैवं पूर्वाभेदः । अत्र जलत्वादिनियतस्नेहाद्यभावोऽपि साध्य इति पूर्वतो भेदात् । क्व चित् मनस्त्वात्यन्ताभावादौ । शङ्कते तावतामिति । अन्यथेति । पक्षधर्मताबललभ्यस्य पक्षे साध्यवैशिष्ट्यस्य प्रसि-

साधनात्, मिलितानामपि साध्यत्वे नाप्रसिद्धिः किञ्चिदेकधर्मावच्छेदो हि बलादिवन्मेलकार्थः, स च नासिद्धः। न च हेतोरसाधारण्यं, तावदभावयोगी ह्यत्र सपक्षो भवति न तु तदेकदेशकतिपयाभाववान्, साध्यतायास्तावत्यपर्य्याप्तेः। यद्वा जलत्वात्यन्ताभावस्तेजस्त्वात्यन्ताभावाधिकरणवृत्तिः अत्यन्ताभावत्वात् घटत्वात्यन्ताभाववत्, एवमत्यन्ताभावान्तरसामानाधिकरण्यमपि तत्र साध्यमिति क्वाप्रसिद्धिः।

द्धिरपि यद्यङ्गं तदेत्यर्थः। ननु जलत्वादिप्रतियोगिकतावदत्यन्ताभावाः प्रत्येकमेव साध्याः अनुमितिः परामर्शश्च समूहालम्बनरूप इत्युक्तौ असाधारण्यं मिलितत्वरूपेण साध्यतायान्तु अप्रसिद्धिः तेन रूपेण कुत्राप्यसिद्धेरित्यत आह मिलितानामपीति। त्रयोदशत्वाद्यवच्छिन्नानामपीत्यर्थः। यत्किञ्चिदेकेति। यत्किञ्चिदेकधर्मावच्छिन्नत्वमित्यर्थः। स च प्रकृते त्रयोदशत्वादिसंख्यासमानकालीनमपेक्षाबुद्धिविशेषविषयत्वमेवेति भावः। स चेति। भिन्नभिन्नाधिकरणस्थानामप्यभावानां मानसोपस्थित्या अपेक्षाबुद्धिविषयत्वप्रकारेण ज्ञानसम्भवात् भिन्नाधिकरणस्थघटयोर्द्वौ घटाविति प्रतीतिवदिति भावः। तावदभावयोगीति। तावदभाववत्तया निश्चित इत्यर्थः। कतिपयाभाववान् कतिपयाभाववत्तया निश्चितः। साध्यताया इति। साध्यतावच्छेदकस्येत्यर्थः। साध्यतावच्छेदकावच्छिन्नवत्तया निश्चितश्च सपक्ष इति भावः। अत्यन्ताभावत्वादिति। तेजस्त्वानियतात्यन्ताभावत्वादित्यर्थः। तेन तेजोऽन्यत्वप्रकारकप्रमाविशेष्यत्वाभावादौ वस्तुतस्तेजोऽविषया च या चतुर्दशविषया धीव्यक्तिस्तद्विषयत्वात्यन्ताभावादौ च न व्यभिचारः। पदार्थविभाजकधर्मात्यन्ताभावत्वादित्यर्थः इति कश्चित्। तत्रेति।

किञ्चेतरे तावत् प्रसिद्धा एव ते च भेदप्रतियोगिनो मेयत्वादितीतरभेदोऽपि सुग्रह एव । ननु पृथिवी नेतरभेदवती गुरुत्वादिभ्यो जलवदिति प्रतिरोध इति चेत् । न । इतरभेदनिषेधो हीतराभेदः न तु तेजःप्रभृत्यभेदः, जल इति दृष्टान्तस्य साध्यवैकल्यात्।चतुर्दशाभेदानां चैकत्र विरोधेनासम्भवात् चतुर्दशभेदानां चैकत्र वृत्तौ न विरोधः । यत्तु साध्यप्रसिद्धौ पृथिवीतरभिन्ना तत्साध्याधिकरणपृथिव्यन्यतरत्वात्तदधिकरणवत् पृथिव्यां तत् साध्यमन्वयिन एव सेत्स्यतीति।तन्न। अन्यतरत्वस्यालिङ्गत्वादित्युक्तत्वात्, लिङ्गत्वे वा जलादावपि तत्सिद्धिप्रसङ्गात् । एवं तर्हि पृथिवी जलं

जलत्वात्यन्ताभाव इत्यर्थः । क्वाप्रसिद्धिरिति । तेजस्त्वात्यन्ताभाववायुत्वात्यन्ताभावादिसमानाधिकरणजलत्वात्यन्ताभावस्यैव साध्यत्वादिति भावः ।

अन्येतुमतं समाप्य प्रकारान्तरेण साध्यप्रसिद्धिं दर्शयति किञ्चेति । ते चेति । पृथिवीतरत्वं भेदप्रतियोगितावच्छेदकं व्यतिरेकिधर्मत्वात् इत्यत्र तात्पर्य्यम्, अन्यथा इतरप्रतियोगिकभेदप्रसिद्धावपि तेजस्त्वावच्छिन्नप्रतियोगिताकभेदाप्रसिद्धेरिति ध्येयम्। नतु तेज प्रभृतीति । प्रातिस्विकरूपेण चतुर्दशभेदानामभावः साध्य इत्यभिप्रायेणेदं दूषणम् । अन्यथा पृथिवीतरभेदाभावस्य पृथिवीतरत्वस्य जले सत्त्वादसङ्गतेः । बाधमप्याह चतुर्दशेति । अभावमादाय चतुर्दशत्वं बोध्यम् । स्थापनानुमाने बाधमुद्धरति चतुर्दशेति । जलादावपीति । तत्रापि तत्साध्याधिकरणजलाद्यन्यतरत्वस्य लि-

पृथिवीत्वात् यन्न जलं तन्न पृथिवी यथा तेज इति सत्प्रतिपक्षोऽस्त्विति चेत् । न । अजलस्य घटादेः प्रत्यक्षत एव पृथिवीत्वनिश्चये व्यतिरेकव्यभिचारादस्य न्यूनत्वात् तदनवधारणे तु सत्प्रतिपक्षत्वमिष्टमेव । ननु जीवच्छरीरं सात्मकं प्राणादिमत्त्वात् इच्छादिकार्य्यवत्त्वाद्वेति व्यतिरेकिणि साध्याप्रसिद्धौ कथं व्यतिरेकादिनिरूपणं, नैरात्म्यञ्च घटस्य न प्रत्यक्षवेद्यं तस्य तत्रासामर्थ्यात्, नानुमानगम्यं नैरात्म्याप्रतीतावन्वयिनोऽभावात् सात्मकत्वप्रतीतिं विना व्यतिरेकिणोऽनुपपत्तिः । अथेच्छा समवायिकारणजन्या कार्य्यत्वात् तच्च समवायिकारणं पृथिव्याद्यष्टद्रव्यभिन्नं पृथिव्यादित्वे बाधकसत्त्वादिति पृथिव्यादिभिन्नात्मसिद्धौ तद्वत्त्वं जीवच्छरीरे साध्यत इति चेत् । यदि सात्मकत्वमात्मसं-

---

द्भूत्वसम्भवादिति भावः । इदमापाततः, जले पृथिवीतरभेदस्य बाधेनासिद्धेः जलेतरभेदसिद्धौ च इष्टापत्तेः । वस्तुतस्तु पृथिवीतरभेदस्य विशिष्य कुत्राप्यधिकरणेऽसिद्धेः सिद्धौ चान्वयाप्रतिसन्धानदशायां व्यतिरेकव्याप्तिज्ञानहेतुत्वावश्यकत्वाच्चेत्येव द्रष्टव्यम् । एवं व्यतिरेकव्याप्तिज्ञानस्य हेतुत्वे । व्यतिरेकव्यभिचारादिति । साध्याभावस्य हेत्वभावव्यभिचारित्वादित्यर्थः।इदमुपलक्षणम् । असाधारण्यादित्यपि द्रष्टव्यम् । तदनवधारणे त्विति।पृथिवीत्वस्यानवधारणे त्वित्यर्थः । इच्छादीति । अवच्छेदकतासम्बन्धेन हेतुरिति भावः । साध्याप्रसिद्धाविति । सात्मकत्वस्य जीवच्छरीरमात्रवृत्तित्वात्तस्य पक्षत्वादिति भावः । व्यतिरेकादीति । आदिना सा-

योगवत्त्वन्तदा घटादौ तदस्तीति ततो हेतुव्यावृत्तावसाधारण्यं, ज्ञानसमानाधिकरणज्ञानकारणीभूतसंयोगाश्रयकार्य्यत्वं सात्मकत्वं शरीरात्मसंयोगस्य ज्ञानकारणत्वात् आत्ममनसोस्तथात्वेऽप्यकार्य्यत्वादिति चेत् । न । शरीरादन्यत्रासिद्धेः, तत्र प्रसिद्धौ सिद्धसाधनात् । इच्छाया असमवायिकारणसंयोगावच्छेदकत्वस्याभावो घटादौ दृष्टः तद्व्यतिरेकः शरीरे साध्यत इति चेत् । न । इच्छाया असमवायिकारणसंयोगावच्छेदकत्वस्य शरीर एव प्रसिद्धेः सिद्धसाधनात्, अन्यथा असिद्धिव्यतिरेकाद्यनिरूपणात् । अप्रसिद्धसाध्यसंसर्गमिव साध्यमप्रसिद्धं साधयति व्यतिरेकीति चेत् । न । व्यति-

---

ध्यवैशिष्ट्यस्य परिग्रहः । तस्येति । तदभावस्यातीन्द्रियत्वादिति भावः । अप्रसिद्धाभावसाध्यके व्यतिरेक्यस्त्वित्यत आह , सात्मकत्वेति । कार्यत्वादिति । भावकार्यत्वादित्यर्थः । शङ्कते ज्ञानेति । चक्षुःसंयोगाश्रयत्वेन घटादेः सात्मकत्ववारणाय ज्ञानसमानाधिकरणेति । आत्मघटादिसंयोगादिमादाय तद्दोषतादवस्थ्यमतः ज्ञानकारणेति । तादृशसत्त्वादेर्घटादौ सत्त्वात् तद्दोषतादवस्थ्यमतः संयोगेति । आत्ममनसोर्वारणाय कार्यत्वमिति । न च प्राणेऽतिप्रसङ्गः, आत्मप्राणसंयोगस्याऽहेतुत्वादिति वक्ष्यमाणत्वादिति भावः । शरीरादन्यत्रेति । न च राहोः शिरसि तत्प्रसिद्धिरिति वाच्यम् । पक्षादन्यत्राप्रसिद्धेरित्यर्थात् चेष्टावत्त्वेन तस्यापि पक्षत्वात् । शङ्कते इच्छाया इति । दृष्टः जातः । तद्व्यतिरेक इति । स एव च सात्मकत्वमिति भावः । अप्रसिद्धसाध्यसंसर्गमिवेति । यद्यपि व्याप्ति-

रेकाद्यनिरूपणात् असाधारणधर्मेणाप्रतीतपदार्थानुमाने घटत्वादिनापि स्वेच्छाकल्पितडित्थाद्यनुमानप्रसङ्ग इति। उच्यते। इच्छाऽसमवायिकारणसिद्धाविच्छात्वं संयोगासमवायिकारणकवृत्ति नित्येन्द्रियग्राह्यविशेषगुणवृत्तिगुणत्वसाक्षाद्व्याप्यजातित्वात् शब्दत्ववत् स चासमवा-

---

ज्ञाने साध्यसंसर्गस्यावश्यं भानात् कथं साध्यसंसर्गोऽप्रसिद्धः। न च निरधिकरणकसाध्यप्रसिद्ध्या साध्याभावहेत्वभावयोर्व्यापकत्वग्रहसम्भवान्न संसर्गप्रसिद्धिरावश्यकीति वाच्यम्। साध्यतावच्छेदकावच्छिन्नसाध्याभावस्य व्याप्तिघटकत्वेन तद्भानावश्यंभावात्। न च तथापि अप्रसिद्धाभावसाध्यकव्यतिरेकिणि अप्रसिद्ध एव साध्यसंसर्गो भासत इति वाच्यम्। पूर्वपक्षिणा तदनङ्गीकारात् तस्य च मतान्तरत्वात्। तथापि साध्यसंसर्गप्रसिद्ध्यसहकारेण साध्यसंसर्गमिव साध्यप्रसिद्धिं विनैव साध्यमपि साधयति व्यतिरेकीत्यर्थः। साध्यसंसर्गस्य प्रसिद्धिसत्त्वेऽपि तत्त्वेनासहकारादिति भावः। असाधारणेति। इच्छाऽसमवायीति। भावकार्यत्वादिति शेषः। एतत्सिद्धिश्च वक्ष्यमाणानुमाने ससमवायिकारणवृत्तित्वस्य सन्दिग्धोपाधित्वनिरासार्थं साधनव्यापकत्वज्ञानायोपयुज्यते। के चित्तु इच्छासमवायिकारणेति अकाररहितः पाठः तत्सिद्धिश्च ससमवायिकारणवृत्तित्वस्य सान्दिग्धोपाधित्वनिरासार्थं साधनव्यापकत्वज्ञानायोपयुज्यते इत्याहुः। इच्छात्वमिति। व्यक्तिपक्षके विभागजे च शब्दे व्यभिचारः स्यादिति जातेः पक्षत्वमुक्तम्। नित्येन्द्रियेति। संख्यात्वपृथक्त्वत्वादौ व्यभिचारवारणाय वृत्त्यन्तम्। स्नेहत्वे व्यभिचारवारणाय नित्येन्द्रियग्राह्येति विशेषणगुणविशेषणम्। नित्येन्द्रियग्राह्यत्वञ्च तन्मात्रग्राह्यत्वमतो न मनसो ग्राह्यत्वेन तस्य तद्दोषतादवस्थ्यम्। आत्मैकत्वप्रत्यक्षत्वपक्षे संख्यात्वे व्यभिचारादाह विशेषेति। शब्दजशब्दादिमात्रवृत्तिजातिविशेषे व्यभिचारादाह गुण-

यिकारणं संयोगः किञ्चिदवच्छिन्नः संयोगत्वात् आत्मसंयोगमात्रस्येच्छाजनकत्वेऽतिप्रसङ्गादितीच्छाऽसमवायिकारणसंयोगावच्छेदकत्वं सात्मकत्वं शरीरे साध्यते । यद्वा आत्मनीच्छाधारता महत्संयोगावच्छेद्या जन्यविभुविशेषगुणाधारतात्वात् वाय्वादिसंयोगाद्यवच्छेद्यशब्दाधारत्ववदिति सामान्यतः सिद्धमिच्छाधारताघटके-

---

त्वसाक्षाद्व्याप्येति । तत्त्वञ्च गुणत्वसाक्षाद्व्याप्यजात्यव्याप्यत्वम् । अन्यथा गुणत्वव्याप्यान्यतरत्वादिव्याप्यत्वादसिद्ध्यापत्तेः । जातिपदञ्च शब्दजशब्दसंख्यान्यतरत्वादौ व्यभिचारवारणाय समवायसम्बन्धेन विशेषगुणवृत्तित्वलाभाय वा । अन्यथा जन्यमात्रस्य कालोपाधितया संख्यात्वे व्यभिचारतादवस्थ्यादिति संक्षेपः । अतिप्रसङ्गादिति । अन्यावच्छेदेनापीच्छोत्पत्त्यापत्तेरित्यर्थः । असमवायिकारणसंयोगावच्छेदकत्वस्यैव इच्छाद्यवच्छेदकत्वनियामकत्वादित्यभिमानः । इच्छाऽसमवायिकारणेति । न च तादृशसंयोगाद्यवच्छेदकत्वेन प्रकारेण साध्यं नोक्तानुमानात् प्रसिद्धमिति वाच्यम् । तदनन्तरं मनसा तथा प्रसिद्धेः । यद्वेति । इच्छाधारतायाः शरीरव्याप्यवृत्तेर्न महत्संयोगोऽवच्छेदक इत्यतः आत्मनीति । महत्संयोगेति । महत्पदं मनोयोगावच्छेद्यत्वेनार्थान्तरवारणाय । ईश्वरज्ञानाद्व्याप्यवृत्तेराधारताया वारणाय जन्येति । रूपाद्याधारतावारणाय विभ्विति । आत्मवृत्तिद्वित्वाद्याधारतावारणाय विशेषेति । आधारता च समवायावच्छिन्ना विवक्षिता, नातः शरीरवृत्तीच्छाद्याधारतायां व्यभिचार इति मन्तव्यम् । सामान्यत इति । सिद्धसाधनशङ्कानिवारणाय इच्छाधारतेति । इच्छाधारताघटकः इच्छाधारतावच्छेदकः य इच्छासमवायिद्रव्यनिरूपितसंयोगस्तद्धर्त्वमित्यर्थः । आत्मन्यतिप्रसक्तेर्वारणाय निरूपितेत्यन्तम् । स्वनिरूपितसंयोगवत्त्वञ्च स्वस्मिन्नास्तीति भावः । अत्रापि साध्यतावच्छेदकप्रकारेण प्रसिद्धिर्मनसा द्र-

च्छासमवायिकारणद्रव्यसंयोगवत्त्वं सात्मकत्वम, अत एव ज्ञानसमानाधिकरणज्ञानकारणीभूतसंयोगाश्रयकार्य्यत्वं वा सात्मकत्वं स्वशरीरे प्राणादिमत्त्वस्य इच्छादिमत्त्वस्य च चेष्टावयवोपचयादिव्याप्यत्वग्रहात् घटादौ चेष्टादिविरहेण प्राणादिमत्त्वेच्छादिमत्त्वविरहानुमानमिच्छादिविरहात् इच्छादिप्रयोजकेच्छाद्याधारताघटकेच्छाद्यसमवायिकारणसंयोगविरहानुमानं कार्य्याभाववति कारणाभावनियमात् । न च सात्मकत्वं शरीरवृत्ति शरीरे बाधकाभावात् शरीरत्ववदित्यन्वयिनैव साध्यसिद्धेः किं व्यतिरेकिणेति वाच्यम् । शरीरं सात्मकमिति शरीरविशेष्यकबुद्धेर्व्यतिरेकिणं विनानुपपत्तेः उपायान्तरस्योपायान्तरादूषकत्वाच्च । यद्वा चेष्टा संयोगासम-

---

ष्टव्या । अत एवेति । ज्ञानाधारता महत्संयोगावच्छेद्या शरीरवत्त्वात् स च महत्संयोगो ज्ञानसमानाधिकरणः तत्तदवृत्त्यवच्छेदकत्वात् ज्ञानकारणञ्च अनन्यथासिद्धान्वयव्यतिरेकात् तदाश्रयो महान् कार्य्यः आत्मसंयोगिमहत्त्वादित्यनुमानेन प्रसिद्धिसम्भवादेवेत्यर्थः । ननु सात्मकत्वस्य साध्यस्य प्रसिद्धावपि नैरात्मत्वस्य साध्याभावस्य घटादावसिद्धत्वात् कथं व्यतिरेकव्याप्तिग्रह इत्यत आह स्वशरीर इति । चेष्टेति । चेष्टावयवोपचयाद्यन्यतमव्याप्यत्वग्रहादित्यर्थः । तेन निष्क्रियविनष्टशरीरे न व्यभिचारः । चेष्टादिविरहेण चेष्टाद्यन्यतमसामान्याभावेन शरीरबाधकाभावेन । शरीरे बाधकेति शरीरवृत्तित्वाभाववत्तया अप्रमितत्वादित्यर्थः । संस्काराजन्येति

वायिकारणिका संस्काराजन्यक्रियात्वादिति चेष्टाया असमवायिकारणसंयोगसिद्धौ प्रयत्नवदात्मसंयोग एव पर्य्यवस्यति प्रयत्नान्वयव्यतिरेकानुविधायित्वात्, एवं चेष्टाया असमवायिकारणसंयोगाश्रयत्वे सति शरीरत्वं सात्मकत्वं जीवच्छरीरे साध्यं चेष्टावत्त्वादिति हेतुः चेष्टाविरहश्च घटादौ प्रत्यक्षसिद्धः चेष्टाविरहात्तदसमवायिकारणसंयोगविरहोऽपि सुग्रहः । यद्वा जीवच्छरीरं तदवयवो वा आत्मभिन्नत्वे सत्यात्मविशेषगुणकारणभोगानधिकरणावृत्तिसंयोगवत् प्राणान्यत्वे सति ज्ञानकारणीभूतप्राणसंयोगवत्त्वात् यन्नैवं

वेगजकर्मणि व्यभिचारवारणाय । गुरुत्वद्रवत्वाजन्येत्यपि बोध्यम् । तेन पतनस्यन्दनयोर्न व्यभिचारः । एवञ्चेति । सत्यन्तमात्रस्यात्मन्यपि सत्त्वात्तद्व्यावृत्तये शरीरत्वमिति । तेन शरीरावयवे न व्यभिचारः । आत्मभिन्नेति । आत्मनः सात्मकत्ववारणाय सत्यन्तम् । मृतशरीरस्यापि कदाचिद्भोगाधारतया तद्व्यावृत्तये आत्मविशेषगुणकारणेति । कारणत्वं फलोपधायकत्वं तेन शरीरात्मसंयोगत्वेन तस्य स्वरूपयोग्यत्वेऽपि न क्षतिः । मृतशरीरात्मसंयोगजनकं तदवयवात्मसंयोगमादाय मृतशरीरावयवस्य मृतशरीरावयवात्मविभागकारणमृतशरीरात्मसंयोगमादाय मृतशरीरस्य च सात्मकत्ववारणाय विशेषेति । भेरीदण्डसंयोगवच्छब्दजनकं मृतशरीरे शरीरान्तरसंयोगमादाय मृतशरीरे सात्मकत्ववारणाय आत्मेति । यद्यपि तस्यापि स्वर्गोचरप्रत्यक्षजनकत्वेन जीवच्छरीरे मृतशरीरसंयोगस्य दुःखजनकत्वेन च तद्दोषतादवस्थ्यम्, तथापि आत्म-

तन्नैवं यथा घटः, आत्मप्राणसंयोगः प्राणमनःसंयोगो वा शरीरप्राणसंयोगेनैवान्यथासिद्धो न कारणं, भोगाधारत्वं भोगसमवायिकारणातिरिक्तवृत्ति सकल-

---

विशेषगुणपदं प्रयत्नपरमित्यदोषः। आत्मवृत्तित्वेन संयोगो विशेष्य इत्यपि के चित्। मनसः सात्मकत्वव्यावृत्तये भोगानधिकरणावृत्तीति। नञ्द्वयस्याप्येतदेव फलमिति संक्षेपः। प्राणान्यत्वे सतीति। प्राणे व्यभिचारवारणाय सत्यन्तमात्मेत्यादौ व्यभिचारवारणाय ज्ञानकारणीभूतेति। चक्षुःसंयोगादिमादाय तद्दोषतादवस्थ्यमतः प्राणेति। नन्वात्ममनसोरपि हेतुत्वेन व्यभिचार इत्यत आह आत्मप्राणेति। न च शरीरप्राणसंयोगस्य न शरीरप्राणसंयोगत्वेन हेतुत्वं गौरवात् किन्तु प्राणसंयोगत्वेनैव यत्रावच्छेदकतासम्बन्धेन ज्ञानं तत्र समवायेन प्राणसंयोग इति सामानाधिकरण्यं प्रत्यासत्तिः तथा चात्मप्राणसंयोगादिरपि ज्ञानस्वरूपयोग्य एवेति व्यभिचारस्तदवस्थ इति वाच्यम्। फलोपधानस्य विवक्षितत्वात्। तच्च कार्यकारणभावघटकसम्बन्धेन ज्ञानसमानाधिकरणत्वे सति ज्ञानजनकत्वमिति न कोऽपि दोष इति भावः। ननु भोगाधिकरणावृत्तिः संयोगोऽसिद्धः भोगसमवायिकारणस्यैव भोगाधारत्वात् संयोगस्य तन्मात्रावृत्तित्वादित्याशङ्क्य उक्तसाध्योपपत्तये शरीरस्यापि भोगाधारत्वं साधयति भोगाधारत्वमिति। भोगासाधारणाधारत्वमित्यर्थः। तेन कालादिवृत्तितया न सिद्धसाधनम्। सकलेति। न च भोगाधिकरणेत्यस्य स्वरूपासिद्ध्यवारकतया वैयर्थ्यमिति वाच्यम्। समुदायस्य भोगाधिकरणत्वव्यापकत्वादित्यर्थत्वात्। नन्विदं सन्दिग्धानैकान्तिकं साध्याभाववत्तया निश्चिते संसार्यात्मत्वे एतदनुमानात्पूर्वं हेतोः सन्देहादित्यत आह तार्किकीति। अनुभवमूलिका रीतिरित्यर्थः। शरीरे सुखमित्यनुभवात् शरीरेऽपि भोगाधारत्वसिद्धौ संसार्या-

भोगाधिकरणवृत्तित्वात् प्रमेयत्वादिवदिति तार्किकी रीतिः । अथेच्छाऽष्टद्रव्यातिरिक्तद्रव्याश्रिता अष्टद्रव्यानाश्रितत्वे सति गुणत्वात् यन्नैवं तन्नैवं यथाऽनाश्रितमष्टद्रव्याश्रितं वेति कथं व्यतिरेकी अष्टद्रव्यातिरिक्तद्रव्यस्य तद्वृत्तित्वस्य चाप्रतीतेर्व्यतिरेकाद्यनिरूपणात् । स्यादेतत्, इच्छाया द्रव्याश्रितत्वेऽनुमिते पृथिव्यादौ बाधानवतारदशायां विप्रतिपत्तिवाक्यादाश्रितत्वादिसाधारणधर्मदर्शनाद्वा तद्द्रव्यमष्टद्रव्यातिरिक्तं न वेति सन्देहेनाष्टद्रव्यातिरिक्तद्रव्योपस्थितिः। यद्वा इच्छाऽष्टद्रव्यातिरिक्ताश्रिता न वेति संशयात् इच्छाया अष्टद्रव्यातिरिक्ताश्रयोपस्थितौ पश्चादिच्छाश्रयोऽष्टद्रव्यातिरिक्तद्रव्यं न वेति संशयादष्टद्रव्यातिरिक्तद्रव्योपस्थितिः । अ-

---

त्मत्वे हेतोर्व्यतिरेकनिर्णयेन व्यभिचारसन्देहाभावादिति भावः । अनुमित इति । गुणत्वेनेति शेषः । आश्रितत्वादीति । आश्रयत्वादीत्यर्थः । द्रव्योपस्थितिरिति । तद्वृत्तित्वञ्च इच्छायां द्रव्यत्वे च प्रतीतिमेवेति भावः । नन्वष्टद्रव्यातिरिक्तद्रव्याश्रितत्वेन साध्यतावच्छेदकप्रकारेण यथोक्तसंशयान्न प्रसिद्धिः प्रसिद्धौ वा साध्यतावच्छेदकांशे निश्चयात्मकसाध्यज्ञानं विना कथं व्यतिरेकव्याप्तिग्रहः तस्य साध्यतावच्छेदकांशे विशिष्टवैशिष्ट्यबोधरूपत्वादित्यस्वरसादाह अथ वेति । ननु कोटितावच्छेदकप्रकारेण कोटिप्रसिद्ध्यभावात् कथमयं संशयः तत्प्रसिद्धौ च तत एवानुमानसम्भवे किमन्तर्गतेनात्र तत्संशयेनेति चेत् । न । इच्छायामष्टद्रव्यातिरि-

थ वा द्रव्याश्रिता इच्छा अष्टद्रव्यातिरिक्तद्रव्यवृत्तिर्न वेति पूर्ववत् संशयादष्टद्रव्यातिरिक्तद्रव्यवृत्तित्वं प्रसिद्धमिच्छायाः साध्यते संशयप्रसिद्धमपि साध्यं व्यतिरेकादिनिरूपकं साध्यज्ञानमात्रस्य कारणत्वात् । न चैवं संशयादेव पक्षे साध्यसिद्धेर्व्यतिरेकिवैयर्थ्यम्, निश्चयार्थं तत्प्रवृत्तेरिति । मैवम् । संशयेन साध्यप्रसिद्धावपि तद्व्यतिरेकनिश्चयासम्भवात् साध्यव्यतिरेकतद्व्याप्तिनिश्चयस्य साध्यनिश्चयसाध्यत्वात् साध्यसन्देहे तद्व्यतिरेकादिसंशयावश्यम्भावात् । किञ्च संशयोपस्थितसाध्यस्य व्यतिरेकिनिरूपणं न योग्यानुपलम्भात्, साध्यनिश्चयं विना योग्यानुपलम्भासम्भवात् । नापि व्यापकाभावात्, साध्यनिश्चयं विना तद्व्यापकत्वनिश्चयाभावात् । न च यदीच्छा अष्टद्रव्यातिरिक्तद्रव्याश्रिता न

क्तवृत्तित्वतदभावकोटिकेन संशयेन उपनयबलादष्टद्रव्यातिरिक्ते द्रव्यत्वस्य विषयीकरणात् अष्टद्रव्यातिरिक्तद्रव्यवृत्तित्वप्रसिद्धिरित्यभिप्रायात् । नन्विदमयुक्तम् इच्छायां साध्यसन्देहेऽपि रूपादौ तद्व्यतिरेकनिश्चये बाधकाभावात्, न ह्येकत्र सन्देहे सर्व्वत्र सन्देहः पार्थिवरूपादिसंशयसत्त्वेऽपि वायौ तदभावनिश्चयस्यानुभविकत्वादित्यत आह किञ्चेति । साध्यनिश्चयं विनेति । प्रतियोगितद्व्याप्येतरसकलतन्निश्चायकसमवधाने प्रतियोग्यनुपलम्भरूपस्य योग्यानुपलम्भस्य तन्निश्चयाप्रसिद्धावसम्भवादिति भावः । इदमापाततः । इदानीं निश्चयत्वस्य योग्यानुपलब्ध्यावतन्त्रत्वात् कादाचि-

स्यादष्टानाश्रिता सती द्रव्याश्रिता न स्यात् रूपवदिति साध्यविपर्य्ययकोटौ प्रतिकूलतर्कसहकृतः साध्यसंशय एव निश्चयकार्य्यं करोति, अत एवैतादृशसंशयोपस्थितकल्पितडित्थादिसाधनमप्यपास्तम्, तद्विपर्य्यये प्रतिकूलतर्काभावादिति वाच्यम् । साध्यनिश्चयं विना साध्यव्यतिरेकनिश्चयतन्मूलतर्कानवतारात्, अन्यथा अष्टद्रव्यातिरिक्तद्रव्यवृत्तित्वनिरूपणे तर्कोदयस्तर्कोदये च तत्सहकृतसाध्यसंशयस्य साध्यव्यतिरेकनिश्चायकत्वमिति । उच्यते । इच्छाश्रयद्रव्यसिद्धौ पृथिव्यादाविच्छाधारताऽभावे तद्द्रव्यं पृथिव्याद्यष्टद्रव्यभिन्नम् अष्टद्रव्यावृत्तिधर्मवत्त्वात् पृथिव्यादित्वे बाधकसत्त्वाद्वेत्यष्टद्रव्यातिरिक्तद्रव्यसिद्धाविच्छायामष्टद्रव्यातिरिक्तद्र-

---

स्कस्य तस्यात्रापि भावात् । व्यापकाभावादिति । साध्यव्यापकाभावादित्यर्थः । साध्यस्य व्यतिरेकनिरूपणमिति शेषः । भ्रान्तः शङ्कते न वेति । रूपवदितीति । प्रतिकूलतर्कत्यनेनान्वयः । एतादृशसंशयेति । प्रागुक्तक्रमेण इच्छा नवद्रव्यातिरिक्तद्रव्याश्रिता न वेति संशयेनोपस्थितेत्यर्थः । साध्यव्यतिरेकनिश्चयेति । आपादकनिश्चयस्य तर्कं प्रति हेतुत्वात् इति भावः । इच्छाश्रयेति । गुणत्वहेतुकद्रव्याश्रितत्वानुमानेनेति शेषः । इच्छाधारताभाव इति । इदञ्चाग्रिमहेतुसिद्ध्यर्थम् । पृथिव्यादीति । पृथिवीत्वाभावादिव्याप्यधर्मवत्त्वादित्यर्थः । स च गन्धाभावादिरिति शेषः । द्रव्यवत्त्वमिति । वृत्तितासम्बन्धेनेत्यर्थः । प्रसिद्धिरिति । उक्तानुमानानन्तरं मनसा तादृशद्रव्यवृत्तित्वत्वेन साध्यतावच्छेदकप्रकारेण साध्यप्रसिद्धि-

व्यवत्त्वमष्टद्रव्यातिरिक्तद्रव्यवृत्तित्वं वा साध्यते, साध्यप्रसिद्धिर्द्रव्यत्वे इच्छाविशेष्यकाष्टद्रव्यातिरिक्तद्रव्यवृत्तित्वप्रतीतेर्व्यतिरेकिसाध्यत्वात्। तथापीच्छाष्टद्रव्यातिरिक्तद्रव्याश्रिता अष्टद्रव्यानाश्रितत्वे सति द्रव्याश्रितत्वात् अष्टद्रव्यातिरिक्तद्रव्यत्ववदिति साध्यप्रसिद्ध्यैव दृष्टान्तसिद्धेरन्वयी हेतुः स्यादिति चेत्। न। अन्वयव्याप्त्यप्रतिसन्धाने व्यतिरेकव्याप्तिप्रतिसन्धानदशायां व्यतिरेकिसम्भवात्। न च द्रव्यत्वादेः सपक्षात् व्यावृत्तावसाधारण्यम्, तद्धि साध्यतदभावोभयसाधकत्वेन सत्प्रतिपक्षोत्थापकतया दोषावहं प्रकृते च न हेतोः साध्याभावसाधकत्वं विपक्षे बाधकाभावात् साध्यसाधकत्वे

र्द्रव्यत्व इत्यर्थः। इदमुपलक्षणम्। अष्टानां द्रव्यस्य अतिरिक्तस्य वृत्तित्वस्य च खण्डशः प्रसिद्ध्या मनसा विशेष्ये विशेषणमिति न्यायेन अष्टद्रव्यातिरिक्तद्रव्यवृत्तित्वमिति विशिष्टप्रमितिसम्भव इत्यपि बोध्यम्। नन्वेवमिच्छायामपि द्रव्यवृत्तित्वात् साध्यसिद्धिर्जातेति किं व्यतिरेकिणा इत्यत आह इच्छेति। द्रव्यत्ववदिति। अन्वयी हेतुः स्यादित्यनेनान्वयः। अत्र हेतुः साध्यप्रसिद्ध्यैवति। दृष्टान्तसिद्धेः दृष्टान्ते द्रव्यत्वे साध्यसिद्धेः। व्यावृत्ताविति। अत्र द्रव्यानाश्रितत्वे सति गुणत्वस्य हेतोर्व्यावृत्तावित्यर्थः। साध्यतदभावोभयसाधकत्वेनेति। प्रकृतहेतौ साध्यतदभावोभयव्याप्तिनिश्चायकत्वेनेत्यर्थः। साध्याभावसाधकत्वं साध्याभावव्याप्तिनिश्चयः। साध्यसाधकत्वे साध्यव्याप्यत्वेतत्सत्त्वादिति। अनुकूलतर्कसत्त्वादित्यर्थः। अष्टद्रव्यानाश्रितस्य तदतिरिक्तद्रव्यवृत्तित्वं

तत्सत्त्वात्। अत एव यावदेकत्रानुकूलतर्को नावतरति तावदेव दशाविशेषेऽसाधारण्यं दोष इत्युक्तम्। सुवर्णतैजसत्वसाधकव्यतिरेकिणि शब्दोऽनित्यः शब्दत्वादित्यादावपि तथा। अथाष्टद्रव्यबाधानन्तरमिच्छादौ गुणत्वादेवाष्टद्रव्यातिरिक्तवृत्तित्वं सिद्ध्यति पक्षधर्मताबलात् प्रसिद्धविशेषबाधे सामान्यज्ञानस्य तदितरविशेषविषयत्वनियमात्, अत एवाऽसर्वविषयानित्यज्ञानबाधानन्तरं क्षित्यादौ कार्य्यत्वेन ज्ञानजन्यत्वं सिद्ध्यन्नित्यसर्वविषयत्वं ज्ञानस्यादायैव सिद्ध्यतीति चेत्। न। बाधानन्तरं ह्यष्टद्रव्यातिरिक्तद्रव्यविषयाप्यनुमितिर्द्रव्याश्रितत्वप्रकारिका, स्यात् अनुमितेर्व्यापकतावच्छेदकमात्रप्रकारकत्वनियमात्, न त्वष्टद्रव्यातिरिक्तद्रव्यवृत्तित्वप्रका-

---

विना द्रव्याश्रितत्वस्यैवानुपपत्तेरिति भावः। एकत्रेति। एकमात्रे इत्यर्थः। सुवर्णतैजसत्वेति। सुवर्णं तेजः अत्यन्ताग्निसंयोगेनानुच्छिद्यमानद्रव्यत्वाधिकरणत्वादित्यर्थः। अष्टद्रव्यबाधेति। पृथिव्याद्यष्टद्रव्येषु इच्छाधारतावाधानन्तरमित्यर्थः। गुणत्वादेवेति। इच्छाद्रव्याश्रिता गुणत्वादित्यनुमानेनेत्यर्थः। पक्षधर्मताबलादिति। अष्टद्रव्यवृत्तित्वबाधसहकारादित्यर्थः। तथा च किं व्यतिरेकिणेति भावः। बाधानन्तरं हीति। बाधानन्तरमनुमितिरष्टद्रव्यातिरिक्तद्रव्यविषयापि द्रव्याश्रितत्वप्रकारिका स्यादित्यर्थः। व्यापकतावच्छेदकेति। येन रूपेण व्यापकत्वग्रहस्तेनैव रूपेणानुमितौ भाननियमादित्यर्थः। यथाश्रुते कूटलिङ्गस्य स्थले व्यभिचारात्। पूर्वमप्रतीतत्वेनेति। पूर्वं व्यापकतावच्छेदकतया अप्रतीतत्वेनेत्यर्थः। नन्वेवमग्नि-

रिका तस्य पूर्वमप्रतीतत्वेन प्रकारत्वासम्भवादिति तत्प्रकारिकानुमितिर्व्यतिरेकिणैव । अनाद्यनन्तद्व्यणुकादियावत्पक्षीकरणेऽनाद्यनन्तताबदुपादानगोचरापरोक्षज्ञानत्वमेव नित्यसर्वविषकत्वमेतदन्यनित्यसर्वविषयत्वं व्यतिरेकिण एव सिद्ध्यति, पक्षधर्मताबलेनापि व्यापकतावच्छेदकप्रकारेण साध्यसिद्धिर्भवति न तु साध्यगतविशेषप्रकारिका अतिप्रसङ्गात् । नन्वष्टद्रव्यानाश्रितेच्छा द्रव्याश्रितेति यदि साध्यते तदाष्टद्रव्यातिरिक्तद्रव्याश्रितत्वमन्तरेण प्रतिज्ञार्थ एव नोपपद्यते, सत्यम्, एवमप्यष्टद्रव्यानाश्रितेच्छायां द्रव्याश्रितत्वं सिद्ध्यतु तस्याष्टद्रव्यातिरेक्यं कुतः सिद्ध्येत् । अथ सासान्याव्यभिचारमादाय मानान्तरोपनीतं तत्तदन्यत्वमुपजीव्याष्टद्रव्यान्यद्रव्यवृत्तितैवेच्छादेः परिच्छिद्यते ज्ञानान्तरोपस्थापितविशेषणविशिष्टज्ञानस्य सुरभि चन्दनमित्यादौ

रानुमाने नित्यत्वं सर्व्वविषयकत्वञ्च ज्ञाने कथं सिद्ध्यतीत्यत आह अनाद्यनन्तेति । सामान्याव्यभिचारमादायेति । गुणत्वनिष्ठद्रव्याश्रितत्वसामान्यव्याप्तिज्ञानमादायेत्यर्थः । परिच्छिद्यत इति । इच्छा द्रव्याश्रिता गुणत्वादिति प्राथमिकसामान्यतोदृष्टानुमानेनेत्यर्थः । मानान्तरादिति । प्राथमिकगुणत्वहेतुकद्रव्याश्रितत्वानुमितिप्राक्काले द्रव्यगतमष्टद्रव्यान्यत्वं मानान्तरान्नियमतो नोपतिष्ठते येनोपनीतं भासेतेत्यर्थः । इदमुपलक्षणम्, मानान्तरादुपस्थितत्वेऽपि भानं न सम्भवति अनुमेतर्व्यापकतावच्छेदकमीत्रप्रारैकवणे

दर्शनादिति चेत् । न । मानान्तरान्नियमेनानुपस्थितेः ।

ये चेच्छाश्रये पृथिव्यादिभिन्नत्वं न जानन्ति इच्छायाश्च पृथिव्याद्यनाश्रितत्वं न जानन्ति तेषामप्यनुमानादित्यप्याहुः । अथ व्यतिरेकी नानुमानं सर्वत्र प्रमेयत्वादिना सत्प्रतिपक्षग्रस्तत्वादिति चेत् । न । विपक्षबाधकेन व्यतिरेकिणो बलवत्त्वात् ।

अन्ये तु व्यतिरेकिण्यभाव एव साध्यः स चाप्रसिद्ध एव सिद्ध्यति यस्याभावस्य व्यापको हेत्वभावो

साध्यविषयकत्वनियमात् अनुमितावुपनीतभाने मानाभावाच्चेत्यपि द्रष्टव्यम् ।

केषाञ्चित्समाधानमाह ये चेति । जानन्तीति । न वा सामान्यतोदृष्टानुमानेन इच्छाया अपि द्रव्याश्रितत्वं जानन्तीति शेषः । पृथिव्याद्यनाश्रितत्वमिति । इदञ्च व्यतिरेकिणि सत्यन्तविशेषणसिद्ध्यर्थम् । अनुमानादिति । इच्छायामष्टद्रव्यातिरिक्तद्रव्याश्रितत्वानुमितेरित्यर्थः । सा च व्यतिरेकिणं विना न सम्भवति पूर्वं सामान्तोदृष्टानुमानाभावेन तेन तत्सिद्ध्यसम्भवादिति भावः । इत्यप्याहुरित्यस्वरसोद्भावनम् । तदबीजन्तु यदिच्छाया द्रव्याश्रितत्वेन तदाश्रयस्य चाष्टद्रव्यभिन्नत्वेन न ज्ञानं तदा साध्याप्रसिद्ध्या व्यतिरेकिणोऽप्यनवकाश इति तत्समर्थनमप्यशक्यं स्यादिति ध्येयम् । बलवत्त्वादिति । सत्प्रतिपक्षानवतारदशायां व्यतिरेकिसाम्राज्याच्चेत्यपि बोध्यम् ।

अभाव एवेति । अभावत्वरूपेणाभाव एव साध्य इत्यर्थः । अत एव व्यतिरेकव्याप्तिज्ञानाद्वन्ध्याभावाभावत्वेनैव वन्ध्यानुमितिरिति भावः । अप्रसिद्ध एवेति । अप्रसिद्धोऽपीत्यर्थः । ननु तस्याप्रसिद्धत्वे हेत्वभावे तदभावव्यापकत्वग्रहासम्भवात् कथमनु-

गृहीतस्तस्याभावः पक्षे व्यापकाभावाभावरूपेण हेतुना सिद्ध्यति व्यापकाभाववत्तया ज्ञाते व्याप्याभावज्ञानावश्यम्भावात्, तथा हि पृथिवी इतरेभ्यो भिद्यते पृथिवीत्वादित्यत्र इतरस्य जलादेर्व्यापकः पृथिवीत्वाभावो गृहीत इति पृथिवीत्वाभावाभावरूपेण पृथिवीत्वेन पृथिव्यामितरान्योन्याभावोऽप्रसिद्ध एव सिद्ध्यति प्रतियोगिज्ञानस्य वृत्तत्वात् प्रत्यक्षेण भूतले घटाभाववत्। एवमन्यत्राप्यव्याप्यवृत्तीच्छायाः स्वाश्रयत्वे सिद्धे स्वाश्रये योऽत्यन्ताभावस्तदवच्छेदकं घटादि सर्वं तदवच्छेदेनेच्छानुपलम्भात् जीवच्छरीरन्तु न तथा तदवच्छेदेन तदाश्रये इच्छोपलम्भात् तथा चेच्छात्यन्ताभावाश्रयतावच्छेदकत्वरूपस्य नैरात्म्यस्य घटादौ प्राणादिमत्त्वाभावो व्यापको गृहीत इति जीवच्छरीरे प्राणादिमत्त्वेन इच्छात्यन्ताभावाश्रयत्वावच्छेदकत्वस्याभावः सात्मकत्वं साध्यते, एवं प्रामाण्यसाधकव्यतिरेकिण्यपि व्यधिकरणप्रकारावच्छिन्नत्वस्य व्यापकः समर्थप्रवृत्तिजनकत्वा-

---

मितिरत आह यस्याभावस्येति। यस्य प्रतियोगिना व्यापकतया हेत्वभावे गृहीत इत्यर्थः। तथा च तत्र हेत्वभावे प्रतियोगिव्यापकताज्ञानमेव हेतुरिति भावः। व्यापकाभाववत्तयेति। व्यापकाभावत्वरूपेण व्यापकाभाववत्तया ज्ञाने इत्यर्थः। तथा हीति। तथा चेत्यर्थः। इतरस्य जलादेरिति। तादात्म्यसम्बन्धेनेत्यादिः। पक्षविशेषणक इ-

भावोऽप्रमायां गृहीतोऽतो विवादाध्यासितानुभवे समर्थ-प्रवृत्तिजनकत्वेन व्यधिकरणप्रकारावच्छिन्नत्वस्याभावः सिद्ध्यति व्यधिकरणप्रकारानवच्छिन्नत्वमेव प्रमात्वम्। ननु साध्याप्रसिद्धौ कथं साध्यविशिष्टज्ञानं विशेषण-ज्ञानजन्यत्वाद्विशिष्टज्ञानस्येति चेत् । न । पक्षे साध्या-नुमितिसामग्रीसत्त्वात्पक्षविशेषणकः साध्यविशेष्यक एव प्रत्ययो जायते भूतले घटो नास्तीत्यभावविशेष्यकप्रत्य-यवत्, तथापि साध्याभावव्यापकाभावरूपहेतुमत्तया प-क्षज्ञानं व्यतिरेकिणि गमकतौपयिकम् । न च साध्य-प्रसिद्धिं विनापि तादृशप्रतिसन्धानं सम्भवति, म च वस्तुगत्या यः साध्याभावस्तद्व्यापकाभावप्रतियोगिमत्त-या ज्ञानं मृग्यत इति वाच्यम् । व्यतिरेक्याभासानुप-

---

ति । पृथिव्यां पृथिवीतरभेद इत्याकारकः प्रत्ययो जायत इत्यर्थः । नन्विदमपि ज्ञानं न सम्भवति पृथिवीतरत्वावच्छिन्नप्रतियोगिता-कभेदत्वस्य विशेष्यीभूते भेदे विशेषणतया तज्ज्ञानाभावात् । न चेतरस्य भेदत्वस्य च खण्डशः प्रसिद्धिसत्त्वेन विशेष्ये विशे-षणमिति न्यायेन तादृशधीसम्भव इति वाच्यम् । तथा सति प-क्षविशेषणकपर्य्यन्तानुधावनवैयर्थ्यात् इतरत्वावच्छिन्नस्य भेदस्य च खण्डशः प्रसिद्धिसत्त्वेन विशेष्ये विशेषणमिति न्यायेन पक्ष-विशेष्यकसाध्यविशेषणकज्ञानस्यापि सम्भवादिति चेत् । न । भे-दत्वरूपेण पृथिवीतरत्वावच्छिन्नप्रतियोगिताकभेदव्यक्तेर्ज्ञानाभाव-दशायामस्याभिधानात् तज्ज्ञानदशायान्तु पक्षविशेष्यकमपि स-म्भवतीति ध्येयम् । व्यतिरेक्याभासेति । वस्तुगत्याधेयत्वादेरभाव-

पत्तेरिति चेत् । न । योऽभावो यस्य भावस्य व्यापकत्वेन गृहीतः तदभावाभावेन तस्य व्याप्यस्याभावः पक्षे साध्यत इत्यनुगतानतिप्रसक्तस्य गमकतौपयिकत्वात्, अयञ्च व्यतिरेकिप्रकारः स्वार्थ एव, परं प्रति साध्याप्रसिद्ध्या प्रतिज्ञाद्यसम्भवादिति सर्वं समञ्जसम् ।

स्याप्रसिद्ध्या व्यतिरेकव्याप्तिज्ञानान्मेयत्वाननुमानापत्तेरित्यर्थः ।

इति श्रीमथुरानाथतर्कवागीशविरचित तत्त्वचिन्तामणि-रहस्ये अनुमानाख्यद्वितीयखण्डरहस्ये केवलव्यतिरेक्यनुमानसिद्धान्तरहस्यं सम्पूर्णमिदम् ।

चिन्तामणेः अर्थापत्तिः ।

व्यतिरेक्यनुमानसिद्धावर्थापत्तिर्न मानान्तरं तेनैव

अथ अर्थापत्तिरहस्यम् ।

व्यतिरेकव्याप्तिज्ञानस्यानुमितिजनकत्वं व्यवस्थाप्य प्रसङ्गसङ्गत्या अर्थापत्तेरतिरिक्तप्रमाणत्वं मीमांसकाभिमतं निराचष्टे व्यतिरेक्यनुमानसिद्धाविति।व्यतिरेकव्याप्तिज्ञानस्यानुमितिजनकत्वसिद्धावित्यर्थः । अर्थापत्तिः अर्थापत्तिशब्दवाच्यं ज्ञानम् । तच्चास्मन्मते व्यतिरेकव्याप्तिज्ञानजन्यानुमितिरेव तन्मते चातिरिक्तमिति ध्येयम् । न मानान्तरमिति । नानुमितिभिन्नमित्यर्थः । तेनैव अनुमानेनैव । तस्य अर्थापत्तिशब्दवाच्यज्ञानस्य । सिद्धेः उत्पत्तेरित्यर्थः । तथा चानुमितिसामग्रीभिन्नसामग्रयजन्यत्वे सति जन्यत्वादिति हेतुरिति भावः । न चानुमितिसामग्रीजन्यत्वादित्येव सम्यक् । यथासन्निवेशे वैयर्थ्याभावात् । अर्थापत्तिशब्दवाच्यं ज्ञानमनुमितिभिन्नं न वेति विप्रतिपत्तिः, यद्वा व्यतिरेकव्याप्तिज्ञानं व्यतिरेकव्याप्त्यविषयकानुमितिभिन्नप्रमितिकरणं न वेति विप्रतिपत्तिः । व्याप्तिविशिष्टबुद्धेः व्याप्तिज्ञानानुव्यवसायस्य च वारणाय व्यतिरेकव्याप्त्यविषयकेति ।

अत्राभिनवमीमांसकाः । शृणोमीत्यनुभवसिद्धशाब्दत्वादिजातिवत् अर्थादापादयामीत्यनुभवसिद्धमर्थापत्तित्वमपि जातिविशेषः सिद्ध्यति । न च व्यतिरेकव्याप्तिज्ञानजन्यानुमितित्वमेव तद्विषय इति वाच्यम् । अननुगतत्वाद्विलम्बोपस्थितिकत्वेन तदुपस्थितिं विनापि तादृशानुगतमतेर्जायमानत्वात् । अथास्तु अर्थापत्तित्वनामा जातिविशेषः स चानुमितित्वव्याप्य एव, न च तस्य तद्व्याप्यत्वे

तदर्थसिद्धेः । स्यादेतत् ज्योतिःशास्त्रात्तत्कथितलिङ्गाद्वा देवदत्तस्य शतवर्षजीवित्वमवगतं चरमं शतवर्षजीवी गृह एवेति नियमे प्रत्यक्षेणावगते पश्चाद्योग्यानुपलब्ध्या निश्चितो गृहाभावो जीवननियमग्राहकप्रमाणयोर्बलाबलानिरूपणाद्बहिःसत्त्वकल्पनं विना नियमद्वयविषयकं संशयं जनयित्वा जीवति न वेति संशयमापाद्य जीव-

---

मानाभावः, व्यतिरेकव्याप्तिज्ञानजन्यज्ञाने अनुमिनोमीत्यनुव्यवसायस्यानुमितिसामग्रीजन्यत्वस्य च मानत्वादिति चेत् । न । तत्र तादृशानुव्यवसायस्यैवासिद्धेः प्रत्युत इदन्त्वसाक्षात्कृतं न वा अनुमितं परन्तु अर्थापत्त्या अवगतमिति वैपरीत्येनैवानुभवात् । अत एवानुमितिसामग्रीजन्यत्वमप्रसिद्धं तत्र तादृशव्यवसायाभावे लाघवात् साध्यवदन्यावृत्तित्वज्ञानस्यैवानुमितिहेतुत्वात् अर्थापत्तिं प्रति गुरुणोऽपि व्यतिरेकव्याप्तिज्ञानस्यानायत्या हेतुत्वकल्पनात् लघुनोऽप्यसम्भवात् । न चार्थापत्तिं प्रति लाघवात् साध्यवदन्यावृत्तित्वज्ञानं हेतुः अनुमितौ च व्यतिरेकव्याप्तिज्ञानमित्येव किन्न स्यादिति वाच्यम् । अन्वयव्याप्तिज्ञानजन्यज्ञाने अर्थादापादयामीत्यनुव्यवसायाभावात् अनुमिनोमीत्यनुव्यवसायात् व्यतिरेकव्याप्तिज्ञानजन्ये च तादृशानुव्यवसायादिति प्राहुः ।

हेतोः स्वरूपासिद्धिमाशङ्क्य ते स्यादेतदिति । देवदत्तः शतवर्षजीवीति न ज्योतिःशास्त्रोक्तं किन्तु यत् केन्द्रस्थबृहस्पतिकं भवति तत् शतवर्षजीवीति व्याप्तिमात्रग्राहकमत आह तत्कथितेति । शतवर्षजीवी गृह एवेतीति । देवदत्तः शतवर्षजीवी सन् गृहान्यावृत्तिर्गति नियमे इत्यर्थः । निश्चितो गृहाभाव इति । शतवर्षमध्ये एव गृहे देवदत्ताभावस्य निश्चय इत्यर्थः । जीवननियमग्राहकेति । जीवित्वनिश्चयगृहान्यावृत्तित्वनिश्चययोः प्रामाण्याप्रामाण्यान्यतरानिश्चयादित्यर्थः । बहिःसत्त्वकल्पनमिति । बहिःसत्त्वनिश्चयाभावेन

नसंशयापनुत्तये जीवनोपपादकं बहिःसत्त्वं कल्पयतीति यथोक्तसामग्र्यनन्तरं बहिरस्तीति प्रतीतेः तत्रान्वयव्यतिरेकाभ्यां संशयद्वारा गृहाभावः तदुत्पादितनियमद्वयविषयकसंशयो वा करणं जीवनसंशय एव वा, करणे सव्यापारकत्वानियमात् । प्रमाणयोर्विरोधज्ञानं तदाहितसंशयद्वारा करणमिति कश्चित् । तदा जीवित्वस्य लिङ्गविशेषणस्य सन्दिग्धत्वेनानुमानासम्भवाद-

---

त्वेत्यर्थः । नियमद्वयविषयकमिति । नियमद्वयविषयकनिश्चयद्वयविषयकं प्रामाण्यसंशयं जनयित्वेत्यर्थः । आपाद्य उत्पाद्यापनुत्तये निवृत्तयेजीवनोपपादकमिति । शतवर्षमध्ये गृहसतः शतवर्षजीवित्वस्य व्यापकमित्यर्थः । कल्पयति ज्ञापयति । अत्र मानमाह यथोक्तेति । संशयद्वारा प्रामाण्यसंशयद्वारा । गृहाभावः गृहे देवदत्तस्याभावनिश्चयः । गृहाभावनिश्चयस्य प्रामाण्यसंशयं प्रत्यहेतुत्वेन तस्य तद्द्वारत्वासम्भवादाह तदुत्पादितेति । तत्प्रयोज्यनिश्चयद्वयविषयकप्रामाण्यसंशय इत्यर्थः । सोपि न जीवनकारणं जीवनसंशयेनान्यथासिद्धत्वात् तस्य तद्व्यापारत्वे मानाभावादत आह जीवनसंशय एव वेति । करणमित्यनुषज्यते । ननु जीवनसंशयस्य व्यापाराभावात् कथं करणत्वमित्यत आह करण इति । फलायोगव्यवच्छिन्नत्वस्य करणलक्षणत्वात् इति भावः । प्रमाणयोः देवदत्ते शतवर्षजीवित्वगृहान्यावृत्तित्वनिश्चययोः । विरोधज्ञानं विरुद्धार्थविषयकत्वज्ञानम् । शतवर्षमध्ये गृहनिष्ठाभावप्रतियोगिनि शतवर्षजीवित्वं गृहान्यावृत्तित्वञ्च धर्मद्वयं विरुद्धमुभाभ्यां तन्निश्चयार्थं तदुभयविषयीकृतं ज्ञानमिति यावत् । तदाहितेति । तादृशविरोधज्ञानाहितप्रामाण्यसंशयद्वारेत्यर्थः । तादृशविरोधज्ञानं विना प्रामाण्यसंशयासम्भवेन उपजीव्यत्वादिति भावः । कश्चिदित्यस्वरसोद्भावनम् । तदूचीजन्तु

र्थापत्तिर्मानान्तरम् । ननु संशयस्य कल्पकत्वे स्थाणु-पुरुषसंशयादपि तदेककोटिनिर्वाहकल्पनापत्तिः, न च प्रमितसंशयः कल्पनाङ्गम्, जीवनस्य तदानीं प्रमितत्वे संशयाभावप्रसङ्गात् जीवित्वनिश्चयेऽनुमानादेव बहिःसत्त्वनिश्चयाच्च । कदाचित् प्रमितत्वे च प्राक्प्रमितपुरुषत्वस्यान्तरा तत्संशये कल्पना स्यात् । किञ्च जीवनसंशयस्य मृतेऽपि दृष्टत्वान्न व्यभिचारेण बहिःसत्त्वगमकमिति चेत् । न । यथोक्तसामग्रीप्रभवसंशयस्य कल्पनाङ्गत्वात्, अत एव मृतजनिष्यमाणयोर्गृहाभावनिश्चयो न यथोक्तसंशयमापादयतीति न बहिःसत्त्वकल्पकः ।

आन्तरालिकस्य प्रामाण्यसंशयस्य तद्व्यापारत्वे मानाभाव इति । लिङ्गविशेषणस्येति । जीवित्वे सति गृहासत्त्वस्यैव हेतूकरणीयत्वादिति भावः । अनुमानासम्भवात् । अनुमितिसामग्र्यसम्भवात् । कदाचित् प्रमितत्व इति । यदा कदाचिन्निश्चितविषयकसन्देहस्यैव कल्पनाङ्गत्व इत्यर्थः । कल्पना स्यात् । जीवनतदुपपादककल्पना स्यात् । जीवनसंशयस्येति । जीवनसंशयो यस्मादिति व्युत्पत्त्या गृहासत्त्वनिश्चयस्येत्यर्थः । यथाश्रुते समाधाने गृहाभावनिश्चय इत्यसङ्गतेः तच्चानुपदं स्फुटीभविष्यति । मृतेऽपि मृतत्वेन निश्चितेऽपि । व्यभिचारेण अन्वयव्यभिचारेण । यथोक्तेति।संशयस्य जीवनसंशयस्येत्यर्थः । कार्यकारणभावस्तु फलबलात्तद्व्यक्तित्वेन विलक्षणशक्तिमत्त्वेनैव वेति । किञ्चेत्युक्तदोषमुद्धरति अत एवेति । यथोक्तसामग्रीप्रभवसंशयस्य कल्पनाङ्गत्वादेवेत्यर्थः । मृतजनिष्यमाणयोरिति। मृतत्वजनिष्यमाणत्वेन निश्चितयोरित्यर्थः । गृहाभावनिश्चयः गृहासत्त्वनिश्चयः । यथोक्तेति । यथोक्तरूपेण जीवित्वसंशयं जनयतीत्यर्थः ।

गृहाभावश्च योग्यानुपलब्धिनिश्चितो न संशय इति । अथ जीवननियमग्राहकप्रमाणयोर्यदि च तुल्यबलत्वमगत्वतम्, क्व तर्हि बहिःसत्त्वकल्पना, विशेषदर्शनविरहात, कल्पने वा प्रमितजीवननिर्वाहकबहिःसत्त्ववद्गृहनियमनिर्वाहकमरणस्याप्युचितत्वेन तत्कल्पनापि स्यात् जीवन-

---

के चित्तु जीवनसंशयस्येति । यथा कथञ्चित् जीवनसंशयस्येत्यर्थः । मृतेऽपीति । बहिःसत्त्वनिश्चयाभावोऽसिद्ध एवेति भावः । एतेन दूषणद्वयमेव निराकृतम् । ननु तथापि मृतत्वादिना निश्चिते गृहासत्त्वनिश्चयः बहिःसत्त्वं न कल्पयतीति अत आह अत एवेति । अर्थस्तु पूर्ववादित्याहुः।ननु जीवित्वनिश्चये प्रामाण्यसंशयात् जीवित्वसंशय इव योग्यानुपलब्धिजनितगृहाभावनिश्चयेऽपि प्रामाण्यसंशयात् कथं न गृहाभावसंशय इत्यत आह गृहाभावश्चेति । तथा च तत्र योग्यानुपलब्धिजनितज्ञानमेव विशेषदर्शनतया प्रामाण्यसंशयविरोधीति भावः । जीवननियमेति । देवदत्ते शतवर्षजीवित्वगृहान्यावृत्तित्वनिश्चययोरित्यर्थः । तुल्यबलत्वमिति । उभयत्रैव सन्दिग्धाप्रामाण्यकत्वमित्यर्थः । अवगतं प्रमाणसिद्धम् । बहिःसत्त्वकल्पना बहिःसत्त्वनिश्चयः । विशेषदर्शनेति । बहिःसत्त्वव्याप्यस्य शतवर्षमध्ये गृहासत्त्वे सति शतवर्षजीवित्वस्य निश्चयविरहादित्यर्थः । व्याप्यनिश्चय एव तदनुपपत्त्या व्यापककल्पनादिति भावः। ननु संशयकरणकार्थापत्तिस्थले व्याप्यनिश्चयो न हेतुः किन्तु व्याप्यसंशय एव तथा फलबलात् तथैव कल्पनादित्यस्वरसादाह कल्पने वेति । जीवनेतिशतवर्षमध्ये गृहासत्त्वे सति शतवर्षजीवित्वस्य व्यापकेत्यर्थः। गृहनियमेति । गृहासतो गृहान्यावृत्तित्वस्य व्यापकेत्यर्थः। उचितत्वेन त्वदभिमतनिश्चायकसामग्रीविशिष्टत्वेन । व्याप्यसंशयमात्रं न व्यापकार्थापत्तिहेतुः किन्तु विलक्षणस्तत्संशय एवेत्यत आह जीवनेति । जीवनमरणयोः जीवित्वतदभावयोः । संशयेति । गृहान्यावृत्तित्वसं-

मरणयोः संशयाविशेषात् । अथ तयोरेकं बलीयोऽपरमबलं तदैकेनापरस्य बाध एवेति न संशयः तस्माद्यत्र शतवर्षजीवित्वमवधारितं गृहाभावश्च निश्चितः तत्र बहिःसत्त्वकल्पनं न तु जीवनसंशये, एवञ्च देवदत्तो बहिः सन् जीवित्वे सति गृहनिष्ठात्यन्ताभावप्रतियोगित्वादिति व्यतिरेकिणा बहिःसत्त्वज्ञानेनार्थापत्त्या लिङ्गविशेषणजीवित्वसंशये बहिःसत्त्वकल्पना च नास्त्येव । किञ्च गृहाभावनिश्चयः प्रमाणद्वयविषयसंशयं जनयित्वा जीवनसंशयमापाद्य बहिःसत्त्वं कल्पयतीति न

शयतोऽवैलक्षण्यादित्यर्थः । एकं गृहान्यावृत्तित्वज्ञानम् । बलीयः निश्चितप्रामाण्यकम् । अपरं शतवर्षजीवित्वज्ञानम् । अबलं गृहीताप्रामाण्यकम् । एकेनेति शतवर्षमध्ये गृहनिष्ठाभावप्रतियोगित्वेन निश्चितस्य देवदत्तस्य गृहान्यावृत्तित्वानिश्चयेनेत्यर्थः । अपरस्य अपरविषयीभूतस्य शतवर्षजीवित्वस्य । बाधः अभावनिश्चयः । शतवर्षमध्ये गृहासत्त्वे सति गृहान्यावृत्तेः शतवर्षजीवित्वाभावनिश्चयादिति भावः । न संशय इति । न शतवर्षजीवित्वसंशय इत्यर्थः । अवधारितमिति । निश्चितमित्यर्थः । गृहान्यावृत्तित्वञ्च सन्दिग्धमित्यपि बोध्यम् । गृहाभावः गृहेऽभावः । नन्वेवमेव वक्तव्यमित्यत आह एवञ्चेति । जीवित्वे सतीति । एतच्छतवर्षमध्ये गृहनिष्ठाभावप्रतियोगित्वादित्यर्थः । व्यतिरेकिणेति इदमुपलक्षणम् । देवदत्तभिन्ने मैत्रादौ साध्यहेतुनिश्चयदशायामन्वयिनापि सम्भवतीति बोध्यम् । लिङ्गेति अग्रे कल्पना चेति चकारोऽयत इत्यर्थे, यतो लिङ्गविशेषणजीवित्वसंशये बहिःसत्त्वकल्पना नास्त्येवेत्यर्थः । प्रमाणद्वयेति निश्चयद्वयविषयकप्रामाण्यसंशयमित्यर्थः । जीवनसंशयमिति । जीवनगृहा-

युक्तं, न हि यत एव यत्संशयः स एव तन्निश्चयाय प्रभवति, अतिप्रसङ्गात्। मैवम्। यथोक्तसामग्रीजनितसंशयत्वानेव तर्कयति योग्यानुपलब्धिगृहीतो गृहाभाव इति तन्निश्चयः सुदृढ इति जीवननियमग्राहकयोरेकं बाध्यं विरुद्धयोरप्रमाणत्वात्। तदिह मरणं कल्पयित्वा जीवनग्राहकं बाध्यतां नो वा बहिःसत्त्वं कल्पयित्वा गृहनियमग्राहकं तत्र बहिःसत्त्वकल्पने गृहनियमग्राहकमात्रबाधा, मरणकल्पने तु शतवर्षजीवी देवदत्तः शतवर्षजीवी गृह एवेति नियमद्वयस्यापि बाधा स्यात्, तदा-

---

न्यावृत्तित्वयोः संशयमापाद्येत्यर्थः। तन्निश्चयायेति।गृहान्यावृत्तित्वनिश्चयस्यैव बहिःसत्त्वसंशयत्वादिति भावः।अतिप्रसङ्गादिति।सर्वत्रैव तत्संशयोत्तरं तन्निश्चयापत्तेरित्यर्थः। पूर्वं तत्संशयस्य तदुपपादकनिश्चयहेतुत्वे सर्वत्रैव तत्संशयानन्तरं तदुपपादककल्पनापत्तिरित्युक्तम्, अत्र तु तत्संशायकस्यैव तन्निश्चयहेतुत्वे सर्वत्र तत्संशयानन्तरं तन्निश्चयापत्तिरित्युच्यते इति न पौनरुक्त्यम्। यद्यपि यथोक्तसामग्रीप्रभवसंशयसहकारेण तत्संशायकस्य तन्निश्चयहेतुत्वाभ्युपगमान्नातिप्रसङ्गः, तथापि स्फुटत्वात् तदनुपेक्ष्य एकमेव समाधानमुभयत्राह मैवमिति। एवं तर्कयतीति। एवं लाघवगौरवतर्कमवतारयतीत्यर्थः। योग्यानुपलब्धीति लाघवगौरवज्ञानशरीरं भवति। तथा च शतवर्षमध्ये गृहासति पुरुषे शतवर्षजीवित्वं गृहान्यावृत्तित्वञ्च द्वयं विरुद्धमिति भावः। मरणं कलपयित्वेति। मरणसत्त्वेन जीवनज्ञानमप्रमेत्यर्थः। बहिःसत्त्वं कलपयित्वेति। बहिःसत्त्वसत्त्वेनेत्यर्थः। बहिःसत्त्वकल्पन इति। बहिःसत्त्वसत्त्वे इत्यर्थः। गृहनियमेति। गृहान्यावृत्तित्वनिश्चयेत्यर्थः। बाधा अप्रमात्वम् शतवर्षजीवी गृह ए-

ह जीवनबाधे तन्नियमबाधस्यावश्यकत्वादिति । किञ्च अद्य जीवति श्वो जीविष्यतीत्यादिबहुतरक्षणलव-मुहूर्त्तादिसमयोपाधिनियतं जीवनमुपलब्धमिति तद्बाधे बहुतरव्याप्तिबाधः, देवदत्ततदवयवगृहसत्त्वव्याप्तिश्चाल्पा तथा अभावस्वरूपमरणापेक्षया बहिःसत्त्वस्य भावस्य

वेति । शतवर्षजीवित्वे सति गृहान्यावृत्तिरित्यर्थः । नियमह्रदयस्यापि बाधा स्यादिति । निश्चयह्रदयस्य विभिन्नरूपाप्रमात्वं स्यात् । शतवर्षजीवी देवदत्तः इत्यस्य शतवर्षजीवित्वाभाववति शतवर्षजीवित्वप्रकारकत्वरूपशतवर्षजीवित्वाप्रमात्वं स्यात् शतवर्षजीवित्वे सति गृहान्यावृत्तिरित्यस्य शतवर्षजीवित्वस्य विशेषणस्याभावेन विशिष्टस्याप्यभावाच्छतवर्षजीवित्वविशिष्टगृहान्यावृत्तित्वप्रकारकत्वरूपविशिष्टाप्रमात्वं स्यादिति यथाश्रुतेऽर्थे न तत्र विशिष्टबाधो विशेष्यबाधात् इत्यग्रिमग्रन्थासङ्गतेः तस्य तत्रैव व्यक्तिर्भविष्यति । तन्नियमबाधस्येति । देवदत्तः शतवर्षजीवित्वे सति गृहान्यावृत्तिरिति निर्णयप्रमात्वाभावस्येत्यर्थः । तदूबाध इति।तेषामप्रामाण्य इत्यर्थः । बहुतरव्याप्तीति । ज्योतिःशास्त्रजनिततदूबलीकृतबहुतरव्याप्तिज्ञानानामप्रामाण्यमित्यर्थः । देवदत्ततदवयवेति ।गृहसत्त्वव्याप्तिः तादात्म्यसम्बन्धेन गृहसत्त्वस्य व्याप्तिधीः गृहान्यावृत्तित्वधीरिति यावत् । न च एकस्य देवदत्तस्य तावत्कालोपाधिनिश्चयापेक्षया देवदत्ततदवयवादिपरस्परार्थगृहान्यावृत्तित्वनिश्चयानां कथमल्पत्वमिति वाच्यम् । तावत्कालोपाधिजीवित्वनिश्चयस्यापि देवदत्ततदवयवादिपरस्परार्थयावत्सत्त्वे जीवनग्राहकस्य बहुत्वात् । न च तथापि बहिःसत्त्वकल्पने देवदत्ततदवयवादिपरस्परार्थग्रहनियमवत्तेषु तदवयवादिपरस्परनियमनिश्चयानामप्यप्रमात्वं स्यादिति कथमल्पत्वमिति वाच्यम् । मरणकल्पने गृहतदवयवादिपरस्पराणां देवदत्ततदवयवादिपरस्पराणामपि कालोपाधितया तत्तज्जीवित्वनिश्चयायां कालो-

लघुत्वम्। यदि च गृहान्योन्याभावाश्रयबहिःपदार्थवृत्ति-संयोगाश्रयत्वं बहिःसत्त्वमिति तदपेक्षया मरणमेव लघु, तथापि मरणापेक्षया जीवनमात्रं लघ्विति तदेव कल्पयितुमर्हम्। ततोऽर्थापत्तिकल्पितं जीवित्वमुपजीव्यानुमानादपि बहिःसत्त्वज्ञानं भविष्यतीत्येतावत्तर्कसहकृतो यथोक्तसामग्रीप्रभवः संशयो बहिःसत्त्वं कल्पयति । न

पाध्यन्तरजीवित्वनिश्चयानामप्यप्रमात्वं स्यादिति भावः । अभावस्वरूपेति। तत्पुरुषीयशरीरसंयोगाधिकरणक्षणावृत्तितत्पुरुषीयशरीरप्राणसंयोगध्वंसरूपेत्यर्थः । गृहान्योन्याभावाश्रयेति । गृहतदभावान्योन्याभावकूटघटितत्वेन च बहिःसत्त्वं गुर्विति भावः । अदृष्टविशेषध्वंसो मरणमित्यभिप्रायेणैतदभिप्राय इत्यपि कश्चित् । तदेवेति । बहिःसत्त्वमेवेत्यर्थः । बहिःसत्त्वकल्पने लघुतरं जीवनमायास्यतीति मरणकल्पने च बहिःसत्त्वापेक्षया गुरुतरं गृहान्यावृत्तित्वमायास्यतीति गौरवादिति भावः । तथा सति जीवनमात्रमेव कल्प्यतां किं बहिःसत्त्वकल्पनेनेत्याशङ्क्यायामाह तत इति । उपजीव्य हेतूकृत्य । अनुमानादपीति । तथा चैतस्याल्पत्वात् तर्कत्वमपि कल्प्यत इति भावः । एतावत्तर्केति। एतावल्लाघवज्ञानेनेत्यर्थः । बहिःसत्त्वं कल्पयति बहिःसत्त्वं निश्चाययतीत्यर्थः । मरणे च लाघवज्ञानाभावान्न तन्निश्चयं जनयतीति भावः । एतेन किञ्चेत्युक्तमपि प्रत्युक्तम् । तत्संशायकमात्रस्य तन्निश्चायकत्वे एवातिप्रसङ्गात् सहकारिविशेषमासाद्य तस्य तथात्वे चातिप्रसङ्गाभावादिति हृदयम् । न च संशयसामान्यमेव कल्पकमस्तु कृतं यथोक्तसामग्रीप्रभवत्वविशेषणेनेति वाच्यम् । अयं पुरुषो न वेति संशयस्यापि पुरुषत्वं भावरूपं तदभावापेक्षया लघ्विति तर्कसहकृतस्य पुरुषत्वकल्पकत्वापत्तेः, अत्रेष्टापत्तौ न देयमेवोक्तविशेषणमिति ध्येयम् । विपर्ययेति । विपर्ययः गुर्वर्थविपरीतः लाघवार्थ इति यावत् । तदपर्य्यवसायित्वे तदनुमि-

च वाच्यं तर्काणां विपर्ययापर्य्यवसायित्वे आभासत्वम्, तत्पर्य्यवसाने च तदेवानुमानमेतत्तर्कसहायं बहिःसत्त्वमनुमापयिष्यतीति यतो लाघवगौरवतर्काणां विपर्य्ययापर्य्यवसायिनामेव प्रमाणसहकारित्वमत एव प्रत्यक्षशब्दादावपि सहकारी सः। न च तस्यां दशायामेव प्रमाणान्तरमस्ति, ततोऽर्थापत्तिसहकारित्वं तर्कस्य। ननु स्वकारणाधीनस्वभावविशेषात्तर्कानुगृहीतयथोक्तसंशयस्य यदि बहिःसत्त्वप्रमापकत्वं तदा मृत्ने गृहस्थिते वा तादृशसंशयाद्यत्र बहिःसत्त्वकल्पना सापि प्रमा स्यादिति चेत्। न। यथा हि प्रमापकस्येन्द्रियस्य दोषेण प्रमाशक्तिरोधानादैन्द्रियकभ्रमः तथा यथोक्तसंशयस्यापि दो-

---

तिजनकसामग्न्यसहकृतत्वे। आभासत्वं लघ्वर्थनिश्चयाजनकत्वम्। ईश्वरानुमानादौ लाघवज्ञानस्य लघ्वर्थानुमितिजनकसहकारेण लघ्वर्थनिश्चयजनकत्वदर्शनादिति भावः। तत्पर्य्यवसाने चेतिदेवदत्त एतत्कालीनबहिःसत्त्वस्मरणान्यतरप्रतियोगी एतत्कालीनप्रागभावाप्रतियोगित्वे सति गृहासत्त्वादित्यनुमितिजनकसामग्न्याः सहकारित्वे चेत्यर्थः। विपर्ययेति। लघ्वर्थानुमितिजनकसामग्न्यसहकृतानामपीत्यर्थः। ननु लाघवज्ञानस्य प्रमाणान्तरसहकारित्वे प्रमाणान्तरादेव बहिःसत्त्वज्ञानं भविष्यति किमर्थापत्त्येत्यत आह न चेति। तस्यामिति। लाघवज्ञानदशायामित्यर्थः। स्वभावविशेषात् विशेषशक्तिविशेषात्। प्रमाशक्तीति। प्रमाजनकशक्तेरुद्भवनाशादित्यर्थः। उद्भवश्च शक्तिनिष्ठपदार्थान्तरम्। अग्रहरूपेति। धर्मधर्मिणोर्भेदाग्रहरूपेत्यर्थः। गुरुभिरन्यथाख्यात्यनभ्युपगमादिदमुक्तम्। जीवनगृ-

षेण प्रमाशक्तितिरोधानादग्रहरूपभ्रमसम्भवात् । परोक्ष-
ज्ञानानां जनकज्ञानाविभ्रमत्वे यथार्थत्वनियम इति चेत्।
सत्यम्,प्रकृतेऽपि जीवनगृहाभावनियमग्राहकप्रमाणयोर-
न्यतराभासत्वेनाभासत्वसम्भवात् । यद्वा दोषाभावसह-
कृतस्य यथोक्तसंशयस्य बहिःसत्त्वप्रमापकत्वमिति ॥

हाभावग्राहकप्रमाणयोरिति। शतवर्षजीवित्वनिश्चययोग्यानुपलब्धि-
जनितगृहाभावनिश्चययोरित्यर्थः । मृतस्थले जीवननिश्चयस्याभा-
वसत्त्वादिति भावः । कुत्र चित् जीवननियमग्राहकयोरिति पाठः।
अत्रापि नियमग्राहकपदेन योग्यानुपलब्धिजनितः देवदत्तो गृहे ना-
स्त्येवेति निश्चयो विवक्षितः न तु जीवी गृह एवेति निश्चयः । त-
थासति बहिःसत्त्वं कुत्रापि न स्यात् । गृह एवेति निश्चयस्य कुत्रा-
प्याभासत्त्वादिति ध्येयम् । दोषेण प्रमाशक्तेरुद्भावनाशमुक्त्वा दो-
षाभावस्य प्रमाहेतुत्वमाह यद्वेति ॥

इति श्रीमथुरानाथतर्कवागीशविरचिते तत्त्वचिन्ता-
मणिरहस्ये अनुमानाख्यद्वितीयखण्डरहस्ये संश-
यकारणकार्थापत्तिपूर्वपक्षरहस्यम् ।

उच्यते । अनयोरेकं बाध्यं विरुद्धार्थग्राहकत्वा-
दिति सामान्यतोदृष्टादेव तर्कसहकृतादगृहनियमग्राह-
कबाधे लिङ्गविशेषेण जीवित्वनिश्चयेऽनुमानाद्बहिःस-
त्त्वसिद्धिः। तथा हि, जीवनप्रमाणबाधे गृहनियमप्रमाणो-
त्थापितलिङ्गेन मरणानुमानात् प्रमाणत्वाभिमतयोर्द्वयोरपि

अथ संशयकारणकार्थापत्तिसिद्धान्तरहस्यम ।

अनयोरिति। देवदत्तः शतवर्षजीवी देवदत्तो गृहान्यावृत्तिरिति निश्चयद्वयान्यतरत्वं शतवर्षजीवित्वभ्रमगृहान्यावृत्तित्वभ्रमद्वया-न्यतरवृत्ति शतवर्षजीवित्वगृहान्यावृत्तित्वोभयविरोधनिरूपकाधिक-रणविशेष्यकशतवर्षजीवित्वप्रकारकज्ञानवृत्तित्वे सति तद्विशेष्यक-गृहान्यावृत्तित्वप्रकारकज्ञानवृत्तित्वादित्यर्थः । तदुभयविरोधनिरूप-कत्वन्तु तदुभयत्वावच्छिन्नप्रतियोगिताकाभाववत्त्वं यत् तदुभयो-र्विरोधनिरूपकाधिकरणविशेष्यकतत्प्रकारकज्ञानवृत्तित्वे सति ताद-शाधिकरणविशेष्यकतत्प्रकारकज्ञानवृत्ति तत्तद्भ्रमतद्भ्रमद्वयान्यतर-वृत्ति यथा सत्तावान् गुणः द्रव्यत्वान् गुण इतिनिश्चयद्वयान्यतर-त्वमिति सामान्यमुखी च व्याप्तिरिति भावः। यथाश्रुते शतवर्षजीवी देवदत्त इत्यत्र व्यभिचारात् तस्य प्रमात्वात् बाधत्वस्य सामान्य-तो दुर्वचत्वाच्च । तर्कसहकृतादिति। लाघवज्ञानसहकृतादित्यर्थः। गृ-हनियमग्राहकबाध इति । गृहान्यावृत्तित्वनिश्चयस्याप्रमात्वनिश्चये इत्यर्थः । जीवनप्रमाणबाध इति । शतवर्षजीवित्वनिश्चयस्याप्रमात्वे इत्यर्थः । गृहनियमप्रमाणेति । गृहान्यावृत्तित्वनिश्चयान्वितेन एत-त्कालीनप्रागभावप्रतियोगिप्राणित्वे सति गृहान्यावृत्तित्वविशिष्टगृ-हासत्त्वेन लिङ्गेनेत्यर्थः । मरणानुमानात् मरणस्यानुमानप्रमाण-सिद्धत्वात् । प्रमाणत्वाभिमतयोरिति। शतवर्षजीवी देवदत्तः शतव-

बाधा स्यात् गृहनियमग्राहकमानबाधे च निष्परिपन्थिजीवनप्रमाणाल्लिङ्गविशेषणजीवित्वनिश्चये बहिःसत्त्वानुमानादेकप्रमाणबाधैवेत्यादितर्कसहकृतात् सामान्यतोदृष्टादेवानयोरेकं बाध्यमिति जायमानानुमितिः परम्परामरणज्ञापकं विषयीकरोति, न तु बहिःसत्त्वपरम्परासाधकं जीवनप्रमाणं, तथा च सामान्यतोदृष्टादेव गृहनियमग्राहकबाधे जीवनप्रमाणाल्लिङ्गविशेषणजीवित्वनिश्चयेऽनुमानादेव बहिःसत्त्वज्ञानमिति किमर्थापत्त्या। ननु बहिःसत्त्वज्ञानं विना जीवी गृह एवेत्यस्य ब्रह्मणापि बाधितुमशक्यत्वात् प्रथमं बहिःसत्त्वज्ञानं न तु गृहनि-

---

र्षजीवी देवदत्तो गृह एवेति निश्चयद्वयोरित्यर्थः। बाधा स्यात् अप्रमात्वं स्यात्। शतवर्षजीवी देवदत्तो गृह एवेति निश्चयेऽपि शतवर्षजीवित्वस्य देवदत्ते प्रकारकत्वादिति भावः। निष्परिपन्थीति। प्रतिबन्धकासमवहितेत्यर्थः। जीवनप्रमाणात् केन्द्रस्थबृहस्पतिकत्वादिनिष्ठप्रमात्मकजीवित्वव्याप्तिनिश्चयात्। जीवित्वनिश्चये जीवित्वसिद्धौ। बहिःसत्त्वानुमानात् बहिःसत्त्वस्यानुमानप्रमाणसिद्धत्वात्। एकप्रमाणबाधैवेति। गृहान्यावृत्तित्वनिश्चयस्यैवाप्रमात्वं स्यादित्यर्थः। परम्परेति। गृहान्यावृत्तित्वनिश्चयमित्यर्थः। जीवनप्रमाणं शतवर्षजीवित्वम्। बाधे अप्रमात्वनिश्चये। जीवनप्रमाणादिति। बहिःसत्त्वज्ञानं विनेति। देवदत्ते बहिष्ट्वनिश्चयं विनेत्यर्थः। बाधितुमिति। अप्रमात्वेन निश्चितुमित्यर्थः। गृहनियमनिश्चयस्याप्रमात्वं हि बहिःसत्त्ववति देवदत्ते गृहान्यावृत्तित्वप्रकारकत्वं बहिःसत्त्वस्यैव गृहान्यावृत्तित्वाभावत्वादिति देवदत्ते तन्निश्चयस्यावश्यकत्वादिति भावः। बाधानन्तरम्। अप्रमात्वनिश्चयानन्तरम्। तत् देवदत्ते बहिःसत्त्वज्ञान-

यमग्राहकबाधानन्तरं तत् येन निष्परिपन्थिजीवनग्राहकाजीवित्वनिश्चयेऽनुमानं स्यात्, न प्राथमिकबहिःसत्त्वज्ञानमर्थापत्तिं विना । न च गृहनियमग्राहिणि तुल्यबले जागरूके कथमर्थापत्त्यापि बहिःसत्त्वज्ञानमिवाच्यम् । तर्कसहकारेणार्थापत्तेर्बलवत्त्वात् बहिःसत्त्वज्ञानमुत्पाद्य गृहनियमग्राहकमानबाधादिति चेत् । न । तर्कसहकारेण सामान्यतोदृष्टस्य बलवत्त्वेन गृहनियमग्राहकबाधसम्भवात्, तस्माद्यथोक्तसंशयदशायां जीवनबाधे तन्नियमबाधस्यावश्यकत्वादिति तर्कानन्तरमेव बहिःसत्त्वज्ञानमित्यविवादम् । तत्र कल्पनीयप्रमाणा-

---

म् । गृहनियमेति । गृहान्यावृत्तित्वसंशये इत्यर्थः । जीवित्वसंशयकालोत्पन्नप्रामाण्यसंशयाहितगृहान्यावृत्तित्वसंशयात्मककोटिद्वयोपस्थितिसत्त्वादिति भावः । अर्थापत्तेर्बलवत्त्वादिति । अर्थापत्तिजनकीभूतस्य जीवित्वसंशयस्य गृहान्यावृत्तित्वसंशये प्रतिबन्धकत्वादित्यर्थः । अलौकिकप्रत्यक्षसामग्र्या मानससामग्र्याः सर्वतो बलवत्त्वात् गृहान्यावृत्तित्वनिश्चयस्याऽप्रमात्वग्रहसम्भवादिति भावः । जीवनबाध इति । जीवित्वनिश्चयस्याऽप्रामाण्ये इत्यर्थः । तन्नियमेति । शतवर्षजीवी देवदत्तो गृह एवेति निर्णयाप्रमात्वस्यावश्यकत्वादित्यर्थः । कल्पनीयप्रमाणाभाव इति । कल्पनीयप्रमितिजनकताकेत्यर्थः । गृहनियमग्राहकद्वारेति । गृहान्यावृत्तित्वनिश्चयस्य प्रामाण्यद्वारेत्यर्थः । अनिर्द्धारितैकेति । सामान्यतोऽन्यतरनिश्चयस्याप्रामाण्यनिश्चयेत्यर्थः । एकबाधानुकूलेति । गृहान्यावृत्तित्वनिश्चयस्याप्रामाण्यानुकूलबहिःसत्त्वकल्पनायामित्यर्थः । एकबाधप्राप्तिः सामान्यतोऽन्यतरनिश्चयस्याप्रामाण्यनिश्चयः । ननु सामान्यतोऽन्यतरामाप्राण्यनिश्चयं विनैव

भावे यथोक्तसंशये तर्कस्य न सहकारित्वं गौरवात् किन्तु नियमग्राहकबाधद्वारा बहिःसत्त्वपरम्परासाधके सामान्यतोदृष्टे लाघवात्। न च सामान्यतोदृष्टावतार एवात्र नास्तीति वाच्यम्। अनिर्द्धारितैकबाधप्राप्तौ ह्येकबाधानुकूलकल्पनायां विनिगमकस्तर्को भवति, न चैकबाधप्राप्तिः सामान्यतोदृष्टं विना। किञ्च विरोधज्ञानानन्तरमेकमप्रमाणमिति यदि धीर्नास्ति तदा प्रामाण्यसंशयो न स्यात्, न स्याच्च जीवनसंशयः द्वयोरपि जीवनमरणनिश्चायकत्वात्। अथैकमनयोरप्रमाणमिति

इदमप्रामाणमिति संशयो यथोक्तलाघवतर्कसहकारादबहिःसत्त्वनिश्चयं जनयिष्यति किं सामान्यतोदृष्टेनेत्यत आह किञ्चेति। विरोधज्ञानानन्तरं विरुद्धार्थविषयकज्ञानानन्तरम्। एकमप्रमाणमिति। अनयोरन्यतरदप्रमाणमिति धीर्यदि नास्तीत्यर्थः। तदा प्रामाण्येति। गृहाभावनिश्चयात् प्राक् द्वयोर्विरुद्धार्थविषयकत्वानुपस्थित्याऽप्रामाण्यनिश्चितप्रामाण्यकत्वान्यतरस्याप्रामाण्यज्ञाने च तत्र च प्रामाण्यनिश्चयेऽप्रामाण्यसंशयादिति भावः। ननु मा भूत् प्रामाण्यसंशयो जीवनसंशयादेव बहिःसत्त्वकल्पना भविष्यतीत्यत आह न स्याच्चेति। द्वयोरिति। जीवनग्राहकप्रमाणगृहान्यावृत्तित्वग्राहकप्रमाणयोरित्यर्थः। जीवनमरणेति। मरणपदं मरणनिर्वाह्यगृहान्यावृत्तित्वपरम्। जीवित्वगृहान्यावृत्तित्वनिश्चयोपस्थितत्वादित्यर्थः। तथा चागृहीताप्रामाण्यकजीवित्वनिश्चयसत्त्वात् कथं तत्संशय इति भावः। इदमापाततः, यत्र द्वयोः प्रामाण्यं पूर्वं न निश्चितं तत्र सामान्यतोदृष्टं प्रति प्रामाण्यसंशयादिसम्भवादिति ध्येयम्। नन्वेतावता भवत्वप्रामाण्यसंशयात् पूर्वं सामान्यतोदृष्टाभावः तथापि तस्यानयोरे-

ज्ञानं जनयित्वा सामान्यतोदृष्टस्य पर्य्यवसितत्त्वात्तज्ज-
नितनियमह्रयसंशयाहितजीवनसंशयानन्तरं तर्कावतारे
बहिरस्तीज्ञानं जायमानं संशयस्य कारणत्वं व्यवस्था-
पयतीति चेत् । न । यदेव हि विरुद्धार्थग्राहकत्वं तर्क-
विनाकृतमनिर्द्धारितैकाप्रामाण्यानुमितिमज्जीजनत्तदेव त-
र्कसहकृतं पुनरनुसन्धीयमानं गृहनियमग्राहकप्रमाण-
मित्यनुमितिं बहिःसत्त्वज्ञानानुकूलां जनयति सहका-
रिवैचित्र्येणैकस्यापि विचित्रफलजनकत्वात् । न च

कमप्रमाणमिति ज्ञानं जनयित्वा विनाशात् तज्जनितप्रामाण्यसंशया-
हितजीवित्वसंशयानन्तरं तर्कावतारे बहिरस्तीति ज्ञानं स्यात् तत्र
जीवित्वसंशयस्य कारणत्वादित्याशङ्क्यते अथेति । पर्य्यवसितत्वात्
विनाशात् । नियमह्रयेति । निश्चयह्रवप्रामाण्यसंशयाहितेत्यर्थः । अ-
निर्द्धारितेति । सामान्यतोऽन्यतरनिश्चयस्याप्रामाण्यानुमितिमित्य-
र्थः । पुनरिति । जीवनसंशयानन्तरं पुनरनुसन्धीयमानमित्यर्थः । वि-
रुद्धार्थग्राहकत्वं विना तज्ज्ञानं विना । बहिःसत्त्वकल्पेऽपीति षष्ठ्य-
र्थे सप्तमी । अबाधप्रसङ्गादिति । बाधः असत्त्वम् । तदभावप्रसङ्गात्
सत्त्वप्रसङ्गादिति यावत् । तदनुसन्धानं विना । तस्यासत्त्वन्तु अनु-
भवसाक्षिकमिति भावः । पर्यवसन्नमपीति । विशिष्टमपीत्यर्थः । अष्ट-
द्रव्यवृत्तित्वबाध इति । अद्रव्यवृत्तित्वाभावनिश्चय इत्यर्थः । व्यति-
रेकिणेति । इच्छा अष्टद्रव्यातिरिक्तद्रव्याश्रिता अष्टद्रव्यानाश्रितत्वे
सति गुणत्वादिति व्यतिरेकिणेत्यर्थः । तत्सिद्धेरिति । अष्टद्रव्याति-
रिक्तद्रव्यसिद्धेः सम्भवादित्यर्थः । तत्प्रकारकेति । अष्टद्रव्यातिरिक्त-
द्रव्यत्वप्रकारकेत्यर्थः । ननु लाघवबाधसहकारेण व्यापकतानवच्छे-
दकमपि प्रकारीभूय भासते ईश्वरानुमानादौ तथा दर्शनादित्यत
आह व्यतिरेकिणोऽपीति । व्यतिरेकव्याप्तिज्ञानस्यापीत्यर्थः । ननु

जीवनसंशयानन्तरं तदनुसन्धानमसिद्धम्, गृहानियमग्राहकस्य जीवनग्राहकविरुद्धार्थग्राहकत्वं विना बहिःसत्त्वकल्पनेऽप्यबाधप्रसङ्गात् । अथ यदि पर्य्यवसन्नमपि प्रमाणं पुनरनुसन्धीयमानं सहकारिविशेषात् फलान्तरजनकं तदेच्छा द्रव्याश्रिता कार्य्यत्वादिति सामान्यतोदृष्टद्रव्याश्रितत्वानुमितौ पश्चादृष्टद्रव्यवृत्तित्वबाधे व्यतिरेकिणात्मसिद्धिरिति भज्येत अदृष्टद्रव्यवृत्तित्वबाधसहकृतात् सामान्यतोदृष्टादेव पुनरनुसन्धीयमानात् तत्सिद्धेरिति चेत् । न । अनुमितेर्व्यापकतावच्छेदकप्रकारकत्वनियमेन तत्प्रकारकबुद्धेर्व्यतिरेकिसाध्यत्वात् व्यतिरेकिणोऽप्यन्यत्र सामर्थ्यावधारणेनोपायान्तरस्यादोषाच्च । अपि च देवदत्तो जीवनमरणान्यतरप्रतियोगी प्राणित्वान्मद्वदिति सामान्यतोदृष्टं लाघवसहकारेण जीवनप्रतियोगित्वं विषयीकरोति तथा च लिङ्गविशेषणनिश्चयादनु-

---

विरुद्धार्थग्राहकत्वप्रतिसन्धानं विना बहिःसत्त्वनिश्चयस्यासत्त्वमेवासिद्धं तस्य पुनरनुसन्धानं विनापि यथोक्तसामग्रीप्रभवसंशयानन्तरं लाघवावतारादबहिःसत्त्वनिश्चयस्यानुभवसिद्धत्वादित्यस्वरसादाह अपि चेति । सामान्यतोदृष्टमिति । जीवित्वसंशयानन्तरोत्पन्नमित्यर्थः । न च प्रामाणिकप्रतिसन्धानाभावेऽपि यथोक्तसामग्रीप्रभवसंशयानन्तरं बहिःसत्त्वासिद्धेरर्थापत्तिरतिरिच्यते इति वाच्यम् । केन्द्रस्थितबृहस्पतिकत्वस्य घटादिसाधारणतया प्रामाणिकत्वोपस्थितिं विनापि यथोक्तसामग्रीघटकस्य शब्दत्वनिश्चयस्यैवास-

मानादेव बहिःसत्त्वसिद्धिः । अथ लाघवसाचिव्यात् सामान्यतोदृष्टस्यापि विशेषविषयत्वात् नियमग्राहक-प्रमाणोत्थापितलिङ्गकमरणानुमानेन जीवनग्राहकस्यैव सत्प्रतिपक्षत्वम् एकेनापि भूयसामपि प्रतिबन्धसम्भवात् । न च तर्कात्सामान्यतोदृष्टस्य बलवत्त्वम्, व्याप्ति-पक्षधर्म्मते हि बलं तच्च तुल्यमेव ज्ञातं लाघवाख्यतर्कस्य विशेषमात्रपर्य्यवसायकत्वेन व्याप्तिग्राहकत्वस्य तुल्य-त्वादिति चेत् । तर्हि पक्षधर्म्मताबलाद्विशेषसिद्धिः क्वापि न स्यात् सर्वत्र सामान्यमुखप्रवृत्तप्रमाणस्य विशेषप-र्य्यवसानेऽन्यसाधर्म्येण सत्प्रतिपक्षसम्भवात्, अप्रयोज-

---

म्भवादिति भावः । विशेषविषयत्वादिति । जीवनत्वप्रकारेण जीवन-विषयकत्वादित्यर्थः । अन्यथा अन्यतरत्वरूपेण जीवनविषयकत्वे मरणानुमानेन न सत्प्रतिपक्षः सम्भवति भिन्नप्रकारकत्वेन विशेष-कत्वाभावादिति भावः । नियमग्राहकप्रमाणोति । गृहान्यावृत्तित्वनि-श्चयनिश्चितलिङ्गपरामर्शेनेत्यर्थः । तच्च देवदत्तो मृतः गृहान्यावृत्ति-त्वे सति गृहावस्थानस्याप्रामाणिकत्वादित्याकारकमिति भावः । जीवनग्राहकस्यैवेति । देवदत्तः शतवर्षजीवी केन्द्रस्थबृहस्पतिप्रामा-णिकत्वादित्यादेरेवेत्यर्थः । सत्प्रतिपक्षितत्वमिति । ननु जीवनग्राह-कस्य केन्द्रस्थबृहस्पतिकप्रामाणिकत्वकेवलप्राणित्वादिरूपतया भू-यस्त्वेन बलवत्त्वमित्यत आह एकेनेति । विशेषमात्रे जीवित्वप्रका-रेण जीवित्वानुमितौ हेतुत्वेनेत्यर्थः । भूयसामपीति । तर्हीति । विशेष-पर्य्यवसान इति । लाघवादिसहकारेण विशेषप्रकारेणानुमितिजनन इ-त्यर्थः । अन्यसाधर्म्येणेति । पर्वतो न पर्वतीयवन्हिमान् पर्वतीयवन्हि-मदन्यत्वात् इति सत्प्रतिपक्षसम्भवादित्यर्थः । अभिसन्धिमुद्घाट-

कत्वान्न विपरीतसाधनमिति तुल्यं नियमग्राहकस्याप्रयोजकत्वात् जीवनग्राहकस्य तु सामान्यतोदृष्टस्य ज्योतिःशास्त्राद्यथार्थत्वमेव विपक्षबाधकं व्याप्तिग्राहकमस्ति तस्मात् सामान्यमुखप्रवृत्तस्य सहकारिविशेषात् विशेषपरस्यानुमानस्य तद्विशेषविलक्षणग्राहकप्रमाणेन सत्प्रतिपक्षत्वम्। न च प्रमाणविरोधेनास्य तर्को न सहका-

---

यति अप्रयोजकत्वादिति। अप्रयोजकत्वात् अनुमितिप्रयोजकरूपशून्यत्वात् हेतौ पक्षधर्मतानिश्चयविरहात् इति यावत्। न विपरीतसाधनमिति। न पक्षधर्मताबललभ्यविशेषविरहव्याप्यवत्तानिश्चय इत्यर्थः। तुल्यमिति। गृहान्यावृत्तित्वस्य देवदत्ते सन्दिग्धत्वादिति भावः। नियमग्राहकस्येति। पूर्वोत्पन्नस्य गृहान्यावृत्तित्वनिश्चयस्येत्यर्थः। अप्रयोजकत्वात् अनुमित्यजनकत्वात्। तत्र प्रामाण्यसन्देहादिति भावः। नन्वेवं जीवित्वे सति गृहासत्त्वेन बहिःसत्त्वानुमितिरेव कथं स्यात् गृहान्यावृत्तित्वनिश्चयवत् लाघवसहकारेण उत्पन्नजीवित्वविषयकानुमितेरपि प्रामाण्यसंशयेन लिङ्गविशेषणजीवित्वसन्देहात् व्याप्तिपक्षधर्मतानिश्चयविरहादित्यत आह जीवनग्राहकस्येति। ज्योतिःशास्त्रादृयथार्थत्वमेव जीवनग्राहकस्य सामान्यतोदृष्टस्य लाघवतर्कसहकारेण जीवनविषयकस्य सामान्यतोदृष्टस्य। विपक्षबाधकम्। अप्रामाण्यग्रहे बाधकम्। व्याप्तिग्राहकमस्तीति। जीवित्वलिङ्गकबहिःसत्त्वानुमाने व्याप्तिविशिष्टपक्षधर्मतानिश्चायकमस्तीत्यन्वयः। विशेषग्राहकप्रमाणेनेति। अतुल्यबलेनेति शेषः। गृहान्यावृत्तित्वस्य निश्चयासत्त्वेऽपि मरणव्याप्यत्वेन धर्मान्तरनिश्चय एव प्रतिबन्धकः स्यादित्याशङ्क्यते न चेति। प्रमाणविरोधेन। प्रमाणान्तरविरोधेन मरणव्याप्यत्वेन मेयत्वादिलक्षणयत्किञ्चिद्धर्मान्तरस्य निश्चयेन प्रतिबन्धेनेति यावत्। यद्यपि मरणव्याप्यत्वेन यत्किञ्चिद्धर्मान्तरस्य निश्चयो न सर्वत्र, तथापि यत्र तद्-

रीति वाच्यम्। तर्कानवतारे विशेषपरत्वाभावेनाविरोधात् तदवतारे तदधिकबलत्वादेव, अन्यथा तर्कानवतारे सत्प्रतिपक्षस्य तदवतारेऽपि तत्त्वं न निवर्त्तते। किञ्चैवमर्थापत्तावपि ताद्विरोधेन न सहकारी स्यात्। यदुक्तं मरणकल्पने शतवर्षावच्छिन्नजीवी गृह एवेत्यस्यापि बाध इति, तत्र विशिष्टबाधो न विशेष्यबाधात् मरणेऽपि जीवी गृह एवेत्यस्य विशेष्यस्याबाधात् किन्तु विशेषणबाधात्, स च शतवर्षजीवित्वबाध एव। विशेषणाभा-

---

वतारस्तत्रार्थापत्तिरायास्यतीति भावः। विशेषपरत्वाभावेनेति। विशेषप्रकारकानुमितिजनकत्वाभावेनेत्यर्थः। अविरोधात् मरणव्याप्यवत्तानिश्चयस्याप्रतिबन्धकत्वात्। तदधिकबलत्वादेवेति। तदपेक्षया सामान्यतोदृष्टस्याधिकबलत्वादेवेत्यर्थः। तर्केण तत्र प्रामाण्यसंशयादिति भावः। अन्यथेति। तर्कस्याधिकबलत्वासम्पादकत्वे इत्यर्थः। ताद्विरोधेनेति। बहिःसत्त्वाभावव्याप्यत्वेन यत्किञ्चिद्धर्मनिश्चयस्य प्रतिबन्धकत्वेनेत्यर्थः। किञ्चेत्यापाततः। बहिःसत्त्वाभावव्याप्यत्वेन यत्किञ्चिद्धर्मनिश्चयसत्त्वे बहिःसत्त्वनिश्चयाभावे इष्टापत्तेः मयापि तदानीं तदनभ्युपगमादिति ध्येयम्। बाधः अप्रामाण्यम्। तत्र विशिष्टबाधः तत्प्रतिपाद्यं विशिष्टविषयकज्ञानस्याप्रामाण्यम्। न विशेष्यबाधात् न विशेष्याभाववति विशेष्यप्रकारकत्वात्, न गृहान्यावृत्तित्वाभाववति गृहान्यावृत्तित्वप्रकारकत्वादिति यावत्। अबाधादिति। गृहान्यावृत्तित्वांशे बाधासम्भवादित्यर्थः। किन्तु विशेषणबाधादिति। किन्तु शतवर्षजीवित्वाभाववति शतवर्षजीवित्वप्रकारकत्वादित्यर्थः। धर्मिणि विशिष्टस्य प्रकारत्वे विशेषणस्यापि प्रकारत्वनियमात्। अत एव गुणान्यत्वविशिष्टसत्तावान् गुण इत्यस्याप्यप्रमात्वं गुणे विशिष्टसत्तायाः प्रकारत्वे गुणान्यत्वस्यापि प्रकारत्वादिति भावः। शतवर्षजीवित्वबाध एवेति। श-

वायत्तो विशिष्टाभावोऽप्यस्तीति चेत् । न । विशेष्यवति विशिष्टाभावस्य केवलविशेषणाभावात्मकत्वात् विशिष्टस्यातिरिक्तस्यानभ्युपगमात् ।

अन्ये तु शतवर्षजीवी देवदत्तो जीवी गृह एव, गृहे नास्तीतिप्रमाणेषु द्वयोरविरोधेऽपि तृतीयमादाय विरोधज्ञानमस्ति तत्र जीवी गृह एवेत्यप्रमाणघटितप्र-

---

तवर्षजीवित्वाप्रमात्वमेवेत्यर्थः । तथा च निश्चयद्वयस्याप्रमात्वद्वयकल्पना नास्तीति भावः । विशेषणाभावायत्त इति । तथा च विशिष्टाभाववति विशिष्टप्रकारकत्वरूपाप्रमात्वद्वयकल्पनापत्तिरिति भावः । विशिष्टाभावस्येति । विशिष्टाभावव्यवहारविषयस्येत्यर्थः । इदमापाततः, विशिष्टाभावस्यातिरिक्तस्याभावेऽपि विशिष्टं नास्तीतिप्रतीत्या विशिष्टस्य प्रतियोगित्वावगाहनाद्विशेषणाभावस्यैव विशिष्टप्रतियोगिकत्वाभ्युपगन्तव्यत्वात् विशिष्टप्रकारकत्वरूपाप्रमात्वमादायाप्रमात्वद्वयकल्पना भवत्येवेति ध्येयम् ।

यदि गृहान्यावृत्तित्वशतवर्षजीवित्वयोः संशयाविशेषेऽपि जीवित्वोपपादकं बहिःसत्त्वमेव कल्प्यं न तु गृहान्यावृत्तित्वोपपादकं मरणमित्यत्र तर्को विनिमक उच्यते, तदा त्वत्कृतादेव देवदत्तो जीवनमरणाद्यन्यतरप्रतियोगीति सामान्यतोदृष्टात् जीवित्वं लिङ्गविशेषणं निश्चित्यानुमानादेव बहिःसत्त्वज्ञानं स्यादिति त्वया वाच्यम्, न चैवम्, किन्तु यथोक्तसंशयस्यायमेव स्वभावो निश्चयं विनापि धर्मिणि वस्तुगत्या अबाधितत्वं यत्तदेव कल्पयति न तत्र बाधितत्वमिति कल्पनेति केचिन्मीमांसका वदन्ति तन्मतमुपन्यस्यति अन्ये त्विति । जीवी गृह एवेति । शतवर्षजीवित्वे सति गृहान्यावृत्तिरित्यर्थः । गृहे नास्तीति । शतवर्षमध्ये गृहे नास्तीत्यर्थः । प्रमाणेषु निश्चयत्रयेषु । द्वयोः शतवर्षजीवित्वनिश्चयशतवर्षमध्यगृहासत्त्वनिश्चययोः । अविरोधेऽपि परस्परविरुद्धार्थविषयकत्वाभावेऽपि । विरोधज्ञानमस्तीति तृतीये विरुद्धार्थविषयकत्वज्ञानमस्ती-

माणद्वयविरोधज्ञानजनितात्प्रामाण्यसंशयाद्धितजीवनसंशयात् प्रमाणयोरविरोधोपपादकमप्रमाणविरोधि बहिःसत्त्वं कल्प्यते यथोक्तसंशस्यायमेव स्वभावो यद्वस्तुगत्या अप्रमाणं तद्विरोधि कल्पयति विरोधघटकस्य वस्तुगत्या अप्रमाणत्वमेव विनिगमकत्वमिति। तत्तुच्छम्। अप्रमाणस्यापि प्रमाणत्वेन ज्ञानात्, तर्कादिभिर्विशेषदर्शनं विना यथोक्तसंशयानन्तरं बहिरस्तीति ज्ञानमसिद्धमतो न फलबलेन तथार्थापत्तिकल्पनम्। किञ्च मृते गृहस्थिते बहिःस्थिते तादृशसंशयादेव बहिःसत्त्वं गृहसत्त्वं मरणञ्च कल्प्येत कस्य चित् क्व चिद्वस्तुगत्या अप्रमाणत्वात्, अर्थापत्त्याभासश्चैवं न स्यात्॥

त्यर्थः। तत्र तस्मिन् ज्ञाने सति। अप्रमाणघटितेति। अप्रमात्मकनिश्चयघटितेत्यर्थः। प्रमाणद्वयेति। विरुद्धद्वयेत्यर्थः। विरोधज्ञानेति। विरुद्धार्थविषयज्ञानेत्यर्थः। अप्रामाण्यसंशयेति। देवदत्तः शतवर्षजीवी शतवर्षजीवी देवदत्तो गृह एवेति निश्चयद्वयनिष्ठाप्रामाण्यसंशयेत्यर्थः। प्रमाणयोः प्रमात्मकनिश्चयद्वयोः। अविरोधोपपादकं भ्रमत्वाभावोपपादकम्। अप्रमाणविरोधि अप्रमात्मकनिश्चयविषयविरोधि। तद्विरोधि कल्पयतीति। तद्विषयीभूतस्य विरोध्येव कल्पयतीत्यर्थः। विरोधघटकस्य विरुद्धार्थविषयकत्वज्ञानघटकस्य। प्रमाणत्वेन ज्ञानादिति। प्रमाणत्वेन निश्चयसम्भवादित्यर्थः। फलबलेनेति। तर्कं विनापि बहिःसत्त्वज्ञानोत्पत्तिबलेनेत्यर्थः॥

इति श्रीमथुरानाथतर्कवागीशविरचिते तत्त्वचिन्तामणिरहस्ये अनुमानाख्यद्वितीयखण्डरहस्ये संशयकारणकार्थापत्तिसिद्धान्तरहस्यम्।

स्यादेतत्, मा भूत् संशयः करणमर्थापत्तावनुपपत्तिस्तु स्यात्, तथा हि जीवी देवदत्तो गृहे नास्तीति ज्ञाने सति बहिःसत्त्वं विना जीवतो गृहासत्त्वमनुपपन्नमिति ज्ञानानन्तरं बहिरस्तीति धीरस्ति तत्रान्वयव्यतिरेकाभ्यामनुपपत्तिज्ञानं करणम्। न च देवदत्तो बहिरास्ति विद्यमानत्वे सति गृहासत्त्वात् घटवदित्यनुमानाद्विद्यमानत्वे सति यत्र यन्नास्ति तदन्यदेशे तदस्ति यथा गृह एव कोणेऽसन्नहं मध्ये तिष्ठामीति व्याप्तिप्रभवानुमानाद्वा बहिःसत्त्वसिद्धेः किमर्थापत्त्येति वाच्यम्। हेतुसाध्ययोः सहचाराज्ञानदशायामनुपपत्तिज्ञानेऽपि बहिःसत्त्वज्ञानात्। सामान्यतो व्याप्तिश्चानुमाने उपसंहर्त्तु-

---

अथानुपपत्तिकरणकार्थापत्तिरहस्यम्।

संशयकरणकार्थापत्तिं निराकृत्यानुपपत्तिकरणकार्थापत्तिमाशङ्कते स्यादेतदिति। अनुपपत्तिरिति। गृहे नास्तीति ज्ञानमित्यर्थः। जीवतो गृहासत्त्वमिति। जीवित्वविशिष्टं गृहासत्त्वमित्यर्थः। व्याप्तिप्रभवेति। व्याप्तिप्रभवात् सामान्यतोव्याप्तिप्रभवात्। अनुमानादिति। देवदत्तो बहिरस्ति विद्यमानत्वे सति गृहासत्त्वादित्यनुमानादित्यर्थः। पूर्वं विद्यमानत्वे सति तद्गृहासत्त्वात् तद्बहिःसत्त्विति विशेषतो व्याप्तिरिदानीन्तु सामान्यतो व्याप्तिरिति भेदाद्विकल्पः। विशेषव्याप्तिमूलकमनुमानं दूषयति हेतुसाध्ययोरिति। यथोक्तहेतुसाध्ययोरित्यर्थः। सामान्यतो व्याप्तिमूलकमनुमानं दूषयति सामा-

मशक्येति, तदन्यदेशसिद्धिरर्थापत्त्यैव । ननु जीविनो गृहासत्त्वमनुपपन्नं किं देवदत्तबहिःसत्त्वं विना, उत बहिःसत्त्वमात्रं विना। नाद्यः, प्रथमं देवदत्तबहिःसत्त्वाप्रतीतौ तेन विनेदमनुपपन्नमिति ज्ञानाभावात् प्रतीतौ वा किमर्थापत्त्या अर्थापत्तित एव तत्प्रतीतावन्योन्याश्रयः, तदुक्तं यतोऽन्यत्वं तत्सिद्धेरग्रे तदसिद्धेरिति । नान्त्यः, अन्यदीयबहिःसत्त्वज्ञानं विनानुपपत्त्यभावात् बहिःसत्त्वमात्रसिद्धावपि देवदत्तबहिःसत्त्वासिद्धेश्चेति चेत् । न। सामान्येन हि विनानुपपत्तिज्ञानं कारणं सामान्याकारेण विशेषज्ञानं फलम्। तथा हि, जीविनो बहिःसत्त्वं विना गृहासत्त्वमनुपपन्नमिति ज्ञान यस्य गृहासत्त्वमनु-

---

न्यत इति । अनुमाने अनुमितिकरणे । उपसंहर्त्तुं प्रवेशयितुम् । अशक्या सामान्यमुखी व्याप्तिर्नाऽनुमितिकरणमित्यर्थः । यत्त्वतत्त्वयोरनुगतयोरभावात् सामान्यतो व्याप्तेरभावादिति भावः । तदन्यदेशेति। गृहान्यदेशसत्त्वसिद्धिरित्यर्थः । ज्ञानाभावादिति।प्रतियोगिज्ञानं विना व्यतिरेकज्ञानासम्भवादिति भावः । नन्वर्थापत्तित एव तत्प्रतीतिरतोऽर्थापत्तिरावश्यकीत्यत आह अर्थापत्तित इति । अन्योन्याश्रय इति । अर्थापत्तितस्तत्प्रतीतौ तेन विना नानुपपत्तिज्ञानमनुपपत्तिज्ञानेऽर्थापत्तिरित्यन्योन्याश्रय इत्यर्थः । स्वोक्तदूषणे खण्डनसम्पत्तिमाह तदुक्तमिति । यतोऽन्यत्वमिति । यतोऽन्यत्वं यस्य व्यतिरेकः । तत्सिद्धेः तस्य सिद्धेः । अग्रे तदसिद्धेः एतद्व्यतिरेकेणेदमनुपपन्नमिति ज्ञानासिद्धेरित्यर्थः । बहिःसत्त्वमात्रपदेन यावद्बहिःसत्त्वं बहिःसत्त्वत्वावच्छिन्नं वा, नाद्य इत्याह अन्यदीयेति । नान्त्य इत्याह बहिःसत्त्वमात्रेति । बहिःसत्त्वत्वा-

पपन्नं तत्र बहिःसत्त्वं कल्पयति नान्यत्र देवदत्तश्च तथेति सिद्धे देवदत्ते बहिःसत्त्वं कल्प्यत इति देवदत्तबहिः-सत्त्वं पर्य्यवस्यति, न तु तेन रूपेण कल्पना न वा तेन विनानुपपत्तिज्ञानं कारणं, यथा वह्निमात्रव्याप्ताद्धू-मात् पर्व्वते वह्निसिद्धिरेव पर्व्वतीयवह्निसिद्धिर्न तु प-र्व्वतीयत्वेनैव धूमात्तत्सिद्धिः तेन रूपेण व्यापकत्वाग्र-हात् । अथोपपादकाभावत्वत्युपपाद्याभावनियमोऽनुपप-त्तिर्न त्वभावमात्रमतिप्रसङ्गात् एवञ्च व्यतिरेकव्याप्ति-मत उपपाद्याद्व्यतिरेक्यनुमानमुद्रयैव साध्यसिद्धेःकिम-र्थापत्त्या, तथा हि देवदत्तो बहिः सन् जीवित्वे सति गृ-हासत्त्वात् यन्नैवं तन्नैवं यथा मृतो गृहास्थितो वा । न चान्यथाप्त्याऽन्यस्य गमकत्वेऽतिप्रसङ्गः, साध्याभावव्या-पकाभावप्रतियोगित्वस्य नियामकत्वात् । न चार्थापत्तौ सरूपसती व्याप्तिर्लिङ्गं नाऽनुमान इति वाच्यम् । अनु-पपत्तेर्ज्ञानं विना कल्पनानुदयात् अर्थापत्त्याभासानव-

---

वच्छिन्नेत्यर्थः । पर्य्यवस्यतीति । पक्षधर्मतावलादिति भावः । तेन रूपेण देवदत्तबहिःसत्त्वत्वरूपेण । कल्पना ज्ञानम् । तेन विना तद्रू-पावच्छिन्नेन विना । उपपादकाभाववतीति । उपपादकाभावव्यापकी-भूताभावप्रतियोगित्वमापाद्यस्येत्यर्थः । अभावमात्रमिति । उपपाद्या-भावमात्रमित्यर्थः । अतिप्रसङ्गादिति । केवलधूमाभावज्ञानादपि धूमा-र्थापत्त्यापत्तिरित्यर्थः । अर्थापत्त्याभासेति । व्यभिचारिणार्थापत्तिरेव

काशाच्च । मैवम् । अत्र हि व्यतिरेकव्याप्तिरन्वयस्य पक्षधर्म्मत्वमिति व्याप्तिधीजन्यमपि बहिःसत्त्वज्ञानं नानुमितिः तस्या व्याप्तपक्षधर्म्मताज्ञानजन्यतानियमात् । न च साध्याभावव्यापकाभावप्रतियोगित्वेन पक्षधर्म्मस्य ज्ञानमनुमितिप्रयोजकं तच्चेहाप्यस्तीति वाच्यम् । केवलान्वयिनि तदसम्भवात् तदपेक्षया साध्यव्याप्यत्वज्ञानस्य लघुत्वाच्च । अथ व्यतिरेकसहचाराद्धेतोरेव व्याप्तिर्गृह्यते एवञ्चान्वयस्य व्यतिरेकस्य उभयस्य वा सहचाराद्व्याप्तिग्रहत्रैविध्येऽनुमानत्रैविध्यम्, अत एव धूमो दशाविशेषेऽन्वयी व्यतिरेकी अन्वयव्यतिरेकी चेति चेत् । अस्तु तावदेवं तथापि जीवितदेवदत्ताभावो गृहे वर्त्तमानो न बहिःसत्त्वलिङ्गं देवदत्तावृत्तित्वात् बहिःसत्त्वगृह-

---

न स्यादित्यर्थः । अत्र हीति । व्यतिरेके हेत्वभावे । व्याप्तिः व्यापकताज्ञानम् । अन्वयस्य हेतोः । पक्षधर्मत्वं पक्षधर्मताज्ञानमित्यर्थः । व्याप्तिधीजन्यमिति । व्यतिरेकव्याप्तिधीजन्यमित्यर्थः । व्याप्तेति । अन्वयव्याप्तिप्रकारकपक्षधर्मताज्ञानेत्यर्थः । केवलान्वयिनीति । तव मत इति शेषः । साध्यव्याप्यत्वेति साध्यस्यान्वयव्याप्तिज्ञानस्येत्यर्थः । यद्यप्येवमपि यत्र नान्वयव्याप्तिग्रहः व्यतिरेकमात्रप्रतिसन्धानं तत्रापस्यवकाशः, न च तत्रार्थनिश्चय एव जनयिष्यत इति वाच्यम्, अनुभवविरोधात्, तथापि तुष्यतु दुर्जन इति न्यायेनाह अस्त्विति । गृहे वर्त्तमान इति । गृहवृत्तित्वविशिष्ट इत्यर्थः । देवदत्तावृत्तित्वादिति पक्षीभूतस्य देवदत्तस्य तदनधिकरणत्वादित्यर्थः । बहिःसत्त्वगृहनिष्ठाभावयोः बहिःसत्त्वगृहवृत्तित्वविशिष्टाभावयोः । व्यधिक-

निष्ठाभावयोर्व्यधिकरणत्वेन नियतसामानाधिकरण्यरूप-व्याप्त्यभावाच्च, उपरि सविता भूमेरालोकवत्त्वादित्यत्र भूमेरुपरिसन्निहितसवितृकत्वेनानुमानात् । नापि गृहनिष्ठाभावप्रतियोगित्वम्, तत्प्रतियोगित्वस्य देवदत्तधर्मतया तदसन्निकर्षे प्रत्यक्षेण ज्ञातुमशक्यत्वात् । अत एव विशेष्यासन्निकर्षात्तृतीयलिङ्गपरामर्शोऽपि न प्रत्यक्षेण ।

रणत्वेनेति । गृहाधिकरणदेशभेदस्यापि बहिःपदार्थघटकत्वादिति भावः । नियतेति । अत एव गृहवृत्तिदेवदत्ताभावोऽपि न लिङ्गं गृहमात्रवृत्तिपदार्थे तस्य सत्त्वेनाव्याप्यत्वादिति भावः । ननूपरि सविता भूमेरालोकवत्त्वादित्यत्र भूमिनिष्ठालोकसंयोगस्य कथमुपरिदेशे संयोगसम्बन्धेन सवित्रनुमापकत्वं पक्षावृत्तित्वादव्याप्यत्वाच्चेत्यत आह उपरीति।उपरिसन्निहितेति।सवितृसंयुक्तोपरिदेशकत्वेनेत्यर्थः । तथा च तत्र भूमिः पक्षः सवितृसंयुक्तोपरिदेशकत्वं साध्यम् उपर्य्यवच्छेदेनालोकसंयोगो हेतुरिति भावः । ननु जीवित्वे सति गृहनिष्ठाभावप्रतियोगित्वमेव लिङ्गं भवतापि तन्निष्ठव्यतिरेकव्याप्तिज्ञानस्यैवार्थापत्तिजनकत्वस्वीकारादित्याशङ्क्याह नापीति । लिङ्गमित्यनुषञ्जनीयम् । ज्ञातुमशक्यत्वादिति । तथा च लिङ्गज्ञानाभावात् न व्याप्तिग्रह इति भावः । ननु सन्निकृष्टस्थले जीवित्वे सति गृहनिष्ठाभावप्रतियोगित्वस्य बहिःसत्त्वव्याप्यत्वं गृहीतं तदेवेदानीं स्मर्य्यतेऽन्यथा भवन्मतेऽपि व्यतिरेकव्याप्तिज्ञानाभावात् कथमर्थापत्तिः, अपि च गृहनिष्ठाभावप्रतियोगित्वं न हेतुः किन्तु प्रतियोगितासम्बन्धेन गृहनिष्ठाभाव एव हेतुर्वाच्यः स च देवदत्तस्यासन्निकृष्टत्वेऽपि गृहस्य सन्निकृष्टतया ग्रहीतुं शक्य इत्यतो व्याप्तिग्रहाभावेऽपि देवदत्तस्यासन्निकृष्टतया न पक्षविशेष्यकपरामर्शसम्भव इत्याह अत एवेति । अस्मन्मते च व्यतिरेकव्याप्तिस्मरणं गृहे जीविनो देवदत्तस्याभावनिश्चयश्च अर्थापत्तिहेतुक इति भावः । शब्दानु-

न च व्यतिरेकव्याप्तिगृहनिष्ठाभावयोर्ज्ञानं सहकार्य्यासाद्य मनसैव जन्यत इति वाच्यम् । सहकारिण एव मानान्तरत्वप्रसङ्गात् । अथ व्याप्तिज्ञानानन्तरं स्मर्य्यमाणधूमात् कथमनुमितिः उक्तन्यायेन तत्रापि लिङ्गपरामर्शाभावादिति चेत्, न कथञ्चित् । कथं तर्हि वह्निज्ञानम्, पक्षधर्मधूमस्मृतिसहितात् धूमो वह्निं विना नास्तीत्यनुपपत्तिज्ञानादिति गृहाण। अत एव दृश्यमानो धूमो वह्निं विनानुपपन्न इति यदा ज्ञायते तदार्थापत्तिरेव, यदा त्वनुपपत्तिज्ञानं विना व्याप्यत्वेन प्रतिसन्धीयते तदानुमानं त्वयापि तत्र त्रिविधानुमानस्वीकारात्, तस्मा-

---

मानादिकञ्च न सार्वत्रिकमिति हृदयम् । गृहनिष्ठाभावयोर्ज्ञानमिति । देवदत्तस्मरणञ्चेत्यपि बोध्यम् । अभावप्रत्ययानुरोधेन तस्यावश्यकत्वात् परामर्शः । व्याप्तिज्ञानानन्तरमिति । वन्हिव्याप्तिरिति स्मरणानन्तरमित्यर्थः । स्मर्य्यमाणेति । पक्षवृत्तिधूमस्मरणादित्यर्थः । असन्निकृष्टपक्षस्थल इति शेषः । उक्तन्यायेति । विशेष्यस्यासन्निकृष्टत्वेनेत्यर्थः । धूमो वन्हिं विनेति । वन्ह्यभावव्यापकीभूताभावप्रतियोगी धूम इति व्यतिरेकव्याप्तिज्ञानादित्यर्थः । दृश्यमानो धूम इति वन्ह्यभावव्यापकीभूताभावप्रतियोगी धूम इति यदा ज्ञायत इत्यर्थः । अनुपपत्तिज्ञानं विना व्यतिरेकव्याप्तिज्ञानं विना । व्याप्यत्वेन अन्वयव्याप्यत्वेन। तदाऽनुमानमिति । यदा तु व्यतिरेकान्वयव्याप्त्युभयप्रतिसन्धानं तत्रैवमेव विज्ञानमुभयात्मकम् अनुमितित्वादेरस्मन्मते जातित्वाभावात् फलबलादेव सामग्र्या वा अन्यत्र प्रतिबन्धकत्वं कल्प्यत इति भावः। त्वयापीति। तत्र वन्हिमान् धूमादित्यत्र । त्रिविधेति । व्याप्तिज्ञानभेदेन त्रिविधानुमितिस्वीकारात् इत्यर्थः । परन्तु

द्व्यतिरेकव्याप्तिमुपजीव्य जीविदेवदत्ताभावो बहिःसत्त्वं कल्पयति । उच्यते । देवदत्तासन्निकर्षेऽपि तस्य गृहनिष्ठाभावप्रतियोगित्वं प्रत्यक्षेण गृह्यते, तथा हि गृहे देवदत्तस्याभाव इति प्रत्यक्षं देवदत्तं षष्ठ्यर्थऊचाभावसम्बन्धं प्रतियोगित्वलक्षणं गोचरयति सम्बन्धज्ञानस्य

भवता यद्व्यतिरेक्यनुमितितया अभिमतं तदेवास्माकमर्थापत्तिरिति शेष इति भावः । व्यतिरेकव्याप्तिमिति । व्यतिरेकव्याप्तिज्ञानं सहकार्य्यासाद्येत्यर्थः । देवदत्ताभावः देवदत्ताभावनिश्चयः । बहिःसत्त्वं कल्पयतीतिबहिःसत्त्वं निश्चाययतीत्यर्थः । न तु व्यतिरेकपरामर्शः, विशेष्यीभूतदेवदत्तासन्निकर्षेण परामर्शासम्भवादिति भावः । गृहे देवदत्तस्याभाव इतिदेवदत्तप्रतियोगिकोऽभाव इति प्रत्यक्षमित्यर्थः। अन्यथा षष्ठ्यर्थप्रतियोगित्वस्य संसर्गविधया भानात् लिङ्गतावच्छेदकीभूतप्रतियोगित्वानुपस्थितौ कथमनुमानं न स्यात् । न चैवं यत्र नेह देवदत्त इति संसर्गविधयैव प्रतियोगित्वभानं तत्रानुमानासम्भवादर्थापत्तिरिष्यत इति वाच्यम।अर्थापत्तावपि बहिःसत्त्वं विना गृहनिष्ठाभावप्रतियोगित्वस्यानुपलब्धिर्गमिकेति प्रतियोगित्वत्वावच्छिन्नप्रतियोगित्वोपस्थितिं विना तेनाप्यर्थापत्त्यनभ्युपगमादिति । ननु देवदत्तप्रतियोगिकोऽभाव इति प्रत्यक्षस्य देवदत्तविषयकत्वे मानाभावः देवदत्तं साक्षात्करोमीत्यनुव्यवसायाभावात् अभावं साक्षात्करोमीत्यनुव्यवसायात् किन्तु तदव्यवहितपूर्ववर्त्तिस्मरणस्यैव देवदत्तो विषय इत्यत आह सम्बन्धज्ञानस्येति । सम्बन्धिद्वयोपस्थितौ सत्यां सम्बन्धप्रत्यक्षस्येत्यर्थः।अन्यथा संयोगो नास्तीत्यादिशाब्दादिज्ञाने तदुपनयवशात् संयोगवदिति प्रत्यक्षे गुण इति प्रत्यक्षे च व्यभिचारापत्तेरिति ध्येयम।न चैवं देवदत्तं न पश्यामि किन्तु तदभावं गेहे इत्यनुव्यवसायः कथं सङ्गच्छते इति वाच्यम । तस्य लौकिकविषयत्वाभावविषयकत्वादिति भावः । ननु सम्बन्धप्रत्यक्ष एव सम्बन्धिद्वयं विषयः प्रतियोगित्वन्तु न प्रतियोग्यभावयोः सम्बन्ध

सम्बन्धिद्वयविषयत्वात्, प्रतियोगिना सममभावस्य सम्बन्धान्तराभावात् गृहनिष्ठाभावप्रतियोगित्वे च प्रत्यक्षोपस्थिते स्मृतव्याप्तिवैशिष्ट्यमपि प्रत्यक्षेण सुग्रहम्। न च देवदत्तविशेष्यकं बहिःसत्त्वव्याप्यगृहनिष्ठाभावप्रतियोगित्वज्ञानं नास्तीति वाच्यम्। पक्षवृत्तिलिङ्गपरामर्शमात्रस्यानुमितिजनकत्वात् अधिकस्य गौरवपराहतत्वात्। अथ वा अनतिप्रसक्तसहकारिवशान्मनसैव स्मृतदेवदत्तविशेष्यकस्तृतीयलिङ्गपरामर्शः। यथा च न सहकारि मानान्तरं तथोपपादितमधस्तात्। ननु मयूरः पर्वतेतरे न नृत्यति नृत्यति चेतिज्ञानानन्तरं पर्वते नृत्य-

---

इत्यत आह प्रतियोगिनेति सम्बन्धान्तराभावादिति। इदमिह नास्तीति प्रतीतेर्नियामकसम्बन्धान्तराभावादित्यर्थः। तथा च सम्बन्धान्तरेण इदमिह नास्तीति प्रतीत्यसम्भवात् प्रतियोगित्वस्य सम्बन्धत्वमावश्यकमिति भावः। यथाश्रुते एककालीनत्वादेरपि सम्बन्धान्तरत्वेन सम्बन्धान्तराभावादित्यसङ्गतेः। पक्षवृत्तीति। तथा च लिङ्गविशेष्यकपरामर्श एवात्र हेतुरिति भावः। अधिकस्य पक्षविशेष्यकत्वस्य। ननु गृहनिष्ठात्यन्ताभावप्रतियोगित्वस्यापि देवदत्तधर्म्मतया असन्निकृष्टत्वात् तद्विशेष्यकोऽपि चाक्षुषः परामर्शोऽसम्भवीत्यस्वरसादाह अथ वेति। पूर्व्वोक्तदोषविरहायाह यथा चेति। पर्वतेतर इतिपर्व्वत इतरो यस्मादिति बहुव्रीहिः तेन न सर्व्वनामकार्यम्। मयूरनृत्यस्य नित्यत्वं साधिकरणत्वं विना अनुपपन्नमिति ज्ञानं प्रसिद्धाधिकरणबाधसहकारेण मयूरः पर्व्वते नृत्यतीति ज्ञानं जनयतीति समाधत्ते अधिकरणं विनेति। अनुपपद्यमानम्। अनुपपन्नत्वेन ज्ञायमानम्। नृत्य नृत्यनित्यत्वमित्यर्थः। नृत्याभावबाधानन्तरमिति। पर्व्व-

तीति ज्ञानमस्ति, न च व्यतिरेकिणस्तत् सम्भवति, पर्वत-नृत्यस्य साध्यस्याप्रतीतौ व्यतिरेकव्याप्त्यनिरूपणात्। न च पर्वतनृत्याप्रसिद्धौ तेन विनानुपपत्तिप्रतिसन्धानमपि नेति कथमर्थापत्तिरपीति वाच्यम्। अधिकरणं विनानुपपद्यमानं नृत्यं प्रसिद्धाधिकरणबाधसहकृतं प्रसिद्धेतरमधिकरणं कल्पयतीति चेत्। न। मयूरनृत्यं साधिकरणं नृत्यत्वादिति सामान्यतोदृष्टं प्रसिद्धाधिकरणबाधसहकृतं प्रसिद्धेतरं पर्वतमधिकरणमादाय नृत्यज्ञानं जनयति। यद्वा पर्वतेतरे न नृत्यतीतिशब्देन नृत्याभावबोधानन्तरं मयूरो नृत्यतीतिशब्दाज्जायमानं ज्ञानं पर्वतनृत्यं गोचरयति प्रसिद्धविशेषबाधसहकृतसामान्यज्ञानजनकप्रमाणस्य प्रसिद्धेतरं पर्वतमधिकरणविशेषमादाय ज्ञानजनकत्वनियमात्। अत एवानित्यज्ञानबाधानन्तरं क्षित्यादौ ज्ञानजन्यत्वं सिद्धनित्यत्वमादाय सिद्ध्यतीत्याचार्य्याः। यद्वा

तेतरनृत्याभावबोधानन्तरमित्यर्थः। ननु सामान्यतोदृष्टेन साधिकरणकत्वानुमितावपि पर्व्वते नृत्यतीत्येवमाकारकबुद्धिर्न सिद्धैव अनुमितेर्व्याप्यकतावच्छेदकप्रकारकत्वनियमात् एवं मयूरो नृत्यतीति शब्दात् पर्व्वतेतराधिकरणकनृत्यबाधसहकारेण नृत्यविशेषसिद्धावपि नृत्ययस्य पर्व्वतवृत्तित्वं न सिद्धं तदुपस्थापकपदाभावादिति। मैवम्। गुरुमते इतरबाधसहकारेण पदानुपस्थितमपि शाब्दबोधे प्रकारीभूय भासते इति तन्मतेनैव तन्मतनिराकरणात्। स्वमते त्वाह यद्वेति। अन्वयव्यतिरेकी पर्वतनृत्यं गोचरयतीत्यनुषज्यते। न चैवं मयूरः

मयूरनृत्यं पर्वताधिकरणकं पर्वतेतरानधिकरणत्वे सति साधिकरणत्वात् पर्वतत्ववदित्यन्वयव्यतिरेकी । अथ वा यः सम्भावितत्तदितरावृत्तिः सन् तदतिरिक्तवृत्तिर्न भवति स तद्वृत्तिर्भवतीति सामान्येन यत्तदर्थान्तर्भावेन व्याप्त्या नृत्यस्य पर्वतवृत्तित्वं सिद्ध्यति। एवं पीनो देवदत्तो दिवा न भुङ्क्ते इत्यत्रापि अप्रसिद्धरात्रिभोजनसाध्यपीनत्वज्ञानं रात्रिभोजनमादाय सिद्ध्यति । अथ यथा अभोजी पीन इत्यत्रायोग्यताज्ञानं तथा पीनो दिवा न भुङ्क्त इत्यत्रापि दिवाभोजनस्य बाधाद्योग्यताघट-

---

पर्वते नृत्यतीति मयूरविशेष्यकप्रतीतिर्न स्यात् इति वाच्यम् । उक्तानुमान एव मनसा तदुपपत्तेरिति भावः । सम्भावितेति । सम्भावना योग्यता । तस्मिन् तदितरस्मिंश्च वर्त्तमानयोग्यः । योग्यतावच्छेदकश्च वृत्तिमत्त्वमेव । तथा च वृत्तिमत्त्वे सतीति फलितार्थः । ननु पीनो देवदत्तो दिवा न भुङ्क्ते इति ज्ञानानन्तरं पीनत्वं भोजनवत्त्वं विना अनुपपन्नमिति ज्ञानात् दिवाभोजनबाधसहकृतात् देवदत्तो रात्रौ भुङ्क्ते इति ज्ञानं जायते तत्रानुमानाद्यसम्भवादर्थापत्तिरिष्यत इत्यत आह एवमिति । देवदत्त इति । अप्रसिद्धरात्रिभोजनदेवदत्त इत्यर्थः । भोजनसाध्यपीनत्वज्ञानमिति । दिवाभोजनबाधसहकृतमिति शेषः । रात्रिभोजनमिति । रात्रिभोजनानुमितिं जनयतीत्यर्थः । यथाश्रुतशब्देन शब्दकल्पनरूपां श्रुतार्थापत्तिं भट्टाभिमतामाशङ्क्यते अथेति । न योग्यताज्ञानमिति । तन्मतेऽन्वयप्रयोजकरूपवत्त्वस्य योग्यतात्वेन पीनत्वान्वये भोजित्वस्य योग्यतात्वेन पीनत्वान्वयेऽभोजित्वस्यायोग्यतात्वादिति भावः । दिवाभोजनस्य बाधादिति योग्यताघटकेत्यत्र हेतुः । योग्यताघटकेति। योग्यतात्मकरात्रिभोजित्वोपस्थितिं विनेत्यर्थः । अन्वयमलभमानमिति । अन्वयबोधं

करात्रिभोजनस्याप्रतीतेः अतो योग्यताघटकोपस्थितिं विना अन्वयमलभमानमिदं वाक्यं योग्यताघटकरात्रिभोजनोपपादकं रात्रौ भुङ्क्त इति वाक्यं कल्पयित्वा तेन सहान्वयबोधं जनयति । न चैवं लाघवाद्रात्रिभोजनमेव कल्पयितुं युक्तम्, शाब्दी ह्याकाङ्क्षा शब्देनैव प्रपूर्यत इतिन्यायेन शब्दोपस्थापितमादाय शब्दस्यान्वयबोधजनकत्वात्, एवञ्च श्रूयमाणशब्दस्यान्वयबोधकत्वं योग्यताघटकोपस्थापकेन शब्देन विनानुपपद्यमानं तं कल्पयित्वा यत्रान्वयबोधं जनयति तत्र श्रुतार्थापत्तिः। द्वारमित्यादौ पिधेहीतिशब्दकल्पनं श्रुतार्थापत्तिरेव।

जनयदित्यर्थः। इदं वाक्यमिति। पीनो देवदत्तो दिवा न भुङ्क्ते इति वाक्यमित्यर्थः। रात्रिभोजनोपपादकमिति। रात्रिभोजनोपस्थापकमित्यर्थः। तेन सहेति। तदुपस्थापितरात्रिभोजित्वेन सहेत्यर्थः। अन्वयबोधमिति। पीनो देवदत्तो दिवा न भुङ्क्ते किन्तु रात्रौ भुङ्क्ते इत्यन्वयबोधमित्यर्थः। तन्मते योग्यत्वस्य शाब्दबोधे भाननियमादिति भावः। लाघवादिति। शब्दं कल्पयित्वापि अर्थोपस्थितेरावश्यकत्वादिति भावः। शाब्दी ह्याकाङ्क्षेति। शाब्दबोधोपयोगिनी पदार्थोपस्थितिः शब्देनैव जन्यत इति नियमेनेत्यर्थः। तथा च केवलार्थकल्पनेन योग्यताज्ञाननिर्वाहेऽपि शब्दजन्योपस्थितिं विना रात्रिभोजित्वरूपस्य योग्यत्वस्य शाब्दबोधे भानासम्भवाच्छब्दः कल्प्यते तन्मते शब्दयोग्यताविषयकस्यैव शाब्दबोधस्य जननियमादिति भावः। शब्देन विनेति शब्दव्यवहारं विनेत्यर्थः। अनुपपद्यमानमिति। अनुपपन्नत्वेन ज्ञायमानमित्यर्थः। द्वारमित्यादाविति। एवमित्यादिः पिधेहीतिशब्दकल्पनमिति। द्वारमितिवाक्यस्यापि पिधानविशेष्यकद्वारकर्मकत्वा-

शब्दश्च यद्यपि श्रूयमाणो बाधितस्तथाप्यभिप्रायस्थः कल्प्यते यथा गुरुमते स्वर्गकामो यजेतेत्यत्र साक्षात्साधनताबाधे परम्पराघटकस्यानुपस्थित्या परम्परासाधनताज्ञानविरहो योग्यताज्ञानाभावात् प्रसिद्धपदसामानाधिकरण्यानुपपत्तिरिति योग्यताज्ञानाय परम्परासाधनताघटकमपूर्व्वं लिङादिवाच्यं कल्पयति ततः स्वर्गसाधनं याग

न्वयबोधजनकत्वं पिधेहीतिशब्दसमभिव्याहारं विनाऽनुपपन्नमिति ज्ञानात् पिधेहिशब्दकल्पनमित्यर्थः । ननु द्वारमिति वाक्यं पिधेहीतिशब्दवदिति ज्ञानमर्थापत्त्या जननीयं तच्च न सम्भवति पिधेहीतिशब्दस्य बाधितत्वादित्यत आह शब्दश्चेति । श्रूयमाणः समभिव्याहारेण श्रूयमाणश्च । बाधित इति । नास्तीत्यर्थः । अभिप्रायस्थ इति । द्वारमिति वाक्यं पिधेहीतिशब्देन सहान्वयबोधं जनयित्वेत्येतादृशाभिप्रायविषयः कल्प्यते इत्यर्थः । तथा च तादृशैकाभिप्रायविषयत्वसम्बन्धेनैव तद्वत्ताज्ञानं अर्थापत्त्या जननीयमिति भावः । योग्यताप्रकारकोपस्थितिं विना शब्दान्वयधीरित्यत्र प्राभाकरसम्मतिमाह यथेति । साक्षात्साधनताबाध इति । स्वर्गं प्रति यागस्य साक्षात्साधनत्वाभाव इत्यर्थः । यागस्य आशुतरविनाशित्वादिति भावः । परम्पराघटकस्येति । परम्पराघटकस्यापूर्व्वस्येत्यर्थः । योग्यताज्ञानाभावादिति । यागे विध्यर्थस्य इष्टसाधनत्वस्यान्वये योग्यताज्ञानाविरहादित्यर्थः । साक्षादसाधने साधनत्वान्वये परम्परासाधनत्वस्य योग्यतात्वादिति भावः । प्रसिद्धपदेति । प्रसिद्धपदस्य विधेरर्थेन इष्टसाधनत्वेनान्वयबोधानुपपत्तिरित्यर्थः । योग्यताज्ञानायेति । परम्परासाधनताज्ञानायेत्यर्थः । लिङादिवाच्यमिति । कार्य्यत्वरूपेण लिङादिवाच्यमित्यर्थः । एवञ्च स्वर्गकामोऽग्निष्टोमादिविषयकसाधनकार्य्यवानिति प्रथमतोऽन्वयबोधः । विषयकत्वं जन्यत्वम् । एतच्च यागकामयोः संसर्गविधया भासत इति भावः । अ-

इति ज्ञानं जायते अन्यथा अपूर्वमपि वाच्यं न स्यादिति । उच्यते । बाधकप्रमाणाभावोऽन्वयविरोधिरूपविरहो वा योग्यता अतो दिवा अभोजने रात्रिभोजनाप्रतीतावपि भोजनसाध्यपीनत्वाद्दिवा न भुङ्क्त इति शब्दाद्बोधुत्पद्यते न प्रतीत्यनुपपत्तिः किन्तु प्रतीतानुपपत्त्या रात्रिभोजनं कल्प्यते अत एवापूर्वमपि न वाच्यमिति वक्ष्यते, तस्मान्नार्थापत्तिरनुमानादतिरिच्यत इति ॥

न्यथेति। योग्यताप्रकारकोपस्थितेरपि हेतुत्वे इत्यर्थः । बाधकप्रमाणाभाव इति । ग्राह्याभावनिश्चयाभाव इत्यर्थः । अन्वयविरोधीति । ग्राह्याभावव्याप्यधर्मेत्यर्थः । प्रतीतानुपपत्त्येति । प्रतीतस्य दिवाऽभोजित्वे सति पीनत्वस्य रात्रिभोजित्वं विनाऽनुपपत्त्या रात्रिभोजित्वमनुमीयते इत्यर्थः । अत एवेति । अन्वयप्रयोजकरूपवत्त्वज्ञानस्याहेतुत्वादेवेत्यर्थः । अर्थापत्तिः अर्थापत्तिशब्दवाच्यं ज्ञानम् ॥

इति श्रीमथुरानाथतर्कवागीश—विरचिते तत्त्वचिन्तामणिरहस्ये अनुमानाख्यद्वितीयखण्डरहस्ये अर्थापत्तिरहस्यम् ।

इतः परमवयवादिग्रन्थस्य जागदीशीव्याख्यैव निवेश्यते ।

चिन्तामणेः अवयवः ।

तच्चानुमानं परार्थं न्यायसाध्यमिति न्यायस्तदवयवाश्च प्रतिज्ञाहेतूदाहरणोपनयनिगमनानि निरूप्यन्ते। तत्र न समस्तरूपोपपन्नलिङ्गप्रतिपादकवाक्यं न्यायः, अत्रैव वाक्येऽतिव्याप्तेः । किन्त्वनुमितिचरमकारणलिङ्गपरामर्शप्रयोजकशाब्दज्ञानजनकवाक्यं न्यायः । प्रति-

दीधित्या अवयवः ।

उचितानुपूर्वीकप्रतिज्ञादिपञ्चकसमुदायत्वं न्यायत्वम् । प्र-

जागदीश्याः अवयवः ।

मूलोक्तन्यायलक्षणस्याऽग्रे दूष्यतया स्वयं न्यायलक्षणमाह उचितेति । व्युत्क्रमेणोक्तप्रतिज्ञादिपञ्चकातिव्याप्तिवारणार्थमानुपूर्वीकान्तं व्युत्क्रमोक्तप्रतिज्ञादिभिन्नार्थकम् । तेन क्रमोत्पन्नप्रतिज्ञाहेतूदाहरणोपनयनिगमनानां लाभः । प्रतिज्ञाहेतूदाहरणत्रिकाद्यतिव्याप्तिवारणाय पञ्चकपदम् । न चाऽसाधकतासाधकानुमानस्थलीयन्यायाव्याप्तिः तत्र हेत्वाभासात्मकहेतोरसाधकताव्याप्यत्वस्योभयसम्मतत्वादुदाहरणाभावेन तादृशपञ्चकसमुदायत्वाभावादिति वाच्यम् । शिरोमणिमते तत्रापि वादिनः स्वकर्तव्यनिर्वाहार्थमुदाहरणस्याऽवश्यकत्वात् । अन्यथा सर्वत्रैवोपनयमात्रस्य

ज्ञादिपञ्चवाक्यैरेकवाक्यतया स्वार्थविशिष्टज्ञानं जन्यते तेन च विशिष्टवैशिष्ट्यावगाहि मानान्तरमुत्थाप्यते तेन च चरमपरामर्श उत्पाद्यत इति न्यायजन्यशाब्दज्ञानस्य परामर्शप्रयोजकता ।

तिज्ञात्वादिकं पुनरुदासीनवाक्यवारकन्यायान्तर्गतत्वशून्यमेवोपा-

---

उद्भाव्यतापत्तेः अनुमित्युपयुक्तव्याप्तिपक्षधर्मतायास्तत एव लाभसंभवात् । यत्तु साध्यादिभेदेन न्यायस्य विभिन्नत्वादुदाहरणविनाकृतं प्रतिज्ञादिचतुष्टयमेव न्यायत्वं वाच्यमिति । तन्न । तथा सति कदाचित्त्रैव समयबन्धवशेन पञ्चावयवप्रयोगेऽव्याप्त्यापत्तेः । समुदायपदन्तु तादृशपञ्चत्वस्य पर्याप्तिसम्बन्धेन यदधिकरणं तस्य क्रमिकत्वलाभार्थम् । तेन क्रमिकप्रतिज्ञाहेत्वादिमात्रे नातिव्याप्तितादवस्थ्यम् । क्रमेण पञ्चभिः पुरुषैः प्रतिज्ञादिपञ्चकाभिधाने न्यायव्यवहाराविरहे त्वेकपुरुषप्रयुक्तत्वमप्यौचित्ये निवेश्यम् । तथा सिद्धसाधनस्थलीयप्रतिज्ञादिसमुदाये न्यायत्वाभावात् सिषाधयिषाकालीनत्वं साध्यसंशायकविप्रतिपत्तिकालीनत्वं वा प्रतिज्ञाविशेषणं वाच्यमित्यपि वदन्ति । ननु न्यायावयवत्वघटितस्य प्रतिज्ञात्वादेर्न्यायनिरुक्तौ प्रवेशादन्योन्याश्रयत्वमत आह प्रतिज्ञात्वादिकमिति । तथा च यादृशयादृशानुपूर्व्यवच्छिन्ने कथकानां प्रतिज्ञाव्यवहारस्तादृशतादृशानुपूर्वीकत्वमेवात्र प्रतिज्ञात्वम् एवं हेतुत्वोदाहरणत्वादिकमपि उक्तक्रमेणैव निरुच्य न्यायलक्षणे निवेश्यम् । अन्यथा पर्वतादौ वन्हयादिप्रतिज्ञायाः पर्वतो वन्हिमान् गिरिरग्निमानित्यादिनानाविधानुपूर्वीकत्वेन तेषामेकविधानुपूर्व्याः प्रकृते न्यायलक्षणघटकत्वेऽन्यविधानुपूर्वीकप्रतिज्ञागर्भन्यायाव्याप्तिः, पक्षधर्मीकसाध्यवत्ताबोधकवाक्यत्वेन कथञ्चित्तादृशसकलप्रतिज्ञानामनुगमसम्भवेपि यद्यदूधू-

देयमिति नाऽन्योन्याश्रयः । साध्यादिविशेषणनियन्त्रिताश्च प्रतिज्ञादयो वाच्या इति न भिन्नसाध्यादिकप्रतिज्ञादिसमुदायेऽतिव्याप्तिः । व्याप्त्यादेरिव साध्याद्यननुगमादननुगमो न्यायादेरि-

---

मवत् तत्तद्वान्हिमत् यथा महानसं यो यो धूमवान् सो सोऽग्निमान् यथा पाकदेशः इत्याद्यनेकविधानुपूर्वीकस्य वन्हिसाध्यकधूमोदाहरणस्य एकोपादानेऽन्यगर्भन्यायाव्याप्तिः, साधनधर्मिकसाध्यव्याप्यताबोधजनकवाक्यत्वेन उदाहरणानामनुगमे धूमो वन्हिव्याप्य इत्यादिवाक्यस्यापि तादृशत्वेन तद्गर्भप्रतिज्ञादिपञ्चके अतिप्रसङ्गादिति ध्येयम् । अत एव पर्वतो वन्हिमान् तस्मादिति क्रमिकवाक्यपञ्चकेपि नातिव्याप्तिः, तस्मादित्यादिभागे कथकानां हेतुत्वव्यवहारविरहेण तादृशानुपूर्व्याः प्रकृतन्यायानिरुक्तत्वन्तर्गतहेतुत्वाघटकत्वादिति वदन्ति । नाऽन्योन्येति । इदमुपलक्षणम् । न्यायावयवत्वघटितस्य प्रतिज्ञात्वादेः प्रवेशे उचितानुपूर्वीकेत्यस्य वैयर्थ्यमपि स्यात् व्युत्क्रमेणोक्तानां न्यायानन्तर्गतत्वेन प्रतिज्ञात्वाभावादेव तादृशसमुदायेऽतिव्याप्त्यसम्भवादिति ध्येयम् । ननु न्यायघटितप्रतिज्ञात्वादेरप्रवेशे पर्वतो वन्हिमान् धूमात् यो यो धूमवान् स स्पर्शवानित्यादिभिन्नसाध्यकक्रमिकवाक्यपञ्चकेऽतिव्याप्तिः, न च तस्य उचितानुपूर्वीकत्वमेव नेति वाच्यम्, व्युत्क्रमोक्तप्रतिज्ञादिभिन्नत्वरूपस्यौचित्यस्य तत्रापि सत्त्वादित्यत आह साध्यादीति । तथा च यादृशयादृशानुपूर्व्यवच्छिन्ने तत्पक्षसाध्यकप्रतिज्ञाव्यवहारस्तादृशान्यतमानुपूर्वीकत्वमेव प्रकृते प्रतिज्ञात्वम् । एवं यादृशयादृशानुपूर्व्यवच्छिन्ने तत्पक्षकतद्धेतुकतत्साध्यकहेत्ववयवत्वव्यवहारस्तादृशान्यतमानुपूर्वीकत्वमेव प्रकृते हेतुत्वम् ।उदाहरणत्वादिकमपि उक्तदिशैव निरुक्त्य निवेशनीयमिति भावः। न चैवं पर्वतस्तेजस्वी वन्हिमत्त्वात् यो योऽग्निमान्स दीप्तिमान् छविव्याप्यहुताशनवांश्चायं तस्मादद्युतिमानित्यादिसमुदायस्यापि तेजःसाध्यकन्यायत्वापत्तिः, इष्टत्वात् । साध्यादिवाचकपदानामेकानुपूर्वीकत्वस्य अतन्त्रत्वात् । अन्यथा घटो नेतराणीत्यादिप्रतिज्ञाघटितन्यायाव्याप्ति-

ष्यत एव । एतेन प्रतिज्ञानिगमनयोरुदाहरणावयवान्तरयोश्च न सम्भूयैकार्थप्रतिपादकत्वं प्रागेव तु पञ्चानामवयवानाम्, परन्तु प्रतिज्ञाहेत्वोः कथञ्चित् । उपनयनिगमनयोरेकवाक्यताव्यवहारस्तु

प्रसङ्गादिति ध्येयम् । ननु साध्यादिभेदेन न्यायनिरुक्तेरननुगमो दोष इत्यत आह व्याप्त्यादेरिति । तथा च लक्ष्यस्याप्यननुगतत्वेन लक्षणस्याप्यननुगतत्वाददोषः इति भावः । अत्र यद्यपि आनुपूर्व्याः क्रमिकतत्तद्वर्णविशिष्टचरमवर्णत्वपर्यवसन्नतया हेत्वाद्यानुपूर्व्यवच्छिन्नस्य तदीयचरमवर्णस्य प्रतिज्ञाद्यव्यवहितोत्तरत्वासम्भवात् प्रतिज्ञादिपञ्चकस्यात्र क्रमिकत्वं दुर्घटम्, तथापि तत्तच्चरमपूर्वपूर्ववर्णविशिष्टपूर्ववर्णत्वमपि तत्तदानुपूर्वी विनिगमकाभावादित्याशयेनेदम् । यादृशयादृशानुपूर्व्यवच्छिन्ने तत्पक्षहेतुसाध्यकन्यायव्यवहारः कथकसम्प्रदायसिद्धः तादृशान्यतमानुपूर्वीमत्त्वं तत्पक्षहेतुसाध्यकन्यायत्वमित्यत्र तात्पर्यम् । इत्थञ्च यादृशयादृशानुपूर्व्यवच्छिन्ने सामान्यतो न्यायव्यवहारः साम्प्रदायिकः तादृशान्यतमानुपूर्वीमत्त्वरूपं न्यायसामान्यलक्षणमपि साध्यविशेषाद्यनियन्त्रितं सुवचमिति ध्येयम् । मूलोक्तलक्षणत्यागे बीजमाह एतेनेति । समाहितमित्यग्रेऽन्वयः । प्रतिज्ञानिगमनयोरिति । ननु प्रतिज्ञार्थधर्मिको निगमनार्थप्रकारको बोधः सम्भवत्येव वन्हिमान् पर्वतस्तस्माद्वन्हिमानित्यन्वये बाधकाभावात् दण्डवान् रक्तदण्डवानित्यादिबोधानुरोधेन तद्विशिष्टे विशेषणान्तरावच्छिन्नस्य तस्याऽन्वये निराकाङ्क्षितत्वाभावादत आह उदाहरणेति । प्रागेव सुतराम् । पञ्चानामिति । तथा च प्रतिज्ञादिभिरेकवाक्यतया स्वार्थविशिष्टज्ञानं जन्यते इति मूलमसङ्गतमिति भावः । एकविशेषनिषेधस्य विशेषान्तरविधिव्युत्पन्नत्वात् तमाह परन्त्विति । कथञ्चिदिति । उपनयस्येदंपदस्य निगमनेऽनुषङ्गपक्षे तयोरपि प्राचां मते निराकाङ्क्षतया परस्परमन्वयबोधासम्भवादिति भावः । यद्यपि धूमाद्वन्हिमत्पर्वताभिन्नो यो यो धूमवान् धूमव्यापकवन्हिमान् तदभिन्नो वन्हिव्याप्यधूमवानयं तस्माद्वन्हिमानिति क्रमेण पञ्चावयवा-

विशिष्टैकार्थप्रतिपत्तिपरतामात्रेण । तादृशपरामर्शप्रयोजकत्वञ्च यदि तद्विषयतत्तत्पदार्थसार्थोपस्थापकतया, तदोदाहरणोपनययो-

---

नां सम्भूय विशिष्टवैशिष्ट्यबोधजनकत्वं वन्ह्यादिसाध्यकन्यायस्थले सम्भवत्येव, तथापि चैत्रः पचति चैत्रत्वात् यो यश्चैत्रः स पचतीत्यादावुक्तक्रमेण पाककर्तृत्वादिविशिष्टविशेष्यकान्वयबोधासम्भवात् तादृशन्यायव्याप्तौ तात्पर्यम्, कृत्यवच्छिन्नविशेष्यकशाब्दबोधं प्रति नामजन्यायास्तिङन्यपदजन्याया वा कृत्युपस्थितेस्तन्त्रत्वात् । पक्ता चैत्रो गच्छतीत्यादाविव पचति चैत्रो गच्छतीत्यादावपि पाककर्तृत्वावच्छिन्ने चैत्रे गतिमत्त्वस्याऽन्वयबोधापत्तेः । यो यः पचति स ज्ञाता इत्यादौ यत्पदेनैव लक्षणया पक्तृत्वावच्छिन्नः प्रत्याय्यत इति तद्धर्मिकपक्तृत्वव्यापकीभूतज्ञातृत्वान्वयो नानुपपन्नः । वीप्सितार्थविधेयकान्वयबोधातिरिक्तस्थल एव उक्तव्युत्पत्त्यादरे तु तत्र पक्तृत्वस्य तिङर्थत्वेपि न क्षतिः, फलानुरोधित्वात्कल्पनायाः । वस्तुतो व्यतिरेक्युदाहरणगर्भन्यायस्थल एव उक्तक्रमेण विशिष्टवैशिष्ट्यबोधो दुर्घटः । [एवमुदाहरणमात्रस्योद्देश्यविधेयभावेन स्वार्थबोधं प्रति स्वरूपायाग्यत्वे कस्यापि न्यायस्य न विशिष्टवैशिष्ट्यान्वयबोधजनकत्वमित्युक्तमेवेति स्मर्तव्यम् ।] दृष्टान्तस्य न्यायघटकत्वपक्षे तूदाहरणस्य विशिष्टवैशिष्ट्यान्वयो दुर्घटः यथा महानस इत्यादिदृष्टान्तस्य कुत्राप्यनन्वितत्वादिति ध्येयम् । नन्वेवं पञ्चावयवानामेकवाक्यताव्यवहारस्तान्त्रिकाणां कथं स्यादित्यत आह एकेति । विशिष्टेति । विशिष्टैकार्थप्रतीतीच्छाप्रयोज्यत्वमात्रेणेत्यर्थः । मात्रपदेन तादृशप्रतिपत्तिजनकत्वव्यवच्छेदः । ननु प्रतिज्ञादिपञ्चवाक्यैरिति मूलस्य प्रतिज्ञादिभिरेकवाक्यतापन्नत्वज्ञानसहकारेण प्रत्येकं स्वस्वार्थविशिष्टज्ञानं जन्यते तेनाऽवान्तरवाक्यार्थज्ञानरूपेण प्रतिज्ञार्थे हेत्वर्थस्य उपनयार्थे निगमनार्थस्य विशिष्टवैशिष्ट्यावगाहि यन्मानं महावाक्यार्थज्ञानं तदुत्थाप्यते जन्यते इत्यर्थकरणान्नासङ्गतिरतो मूलोक्तलक्षणे दोषमाह तादृशपरामर्शेति । अनुमितिचरमकारणपरामर्शेत्यर्थः । तद्विषयेति । परामर्शविषयेत्यर्थः । तत्तत्पदार्थसार्थो व्याप्तिपक्षधर्मतेति । तदुपस्थापकतया तद्विषयकतये-

अनुमितिचरमकारणलिङ्गपरामर्शप्रयोजकशाब्दज्ञानजनकशाब्दज्ञानजनकवाक्यत्वमवयवत्वम् । अत एव वन्हिव्याप्यधूमवानयमितिवाक्ये तदवयवे च न न्यायतदवयवलक्षणातिव्याप्तिः । तेन परामर्शस्य, तदवयवेन परामर्शजनकस्य जननात् । यत्तु संक्षेपतः परामर्शप्रयोजकवाक्यत्वेन विशेषाभावात् सोऽपि न्याय एवेति ।

रेव तत्पर्य्यवस्यति । अथ तदानुकूल्यमात्रेण, तदा को वह्निमान् पर्वतो वह्निमान् कुतो धूमवत्त्वादिसादेरपि तथात्वमित्यादिकं समाहितम् ।

अवयवत्वन्तु न्यायान्तर्गतत्वे सति प्रतिज्ञाद्यन्यतमत्वं प्रतिज्ञाद्यघटकत्वे सति उभयघटकभागद्वयाघटितत्वं वा वक्तव्यम् । उभ-

---

त्यर्थः । तेन शाब्दबोधनिष्ठस्यैव प्रयोजकत्वस्य मूलेऽभिधानान्नासङ्गतिः । सर्वदा उदाहरणस्य परामर्शविषयीभूतपक्षानुपस्थापकत्वादुपनयपर्यन्तानुसरणम् । तदिति । मूलोक्तपरामर्शजनकशाब्दधीजनकत्वमित्यर्थः। तथा चाऽसम्भव एव लक्षणस्य दोषः उदाहरणादावतिव्याप्तिर्वा इति भावः । तदानुकूल्यमात्रेणेति । परामर्शविषयीभूतार्थविषयत्वमात्रेणेत्यर्थः । तादृशपरामर्शप्रयोजकत्वमिति पूर्वेणान्वयः । इत्यादेरित्यादिना न्यायसमानार्थकस्य तावद्विसदृशवाक्यस्तोमस्य परिग्रहः । तथात्वं परामर्शप्रयोजकशाब्दधीजनकत्वम् । इत्यादिकामित्यादिना प्रतिज्ञाद्येकैकास्मिन्नतिप्रसङ्गोपग्रहः । मूलोक्तावयवलक्षणस्याप्युक्तदोषग्रस्तत्वात्स्वयं तल्लक्षणमाह अवयवत्वं त्विति । अत्र प्रतिज्ञासमानानुपूर्वीकस्य उदासीनवाक्यस्य वारणाय सत्यन्तम् । न्यायान्तर्गतत्वगर्भप्रतिज्ञात्वादिकमुपादाय तदन्यतमत्वोक्तौ न्यायान्तर्गतत्वस्य पञ्चधा प्रवेशे गौरवं

स्यादतः सकृदेव पार्थक्येन निवेशितमिति ध्येयम् । न च प्रकृतपक्षहेतुसाध्यकैकविधन्यायान्तर्गतत्वस्योक्तावन्यानुपूर्वीकतादृशन्यायावयवेऽव्याप्तिरिति वाच्यम् । प्रकृतपक्षहेतुसाध्यकन्यायसामान्यं यदघटितं तदन्यत्वस्य विवक्षितत्वात् । यादृशयादृशानुपूर्व्यवच्छिन्नस्य प्रकृतपक्षहेतुसाध्यकन्यायत्वं तादृशतादृशानुपूर्व्याः प्रत्येकानन्तर्गतं यत्तदन्यत्वे सति इति तु फलितार्थः । यत्तु प्रकृतपक्षहेतुसाध्यकयावन्न्यायविषयिताव्यापकविषयिताकत्वमेव प्रकृतन्यायान्तर्गतत्वमिति । तन्न । उदासीनवाक्याविषयके यावन्न्यायविषयकैकज्ञाने मानाभावेनाऽसम्भवापत्तेः । प्रतिज्ञाद्येकदेशेऽतिव्याप्तेर्वारणाय विशेष्यदलम् । तत्र प्रतिज्ञाद्यन्यतमत्वं प्रतिज्ञादिस्वरूपमेव तद्भिन्नभेदस्य तदात्मकत्वात् तथा च यदात्मकं यत्र प्रतिज्ञाद्यन्यतमत्वं तस्य तादृप्येण न्यायावयवत्वं साध्यसम्बन्धितावच्छेदकयद्रूपवत्त्वं यस्य तस्य तादृप्येण साध्यव्याप्यतावत् । अन्यथा सत्ताया एकत्वादिविशिष्टसत्ता द्रव्यत्वव्याप्येतिवत् शुद्धसत्ता द्रव्यत्वव्याप्येति व्यवहारापत्तेः साध्यसम्बन्धितावच्छेदकीभूतविशिष्टसत्तात्वस्यैव शुद्धसत्तायां सत्त्वात् । एवञ्च क्रमिकतत्तद्वर्णविशिष्टचरमवर्णत्वपर्यवसितस्य प्रतिज्ञात्वादेरन्तिमवर्णवृत्तित्वेपि न तन्मात्रेऽवयवव्यवहारः । यादृशयादृशानुपूर्व्यवच्छिन्ने तान्त्रिकाणां प्रकृतपक्षहेतुसाध्यकप्रतिज्ञाहेत्वादिव्यवहारः तादृशतादृशानुपूर्व्यन्यतमत्वे तात्पर्यम् । यत्तु यादृशयादृशवर्णस्तोमे तान्त्रिकाणां प्रतिज्ञादिव्यवहारः तादृशतादृशवर्णस्तोमान्यतमत्वमेव प्रतिज्ञाद्यन्यतमत्वं वाच्यमतो नैकवर्णेऽतिप्रसङ्गः इति । तत्तुच्छम् । तथासति प्रतिज्ञादिघटकेषु सर्वेष्वेव वर्णेषु प्रत्येकं क्रमिकतावद्वर्णसमुदायात्मकस्य प्रतिज्ञादेर्भेदसत्त्वात्तद्भिन्नभेदात्मकस्य प्रतिज्ञाद्यन्यतमत्वस्य प्रतिज्ञाद्यवयवमात्र एवाऽसम्भवापत्तेः । नन्वेवं रमाधवः पूज्यो रमाधवत्वादित्यादौ प्रतिज्ञाघटकस्य माधवः पूज्य इत्यस्य हेतुघटकस्य माधवत्वादित्यस्य च निरुक्तप्रतिज्ञाद्यन्यतमत्वात्तमादायाऽतिव्याप्तिः एवं पर्वतो धूमादगुणवान् धूमादित्यादौ धूमजगुणत्वेन साध्यतायां प्रतिज्ञादिपञ्चानामेवावयवानां घटिकायां धूमादित्यानुपूर्व्यामपि । न चोक्तलक्षण एव प्रतिज्ञाद्यघटकत्वे सतीत्यपि विशेषणं देयमतो नैष दोषः, तथा सत्यपि प्रतिज्ञात्वादिपर्यवसितेन प्रतिज्ञाद्यन्यतमत्वेनावयवानामि-

तन्न । कथायामाकाङ्क्षाक्रमेणाभिधानमिति प्रथमं विशिष्टवैशिष्ट्य आकाङ्क्षा नास्तीति तदभिधाने निग्रहादिति वक्ष्यते । अन्यथा चक्षुरादेरपि परामर्शजनकतया न्यायत्वापत्तिः, आकाङ्क्षाविरहस्तुल्य एव । अन्ये तु पञ्चा-

---

यञ्च प्रतिज्ञाहेतू हेतूदाहरणे उदाहरणोपनयौ उपनयनिगमने इति

तरभेदसाधने प्रतिज्ञात्वादेरेव गमकत्वसम्भवेऽन्यतमत्वांशस्य व्यर्थविशेषणत्वेन लक्ष्यत्वानुपपत्तेः । (न चान्यतमत्वमत्र न प्रतिज्ञात्वादिरूपं किन्त्वतिरिक्तो भेद इति वाच्यम् । तावतापि यत्र पर्वतत्वाद्यवच्छेदेन वन्हेः साध्यतायां तत्सामानाधिकरण्येन यथाऽयं पर्वत इति दृष्टान्तोपन्यासः तत्र पर्वतो वन्हिव्याप्यधूमवानित्यन्तस्य उदाहरणोपनयघटकभागद्वयस्यापि पर्वतधर्मिकसाध्यव्याप्यवत्ताबोधकत्वेन प्रतिज्ञाद्यन्यतमत्वात् प्रतिज्ञाद्यघटकत्वाच्च तत्रातिव्याप्तिः) इत्यस्वरसाल्लक्षणान्तरमाह प्रतिज्ञाद्यघटकत्वे सतीति । प्रतिज्ञाद्येकदेशेऽतिव्याप्तिवारणार्थं सत्यन्तम् । अत्र च स्वान्यप्रतिज्ञाविषयताव्यापकविषयताकत्वेन स्वविषयिताशून्यज्ञानावृत्तिस्वान्यप्रतिज्ञाविषयताकत्वेन वा प्रतिज्ञाघटकत्वं निरुच्य तदन्यत्वं निवेश्यं प्रतिज्ञाविषयतायामपि तद्विषयिताव्यापकत्वादसम्भवः स्यादतः स्वान्येति प्रतिज्ञाविशेषणम् । एवं हेत्वादिघटकत्वमपि निर्वाच्यम् । यद्यपि सर्वेषामेव पदार्थानां प्रतिज्ञादिघटकत्वात्तदन्यत्वं न प्रतिज्ञादावपि, तथापि प्रतिज्ञात्वान्ययद्धर्मावच्छिन्नविषयित्वं प्रतिज्ञाविषयताव्यापकं तद्धर्मानवच्छिन्नन्यायान्तर्गतविषयितावत्त्वं वाच्यम् । एवं हेत्वाद्यघटकत्वमपि निर्वाच्यम् । प्रतिज्ञाहेतुसमुदायादावतिव्याप्तिवारणार्थमुभयघटकभागद्वयाघटितत्वमिति । ननु प्रतिज्ञादेरपि स्वीयदलद्वयघटकभागद्वयघटितत्वादसम्भवोऽव्याप्तिर्वा इत्यत आह उभयञ्चेति । न चैवं निगमने-

वयववाक्याद्विजातीयमेव शाब्दज्ञानमुत्पद्यत इति तद्बी-
जनकवाक्यत्वं न्यायत्वम्, एवं प्रतिज्ञाद्यवयवादपि

विशिष्य वक्तव्यमिति। प्रतिज्ञादिगतिपाद्यतत्तद्विशिष्टार्थविषयक-
ज्ञानपञ्चकान्यतमज्ञानजनकवाक्यत्वं तत्त्वमित्यपि के चित्। तस्यै-

---

ऽव्याप्तिः उपनयस्थायंपदघटितस्य अयं तस्माद् वन्हिमानिति निगमनस्योपनयघटकायंपदेन निगमनघटकवन्ह्यादिपदेन च घटितत्वादिति वाच्यम्। अन्वयबोधार्थमयंपदस्याऽनुषङ्गेपि तदन्तर्भावेण निगमनत्वाभावात् तस्माद्वन्हिमानित्येव निगमनाकारत्वात् निगमनाघटकं सत् यदुपनयघटकं यच्चोपनयाघटकं सत् निगमनघटकं तदुभयाघटितत्वं वा लक्षणे निवेश्यम्। तथा चायंपदस्य उपनय इव निगमनेपि घटकत्वाददोषः। न च प्रतिज्ञाघटकहेतुघटकोभयाघटितत्वादित्यादिना प्रवेशेपि प्रतिज्ञोपनयसमुदायेऽतिव्याप्तिस्तादृशोभयाघटितत्वादिति वाच्यम्। उदासीनवाक्यवारणार्थमवश्यमनुषञ्जनीयेन न्यायान्तर्गतत्वे सतीत्यनेनैव तादृशसमुदायस्य वारणात् न्यायविषयिताव्यापकविषयिताप्रतियोगित्वरूपस्य प्रकृतपक्षहेतुसाध्यकन्यायसामान्यं यदघटितं तदन्यत्वरूपस्य वा न्यायान्तर्गतत्वस्य प्रतिज्ञोपनयसमुदायस्य कुत्राप्यसत्त्वात्। के चित्तु प्रतिज्ञाहेत्वित्यत्र हेतुपदं प्रतिज्ञाघटकान्यपरं तथा च प्रतिज्ञाघटकप्रतिज्ञाघटकान्योभयाघटितत्वे सतीत्यर्थलाभान्नोक्तदोषः। एवं हेतूदाहरणेत्यादावपि उदाहरणाद्यन्तिमपदं हेत्वादिघटकान्यपरं नातो हेतूपनयसमुदायादावतिव्याप्तिरित्याहुः। तच्चिन्त्यम्। कस्य चिदवयवलक्षणमाह प्रतिज्ञादीति। तत्तद्विशिष्टाविषयकेत्यादेस्तन्मात्रविषयकेत्यर्थः। तेन प्रतिज्ञाहेतुसमुदायस्य प्रतिज्ञार्थज्ञानजनकत्वेपि न तत्राऽतिव्याप्तिः। वाक्यत्वं न्यायान्तर्गतवाक्यत्वम्। तेन उदासीनवाक्ये नातिव्याप्तिः। अत्र तादृशान्यतमबोधजनकत्वं तत्स्वरूपयोग्यत्वमेव वाच्यम् अन्यथा सभाक्षोभादि-

प्रत्येकं विजातीयं शाब्दज्ञानमिति तत्तद्बीजनकशब्दत्वमेव तत्तल्लक्षणमिति । तन्न । ज्ञानविशेषजनकत्वं तत्तज्ज्ञानजनकत्वंवा न्याये प्रतिज्ञादौ चानतिप्रसक्तमनुगतरूपमन्तरेण दुर्निरूपमिति तत्स्वीकारे तस्यैव लक्षणत्वात्, अन्यथा जातिसङ्करप्रसङ्गः ॥

वेति। तथा च तादृशजातौ साधकाभाव इति भावः । बाधकमप्याह अन्यथेति। न्यायजन्यज्ञाने पञ्चावयवजन्यत्वात् पञ्चद्वित्र्यादिजन्ये द्वित्र्याद्या एकैकजन्ये चैकैका जातय इति सङ्कर इत्यर्थः । तत्र तत्र भिन्नभिन्नजातिकल्पने सुतरां मानाभावादिति भावः । के चित्तु यदि चानुगतं कारणमन्तरेणापि तादृशजातिमत्त्वसम्भवस्तदा कदाचित् प्रतिज्ञादिजन्येऽपि हेत्वादिजन्यवृत्तिर्हेत्वादिजन्ये च प्रति-

---

वशादबोधाजनकप्रतिज्ञादावव्याप्तत्वापत्तेः, तथा च चित्रभानुः प्रमेयो द्रव्यत्वादित्यादौ प्रतिज्ञैकदेशे भानुः प्रमेय इत्यत्रातिव्याप्तिः तस्यापि तादृशविशिष्टार्थबोधस्वरूपयोग्यत्वादित्यस्वरसः केचिदित्यनेन सूचितः। नन्वेकलक्षणस्य लक्षणान्तरादूषकत्वात् तस्यैवेतिमूलमसङ्गतमत आह तथा चेति। तादृशजातावितिं । न्यायप्रयोज्यायां प्रतिज्ञादिप्रत्येकप्रयोज्यायाश्च जातावित्यर्थः । साधकाभाव इति । अन्यथा प्रतिज्ञाव्यवहारसम्भवाज्जातिसाधकाभाव इत्यर्थः । बाधकमिति । प्रतिज्ञादिप्रत्येकप्रयोज्यायां जातावित्यादिः । न्यायप्रयोज्यजातेः प्रतिज्ञादिप्रयोज्यजातिव्याप्यत्वोपगमे साङ्कर्य्यासम्भवादिति ध्येयम् । पञ्चेति । जातय इत्यग्रेऽन्वयः । प्रतिज्ञादिपञ्चवाक्यैरेकबोधजननपक्षेपि साङ्कर्य्यार्थमाह द्वित्रादीति । ननु द्वित्रादिजन्ये प्रत्येकजन्ये च शाब्दबोधे विरुद्धा एव नानाजातयो बाच्यास्तत्कुतः साङ्कर्य्यमत आह तत्रेति । सुतरामिति । प्रति-

ज्ञादिजन्यवृत्तिर्जातिः स्यादिति सङ्कर इत्यर्थः। एवं सर्वेषां सर्वजातीयत्वमेकजातीयत्वं वा स्यादित्यपि द्रष्टव्यमित्याहुः॥

साध्यनिर्देशः प्रतिज्ञेति सूत्रम्। साध्यो विधेयधर्मविशिष्टो धर्मी तथा च पक्षतावच्छेदकपर्वतत्वादिविशिष्टे साध्यतावच्छेदकवन्हित्वादिविशिष्टवैशिष्ट्यज्ञानजनको न्यायावयव इति पर्य्यवसितोऽर्थः। उदाहरणाच्च साध्यतावच्छेदकविशिष्टवैशिष्ट्यज्ञानं न पक्षतावच्छेदकविशिष्टे, उपनयाच्च पक्षतावच्छेदकविशिष्टे न साध्यतावच्छेद-

---

ज्ञाव्यवहारानुरोधेन प्रत्येकजन्यबोधवृत्तिवैजात्यसत्त्वेपि द्वित्वादिजन्यबोधे तद्विरुद्धजातेः कल्पकाभावादिति भावः। मिश्रमतमाह के चित्त्विति। मूलस्थमन्यथापदं व्याकरोति यदि चेति। कदाचिदिति साङ्कर्य्यसम्पत्तये। ननु नियामकाभावान्मिथो व्यभिचार एव नास्ति कुतः सङ्कर इत्यत आह एवमिति। ननु समनियतनानाजातेरनङ्गीकारात्सर्वजातीयत्वमसङ्गतमत आह एकजातीयत्वं वेति। तथा च सर्वमेव लक्षणमवयवान्तरेऽतिव्याप्तमिति भावः। सङ्करपदस्य मुख्यार्थायोगोऽत्राऽस्वरसः॥

वक्ष्यमाणार्थस्य शब्दाल्लाभार्थमाह साध्य इति। अत्र जनकान्तेन हेत्वादेरवयव इत्यनेनोदासीनवाक्यस्य व्युदासः। न च पर्वतो वन्हिमानितिप्रतिज्ञायां वन्हिमत एव तादात्म्येन प्रकारत्वान्न पक्षे साध्यतावच्छेदकीभूतवन्हित्वविशिष्टवैशिष्ट्यावगाहिधीजनकत्वं नामार्थयोर्भेदान्वयस्याऽव्युत्पन्नतया पर्वते वन्हेः संयोगेन प्रकारत्वाभावादिति वाच्यम्। भेदार्थकविभक्तीनामिव तद्वर्थकमतुबादीनामपि समभिव्याहारवशेन नामार्थयोर्भेदान्वयस्य प्राञ्चैरुपगमात् तन्मत एवैतल्लक्षणकरणादिति भावः। पक्षतावच्छेदकविशिष्टेत्यस्य व्यावृत्तिमाह उदाहरणाच्चेति। न च यत्र पर्वतत्वावच्छेदेन साध्यसिद्धरुद्देश्यत्वे तत्सामानाधिकरण्येन पर्वतस्य दृष्टान्तता तत्र उदाहरणेऽतिव्याप्तिरिति वाच्यम्। पक्षतावच्छेदकनिष्ठावच्छेदकत्वाद्यवगाहिताया अपि विशिष्य प्रवेशनी-

तत्र प्रतिज्ञा न साध्यनिर्देशः, साध्यपदेऽतिव्याप्तेः । किन्तूद्देश्यानुमितिहेतुलिङ्गपरामर्शप्रयोजकवाक्यार्थज्ञानजनकत्वे सत्युद्देश्यानुमित्यन्यूनानतिरिक्तविषयकशाब्दज्ञानजनकं वाक्यम् । अन्यूनानतिरिक्तपदं वि-

---

कविशिष्टवैशिष्ट्यज्ञानमिति तयोर्व्युदासः । किन्त्वित्यादि । प्रकृतन्यायबहिर्भूतवाक्यवारणाय सदन्तं प्रकृतन्यायावयवत्वपर्य्यवसितार्थकम् । उद्देश्येति । प्रकृतेत्यर्थः । वन्हिसाध्यकन्यायोपनयस्य वन्हिव्याप्यधूमसाध्यकानुमित्यन्यूनानतिरिक्तविषयकज्ञानजनकस्य

त्वादिति भावः । साध्यतावच्छेदकेत्यस्य फलमाह उपनयाच्चेति । द्रव्यव्याप्यधूमवान्पर्वत इत्युपनयाच्चेत्यर्थः । यत्र येन सम्बन्धेन साध्यता तत्र तेनैव साध्यवैशिष्ट्यावगाहित्वं बोध्यम् । तेन यत्र विषयतासम्बन्धेन ज्ञानस्य साध्यतायां समवायेनैव ज्ञानं हेतुः तत्र ज्ञानव्याप्यज्ञानवानयमित्युपनये नातिप्रसङ्गः, सिषाधयिषया च न न्यायप्रयोग इति भावः । तयोः उदाहरणोपनययोः । सर्वमिदमापाततः । प्रतिज्ञासहकारेण हेत्ववयवस्यापि प्रकृतपक्षधर्मिकस्वार्थविशिष्टप्रकृतसाध्यबोधकतया तत्रातिप्रसङ्गस्य दुर्वारतापत्तेः । परन्तु तद्वारणाय प्रकृतपक्षधर्मिकप्रकृतसाध्यान्वयबोधत्वावच्छिन्नं प्रति जनकत्वमेव लक्षणं वाच्यम्, अत्र च प्रकृतपक्षसाध्ययोरेकमात्रस्योपादाने प्रतिज्ञामात्रेऽसम्भवापत्तिरतो द्वयमुपात्तमित्येव तत्त्वम् । [ननु प्रकृतपक्षधर्मिकयत्किञ्चित्प्रकारकशाब्दत्वावच्छिन्नं प्रति यत्किञ्चिद्धर्मिकप्रकृतसाध्यप्रकारकशाब्दत्वावच्छिन्नं प्रति वा जनकत्वं कुतो न निवेशितमित्याशङ्क्यैव उदाहरणाच्चेत्यादिको ग्रन्थ इति न कश्चिदोषः ।] बहिर्भूतवाक्यस्येति । प्रतिज्ञासमानार्थकस्येति शेषः । तस्यापि कथञ्चित्परामर्शप्रयोजकशाब्द-

वारणाय प्रकृतद्वयम् । तथा च तादृशसाध्यपक्षकन्यायावयवत्वं तादृशसाध्यपक्षकानुमितिसन्यूनानतिरिक्तविषयकशाब्दज्ञानजनकत्वं

धीजनकत्वात् यथाश्रुते सत्यन्तदलेन वारणासम्भवादाह प्रकृतन्यायेति । साध्यव्याप्यवत्त्वानुमितेरपि कदाचिदुद्देश्यत्वादुपनयेतिव्याप्तिरतो व्याचष्टे प्रकृतेत्यर्थ इति । वन्हिसाध्यकेत्यादिः । न्यायावयवत्वे सति प्रकृतानुमित्यन्यूनानतिरिक्तविषयकशाब्दधीजनकत्वोक्तौ वन्हिव्याप्यधूमसाध्यकप्रतिज्ञालक्षणस्य वन्हिसाध्यकोपनयेऽतिव्याप्तिः तस्यापि न्यायावयवत्वात् वन्हिव्याप्यधूमसाध्यकानुमितिसमानाकारकबोधजनकत्वात् च अतः प्रकृतद्वयमित्यर्थः । इदन्तु चिन्त्यते । वन्हिसाध्यकोपनयस्य व्यावृत्तये प्रकृतद्वयमित्यसङ्गतं साध्यादिभेदेन प्रतिज्ञायां विभिन्नतया वन्हिसाध्यकप्रतिज्ञालक्षणे यत्किञ्चिन्न्यायावयवत्वे सति वन्हिसाध्यकानुमित्यन्यूनानतिरिक्तविषयकबोधजनकत्वमात्रस्यैव सम्यक्त्वेन तत्र प्रकृतन्यायावयवत्वपर्यन्तप्रवेशे वैयर्थ्यात् । प्रकृतन्यायावयवत्वे सति अनुमित्यन्यूनानतिरिक्तविषयकशाब्दधीजनकत्वोक्तौ च वन्हिसाध्यकप्रतिज्ञालक्षणस्य तत्साध्यकोपनयेतिव्याप्तिः तस्यापि वन्हिव्याप्यधूमसाध्यकानुमितिसमानाकारबोधजनकत्वात् च किन्तु वन्हिव्याप्यधूमसाध्यकप्रतिज्ञालक्षणस्य वन्हिसाध्यकोपनयेऽतिव्याप्तिवारणार्थमेव प्रथमं प्रकृतपदम्, द्वितीयन्तु तस्यैव लक्षणस्य वन्हिव्याप्यधूमसाध्यकोपनयेऽतिव्याप्तिवारणार्थम्, तादृशोपनयस्यापि यत्किञ्चिदनुमितिसमानाकारकबोधजनकत्वात् न च वन्हिसाध्यकप्रतिज्ञालक्षणे अनुमित्यंशे यत्प्रकृतत्वं यच्च वन्हिव्याप्यसाध्यकप्रतिज्ञालक्षणे न्यायावयवत्वांशे प्रकृतत्वं तदुभयं वन्हिसाध्यकोपनयस्य वारणाय इत्यर्थकरणाच्चाऽसङ्गतिरिति वाच्यम् । तथाप्येकलक्षणस्यप्रकृतद्वयस्य व्यावृत्त्यननुधावने सन्दर्भविरोधित्वापत्तेरिति ध्येयम् । प्रकृतेत्यस्यार्थं व्याकरोति यादृशपक्षसाध्यकेति । यद्धर्मावच्छिन्नसाध्यपक्षकेत्यर्थः । न च तद्धर्मावच्छिन्नसाध्यकन्यायावयवत्वे सति तद्धर्मावच्छिन्नसाध्यकानुमित्यन्यूनानतिरिक्तविषयकशाब्दधीजनकत्वमेव तद्धर्मावच्छिन्नसाध्यकप्रतिज्ञात्वमस्तु तद्धर्मावच्छिन्नपक्ष-

पर्य्यवसितार्थः । धूमादालोकवान् पर्वतो वन्हिमान् धूमादित्यादावनतिरिक्तविषयकज्ञानजनकस्य हेतोर्वारणाय अन्यूनेति । निगमन-

---

प्रवेशो व्यर्थ इति वाच्यम् । तद्धर्मावच्छिन्नसाध्यकानुमितिविषयत्वसमनियतविषयताकत्वपर्यवसितस्य तद्धर्मावच्छिन्नसाध्यकानुमित्यन्यूनानतिरिक्तविषयत्वस्याऽप्रसिद्ध्या प्रतिज्ञामात्र एवाऽसम्भवापत्तेः । प्राञ्चस्तु बुद्धिविषयत्वं धूमज्ञानजन्यज्ञानीयं धूमादित्यादिन्यायस्थलीयहेत्ववयवे विषयत्वमात्रपक्षकधूमज्ञानजन्यज्ञानीयत्वसाध्यकप्रतिज्ञालक्षणस्याऽतिव्याप्तिवारणार्थमवश्यं तद्धर्मावच्छिन्नपक्षकत्वेन न्यायावयवो विशेषणीयः । अन्यथा तत्रापि धूमज्ञानजन्यज्ञानत्वत्वावच्छिन्नसाध्यकन्यायावयवत्वस्य विषयत्वत्वावच्छिन्नपक्षकधूमज्ञानजन्यज्ञानीयत्वत्वावच्छिन्नसाध्यकानुमितिसमानाकारकशाब्दधीजनकत्वस्य च द्वयोः सत्त्वेनातिव्याप्त्यापत्तेः । बुद्धिविषयत्वत्वावच्छिन्नपक्षकन्यायावयवस्य हेतोर्विषयत्वत्वावच्छिन्नपक्षकन्यायावयवत्वाभावादेव व्युदासात् । इत्थञ्चानुमित्यंशेपि तद्धर्मावच्छिन्नपक्षकत्वं देयम् । अन्यथा वन्हिविषयत्वत्वावच्छिन्नपक्षकोपदर्शितप्रतिज्ञालक्षणस्य तत्र हेत्ववयवेऽतिव्याप्त्यापत्तेः तस्यापि विषयत्वत्वावच्छिन्नपक्षकप्रकृतानुमित्यन्यूनानतिरिक्तविषयकशाब्दज्ञानजनकत्वादित्याहुः । तच्चिन्त्यम् । हेतोरिति । न चोक्तस्थले अनुमितावालोकनिष्ठमेव धूमज्ञानज्ञाप्यत्वं विषयः हेत्ववयवजन्ये च बोधे वन्हिनिष्ठमपि धूमज्ञानज्ञाप्यत्वं भासत इत्यतिरिक्तविषयकत्वादेव उक्तहेतावतिव्याप्त्यसम्भव इति वाच्यम् । अत एवाऽस्वरसादादिपदेन ज्ञेयाद्वाच्यत्वसर्वं प्रमेयं ज्ञेयादित्यादिस्थलीयहेतोरुपग्रहात् प्रकृतानुमितिविषयताबहिर्भूतविषयताशून्यत्वरूपस्य प्रकृतसाध्यव्याप्त्यविषयकत्वरूपस्य वा वक्ष्यमाणानतिरिक्तविषयत्वस्य धूमादालोकवान् पर्वतो वन्हिमान् धूमादित्यादिस्थलीयहेतावप्यनपायाच्च । के चित्तु हेत्ववयवजन्यबोधस्य धूमज्ञानजन्यज्ञानविषय इत्याकारकस्य आलोकेतरस्मिन् बाधदशायामुक्तस्थलेऽप्यन्यूनपदस्य व्यावृत्तिरिति व्याचक्षते । यत्तु धूमात्तेजस्वी पर्वतो वन्हिमान् धूमा-

वारणाय अनतिरिक्तेति । यद्यपि निगमने साक्षात्पक्षवाचकं पदं न श्रूयते, तथापि न्यूनताभङ्गाय उपनयस्थायमादिपदस्याऽनुषङ्गात्तथा बोध्यम् । इत्थमेव च प्रसक्तामतिप्रसक्तिं निगमनञ्चेत्यादिना निराकरिष्यति । तदर्थश्च निगमनमन्यूनानतिरिक्तविषयकज्ञानजनकं सन्न परामर्शहेतुर्येन निरुक्तन्यायावयवत्वरूपं प्रतिज्ञात्वं तदपि

दित्यादिस्थलीयहेतावतिव्याप्तिवारणार्थमेव अन्यूनपदम्, तत्र वह्निनिष्ठस्यैव धूमज्ञानज्ञाप्यत्वस्याऽनुमितौ हेतुजन्यबोधे च भानादिति । तत्तुच्छम् । तत्रापि प्राथमिकेन हेतुजन्यबोधेनाकाङ्क्षादिसाम्याद्धूमज्ञानज्ञाप्यत्वत्वेन द्रव्यत्वादिनिष्ठस्य धूमज्ञानज्ञाप्यत्वस्य विषयीकरणादनतिरिक्तविषयकत्वासम्भवात् । ननु निगमनस्य पक्षतावच्छेदकरूपेण पक्षाबोधकत्वादन्यूनपदेनैव तद्वारणं सम्भवतीत्यत आह यद्यपीति । सम्बन्धित्वप्रकारेण पक्षबोधकं सत्त्वादिकमेव निगमनेऽस्तीत्यतः साक्षादिति । पक्षतावच्छेदकरूपेणेत्यर्थः । न्यूनतेति । निगमनस्य प्रतिज्ञासमानाकारबोधजनकतायामेव पुनरुक्तताप्रतिसन्धानादबाधितत्वादिरूपबोधकत्वं तस्य लभ्यते नान्यथा इति भावः । अयमादित्यादिपदादियमिति स्त्रीलिङ्गे, नपुंसकलिङ्गे चेदमित्यस्य परिग्रहः । तथेति । अन्यूनविषयकत्वमित्यर्थः । इत्थमेव चेति । अयमादिपदानुषङ्गादन्यूनविषयकज्ञानजनकत्वेनैवेत्यर्थः । ननु निगमनस्य कथञ्चित्परामर्शप्रयोजकत्वान्न परामर्शहेतुरिति मूलासङ्गतिरित्यत आह तदर्थश्चेति । न परामर्शहेतुरिति । इदञ्च सत्यन्तमूलस्य यथाश्रुतार्थमभिप्रेत्य । वस्तुतः परामर्शपदस्य ज्ञानवाचकतया निगमनं नान्यूनानतिरिक्तविषयकज्ञानहेतुरित्येवार्थो बोध्य इति ध्येयम् । येनेति । सत्यन्तस्य प्रकृतन्यायावयवार्थकतया व्याख्यातत्वादिति भावः । निरुक्तेति । प्रकृतानुमित्यन्यूनानतिरिक्तविषयकज्ञानजनकत्वे सति प्रकृतन्यायावयवत्वरूपमित्यर्थः । तदपि निगमनमपि । अबाधितत्वादेरित्यादिपदात्सत्प्रतिपक्षस्य सङ्ग्रहः । अबाधितत्वादेरपदार्थतया निगमनबोध्यत्वासम्भवादाह तद्बोधेति । विशिष्टेति । व्याप्तिविशिष्टपक्षधर्मताविशिष्टहे-

व्याप्नुयात्, अबाधितत्वादेस्तद्बोधौपयिकविशिष्टहेतुसम्बन्धस्य वा बोधकतया तस्यातिरिक्तविषयकज्ञानजनकत्वादिति । यत्तु पृथिवी इतरेभ्यो भिद्यते पृथिवीत्वादित्यादौ यन्न पृथिवीतरेभ्यो भिद्यते न तत् पृथिवीत्युदाहरणवारणाय तदिति । तत्तुच्छम् । तेन पृथिव्यामितरभेदस्याविषयीकरणात् तात्पर्य्यभ्रमेण तादृशबोधजनकत्वस्यातिप्रसक्तत्वात् । न च तावताप्युदाहरणस्य तथात्वसम्भवः, यत्रेत्यादेरनन्वयात् । यदि च निगमने नाऽयमादिपदं निविशते वाक्यैकवाक्यतयैव विशिष्टलाभादिति विभाव्यते, तदा

तीयः साध्ये ज्ञानज्ञाप्यत्वलक्षणः सम्बन्धस्तद्बोधकतयेत्यर्थः । अत्र च निगमनस्याऽनुवादकत्वप्रतिसन्धानोत्तरमेवाऽबाधितत्वादेर्मानसग्रहोत्पत्त्या कथञ्चित्तद्बोधौपयिकत्वं बोध्यम् । मिश्रमतमुपन्यस्यति यत्त्विति । तदिति । अनतिरिक्तपदमित्यर्थः । तेन उक्तोदाहरणेन । पृथिव्यामिति । पृथिवीतरत्वावच्छिन्नभेदाभावस्यैव तेनाऽबोधनात् तथा चाऽनुमितिन्यूनविषयकत्वादन्यूनपदेनैव धारणं सम्भवतीति भावः । ननूक्तस्थलेपि तात्पर्यभ्रमेण पृथिव्यामितरभेदप्रकारकबोधः सम्भवत्येवेत्यत आह तात्पर्येति । तादृशबोधेति । अनुमित्यन्यूनविषयकबोधेत्यर्थः । अतिप्रसक्तत्वात् अवयवान्तरेपि सत्त्वात् । नन्ववयवान्तरे तत्सत्त्वेपि न क्षतिः, तस्यातिरिक्तविषयकबोधजनकतया अनतिरिक्तपदेनैव तद्धारणसम्भवादत आह न चेति । तावतापीति । तात्पर्यभ्रमेणापीत्यर्थः । तथात्वस्य अन्यूनविषयकबोधजनकत्वस्य सम्भवः । यत्रेत्यादेरिति । तात्पर्यभ्रमादप्येकदेशस्यैवानुमित्यन्यूनविषयकज्ञानजनकत्वं न तु समुदितोदाहरणस्य, तस्य च न्यायावयवार्थकेन सत्यन्तदलेनैव वारणं सम्भवतीति भावः । नायमादीति । तथा चान्यूनविषयकत्वाभावादेव निगमनव्युदासात्तद्धारणार्थमनतिरिक्तपदं व्यर्थमिति भावः । नन्वेवं न्यूनतातादवस्थ्यमत आह वाक्येति । उपनयनिगमनस्वरूपवाक्ययोरेकवाक्यतावलाद्विशिष्टवैशिष्ट्यान्वयबोधबलादेव विशिष्टस्य प्रकृतसाध्यविशिष्टप्रकृत-

हेतौ साध्यसामानाधिकरण्यभाने सामान्यतः पक्षेऽपि साध्यवत्त्व-भानात् पक्षे हेतुव्यापकसाध्यसामानाधिकरण्यविशिष्टहेतुमत्ताबो-धकस्योपनयस्य, यत्र च पक्षसाध्ययोस्तादृप्येण दृष्टान्तत्वहेतुत्वा-

---

पक्षस्य लाभादित्यर्थः। तथा च विनाप्यनुषङ्गमबाधितत्वादिबोध-कस्य पुनरुक्तत्वस्य लाभान्न न्यूनत्वमिति भावः। यत्र पक्षतावच्छेदक-धर्मावच्छेदेन साध्यसिद्धिरुद्देश्या तत्र तदवच्छेदेनैव साध्यस्य पुन-रुक्तत्वज्ञानमबाधितत्वादिग्रहोपयोगि, तच्च वाक्यैकवाक्यतया बोधान्न सम्भवति वन्हिव्याप्यधूमवत्पर्वतत्वावच्छेदेन वन्हिमत्त्वग्र-हेपि पर्वतत्वावच्छेदेन वन्हिमत्त्वाग्रहादन्वयितावच्छेदकधर्मावच्छे-देनैवान्वयस्य व्युत्पन्नत्वादित्यनुषङ्गस्यैव सम्यक्त्वमित्यावेदयितुं य-दि चेत्युक्तम्। सामान्यतः अधिकरणत्वप्रकारेणोपनयस्येति। वार-णादित्यग्रेऽन्वयः। न च पक्षतावच्छेदकविशिष्टे साध्यवैशिष्ट्यावगा-हित्वरूपमेवाऽन्यूनविषयकत्वं निरुच्य उपनयवारणसम्भवादिदमस-ङ्गतमिति वाच्यम्। यत्राधिकरणं प्रमेयं ज्ञेयत्वादित्यादिक्रमेण न्या-यस्तत्रोपनयस्य पक्षतावच्छेदकविशिष्टे साध्यवैशिष्ट्यावगाहित्वनि-यमादधिकरणत्वावच्छेदेन प्रमेयत्वसिद्धेरुद्देश्यत्वादेव सिद्धसाधना-योगादिति भावः। अथानुमित्यन्यूनविषयत्वमेवाऽवश्यं पक्षविशेष्य-कसाध्यप्रकारकत्वं वाच्यं तथा च तत्रैव पक्षनिष्ठमुख्यविशेष्यकत्व-निवेशेनोपनयवारणसम्भवात्तदर्थं विशेषणान्तरमयुक्तम्, स्वव्यापक-साध्यकत्वस्य साध्यवदन्यावृत्तिस्वस्यैव वाऽनुमितिहेतुत्वमते सा-ध्यसामानाधिकरण्यांशस्य उपनयाविषयतया तत्राऽतिव्याप्त्ययोगश्चे-त्यत आह यत्र चेति। तादृप्येणेति। पक्षतावच्छेदकसाध्यतावच्छे-दकरूपाभ्यामित्यर्थः। तथा च पर्वतो वन्हिमान् धूमात् यो यो धूम-वान् स स वन्हिमान् यथा पर्वतः इत्यादिस्थलीयोदाहरणस्य पर्वतो वन्हिमान् वन्हेरित्यादिस्थलीयस्य वन्हिव्याप्यवन्हिमांश्चायमित्युप-नयस्य च वारणायाऽनतिरिक्तपदम्। तत्रापि यद्रूपेण पक्षत्वं तदन्य-रूपेणैव दृष्टान्तमते निरुक्तोदाहरणेतिव्याप्त्यसम्भवादुपनयपर्यन्ता-नुसरणम्। यत्तु दृष्टान्तस्योदाहरणाघटकत्वपक्षे तत्रातिव्याप्त्यस-

भ्यामुपन्यासस्तादृशसिषाधयिषया च न्यायप्रयोगस्तत्रोदाहरणोपनययोः, यत्र वा पर्वतत्वाद्यवच्छेदेन साध्यसिद्धेरुद्देश्यतायामेतत्पर्वतत्वादिना दृष्टान्तस्योपन्यासस्तत्रोदाहरणस्य सत्यन्तस्य चा-

---

म्भवादुपनयपर्यन्तानुधावनमिति। तन्नुच्छम्। तथासत्यग्रे सामानाधिकरण्येन दृष्टान्तमुपादाय उदाहरणेऽतिव्याप्तिप्रदर्शनस्य सन्दर्भविरोधापत्तेः। न च साध्यहेतुतुल्यन्याय एवाऽसम्भवीति कुतस्तदुपनयेऽतिव्याप्तिः उद्देश्यतावच्छेदकविधेययोरैक्येन यो यो वन्हिमान् स स वन्हिमानित्युदाहरणस्य निराकाङ्क्षत्वेनासम्भवादिति वाच्यम्। यद्योगात्प्राथम्यलब्धस्य वन्हिव्यापकत्वविशिष्टवन्हेरेव विधेयतया दण्डवान् रक्तदण्डवानित्यादेरिवोक्तोदाहरणस्यापि साकाङ्क्षत्वसम्भवात्, व्यापकत्वस्य तत्र संसर्गमर्यादया भानमतेपि संयोगमात्रेण वन्हिमति व्यापकत्वविशिष्टसंयोगेन वन्हिमत्तान्वये बाधकाभावात्, एकसम्बन्धेनैव उद्देश्यतावच्छेदस्य विधेयतायां निराकाङ्क्षत्वादिति ध्येयम्।ननूक्तस्थले पक्षे साध्यसन्देहविरहान्न्यायप्रयोग एव नास्ति कुत्रोदाहरणातिव्याप्तिरत आह सिषाधयिषेति।ननु सिषाधयिषया न्यायप्रयोगो विवादग्रस्त इत्यत आह यत्र वेति।पर्वतत्वसामानाधिकरण्येन साध्यसिद्धेरुद्देश्यत्वे सिद्धसाधनापत्तेः पर्वतत्वावच्छेदेनेत्युक्तम्।यद्रूपेण पक्षत्वं तदन्यरूपेणैव दृष्टान्तवचनमिति प्रवादरक्षार्थमेतत्पदम्।उदाहरणस्येति। यद्यपि यत्र पर्वतत्वावच्छेदेन जातिमत्त्वस्योद्देश्यतायां जातिमत्पर्वतस्य तादात्म्येन हेतुत्वं तत्रावयवमात्रेतिव्याप्त्यसम्भवादुदाहरणमात्राकिरङ्गता, तथापि पक्षमुख्यविशेष्यकसाध्यवत्तावगाहित्वरूपस्याऽन्यूनविषयकत्वस्य प्रवेशेऽवयवान्तरातिव्याप्त्यसम्भवात्तन्मात्रानुसरणमिति भावः। ननु यन्मते दृष्टान्तमनन्तर्भाव्यैवोदाहरणशरीरं तन्मते नोदाहरणेऽतिव्याप्तिः सम्भवतीत्यत आह सत्यन्तस्य चेति। ननूक्तदृष्टान्तस्य पर्वतत्वसामानाधिकरण्येन वन्हिमत्त्वबोधकत्वेप्यनुमितिविषयीभूतस्य पर्वतत्वावच्छेदेन वन्हिमत्त्वस्याऽबोधकत्वादन्यूनपदेनैव तद्वारणं सम्भवतीत्यत उक्तं सत्यन्तस्य चेत्यपि वदन्ति। परमेश्वरो देव सौदामिनी

वयवावघटकन्यायान्तर्गतत्वपरतया हेत्वन्तस्यायमादिनिगमनान्तभागस्य वारणाय तत् । यद्यपि सर्वमभिधेयं प्रमेयमित्यादावतिरिक्ताप्रसिद्धिः, न च कोऽप्यप्रसिद्धया प्रमेयं न वेति विप्रतिपत्तेः

द्रव्यमित्यादि प्रतिज्ञैकदेशस्य मेश्वरो देवः दामिनो द्रव्यमित्यादेरपि प्रकृतानुमितिसमानाकारबोधजनकत्वात्तत्राप्तिव्याप्तिरत उक्तमवयवावघटकेति। अवयवावघटकत्वे सति यन्न्यायान्तर्गतं तस्त्वे सतीत्यर्थः। हेत्वन्तस्य प्रतिज्ञादिहेत्वन्तभागस्य । न्यायस्य पूर्वप्रतीके व्यावृत्तिमुक्त्वा परप्रतीकेपि तामाह अयमादीति । हेत्वघटितत्वोक्त्यापि हेत्वन्तभागस्य वारणसम्भवादाह अयमादीत्यपि कश्चित् । न चोपनयादिनिगमनान्तभागेऽप्यतिव्याप्तिसम्भवादयमादिपर्यन्तानुसरणं व्यर्थमिति वाच्यम् । पक्षतावच्छेदकमात्रावच्छिन्नविशेष्यकसाध्यप्रकारत्वरूपान्यूनविषयकत्वविवक्षयापि तद्वारणसम्भवादिति भावः । तत् अनतिरिक्तपदम् । न च साध्यतावच्छेदकधर्ममात्रावच्छिन्नविधेयताकत्वरूपमन्यूनविषयकत्वं निरुक्तयैव प्रतिज्ञादिहेत्वन्तभागादेर्वारणसम्भवादनतिरिक्तपदं व्यर्थं तत्र धूमज्ञानज्ञाप्यवन्हित्वावच्छिन्नस्यैव विधेयत्वादिति वाच्यम् । विशिष्टवैशिष्ट्यविषयतातिरिक्तशाब्दधीविषयत्वस्याऽनङ्गीकारात्तादृशविषयतायाः प्रकृतेपि सत्त्वादनतिरिक्तपदसार्थकत्वार्थमेव तावद्दूराविवक्षणाच्च । वस्तुतः प्रतिज्ञासहकारेण हेत्ववयवस्य उपनयसहकारेण निगमनस्य अनुमित्यन्यूनविषयकत्वात् सत्यन्तस्याप्ययवार्थकत्वेपि हेतुनिगमनयोर्वारणार्थमेवाऽनतिरिक्तपदं देयम्, न ह्यन्यूनविषयकशाब्दत्वावच्छिन्नजन्यतानिरूपितं जनकत्वं निरुक्तौ निविष्टं येन केवले हेतौ निगमने चातिव्याप्तिर्न स्यादिति युक्तमुत्पश्यामः । यद्यपीति । सर्वस्य पक्षत्वे व्यतिरेकिणः साध्यस्यांशतो बाधितत्वात्तत्साध्यको न सन्न्यायः इति केवलान्वयिनः साध्यतयोल्लेखः । अभिधेयपदं सम्पातायातम् । सर्वत्वावच्छिन्नस्यैव पक्षत्वे प्रकृते दोषसम्भवादतिरिक्तेति । प्रकृतानुमितिविषयतातिरिक्तेत्यर्थः । तद्विषयतायाः केवलान्वयित्वादिति भावः । न चेति । वाच्यमित्यग्रेऽन्वयः । कोटीति ।

संशयस्य चायोगान्न तादृशी प्रतिज्ञा प्रकृतानुमितिविषयतासमव्याप्तविषयताकत्वं प्रकृतानुमितिप्रकारतासमव्याप्तप्रकारताकत्वं वा वक्तव्यमिति वाच्यम् । सकलाभिधेयनिष्ठधर्मवत्सकलाभिधेयनिष्ठात्यन्ताभावाप्रतियोग्याकाशाभाववद्वा इदं द्रव्यमित्यादौ विशिष्टपक्षबोधके उपनयेऽतिव्याप्तेः । तथापि प्रकृतपक्षे प्रकृतसाध्य-

---

प्रमेयत्वाभावरूपेत्यादिः । सन्दिग्ध एव न्यायप्रवृत्तेर्विप्रतिपत्तेरनादृश्यकत्वादाह संशयस्य चेति । सन्दिग्धसाध्यके धर्मिण्येव न्यायप्रवृत्तेरिति भावः । ननु खण्डशः प्रत्येकपदार्थप्रसिद्धौव सर्वं प्रमेयं न वा इत्याकारकसंशयः सम्भवत्येव सर्वसदृशः पर्वतो वन्हिमान् इत्यादिप्रतिज्ञान्तरेऽव्याप्तितादवस्थ्यञ्च तत्र कोट्यप्रसिद्धेर्वक्तुमशक्यत्वादत आह प्रकृतेति । प्रकृतानुमितिविषयतासमव्यापकविषयताकत्वमित्यर्थः । सामानाधिकरण्यांशस्य वैयर्थ्येनाऽप्रविष्टत्वादिति ध्येयम् । सर्वपक्षोपनयमात्रेतिव्याप्तिरतः कल्पान्तरमाह प्रकृतानुमितीति । वक्तव्यमित्यस्यान्यूनानतिरिक्तदलेनेत्यादिः । सकलाभिधेयवृत्तिधर्मवदिदं द्रव्यमिति योजना । अभिधेयेति सम्पातायातम् । संशयकोटिप्रसिद्ध्यर्थं द्रव्यत्वस्य व्यतिरेकिणः साध्यतयोल्लेखः । अत्रानुमितावित्र उपनयेपि वस्तुमात्रस्यैव प्रकारत्वात्तत्रातिव्याप्तिरिति भावः । ननु निरवच्छिन्नप्रकृतानुमितिप्रकारत्वसमव्यापकनिरवच्छिन्नप्रकारताकत्वं वाच्यं तथा चानुमितौ स्वरूपतोऽप्रकाराणामभावत्वप्रतियोगित्वादीनामुक्तस्थलीयोपनये व्याप्तिघटकतया स्वरूपतः प्रकारत्वान्न तत्रातिव्याप्तिरत आह सकलाभिधेयनिष्ठेति। तथा च सकलाभिधेयनिष्ठाभावप्रतियोग्याकाशाभाववादिदं द्रव्यमाकाशादित्यादितादात्म्यसम्बन्धावच्छिन्नहेतुकस्थलीयोपनयेऽतिव्याप्तिः तत्राऽनुमितावुपनये च स्वरूपतः प्रकाराणां तुल्यत्वादिति भावः । समव्याप्तत्वं विहाय समसंख्यप्रकारत्वोक्तौ न कोपि दोष इति ध्येयम् । प्रकृतपक्ष इत्यादि । पक्षतावच्छेदकधर्मावच्छिन्नविशेष्यतानिरूपितसाध्यतावच्छेदकधर्मावच्छिन्नप्रकारकत्वमित्यर्थः ।

वैशिष्ट्यविषयत्वं तदन्यूनविषयत्वम् । प्रकृतपञ्चम्यर्थपक्षकप्रतिज्ञादिस्थले तु पक्षे प्रकृत्यर्थस्य वैशिष्ट्यबोधको हेतुर्न तु प्रकृतसा-

---

तदन्यूनविषयकत्वं प्रकृतानुमित्यन्यूनविषयकत्वम् । अत्र यदि निरुक्तविषयताविलक्षणविषयताशून्यत्वरूपमनतिरिक्तविषयकत्वं निवेश्यते, तदा पक्षदिशि प्रकृतत्वानुक्तौ वन्हिमद्द्रव्यं तेजस्वी पर्वतो वन्हिमान् वन्हिमद्द्रव्यादित्यादिस्थलीये तादात्म्येन हेत्ववयवेऽतिव्याप्तिः तस्यापि द्रव्यत्वेनैव पक्षे प्रकृतसाध्यवैशिष्ट्यावगाहित्वात् । यदि तु प्रकृतव्याप्त्यविषयकत्वरूपमेवाऽनतिरिक्तविषयकत्वं निवेश्यते, तदा पर्वतो वन्हिमान् वन्हिमद्द्रव्यादित्यादिस्थलीयहेतावतिव्याप्तिवारणार्थं तदूबोध्यम् । साध्यीयप्रकृतत्वस्य व्यावृत्तिं स्वयमेवाह प्रकृतपञ्चम्यर्थेति । ज्ञापकत्वादिरूपो यः पञ्चम्यर्थः तत्पक्षकेत्यर्थः । तथा च हेतुत्वं वाच्यवत् प्रमेयत्वादित्यादौ हेत्ववयवस्य पञ्चम्यर्थहेतुत्वे प्रकृतपक्षे वाच्यविशेषे मेयत्वस्वरूपसाध्यस्य वैशिष्ट्यावगाहित्वेपि साध्यतावच्छेदकीभूतवाच्यत्वप्रकारेणैव तद्वैशिष्ट्यानवगाहनान्नातिव्याप्तिः, हेतुत्वं वाच्यवत् वाच्यादित्यादिकन्तु न न्यायः सिद्धसाधनादिति भावः । इदञ्च व्याप्त्यविषयत्वरूपमनतिरिक्तविषयकत्वं लक्षणे प्रविष्टमित्यभिप्रेत्योक्तम् । प्रकृतपक्षे प्रकृतसाध्यवैशिष्ट्यावगाहितावलक्षणविषयताशून्यत्वरूपस्य तस्य प्रवेशे तु ज्ञापकं प्रमेयत्वात् वाच्यत्ववन्निष्ठधर्मवत् प्रमेयत्वादित्यादौ पर्वतो वन्हिमत्पर्वतात्तेजस्वी वन्हिमत्पर्वतादित्यादौ च हेत्ववयवस्य वारणाय प्रकृतत्वं वाच्यमिति ध्येयम् । अत्र च प्रकृतसाध्यवैशिष्ट्यविषयकत्वं साध्यतावच्छेदकधर्मावच्छिन्नविधेयताकत्वपर्यवसितं ग्राह्यम् । तेन नव्यमते ज्ञानज्ञाप्यत्वस्यैव हेतुपञ्चम्यर्थत्वाद्विषयत्वं धूमज्ञानजन्यज्ञानीयं धूमादित्यादौ हेत्ववयवस्य प्रकृतपक्षे प्रकृतसाध्यवैशिष्ट्यावगाहिबोधजनकत्वेपि न तत्रातिव्याप्तिः । ज्ञानज्ञाप्यत्वरूपपञ्चम्यर्थैकदेशस्य ज्ञानजन्यज्ञानस्य तदर्थविषयतायां विधेयत्वेनाऽनन्वयात् वृत्तिद्वयोपस्थाप्ययोरेवोद्देश्यविधेयभावेनान्वयस्य व्युत्पन्नत्वादिति

ध्यस्य । तादृशविषयताविलक्षणविषयताशून्यत्वं प्रकृतहेतुकप्रकृतसाध्यसिद्ध्यौपयिकव्याप्यविषयकत्वं वा तदनतिरिक्तविषयत्वम् । वन्हिव्याप्यालोकवत्सधर्मा पर्वतो वन्हिमान् धूमात् इन्धनव्या-

---

चदन्ति । तादृशेति । प्रकृतपक्षे प्रकृतसाध्यवैशिष्ट्यविषयताविलक्षणविषयताशून्यत्वमर्थः । तादृशविषयताविलक्षणविषयत्वमत्र न तादृशविषयताभिन्नत्वं सर्वस्यैव प्रतिज्ञाजन्यबोधस्य तादृशविशिष्टविषयताभिन्नसाध्यादिप्रत्येकविषयतावत्त्वेन प्रतिज्ञामात्र एवाऽसम्भवापत्तेः । किन्तु तादृशविषयताव्यापकत्वम्, तथा च तत्र साध्यपक्षयोः प्रकृतत्वानुक्तौ प्रतिज्ञायामसम्भवः स्यात् तज्जन्यबोधविषयतामात्रस्यैव सामान्यतः साध्यवत्पक्षावगाहित्वाव्यापकत्वात् अतस्तदुपात्तम् । ननु ज्ञानभेदेन स्वरूपसम्बन्धात्मिकानां प्रतियोगिताव्यक्तीनां भेदात् प्रतिज्ञाजन्यबोधानामपि न तादृशविषयत्वाव्यापकविषयताशून्यत्वमित्यसम्भवः समानाकारज्ञानीयविषयतानामैक्यस्य विवादग्रस्तत्वात् अतः प्रकारान्तरमाह प्रकृतहेतुकेति । अन्वयव्याप्तित्वेन प्रवेशे व्यतिरेकिनिगमनेऽतिव्याप्तिरतः सिद्ध्यौपयिकान्तम् । प्रकृतहेतुमत्तानिश्चयोत्तरप्रकृतसाध्यानुमितित्वघटितधर्मावच्छिन्नजन्यतानिरूपितजनकतावच्छेदकीभूतविषयिताशून्यत्वमर्थः । तेन वन्हिव्याप्यधूमवन्निरूपितसंयोगेन पर्वते वन्हेः साध्यतायां पर्वतो वन्हिमान् धूमादित्यादिस्थलीयप्रतिज्ञायां सम्बन्धमर्यादया वन्हिधूमयोर्व्याप्त्यवगाहित्वेपि न तत्राव्याप्तिः । यद्यपि विवक्षेयं न्यायावयवत्वगर्भनिरुक्तावेव अन्यथा तद्धानेपि हेत्वन्तभागेतिव्याप्तिरिति वक्ष्यते तथा च निगमनस्थयिमादिपदाघटितत्वकल्पने अन्यूनपदेनैव तद्वारणसम्भवः, तथापि अन्वयव्याप्तीनामपि नानात्वादेकोपादानेऽन्यामन्तर्भाव्य पक्षतावच्छेदकसामानाधिकरण्येन दृष्टान्तवत्युदाहरणेऽतिव्याप्तिवारणार्थमुक्तानुगमस्यावश्यकत्वादिति भावः । प्रकृतहेतुप्रवेशस्य फलमाह वन्हिव्याप्येति । वन्हिव्याप्यालोकवत्पर्वतत्वेन पक्षत्वे तद्रूपावच्छिन्ने वन्हेः संशयासम्भवान्न्याय एव नावतरतीत्यतः सधर्मेति । यत्तु व-

प्यधूमवान् पर्वतो वन्हिमान् धूमादिसादौ तस्याः संग्रहाय प्रकृतहेतुसाध्ययोरुपादानम्। वन्हिव्याप्यधूमवान् पर्वतो वन्हिमान्

न्हिव्याप्यालोकवत्तया गृहीते पर्वते वन्हिसाध्यकहेत्वाकाङ्क्षा न सम्भवत्यतः सधर्मपदमिति। तत्तुच्छम्। पर्वतधर्मिकवन्हिसिद्ध्यौपयिकहेत्वाकाङ्क्षानुपपत्तावपि वन्हिव्याप्यालोकवत्पर्वतत्वावच्छिन्नधर्मिकवन्ह्यनुमित्युपयुक्तहेत्वाकाङ्क्षायां बाधकाभावात्, प्रकृतपक्षे प्रकृतसाध्यवत्त्वं कुत इत्याकाङ्क्षयैव हेतुप्रयोगात् इति। प्रकृतत्वेन साध्यप्रवेशस्य फलमाह इन्धनव्याप्येति। तस्याः प्रतिज्ञायाः। इदन्तु बोध्यम्। सत्यन्तस्य न्यायावयवार्थकत्वपक्ष एवायं कल्पोऽभिहितः, तेन अवयवाघटकन्यायान्तर्गतस्य हेत्वन्तभागस्य प्रकृतव्याप्त्यविषयकत्वेपि न तत्रातिव्याप्तिः। न चैवमनतिरिक्तपदवैयर्थ्यम् अन्यूनविषयकत्वाभावेनैवावयवान्तरव्युदासादिति वाच्यम्। पर्वतत्वावच्छेदेन वन्हेः साध्यतायामेतत्पर्वतत्वेन दृष्टान्तवत्युदाहरणेतिव्याप्तिवारकत्वात्। न च तथापि पर्वतो वन्हिमान् वन्हिमत्पर्वतादित्यादौ हेत्ववयवेतिव्याप्तिः तस्यापि व्याप्त्यविषयकत्वेनाऽनतिरिक्तविषयकत्वात् पक्षे साध्यवैशिष्ट्यावगाहित्वेनाऽन्यूनविषयकत्वाच्च, पर्वतत्वावच्छेदेन साध्यसिद्धेरुद्देश्यत्वादेव सिद्धसाधनासम्भवादिति वाच्यम्। पक्षमुख्यविशेष्यकसाध्यवैशिष्ट्यावगाहित्वरूपान्यूनविषयकत्वाविवक्षयैव तद्धारणात् पक्षमर्यहेतुत्वस्यैव तन्मुख्यविशेष्यत्वादिति दिक्। के चित्तु सत्यन्तस्यावयवाघटकन्यायान्तर्गतत्वार्थकत्वेपि हेत्वन्तभागेतिव्याप्तिः तत्रावयवाघटक इत्यत्रावयवोऽघटको यस्य अवयवस्याऽघटकमित्येकत्र समासद्वयाश्रयेणाऽवयवद्वयाघटितत्वे सत्यवयवाघटकत्वस्य लाभात् प्रथमेन हेत्वन्तस्य द्वितीयेन च चित्रभानुः प्रमेय इत्यादिप्रतिज्ञैकदेशे भानुः प्रमेय इत्यादावतिव्याप्तिवारणादित्याहुः। नन्वेवं वह्निव्याप्यधूमवत्पर्वतो वह्निमान् धूमादित्यादौ प्रतिज्ञायामव्याप्तिः स्यात् प्रकृतव्याप्तिविषयकत्वात्, पक्षतावच्छेदकीभूतव्याप्तिभिन्नाया एव व्याप्तेर्विधेयकोटिनिविष्टतया उपनयस्योद्देश्यतावच्छेदकविधेययोरैक्यासम्भवेन निराकाङ्क्षत्वायोगादत आह वह्निव्याप्येति। संयोगेन साध्यतास्य-

धूमात् सत्तादिव्याप्यद्रव्यत्ववदिदं सत्तादिमद्द्रव्यत्वादित्यादिस्तु न प्रयोगः, विशिष्टपक्षोपस्थापकादेव तादृशव्याप्तिप्रतीतावाकाङ्क्षाविरहेणोदाहरणानुत्थानात्, अन्यथातिप्रसङ्गात् । अत एव नैकदोभयव्याप्त्युपन्यासोऽपि । यदि च मैत्रः पचति अयं गौरित्यादेरेव प्रतिज्ञाया यथोपवर्णितविशिष्टज्ञानजनकत्वं तादात्म्येन गोः साध्यत्वात् गोत्वत्वाद्यनुपस्थित्या गोत्वादेः साध्यत्वानुपपत्तेः

लेऽव्याप्तिमुक्त्वा समवायेन साध्यतास्थले तामाह सत्तादीति । अन्यथा विनाप्याकाङ्क्षामभिधाने । अतिप्रसङ्गादिति । हेत्ववयवद्वयस्याप्युद्भावनप्रसङ्गादित्यर्थः । अत एव आकाङ्क्षाविरहादेव । नैकदेति । समयबन्धं विनेत्यादिः । तेनाऽन्वयव्यतिरेकोभयव्याप्तिबोधकोदाहरणाकाङ्क्षाप्रयोजकावयवत्वेन मणिकृता वक्ष्यमाणस्य नासङ्गतिः, समयबन्धानुरोधेन व्याप्तिद्वयबोधकोदाहरणसम्भवादिति ध्येयम् । उभयव्याप्तीत्यत्र व्याप्तिपदमेकजातीयव्याप्तिपरमतो नाऽसङ्गतिरिति परमार्थः । यदि मीमांसकमतेनैव मया पक्षे साध्यं साधनीयमित्यादिसमयबन्धवशाद्धूमलिङ्गान्वयव्याप्तिं पक्षतावच्छेदककोटौ निवेश्य व्यतिरेकव्याप्त्या धूमहेतोरुदाहरणोत्थानसम्भवस्तदा तत्रत्यप्रतिज्ञायामव्याप्तिरिति तु चिन्तनीयम् । यदि चेति । सूक्ष्ममीक्ष्यत इत्यन्वयः । खलेकपोतन्यायेनैव शाब्दधीस्वीकारे पचतीत्यादेः पाककृतित्वावच्छिन्नसाध्यबोधकत्वासम्भवात् वैयाकरणमते पाककर्तुरेव तादात्म्यसम्बन्धेन तत्र साध्यत्वाच्चाह अयं गौरिति । आदिना घटो नेतराणि इत्यादेः सङ्ग्रहः । ननु व्युत्पत्तिविरोधादयं गौरित्यादिप्रतिज्ञायाः पक्षे साध्यीभूतगोत्वविशिष्टज्ञानजनकत्वात्कथं तत्रोपदर्शितज्ञानजनकत्वमत आह तादात्म्येनेति । गोत्वादेः साध्यतायां स्वयं बाधकमाह गोत्वत्वादीति । अनुपस्थित्येति । गवादिपदादनुपस्थित्येत्यर्थः । तथा च साध्यतावच्छेदकरूपेण साध्यवत्त्वबोधकस्यैव वाक्यस्य प्रतिज्ञात्वान्न तस्य गोत्वसाध्यकप्रतिज्ञात्वसम्भवः इति । ननु शुद्धगोत्वादेः साध्यतायां निरवच्छिन्नतद्बाधकेवाक्यस्यैव प्रतिज्ञात्वं स्थसायतीत्यत आह पदा-

पदार्थतावच्छेदकजातौ हेत्वर्थान्वयायोगाच्च, वन्हिमानित्यादौ पुनरनुमितौ पक्षे साध्यस्य वन्हेः संयोगात्मकः सम्बन्धो भासते तथैव वन्हिव्याप्यधूमवानित्याद्युपनयसङ्गमात् शाब्दभाने तु वन्हिमतोऽभेद एवं भेदे साध्ये भिद्यते भिन्नमित्यादावपि वैलक्षण्यमिति सूक्ष्ममीक्षते, तदा यादृशपक्षसाध्यिकाः पक्षे यादृशयादृशविशि-

---

र्थतावच्छेदकेति । घटादन्य इत्यादावेकदेशेपि पञ्चम्यर्थान्वयाज्जातावित्युक्तम् । ननु पर्वतो वह्निमानित्यादिस्थलेऽनुमितौ तादात्म्येन वह्निमानेव साध्यमित्यत आह तथैवेति । वन्हौ साध्यतायामित्यर्थः । अन्यथा वन्हिमद्व्याप्यवांश्चायमित्येवोपनयः स्यादिति भावः । अभेद इति । भासत इति पूर्वेणान्वयः । तथा च वन्ह्यादिसाध्यकप्रतिज्ञाया वन्ह्यादिसाध्यकानुमित्यन्यूनविषयकज्ञानाजनकत्वात्तन्नाव्याप्तिरिति भावः । ननु साध्यपक्षभेदेन प्रतिज्ञाया भिन्नत्वाद्वन्ह्यादिसाध्यकस्थले साध्यवद्भेदबोधकत्वमेवाऽन्यूनविषकत्वं वाच्यमत आह एवमिति । तथा च भिद्यत इत्यत्र भेदाश्रयत्वप्रकारकस्य भिन्नमित्यत्र च तादात्म्येन भेदाश्रयप्रकारकस्य बोधस्य जनिकायां भेदसाध्यकप्रतिज्ञायामेकविधबोधस्योपादानेऽन्याद्दशबोधजनिकायां तस्यामव्याप्तिरिति भावः । यादृशपक्षसाध्यकेति । बहुवचनं तथाविधयावत्प्रतिज्ञालाभार्थम् । अन्यथा पृथिवीपक्षकेतरभेदसाध्यकप्रतिज्ञायास्तादृशप्रतिज्ञास्थलीयकतिपयबोधानिवर्तनीयसंशयनिवर्तकत्वेन तत्राव्याप्तिप्रसङ्गात् । एवञ्च यत्पक्षिका यत्साध्यिका यावत्यः प्रतिज्ञाः प्रकृतपक्षे यादृशयादृशबोधजनकत्वेन सम्प्रदायसिद्धा इत्युक्तावसम्भवः स्यादतो यादृशपक्षसाध्यकेति यादृशत्वेन पक्षसाध्ययोर्द्वयोरुपादानमिति ध्येयम् । पक्ष इति । प्रकृतपक्षतावच्छेदकविशिष्टधर्मिणीत्यर्थः । तेन रूपान्तरावच्छिन्ने पक्ष एव साध्यस्य यादृशो बोधस्तदनिवर्तनीयसंशयनिवर्तकत्वेपि प्रतिज्ञासु नाऽसम्भवः । वस्तुतः पक्षतावच्छेदकविशिष्ट इत्यपहायात्रापि यादृशधर्मावच्छिन्नधर्मिणीत्येव वक्तुमुचितम्, अन्यथा संयोगेन वन्ह्यवच्छिन्न एव पर्वते द्रव्यत्वस्य साध्यतायां वन्हिमत्पर्वतो द्रव्यमित्यादिप्रतिज्ञायां वन्हि-

मदभिन्न एव द्रव्यत्वबोधजनकत्वेनाऽव्याप्तेरिति ध्येयम् । तादृशानामिति । प्रकृतपक्षविशेष्यकतद्धर्मावच्छिन्नविधेयताकबोधानामित्यर्थः । तावदबोधनिवर्त्यत्वं न कस्यापि संशयस्य अत उक्तमन्यतमेनेति । अपिशब्दः सामान्याभावलाभार्थः । तेन कृतेः साध्यतायां कृतिप्रकारकबोधानिवर्त्यस्य कर्तृसंशयस्य निवर्तको यः कर्तृप्रकारको बोधस्तज्जनकत्वेपि चैत्रः कर्ता इति प्रतिज्ञायां नाव्याप्तिः । अनिवर्तकेत्यन्तेन अनतिरिक्तविषयकत्वं व्युत्पादितम् । तत्प्रयोजनञ्च हेत्वन्तभागस्य वारणमित्युक्तमेव, तावदबोधानिवर्त्यो यो वह्निर्धूमज्ञानज्ञाप्यो न वा इति संशयस्तन्निवर्तकत्वात् हेत्वन्तभागस्य । यद्यपि हेत्वन्तभागजनितस्य पर्वतो धूमज्ञानज्ञाप्यवन्हिमानित्याकारकबोधस्यापि तावदन्यतमबोधान्तर्गतत्वात् वह्निर्धूमज्ञानज्ञाप्यो न वेति संशयस्यापि तावदन्यतमबोधनिवर्त्यत्वादतिव्याप्तिस्तादवस्थ्यम्, तथापि केवलप्रतिज्ञाव्यक्तीनां यादृशयादृशशाब्दधीजनकत्वं तादृशतादृशशाब्दसामान्यं यत्र यत्र प्रतिबन्धकं तदन्यसंशयानिवर्तकत्वं विवक्षितम् । तथा च वह्निर्धूमज्ञानज्ञाप्यो न वेति संशयस्य केवलप्रतिज्ञाजन्यबोधेनाऽप्रतिबन्धान्न हेत्वन्तभागेऽतिप्रसङ्गः । इदन्तु चिन्त्यते । यद्यप्येवमपि संशयपदं व्यर्थं प्रकृतपक्षसाध्यकप्रतिज्ञाव्यक्तीनां यादृशयादृशशाब्दधीजनकत्वं तादृशतादृशशाब्दसामान्यं यत्र यत्र प्रतिबन्धकं तदन्यानिवर्तकत्वमात्रस्यैव सम्यक्त्वात् । न चैतत्कालीनं वह्निमत्तया पर्वतस्य शाब्दज्ञानं जायतामितीच्छाया अपि प्रतिज्ञाजन्यशाब्दसामान्याप्रतिबध्यत्वात्तन्निवर्तकं यदेतत्कालीनं वह्निमत्तया पर्वतस्य शाब्दज्ञानं तज्ज्ञानिकायामिदानीन्तनप्रतिज्ञायामव्याप्तिवारणार्थं संशयपदमिति वाच्यम् । ज्ञानपदेनापि उक्तेच्छामादायाव्याप्तिवारणसम्भवे संशयत्वप्रवेशस्य तथाप्यनौचित्यात् । किञ्चैतत्कालीनस्य प्रतिज्ञाजन्यतादृशशाब्दस्य निरुक्तेच्छानिवर्तकत्वेपि तदनिवर्तकस्य कालान्तरोत्पन्नस्यैव वह्निमत्तया पर्वते शाब्दस्य स्वरूपयोग्यतया इदानीन्तनप्रतिज्ञायां लक्षणसम्भवाच्चाव्याप्तिशङ्कापि, यत्र चेत्यादिना ग्रन्थकृतैवाग्रे तादृशशाब्दस्वरूपयोग्यताया निवेशनीयत्वात् । एतेन प्रतिज्ञाजन्यशाब्दमात्रस्य न समानाकारशाब्दं प्रति विरोधित्वं बुभुत्सासत्त्वे शाब्दज्ञानान्तरोत्पादेन बुभुत्साविरहविशिष्टसमानाकारशाब्दत्वेनैव शाब्दधीविरोधित्वात्, तथा च प्रतिज्ञाजन्य-

ष्टार्थबोधिकाः प्रतिज्ञाः सम्प्रदायप्रसिद्धाः तादृशानां बोधानामन्यतमेनाप्यनिवर्त्त्यस्य संशयस्यानिवर्त्तको यस्तावद्बोधानामन्यतमो बोधस्तज्जनकत्वं वक्तव्यम् । एवञ्च तादात्म्येन गवि साध्ये

शाब्दसामान्यं यत्र यत्र प्रतिबन्धकं तदन्यस्य समानाकारशाब्दस्यैव निवर्तकत्वं प्रतिज्ञाजन्यबोधस्येत्यसम्भवापत्तिरतः संशयपदमित्युपात्तम् । तत्रापि बुभुत्साकालीनशाब्दबोधस्यैव तादृशशाब्दसामान्यानिवर्तनीयबोधानिवर्तकतया तत्स्वरूपयोग्यतयैव प्रतिज्ञामात्रे लक्षणसम्भवादिति दिक् । धूमादालोकवान्पर्वतो वह्निमान् धूमादित्यादौ हेत्ववयवस्य वारणाय लक्षणोपात्तस्यान्यूनविषयकत्वदलस्य निष्कर्षमाह तावतां बोधानां चान्यतमबोधेति । वक्तव्यमिति । अन्यूनानतिरिक्तविषयकत्वदलेनेत्यादिः । अत्र कल्पे सत्यन्तस्य न्यायान्तर्गतत्वमेवार्थो न तु न्यायावयवोर्थः, तावदन्यतमबोधानिवर्त्यसंशयानिवर्तकत्वदलस्य वैयर्थ्यापत्तेः । अवयवान्तरस्य तावद्बोधान्यतमबोधजनकत्वविरहाद्विशेष्यदलेनैव वारणसम्भवात् । न च यत्रानुमित्सया पर्वतो वह्निमान् वह्नेरित्यादिकन्यायस्तत्र उपनयादिद्वारकतया निवर्तकान्तसार्थक्यम्, अनुमित्सया न्यायप्रयोगानभ्युपगमात् । अन्यथा हेतुत्वं प्रमेयवत्प्रमेयादित्यादौ हेत्ववयवातिव्याप्तेर्दुर्वारतापत्तेरिति ध्येयम् । यादृशतादृशत्वयोरनुगतयोरभावाद्विशेषतः पर्यवसन्नं लक्षणमाह एवञ्चेति । पक्षे इदन्त्वादिविशिष्टे । गवाभेदस्येति । अभेदसम्बन्धेन गोरित्यर्थः । बोधाः, विशिष्य वक्तव्या इत्यग्रेणान्वयः । तथाच तादात्म्येन गोप्रकारकेदंधर्मिकशाब्दसामान्यानिवर्तनीयसंशयानिवर्तकबोधजनकत्वे सत्यवयवाघटकप्रकृतन्यायान्तर्गतत्वं प्रकृतन्यायावयवत्वं वा तादात्म्येन गोसाध्यकेदंपक्षकप्रतिज्ञात्वं निर्वाच्यम् । इदंधर्मिकतादृशगोप्रकारकत्वपर्यवसितमन्यूनविषयकत्वं तु बोधस्य न देयं विशेषणं वैयर्थ्यात् धूमादालोकवान्पर्वतो वह्निमान् धूमादित्यादिस्थलीयनिरुक्तावेव हेतुवारणार्थं तस्य प्रवेश्यत्वात् । न चायं गौरितिप्रतिज्ञाजन्यबोधस्य तादृशशाब्दसामान्यानिवर्तनीयेदन्त्वधर्मिकैकत्वसंशयं प्रति निवर्त-

पक्षे गवाभेदस्य संयोगेन समवायेन वा वन्हौ वन्हिमदभेदस्य समवायेन पाकस्य कृतौ पाककृतिमत्त्वस्य पाककर्त्रभेदस्य विशेषणतयेतरेभ्यो भेदे इतरभेदवत्त्ववत्त्वस्येतरान्याभेदस्येतरभेदवत्त्वस्ये-

---

कत्वादव्याप्तिरिति वाच्यम् । एकत्वाविषयकप्रतिज्ञाजन्यबोधमादाय लक्षणसङ्गमादिति भावः । समवायेनेति । संयोगान्यवृत्तिनियामकसम्बन्धेनेत्यर्थः । तेन कालिकसम्बन्धेन वह्नेः साध्यत्वे कालो वह्निमानितिप्रतिज्ञाया अपि वह्निमदभेदमादायैव निर्वाच्यत्वान्न न्यूनतेति ध्येयम् । वह्नाविति । साध्य इति पूर्वेणान्वयः । एवमग्रेपि । वह्निमदभेदस्येति । तथा च पर्वतधर्मिकवह्निमत्प्रकारकशाब्दसामान्यानिवर्तनीयसंशयानिवर्तकबोधजनकत्वमन्तर्भाव्यैव संयोगादिसम्बन्धेन वह्निसाध्यकपर्वतपक्षकप्रतिज्ञात्वं निर्वाच्यम् । न च तादात्म्येन वह्निमत्साध्यकप्रतिज्ञायामतिव्याप्तिः तत्रापि पर्वतो वह्निमानित्येव प्रतिज्ञाशरीरत्वादिति वाच्यम् ।प्रकृतन्यायावयवार्थकेन मूलोक्तसत्यन्तदलेनैव तद्वारणादिति भावः।पाककृतेः साध्यतायां चैत्रः पचति चैत्रः पक्तेत्येवं प्रतिज्ञाद्वैविध्यादबोधद्वयं दर्शयति समवायेत्यादिना । कृतिमत्त्वस्येति।चैत्रः पचतीत्यत्र आख्यातार्थकृतेरेव चैत्रे प्रकारत्वात् । पाककर्त्रभेदस्येति । चैत्रः पक्तेत्यत्र कृदर्थस्य कर्तुरेव चैत्रे तादात्म्येन प्रकारत्वात् । तथा च चैत्रधर्मिको यः पाककृतिप्रकारको यश्च तादात्म्येन पक्तृप्रकारको बोधस्तदन्यतरानिवर्तनीयसंशयानिवर्तकतदन्यतरबोधजनकत्वमन्तर्भाव्य चैत्रपक्षकपाककृतिसाध्यकप्रतिज्ञात्वं वाच्यमिति भावः । अत्र चैत्रः पाककृतिमानित्येवं कृतीयस्यापि प्रतिज्ञाप्रकारस्यासम्भवादबोधद्वयोपादानमसङ्गतम् । न च तादृशवाक्यस्य साध्यतावच्छेदकीभूतपाककृतित्वेन साध्यस्यानुपस्थापकत्वान्न पाककृतिसाध्यकप्रतिज्ञात्वसम्भवः पाकपदस्य पाकसम्बन्धिनि लाक्षणिकत्वादिति वाच्यम् । तादृप्येणानुपस्थापकत्वेपि तदवच्छिन्नसाध्यकप्रतिज्ञात्वे बाधकाभावात् । अन्यथा प्रतियोगितासम्बन्धेन इतरतो भेदस्य साध्यतायामितरभिन्नेति प्रतिज्ञायाः पञ्चावयवोपदर्शनानुपपत्तेः तत्रापि इतरपदस्येतरप्रति-

तरभिन्नाभेदस्य च बोधा विशिष्य वक्तव्या इति दिक्। तावद्बोधानिवर्त्यसंशयानिवर्त्तकतावद्बोधनिवर्त्ययावत्संशयनिवर्त्तकबोध-

---

योगिके लाक्षणिकत्वादिति चिन्तनीयम् । पृथिव्यादावितरभेदस्य साध्यतायां चतुर्विधस्यैव प्रतिज्ञाजन्यबोधस्य सम्भवात्तत्रान्यतमत्वेनोपादेया इत्याह विशेषणतयेत्यादिना । इतरभेदवत्त्ववत्त्वस्येति । पृथिवी इतराद्भिद्यते इत्यत्राख्यातार्थस्य आश्रयत्वस्यैव पृथिव्यां प्रकारत्वादिति भावः । इतरान्याभेदस्येति । पृथिवी इतरान्या इत्यत्र अभेदसम्बन्धेन पृथिव्यामितरान्यस्यैव प्रकारत्वादिति भावः । इतरभेदवत्त्वस्येति । पृथिवी नेतराणीत्यत्र पृथिव्यामितरभेदस्य नञर्थस्य साक्षात्प्रकारत्वादिति भावः । इतरभिन्नाभेदस्येति । पृथिवी इतरभिन्नेति प्रतिज्ञामभिप्रेत्येदम् । न च पृथिवी इतरान्येति प्रागुक्तक्रमेणैवास्य गतार्थत्वम्, तत्रान्यत्वप्रकारेणैव भिन्नस्योपस्थानात्, इह तु भिदधात्वर्थभिदाश्रयत्वस्येव निष्ठार्थाश्रयस्यैवाश्रयत्वरूपेण पृथिव्यामभेदेन भानात्ततो वैलक्षण्यादिति भावः। कस्य चिल्लक्षणमुपन्यस्यति तावदिति । यत्पक्षकयत्साध्यकप्रतिज्ञाव्यक्तयो यादृशयादृशबोधजनकतया सम्प्रदायसिद्धास्तावद्बोधेत्यर्थः । अत्राऽनिवर्तकान्तं चरमबोधस्यं विशेषणं हेत्वन्तभागेऽतिव्याप्तिवारणार्थम् । तत्रापि पृथिवी इतरेभ्यो भिद्यते इति प्रतिज्ञाजन्यबोधस्य तावद्बोधानिवर्त्यस्वसमानाकारकानुमितिनिवर्तकत्वादतः संशयपदं प्रत्यक्षार्थकम् । धूमादालोकवान्पर्वतो वन्हिमानित्यादिस्थलीयहेतोर्वारणाय निवर्तकान्तम् । धूमादालोकवानित्यादिप्रतिज्ञाजन्यबोधनिवर्त्यस्य हेतुत्वं धूमीयं न वेत्याकारकसंशयस्य निवर्तकबोधजनकत्वं धूमादित्येवं तदीयहेत्ववयवस्यापीत्यतो यावदिति । तथा च तत्र प्रतिज्ञाजन्यबोधनिवर्त्ययावत्संशयान्तर्गतस्य साध्यसंशयस्यैवानिवर्तकत्वान्न हेतोरतिव्याप्तिरिति भावः। पृथिवी इतरेभ्यो भिद्यते इति प्रतिज्ञाजन्यबोधस्य तावद्बोधस्य प्रत्येकनिवर्तनीययावदन्तर्गतायाः पृथिवी इतरान्येत्येवमसमानाकारानुमितेः अप्रतिबन्धकत्वादव्याप्तिरतः संशयपदं पूर्ववदर्थकम् । स्वसमानाकारस्य निश्चयस्यैव विरोधित्वादितरभेदादिसाध्यकस्थले तावद्बोधनिवर्त्यो न कोपि सं-

जनकत्वं वाच्यमित्यपि कश्चित् । चैत्रः पचति घटो नेतराणीति प्रतिज्ञायां साध्ये विषयित्वानुयोगित्वयोः सम्बन्धविधयैवानुभवेशाद्यथोपदर्शितसाध्यगमकतौपयिकव्याप्तिविशिष्टहेतुमत्त्वस्य च पक्षे उपनेयत्वात् तथाचायमित्याकारः सुवच एव प्राचामुपनयः, नव्यानां पुनरनन्यगतिकतया तद्व्याप्यहेतुमांस्तद्वान् वेत्याकारः, यो-

---

शयः इत्यस्वरसात्कश्चिदित्युक्तम् । ननु यद्रूपेण साध्यत्वं तदवच्छिन्नव्याप्यवत्ताबोधकस्य उपनयस्याऽसम्भवाच्चैत्रः पचतीत्यादिप्रतिज्ञैव नास्ति तत्र मूलोक्तानुमित्यन्यूनानतिरिक्तविषयकत्वस्य व्युत्पादनं प्रागुक्तं विफलमत आह चैत्रः पचतीत्यादि । चैत्रः पचतीत्यत्र पाककृतित्वावच्छिन्नव्याप्यवत्ताबोधकपक्तृत्वव्याप्यचैत्रत्ववानयमित्याकारकोपनयसम्भवादाह घटो नेतराणीति । विषय इति । पचतीत्यत्र तिङर्थकृतौ पाकस्य विषयित्वं संसर्गस्तथा नेतराणीत्यत्र नञर्थभेदे इतरस्यानुयोगित्वं सम्बन्ध इति भावः । यथोपदर्शितेति । यद्रूपेण साध्यं प्रतिज्ञायामुपदर्शितं तदवच्छिन्नसाध्येत्यर्थः । उपनेयत्वात् उपनयेन दर्शयितुमुचितत्वात् । अन्यथा वन्हित्वेन साध्यतायां तेजोव्याप्यवत्त्वेन पक्षस्य उपनयप्रसङ्गादिति भावः । सुवच एवेति । यद्रूपेण साध्यत्वं तदवच्छिन्नव्याप्यवत्त्वस्यैव तथाशब्देन बोधयितुं शक्यत्वादिति भावः । यो यश्चैत्रः पचतीत्यादिक्रमेणोदाहरणसम्भवादुपनयपर्यन्तानुसरणम् । ननु तथापि मणिकारादीनां नव्यानां मते पाककृतिव्याप्यवांश्चायमित्युपनयस्यासङ्गतिरेव यादृशेन पाकीयकृतित्वादिना साध्यत्वं तदवच्छिन्नसाध्यव्याप्यवत्त्वस्य तेनाऽनुपस्थापनादत आह नव्यानामिति । तद्व्याप्यहेतुमानित्यतो हेतौ व्याप्यस्याऽभेद एव भासते न तु व्याप्तिमत्त्वमनुमित्युपयुक्तञ्च तदेव इत्यतः प्रकारान्तरमाह तद्वान् वेति । ननूक्तक्रमेणाप्युपनये पूर्वोपस्थापितत्वाविशेषात्पक्षादेरपि तच्छब्देन परामर्शः स्यादत आह योग्यतेति । प्रमेयं वाच्यमभिधेयत्वादित्यादिस्थले पक्षपरामर्शेऽपि योग्यतासम्भवादादिपदमुपात्तम् । तेन तात्पर्याद्ग्रहः । तदा तच्छब्देन । साध्यस्येति, प्रथमे । तद्व्याप्येति, द्वितीये । अत्र

ग्यतादिवशाच्च तदा साध्यस्य तद्व्याप्यस्य वा परामर्शः। के चित्तु वह्निमान्नवेति विप्रतिपत्तौ तदधीनसंशये च वन्हिमत्तदन्योन्याभावयोस्तादात्म्यविशेषणत्वाभ्यां कोटित्वेन जिज्ञासितत्वात्तादात्म्येन वन्हिमानेव साधयितुमुचितो न तु वन्हिः, अजिज्ञासि-

---

पाककृतिव्याप्यचैत्रत्ववांश्चायमित्याद्युपनयेपि न क्षतिः। कृतिपदेन लक्षणया साध्यतावच्छेदकीभूतपाकीयकृतित्वप्रकारेण साध्यस्योपस्थितिसम्भवादत्र लक्षणाया आवश्यकत्वात्। अन्यथा नामार्थस्य कृतेर्धात्वर्थव्याप्तौ भेदेनान्वयस्य सम्भवात् पाकपदस्य तात्पर्यग्राहकतयैवोपयोगात्। न च तथापि चैत्रत्वादित्यादिहेतौ व्याप्यस्याभेदान्वयात् तत्र व्याप्तिमत्त्वालाभः, तवापि तद्धानयमित्युपनयादनुमित्युपयुक्तस्य पक्षे हेतुमत्त्वस्याऽलाभेन तुल्यत्वात्, पक्षे हेतुमदभेदस्यैव तेन बोधनादिति चिन्त्यम्। तादात्म्येन वन्हिमतः साध्यतायामेव पर्वतो वन्हिमानित्याकारिका प्रतिज्ञा वन्हेः साध्यतायान्तु पर्वतस्तथा इत्यादिरूपैव सा तथा च यादृशेत्यादिविवक्षां विना मूलोक्तानुमित्यन्यूनानतिरिक्तविषयत्वेनैव सामञ्जस्यमित्येवं केषाञ्चिन्मतं सयुक्तिकमुपन्यस्यति के चित्त्विति। विप्रतिपत्तिवाक्यस्य निर्विषयत्वात् वह्निमदादेर्न तत्कोटित्वसम्भवः शाब्दसंशयस्यापसिद्धान्तत्वेन व्यापारानुबन्धितत्कोटित्वस्याप्यभावादाह तदधीनसंशये चेति। जिज्ञासितत्वात् तादृशसंशयाधीनजिज्ञासाविषयत्वात्। न तु वह्निरिति। साधयितुमुचित इति पूर्वेणान्वयः। न च विप्रतिपत्तिवाक्याद्वह्निमत इव वह्नेरप्युपस्थितत्वाद्वन्हिवन्हिमद्भेदकोटिकसंशयोत्पत्त्या वन्हेरपि जिज्ञासितत्वसम्भवः इति वाच्यम्। विप्रतिपत्तिवाक्यस्य यद्धर्मावच्छिन्नविधेयताकबोधजनकत्वं तदवच्छिन्नस्यैव प्रतिज्ञायामपि विधेयत्वनियमात्। अन्यथा वन्हिसामग्रीमाश्च वेति विप्रतिपत्तिवाक्यस्थलेपि वन्हेः साध्यत्वप्रसङ्गात्। अत एवावृत्तौ सैव प्रतिज्ञा इति मूले वक्ष्यते इति भावः। ननु वन्हिमतः साध्यत्वे वन्हेरुपनयप्रदर्शनविरोध इत्यतस्तदपि परित्यजन्नाह तथा चेति। प्राचीननव्ययोर्मतभेदेन प्रकारद्वयम्। अर्थान्तरादिति। वन्हिव्या-

तत्वात्, तथा च तथा चायमित्याकारो वन्हिमद्व्याप्यो धूमवांश्चायमित्याकारो वा उपनयो न तु वन्हिव्याप्यधूमवांश्चायमित्याकारोऽर्थान्तरत्वादिति प्राहुः। यत्र चान्तरा तादृशबोधो न जातस्तत्रापि तादृशाकाङ्क्षायोग्यतादिशालित्वरूपं तज्जननयोग्यत्वमक्षतम्, तल्लाभश्च जातिविशेषोपस्थापकशाब्दवाक्यशब्दयोरुपसन्दानादेवेति। अन्यूनेत्यादि । तथा चोद्देश्यानुमितिसमानविषयकलिङ्गा-

---

प्त्युपन्यासस्य वन्हिमत्सिद्धावनुपयुक्तत्वादिति भावः। प्राहुरिति। यादृशपक्षकेत्यादिविवक्षां विनापि मूलोक्तसामञ्जस्यं प्रकर्षः। ननु यत्र सभाक्षोभादिवशात्प्रतिज्ञया बोधो न जनितस्तत्राव्याप्तिरत आह यत्र चेति। तादृशाकाङ्क्षा इति। तादृशबोधानुकूलाकाङ्क्षा इत्यर्थः। योग्यतादीत्यादिना आसत्त्यादेः परिग्रहः। न चैवं ह्रदो वन्हिमानित्यादिप्रतिज्ञायामव्याप्तिः योग्यताविरहादिति वाच्यम्। सन्न्यायान्तर्गतप्रतिज्ञाया एव लक्ष्यतया तत्राऽव्याप्तेरदोषत्वादिति भावः। नन्वेवं शाब्दवाक्यपदयोर्वैयर्थ्यं योग्यताज्ञानादेस्तादृशबोधजनकत्वेपि आकाङ्क्षादिमत्त्वविरहेण वारणादत आह तल्लाभश्चेति। तथा चोक्तपदद्वयसान्निध्यादेव स्वरूपयोग्यत्वलाभान्न तयोर्व्यर्थत्वमिति भावः। ननु अन्यूनानतिरिक्तपदत्यागे उद्देश्यानुमितिविषयकशाब्दज्ञानजनकवाक्यत्वं लक्षणं भविष्यति तच्च न सम्भवति असम्भवात् प्रतिज्ञाजन्यबोधस्यानुमित्यविषयकत्वादित्यत आह उद्देश्येति। समानविषयकेति। अन्यूनानतिरिक्तपदत्यागादुद्देश्यानुमितिविषयकपदेन उद्देश्यानुमितिविषयो विषयो यस्येति व्युत्पत्त्या तत्समानविषयकत्वलाभादिति भावः। अत्र कल्पे सत्यन्तस्य अवयवाघटकन्यायान्तर्गतत्वं नार्थः तथा सति वन्हिः शुक्लभास्वरस्तेजस्त्वाद्रूपवत्त्वादित्यादौ तेजस्त्वज्ञाप्यरूपवत्त्वहेतुकन्याये तेजस्त्वादित्यन्तस्य दुर्वारतापत्तेः, किन्तु न्यायावयवत्त्वमेवेत्याशयेन प्राग्व्याख्यातस्यापि सत्यन्तस्य अर्थो न्यायावयवत्वरूपः पुनरुदितः। समानविषयकान्तस्य फलमाह व्यतिरेकिणीति। यो यो निर्वन्हिः

विषयकशाब्दज्ञानजनकन्यायावयवत्वमर्थः । व्यतिरेकिणि ह्रदो निर्धूम इत्यादौ निर्वन्हित्वहेतुके यथा ह्रदभिन्नमित्यादिदृष्टान्तवतो ह्रदावृत्तिधर्मशून्यत्वादिहेतुके वोदाहरणस्य वारणाय समानविषयकान्तं पक्षविशेष्यकार्थकम् । उपनयवारणाय लिङ्गाविषयकेति ।

स निर्धूमो यथा ह्रद इत्युदाहरणस्य लिङ्गाविषयत्वविरहादेव व्युदासाद्व्यतिरेकिणीत्युक्तम् । तथा च यो यो धूमवान् स वन्हिमान् यथा ह्रदभिन्नमित्युदाहरणस्य निर्वन्हित्वरूपलिङ्गाविषयकत्वमस्त्येवेति भावः । पक्षविषयकत्वं त्यक्त्वा पक्षविशेष्यकत्वपर्यन्तस्याग्रे विवक्षणीयस्य व्यावृत्तिमभिधातुं यथा पर्वत इत्यादिदृष्टान्तमुपेक्ष्य दृष्टान्तान्तरमाह यथा ह्रदेति । दृष्टान्तवत इति । उदाहरणस्य इत्यग्रेन्वयः । तथा च प्रतियोगिविधयैव निरुक्तोदाहरणस्यापि पक्षविषयकत्वात्पक्षविशेष्यकत्वं वाच्यमिति भावः । दृष्टान्तमनन्तर्भाव्यैव उदाहरणशरीरमिति मतेपि पक्षविशेष्यकत्वपर्यन्तप्रवेशार्थं स्थलान्तरमाह ह्रदावृत्तीत्यादि । ह्रदो निर्धूमो ह्रदावृत्तिधर्मशून्यत्वादित्यादौ यो यो धूमवान् स ह्रदावृत्तिधर्मवानित्युदाहरणस्यापि लिङ्गाविषयकस्य ह्रदात्मकपक्षविषयकत्वात्पक्षविशेष्यकत्वप्रवेशस्तद्वारणार्थमावश्यक इति भावः । पक्षविशेष्यकेति । तन्मुख्यविशेष्यकेत्यर्थः । न च वृक्षस्तत्कपिसंयोगशून्यः तत्कपिविभागरहितत्वादित्यादिस्थलीयस्य यस्तत्कपिसंयोगवान् स तत्कपिविभागवानिति व्यतिरेक्युदाहरणस्य तत्कपिसंयोगवत्त्वप्रकारेणैव पक्षीभूतवृक्षविशेष्यकज्ञानजनकत्वात्तत्रातिव्याप्तिरिति वाच्यम् । कथितसाध्यसाधनयोः केवलान्वयितया व्यतिरेकव्याप्त्यसम्भवेन उदाहरणस्यैव तादृशस्यासत्त्वात्तत्रातिव्याप्त्ययोगादिति भावः । उपनयेति । यद्यपि निगमनस्यापि पक्षविशेष्यकज्ञानजनकत्वादुपनयमात्रोक्तिरयुक्ता तस्माद्वन्हिमानित्यादौ वन्हिमत्त्वेन पर्वतस्यैव विशेष्यत्वात् । न च पक्षतावच्छेदकधर्मावच्छिन्नविशेष्यकत्वप्रवेशेनैव तद्वारणसम्भवात्तदुपनयपर्यन्तानुसरणमिति वाच्यम् । हेतुत्वं प्रमेयं ज्ञेयत्वादित्यादौ हेत्ववयवस्यापि वारणीयत्वसम्भवात् इत्थमपि न्यून-

यद्यपि प्रकृतलिङ्गाविषयत्वं पृथिवी इतरेभ्यो भिद्यते पृथिवीत्वात् गन्धवती तथा गन्धादिसादावव्यापकम्, न चात्रोपनयासम्भवः इदमा गन्धवत्त्वेन परामृष्टे हेतुभूतगन्धवत्त्वान्वयायोगादिति वाच्यम् । साध्याभावव्यापकगन्धाभावाभावत्वेनान्वयात् । अत एव व्यतिरेकिणि न च नेयं पृथिवीसादिकः प्राचां प्रयोगः । यदि

तानुद्धारात् । तथापि निगमनादौ न सर्वत्रातिव्याप्तिसम्भवः तस्माद्भिद्यते इत्यादावभावात् उपनये तु सर्वत्र पक्षधर्मिकज्ञानजनकत्वात्तन्मात्रोक्तिरिति भावः । वस्तुमात्रस्यैव लिङ्गत्वात्सामान्यतस्तद्विषयकत्वमसम्भवदुक्तिकमतः प्रकृतपदं प्रक्षिप्य शङ्कते यद्यपीति । ननु लिङ्गतावच्छेदकरूपेण यल्लिङ्गविशेषणकत्वं तद्भावो वाच्यः तथा चोक्तप्रतिज्ञायां पृथिवीत्वत्वप्रकारेण पृथिवीत्वस्याप्रवेशान्नाव्याप्तिः विशेषणत्वनिवेशाच्चोक्तस्थल एव तादात्म्येन पृथिव्याः साधनत्वेपि नाप्रसङ्ग इत्यत आह गन्धवतीत्यादि । तथा इतरभ्यो भिद्यते । अव्यापकमिति । लिङ्गतावच्छेदकीभूतं यद्गन्धत्वं तादृष्यैणैव लिङ्गस्य प्रतिज्ञायां निविष्टत्वादिति भावः । ननूक्तस्थले न्यायासम्भवात्प्रतिज्ञैव नास्तिं कुत्राव्याप्तिरित्याशङ्क्य निराचष्टे न चेति । वाच्यमित्यग्रेन्वयः । गन्धवत्त्वान्वयेति । गन्धवत्त्वप्रकारेणाभेदान्वयबोधस्यायोगादित्यर्थः । उद्देश्यतावच्छेदकविधेययोरैक्याद्दण्डवान् रक्तदण्डवानित्यादिवन्निराकाङ्क्षत्वादिति भावः । साध्याभावेति।तथा चेतरभेदाभावव्यापकीभूतस्य गन्धाभावस्याऽभाववती चेयमित्याकारकमुपनयशरीरमतो न निराकाङ्क्षत्वमिति भावः । अत एवेति । यद्रूपेण हेतुत्वं तदवच्छिन्नाभावाभावत्वप्रकारेणैव व्यतिरेक्युपनयस्य हेतुमत्त्वबोधकत्वादेवेत्यर्थः । न च नेयमिति । यद्यप्युक्तप्रयोगाद्व्याप्त्यवच्छिन्नस्य हेतोर्न पक्षधर्मताबोधः, तथापि पक्षधर्मताबोधमात्रमुपनयस्य फलं व्याप्तिबोधस्य उदाहरणादेव वृत्तत्वादतो व्याप्तिबोधार्थं न तत्र पदान्तरप्रक्षेप इति प्राचामाशयः । ननु व्याप्तस्य हेतोः पक्षसत्त्वं न वा इत्याकाङ्क्षायामभिधा-

च दण्डवान् रक्तदण्डवानित्यस्यान्वयो नानुपपन्नस्तद्विशिष्टे शुद्धतद्विशिष्टान्वयस्यैवाव्युत्पन्नत्वादित्युपेयते, तदा नानुपपत्तिगन्धोऽपि।

नीयस्योपनयस्यावश्यं हेतुतावच्छेदकावच्छिन्नहेतुमत्तया पक्षबोधकत्वम्, अन्यथा तादृशाकाङ्क्षाया अनिवृत्तेरत आह यदि चेति। शुद्धेति। विशेषणान्तरानवच्छिन्न इत्यर्थः। तदेति। प्रकृतेपि गन्धविशिष्टव्यतिरेकव्याप्तिविशिष्टगन्धवत्त्वावच्छिन्नस्यैवाऽन्वयेन व्युत्पत्त्यभङ्गादिति भावः। प्राच्यैः खलेकपोतन्यायेनैव सर्वत्रान्वयबोधस्योपगमात् तन्मते च दण्डवान् रक्तदण्डवानित्यत्रापि रक्तत्वविशिष्टदण्डत्वावच्छिन्नस्य न दण्डवत्यन्वयः किन्तु दण्डवति दण्डस्तत्र रक्तत्वं विशेष्ये विशेषणमिति न्यायेन युगपदेव भासत इत्यवश्यं तन्मते निराकाङ्क्षत्वमित्याशयेन यदि चेत्युक्तम्। पक्षाविशेषणत्वेनेति। इदमत्र चिन्त्यते। किमिदं पक्षाविशेषणत्वेन लिङ्गाविषयकत्वं न तावत्पक्षविशेषणतान्यलिङ्गविषयत्वाभावः, प्रागुक्तदोषतादवस्थ्यात्, गन्धवती इतरेभ्यो भिद्यते इति प्रतिज्ञायामपि पक्षविशेषणतान्यगन्धत्वांशे विशेष्यतारूपस्यैव गन्धात्मकहेतुविषयत्वस्य सत्त्वात् प्रकारत्वविशेष्यत्वयोरिव विशेष्यतात्वयोर्मिथो निरूप्यनिरूपकत्वाभावेन पक्षनिष्ठविषयत्वानिरूपितलिङ्गविषयत्वाभावस्यापि वक्तुमशक्यत्वात्। न च पक्षविशेषणतातिरिक्तं यद्धेतुतावच्छेदकधर्मावच्छिन्नविषयत्वं तदभावोऽर्थः प्रोक्तप्रतिज्ञायान्तु गन्धनिष्ठगन्धत्वांशे विशेष्यत्वस्य गन्धत्वानवच्छिन्नत्वान्नाव्याप्तिरिति वाच्यम्। सुरभिगन्धवती इतरेभ्यो भिद्यते गन्धादित्यादिप्रतिज्ञायामव्याप्तितादवस्थ्यात् तत्र सौरभांशे गन्धत्वावच्छिन्नस्य विशेष्यत्वस्य पक्षविशेषणतातिरिक्तगन्धत्वावच्छिन्नविषयतारूपत्वात्। नापि प्रकृतपक्षविषयत्वानन्तर्गतलिङ्गविषयत्वाभावोर्थः, तथासति प्रमेयत्वनिष्ठहेतुत्वं वाच्यं प्रमेयत्वादित्यादौ हेतावतिव्याप्तिप्रसङ्गात्। एवं दधि द्रव्यमित्यादिप्रतिज्ञायां वक्ष्यमाणाव्याप्तेरसङ्गत्यापत्तेः तत्रापि पक्षविषयत्वानन्तर्गतत्वे सति साध्यविषयत्वानन्तर्गतं यल्लिङ्गविषयत्वं तदभाववत्त्वेनाऽव्याप्त्यसम्भवात्। सा-

पक्षाविशेषणत्वेन तदविषयत्वञ्चायं वन्हिसामग्रीमान् वन्हेरित्यादौ पक्षाविशेषणत्वेन साध्याविशेषणत्वेन च तदविषयत्वं दधि द्रव्यं दध्नः प्रमेयत्वमभिधेयं प्रमेयत्वात् गोत्वाभावो न सास्नादिमान् गोत्वाभावादित्यादावव्यापकमतिव्यापकञ्चोपनयस्य । तथापि प-
'क्षतावच्छेदकविशिष्टपक्षे यत्साध्यतावच्छेदकविशिष्टसाध्यवैशिष्ट्या-

---

ध्याविशेषणत्वेन लिङ्गविषयत्वस्याप्युक्तक्रमेणैव निर्वाच्यत्वात् । अन्यथाऽयं वन्हिसामग्रीमान् वन्हेरित्यादावप्युक्तदिशैवाव्याप्तितादवस्थ्यादिति सङ्क्षेपः । वन्हेरित्यादाविति । अव्यापकमित्यग्रेऽन्वयः । पक्षेत्यादि । तथा चोक्तप्रतिज्ञाद्वये पक्षसाध्ययोर्विशेषणतयैव लिङ्गस्य विषयत्वान्नाव्याप्तिरिति भावः । दधि द्रव्यमित्यत्र प्रतिज्ञायां विशेष्यत्वेनैव लिङ्गस्य भानात् पक्षसाध्ययोरविशेषणत्वेन यल्लिङ्गविषयत्वं तदभावविरहादव्याप्तिरित्यर्थः । न चात्र समवायेन दध्नो हेतुत्वात्तदन्वयानुरोधादन्यावयविभिन्नं दध्येव प्रतिज्ञायां बोध्यते, अन्यथा भागासिद्धिप्रसङ्गात् तथा च पक्षसाध्ययोरविशेषणत्वेन लिङ्गतावच्छेदकावच्छिन्नयावल्लिङ्गविषयकत्वविवक्षयैव नाव्याप्तिरिति वाच्यम् । तादात्म्यसम्बन्धेन तत्र दध्नो हेतुतया तथाप्यप्रतीकारात् इति भावः । व्यतिरेकिपक्षकप्रतिज्ञायामव्याप्तिमुक्त्वा केवलान्वयिपक्षिकायां तामाह प्रमेयत्वमिति । न च केवलान्वयिसाध्यके विवादाभावात्प्रतिज्ञैव नास्ति कुत्राव्याप्तिरिति वाच्यम् । केवलान्वयित्वाग्रहदशायां विवादसम्भवादिति भावः । ननु नीलधूमत्वेनेव प्रमेयत्वत्वेन हेतूकृत्यापि न न्यायो व्यर्थविशेषणत्वात् विषयतात्वस्यैव व्याप्यतावच्छेदकत्वादिति कुतस्तत्रत्यप्रतिज्ञायामव्याप्तिरत आह गोत्वाभावेति । अत्र च गोत्वाभावस्य स्वरूपसम्बन्धेन स्वस्मिन्नपि सत्त्वान्न पक्षधर्मत्वहानिः । ननु पक्षसाध्ययोरविशेषणत्वेन यल्लिङ्गप्रकारकत्वं तदभावो वाच्यः तथा चोक्तप्रतिज्ञाभ्रमेपि लिङ्गस्य प्रकारत्वाभावान्नाव्याप्तिरत आह अतिव्यापकञ्चेति । सर्वत्रैवोपनये लिङ्गस्य पक्षविशेषणतयैव भानादतिव्याप्तिरित्यर्थः । न चोपनयमात्रस्यैव हेतुव्यापकत्वांशे पक्षाविशे-

वगाहित्वं तदबहिर्भावेण लिङ्गविषयत्वस्याभावो वाच्यः । वस्तुतो लिङ्गं लिङ्गत्वं तथा च प्रकृतहेतुतावच्छेदकावच्छिन्नस्य प्रकृतसाध्यतावच्छेदकावच्छिन्नगमकतौपयिकं यदव्याप्तिविषयत्वं तच्छून्य-

---

षणत्वेन लिङ्गप्रकारकत्वान्नातिव्याप्तिरिति वाच्यम् । साक्षात्परम्परासाधारणपक्षविशेषणत्वस्यैव प्रवेश्यतया व्याप्तिविशेषणतया भातस्याप्युपनये पक्षविशेषणत्वात् । अन्यथा धूमसधर्मा पर्वतो वन्हिमान् धूमादित्यादिप्रतिज्ञायामव्याप्तितादवस्थ्यात् तत्र धूमस्य पक्षे साक्षादविशेषणत्वात् साध्यवदन्यावृत्तित्वादिव्याप्तेर्लिङ्गाघटकत्वात्तद्भर्मोपनयेऽतिप्रसक्तेस्तथाप्यवारणाच्चेति भावः । तथापीत्यादि । गन्धवती इतरेभ्यो भिद्यते गन्धादित्यादौ पर्वतो वन्हिसामग्रीमान् वन्हेरित्यादौ च प्रतिज्ञायाः सङ्ग्रहार्थमवच्छेदकत्वस्योपादानम् । अत्र च यत्र गन्धवत्त्वावच्छेदेन साध्यसिद्धेरुद्देश्यतायां गन्धादिकं हेतुस्तत्रत्यप्रतिज्ञायामव्याप्तिवारणार्थं यद्रूपेण पक्षत्वं तन्निष्ठावच्छेदकत्वादेरप्यवगाहितायाः क्व चिन्निवेशो बोध्यः । निरुक्तावगाहिताबहिर्भूतं यद्विषयित्वं तदभावस्योक्तौ प्रागुक्तस्य पक्षविशेष्यकत्वदलस्य वैयर्थ्यादत उक्तं लिङ्गविषयत्वस्येति । अखण्डाभावघटकतया च लिङ्गपदस्य न वैयर्थ्यमिति भावः । अत्रापि यत्पक्षसाध्यकप्रतिज्ञाव्यक्तीनां यादृशयादृशविषयिताकबोधजनकत्वं साम्प्रदायिकं तादृशविषयिताबहिर्भूतलिङ्गविषयित्वाभावः फलितार्थो ग्राह्यः । तेन गन्धवती इतरेभ्यो भिद्यते गन्धादित्यादौ प्रतिज्ञायाः पक्षे साध्यवैशिष्ट्यावगाहिज्ञानाजनकतया तादृशविषयिताबहिर्भूतलिङ्गविषयिताकत्वस्य तत्र सत्त्वेपि नाव्याप्तिरिति ध्येयम् । ननूक्तविषयिताबहिर्भावो न तद्भिन्नत्वं तादृशी विषयितामादायैवोक्ताव्याप्तितादवस्थ्यात्, अत एव न तद्विषयित्वाव्यापकत्वमपि तदबहिर्भावः, प्रतिज्ञाभेदेन स्वरूपसम्बन्धात्मनो लिङ्गविषयित्वस्य भेदादुक्तदोषतादवस्थ्यात् अत आह वस्तुत इति । ननु लिङ्गत्वं व्याप्यत्वं तथा च व्याप्यवान्पर्वतो वन्हिमान् धूमादित्यत्र प्रतिज्ञायामव्याप्तिरत आह तथा चेति । तच्चेति । तादृशव्याप्तिविषयकत्वज्ञेत्यर्थः । हेतुभूतेति । हेतुभूतो योऽभावस्तत्प्रतियोगितावच्छेदकं

त्वमर्थः । तच्च हेतौ साध्यव्याप्यतावगाहित्वं हेतुभूताभावप्रतियोगितावच्छेदकावच्छिन्ने साध्याभावव्यापकतावगाहित्वञ्च । द्रव्यत्वव्याप्यसंयोगवदवृत्तिधर्मवानयं द्रव्यत्ववान् गुणात् गुणव्याप्यरूपवानयं स्पर्शवान् रूपादित्यादौ प्रतिज्ञासंग्रहायाऽवच्छेदकद्वयोपादानम् । अन्यूनानतिरिक्तपदमिति च मूलमुद्देश्यानुमित्यन्यूनानतिरिक्तविषयभागपरम् । हेतुत्वमभिधेयं मेयत्वादित्यादौ पञ्च-

---

यद्धेत्वभावत्वं तदवच्छिन्नेत्यर्थः । हेतौ साध्याभावव्यापकीभूताभावप्रतियोगित्वावगाहित्वमित्युक्तौ ह्रदो निर्धूमो निर्वन्हित्वादित्यादौ यो यो निर्धूमत्वाभाववान् स वन्हिमानिति व्यतिरेक्युदाहरणेऽतिव्याप्तिः तस्य निरुक्तव्याप्त्यविषयत्वादतो वक्रोक्तिः । तेन तत्रापि हेतुभूतं यन्निर्वन्हित्वं तत्प्रतियोगितावच्छेदकीभूतवन्हित्वावच्छिन्ने साध्याभावव्यापकत्वावगाहित्वान्नातिव्याप्तिः । इदमुपलक्षणम् । साध्याभावोपि साध्यीभूताभावप्रतियोगितावच्छेदकावच्छिन्नत्वेनोपादेयः, तेन धूमाभावाभावत्वेन साध्याभावाप्रवेशेपि नोक्तस्थलीयोदाहरणेऽतिप्रसङ्गः । वस्तुतो यावत्यो व्याप्तिविषयिताः प्रकृतसाध्यहेतुकानुमित्योपयिकाः प्रत्येकं तत्तद्विषयित्वाभावकूटवत्त्वमेव प्रवेश्यम् । तेन नानाविधानां व्याप्तिविषयितानामनुगतधर्माभावेपि नोपनयाद्यतिव्याप्तिरिति ध्येयम् । प्रकृतहेतुतावच्छेदकेत्यस्य फलमाह द्रव्यत्वव्याप्येति । अत्र हेतुतावच्छेदकीभूतं यद्गुणत्वं तदवच्छिन्ने द्रव्यत्वव्याप्त्यभावान्नाव्याप्तिरिति भावः । द्रव्यत्वव्याप्यसंयोगवानयमित्युक्तौ विवादात् संशयाद्यसम्भवात्संयोगवदवृत्तीत्युक्तम् । प्रकृतसाध्यतावच्छेदकेत्यस्य फलमाह गुणव्याप्येति । तथा चात्र स्पर्शत्वावच्छिन्ने यत्प्रकृतसाध्यं तद्व्याप्त्यलाभान्नाव्याप्तिरिति भावः । नन्वेवं निरुक्तव्याप्तिविषयिताशून्यत्वदलेनैव व्यतिरेक्युदाहरणस्यापि वारणसम्भवात्पक्षविशेष्यकार्थकं समानविषयकान्तदलं व्यर्थमतस्तत्परित्यागे मूलस्य तात्पर्यमाह अन्यूनेति । ननु तद्दलत्यागे धूमादिहेत्ववयवेऽतिव्याप्तिरत आह हेतुत्वमिति । वारणायेति । तत्र हेत्ववयवस्य पक्षविशेष्यकत्वात्समानविषयकत्वदलेन

म्यर्थपक्षकहेतुवारणाय पञ्चम्यन्तान्यत्वस्य हेत्वन्यत्वस्य वावश्यं वाच्यत्वात् । संख्यातिरिक्तसुबर्थस्य प्रातिपदिकार्थे विशेष्यत्वेनैवान्वयात् प्रातिपदिकार्थयोः क्रियाप्रातिपदिकार्थयोश्च भेदेन साक्षा-

---

तद्वारणायोगादिति भावः । ननु पञ्चम्याऽन्यत्वोक्तौ वन्हिरन्यो धूमादित्यादिप्रतिज्ञायामव्याप्तिरत आह हेत्वन्यत्वस्य वेति । ननु हेतुत्वपक्षकस्य प्रमेयत्वादित्यादिहेतौ पक्षविशेष्यकज्ञानजनकत्वे सत्येव हेत्वन्यत्वविशेषणं वाच्यं तत्रैव किं मानमतस्तत्र प्रमाणमाह सङ्ख्येत्यादि । विभक्त्यर्थस्य संसर्गविधयैव भानसम्भवादित्यत आह सङ्ख्यातिरिक्तेति । तथा चोक्तनियमबलादेव प्रकृतहेतोः पक्षविशेष्यकज्ञानजनकत्वमावश्यकमिति भावः । यत्तु ननु सुबर्थमात्रस्य प्रकृत्यर्थविशेषणतयैव भानात्प्रमेयत्वादित्यादिहेतुवाक्येन प्रमेयत्वं हेतुतावदित्येव बोधजननात्पक्षविशेष्यकत्वदलेनैव तद्वारणं सम्भवत्यतः सङ्ख्यातिरिक्तेत्यादीति । तत्तुच्छम् । तादृशशङ्क्या ग्रन्थावतारणे पर्वतो वन्हिमान् पर्वतादित्यादौ हेत्ववयवे तथाप्यतिव्याप्तितादवस्थ्यात् तस्याप्युक्तक्रमेणाशङ्क्या पक्षविशेष्यकज्ञानजनकत्वसम्भवादिति ध्येयम् । सुबर्थसङ्ख्यायाः प्रकृत्यर्थविशेषणतयैवान्वयात् तत्र व्यभिचारवारणार्थमतिरिक्तान्तम् । जानातीत्यादौ तिङर्थवर्तमानत्वस्य यजेतेत्यादौ च तिङर्थकार्यत्वादेः प्रकृत्यर्थविशेषणतयैव भानाद्विभक्त्यर्थत्यपहाय सुबर्थेत्युक्तम् । ननु चैत्र गच्छेत्यादौ सुबर्थस्य सम्बोध्यत्वादेः प्रकृतत्यर्थचैत्रादौ विशेषणत्वेनैव भानादुक्तनियमो व्यभिचारीत्यत आह प्रातिपदिकेति । भेदेन तादात्म्यान्यसम्बन्धेन । वक्ष्यमाणत्वादिति । अन्यथा घटो रूपमोदनः पचतीत्यतोपि घटीयत्वेन रूपस्य ओदनीयत्वेन पाकस्य बोधापत्तेः, तथा च हेतुत्वमभिधेयं भिद्यते वा प्रमेयत्वादित्यादौ हेतुत्वसम्बधेन प्रमेयत्वस्य नामोपस्थाप्याभिधेयत्वे धातूपस्थाप्यभेदे वा अन्वयासम्भवादवश्यं हेत्ववयवस्य हेतुतारूपपक्षविशेष्यकान्वयबोधजनकत्वमिति भावः । ननु कर्मत्वादिरूपभेदसंसर्गेण नामार्थस्यान्वयबोधे नाम्नः कर्मत्वाद्यर्थकविभक्त्यन्तस्य तन्त्रत्वादेवोक्तातिप्र-

दन्वयस्याव्युत्पत्तेर्वक्ष्यमाणत्वात् । चैत्रस्येदं न मैत्रस्य मैत्रस्येदं न चैत्रस्य द्वयोरिदं नेदमेकस्यापीत्यादौ चैत्रादिसम्बन्धाभावबोध-

---

सङ्गस्य वारणसम्भवात् पञ्चम्यर्थहेतुत्वादिविशिष्टस्य प्रमेयत्वादेर्हेतुत्वादिसम्बन्धेनैवाऽभिधेयत्वादावन्वये बाधकाभाव इत्यत आह चैत्रस्येत्यादि । तथा च चैत्रस्येदं मैत्रस्वत्वाभाववदित्यन्वयबोधे विभक्त्यर्थस्य स्वत्वादेर्नामार्थविशेष्यतया भानमावश्यकं, न हि स्वत्वान्वितस्य मैत्रस्यैव स्वत्वसम्बन्धेनाभावस्तत्र धनादौ प्रतीयते, स्वत्वादेर्वृत्त्यनियामकतया तत्सम्बन्धावच्छिन्नप्रतियोगिताकाभावस्याऽसम्भवात् । न वा स्वत्वविशिष्टमैत्रस्य संयोगादिसम्बन्धेनैवाभावस्तत्र भासते, नेदं चैत्रस्येत्यपि प्रसङ्गात् चैत्रस्वामिकेपि धने संयोगादिसम्बन्धेन चैत्रस्याभावसत्त्वात् एतदर्थमेव चैत्रस्येत्यभिधानादिति भावः । ननु नञा चैत्रात्यन्ताभावस्य बोधने चैत्रात्मकनाम्नः प्रथमान्तत्वं तन्त्रमतः संयोगादिना चैत्रात्यन्ताभावस्य चैत्रीयधने सत्त्वेपि नेदं चैत्रस्येति न प्रयोग इत्यत आह मैत्रस्येदं न चैत्रस्येति । तथा चोक्तस्थल एव चैत्रात्यन्ताभावबोधस्वीकारे प्रथमान्तताव्युत्पत्तौ व्यभिचार इत्यवश्यं चैत्रादिस्वत्वाभाव एव बोधनीयः, अन्यथा उक्तक्रमेणाऽतिप्रसङ्गादिति भावः । ननु नेदं चैत्रस्येत्यादिषष्ठ्या प्रतियोगित्वस्य नञा च भिन्नस्याभिधानान्मैत्रादिधने स्वत्वसम्बन्धेन चैत्रान्यत्ववत्त्वमेव प्रतीयेत इति यदि ब्रूयात्तदाह द्वयोरिदमिति । नेदं चैत्रस्येत्यनुषञ्जनीयम् । तथा चोक्तक्रमेण चैत्रमैत्रयोरिदं न चैत्रस्येति वाक्यस्यापि योग्यतापत्तिः उभयस्वामिकस्य सुतरां चैत्रभिन्नस्वामिकत्वादतस्तदयोग्यत्वार्थं चैत्रस्वत्वाभावबोधने विभक्त्यर्थविशेष्यकत्वमावश्यकमिति भावः । उक्तक्रमेण शाब्दबुद्ध्युपगमे अयोग्यस्य वाक्यस्य योग्यतापत्तिं बाधिकामुक्त्वा योग्यस्यापि वाक्यस्याऽयोग्यतापत्तिं बाधिकामाह नेदमेकस्यापीति । अत्रैकपदं प्राणिसामान्यपरम् । तथा च प्राणिभिन्नस्य स्वत्वसम्बन्धेन धनादौ असत्त्वान्नेदमेकस्यापीति वाक्यमयोग्यं स्यादतस्तद्योग्यत्वार्थं प्राणिस्वत्वाभावबोधने विभक्त्यर्थविशेष्यकत्वमावश्यकमिति भावः । नन्वेतावता षष्ठ्यर्थस्य प्रकृत्यर्थविशेष्यतया भानसिद्धावपि पञ्चम्य-

स्य विना विभक्त्यर्थविशेष्यतामनुपपत्तेः चैत्रो न पचतीत्यादौ तिङर्थस्येव विनाप्यनुयोगिनि सप्तम्यां सुबर्थस्याप्यभावान्वयात् । हेतुविषयकज्ञानजनकत्वव्याप्यावयवतावच्छेदकरूपशून्यत्वे सत्युदाहरणान्यन्यायावयवत्वं तत्त्वम्, तादृशञ्चावच्छेदकं हेतुत्वादिक-

---

र्थहेतुत्वस्य तथात्वं नायातमत आह इत्यादाविति । तथा च पर्वतो वन्हिमान् धूमान्न तु जलादित्यादौ वन्ह्यादेर्जलादिज्ञाप्यत्वाभावबोधानुरोधादेव तथात्वमिति भावः । मैत्रादिसम्बन्धाभावबोधस्येति, पाठः तस्यैव प्रागुक्तत्वात्, चैत्रादिसम्बन्धाभावेति पाठे तु चैत्रादिसम्बन्धस्य सान्निध्यात्तदभावस्य च बोधो ग्राह्यः । वस्तुतः चैत्रस्येदं न किन्तु मैत्रस्येति योजनया चैत्रादिसम्बन्धाभावस्यैव बोधः प्रक्रान्त इति नानुपपत्तिलेशोपि । ननु नेदं चैत्रस्येत्यादौ स्वत्वान्वितस्य चैत्रस्यैव स्वत्वसम्बन्धेनाभावो नञा बोध्यते वृत्त्यनियामकसम्बन्धस्य प्रतियोगितानवच्छेदकत्वप्रवादस्य निर्युक्तत्वादित्यतः स्वत्वस्येव चैत्रस्यात्यन्ताभावो बोधयितुमशक्य इत्याह चैत्रो न पचतीत्यादि । तथा च विभक्त्यर्थात्यन्ताभावबोधने नञा सप्तम्यनपेक्षणात् अस्माकं मते, चैत्रस्वत्वात्यन्ताभावस्य बोधो न दुर्घटः, प्रातिपदिकार्थस्य तु चैत्रादेः स्वत्वादिसम्बन्धेन धनादावभावस्य बोधो न सम्भवति नामार्थस्यात्यन्ताभावबोधने नञा सप्तम्यपेक्षणात्, अन्यथा घटः पटो नेत्यादावपि पटादेरत्यन्ताभावप्रतीतिप्रसङ्गादिति निगर्वः । हेतुविषयकेत्यादि । हेतुविषयकज्ञानजनकत्वव्याप्यं यदवयवतावच्छेदकं हेतुत्वोपनयत्वादि तच्छून्यत्वे सतीत्यर्थः । हेतुविषयकज्ञानजनकत्वस्य समानाधिकरणं प्रतिज्ञात्वमादायाऽसम्भवः स्यादतो व्याप्यपदम् । हेतुविषयकज्ञानजनकत्वव्याप्यं तत्तत्प्रतिज्ञाव्यक्तित्वमादायाव्याप्तेर्वारणाय अवयवतावच्छेदकेति । उदाहरणत्वस्य हेतुविषयकज्ञानजनकत्वनियतत्वात्तमादायोदाहरणेऽतिव्याप्तिरत उक्तमुदाहरणान्येति । उदासीनव्युदासाय न्यायावयवेति । अत्र हेतुविषयकत्वमवश्यं प्रकृतहेतुविषयकत्वं वाच्यम्, अन्यथा वस्तुमात्रस्यैव हेतुत्वसम्भवात्प्रतिज्ञायाम-

हाय लिङ्गाविषयकत्वं वा ज्ञानविशेषणम् । तेनोदाहरणादिव्युदासः । निगमनञ्च न परामर्शहेतुः, अबाधितासत्प्रतिपक्षत्वज्ञानजनकत्वात् । हेत्वभिधानप्रयोजकजिज्ञासाजनकवाक्यत्वं वा । लिङ्गाविषयकलिङ्गिविषयकज्ञानजनकन्यायावयववाक्यत्वं वा, इतरावयवानां लिङ्गविषयकज्ञानजनकत्वात् । प्रतिज्ञात्वं जातिः अनुग-

---

मिति के चित् । हेत्वभिधानेति । जिज्ञासाजनकत्वं तद्योग्यता । वाक्यत्वं न्यायावयवत्वम् । लिङ्गेत्यादि । लिङ्गाविषयेति पूर्वोपदर्शितार्थकम् । अभावहेतुकव्यतिरेक्युदाहरणवारणाय लिङ्गीति ।

सम्भवापत्तेः तथा च सर्वसाधारणस्योपनयत्वादेरपि धूमादिप्रकृतहेतुविषयकज्ञानजनकत्वनियतत्वात्तद्व्यतिव्याप्तिः । यदि च सर्वसाधारणमुपनयत्वादिकं नास्त्येवाऽवयवविभाजकं परन्तु तत्तत्साध्यत्वादिघटितं तत्तथेति विभाव्यते, तदा प्रतिज्ञात्वमपि तत्तद्धेतुकतत्तत्साध्यकत्वादिनैव निर्वाच्यं तथा च यत्साध्यहेतुकप्रतिज्ञायां हेतुविषयकत्वनैयत्यं तत्राव्याप्तिरित्यस्वरसः के चिदित्युक्त्वा सूचितः । जिज्ञासानुपधायकप्रतिज्ञायामव्याप्तिरत आह तद्योग्यतेति । योग्यता चात्र प्रकृतहेत्वावयवप्राग्वर्तित्वरूपा ग्राह्या । ननु प्रतिज्ञैकदेशादेरपि तादृशवाक्यत्वात्तत्रातिव्याप्तिरत आह न्यायावयवत्वमिति । प्रकृतेत्यादिः । गन्धवती भिद्यते गन्धादित्यादिस्थलीयप्रतिज्ञायामव्याप्तिमाशङ्क्याह पूर्वोपदर्शितेति । प्रकृतपक्षे प्रकृतसाध्यवैशिष्ट्यविषयताबहिर्भावेण यल्लिङ्गविषयत्वं तदभावार्थकमित्यर्थः । तेन चोपनयादेर्व्युदासः । भावहेतुकोदाहरणस्य लिङ्गाविषयकत्वदलेनैव वारणसम्भवादाह अभावहेतुक इति । तथा च ह्रदो निर्धूमो निर्व-

तानतिप्रसक्तेतान्त्रिकव्यवहारादिति के चित्। तन्न। देवदत्तप्रभवत्वादिना जातिसङ्करप्रसङ्गात्। प्रतिज्ञाजन्यं विजातीयं ज्ञानं व्यवहारादिति तज्जनकं वाक्यं प्रतिज्ञेत्यपि न, तज्जनकत्वं जनकत्वज्ञानं वा नानुगतरूपमन्तरेण सम्भवतीत्युक्तस्याऽनुसरणीयत्वात्। एतेन शब्दोऽनित्य इति लिङ्गिधीपरवाक्यजन्यज्ञानवृत्तिकृतकत्वादित्यादिवाक्यजन्यज्ञानावृत्तिजातियोगिज्ञानजनक-

---

लिङ्गि साध्यम्। तद्विषयकं तद्वद्विशेष्यकम्। तेनेदं जलं निःस्नेहत्वप्रकारकप्रमाविषयत्वशून्यत्वात् इदं द्रव्यं जलान्यत्वप्रकारकप्रमाविष-

---

न्हित्वादित्यादिस्थलीयस्य यो यो धूमवान् स वन्हिमानित्युदाहरणस्य वारणायेत्यर्थः। लिङ्गिपदस्य पक्षपरत्वे पूर्वस्मादभेदापत्तिरतो व्याचष्टे लिङ्गि साध्यमिति। यद्यपि लिङ्गिविषयकं लिङ्गवद्विशेष्यकमित्येव व्याख्यातुमुचितं तावतैवाग्रिमदोषव्युदासात्, तथाप्यग्रिमव्याख्यायां लिङ्गिपदस्य साध्यपरत्वार्थं ग्रन्थगौरवापत्तिभियैवात्र लिङ्गि साध्यमित्युक्तमिति ध्येयम्। तेनेति। साध्यवन्मुख्यविशेष्यकत्वपर्यन्तविवक्षणनेत्यर्थः। अन्यथा इदं जलमित्यादिस्थलीयस्य यन्न जलं तन्निःस्नेहत्वप्रकारकप्रमाविषय इत्युदाहरणस्यापि जलत्वं साध्यं जलात्मकञ्च साध्यवन्तमवगाहमानत्वात्तत्रातिप्रसङ्गापत्तेरिति भावः। स्नेहवत्त्वप्रकारकप्रमाविषयत्वस्य हेतुतायामुदाहरणस्य लिङ्गाविषयकत्वदलेनैव वारणसम्भवान्निःस्नेहत्वप्रकारकप्रमाविषयत्वाभावो हेतुरुक्तः। शीतस्पर्शादिसमवायिकारणतावच्छेदकीभूतजलत्वजातेर्द्व्यणुकपर्यन्तस्थायित्वमते जलारम्भकपरमाणावुक्तहेतोः साध्यव्यभिचारादाह इदं द्रव्यमिति। यत्तु निःस्नेहत्वप्रकारकप्रमाविषयत्वाभावो जलत्वमेव स्नेहानामनन्तत्वेन तथात्वा-

वाक्यं प्रतिज्ञेति निरस्तम् । ननु प्रतिज्ञा न साधनाङ्गं विप्रतिपत्तेः पक्षपरिग्रहे तत्र प्रमाणाकाङ्क्षायां हेत्वभिधानस्य प्राथम्यादिति चेन्न । विप्रतिपत्त्यग्रे समयबन्धानन्तरं शब्दानित्यत्वं साधयेति मध्यस्थस्यं वादिनो वाऽऽकाङ्क्षायां शब्दानित्यत्वं साध्यं, न च साध्यनिर्देशं विना हेतुवाक्यं निष्प्रतियोगिकमन्वयं बोधयितुमीष्टे ।

यत्वशून्यत्वादित्यादौ यन्न जलं तन्निःस्नेहत्वप्रकारकप्रमाविषय इत्याद्युदाहरणे नातिप्रसङ्गः । लिङ्गविषयेऽस्य पूर्वोक्तव्याप्यत्वा-

---

योगात् तथा च यन्न जलमित्युदाहरणस्य जलत्वरूपलिङ्गविषयकत्वादेव नातिप्रसङ्गः अतः स्थलान्तरमाह इदं द्रव्यमितीति । तन्न । निःस्नेहत्वप्रकारकप्रमाविषयत्वाभावस्याऽतिरिक्तत्वात् । अन्यथा तुल्यन्यायेन जलान्यत्वप्रकारकप्रमाविषयत्वाभावस्यापि जलत्वस्वरूपत्वे यन्न द्रव्यं तज्जलान्यत्वप्रकारकप्रमाविषय इत्युदाहरणस्यापि जलत्वस्वरूपलिङ्गविषयकत्वेनैव वारणसम्भवादिति ध्येयम् । जन्यजलस्य पक्षत्वे निःस्नेहत्वप्रकारकप्रमाविषयत्वशून्यत्वं स्वरूपासिद्धम् उत्पत्तिकालावच्छेदेन निःस्नेहत्वस्य तत्र सत्त्वादतो हेत्वन्तरमाह जलान्यत्वेति । तथा चोक्तस्थलीयस्य यन्न द्रव्यं तज्जलान्यत्वप्रकारकप्रमाविषय इत्युदाहरणस्य द्रव्यत्वरूपसाध्यविषयकत्वेपि तद्धर्म्मुख्यविशेष्यकत्वाभावान्नातिव्याप्तिरिति भावः । ननु विषयत्वं प्रमेयत्वज्ञानजन्यज्ञानीयं प्रमेयत्वादित्यादिस्थलीयहेतावतिव्याप्तिः, तादृशानुपूर्व्याः सम्प्रदायविरोधेन न्यायाघटकतया कथञ्चिद्धारणे ह्रदो निर्द्धूमो निर्वह्नित्वादित्यादिस्थलीये यत्र धूमस्तत्र वन्हिरिति व्यतिरेक्युदाहरणेतिव्याप्तिः तस्य साध्यवन्मुख्यविशेष्यकत्वात् यत्र धूमस्तत्र वन्हिरि-

न च वादिवाक्येऽनुपस्थितमपि योग्यतया अन्वेति, अतिप्रसङ्गात्। न च विप्रतिपत्तितः साध्योपस्थितिः, तस्याः प्रतिवादिविप्रतिपत्त्या प्रमाणादिव्यवस्थया चान्तरितत्वात् परविप्रतिपत्तिं समयबन्धञ्च विना स्थापनाया अभावात् विप्रतिपत्तिवाक्यस्य पक्षपरिग्रहेण पर्यवसिततया निराकाङ्क्षत्वाच्च। आवृत्तौ तु सैव प्रतिज्ञा। न चावयवान्तराद्धेत्वन्वययोग्या साध्योपस्थितिः। ना-

---

विषयार्थकत्वे हेतुवारणाय लिङ्गीति। लिङ्गिविषयत्वञ्च प्रकृतहेतुतावच्छेदकावच्छिन्नहेतुविशिष्टहेतुत्वविषयतावहिर्भावेण वाच्यमतेन वह्निमान् वन्हिसामग्रीमत्त्वात् अयं हेतुरिदं वा हेतुत्वं तत्त्वेन प्रतीयमा-

---

त्याकारकस्यैवोदाहरणस्य मिश्रैर्व्यवस्थापितत्वादित्यतः प्रकारान्तरमाह लिङ्गाविषयेत्यस्येत्यादि। पूर्वोक्तेति। प्रकृतहेतुकप्रकृतसाध्यसिद्ध्यैपयिकेत्यर्थः। ननु साध्यवद्विशेष्यकत्वरूपस्य प्रागुक्तलिङ्गिविषयत्वस्य निवेशे घटः प्रमेयो द्रव्यत्वादित्यादौ हेतावतिव्याप्तिः पक्षस्यर्थस्यापि प्रमेयत्वेन साध्यवत्त्वादतः साध्यतावच्छेदकरूपेण साध्यविषयकत्वरूपं तद्वाच्यं तच्च वन्हिमान् वन्हिसामग्रीमत्त्वादित्यादिहेतावतिप्रसक्तमत आह लिङ्गिविषयत्वञ्चेति। प्रकृतेत्यादि। प्रकृतहेतुतावच्छेदकावच्छिन्नप्रकारकतानिरूपितहेतुत्वत्वावच्छिन्नविशेष्यकत्वस्य बहिर्भूतमव्यापकं यत्साध्यविषयत्वं तादृशविशेष्यताबहिर्भूतविषयताकत्वमिति यावत्, साध्यप्रवेशे वैयर्थ्यादिति ध्येयम्। हेतुतावच्छेदकावच्छिन्नेत्यस्य फलमाह वन्हिमानित्यादि। वन्हिसामग्रीमत्त्वादित्यत्र हेतुप्रकारकहेतुत्वत्वावच्छिन्नविशेष्यत्वाव्यापकसाध्यविषयिताकत्वेपि हेतुतावच्छेदकावच्छिन्नप्रकारित्वा-

प्यवयवान्तरेणाऽऽक्षेपात्, साध्यान्वये तदभिधानं तदभिधाने च साध्यान्वय इत्यन्योन्याश्रयात् । तस्मात् प्रतीत्यनुपपत्त्या प्रतीतानुपपत्त्या वा नेहाक्षेपः । अन्ये तु शब्दानित्यत्वे प्रमाणं वदेति यदि मध्यस्थस्यानुयोगः तथापि प्रमाणमात्रे नाकाङ्क्षा किन्तु विशिष्टे, विशिष्टन्तु विशेषणं साध्यमनभिधाय न शक्याभिधानम् । न च

नत्वादित्यादौ हेतौ नातिप्रसङ्गः । लिङ्गविषयकज्ञानजनकत्वानिय-

व्यापकसाध्यविषयिताकत्वविरहान्नातिव्याप्तिरिति भावः । हेतुत्वस्वावच्छिन्नविशेष्यताप्रवेशस्य फलमाह अयं हेतुरिति । अयं हेतुत्ववान् हेतुत्वेन प्रमीयमाणत्वादित्यादौ हेत्ववयवस्य पक्षस्यैर्थविधेयहेतुतावच्छेदकावच्छिन्नप्रकारित्वाव्यापकसाध्यविषयितावत्त्वेपि तादृशविषयित्वस्य हेतुत्वत्वावच्छिन्नविशेष्यत्वाव्यापकत्वविरहान्नातिव्याप्तिरिति भावः । ननु पक्षांशे साध्यावगाहित्वविवक्षयैव उक्तहेतोर्वारणसम्भवान्निरुक्तविषयिताबहिर्भावेण साध्यविषयितापर्यन्तानुधावनमफलमत आह इदं वेति । तथा चेदं हेतुत्वं हेतुतात्वेन प्रमीयमाणत्वादित्यादौ हेतुत्वत्वसाध्यकस्य हेत्ववयवस्य पक्षीभूतहेतुत्वांशे पक्षस्यर्थतावच्छेदकीभूतहेतुतात्वरूपसाध्यावगाहित्वात्तत्राऽतिव्याप्तिरेव स्यात् यदि नोक्तविवक्षा स्यादिति भावः । नन्वेवमपि यत्रायं वन्हिमानित्यादौ विषयितासम्बन्धेन बुद्ध्यवच्छिन्नस्यैव समवायेन हेतुत्वं तत्र बुद्धिमत इत्यादौ हेत्वयवेऽतिव्याप्तिः तस्य मतुवर्थबुद्धिसम्बन्धित्वप्रकारेणैव हेतुत्वावगाहितया हेतुतावच्छेदकधर्मावच्छिन्नप्रकारतानिरूपितहेतुत्वविशेष्यताबहिर्भावेणैव साध्यावगाहित्वात्, तथाऽयमेको धूमादित्यत्रापि हेतावतिव्याप्तिः तस्या निरुक्तविषयिताबहिर्भावेण प्रकृत्यर्थधूमे एकत्वरूपसाध्यावगाहित्वादिति चेन्न । यत्साध्यकहेत्ववयवानां यादृशयादृशविष-

वस्तुतो यत्साध्यं तत्र प्रमाणं वदेति मध्यस्थनियोगः, वादिद्वयमध्ये तदसम्भवात्। तस्मात्साध्याभिधानं विना न हेतोराकाङ्क्षा न वान्वयबोधकत्वमिति प्रतिज्ञा साधनाङ्गमिति॥

तावयवतावच्छेदकरूपवत्त्वं तत्त्वमिश्रादिकं तादृशावच्छेदकरूपान्तरापरिचये दुर्ग्रहत्वादनुपादेयम्॥

यिताकबोधजनकत्वं सम्प्रदायसिद्धं तादृशतादृशविषयिताबहिर्भावेण साध्यावगाहित्वस्य विवक्षितत्वादुक्तहेतूनामतथात्वादिति भावः। लिङ्गेत्यादि। उपनयादिवारणार्थमनियतान्तं प्रकृतहेतुविषयकज्ञानजनकत्वाव्याप्यार्थकम्। प्रतिज्ञात्वस्यापि क्वचिल्लिङ्गज्ञानजनकत्वसमानाधिकरणत्वादनियतत्वानुसरणम्। अप्रसिद्धहेतुकोदाहरणस्थले लिङ्गज्ञानजनकत्वानियतस्योदाहरणत्वस्य वारणाय लिङ्गविषयकेत्यादि। प्रकृतसाध्यविषयकज्ञानविषयकत्वनियतेति तदर्थः। इदं जलं निःस्नेहत्वाभावादित्यादौ यन्न जलं तन्निःस्नेहत्ववदित्याद्युदाहरणे तत्तदुदाहरणत्वमादायातिप्रसङ्गवारणार्थमवयवतावच्छेदकेत्युक्तम्। दुर्ग्रहत्वादित्याद्युपलक्षणम्। यत्साध्यकप्रतिज्ञायां लिङ्गविषयकत्वनियमस्तत्र प्रागुक्तरीत्या अव्याप्तेश्चेत्यपि द्रष्टव्यम्॥

इति जागदीश्या अवयवग्रन्थे प्रतिज्ञालक्षणम्।

साध्यनिर्देशानन्तरं कुत इत्याकाङ्क्षायां साधनता-व्यञ्जकविभक्तिमल्लिङ्गवचनमेवोचितम्, अन्यथाऽनाकाङ्क्षाभिधाने निग्रहापत्तेः, लोके तथैवाकाङ्क्षानिवृत्तिरिति व्युत्पत्तेरिति प्रतिज्ञानन्तरं हेतूपन्यासः। हेतुत्वञ्चानुमितिकारणीभूतलिङ्गपरामर्शप्रयोजकशाब्दज्ञानजनकसाध्याविषयकशाब्दधीजनकहेतुविभक्तिमच्छब्दत्वम्,

---

अनुमितीत्यादि । जनकान्तं न्यायावयवार्थकं निगमनवारणाय । साध्याविषयेत्यादि । साध्याविषयत्वञ्च प्रकृतहेतुतावच्छेदकावच्छिन्नहेतुविशिष्टहेतुत्वविषयताबहिर्भावेण पूर्वोपदर्शितसाक्षात्प-

---

न्यायावयवार्थकमिति। न च न्यायान्तर्गतत्वमात्रं सम्यक् तावतापुदासीनस्य धूमादित्यादिवाक्यस्य वारणसम्भवादिति वाच्यम्। निगमनैकदेशे तस्मादित्यत्रातिव्याप्त्यापत्तेरिति भावः । उपनयादीनां वक्ष्यमाणहेतुविभक्तिमत्त्वेनैव वारणसम्भवादाह निगमनेति। ननु वन्हिमान् वन्हिसामग्रीमत्त्वादित्यादौ हेतावव्याप्तिः तस्य साध्याविषयकज्ञानजनकत्वाभावादत आह साध्याविषयत्वञ्चेति। प्रकृतेति । तथा च हेतुतावच्छेदकावच्छिन्नप्रकारतानिरूपितहेतुत्वत्वावच्छिन्नविशेष्यताबहिर्भावेण यत्साध्यविषयकत्वं तच्छून्यज्ञानजनकत्वमर्थः । न च तादृशविशेष्यताबहिर्भूतविषयताशून्यत्वस्यैव सम्यक्त्वे साध्यप्रवेशो व्यर्थ इति वाच्यम् । अखण्डाभावत्वात् । न च तथाप्यनतिप्रयोजकत्वम्, हेतुविभक्तिमत्त्वपदसार्थक्यस्यैवाऽतिप्रयोजकत्वात्। अन्यथा तद्धारणीये व्यतिरेक्युदाहरणादौ निरुक्तविशेष्यताबहिर्भूतविशेष्यतावत्त्वादेवातिव्याप्तिविरहेण तद्वैयर्थ्यापत्तेः। न चेदमेकं धूमादित्यादिहेतावव्याप्तिः तस्य हेतुविशिष्टहेतुत्वविषयतावहिर्भावेणैकत्वरूपसाध्यावगाहित्वादिति वाच्यम् । धूमादावे-

रम्परासाधारणप्रकृतपक्षविशेषणत्वेन वा, तेन पूर्वोपदर्शितहेतौ नाव्याप्तिः। इदं न दण्डाज्जातं दण्डसंयोगाजन्यद्रव्यत्वात् अयं

कत्वादेरयोग्यतानिश्चयकालीनस्य केवलधूमादिहेतुताबोधस्य जनकतामादायैव तत्र लक्षणसम्भवादिति भावः। नन्वेवमपि यत्रायं वन्हिमानित्यादौ विषयितासम्बन्धेन बुद्ध्यवच्छिन्नस्यैव समवायेन हेतुत्वं तत्र वन्हिमत इत्यादौ हेतावव्याप्तिः तस्य हेतुप्रकारकहेतुत्वविषयतावहिर्भावेण मतुवर्थसम्बन्धांशे बुद्धिरूपसाध्यावगाहित्वादत आह पूर्वोपदर्शितेति। प्रतिज्ञालक्षणोपदर्शितत्यर्थः। तथा च यत्पक्षकयत्साध्यकप्रतिज्ञाव्यक्तीनां पक्षोद्देश्यकसाध्यनिष्ठयादृशयादृशविशेषणताकबोधजनकत्वं साध्यनिष्ठतादृशविशेषणताशून्यबोधजनकत्वमर्थः स चोक्तहेतावप्यस्तीति नाव्याप्तिः। तत्र साक्षात्पक्षविशेषणत्वेन यत्साध्यविषयकत्वं तच्छून्यत्वमात्रोक्तौ तस्माद्भिद्यत इत्यादिनिगमनेऽतिव्याप्तिः तत्राख्यातार्थद्वारैव प्रतिज्ञायाः पक्षधर्मिकसाध्यविशेषणकज्ञानजनकत्वादतः परम्परेत्युक्तम्। तन्मात्रोक्तौ च तस्मात्पचतीत्यादिनिगमनेऽतिव्याप्तिः तत्र साक्षादेव प्रतिज्ञायाः पक्षे साध्यप्रकारकज्ञानजनकत्वादतो द्वयमुपात्तम्। न च साध्यनिष्ठतादृशविशेषणत्वानां प्रातिस्विकरूपेण प्रवेशादननुगमः, तादृशविशेषणत्वाभावकूटस्यानुगतत्वात् पक्षनिष्ठमुख्यविशेष्यतानिरूपितसाध्यनिष्ठविशेषणताकत्वेन कथञ्चिदनुगमयितुं शक्यत्वाच्च। न चैवं तस्मात्पचतीत्यादिनिगमनेऽतिव्याप्तिरिति वाच्यम्। स्वस्यापि स्वघटकतया साध्यनिष्ठविषयतायामपि तादृशविशेषणतात्वादिति भावः। पूर्वोपदर्शितेति। वन्हिमान् वन्हिसामग्रीमत्त्वादित्यादावित्यर्थः। यद्यपि हेतुविभक्तिमत्त्वानुक्तौ ह्रदो निर्धूमो निर्वन्हित्वादित्यादौ व्यतिरेक्युदाहरण एवातिप्रसङ्गः, तथापि अग्रे विवक्षणीयतदर्थस्य व्यावृत्त्यर्थं स्थलान्तरमाह इदमिति। दण्डसंयोगेति। संयोगपदं साध्याविशेष्यस्य वारणाय। द्रव्यपदञ्च दण्डगुणादौ व्यभिचारस्य वारणाय। अजन्यत्वस्यैव हेतुत्वसम्भवेपि अखण्डाभावतया दण्डसंयोगाजन्यत्वे व्यर्थविशेषणत्वाभावः। ननूक्तस्थलीयस्य यद्दण्डाज्जातं तद्दण्डसंयोगाजन्यद्रव्यत्वाभावक-

न धूमादालोकवान् आर्द्रेन्धनशून्यत्वादित्यादौ व्यतिरेकिण्युदाहरणस्य हेतुत्वपक्षकसाध्यान्वितस्वार्थबोधकेदम्पदशालिन उपनयस्य च वारणाय हेतुविभक्तिमदिति। तदर्थश्च प्रकृतसाध्यान्वयबो-

---

दित्युदाहरणस्य ज्ञापकत्वरूपहेतुत्वप्रतिपादकविभक्तिमत्त्वमात्रेणापि वारणसम्भवादग्रे साध्यान्वयिस्वार्थबोधक्षणेत्यादिपर्यन्तविवक्षा व्यर्थेत्यत आह अयं न धूमादिति। अन्वय्युदाहरणस्य साध्याविषयकत्वदलेनैव वारणसम्भवादाह व्यतिरेकिणीति। न्याय इति शेषः। यद्यप्युक्तस्थलीयस्य धूमादालोकव्यापकीभूताभावप्रतियोग्यार्द्रेन्धनशून्यत्ववानयमित्याकारकोपनयस्यापि वारणसम्भवादुदाहरणमात्रानुसरणमयुक्तम्, तथापि अग्रे हेतुत्वपक्षकोपनयस्य वारणेनैव उपनयान्तरस्य वारणमर्थतः सिद्धमतो न तस्य पृथगुपन्यास इति ध्येयम्। ननु प्रकृतसाध्यान्वितस्वार्थोपस्थापकपदवत्त्वेनाप्युक्तोदाहरणस्य वारणसम्भवाद्विभक्तिपर्यन्तानुसरणं व्यर्थमत आह हेतुत्वपक्षक इति। घटादिपक्षकोपनयस्य विभक्तिपदाप्रवेशेपि प्रकृतसाध्यान्वितस्वार्थबोधकहेतुत्वार्थकपदवत्त्वाविवक्षयापि वारणसम्भवात् हेतुत्वपक्षकोपनयानुसरणम्। न चोपनयमात्रस्यैव प्रागुक्तसाध्याविषयकत्वदलेनैव वारणादिदमयुक्तम्, पूर्वोपदर्शितेत्यादिद्वितीयकल्पोक्तसाध्याविषयकत्वस्योपनयेपि सम्भवात्। प्रकृतहेतुविशिष्टहेतुत्वविषयिताबहिर्भावेण साध्याविषयकत्वकल्पे तु हेतुत्वं न रूपं गुणभिन्नत्वादित्यादिस्थलीयस्य रूपत्वव्यापकाभावप्रतियोगिगुणान्यत्ववदिदमित्येवं व्यतिरेक्युपनयस्य वारणार्थं विभक्तिपदम्, तस्यापि तस्मान्न रूपमित्याकारकनिगमनोपस्थापितसाध्यान्वितस्वार्थबोधकहेतुत्वार्थकेदम्पदवत्त्वादिति वदन्ति। यथाश्रुतमूलेन वारयितुमशक्यत्वादाह तदर्थश्चेति। अयं धूमाद्वन्हिमान् आलोकादित्यादिस्थलीयस्य धूमाद्वन्हिव्याप्यालोकवानयमित्युपनयस्यापि वह्निस्वरूपसाध्यान्वितस्वार्थबोधकपञ्चमीविभक्तिमत्त्वात्तत्रातिव्याप्तिरतः प्रकृतपदम्। तथा च तत्र धूमज्ञानज्ञाप्यवह्नित्वावच्छिन्ने पञ्चम्यर्थहेतुत्वस्यान्वयान्नातिव्याप्तिः। ननु प्रकृतहेतुविशिष्टहेतुत्वविष-

धनक्षमार्थोपस्थितिजनकहेतुविभक्तिमत्त्वम्। हेत्वितिसम्पातायातम्। यदि च पर्वते पर्वतभिन्नत्वप्रकारकज्ञानस्य विशेष्यतया अभाव-

---

यताबहिर्भावेण साध्याविषयकत्वस्य प्रवेशकल्पे मूलोक्तहेतुपदं व्यर्थं प्रकृतसाध्यान्वितार्थोपस्थितिजनकविभक्तिमत्त्वस्यैव सम्यक्त्वादत आह हेत्विति। पूर्वोपदर्शितेत्यादिः। द्वितीयसाध्याविषयकत्वकल्पे तु हेतुत्वबोधकार्थकं हेतुपदं देयमेवान्यथा गुणाभावो गुणशून्यो द्रव्यभिन्नत्वादित्यादिस्थलीयस्य गुणव्यापकीभूताभावप्रतियोगिद्रव्यान्यत्ववानयमित्याकारकव्यतिरेक्युपनयस्यापि पक्षीभूतप्रकृतसाध्यान्वितैकत्वोपस्थितिजनकप्रथमाविभक्तिमत्त्वात्तत्रातिव्याप्त्यापत्तेः। वस्तुतः प्रथमकल्पेपि हेतुपदादेव प्रकृतसाध्यान्वितस्वार्थोपस्थितिहेतुत्वस्य लाभान्न तद्वैयर्थ्यं सामान्यशब्दस्य विशेषपरतायां व्युत्पत्तिसिद्धत्वादिति परमार्थः। ननु पर्वतस्तत्पुरुषीयपर्वतभिन्नत्वप्रकारकनिश्चयस्य विशेष्यतयाऽभाववान् तत्पुरुषीयतादृशनिश्चयाभावादित्यादिस्थलीयस्य यो यस्तत्पुरुषीयपर्वतभिन्नत्वप्रकारकनिश्चयवान् स तत्पुरुषीयतादृशनिश्चयवान् यथा तत्पुरुषीयतादृशनिश्चयाभावादुत्पन्नं ज्ञानमित्युदाहरणस्यापि प्रकृतहेतुविशिष्टहेतुत्वविषयताबहिर्भावेणोत्पन्नज्ञानांशे प्रकारतावच्छेदकतया साध्यावगाहित्वेपि पूर्वोपदर्शितसाक्षात्परम्परासाधारणसाध्याविषयकत्वात् प्रकृतसाध्यान्वितस्वार्थबोधकपञ्चमीविभक्तिमत्त्वाच्च द्वितीयकल्पे तत्रातिव्याप्तिरित्याशङ्क्य ते यदि चेति। पर्वत इति। पक्ष इति शेषः। पर्वतभिन्नत्वेति। तत्पुरुषीयपर्वतभिन्नत्वप्रकारकनिश्चयस्येत्यर्थः। यथाश्रुते तादृशज्ञानत्वावच्छिन्नाभावस्य ज्ञानानुत्पादकतया वक्ष्यमाणदृष्टान्तासङ्गतेर्विशेष्यतासम्बन्धेन तादृशनिश्चयत्वावच्छिन्नाभावादेव पर्वतत्वादिप्रकारकज्ञानस्योत्पादात्। अत एव वस्तुमात्रस्यैव सर्वं पर्वतभिन्नमित्याकारकभ्रमविशेष्यत्वात्साध्याप्रसिद्धिरित्यपि दूषणं समाहितम्, तादृशभ्रमशून्यपुरुषस्यैव साध्येऽन्तर्भावात् प्रमेयावच्छेदेन विशेष्यतया तादृशज्ञानाभावस्य पर्वते सम्भवाच्चेति ध्येयम्। पर्वतत्वादिहेतुतायामुदाहरणस्य प्रकृतसाध्यान्वितस्वार्थबोधकविभक्तिमत्त्वविरहादेव व्युदासः स्याद-

स्य साध्यत्वं हेतुत्वञ्च सिषाधयिषया च न्यायप्रयोगस्तत्र यथा तादृशज्ञानाभावादुत्पन्नं ज्ञानमिति दृष्टान्तशालिनि व्यतिरेक्युदाहरणेऽतिव्याप्तिरित्युच्यते, तदाऽवयवान्तरोपस्थितार्थान्वितस्वार्थबोधकविभक्तिमत्त्वं वक्तव्यम्, उदाहरणान्यत्वेन वा विशेषणीयम् । के

तः साध्यस्यैव हेतुत्वमुक्तम् । ननु साध्यस्यैव हेतुत्वे विवादाङ्गसंशयाभावान्न्याय एव नास्ति कस्योदाहरणेऽतिव्याप्तिराशङ्क्यत इत्यत आह सिषाधयिषेति । इदञ्च स्वरूपसम्बन्धेनैव साध्यसाधनभावमभिप्रेत्योक्तं स्वरूपकालिकादिसम्बन्धाभ्यां तादृशज्ञानाभावस्य साध्यसाधनस्थलेऽनुमित्सां विनापि न्यायप्रयोगसम्भवादिति ध्येयम् । तादृशज्ञानाभावादिति । तत्पुरुषीयपर्वतभिन्नत्वप्रकारकनिश्चयाभावादित्यर्थः । अन्वय्युदाहरणस्य साक्षात्परम्परासाधारणपक्षविशेषणतया साध्याविषयकत्वदलेनैव वारणसम्भवादाह व्यतिरेकीति । न चैतदुदाहरणवारणार्थमेव मूलोक्तं हेतुपदं ज्ञापकत्वरूपहेतुत्वबोधकार्थकमस्तु प्रकृतस्थलीयपञ्चम्याः कारणमात्रबोधकत्वादिति वाच्यम् । यत्र पर्वतभिन्नत्वज्ञानाभावज्ञाप्यस्यैव ज्ञानस्य यथा पर्वतभिन्नत्वज्ञानाभावादिदं ज्ञानमित्येवं प्रकारेण दृष्टान्तता तादृशोदाहरणे तथाप्यतिव्याप्तितादवस्थ्यादिति भावः । दृष्टान्तस्योदाहरणघटकत्वं न सर्वसम्मतमतो यदि चेत्युक्तम्। यत्तु प्रकृतसाध्यविशेष्यकस्वार्थान्वयबोधजनकत्वविवक्षयैव कथितोदाहरणव्युदासम्भवात् यदि चेत्युक्तमिति । तत्तुच्छम् । साध्यविशेष्यकान्वयबोधप्रवेशे विभक्तिपदव्यर्थतापत्तेः, उपनयस्थायपदस्य साध्यप्रकारकान्वयबोधं प्रत्येव हेतुत्वेन तत्रातिप्रसङ्गाभावादिति ध्येयम् । अवयवान्तरेति । न च अवयवान्तरेण प्रतिज्ञादिना साध्यविधया वस्तुगत्योपस्थापितो यः पर्वतभिन्नत्वप्रकारकज्ञानाभावस्तदन्वितस्यैव स्वार्थस्यान्वयबोधकत्वमुक्तोदाहरणस्थपञ्चम्या अप्यस्तीत्यतिव्याप्तितादवस्थ्यमिति वाच्यम् । अवयवान्तरस्थपदसाकाङ्क्षविभक्तिमत्त्वस्य विवक्षितत्वादिति भावः । वक्तव्यमिति । हेतुविभक्तिमत्त्वदलेनेति शेषः । अवयवान्तरादिप्रवेशमपेक्ष्य लाघवादाह उदाहरणे-

चित्तु साध्यविषयकधीजनकत्वानियतहेतुविभक्तिमत्त्वनियतावच्छेदकरूपवत्त्वं समुदितलक्षणार्थ इत्याहुः । तच्चिन्त्यम् । हेतुत्वप्रतिपाकेति विभक्त्यर्थ । हेतुत्वविशेष्यकान्वयबोधजनकन्यायावयवत्वमित्यर्थः । हेतुत्वं प्रमेयमित्यादिप्रतिज्ञावारणाय विभक्त्यर्थेति । तस्मादितरेभ्यो भिद्यते इत्यादिनिगमनवारणाय हेतुत्वेति विशेष्येति च । घटो दण्डाद्वह्निर्धूमादित्यादिकं तु न प्रतिज्ञा, तदवृत्ते-

---

ति । साध्येत्यादि । अत्राऽनियतान्तं निगमनत्वस्य, नियतत्वान्तमुदाहरणत्वस्य, अवच्छेदकान्तञ्च व्यतिरेक्युदाहरणत्वस्य व्युदासाय बोध्यम् । सर्वसाधारणस्य हेतुत्वनिगमनत्वादेर्दुर्वचत्वान्नेदं युक्तमित्याशयेनाह तच्चिन्त्यमिति । अत्र निगमनादेरपि हेतुत्वप्रतिपादकविभक्तिमत्त्वात्तत्राऽतिव्याप्तिरतो व्याचष्टे विभक्त्यर्थेति । विभक्त्यर्थीभूतं यद्धेतुत्वं तद्विशेष्यकान्वयबोधजनकेत्यर्थः । हेतुत्वमित्यादि । यद्यपि नामोपस्थाप्यस्यापि हेतुत्वस्य विभक्त्यर्थत्वात्तद्दोषतादवस्थ्यम्, तथापि विभक्तिजन्योपस्थितिसहकारेण हेतुत्वविशेष्यकबोधजनकत्वं विवक्षितम् । न चेदं हेतुत्वमित्यादिस्थलीयस्य तस्माद्धेतुत्वमित्यादिनिगमनस्यैवमप्यवारणं तस्य पञ्चमीजन्यहेतुत्वोपस्थितिसहकारेणैव तादृशबोधजनकत्वादिति वाच्यम् । हेतुत्वविधेयकबोधजनकत्वेनापि विभक्तिजन्योपस्थितेर्विशेषणीयत्वात्, तथा च तस्माद्धेतुत्वमित्यादौ पञ्चम्यर्थहेतुत्वस्य साध्यीभूतहेतुत्वांशे विधेयतयैव भानात्तद्वारणमिति भावः । भिद्यत इत्यादिना तस्मात्पचतीत्यादिनिगमनस्यापि सङ्ग्रहः, तस्यापि आख्यातविभक्त्यर्थविशेष्यकबोधजनकत्वादिति भावः । ननु घटो दण्डादित्यादिप्रतिज्ञास्थलीयस्य तस्माद्दण्डादित्यादिनिगमनस्यापि पञ्चम्यर्थहेतुत्वविशेष्यकबोधजनकत्वात्तत्राऽतिव्याप्तिरत आह घटो दण्डादिति । ननु घटो दण्डादित्यत्र जनकत्वमेव पञ्चम्यर्थः इति तत्रत्यलक्षणस्य ज्ञापकत्वलक्षणहेतुत्वविशेष्यकबोधजनकत्वाभावादेव वारणं भविष्यतीत्यत आह वन्हिर्धूमादिति । तदवृत्तेरिति । पञ्चम्यर्थहेतुताया दण्डादिवृत्तित्वेन घटाद्यवृत्तेरिति भावः । स्वावृत्तेरपि स्वस्य तादात्म्येन स्वनि-

हेतुत्वप्रतिपादकविभक्तिमन्न्यायावयवत्वं वा, उदाहरण-प्रयोजकाकाङ्क्षाजनकशाब्दज्ञानजनकन्यायावयवत्वं वा,

---

रतदात्मनश्च तद्धर्मव्यापकत्वायोगात् सम्प्रदायविरोधाच्चतेन तत्र-स्यनिगमने नातिव्याप्तिरिति भावः। उदाहरणेति। क्व चिज्जि-ज्ञासानुत्पादेऽपि तद्योग्यतासत्त्वान्नाव्याप्तिः। अनुक्तोदाहरणस्य-

---

ष्टधर्मव्यापकत्वादाह अतदात्मन इति। तथा च तादात्म्येतरवृत्त्य-नियामकसम्बन्धेन व्यापकत्वविरहादुक्तक्रमेण न्याय एव नास्ति क-स्य निगमनेतिव्याप्तिरिति भावः। ननु वृत्त्यनियामकसंयोगादिना-पि गगनादेः पृथिवीत्वादिव्यापकत्वस्य स्वयमेवोक्तत्वात् ज्ञाप्यत्वस्य पञ्चम्यर्थत्वमते वन्ह्यादौ तादृशसाध्यस्य सत्त्वाच्चेदं न युक्तमत आह सम्प्रदायेति। न च विवादाङ्गस्य संशयादेः शाब्दप्रमोपयु-क्तस्य चाकाङ्क्षादेः सम्भवेपि वन्हिर्धूमादित्यादिप्रतिज्ञानङ्गीकारः साम्प्रदायिकानां निर्बीजमिति वाच्यम्। एकसुबर्थेन समं सामा-न्यत एव सुबर्थान्तरान्वयस्याऽव्युत्पन्नतया प्रतिज्ञानिविष्टपञ्चम्यर्थो-पस्थापितधूमज्ञाप्यत्वादिसाध्ये हेत्ववयवान्तर्गतपञ्चम्यर्थान्वयस्यैव उपनयानङ्गीकारबीजत्वात्। अन्यथा गृहे घटस्य इत्यादितोपि घट-सम्बन्धो गृहवृत्तिरित्याकारकबोधप्रसङ्गात्। अत एव धने चैत्रस्य इत्यादितोपि चैत्रस्वत्ववद्धने इत्येव बोधो न तु चैत्रस्वत्वं धनवृत्ति इत्याकारको बोधः सप्तम्यर्थाधेयत्वस्य षष्ठ्यर्थस्वत्वेऽन्वयस्याऽव्यु-त्पन्नत्वात्। न च क्रयाजन्यचैत्रस्य धनमित्यादितः क्रयजन्यचैत्रस्वत्वस्य धनादौ प्रतीत्यनुरोधात्सुबर्थेन समं स्वार्थमुख्यविशेष्यकान्वयबो-धजनकत्वमेव सुपामव्युत्पन्नं कल्प्यते तथा च वन्हिर्धूमादिति प्र-तिज्ञायां पञ्चम्यर्थस्य पक्षविशेषणतया मुख्यविशेष्यत्वाभावात् तत्र हेत्वन्तर्गतपञ्चम्यर्थस्याऽन्वये बाधकाभाव इति वाच्यम्। तावता तस्मादूधूमादित्येवं निगमनान्तर्गतयोः पञ्चम्यर्थयोः परम्परान्वय-सम्भवेन सम्प्रदायविरोधस्यावश्यकत्वात्। तत्र धूमज्ञाप्यत्वादिसा-

साध्यविषयकज्ञानजनकहेतुपञ्चम्यन्तानुमितिपरशब्दत्वं वा, प्रतिज्ञावाक्यधीजन्यकारणाकाङ्क्षानिवर्त्तकज्ञानजन-

---

लेऽपि तादृशयोग्यतासत्त्वान्न्यायावयवेति। उदाहरणत्वञ्चेह न न्यायगर्भं वैयर्थ्यात्। साध्यविषयेत्यादि। अयं न दण्डादण्डसंयोगाजन्यद्रव्यत्वादित्यादौ प्रतिज्ञानिगमनयोर्वारणाय साध्यविषयेत्यादि व्याख्यातार्थम्। उपनयविशेषवारणाय हेतुपञ्चम्यन्तेति। हेत्विति हेतुत्वबोधकार्थकं हेतुपञ्चम्योर्वैकल्पिकमुपादेयम्। उपनयस्य

ध्यस्य मुख्यविशेष्यतयैव भानादिति भावः। तादृशयोग्यतासत्त्वादिति। धूमादितिवाक्यात्मकेत्यादिः। उदाहरणत्वञ्चेति। न्यायगर्भोदाहरणत्वप्रवेशेपि अनुक्तोदाहरणस्थले तादृशयोग्यतासत्त्वेनातिव्याप्तिर्न्यायावयवत्वस्यावश्यकत्वादिति भावः। वैयर्थ्यादिति। प्रकृतव्याप्तितात्पर्यकत्वभागस्यैव सम्यक्त्वादिति भावः। प्रतिज्ञादीतरस्य हेतुपञ्चम्यन्तत्वेनैव वारणादाह अयं न दण्डादित्यादि। यथाश्रुतसाध्यविषयकत्वस्य वन्हिमान् वन्हिसामग्रीमत्त्वादित्यादिहेतावव्याप्तेराह व्याख्यातार्थमिति। तथा च प्रकृतहेतुर्विशिष्टहेतुत्वविषयतावहिर्भावेण यत्साध्यविषयकत्वं तदभावो ग्राह्यः अन्वय्युपनयस्य निरुक्तसाध्यविषयकत्वदलेनैव वारणादाह उपनयविशेषेति। तथा च ह्रदो निर्धूमो निर्वन्हित्वादित्यादिस्थलीयस्य धूमव्यापकीभूताभावप्रतियोगिनिर्वन्हित्ववानयमित्याकारकव्यतिरेकयुपनयस्य वारणायेत्यर्थः। यद्यप्युक्तस्थलीयोदाहरणस्यापि हेतुपञ्चम्यन्तत्वेन वारणं सम्भवति, तथाप्यग्रे वक्ष्यमाणोदाहरणान्यत्वेनैव तद्वारणसम्भवादुपनयमात्रानुसरणम्। ननु पञ्चम्यन्तत्वस्यैव सम्यक्त्वाद्धेतुपदं व्यर्थमत आह हेत्विति। वैकल्पिकमिति। तथा च निरुक्तसाध्याविषयकत्वविशेषितं हेतुत्वप्रतिपादकान्तावयवत्वं पञ्चम्यन्तावयवत्वं वा लक्षणार्थः। ननु हेतुत्वं निर्धूमं निर्व-

चान्तेऽनुसन्धीयमाना प्रथमैवान्तः । यथा दण्डादित्यादेः स्वपरस्यापि दृष्टान्तस्य, पञ्चम्यन्तत्वेऽन्वयायोगात् । कस्यचिद्व्यतिरेकिण उदाहरणस्य पञ्चम्यन्तत्वसम्भवे तु तद्वारणं पूर्ववत् । अत्र चार्थवद्भागस्य हेतुपञ्चम्यन्तत्वं बोध्यम् । तेन निरर्थतसिलन्तवह्निप्रमात इत्यादौ नाव्याप्तिः । पञ्चम्यादेस्तसिलाद्यादेशवादिनां नये तु नानुपपत्तिगन्धोऽपि । के चित्तु हेतुपञ्चम्यन्तत्वं हेतुत्वप्रतिपादकप-

---

न्हित्वादित्यादिस्थलीयस्य व्यतिरेक्युपनयस्यापि हेतुत्वप्रतिपादकमिदंपदमन्तर्भूतमिति तत्राप्यतिव्याप्तिरत आह उपनयस्य चेति । ननु घटो वाक्यभिन्नः शब्दान्यत्वादित्यादिस्थलीयस्य यद्यद्वाक्यं स शब्दो यथा दण्डादित्युदाहरणस्यापि पञ्चम्यन्तत्वात्तत्राप्यतिव्याप्तिरत आह यथा दण्डादित्यादेरिति । दृष्टान्तस्येति । प्रथमैवाऽन्त इति पूर्वेणान्वयः । ननु यथा दण्डादिति दृष्टान्तस्य पञ्चम्यन्तत्वे को दोष इत्यत आह पञ्चम्यन्तत्वे इति । अन्वयायोगादिति । समासातिरिक्तस्थले नामार्थयोरभेदान्वयबोधे नाम्नः समानविभक्तिकत्वस्य तन्त्रत्वादिति भावः । इदञ्च वस्तुगतिमनुरुद्ध्योक्तम् । स्वपरदृष्टान्तस्य पञ्चम्यन्तत्वेपि वक्ष्यमाणोदाहरणान्यत्वेनैव तत्राप्यतिव्याप्त्यसम्भवादिति ध्येयम् । अथायं गोभिन्नो द्रव्यान्यत्वादित्यादिस्थलीयस्य या या गौस्तद्द्रव्यं यथा पशुर्लाङ्गूलवत्त्वादित्याद्युदाहरणस्यापि हेतुपञ्चम्यन्तत्वात्तत्राप्यतिव्याप्तिरत आह कस्यचिदिति । उदाहरणस्य दृष्टान्तघटितत्वं न सर्वसम्मतमित्याशयेनाह सम्भवे त्विति । पूर्ववदिति । उदाहरणभिन्नत्वविवक्षयेत्यर्थः । ननु वन्हिमान् वन्हिप्रमातः इत्यादिहेतावव्याप्तिः तस्य तसिलन्तत्वेन पञ्चम्यन्तत्वविरहादत आह अत्र चेति । तथा च तसिलो निरर्थकतया लुप्तपञ्चम्यन्तभागस्यैवाऽर्थवत्त्वान्नाव्याप्तिः पञ्चम्यन्तपदेन पञ्चमीभिन्नस्वघटकयावत्पार्थकोत्तरपञ्चमीघटितस्योक्तत्वादिति भावः । पञ्चम्यास्तसिलिति सूत्रस्य पञ्चम्याः स्थाने तसिलित्यर्थमभिप्रेत्याह पञ्चम्यादेरिति । आदिपदाभ्यां सप्तम्यादेस्त्राद्यादेशस्य परिग्रहः । नानुपपत्तीति । आदेशस्मारितायाः पञ्चम्या एवाऽन्तेनुसन्धीयमानत्वादिति भावः ।

दशालित्वं, पूर्ववत्साध्याविषयकज्ञानजनकत्वञ्च इतरनैरपेक्ष्येण प्रकृतहेतुत्वविशिष्टसाध्यविषयकज्ञानाजनकत्वं, साध्यञ्चेह न विव-

---

न च सर्वेभ्य इत्यत्र पञ्चम्याः स्थाने तसिलादेशे बहुत्वे सुप्येकार-प्रसङ्गे सर्वत इत्येव प्रयोगः स्यान्नतु सर्वत इति वाच्यम्। तन्मते तसिलादिभिन्न एव बहुत्वे स्यादिति स्वतः परतो वैकारस्यानुना-सिकत्वादिति भावः। यथाश्रुतेन धूमादालोकवत्पर्वतो वन्हिमान् धूमादित्यादिस्थलीयप्रतिज्ञादेर्वारणासम्भवादाह पूर्ववदिति। प्रकृ-तसाध्यविशेष्यकप्रकृतहेतुविशिष्टहेतुत्वप्रकारकान्वयबोधजनकपद-वत्त्वमित्यर्थः। न च सर्वत्र प्रतिज्ञायामतिव्याप्तिः साध्यविशेष्यक-प्रकृतहेतुत्वप्रकारकान्वयबोधजनकसाध्यवाचकपदवत्त्वादिति वा-च्यम्। साध्यवाचकपदान्यत्वस्य तादृशपदे निवेश्यत्वात्। न च साध्यस्य हेतुतास्थले हेतावव्याप्तिरिति वाच्यम्। तत्र साध्यवा-चकपदान्यस्य तादृशान्वयबोधजनकपञ्चमीपदस्यैव सत्त्वादिति विभावनीयम्। न च प्रकृतहेतुविशिष्टदलं व्यर्थम्, आलोकाद्वन्हिमतः सधर्मा पर्वतो वन्हिमानित्यादिप्रतिज्ञायामतिव्याप्तिवारकत्वादिति भावः। इत्थञ्च धूमाद्वन्हिमतः सधर्मा पर्वतो वन्हिमानित्यादिप्रति-ज्ञायास्तस्माद्वन्हिमानित्यादिनिगमनस्य वा व्युदासार्थमेव साध्या-विषयकत्वदलम्, तच्च वन्हिमान् वन्हिसामग्रीमत्त्वादित्यादौ हेतावव्याप्तमतो व्याचष्टे साध्याविषयकेत्यादि। प्रतियोगितानवच्छेदकेत्यादौ मध्यस्थनञापि समुदितान्वयस्य व्युत्पत्तिसिद्धत्वादिति भावः। इतरेत्यादि। हेत्ववयवमात्रस्यैव प्रतिज्ञैकवाक्यतया हेतुत्वविशिष्ट-साध्यज्ञानजनकत्वादसम्भवापत्तिरतो नैरपेक्ष्यान्तम्। पर्वतो धूम-ज्ञानज्ञाप्यवन्हिमान् धूमाद्वन्हिसामग्र्या इत्यादिहेतावव्याप्तिः तस्या-पि अवयवान्तरनैरपेक्ष्येण हेतुत्वविशिष्टसाध्यज्ञानजनकत्वादतः प्र-कृतपदम्। तथा च इतरनैरपेक्ष्येण प्रकृतहेतुविशिष्टहेतुत्वप्रकारक-साध्यधर्मिकज्ञानजनकत्वमर्थः स चोक्तहेतावस्त्येव तत्र हेतुभूत-सामग्रीविशिष्टहेतुत्वस्य वन्हावप्रकारत्वादिति भावः। वैयर्थ्या-दिति। यद्यपि प्रकृतहेतुविशिष्टहेतुत्वप्रकारकसाध्यधर्मिकज्ञानजन-कत्वाभावस्याऽखण्डत्वान्न वैयर्थ्यम्, तथाप्यसत्प्रयोजनत्वे तात्प-

कहेतुविभक्तिमद्वाक्यत्वं वा, पञ्चम्यन्तलाक्षणिकपदवद-नुमितिपरवाक्यत्वं वा। हेतुपदेन ज्ञाने लक्षणा।अन्यथा लि-ङ्गस्याहेतुत्वेन हेतुविभक्त्यर्थानन्वयात् तथैवाकाङ्क्षानिवृ-त्तेः। अनुमितिहेतुज्ञानकारणधूमवत्त्वादितिशब्दजन्यज्ञा-नवृत्तिप्रतिज्ञादिजन्यज्ञानावृत्तिजातियोगिज्ञानजनकवा-क्यत्वं हेतुत्वमित्यन्ये। जातिं विना केन रूपेण ज्ञान-स्यानुमितिजनकत्वं वाक्यविशेषजन्यत्वस्यापि जन्यता-वच्छेदकरूपापरिचये दुर्ग्रहादित्यपरे।

क्षितं वैयर्थ्यादित्याहुः। पञ्चम्यन्तेति। अनुमितिपरवाक्यत्वम् अवयवत्वम्।हेतुत्वादौ पञ्चमी लाक्षणिकी। वृक्षाद्विभजत इत्यादौ लाघवेनाऽवधित्वे अवधिमत्त्वे वा शक्तत्वात् द्रव्यानिष्ठमवधित्वमिव

र्थम्। अत्र उदक्षरत्वमेवाऽस्वरसः केचिदित्युक्त्या सूचितः। ननु उदासीनस्यापि धूमादिति वाक्यस्याऽनुमित्यनुकूलत्वेन कथञ्चि-दनुमितिपरत्वात्तत्राऽतिव्याप्तिरतो व्याचष्टे अवयवत्वमिति। एत-दनन्तरमेव पञ्चम्यन्तेतीति पाठो युक्तः। लक्षणद्वय एवानुमितिपर-त्वस्य निविष्टत्वेन पूर्वत्रैव तस्य व्याख्यातुमौचित्यात् तावतैवोत्तरत्र तदर्थलाभसम्भवादिति ध्येयम्। ननु निगमनस्य पञ्चमीद्वयलक्षणीय-लाक्षणिकपदवत्त्वाभावादेव व्युदाससम्भवे तद्वारणार्थं पञ्चम्यन्तप-दं व्यर्थमतः पञ्चमीरूपं पदमादायैव निगमनस्य लाक्षणिकपदवत्त्वं व्यवस्थापयितुमाह हेतुत्वादाविति। हेतुत्वं ज्ञापकत्वम्। आदिना ज्ञाप्यत्वादेः परिग्रहः। अवधित्व इति। तथा च वृक्षनिष्ठं यदवधित्वं निरूपकतासम्बन्धेन तद्वान् यो विभागस्तदाश्रयत्वमित्याकारोऽन्वय-

विभागनिष्ठमवधिमत्त्वमपि सम्बन्धविशेषः । स चातिरिक्तोऽनतिरिक्तो वेत्यन्यदेतत् । तत्सम्बन्धाग्रहे च व्यवहारः शक्तिभ्रमात् वृक्षादपैति पतति इत्यादौ लाघवाद्विभागे शक्तिस्तज्जनकत्वञ्च

बोधः । ननु निरूपकतासम्बन्धेनावधित्वस्य विभागेऽन्वये घटीयविभागेऽप्ययं विभागो न घटादिति प्रयोगः स्यात् संयोगादिसम्बन्धेनैव घटनिष्ठावधित्वस्य तत्राऽसत्त्वात् निरूपकतासम्बन्धस्य वृत्त्यनियामकतया प्रतियोगितानवच्छेदकत्वादत आह अवधिमत्त्वे वेति । तथा च घटनिरूपितं यदवधिमत्त्वं स्वरूपसम्बन्धावच्छिन्नतदभावस्य घटीयविभागे विरहान्नोक्तप्रयोग इति भावः । ननु विभागनिष्ठे अवधिमत्त्वे प्रमाणाभाव इत्यत आह द्रव्येत्यादि । अवधित्वमिवेति । इवार्थः साहश्यं तच्चानुभूयमानत्वेन, तथा चानुभव एव तत्र प्रमाणमिति भावः । सः सम्बन्धविशेषः । अतिरिक्त इतिविभागादित्यादिः । अनतिरिक्तो वेति । न चैवं जनकत्वादेः स्वरूपसम्बन्धत्वमते तत्रापि पञ्चम्याः शक्तिः स्यादिति वाच्यम् । तथात्वेपि क्षत्यभावात् । अत एव हेतुमत्त्वे शक्तावपीत्यादि स्वयमग्रे वक्ष्यते । ननु ज्ञापकत्वादिरूपहेतुत्वादौ पञ्चम्याः शक्त्यभावे शक्यसम्बन्धाप्रतिसन्धानदशायां धूमाद्वन्हिमानित्यादितस्तत्प्रतीतिः कथं स्यादत आह तत्सम्बन्धेति । हेतुत्वादौ अवधिमत्त्वादिरूपशक्यस्य सम्बन्धस्य इत्यर्थः । अवधितानिरूपकत्वातिरिक्तमवधिमत्त्वं यदि विभागनिष्ठं नानुभवसिद्धं तदा विभागापेक्षया गुरुत्वात्तस्य शक्यत्वं दुर्घटमित्याशयेनाह वृक्षादपेतीति । ननु विनापि पञ्चम्यन्तसमभिव्याहारमपेतिशब्दाद्विभागावच्छिन्नक्रियाप्रतीतेः वृक्षादपैतीत्यत्रापि विभागो धातुलभ्य एव पञ्चम्यास्तु विभागान्वितमाधेयत्वमवधितानिरूपकत्वं वाऽर्थः इत्यतः स्थलान्तरमाह पततीत्यादि । वृक्षादित्यर्थः । अत्र गुरुत्वजन्यतावच्छेदिका पतनत्वजातिरेव पतेः शक्यतावच्छेदिका विभागावच्छिन्नक्रियात्वस्य तदपेक्षया गुरुत्वादतो नोक्तक्रमावसरः । ननु वृक्षात्पततीत्यतो वृक्षनिष्ठविभागजनकपतनानुकूलकृतिमानिति बोधो जायते तत्र धात्वर्थपतनादौ विभागवत्त्वस्य बाधितत्वात् विभागजनकत्वमेव पञ्चम्यर्थो बोध्यः तत्कुतो ज्ञापकत्वाद्य-

क्रियायाः सम्बन्धमर्य्यादया भासत इत्यपि वदन्ति । अतो निगमनेऽतिव्याप्तिरतः पञ्चम्यन्तात । तस्मादित्यत्र च तत्पदे न लक्षणा शक्त्यैव तादृशज्ञानोपस्थितिसम्भवात्, पर्वतो वह्निमान् वान्हिसा-

---

पेक्षया लाघवमत आह तज्जनकत्वञ्चेति । न चैवं वृक्षात्पतनेपि नेदं पतनं वृक्षादिति प्रयोगः स्यात् पतनस्य सम्बन्धान्तरेण वृक्षावधिकविभागाभाववत्त्वात् जनकत्वस्य वृत्त्यनियामकतया तत्सम्बन्धेन विभागाभावस्य बोधयितुमशक्यत्वादिति वाच्यम् । तत्र नञ्समभिव्याहृतपञ्चम्या विभागजनकत्वे लाक्षणिकत्वादिति भावः । अत इति लाक्षणिकपञ्चमी । विशिष्टनिगमनवारणाय पञ्चम्यन्तेतीति । अन्यथा तस्माद्वन्हिमानित्यादिनिगमनस्यापि पञ्चमीस्वरूपलाक्षणिकपदवत्त्वात्तत्राऽतिव्याप्तिः स्यादित्याशयः । न च तस्माद्वन्हिमानित्यादावपि ज्ञानजनकत्वलक्षणं हेतुत्वं जन्यज्ञानविषयत्वलक्षणं ज्ञाप्यत्वं वा न पञ्चम्यर्थः येन विभागाद्यपेक्षया गुरुत्वेन लक्षणा स्यात् किन्तु ज्ञानमात्रं तदर्थः तच्छब्दोपस्थापितस्य धूमादिज्ञानस्य जनकत्वादिसम्बन्धेन पञ्चम्यर्थज्ञानेऽन्वयादेव धूमज्ञानादौ ज्ञापकत्वादिलक्षणस्य हेतुत्वादेर्लाभसम्भवादिति वाच्यम् । विभागत्वस्येव ज्ञानत्वस्य लघुत्वेपि तदवच्छिन्ने पञ्चम्याः स्वारसिकभूरिप्रयोगाभावेन लक्षणायास्तत्रावश्यकत्वात् । अन्यथा घटादिपदस्यापि पटादौ शक्त्यापत्तेः पटत्वस्यापि घटत्वबलघुत्वादिति भावः । ननु पञ्चम्यन्तलाक्षणिकपदवत्त्वोक्तावपि निगमनेतिव्याप्तिरेव तन्निविष्टतच्छब्दस्य पञ्चम्यन्तत्वात् धूमादिज्ञानलाक्षणिकत्वाच्चेत्यत आह तस्मादिति । शक्त्यैवेति । यद्यपि धूमादिलक्ष्यार्थशक्तस्य तच्छब्दस्य धूमज्ञानत्वादिगुरुधर्मेण बोधने लक्षणैव युक्ता, तथापि प्रत्येकशक्त्या धूमस्य ज्ञानस्य तच्छब्दादुपस्थितौ व्युत्पत्तिवैचित्र्यादेवकारस्थल इव नामार्थयोरपि तयोर्मिथोऽन्वयादेव धूमज्ञानस्य लाभसम्भवान्न विशिष्टे तत्पदस्य लक्षणेत्याशयः । नन्वेवं यत्र तस्मादित्येव हेतुः प्रयुज्यते तत्राव्याप्तिः तच्छब्दस्य पञ्चम्यन्तत्वेपि लाक्षणिकत्वाभावादत आह पर्वतो वन्हिमानिति । अत्र तच्छब्दस्य प्रक्रान्तपरामर्शकत्व-

अन्वयव्याप्त्यभिधायकावयवाभिधानप्रयोजकज्ञानजनकहेतुत्वप्रतिपादकविभक्तिमन्न्यायावयवत्वमन्वयिहेतुत्वम् । एतदेव व्यतिरेव्याप्त्यभिधायकपदप्रक्षेपादव्यतिरेकिहेतुत्वम् । अन्वयव्यतिरेकोदाहरणाकाङ्क्षा-

---

मग्नीमान् वा तस्मादित्यादिकस्तु न न्यायप्रयोगः सम्प्रदायविरोधात् इति वदन्ति । यत्तु हेत्वन्वयानुरोधात् वन्हिमानित्यादावपि ज्ञानलक्षणेति । तन्न । पञ्चम्या ज्ञापकत्वे ज्ञाप्यत्वे वा लक्षणयैवोपपत्तौ तत्र लक्षणायां मानाभावात् । अत एवोक्तम् आवृत्तौ सैव

नियमाद्वह्निपरामर्शे साध्याविशेषः स्यादतः साध्यान्तरमाह वन्हिसामग्रीमान्वेति । सम्प्रदायविरोधादिति । हेत्वादेरसाधारणशब्देनैव कथायामुल्लेखः, अन्यथाऽविज्ञातार्थनिग्रहस्थानापत्तेः इत्याचार्यैरभिधानादिति भावः । पञ्चम्यन्तपदानुक्तौ पर्वतो वन्हिमानित्यादिप्रतिज्ञायामप्यतिव्याप्तिः तत्रापि ज्ञेयवन्हित्वप्रकारेण लाक्षणिकस्य वन्हिपदस्य सत्त्वात्, अन्यथा हेत्ववयवार्थस्य धूमज्ञानजन्यत्वादेर्वन्हावसत्त्वेन तत्र हेत्वर्थान्वयासम्भवादिति प्राचीनमतं निरस्यति यत्त्वित्यादिना । ज्ञानलक्षणेति । ज्ञानप्रकारेण ज्ञेयवन्ह्यादौ लक्षणेत्यर्थः । तेन लक्ष्यतावच्छेदके लक्षणाविरहेपि न क्षतिः । ज्ञापकत्व इति प्राचां मतेन, ज्ञाप्यत्व इति स्वमतेन । अनयोस्तत्त्वं पुनरग्रे दर्शयिष्यते । उपपत्ताविति । हेत्वर्थान्वयस्येत्यादिः । तत्र प्रतिज्ञान्तर्गतसाध्यपदे । मानाभावादिति । जनकत्वादिबोधार्थं पञ्चम्या लक्षणाया आवश्यकत्वे तत्रैव ज्ञानजनकत्वादिलक्षणौचित्यादिति भावः । अत एव प्रतिज्ञासु साध्यपदेन लक्षणाविरहादेव । आवृत्ताविति । अन्यथा बोधितधर्मप्रकारेण बोधितार्थस्य प्रतिपत्तये पुनः पदानुसन्धानस्यैवानुपपत्तेः बोधितवन्हिस्वरूपस्य पर्वतो वन्हिमान्नवेत्यादिविप्रतिपत्तिविषयवन्हिपदस्य ज्ञेयवन्हित्वप्रकारेण बोधने आवृ-

प्रयोजकतथाभूतावयवत्वमन्वयव्यतिरेकिहेतुत्वम् । यद्वा पक्षसपक्षसतो विपक्षासतो हेतुवचनमन्वयव्यतिरेकि । अत्यन्ताभावाप्रतियोगिसाध्यसमानाधिकरणपक्षसपक्षस-

---

प्रतिज्ञेति । अत एव च व्याचक्षते यतो द्रव्यं गुणाः कर्मेत्यत्र हेतुत्वं यथासम्भवमुत्पादकत्वं ज्ञापकत्वञ्चेति । अत एव लोके किं वन्हिमदिति प्रश्ने तदगृहं वन्हिमदित्युत्तरिते कुत इति जिज्ञासा धूमवत्त्वादित्युत्तरञ्च । न हि तत्र ज्ञाने प्रश्नः, येन लक्षणया ज्ञानेनोत्तरयेत् । न वा परकीयभाविप्रश्नानुरोधात् अजिज्ञासि-

---

त्तित्वाभावप्रसङ्गादिति भावः । ननु सुब्बिभक्तौ निरूढलक्षणान्यलक्षणाविरहात्पञ्चम्याः कुतो ज्ञापकत्वादौ लक्षणेत्यत आह अत एवचेति । व्याचक्षते प्रकाशकृतः । तथा च ज्ञापकत्वादावपि पञ्चम्या निरूढलक्षणेति भावः । यथासम्भवमिति । द्रव्यादावुत्पादकत्वं जात्यादौ च ज्ञापकत्वमेव हेतुत्वमित्यर्थः । ननु वाक्यार्थमर्यादया लब्धस्यैव ज्ञापकत्वलक्षणहेतुत्वस्य उपदर्शितत्वेनापि प्रकाशव्याख्यानिर्वाहाज्ज्ञापकत्वस्य पञ्चम्यर्थत्वे मानाभाव इत्यत आह अत एवेति । ज्ञापकत्वस्य पञ्चम्यर्थत्वादेवेत्यर्थः । जिज्ञासेतिजिज्ञासावाक्यमित्यर्थः । तथा च ज्ञापकत्वस्य पञ्चम्यर्थत्वाभावे कुतो वह्निमानित्यतः किंनिष्ठज्ञापकताकवह्निमानित्यन्वयबोधो न स्यादिति भावः । ननु वह्नेरुत्पादकत्वे एव जिज्ञासा न तु ज्ञापकत्वे ज्ञानविषयस्येति यदि ब्रूयात्तदा बाधकमाह धूमवत्त्वादित्युत्तरञ्चेति । तथा च वह्नयुत्पादकत्वजिज्ञासायां धूमवत्त्वादित्युत्तरं न स्यात् वह्निस्वरूपस्य धूमस्यानुत्पादकत्वेन बाधादित्यवश्यं ज्ञापकत्व एव जिज्ञासेति भावः । ननु वह्निज्ञाने प्रश्नविरहेपि कुत इत्युत्तरकालीनजिज्ञासानुरोधादेव तदगृहं वह्निमदित्युत्तरवाक्यं ज्ञेयवह्नित्वप्रकारेण बोधं जनयिष्यतीत्यत आह न वेति । अर्थान्तरत्वापत्तेरिति भावः । ननु कुत इत्यन-

हेतुवचनं केवलान्वयि । यद्वा अनुमितिकारणीभूतपरामर्शप्रयोजकशाब्दज्ञानकारणसाध्याविषयकशाब्दधीजनकप्रतीतान्वयसाध्यसाधनवाचकहेतुविभक्तिमच्छब्दत्वमन्वयिहेतुत्वम् । एतदेवाऽप्रतीतान्वयसाधनेतिविशेषणाद्व्यतिरेकिहेतुलक्षणम् । कथायां धूमादित्येव प्रयोक्तव्यं

ताभिधानं, न वा कुत इति प्रश्ने ज्ञातमेतदित्यध्याहार्यं मानाभावात् । दाहो दहनात् न जलात् जलं स्पर्शवत् रूपात् न गन्धा-

---

न्तरं ज्ञातमित्यध्याहारात्पञ्चम्या जनकत्वबोधकतयैव सर्वसामञ्जस्ये तस्य ज्ञापकत्वार्थकत्वे मानाभाव इत्यत आह न वा कुत इत्यादि । मानाभावादित्युपलक्षणम् । ज्ञातपदार्थस्य ज्ञानविषयस्य पूर्ववाक्यस्थवह्नावन्वययोगाच्चेत्यपि बोध्यम् । नामार्थयोरभेदान्वये नाम्नोः समानविभक्तिकत्वस्य तन्त्रत्वादिति ध्येयम् । ज्ञापकत्वं परित्यज्य ज्ञाप्यत्वे वेति यदुक्तं तत्र सदृष्टान्तमनुशयमाह दाह इत्यादि । तथा च दाहो दहनान्न तु जलादित्यत्र यथा जन्यत्वमेव पञ्चम्यर्थो न तु जनकत्वं तथा सति जलनिष्ठजनकत्वस्येव दहननिष्ठजनकत्वस्यापि स्वरूपादिसम्बन्धावच्छिन्नाभावस्य दाहे सत्त्वाद्दाहो न दहनादित्यपि प्रयोगापत्तेः, निरूपकतासम्बन्धस्य वृत्त्यनियामकतया तत्सम्बन्धावच्छिन्नाभावस्य दुर्वचत्वात्, तथा जलं स्पर्शवत् रूपान्न तु गन्धादित्यत्रापि ज्ञाप्यत्वमेव पञ्चम्यर्थो न तु ज्ञापकत्वं तथा सति गन्धनिष्ठस्येव रूपनिष्ठस्यापि ज्ञापकत्वस्य स्वरूपादिसम्बन्धेनाभावस्य स्पर्शे सत्त्वाज्जलं स्पर्शवन्न रूपादित्यपि प्रयोगापत्तेः, निरूपकत्वस्य वृत्त्यनियामकतया तत्सम्बन्धावच्छिन्नज्ञापकत्वाभावस्याऽप्रसिद्धत्वेन बोधयितुमशक्यत्वादित्याखण्डनार्थः । ननु जलं स्पर्शवन्न गन्धादित्यत्र तन्मतेपि नञा स्पर्शे गन्धज्ञाप्यत्वस्याभावो न बोध्यते ग-

न तु धूमवत्त्वादिति, मतुपो व्यर्थत्वात् । सामान्यवत्त्वे सति बाह्यकरणप्रत्यक्षत्वादित्यपार्थकं विभक्त्युपस्थापितहेतुत्वेन सामान्यवत्त्वस्य विभक्त्यन्तरावरुद्धस्यानन्व-

---

न्नापि शब्दादित्यादौ नञ अन्वयानुरोधात् जन्यत्वरूपं हेतुमत्त्वं जन्यज्ञानविषयत्वरूपञ्च ज्ञाप्यत्वमर्थः । एवञ्च हेतुमत्त्वे शक्तावपि

न्धेनापि घटादौ स्पर्शस्यानुमानात् गन्धज्ञाप्यत्वस्यैव स्पर्शे सत्त्वात् । अन्यथा घटः स्पर्शवान्न गन्धादित्यपि प्रयोगापत्तेः । परन्तु पञ्चम्यर्थेन गन्धज्ञाप्यत्वेनान्वितस्य स्पर्शादेर्गन्धवन्निरूपितसमवायादिसंसर्गेणैव मतुबादिसाकाङ्क्षतया गन्धज्ञाप्यत्वादिविशिष्टस्पर्शस्य तादृशसम्बन्धेन यदधिकरणं तद्भिन्न एव नञा जलादौ बोध्यते, कथितक्रमेण आकाङ्क्षानुपगमे जलं स्पर्शवद्गन्धादित्यादिवाक्यस्यापि प्रामाण्यापत्तेः । एवञ्च ज्ञापकतायाः पञ्चम्यर्थत्वमतेपि गन्धनिष्ठज्ञापकताकस्पर्शस्य गन्धवन्निरूपितसमवायेन यदधिकरणं तद्भेदस्यैव नञा जले धर्मिणि बोधनसम्भवान्नोक्तस्थलीयनञर्थान्वयानुरोधात् ज्ञाप्यत्वस्य पञ्चम्यर्थत्वं सिद्ध्यतीत्यत आह नापि शब्दादिति । तथा च शब्दादितिपञ्चम्युपस्थापितस्य शब्दज्ञाप्यत्वस्य शब्दव्यापकत्वविशिष्टस्वरूपसम्बन्धेनैव साध्यसाकाङ्क्षत्वात् स्पर्शस्य च शब्दाव्यापकतया तादृशसम्बन्धेन तत्र ज्ञाप्यत्वस्यान्वयासम्भवान्नेह शब्दज्ञाप्यस्पर्शस्य यदधिकरणं तद्भेदो नञा बोधयितुं शक्यते किन्तु शब्दव्यापकत्वविशिष्टस्वरूपसम्बन्धेन ज्ञाप्यत्वस्यैवाभावः स्पर्शे धर्मिणि बोध्यते शब्दव्यापकत्वविशिष्टनिरूपकत्वस्य वृत्त्यनियामकतया तादृशसम्बन्धेन शब्दनिष्ठज्ञापकत्वाभावस्य बोधनायोगात् । न च स्वरूपसम्बन्धमात्रेणैव पञ्चम्यर्थस्य शब्दादिज्ञाप्यत्वस्य साध्यसाकाङ्क्षत्वम्, स्पर्शवान् शब्दादित्यादिवाक्यस्यापि प्रमाणतापत्तेः । व्याप्त्यादिभ्रमवशात् शब्देनापि स्पर्शस्य ज्ञापनादिति भावः । ननु

यादिति के चित्। तन्न। सतिसप्तमीबलात् सामान्य-

ज्ञाप्यत्वे लक्षणैव। न च धूमाद्वन्हिमतः सधर्म्मा पर्वतो वन्हिमानित्यादौ प्रतिज्ञायां पर्वतो धूमाद्वन्हिमानित्यादौ च तत्रत्यनि-

---

दाहो दहनादित्यादिप्रयोगसत्त्वाद्विभागादिकमिव जन्यत्वमपि पञ्चमीशक्यमस्तु नव्यमते जन्यत्वस्यातिरिक्तत्वेन गौरवानवकाशादित्यतः तत्रेष्टापत्तिमाह एवञ्चेति। जन्यतायां पञ्चम्याः प्रयोगसत्त्वे चेत्यर्थः। हेतुमत्त्वे जन्यत्वे। ज्ञाप्यत्वे लक्षणैवेति। तावतैव निगमनवारकतया पञ्चम्यन्तपदस्य सार्थक्यसम्भवादिति भावः। ननु प्रकृतसाध्यान्वितस्वार्थबोधकत्वेन पञ्चम्यर्थविवक्षणे धूमादालोकवत्पर्वतो वन्हिमानिति प्रतिज्ञायां नातिव्याप्तिः सम्भवतीत्यत आह धूमाद्वन्हिमत इत्यादि। न चोक्तवाक्यादेव प्रथमतो वह्नेर्धूमज्ञाप्यत्वावगमात् कुत इत्याकाङ्क्षाविरहे त्ववयवासम्भवान्न तादृशी प्रतिज्ञेति वाच्यम्। किंज्ञाप्यो वन्हिरित्याकाङ्क्षाविरहेपि धूमज्ञानज्ञाप्यवन्हिमत्सधर्मपर्वतं किंज्ञाप्यो वन्हिरित्येवं क्रमेण हेत्वाकाङ्क्षयैव हेतोः प्रयोगात्। अत एव पर्वतो द्रव्यमित्यत्र प्रतिज्ञायां पर्वते द्रव्यत्वं किंज्ञाप्यमित्याकाङ्क्षायां पृथिवीत्वादेरेव हेतुत्वेनोपन्यासो न तु महानसत्त्वादेः। अन्यथा द्रव्यत्वं किंज्ञाप्यमित्याकाङ्क्षया महानसत्वादेरपि तत्र हेतुत्वेनोद्भावनापत्तेः तस्यापि महानसे द्रव्यत्वज्ञापकत्वात्। न चैवं धूमाद्वन्हिमत्पर्वतो वन्हिमान् धूमादित्यादिक्रमेणापि न्यायः स्यात् वन्हिमात्रस्य धूमज्ञाप्यत्वावगमेपि धूमज्ञाप्यवन्हिमत्पर्वतत्वावच्छिन्ने किंज्ञाप्यो वन्हिरित्याकाङ्क्षया हेत्वुत्थानसम्भवादिति वाच्यम्। तत्रोद्देश्यतावच्छेदकविधेययोरैक्येन निराकाङ्क्षत्वादेव तादृशप्रतिज्ञाविरहेण तदघटितन्यायासम्भवात्। न हि ज्ञातवन्हिमान् पर्वतो वन्हिमानित्यादिवाक्याद्वन्ह्यादिविधेयकः कदाप्यन्वयबोधः। ननु प्रकृतपक्षधर्मिकस्वार्थान्वयबोधकपदोपस्थापितं यत्साध्यं तदन्वितस्वार्थबोधकत्वे पञ्चमीविशेषणादेव धूमाद्वन्हिमत इत्यादिप्रतिज्ञाया अपि व्युदासः सम्भवतीत्य आह प-

वत्त्वस्य बाह्यकरणप्रत्यक्षत्वस्य च सामानाधिकरण्योपस्थितौ विशिष्टे हेतुत्वान्वयात् तथैव व्युत्पत्तेः, न ह्ययमर्थोऽस्मान्नावगम्यते इति ॥

गमने चातिव्याप्तिः, प्रकृतपक्षान्वितस्वार्थबोधकपदोपस्थापितप्रकृतसाध्यान्वितस्वार्थबोधकपञ्चम्यन्तलाक्षणिकपदवदवयवत्वस्य

वेत इत्यादि । इत्यादौ । प्रतिज्ञायामित्यनुषज्यते । तत्रत्यनिगमने तस्माद्धूमाद्वन्हिमानित्याकारेऽत्रापि धूमादित्यस्यैव निरुक्तपञ्चम्यन्तलाक्षणिकपदस्य सत्त्वादिति भावः । प्रकृतेत्यादि । प्रकृतपक्षधर्मिकस्वार्थबोधकपदोपस्थापितं यत्प्रकृतसाध्यं तद्धर्मिकस्वार्थबोधिका या पञ्चमी तदन्तलाक्षणिकपदावयवत्वमित्यर्थः । अत्र धूमाद्वन्हिमतः सधर्मेत्यादिप्रतिज्ञावारणार्थमुपस्थापितान्तम् । तत्रापि पक्षमात्रोक्तौ मतुबर्थसम्बन्धित्वेनैव पक्षे धर्मिणि वन्हिपदस्य प्रकृतसाध्यबोधकत्वात्तद्दोषतादवस्थ्यमतः प्रकृतपदम् । न च प्रकृतपक्षान्वितस्वार्थबोधकेनाऽन्तिमपदेनोपस्थापितं यद्वन्हिस्वरूपं प्रकृतसाध्यं तत्रैव धूमपदोत्तरपञ्चम्याः स्वार्थबोधकत्वान्नोक्तप्रतिज्ञाव्युदास इति वाच्यम् । प्रकृतपक्षधर्मिकप्रकृतसाध्यान्वयबोधसाकाङ्क्षं यत्प्रकृतसाध्यबोधकं पदं तत्साकाङ्क्षा या पञ्चमी तदन्तलाक्षणिकपदवत्त्वे तात्पर्यात् । न च समवायेन नीलरूपावच्छिन्नपर्वते संयोगेन वन्हिसाध्यतास्थले नीलपर्वतो वन्हिमानित्यादिप्रतिज्ञायाः प्रकृतपक्षधर्मिकप्रकृतसाध्यप्रकारकबोधस्याऽजनकत्वात्तत्रत्यहेतावव्याप्तिः नीलरूपवतो वन्हिमतश्च तादात्म्येनैव पर्वते प्रकारीभूय भानादिति वाच्यम् । नव्यमते नीलाभिन्नपर्वते तादात्म्येन वन्हिमतः साध्यतायामेवोक्ताकारप्रतिज्ञास्वीकारात् तन्मते चैतल्लक्षणकरणादिति भावः । पर्वतो धूमाद्वन्हिमानित्यादिप्रतिज्ञाया अपि तादृशपदोपस्थापितान्वितस्वार्थबोधकपञ्चम्यन्तपदवत्त्वात्तद्वारणार्थं प्रकृतसाध्यपदम् । तथा च तत्र साध्यतावच्छेद-

विवक्षितत्वात्। यत्तु अयमात्मा ज्ञानादित्यादावव्याप्तिः शक्त्यैव ज्ञानोपस्थितिसम्भवेन लक्षणाविरहादिति। तन्न। यद्विषयकज्ञानस्य हेतुत्वादिकमवगतं तस्य व्याप्त्यादिजिज्ञासायामुदाहरणादिप्रयोगः, न वेह ज्ञानविषयत्वेनोपस्थितिर्विना लक्षणाम्, अन्यथा सुखा

कीभूतधूमज्ञाप्यवन्हित्वावच्छिन्ने धूमज्ञाप्यत्वरूपस्य पञ्चम्यर्थस्याऽन्वयान्नातिप्रसङ्गः। निरुक्तसाध्यान्वितस्वार्थबोधकलाक्षणिकपदवत्त्वोक्तौ निगमनातिव्याप्तिः तस्यापि प्रकृतसाध्यान्वितहेतुत्वलाक्षणिकपञ्चमीसत्त्वादतः पञ्चम्यन्तपदम्। न च साध्यान्वितस्वार्थबोधकसुबन्तलाक्षणिकपदवत्त्वोक्त्यापि तद्वारणसम्भवात्पञ्चमीपर्यन्तानुसरणं व्यर्थमिति वाच्यम्। तादात्म्येन रक्तसाध्यकस्य घटो रक्तस्तद्भट वादित्यादिन्यायस्य निगमने तस्माद्रक्त इत्याकारेऽतिव्याप्त्यापत्तेः तस्यापि प्रकृतसाध्यान्वितस्वार्थबोधकं यत्प्रथमैकवचनं तदन्तलाक्षणिकरक्तपदवत्त्वात् गुणशक्तरक्तपदस्य गुणिपरत्वे लाक्षणिकत्वात्। निरुक्तपञ्चम्यन्तपदवत्त्वमात्रोक्तौ तु तादृशतच्छब्दमादाय पुनर्निगमनेतिव्याप्तिरतो लाक्षणिकत्वेत्युक्तम्। न चैवमयं देशः क्रियावान् पाकादित्यत्र हेतावव्याप्तिः पाकशब्दस्य शक्तिविरहेण पाकज्ञानलक्षणत्वासम्भवात् अन्यत्रक्लृप्तपचधातोरेव प्रतीतेरिति वाच्यम्। पञ्चम्यन्तपदेन पञ्चमीसाकाङ्क्षपदस्योक्तत्वात् पाकादित्यादौ भावकृदन्तस्य पचादिधातोरपि स्वोत्तरविभक्तिसाकाङ्क्षत्वेन तत्र लक्षणासम्भवात्। यत्तु तत्र पाकशब्दान्तर्गतककारस्यैव पाकज्ञाने लाक्षणिकत्वान्नातिव्याप्तिः,एकाक्षरकोशतस्तस्यापि शक्तत्वावधारणात् वर्णान्तरस्य तत्र तात्पर्यग्राहकत्वेनैव साफल्यात्, एवमन्यत्रापीति। तच्चिन्त्यम्। अत्र निरुक्तौ प्रगल्भोक्तं दूषणं निरस्यति यस्त्वित्यादिना। ज्ञानादित्यादिना धिय इत्यादिहेतूपग्रहः। ननु ज्ञानादित्यत्र ज्ञानपदं न शक्तं सुबन्तशब्दस्य कुत्राप्यशक्तत्वात् धातोस्तु शक्त्या ज्ञानोपस्थापकत्वेपि तस्य निरुक्तपञ्चम्यन्तत्वाभावात् तथा च ज्ञानपदान्तर्गतस्य नशब्दस्य ज्ञाने लक्षणाऽऽवश्यकीत्यत आह इत्यादाविति। तथा चायमात्मा धियः इत्यादौ धीशब्द-

देरपि व्याप्त्याद्युपदर्शनप्रसङ्गात् । के चित्तु पञ्चम्यन्तलाक्षणिक-पदवत्त्वनियतावच्छेदकरूपवत्त्वं तादृशपदवत्त्वव्यभिचार्य्यवयव-तावच्छेदकशून्यावयवत्वं वा विवक्षितमित्याहुः । नव्यास्तु पञ्च-म्या ज्ञानज्ञाप्यत्वलक्षणयैवोपपत्तौ न प्रातिपदिकऽपि लक्षणा आ-काङ्क्षावैचित्र्याच्च पदार्थैकदेशेऽपि ज्ञाने प्रातिपदिकार्थो विषय-त्वेनान्वेति कर्तृकृतीव कृतौ धात्वर्थः, यद्धर्मावच्छिन्नश्च हेतुः प्रयु-

---

स्य शक्त्यैव धीविषयकज्ञानोपस्थापकत्वात्तादृशहेत्ववयवाव्याप्ति-रावश्यकीति भावः । अन्यथेति । वस्तुगत्या यद्विषयज्ञानस्य हेतु-त्वमवगतं तत्रैव तद्धियेऽपि व्याप्त्यादेरुपदर्शनीयत्व इत्यर्थः । तत्र अयमात्मा ज्ञानादित्यादौ । सुखादेरपीति । ज्ञानविषयकज्ञानस्येव सुखादिविषयज्ञानस्यापि ज्ञानत्वप्रकारेण हेतुत्वावगमादिति भावः । के चिदित्यादि । अत्र प्रतिज्ञात्वादिवारणाय नियतान्तम् । तत्रापि पञ्चम्यन्तपदवत्त्वस्य लाक्षणिकपदवत्त्वस्य वा नियतत्वोक्तौ निग-मनेऽतिव्याप्तिरतः पञ्चम्यन्तत्वविशिष्टलाक्षणिकपदवत्त्वस्यैव नियम उक्तः । प्रतिज्ञात्वादेरपि पटो न दण्डादित्यादिप्रतिज्ञायां तादृश-पदवत्त्वसामानाधिकरण्यान्नियतेति । तत्तत्प्रतिज्ञात्वव्युदासार्थमव-यवतावच्छेदकेति । हेतुत्वरूपस्य तादृशावच्छेदकस्य प्रथमं गृही-तुमशक्यत्वादाह तादृशेति । यत्साध्यकप्रतिज्ञादौ तादृशपदवत्त्वनै-यत्यं तत्रातिव्याप्तिरित्यस्वरसः कोचिदित्युक्त्या सूचितः । प्रगल्भ-दूषणं निरस्य स्वयं मूललक्षणं दूषयति नव्यास्तु इत्यादिना । न प्रातिपदिकेपीति । मानाभावादिति शेषः । तथा च हेतोः पञ्चम्य-न्तलाक्षणिकपदवत्त्वाभावादसम्भव इति भावः । ननु ज्ञानज्ञाप्यत्व-स्य पञ्चम्यर्थत्वे तदेकदेशे ज्ञाने धूमादेरन्वयो न स्यान्निराकाङ्क्षत्वा-दत आह आकाङ्क्षेति । कर्तृकृतीति । पाचक इत्यादौ ण्वुलाद्यर्थस्य कर्तुरेकदेशभूतायां कृतौ धात्वर्थपाकादिर्यथाऽन्वेतीत्यर्थः । यद्यपि गन्तव्यो ग्राम इत्यादौ कर्मकृतोऽप्येकदेशान्वयित्वम्, तथापि विषयता-सम्बन्धेनैकदेशान्वयित्वमेव प्रकृते सौसाहश्यमित्याशयेन कर्तृकृदुप-न्यासः । धूमादिपदे लक्षणायां बाधकमाह यद्धर्मेति । हे-

ज्यते आकाङ्क्षाबलात् तद्धर्मविशिष्टस्यैव व्याप्यत्वमुपदर्श्यते, अन्यथा यथार्थधूमज्ञानादित्यादिप्रयोगेऽपि धूमादेर्व्याप्यत्वोपदर्शनप्रसङ्ग इति प्राहुः ॥

तौ यद्धर्मावच्छिन्नो हि हेत्ववयवान्तर्गतधूमादिप्रातिपदिकेन बोध्यते कुतोऽस्य गमकत्वमित्याकाङ्क्षावशात्तदवच्छिन्नस्यैव व्याप्यत्वमाकाङ्क्षावशादुदाहरणेन प्रदर्श्यत इति नियमाद्धूमस्य व्याप्यतयोपन्यासो नाऽसङ्गत इत्याह अन्यथेति । तत्रस्थपञ्चम्यन्तप्रातिपदिकेन यद्विषयज्ञानं बोध्यते तस्यैव व्याप्तेः प्रदर्शनीयत्वे इत्यर्थः । यथार्थधूमज्ञानादिति । धूमयथार्थज्ञानविशेष्यत्वादित्यर्थः । धूमस्य व्याप्यतारक्षार्थं यथार्थपदम् । धूमादेरिति । हेत्वन्तर्गतधूमज्ञानपदेन तद्विषयकस्य ज्ञानस्यैव बोधनादिति भावः । यद्यपि हेतुघटकपञ्चम्यन्तप्रातिपदिकेनोपस्थापिते यद्धर्मावच्छिन्नविषयकज्ञाने तादृशपञ्चम्या ज्ञापकत्वं बोध्यते तदवच्छिन्नस्यैव व्याप्यत्वं प्रदर्श्यत इत्युक्तौ नैष दोषः यथार्थधूमज्ञानादित्यत्र प्रातिपदिकेन लक्षणया यथार्थधूमज्ञानविषयकज्ञानत्वेनोपस्थापित एव ज्ञापकत्वबोधनात् यथार्थधूमज्ञानत्वावच्छिन्नस्यैव व्याप्तेः प्रदर्शनस्यौचित्यात् । तथापि पञ्चमीलक्षणाभ्युपगमे तस्यामेव ज्ञानज्ञाप्यत्वे लक्षणया सर्वसामञ्जस्ये प्रातिपदिके लक्षणान्तरकल्पने गौरवम्, एवं हुंफडितिनिरर्थकशब्दस्य हेतुतात्पर्ये तस्य लाक्षणिकत्वानुपपत्तिः शक्तिविरहादित्येव मूलं बाधकमित्यवधेयम् ॥

इति जागदीश्यां हेतुलक्षणम् ।

इतः परमुदाहरणोपनयनिगमननिरूपणपरं मूलमनुरुद्धैव स्वातन्त्र्येण दीधितिकृता सर्वेषां लक्षणं कृतं तदनुससार च जगदीश इत्यवधेयम् ।

हेतावुक्ते कथमस्य गमकत्वमित्याकाङ्क्षायां व्याप्तिपक्षधर्मतयोः प्रदर्शनप्राप्तौ व्याप्तेः प्राथम्यात् तत्प्रदर्शनायोदाहरणम् । तत्रानुमितिहेतुलिङ्गपरामर्शपरवाक्य-

---

इतरान्वितस्वार्थबोधकत्वे सति स्वकीयं यदन्त्यभिन्नं पदं तदर्थविशेष्यकान्वयबोधजनकत्वे सति अन्त्यपदवत्त्वे सति स्वीयानन्त्यपदार्थविशेष्यकान्वयबोधाजनकान्यत्वे च सति वा न्यायावयवत्वं

न्यायतदवयवयोरिव प्रतिज्ञादीनामपि स्वातन्त्र्येण लक्षणमाह इतरान्वितेत्यादि । अत्रोदाहरणस्यापि स्वीयं यदन्त्यभिन्नं धूमवानित्यादिपदं तदर्थविशेष्यकान्वयबोधजनकत्वात्तद्वारणार्थं प्रथमसत्यन्तम् । स्वघटकपदाकाङ्क्षादिमत्पदघटितत्वे सतीति तदर्थः । अवयवान्तरस्य व्युदासार्थमाह स्वकीयमिति । भवति हि पर्वतो वन्हिमानित्यादौ स्वीयान्त्यपदभिन्नं यत्पर्वत इति पदं तदर्थविशेष्यकान्वयबोधजनकत्वं प्रतिज्ञाया इति लक्षणसमन्वयः । अन्त्यभिन्नत्वं नान्त्यसामान्यभेदः शब्दमात्रस्यैव कुतश्चिदन्त्यतया प्रतिज्ञाया असम्भवापत्तेः, किन्तु स्वघटकपदप्राक्क्षणवृत्तित्वम् । तथा च स्वकीयं यत्पदं स्वघटकपदप्राग्वर्तिपदं तदर्थविशेष्यकान्वयबोधजनकत्वे सतीत्यर्थः । तत्र स्वकीयमित्यनुक्तौ स्वघटकपदप्राक्क्षणवृत्त्युपनयस्थायंपदार्थविशेष्यकान्वयबोधजनके निगमनेऽतिव्याप्तिः स्यादतस्तदुक्तम् । न चोपनयस्थेदंपदस्यैव निगमनेऽप्यन्तर्भावात्तद्दोषतादवस्थ्यम्, तदनन्तर्भावमत एवैतल्लक्षणकरणात्। स्वीयमित्यनेन स्वेतराघटकस्य विवक्षितत्वान्नोक्तदोष इत्यप्याहुः । स्वघटकपदप्राक्क्षणवृत्तीत्यनुक्तौ स्वघटकान्त्यपदार्थविशेष्यकान्वयबोधजनकयोरुपनयनिगमनयोरतिव्याप्तिस्तदुपात्तम् । न च स्वकीयं यदाद्यपदं तदर्थविशेष्यकेत्युक्त्वाप्युपनयादिव्युदाससम्भवादन्त्यभिन्नत्वपर्यन्तप्रवेशो व्यर्थः । स्वघटकपदध्वंसाधिकरणक्षणावृत्तित्वरूपस्याऽऽद्यत्वस्य निरुक्तान्त्यभिन्नत्वापेक्षया गुरुत्वात्, नीलः

जन्यज्ञानजनकव्याप्यत्वाभिमतवन्निष्ठनियतव्यापकत्वाभिमतसम्बन्धबोधजनकशब्दत्वमुदाहरणत्वम् । सामान्यलक्षणे साध्यसाधनसम्बन्धबोधकत्वं साध्यसाधनाभावसम्बन्धबोधकत्वञ्च विशेषलक्षणद्वयम् । न्यायावय-

---

पर्वतो वह्निमानित्यादिप्रतिज्ञायामव्याप्तिप्रसङ्गाच्च । तत्र नीलपदस्यैवाद्यत्वेन तदर्थमुख्यविशेष्यकान्वयबोधजनकत्वाभावात् । मुख्यविशेष्यतापर्यन्तप्रवेशस्तु इदं द्रव्यं गुणाद्यन्यत्वे सति सत्त्वादित्यादिहेतोर्वारणार्थम्।अन्यथा तस्यापि स्वीयं यत्स्वघटकप्राग्वर्तिपदं तदर्थविषयकबोधजनकत्वेनातिव्याप्तिप्रसङ्गादिति भावः । अत्रानुयोगिनि स्वत्वघटनयाऽननुगमादनुगतं लक्षणमाह अन्त्यपदवत्त्वे इत्यादि । अत्र स्वीयं यदन्त्यभिन्नं पदं तदर्थविशेष्यकान्वयबोधजनकं यन्निगमनादिकं तदन्यत्वं धूमादित्यादिहेतावपि गतं तदीयान्त्यभिन्नपदस्याऽप्रसिद्धत्वात् पदशब्देन विभक्त्यन्तस्याऽग्रे वक्ष्यमाणत्वादतस्तद्वारणार्थमन्त्यपदवत्त्वे सतीत्युक्तम । पदद्वयघटितत्वे सतीति तदर्थः । तावन्मात्रञ्च निगमनादिष्वतिप्रसक्तमतः स्वीयानन्त्येत्यादिकमुक्तम । अत्राप्यनन्त्यत्वं स्वघटकपदप्राक्क्षणवृत्तित्वं तथा च निगमनस्यापि तादृशायम्पदार्थविशेष्यकान्वयबोधजनकत्वेन तादृशान्वयबोधाजनकभिन्नस्य वारणार्थं स्वीयपदम् । न च स्वीयं यदन्त्यपदं तदर्थविशेष्यकान्वयबोधजनकभिन्नमेव किन्नोक्तम अन्त्यशब्देन स्वघटकपदप्राक्क्षणावृत्तित्वस्य बोधनीयत्वादिति वाच्यम । गुणाद्यन्यत्वे सति सत्त्वादित्यादिहेतावतिप्रसङ्गात् तस्यापि स्वीयं यत्स्वघटकपदप्राक्क्षणावृत्ति सत्त्वादिति पदं तदर्थविशेष्यकान्वयबोधजनकत्वात्, पञ्चम्यर्थस्यैव तत्र मुख्यविशेष्यत्वात् । अत्राप्युदाहरणवारणार्थमितरान्वितस्वार्थबोधकत्वे सतीत्यनुषञ्जनीयम । तस्य च स्वाघटकपदाकाङ्क्षादिमत्पदाघटितं यद्यत्तदन्यत्वमुदाहरणभिन्नत्वमेव वार्थो नातः स्वत्वाननुगमतादवस्थ्यम । नान्वितरान्वितस्वार्थबोधकत्वे सतीत्यनेनैव हेतूपनयनिग-

वदृष्टान्तवचनमुदाहरणमिति तु न । दृष्टान्तप्रयोगस्य सामयिकत्वेनाऽसार्वत्रिकत्वात्, यो यो धूमवान् सोऽग्निमानित्येव व्याप्तिप्रतीतेः । नापि प्रकृतानुमितिहेतुलिङ्गपरामर्शपरवाक्यजन्यज्ञानविषयव्याप्त्युपनायकं वचनं तत्, उपनयातिव्याप्तेः । अत उपनयाभिधानप्रयोजकजिज्ञासाजनकवाक्यमुदाहरणम् । एतदेवान्वयव्यतिरेकव्याप्तिविषयत्वविशेषितं विशेषलक्षणद्वयमित्यन्ये । अत्र च व्यभिचारवारणाय बीप्सामाहुः । यत्र च सा-

---

प्रतिज्ञात्वम् । प्रतिज्ञाहेत्वोरुपनयननिगमनयोश्चार्थौ परस्परमन्वितौ न तूदाहरणस्य केनापि विभक्त्यन्तं पदं तेन निगमने नातिव्याप्तिः ।

मनानां व्युदाससम्भवात्स्वीयं यदन्त्यभिन्नं पदमित्यादिकं व्यर्थमत आह प्रतिज्ञाहेत्वोरिति । नन्वेवं तावन्मात्रमेवास्तु इतरान्वितेत्यादिकं व्यर्थमत आह न तूदाहरणस्येति । केनापीति । अन्वय इति शेषः । तथा च तद्धारणार्थमेवेतरान्वितेत्यादिकमिति भावः । ननु पदत्वं शक्तिमत्त्वं तथा च तस्मात्पाचक इत्यादिनिगमने लक्षणद्वयस्याप्यतिव्याप्तिः तस्यापि ण्वुलाद्यात्मकं यत्स्वीयान्त्यभिन्नं पदं तदर्थविशेष्यकान्वयबोधजनकत्वात् प्रथमाविभक्तेरेव तत्रान्तिमपदत्वादत आह पदं विभक्त्यन्तमिति । स्वीयं यत्स्वघटकपदप्राग्वर्ति पदं तदर्थविशेष्यकेत्यत्रोभयत्रैव पदं विभक्त्यन्तरूपं ग्राह्यमित्यर्थः । न च स्वीयं यत्स्वघटकस्य विभक्त्यन्तपदस्य प्राग्वर्ति शक्तपदं तदर्थविशेष्यकत्वप्रवेशेनैव उक्तनिगमनव्युदासादन्तिमपदस्य विभक्त्यन्तरूपस्य प्रवेशो व्यर्थ इति वाच्यम् । कायपूर्वभागसाध्यकस्य अयं पूर्वकायो मस्तकत्वादित्यादिन्यायस्य निगमने तस्मात्पूर्वकाय इत्या-

मानाधिकरण्यादेव व्याप्तिस्तत्र न वीप्सा, केवलान्वयि-न्यभेदानुमाने च वीप्सायामपि व्यभिचारतादवस्थ्यमिति तु वयम् । वीप्सा च यत्पदे न तु तत्पदेऽपि, विरूपोपस्थितयोरपि तत्पदेन परामर्शाद्बुद्धिस्थत्वाचकत्वादिति न व्युत्पत्तिविरोधः, यथा यद्यत् पापं प्रतिजहीत्यत्र । इदञ्च साध्यसाधनोभयाश्रयाविकलानुपदर्शितान्वयविपरीतोपदर्शितान्वयानुपदर्शितव्यतिरेकविपरीतोपदर्शितव्यतिरेकभेदादाभासरूपमिति ॥

कारेऽतिव्याप्त्यापत्तेः तस्यापि स्वघटकं यद्विभक्त्यन्तं कायपदं तत्प्राग्वर्तिपूर्वशब्दार्थीभूत पूर्वभागविशेष्यकान्वयबोधजनकत्वात्, पूर्वकायादितत्पुरुषस्य पूर्वपदार्थप्रधानत्वात् । इत्थञ्च पूर्वशब्दस्य विभक्त्यन्तत्वाभावान्न तत्राऽतिप्रसङ्गः । अत एव प्रथमस्यैव पदस्य विभक्त्यन्तरूपस्य निवेशादुपनयवारणादाद्यस्याग्रिमस्य च विभक्त्यन्तरूपपदस्य निगमनमात्रवारणं प्रयोजनमित्याशयेन निगमनव्युदास इत्येवोक्तम् । अन्यथा उपनयस्यापि स्वघटकं यत्प्रथमास्वरूपं पदं तत्प्राक्क्षणवृत्तीदम्पदार्थविशेष्यकबोधजनकतया निरुक्तलक्षणस्य तत्राप्यतिव्याप्तत्वात् तद्वारणार्थमपि प्रथमविभक्त्यन्तदलनिवेशाद्यौक्त्ये निगमनमात्रव्युदासाभिधानं विरुद्ध्यते । न चैवं पूर्वकायो द्रव्यमित्यादिप्रतिज्ञायामव्याप्तिः पूर्वपदस्य विभक्त्यन्तत्वाभावेनान्त्यभिन्नपदत्वाभावादिति वाच्यम् । तत्र कार्यशब्दस्येव पूर्वकायभागस्यापि विभक्त्यन्तत्वात् तदुपस्थाप्यविशिष्टार्थविशेष्यतामादायैव लक्षणसामञ्जस्यादिति भावः । यद्यप्येवमपि लक्षणद्वयस्यैव तस्मान्नेतराणीत्यादिनिगमनातिव्याप्तिः तस्य स्वीयं यदन्त्यभिन्नं नञ्पदं तदर्थविशेष्यकान्वयबोधजनकत्वात् नञोऽपि विभक्त्यन्तत्वस्यानुशिष्टत्वात् । न चाऽव्ययभिन्नत्वेन श्रूयमाणविभक्ति-

उदाहरणानन्तरं भवतु व्याप्तिस्तथापि व्याप्तं किं पक्षे वर्त्तते न वेत्याकाङ्क्षायां व्याप्तस्य पक्षधर्मत्वप्रदर्शनायोपनयः । तत्रानुमितिकारणतृतीयलिङ्गपरामर्शजनकावयवत्वमुपनयत्वमिति सामान्यलक्षणम् । साध्यव्याप्यविशिष्टपक्षबोधकावयवत्वं साध्याभावव्यापकाभावप्रतियोगिमत्पक्षबोधकावयवत्वञ्च विशेषलक्षण-

---

प्रकृतपक्षान्वितस्वार्थबोधकपदोपस्थापितार्थान्वितस्वार्थबोधकन्यायावयवत्वं हेतुत्वम्।निगमनवारणाय उपस्थापितान्तम् । प्रमेयत्वम-

---

कजातीयत्वेन वा पदं विशेषणीयम्, दिवा प्रमेयमित्यादिप्रतिज्ञायामव्याप्तेः दिवाशब्दस्याव्ययत्वात् तदुत्तरविभक्तिमात्रस्यैवाश्रूयमाणत्वाच्च । तथाप्यन्त्यभिन्नं यत्पदं तदर्थविशेष्यत्वं स्वीयान्त्यपदार्थानवच्छिन्नत्वेन विशेषणीयमित्यदोषः । के चित्तु अन्त्यभिन्नं पदं नञादिभिन्नत्वेनापि विशेष्यमतो नोक्तदोषः । न चैवं न पटत्वं घटे इत्यादिप्रतिज्ञायामव्याप्तिः पटत्वाभावो घटवृत्तिरित्याकारकबोधे नञर्थस्य विशेष्यत्वादिति वाच्यम् । सुबर्थद्वयोर्मिथोऽन्वयस्याऽव्युत्पन्नतया हेत्वर्थान्वयासम्भवेन घटो दण्डादित्यादेरिव न पटत्वं घटे इत्यादिप्रतिज्ञाया अपि सम्प्रदायविरुद्धत्वात् । वस्तुतो नञादिनिपातानां स्वोत्तरविभक्त्यर्थान्वयित्वस्य अदृष्टचरत्वात्तेषां विभक्त्यन्तत्वे प्रमाणाभावादेव नोक्तातिव्याप्तिः, अत एव भूतले प्रमेयं नेत्यादिको न प्रयोगः । अन्यथा नञः प्रथमान्तत्वे तत्समानविभक्तिकप्रमेयपदसत्त्वात् प्रमेयात्मकोऽभावो भूतलवृत्तिरित्यभेदान्वयमादाय तादृशप्रयोगस्य योग्यतापत्तेरित्याहुः । तच्चिन्त्यम् । कथितरीत्यापि तस्मादन्यो घटादित्यादिनिगमनातिव्याप्तेर्दुरुद्धरत्वादिति दिक् । प्रकृतपक्षेत्यादि । प्रकृतपक्षान्वितस्वार्थबोधकं यत्पदं तदुपस्थापितार्थान्वितो

दूयम् । उदाहरणान्त एव प्रयोग इति न वाच्यम् । तृतीयलिङ्गपरामर्शस्य व्याप्तिपक्षधर्मतावगाहिनोऽवयवान्तरादलाभात्, तदनभ्युपगमेऽपि पक्षधर्मताया अलाभात् । न च हेतुवचनादेव तदवगमः, तस्य को हेतुरित्याकाङ्क्षायां प्रवृत्तत्वेन हेतुस्वरूपोपस्थापकस्यातत्परत्वात् । वादिवाक्यादेवाक्षेप इति चेन्न । तदर्थस्यासि-

---

भिधेयं प्रमेयत्वात् इत्यादौ प्रकृतार्थपक्षान्वितस्वार्थबोधकपञ्चम्यर्थान्वितो न प्रतिज्ञार्थः अपि तु तदेकदेशार्थः इति स्वार्थविशि-

---

यः स्वार्थस्तद्बोधकावयवत्वमित्यर्थः । ननु इतरान्वितस्वार्थबोधकावयवत्वमेव सम्यक् किमुपस्थापितान्तेन इत्यत आह निगमनवारणायेति । अन्यथा तस्याप्युपनयार्थान्वितस्वार्थबोधकपदवत्त्वादतिव्याप्त्यापत्तेः इति भावः । स्वार्थप्रकारकबोधजनकत्वविवक्षयाप्युपनयवारणसम्भवान्निगमनपर्यन्तानुसरणम् । साध्यव्याप्यहेतुमत्त्वप्रकारेण पक्षान्वितस्वार्थबोधकं यदिदंपदं तदुपस्थापितान्वितस्वार्थबोधकत्वं निगमनस्यास्त्येव इत्यतः प्रकृतपदम् । तथा चेदंपदस्य पक्षतावच्छेदकविशिष्टपक्षान्वितस्वार्थबोधकत्वाभावात्तदुपादाय निगमने नातिव्याप्तिः । स्वार्थपदमप्यत एव, अन्यथा प्रकृतपक्षान्वितव्याप्यवत्त्वान्वयबोधजनकेन उपनयस्थायम्पदेनोपस्थापितान्वितस्वार्थबोधके निगमन एवातिव्याप्त्यापत्तेः । स्वार्थ इत्युक्तौ तु व्याप्यवत्त्वादेरिदंपदार्थत्वाभावान्न दोषः । स्वयमेव चरमस्वार्थपदस्य व्यावृत्तिमाह प्रमेयत्वमित्यादिना । तदेकदेशार्थ इति । तथा चोक्तप्रतिज्ञावारणार्थमेव द्वितीयं स्वार्थपदमिति भावः । इदमुपलक्षणम् । प्रकृतपक्षान्वितस्वार्थबोधकवन्ह्यादिपदोपस्थापितवन्ह्याद्यन्वितस्य धूमादिज्ञाप्यत्वस्य तस्मादित्यंशेन बोधके निगमनेऽतिव्याप्तिवारणार्थमपि

द्धत्वेनाऽनाक्षेपकत्वात् । अन्यथा प्रतिज्ञामात्रादेव सर्वाक्षेपेऽवयवान्तरविलयात् । प्रतिपाद्यानां स्वत एव तदवगम इति चेन्न । तेषां व्युत्पन्नाव्युत्पन्नतया सर्वत्र तदसम्भवात् प्रतिपादकेन स्वव्यापारस्य निर्वाहयितुमुचितत्वाच्च । अन्यथावयवान्तरेऽप्येवं प्रसङ्गादिति ॥

ष्टवैशिष्ट्यबोधजनकन्यायावयवत्वं विशिष्टवैशिष्ट्यबोधजनकस्वार्थोपस्थितिजनकन्यायावयवत्वं विशिष्टबोधजनकस्वार्थविशिष्टबोधजनकन्यायावयवत्वं वा तत्त्वम् । एकवाक्यतया हेत्वर्थविशिष्टसाध्यस्य वैशिष्ट्यं भासते न पुनरवयवान्तरार्थविशिष्टस्य कस्यचिदिति । इतरान्वितस्वार्थाबोधकन्यायावयत्वम् उदाहरणत्वम् ।

द्वितीयं स्वार्थपदं द्रष्टव्यम् । ननूपनयेऽतिव्याप्तपदमिदं लक्षणं तस्यापि वाक्यैकवाक्यतया प्रकृतपक्षान्वितस्वार्थबोधकं यन्निगमनस्थसाध्यपदं तदुपस्थापितार्थान्वितस्वार्थबोधकत्वात् । न चान्वितस्वार्थबोधकेत्यत्र स्वार्थप्रकारकबोधजनकत्वविवक्षणान्नातिव्याप्तिः उपनयार्थस्य निगमनार्थे विशेष्यत्वेनैव भानादिति वाच्यम् । प्रमेयत्वमित्यादिप्रागुक्तग्रन्थविरोधापत्तेः तत्र प्रतिज्ञैकदेशार्थस्यापि विशेष्यतया एव भानादतिव्याप्त्यसम्भवात्, किञ्च गोत्वाभावः प्रमेयो गोत्वाभावादित्यादिस्थलीये निगमनेतिव्याप्तिः तस्यापि हेतुविधया प्रकृतपक्षान्वितस्वार्थबोधकं यत्प्रमेयत्वव्याप्यगोत्वाभाववानयमित्याकारकोपनयस्थायम्पदं तदर्थान्वितस्वार्थबोधकत्वादित्यतो लक्षणान्तरमाह स्वार्थविशिष्टेत्यादि । निगमनस्यापि धूमादिज्ञाप्यत्वविशिष्टसाध्यवैशिष्ट्यबोधजनकत्वात्स्वार्थपदम् । स्वार्थविशिष्टबोधजनकत्वमपि निगमनेऽतिप्रसक्तमतो वैशिष्ट्यपदम् । विशिष्टवैशिष्ट्येति । विशिष्टवैशिष्ट्यबोधजनिका या स्वार्थोपस्थितिस्तज्जनका-

उपनयानन्तरं निगमनम् । तच्चानुमितिहेतुलिङ्ग-परामर्शप्रयोजकशाब्दज्ञानकारणव्याप्तिपक्षताधीप्रयुक्तसाध्यधीजनकं वाक्यम् । न च व्याप्तिपक्षधर्मतयोश्चतुर्भिरेवावयवैः पर्य्याप्तेः किं तेनेति वाच्यम् । अबाधितासत्प्रतिपक्षत्वयोरलाभे चतुर्णामप्यपर्य्यवसानात् । अथाऽभिधानाभिधेययोर्व्याप्तिपक्षधर्मतावल्लिङ्गप्रतिपादनादेव पर्य्यवसानेनाऽवयवान्तराणां निराकाङ्क्षत्वं विपरीतशङ्कानिवृत्तेरपि तत एव लाभात्, अन्यथा निगमनेनापि तदवारणात्, न हि तद्विशेषदर्शनमनादृत्यैव तन्निवर्त्तकम्। सिद्धनिर्देशतया वारयतीति चेन्न । स्वरूपमात्राभिधानात् साध्यत्वानुपस्थितौ तस्मादिति हेतुविभक्त्यनन्वयप्रसङ्गाच्चेति चेन्न । व्याप्तिपक्षधर्मताज्ञानेऽपि

अन्वयव्याप्तिबोधकतत्त्वं व्यतिरेकव्याप्तिबोधकतत्त्वञ्च विशेषलक्ष-

---

वयवत्वमित्यर्थः । धूमज्ञाप्यत्वादिविशिष्टवन्ह्यादिवैशिष्ट्यबोधं प्रत्यपि विशेषणज्ञानविधया धूमज्ञाप्यतामात्रबोधस्य हेतुत्वात् धूमादित्यादिहेतौ लक्षणसमन्वयः । पदव्यावृत्तिस्तु पूर्ववत् । विशिष्टबोधेत्यादि । विशिष्टबोधजनको यः स्वार्थविशिष्टबोधस्तज्जनकावयवत्वमर्थः । पर्वतो ज्ञाप्यवन्हिमानित्येवं विशिष्टबोधे वन्हिर्धूमज्ञाप्य इति स्वार्थविशिष्टबोधस्य हेतुत्वाद्धूमादित्यादिहेतौ लक्षणसङ्गमः । हेतौ लक्षणं योजयति एकवाक्यतयेति। प्रतिज्ञैकवाक्यतयेत्यर्थः । कस्य चिदिति । वैशिष्ट्यं भासते इति पूर्वेणाऽन्वयः । अन्वयव्याप्तिबोधकतामात्रस्य अन्वय्युपनयसाधारणत्वादाह तत्त्वमिति । उदाहरण-

बाधसत्प्रतिपक्षबुद्धेः साध्यज्ञानानुत्पत्तिदर्शनाद् तदभावाबोधने समीहितानिर्वाहात् । अथ बाधादिविरहस्य प्रयोजकत्वं न तु तद्बोधस्य, मानाभावादसिद्धेश्च इति किमर्थं बाधादिविरहो बोधनीय इति चेन्न । यदवगमे सति यन्न भवति तत्तदभावज्ञानसाध्यमिति व्याप्तेः । न चानन्वयः, तस्मादित्यन्वयबलादेव हेत्वाकाङ्क्षितत्वलक्षणसिद्धत्वज्ञानात्, न त्वन्वयात् पूर्वम्। इह के चित् यथा तस्मादिति सर्वनाम्ना हेतोः परामर्शः पूर्वोक्ताशेषरूपलाभाय तथा साध्यांशस्यापि तथा इति सर्वनाम्ना सिद्धस्थल इव विरोधादिवारणाय युक्त

द्वयमा इतरोपस्थापितार्थविशेषणकस्वार्थबोधकन्यायावयवत्वं स्वार्थ-

---

त्वमित्यर्थः । न चान्वयव्यतिरेक्युदाहरणातिव्याप्तिः, व्यतिरेकव्याप्त्यबोधकत्वेनापि विशेषणीयत्वात् । वस्तुतः शिरोमणिमते व्याप्त्यबोधकमुदाहरणमेव नास्ति कुतोऽस्य गमकत्वमित्याकाङ्क्षाया प्रथमोक्तव्याप्त्यवगमादेव निवृत्तौ व्याप्त्यन्तराभिधानस्य निराकाङ्क्षतयाऽनौचित्यात् । अत एव प्रतिज्ञालक्षणे स्वयमेवोक्तं नैकदोभयव्याप्त्युपन्यासोपीति, अत एव चान्वयव्यतिरेक्युदाहरणस्य विशिष्य लक्षणाकरणादीधितेन्यूनत्वमित्यपि नाशङ्कनीयम् । न चैवमुदाहरणस्येव हेत्ववयवस्यापि अन्वयिव्यतिरेकिभेदेन लक्षणद्वयस्यौचित्यात्तदकरणे न्यूनतैव ग्रन्थस्येति वाच्यम् । अन्वय्युदाहरणपूर्वावयवत्वादिरूपस्यान्वयिहेत्वादिलक्षणस्य अन्वय्युदाहरणादिग्रहोत्तरमर्थवशसम्पन्नत्वात् । अत एव अन्वय्युपनयादेरपि लक्षणं न वक्ष्यते । तत्राप्यन्वय्युदाहरणोत्तरावयवत्वादेरेव तल्लक्षणस्याऽर्थतः प्राप्य-

इत्याहुः। तन्न। तथेति स्वरूपे, प्रकारे, सादृश्ये, वा। आद्ये तथा चायमिति प्रक्रमात् तथेति हेतुमानित्यर्थः स्यात्, तथा चानन्वयः, न हि हेतुमत्त्वादेव हेतुमत्त्वमित्यन्वितम्। न द्वितीयः, सामान्येन पक्षस्यापि अन्वयव्याप्तौ प्रवेशात् तत्प्रकारान्वयस्तत्रैवेत्यनन्वयात्। अत एव न तृतीयोऽपि, अभेदानुमाने चान्वयिनि तस्मात्तथेति सादृश्याभावात् बहूनाञ्च प्रक्रमे विशेष्यानन्वयात् वादिवाक्ये च योग्यतान्वयेऽतिप्रसङ्गात्। तस्मादित्यत्र तु विभक्त्यर्थानन्वयादेव नियमः, तस्मादनित्य

विशेष्यकेतरार्थान्वयबोधजनकन्यायावयवत्वं वोपनयत्वम्। अन्यवार्थविशेष्यकस्वार्थबोधजनकन्यायावयवत्वं निगमनत्वम्। हेत्वर्थश्च

त्वादिति भावः। इतरेत्यादि। यद्यपि साध्यांशे हेत्वर्थविशेष्यको यः स्वार्थविधेयको बोधस्तज्जनकत्वं प्रतिज्ञायामतिप्रसक्तम्। न चेतरोपस्थापितार्थविषयकस्वार्थविशेष्यकबोधजनकत्वविवक्षणान्नातिव्याप्तिः प्रतिज्ञार्थस्य वन्हिविशिष्टपर्वतत्वाद्यवच्छिन्नस्य हेत्वर्थविशेष्यकत्वादिति वाच्यम्। विशेषणकान्तवैयर्थ्यापत्तेः स्वार्थविशेष्यकान्वयबोधजनकत्वस्यैव सम्यक्त्वात्। तथापि इतरोपस्थापितार्थनिष्ठविशेषणतानिरूपितस्वार्थनिष्ठविषयताकबोधजनकन्यायावयवत्वमित्यर्थो विवक्षितस्तथा च प्रतिज्ञावारणाय स्वार्थेति, अवयवान्तरवारणाय निरूपितान्तं स्वार्थविषयताविशेषणम्। विशेषणविशेष्यभावव्यत्यासेन लक्षणान्तरमाह स्वार्थेत्यादिना। स्वार्थनिष्ठविषयतानिरूपितेतरप्रकारताकबोधजनकन्यायावयवत्वमित्यर्थः। स्वार्थविशेष्यकत्वप्रवेशे तादृशबोधजनकतामात्रस्यैव सम्यक्त्वे शेषवै-

इत्यभिधाने विशिष्य सिद्धतावगम्यते पूर्वं साध्यतयोक्तस्य समर्थहेतुसम्बन्धेन पुनरुत्कीर्त्तनात्, अन्यथा तद्वैयर्थ्यात् । संशयप्रयोजनादयस्त्ववयवलक्षणाभावादेव नावयवाः, किन्तु न्यायाङ्गतयोपयुज्यन्त इति नाधिक्यम् । कण्टकोद्धारस्य च न सार्वत्रिकत्वं समयविशेषोपयोगित्वादिति ॥

प्रतिज्ञार्थे न विशेषणत्वेनान्वेति किन्तु तदेकदेशार्थ इत्युक्तप्रायम् ॥

थर्थापत्तेरिति ध्येयम् । अवयवार्थेति । अवयवार्थविशेष्यकस्वार्थप्रकारकबोधजनकावयवत्वमर्थः । स्वार्थप्रकारकबोधजनकत्वं हेतावपीत्यतो विशेष्यकान्तम् । अवयवार्थविशेष्यकबोधजनकत्वमुपनयस्यापीत्यतः स्वार्थप्रकारकेति । ननूपनयलक्षणस्य प्रतिज्ञायामतिव्याप्तिः तस्यापि हेत्वर्थविशेषणकबोधजनकत्वात्, एवं निगमनलक्षणस्य हेतावतिव्याप्तिः तस्यापि प्रतिज्ञार्थविशेष्यकस्वार्थप्रकारकबोधजनकत्वादत आह हेत्वर्थश्चेति । प्रतिज्ञार्थे वह्निविशिष्टपर्वतादौ । तदेकदेशे वह्न्यादौ । उक्तप्रायमिति । पञ्चम्यर्थान्वितो न प्रतिज्ञार्थः किन्तु तदेकदेशार्थ इत्येव प्रागुक्तं न तु हेत्वर्थान्वितो न प्रतिज्ञार्थ इत्युक्तमित्याशयेनाह प्रायमिति ॥

इति श्रीजगदीशतर्कालङ्कारविरचिता
अवयवदीधितिव्याख्या समाप्ता ॥

चिन्तामणेः सामान्यनिरुक्तिः ।

अथ हेत्वाभासास्तत्त्वनिर्णयविजयप्रयोजकत्वान्निरूप्यन्ते ।

तत्रानुमितिकारणीभूताभावप्रतियोगियथार्थज्ञानविषयत्वम्,

दीधित्याः सामान्यनिरुक्तिः ।

एतावता प्रबन्धेन सपरिकर हेतुं निरूप्य तत्प्रसङ्गात् तत्त्वनिर्णयादिरूपतत्कार्य्यकारित्वाच्च तदाभासनिरूपणं प्रतिजानीते अथेति ।

अनुमितीति । यथाश्रुतमिदं हेतुदोषाणां लक्षणम् । तद्वत्त्वञ्च

जागदीश्याः सामान्यनिरुक्तिः ।

परिकरः सहकारी, स च व्याप्तिपक्षधर्मतादिः । तत्प्रसङ्गादिति । तेन हेतुना विरोधादिसम्बन्धेन स्मारितस्योपेक्षाऽनर्हत्वादित्यर्थः । तत्त्वनिर्णयादीत्यादिना विजयादेः परिग्रहः । तत्कार्य्येति । सद्धेतुकार्य्येत्यर्थः । स्वहेतोस्सद्धेतुत्वव्यवस्थयेव प्रतिवादिहेतोराभासत्वव्यवस्थापनयापि तत्त्वनिर्णयाद्युत्पत्तेः, तथा चैककार्य्यकारित्वमपि सङ्गतिः सम्भवतीति भावः ।

मनु निरुक्तयथार्थज्ञानस्य विषयतामात्रं समूहालम्बन-

दुष्टहेतूनाम्। तदभिप्रायेणैव उपधेयसङ्करेऽपीत्यादि वक्ष्यति। तत्रानुमितिपदम् अनुमितिनिष्ठकार्य्यतानिरूपकसम्बन्धित्वेनानुमितितत्कारणज्ञानपरम्, साध्यव्याप्यहेतुमान् पक्षः, साध्यवानित्याका-

---

विषयतामादायोदासीनेऽतिप्रसक्तमतो यथार्थज्ञाननिष्ठस्यानुमितिकारणीभूताभावप्रतियोगित्वस्य विषयविधयाऽवच्छेदकत्वमेवार्थो वाच्यः स च ह्रदो वन्हिमान् धूमादित्यादौ बाधितहेतावव्याप्त इत्यत आह यथाश्रुतेति। ज्ञाननिष्ठानुमितिप्रतिबन्धकतावच्छेदको यो बाधाद्यात्मको दोषो येन केनापि सम्बन्धेन तद्वत्त्वमिति वक्ष्यमाणमिश्रोक्तविवक्षादरे तु दुष्टलक्षणमपि सम्भवतीत्यभिप्रायेणोक्तं यथाश्रुतमिति। तथा च दुष्टहेतोरलक्ष्यत्वात्तत्राव्याप्तिर्न क्षतिकरीति भावः। नन्वेवं दुष्टहेतूनां प्रागनुपक्रान्तत्वात्ते च पक्षेत्यग्रिममूलेन तेषां विभागोऽसङ्गत इत्यत आह तद्वत्त्वं चेति। तादृशविषयवत्त्वं चेत्यर्थः। दुष्टहेतूनामित्यस्य लक्षणमिति पूर्वेणान्वयः। तथा चानुमितिकारणीभूताभावप्रतियोगियथार्थज्ञानस्य विषयो यत्रेति व्युत्पत्त्या दुष्टहेतोर्लक्षणमवगत्यैव तेषामग्रे विभाग इति भावः। तदभिप्रायेणैवेति। दोषलक्षणाभिप्रायेणैवेत्यर्थः। अन्यथा दुष्टहेतूनां लक्ष्यत्वे विरुद्धादिहेतोर्व्यभिचारित्वनियमात् पृथग् विभागो न स्यान्मिथो व्यावर्त्तकानां धर्माणामेव विभाजकत्वादिति भावः। ननु व्यभिचारादीनां ज्ञानस्यानुमित्यप्रतिबन्धकत्वात्तत्राव्याप्तिरत आह तत्रेत्यादि। अनुमितिपदमनुमितितत्कारणपरमित्यन्वयः। अनुमितिपदेनानुमितित्वादिप्रत्येकरूपेणोभयबोधने युगपदवृत्तिद्वयविरोध इत्यत आह अनुमितीति। अनुमितिनिष्ठकार्यतायां यन्निरूपकं तत्सम्बन्धित्वेनेत्यर्थः। तथा चानेन रूपेणाऽजहत्स्वार्थलक्षणेति भावः। निरूपकत्वं चामुकनिष्ठकारणतायां इयं कार्यत्यनुभवसाक्षिकस्वरूपसम्बन्धविशेषः, तत्सम्बन्धित्वञ्चानुमितितत्कारणयोरुभयोरेव। केचित्तु अनुमितिनिष्ठकार्यतानिरूपकमनुमितिकारणत्वं तत्सम्बन्धित्वेनेत्यर्थः। परामर्शे तदाश्रयत्वस्यानुमितौ तन्निरूपितकार्यत्वस्य सत्त्वात्। वस्तुतस्तु अनुमितिनिष्ठकार्यतानिरूपकेत्यत्र, बहुव्रीहितोऽनुमितिनिष्ठकार्यतानिरूपितसम्बन्धवत्त्वलाभादाश्रयत्वे प्रतियोगित्वे

रानुमितिपरं वा। तेनैकत्र हेतौ व्यभिचारादिग्रहेऽप्यन्यस्य परामर्शादनुमित्युत्पादेन व्यभिचाराद्व्याप्त्यादिज्ञानेनाऽन्यथासिद्धत्वाच्च व्यभिचारादिग्रहाभावस्यानुमित्यजनकत्वेऽपि न क्षतिरिति वदन्ति। पर्वतो निर्वह्निर्धूमो वह्नेरभिधेयत्वं वा मेयत्वस्य व्यभिचारीत्यादिभ्रमादनुमितिप्रतिबन्धादाह यथार्थेति।

ननु प्रतिबन्धकज्ञानविषयव्यभिचारादिघटकसाध्यादेरपि

च निरूपकत्वस्यासत्त्वेपि न क्षतिः, निरूपितत्वस्यैव तत्र सत्त्वादित्याहुः॥ अत्रानुमितिपदस्य लाक्षणिकत्वापातादाचार्यीयमनुमितिमात्रस्यैव लिङ्गोपधानपक्षमनुसृत्य मूलं व्याचष्टे साध्यव्याप्येत्यादिना। मणिकारमताभिप्रायेणैव तदुव्याख्यायान्तु सर्वत्र भ्रमानुमितौ मानाभावेन यत्रोक्तरीत्या विशिष्टानुमितिः कदापि नोत्पन्ना तत्रत्यदोषेष्वव्याप्तिप्रसङ्गात्। अत एव पक्षः साध्यवान् साध्यव्याप्यवांश्चेति समूहालम्बनानुमितिर्नोपात्ता। लिङ्गोपधानमते तु सर्वत्र तादृशानुमतेरावश्यकत्वेन नाव्याप्तिस्तदवस्था। न च ह्रदो वह्निमान् घटत्वादित्यादौ वन्ह्यभाववद्घटेऽतिव्याप्तिः घटत्ववति वन्ह्यभाववत्तानिश्चयस्यापि घटत्ववद्भ्रदो वह्निमानित्यनुमितिविरोधित्वादिति वाच्यम्। साधनवन्निष्ठसाध्याभावस्य व्यभिचारत्वेन मणिकारमते तस्य लक्ष्यत्वादिति ध्येयम्। व्यभिचारादिति। व्यभिचारादिग्रहाभावस्यानुमित्यजनकत्वेऽपीत्यग्रेणान्वयः। ननु तद्धेतुकानुमितिं प्रति तद्धेतौ व्यभिचारज्ञानाभावस्य हेतुत्वं वाच्यमतो न व्यभिचार इत्यत आह व्याप्त्यादीति। [यद्वा कारणताघटकनियमांशस्य व्यतिरेकं प्रदर्श्यानन्यथासिद्धत्वाभावमाह व्याप्त्यादीति] न क्षतिः न व्यभिचारादावव्याप्तिः। पर्वतो निर्वह्निरित्यादि। भ्रमादिति योजना। धूमो वह्नेर्व्यभिचारीत्यग्रेऽन्वयः। यथार्थेतीति। नच पर्वतो निर्वह्निरित्यादिज्ञानस्याप्यंशतो यथार्थत्वात् तद्विषयेऽतिव्याप्तितादवस्थ्यमिति वाच्यम्। यथार्थपदेन भ्रमसामान्यभिन्नत्वस्य विवक्षितत्वादिति भावः।

साध्यादिघटितव्यभिचारस्य हेत्वाभासपदवाच्यत्वे सा-

यद्विषयत्वेन लिङ्गज्ञानस्यानुमितिप्रतिबन्धकत्वम्, ज्ञायमानं सदनुमितिप्रतिबन्धकं यत् तत्त्वं वा हेत्वाभासत्वम् ।

प्रत्येकं हेत्वाभासतापत्तिः । अथ विशिष्टविषयकज्ञानं प्रतिबन्धकं तदघटकञ्च न विशिष्टमिति चेत्तर्हि यथार्थेति व्यर्थं भ्रमविषयविशिष्टस्याऽप्रसिद्धत्वादिसनुशयेनाह यदिति । केचित्तु दुष्टानामेव हेतूनामेतानि लक्षणानि तत्र तृतीयमिव प्रथममपि ज्ञायमानव्यभिचारादेः प्रतिबन्धकत्वमभ्युपेत्य तदर्थश्च तादृशाभावप्रति-

---

ध्यादेरपि तत्त्वमिष्टमेवेत्यतः प्रत्येकमित्युक्तम् । ननु यादृशविशिष्टविषयकत्वेनानुमितिप्रतिबन्धकत्वं यथार्थज्ञानविषयीभूततादृशविशिष्टत्वं विवक्षितमतः साध्यादौ नातिव्याप्तिरित्याशयेन शङ्कते अथेति । तदघटकं चेति । व्यभिचारादिघटकीभूतसाध्यादिकं चेत्यर्थः । न विशिष्टं न प्रतिबन्धकतावच्छेदकीभूतविशिष्टस्वरूपमित्यर्थः । [अप्रसिद्धत्वादिति । भ्रमविषयखण्डशःपदार्थविषयकत्वस्य विवक्षणीयप्रतिबन्धकतानतिरिक्तवृत्तित्वाभावात् यथार्थपदं प्रकारान्तरेण सार्थकं कुर्वतां मिश्राणां मतमाह केचिदिति । नन्वेवं बाधितेऽव्याप्तिरित्यत आह तत्रेति । ननु एतावतैव कथं यथार्थपदसार्थक्यमत आह] तृतीयमिवेति । ज्ञायमानं सदित्यादिकमिवेत्यर्थः । ज्ञायमानव्यभिचारादेरिति । साधनधर्मिकज्ञानीयप्रकारत्वाविशिष्टसाध्याभाववद्वृत्तित्वादेरित्यर्थः । यद्यपि अनुमितिकारणीभूताभावस्य प्रतियोगि यत्रेति व्युत्पत्त्याऽनुमितिकारणीभूताभावप्रतियोगिज्ञानप्रकारीभूतव्यभिचारादेर्लोभसम्भवात् ज्ञायमानस्य व्यभिचारादेः प्रतिबन्धकत्वाभ्युपगमो न युक्तः, तथापि व्यधिकरणबहुव्रीहेः प्रयोगानुसारितया सर्वत्राव्युत्पन्नत्वादिदमुक्तम् । नन्वेतावता कथमव्याप्तिनिरास इत्यत आह तदर्थश्चेति । प्रथमल-

योगिनो ये व्यभिचारादयस्तत्प्रकारकयथार्थज्ञानविषयत्वम्। अग्रे च तत्त्वमित्यस्य तद्वत्त्वमित्यर्थः। आद्यस्यैव वा दुष्टहेतुलक्षणत्वमिति माहुः। लिङ्गमविवक्षितम्। यद्विषयत्वेन यादृशविशिष्टविषयत्वेन।

क्षणार्थश्चेत्यर्थः। तादृशाभावेति। अनुमितिकारणभूताभावेत्यर्थः। व्यभिचारादय इति फलितार्थकथनं तादूप्येणाप्रवेशात्। तत्प्रकारकेति। एतन्मते साध्याभाववद्वृत्तित्वमेव व्यभिचारः तथा च वाच्यं प्रमेयत्वादित्यादिसद्धेतोरनुमितिविरोधिनः साध्यासामानाधिकरण्यस्य भ्रमविशेष्यतामादाय प्रमेयत्वादिसद्धेतावतिव्याप्तिवारणाय यथार्थपदम्। न चैवमपि निर्वह्निवृत्तित्वादेः कालिकादिसम्बन्धेन यथार्थज्ञानमादाय, सद्धेतावतिव्याप्तितादवस्थ्यम्, यादृशसम्बन्धेन ज्ञायमानस्य प्रतिबन्धकत्वं तादृशसम्बन्धेन तत्प्रकारकयथार्थज्ञानस्योक्तत्वात्। न च ह्रदो धूमत्ववान् धूमादित्यत्र बाधितहेतावव्याप्तिः पक्षे धूमत्वाभावस्वरूपबाधस्य धूमहेतौ स्वरूपसम्बन्धेन यथार्थज्ञानासम्भवादिति वाच्यम्। साधननिष्ठव्यभिचारादेर्यथार्थज्ञानमादायैव तत्र लक्षणसङ्गमादिति भावः। ननु दुष्टहेतोरेव लक्ष्यत्वे द्वितीयादिनिरुक्तेस्तत्राव्याप्तिदोषेतिव्याप्तिश्चेत्यत आह अग्रे चेति। उपधेयसङ्गरेपीत्यादिग्रन्थासङ्गतेर्लक्षणापत्तेश्चाह आद्यस्यैव वेति। तथा चाग्रमलक्षणमभिप्रेत्य उपधेयेत्यादिग्रन्थ इति भावः। प्राहुरितिं। यथार्थपदसार्थक्यमेवात्र प्रकर्षः। पक्षवृत्तितया ज्ञायमानस्य बह्वभावरूपबाधस्य स्वरूपसम्बन्धेनैव यदयथार्थज्ञानं तद्विषयत्वस्यैव धूमादौ सत्त्वात् पर्वतो वन्हिमान् धूमादित्यादावतिव्याप्तिरित्यस्वरसः कैश्चिदित्युक्त्या सूचितः। यदि च स्वलिङ्गकानुमितिकारणीभूताभावप्रतियोगियथार्थज्ञानविषयत्वमेवार्थः सर्वत्रैव दुष्टहेतावन्ततो नित्यज्ञानविषयतामादायैव लक्षणसम्भवात्, तदा अनुमितिप्रतिबन्धकीभूतव्यभिचारादिभ्रमविषयतामादायैव सद्धेतावतिप्रसङ्गवारणाय भ्रमसामान्याभिप्रायेकं यथार्थपदमावश्यकमिति युक्तमुत्पश्यामः। लिङ्गपदस्य निष्प्रयोजनकत्वादाह लिङ्गमिति। ज्ञानपदप्रयोजनं त्वग्रे वक्ष्यामः। ननु यत्पदस्याखण्डव्यक्तिवा-

तेनानुमितिप्रतिबन्धकपक्षविशेष्यकभ्रमविषये साध्याभावादौ सद्धेत्वादिनिष्ठे नातिप्रसङ्गः । अवच्छेदकत्वञ्चेहानतिरिक्तवृत्तित्वम् । तेन विशिष्टस्यासत्त्वेऽपि भ्रमात् प्रतिबन्धेऽपि न क्षतिः । विशेषणीयञ्च तादृशविशिष्टान्तराघटितत्वेन । तेन प्रमेयत्वादिविशिष्टे

चकतया ह्रदो वन्हिमान् धूमादित्यादौ साध्यादिशून्यस्यापि केवलस्य पक्षादेर्दोषत्वं स्यात्तन्निष्ठस्यापि बाधनिश्चयविषयत्वस्यानुमितिप्रतिबन्धकतावच्छेदकत्वादतो व्याचष्टे यादृशेति । यादृशधर्मवन्निष्ठतत्तद्विशिष्टधर्मावच्छिन्नविषयकत्वेनेत्यर्थः । विशिष्टपदस्य फलमाह तेनेति । सद्धेत्वादिनिष्ठ इति तादृशस्य दोषत्वे तेनैव दोषेण हेतोर्दुष्टत्वप्रसञ्जनार्थमुक्तम् । आदिनाऽसद्धेतुपरिग्रहः । नातिप्रसङ्ग इति । साध्याभावनिष्ठायाः साध्यीयत्वविशिष्टाभावत्वविशिष्टविषयतायाः अनुमितिप्रतिबन्धकताऽनवच्छेदकत्वादिति भावः । नन्वेवमप्यसम्भवः, ह्रदत्वेन नद्यां वन्ह्यभावत्वेन गुञ्जाद्यभावस्य निश्चये सत्यपि ह्रदो वह्निमान् इत्याद्यनुमितेरनुत्पत्त्या ह्रदत्वावच्छिन्नविशेष्यताकवन्ह्यभावत्वावच्छिन्नप्रकारताकनिश्चयत्वादित्यत आह अवच्छेदकत्वमिति । तथा च यादृशधर्मवन्निष्ठतद्विशिष्टधर्मनिरूपितविषयितायाः अनुमितिप्रतिबन्धकतानतिरिक्तवृत्तित्वं तादृशविशिष्टधर्मवान् हेतुदोष इत्यर्थः । तादृशधर्मश्च बाधादिस्थले वन्ह्यभावविशिष्टह्रदत्वादिरेवेति भावः । विशिष्टस्यासत्त्वेपीति । वन्ह्याद्यभावविशिष्टह्रदादेर्विषयितासम्बन्धेनासत्त्वेपीत्यर्थः । भ्रमादिति । ह्रदत्वादिरूपेण नद्यादौ वन्ह्यभावत्वेन गुञ्जाद्यभावस्य भ्रमादित्यर्थः । न क्षतिः । नासम्भवः । तादृशेति । स्वातिरिक्तं यादृशमनुमितिप्रतिबन्धकतानतिरिक्तवृत्तिविषयिताकं तादृशाघटितत्वेन निरुक्तविशिष्टं विशेषणीयमित्यर्थः । सव्यभिचारादपि अनुमितिप्रतिबन्धकतानतिरिक्तवृत्तिविषयिताकेन स्वेनैव घटितत्वादसम्भवः स्यादतः स्वातिरिक्तेति । प्रमेयत्वविशिष्टसव्यभिचारादिश्च स्वातिरिक्तेन सव्यभिचारादिनैव तादृशेन घटित इति न

तत्रातिप्रसङ्गः। स्वातिरिक्तत्वं च स्वानवच्छिन्नप्रकारतावच्छेदकत्वम्। तेन सव्यभिचारस्य प्रमेयत्वविशिष्टसव्यभिचाराभिन्नत्वेऽपि न क्षतिः, शुद्धसव्यभिचारस्य विशिष्टसव्यभिचारत्वावच्छिन्नप्रकारतावच्छेदकत्वेनैव तत्रातिप्रसङ्गभङ्गादिति भावः। यद्यप्येवमपि प्रमेयत्वमवृत्ति प्रमेयत्वादित्यत्रावृत्तित्वाभाववदवृत्तिप्रमेयत्वरूपसव्यभिचारेऽव्याप्तिः तस्य वृत्तिप्रमेयत्वरूपबाधात्मकेनैव तादृशधर्मान्तरेण घटितत्वात्, तथापि यादृशविशिष्टविषयकत्वं यत्पक्षहेतुसाध्यकानुमितिनिरूपितयत्प्रतिबन्धकतानतिरिक्तवृत्ति स्वातिरिक्तेन तत्प्रतिबन्धकतानतिरिक्तवृत्तिविषयिताकेन अघटितं तादृशविशिष्टं तत्पक्षहेतुसाध्यकानुमितौ दोष इति विवक्षितम्। उक्तस्थलीयव्यभिचारस्य तु बाधघटितत्वेऽपि व्यभिचारज्ञानत्वावच्छिन्नं यत्तथाविधानुमितिप्रतिबन्धकत्वं तदनतिरिक्तवृत्तिविषयिताकस्य व्यभिचारस्य व्यभिचारज्ञानत्वावच्छिन्नप्रतिबन्धकतानतिरिक्तवृत्तिविषयिताकेन धर्मान्तरेण अघटितत्वात् न तत्राऽव्याप्तिः, तादृशधर्मान्तरञ्च प्रमेयत्वविशिष्टं स्वमेव सव्यभिचारादिकं सर्वत्र सुलभम्। न चैवमपि साध्याभावविशिष्टपक्षादिविषयित्वस्यानुमितिप्रतिबन्धकताशून्ये संस्कारादौ सत्त्वादसम्भव इति वाच्यम्। मूलस्थेन लिङ्गज्ञानस्येत्यत्र निश्चयपरेण ज्ञानपदेन यादृशविशिष्टविषयकनिश्चयत्वं तादृशप्रतिबन्धकताऽनतिरिक्तवृत्ति इत्यर्थलाभेन तन्निरासात्। प्रतिबन्धकत्वं वा प्रतिबन्धकतावच्छेदकीभूतविषयितावत्त्वं वाच्यम्, तथा च संस्कारादेरपि तादृशविषयितावत्त्वादेव नासम्भवः। संयोगाद्यभावस्य च प्रतियोगिवैयधिकरण्यावच्छिन्नस्यैव निर्णयो द्रव्ये संयोगानुमितिविरोधी न त्वव्याप्यवृत्तित्वज्ञानाभावविशिष्टसंयोगाभावमात्रस्य निर्णयस्तथा, येन वृक्षः संयोगी द्रव्यत्वादित्यादौ संयोगाभावविशिष्टवृक्षादावतिव्याप्तिरिति ध्येयम्। प्रमेयत्वविशिष्टसव्यभिचारादाविति। अत्र प्रमेयत्वविशिष्टं यत्साध्यव्यभिचारि साधनं तत्रेत्यर्थः कार्यः, न तु प्रमेयत्वविशिष्टं यत्साध्यव्यभिचारित्वं तद्वति साधन इत्यर्थः। तादृशस्य लक्ष्यत्वात् साधनधर्मिकप्रमेयत्वविशिष्टसव्यभिचारत्वप्रकारकनिश्चयत्वेनापि व्याप्तिबुद्धौ प्रतिबन्धकत्वात्, अन्यथा प्रमेयत्वविशिष्टव्यभिचारवत्तानिश्चयस्य विशिष्टव्यभिचारि-वा-

सव्यभिचारादौ नातिप्रसङ्गः । एवञ्च पक्षतावच्छेदकादिविरहविशिष्टः पक्षः पक्षनिष्ठस्तद्विरहो वा साध्याभाववद्वृत्ति साधनं साधनवद्वृत्तिसाध्याभावो वा हेतुदोषः । येन केनापि सम्बन्धेन तद्वांश्च प्रकृतो हेतुर्दुष्टः । यादृशधर्मिणि यादृशधर्मवत्ताज्ञानमनुमितिप्रतिबन्धकं तस्य धर्मिणस्तादृशधर्मवत्त्वं हेतुदोष इत्यपि

शे भ्रमत्वग्रहदशायां हेतौ व्याप्तिग्रहानुत्पादप्रसङ्गात्, यद्रूपावच्छिन्नवत्तानिश्चयत्वेन विरोधित्वं तदवच्छिन्नाभावगर्भस्यैव भ्रमत्वग्रहस्योत्तेजकत्वात्, अत एव गृहादौ घटसामान्याभावे साध्ये गृहस्य घटवत्त्वमिव नीलघटवत्त्वमपि बाध एवेति वदन्ति । न च ह्रदः प्रमेयवन्हिमान् धूमादित्यादौ गुरुधर्मस्य प्रतियोगितानवच्छेदकत्वेन प्रमेयवन्हित्वावच्छिन्नाभावविशिष्टह्रदाद्यप्रसिद्ध्या बाधादावव्याप्तिरिति वाच्यम्।तत्र ह्रदो निर्वन्हिरिति ज्ञानस्यापि प्रतिबन्धकतया निर्वन्हित्वविशिष्टह्रदादेरेव दोषत्वसम्भवात्।वस्तुतो गुरुधर्मस्य प्रतियोगितावच्छेदकत्वमत एव एतल्लक्षणम्, अन्यथा ह्रदो दाहजनकद्रव्यवान् द्रव्यादित्यादौ बाधाद्यसम्भवापत्तेः, निर्वन्हित्वविशिष्टह्रदादिविषयकत्वस्य प्रकृतानुमितिप्रतिबन्धकतातिरिक्तवृत्तित्वात् दाहजनकद्रव्यत्वाद्यवच्छिन्नाभावाप्रसिद्ध्या तद्विशिष्टह्रदादिविषयित्वस्य चासम्भवात्।न च तत्र साध्यनिष्ठपक्षवृत्तित्वाभाव एव बाध इति साम्प्रतम् ह्रदत्वप्रकारकप्रमाविशेष्यो वन्हित्वप्रकारकप्रमाविशेष्यवान् [दाहजनकतेजस्वी] द्रव्यत्वादित्यादौ तस्याप्यसम्भवात् ह्रदावृत्तित्वमपेक्ष्य ह्रदत्वप्रकारकप्रमाविशेष्यावृत्तित्वस्य गुरुतया तदवच्छिन्नाभावस्याप्यप्रसिद्धेरिति ध्येयम्।एवं चेति । विशिष्टविवक्षणे चेत्यर्थः।पक्षतावच्छेदकादीत्यादिना साध्यहेत्वोः संग्रहः।असमानप्रकारकस्यापि ज्ञानस्य प्रतिबन्धकतामादत्याह पक्षनिष्ठेत्यादि । येन केनापीति । दोषासमानकालीनस्यापि हेतोरेकज्ञानविषयत्वादिसम्बन्धेन तत्सम्बन्धित्वात् विशिष्टदोषाप्रसिद्ध्यैव सम्बन्धसामान्येन तद्वत्त्वोक्तावपि सद्धेतावतिप्रसङ्गाभावादिति भावः । प्रकृतः प्रकृतहेतुतावच्छेदकवत्तया अभिमतः, तेन काञ्चनमयधूमत्वादिप्रकारेण

कश्चित्। अथ पर्वतत्वेन पक्षत्वे वन्हित्वेन साध्यत्वे विशिष्टधूमत्वेन च हेतुत्वे पर्वतादेः काञ्चनमयत्वविरहो, ह्रदस्य वन्हिधूमशून्यत्वं, पर्वतस्य महानसीयवन्हिधूमविरहित्वं, मेयत्वस्य केव-

---

हेतुतावच्छेदकविशिष्टहेतोरलीकत्वेपि नाव्याप्तिः। यादृश इति। यद्धर्मविशिष्ट इत्यर्थः।एवमन्यत्रापि। कश्चिदित्यस्वरसः, तदूषीजं तु यादृशधर्मिणि यादृशधर्मवत्ताज्ञानं वस्तुगत्याऽनुमितिप्रतिबन्धकमित्युक्तौ पर्वते ह्रदे च वन्ह्यभाववत्त्वावगाहिसमूहालम्बनमादायवन्ह्यभावविशिष्टह्रदस्यापि पर्वतो वन्हिमान् धूमादित्यादौ दोषत्वापत्तिः। यादृशधर्मिणि यादृशधर्मवत्तानिश्चयत्वावच्छिन्नानुमितिप्रतिबन्धकत्वमित्युक्तौ चासम्भवः ह्रदत्वेन घटे धर्मिणि अभावत्वेन भावं तत्र च वन्हित्वेन गुञ्जां प्रतियोगिविधयाऽवगाहमानस्यापि ज्ञानस्य ह्रदो वन्हिमानित्यनुमितिप्रतिबन्धकत्वेन ह्रदत्वविशिष्टधर्मिकवन्हिसामान्याभावत्वावच्छिन्नप्रकारताकनिश्चयत्वादिना प्रतिबन्धकत्वविरहादिति ध्येयम्। विशिष्टधूमत्वेनेति। अविच्छिन्नमूलकत्वादिविशिष्टधूमत्वेनेत्यर्थः। पक्षसाध्यहेतुत्वानामवच्छेदकप्रवेशार्थमाह पर्वतादेरिति।आदिना वन्हिधूमयोरुपग्रहः। काञ्चनमयत्वविरह इति। न दोष इति परेणान्वयः। एवमग्रेपि। यथाश्रुतलक्षणं तु काञ्चनमयः पर्वतो वन्हिमानित्यनुमितिं प्रति विरोधित्वमादायैव तत्रातिव्याप्तमिति भावः। अप्रसिद्धपक्षिकामिव प्रसिद्धपक्षिकामप्यनुमितिमादायातिव्याप्तिवारणाय पक्षतावच्छेदकं प्रवेशनीयमित्याशयेनाह ह्रदस्य वन्हिधूमशून्यत्वमिति। तद्धर्मावच्छिन्नपक्षकत्वाप्रवेशे ह्रदो वह्निमानित्याकारकवन्हिसाध्यकधूमलिङ्गकानुमितेः प्रतिबन्धकतावच्छेदकत्वस्य तत्रापि सत्त्वेन तत्रातिव्याप्तिरेवेति भावः। अप्रसिद्धसाध्यहेतुकामिव प्रसिद्धसाध्यहेतुकामप्यनुमितिमादायातिप्रसङ्गवारणं साध्यहेतुतयोरवच्छेदकप्रवेशस्य फलमाह पर्वतस्येति। तद्धर्मावच्छिन्नसाध्यहेत्वोरप्रवेशे पर्वतो महानसीयवन्हिमान् तादृशधूमादित्याद्यनुमितिमादाय तत्प्रतिबन्धकतावच्छेदकत्वस्य महानसीयवन्ह्यभाववत्पर्वते तादृशधूमाभाववत्पर्वते च

लधूमस्य वा वन्हिव्यभिचारो, विशिष्टस्य धूमस्य वा पर्वतीयवन्हिव्यभिचारो न दोषः, न वा तत्सम्बन्धेन तत्र तस्य हेतोर्दुष्टत्वम्, अतस्तद्धर्मावच्छिन्नतत्पक्षकतद्धर्मावच्छिन्नतत्साध्यकतद्धर्मावच्छिन्नतद्धेतुकानुमितिप्रतिबन्धकत्वं वाच्यं तथा च निर्व-

---

सत्त्वात्तयोरतिव्याप्तिः स्यादिति भावः । व्याप्यत्वांशेऽप्यनुमितौ हेतुविशेषोऽवश्यं निवेशनीय इत्याशयेनाह मेयत्वस्येति । अन्यथा वन्हिव्याप्यमेयत्ववान्पर्वतो वन्हिमानित्यनुमितिव्यक्तिप्रतिबन्धकतावच्छेदकत्वस्य वन्हिव्यभिचारिमेयत्वे सत्त्वात्तत्रातिव्याप्तिः स्यादिति भावः । व्याप्यत्वांशे हेतुतावच्छेदकप्रवेशार्थमाह केवलधूमस्येति । व्याप्यत्वांशेऽप्यनुमितौ साध्यतावच्छेदकप्रवेश आवश्यक इत्यभिप्रेत्याह विशिष्टधूमस्य वेति । अन्यथा पर्वतीयवन्हिव्याप्यविशिष्टधूमवान्पर्वतो वन्हिमानित्याकारकानुमितिप्रतिबन्धकतावच्छेदकत्वस्य पर्वतीयवन्हिव्यभिचारित्वविशिष्टधूमे सत्त्वादतिव्याप्तिः स्यादिति भावः । तत्सम्बन्धेनेति । तेषां पर्वतनिष्ठकाञ्चनमयत्वविरहादीनां यथाकथञ्चित्सम्बन्धेनेत्यर्थः । तत्र पर्वते वन्हेः साध्यत्वे । तस्य विशिष्टधूमस्य । समानधर्मिकज्ञानस्यैव प्रतिबन्धकत्वमते पर्वतत्वेन वन्हिशून्यपर्वतपक्षिकायाः पर्वतो वन्हिमानित्यनुमितेः प्रतिबन्धकतावच्छेदके वन्ह्यभाववत्पर्वतेऽतिव्याप्तिवारणार्थं तत्पक्षकेति। तथा च पर्वतत्वेन वन्हिमत्पर्वतपक्षकानुमितिप्रतिबन्धकतावच्छेदकत्वस्य तत्रासत्त्वान्नातिव्याप्तिः वन्हित्वेन पर्वतावृत्तिवन्हिविषयिकायाः पर्वते वन्हिरित्याकारिकायाः पर्वतो वन्हिमानित्याकारिकाया वाऽनुमितेः प्रतिबन्धकतावच्छेदके पर्वतावृत्तित्वविशिष्टवन्हावतिप्रसङ्गवारणाय तत्साध्यकेति । तथा च वन्हित्वेन पर्वतीयवन्हिसाध्यकानुमितिप्रतिबन्धकतावच्छेदकत्वविरहान्न तत्रातिप्रसङ्गः । एवं धूमत्वेन पर्वतावृत्तिधूमस्य पक्षधर्मत्वावगाहिन्या अनुमितेः प्रतिबन्धकतावच्छेदकपर्वतावृत्तित्वविशिष्टधूमेऽतिप्रसङ्गवारणाय तद्धेतुकेति । इत्थं च पर्वतत्वेनैव निर्वन्हिपर्वतस्य पक्षत्वे वन्हित्वेनैव पर्वतावृत्तिवन्हेः साध्यत्वे धूमत्वेनैव पर्वतावृत्ति-

न्हिः पर्वतो वन्हिमान् पर्वतावृत्तिवन्हिमान् वा तद्व्यभिचारिणः पर्वतावृत्तेर्वा धर्मादिस्वादौ न कोऽपि हेत्वाभासः स्यात् तादृशानुमितेरप्रसिद्धत्वादिति।

अत्र वदन्ति। यद्विषयकनिश्चयस्य विरोधिविषयितायुक्तस्तदुत्तरम् अनुमितौ अनाहार्य्यमानसङ्गा नेवा पक्ष-

---

धूमस्य हेतुतायां पर्वतो वन्हिमान् धूमादित्यत्रापि वन्ह्यभावविशिष्टपर्वतादिकं प्राचां मते हेतुदोष एवेति हृदयमायेन सम्बन्धेन यस्य पर्वतत्वादेः पक्षतावच्छेदकत्वं तेनैव सम्बन्धेन तद्धर्मावच्छिन्नत्वलाभाय तत्पक्षकेत्यादौ तत्पदम्। तेन विषयितया पर्वतत्वाद्यवच्छिन्नं यत् ज्ञानादिकं तत्पक्षकानुमितिप्रतिबन्धकतामादाय समवायेन पर्वतत्वाद्यवच्छिन्नस्य पक्षत्वादिस्थले पर्वतत्वविशिष्टज्ञाननिष्ठवन्ह्यभाववत्त्वादौ नातिप्रसङ्ग इत्याहुः।इत्यादाविति। इत्यादिन्यायस्थलीयहेताविति्यर्थः। अत्र च निर्वन्हिपर्वतत्वेन वन्हिमत्पर्वतव्यक्तेः पक्षत्वे आश्रयासिद्धिरेव, निर्वन्हिपर्वतत्वेन निर्वन्हिपर्वतव्यक्तेः पक्षत्वे बाध एव दोषः, पर्वतः पर्वतावृत्तिवन्हिमानित्यत्र तु बाधः, तयोश्च तादृशपक्षसाध्यकानुमित्यप्रसिद्ध्याऽव्याप्तिः, पर्वतो वन्हिमान् वन्हिव्यभिचारिधर्मादित्यत्र वन्हिव्यभिचारित्वविशिष्टवन्हिव्याप्यत्वावगाह्यनुमित्यप्रसिद्ध्या व्यभिचारादावव्याप्तिः, पर्वतो वन्हिमान् पर्वतावृत्तिधर्मादित्यत्र पर्वते प्रकृतहेतुवैशिष्ट्यावगाह्यनुमित्यप्रसिद्ध्या स्वरूपासिद्ध्यादावव्याप्तिरिति द्रष्टव्यम्। तादृशानुमितेरिति। द्वितीयव्याख्यानुसारेणेदम्। तेन पर्वतो वन्हिमान् वन्हिव्यभिचारिधर्मादित्यादावाद्यव्याख्यायामनुमितिप्रसिद्धावपि न क्षतिः। वस्तुतः अनाहार्यपरामर्शस्यैवानुमितिहेतुत्वात् प्रथमकल्पेपि तत्रानुमितेरप्रसिद्धिः॥

यद्विषयकेति। यद्विषयकनिश्चयस्य विरोधिनी यद्विषयकनिश्चयत्वाभावव्याप्या यद्विषयकनिश्चयावृत्तिरिति यावत् तादृशी या विषयिता तत्प्रतियोगिक इत्यर्थः। एतस्य च द्वयोर्व्यतिरेक इत्यन्वयः। तदुत्तरमनुमितौ तादृशनि-

तावच्छेदकविशिष्टपक्षे साध्यतावच्छेदकविशिष्टसाध्यवैशिष्ट्यावगाहित्वस्य साध्यतावच्छेदकविशिष्टसाध्यनिरूपितव्याप्तिविशिष्टहेतुतावच्छेदकविशिष्टहेतुमत्त्वावगाहित्वस्य च द्वयोर्व्यतिरेक-

---

इत्ययोत्तरानुमितिसामान्ये । पक्षतावच्छेदकविशिष्टपक्ष इत्यादि । अत्र द्वितीयपक्षपदं पक्षतावच्छेदकताघटकसम्बन्धेन पक्षतावच्छेदकवैशिष्ट्यस्य प्रवेशलाभाय, तेन ह्रदे वन्ह्यभावनिश्चयोत्तरं कालिकादिसम्बन्धेन ह्रदत्वादिविशिष्टकालादौ वन्हेस्तद्व्याप्यधूमवत्त्वस्य चानुमितौ उभयस्य सत्त्वेऽपि न बाधादावसम्भवः । कथितदिशैवाग्रिमयोः साध्यहेतुपदयोर्व्यावृत्तिरवसेया । तथा च यादृशविशिष्टविषयकनिश्चयोत्तरानुमितिसामान्ये यादृशविशिष्टविषयकनिश्चयत्वाभावव्याप्यविषयितानियोगिकः प्रकृतपक्षे प्रकृतसाध्यावगाहित्वप्रकृतपक्षधर्मिकप्रकृतसाध्यव्याप्यहेतुमत्तावगाहित्वोभयव्यतिरेकस्तादृशविशिष्टमेव प्रकृतपक्षसाध्यन्यायस्थलीयप्रकृतहेतौ दोष इति फलितार्थः । पर्वतधर्मिकवन्ह्यभावव्याप्यवत्तावगाहित्ववन्ह्यभावव्याप्यव्याप्यधूमवत्त्वावगाहित्वोभयव्यतिरेकस्य वन्हिविशिष्टपर्वतनिश्चयत्वाभावव्याप्यं यत् पर्वतधर्मिकवन्ह्यभावव्याप्यवत्तावगाहित्वं तत्प्रतियोगिकत्वात्पर्वतो वन्ह्यभावव्याप्यवान् धूमादित्यादौ वन्हिविशिष्टपर्वतेतिव्याप्तिरतस्तद्वारणाय सामान्य इत्युक्तम् । तथा च वन्हिविशिष्टपर्वतनिश्चयोत्तरमुत्पन्नायां ,पर्वतो वन्ह्यभावव्याप्यवान् वन्ह्यभावव्याप्यव्याप्यधूमवांश्चेत्याकारिकायामेवानुमितौ पक्षधर्मिकसाध्यावगाहित्वतादृशसाध्यव्याप्यहेतुमत्तावगाहित्वोभयव्यतिरेकस्यासत्त्वान्न तादृशस्थले वन्हिविशिष्टपर्वतो दोषः । तत्रापि बाधादिसंशयोत्तरोत्पन्नायां कस्याञ्चिदनुमितौ पक्षधर्मिकसाध्यावगाहित्वसाध्यव्याप्यहेतुमत्त्वावगाहित्वोभयोः सत्त्वेन ह्रदो वन्हिमान्धूमादित्यादौ सर्वत्रैव बाधप्रभृतावसम्भवः स्यादतो यादृशनिश्चयपदम् । यद्विषयकनिश्चयस्य पूर्वमनुमितावित्युक्तौ बाधादिनिश्चयपूर्वोत्पन्नानुमितौ साध्यावगाहित्वतद्व्याप्यवत्त्वागाहित्वोभयोः सत्त्वादसम्भवः स्यादतस्तदुत्तरमित्युक्तम् । निश्चयश्चागृहीताप्रामाण्यको निविष्टः, तेन भ्रमत्वेन गृह्यमाणस्य बाधादि-

निश्चयस्योत्तरमुत्पद्यायामनुमितौ कदाचिन्निरुक्तावगाहिताद्वय-सत्त्वेपि नासम्भवतादवस्थ्यम् । निर्वन्हिर्वन्हिमान् धूमादित्यादौ घटविशिष्टगृहादावतिव्याप्तिः तन्निश्चयोत्तरानुमितित्वावच्छेदेनैव निर्वन्हिधर्मिकवन्ह्यवगाहित्वविरहेण निरुक्तावगाहिताद्वयव्यतिरेकस्य सत्त्वादतस्तद्वारणाय विशिष्टविषयकनिश्चयत्वाभावव्याप्य-विषयिताप्रतियोगिक इत्युक्तम् । तथा च निर्वन्हिर्वन्हिमान् वन्हिव्याप्यधूमवान् गूढं च घटवदित्यादिसमूहालम्बन एव व्यभिचारेण निर्वन्हिधर्मिकवन्ह्यवगाहित्वस्य वन्हिव्याप्य-धूमवत्त्वावगाहित्वस्य वा घटविशिष्टगृहादिनिश्चयत्वाभावव्याप्यत्वाभावान्निरुक्तावगाहिताद्वयव्यतिरेकस्य घटविशिष्टगृहादि-निश्चयत्वाभावव्याप्यविषयिताप्रतियोगिकत्वमेव नास्तीति न तत्र घटविशिष्टगृहादिकं दोषः, किन्तु वन्ह्यभावादिविशिष्टो निर्वन्ह्यादिरेव तत्र दोषः । न च निर्वन्हिधर्मिकवन्ह्यवगाहिज्ञानसामान्य एव यादृशवस्तुनो न भानं तत्रातिव्याप्तितादवस्थ्यम्, तादृशवस्तुनि भानाभावात् एतदस्वरसेनैव वदन्तीत्यभिधानाच्च । यादृशविशिष्ट-विषयकज्ञानत्वाभावव्याप्यविषयिताप्रतियोगिक इत्युक्तावसम्भवः पक्षधर्मिकसाध्यसंशयादौ पक्षधर्मिकसाध्यावगाहित्वादेः साध्याभावविशिष्टपक्षज्ञानत्वाद्यभावव्यभिचारित्वादतो निश्चयत्वानुसरणम् । अत्र निश्चयस्तत्तदाहार्यज्ञानभिन्नत्वेन विशेषणीयः, तेनाहार्यस्य साध्याभावादिमत्तया पक्षादिनिश्चयस्य पक्षादिधर्मिकसाध्यादिमत्त्वावगाहित्वेऽपि ह्रदो वह्निमान् धूमादित्यादौ न बाधप्रभृतावसम्भवः । यद्यपि पक्षधर्मिकसाध्यावगाहित्वविशिष्टस्य तादृशसाध्यव्याप्यहेतुमत्तावगाहित्वस्य व्यतिरेकमन्तर्भाव्यापि लक्षणं सुवचम्, तथापि यत्र स्थलविशेषे साध्यतद्व्याप्यहेतुमत्त्वयोः पक्षे समूहालम्बनभ्रमोऽप्रसिद्धः तत्रत्यदोषेऽव्याप्तिप्रसङ्गात् विशिष्टाभावस्यातिरिक्तत्व-मते विशेषणाप्रतियोगिकतया साध्याभावव्याप्यवत्पक्षेऽव्याप्तिप्रसङ्गाच्चेति निरुक्तविशिष्टाभावं परित्यज्य द्वयोरित्यनेनोभयाभावो निवेशितः । न च समवेतं द्रव्यं मूर्तं स्पर्शवत्त्वादित्यत्र सद्धेतौ असमवेतत्वविशिष्टद्रव्येऽतिप्रसङ्गः समवेतत्वतदभावयोर्द्वयधर्मिकैक-निश्चयागोचरत्वादिति वाच्यम्। द्रव्यत्वावच्छेदत्वविशिष्टस्वरूपसम्बन्धेन समवेतत्वस्य पक्षतावच्छेदकत्वे तद्दोषस्येष्टत्वात्, स्वरूपस-

म्बन्धमात्रेण समवेतत्वस्य पक्षतावच्छेदकत्वप्रवेशे तु तादृशपक्षधर्मिकसाध्यावगाहित्वस्याऽसमवेतत्वविशिष्टद्रव्यनिश्चयत्वाभावव्याप्यत्वविरहादेव उक्तस्थले समवेतत्वाद्यभावविशिष्टद्रव्यस्य दोषत्वासम्भवात्। द्रव्यं द्विविधं समवेतमसमवेतं चेत्याकारकस्य द्रव्यत्वसामानाधिकरण्येन समवेतत्वतदभावयोर्निश्चयस्य सर्वानुभवसिद्धत्वात्, एकधर्मावच्छेदेनैव विरोधिनोरेकनिश्चयाविषयत्वात्। इदं तु बोध्यम्। अत्रापि प्रमेयत्वविशिष्टव्यभिचारादावतिप्रसङ्गवारणाय तादृशविशिष्टान्तराघटितत्वविशेषणं देयमेव। तस्य च प्रकृतलक्षणाश्रयीभूतं यत् स्वभिन्नं तदघटितान्यत्वं नार्थः प्रमेयत्वमवृत्ति प्रमेयत्वादित्यादौ व्यभिचारस्य तादृशस्वभिन्नबाधादिघटितत्वेनाव्याप्त्यापत्तेः, किं तु तादृशं निरुक्तलक्षणाश्रयीभूतं वस्तुगत्या यद्विशिष्टान्तरं हेत्वाभासत्वविशिष्टाद्भिन्नं तदघटितत्वमेव। वस्तुतो यद्विषयकनिश्चयत्वविरोधियादृशयादृशविषयिताप्रतियोगिको निरुक्तोभयव्यतिरेकस्तदन्ययद्विषयकनिश्चयत्वविरोधितादृशविषयिताप्रतियोगिकस्तथाविधाविशिष्टाघटितत्वमेव तादृशविशिष्टान्तराघटितत्वमित्यस्यार्थो बोध्य इति नोक्ताव्याप्त्याद्यवकाशः। यदि च नव्यानां मते साध्याभाववदवृत्तित्वरूपाया एवान्वयव्याप्तेरनुमित्युपयोगित्वात् तादृशव्याप्तिविशिष्टप्रकृतहेतुमत्त्वावगाहित्वमेव लक्षणे निवेश्यते तदा प्रकृतपक्षतावच्छेदकविशिष्टपक्षे प्रकृतसाध्यावगाहित्वस्य प्रकृतसाध्यीयतादृशव्याप्तिविशिष्टप्रकृतहेतुमत्तावगाहित्वस्य प्रकृतसाध्यीयव्यतिरेकव्याप्तिविशिष्टप्रकृतहेतुमत्त्वावगाहित्वस्य च त्रित्वावच्छिन्नाभावो यद्धर्मावच्छेदेन यादृशधर्मवत्तानिश्चयत्वविरोधिविषयिताप्रतियोगिकस्तद्धर्मावच्छिन्न एव तादृशधर्मविशिष्टः प्रकृतपक्षतावच्छेदकविशिष्टपक्षकप्रकृतहेतुसाध्यकन्यायस्थले दोषो वक्तव्य इति प्रमेयत्वविशिष्टसाधनत्वावच्छेदेन साध्यव्यभिचारनिश्चयस्यापि साधनत्वसामानाधिकरण्येन तथाविधव्याप्त्यवगाहित्वसत्त्वात् निरुक्तत्रित्वावच्छिन्नाभावस्य तादृशनिश्चयत्वविरोधिविषयिताप्रतियोगिकत्वविरहादेव प्रमेयत्वविशिष्टसव्यभिचारादौ नातिप्रसङ्गः। प्रमेयत्वविशिष्टसव्यभिचारत्वावच्छेदेन साधनवृत्तितानिश्चयस्यापि विरोधिनी न साधनधर्मिकसाध्याव्यभिचारित्वावगाहिता, नव्यानां मते समानधर्मिकस्यैव ज्ञानस्य विरोधि-

त्वादतः साधननिष्ठप्रमेयत्वविशिष्टसव्यभिचारेपि नातिप्रसङ्गः। धूमहेतुना द्रव्यत्वसामानाधिकरण्येन वह्नेः साध्यतास्थले तु द्रव्यत्वावच्छिन्नं सर्वं द्रव्यं न वन्ह्यभाववत् किन्तु यत्किञ्चिद्द्रव्यमेवेति न तत्र वन्ह्यभावविशिष्टद्रव्येऽतिप्रसङ्गः। न चैवं द्रव्यत्वावच्छेदेन धूमहेतुना वह्नेः साध्यतास्थले भागासिद्ध्यशतोबाधयोरव्याप्तिः द्रव्यत्वावच्छिन्ने सर्वत्र धूमस्य वह्नेर्वा सामान्याभावस्यासत्त्वादिति वाच्यम्। निरुक्तत्रित्वावच्छिन्नाभावो यद्धर्मावच्छेदेन यादृशधर्मवत्तानिश्चयत्वविरोधिविषयिताप्रतियोगिकः तद्धर्मावलीढस्यैव तादृशधर्मवतः प्रकृतपक्षतावच्छेदकधर्मावच्छेदेन प्रकृतसाध्यहेतुकदोषनिरुक्तौ निवेश्यत्वात्। न च वह्नित्वावच्छेदेन निर्धूमवृत्तित्वासत्त्वाद्द्रव्यं धूमवद्वह्नेरित्यादौ साध्याभाववद्वृत्तित्वविशिष्टहेतुस्वरूपव्यभिचारेऽव्याप्तिः साध्याभाववन्निष्ठाधिकरणतानवच्छेदकीभूतहेतुतावच्छेदकधर्मवत्त्वस्यैव व्याप्तितया तद्विरोधिनो हेतुतावच्छेदकधर्मवत्त्वावच्छेदेन तादृशाधिकरणतावच्छेदकवत्त्वस्यैव व्यभिचारत्वात्। अन्यथा द्रव्यं विशिष्टसत्त्वादित्यादेरपि व्यभिचारित्वापत्तेरिति परैरपरिशीलितः पन्थाः।

गुरुचरणास्तु यद्विषयकेत्यादेर्यादृशविशिष्टविषयकनिश्चयवृत्तित्वविशिष्टाया विरोधिविषयितायाः प्रयुक्तो व्यापकः प्रकृतपक्षे प्रकृतसाध्यावगाहित्वस्य प्रकृतसाध्यव्याप्यप्रकृतहेतुमत्त्वावगाहित्वस्य च द्वयोर्व्यतिरेकस्तत्त्वं हेतुदोषत्वमित्यर्थः। तत्र च विरोधिविषयितायाः व्याप्यत्वं न स्वरूपसम्बन्धेन, बाधादेराहार्यनिश्चये निरुक्तावगाहिताद्वयसत्त्वेनाऽसम्भवापत्तेः, किन्तु स्वाश्रयोत्तरानुमितित्वसम्बन्धेन स्वाश्रयोत्तरानाहार्यमानसज्ञानत्वसम्बन्धेन वा तथात्वम्, एतल्लाभार्थमेव तदुत्तरमनुमितावनाहार्यमानसज्ञाने वेत्युक्तम्। न च विषयिताया विरोधित्वं यदि प्रतिबन्धकतावच्छेदकत्वं तदा निर्वह्निर्वह्निमानित्यादौ घटाद्यभावविशिष्टभूतलादेरपि दोषत्वापत्तिः तन्निश्चयनिष्ठविषयिताया अपि भूतलं घटवदित्यादिधीप्रतिबन्धकतावच्छेदकत्वात्, एवं पर्वतान्यः पर्वतो दहनान्यदहनवानित्यादौ पर्वतान्यत्वाद्यभावविशिष्टपर्वतादिरूपाश्रयासिद्धावव्याप्तिः तद्विषयिताया कुत्रापि बुद्धौ प्रतिबन्धकतानवच्छेदकत्वात् पर्वतः पर्वतान्य इत्याकारकबुद्धेराहार्यत्वेनाऽप्रतिबध्यत्वादिति वाच्यम्। निरु-

क्तोभयाभावप्रतियोगिनी अवगाहिता यदंशे यन्निरूपिता तदंशे तदभावनिरूपितविषयिताया एव प्रकृते विरोधिविषयितापदेनोक्तत्वात् । घटाभावविशिष्टभूतलादिविषयितायाश्चाऽतथात्वेन निर्वन्हिर्वन्हिमानित्यादौ निर्घटत्वविशिष्टभूतलादावतिव्याप्त्यभावादिति प्राहुः । तच्चिन्त्यम् । साध्याभावव्याप्यविशिष्टपक्षात्मकसत्प्रतिपक्षाव्याप्तिप्रसङ्गात्, एवं काञ्चनमयपर्वतः काञ्चनमयवन्हिमानित्यादौ काञ्चनमयत्वाद्यभावविशिष्टपर्वतादिरूपाश्रयासिद्धौ लक्षणसङ्गमनेऽपि काञ्चनमयत्वाद्यभावव्याप्यविशिष्टपर्वतादिरूपाश्रयासिद्धावव्याप्तिप्रसङ्गाच्च । यत्र यो यादृशहेत्वाभासस्तत्र तद्व्याप्यमपि तादृशहेत्वाभास इत्यादिना दीधितिकृता तस्याप्यत्र लक्ष्यतायाः स्वीकर्तव्यत्वात् । किं चैवं यद्विषयकानार्हार्थनिश्चयनिष्ठविरोधिविषयितायाः स्वरूपसम्बन्धेन निरुक्तोभयाभावव्याप्यत्वं तत्त्वं हेतुदोषत्वमित्यस्यैव सम्यक्त्वे स्वाश्रयोत्तरानुमितित्वादिसम्बन्धेन विरोधिविषयितायाव्याप्यत्वाभिधानमपि सन्दर्भविरुद्धं स्यात् । एतेन निरुक्तोभयाभावप्रतियोगिन्यवगाहिता यदंशे यन्निरूपिता तदंशे तदभावेन तदभावव्याप्येन वा निरूपितैव विषयिता प्रकृते विरोधिविषयिता वक्तव्या अतो न सत्प्रतिपक्षाद्यव्याप्तिरित्युक्तावपि न निस्तारः, पक्षनिष्ठसाध्याभावादेस्तावतापि संग्रहायोगाच्चेति दिक् ।

यत्तु प्रयुक्तत्वं व्यापकत्वं, यद्विषयकनिश्चयनिष्ठविरोधिविषयिताया उभयाभावव्याप्यत्वं च स्वाश्रयनिश्चयाव्यवहितोत्तरानुमितित्वसम्बन्धेन, तादृशसम्बन्धलाभायैव तदुत्तरमनुमितावित्युक्तम् । एवं च विरोधिविषयकयद्विषयकनिश्चयाव्यवहितोत्तरानुमितित्वव्यापकस्तादृशोभयाभाव इति यावत्, एवं च निर्वन्हिर्वन्हिमानित्यादौ दोषादिविषयितायां स्वरूपसम्बन्धरूपोभयाभावप्रयोजकत्वासम्भवेऽपि तादृशविषयितायां निरुक्तविरोधित्वस्य निवेशिततया तत्र लक्षणं सुसमन्वयमेव, तादृशप्रयोजकत्वस्याऽनिवेशात् । न चैवं तत्र वस्तुमात्रेऽतिव्याप्तिर्दुर्वारैव तादृशोभयाभावस्य विरोधिविषयकसमूहालम्बनघटादिविषयकनिश्चयाव्यवहितोत्तरानुमितित्वव्यापकताया अक्षतत्वादिति वाच्यम् । विरोधिविषयितानतिरिक्तवृत्तिर्यद्विषयिता तच्छालिनिश्चयस्य निश्चयान्तेन विवक्षितत्वात् । घटादिविषयितायास्तत्र निरु-

क्तविरोधिविषयितानतिरिक्तवृत्तित्वविरहात् । न चैवं विरोधिविषयितानतिरिक्तवृत्तिर्यदीयविषयिता तावतैव सामञ्जस्ये शेषवैयर्थ्यमिति वाच्यम् । यत्र पर्वतत्वादिसामानाधिकरण्येन वन्ह्यादेः साध्यता तत्र पर्वतत्वादिसामानाधिकरण्येन वन्ह्यभावादिमत्त्वस्य विषयिताया निरुक्तविरोधिविषयितानतिरिक्तवृत्तितया तत्रातिव्याप्तिवारकतया शेषसार्थक्यात्, तदुपादाने तादृशवन्ह्यभावादिमत्त्वविषयकनिश्चयानन्तरं पर्वतत्वादिसामानाधिकरण्येन वन्ह्यनुमित्युत्पत्त्या तादृशानुमितौ तथाविधोभयसत्त्वेनाऽतिव्याप्त्यनवकाशादिति। तत्तुच्छम् । निर्वन्हिः पर्वतो वन्हिमानित्यादौ यत्र पर्वतत्वादिसामानाधिकरण्येन वन्ह्यभावादेः पक्षतावच्छेदकता तत्र पर्वतत्वादिसामानाधिकरण्येन वन्ह्यादिमत्त्वस्य विशिष्टपक्षग्रहाविरोधित्वेनाश्रयासिद्ध्यनात्मकस्य निरुक्तविरोधिविषयितानतिरिक्तवृत्तिविषयिताकतया तत्रातिव्याप्तेः । तादृशोभयाभावप्रतियोगितावच्छेदकगर्भे यद्रूपविशिष्टे येन सम्बन्धेन यद्रूपावच्छिन्नवैशिष्ट्यावगाहित्वं निविशते तद्रूपावच्छिन्नविशेष्यकतत्संसर्गकतद्रूपावच्छिन्नप्रकारकानुमितित्वावच्छिन्ननिरूपितप्रतिबन्धकतावच्छेदकत्वरूपविरोधित्वस्य विषयितायां निवेशे शेषवैयर्थ्यम्, उक्तरीत्या निर्वन्हिर्वन्हिमानित्यादिस्थलीयदोषे अव्याप्तिश्च। यद्विषयकनिश्चयस्य विरोधिनी प्रतिबध्यतावच्छेदिका या विषयिता तत्प्रयुक्तः तदघटितप्रतियोगिक इत्यर्थस्तु न युक्तः । पर्वतः पर्वतान्यो धूमादित्यादौ पर्वतान्यत्वाभावविशिष्टपर्वतावृत्त्यात्मकबाधप्रभृतावव्याप्तिप्रसङ्गात्, पर्वतान्यत्वाभावविशिष्टपर्वतनिश्चयस्य प्रतिबध्यतावच्छेदकविषयित्वाप्रसिद्धेः तदुत्तरमनुमितावित्यादिदलस्य व्यर्थतापत्तेश्च, यद्विषयकनिश्चयप्रतिबध्यतावच्छेदकविषयितावघटितप्रतियोगिकः पक्षधर्मिकसाध्यावगाहित्वसाध्यव्याप्यहेतुमत्त्वावगाहित्वोभयव्यतिरेकस्तत्त्वमित्यस्यैव सम्यक्त्वात्।एतेन यद्विषयकनिश्चयनिष्ठया यद्विरोधिविषयितया प्रयुक्तस्तदुत्तरमनुमितौ निरुक्तावगाहिताद्वयव्यतिरेकस्तत्त्वमेवार्थः, प्रयुक्तत्वञ्च काष्ठादौ दाहाद्यभावो मणित्वाद्यवच्छिन्नप्रयुक्त इत्यादिप्रतीतिसाक्षिकः स्वरूपसम्बन्धविशेषः, स च क्वचिदेव किञ्चिन्निरूपित इति नातिप्रसङ्गशङ्कापीति कस्यचित् प्रलपितमप्यपास्तम् । तादृशस्वरूपसम्बन्धे मानाभावात्।

तत्त्वं हेतुदोषत्वम् । पक्षतावच्छेदकवैशिष्ट्यादिकञ्च वैज्ञानिकं न तु वास्तवं ग्राह्यम् । व्याप्तिश्चान्वयतो व्यतिरेकतश्च

मणिप्रयुक्तो दाहाभाव इत्यादौ च मण्यभावजन्यदाहप्रतियोगिकत्वरूपस्यैव मणिप्रयुक्तत्वस्य दाहाद्यभावे अवगाहनात् । अस्तु वा स्वरूपसम्बन्धविशेषः प्रयुक्तत्वम्, अन्यथा इन्धन इव जलेऽपि मणिप्रयुक्तो दाहाभाव इत्यादिप्रतीत्यापत्तेः, तथापि निश्चयपदस्य विरोधिपदस्य तदुत्तरमनुमितावित्यादिभागस्य च वैयर्थ्यं दुर्वारमेव, यद्विषयकनिष्ठविषयिताप्रयुक्तः पक्षधर्मिकसाध्यावगाहित्वसाध्यव्याप्यहेतुमत्तावगाहित्वयोर्व्यतिरेकस्तत्त्वं हेत्वाभासत्वमित्यस्यैव सम्यक्त्वादित्यास्तां विस्तरः ॥

ननु यादृशदोषव्यक्तीनां निश्चयस्योत्तरक्षणे सामग्रीविरहेण कस्यापि वस्तुनोऽनुमितिर्नोत्पन्ना तादृशव्यक्तिष्वनुमितिगर्भलक्षणस्याव्याप्तिरत आह अनाहार्यमानसज्ञाने वेति । तदुत्तरमित्यनुषज्यते । तथा च यादृशविशिष्टविषयकनिश्चयोत्तरानाहार्यमानसज्ञानत्वावच्छेदेन तादृशप्रयुक्तत्वविशिष्टनिरुक्तावगाहिताद्वयव्यतिरेकस्तादृशविशिष्टो हेतुदोष इत्यर्थः । दोषमात्रस्यैव निश्चयोत्तरमन्ततस्तन्निश्चयस्यैव मानसज्ञानसम्भवात् अत्र कलेे न कुत्राप्यव्याप्तिसम्भावनेति भावः । अत्रापि बाधनिश्चयोत्तरमुत्पन्नस्याहार्यमानसज्ञानस्य निरुक्तावगाहिताद्वयसत्त्वादसम्भवस्य वारणार्थमनाहार्यपदम् । मानसपदं त्वव्याप्तिवारणार्थमेव । अन्यथा बाधनिश्चयोत्तरमुत्पन्नदोषविशेषादिजन्यानाहार्यज्ञाने निरुक्तावगाहिताद्वयस्य सत्त्वेन क्वचिदूबाधप्रभृतावव्याप्तिप्रसङ्गात् । न च अहं गौरो ज्ञानित्वादित्यादिस्थलीयबाधे तथाऽप्यव्याप्तिः सत्यपि नाहं गौर इत्यादिबाधनिश्चये तदुत्तरं दोषवशादहं गौर इति पक्षधर्मिकसाध्यवत्त्वावगाहिमानसज्ञानोत्पादादिति वाच्यम् । मानसपदस्य दोषविशेषाद्यजन्यपरत्वादिति ध्येयम् । ननु काञ्चनमयोयं पर्वतः तादृशवह्निमांस्तथाविधधूमादित्यादौ पक्षतावच्छेदकविशिष्टपक्षादेरप्रसिद्धत्वादाश्रयासिद्ध्यादावव्याप्तिरत आह पक्षतावच्छेदकवैशिष्ट्यादिकं चेति । वैज्ञानिकम्=विज्ञानीयविषयता-

वाच्या । तादृशावगाहित्वप्रसिद्धिराहार्य्यज्ञान एवाभ्युपेतव्याऽनन्यगतिकत्वात् । एवञ्च वस्तुमात्रनिश्चयादनन्तरं निर्वन्हित्वादिविशिष्टे वन्हेरग्रहेऽपि न क्षतिस्तस्य विरोध्यविषयकत्वात्, एवं

रूपमान तु वास्तवमासमवायादिसम्बन्धरूपमित्यर्थः । गुणीयसंयोगेन पर्वते वन्हेः साध्यत्वे तु तत्सम्बन्धावच्छिन्नवन्ह्यभावादिकं न हेत्वाभासः, तस्याऽप्रसिद्धत्वात्, किन्तु संयोगे गुणीयत्वाभावः स च हेतुमन्निष्ठाभावीयगुणीयसंयोगावच्छिन्नप्रतियोगितानवच्छेदकं वन्हित्वमित्येवं व्यापकताज्ञानं प्रति विरोधित्वाद्धेत्वाभासलक्षणाक्रान्त इति । अन्वयव्याप्तिमात्रस्य निवेश व्यतिरेकव्याप्तिग्रहप्रतिबन्धके अनुपसंहारिण्यव्याप्तिरत आह व्याप्तिश्चेति । इत्थं च प्रकृतपक्षे प्रकृतसाध्यावगाहित्वस्य साध्यान्वयव्याप्तिविशिष्टहेतुमत्त्वावगाहित्वस्य साध्यव्यतिरेकव्याप्तिविशिष्टप्रकृतहेतुमत्त्वावगाहित्वस्य च त्रित्वावच्छिन्नाभाव एव लक्षणघटक इति भावः । ननु निर्वन्हिर्वन्हिमान् धूमादित्यादौ बाधाद्यव्याप्तिः, निर्वन्हिधर्मिकवन्हिमत्त्वादिज्ञानस्यालीकतया पक्षधर्मिकसाध्यावगाहित्वाप्रसिद्धेरत आह तादृशावगाहितेति । यद्विषयकनिश्चयस्य विरोधिविषयिताप्रयुक्त इत्यस्य फलमाह एवं चेति । वस्तुमात्रनिश्चयेति । घटविशिष्टगृहाद्यात्मकवस्तुनिश्चयेत्यर्थः । अनन्तरमित्यत्र अननुमिताविति शेषः । निर्वन्हित्वविशिष्ट इति । निर्वन्हित्वविशिष्टधर्मिकवन्ह्यवगाहित्वविरहेऽपीत्यर्थः । न क्षतिःन घटादिविशिष्टगृहादावतिव्याप्तिः । तस्येति । तस्य निर्वन्हिधर्मिकवन्ह्यवगाहित्वस्य, विरोध्यविषयकत्वात् घटविशिष्टगृहाद्यात्मकं यद्वस्तुमात्रं तन्निश्चयत्वविरोधिविषयितान्यत्वादित्यर्थः । पटानधिकरणमित्यादौ पदमध्यस्थनञापि समुदितार्थस्य प्रतियोगितयाऽन्वयस्य व्युत्पन्नत्वात्, तथा च तत्रत्यस्य निरुक्तावगाहिताद्वयव्यतिरेकस्य घटविशिष्टगृहादिनिश्चयत्वविरोधिविषयिताप्रतियोगिकत्वमेव नास्तीति वस्त्वन्तरे नातिव्याप्तिरिति भावः । यादृशविशिष्टविषयकत्वं प्रकृतपक्षहेतुसाध्यकानुमितिप्रतिबन्धकतानतिरिक्तवृत्ति तत्त्वं हेतुदोषत्वमिति प्रागुक्तलक्षणस्य त्यागे अनुशयान्तरमप्याह एवमिति । उक्तरीत्या विरोधिविषयिताप्रयुक्तत्वस्य नि-

साध्यनिश्चयोत्तरं तस्यानुमितावपि मानसज्ञानाविरोधित्वाच्च ।

वेशन इत्यर्थः । साध्यनिश्चयेत्यस्य पक्ष इत्यादिः । तस्य साध्यस्य । अननुमितावपीति । न क्षतिरिति पूर्वेणान्वयः । पक्षधर्मिकसाध्यावगाहित्वस्य साध्यव्याप्यहेतुमत्त्वावगाहित्वस्य वा साध्यविशिष्टपक्षनिश्चयत्वाभावव्याप्यत्वविरहेण तादृशावगाहिताद्वयव्यतिरेकस्य साध्यविशिष्टपक्षनिश्चयत्वाविरोधिविषयिताप्रतियोगिकत्वविरहादेव प्रकृतलक्षणस्य साध्यविशिष्टपक्षे नातिव्याप्तिः, प्रागुक्तलक्षणस्य तु पक्षधर्मिकसाध्यविधेयकानुमितित्वावच्छिन्नं प्रति प्रतिबन्धकत्वमादायैव तत्रातिव्याप्तिरावश्यकीति भावः । यद्यप्यनुमित्साकालीनसाध्यनिश्चयोत्तरानुमितौ निरुक्तावगाहिताद्वयस्य सत्त्वात् यादृशविशिष्टविषयकनिश्चयोत्तरानुमितित्वावच्छेदेन निरुक्तावगाहिताद्वयव्यतिरेक इत्येतावतैव साध्यविशिष्टपक्षस्य वारणं सम्भवति, तथापि यत्साध्यवत्तया यत्पक्षनिश्चयोत्तरं कदापि तत्साध्यवत्तया तत्पक्षस्य नानुमितिस्तत्साध्यविशिष्टतत्पक्षेऽतिव्याप्तिर्विरोधिविषयिताप्रयुक्तत्वदलेनैव वारयितुं शक्यते इत्याशयेनेदम् । अत एव द्वितीयकल्पे यद्विषयकनिश्चयोत्तरानाहार्यमानसज्ञानत्वावच्छेदेन निरुक्तावगाहिताद्वयव्यतिरेक इत्यतोपि सिद्धसाधनसामान्यवारणं सम्भवतीत्याह मानसेति । साध्यनिश्चयोत्तरमित्यनुषज्यते । तेन पक्षधर्मिकसाध्यावगाहित्वसाध्यव्याप्यहेतुमत्त्वावगाहित्वयोः साध्यनिश्चयोत्तरमानसज्ञानाविरोधित्वात्तादृशमानसज्ञानेऽपि समावेशादित्यर्थः । तथा च सिद्धसाधनोत्तरमानसत्वावच्छेदेन निरुक्तावगाहिताद्वयस्य व्यतिरेको नास्तीति न कुत्रापि साध्यविशिष्टपक्षेऽतिप्रसङ्ग इति भावः । अत्र वदन्तीत्युक्त्वाऽस्वरसः सूचितः । तदूबीजं तु सर्वत्र सर्ववस्तूनां भ्रमे मानाभावात् यत्र यस्य यद्व्याप्यवत्त्वस्य वा भ्रमो नास्ति तत्र तस्य साध्यतास्थले तदभावविशिष्टतद्वस्तुरूपबाधप्रभृतावव्याप्तिः निरुक्तावगाहिताद्वयस्याप्रसिद्ध्या तद्व्यतिरेकस्य तत्राऽलीकत्वात् । किञ्च यत्र संयोगेन पर्वतत्वादेः पक्षतावच्छेदकत्वं यत्र वा पर्वतत्वादिप्रकारेणैव ह्रदादेः पक्षत्वं तत्र पर्वतो वन्हिमान् धूमादित्यादावाश्रयासिद्ध्यादावव्याप्तिः, एवं व-

तादृशि पक्षे तादृशसाध्यवैशिष्ट्यस्य तादृशसाध्यनिरूपितव्याप्तिवि-शिष्टतादृशहेतुवैशिष्ट्यस्य चावगाहिनो ज्ञानस्य यद्विषयं ज्ञानं विरो-धिविषयकं तत्त्वं तादृशज्ञानविरोधित्वं वा हेतुदोषत्वम्। ज्ञानविरोधि-

---

न्हिमत्पर्वतो निर्वन्हित्वव्याप्यवान् धूमादित्यादौ पर्वतो निर्वन्हित्व-व्याप्यजलत्ववान् निर्जलत्वादित्यादौ च वन्हिविशिष्टपर्वतस्य हेत्वा-भासत्वापत्तिः, निरुक्तोभयाभावस्याऽनाहार्यनिश्चयत्वविरोधिविष-यिताप्रतियोगिकत्वात् तस्य निश्चयोत्तरानुमितित्वावच्छेदेन वर्तमा-नत्वाच्च । वस्तुतः पर्वतो वन्हिमान् धूमादित्यादौ महानसीयान्य-वन्हेर्बाधभ्रमदशायामुत्पद्यमानायां पर्वतो महानसीयवन्हिमानित्य-नुमितौ विरोधित्वेन पर्वतो महानसीयवन्ह्यभाववानित्याद्यसङ्कीर्ण-बाधश्चिन्तामणिकृताग्रे वक्ष्यत इति तत्राप्युक्तलक्षणाव्याप्तिरिति द्र-ष्टव्यम् । केषाञ्चिल्लक्षणमाह तादृशपक्ष इत्यादि । प्रकृतपक्षे प्रकृत-साध्यवत्त्वस्य प्रकृतसाध्यव्याप्यप्रकृतहेतुमत्त्वस्य चावगाहिनो ज्ञा-नस्य विरोधिविषयकं यद्विषयकं ज्ञानं तत्त्वं हेतुदोषत्वमित्यर्थः । ह्रदो वन्हिमान् वन्हिव्याप्यधूमवांश्चेत्यादिज्ञानस्य विरोधिविषयकत्वं ह्रदो निर्वन्हिरित्येवंविधबाधादिज्ञानस्यास्तीति तत्र लक्षणसमन्व-यः। ननु विषयस्य पक्षधर्मिकसाध्यतद्व्याप्यवत्तावगाहिज्ञानविरो-धित्वं तादृशज्ञानसमानविषयकज्ञानप्रतिबन्धकग्रहविषयत्वरूपमेवा-ग्रे वक्ष्यते तथा च तावन्मात्रस्य सम्यक्त्वे यद्विषयकं ज्ञानं तादृश-विरोधिविषयकमित्यत्र विषयत्वद्व्यादिप्रवेशे गौरवमतस्तथैवाह ता-दृशज्ञानविरोधित्वं वेति। पक्षधर्मिकसाध्यतद्व्याप्यहेतुमत्त्वावगाहि-ज्ञानविरोधित्वं वेत्यर्थः । प्रतिबन्धकत्वरूपस्य तादृशज्ञानविरोधि-त्वस्य सव्यभिचारादावसम्भवाद्व्याचष्टे तज्ज्ञानेत्यादि । तद्विषय-विषयकेति । पक्षधर्मिकसाध्यतद्व्याप्यहेतुमत्त्वावगाहिज्ञानविषयक-ग्रहप्रतिबन्धकीभूतग्रहविषयत्वमित्यर्थः । तादृशज्ञानप्रतिबन्धकग्र-हविषयत्वमात्रोक्तौ निर्वन्हिः पर्वतो वन्हिमान् धूमादित्यादौ बाधा-ख्यव्याप्तिः तादृशसाध्यतद्व्याप्यहेतुमत्त्वावगाहिज्ञानस्याहार्यतया त-त्प्रतिबन्धकग्रहाप्रसिद्धेः अतस्तादृशज्ञानविषयविषयकग्रहप्रतिबन्ध-

त्वञ्च तद्विषयविषयकग्रहविरोधिग्रहविषयत्वम् । एवंविधैव रीतिरुत्तरत्र सर्वत्र सव्यभिचारलक्षणादावनुसर्त्तव्या इयमपि कोचित्काचित्तु यादृशपक्षकयादृशसाध्यकयादृशहेतौ यावन्तो दोषाः सम्भवन्ति

कत्वं निवेशितम्, तथा च निर्वन्हिः पर्वतो वन्हिमानित्याकारकज्ञानसमानविषयकस्य पर्वतो वन्हिमानिति ज्ञानस्य प्रतिबन्धको यः पर्वतो निर्वन्हिरित्याकारकग्रहस्तद्विषयत्वमादायैव तत्र लक्षणस्य सङ्गमः । न च वन्हिमान्वन्हिव्याप्यधूमवांश्चायं पर्वतः पटवानित्याकारस्य साध्यतद्व्याप्यवत्त्वावगाहिज्ञानसमानविषयकग्रहस्य प्रतिबन्धकं पर्वतो निष्पट इत्याकारकज्ञानमादाय तद्विषयस्य निष्पटत्वविशिष्टपर्वतादेर्धूमादिसङ्गतुस्थले दोषत्वापत्तिरिति वाच्यम् । पक्षधर्मिकसाध्यतद्व्याप्यहेतुमत्त्वावगाहिज्ञानत्वाव्यापकविषयिताशून्यग्रहप्रतिबन्धकग्रहविषयत्वस्य विवक्षितत्वात् । उक्तसमूहालम्बनस्य च तादृशज्ञानत्वाऽव्यापकीभूतपटाद्यवगाहितावत्त्वेनाऽतिव्याप्त्यभावादिति भावः । अग्रिमग्रन्थलाघवार्थमाह एवंविधैवेति । आहार्यव्याप्तिज्ञानमुपादाय तत्समानविषयकग्रहविरोधित्वघटितैव रीतिरुपादेयेत्यर्थः । अन्यथा पर्वतो धूमवान् धूमव्यभिचारिवन्हेरित्यादौ प्रकृतहेतुकव्याप्तिग्रहविरोधित्वाप्रसिद्ध्या तत्रत्यव्यभिचारादावव्याप्तिप्रसङ्गादिति भावः । यत्र स्थलविशेषे साध्यतद्व्याप्ययोः पक्षे समूहालम्बनभ्रमो न कस्यापि जातः तत्रत्यदोषेऽव्याप्तिः एवं पर्वतः पर्वतान्यो धूमादित्यादौ बाधादावव्याप्तिश्चेत्यादिदोषः केचिदित्युक्त्या सूचितः । द्वयोर्बहूनां च निर्धारणे तरतमयोर्विधानादन्यतरत्वाद्युक्तेरसार्वत्रिकत्वादाह तावदन्यान्यत्वमिति । न च गगनवत्प्रमेयो वन्हिमान् घटत्वादित्यादौ गगनाभावविशिष्टप्रमेयरूपाश्रयासिद्धिमन्तर्भाव्याऽन्यान्यत्वं दुर्वचं निर्गगनप्रमेयान्याप्रसिद्धेरिति वाच्यम् । प्रमेयनिष्ठस्य गगनाभावस्यैव तत्राश्रयासिद्धित्वेन तमन्तर्भाव्यान्यान्यत्वस्य सुप्रसिद्धत्वात् । यत्तु वन्ह्यभावविशिष्टह्रदात्मकबाधप्रभृतीनां तादृप्येण दोषाणामपि ह्रदत्वादिमात्रेणाऽदोषत्वाद्यत्र स्थले यादृशयादृशरूपेण दोषव्यवहारः प्रामाणिकस्तत्र

तावदन्यान्यत्वम्। एकमात्रदोषस्थले च तत्त्वमेव हेत्वाभासत्वम्। स चातिरिक्त एवान्योन्याभाव इति न वैयर्थ्यम्। पञ्चविधभेदोक्तिस्तु तत्सम्भवस्थलाभिप्रायेण। व्यभिचारादेः साध्यादिभेदनियन्त्रितत्वात् शब्दाभेदमात्रस्य चाकिञ्चित्करत्वादिति प्राहुः।

स्यादेतत्, शब्दोऽनित्यः शब्दत्वात् इत्यत्रासाधारणेऽव्याप्तिः

तावदन्यान्यरूपवत्त्वमेव दोषत्वं वाच्यं तथा च गगनाभावविशिष्टप्रमेयस्यापि तादृप्येण दोषत्वमक्षतमेवेति। तन्मन्दम्। यथाकथञ्चित्सम्बन्धेन तादृशान्यतमरूपवत्त्वस्यातिप्रसक्तत्वात्, अनुगतानतिप्रसक्तैकसम्बन्धेन तद्वत्त्वस्य च सर्वत्र दोषे वक्तुमशक्यत्वादिति ध्येयम्। ननु ह्रदाद्यात्मकपर्वतो वन्हिमान् धूमादित्यत्र आश्रयासिद्धेरेव दोषत्वात्तावदन्यान्यत्वाप्रसिद्धिरत आह एकेति। दोषविभाजकैकरूपमात्रस्थले इत्यर्थः। तेन पक्षनिष्ठह्रदान्यत्वस्य ह्रदत्वाभावव्याप्यविशिष्टपक्षस्य वाश्रयासिद्धित्वादेकव्यक्तिमात्रदोषस्थलाप्रसिद्धावपि न क्षतिः। ननु दोषपक्षकेतरभेदानुमाने बाधत्वादेरेव हेतुत्वसम्भवे बाधाद्यन्यतमत्वस्य हेतुतायां व्यर्थविशेषणत्वान्नेदं लक्षणमत आह स चेति। न वैयर्थ्यं धूमप्रागभाववद्भिन्नधर्मिकत्वादिति भावः। न चैकस्मिन्हेतौ द्वौ त्रयश्चत्वार एव वा दोषा इति तावदन्यान्यत्वमेव लक्षणं वाच्यम्, तथा च तदवान्तरधर्मेण पञ्चधा अग्रे विभागानुपपत्तिः सामान्यतोऽवगतस्यैव विशेषरूपेण विभागस्य सम्प्रतिपन्नत्वादत आह पञ्चविधेति। तथा च यत्र ह्रदो वन्हिमान् घटत्वादित्यादिस्थले व्यभिचारविरोधासिद्धिसत्प्रतिपक्षबाधाः पञ्चैव दोषाः सन्ति तत्र तावदन्यान्यत्वस्यैव दोषलक्षणत्वात्तदवान्तररूपैः पञ्चभिरग्रे विभागस्य न व्याघात इति भावः। ननु विशिष्य दोषानुपादाय तावदन्यान्यत्वस्य लक्षणत्वे सर्वत्र हेतावनुगतलक्षणाभाव इत्यत आह व्यभिचारादेरिति। तथा च लक्ष्यस्य अननुगतत्वादत्र लक्षणानुगमेऽपि न क्षतिरिति भावः।

दोषमात्रस्यैव स्वमते नित्यत्वादृशाविशेष इत्यादिग्रन्थस्य सद्धेतौ लक्षणार्थयोजकत्वासम्भवादलक्ष्यताप्रदर्शनाभिप्रायेण तमुत्थापयति

दशाविशेषे हेत्वोरेवाऽसाधारणसत्प्रतिपक्षयोराभासत्वात् तद्बुद्धेरप्यनुमितिप्रतिबन्धकत्वम् ।

सर्वसाध्यवद्व्यावृत्तेस्तत्रासत्त्वात्, एवं शब्दोऽनित्यः कृतकत्वात् इत्यस्य सत्प्रतिपक्षे नित्यत्वव्याप्याद्रव्यद्रव्यत्वादावपि पक्षस्य तद्वत्त्वाविरहादित्याशङ्क्य तयोरलक्ष्यत्वेन निराकुरुते दशाविशेष इति । हेत्वोः सद्धेत्वोः । असाधारणः पक्षमात्रवृत्तिः । सन् प्रतिपक्षो विरोधिपरामर्शो यस्य स तथा । तयोर्दशाविशेषे हेतौ सर्वसाध्यवद्व्यावृत्तत्वस्य पक्षे साध्याभावव्याप्यवत्त्वस्य च भ्रमदशायामाभासत्त्वात् अनुमित्यजनकत्वात्तद्बुद्धेर्हेत्वादौ साध्यवद्व्यावृत्तत्वादिबुद्धेः प्रतिबन्धकत्वं परमायाति न तु तद्विषयस्य दोषत्वम् असत्त्वात् । अन्यथा बाधभ्रमेणानुमित्यनुदयात् तस्यापि दोषत्वं स्यात्।

स्यादेतदित्यादिना । अव्याप्तिरिति । दुष्टलक्षणस्येत्यादिः । साधननिष्ठस्य सर्वसाध्यवद्व्यावृत्तत्वस्य दोषतया तदप्रसिद्धैव तद्वत्त्वरूपस्य दुष्टहेतुलक्षणस्याव्याप्तिरित्यत आह सर्वेत्यादि । तत्र शब्दत्वे । अद्रव्यद्रव्यत्वादावपीति । असमवेतद्रव्यत्वादावपीत्यर्थः । शब्दवृत्तित्वविशिष्ट इत्यादिः । पक्षवृत्तित्वविशिष्टस्यैव साध्याभावव्याप्यस्य सत्प्रतिपक्षतया केवलस्य तस्यादोषत्वादत आह पक्षस्येति । तद्वत्त्वविरहादिति । नित्यत्वव्याप्यासमवेतद्रव्यत्ववत्त्वविरहादित्यर्थः । अलक्ष्यत्वं स्फुटीकर्तुमाह सद्धेत्वोरिति । ननु तयोरदुष्टत्वे कथमसाधारणादिपदेनोल्लेख इत्यतो व्याचष्टे असाधारण इत्यादि । स तथा सत्प्रतिपक्षपदबोध्यः । दुष्टत्वरूपस्याभासत्वस्यानङ्गीकारादन्यथा व्याचष्टे अनुमित्यजनकत्वादिति । हेत्वोरेवेत्येवकारः प्रतिबन्धकत्वमित्यनन्तरं योज्य इत्याशयेन तादृशैवकारार्थं व्याकरोति परमायातीत्यादिना । असत्त्वात् अप्रसिद्धत्वात् । अन्यथेति । प्रतिब-

कोऽहि साध्याभावतदव्याप्यवत्ताभ्रमयोरनुमितिविरोधित्वे विशेषः। निर्युक्तिकस्तु प्रवादो न श्रद्धेयः। यत्तु ज्ञानस्य यदनुमितिप्रतिबन्धकतावच्छेदकं तद्वत्त्वं तत्प्रकारकप्रमाविषयत्वञ्च लक्षणार्थः। तच्च द्विविधम्। विषयरूपं साधारण्यादि। बाधे च प्रमितसाध्याभाववान् पक्षः। तद्विषयत्वेन ज्ञानस्यानुमितिप्रतिबन्धकत्वात्। अविषयरूपञ्च विरोधिसामग्रीकालीनत्वादिकम्। तद्वत्त्वञ्च ज्ञानस्येव

न्धकज्ञानविषयीभूतस्य विशिष्टस्यासत्त्वस्थले दोषाभ्युपगम इत्यर्थः। तस्यापि बाधभ्रमविषयस्यापि। असाधारण्यादिभ्रमदशायां सद्धेत्वोरपि प्राच्यैर्लक्ष्यत्वस्वीकारादुक्तव्याख्यानमसङ्गतमित्यत आह निर्युक्तिकास्त्विति। सत्प्रतिपक्षासाधारण्यानुपसंहारित्वानामनित्यदोषत्वमङ्गीकुर्वतां मतमुत्थापयति यत्त्विति। द्वितीयलक्षणमनुसृत्याह तद्वत्त्वमिति। यद्विषयत्वेनेत्यत्र विषयशब्दस्य स्वरूपपरत्वाद्यद्रूपेण ज्ञानस्यानुमितिप्रतिबन्धकत्वमित्यर्थलाभादिति भावः। यथार्थपदघटितप्रथमलक्षणमनुसृत्याह तत्प्रकारकेति। अनुमितिप्रतिबन्धकतावच्छेदकप्रकारकेत्यर्थः। मूलस्थप्रतियोगिपदस्य प्रतियोगितावच्छेदकपरत्वादिति भावः(तथा चानुमितिकारणीभूताभावप्रतियोगितावच्छेदकप्रकारकप्रमाविषयत्वं प्रथमलक्षणार्थ इति भावः। वस्तुतः प्रकारकत्वविवक्षणेऽपि यथाश्रुतमूलासङ्गतिः ज्ञायमानव्यभिचारादेः प्रतिबन्धकत्वमते तेषां तादृप्येणैव साध्याभावज्ञानस्यानुमितिप्रतिबन्धकत्वोपगमादितिभावः।) यद्यपि प्रथमलक्षणं व्याख्याय द्वितीयं व्याख्यातुमुचितं तथापि ग्रन्थलाघवार्थं व्यतिक्रमेण व्याख्यातमित्यवधातव्यम्। तच्चेति। प्रतिबन्धकतावच्छेदकं चेत्यर्थः। विषयरूपमिति। प्रतिबन्धकज्ञानस्येत्यादिः। ननु साध्याभावप्रमैव बाध इति तत्र विषयतया प्रतिबन्धकतावच्छेदकत्वं दुर्घटमित्यत आह बाधे चेति। प्रमितेति प्राचां मतेन। तेषां तादृप्येणैव साध्याभावज्ञानस्यानुमितिविरोधित्वोपगमात्। अविषयरूपं चेति। अनुमितिप्रतिबन्धकज्ञानाविषयरूपं चेत्यर्थः। विरोधिसामग्रीकालीनत्वेति। साध्याभावानुमितिसामग्रीविशिष्टत्वादीत्यर्थः। वैशिष्ट्यं च सामानाधिक-

तद्विषयस्य हेतोरपीति । तन्न । तद्धत्त्वं हि हेतोर्नाऽभेदेन, बाधे तदभावात् । अत एव नाश्रयतया, वन्हिव्यभिचारिद्रव्यत्वादिमति धूमेऽतिप्रसङ्गाच्च । साध्याभाववत्पक्षस्येव साध्याभाववद्वृत्तिहेतोर्ज्ञानस्य प्रतिबन्धकत्वात् । साधारण्यादिविषयकत्वस्य ज्ञा-

---

रण्यसम्बन्धेन ग्राह्यम् । तेन पुरुषान्तरीयसाध्याभावानुमितिसामग्रीकालीनस्य धूमपरामर्शस्य स्वहेतुकानुमित्यप्रतिबन्धकत्वेऽपि न क्षतिः । आदिपदेनासाधारण्यादिग्रहकालीनत्वोपग्रहः । ननु परामर्शस्य विरोधिसामग्रीकालीनत्वेपि तद्विषयस्य धूमादिहेतोस्तथात्वाभावादव्याप्तिरत आह तद्धत्त्वं चेति । बाध इति । प्रायश इत्यादिः । तथा च धूमो वन्हिमान् धूमादित्यादौ साध्याभावाविशिष्टपक्षाभेदस्य हेतौ सत्त्वेपि ह्रदो वन्हिमान् धूमादित्यादौ धूमादिहेतौ साध्याभाववत्पक्षाभेदाविरहादव्याप्तिरित्यर्थः । साध्याभाववदवृत्तित्वविशिष्टहेतोरेव व्यभिचारितया तदभेदस्य व्यभिचारिमात्रे सम्भवादबाधपर्यन्तानुसरणम् । अत एव बाधितहेतावव्याप्तेरेव नाश्रयतयेति। तद्धत्त्वमिति पूर्वेणान्वयः । ननु साध्याभाववत्पक्षस्येव पक्षनिष्ठसाध्याभावस्यापि बाधत्वात्तदाश्रयत्वमादायैव ह्रदो वन्हिमान्धूमादित्यादिबाधिते नाव्याप्तिरत आह वन्हिव्यभिचारीति । धूम इति । पर्वतादौ वन्हेस्साध्यतास्थले इत्यादिः । तेन ह्रदपक्षकवन्हिसाध्यकधूमस्य दुष्टतया नेष्टापत्तिसम्भवः । ननु वन्ह्यभाववदवृत्तित्वमात्रस्यानुमितिप्रतिबन्धकतावच्छेदकत्वात्तद्धत्त्वस्य च धूमे विरहात्कुतोऽतिव्याप्तिरत आह साध्याभाववदिति । तथा च वन्हिव्यभिचारिद्रव्यत्वमपि विषयतयाऽनुमितिप्रतिबन्धकतावच्छेदकमिति तद्धत्त्वमादायातिप्रसङ्गो युक्त इति भावः । ननु तत्पक्षकतत्साध्यकतद्धेतुकानुमितिप्रतिबन्धकतावच्छेदकत्वं वक्तव्यं तथा च वन्हिव्यभिचारिद्रव्यत्वस्य धूमहेतुकानुमितिप्रतिबन्धकतावच्छेदकत्वाभावान्नातिव्याप्तिरत आह साधारण्यादीति । ज्ञानधर्मिकसत्तासाध्यकानुमितिप्रतिबन्धकता-

ननिष्टस्यैव प्रतिबन्धकतावच्छेदकत्वात् सत्तादिसाध्यके ज्ञानेऽतिप्रसङ्गाच्च। यथाकथञ्चित्तद्वत्त्वस्य चातिप्रसञ्जकत्वात्। विरोधिसामग्रीसमवहितोऽपि च लिङ्गपरामर्शो न स्वसाध्यकानुमितेः प्रतिबन्धको मणिसमवहितो वह्निरिव दाहस्य। अथ यद्धर्मविशिष्टज्ञाने सत्यवश्यमनुमितिप्रतिबन्धः तदेवात्र प्रतिबन्धकतावच्छेदकत्वात्तदाश्रयत्वमादाय सत्तासाध्यकज्ञानादिहेतावतिव्याप्तिरित्यर्थः। ननु वैशिष्ट्यविषयित्वान्यतरसम्बन्धेन योऽनुमितिप्रतिबन्धकतावच्छेदको धर्मस्तद्वत्त्वमित्यर्थः, विरोधिसामग्रीविशिष्टस्वपरामर्शत्वेन बाधादिविषयकत्वेन चानुमितिप्रतिबन्धकत्वात् तथा च साधारण्यादिविषयकनिश्चयत्वस्य तादृशान्यतरसम्बन्धेन प्रतिबन्धकतानवच्छेदकत्वात्तद्वत्तामादाय नातिव्याप्तिः स्वरूपसम्बन्धेनैव तस्य तथात्वादत आह यथाकथञ्चित्तद्वत्त्वस्येति। प्रतिबन्धकतावच्छेदककोटिनिविष्टतामात्रेण यत्प्रतिबन्धकतावच्छेदकं तद्वत्त्वस्येत्यर्थः। अतिप्रसञ्जकत्वादिति। पर्वतो न वन्हिमानित्याकारकज्ञानत्वेन प्रतिबन्धकतायां वन्ह्यभावस्यापि प्रविष्टत्वात्तदाश्रयत्वमादाय पर्वतो वन्हिमान्धूमादित्यत्र सङ्केतावतिव्याप्तत्वादिति भावः। ननु वैशिष्ट्यविषयितान्यतरसम्बन्धेन प्रतिबन्धकतावच्छेदकत्वं यत्र पर्याप्तं तादृशधर्मवत्त्वं वाच्यं तथा च विषयितयाऽनुमितिप्रतिबन्धकतावच्छेदकत्वस्य साध्याभावमात्रे अपर्याप्तत्वात्तद्वत्त्वमादाय नातिव्याप्तिरत आह विरोधिसामग्रीति। तथा च विरोधिसामग्रीविशिष्टवन्हिपरामर्शत्वेन वन्ह्यनुमितिप्रतिबन्धकत्वाभावेन विरोधिसामग्र्योः प्रतिबन्धकतानवच्छेदकत्वात्सत्प्रतिपक्षितसङ्केतावव्याप्तिरिति भावः। उक्तव्याप्तिं निराकर्तुं प्रतिबन्धकतावच्छेदकपदस्य प्रतिबन्धकपरत्वमाशङ्क्यते अथेति। ज्ञाने हेतुज्ञाने। तदेवेति। तथा च स्वलिङ्गकप्रकृतपक्षकप्रकृतसाध्यकानुमितिप्रतिबन्धकीभूतधर्मवत्त्वमेव दुष्टहेतुत्वं ज्ञायमानस्य व्यभिचारादेरनुमितिप्रतिबन्धकत्वोपगमाच्च न व्यभिचारिबाधितहेतावव्याप्तिरित्याशयः। सत्प्रतिपक्षिते लक्षणं सङ्गमयति भवति चेति। प्रतिबन्धकीभूतेति। स्वलि-

च्छेदकमुक्तं, भवति च प्रतिबन्धकीभूतविरोधिसामग्रीकालीनत्वादिविशिष्टे परामर्शे तथा इति चेत्, न वै कालादिसाधारणकारणघटिता सामग्री क्वापि प्रतिबन्धिका विशेषतस्तत्र तत्सत्त्वे कार्य्योत्पादस्य दुर्वारत्वात्, किन्तु विरोधिपरामर्शस्तथा, यदि च तत्सत्त्वेऽपि तत्साध्ये बाधावतारान्नानुमितिप्रतिबन्धः प्रामाणिकस्त-

---

ङ्गकप्रकृतसाध्यानुमितिप्रतिबन्धकीभूतेत्यर्थः । कालीनत्वविशिष्टेत्यत्र कालीनत्वं कालघटितसम्बन्धेन वैशिष्ट्यलाभार्थम् । तथा साध्यानुमितिप्रतिबन्धः । विरोधिसामग्र्याः प्रतिबन्धकत्वे सत्येव तद्बलामादाय सत्प्रतिपक्षितस्य सङ्ग्रहः स्याच्चैव त्वसिद्धमित्याह नवै इति । क्वापीति । अनुमित्यादिकं प्रति प्रत्यक्षसामग्र्याः प्रतिबन्धकत्वस्यापि प्रत्यक्षोपधायकतत्तत्सन्निकर्षादिव्यक्तिष्वेव व्यवस्थापितत्वादिति भावः । अनुमित्यादौ कथञ्चित्प्रत्यक्षादिसामग्रीत्वेन प्रतिबन्धकत्वस्वीकारेऽपि सत्प्रतिपक्षस्थले साध्याभावानुमितिसामग्रीत्वेन साध्यानुमितिप्रतिबन्धकत्वं दुर्घटमित्याह विशेषतस्त्वत्रेति । न सामग्री प्रतिबन्धिकेत्यनुषज्यते । सामग्र्यात्वेन प्रतिबन्धकत्वाभावे हेतुमाह तत्सत्त्व इति । साध्याभावानुमितिसामग्रीसत्त्वे साध्याभावानुमितिरूपकार्योत्पादापत्तेरित्यर्थः । तथा च सत्प्रतिपक्ष एव व्याहन्येतेति भावः । ननु विरोधिसामग्र्याः प्रतिबन्धकत्वानभ्युपगमे सत्प्रतिपक्षस्थले साध्यानुमितेः कथं नोत्पाद इत्यत आह किन्त्विति । तथा साध्यानुमितिप्रतिबन्धकः । ननु सत्यपि विरोधिपरामर्शे पक्षस्य साध्याभावशून्यत्वनिश्चयदशायां साध्यानुमित्युत्पत्त्या तस्य प्रतिबन्धकत्वं दुर्घटमत आह यदि चेति । तत्साध्य इति । विरोधिपरामर्शीयसाध्य इत्यर्थः । नानुमितीति । न प्रकृतसाध्यानुमितिप्रतिबन्ध इत्यर्थः । विरोधिसाध्यस्य बाधावतारेण विरोधिपरामर्शस्याऽप्रामाण्यप्रसङ्गेन तत एव न तस्य साध्यानुमितिप्रतिबन्धकत्वम् अन्यथा तु प्रतिबन्धकत्वमिष्टमेव नव्यैरित्याशयेन यदि चेत्युक्तम् । तदभावस्यापि तादृशबाधनिश्चयाभावस्यापि। तत्र विरोधिपरामर्शस्य विरोधितायाम् । निवेश्यतामिति । अवच्छे-

दा भ्रमप्रमाण्यग्रहाभावस्येव तदभावस्यापि वैशिष्ट्यन्तत्र निवेश्यताम्, यथा च भ्रमप्रमासाधारणविरोधिपरामर्शसत्त्वे नानुमितिस्तथा तथाविधबाधादिग्रहेपीत्यतिप्रसङ्गः । न चातीतादौ लिङ्गे विरोधिपरामर्शकालीनत्वमपि । यदपि यद्विषयत्वेन ज्ञानस्य अनुमितिप्रतिबन्धकत्वं तद्वत्त्वमेव वाच्यं सत्प्रतिपक्षे च विरोधिव्याप्त्यादिकमेव तथा, तद्वत्त्वमपि हेतोस्तज्ज्ञानरूपसम्बन्धेन, तस्य समूहालम्बनरूपतया हेतुद्वयविषयत्वादिति । तदपि तुच्छम् । साध्याभाववत्पक्षविषयत्वेन तादृशपक्षज्ञानप्रमात्वविषयत्वेन वा ज्ञा-

---

द्धकत्वेनेत्यादिः । नन्वेवं विरोधिसामग्र्या अप्रतिबन्धकत्वेऽपि स्वलिङ्गकानुमितिप्रतिबन्धकीभूतविरोधिपरामर्शवत्तामादायैव सत्प्रतिपक्षिते लक्षणं यास्यतीत्यत आह यथा चेति । तथाविधेति । भ्रमप्रमासाधारणेत्यर्थः । अतिप्रसङ्ग इति । पर्वतो वन्हिमान् धूमादित्यत्र वन्ह्यभावभ्रममादाय धूमादावतिप्रसङ्ग इत्यर्थः । दूषणान्तरमाह न चाऽतीतादाविति । कालीनत्वमपीति । तथा च भिन्नकालीनयोर्वैशिष्ट्यविरहादतीतसत्प्रतिपक्षितसद्धेतावनुमितिप्रतिबन्धकीभूतविरोधिपरामर्शवत्त्वं केनापि सम्बन्धेन नास्तीति तत्राव्याप्तिरिति भावः । स्वसमानकालीनज्ञानविषयत्वादिसम्बन्धेनातीतलिङ्गस्यापि कथञ्चिद्विरोधिपरामर्शवत्त्वोपगमेऽपि परामृष्टत्वोत्तीर्णतादशायामपि सद्धेतोः कालिकादिसम्बन्धेन स्वलिङ्गकानुमितिप्रतिबन्धकीभूतविरोधिपरामर्शवत्त्व.त्तत्रातिव्याप्तिरित्याशयः । सर्वत्र विषयरूपमेव प्रतिबन्धकतावच्छेदकं लक्षणे निवेश्यमितिमतं दूषयति यद्पीत्यादिना । व्याप्त्यादीत्यादिना साध्याभावव्याप्तिविशिष्टपक्षधर्मत्वादेः परिग्रहः । तथा प्रतिबन्धकतावच्छेदकम् । ननु सत्प्रतिपक्षितसद्धेतौ साध्याभावव्याप्तिविरहात्तत्राव्याप्तिरत आह तद्वत्त्वमपीति । तज्ज्ञानेति । विरोधिव्याप्त्यादिज्ञानेत्यर्थः । साध्याभाववदिति । पक्षधर्मिकसाध्याभाववत्तानिश्चयत्वेनेत्यर्थः । प्रमात्वविषयकत्वेनेति प्राचां मतेन । तस्य चेति । पक्षध-

नस्य प्रतिबन्धकत्वं तस्य च साध्यवत्त्वेऽपि पक्षे सम्भवादतिव्याप्तेः। विशिष्टविषयत्वेन प्रतिबन्धकत्वं विशिष्टश्च तत्राप्रसिद्धमिति चेत्, तर्हि किं सर्वत्र सत्प्रतिपक्षे साध्याभावव्याप्यवान् पक्षः प्रसिद्धः, यथाकथञ्चित् सम्बन्धेन तद्वत्त्वञ्चातिप्रसक्तं धूमादेरपि ज्ञानरूपेण तदाश्रयाश्रयत्वादिना वा सम्बन्धेन व्यभिचारादिमत्त्वात्, यादृशसम्बन्धावगाहित्वेन ज्ञानस्य प्रतिबन्धकत्वं तेन तद्वत्त्वञ्च न

र्भिकसाध्याभाववत्ताज्ञानस्य चरमार्थः। तथा च पर्वतो द्रव्यं धूमादित्यत्र पर्वतो न द्रव्यमित्येवं बाधज्ञानसम्बन्धेन द्रव्यत्वाद्यभावस्य धूमे सत्त्वादतिव्याप्तिरत्यर्थः। ननु यादृशविशिष्टविषयकत्वेनानुमितिप्रतिबन्धकत्वं तद्वत्त्वं वाच्यं तथा च द्रव्यत्वाभावविशिष्टपर्वतप्रसिद्ध्यैव नोक्तस्थलेऽतिव्याप्तिरित्याशङ्क्य विशिष्टेति। तत्र साध्यवत्पक्षस्थले। पर्वतो वन्हिमान्धूमादित्यादौ सत्प्रतिपक्षितसद्धेतावव्याप्तिप्रसङ्गाद्विशिष्टविषयकत्वेन प्रतिबन्धकत्वं निवेशयितुमशक्यमित्याह तत्किमिति। जलं वन्हिमद्धूमादित्यादौ सत्प्रतिपक्षिते साध्याभावव्याप्यवत्पक्षस्य प्रसिद्धत्वात्सर्वत्रेत्युक्तम्। ननु पर्वतो द्रव्यं धूमादित्यादौ बाधभ्रमस्य सम्बन्धत्वे मानाभावाज्ञातिव्याप्तिः, विशेषदर्शिनामपि विरोधिपरामर्शदशायां धूमादौ सत्प्रतिपक्षितोऽयमिति व्यवहारात्तत्रैव विरोधिव्याप्त्यादेः ज्ञानस्य सम्बन्धत्वकल्पनादश्च तु बाधितो हेतुरित्यादिव्यवहारविरहादत आह यथाकथञ्चिदिति। ज्ञानरूपेणेति। धूमो वन्हिव्यभिचारीति ज्ञानरूपेणेत्यर्थः। बाधभ्रमस्येव व्यभिचारिभ्रमस्याप्युक्तक्रमेण सम्बन्धत्वे मानाभावादाह तदाश्रयेति। व्यभिचाराश्रयीभूतं यद्द्रव्यत्वादिकं तदाश्रयत्वेत्यर्थः। आदिना कालिकादेः परिग्रहः। ननु यादृशसम्बन्धेन यत्प्रकारकज्ञानत्वेनानुमितिप्रतिबन्धकत्वं तेन सम्बन्धेन तद्वत्त्वस्योक्तत्वाच्च धूमेऽतिप्रसक्तिरत आह यादृशेति। न सर्वत्रेति। तथा च पर्वतो द्रव्यं धूमादित्यादौ सत्प्रतिपक्षितसद्धेतावव्याप्तिः प्रतिबन्धकज्ञानविषयेण समवायादिसम्बन्धेन द्रव्यत्वाभावव्याप्यगुणत्वादिमत्त्वस्य धूमे विरहादिति भावः। पर्वतो वन्हिमान्धूमादित्यत्र प्रति-

यद्यपि बाधसत्प्रतिपक्षयोः प्रत्यक्षशाब्दज्ञानप्रतिबन्धकत्वान्न लिङ्गाभासत्वम्, तथापि ज्ञायमानस्याभासस्यात्र

सर्वत्र सत्प्रतिपक्षिते हेतौ, अस्ति च क्वचित् सद्धेताविति कृतं पल्लवितेन ।

यद्यपीति । स्थाणुत्वाभावस्य तद्व्याप्यकरादेश्च निश्चये स्थाणुत्वप्रत्यक्षशाब्दयोरनुदयात् । न चैवं नरशिरःकपालं शुचि प्राण्यङ्गत्वादित्यादिनाप्यागमप्रतिरोधः स्यात्, तत्रानुकूलतर्काभा-

---

बन्धकधीविषयेण समवायसम्बन्धेन वन्ह्यभावव्याप्यधूमत्वादेः साधने सत्त्वात् सर्वत्रेत्युक्तम् । ननु यादृशसम्बन्धावगाहियत्प्रकारकज्ञानत्वेन प्रतिबन्धकत्वं तादृशज्ञानतादृशसम्बन्धान्यतरसंसर्गेण तद्वत्त्वं वाच्यमतो नोक्तस्थलेऽव्याप्तिः ज्ञानसम्बन्धेनैव हेतोः साध्याभावव्याप्यगुणत्वादिमत्त्वादत आह अस्ति चेति । तेन तद्वत्त्वं चेत्यनुषज्यते । तथा च पर्वतो वन्हिमान्धूमादित्यत्र बाधबुद्धेः स्वरूपादिसम्बन्धावगाहितयैव प्रतिबन्धकत्वात्तादृशसम्बन्धेन वन्ह्यभावस्य धूमे सत्त्वादतिव्याप्तिरित्यर्थः । पर्वतो द्रव्यं धूमादित्यत्र द्रव्यत्वाद्यभावस्य स्वरूपसम्बन्धेन धूमादावभावात्क्वचिदित्युक्तम् ।

मूले यद्यपीत्यादिकं तल्लिङ्गकतत्साध्यकतत्पक्षकानुमितित्वावच्छिन्नं प्रत्येव तादृशव्यभिचारज्ञानत्वादिना स्वतः प्रतिबन्धकत्वमाहत्य तदघटितलक्षणाभिप्रायेणोक्तम्, अन्यथा व्यभिचारादिज्ञानस्यापि व्याप्त्यादिप्रत्यक्षविरोधित्वादबाधसत्प्रतिपक्षमात्रमधिकृत्य शङ्कानुपपत्तेः । अनुमितितत्कारणपरामर्शान्यतरमात्रं प्रति ज्ञायमानं यत्प्रतिबन्धकं स एव लिङ्गाभास इत्याशयेन शङ्क्येयमिति ध्येयम् । बाधसत्प्रतिपक्षयोः प्रत्यक्षादिप्रतिबन्धकत्वे हेतुमाह स्थाणुत्वाभावस्येत्यादिना । एवं शाब्दबोधेपि बाधसत्प्रतिपक्षयोर्विरोधित्वे । आगमेति । मलमूत्रपूरीषास्थिनिर्गतं ह्यशुचि स्मृतमित्यागमस्येत्यर्थः । तत्र प्राण्यङ्गत्वादिहेतौ । अनुकूलतर्कस्य व्याप्तिग्रहे स्वतोऽनु-

लक्षणम् । यद्वा प्रत्यक्षादौ बाधेन न ज्ञानं प्रतिबध्यते किन्तूत्पन्नज्ञानेऽप्रामाण्यं ज्ञाप्यते, अनुमितौ तूत्पत्तिरेव प्रतिबध्यते ॥

ते च सव्यभिचारविरुद्धसत्प्रतिपक्षासिद्धबाधिताः पञ्च ॥

वेन बलवत्तरागमविरोधेन च व्याप्तिनिश्चयस्यानुमितेश्चानुत्पत्तेरिति भावः । यद्वेत्याद्यभ्युच्चयमात्रम्, प्रत्यक्षं प्रत्यानुमानिकबाधादिनिश्चयस्याप्रतिबन्धकत्वेऽपि शाब्दं प्रति प्रतिबन्धकत्वात् । योग्यताज्ञानेनान्यथासिद्धत्वात् तदभावो न तत्र हेतुरिति चेत्, एवमप्युपनीतभानविशेषं प्रति तत्त्वेन हेतुताया दुर्वारत्वात् ॥

षयोगादाह बलवत्तरेति । शौचानुमाने साध्याप्रसिद्ध्यादेरागममात्राधीनतया उपजीव्यजातीयत्वेन मलमूत्रेत्याद्यागमस्य बलवत्तरत्वं बोध्यम् । अनुपपत्तेरिति । तथा च प्रतिबन्धकसत्त्वान्नागमविरोध इति भावः । अभ्युच्चये हेतुमाह प्रत्यक्षं प्रतीति । लौकिकप्रत्यक्षं प्रतीत्यर्थः । बाधादीत्यादिपदेन ग्राह्याभावव्याप्यत्वोपग्रहः । शङ्कते योग्यताज्ञानेति । तदभावो बाधनिश्चयाद्यभावः । तत्र शाब्दबोधे । शब्दं प्रति बाधनिश्चयस्याप्रतिबन्धकत्वे योग्यताज्ञानोत्तरं लौकिकात्मकबाधनिश्चये सत्यपि शाब्दधीः स्यादिति दोषं स्फुटतयोपेक्ष्याह एवमपीति । उपनीतभानविशेषमिति । दोषविशेषजन्योपनीतभानं प्रतीत्यर्थः । तत्त्वेन बाधनिश्चयाभावत्वेन । यद्यपि बाधनिश्चयदशायामुपमितेः स्मृतेश्चानुत्पादादुपमितिस्मृती प्रत्यपि तदभावस्य हेतुत्वं वक्तुमुचितं तथाऽप्युपमितेरतिरिक्तप्रमात्वे विप्रतिपत्तेर्बाधदशायां विशिष्टस्मरणानुत्पादस्य चोद्बोधकविरहेणापि सम्भवात्तत्र बाधाद्यभावस्य हेतुत्वे मानाभाव इत्याशयः ॥

इति जागदीश्यां सामान्यनिरुक्तिः समाप्ता ॥

चिन्तामणेः व्यभिचारः ।

सव्यभिचारोऽपि त्रिविधः, साधारणासाधारणानुपसंहारिभेदात् । तत्र सव्यभिचारः साध्यतदभावप्रसञ्जक

दीधित्याः सव्यभिचारः ।

यद्यपि लक्षणतः सामान्यमप्रतीतवतो विशेषजिज्ञासानुदयात् सामान्यलक्षणानन्तरमेव विशेषविभागो युक्तः, तथापि सव्यभिचारपदस्य साधारणमात्रे प्रसिद्धतया तन्मात्रस्य लक्ष्यभावं बुध्यमानैरन्तेवासिभिरसाधारणादिसाधारणस्य लक्षणस्यातिव्याप्तिस्तद्व्यावृत्तस्यैव च साधुता प्रतीयेत अतस्तद्वारणाय लक्ष्यान्तरमपि दर्शयति सव्यभिचार इति । कश्चित्तु सामान्यज्ञानाधीनो विभागो न तल्लक्षणप्रत्ययमपेक्षतेऽतः प्रथमं विभागकरणेऽपि

जागदीश्याः सव्यभिचारः ।

लक्षणतः लक्षणवाक्यतः । विशेषेति । तदवान्तरधर्मप्रकारेण तद्गोचरज्ञानेच्छायां सामान्यतः तद्गोचरज्ञानस्य हेतुत्वादिति भावः । लक्षणस्येति । वक्ष्यमाणस्येत्यादिः । अतिव्याप्तिरिति । प्रतीयत इत्यन्वयः । तद्व्यावृत्तस्य । असाधारणादिव्यावृत्तस्य । लक्ष्यान्तरमपीति । तथा च नायं विभागपरो ग्रन्थः किं तु लक्ष्यप्रदर्शक इति भावः । तल्लक्षणप्रत्ययमिति । तस्य सामान्यस्य लक्षणतः प्रत्ययमित्यर्थः । प्रकारान्तरेण सामान्यज्ञानस्य प्राक्सत्वे पश्चात्सामान्यल-

इति न त्रितयसाधारणं लक्षणम्, एकस्योभयं प्रत्यसाधकत्वात् अनापादकत्वाच्च । नाप्युभयपक्षवृत्तित्वम्, उभयव्यावृत्तत्वं वा तत्त्वम्, अननुगमात्।अथ साध्यसंशयजनककोटिद्वयोपस्थापकपक्षधर्मताज्ञानविषयत्वे सति हेत्वभिमतः सः । त्रिप्रतिपत्तिस्तु प्रत्येकं न तथा न वा

न दोष इत्याह। प्रसक्तिरनुमितिरापत्तिर्वा, तदुपधानमव्यापकमतिव्यापकञ्च तथाविधव्याप्तिभ्रमेण सद्धेतावतस्तद्योग्यता वाच्या, सा च तादृशव्याप्त्यादिरूपा, न च विरुद्धोभयव्याप्यत्वमेकस्य सम्भवतीत्याह एकस्येति । साध्येति । कोटिद्वयोपस्थापकं सत् साध्यसन्देहजनकं साध्यसन्देहजनककोटिद्वयोपस्थितिजनकमिति याव-

---

क्षणोद्भावनं न स्यात् आकाङ्क्षाविरहादित्याद्यस्वरसः कश्चिदित्युक्त्या सूचितः । हेतुद्वयसङ्गत्यर्थं वितर्कयति अनुमितिरापत्तिर्वेति । नन्वेकस्यापि हेतोर्व्याप्त्यादिभ्रमेण साध्यतदभावोभयसाधकत्वादेकस्येत्यादिमूलमसङ्गतमत आह तदुपधानमिति । साध्यतदभावोपधानमित्यर्थः । अव्यापकमिति । तथा च येन व्यभिचारिहेतुना साध्यतदभावयोरनुमित्यादिर्नोत्पादितः तत्राव्याप्तिरिति भावः । पक्षतावच्छेदकसामानाधिकरण्येनेतरभेदस्य सिद्धेरुद्देश्यतायामव्याप्तेरदूषणत्वादाह अतिव्यापकं चेति । तथाविधेति । तदभावीयव्याप्तिभ्रमेणेत्यर्थः । तद्योग्यतेति । साध्यतदभावानुमित्यादिस्वरूपयोग्यतेत्यर्थ।संशयं प्रत्येव साधारणादिधर्मवद्धर्मिज्ञानत्वेन हेतुत्वे कोटिद्वयोपस्थापकपदवैयर्थ्यापत्तिरतः संशयहेतुकोटिद्वयोपस्थितिं प्रत्येव तादृप्येण हेतुत्वं संशयसामान्यं प्रति तु तद्धर्मिज्ञानं कारणमिति मतानुसारेण व्याचष्टे कोटीत्यादि । तथा च भ्रमिजनकं सद्घटकारणमित्यत्र भ्रमिद्वारा घटजनकत्वस्येव प्रकृतेपि कोटिद्वयोपस्थिति-

तु । आश्रयतया विषयितया वा नित्यत्वानित्यत्वोपस्थापकस्य नित्यत्वे साध्ये ज्ञानस्याऽनुवृत्तत्वव्यावृत्तत्वाभ्यां वन्हितदभावोपस्थापकस्य वन्हौ साध्ये धूमस्य वारणाय जनकान्तम् । तथोपस्थितेः साध्यसन्देहाजनकत्वात् । धर्मितावच्छेदकपुरोवर्त्तित्वादिविशिष्टधर्मिज्ञानस्य संशयजनकतया तद्वारणाय कोटिद्वयोपस्थापकेति । न च तदसाधारणतया संग्राह्यमेवेति वाच्यम्, तथात्वेऽपि

द्वारा संशयजनकत्वस्य लाभो व्युत्पत्तिवैचित्र्यादिति भावः । साध्यसन्देहजनकेत्यस्योपस्थितिक्रियायामभेदान्वयादेव सामञ्जस्ये समासनिविष्टपदानामप्युक्तदिशा व्युत्पत्त्यन्तरस्वीकारेण द्वारत्वलाभो न युक्तः क्रियाविशेषणेनापि नितान्तक्षाम इत्यादौ स्तोकनघ्रा स्तनाभ्यामित्यादौ च द्वितीयातत्पुरुषस्येष्टत्वादित्याह साध्यसन्देह इत्यादि । आश्रयतयेति । तृतीयार्थः प्रकारत्वं, तच्चोपस्थापकपदार्थस्योपस्थापकज्ञानविषयस्यैकदेशे ज्ञानेऽन्वितम् । तेन नित्यत्वानित्यत्वाश्रयज्ञानवानयमित्याकारबुद्धेः तादृशज्ञानविशिष्टवैशिष्ट्यबुद्धिरूपायाः साध्यतदभावोपस्थितौ हेतुत्वेन तद्विषये ज्ञानहेतावतिव्याप्तिवारणायेत्यर्थः । एवमग्रेपि द्रष्टव्यम् । एकस्या ज्ञानव्यक्तेर्नित्यत्वानित्यत्वोभयाश्रयत्वाभावादाह विषयितया वेति । अनित्यत्वे साध्ये ज्ञानस्य व्यभिचारित्वं नव्यैरिष्यत एवेत्यतो नित्यत्वे साध्य इत्युक्तम् । समवायेन हेतावतिव्याप्तिमुक्त्वा संयोगेन सद्धेतौ तामाह अनुवृत्तेत्यादि । अनुवृत्तत्वं तदधिकरणवृत्तित्वं व्यावृत्तत्वं च तदभाववदवृत्तित्वं तथा च वन्हिमदवृत्तितदभाववदवृत्तिधूमवानयमित्यनुभवस्य वन्हितदभावोपस्थापकतया तद्विषयस्य धूमहेतोर्वारणार्थं जनकान्तमित्यर्थः । तथोपस्थितेरिति । उक्तक्रमेण कोटद्वयोपस्थितेरित्यर्थः । साधारणादिधर्मवद्धर्मिज्ञानजन्यकोटद्वयोपस्थितित्वेनैव संशयहेतुत्वादिति भावः । धर्मितेति । पुरोवर्तीदं द्रव्यं न वेत्यादिसंशयजनकस्येदम्पुरोवर्त्तीत्यादिपक्षधर्मताज्ञानस्य विषयतामादाय द्रव्यत्वसाध्यके पुरोवर्तित्वादिहेतावतिव्याप्तिवारणायेत्यर्थः। एतत् धर्मितावच्छेदकम् । असाधारणतयेति । निश्चितसाध्यतदभाव-

तदुत्तीर्णतादशायां विशेषदर्शनात् संशयानुपधायकत्वेऽपि तज्जननयोग्यताया अनिवृत्तेः । अन्यथा यथायथं पक्षे साध्यतदभावनिश्चयदशायां साधारणाव्याप्तिप्रसङ्गात् । प्रतिपक्षसम्बलनदशायां हेतुमत्ताज्ञानस्य साध्यसन्देहजनकत्वपक्षे हेतुवारणाय कोटीत्यादि। हेतुना साध्यस्य प्रतिहेतुना तदभावस्य उपस्थापनादुभयोपस्थापकत्वं न कस्यापीत्यपि कश्चित्। इदं द्रव्यणुकं नित्यमणुत्वादित्यादौ साधारणधर्मवद्धर्मिज्ञानस्य कोट्युपस्थितिं संशयञ्च प्रति हेतुतया

वत्ताकधर्मिव्यावृत्तत्वेन ज्ञाततयेत्यर्थः । तथात्वेपि संग्राह्यत्वेपि । तदुत्तीर्णेतेति । असाधारण्योत्तीर्णतादशायामित्यर्थः । विशेषदर्शनात् अलक्ष्यत्वनिर्णयात् । तथा च धर्मितावच्छेदकपुरोवर्तित्वादौ निश्चितसाध्यवद्व्यावृत्तत्वाग्रहदशायामतिव्याप्तिवारणार्थमेव कोटिद्वयोपस्थापकपदं वाच्यमिति भावः । ननु तदुत्तीर्णतादशायां धर्मितावच्छेदकप्रकारकज्ञानस्य साध्यसंशयोपधायकत्वाभावात्कुतस्तत्राव्याप्तिरत आह संशयेति । तज्जनकेति । साध्यसंशयजननयोग्यतेत्यर्थः । नन्वेवं साध्यसंशयोपधायकपक्षधर्मताज्ञानविषयत्वमेव सव्यभिचारत्वं निरुच्य धर्मितावच्छेदकं वार्यतामत आह अन्यथेति । संशयोपधायकत्वस्य निरुक्तिघटकत्व इत्यर्थः । यथायथमिति । यदा पक्षे साध्यवत्त्वस्यान्यत्र च साध्याभाववत्त्वस्य निश्चयो वृत्तस्तदा सपक्षविपक्षवृत्तिहेतोः कुत्रापि धर्मिणि साध्यसन्देहानुपधायकत्वात्तदानीं साधारणाव्याप्तिप्रसङ्गादित्याशयः । तथा च तत्संग्रहाय स्वरूपयोग्यत्वस्य निवेशे धर्मितावच्छेदकस्य वारणार्थमवश्यं कोटिद्वयोपस्थापकपदं वाच्यमिति भावः । कोटिद्वयोपस्थापकेतिपदस्य द्वित्वसंवलितस्यैव प्रयोजनं यत्कंनचिदित्युक्तं तदाह प्रतिपक्षेत्यादिना । पक्ष इति । न च परामर्शोऽयं मिथः प्रतिबन्धात् साध्यसंशयासम्भवः, फलानुरोधेन साध्यीयपरामर्शाभावविशिष्टस्यैव साध्याभावीयपरामर्शस्य साध्यवत्ताज्ञानविरोधित्वमित्याशयादिति भावः । इदमित्यादि । निश्चितसाध्यतदभाववद्वृत्ते-

तद्विषये धर्मिणि सन्देहौ अतिप्रसङ्गः स्यादतः पक्षधर्मतेति । पक्षपदं धर्मिमात्रपरम् । न चैवं निसो घटः शब्दत्वादित्यत्र बाधाद्यवतारेऽसाधारण्यापत्तिः, इष्टत्वात्। अन्यथा बाधासिद्ध्योरन्यतरावतारदशायां साधारणासंग्रहापत्तेः। असिद्धिसङ्कीर्णत्वेन सव्यभिचारमध्याप्रवेशे सव्यभिचारसङ्कीर्णतया असिद्धेऽप्यनन्तर्भावापत्तौ तस्याऽतिरिक्तहेत्वाभासत्वापत्तेः। न च व्याप्यविरुद्धयोः साधार-

---

स्साधारणत्वमते द्रव्यणुकत्वावच्छेदेन पक्षतायामणुत्वस्य तथात्वं न सम्भवत्यतः इदंपदम्। तद्विषय इति । तथा च नित्यानित्यवृत्त्यणुत्ववदिदं द्रव्यणुकमिति ज्ञानस्य नित्यत्वसंशयजनककोटिद्वयोपस्थापकतया तद्विषयीभूतस्य द्रव्यणुकधर्मिणो नित्यत्वे साध्ये सव्यभिचारत्वापत्तिरतः पक्षांशे प्रकारत्वलाभाय पक्षधर्मतापदमित्यर्थः। सन्दिह्यसाध्यत्वादिरूपपक्षताविशिष्टप्रकृतधर्मिणः पक्षपदार्थत्वे वैयर्थ्यात् निर्वन्हिर्वन्हिमान् द्रव्यत्वादित्यादिव्यभिचारिण्यप्रसङ्गाच्चाह पक्षपदमिति। ननु यदि पक्षताविशिष्टप्रकृतधर्मिवृत्तित्वाप्रवेशस्तदा घटो न नित्य इत्येवम्बाधनिर्णयदशायामपि नित्यगगनाद्यनित्यघटादिव्यावृत्तशब्दत्ववान्वर्ण इति ज्ञानेन वर्णो नित्यो न वेति संशयोत्पादात् तदानीमपि शब्दत्वमसाधारणं स्यादित्याशङ्क्य निराचष्टे न चैवमिति। एवं प्रकृतपक्षत्वाप्रवेशे । बाधादीत्यादिना स्वरूपासिद्धिपरिग्रहः। अन्यथा प्रकृतपक्षत्वप्रवेशेबाधासिद्धाति। तथा च ह्रदो धूमवान् वन्हेरित्यत्र साधारणे बाधनिश्चयदशायां पक्षताविरहात्स्वरूपासिद्धिनिर्णयदशायां च प्रकृतधर्मिवृत्तित्वाज्ञानादव्याप्तिः स्यात्, अस्माकं तु तदानीमपि धर्म्यन्तरे तत्रैव च कालान्तरे सपक्षवृत्तिवह्निमत्ताज्ञानमादायैव लक्षणसङ्गम इति भावः। ननु घटो नित्यः शब्दत्वादित्यसाधारणस्याऽसिद्धिसङ्कीर्णत्वान्न सव्यभिचारत्वमतस्तत्राव्याप्तिरेवेत्यत आह असिद्धिसङ्कीर्णत्वेनेति।बाधसङ्कीर्णत्वेनेत्यपि द्रष्टव्यम्। अतिरिक्तेति। तथा च हेत्वाभासानां पञ्चविधत्वव्याघात इति भावः। न चेति। वन्हिमान् धूमाद्रोत्वाद्वेत्यादौ वन्हितदभाववद्वृत्तिधूमवानयमिति भ्रमस्यापि निरुक्तपक्षधर्मताज्ञानत्वा-

ण्यभ्रमदशायामतिप्रसङ्गः, धर्मिणि यद्रूपावच्छिन्नवत्ताज्ञानं साध्यसंशयजनकं तद्रूपावच्छिन्नत्वस्योक्तत्वात् । तच्च रूपं साधारणत्वा-

---

त्तत्प्रकारतामादाय धूमवान् गोत्वादित्यादावतिव्याप्तिरित्यर्थः। धर्मिणीति । किञ्चिद्धर्मविशिष्ट इत्यर्थः । तथा च ज्ञाननिष्ठं किञ्चिद्धर्मावच्छिन्नविशेष्यकयद्रूपावच्छिन्नप्रकारताकत्वं साध्यसंशयत्वावच्छिन्नजनकतावच्छेदकं तद्रूपवत्त्वमर्थः, पर्वतत्वाद्यवच्छिन्नधर्मिकवन्हितदभावसहचारत्वाद्यवच्छिन्नप्रकारताकत्वेन वन्हिसंशयजनकत्वात्तादृशसहचरितत्वस्य धूमादावसत्त्वान्नोक्तातिप्रसङ्ग इति भावः। अत्र जनकतायामवच्छेदकत्वं न स्वरूपसम्बन्धविशेषः साधारणत्वाद्यभावेपि तादृप्येण वस्त्वन्तरावगाहिभ्रमादपि साध्यसन्देहादसम्भवापत्तेः, किं त्वनतिरिक्तवृत्तित्वम्, न च साधारणत्वाद्यवच्छिन्नप्रकारताकत्वमात्रं तथेत्यतो धर्मिणीत्युक्तम् । न च साधारणत्वाद्यवाच्छन्नहेतुमत्तासंशयस्य साध्यसन्देहजनकत्वादसम्भवः, किञ्चिद्धर्मिकयद्रूपावच्छिन्नप्रकारित्वं साध्यसंशयजनकतावच्छून्यनिश्चयावृत्ति तद्रूपवत्त्वस्यैव ज्ञानपदमहिम्ना विवक्षितत्वात् । किञ्चिद्धर्मिकयद्रूपावाच्छन्नवत्तानिश्चयत्वं साध्यसंशयजनकतानतिरिक्तवृत्ति तद्रूपवत्त्वं तु नार्थः, पश्चाद्वक्ष्यमाणस्य व्याप्यसंशयेत्यादिग्रन्थस्य विरोधापत्तेरिति ध्येयम् । साध्यसंशयजनकमिति । कोटिद्वयोपस्थितिद्वारा जनकमित्यर्थः । तेन कोटिद्वयोपस्थितिजनकत्वस्यैव प्रक्रान्तत्वान्न तेन विरोधः । ननु तादृशं रूपं यदि सपक्षविपक्षवृत्तित्वादिकं तदा धूमवान् वन्हेरित्यत्र साधारणेऽतिव्याप्तिः कुत्रापि वन्हौ साध्यतदभाववत्संयुक्तत्वस्याऽसत्त्वात् एवं घटो द्रव्यं विशिधूमत्वादित्यादिसङ्केतावतिव्याप्तिश्चेत्यत आह तच्चेति । साधारणत्वं साध्यतदभाववदवृत्त्यधिकरणतानिरूपकतावच्छेदकधर्मवत्त्वं तथा च धूमतदभाववदवृत्त्यधिकरणतानिरूपकतावच्छेदकीभूतवन्हित्वाद्यवच्छिन्नवान् पर्वत इत्याकारकज्ञानादेव पर्वतो धूमवान्नवेति संशयोत्पादात्तादृशवन्हित्वमादायैव लक्षणसत्त्वाद्धूमसाध्यकवन्हौ नाव्याप्तिः, विशिष्टसत्त्वत्वस्य च द्रव्यतदन्यवृत्त्यधिकरणतानिरूपकतावच्छेदकत्वाभावान्नातिव्याप्तिरिति भावः।अत्र च धूमान्यधूमवान् का-

दीति सिद्धान्ते स्फुटीभविष्यति। इदं सविषयकमात्मवृत्ति वा ज्ञानत्वात् इत्यादौ प्रामाण्याप्रामाण्यसंशयस्य तद्घटकीभूतसाध्यतदभावविषयकतया कोट्युपस्थितिरूपस्य जनकीभूतज्ञानविषये ज्ञानत्वे तु नातिप्रसङ्गशङ्कापि, साधारणधर्मवत्ताज्ञानस्य तज्जन्यको-

---

ञ्जनमयधूमवान् वन्हेरित्यत्र प्रकृतसाध्यसन्देहप्रयोजकस्य च तादृशसाध्यतदभाववद्वृगामित्वस्याऽप्रसिद्ध्या न तत्र सव्यभिचारो हेत्वाभासः किं तु व्याप्यत्वासिद्धिरेवेति ध्येयम्। साधारणत्वादीत्यादिना साध्यतदभाववद्वृत्तित्वरूपस्याऽसाधारणत्वस्य परिग्रहः। न च साध्यव्याप्यात्मकासाधारणाव्याप्तिः, साध्यवद्वृत्तित्वांशस्य तत्राऽसत्त्वादिति वाच्यम्। प्राचां मते साध्यतदभावनिश्चयकालीनस्य तद्विशेष्ययावद्धर्मिव्यावृत्तत्वस्यैव साध्यसंशयप्रयोजकतया सद्धेतावपि कदाचित् तादृशसपक्षव्यावृत्तत्वसम्भवात्, नव्यमते च सद्धेतोः साध्यवद्व्यावृत्तत्वविरहेणालक्ष्यत्वादिति भावः। ननु यत्र सविषयकत्वनिर्णयदशायामिदं सविषयकं न वेत्याकारकः सन्देहः सविषयकत्वज्ञानं सविषयकत्वाभाववति सविषयकत्वप्रकारकं न वेत्याकारकभ्रमत्वसंशयादेवोत्पन्नः तत्र सविषयकत्वरूपसाध्यस्य सन्देहजनिका या निरुक्तभ्रमत्वसन्देहरूपा साध्यतदभावोपस्थितिः तज्जनकीभूतस्य भ्रमत्वतदभाववद्वृत्तिज्ञानत्ववदिदं ज्ञानमित्याकारकपक्षधर्मताज्ञानस्य विषये ज्ञानत्वे सद्धेतावतिव्याप्तिरत आह इदमित्यादि। विषयितात्वस्य साध्यतावच्छेदकीभूतस्यानुगतत्वे विवादात् साध्यान्तरमाह आत्मवृत्तिरिति। प्रामाण्याप्रामाण्यसंशयस्येति। अप्रमात्वसन्देहस्येत्यर्थः। प्रामाण्यसन्देहस्येतिपाठे भ्रमत्वलक्षणविरुद्धधर्मकोटितः प्रामाण्यसंशयो बोध्यः, तस्यैव साध्यतदभावोपस्थितित्वसम्भवादिति ध्येयम्। तद्घटकेति। भ्रमत्वरूपाप्रामाण्यघटकीभूतेत्यर्थः। ज्ञानविषय इति। भ्रमत्वतदभाववद्वृत्तिज्ञानत्ववदिदं ज्ञानमित्याकारकज्ञानस्य विषय इत्यर्थः। साधारणेत्यादि। साध्यतदभावसहचरितधर्मवत्ताज्ञानस्य तादृशधर्मवत्ताज्ञानजन्यतत्तदभावोपस्थितेर्वा

टद्युपस्थितेर्वा संशयजनकतया तज्ज्ञानस्य तादृशसंशयाहेतुत्वात्। प्रामाण्यसंशयस्थले तु ज्ञानत्वलक्षणसाधारणधर्मदर्शनात् ज्ञाने प्रामाण्यस्य ज्ञानविषयतात्मकसाधारणधर्मदर्शनाच्च विषये तद्वत्त्वस्य सन्देहः। अप्रामाण्यशङ्काघन्वयानुविधानन्तु भ्रमत्वज्ञानशून्यविरोधिज्ञानस्य प्रतिबन्धकतया तदपसारणप्रयुक्तमित्यस्याऽऽकरे

तत्तदभावकोटिकसन्देहजनकतयेत्यर्थः।तज्ज्ञानस्येतिभ्रमत्वसन्देहात्मकसाध्यतदभावगोचरज्ञानस्य प्रकृतसन्देहत्वावच्छिन्नं प्रत्यहेतुत्वादित्यर्थः। नन्वेवं निश्चितप्रामाण्यके ज्ञाने घटत्वादिगर्भप्रामाण्यघटितभ्रमत्वस्य संशयादूघटत्वादिप्रामाण्यसंशयः तदुत्तरं निर्णीतस्यापि घटत्वादेर्धर्मिणि सन्देहश्च कुतः स्यादत आह प्रामाण्यसंशयस्थल इति। तथा च तत्रापि प्रामाण्यादिघटितभ्रमत्वस्य सन्देहो न प्रामाण्यादिसन्देहस्य कारणं किं तु प्रामाण्यादेः साधारणधर्मवत्ताज्ञानमेवेति भावः।अथाऽर्थनिश्चयोत्तरार्थसन्देहं प्रत्यन्वयव्यतिरेकाभ्यामेव प्रामाण्यसन्देहः कारणमन्यथा विनापि प्रामाण्यसन्देहं क्वचिन्निश्चितार्थसंशयापत्तेरत आह अप्रामाण्यशङ्केति। तदपसारणेति। तथा च विरोधिनो विषयनिश्चयस्य सत्त्वे तत्संशयोऽनुपपन्न इत्यप्रामाण्यज्ञानेन विषयनिर्णयस्य भ्रमत्वशङ्काशून्यत्वरूपं यत्प्रतिबन्धकतावच्छेदकं तदपसार्यत इत्यप्रामाण्यज्ञानापेक्षेति भावः। ननु पर्वतादिधर्मिकवन्हिमत्तादिसन्देहं प्रति वन्हिव्याप्यत्वावच्छिन्नप्रकारताकसंशयस्य हेतुत्वाद्वन्हिव्याप्यत्वावच्छिन्नेऽतिव्याप्तिः। न च वहिव्याप्यत्वावच्छिन्नप्रकारताकत्वस्य साध्यसंशयाजनकव्याप्यवत्तानिश्चयेपि सत्त्वात् साध्यसन्देहजनकतानतिरिक्तवृत्तित्वलक्षणतज्जनकतावच्छेदकत्वाभावादेव नातिव्याप्तिरिति वाच्यम्। वन्ह्यादिसन्देहं प्रति वन्ह्यादिव्याप्यवत्ताज्ञानत्वेनैव जनकतया वन्ह्यादिव्याप्यवत्तादिनिश्चयस्यापि वन्ह्यादिसन्देहस्वरूपयोग्यत्वात्। साध्यसन्देहमात्रस्यैव साध्याभावविशिष्टबुद्धित्वात्। तदवच्छिन्नं प्रति साध्यव्याप्यवत्तानिश्चयत्वेन प्रतिबन्धकत्वादेव व्याप्यवत्तानिश्चयसत्त्वे साध्यसंशयानुत्पादसम्भवादत आह व्याप्यव-

व्यक्तत्वात्। व्याप्यवत्तासंशयस्य पृथग्व्यापकवत्तासंशयहेतुत्वपक्षे ज्ञानपदं निश्चयपरम्। हेत्वभिमतविशेषणन्तु येन सम्बन्धेन तदुभयसाहचर्य्यं तेन सम्बन्धेन तद्वत्ताज्ञानस्य संशयादिजनकतासूचनार्थम्। तेनात्मत्वकपालत्वादिसाध्यके समवायसम्बन्धेन हेतौ ज्ञानघटादौ विषयत्वसंयोगादिना तत्सन्देहजनके नातिप्रसङ्ग इति। विप्रतिपत्तौ प्रत्येकं कोटिद्वयोपस्थापकत्वाभावात् लक्षणस्यद्वयप-

---

त्तेति। स्वमतेपि व्याप्यवत्तासंशयस्य विशेषणज्ञानादिविधया व्यापकवत्तासंशये हेतुत्वादाह पृथगिति।व्याप्यत्वावच्छिन्नप्रकारताकत्वेनेति तदर्थः। कोटिद्वयोपस्थितिद्वारा संशयजनकत्वस्यैव प्रक्रान्तत्वात् पृथगित्यस्य कोटिद्वयोपस्थितिद्वारेति वार्थः। साधारणादिधर्मवद्धर्मिज्ञानस्यैव संशयजनकत्वं मूलसंमतमतः पक्ष इत्युक्तम्। निश्चयपरमिति। तथा च धर्मिणि यद्रूपावच्छिन्नप्रकारताकनिश्चयत्वं निश्चयत्वावच्छिन्नायास्साध्यसन्देहजनकतायां अनतिरिक्तवृत्ति तद्रूपवत्त्वं विवक्षितं व्यापकसन्देहं प्रति व्याप्यवत्ताज्ञानत्वेनैव जनकत्वं न तु तन्निश्चयत्वेनेति नातिप्रसङ्ग इति भावः। ननूक्तक्रमेणैव सद्धेतुनिरासाद्धेत्वभिमतपदं व्यर्थमत आह हेत्वभिमतेति। हेतुताघटकेति तदर्थः। तथा च यादृशसम्बन्धेन यद्रूपावच्छिन्नवत्त्वज्ञानं साध्यसन्देहप्रयोजकं तादृशसम्बन्धेन हेतुतास्थल एव तद्रूपवत्त्वं सव्यभिचारः अयमात्मा ज्ञानादित्यादौ समवायेन ज्ञानस्य हेतुतास्थले तु साध्यतदभाववद्विषयकत्वावच्छिन्नज्ञानवत्तायाः समवायेन ज्ञानं न साध्यसन्देहजनकमतो नातिव्याप्तिः, विषयतासम्बन्धेन तादृशज्ञानादिहेतोः सव्यभिचारत्वमेवेति भावः। आत्मत्वजातेरीश्वरावृत्तित्वमते तत्साध्यकज्ञानहेतोः सव्यभिचारत्वमिष्टमेवेत्यतः आह कपालत्वादीति। तत्सन्देहजनक इति। आत्मत्वादिसन्देहजनकपक्षधर्मताज्ञानविषय इत्यर्थः।

ननु जनकत्वस्य व्याप्यवृत्तित्वात् कोटिद्वयोपस्थितिजनिकाया विप्रतिपत्तेः प्रत्येकपदावच्छेदेन तदुभयोपस्थितिजनकत्वाभावासम्भवाद्विप्रतिपत्तास्त्वित्यादिमूलासङ्गतिरतस्तदभिप्रायं प्र-

देन तद्वारणात् मिलितस्य तदुपस्थापकत्वेऽपि तद्वत्ताज्ञानं न तथा न वा मिलित्वा द्वयोर्ज्जनकत्वं, तथात्वेऽपि वा येन सम्बन्धेन तद्वत्ताज्ञानमुभयकोट्युपस्थापकं तेन सम्बन्धेन हेतुत्वेऽवश्यं सव्यभि-

---

काशयति विप्रतिपत्तावितिं । प्रत्येकं साध्यादिवाचकप्रत्येकपदस्य । तद्वारणं साध्यादिघटकप्रत्येकपदस्य वारणम् । तथा च विप्रतिपत्तिः प्रत्येकं न तथेत्यस्य मूलस्य विप्रतिपत्तिर्न कोटिद्वयोपस्थापकैकपदवतीत्यर्थः । ननु प्रत्येकपदस्य कोटिद्वयोपस्थापकत्वाभावेपि समुदितविप्रतिपत्तेस्तथात्वात्तत्रातिव्याप्तिरेवेत्यत आह मिलितस्येति । तदुपस्थापकत्वेपि साध्यसंशयजनककोटिद्वयोपस्थापकत्वेपि । तद्वत्ताज्ञानं विप्रतिपत्तिमत्ताज्ञानम् । न तथा न संशयजनककोटिद्वयोपस्थापकम् । स्वरूपतो ज्ञाताया विप्रतिपत्तेरेव तथात्वात् । तथा च पक्षधर्मताज्ञानपदेन तद्वारणम्, एतदभिप्रायेणैव न वा पक्षवृत्तिरिति भावः । ननु शब्दो नित्यो न वेत्यादिवाक्यस्येव तादृशवाक्यवत्त्वस्यापि ज्ञानं कोटिद्वयोपस्थापकं भवत्येव तथा तदूघटकीभूतप्रत्येकपदवत्ताज्ञानमप्येवं तथा च विप्रतिपत्तौ तदूघटकप्रत्येकपदे चातिव्याप्तिरेवेत्यत आह न वेति । विप्रतिपत्तिमत्ताज्ञानस्य तदूघटकप्रत्येकपदवत्ताज्ञानस्य च द्वयोर्न मिलित्वा जनकत्वं न विप्रतिपत्तिमत्ताज्ञानत्वेन कोटिद्वयोपस्थितिं प्रति जनकत्वं तथा च धर्मिणि यद्वत्ताज्ञानत्वेन कोट्युपस्थितिजनकत्वं तत्त्वमेव सव्यभिचारत्वं विवक्षितम्, न च विप्रतिपत्तिमत्ताज्ञानत्वेन तथात्वम्, प्रत्येकार्थोपस्थितिं प्रति प्रत्येकपदज्ञानत्वेनैव हेतुत्वादतो नातिप्रसङ्गः । ननु बोध्यत्वादिसम्बन्धेन साध्यतदभावसहचरितविप्रतिपत्तिमत्ताज्ञानत्वेन तादृशकोटिद्वयोपस्थितिजनकत्वादुक्तक्रमेणापि विप्रतिपत्तिवारणं दुर्घटमत आह तथात्वेपीति । विप्रतिपत्त्यादिमत्ताज्ञानत्वेन कोट्युपस्थापकत्वेपि वेत्यर्थः । तथा च शब्दो नित्यः शब्दो नित्यो नवेतिवाक्यवत्त्वादित्यादौ बोध्यत्वादिसम्बन्धेन हेतुतायां विप्रतिपत्तेः सव्यभिचारत्वमिष्टमेवेति भावः । ननु विश्वधर्मिकसाध्यसन्देहदशायाच्छन्नस्य साधारणहेतोरेवानुपसंहारित्वात्तदानीं च कुत्रापि साध्यादिमत्त्वानिर्णयेन

पक्षवृत्तिः, साधारणमन्वयेन असाधारणं व्यतिरेकेण अनुपसंहारी पक्ष एवोभयसाहचर्य्येण कोटिद्वयोपस्थापकः।

चारत्वमिति।अनुपसंहारी पक्ष एवेति।अनुपसंहारितादशायां साध्यतदभावसहितत्वनिर्णयाभावेऽप्युक्तक्रमेण वास्तवतत्सहचरितत्वमादायैव लक्षणसमन्वय इति भावः। केचित्तु व्याप्यादिधर्मेऽपि साधारण्यज्ञानात् संशयस्योदयात् तदज्ञाने च वस्तुतः साधारण्यज्ञानेऽप्यनुदयात् साधारण्यज्ञानं हेतुस्तत्र निश्चयत्वमकिञ्चित्करं गौरवात्, तथा च पक्ष एव तत्संशयात्मकतदुभयसाहचर्य्यज्ञानाद्भवति

कारणबाधात् साध्यतदभावसहचरितत्वनिर्णयासम्भवेन तस्य संशयजनकत्वायोगात् तत्राव्याप्तिरित्यत आह अनुपसंहारितेति। उक्तक्रमेणेति। सन्देहादिजननयोग्यताया एव लक्षणघटकत्वेनेत्यर्थः। सर्वधर्मिकसाध्यसन्देहदशायामप्ययं साध्यस्य तदभावस्य वा अधिकरणवृत्तिहेतुमानित्याकारकस्यैव साध्यसंशयजनकपक्षधर्मताज्ञानस्य सम्भवाद्धानुपसंहारिण्यव्याप्तिरिति प्राचां मतमुपन्यस्यति केचित्त्विति। अनुदयादिति। साध्यसंशयस्येत्यनुषज्यते। निश्चयत्वमित्यस्य साध्यादिमत्त्वांश इत्यादिः। तेनाऽपरांशे निश्चयत्वस्यापेक्षायामपि न क्षतिः। गौरवादिति। साध्यतदभावांशे निश्चयात्मकतदुभयसहचरितत्वप्रकारकज्ञानत्वेन हेतुतायां गौरवादित्यर्थः। तत्संशयात्मकेति। साध्यादिमत्त्वांशसंशयात्मकेत्यर्थः। तथात्वमनुपसंहारितादशायामपि साध्यसंशयजनकपक्षधर्मताज्ञानविषयत्वमित्यर्थः। नव्यमते विशिष्टवैशिष्ट्यविषयताशालिन एव साध्यतदभावसहचरितहेतुमत्ताज्ञानस्य साध्यसन्देहजनकत्वात् साध्यतदभाववत्त्वांशे निश्चयात्मकतदुभयसहचरितत्वप्रकारकज्ञानत्वस्य जनकतावच्छेदकत्वात् न तन्मते गौरवावकाशः किं तु प्राचां मते विशेष्ये विशेषणमित्यादिरीत्या जायमानस्य हेतुत्वोपगमे वृत्तित्वांशे साध्यवदीयत्वादिनिश्चयत्वापेक्षायामेव विपरीतगौरवम्। अन्यथा साध्यव-

तथात्वमिति भाव इत्याहुः।तच्चिन्त्यम्।ननु केवलान्वयिसाध्यकानुपसंहारिणि साध्याभावाप्रसिद्ध्या तत्संशयाद्यभावादव्याप्तिः, एवं यत्र स्थिरे धर्मिणि पूर्वं घटत्वं गृहीतमुत्तरदशायां तत्रैव दोषात् घटत्वाग्रहे तद्घटभिन्नोऽयमिति भ्रमे च घटत्वनिश्चयविषयीभवद्धर्मिव्यावृत्तत्वेन गृह्यमाणतया असाधारणे इदन्त्वेऽपि वस्तुतस्तद्व्यावृत्तत्वाभावेन तत्र लक्षणायोगादिसतस्तयोर्लक्ष्यत्वाभावेन

न्निरूपितस्य तदन्यस्य वा आधेयत्वस्याश्रयहेतुमानयमित्यादिज्ञानादपि साध्यसंशयापत्तेरित्याशयेनाह तच्चिन्त्यमिति । नन्वित्यादि केचिदित्यन्त एको ग्रन्थः । अनुपसंहारिणि अनिश्चितोभयसहचारके । संशयादिति । वाच्यत्वादिप्रतियोगिकत्वेनाऽभावान्तरं विषयीकृत्य साध्यसंशयस्य सम्भवादादिपदम् । तेन सन्देहप्रयोजकविप्रतिपत्तिवाक्यस्य साध्यतदभाववद्वृत्तित्वस्याप्रसिद्धेर्लाभः । ननु अयं पटः एतत्त्वादित्यत्र साध्यवत्तानिश्चयविषयीभूतधर्मिव्यावृत्तत्वेन गृह्यमाणत्वप्रयुक्त एव हेतावसाधारण्यव्यवहारो वाच्यः स च साध्यवत्त्वनिश्चयाप्रसिद्धौ हेतुमत्येव साध्यवत्तानिश्चये वा दुर्घटः कुतस्तत्राव्याप्तिरित्यतः तं घटयति एवमित्यादिना। असाधारण्यदशायां तद्घटनाशे वास्तवमेव साध्यवद्व्यावृत्तत्वमेतत्त्वहेतौ तत्कालावच्छेदेन कदाचित्स्यादतः स्थिर इत्युक्तम् । ननूत्तरदशायामपि इदन्त्वावच्छिन्ने घटत्वमेव गृहीतं यदि तदा तद्व्यावृत्तत्वेनाऽगृह्यमाणत्वाद्धेतौ कुतोऽसाधारणत्वव्यवहार इत्यत आह उत्तरदशायामिति । ननु तद्धर्मावच्छिन्नविशेष्यकसाध्यवत्तानिश्चयकालीनस्तद्धर्मावच्छिन्नव्यावृत्तत्वग्रह एव हेतौ असाधारण्यव्यवहारौपयिकः अन्यथाऽतिप्रसङ्गात्, तथा च प्राक्तनं साध्यवतो निश्चयमादाय व्यवहारसम्पत्तिर्नोचितेत्यतस्तत्कालेपि साध्यनिश्चयं समर्थयति तद्घटभिन्नोयमिति । भ्रमे चेति । तथा च स घटस्तद्व्यावृत्तमिदंत्वमित्याकारकग्रहस्य तदानीमपि सम्भवात्तमादायैवाऽसाधारण्यव्यवहार इति तत्रैवाव्याप्तिरुक्तेति भावः । इदन्त्वेपीति । अव्याप्तिरित्यनुषज्यते । अव्याप्तौ हेतुमाह वस्तुत इति । वस्तुगत्या निश्चि-

केवलान्वयिसाध्यकानुपसंहारी अयं घट एतत्त्वादित्यसाधारणश्च सद्धेतुरेव, तदज्ञानं दोषः पुरुषस्य। अत एवाऽसाधारणप्रकरणसमयोरनित्यदोषत्वम्। अन्यथा सद्धेतौ बाधादिज्ञाने हेत्वाभासाधिक्यापत्तिः। न च प्रमे-

---

परिहरति केवलान्वयीति। अत एवेति। यत एव पुरुषदोषाधीनं तदोषत्वम् अत एव तस्याऽनित्यदोषत्वं, साहजिकत्वे कादाचित्कत्वानुपपत्तेः। एवञ्च यत्र दोषताप्रयोजकं वस्तुतो हेतौ तत्राऽनित्यदोषत्वमपि, यत्र पुरुषस्य तद्भ्रमो न तत्र तदपि भ्रममात्रादुष्टत्वेऽतिप्रसङ्गमाह अन्यथेति, के चित्। परे तु अयं घट एतत्त्वादित्यादावव्याप्तिः साध्यसन्देहप्रयोजकं हि तस्य साध्यतदभाववत्-

---

तसाध्यवद्वृत्तित्वाभावेनेत्यर्थः। लक्षणायोगादिति। तत्तद्धर्मावच्छिन्नविशेष्यकसाध्यतदभाववत्तानिश्चयकालीनस्य तत्तद्धर्मावच्छिन्नव्यावृत्तहेतुमत्ताज्ञानस्यैव साध्यसन्देहजनकत्वादिति भावः। तस्य असाधारणस्य। अनित्यदोषत्वं कदाचिदेवाभासत्वम्। इत्थं च साध्यपरामर्शदशायामेव परामृश्यमाणस्य साध्याभावव्याप्यवत्पक्षस्य प्राचां मते प्रकरणसमत्वात् मूले तदुपन्यासो दृष्टान्तार्थ इति भावः। अन्यथेति मूलमवतारयितुं पूरयति एवं चेति। अनित्यदोषत्वमपि।युज्यत इति शेषः। तद्भ्रमः।दोषताप्रयोजकरूपस्य भ्रमः। तदपीति।अनित्यदोषत्वमपीत्यर्थः। अपिना नित्यदोषत्वपरिग्रहः। अवतारयति भ्रममात्रादपीति। दोषमात्रस्यैव साहजिकत्वं वदतां मतमुत्थापयति परे त्विति। अनुपसंहार्यव्याप्तेः पूर्वतुल्यत्वात्तदुपेक्ष्याह अयं घट इति।तस्य असाधारणस्य। न च साध्यवद्वृत्तिधर्मवत्ताज्ञानस्य साध्याभावविशेषदर्शनविधया साध्यवत्ताज्ञानावरोधित्वात्तदुभयव्यावृत्तत्वस्य साध्यसंशयप्रयोजक-

द्व्यावृत्तत्वं न ह्येकस्य धर्मस्य तदुभयव्यावृत्तत्वं सम्भवति, असाधारण्यन्तु तस्य पक्षमात्रवृत्तितया अतस्तस्याऽलक्ष्यतयोत्तरयति अयं घट इत्यादि । एवञ्चावृत्तिगगनादिकमेवासाधारणम् । पक्षवृत्तित्वभ्रमदशायाञ्चासाधारण्यस्यासङ्करः ।न चोभयव्यावृत्तत्ववृत्तिमत्त्वयोः स्वरूपतो विरोधः, निश्चितसाध्यतदभाववद्व्यावृत्तत्वञ्च न सन्देहप्रयोजकम्, तथा सति तुल्यन्यायतया निश्चितसाध्यतदभाववद्वृत्तित्वस्यापि तथात्वे सद्धेतावपि साध्याभाववत्त्वभ्रमविषयवृत्तित्वग्रह-

---

स्वासम्भव इति वाच्यम् । सत्प्रतिपक्षस्थलीयसंशयानुरोधेन तदीयविशेषदर्शनाभावविशिष्टस्यैव तदभावविशेषदर्शनस्य संशयविरोधित्वोपगमादिति भावः । एकस्येति । वृत्तिमत इत्यादि । ननूक्तहेतोः संशयप्रयोजकरूपसत्त्वे मूले कुतस्तस्यासाधारण्येनोल्लेखः तत्प्रयुक्तत्वादुल्लेखस्येत्यत आह असाधारण्यं त्विति । असाधारण्यत्वोक्तिस्त्वित्यर्थः । ननु साध्यतदभाववद्व्यावृत्तत्वस्य कुत्राप्यसत्त्वात्तदाश्रयस्यासाधारणत्वमसङ्गतमत आह एवञ्चेति । येन सम्बन्धेन यो वृत्तिमान् स एव तेन सम्बन्धेन साध्यतदभाववद्व्यावृत्तत्वादसाधारण इत्यर्थः । तेन वृत्तिमतोपि रूपादेः संयोगादिसम्बन्धेन हेतुतायामसाधारण्यम् । नन्वेवमवृत्तिहेतोः पक्षावृत्तित्वमावश्यकमतः स्वरूपासिद्धिरेवास्तु दोष इत्यत आह पक्षवृत्तित्वेति । असङ्करः स्वरूपासिद्ध्या । ननु हेतोः पक्षमात्रवृत्तित्वभ्रमदशायां साध्यतदभाववद्व्यावृत्तत्वज्ञानमेव दुर्घटं वृत्तिमत्त्वज्ञानस्य तादृशव्यावृत्तत्वधीविरोधित्वादत आह न चेति । स्वरूपतः ग्राह्याभावविधया । व्यावर्तकधर्मविधया तु वृत्तिमत्त्वस्य ज्ञानं न सार्वत्रिकमिति भावः । ननु साध्यवत्तया निश्चीयमानाद्व्यावृत्तत्वे सति साध्याभाववत्तया व्यावृत्तत्वमेव सन्देहप्रयोजकं न तु साध्यतदभाववद्व्यावृत्तत्वं तच्च इदन्त्वेप्यस्तीति कथं तस्याऽलक्ष्यत्वमत आह निश्चितेति । निश्चितौ निश्चीयमानौ साध्यतदभावौ येषु तत्तद्धर्मिव्यावृत्तत्वं चेत्यर्थः । एवमग्रेपि । तथात्वे संशयप्रयोजकत्वे । अतिप्रसङ्गादिति । अनैकान्तिकत्वप्रसङ्गादित्यर्थः । तादृ-

यत्वेनाऽभेदानुमाने शब्दोऽनित्यः शब्दाकाशान्यतरत्वा-

दशायामतिप्रसङ्गात् । न च तादृशनिश्चयविषयस्य धर्मिणो वास्तवं साध्याभावादिमत्त्वमपि तन्त्रम्, मानाभावात्, किञ्च सन्देहजनकतावच्छेदकरूपस्य विशेषणत्वे व्यभिचारिणि रासभादौ महानसादिवृत्तितादृशायामव्याप्तिः, उपलक्षणत्वे असाधारण्योत्तीर्णतादृशायामतिव्याप्तिः असाधारणप्रकरणसमययोस्तत्त्वेन भ्रमविषययोरनित्यदोषत्वं विशेषादर्शनदशायामनुमितेरनुत्पादप्रयोजकत्वं न तु वास्तवं हेतुदोषत्वम्, अन्यथाऽनुमितेरनुत्पादप्रयोजकज्ञानविषयतामात्रेण वास्तवहेतुदोषत्वे इत्याहुः ॥

शधर्मद्वयवृत्तित्वस्य तत्र सत्त्वादिति भावः । तादृशेति । साध्यादिमत्तानिश्चयेत्यर्थः । तथा च साध्यतदभाववत्तानिश्चयविशेष्यवृत्तित्वेपि वस्तुगत्या साध्यशून्ये तादृशवृत्तित्वविरहादेव सङ्कोचो नातिप्रसङ्ग इति भावः । प्रतिबन्देरनुत्तरत्वादाह किं चेति । विशेषणत्व इति । यस्य यदा साध्यसंशयप्रयोजकरूपवत्त्वं तदैव सोऽनैकान्तिक इत्युक्ताविति्यर्थः । महानसादीति । तथा च धूमवान् वनसंयोगित्व इत्यादौ वनसंयोगित्वेन रासभादेर्हेतुतायामव्याप्तिः साध्यतदभावदवृत्तितावच्छेदकीभूतस्य वनसंयोगित्वस्य महानसवृत्तितादशायां रासभादावसम्भवादिति भावः । अतिव्याप्तिरिति । व्याप्तिनिश्चयदशायामपि कालान्तरनिर्णीतसाध्यादिमत्ताकतद्धर्मिव्यावृत्तत्वानपायादिति भावः । ननु यद्यभासमात्रस्यैव नित्यदोषत्वं तर्हि असाधारणप्रकरणसमयोरनित्यदोषत्वाभिधायकं मूलमसङ्गतमतस्तद्व्याचष्टे असाधारणेति । अनित्यदोषत्वं यदि नित्यदोषत्वाभावस्तदा नित्यपदं व्यर्थं दोषत्वाभावस्यैव प्रकृतत्वादत आह विशेषादर्शनेति । असाधारण्यादिभ्रमस्य तत्त्वाग्रहदशायामित्यर्थः । अन्यथेति मूलमवतारार्थं पूरयति न तु वास्तवं दोषत्वमिति । मूले अभेदानुमानेति ।

दित्यत्र च साधारणेऽव्याप्तिः तयोः साध्यवदवृत्तित्वेन विरुद्धत्वादिति चेन्न । एतदज्ञानेऽपि साधारण्यादिप्रत्ये-

---

अनवगतसाध्यसहचारत्वे सति अवगतसाध्याभावसहचारतया विरुद्धत्वमेव तयोरिति । इदञ्चाभ्युपगमवादेन । वस्तुतो यथोपवर्णितलक्षणस्य न तत्राव्याप्तिरिति ध्येयम् । यद्रूपज्ञानमनुमितिप्रतिबन्धकं तदेव विभाजकम्, अन्यथा अतिप्रसङ्ग इत्यभिप्रेत्य दूषयति नैतदिति । वस्तुतस्तु उपस्थापकत्वादिज्ञानमनुमितेस्तज्जन-

---

इदमाकाशाभिन्नं मेयत्वादित्यादौ क्वचिदपि साध्यवत्त्वानिश्चयेन तदानीं साध्यतदभाववदवृत्तित्वेन हेतोरग्रहात् साध्यसंशयानुत्पत्तावव्याप्तिरित्यर्थः । ननूक्तहेतुद्वयस्य पक्ष एव साध्यसमानाधिकरणत्वात् साध्यवदवृत्तित्वेनेति मूलासङ्गतिरतः प्राचां मतानुसारेण व्याचष्टे अनवगतेत्यादि । अनुपसंहारिणोप्यनवगतसाध्यसहचारत्वात्तद्वारकाय विशेष्यदलमविरुद्धत्वेपि सव्यभिचारत्वसम्भवात्तन्मात्रोक्त्या नाऽलक्ष्यत्वप्राप्तिः इत्येवकारमन्तर्भाव्य योजयति विरुद्धत्वमेवेति । अभ्युपगमेति । साध्यसंशयोपधायकत्वघटितलक्षणाभ्युपगमेनेत्यर्थः । वस्तुत इति । तदानीं साध्यसंशयानुत्पादेपि सन्देहजनकतावच्छेदकीभूतं साधारणत्वमादाय तत्र लक्षणसम्भवादिति भावः । वस्तुतः प्रमेयत्वस्य शब्दाकाशान्यतरत्वस्य च तादात्म्येन हेतुतात्थले एवाऽव्याप्तिमाशङ्क्य तयोरलक्ष्यत्वं मूलकृतोक्तं यथाश्रुतमेव सम्यगिति युक्तमुत्पश्यामः । ननु विरोधितानवच्छेदकेनापि अनुगतरूपेण विभजने बाधकाभावादेतदज्ञानेपीत्यादिमूलमसङ्गतमत आह यद्रूपेति । अन्यथेति । विरोधितानवच्छेदकेनापि विभजने साध्यवत्ताज्ञानविरोधित्वे बाधप्रतिरोधयोरप्येकहेत्वाभासत्वापत्तिरिति भावः । इति चेदेतदज्ञाने इति मूलपाठमभिप्रेत्यं प्रतिबन्धादित्यग्रिमहेत्वन्वयार्थं नकारमन्तर्भाव्य समाधत्ते नैतदिति । ननु

कस्य ज्ञानादुद्भावनाच्च स्वपरानुमितिप्रतिबन्धात्, उद्भावितैतन्निर्वाहार्थं साधारणादेरवश्योद्भाव्यत्वेन तस्यैव दोषत्वाच्च। एतेन पक्षवृत्तित्वे सत्यनुमितिविरोधिसम्बन्धाव्यावृत्तिरनैकान्तिकः सपक्षविपक्षवृत्तित्वमुभयव्या-

---

कस्य वा न प्रतिबन्धकं विरोधिविषयकत्वाभावात्। एवमुत्तरत्रापि। पक्षवृत्तित्वे सतीतिविरोधित्वं विरोधिज्ञानविषयत्वम् अव्यावृत्तिपदम् असन्तायागव्यवच्छेदार्थकम्, तेन संयोगसम्बन्धेन व्यभिचारिणि द्रव्ये हेतौ व्यभिचाराभावदशायां नाप्रसङ्गः। साध्य-

---

तदज्ञानेपि वस्त्वन्तरज्ञानादनुमितिप्रतिबन्धात्तस्यैव दोषत्वाभावे साधारण्यादि प्रत्येकमपि दोषो न स्यात् तदज्ञानेपि बाधादिज्ञानेनानुमितिप्रतिबन्धादतः स्वयं दूषणमाह वस्तुतस्त्विति। त्रितयानगतरूपस्य प्रतिबन्धकतानवच्छेदकत्वे मूलस्वरसमाह एवमुत्तरत्रेति। एवमेवोत्तरग्रन्थे दर्शितमित्यर्थः। एतदज्ञाने ज्ञाने चावश्यकप्रत्येकज्ञानस्य दोषत्वादित्यग्रिममूलेनाऽनुगतधर्मज्ञानसत्त्वेपि साधारण्यादिप्रत्येकज्ञानस्यापेक्षणीयत्वोक्त्याऽनुगतस्य प्रतिबन्धकतानवच्छेदकत्वस्फोरणादिति भावः। व्यभिचारादेरनुमितिप्रतिबन्धकत्वे मानाभावादाह विरोधित्वमिति। लिङ्गोपधानमतेनेदम्, मणिकारमते व्यभिचारज्ञानस्याप्यनुमित्यविरोधित्वादव्याप्त्यापत्तेः इति ध्येयम्। अथानुमितिविरोधिसम्बन्धवत्त्वमित्येव क्रियतामव्यावृत्तिपदं व्यर्थमत आह अव्यावृत्तीति। अत्यन्तेति। तथा च स्वहेतुकानुमितिविरोधियद्रूपवत्त्वं यस्य तस्य तद्रूपेण सव्यभिचारत्वं कालविशेषानन्तर्भावेणैव वाच्यमिति भावः। तेनेति। अन्यथा यदानुमितिविरोधिसम्बन्धः तदैव सव्यभिचारत्वे वन्हिमान् तद्रासभादित्यादौ तद्रासभस्य साध्यवत्संयुक्तत्वदशायामनुमितिविरोधिसम्बन्धस्य साध्याभाववत्संयुक्तत्वस्याभावादव्याप्तिरेव स्यात् इति भावः। अथायं घट एत-

वदवृत्तिस्तु नासाधारण इति हृदयम् । अपक्षधर्मधूमादिवारणाय सयन्तम् । पक्षः सन्दिग्धसाध्यो धर्मी । विशिष्टहेतौ तदवृत्तित्वग्रहाविरोधित्वञ्च तदर्थः । तथा च पक्षतावच्छेदकरूपेण पक्षे साध्यतावच्छेदकरूपेण साध्यस्य हेतुतावच्छेदकरूपेण हेतोर्वा यज्ज्ञानं तदविरोधित्वस्य लाभात पक्षसाध्यसाधनाप्रसिद्धिस्वरूपासिद्धिबाधप्रतिरोधानां निरासोऽसिद्धिसङ्कीर्णसंग्रहश्च । विरोधोऽपि फलतः

स्वादित्यत्र पक्ष एव तद्वटभिन्नोयमिति भ्रमदशायामसाधारणे अव्याप्तिः साध्यवत्तानिश्चयकालीनस्य तद्विषयीभवत्तद्धर्मिव्यावृत्तत्वरूपस्यानुमितिविरोधिसम्बन्धस्य कदापीदन्तद्देतोरसत्त्वादत आह साध्यवदिति । साध्यवत्ताप्रमाकालीनस्य सर्वसाध्यद्वद्व्यावृत्तत्वस्यैवानुमितिविरोधिरूपस्यासाधारणत्वादिति भावः । अपक्षेति । ह्रदो वह्निमान् धूमादित्यादौ धूमादिवारणायेत्यर्थः । तत्रापि स्वरूपासिद्धिरूपस्यानुमितिविरोधिसम्बन्धस्य सत्त्वादिति भावःयथाश्रुतस्य आश्रयासिद्धिबाधाद्यतिव्याप्तिः जलं धूमवद्वन्हेरित्यादौ व्यभिचारिण्यतिव्याप्तिश्चेत्यतो व्याचष्टे पक्ष इति। विशिष्टेति । हेतुतावच्छेदकविशिष्टहेतावित्यर्थः।सन्देहाद्यप्रवेशेन लाघवादाह तथा चेति । हेतोर्वेति। वाशब्दः समुच्चये । अवच्छेदकानां प्रवेशस्य फलमाह पक्षेत्यादि । पक्षादेः प्रत्येकमप्रसिद्धावन्वयः । साधनांशे प्रकृतपक्षधर्मिकत्वप्रवेशस्य फलमाह स्वरूपासिद्धीति । साध्यांशे प्रकृतपक्षकत्वस्य तदाह बाधप्रतिरोधेति । अन्यथा ह्रदो वन्हिमान्धूमादित्यादौ व्याप्यहेतोरपि बाधादिकमादायातिप्रसङ्गापत्तेरिति भावः । असिद्धीति । स्वरूपासिद्धिसंकीर्णव्यभिचारिणः संग्रहश्चेत्यर्थः । ननु विरोधस्याप्यनुमितिविरोधिरूपत्वात्तादृप्येणापि विरुद्धहेतोः सव्यभिचारत्वापत्तिरत आह विरोधोपीति । विरुद्धत्वं यदि प्रकृतहेतुनिष्ठं पक्षवृत्तित्वे सति साध्यव्यापकाभावप्रतियोगित्वं तदा तस्यापि प्रकृतपक्षधर्मिकसाध्यवत्ताज्ञानविरोधित्वादविरोधित्वान्तद्वलेनैव वारणमित्यभिप्रायेणाह फलतः प्रतिरोध एवेति । साध्यासमा-

प्रतिरोध एव। तदन्यत्वेन वा विरोधि विशेषणीयम्। वक्ष्यते च सिद्धान्ते विरुद्धान्येति हेतुसाध्यसामानाधिकरण्यग्रहाविरोध्यर्थकम्। सम्बन्धपदबलेन प्रकृतहेतुसम्बन्धितया विरोधित्वे तात्पर्योपवर्णनेन प्रायशो बाधादिवारणेऽपि घटत्वमनित्यं घटत्वादित्यादौ प्रयत्नसाध्यमिव तत् प्रतिभाति। वस्तुतस्त्वनुमितिपदं तत्कारणज्ञानपरम्। आश्रयासिद्ध्यादिवारणाय सत्यन्तम्। तादृशपक्षकतादृशहेतुक-

---

नाधिकरणत्वादिकं यदि विरुद्धत्वं तदाह तदन्यत्वेन वेति। विरोधान्यत्वेनैवानुमितिविरोधिरूपं विशेषणीयमित्यर्थः। विशेषणे मूलस्वरसमाह वक्ष्यते चेति। विरोधस्यापि विरुद्धान्यत्वादनेकविधत्वेनैकान्यत्वोक्तावन्यत्रातिप्रसङ्गाच्च व्याचष्टे हेतुसाध्येत्यादि। साध्यवत्ताप्रमाविषयीभूतधर्मिव्यावृत्तत्वलक्षणस्य चासाधारण्यस्य ज्ञानं न साध्यसाधनयोः सामानाधिकरण्यज्ञानमात्रे विरोधि तन्निश्चयेपि धर्मान्तरेण तयोः सामानाधिकरण्यग्रहा दतो नासाधारणाव्याप्तिरिति भावः। ननु सम्बन्धपदमहिम्ना प्रकृतहेतुधर्मिकयादृशधर्मवत्ताज्ञानत्वेनानुमितिविरोधित्वं हेतोस्तादृशधर्मवत्त्वमेव सव्यभिचारत्वं विवक्ष्यतां कृतं बाधादिवारणार्थं विशेषणान्तरेणेत्यत आह सम्बन्धेति। विरोधित्वे अनुमितिविरोधित्वे। बाधादित्यादिना सत्प्रतिपक्षस्योपग्रहः। तत् बाधादिवारणम्। तत्र साधनस्यैव पक्षतया हेतुधर्मिकस्यैव बाधादिज्ञानस्यानुमितिप्रतिबन्धकत्वादिति भावः। ननु प्रकृतहेतुकसाध्यानुमितिसामान्यं प्रति प्रकृतहेतुसम्बन्धितया यद्रूपवत्ताज्ञानं विरोधि तद्वत्त्वमित्यभिधायोक्तदोषवारणे ह्रदो वन्हिमान्धूमादित्यादौ स्वरूपासिद्धसद्धेतुवारणार्थमुपात्तस्य पक्षवृत्तित्वे सतीत्यस्य व्यर्थतापत्तिः धूमनिष्ठतया ह्रदवृत्तित्वाभावज्ञानस्य धूमलिङ्गकवन्ह्यनुमितिसामान्यं प्रति अविरोधित्वादेव तन्नातिव्याप्तिसम्भवादित्याशयेन प्रयत्नसाध्यमिवेत्युक्तम्। चिन्तामणिकृन्मते व्यभिचारज्ञानस्यानुमित्यविरोधित्वात्तन्मतानुसारेण व्याचष्टे वस्तुतस्तु इति। तत्कारणेति। परामर्शपरमित्यर्थः। आश्रयासिद्ध्यादीत्यादिना स्वरूपासिद्धेः संग्रहः। तादृशेति। पक्षता-

वृत्तत्वमनुपसंहारित्वञ्चानुमितिविरोधि, तत्सम्बन्धः प्रत्येकमस्ति, विरुद्धोऽप्यनेन रूपेण सव्यभिचार एव, उपाधेश्च न सङ्कर इति वक्ष्यत इति निरस्तम् । एतदज्ञाने

ग्रहाविरोध्यर्थकम् । अनया च वाचोभङ्ग्या व्याप्तिग्रहविरोधित्वमेवाऽभिधित्सितम् । तेन वन्हिमान् वन्हिमान् ह्रदत्वादित्यादौ हेतोः साध्यवदवृत्तित्वादेर्नाऽसंग्रहः । विवेचयिष्यते चेदमुपरिष्टात् । सपक्षेति सम्पातायातम् । अत एवानुपदं विरुद्धोऽपीत्यादिकम् ।

यच्छेदकविशिष्टेत्यर्थः । ननु वन्हिमान् वह्निमान् ह्रदत्वात् इत्यादौ हेतौ वन्हिमदवृत्तित्वरूपे असाधारण्ये अव्याप्तिस्तस्य प्रकृतपक्षधर्मिकहेतुमत्त्वग्रहविरोधित्वादत आह अनयेति । पक्षधर्मत्वग्रहाविरोधित्वे सति परामर्शाविरोधित्वस्य व्याप्तिग्रहविरोधितायामेव पर्यवसानादिति भावः । अथात्राऽन्वयव्याप्तिनिवेशे व्यतिरेकव्याप्तिधीविरोधिन्यनुपसंहारिण्यव्याप्तिः एवं साध्याव्यभिचारितासामानाधिकरण्याभावरूपायां व्याप्यत्वासिद्धौ साध्यसाधनयोर्विशेषणासिद्धौ व्यर्थविशेषणतायां चातिव्याप्तिरित्यत आह विवेचयिष्यत इति । नानाविधं साधनव्यापकत्वं व्यतिरेकेण व्याप्यत्वं चोपादाय तावदवगाहिग्रहस्यैव प्रवेश्यत्वात् न साध्याव्यभिचरितसामानाधिकरण्याभावेऽतिप्रसङ्गो न वा अनुपसंहारिण्यव्याप्तिः, प्रकृतसाध्यसाधनग्रहाविरोधित्वेन विशेषणाच्च न साध्यसाधनाप्रसिध्योरतिप्रसङ्गः, व्यर्थविशेषणत्वं तु न व्याप्तिधीविरोधीत्यादेः सिद्धान्ते वक्ष्यमाणत्वादिति भावः । सपक्षवृत्तित्वांशस्य दूषकतायामनुपयुक्तत्वादाह सपक्षेतीति । इदमुपलक्षणम् । उभयव्यावृत्तत्वमित्यत्रापि विपक्षेति सम्पातायातं द्रष्टव्यम्, सपक्षव्यावृत्तत्वस्यैव दूषकत्वादिति । अत एवेति । सपक्षवृत्तित्वांशस्योपेक्षितत्वादेवेत्य-

ज्ञानेऽपि वाऽऽत्रयकप्रत्येकज्ञानस्य दोषत्वात् असाधकतानुमितौ व्यर्थविशेषणत्वाच्च। अत एव साध्याव्याप्यत्वे सति साध्याभावाव्याप्यहेत्वाभासत्वं साध्यवन्मात्रवृत्त्यन्यत्वे सति साध्याभाववन्मात्रवृत्त्यन्यत्वं वेति परास्तम्,

---

व्यर्थेति। विशेषणं पक्षवृत्तित्वम्। साध्याव्याप्यत्व इति। हेत्वाभासत्वं हेतुवदाभासमानत्वं वस्तुतश्च वृत्तिमत्त्वम् एवञ्च साध्यतदभावव्याप्यत्वग्रहविरोधिवृत्तिमत्त्वग्रहाविरोधिरूपवत्त्वमर्थः। साध्यतदभाववद्वृत्तित्वं साधारण्यं, निश्चितसाध्यतदभाववद्व्यावृत्तत्व-

---

र्थः। अन्यथा विरुद्धस्य सपक्षवृत्तित्वाभावादनेन रूपेणेत्यसङ्गत्यापत्तेः। साध्याभावव्याप्यत्वरूपस्य विरुद्धपदार्थस्य तदुभयव्यावृत्तत्वासम्भवादिदमा तत्परामर्शायोगादिति भावः। अनुमितिविरोधित्वविशेषणस्य सद्धेतुवारकत्वात्तद्वैयर्थ्यायोगाद्वाच्छे विशेषणमिति। हेत्वाभासपदं सार्थकीकर्तुमाह हेतुवदिति। साध्यादिव्याप्यस्यापि दशाविशेषे असाधारणत्वात्तत्राव्याप्तिः एवमवृत्तिहेतावपीत्यत आह एवं चेति। प्रकृतहेतौ साध्यव्याप्यत्वग्रहविरोधित्वे सति साध्याभावव्याप्यत्वग्रहविरोधि यद्वृत्तिमत्त्वग्रहाविरोधि रूपं तद्वत्त्वमर्थः। साध्याभाववद्वृत्तित्वादिमात्रस्य साध्यतदभावोभयव्याप्तग्रहविरोधित्वात् साधारण्यादिकमन्यथा निर्वक्ति साध्यतदभावेत्यादिना। असाधारण्यमिति। इदमुपलक्षणम्। केवलान्वयिधर्मावच्छिन्नपक्षकत्वे सति साध्यतदभाववद्वृत्तित्वमनुपसंहारित्वमित्यपि द्रष्टव्यम्। व्याप्तिद्वयेति। साध्यतदभावव्याप्त्योरित्यर्थः। अत्र यादृशविशिष्टविषयकत्वेन ज्ञानस्य व्याप्तिद्वयग्रहविरोधित्वं तद्वत्त्वं नार्थः कथितस्य साधारण्यादेरतथात्वेनासम्भवापत्तेः, किं तु प्रकृतहेतौ साध्यस्य साध्याभावस्य च व्याप्त्यवगाहित्वं यादृशविशिष्टविषयकनिश्चयत्वविरोधि तद्वत्त्व-

व्यर्थविशेषणत्वात् प्रथमं हेत्वाभासत्वाज्ञानाच्च । गग-

---

*

मसाधारण्यं, तच्च व्याप्तिद्वयग्रहविरोधीति हृदयम् । असिद्धिविशेषस्त्ववृत्तित्वं वृत्तिमत्त्वग्रहविरोधि, साध्यतदभाववद्वृत्तित्वमपि यदीदृशं तदा असिद्धिरेव,नो चेदिदमेवाऽसाधारण्यं बोध्यम् । साध्याप्रसिद्ध्यादिवारणाय विशिष्टसाध्यसाधनग्रहाविरोधित्वं वाच्यम् । व्यापकसामानाधिकरण्यमिह व्याप्यत्वम् । तेन च द्विती-

---

मेव, प्रमेयत्वादिविशिष्टस्य सपक्षविपक्षवृत्तिहेतोः हेत्वाभासलक्षणोक्तदिशैव वारणीयत्वादिति ध्येयम् । अत्र हेत्वाभासलक्षणोक्तरीत्या तादृशविशिष्टविषयकत्वं व्याप्तिद्वयग्रहविरोधितानतिरिक्तवृत्ति तादृशमेव फलितार्थो वाच्यः तथा च प्रमेयत्वादिविशिष्टेपि साध्यतदभाववद्वृत्तेरतिव्याप्तिः, न हि तादृशधर्मान्तराघटितमत्रापि शक्यते वक्तु, साध्यतदभाववद्वृत्तित्वादेः साध्याभाववद्वृत्तितादृशधर्मान्तरघटितत्वेनाऽसम्भवापत्तेः,किञ्च साध्यवद्वृत्तित्वांशग्रहस्य साध्याभावाभावत्वेन साध्याविषयकत्वात् न साध्याभावव्याप्तिग्रहविरोधित्वमित्याशयेनोक्तं हृदयमिति । लक्षणकृतो हृदयं न त्वस्माकमितीत्यर्थः । असिद्धिविशेष इति । स्वरूपासिद्धिव्याप्यत्वासिद्ध्योरन्यतररूप इत्यर्थः । वृत्तिमत्त्वेति । तथा च तद्वारणार्थमेव हेत्वाभासपदं वृत्तिमत्त्वग्रहाविरोध्यर्थकमिति भावः । ईदृशं वृत्तिमत्त्वग्रहविरोधि । तदेति । तथा च वृत्तिमत्त्वग्रहाविरोधीत्यनेनैव तस्यापि वारणमिति भावः । ननु साध्यतदभाववद्वृत्तित्वस्य वृत्तिमत्त्वाभावनियतत्वेन गृह्यमाणस्यैव वृत्तिमत्त्वग्रहविरोधित्वं न स्वरूपतो गृहीतस्येत्यत आह नो चेदिति।इदमेवेति।तथा च निश्चितसाध्यतदभाववद्वृत्तित्वस्य व्याप्तिद्वयग्रहाविरोधित्वेपि न क्षतिरिति भावः।साध्याप्रसिध्यादीत्यादिना हेत्वप्रसिद्धिसंग्रहः । नन्वत्र यदि साध्यादिव्याप्यत्वं साध्यादिमन्मात्रवृत्तित्वं तदा द्वितीयनिरुक्तभेद इत्यत आह व्यापकेति । (न चैव वन्हिमान् वन्हिव्यभिचारिधर्मादित्यादौ साध्यरूपेऽव्याप्तिः धर्मो वन्हिव्याप्य इत्याकारक व-

यस्य भेदः। रीतिस्तुल्यैव। के चित्तु असाधारण्याभावकालावच्छिन्नसाध्यतदभावव्याप्तिशून्यत्वं विवक्षितं विशेषणाभावात् वस्तुतो व्याप्यस्य विरुद्धस्य वा असाधारणस्य संग्रह इत्याहुः। तच्चिन्त्यम्। व्यर्थेति। विरोधादेर्वारकं साध्याभावेसादि व्यर्थं तस्य

न्हिव्यभिचारी धर्मो वन्हिव्याप्य इत्याकारकव्याप्तिग्रहन्यूनवृत्तिविषयताकत्वात् धर्मसामान्यव्यापकतात्वस्य विशिष्टधर्मव्यापकतानोऽतिरिक्तत्वादिति वाच्यम्।एतदस्वरसेनैव द्वितीयलक्षणस्यादरादिति भावः।) भेद इत्यस्य प्रथमादित्यादिः, नातः षष्ठ्यर्थासङ्गतिः। साध्यतदभावयोरेकवन्मात्रवृत्तेरपि हेतोर्दशाविशेषे असाधारणत्वात्तत्संग्रहार्थं द्वितीयलक्षणस्यापि साध्यतदभाववन्मात्रवृत्तित्वग्रहविरोधिरूपवत्त्वमर्थो वाच्य इत्याह रीतिरितिद्वितीयस्येत्यनुषज्यते। असाधारण्याभावेति। हेतुधर्मिकसाध्यतदभाववद्वृत्तित्वज्ञानाभावविशिष्टेत्यर्थः। न च यत्र हेतौ तादृशज्ञानमप्रसक्तं तत्र साधारणेऽव्याप्तिः, तत्र तादृशविशेषणस्यानुपादेयत्वात् साध्यसाधनभेदेन सव्यभिचारस्य भेदादिति भावः। विशेषणेति। असाधारण्याभावकालावच्छिन्नत्वविशेषणाभावादित्यर्थः। असाधारण्यस्य तत्तत्पुरुषनियन्त्रितत्वात् तदघटितं सव्यभिचारत्वमप्येवं पुरुषभेदनियन्त्रितं स्यादित्यभिप्रेत्याह तच्चिन्त्यमिति। उक्तसव्यभिचारेण असाधकतानुमानस्यावश्यकत्वे मानाभावात्तत्र वैयर्थ्यासम्भवादन्यथा व्याचष्टे विरोधादेरिति। आदिपदादवृत्तिमत्त्वपरिग्रहः। साध्याभावेति। साध्याभावव्याप्यत्वादिकमित्यर्थः। आदिपदादवृत्तिमत्त्वग्रहाविरोधित्वपर्यवसन्नस्य हेत्वाभासत्वस्योपग्रहः। नन्वेवमुक्तनिरुक्त्या सव्यभिचारेतरभेदानुमाने विरोधादौ व्यभिचार इत्यत आह तस्येति। विरोधादेरित्यर्थः। वृत्तिमत्त्वग्रहाविरोधित्वरूपस्य व्याख्यातहेत्वाभासत्वस्य प्रथमतः सुग्रहत्वादुभयव्याप्तिग्रहविरोधिनां निश्चितसाध्यतदभाववद्वृत्तित्वमादायैव गगनमनित्यमित्याद्यसाधारणसंग्रहाच्चाह प्रथममित्यादीति। गगनमित्यादीति च प्रथमव्याख्यानुसारेण। न च नोचेद्-

नमनित्यं शब्दाश्रयत्वादित्यादिबाधविरुद्धसङ्कीर्णासाधारणाव्याप्तिरिति कश्चित् । नापि सपक्षविपक्षगतसर्वसपक्षविपक्षव्यावृत्तान्यतरत्वम्, व्यर्थविशेषणत्वात् अनुपसंहार्य्यव्याप्तेश्च । किञ्च पक्षातिरिक्तसाध्यवतः सपक्षत्वे प्रमेयत्वेनाऽभेदसाधनेऽनुपसंहार्य्येऽव्याप्तिः पक्षातिरिक्तसाध्यवतोऽप्रसिद्धेः, साध्यवतः सपक्षत्वे विवक्षितेऽप्रसिद्धिः, वृत्तिमतो धर्मस्य साध्यवद्विपक्षान्यतरवृत्तित्वनियमात् । नापि पक्षातिरिक्तसाध्यवन्मात्रवृत्त्यन्यत्वे

पार्थक्ये प्रमाणाभावादिति भावः । प्रथममित्यादि गगनमित्यादि च दूषणं यथाश्रुते । नापीत्यादि । सपक्षविपक्षत्वावच्छिन्नव्यावृत्तत्वं सर्वतद्व्यावृत्तत्वम् । व्यर्थेति । सपक्षवृत्तित्वविपक्षव्यावृत्तत्वयोर्दूषकतायामनुपयोगादिति भावः । पक्षातिरिक्तेत्यादि । व्याप्यविरु-

---

त्यादिकल्पे तत्राव्याप्तिरेवेति वाच्यम् । तत्कल्पे गगनाद्यवृत्तिहेतोरेवाऽसाधारणतया तस्याऽलक्ष्यत्वादिति भावः । यत्रैकव्यक्तिकमेव सपक्षादिकं तत्र सर्वपदार्थाप्रसिद्धेरव्याप्तिरतो व्याचष्टे सपक्षविपक्षत्वावच्छिन्नेति।साध्यस्य तदभावस्य च यत्र यत्र निश्चयस्तत्तद्धर्मिव्यावृत्तत्वमित्यर्थः । उक्तान्यतरत्वेन सव्यभिचारेतरभेदानुमाने व्याप्यतावच्छेदकान्तरासम्भवान्न तत्र व्यर्थविशेषणत्वमतो दूषकतायां तद्योजयति सपक्षेत्यादि । व्याप्यविरुद्धयोरित्यस्य पक्षनिष्ठयोरित्यादिः । तेन वन्हिरनित्यः शब्दत्वादित्याद्यसाधारणस्य पक्षातिरिक्तत्वविशेषणादसंग्रहेपि न क्षतिः । संग्रहायेति । शब्दोऽनित्यः शब्दत्वादित्यत्र व्याप्यस्य हेतोः साध्यवन्मात्रवृत्तित्वेपि पक्षातिरिक्ततन्मात्रवृत्तित्वाभावात् एवं शब्दो नित्यः शब्दत्वादित्यत्र विरुद्धस्य

सति पक्षातिरिक्तसाध्याभाववन्मात्रवृत्तिभिन्नत्वम्, अनुपसंहार्य्यव्याप्तेः धूमादावतिव्याप्तेश्च तस्य पक्षे साध्यवति वृत्तेः । नापि पक्षवृत्तित्वे विरुद्धान्यत्वे च सत्यनुमित्यौपयिकसम्बन्धशून्यत्वम्, व्यर्थविशेषणत्वात् । ए-

---

द्धयोरसाधारणयोः संग्रहाय पक्षातिरिक्तपदे । पक्षत्व सन्दिग्धसाध्यकत्वम् । धूमेत्यादिदूषणं यथाश्रुते न तु सप्तमीसमासात् पक्षातिरिक्ते वर्त्तते यत्साध्यवन्मात्रवृत्ति साध्याभाववन्मात्रवृत्ति च तद्भिन्नत्वमित्यर्थे इति ध्येयम् । पक्षवृत्तीत्यादि । विरोधः साध्यासा-

---

हेतोः साध्याभाववन्मात्रवृत्तित्वेपि पक्षातिरिक्ततन्मात्रवृत्तित्वाभावादुभयोरसाधारणयोः संग्रहायेत्यर्थः । पक्षत्वं यदि प्रकृतपक्षतावच्छेदकधर्मवत्त्वं तदा द्रव्यत्वरूपेण पर्वते धूमसन्देहदशायां द्रव्यं धूमवद्वन्हेरित्यादिसाधारणेऽव्याप्तिः द्रव्यान्यधूमवदप्रसिद्धेरत आह पक्षत्वमिति । तथा च तत्र साध्यसन्देहविषयीभूतद्रव्यान्यमहानसादेरेव धूमवत्त्वान्न दोषः । न चैवं द्रव्यसामान्ये धूमवत्त्वसन्देहदशायां तथाप्यप्रतीकार इति वाच्यम् । एतद्दोषस्यानुपसंहार्यव्याप्तेरित्यादिना मूल एव वक्ष्यमाणप्रायत्वादिति भावः । यथाश्रुते पक्षातिरिक्तो यः साध्यवान् तन्मात्रवृत्तिभिन्नत्वे सतीत्यन्वये । इत्यर्थ इति । न तु दूषणमित्यन्वयः । धूमस्य पर्वतातिरिक्तसाध्यवन्मात्रे च वर्तमानत्वेन तदन्यत्वाभावादिति भावः । न चैवमपि पक्षातिरिक्तसाध्याभाववन्मात्रवृत्त्यन्यत्वमित्यत्र कर्मधारयत्यागानौचित्यमिति वाच्यम् । कुलीनोऽश्वो गौरश्वत्वादित्यत्र विरुद्धहेतावतिव्याप्तेः । तस्य पक्षेपि वृत्त्या पक्षातिरिक्तो यः साध्याभाववांस्तन्मात्रवृत्त्यन्यत्वादिति भावः । विरोधो यदि साध्याभावव्याप्यत्वं तदा तदन्यत्वस्य साध्यसामानाधिकरण्येपि सत्त्वा-

तेनानुगतं सर्वमेव लक्षणं प्रत्युक्तम्, प्रत्येकमेव दूषणत्वात् उद्भावने वादिनिवृत्तेश्च ॥

मानाधिकरण्यम् । पक्षवृत्तित्वसाध्यसामानाधिकरण्यग्रहविरोधी योऽनुमितेरौपयिकस्य जनकज्ञानविषयस्य सम्बन्धस्य सपक्षसत्त्वादेरभावस्तद्रूपत्वमित्यर्थः । सपक्षविपक्षव्यावृत्तत्वस्य चासाधारण्यस्य असाधारण्यनिश्चये पक्षे साध्यसामानाधिकरण्यसन्देहान्न तस्य तज्ज्ञानविरोधित्वम् । पक्षवृत्तौ विरुद्धभिन्ने च वर्त्तते यस्तादृशाभावस्तद्रूपत्वमर्थ इति के चित् ॥

तत्रातिव्याप्तिरतोऽन्यथा व्याचष्टे विरोध इति । ननु साध्याभावव्याप्यत्वस्य विरोधत्वे विरुद्धान्यत्वेति व्यर्थं तस्याऽनुमित्यौपयिकसम्बन्धाभावत्वाभावादत आह विरोध इत्यपि वदन्ति । पक्षावृत्तिसव्यभिचारे विरुद्धात्मकासाधारणे च यथाश्रुतस्याव्याप्तेराह पक्षवृत्तित्वेति । अनुमितेरौपयिकत्वं जनकत्वं तच्च न सपक्षवृत्तित्वादेरतोऽन्यथा व्याचष्टे जनकज्ञानविषयस्येति । तत्रानुमितिपदं तत्कारणपरामर्शपरं तेनाऽबाधितत्वासत्प्रतिपक्षितत्वयोरनुमित्यौपयिकत्वपक्षेपि बाधितत्वादौ नातिप्रसङ्गः । ननु सपक्षासत्त्वमेवाऽसाधारण्यं साध्यसामानाधिकरण्यग्रहविरोधीति तत्राव्याप्तिरत आह सपक्षविपक्षव्यावृत्तत्वस्य चेति। निश्चितसाध्यतदभाववद्व्यावृत्तत्वस्य चेत्यर्थः । असाधारण्यस्येति । प्राचां मते इत्यादिः । पक्ष इति । सप्तम्यर्थोऽवच्छेदकत्वं तथा च पक्षावच्छेदेनेत्यर्थः । तस्य सपक्षव्याप्तत्वस्य । तथा च सुतरां विपक्षव्यावृत्तत्वस्य न तथात्वमतो न तत्राव्याप्तिरित्याशयः । तेन सपक्षव्यावृत्तत्वमात्रस्यैवानुमित्यौपयिकाभावत्वरूपाभावत्वादुभयव्यावृत्तत्वाभिधानस्य नासङ्गतिरिति ध्येयम् । तज्ज्ञानेति । साध्यसामानाधिकरण्यज्ञानेत्यर्थः । तादृशाभावः अनुमित्यौपयिकसम्बन्धाभावः । अत्र ह्रदो धूमवान् वन्हेरि-

उच्यते । उभयकोटयुपस्थापकतावच्छेदकरूपवत्त्वं तत्त्वम् । तच्च साधारणत्वादि ।

पूर्वोक्तलक्षणानां यथोक्तरीत्या यथामतं नाव्याप्त्यादिसम्भावना परन्तु तज्ज्ञानस्यानुमितिप्रतिबन्धकतया तेषां हेत्वाभासतावच्छेदकत्वं न घटते, न घटतां किन्तेन, तेषां हेत्वाभासविभागमात्रोपयोगित्वादित्याशयेनाह उच्यत इति । सन्देहं प्रत्येव साधा-

---

त्यत्र साधारणेऽव्याप्तिः ह्रदवृत्तौ वर्तते यत् साध्याभाववत्संयुक्तत्वं तस्य वन्ह्यभावात्, किञ्च पक्षवृत्तित्वमवश्यं हेतुनाघटकसम्बन्धेन वाच्यम्, अन्यथा पक्षधर्मत्वाभावस्य सम्बन्धान्तरेण यत्पक्षवृत्ति तन्निष्ठतया तत्राव्याप्तितादवस्थ्यात्, तथा च रूपं धूमवद्वन्हेरित्यादावव्याप्तिः संयोगेन रूपवृत्त्यप्रसिद्धेरित्यस्वरसः के चिदित्युक्त्या सूचितः ॥

इति जागदीश्यां सव्यभिचारलक्षणपूर्वपक्षग्रन्थः समाप्तः ।

अथ सव्यभिचारसिद्धान्तः ।

ननु यद्रूपवत्ताज्ञानमनुमितिविरोधि तस्यैव विभाजकत्वात् वक्ष्यमाणलक्षणस्य चाऽतथात्वादुच्यत इत्यादिकमसङ्गतम् अन्यथा प्रागुक्तलक्षणानामपि सम्यक्त्वे तत्परित्यागानौचित्यादत आह पूर्वोक्तेत्यादि। यथामतमिति । तेन सत्प्रतिपक्षोत्थापकत्वेनासाधारणस्य दूषकत्वपक्षे साध्यसन्देहजनकत्याद्युक्तलक्षणस्य तत्राव्याप्तावपि न क्षतिः। साध्यसंशायकत्वेन दोषतामवलम्ब्यैव तल्लक्षणावतारादिति भावः। हेत्वाभासता अनुमितिविरोधिता। विभागमात्रेति। अतिप्रसङ्गस्य मूलकृतैव स्वतन्त्रेच्छाया इत्यादिना निवेश्यत्वादिति भावः। द्वय-

रण्यादिविशिष्टधर्मवद्धर्मिज्ञानत्वेन हेतुता तज्जनककोटिद्वयोपस्थितिं प्रति तु तादृशधर्मज्ञानत्वमात्रेणेत्यभिप्रेत्याह उभयेति। साध्यसन्देहजनकेति प्रकृतम्। यथाकथञ्चित् कोटिद्वयोपस्थितिः स्मृत्यनुभवसाधारणी सन्देहजननी, नियामकन्तु साधारण्यादिविशि-

---

णुकं नित्यमणुत्वादित्यादौ धर्मिवाचकस्य प्रागुक्तपक्षधर्मताज्ञानपदस्य त्यागे बीजमाह सन्देहमित्यादिना। तज्जनकेति। साध्यसन्देहजनकेत्यर्थः। तादृशेति। साधारण्यादिविशिष्टधर्मज्ञानत्वमात्रेणेत्यर्थः। तथा च धर्मिणः कोटेरुपस्थापकतावच्छेदकत्वाभावादेव न तत्रातिव्याप्तिरतः पक्षधर्मतापदं परित्यक्तमिति भावः। ननु वस्तुगत्या साध्यतदभावोपस्थितिं प्रति जनकत्वं साध्यादिमत्त्वज्ञानत्वेनापीति तत्रातिव्याप्तिः तदुभयोपस्थितित्वावच्छिन्नं प्रति जनकत्वं तु न साधारण्यादिवाँशिष्टधर्मज्ञानत्वेनापीत्यव्याप्तिरत आह साध्यसन्देहेति। प्रकृतमिति। प्रक्रमप्राप्तमित्यर्थः। तथा च स्थाणुत्वतदभावसहचारतोर्ध्वत्वविशिष्टेदंधर्मिकस्थाणुत्वसन्देहजनक-स्थाणुत्वतदभावस्मृतित्वावच्छिन्नं प्रति स्थाणुत्वतदभावसहचरितत्वावाँशिष्टोर्द्धत्वज्ञानत्वेन हेतुत्वात् स्थाणुत्वसाधारण्यं तादृशोपस्थितिजनकतावच्छेदकमिति तत्र लक्षणसङ्गतिः, एवमसाधारण्येपि नेयमिति भावः। नव्यमतेन व्याख्यातुमुक्तव्याख्यायामसम्भवं दर्शयति यथाकथञ्चिदिति। साधारण्यादिज्ञानाधीना तदनधीना वेत्यर्थः। विशेषणज्ञानविधयैव सन्देहकोटेरुपस्थितेरुपयोगादिति भावः। नन्वेवं कोटिद्वयस्य ज्ञानमात्रादेव संशयः स्यादत आह नियामकन्त्विति। तथा च स्थाणुत्वतदभावसहचरितोर्ध्वत्वविशिष्टेदंधर्मिकस्थाणुत्वसंशयं प्रति इदंधर्मिकस्थाणुत्वतदभावसहचरितोर्ध्वत्ववत्तानिश्चयत्वेन हेतुत्वान्नातिप्रसङ्गः। विशिष्टान्तोपादानादसाधारणादिधर्मवत्ताज्ञानजन्ये स्थाणुत्वसंशये न व्यभिचारः। स्थाणुत्वसाधारणोर्ध्वत्ववानयं स्थाणुर्न वेत्येव संशयोत्पादाच्च नासिद्धिः। अत एव स्वाश्रयोत्तरतृतीयक्षणवृत्तित्यादिहेतुव्याख्यायां संशयस्य स्वजनकज्ञानविषयीभूतसाधारण्यादिविशिष्टधर्मविषयकत्वनियमः

ष्टधर्मवत्ताज्ञानम्, अत एव धारावाही सन्देह इति मते तु धर्मिता-वच्छेदकविशिष्टं धर्मिणि यद्रूपविशिष्टज्ञानं साध्यसन्देहजनकं त-द्रूपवत्त्वमेव वक्तव्यम्। कोटिद्वयसहचरितत्वादिना ज्ञातस्य ऊर्ध्व-त्वादेरूर्ध्वत्वत्वादिना धर्मिणि ज्ञानमेव संशयजनकं न तु तदानीं साहचर्य्यज्ञानमपेक्षते इति नये तु यद्रूपविशिष्टत्वेन गृहीतस्य ध-र्मस्य धर्मिवृत्तिताज्ञानं तथा तद्वत्त्वमेव वाच्यम्। तच्चेति।

प्रत्यक्षालोकेप्युक्तः। अत एवेति। कोट्यनुभवस्यापि हेतुत्वादेवेत्य-र्थः। अन्यथा साधारण्यादिविशिष्टधर्मिधीजन्यायाः कोटिस्मृतेरन्त-रोपेक्षायां सन्देहस्य धारावाहिकत्वं न स्यादिति भावः। धर्मिते-त्यादि। किंचिद्रूपावच्छिन्नधर्मिताकयद्रूपावच्छिन्नप्रकारताकज्ञानत्वं साध्यसन्देहजनकतावच्छेदकं तद्रूपवत्त्वमर्थः। तत्र जनकत्वं न स्व-रूपसम्बन्धविशेषः साधारणत्वाद्यभानेपि तादृप्येण वस्त्वन्तरावगा-हिभ्रमादपि साध्यसन्देहादव्याप्तेः, किं त्वनतिरिक्तवृत्तित्वम्, न च साधारणत्वाद्यवच्छिन्नप्रकारताकत्वमात्रं तथेत्यतो धर्मिताकान्तम्। तादृशावच्छेदकान्तराद्यघटितत्वेन विशेषणीयत्वाच्च न प्रमेयत्वा-दिविशिष्टसाधारण्यादावव्याप्तिः। वक्तव्यमिति। उभयकोट्युप-स्थापकत्वत्र मूले संशयरूपाया एवोभयकोट्युपस्थितेर्ग्रन्थकृताभिप्रे-तत्वादिति भावः। मतान्तरमाह कोटिद्वयेत्यादि। यद्रूपेण सहचारा-दिग्रहस्तादृप्येणैव धर्मिणि ज्ञानं संशयहेतुः अन्यथाऽतिप्रसङ्गादित्या-शयेनाह ऊर्ध्वत्वत्वादिनेति। तदानीं सन्देहदशायामित्यर्थः। तथा चेदन्धर्मिक-स्थाणुत्वसंशयं प्रति ऊर्ध्वत्वविशेष्यकस्थाणुत्वतदभावसहचारगो-चरसंस्कारविशिष्टेदन्धर्मिकोर्ध्वत्वनिश्चयत्वेन हेतुत्वम्। असाधार-ण्यादिसंस्काराप्रयोज्यत्वेन कार्यविशेषणाच्च न व्यभिचारः। न चैवं सहचारादिगोचरानुद्बुद्धसंस्कारदशायामपि संशयापत्तिः, सं-स्कारानुद्बोधकालीनज्ञानव्यक्तीनामपि विशिष्य संशये प्रतिबन्ध-कत्वोपगमादिति भावः। नये त्विति। तुकारोऽनाश्वायाम्। सा-धारण्यादिविशिष्टधर्मवत्तानिश्चयत्वेन प्रागुक्तलघुरूपेण हेतुतामपे-क्ष्योक्तक्रमेण हेतुतायामतिगौरवादिति भावः। तथा साध्यसन्देह-

ननु असाधारण्यं न साध्यतदभाववद्व्यावृत्तत्वम्, वृत्तिमतस्तथात्वासम्भवात् एककोटिव्याप्यस्येव एककोटिमद्व्यावृत्तस्यापि धर्मस्य बुद्धेर्विशेषदर्शनतया संशयविरोधित्वाच्च । सत्प्रतिपक्षे च परामर्श-

---

जनकम् । तथा चोर्ध्वत्वधर्मिकयद्रूपावच्छिन्नप्रकारताकसंस्कारविशिष्टमूर्ध्वत्वादिनिश्चयत्वं साध्यसन्देहजनकतावच्छेदकं तद्रूपवत्त्वमर्थः । इदं च संस्कारस्य स्मृतिमात्रहेतुताप्रवादमनुसृत्योक्तम् । यदा तु स्थाणुत्वादिसंशयं प्रति इदंधर्मिकोर्ध्वत्वादिनिश्चयः स्थाणुत्वतदभावसहचरितत्वेनोर्ध्वत्वसंस्कारश्च द्वयमेव विनिगमनाविरहाद्धेतुरिति पक्षस्तदा साध्यसंशयत्वावच्छिन्नं प्रति यद्रूपावच्छिन्नप्रकारताकसंस्कारत्वेन यद्रूपावच्छिन्नप्रकारताकत्वेनैव वा हेतुत्वं तद्रूपवत्त्वमेव वक्तव्यमित्यवधेयम् । तच्च साधारणत्वादीत्यस्यानन्तरमेव विरुद्धान्येत्यादिमूलं मन्वानो धत्ते तच्चेत्यादि ।

लक्षणान्तरमवतारयितुं साधारणत्वादीत्यत्रादिपदोपगृहीतमसाधारणत्वं प्रतिक्षिपति नन्विति । वृत्तिमत इति । तथा च शब्दोऽनित्यः शब्दत्वादित्यादिकं दशाविशेषे असाधारणं न स्यादिति भावः । ननु अवृत्तिगगनादिकमेवासाधारणं भविष्यतीत्यत आह एककोटीति । तथा च साध्यतदभाववद्व्यावृत्तत्वनिश्चयदशायां साध्यसंशयविरोधिनः साध्यवद्व्यावृत्तधर्मवत्तानिश्चयस्यावश्यकत्वान्न तस्य संशयजनकत्वमित्यव्याप्तिः । यद्यपि तृतीयव्याख्यायां नैष दोषः संशयदशायामसाधारण्यादिज्ञानस्य तत्रानपेक्षणात्, तथापि गौरवादिदोषेण तत्कल्पस्याऽनादेयत्वात् तद्धर्मिणि यद्रूपावच्छिन्नवत्ताज्ञानत्वेन संशयजनकत्वं तद्रूपवत्त्वमित्यादिकल्प एवाश्रय इत्याशयेन तत्रैव दूषणमिदं दत्तमिति द्रष्टव्यम् । ननु यथा साध्यपरामर्शाभावविशिष्टस्यैव साध्याभावपरामर्शस्य साध्यसंशयविरोधित्वमन्यथा सत्प्रतिपक्षितस्थले साध्यसंशयानुपपत्तेः तथा च साध्याभाववद्व्यावृत्तधर्मवत्ताज्ञानाभावावशिष्टस्यैव साध्यवद्व्यावृत्तधर्मवत्ताज्ञानस्य तथात्वमित्युभयव्यावृत्तधर्मवत्ताज्ञानदशायां साध्यसंशये बाधकाभाव

र्शाप्रामाण्यसंशयोत्तरमेव साध्यसन्देहात। नापि निश्चितसाध्यतदभाववद्वृत्तित्वम्। तद्धि यत्र यत्र साध्यादिमत्तानिश्चयस्तद्वृत्तित्वं, येन येन रूपेण यत्र यत्र तन्निश्चयस्तेन तेन तद्वृत्तित्वं वा। आद्ये सर्वाणि साध्यव्याप्यवन्ति साध्यवन्ति सर्वाणि वा साध्यवन्ति प्रमेयाणीत्यादिनिश्चये सामान्यतः पक्षेऽपि साध्यादिनिश्चयादतथात्वप्रसङ्गः। द्वितीये तु विशिष्य पक्षे साध्यनिश्चयं

इत्यतो दृष्टान्तासिद्धिमाह सत्प्रतिपक्ष इति। बलमर्शयोः प्रामाण्यसंशयोत्तरमेव तत्र साध्यसंशयो न त्वगृहीताप्रामाण्ययोरपि परामर्शयोः सत्त्वे इत्येवकारार्थः। येनेत्यादि। यद्यद्धर्मावच्छिन्नविशेष्यकः साध्यादिमत्तानिश्चयः तत्तद्धर्मावच्छिन्नव्यावृत्तत्वमित्यर्थः। साध्यव्याप्यवन्ति सर्वाणि साध्यवन्तीति दोषस्य द्वितीयकल्पेऽव्यविशिष्टत्वात् प्रथमकल्पमात्रीयं दूषणमाह सर्वाणि वा साध्यवन्ति प्रमेयाणीति। साध्यवत्त्वस्यावच्छेदकत्वस्फोरणार्थं सर्वपदम्। तेन साध्यवत्त्वांशे धर्मितावच्छेदकाभावान्न द्वितीयवितर्कसाधारण्यमित्यवधेयम्। सामान्यतः साध्यव्याप्यवत्त्वावच्छेदेन। अतथात्वेति। अनित्यादूर्घटादेः नित्याच्च गगनादेः व्यावृत्तं शब्दत्वमिति ग्रहेपि शब्दत्वादेरसाधारण्याभासत्वप्रसङ्गः पक्षव्यावृत्तत्वस्याऽग्रहादिति भावः। विशेषतः शब्दत्वावच्छेदेन साध्यनिश्चयसत्त्वे शब्दत्वादिहेतोः तदवच्छिन्नव्यावृत्तत्वाभावादेव नातिव्याप्तिरत उक्तं विशिष्येति। तथात्वापत्तिरिति। शब्दत्वस्यानित्यत्वव्याप्यतानिश्चयदशायामपि नित्याद्गगनादेरनित्याच्च घटाद्व्यावृत्तं शब्दत्वमितिज्ञानसम्भवात्तदानीमसाधारणत्वापत्तिरिति भावः। न च व्याप्तिज्ञाने अधिकरणत्वविशिष्टांशे साध्यनिश्चयात्तदवच्छिन्नव्यावृत्तत्वस्य च हेतावभावान्नातिव्याप्तिरिति वाच्यम्। येन रूपेणेत्यत्राधिकरणत्वादिविशिष्टस्यैव रूपस्य प्रवेश्यत्वात्। अन्यथा अधिकरणं साध्यवत् अधिकरणवृत्तिश्च हेतुरित्येवंग्रहदशायामसाधारण्याव्याप्तिप्रसङ्गात्। साध्यसामानाधिकरण्यादौ साध्यादिमात्रप्रकारेणैव तदधिकरणस्य भानसम्भवाच्चेति भावः। शङ्कते नैष दोष इति। विशेषलक्षणस्ये-

विनैव शब्दादिना साध्यव्याप्यत्वनिर्णयेऽपि तथात्वापत्तिः । नैष दोषो यादृशव्याप्तिग्रहे सति नासाधारण्यं तदग्रहाभावेन विशेषलक्षणस्य साधारण्याभावविशिष्टस्य तदग्रहस्य चाभावेन सामान्यलक्षणस्य विशेषणादतिव्याप्तिनिरासात्, विशिष्टाभावादेव च साधारण्ये व्याप्तिभ्रमदशायां नाव्याप्तिरिति चेत् । एवं सत्येकेन व्याप्तौ गृहीतायामसाधारणस्य न किञ्चिदपि प्रति सव्यभिचारित्वं स्यात्, स्याद्वा तदपि तत्तत्पुरुषघटितमसाधारण्यवत्, साध्यादिव्या-

---

ति । तत्तद्धर्मावच्छिन्नविशेष्यकसाध्यवत्तानिश्चयकालीनस्य तत्तद्धर्मावच्छिन्नव्यावृत्तत्वरूपस्य असाधारणलक्षणस्येत्यर्थः । विशेषणादतिव्याप्तिनिरासादित्यग्रे अन्वयः । तद्ग्रहस्य तादृशव्याप्तिग्रहस्य । सामान्यलक्षणस्येति । साध्यसन्देहजनकतावच्छेदकधर्मवत्त्वरूपस्य सव्यभिचारलक्षणस्येत्यर्थः । नाव्याप्तिरिति । साधारणे व्याप्तिग्रहदशायामपि साधारण्याभावविशिष्टस्य व्याप्तिग्रहस्य विषयतासम्बन्धेनाऽभावानपायादिति भावः । सामान्यलक्षणे दोषमाह न किञ्चिदिति । साधारण्याभावविशिष्टस्यैव व्याप्तिग्रहस्य तत्र सत्त्वादिति भावः । ननु तत्पुरुषीयव्याप्तिग्रहाभावविशिष्टं साध्यसन्देहजनकतावच्छेदकरूपवत्त्वं तत्पुरुषस्य सव्यभिचारत्वं वाच्यमत आह स्याद्वेति । तदपि सव्यभिचारत्वमपि । तथा च यत्र साधारणे हेतौ कस्यापि व्याप्तिभ्रमो न जातः स कस्यापि पुंसः सव्यभिचारः असाधारण्यादेस्तदव्याप्यधर्मत्वेन विभाजकत्वं वा न स्यादिति भावः । विशेषलक्षणे दोषमाह साध्यादिव्याप्येति ! आदिपदाभ्यां साध्याभावोपग्रहः । अव्याप्तिप्रसङ्गादिति । अनित्यत्वादिव्याप्यवद्व्यावृत्तत्वस्य शब्दत्वादावभावादिति भावः । ननु साध्यव्याप्यवत्त्वावच्छिन्ने साध्यवत्तानिश्चयदशायां सङ्केतोरसाधारणत्वाभावेपि न क्षतिः तत्राऽसाधारणत्वभ्रमादेव साध्यसंशयोत्पादादित्यतः तद्भ्रमं निरस्यति न हीति । शब्दस्यानित्यत्वव्याप्यवत्तासन्देहदशायां शब्दत्वेप्यनित्यत्वव्याप्यवद्वृत्तितासन्देहस्यौचित्यावर्जितस्योत्पत्तेरिति

विरुद्धान्यपक्षवृत्तित्वे सत्यनुमितिविरोधिसम्बन्धा-

प्यवत्त्वेन रूपेण साध्यादिमत्त्वनिश्चयेऽव्याप्तिप्रसङ्गाच्च। न हि घटोऽनित्यो घटाद्व्यावृत्तं शब्दत्वमिति वद् अनित्यत्वव्याप्यवतो व्यावृत्तं शब्दत्वमिति तदानीं निश्चयः। अभिहितञ्च निश्चितसाध्यतदभाववद्व्यावृत्तत्वं न संशयप्रयोजकं किन्तु साध्यतदभावाभ्यां सहचरितत्वमिव तत्सहचरिताभावप्रतियोगित्वम्, व्याप्यविरुद्धयोस्तु तत्त्वेन निश्चितयोर्दर्शने विशेषदर्शनवशादेव न संशय इति विभाव्य लक्षणान्तरमाह विरुद्धान्येति। विशिष्टसाध्यहेतुसामानाधि-

---

भावः। ननु येन येन रूपेण साध्यवत्तानिश्चय इत्यत्र रूपं साध्यव्याप्यवत्त्वादिभिन्नं ग्राह्यमतो नोक्ताव्याप्तिरित्यत आह अभिहितं चेति। न संशयेति। तथा च तदुपादायाऽसाधारणे सव्यभिचारनिरुक्त्यन्वयो दुर्घट इति भावः। तर्हि संशयप्रयोजकमसाधारण्यं दुर्वचमत आह किं त्विति। तत्सहचरितेति। साध्यतदभावाभ्यां सहचरितो योऽभावः तत्प्रतियोगित्वमित्यर्थः। तच्च वन्हिसाध्यके धूमादिसद्धेतावतिप्रसक्तमतो न तादृप्येणासाधारणस्य सव्यभिचारित्वसङ्गतिरिति भावः। ननूक्तधर्मस्य संशयप्रयोजकत्वे साध्यव्याप्यत्वेन तद्विरुद्धत्वेन वा गृहीतस्यापि हेतोर्धर्मिणि निश्चये तत्र साध्यसंशयः स्यात्तदानीमपि तादृशाभावप्रतियोगित्वधीसम्भवादित्यकामेनापि निश्चितसाध्यतदभाववद्व्यावृत्तत्वमेव तथा वाच्यमत आह व्याप्येत्यादि। तत्त्वेन व्याप्यत्वेन विरुद्धत्वेन चेत्यर्थः। दर्शन इत्यस्य धर्मिणीत्यादिः। तथा च प्रतिबन्धकान्तरसत्त्वादेव तदानीं सन्देह इति भावः। लक्षणान्तरं विरुद्धान्येत्यादिरूपम्। विरोधस्यापि विरुद्धान्यत्वात्तादृप्येण सव्यभिचारत्वापत्तिरतो व्याचष्टे विरुद्धान्येतीति। सतिसप्तम्या विरोधान्यत्वसमानाधिकरणस्य अनुमितिविरोधिरूपस्य बोधसम्भवादाह अर्थत इति। सामानाधि-

करण्यग्रहाविरोध्यर्थकमर्थतो विरोधिविशेषणम् । तेन साध्यसाधनयोरप्रसिद्धेरवृत्तित्वस्य परम्परासामानाधिकरण्यादीनाञ्च निरासः।पक्षपदञ्च धर्मिमात्रपरम् । तथा च यद्यद्धर्मिवृत्तित्वं हेतोर्ज्ञायते तत्र तत्रैवानुमितिविरोधि यद्रूपं तद्वत्त्वमित्यर्थः । साध्यव्यापकीभूताभावप्रतियोगित्वन्तु तथा, बाधप्रतिरोधौ तु धर्मिविशेषितत्वात् न तादृशौ । सर्वं साध्याभाववत् तद्व्याप्यवद्वेत्यादिकञ्च साध्यवत्त्वग्रहविरोधित्वेन सामानाधिकरण्यग्रहविरोधि साध्यानु-

---

करण्यवाचिकाया अपि सप्तम्याः प्रकृते अधिकरणत्वमर्थ इति भावः। विरोधान्यत्वमुपेक्ष्य ज्ञानगर्भानुगतरूपोक्तेः फलमाह तेनेति । साध्यसाधनयोरित्यस्य त्रिष्वेवान्वयः । आदिना साध्यसमानाधिकरणभिन्नत्वादेः परिग्रहः । पक्षतानिवेशे वैयर्थ्यादाह पक्षपदं चेति । बाधप्रतिरोधयोर्वारणार्थं तात्पर्यार्थमाह तथा चेति । तथा च प्रकृतहेतुकसाध्यानुमितिसामान्यविरोधिरूपवत्त्वमर्थः । हेतोः साध्याभाववद्वृत्तित्वादिग्रहे कुत्रापि तद्धेतुकसाध्यानुमित्यनुदयात्साधारण्यादौ लक्षणसङ्गतिरिति भावः । असाधारण्ये लक्षणं ग्राह्यति साध्यव्यापकेत्यादि । तथा तद्धेतुसाध्यकानुमितिसामान्यविरोधि । हेतोस्तादृशप्रतियोगित्वग्रहे कुत्रापि तद्धेतुकतत्साध्यकानुमित्यनुदयान्मणिमन्त्रादिन्यायेनैव तद्ग्रहस्य तथात्वमित्यभिमानः । वस्तुतो यद्यद्धर्मिकयादृशरूपविशिष्टप्रकृतहेतुमत्तानिश्चयत्वं तत्तद्धर्मिकतत्साध्यतद्व्याप्यप्रकृतहेतुमत्तानुमितिप्रतिबन्धकतानतिरिक्तवृत्ति तादृशरूपवत्त्वं यद्धर्मिवृत्तित्वमित्यादेरर्थ इति साध्यव्यापकीभूताभावप्रतियोगित्वज्ञानस्य मणिमन्त्रादिन्यायेनाविरोधित्वेपि तत्र लक्षणं सुघटमेवेति ध्येयम् । धर्मिविशेषितत्वात् तत्तद्धर्मिकसाध्यानुमितिं प्रत्येव विरोधित्वात् । न तादृशौ न प्रकृतहेतुकसाध्यानुमितिसामान्यविरोधिनौ । ननु सर्वं गगनवद्वाच्यत्वादित्यस्य बाधे प्रतिपक्षे च गगनाभाववत्सर्वादावतिव्याप्तिः तस्यापि प्रकृतहेतुकसाध्यानुमितिसामान्यविरोधित्वादत आह साध्यवत्त्वग्रहेति । साध्यवत्त्वांशग्रहे-

व्यावृत्तिर्वा । तेनैव रूपेण ज्ञातस्य प्रतिबन्धकत्वात् परस्य तथैवोद्भावनाच्च लक्षणानुरोधेन प्रत्येकमेव हेत्वाभासत्वम् ।

मितिसामान्यविरोधित्वं वा विशेषणम् । तेनैवेति । तेन अनुमिति-विरोधिना विपक्षवृत्तित्वादिनाऽएवकारेणानुगमकं रूपं व्यवच्छिद्य तस्य हेत्वाभासतावच्छेदकत्वं निरस्यति हेत्वाभासलक्षणानुरो-

---

त्यर्थः । तथा च विरोध्यन्तभागेनैव तद्धारणमिति भावः । ननु साध्यवत्त्वांशे निर्द्धर्मितावच्छेदके साध्यवदवृत्तित्वस्य ग्रहे सर्वं साध्याभाववदिति निश्चयस्य विरोधित्वे मानाभावः किञ्चिद्धर्मावच्छिन्नविशेष्यताकग्रहं प्रत्येव बाधादिनिश्चयस्य विरोधित्वादत आह साध्येति । प्रकृतसाध्यकानुमितिसामान्येत्यर्थः । तेन सर्वं गगनाभाववदित्यादिबोधस्य द्रव्यत्वादिप्रकारेण गगनानुमितेरविरोधित्वेपि न तत्रातिव्याप्तिः । व्यभिचारादेस्त्वन्यहेतुकसाध्यानुमित्यविरोधित्वादेव संग्रह इति भावः । यद्यपि सर्वं गगनाभाववदिति ज्ञानस्य घटो गगनवानित्यनुमितिविरोधित्वाभावादनुमितिसामान्याविरोधित्वमस्त्येव, तथापि मणिमन्त्रादिन्यायेन तज्ज्ञानस्य प्रतिबन्धकत्वं समानविशेष्यतया वा प्रतिबन्धकत्वमित्याशयः । तत्पदेन त्रितयानुगमकधर्मस्य परामर्शे तज्ज्ञानस्याऽनुमित्यप्रतिबन्धकत्वादसङ्गतिरतो विरोधिनं परामृशन्नाह अनुमितिविरोधिनेति । तदेव विवृणोति विपक्षेत्यादिना । ननु विपक्षवृत्तित्वभिन्नेन स्वरूपासिद्धित्वरूपेणापि ज्ञानस्यानुमितिप्रतिबन्धकत्वात्तेनैवेति मूलमसङ्गतम्, एवं विपक्षवृत्तित्वादिप्रत्येकभिन्नस्यापि स्वरूपासिद्धत्वात्प्रत्येकमेव हेत्वाभासत्वमित्यादिमूलं तथेत्यत आह एवकारेणेति । तेनैवेत्येवकारेणेत्यर्थः । अनुगमकं रूपं व्यवच्छिद्येति । अनुगमकरूपवत्तया ज्ञातस्यानुमितिप्रतिबन्धकत्वा-

यद्वा साध्यवन्मात्रवृत्त्यन्यत्वे सति साध्याभाव-वन्मात्रवृत्त्यन्यत्वम् । तेनासाधारणस्य साध्यतदभावोपस्थापकतया दूषकत्वपक्षे नाव्याप्तिः । न चैवमाधिक्ये विभागव्याघातः, स्वरूपसताऽनुगतरूपेण त्रयाणामेकीकृत्य महर्षिणा विभागकरणात् । न चैवं साध्याभाव-ज्ञापकत्वेन बाधप्रकरणसमयोस्तदज्ञापकतयान्येषामुपसं-

---

धेनेति । तेनानुमितिविरोधित्वघटितलक्षणकरणेन असाधारणस्य सत्प्रतिपक्षोत्थापकतया दूषणत्वपक्षे नाव्याप्तिरितरथा पुनरव्याप्ति-

---

भावं प्रतिपाद्येत्यर्थः । तस्य त्रितयानुगमकरूपस्य । हेत्वाभासत्वावच्छेदकत्वम् अनुमितिविरोधितावच्छेदकत्वम् । तथा च विपक्षवृत्तित्वादिप्रत्येकरूपेण ज्ञानस्याऽनुमितिप्रतिबन्धकत्वाद्धेत्वाभासलक्षणानुरोधेन तत्प्रत्येकस्यानुमितिप्रतिबन्धकतावच्छेदकत्वं प्रत्येकरूपभिन्नेन त्रितयानुगमकरूपेण ज्ञानस्यानुमित्यप्रतिबन्धकत्वान्न त्रितयानुगमकरूपस्यानुमितिप्रतिबन्धकतावच्छेदकत्वमिति तेनैवेत्यादिसंवलितमूलस्याऽर्थ इति भावः । विपक्षवृत्तित्वादिप्रत्येकधर्मस्यानुमितिप्रतिबन्धकत्वं न वस्त्वन्तरस्य लक्षणानुरुद्धमतो हेत्वाभासपदं पूरायत्वा धत्ते हेत्वाभासलक्षणानुरोधेनेति । इदन्तु चिन्त्यते । पक्षवृत्तित्वाविशेषितस्य साध्यव्यापकीभूताभावप्रतियोगित्वादिमात्रस्य हेत्वाभासतावच्छेदकत्वाभावेन तन्मात्रस्याऽसाधारण्यस्वीकारो नोचित इति । ननु यथाश्रुतस्य तेनेत्यादिमूलस्य द्वितीयादिलक्षणास्वरसव्यञ्जकत्वे सन्दर्भविरोधः प्रथमत एवाऽस्वरसमुद्भाव्य लक्षणान्तरावतारस्य साम्प्रदायिकत्वादतः पूर्वलक्षणेऽस्वरसव्यञ्जकतयैव व्याचष्टे तेनेत्यादि । साध्यतदभावोपस्थापकस्य निश्चितसाध्यतदभाववद्वृत्त्यावृत्तत्वादेरनुमितिविरोधित्वासम्भवादाह सत्प्रतिपक्षोत्थापकतयेति । सत्प्रतिपक्षः पक्षधर्मिकसाध्यव्यापकीभू-

ग्रहः कुतो न कृत इति वाच्यम्। स्वतन्त्रेच्छस्य नियोगपर्य्यनुयोगानर्हत्वात् ॥

रेव। साध्याभावज्ञापकत्वेन साक्षात्साध्यवत्तानुमितिविरोधित्वेन ॥

ताभावप्रतियोगिहेतुमत्तापरामर्शः। तदुत्थापकतया। विशेषणज्ञानविधया तदनुकूलत्वेनेत्यर्थः। तेन साध्यव्यापकीभूताभावप्रतियोगितामात्रस्य पक्षधर्मताघटितसत्प्रतिपक्षाद्यनात्मकत्वेपि न क्षतिः। अन्यथा प्रागुक्तलक्षणादरे। तथा च साध्यव्यापकीभूताभावप्रतियोगित्वरूपासाधारण्यस्य साध्यसन्देहजनकतावच्छेदकत्वाभावादाद्यलक्षणस्य तत्राऽव्याप्तिरतो विरोधित्वघटितं द्वितीयं लक्षणमाहृतमिति भावः। तादृशविशिष्टविषयत्वेन साध्याभावानुमितिजनकत्वं तादृशविशिष्टत्वमेव साध्याभावज्ञापकत्वं तच्च न बाधस्येत्यतो व्याचष्टे साध्याभावेत्यादि। साक्षात्पदं साध्याभावावच्छेदकीभूतधर्मवत्त्वस्य वारणाय ॥

इति श्रीजगदीशतर्कालङ्कारविरचितायामनुमानदीधितिव्याख्यायां सव्यभिचारग्रन्थः समाप्तः।

चिन्तामणेः साधारणः ।

तत्र साधारणत्वं न साध्याभाववद्गामित्वम् । सर्व्वमनित्यं मेयत्वादित्यनुपसंहार्य्ये भूर्नित्या गन्धवत्त्वादित्यसाधारणे संयोगादिसाध्यकद्रव्यत्वे चातिव्याप्तेः । अत एव न साध्यवत्तदन्यवृत्तित्वम् । नापि निश्चितसाध्यवत्तदन्यवृत्तित्वम् । साध्यवदन्यवृत्तित्वस्य दूषकत्वेन शेषवैयर्थ्यात् । अत एवामुकेनायमनैकान्तिक इत्येवोद्भाव्यते तत एव वादिनिवृत्तेश्च, न तु सपक्षगतत्वमपि ।

दीधित्याः साधारणः ।

सर्वमनित्यमित्यादि सम्प्रदायमनुरुध्योक्तम् । अत एव ताव्ग्रेऽन्तर्भावयिष्यति । नापीति । निश्चिते साध्यवति साध्यवद्भिन्ने च

जागदीश्याः साधारणः ।

ननु मणिकृन्मते सर्वमनित्यं प्रमेयत्वादित्यादेर्लक्ष्यत्वात्तत्राऽतिव्याप्त्यभिधानमसङ्गतमत आह सम्प्रदायेति । ताविति । सर्वमनित्यं प्रमेयत्वात् भूर्नित्या गंन्धवत्त्वादित्येतावित्यर्थः । अग्रे सिद्धान्ते । ननु निश्चितत्वं यदि साध्यवद्भिन्नेष्यन्वितं तदाऽनुपसंहार्यो ऽयावर्त्य इत्यादिनाग्रे सपक्षगतत्वांशस्य सार्थकत्वशङ्का विरुध्येत साध्यवद्भिन्नत्वनिश्चयाप्रसिद्ध्यैवानुपसंहारितादशावामतिव्या-

अनुपसंहार्य्यो व्यावर्त्योऽन्यथा तस्यैतद्विशेषत्वापत्तिरिति चेत्, त्यज तर्हि तमधिकं ल्कृप्तेऽन्तर्भावात् । नापि सपक्षविपक्षगतत्वम्, व्यर्थविशेषणत्वात् । विरुद्धो व्यावर्त्य इति चेन्न । विपक्षगामित्वस्यैव दूषकत्वे तस्याप्येतदन्तर्भावात् । अथ पक्षान्यसाध्यवत्तदन्यवृत्तित्वं साधारणत्वम्, तेन सर्वमनित्यं मेयत्वादित्यनुपसंहार्य्ये नातिप्रसङ्गः, न च व्यर्थविशेषणता, घटोऽनित्यो घटाकाशोभयवृत्तिद्वित्वाश्रयत्वादित्यनुपसंहार्य्यस्य विरुद्धस्यानैकान्तिकभिन्नस्य व्यवच्छेद्यत्वादिति चेन्न । दूषक-

---

वर्तमानत्वमित्यर्थः । अनुपसंहार्य्य इति । साध्यवदन्यवृत्तित्वांशस्य तत्रापि सत्त्वादिति भावः । नापीति । इह सपक्षत्वं न निश्चयगर्भमतो नाभेदः । घट इत्यादि । इत्यस्य विरुद्धस्य, अनुपसंहार्य्यस्य, प्रसिद्धस्य च विरुद्धान्तरस्य व्यवच्छेद्यत्वादित्यर्थः

प्यसम्भवादतः तदनुरोधेन साध्यवन्मात्रान्वयितया निश्चितत्वं व्याचष्टे निश्चिते साध्यवतीति । अत एव अनुपदं वक्ष्यति साध्यवदन्यवृत्तित्वांशस्येति । केचित्तु निश्चितसाध्यवत्तदन्यत्वमित्यत्र तदन्यत्वे यदि निश्चितसाध्यवत्त्वावच्छिन्नभिन्नत्वं तदा पक्षे साध्यसन्देहदशायां पर्वतो वह्निमान्धूमादित्यत्र सङ्केतावतिव्याप्तिरतः साध्यवन्मात्रान्वयितया निश्चितत्वं व्याख्यातमित्यप्याहुः । ननु यदि सपक्षत्वं निश्चितसाध्यवत्त्वं तदा पूर्वलक्षणाभेद इत्यत आह इहेति । तथा च साध्यवद्वृत्तित्वे सति साध्यवदन्यवृत्तित्वमेव तस्यार्थ इति भावः । इह विपक्षत्वं निश्चयगर्भमित्यपि क्वाचित्कः पाठः । अनुपसंहारिसामान्यस्यैव व्यावर्तनसम्भवे घटपक्षकोक्तद्वित्वपर्यन्तानुसरणानौ-

ताप्रयोजकरूपभेदमन्तरेण भेदस्यैवानुपपत्तेः । साध्यवद्वृत्तित्वे सति सर्वसाध्यवदन्यवृत्तित्वमित्यपि न, व्यर्थविशेषणत्वात् एकव्यक्तिकसाध्ये तदभावाच्च । एतेन हेत्वाभासान्तरव्यवच्छेदकं लक्षणान्तरेऽपि विशेषणं व्यर्थमिति ।

अन्वयतो व्यतिरेकतश्च सहचाराग्रहदशायामीदृशं द्वित्वमनुपसंहारीति मतेनेदमिसपि कश्चित् ।

चित्यं सर्वपक्षकव्यभिचारिहेतोरेवानुपसंहारितयोक्तस्य तथात्वायोगाच्चेत्यतो मूलमन्यथा योजयति इत्यस्येति । तथा च इतिशब्दो लुप्तषष्ठिक इति भावः । दूरस्थमलक्ष्यताप्रयोजकं विशेषणमासन्नीकरोति विरुद्धस्येति।अनवगतसाध्यसहचारकत्वे सति साध्याभावसहचरितस्यैव प्राचीनमते विरुद्धत्वादिति भावः । न्यूनतामपाकर्तुं पूरयति प्रसिद्धस्य च विरुद्धान्तरस्येति । साध्याभावव्याप्यात्मकस्य गोत्वादिसाध्यकाश्वत्वादेरित्यर्थः । व्यवच्छेद्यत्वादिति । सर्वमनित्यमित्यनुपसंहार्ये पक्षान्यत्वाप्रसिध्या विरुद्धद्वये पक्षान्यसाधर्म्यवृत्तित्वविरहेण तेषां व्यावर्तनीयत्वादिति भावः । ईदृशं द्वित्वम् । अनित्यत्वसाध्यकघटाकाशवृत्तिद्वित्वमित्यर्थः । व्याप्तिग्रहानुकूलैकधर्म्युपसंहाराभावदशायामुक्तद्वित्वस्यापि अनुपसंहारिताया मणिकृतैव तद्ग्रन्थे वक्ष्यमाणत्वादिति भावः । केवलान्वयिधर्मावच्छिन्नपक्षताकस्यैव हेतोरनुपसंहारित्वादुक्तद्वित्वमनुपसंहार्यमेव नेत्याद्यस्वरसः कश्चिदित्युक्त्या सूचितः ॥

इति जागदीश्यां साधारणपूर्वपक्षः समाप्तः ।

उच्यते । विपक्षवृत्तित्वं साधारणत्वम् । तन्मात्रस्य दूषकत्वात् । विरुद्धस्यापि तत्त्वाज्ञाने विपक्षवृत्तिताज्ञानदशायां साधारणत्वम् । अन्यथा तस्य हेत्वाभासा-

---

विपक्षेति । अत्र विपक्षत्वं साध्याभाववत्त्वम् । अनुपदमेव वस्तुगत्या साध्याभाववदवृत्तित्वेन साधारण इति मूल एव स्फुटतरमभिधानात् । न तु निश्चयगर्भम्, तज्ज्ञानस्याप्रतिबन्धकत्वात् । न च वस्तुतो यत्र तन्निश्चयस्तदवृत्तित्वज्ञानं प्रतिबन्धकम्, रूपान्तरेण साध्याभाववत्तया निश्चिते रूपान्तरेण हेतुज्ञानेऽप्यप्रतिबन्धात्, न चैकेन रूपेण तत्तथा, गौरवात् हेतुसाध्याभावयोः सामानाधिकरण्यास्फुरणेनाऽविरोधात् साध्याभाववदवृत्तिर्हेतुरित्यादिशाब्द-

---

निश्चयगर्भमिति । साध्याभाववत्तानिश्चयविशेष्यवृत्तित्वमित्यर्थः । तज्ज्ञानस्य निश्चयज्ञानस्य । ननु तद्धर्मिकसाध्याभाववत्तानिश्चयात्मकतद्धर्मिवृत्तिताज्ञानमेव विरोधि वाच्यमित्याशङ्क्य निषेधति न चेति । रूपान्तरेणेति । तथा च जलह्रदो निर्वह्निः द्रव्यवृत्तिश्च धूम इति ज्ञानादपि धूमे वह्निव्याप्तिधीप्रतिबन्धापत्तिरिति भावः । न चेति । तत्तद्धर्मावच्छिन्नविशेष्यकसाध्याभाववत्तानिश्चयात्मकतत्तद्धर्मावच्छिन्नवृत्तिताज्ञानं न प्रतिबन्धकं तत्तद्रूपमन्तर्भाव्याऽनन्तप्रतिबन्धकत्वकल्पने गौरवादित्यर्थः । ननूक्तगौरवं प्रामाणिकमित्यत आह हेत्विति । तथा च ह्रदो निर्वह्निर्धूमश्च ह्रदवृत्तिः इत्यादिज्ञाने हेतुसाध्याभावयोर्वैशिष्ट्याभानात्तस्य विरोधित्वं न सम्भवतीति भावः । ननु साध्याभावविशिष्टतत्तद्धर्मावच्छिन्नवृत्तिताज्ञानमेव विरोधि वाच्यं तथा च निर्वह्निह्रदवृत्तिर्धूम इत्यादिज्ञानमेव तथेति तत्र हेतुसाध्याभावसामानाधिकरण्यावगाहित्वमप्यक्षतमेवेत्यत आह साध्याभाववदवृत्तिरिति । साध्यशून्यवृत्तिरित्यर्थः । यथाश्रुते मतुबर्थाधिकरण-

न्तरतापत्तेः। उपाधेरसङ्कर एव। सर्वमनित्यं मेयत्वादित्यनुपसंहारी शब्दो नित्यः शब्दत्वात् भूर्नित्या गन्ध-

---

ज्ञानानामप्रतिबन्धापाताच्च। यत्तु साध्याभावांशे निश्चयरूपं शेषांशे संशयसाधारणं साध्यभाववदवृत्तित्वज्ञानं प्रतिबन्धकम्, अन्यथा पक्षे एव साध्यसन्देहेन सन्दिग्धानैकान्तिकत्वापत्तेरिति, यदाहुः न हि पक्षे पक्षसमे वा व्यभिचार इति।तन्न। व्याप्तिनिश्चये हेतौ व्यभिचारसंशयायोगात्, तदनिश्चयदशायाम् अनुकूलतर्का-

---

त्वादिविशिष्टे साध्याभावस्य निश्चयसम्भवेपि नासङ्कत्यापत्तिः। तादृशप्रत्यक्षे साध्याभावांशे धर्मितावच्छेदकस्यापि भानसम्भवान्नियतविषयकस्य शाब्दस्याऽनुसरणम्। तथा च तादृशशब्दस्य प्रतिबन्धकत्वानुरोधात्साध्याभाववदवृत्तिताज्ञानत्वेनैव तथात्वं न तु साध्याभावविशिष्टतत्तद्धर्मावच्छिन्नवृत्तिताज्ञानत्वेन, गौरवात्। न चैवं निर्वन्हिह्रदवृत्तिर्धूम इत्यादिज्ञानस्य ह्रदवृत्तित्वांशे भ्रमत्वग्रहेपि व्याप्तिग्रहप्रतिबन्धापत्तिः, फलबलेन विरोधितानवच्छेदकतत्तदर्थघटितताप्रामाण्यज्ञानस्याप्युत्तेजकत्वादिति भावः। मिश्रमतमुपन्यस्यति यत्त्विति। शेषांशे साध्यभाववदवृत्तित्वांशे। अन्यथा साध्याभाववत्त्वांशे निश्चयानपेक्षणे। पक्ष एवेति। साध्यस्य तदभावस्य वाऽधिकरणे पक्षे वर्त्तते हेतुरिति ज्ञानस्य तदानीं सत्त्वादिति भावः। न हीति। प्रतिज्ञाया विषये अविषये वा सन्दिग्धसाध्यके व्यभिचारधीर्न दोषायेत्यर्थः। पक्षतावटकसन्देहप्रयुक्तं सन्दिग्धानैकान्तिकत्वं व्याप्तिनिश्चयदशायामापद्यत तदनिश्चयदशायां वा, नाद्य इत्याह व्याप्तीति। अयोगादिति। व्याप्तिनिश्चयेनैव तस्य प्रतिबन्धादिति भावः। द्वितीये त्वाह तदनिश्चयेति। व्याप्त्यनिश्चयेत्यर्थः। व्याप्तिग्राहकानुकूलतर्कविनाकृतस्यैव व्यभिचारसंशयस्य व्याप्तिग्रहविरोधित्वमित्याशयेनाह अनुकूलेति। ननु हेतुधर्मिकवृत्तित्व-

वत्त्वादित्यसाधारणश्च वस्तुगत्या साध्याभाववद्वृत्तित्वेन साधारणोऽपि पक्षतादशायाम् उद्भावयितुं न शक्यत इत्युभयोर्भेदेनोपन्यासः ॥

स्फूर्त्तौ सन्दिग्धानैकान्तिकत्वस्येष्टत्वात्, हेतुसाध्याभावसामानाधिकरण्यावगाहितयैव ज्ञानस्य व्याप्तिग्रहप्रतिबन्धकत्वात् अत एव पक्षः साध्यातिरिक्तपक्षधर्मातिरिक्तधर्मवान् मेयत्वादिसादयोऽनुकूलतर्कविरहिणो बाधप्रतिरोधयोरनवतारेऽपि पक्ष एव सन्दिग्धानैकान्तिकतया अप्रयोजका गीयन्ते, एवं वन्हिर्दाहानुकूलेऽयादयः शक्तिसाधका अपि । अन्यथा पक्षातिरिक्ते सर्वत्र साध्यवत्तानि-

---

प्रकारतानिरूपितसाध्याभाववत्त्वमात्रावच्छिन्नप्रकारताकज्ञानत्वेनैव व्यभिचारज्ञानस्य व्याप्तिधीप्रतिबन्धकत्वात् साध्याभाववत्त्वांशे संशयाकारस्य तस्य विरोधित्वं दुर्घटमत आह हेत्विति । हेतुधर्मिकसाध्याभाववद्वृत्तित्वप्रकारकज्ञानत्वेनैव व्याप्तिधीविरोधित्वं न तूक्तरूपेण, गौरवात्, तच्च साध्याभाववत्त्वांशे संशयाकारस्याप्यक्षतम् । ननु हेतुः साध्याभाववद्वृत्तिरित्याकारस्य साध्याभावाविशिष्टवैशिष्ट्यबोधस्यैव लाघवेन व्याप्तिधीविरोधित्वात् साध्यस्य तदभावस्य वा अधिकरणे पक्षे वर्त्तते हेतुः इत्यादिसंशस्य तथात्वं दुर्घटमत आह अत एवेति । पक्षीयव्यभिचारसन्देहस्यापि विरोधित्वादेवेत्यर्थः । तथा च शब्दो नित्यत्वभिन्नपक्षधर्मातिरिक्तधर्मवान् प्रमेयत्वादित्यादिहेतोरप्रयोजकत्वानुरोधेन गौरवमप्याश्रीयत इति भावः । अनवतारेपीति । अवतारे तु तत एवाप्रयोजकत्वं सम्भाव्येतेति भावः । पक्ष एवेति । पक्षातिरिक्ते सर्वत्रैव साध्यनिश्चयादिति भावः । सर्वसंमतमप्रयोजकत्वमुक्त्वा न्यायमते तमाह एवमिति । वन्हिर्दाहानुकूलाद्विष्ठातीन्द्रियधर्मसमवायी दाहजनकत्वादित्यादयः शक्तिसाधका अप्यप्रयोजका गीयन्ते इत्यन्वयः । आदिना वायुः रूप-

र्णयाद्व्याप्तिग्रहस्य दुर्वारत्वात् पक्षविपक्षान्यतरत्वादिना सर्वत्र सत्प्रतिपक्षप्रसङ्गाच्च। अथ साध्यतद्वदत्यन्तान्योन्याभावगर्भव्यभिचारयोरेकोपादानेऽन्यतराव्याप्तिः, साध्यवत्ताज्ञानप्रतिबन्धकज्ञानविषयत्वेनाभावद्वयानुगमेऽपि हेतुमति तादृशाभाववत्त्वस्य तादृशाभाववति हेतुमत्त्वस्य तादृशाभावे हेतुसामानाधिकरण्यस्य साध्यतद्वदादौ हेतुसमानाधिकरणतादृशाभावप्रतियोगित्वादेश्चासंग्रह इति चेत्। अत्र वदन्ति। प्रकृतसाध्यसाधनसामानाधिकरण्यग्रहाविरोधिनो ज्ञानस्य विषयतया अन्वयव्याप्तिग्रहाविरोधितावच्छेदकत्वेन विभजनान्नाऽसंग्रहः। अविरोधिन इत्यन्तेन साध्याप्रसिद्ध्यादीनां निरासः। यदि पुनरत्यन्तान्योन्याभावयोरेकतरगर्भव्य-

---

वान् स्पर्शवत्त्वादित्यादेरप्युक्तक्रमेणैवाऽप्रयोजकत्वस्य परिग्रहः। अन्यथेति। पक्षीयव्यभिचारसंशयस्याऽविरोधित्वे इत्यर्थः। तादृशपक्षीयव्यभिचारसन्देहस्य व्याप्तिग्रहविरोधित्वे प्रतिबन्दिमप्याह पक्षेत्यादि। तथा च पर्वतो वन्हिमान् धूमादित्यस्यापि पर्वतो न वन्हिमान् ह्रदपर्वतान्यतरत्वादित्यनेन प्रतिरोधः स्यात् पक्षे साध्यसन्देहेऽपि ह्रद एव तादृशान्यतरत्वस्य साध्याभावव्याप्यतानिश्चयसम्भवादिति भावः। साध्यवत्तेति। यादृशाभाववत्तानिश्चयत्वेन साध्यवत्ताग्रहविरोधित्वं तादृशाभावत्वेनेत्यर्थः। तेन साध्याभावव्याप्यवद्वृत्तित्वे नातिप्रसङ्गः। अभावद्वयं साध्यतद्वतोरत्यन्तान्योन्याभावरूपं द्वयम्। तादृशाभाववत्त्वस्येति। साध्यतद्वतोरत्यन्तान्योन्याभाववत्त्वस्येत्यर्थः। एवमाग्रिमेष्वपि। असंग्रह इति। तेषामपि व्यापकताज्ञानविरोधित्वेन साधारणत्वादिति भावः। प्रकृतेति साध्यसाधनयोर्द्वयोरप्यन्वितम्। व्यतिरेकव्याप्तिग्रहविरोधिनोऽनुपसंहारित्वस्य वारणार्थमन्वयपदम्। साध्याप्रसिद्ध्यादीत्यादिना हेत्वप्रसिद्धिविरोधयोरुपग्रहः। ननु अत्रात्यन्तान्योन्याभावयोरेकघटितव्याप्तेः प्रवेशे अन्यघटितसाधारण्ये अव्याप्तिः समानविषयकस्यैव ग्रह-

भिचारज्ञानस्य नान्यतरगर्भव्याप्तिग्रहविरोधित्वम् इत्यादिकं विभाव्यते, तदा साध्यसामानाधिकरण्यघटितत्वेनान्वयव्याप्तयोऽनुगमनीयाः, प्रातिस्विकरूपेणोपादाय वा तावदुव्याप्त्यवगाहित्वं ग्रहस्य वक्तव्यम्। साध्याव्यभिचरितसामानाधिकरण्यस्य व्याप्ये प्रसिद्धस्य हेतौ विरहोऽप्यतद्विशेष एव । विशिष्टसाध्यसाधनवत्त्वग्रहाविरोधिनो ज्ञानस्य विषयतया व्यापकत्वग्रहविरोधितावच्छेदकरूपत्वं वा विभाजकम् । शेषं पूर्ववत् । साध्यतद्वतोरत्यन्तान्यो-

---

स्य विरोधित्वादित्याशङ्क्याह यदि पुनरिति । इत्यादिकमित्यादिपदेनाऽत्यन्ताभावगर्भस्यापि साध्यात्यन्ताभाववदवृत्तित्वस्य ज्ञानं न हेतुमन्निष्ठात्यन्ताभावाप्रतियोगिसाध्यसामानाधिकरण्यरूपात्यन्ताभावगर्भव्याप्तिग्रहप्रतिबन्धकमित्याद्युपग्रहः । ननु साध्यसामानाधिकरण्यघटितत्वं साध्यसामानाधिकरण्याभावस्यापीति तदग्रहप्रतिबन्धकतावच्छेदके साध्यसामानाधिकरण्येऽतिव्याप्तिरत आह प्रातिस्विकरूपेति । ननु साध्यवदन्यावृत्तित्वविशिष्टसाध्यसामानाधिकरण्याभावरूपायां व्याप्यत्वासिद्ध्यादौ अतिव्याप्तिरत आह साध्येति । एतस्य साधारणस्य विशेषः । तथा च सोऽपि लक्ष्य एवेति भावः । व्याप्तिमपेक्ष्य व्यापकत्वस्य लघुत्वात्तद्गर्भं लघुलक्षणमाह विशिष्टसाध्यसाधनवत्त्वेति । अत्राऽविरोधिन इत्यन्तेन साध्यसाधनयोरप्रसिद्धेस्तयोरवृत्तित्वस्य च व्युदासः'। व्यापकत्वग्रहेत्यस्य साध्यधर्मिकेत्यादिः । पूर्ववदिति । अत्रापि नानाविधानि व्यापकत्वान्युपादाय तावदवगाहिग्रहो वाच्य इत्यर्थः । न च हेतुमन्निष्ठाभावीयसाध्यतावच्छेदकसम्बन्धावच्छिन्नप्रतियोगितानवच्छेदकत्वरूपव्यापकताग्रहं प्रति हेतुमन्निष्ठाभावीयप्रतियोगितायां साध्यतावच्छेदकसम्बन्धावच्छेद्यत्वाभावोपि विरोधीति वृत्त्यनियामकसम्बन्धेन साध्यतास्थले तादृशाभावरूपायामसिद्धावतिव्याप्तिरिति वाच्यम् । वृत्त्यनियामकसम्बन्धस्यापि प्रतियोगितावच्छेदकत्वोपगमात्, साध्यतावच्छेदकसम्बन्धेन प्रतियोग्यसम्बन्धिहेतुमत

न्याभावौ साध्याभावव्याप्यादिव्यावृत्तेन साध्यवत्ताज्ञानविरोधित्वेनानुगमय्य तत्र हेतुसामानाधिकरण्याभावग्रहविरोधित्वं साध्यवत्ताज्ञानविरोधिनि तादृशाभावग्रहविरोधिहेत्वाभासतावच्छेदकरूपवत्त्वं वा तथा वक्तव्यम्। साध्याभावव्याप्यादौ तु हेतुसामानाधिकरण्यादिकमविरोधित्वान्नाभासः। विरोधित्वे पूर्वोक्तदिशा-

---

एव वा सर्वत्र व्यापकत्वे निवेशादिति भावः। व्यापकताज्ञानस्यानुमितिहेतुतां खण्डयतां नव्यानां मते लक्षणान्तरमाह साध्यतद्वतोरित्यादिना। व्याप्यादीत्यादिना साध्यव्यापकाभावस्योपग्रहः। व्यावृत्तेनेति। नातः साध्याभावव्याप्यवत्त्वादिनिष्ठे साधनसामानाधिकरण्येतिप्रसङ्गः। ननु यादृशविशिष्टप्रकारकत्वेन प्रकृतसाध्यवत्ताज्ञानत्वावच्छिन्नं प्रति प्रतिबन्धकत्वं तत्त्वमेवात्र साध्यवत्ताज्ञानविरोधित्वं वाच्यम् अन्यथा शशशृङ्गवान् शृङ्गादित्यादौ शशीयत्वाभावस्यापि साध्यतावच्छेदकांशे प्रकृतसाध्यवत्ताज्ञानविरोधितया तन्निष्ठहेतुसामानाधिकरण्येतिव्याप्त्यापत्तेः, एवं च शशीयशृङ्गवान् द्रव्यत्वादित्यत्र शृङ्गाभावनिष्ठद्रव्यत्वसामानाधिकरण्ये अव्याप्तिः शृङ्गसामान्याभावस्य शशीयशृङ्गवत्ताज्ञानत्वावच्छिन्नं प्रत्यविरोधित्वात् शृङ्गवत्ताज्ञानत्वावच्छिन्नं प्रत्येव तस्य तथात्वात्, एवं धूमान्यधूमवान् वन्हेरित्यादौ धूमान्यधूमवत्ताबुद्धित्वावच्छिन्नं प्रति विरोधित्वाप्रसिद्धिरित्यतो लक्षणान्तरमाह साध्यवत्ताज्ञानविरोधिनीति। तथा चात्र साध्यवत्ताज्ञानं प्रति विरोधितामात्रनिवेशान्नोक्ताव्याप्तिः, शशशृङ्गवान् शृङ्गादित्यादौ शशीयत्वाभावस्य साध्यवत्ताज्ञानविरोधित्वेपि तन्निष्ठहेतुसामानाधिकरण्यस्य हेत्वाभासतावच्छेदकत्वाभावादेव नातिव्याप्तिरिति भावः। तादृशाभावेति। हेतुसामानाधिकरण्याभावेत्यर्थः। साध्याभावव्याप्यादेः साध्यवत्ताज्ञानविरोधित्वेपि तन्निष्ठहेतुसामानाधिकरण्यस्य हेत्वाभासतावच्छेदकत्वाभावादेव नातिव्याप्तिरित्याह साध्याभावेत्यादि। अविरोधित्वात् प्रकृतव्याप्तिग्रहाविरोधित्वात्। नाभासो नाभासपदार्थः। तथा च प्रकृतव्याप्तिग्रहविरोधितावच्छेदकत्वमेवात्र हेत्वाभासता-

ऽवसेयम् । उपदर्शितविशिष्टव्याप्तिविरहो व्याप्यत्वासिद्धिरेवेति ।

वच्छेदकत्वमिति फलितम् । तेन धूमासमानाधिकरणकाञ्चनमयत्वाभावविशिष्टः पर्वतः काञ्चनमयवन्हिमान् धूमादित्यादौ साध्यतावच्छेदकांशे प्रकृतसाध्यवत्ताज्ञानविरोधिनि काञ्चनमयत्वाभावे धूमसामानाधिकरण्यस्याश्रयासिद्धित्वेन हेत्वाभासतावच्छेदकत्वेपि नातिव्याप्तिः तस्य प्रकृतहेतुसाध्यव्याप्तिग्रहविरोधित्वादिति ध्येयम् । [इदन्त्ववधातव्यम् । एकव्याप्त्यवगाहिज्ञानविरोधित्वनिवेशे अन्यविधव्यभिचारेऽव्याप्तिः नानाविधव्याप्त्यवगाहिज्ञाननिवेशे साध्यवत्ताज्ञानविरोधिन्यसामानाधिकरण्यग्रहविरोधित्वविशेषणं व्यर्थं तस्माद्धेत्वाभासतावच्छेदकत्वमनुमितिजनकतावच्छेदकविषयतावच्छिन्नप्रतिबध्यतानिरूपितप्रतिबन्धकतावच्छेदकत्वमेव तथा चोक्तस्थले पक्षग्रहाविरोधित्वविशेषणेनैव वारणं बोध्यम् ।] नन्वेवमपि पर्वतः काञ्चनमयपर्वतवान् पर्वतत्वादित्यादौ साध्यतावच्छेदकांशे प्रकृतसाध्यवत्ताज्ञानविरोधिनि काञ्चनमयत्वाभावे पर्वतत्वसामानाधिकरण्यस्य साध्याप्रसिद्धित्वेन व्याप्तिज्ञानाविरोधित्वात्तत्राव्याप्तिरत आह विरोधित्वमिति । विशिष्टसाध्यसाधनवत्ताग्रहाविरोधिनो ज्ञानस्य विषयतया यत्साध्यवत्ताग्रहविरोधिनि हेतुसामानाधिकरण्याभावग्रहविरोधित्वं तदेव प्रवेश्यमतो नोक्तदोष इति भावः । के चित्तु ननु साध्यवत्ताज्ञानस्य विरोधित्वं प्रतिबन्धकत्वं तच्च न साध्याभावादेरित्यव्याप्तिरत आह विरोधित्वमिति । तथा च सव्यभिचारलक्षणे अनुमितिविरोधिसम्बन्धाव्यावृत्तिरित्यत्र यथा विरोधित्वं विरोधिज्ञानविषयत्वं व्याख्यातं तथात्रापीत्यर्थः इत्यप्याहुः । ननु साध्याव्यभिचरितसामानाधिकरण्याभावस्यैतद्विशेषत्वात्तत्रान्तिमलक्षणद्वयाव्याप्तिः तस्य व्यापकत्वग्रहे साध्याभावादिधर्मिकहेत्वसामानाधिकरण्यग्रहे चाऽविरोधित्वादत आह उपदर्शितेति।तथा चात्र कल्पे न तस्य लक्ष्यत्वमिति भावः।व्यभिचारज्ञानाभावसहकृतं सहचारज्ञानं व्याप्तिग्राहकमिति मूलमनुसरतां प्राचां मतमाह व्याप्तीति । व्याप्तिग्रहस्य कारणीभूतो यः सहचारग्रहस्तत्सहकारी योऽभावः तत्प्रतियोगिज्ञानविषयत्वमर्थः । अत्र

व्याप्तिग्रहकारणसहचारग्रहसहचार्य्यभावप्रतियोगिग्रहविषयत्वेनाऽनुगम इत्यपि कश्चित् ॥

प्रतियोगित्वं निश्चयत्वानवच्छिन्नं ग्राह्यम् । तेन व्याप्त्यभावव्याप्यत्वादौ नातिव्याप्तिः । व्याप्तिग्राहकमितिमूले संशयसाधारणेन व्यभिचारज्ञानत्वेनैव व्याप्तिग्रहप्रतिबन्धकत्वोपगमाच्च नासम्भवः । व्याप्तिग्रहविरोधिजिज्ञासाविषये कामिन्यादावतिव्याप्तेर्वारणाय ज्ञानपदम् । अत्र व्याप्तिग्रहकारणीभूताभावप्रतियोगिज्ञानविषयत्वमित्येव सम्यक् कृतं सहचारादिनिवेशनेन, न वा व्यभिचारज्ञानत्वमात्रेण प्रतिबन्धकत्वं निश्चयत्वस्य जन्यतानवच्छेदकत्वादित्यस्वरसः कश्चिदित्युक्त्वा सूचितः ॥

इति श्रीजगदीशतर्कालङ्कारकृतायामनुमानदीधितिव्याख्यायां साधारणग्रन्थः समाप्तः ।

चिन्तामणेः असाधारणः ।

सर्वसपक्षविपक्षव्यावृत्तोऽसाधारणः । ननु सपक्षत्वं न साध्यवन्मात्रत्वं, विपक्षावृत्तेर्वृत्तिमतः साध्यवद्वृत्तित्वनियमात्, नापि पक्षातिरिक्तसाध्यवत्त्वं, शब्दोऽनित्यः शशब्दत्वादित्यादेर्व्याप्तिधीदशायामप्यसाधारणतापत्तेः, न चेष्टापत्तिः, बाधप्रतिरोधौ विना व्याप्तिपक्षधर्मतया ज्ञातादनुमितिनियमादिति चेन्न । सर्वनिश्चितसाध्यवद्विपक्ष-

दीधित्याः असाधारणः ।

—०*०—

प्राचां मतेनोत्तरयति न सर्वेत्यादि । सर्वेति विपक्षेऽप्यन्वेति । तेन साध्याभावन्यूनवृत्तेर्व्युदासः । विपक्षत्वस्य निश्चयगर्भत्वाद् भूरनित्या गन्धवत्त्वाद् नित्यः शब्दः, शब्दत्वा-

अथ जागदीश्याः असाधारणः ।

सर्वनिश्चितेत्यादेरग्रे मणिकृतैव दूषितत्वात्तदुत्तरत्वासम्भवादाह प्राचामिति । तेनेति । रूपं गुणो द्रव्यत्वादित्यत्र गुणत्वाभाववत्कर्मादिव्यावृत्तस्य द्रव्यत्वादेर्व्युदास इत्यर्थः । ननु विपक्षस्यापि सर्वस्य प्रवेशे भूरनित्या गन्धवत्त्वादित्यत्राव्याप्तिः गन्धवत्त्वादेः साध्याभाववत्परमाण्वादिव्यावृत्तत्वाभावादत आह विपक्षत्वस्येति । तथा च भूत्वावच्छेदेन पक्षतायां पार्थि-

व्यावृत्तत्वस्य तत्त्वात्। शब्दत्वानित्यत्वव्याप्तिग्रहे सति शब्दे साध्यनिश्चयान्नातिव्याप्तिः। न च घटोऽयमेतत्त्वादिति सद्धेतावतिव्याप्तिः, साध्यसन्देहदशायां तस्य हेत्वाभासत्वात्। यद्यपि भूर्नित्या गन्धवत्त्वादित्यादिर्वस्तुतः साधारणः, शब्दो नित्यः शब्दत्वादिति विरुद्धः, शब्दोऽनित्यः शब्दत्वादित्यादिः सद्धेतुरेव, व्याप्त्यज्ञानस्य पुरुषदोषत्वादित्युदाहरणाभावादसाधारणो न पृथक्। तथापि पक्षतादशायां साध्यतदभावनिश्चयेन तस्य दोषत्वम्, अन्यथा पक्षत्वभङ्गप्रसङ्गात्।

अथ सर्वसपक्षव्यावृत्तिरेव दोषो न विपक्षव्यावृत्तिरपि, तस्या अनुगुणत्वात् प्रत्युत विपक्ष-

---

दित्यादौ नाव्याप्तिः। पृथिवी रूपवती रसादित्यादौ जलादेर्नीरसत्वभ्रमे पुनरसाधारण्यभ्रम एवेति मन्तव्यम्। तथापीति। पक्षत्वं सन्दिग्धसाध्यकत्वम्।

वपरमाणोरनित्यत्वाभावनिश्चयान्नाव्याप्तिरिति भावः। साधारणसंकीर्णमुक्ता विरुद्धसंकीर्णमाह नित्यः शब्द इति। शब्दो नित्य इत्युक्तावनित्यत्वस्यापि कदाचित्साध्यता प्रतीयेतेत्यतः प्रागेव नित्य इति साध्यस्योल्लेखः। ननु क्षितिः रूपवती रसादित्यादौ रसादेः साध्यवज्जलादिव्यावृत्तत्वभ्रमेपि वस्तुगत्या तद्व्यावृत्तत्वाभावादव्याप्तिरत आह पृथिवीत्यादि। ननु सिध्यभावश्चेत् पक्षता तर्हि तदशायामपि पक्षे साध्याभावनिश्चयसम्भवात् पक्षतादशायामित्याद्यसङ्गतमत आह पक्षत्वमिति।

व्यावृत्तत्वेन व्यतिरेकितया परसाध्यसाधकमेवोपन्यस्तं स्यात् । न च संशायकतया दोषत्वं तच्चोभयव्यावृत्तत्वज्ञानादिति वाच्यम् । व्याप्तिग्राहकं सहचारज्ञानं तदभावद्वारा सपक्षव्यावृत्तिमात्रस्य दोषत्वा-

---

मतं दूषयति अथेत्यादि । व्याप्तीति । तथा च स्वतो दूषणाक्षमत्वान्नाभासत्वम् उपाधिवदिति भावः । एकधर्मिव्यावृत्तत्वञ्च न सामानाधिकरण्यग्रहविरोधि धर्म्यन्तरे तत्सम्भवात्, अन्यथा सतोरपि साध्यसाधनयोर्व्यतिरेकित्वं दोषाय स्यात् । अथायं शङ्कितुरभिप्रायः, पक्षे साध्याभावस्य संशयो निश्चयश्चानुमितिविरोधी विरोधिविषयकत्वात् तत्सामग्री च विरोधिसामग्रीत्वेन, तत्रादिमस्य सामग्रीपक्षे सव्यभिचारस्य हेतोर्ग्रहः

मतमिति । प्राचामित्यनुषज्यते । मूले सपक्षव्यावृत्तिमात्रस्य निश्चितसाध्यवद्व्यावृत्तत्वमात्रस्य । दोषत्वात् अनुमितिप्रतिकूलत्वादित्यर्थः । ननु निश्चितसाध्यवद्व्यावृत्तत्वस्य प्रतिकूलत्वे तस्यैवाभासत्वं किमित्युपेक्षितमतो दीधितिकृदाह तथा चेति । स्वत इति । अनुमितेस्तत्कारणपरामर्शस्य वा साक्षात् प्रतिबन्धाक्षमत्वादित्यर्थः । ननु परामर्शे प्रत्येव साध्यसहचारांशे निश्चितसाध्यवद्व्यावृत्तत्वं विरोधीति तस्याभासत्वं दुर्वारमत आह एकेति । साध्यवत्तया निश्चितयत्किञ्चिद्धर्मिव्यावृत्तत्वं चेत्यर्थः । तत्सम्भवात् सामानाधिकरण्यग्रहसम्भवात् । ननु तत्तद्धर्मान्तर्भावेणैव साध्यसामानाधिकरण्यग्रहं प्रति निश्चितसाध्यवत्तद्धर्मिव्यावृत्तत्वस्य विरोधित्वात्तद्दोषत्व सुघटमत आह अन्यथेति । सतोः समीचीनयोः । तथा च जलाद्यन्तर्भावेण भ्रमात्मकवन्हिधूमसहचारग्रहं प्रति वन्हिधूमयोर्जलादिव्यावृत्तत्वज्ञानं विरोधीति तदपि वन्हिमान्धूमादित्यत्र दोषः स्यादिति भावः । शङ्कितुरिति । साध्यसंशायकतया

द्वितीयस्य तु प्रतिहेतोः परामर्शः अतस्तयोराभासत्वम् । अत एव सव्यभिचारलक्षणे पक्षवृत्तित्वं विशेषणम् । साध्याभाववद्वृत्तित्वमात्रं पुनरसिद्धिरेवेति विरोधान्यस्य परामर्शविरोधिनो रूपस्य तत्त्वादिति । मैवम् । बाधसंशयस्य प्रतिबन्धकत्वानङ्गीकारात् साधारणधर्मवत्ताज्ञानस्य संशयसामग्रीत्वाभावात् सामग्रीत्वेन प्रतिबन्धकत्वे हेत्वाभासत्वायोगाच्च । अन्यथा पक्षस्य साध्यतदभाववद्वृत्तिप्रमेयत्वादिमत्त्वं सर्वत्र हेत्वाभासीभवेत्, तथा कामिनी-

---

सपक्षविपक्षव्यावृत्तत्वस्य दोषत्वं नचेत्यादिना मूलेनाशङ्क्योत्तरित्यर्थः । तत्सामग्रीति । साध्याभावस्य निश्चयसंशययोः सामग्रीत्यर्थः । सामग्रीत्वेनेति । लिङ्गव्यत्ययेन विरोधिनीत्यन्वयः । आदिमस्य साध्याभावसंशयस्य । द्वितीयस्य साध्याभावनिश्चयस्य । सामग्रीति पूर्वेणान्वयः । तयोः सव्यभिचारप्रतिहेत्वोः । अत एवेति । साधारण्यादिविशिष्टतत्तत्पक्षवृत्तितानिश्चयस्यैव तत्तत्पक्षधर्मिकसाध्यसंशयसामग्रीत्वादिति भावः । नन्वेवं साध्यसंशायकस्यैव सव्यभिचारत्वे व्याप्तिग्रहविरोधित्वेन साध्याभाववद्वृत्तित्वमधिकाभासः स्याद्रत आह साध्याभावेति । असिद्धिरेवेति । तस्य व्याप्यत्वासिद्धौ निवेश्यत्वादिति भावः । अनङ्गीकारादिति । तथा च साधारण्यादिविशिष्टहेतुमत्ताज्ञानस्य विरोधिसामग्रीत्वेन अनुमितिप्रतिबन्धकत्वं दुर्घटमिति भावः । ननु साध्याभावज्ञानसामग्रीत्वेनैव तस्य साध्यानुमितिविरोधित्वं वाच्यमत आह साधारणेति । सामग्रीत्वाभावादितिासत्यपि तादृशज्ञाने विशेषदर्शनदशायां साध्यसन्देहानुत्पादादिति भावः । ननु प्रतिबन्धकाभावादिसहकृतसाधारणधर्मवत्ताज्ञानं भवत्येव संशयसामग्रीत्यत आह सामग्रीत्वेनेति । अयोगादितिायादृशविशिष्टविषयकत्वेनानुमितिविरोधित्वं तस्यैव हेत्वाभासतावच्छेदकत्वादिति भावः । अन्यथा सामग्रीत्वेन प्रतिबन्धकतयापि हेत्वाभासत्वं । सर्वत्रेति । सत्यसति चेत्यर्थः । आभासीभवेदिति । असति बाधके पक्षधर्मिकतादृशप्रमेयत्वादिमत्ताज्ञानस्यापि साध्यसन्देहसामग्रीत्वादिति भावः । साधनत्वादिकमपीति । आ-

त् । किञ्च शब्दोऽनित्यः शब्दत्वादित्युक्त्वा निवृत्ते तावन्नेदमुद्भाव्यं न्यूनत्वेनैव वादिनिग्रहात् तदुद्भावने वादिनिवृत्तेश्च, न च न्यूनत्वे तदुपजीव्यम्, असाधारण्यव्यतिरेकेणापि तदुद्भावनात् । न च व्यतिरेकिप्रयोगे तदुपन्यासः, व्याप्तिपक्षतयोरप्रतिक्षेपेऽकिञ्चित्करत्वात्

जिज्ञासाप्रयोजकं तज्ज्ञानेष्टसाधनत्वादिकमपि । एवं विशिष्टस्यानुद्भाव्यत्वं व्युत्पाद्य केवलस्यापि सपक्षव्यावृत्तत्वस्य तथात्वं व्युत्पादयति किञ्चेति । वाद्युपदर्शितदृष्टान्तस्य साधनवैकल्यन्तु ना-

---

भाग्भीभवेदित्यन्वयः । कामिनीजिज्ञासायाः साध्यादिमत्ताज्ञानविरोधित्वेन कामिनीज्ञानधर्मिकेष्टसाधनताज्ञानस्यापि विरोधिसामग्रीत्वेन विरोधित्वसम्भवादिति भावः । वक्ष्यमाणदोषस्य विशिष्ट इव केवलेऽपि सपक्षव्यावृत्तत्वे सम्भवादाह एवमिति । विशिष्टस्य विपक्षव्यावृत्तत्वसहितस्य । तथात्वम् । अनुद्भाव्यत्वम् । मूले निवृत्त इति । वादिनीति शेषः । इदं सपक्षव्यावृत्तत्वरूपम् । हेतुमाह न्यूनत्वेनैवेति । उदाहरणस्य दृष्टान्तशून्यत्वेनैवेत्यर्थः । तथा च शब्दोऽनित्यः शब्दत्वादित्यादौ अन्वयुदाहरणे दृष्टान्तस्याभावादिति भावः । ननु न्यूनत्वस्य न स्वरूपतो निग्रहस्थानप्रयोजकत्वमत आह उद्भावन इति । न्यूनत्वोद्भावने एवेत्यर्थः । तत् असाधारण्यम् । तथा चासाधारणत्वस्य न्यूनत्वप्रयोजकत्वमिति भावः । असाधारण्येति । तथा च व्यभिचाराच्चाऽसाधारण्यस्य न्यूनत्वप्रयोजकत्वमित्यर्थः । न चेति । व्यतिरेकिप्रयोगे व्यतिरेक्युदाहरणप्रयोगे । तथा च यो यो नित्यत्वाभाववान्स शब्दत्वाभाववान् यथा महाकाल इत्यन्वयदृष्टान्तसत्त्वेन न्यूनत्वाभावादसाधारण्योद्भावनमिति भावः । अप्रतिक्षेपे अप्रतिबन्धे । आकाञ्क्षित्करत्वादिति । उपन्यासस्य फलर-

स्वार्थानुमाने च सर्वसपक्षव्यावृत्तिरेव दोष इत्युक्तमिति।

साधारण्यम्, सपक्षान्तरवृत्तित्वेऽपि तत्सम्भवात्। उद्भावनन्तु तस्य निग्रहस्थानत्वात्, तद्विभाजकसूत्रस्थानुक्तसमुच्चायकचकारेण तस्य समुच्चितत्वात्, उदाहरणस्याभासतामदर्शनायैव वा, आवश्यकश्च प्राचां दृष्टान्तप्रयोग इति भावः। माभूत् परार्थानुमानेऽसाधारण्यं दोषः स्वार्थे तु स्यादत आह स्वार्थेति।

हितत्वादित्यर्थः। ननु यत्र सदृष्टान्तमुदाहरणं प्रयुक्तं तत्रैव न न्यूनत्वं परं तु निश्चितसाध्यवद्दृष्टान्तव्यावृत्तत्वमसाधारण्यमेव दोष इति पञ्चमपरिशिष्टकृतां मतं निरस्यति दीधितौ वादीति। दृष्टान्तस्य साध्यवत्तया निश्चितस्य। सपक्षान्तरेति। हेतोरनुपन्यस्तनिश्चितसाध्यवद्वृत्तित्वेप्युपन्यस्तसाध्यवद्व्यावृत्तत्वसम्भवादित्यर्थः। तथा च सर्वसपक्षव्यावृत्तत्वं दुर्घटमिति भावः। नन्वेवमुपात्तदृष्टान्तस्य साधनविकलत्वोद्भावनं विफलमत आह उद्भावनं त्विति। ननु प्रतिज्ञाहान्यादिद्वाविंशतिभिन्नस्य तस्य निग्रहस्थानत्वे मानाभाव इत्यत आह तद्विभाजकेति। 'हेत्वाभासाश्च यथोक्ताः' इत्येवं निग्रहस्थानविभाजकसूत्रस्थचकारेणेत्यर्थः। तत्रत्यचकारस्योक्तमात्रसमुच्चयार्थकत्वेप्याह उदाहरणस्येति। तथा च यो यः शब्दत्ववान् सोऽनित्यो यथा घट इत्युदाहरणे यथाशब्देन शब्दत्वानित्यत्वयोरुपस्थितावनित्यो घटः शब्दत्ववानित्येवं शाब्दधीरनित्यो घटो न शब्दत्ववानित्युद्भावनदशायां नोत्पद्यत इत्यपेक्षितान्वयसामग्रीवैधुर्यरूपमपार्थकमेव तत्र निग्रहस्थानमिति भावः। ननु दृष्टान्तस्य यदि न्यायघटकत्वं तदा वाद्युद्भावितस्य तस्य साधनवैकल्यमसाधारण्यं वा निग्रहस्थानान्तरं वेति विचारणीयं तदेव तु मणिकारैर्नेष्यते इत्यत आह आवश्यकश्चेति। तथा च प्राचां मते सदृष्टान्त एव न्याय इति भावः। असाधारण्यं सपक्षविपक्षव्यावृत्तत्वरूपम्। स्वार्थेति। परसाध्यानुगुणस्यापि विपक्षव्यावृत्तत्वांशस्य तत्रोपन्यासाभावादिति भावः।

इति जागदीश्यामसाधारणपूर्वपक्षग्रन्थः समाप्तः।

उच्यते । शब्दत्वं साध्यवतस्तदभाववतश्च निवृत्तत्वेन ज्ञातमर्थाद्व्यतिरेकितया वा पक्षे साध्यं तदभा-

---

स्वमते सिद्धान्तमुपक्रमते उच्यत इति । अर्थादिति । व्यतिरेकिमुद्रया अर्थादुभयं साधयेत्, अर्थवशसम्पन्नमेवोभयसाधकत्वम् उभयसिद्ध्यनुकूलव्याप्त्यादिग्रहादिस्वर्थः । व्यतिरेकितया वेति पाठे अर्थात् अर्थापत्तिविधयेति परमतेन । एवञ्च पक्षधर्मतया ज्ञायमानो हेतुः साध्याभावव्यापकीभूताभावप्रतियोगित्वज्ञानात् साध्यस्य साध्यव्यापकीभूताभावप्रतियोगित्वज्ञानाच्च साध्याभावस्य साधनायोन्मुखो मिथो विरोधेन नैकमपि साधयति । न च शब्दे नित्यत्वानित्यत्वसन्देहे तदुभयव्यापकत्वं शब्दत्वाभावस्य ग्रहीतुमशक्यं व्यापकत्वाभिमतशब्दत्वाभावाभाववच्छब्दवृत्तित्वस्य नित्यत्वानित्यत्वयोः सन्दिह्यमानत्वादिति वाच्यम् । तथात्वेऽपि तादृश-

---

अथाऽसाधारणसिद्धान्तः ।

व्यतिरेकितायामर्थादित्यन्वयासम्भवात् साधयेदित्यत्रैव अर्थादित्यस्य प्रयोजनमाह अर्थादुभयं साधयेदिति। साधयेदित्यत्रार्थापत्त्यंशस्यानपेक्षितत्वादपेक्षितांशं निष्कृष्याह अर्थवशसम्पन्नमिति । उभयसाधकत्वं साध्यतदभावोभयानुमितिस्वरूपयोग्यत्वम् । न्यायनये व्यतिरेकानुमित्यतिरिक्तार्थापत्त्यनङ्गीकरणादाह परमतेनेति। समुदितग्रन्थार्थमाह एवं चेति । साध्यस्येति । साधनायोन्मुख इत्यग्रिमेणान्वयः । न चेति । वाच्यमित्यनेनान्वितम् । ग्रहीतुं निश्चेतुम् । अशक्यमिति। तथा च नित्यः शब्दः शब्दत्वादित्यसाधारणो न स्यादिति भावः । व्यापकत्वेति । साध्यतदभावव्यापकत्वाभिमतो यः शब्दत्वाभावस्तदभाववदित्यर्थः । शब्दत्वाभावे वस्तुगत्या साध्यादि-

वञ्च साधयेत् अविशेषात्, अन्यथा पक्षवृत्तित्वानुपपत्तिरिति साध्यतदभावोत्थापकतया स्वार्थानुमानेऽसाधारणो दोषः । सत्प्रतिपक्षे द्वौ हेतू तथा, अत्र त्वेक एवे-

---

संशयाभावदशायां तथात्वनिश्चये तदुभयव्यापकीभूताभावप्रतियोगिशब्दत्ववत्त्वस्य शब्दे प्रतिसन्धातुं शक्यत्वात् । स्वाश्रयमप्रतीत्यैव प्रतीतस्य सौरभादरभावस्य पानीयपाषाणादौ पृथिवीत्वतदभावसहचारेण तदुभयव्यापकताग्रहे तादृशाभावप्रतियोगिसौरभस्य चन्दनादौ परामर्शे पृथिवीत्वादौ साध्ये तदसाधारण्यस्याऽतिसुलभत्वाच्च । नन्वयं सत्प्रतिपक्ष एव व्याप्तेरन्वयनिरूप्यत्वस्याव्यापकत्वेनाप्रयोजकत्वादित्यत आह सत्प्रतिपक्ष इति । न चैवंविध-

---

व्यापकत्वाभावादभिमतेत्युक्तम् । सन्दिह्यमानत्वादिति । तथात्वेपि शब्दे नित्यत्वसन्देहदशायां शब्दत्वाभावस्य साध्यादिव्यापकत्वानिश्चयेपि । तथात्वनिश्चये शब्दत्वाभावस्य साध्यादिव्यापकत्वनिश्चये । तदुभयेति । साध्यतदभावोभयेत्यर्थः । प्रतिसन्धातुमित्यस्य शब्दे धर्मिणीत्यादिः । शब्दत्वादिजातेराश्रयं प्रतीत्यैव प्रत्यक्षनियमेपि सौरभादेः प्रत्यक्षे नाश्रयस्य भाननियमः तथा च चन्दनं पृथिवीत्वाभाववत् सौरभादित्यत्रैवाऽसाधारणस्थले पक्षे साध्यसन्देहकालेपि साध्यतदभावव्यापकत्वग्रहो हेत्वभावस्य भवतीत्याह स्वाश्रयमित्यादिना । तदसाधारण्यस्य सौरभाद्यसाधारण्यस्य । सत्प्रतिपक्ष एवेति । तथा च सव्यभिचारान्तर्गतत्वानुपपत्तिरिति भावः । ननु साध्याभावान्वयव्याप्तिविशिष्टपक्षधर्मस्यैव सत्प्रतिपक्षत्वान्न साध्यव्यापकाभावप्रतियोगित्वविशिष्टपक्षधर्मत्वस्य तथात्वमत आह व्याप्तेरिति । अव्यापकत्वेनेति।ह्रदो धूमवान् जलत्वात् स धूमाभाववान् वन्ह्यभावादित्यत्र हेतुद्वयस्य व्यतिरेकव्याप्तिग्रहेपि प्रतिपक्षत्वात्तत्रान्वयव्याप्तेरनियामकत्वादित्यर्थः । एवंविधेति। साध्यसाधकतया

ति तयोर्भेदः । असाधारणेन व्यतिरेकिप्रयोगे परस्य सर्वसपक्षव्यावृत्तत्वमात्रमुद्भाव्यं साध्याभावोत्थापकत्वात्, न तु विपक्षव्यावृत्तत्वमपि, प्रतिकूलत्वात् व्यर्थत्वाच्च ।

यद्वा विपक्षव्यावृत्ततया साध्यमिव सपक्षव्यावृत्ततया साध्याभावमपि साधयेदिति दृष्टान्ततया प्रतिबन्धितया वा तदुद्भावनमपि । लक्षणन्तु सर्वसपक्षव्यावृत्तत्वम्, न तु विपक्षव्यावृत्तत्वमपि । व्यर्थविशेषणत्वात् । विरुद्धमप्यनेनोपाधिनाऽसाधारणमेव । अन्यथैतदवगमे विरुद्धत्वाज्ञाने हेत्वाभासान्तरतापत्तेः ॥

भेदेन पृथगभिधानेऽतिप्रसङ्गः, स्वतन्त्रेच्छाया इत्यादेर्ग्रन्थकृतैवाभिधानात् तदभावसाधके तत्साधकत्वभ्रमरूपाशक्तिविशेषसूचनार्थत्वाच्च । सत्प्रतिपक्षसव्यभिचारोभयलक्षणाक्रान्ततया उभयान्तर्भावस्याऽविरुद्धत्वादिस्यपि काश्चित् । सर्वसपक्षेति । सपक्षः सा-

---

वाद्युपन्यस्तहेतोः साध्याभावव्याप्तिविशिष्टपक्षधर्मत्वमसाधारण्यं तदन्यहेतोः तादृशपक्षधर्मत्वं सत्प्रतिपक्ष इत्यभिधाने द्रव्यस्य हेतोः साध्याभावव्याप्तिविशिष्टपक्षधर्मत्वं प्रतिपक्षो गुणादिहेतोस्तादृशपक्षधर्मत्वं तु हेत्वाभासान्तरमित्यपि स्यादित्यर्थः तदुद्भावनगतं पार्थक्यस्य फलमाह तदभावेतितथा च शब्दो नित्यः शब्दत्वादित्यत्र नित्यत्वाभावसाधकस्यैव हेतोर्नित्यतासाधकत्वभ्रमसूचनार्थं हेत्वैक्येनाऽसाधारण्यप्रदर्शनमिति भावः । कस्यचित्सिद्धान्तमाह सव्यभिचारेत्यादि । मिथोविरुद्धाभ्यामेव विशेषधर्माभ्यां विभागस्य सम्प्रतिपन्नत्वान्नेदं युक्तमित्याशयेन कश्चिदित्युक्तम् । सपक्षत्वं न निश्चितसा-

ध्यवान् । पक्षवृत्तित्वे सति साध्यव्यापकीभूताभावप्रतियोगित्व-मित्यर्थः । इदञ्च साक्षादनुमितिविरोधि, विरोधश्च साध्यासामा-नाधिकरण्यादिरूपोऽन्वयव्याप्तिग्रहविरोधीति न साङ्कर्य्यशङ्कापि । साध्यसमानाधिकरणन्तु नासाधारणम् । दशाविशेषे तदभ्रमस्तु पुरुषदोषो व्याप्य इव साधारण्यभ्रमः ।

नवीनाः पुनरेवं वर्णयन्ति । सामग्रीद्वयविरोधेन हेत्वभावस्य साध्यत-दभावव्यापकताग्रहविरोधोऽसाधारणस्य दूषकताबीजम्, तथा हि, वृत्तिमता हेतुना क्वचिदपि वर्त्तितव्यं तत्र चावश्यं साध्यतदभावयो-

---

ध्यवत्त्वं निश्चयांशज्ञानस्याविरोधित्वादतो व्याचष्टे सपक्षः साध्य-वानिति । साध्यवद्वृत्तितामात्रस्य सत्प्रतिपक्षाक्षमत्वात् पूरयति पक्षवृत्तित्वे सतीति। पक्षवृत्तिताघटकसम्बन्धेन साध्यवदवृत्तित्वसा-मान्याभाव एव साध्यवद्वृत्तित्वं वाच्यम्, अन्यथातिप्रसङ्गात्, एवं च रूपं जातिर्गुणत्वादित्यत्राव्याप्तिः सामान्यसमवेतत्वाप्रसि-द्धेरतो व्याचष्टे साध्यव्यापकीभूतेत्यादि । साध्यवत्त्वावच्छेदेन व्या-वृत्तत्वस्यान्वयादेव तादृशार्थलाभ इति भावः । अत्र स्वहेतुकप्र-कृतसाध्यविरोध्यनुमित्यौपयिकव्याप्तिपक्षधर्मतावि शिष्टप्रकृतहेतुत्वे तात्पर्यम्, तेन साध्याभावस्य साध्यवदन्यत्वस्य अन्वयव्याप्तिविशिष्ट-प्रकृतहेतुनिष्ठपक्षधर्मत्वादौ नाव्याप्तिरिति ध्येयम् । ननूक्तरूपस्य वि-रोधघटितत्वात्तेनैव गतार्थतेत्यत आह इदं चेति । तथा च प्रतिब-न्धकभङ्गादेव पृथगाभासत्वमिति भावः । असामानाधिकरण्यादी-त्यादिना साध्यव्यापकाभावप्रतियोगित्वसाध्यसमानाधिकरणभि-न्नत्वादेर्वा परिग्रहः । व्यतिरेकव्याप्तौ साध्यासामानाधिकरण्याप्रवे-शात् तद्ग्रहप्रतिबन्धकत्वासम्भवादन्वयेत्युक्तम् । ननु दशाविशेषे शब्दोऽनित्यः शब्दत्वादित्यस्यापि असाधारणत्वात्तत्र चोक्तरूपस्याऽ-भावाद्व्याप्तिरत आह साध्येत्यादि । तद्भ्रमः निरुक्तासाधारण्यभ्र-मः । पुरुषस्य दोषो न तु हेतोर्दोषः ।

नवीनाः मिश्रादयः । सामग्रीद्वयेति । हेत्वभावे ध-र्मिणि साध्यतदभावव्यापकताग्राहिकयोः सामग्र्योर्मिथो विरो-

रन्यतरेण भवितव्यम् । न च तत्र हेत्वभावः सम्भवति, अतोऽवश्य-मन्यतराव्यापकत्वं तस्य, एवंविधविरोधप्रौव्ये साध्येनतदभावेन च हेत्वभावस्य सहचारज्ञानं नैकतरनिरूपितामपि व्यापकतां ग्राहयति मिथो विरोधात, विरोधिपरामर्शद्वयमिव साध्यतदभावौ, एवञ्च वृत्ति-मत्त्वविशेषितं हेतोर्यावद्विपक्षतपक्षव्यावृत्तत्वं वृत्तिमत्प्रतियोगित्व-विशेषितंवा हेत्वभावस्य यावत्सपक्षविपक्षवृत्तित्वमसाधारण्यमिति ।

धेनेत्यर्थः । विरोधोऽनुपपत्तिः । गगनादेर्हेतुतास्थले तदभावस्य साध्यतदभावोभयव्यापकताग्रहे बाधकाभाव इत्यत उक्तं वृत्ति-मतेति । तत्र हेतुमति । तस्य हेत्वाभावस्य । एवंविधेति । उक्तव्यापकत्वयोरेवंक्रमेण विरोधप्रौव्ये इत्यर्थः । सहचारज्ञानमिति। विरुद्धस्थले सहचारभ्रमण व्यापकताभ्रमदर्शनात् तद्व्यापकतासा-मान्यं प्रत्येव समानविशेष्यताप्रत्यासत्त्या तत्सहचारज्ञानं कारणमि-ति तु प्राग्वद मिश्रैर्व्यवस्थापितमिति भावः । मिथ इत्यस्य व्यापक-त्वग्राहकसामग्र्योरित्यादिः । साध्यतदभावौ । न ग्राहयतीत्यन्वयः । अवृत्तिगगनादेर्यावत्सपक्षविपक्षव्यावृत्तत्वग्रहेपि तदभावस्य साध्य-तदभावोभयव्यापकताग्रहस्योत्पादादुक्तं वृत्तिमत्त्वविशेषितमिति । अत्र यावत्सपक्षविपक्षव्यावृत्तत्वं न यावत्सपक्षविपक्षवृत्तित्वाभावः शब्दो जातिः शब्दत्वादित्यादौ हेतुतावच्छेदकसमवायादिसम्बन्धेन सपक्षविपक्षवृत्तित्वाद्यप्रसिध्याऽव्याप्तिप्रसङ्गात्, किं तु यावत्सपक्ष-विपक्षनिष्ठाभावप्रतियोगित्वं तथासत्येव हेत्वभावस्य साध्यतदभावो-भयसहचारस्य प्राप्तेरिति ध्येयम् । विशिष्टं चेदं प्रकृतहेतुना साध्य-तदभावयोः स्वार्थानुमानस्थले एव दूषणम् । परार्थस्थले तु यावत्स-पक्षव्यावृत्तत्वमात्रं दूषणं तदग्रहादेव हेत्वभावस्य साध्यतदभावव्या-पकताग्रहप्रतिबन्धात् अतएवाऽसाधारणेन व्यतिरेकिप्रयोगे सर्वस-पक्षव्यावृत्तत्वमात्रमुद्भाव्यमिति मणिकृतैव व्याख्यातमिति ध्येयम् । ननु शब्दोऽनित्यः शब्दत्वगगनान्यतरत्वादित्यादौ अन्यतरत्वरूपेण गगनस्याप्यसाधारणत्वं न च तत्र वृत्तिमत्त्वमित्यव्याप्तिरत आह वृत्तिमदिति । इत्थम् । यद्यादिपदान्तर्भावेण । तदेवाह शब्दत्वं य-

योजयन्ति च ग्रन्थमित्थम्, शब्दत्वं यदि साध्यतदभाववद्वृत्त्या वृत्तस्त्वेन तदुभयव्यापकीभूताभावप्रतियोगित्वेन ज्ञातं ज्ञानयोग्यं स्यात् तद्वत् स्यादिति यावत् तदा व्यतिरेकितया तादृशव्यतिरेकप्रतियोगित्वेनाऽर्थात् पक्षे तदुभयं साधयेत् तदुभयसहचरितं भवेत्, व्यापकाभावव्रति व्याप्याभावस्यावश्यम्भावात् अतथाभावे पक्ष-

---

दीति । साध्यतदभाववद्वृत्त्यावृत्तत्वं यदि साध्यतद्भाववन्निष्ठाभावप्रतियोगित्वं तदा न तस्य साध्यतदभावसहचारापादकत्वं साध्यतदभावयोर्न्यूनवृत्तौ व्यभिचारात् अतो व्याचष्टे तदुभयेति । साध्यतदभावोभयेत्यर्थः । ननु निरुक्तप्रतियोगितया ज्ञातत्वमपि साध्यतदभावव्यधिकरणस्य न सम्भवतीति तत्र व्यभिचारतादवस्थ्यमत आह ज्ञानयोग्यमिति । निरुक्तप्रतियोगितया ज्ञानयोग्यत्वमपि तादृशप्रतियोगितातिरिक्तं दुर्वचमित्याशयेनाह तद्वत्स्यादिति । साध्यतदभावव्यापकीभूताभावप्रतियोगितावत्स्यादित्यर्थः । व्यतिरेकिमात्रस्य साध्यतदभावसहचरितत्वाव्याप्यत्वात् तृतीयार्थहेतुत्वासङ्गतेर्व्याचष्टे तादृशेति । साध्यतदभावव्यापकीभूतेत्यर्थः। वाकारशून्यं मूलमभिप्रेत्येदम् । ननु साध्यतदभावव्यापकीभूताभावप्रतियोगिनः साधनस्य विभिन्नाधिकरणे तदुभयसाहचर्यं न क्षतिकरमतः पूरयति पक्ष इति । शब्द इत्यर्थः । तत् उभयं साध्यं तदभावं च । ननु साध्यतदभावयोरेकैकव्याप्तिधीसहकारेण शब्दत्वस्य हेतोः साध्यतदभावोभयसाधकत्वमिष्यत एव सर्वैरतो व्याचष्टे तदुभयसहचरितं भवेदिति । अत्र साध्यव्यापकीभूताभावप्रतियोगि स्यात्साध्याभावसहचरितं स्यात् इति प्रत्येकमेव व्याप्तिः न तु विशिष्टमापादकम्, दृष्टान्तासिद्धेरिति ध्येयम्। ननु पक्षः साध्यतदभावयोर्व्यापकीभूतस्य हेत्वभावस्याभाववानपि स्यात् साध्यतदभावयोरभाववान्न स्यादत आह व्यापकाभाववतीति । अन्यथेतिमूलमधृत्वैव व्याचष्टे अतथाभाव इति । पक्षे हेतोस्तदुभयसहचरितत्वाभाव इत्यर्थः । न्यूनतामपाकर्तुं पूरयति व्याप्तेर्वेति । साध्यतदभावव्यापकीभूताभावप्रतियोगित्वरूपव्यतिरेकव्याप्तेर्वेत्यर्थः । ननु पक्षे तदुभयसहचरितं

धर्मतायां व्याप्तेर्वाऽनुपपत्तिः, न च तथाभावः सम्भवति, न वा पक्षवृत्तित्वं बाधितम्, अतः साध्यतदभावोत्थापकतया तदुभयसिद्ध्यनुकूलविरोधिव्याप्तिद्वयग्राहकव्यतिरेकसहचारद्वयग्रहविषयतया असाधारणो दोषो व्याप्तिद्वयग्रहप्रतिबन्धकः। ननु यदि विरोधिव्याप्तिद्वयं न गृह्यते तदा सत्प्रतिपक्षोच्छेदः गृहीतविरोधिव्याप्तिद्वयहेतुसमुत्थत्वात् तस्येत्यत आह सत्प्रतिपक्ष इति। तत्र हेत्वोर्भिन्नतयाधिकरणभेदेन तथा ग्रहः सम्भवति, अत्र पुनरेकस्मिन् हेतौ तदुभयग्रहो विरुद्ध इत्यर्थः। अत्र चेदं चिन्त्यम्। एवं सपक्षादेर्यावत्त्वविशेषणं व्यर्थम्, दूषकतायामनुपयोगात् व्यभिचाराग्रहमा-

---

भवत्येव शब्दत्वमिति इष्टापत्तिं निरस्यति न चेति। भावाभावयोरेकत्रासत्त्वनियमादिति भावः। पक्षधर्मतानुपपत्ताविष्टापत्तिं निरस्यति न वेति। प्रत्यक्षत एव शब्दत्वहेतोः शब्दवृत्तित्वावगमादिति भावः। यथाश्रुतेन साध्यतदभावोपस्थापकेत्यादिमूलेन साध्यतदभावव्याप्तिग्राहकसामग्रीद्वयविरोधस्याऽप्राप्तेराह तदुभयेति।व्याप्तिग्रहेति। साध्यतदभावोभयव्यतिरेकव्याप्तिग्रहप्रतिबन्धक इत्यर्थः। गृहीतेति। गृहीतं विरोधिनोः साध्यतदभावयोर्व्याप्तिद्वयं ययोः तादृशहेतुप्रयुक्तत्वात् प्रतिपक्षस्येत्यर्थः। तथाग्रहः विरोधिव्याप्तिद्वयग्रहः। यावत्त्वं व्यर्थमिति। क्वचिदेवाधिकरणे हेत्वभावे साध्यादिसहचारस्य तत्र साध्यादिव्यापकताग्राहकत्वसम्भवादिति भावः। नन्वेकसाध्यादिमति हेत्वभावग्रहेप्यन्यत्र तादृशहेतुमत्त्वग्रहदशायां हेत्वभावस्य साध्यादिव्यापकत्वाग्रहादवश्यं हेत्वभावस्य यावत्सपक्षादिवृत्तित्वमेव साध्यादिव्यापकताग्राहकं वाच्यमत आह व्यभिचाराग्रहेति। तथा च व्यभिचारज्ञानस्य स्वातन्त्र्येण प्रतिबन्धकत्वादेव तदानीमुक्तव्यापकत्वाग्रहसम्भवादसाधारण्ये यावत्पदप्रवेशो व्यर्थ इति भावः। ननु न देयमेव यावत्त्वं किं तु हेत्वभावनिष्ठं सपक्षविपक्षव्यावृत्तत्वमेवासाधारण्यं वाच्यमत आह वृत्तिमत्त्वादीति। आदिना वृत्तिमत्प्रतियोगिकत्वापग्रहः। व्याप्तिज्ञानेति। साध्यतदभावोभय-

श्रोपक्षीणत्वात् । वृत्तिमत्त्वादिविशेषितस्यापि चासाधारण्यस्य ज्ञानं न व्याप्तिज्ञानविरोधि, विरोधिविषयकत्वाभावात् उपदर्शित-विरोधस्य तच्छरीरेऽनन्तर्भावाच्च । व्यापकतयोरपि च न स्वतो विरोधः । उपदर्शितरीत्या तदवधारणे चावश्यं व्यभिचारज्ञानमेव प्रतिबन्धकम्, अत एव सत्यपि असाधारण्यज्ञाने एकत्रानुकूलत-र्कावतारे भवति व्याप्तिधीरिति । एतेन तादृशसहचारज्ञानं तुल्य-

---

व्यतिरेकव्याप्तिज्ञानेत्यर्थः । ननु वृत्तिमता कुत्रापि स्थातव्यमित्याद्यु-क्तक्रमेणाऽसाधारण्यं व्याप्तिग्रहविरोध्येवेति तज्ज्ञानं विरोधिविष-यकत्वेनैव प्रतिबन्धकं भविष्यतीत्यत आह उपदर्शितेति । तच्छरीरे असाधारण्यशरीरे । ननु साध्यतदभावोभयव्यापकत्वयोरेकत्र वि-रोधाद्धेत्वभावधर्मिकमिथोविरोधितदुभयसामग्रीत्वेनैव निरुक्तासा-धारण्यज्ञानं तादृशव्यापकताद्वयग्रहं विरुन्ध्यादत आह व्यापकत-योरिति । न स्वत इति । साध्यतदभावव्यापकत्वयोः परस्परभा-वानात्मकत्वादिति भावः । ननु वृत्तिमत्प्रतियोगित्वे सत्यनित्यत्व-व्यापकत्वस्य नित्यत्वाव्यापकत्वेन तादृशनित्यत्वव्यापकत्वस्य चा-नित्यत्वाव्यापकत्वेन नियतत्वात्साध्यतदभावव्यापकत्वयोः विरोधो-ऽवधारणीयः इत्यत आह उपदर्शितरीत्येति । व्यभिचारज्ञानमेवेति । व्यापकत्वाभिमतस्य शब्दत्वाभावस्याभाववत्तया निश्चिते शब्दे व्याप्यत्वाभिमतयोः सन्दिग्धतया व्यभिचारज्ञानमेव शब्दत्वाभावे नित्यत्वानित्यत्वव्यापकताज्ञानप्रतिबन्धकमित्यर्थः । तथा चासाधा-रण्यग्रहस्य तदुभयव्यापकताधीविरोधित्वे मानाभाव इति भावः । अत एवेति । यत एवासाधारण्यज्ञानं न प्रतिबन्धकमत एव एकत्र साध्यस्य साध्याभावस्य वा व्यतिरेकव्याप्तावनुकूलतर्कावतारे हे-त्वभावस्य तादृशव्याप्तिधीरुत्पद्यत इत्यर्थः । एतेनेति । परास्तमित्य-न्वयः । तादृशेति । हेत्वभावधर्मिकसाध्यतदभावसहचारज्ञानमित्य-र्थः । तर्कावतार इत्यस्यैकत्रेत्यादिः । नास्तीति । सतर्कसहचारज्ञान-स्याधिकबलत्वादिति भावः । तर्को न बलं व्याप्त्यग्राहकत्वात् किं तु

बलविरोधिव्याप्तिग्रहसामग्रीत्वेन प्रतिबन्धकं तर्कावतारे पुनस्तुल्यबलतैव नास्तीति परास्तम् । तर्कस्य व्यभिचारशङ्कानिवर्तकत्वेनैवोपयोगित्वात् सामग्रीत्वेन प्रतिबन्धकत्वे हेत्वाभासत्वायोगाच्च । सत्प्रतिपक्षे च विरोधिव्याप्यवत्तानिर्णयत्वेन प्रतिबन्धकत्वं न तु विरोधिसामग्रीत्वेन, बाधावतारे त्वापाततः सत्प्रतिपक्षितत्वेऽपि बाधेन प्रतिहेतोरव्याप्यत्वादिज्ञान एव साध्यानुमित्युदयादिति कृतं पल्लवितेन ॥

व्यभिचारज्ञानाभाव एव तथा, स चेदुभयत्र तदैकत्र तर्कसद्भावेप्युभयत्र व्याप्तिग्रहे बाधकाभाव इत्यभिप्रेत्याह तर्केत्यादि । ननु तुल्यबलव्यभिचारसंशयसामग्रीत्वेन तादृशसहचारज्ञानं साध्यतदभावव्याप्तिधीप्रतिबन्धकमेकत्र तर्कावतारे तु न तुल्यबलत्वं तर्कस्य व्यभिचारधीविरोधित्वादत आह सामग्रीत्वेनेति । अयोगाच्चेति । यद्विषयकत्वेन ज्ञानस्य विरोधित्वं तस्यैव हेत्वाभासत्वादिति भावः। ननु विरोधिनिश्चयसामग्रीत्वेन प्रतिबन्धकत्वेपि यथा सत्प्रतिपक्षस्य हेत्वाभासत्वं तथात्रापि स्यादत आह सत्प्रतिपक्षे चेति।ननु विरोधिव्याप्यवत्तानिश्चयत्वेनैव तत्र विरोधित्वे प्रतिहेतुना साध्यस्य बाधावतारेपि प्रकृतसाध्यानुमितिर्न स्यात् अस्माकं तु साध्याभावानुमितिसामग्रीविरहादेव तदानीं न साध्यानुमितिप्रतिबन्धे इत्यत आह बाधेत्यादि । आपातत इति।बाधेन यावत्प्रतिहेत्वादावव्याप्यत्वादिज्ञानं नोत्पद्यते तावदित्यर्थः । प्रतिहेतुपरामर्शस्य प्रकृतानुमितिविरोधितायां तादृशहेतोरव्याप्यत्वज्ञानस्योत्तेजकत्वे मानाभावः कुत्राप्यकल्पत्वात्, अन्यथा हेत्वाभासलक्षणोक्ततादृशबाधनिश्चयस्यैव तत्रोत्तेजकत्वं किमित्युपेक्षितमित्यतो व्याप्यत्वादीत्यादिपदं प्रतिहेतुपरामर्शस्याऽप्रामाण्यलाभार्थम्। तेनाप्रामाण्यज्ञानाभावविशिष्टस्यैव साध्याभावपरामर्शस्य प्रतिबन्धकत्वादप्रामाण्यज्ञानदशायां च तदसत्त्वान्न साध्यानुमितिप्रतिबन्ध इति भावः।अत्रेदं बोध्यम् । अनुमितित्वादेः प्रत्येकस्य प्रतिबध्यतावच्छेदकत्वे पक्षधर्मिकसाध्यव-

स्तानुमितित्वावच्छिन्नं प्रति पक्षधर्मिकसाध्याभावज्ञानाव्यवहितपूर्व-वर्तिबुद्धित्वपर्यवसितेन साध्याभाववत्ताज्ञानसामग्रीत्वेन प्रतिबन्धकत्वमुचितं लिङ्गादिभेदेन बहुविधैः पक्षधर्मिकसाध्याभावव्याप्यवत्तानिश्चयैस्तथात्वे गौरवात् सत्प्रतिपक्षस्थलेपि संशयाकारस्यैव साध्याभावज्ञानस्योपगमेन तत्सामग्रीसम्भवात्, पक्षधर्मिकसाध्याभावज्ञानाव्यवहितपूर्वत्वं च स्ववृत्तिध्वंसप्रतियोगित्वस्वसामानाधिकरण्योभयसम्बन्धेन तादृशज्ञानवत्त्वम्, अतो नाऽनुगमवार्तापि, स्वत्वस्य परिचायकत्वात्तत्रेति निबन्धकारानुयायिनः।

इति श्रीजगदीशतर्कालङ्कारकृतायामनुमानदीधिति-व्याख्यायामसाधारणग्रन्थः समाप्तः।

चिन्तामणेः अनुपसंहारी ।

अनुपसंहार्य्यो नाऽसत्सपक्षविपक्षः, सिद्ध्यसिद्धि-विरोधात् । नापि केवलान्वयिधर्मावच्छिन्नपक्षकः, केवलान्वयिसाध्यकस्य सद्धेतुत्वात् व्यतिरेकिसाध्यकस्य तु साध्यतदभाववद्गामित्वेन साधारणत्वात् । अन्यथा संशयाहेतुत्वेनाऽनैकान्तिकता न स्यात् । सर्वं क्षणिकं सत्त्वादिति साध्याप्रसिद्ध्या व्याप्यत्वासिद्धमपार्थकं वा,

दीधित्याः अनुपसंहारी ।

केवलान्वयीत्यादि । सद्धेतुत्वं साधारणत्वञ्च केवलान्वयिनः साधनस्य, व्यतिरेकिणस्तु भागासिद्धत्वं साधारणत्वं विरुद्धत्वञ्च

जागदीश्याः अनुपसंहारी ।

ननु सर्वस्य पक्षतायां केवलान्वयिसाध्यकस्यापि घटत्वादेर्न सद्धेतुत्वं भागासिद्धत्वादेवं वन्ह्यादिव्यतिरेकिसाध्यकस्यापि धूमजलत्वादेर्न साधारण्यं सम्भवति, तथापि सर्वत्र व्यतिरेकिसाध्यकस्थले द्रव्यत्वादेर्न तथात्वसम्भवः किं तु केवलान्वयिनः प्रमेयत्वादेरेवेत्याशयेन केवलान्वयिन इत्युक्तम् । न्यूनतां परिहर्तुमाह व्यतिरेकिणस्त्विति । साधनस्यैत्यनुषज्यते । यथासम्भवमिति ।

साध्यप्रसिद्धौ तु साधारणमेव। न च पक्षान्यसाध्यवत्तदन्यवृत्तित्वं पक्षातिरिक्तसाध्याभाववद्वृत्तित्वं वा साधारणत्वम्, व्यर्थविशेषणत्वात्। न च विरुद्धं विशेषणस्य व्यावर्त्यमित्युक्तम्। नाप्यत्यन्ताभावप्रतियोगिसाध्यकत्वे सति केवलान्वयिधर्मावच्छिन्नपक्षकत्वम्, सर्व-

---

यथासम्भवं बोध्यम्। नापीति। केवलान्वयिसाध्यकवारणाय सत्सन्तम्। व्यतिरेकिसाध्यकसद्धेतुवारणाय केवलान्वयीत्यादि। पक्षत्वं साधकबाधकमानशून्यत्वम्। केवलान्वयिसाध्यकेऽपि बा-

---

सर्वस्य पक्षतायां केवलान्वयि साध्यं चेत्तदा व्यतिरेकिणः साधनमात्रस्यैव भागासिद्धत्वं व्यतिरेकि वन्ह्यादिकं साध्यं चेत्तदा द्रव्यत्वादेः साधारणत्वं जलत्वादेर्विरुद्धत्वं धूमादेः सद्धेतुत्वं तु नाशङ्कनीयं, भागासिद्धित्वेनैव तथात्वायोगादिति भावः। केवलान्वयिसाध्यकेति। व्याप्तिनिश्चयदशायां तस्याप्यलक्ष्यत्वादिति भावः। सद्धेतुत्वं निश्चितव्याप्तिकत्वं तेन धूमसाध्यकवन्ह्यादेरपि गृहीतसाध्यसहचारस्याऽवारणान्न न्यूनत्वम् [ननु विरुद्धवारणाय सपक्षवृत्तित्वमिवानुपसंहारिवारणाय पक्षान्यत्वमपि साधारण्यलक्षणविशेषणं देयमेवेत्यत आह मूले न च विरुद्धमिति। उक्तं साधारणग्रंथेतथाच दृष्टान्तासिद्धिरिति भावः]तन्वत्र पक्षत्वं यदि सन्दिग्धसाध्यकत्वं तदा सर्वत्र साध्यसन्देहदशायां केवलान्वयिसाध्यस्याप्यनुपसंहारित्वात्तद्वारणाय सत्यन्तानौचित्यमत आह पक्षत्वमिति। सिद्ध्यभावमात्रस्य पक्षतात्वे व्यतिरेकव्याप्तिमत्तया निश्चितस्यापि वन्ह्यादिसाध्यकधूमादेरनुपसंहारित्वापत्तिरतो बाधकमानप्रवेशः। तथा च कुत्रापि साध्यतदभावयोरनिश्चयदशायामेवानुपसंहारित्वमिति भावः। ननु बाधकमानं साध्याभावस्य निश्चयः तथा च केवलान्वयिनामभावाप्रसिद्ध्या विशेष्यदलेनैव तत्साध्यकस्य

व्रेमभिधेयं मेयत्वादित्यत्र विप्रतिपत्त्या पक्षतादशायां पक्षे साध्यानिश्चयेनाऽनुपसंहारिण्यव्यापकत्वात् । अथ पक्षातिरिक्ते व्याप्तिग्रहानुकूलाप्रतीतसहचारोऽनुपसंहार्य्यः,

---

धकमानाप्रसिद्धिरुक्तैवेति न सत्यन्तवैयर्थ्यम् । निश्चितसाध्याभाववत्तन्मात्रवृत्तित्वे त्वसाधारण्यं विरुद्ध इति साधारण्याद्यग्रहदशायामसाङ्कर्य्यमिति वा हृदयम् । अव्यापकत्वादिति । सद्धेतुत्वञ्च व्याप्तिनिश्चयदशायामेवेति भावः । अथेत्यादि । पक्षातिरिक्ते न प्रतीतो निश्चितो व्याप्तिग्रहानुकूलोऽन्वयेन व्यतिरेकेण वा सह-

---

धारणसम्भवे सत्यन्तभागो व्यर्थ इत्यत आह केवलेति । पक्षधर्मिकसाध्यवत्ताग्रहविरोधिमानमेव बाधकमानं तच्च साध्यादौ पक्षवृत्त्यत्यन्ताभावप्रतियोगित्वाद्यवगाहिनिश्चयरूपमेव सुलभमिति पक्षतायामुक्तत्वादिति भावः । ननु साध्याभाववदवृत्तित्वलक्षणसाधारण्यसाध्याभाववन्मात्रवृत्तित्वलक्षणविरुद्धत्वयोरन्यतरेण सङ्कीर्त्तनादुक्तरूपं नानुपसंहारित्वमत आह निश्चितेति । तथा चानुपसंहारितादशाया साध्याभावस्य कुत्राप्यनिश्चयान्न तार्य्यां सङ्कर इति भावः । नन्वेवं साधारण्यादेर्निश्चयगर्भत्वे नित्यदोषता न स्यादतः कल्पान्तरमाह साधारण्याद्यग्रहेति । तथा च साध्याभाववदवृत्तित्वादेरेव साधारण्यादित्वेऽपि न क्षतिः ज्ञानसाङ्कर्यादेवानुपसंहारिणः पृथक्त्वादिति भावः । ननु सर्वमभिधेयं प्रेमयत्वादित्यत्तस्यानुपसंहारित्वे केवलान्वयिसाध्यकस्य सद्धेतुत्वादिति प्रागुक्तमूलासङ्गतिरत आह सद्धेतुत्वं चेति । अन्यथा लक्षणस्थसत्यन्तदलस्यैव व्यर्थतापत्तेरिति भावः । अप्रतीतेत्यस्य विशेषणत्वात्तदेव पूर्वं निपात्य योजयति पक्षातिरिक्तेत्यादिना । अनुपसंहारितादशायामपि संशयात्मकसहचारप्रतीतिरस्त्येवेत्यत आह न निश्चित इति । व्याप्तिग्रहानुकूलेत्यनुगतोक्तसङ्गत्यं प्रदर्शयति अन्वयेन व्यतिरेकेण वेति । ननु पक्षे गृही-

यदि च पक्षे व्याप्तिग्रहः कथञ्चित्तदा शब्दोपदर्शितव्याप्तिकानुमानवदभेदानुमानत्वञ्च सद्धेतुरेवेति चेन्न। तत्रैव सद्धेतावतिव्याप्तेः, सर्वस्य पक्षत्वे पक्षातिरिक्ताप्रसिद्धेः,

---

चारो यस्य स तथा। सद्धेतुरेवेति। तथा च लक्षणे पक्षातिरिक्तपदं सहचारग्रहस्थलमात्रोपदर्शकं न तु विशेषकमिति। विशेषकत्वाभिप्रायेण दूषणद्वयमाह तत्रैवेत्यादि। असाधारणे सपक्षव्यावृत्ते पक्षतादशायां शब्दोऽभिधेयः शब्दत्वादित्यादौ जलं निःस्नेहं

तव्याप्तिकस्य सद्धेतुत्वेपि पक्षादन्यत्राऽनिश्चितसाध्यसहचारत्वरूपमनुपसंहारित्वं तत्रातिव्याप्तमेवेत्यतो भावार्थमाह तथा चेति। स्थलमात्रेति। मात्रपदं कृत्स्नार्थकमान्न तु विशेषकमितिान विशेषस्य पक्षादन्यत्वस्य प्रापकमित्यर्थः। तथा च पक्षेऽतिरिक्ते चेति द्वन्द्वसमासो निरुक्तिकृतामभिप्रेत इति नातिव्याप्तिरिति भावः। नन्वेवं तत्रैवेत्याद्युत्तरमूलासङ्गतिरत आह विशेषकत्वेति। पक्षातिरिक्तपदस्य पक्षादन्यत्वरूपस्य विशेषस्य प्रापकत्वाभिप्रायेणेत्यर्थः। तथा च पक्षादतिरिक्तः पक्षातिरिक्त इति तत्पुरुषाभिप्रायेण दूषणमिति भावः। ननु शब्दो नित्यः शब्दत्वादित्यसाधारणस्थले अयं गौरश्वत्वादितिविरुद्धस्थले च घटाद्यवच्छेदेनैव व्याप्तिग्रहानुकूलव्यतिरेकसहचारस्य प्रतीतिसम्भवान्नातिव्याप्तिरतः स्थलान्तरे तामाह असाधारण इत्यादिना। सपक्षविपक्षव्यावृत्तत्वं यद्यसाधारण्यं तदा विपक्षत्वाप्रसिद्ध्यैव नातिव्याप्तिरतो व्याचष्टे सपक्षव्यावृत्त इति। निश्चितसाध्यवद्व्यावृत्त इत्यर्थः। पक्षतावि रहे पक्षातिरिक्तपदार्थाप्रसिद्ध्यैव नातिव्याप्तिरतः पूरयति पक्षतादशायामिति। शब्दत्वादित्यादाविति। अतिव्याप्तिरित्यन्वयः। पक्षातिरिक्ते कुत्राप्यन्वयतो व्यतिरेकतो वा सहचारस्य तत्राऽप्रतीतेरिति भावः। साध्यवदव्यावृत्तत्वमेवाऽसाधारण्याह जलमित्यादिना। अत्र निःस्नेहत्वं स्नेहवदन्यत्वं स्नेहव-

असाधारणविरुद्धयोरतिव्याप्तेश्च, दूषकतायां व्यर्थविशेषणत्वाच्च । न च दूषकताऽनैकान्तिकत्वेन न प्रत्येकमिति वाच्यम् । अर्थगत्या व्यर्थविशेषणत्वात् । नापि

शीतस्पर्शवत्त्वादित्यादौ च रूपं जलं वा द्रव्याभिन्नं गुणवत्त्वात् गुणकर्मावृत्तिजातिमत्त्वादित्यादौ विरुद्धे चातिव्याप्तिरित्यर्थः । दूषकतायामिति । सहचाराभावस्यैव ज्ञानं विरोधि न तु तत्प्रत्ययांशस्यापीति । अर्थगत्येति । अनैकान्तिकशब्दार्थविवेचनेन प्रातिस्विकरूपेणैव प्रतिबन्धकत्वव्यवस्थितेरित्यर्थः । केचित्तु दूषकतायामसाधकतायाम्, अर्थेति, अनैकान्तिकशब्दार्थे उभयको-

---

वृत्तिजातिमत्त्वं वा, तेनोत्पत्तिकालावच्छेदेन स्नेहशून्यस्थूलजले जन्यशीतस्पर्शवत्त्वस्य सत्त्वेपि न क्षतिः । असाधारणस्य स्वलविशेषमुक्त्वा विरुद्धस्य तमाह रूपमित्यादिना । अत्र विरोधस्य स्वरूपासिद्धबाधान्यतरसङ्कीर्णतानियमात् स्वरूपासिद्धिसङ्कीर्णविरोधं दर्शयितुं रूपस्य बाधसङ्कीर्णं च तं प्रदर्शयितुं जलस्य पक्षतया निर्देशः । ननु घटादौ उत्पत्तिकालावच्छेदेन गुणवत्त्वस्य हेतोर्व्यतिरेकसत्त्वात् द्रव्याभिन्नत्वाभावाज्जलेव व्यतिरेकसहचारो गृहीतुं शक्यत एवेत्यतो हेत्वन्तरमाह गुणेत्यादि । गुणकर्मावृत्तेः समवायेन हेतुतालाभार्थं जातिपदम् । तत्प्रत्ययेति । सहचारप्रत्ययांशस्येत्यर्थः । तथा च व्याप्तिग्रहानुकूलसहचारशून्यत्वमेवानुपसंहारित्वं युक्तमिति भावः । अनैकान्तिकशब्देति । ऐकान्तिकत्वं साध्यैकनियतत्वं साध्यव्याप्यत्वमिति यावत्, तच्च तद्ग्रहप्रतिबन्धकग्रहविषयत्वरूपतद्विरोधित्वमुपस्थाप्यत इत्यनैकान्तिकशब्दार्थमहिम्ना साधारण्यादिकं प्रत्येकमेव दूषणं प्राप्तमुक्ताऽनुपसंहारित्वस्य च व्यर्थविशेषणत्वान्न तथात्वसम्भव इति भावः । असाधकतेति । अयं हेतुरसाधकोऽनुपसंहारित्वादित्यत्र व्याप्तिग्रहानुकूलसहचाराभावादित्य-

विप्रतिपत्तिविषयमात्रवृत्तित्वम्, केवलान्वयिसाध्यके अव्याप्तेः, सर्वस्य पक्षत्वे मात्रार्थाभावादिति ॥

टचुपस्थापकत्वादौ साध्योपस्थापकत्वाद्यंशस्य व्यर्थत्वादित्यर्थ इत्याहुः। विप्रतिपत्तिः पक्षे साध्याभावप्रतीतिः साध्ये पक्षनिष्ठाभावप्रतियोगित्वप्रतिपत्तिर्वा, आद्ये केवलान्वयीति। साध्याभावाप्रसिद्धया अव्याप्तिरित्यर्थः। उभयत्र सर्वस्येति। अतिव्याप्तेरिति पाठे तन्मात्रवृत्तित्वं तत्त्वव्याप्यवृत्तिकत्वं तदितरावृत्तित्वं वा, आद्ये केवलेति। इदञ्च यथाकथञ्चिद्व्याप्तिग्रहदशायाम्। द्वितीये सर्वस्येति ॥

स्यैव सम्यक्त्वे प्रत्ययांशस्य व्यर्थत्वादिति भावः। साध्योपस्थापकत्वादीत्यादिना साध्याभावोपस्थापकत्वांशस्योपग्रहः। व्यर्थत्वादिति। अयं हेतुरसाधकोऽनैकान्तिकत्वादित्यत्र साध्यसन्देहजनकसाध्यतदभावोपस्थापकपक्षधर्मताज्ञानविषयत्वरूपानैकान्तिकत्वहेतौ साध्योपस्थापकत्वाद्यंशस्य व्यर्थत्वात् साध्यसन्देहजनकसाध्याभावोपस्थापकेत्यादेः साध्यसन्देहजनकसाध्योपस्थापकेत्यादेरेव वा हेतोः सम्यक्त्वात् तथा च प्रत्येकरूपाणामिवाऽनुगतरूपस्याप्यसाधकत्वानुमापकत्वं दुर्घटमिति भावः। अयं हेतुरसाधकोऽनुपसंहारित्वादित्यत्राऽगृहीतसहचारकत्वहेतौ भिन्नधर्मिकत्वाद्व्यर्थशङ्कैव नास्तीत्यस्वरसः केचिदाहुरित्युक्त्वा सूचितः। सर्वस्येत्यादिमूलस्य प्रागुक्ताव्याप्त्युपष्टम्भकत्वे केवलान्वयिसाध्यकत्वपर्यन्तानुसरणवैयर्थ्यापत्तिरतो दूषणद्वयाभिप्रायेण मूलं व्याख्यातुं वितर्कयति विप्रतिपत्तिरिति। उभयत्र साध्याभाववत्त्वस्य पक्षनिष्ठाभावप्रतियोगिस्य वा प्रतीतेः प्रवेशे। इत्थं च मूले मात्रार्थाभावादित्यत्र चकारः पूरणीयः। तत्त्वं विप्रतिपत्तिविषयत्वम्। व्याप्तिस्तु व्यापकसामानाधिकरण्यरूपा ग्राह्या। स्वसत्ताव्यापकंविप्रतिपत्तिविषयताकत्वं तु फलितार्थः। ननु सर्वत्र मेयत्वादेः विप्रतिपत्तिदशायां तत्साध्यस्य

उच्यते । व्याप्तिग्रहानुकूलैकधर्म्युपसंहाराभावो यत्र स हेत्वभिमतोऽनुपसंहारी । स चान्वयेन व्यतिरेकेण वा सर्वस्य पक्षत्वे दृष्टान्ताभावात् घटोऽनित्यो घटाकाशोभयवृत्तित्वाद्घटत्वाश्रयत्वादित्यादौ साध्यसाधनसाहचर्य्याज्ञानात्तस्य विरुद्धत्वाज्ञानदशायामनुपसंहारित्वेनेष्टत्वात्।

व्याप्तीत्यादि । यत्र यस्येत्यर्थः।तथा च हेत्वभिमतशब्दोपसन्दानात् तद्धेतुकप्रकृतसाध्यसिद्ध्यौपयिकव्याप्तिग्रहानुकूलोपसंहाराभावस्तस्याऽनुपसंहारित्वमित्यर्थलाभाद्व्यतिरेकिणि नातिव्याप्तिः।

हेतोरनुपसंहारित्वात्कथं तत्रातिव्याप्तिरत आह इदं चेति । कथञ्चित् आप्तवाक्यादिना ॥

अथाऽनुपसंहारिसिद्धान्तः ।

ननु साध्याभावहेत्वभावयोः सहचारग्रहदशायामपि हेतौ सहचारनिश्चयात्मकस्य तादृशैकधर्म्युपसंहारस्याभाववत्त्वात्तदानीमतिव्याप्तिरत आह यस्येत्यर्थ इति । तथा च यदा यदीयव्याप्तिग्रहानुकूलैकधर्म्युपसंहाराभावः तदैव सोऽनुपसंहारीत्यर्थः । अत्र च व्याप्तिग्रहस्य यदीयत्वं न यद्विशेष्यकत्वं येन यस्येति सप्तम्या अपि तल्लाभसम्भवे यस्येतिषष्ठ्या विवरणासङ्गतिः तथासत्यन्वयव्यतिरेकव्याप्त्योरनुगतधर्माभावादेकमात्रोक्तौ अन्यव्याप्तिग्रहदशायामतिव्याप्त्यापत्तेः किं तु तद्धेतुकप्रकृतसाध्यानुमित्यौपयिकत्वरूपमेव यदीयत्वमुभयव्याप्तिग्रहानुगमकं वाच्यम् । न चैवं हेत्वभिमतपदं व्यर्थं, तदुपसन्धानादेवोक्तार्थलाभादित्यभिप्रेत्याह तथा चेति । तद्धेतुकप्रकृतसाध्यसिद्ध्यौपयिको यो व्याप्तिग्रहः तदनुकूलधर्म्युपसंहाराभावः तस्य हेतोरनुपसंहारित्वमित्यर्थः । अत्र

केवलान्वयिधर्मावच्छिन्नपक्षको वा। सर्वमभिधेयं प्रमेयत्वादितिसद्धेतौ न केवलान्वयी पक्षतावच्छेदकः, निश्चितसाध्यवद्वृत्तित्वात् । विप्रतिपत्त्या साध्यानिश्चयदशायां पक्षत्वे तदनुपसंहार्य्येव । व्यतिरेकिसाध्यके साध्याभाववद्वृत्तित्वाज्ञानदशायामिदं दूषणम्, तदव-

---

ननूपसंहारः सहचारः तन्निश्चयो वा, आद्ये तादृशस्याभावो निखिलप्रसिद्धानुपसंहार्य्यव्यापकः अतिव्यापकश्च रूपं द्रव्यभिन्नं गुणवत्त्वाद्गुणकर्मावृत्तिजातिमत्त्वादित्यादेः, द्वितीये पुनरज्ञानरूपासिद्धिपर्य्यवसायी कारणाभावतया स्वरूपसन्नेव दोषो न हेत्वाभास इयत आह केवलान्वयीति । पक्षः साध्यनिश्चयविरोधिनः

व्याप्तीति स्वरूपकथनमात्रं न तु विवक्षितं वैयर्थ्यादन्वयव्यतिरेकसाधारणव्याप्तित्वस्यैकस्यदुर्वचत्वात् च, साध्यसिद्ध्यौपयिकताविशेषस्य निवेशादेवातिप्रसङ्गभङ्गादिति ध्येयम । व्यतिरेकिणि व्यतिरेकव्याप्तिमत्तया निश्चिते ।

तन्निश्चयो वेति । उभयत्रापि व्याप्तिग्रहानुकूलत्वस्य वक्तुं शक्यत्वादिति भावः । तादृशस्य निरुक्तसहचारस्य । सर्वं निःस्नेहं जलत्वादित्यादेर्विरुद्धस्यापि दशाविशेषे अनुपसंहारित्वात्तत्राव्याप्त्यसम्भवादाह प्रसिद्धेति । तथा च सर्वमनित्यं प्रमेयत्वादित्यादावव्याप्तिरित्यर्थः । अतिव्यापकश्चेति । साध्यहेत्वोस्तदभावयोर्वा तत्र सहचारस्यासम्भवादिति भावः । सर्वस्य पक्षत्वे अनुपसंहारित्वमिष्टमेवेत्यतो रूपस्य पक्षतया निर्देशः । कारणाभावेति । व्याप्तिज्ञानकारणाभावेत्यर्थः । दोषोऽनुमित्यनुत्पत्तिनियामकः । न हेत्वाभासः । तज्ज्ञानस्याऽप्रतिबन्धकत्वादग्रे हेत्वादिमद्धर्मिकसाध्यसन्देहस्य व्याप्तिधीविरोधित्वात्तद्विषयस्यैव अनुपसंहारित्वं वा-

गमेऽपि साधारणसङ्कर एव । एवं व्याप्यत्वासिद्धेर्ज्ञाने ।

साध्यवान्नवेत्यादेः सन्देहस्य विषयः । अवच्छेदकत्वञ्च स्वान्यून-वृत्तितत्कत्वं तच्च स्वरूपसतोऽप्यविरुद्धम् । तेन प्रातिस्विकद्रव्य-त्वादिरूपेण सर्वत्र साध्यसन्देहदशायां नाव्याप्तिः । एवञ्च सर्वत्रैव हेत्वादिमति साध्यतदभावसन्देहाद्व्याप्यग्रहेणाभासत्वम् । परार्थ-स्थले बहिर्भावं व्युत्पादयति एवमित्यादिना । असिद्धिरनिश्चयः ।

त्यमित्यभिमानः । ननु पक्षत्वं यदि साध्यतदभावकोटिकसंशयवि-शेष्यत्वं तदा साध्यवत्तदन्यत्वकोटिकसंशयदशायामव्याप्तिरतोऽनु-गतरूपेण संशयं निवेशयति साध्यनिश्चयेति । साध्यनिश्चयो विरो-धी प्रतिबन्धको यस्य तादृशस्येत्यर्थः । सर्वं वह्निव्याप्यवत् धूमा-दित्यादौ सर्वं वन्हिमन्न वेत्यादिसंशयस्यापि साध्यवत्तानिश्चयप्रति-बध्यत्वात्तदृशायामपि धूमादेरनुपसंहारित्वापत्तिः अतः प्रकृतसाध्य-वैत्तावगाहित्वावच्छिन्नमेव साध्यवत्तानिश्चयप्रतिबध्यत्वं निवेशनी-यमित्यावेदयितुं संशयं विशिष्योल्लिखति साध्यवान्नवेत्यादेरिति । सर्वधर्मिकसाध्यवत्तानिश्चयप्रतिबद्धस्य तादृशसाध्याभावनिश्चयस्य सत्त्वेनुपसंहारित्वाभावादुक्तं संशयस्येति। यद्यपि धर्मान्तरसन्देहा-त्मकस्य साध्याभावनिश्चयस्य ततोप्यवारणं प्रकृतसाध्यसंशयत्वा-भिधाने च नानुगमवार्तापि, तथापि साध्यवत्ताज्ञानाविरोधित्वमे-वात्र संशयत्वं बाधनिश्चयस्तु न तथेति तद्व्युदासः । नन्वेतावता केवलान्वयिधर्मावच्छिन्नतादृशसंशयविशेष्यताकत्वं फलितं तत्र चावच्छेदकत्वं यदि स्वरूपसम्बन्धविशेषः तदा द्रव्यत्वगुणत्वादि-प्रातिस्विकरूपेण सर्वत्र साध्यसन्देहदशायामनुपसंहारिण्यव्याप्तिः तत्र केवलान्वयिधर्मस्य प्रमेयत्वादेः साध्यसन्देहविशेष्यतानवच्छे-दकत्वादत आह अवच्छेदकत्वञ्चेति।स्वं केवलान्वयिधर्मः तद्व्यापकी-भूतताहशविशेष्यताकत्वमर्थः । केवलान्वयिसाध्यकानुपसंहारिस्थले च अभावान्तरे साध्यीयत्वाबाधवगाहिनः सर्वं प्रमेयं न वेत्यादिसंशय-

तदुद्भावने चायं व्यभिचारवदुपजीव्यत्वाददोषः । घटाकाशोभयवृत्तित्वाश्रयत्वञ्च विरुद्धमेव । एतेनाऽनु-

---

ज्ञाने ज्ञापने । स्वार्थस्थलेऽन्तर्भावम् एतेनेत्यादिनाशङ्क्य निरस्यति उपजीव्यत्वादिति । अत्रेदं चिन्त्यम् । हेतुमति साध्याभावसन्देहो नाभासः सत्तयैव विरोधित्वात्, तद्विषयस्तु हेतोः साध्याभावसामानाधिकरण्यं साध्यस्य वा हेतुमन्निष्ठाभावप्रतियोगित्वं नास्त्येव केवलान्वयिसाध्यके, व्यतिरेकिसाध्यके तु साधारण्यरूपतया स-

---

स्यैव तादृशविशेष्यत्वं सुलभमिति भावः। स्वरूपसतः धर्मिण्यप्रकारीभूतस्य । उक्तसंशयस्याभासताप्रयोजकं रूपमाह एवं चेति । हेत्वादीत्यादिना हेत्वभावस्य परिग्रहः । एतेनेत्याद्यग्रिममूलेन पौनरुक्त्यं निरसितुमाह परार्थ इति । नाहिर्भावमित्यस्य व्याप्यत्वासिद्धित इत्यादिः । व्याप्यत्वासिद्धिर्यदि व्याप्यत्वाभावः तदा निरुक्तानुपसंहारित्वस्यानुपजीव्यत्वादसङ्गतिरतो व्याचष्टे असिद्धिरिति । तथा च सहचारनिश्चयाभावस्य कारणभावमुद्रया व्याप्तिनिश्चयाभावोपजीव्यत्वं सुघटमेवेति भावः । परार्थस्थले हेत्वाभासज्ञापनस्यैव उद्देश्यत्वाद्व्याचष्टे ज्ञाने ज्ञापन इति । अन्तर्भावमित्यस्य व्याप्यत्वासिद्धावित्यादिः । नाभास इति । तथा च सुतरां नाऽनुपसंहारित्वमिति भावः । सत्तया स्वरूपसत्तया । विरोधित्वादित्यस्य व्याप्तिबुद्धावित्यादिः । ननु माभूत्तद्धेतुमद्विशेष्यकः साध्यसंशयो हेत्वाभासः तथापि व्याप्तिज्ञानविरोधिनः तस्य विषय एव तथा भविष्यतीत्यत आह तद्विषयास्त्विति । नास्त्येव केवलेति । तथा च सर्वं प्रमेयं वाच्यत्वादित्याद्यनुपसंहारिण्यव्याप्तिः । यद्यपि सर्वे वन्हिमदूधूमादित्यादौ व्यतिरेकिसाध्यकेप्यव्याप्तिः सम्भवति, तथापि केवलान्वयिसाध्यके सर्वत्रैवाव्याप्तिः व्यतिरेकिसाध्यके तु क्वचिदेव इत्याशयेन तन्मात्रोल्लेखः। साधनवन्निष्ठाभावा-

पसंहारित्वप्रतिसन्धाने यदि व्याप्तिग्रहस्तदानुमितिरेव तदभावे व्याप्यत्वासिद्धिरेवेति निरस्तम्, उपजीव्यत्वादिति ॥

न्दिग्धानैकान्तिकत्वं पर्य्यवसितं, विश्वविषयकसाध्यतदभावसन्देहे च कारणीभूतान्वयव्यतिरेकसहचारग्रहविरहात् संशयसामग्र्या साध्यतदभाववत्त्वनिश्चयप्रतिबन्धाद्वा व्याप्त्यग्रहेऽज्ञानरूपासिद्धिरेव, उपजीव्योऽपि च साध्याभावसन्देहादिर्नाभासः सत्त्वयैव विरोधादिति । यत्तु व्याप्तीति, व्याप्तिग्रहानुकूलसहचारनिश्चयत्वाव-

---

प्रतियोगित्वं वा प्रकृते केवलान्वयित्वं तेन तस्याप्युपग्रहः । ननु बाधभ्रमस्यैव सर्वे हेतुमत्प्रमेयं न वेत्यादिसंशयस्यापि हेत्वाभासत्वं नोपेयमतस्तत्राव्याप्तिर्न क्षतिकरीत्यत आह व्यतिरेकीत्यादि । सन्दिग्धेति । तथा च न साधारण्यान्पार्थक्यमिति भावः । ननूक्तसंशयविषयतापन्नं साध्याभाववद्वृत्तित्वमेवास्तु अनुपसंहारित्वं तादृशसंशयविषयतानवच्छिन्नस्यैव तस्य साधारणत्वेन मिथो भेदसम्भवादतः सर्वधर्मिकसाध्यसन्देहस्य व्याप्तिधीप्रतिबन्धकत्वमेव निरस्यति विश्वेत्यादिना । कारणीभूतेत्यस्य व्याप्तिग्रहेत्यादिः । सहचारग्रहेति । सहचारस्य ग्रहो निश्चयः तद्विरहादित्यर्थः । तथा च कारणाभावादेव व्याप्तिग्रहाभावस्योपपत्तौ साध्यसन्देहस्य तत्र प्रतिबन्धकत्वे मानाभाव इति भावः । ननु विश्वधर्मिकसाध्यसन्देहदशायामेवान्वयव्यतिरेकसहचारयोर्निश्चयः कुतो न जायते इत्यत आह संशयसामग्र्या इति । निश्चयप्रतिबन्धादिति। प्राचां मतेनेदम्, तैर्निश्चयत्वस्य जन्यतावच्छेदकत्वोपगमात्, स्वमते तु साध्यादिविशिष्टवैशिष्ट्यविषयताकस्य साध्यादिसहचारज्ञानस्य विशेषणतावच्छेदकीभूतसाध्यादिमत्तानिश्चयविरहादेव तदानीमनुत्पत्तिरिति द्रष्टव्यम् । व्याप्त्यज्ञानरूपासिद्धेरावश्यकत्वेप्युपजीव्यत्वादेवानुपसंहारित्वं पृथग्वाच्यमिति मणिकृदुक्तं समाधानं दूषयति उपजीव्योपि चेति ।

च्छिन्नविरोधिरूपवत्त्वमर्थः । विरोधस्तु संशयसाधारणमन्वयमात्रसहचारग्रहं विरुणद्धि, असाधारणे व्यतिरेकिणि च न व्यतिरेकसहचारग्रहविरोधः, तादृशरूपमन्तरेण लक्षणस्यासम्भवितया तदेव रूपं लक्षणमाह केवलेति । तादृशावच्छिन्नः पक्षः सन्दिग्धसाध्यको यस्याश्रयः स तथा । तथा च केवलान्वयिधर्मावच्छिन्नसाध्यस-

---

साध्याभावसन्देहादिरित्यादिना साध्यवदन्यत्वादिसंशयस्योपग्रहः। विरोधित्वादित्यस्योक्तत्वादिति शेषः । मिश्रमतमुपन्यस्यति यत्त्विति । व्याप्तिग्रहानुकूलो यः सहचारस्तन्निश्चयसामान्यप्रतिबन्धकतावच्छेदकरूपवत्त्वमर्थः । सन्देहं प्रति अनुपसंहारित्वस्याविरोधित्वान्निश्चयपदम् । अन्वयव्याप्तिग्रहं प्रत्येवान्वयव्यतिरेकीयसहचारयोः प्रयोजकत्वोपगमादुभयव्याप्त्यनुगमाभावेपि न क्षतिरिति भावः । सामान्यार्थकस्यावच्छिन्नपदस्य व्यावृत्तिमाह विरोधस्त्विति । तथा च तादृशनिश्चयसामान्यान्तर्गतस्य व्यतिरेकसहचारनिश्चयस्यैव विरोधित्वाद्विरोधस्य व्युदासः । अथाऽन्वयसहचारनिश्चयत्वावच्छिन्नविरोधिरूपवत्त्वमित्यस्यैव सम्यक्के व्याप्तिग्रहानुकूलत्वेनान्वयव्यतिरेकसहचारयोरनुगमो व्यर्थ इत्यत आह असाधारण इति । निश्चितसाध्यवद्वृत्तित्व इत्यर्थः । व्यतिरेकिणि व्यतिरेकसहचारगृहीतव्याप्तिके । न व्यतिरेकेतितथा च तदुभयवारणार्थमेवोक्तक्रमेण सहचारद्वयोरनुगम इति भावः । इदमुपलक्षणम् । व्यतिरेकसहचारनिश्चयत्वावच्छिन्नविरोधिरूपवत्त्वमित्युक्तौ निश्चितान्वयसहचारकेऽतिव्याप्तिरतोप्यनुगमो द्रष्टव्यः । तादृशरूपम् उक्तरूपावच्छिन्नविरोधिरूपम् । यस्येत्यत्र षष्ठ्यर्थस्यैव विवरणमाश्रय इति। यथाश्रुतेन साध्यसन्देहस्य केवलान्वयिधर्मव्यापकत्वालाभादाह तथा चेति । केवलान्वयिधर्मेणावच्छिन्नं तद्व्यापकं यत्साध्यसन्देहविशेष्यत्वं तद्व्यवृत्तित्वमित्यर्थः । केवलान्वयिसाध्यके चाभावान्तरे वाच्यत्वीयत्वाद्यवगाही सर्वं वाच्यं न वेत्याकारक एव साध्यसन्देहस्तथाविधः सुलभ इति भावः । अवच्छिन्नान्तस्य व्याप्तिमाह व्यतिरेक्यादाविति । व्यतिरेकसहचारगृहीतव्याप्तिकादाविल्यर्थः । आ-

न्देहविषयवृत्तित्वमनुपसंहारित्वम् । व्यतिरेक्यादौ केवलान्वयी न साध्यसन्देहविषयतावच्छेदकः । साध्यवत्तानिश्चयसामान्यविरोधिसंशयविषयवृत्तित्वं वा तत्त्वम् । धर्मिविशेषनियन्त्रितस्तु सन्देहो नान्यधर्मिकनिश्चयविरोधी । साध्यसन्देहविषयताव्याप्यसाध्यसिद्ध्यनुकूलव्याप्तिग्रहोपयिकसत्ताकत्वं वा, तादृशी च सत्ता अन्वये हेतोर्व्यतिरेके च तदभावस्येति न कश्चिद्विशेषः । स्वरूपसत्ताद्दशसंशयविषये च हेतुमत्ताज्ञानं हेतौ साध्यसामानाधिकरण्यं संश-

---

दिपदेनाऽसाधारणादेः संग्रहः । सन्देहेति । सर्वत्र साध्यसन्देहे सहचारग्रहस्यैवासम्भवादिति भावः । ननु सर्वत्र साध्यवत्तदन्यत्वादिसन्देहदशायामपि हेतोरनुपसंहारित्वात् साध्यवत्तानिश्चयविरोधित्वेनैव संशयोनुगमनीयः तथा च साध्यवत्तानिश्चयसामान्यविरोधित्वेनैव सामञ्जस्ये केवलान्वयिधर्मावच्छिन्नत्वाद्यन्तर्भावो गौरवग्रस्त इत्याशयेनाह साध्यवत्तानिश्चयसामान्येति । सर्वे वाच्यं ज्ञेयत्वादित्यादौ चाभावान्तरे वाच्यीयत्वाद्यवगाहिभ्रमरूप एव साध्यवत्तानिश्चयविरोधी सुलभ इति दशाविशेषे तत्र नाव्याप्तिरिति भावः । सामान्यपदोपादानाद्व्यतिरेक्यादौ नातिव्याप्तिरित्यावेदयति धर्मिविशेषेत्यादिना । ननु यदा वस्तुमात्रे न सन्देहः किं तु हेतुमत्तदभावो वा यत्र निर्णीतः तत्रैव साध्यसन्देहस्तदानीमपि हेतोरनुपसंहारित्वमेव, दूषकताबीजस्य व्याप्त्यग्रहस्य सम्भवात् तथा च तत्रोक्तलक्षणाव्याप्तिस्तत्रत्यसन्देहव्यक्तीनां धर्मिविशेषनियन्त्रितत्वेन साध्यनिश्चयसामान्याविरोधित्वादत आह साध्यसन्देहेति । स्वविशेष्यताव्याप्यप्रकृतसाध्यसिद्ध्यनुकूलव्याप्तिग्रहोपयुक्तसत्ताकसंशयत्वमित्यर्थः । अन्वये साध्यस्यान्वये । एवं व्यतिरेक इत्यत्रापि साध्यस्य व्यतिरेक इत्यर्थः । ननूक्तसंशयस्यानुमितौ परामर्शे च विरोधित्वाभावात्तद्धियस्यानुपसंहारित्वरूपहेत्वाभासत्वानुपपत्तिरत आह स्वरूपसादति । तथा च तादृशसंशयकालावच्छिन्नतादृशसंशयधर्मिणा हेतुमत्त्वमेवानुपसंहारित्वमिति भावः । तन्निश्चयेति । हेतौ

यसामग्रीत्वेन तन्निश्चयप्रतिबन्धकं, सर्वत्र संशयसामग्र्या निश्चयप्रतिबन्धकत्वकल्पनात् । हेतुमति सर्वत्र साध्याभावसन्देहे हेतौ साध्यसामानाधिकरण्याभावसंशयस्यौचित्यावर्जितत्वात् साध्याभावेन साध्यसामानाधिकरण्याभावोपस्थापनादिति । तन्न । सर्वत्र साध्यसन्देहदशायां क्वचिदपि साध्यसामानाधिकरण्यस्यागृहीतत्वेन तदभावस्य गृहीतुमशक्यत्वात् । प्रतियोगितावच्छेदकविशिष्टप्रतियोगिनिश्चयस्याभावधीहेतुताया असकृदावेदितत्वात् । अस्तु वा

साध्यसामानाधिकरण्यनिश्चयप्रतिबन्धकमित्यर्थः । ननूक्तसंशयविषयस्य धर्मिणो हेतुमत्ताज्ञानं साध्यसामानाधिकरण्यसंशयस्य हेतुरेव न कुतः सामग्रीत्वमत आह हेतुमतीति । हेतुमत्तया ज्ञात इत्यर्थः । औचित्येति । क्रमसिद्धत्वादित्यर्थः । तथा चान्वयव्यतिरेकाभ्यामेव तद्धेतुत्वमिति भावः । ननु हेतुमत्त्वावच्छेदेन साध्यसंशयस्त्वेपि कोट्यनुपस्थित्या हेतौ सामानाधिकरण्यसन्देहो दुर्घट इत्य आह साध्याभावेति । ज्ञातस्यैकसम्बन्धिनः सम्बन्ध्यन्तरस्मारकत्वादिति भावः । क्वचिदपि किञ्चिदधिकरणान्तर्भावेणापि । तथा च साध्यविशिष्टवैशिष्ट्यबुद्ध्यात्मकस्य साध्यसामानाधिकरण्यज्ञानस्य विशेषणतावच्छेदकीभूतसाध्यकत्तायाः क्वचिदप्यनिश्चयेन कारणबाधादनुत्पत्त्या साध्यसामानाधिकरण्यसंशयस्तदानीं दुर्घट इति भावः । ननु कारणबाधात्साध्यसामानाधिकरण्यत्वप्रकारेण साध्यसामानाधिकरण्यस्य प्रागनुपस्थितावपि तदवच्छिन्नाभावग्रहे बाधकाभाव इत्यत आह प्रतियोगितेति । प्रतियोगितावच्छेदकप्रकारकप्रतियोगिधर्मिकनिश्चयस्येत्यर्थः । असकृदित्यस्य मिश्रैरित्यादिः । स्वमते प्रतियोगिविशेषिताभावभानस्य विशिष्टवैशिष्ट्यधीसामान्यसामग्रीत एवोपगमात् । न च विशेष्ये विशेषणमित्यादिक्रमेण साध्यसामानाधिकरण्यज्ञानादेव तादृप्येण तस्याभावः सन्दिह्यतामिति वाच्यम् । प्रतियोगिविशेषिताभावबुद्धेः विशिष्टवैशिष्ट्यावगाहित्वनियमात् । अन्यथा निर्धिकल्पकादपि तत्क्रमेण घटो नास्तीत्यभाव-

स यथाकथञ्चित् साध्ये हेतुसामानाधिकरण्याभावसंशयहेतुत्वेन वा तथात्वं, न तथापि सामग्रीत्वेन प्रतिबन्धकतया हेत्वाभासत्वम्। अन्यथा व्यभिचरिताव्यभिचरितसमानासमानाधिकरणव्याप्याव्याप्यपक्षधर्मापक्षधर्मादिसाधनवह्निःसाधनादिसाधारणद्रव्यत्वादिमत्त्वं हेतोः पक्षस्य चाभासान्तरं स्यात्, तदुपदर्शितस्येव तस्यापि

प्रत्यक्षापत्तेरिति भावः । ननु साध्यवद्वृत्तित्वमित्याकारकं प्रतियोगितावच्छेदकविशिष्टप्रतियोगिज्ञानं साध्यवत्तानिश्चयं विनापि सम्भवत्येव यत्र विशेषणतावच्छेदकांशे धर्मितावच्छेदकीभूतं यत्किञ्चिद्भासते तादृशविशिष्टवैशिष्ट्यबुद्धावेव विशेषणतावच्छेदकप्रकारकनिश्चयत्वेन हेतुत्वात् प्रकृते च तादृशसाध्यांशे धर्मितावच्छेदकान्तराभावादत आह अस्तु वेति । सः प्रतियोगितावच्छेदकीभूतसाध्यसामानाधिकरण्यत्वप्रकारकनिश्चयः । ननु साध्यवत्त्वांशे धर्मितावच्छेदकशून्येपि साध्यविशिष्टवैशिष्ट्यबोधे साध्यवत्तानिश्चयत्वेनैव हेतुत्वं न तु साध्यवत्ताज्ञानत्वेन संशयसाधारणसाध्यवत्ताज्ञानस्य हेतुत्वे तदप्रामाण्यनिश्चयाभावस्योत्तेजकतायां गौरवापत्तेरित्यतः कल्पान्तरमाह साध्य इति । तथात्वमिति । स्वरूपसत्तादृशसंशयविशेष्यधर्मिकहेतुमत्ताज्ञानस्य हेतुधर्मिकसाध्यसामानाधिकरण्यनिश्चयप्रतिबन्धकत्वमित्यर्थः। न तथापीति । यद्विषयकत्वेन ज्ञानस्य प्रतिबन्धकत्वं तस्यैव हेत्वाभासत्ववादिति भावः । अन्यथेति । सामग्रीत्वेन प्रतिबन्धकत्वेप्याभासत्व इत्यर्थः । व्यभिचरिताव्यभिचरितादिसाधारणद्रव्यत्वादिमत्त्वं हेतोः साधनवह्निःसाधनादिसाधारणद्रव्यत्वादिमत्त्वं च पक्षस्याभासान्तरमाभासताप्रयोजकं स्यादित्यर्थः । ननु व्यभिचरिताव्यभिचरितादिसाधारणद्रव्यत्वादिमत्त्वस्य हेतौ ग्रहेपि विशेषदर्शनदशायां व्यभिचारादिसंशयानुत्पत्त्या न तज्ज्ञानस्य विरोधिसंशयसामग्रीत्वमत आह त्वदुपदर्शितस्येवेति । साध्यसंशयधर्मिणो हेतुमत्त्वस्येवेत्यर्थः । तस्य निरुक्तद्रव्यत्वादिमत्त्वस्य । इतरसाचिव्येन विशेषदर्शनाद्यभावसहकारेण । तन्निश्चयेति । व्याप्त्यादिनिश्चयविरोधी यो व्यभिचा-

ज्ञानस्येतरसाचिव्येन तत्त्वनिश्चायकविरोधिसंशयसामग्रीत्वात् । एवमसिद्ध्यादिनिश्चायकप्रत्यक्षसामग्र्यपि । अपि च हेतोः साध्याभावसन्देहविषयमात्रवृत्तित्वं दूषणमिति प्राप्तं तच्च व्यतिरेकिणि हेतौ नियतविषयेणापि सन्देहेन सम्पद्यते, दूषकताबीजसत्त्वे चासाधारण्यादिसाधारण्यं न दोषाय, न वा अत्रैव निर्भरः कर्त्तव्यो हेत्वाभासत्वानुपपत्तेरुक्तत्वादिदमलं पल्लवितेन ॥

व्याप्तिग्रहप्रतिबन्धलक्षणैकप्रयोजनकत्वेन साधारण्यादीनामेक-

रादिसंशयस्तत्सामग्रीत्वादित्यर्थः । असिद्ध्यादीत्यादिना व्यभिचारादुपग्रहः । प्रत्यक्षसामग्र्यपीति । आभासताप्रयोजकं स्यादिति पूर्वेणान्वयः । तथा च सन्निकर्षादिसहकृतस्यासिद्ध्यादिविशेषणीभूतवस्तुज्ञानस्य स्वरूपासिद्ध्यादिनिश्चयसामग्रीत्वेन पक्षधर्मत्वादिज्ञानविरोधित्वात्तद्विषयीभूतताद्दशवस्तूनां हेत्वाभासतापत्तिरिति भावः । प्रतिबन्देरनुत्तरत्वादाह अपि चेति । नियतविषयेणापीति । यत्र यत्र हेतुमत्त्वं तन्मात्रे साध्यसन्देहेनाप्युपपद्यते इत्यर्थः । तदानीमप्यन्वयव्याप्त्यग्रहस्य दूषकताबीजस्य सम्भवात्तथा च तादृशसंशयदशायामपि हेतोरनुपसंहारित्वात्तत्र प्रागुक्तलक्षणाव्याप्तिः साध्यसिद्ध्यौपयिकसत्तायास्तत्संशयविषयताव्याप्यत्वाभावाद्धेतोर्व्यतिरेकसत्तायां व्यभिचारादिति भावः । ननु निश्चितसाध्यवद्वृत्तित्वरूपेणासाधारण्येन सङ्कुरात् साध्यवत्तासंशयविशेष्यमात्रवृत्तित्वं दूषणमेव नेत्यत आह दूषकताबीजेति । अन्वयव्याप्तिग्रहप्रतिबन्धकतारूपेणेत्यादिः । न दोषायेति । असाधारण्याद्यग्रहदशायामेव पार्थक्यसम्भवादिति भावः । नन्वेवं हेतोः साध्यसन्देहविषयमात्रवृत्तित्वमेवाऽनुपसंहारित्वमस्तु अत आह न वाऽत्रैवेति । हेत्वाभासत्वेति । साध्यसंशयविषयीभूततत्तद्धर्मिकवृत्तिताज्ञानत्वेनैवानुमित्यादौ अप्रतिबन्धकत्वादिति भावः ॥

स्वातन्त्र्येण व्यभिचारादेर्लक्षणं वक्तुमुपक्रमते व्याप्तिग्रहेत्यादिना । एकहेत्वाभासत्वं हेत्वाभासविभाजकैकधर्मवत्त्वम् ।

हेत्वाभासत्वम्। साधारणेन व्यापकत्वस्याऽव्यभिचारित्वस्य वा असाधारणेन सामानाधिकरण्यस्याऽनुपसंहारिणा च व्यतिरेकव्याप्त्यग्रहस्य विरोधात् । लक्षणन्तु विशिष्टसाध्यसाधनग्रहाविरोधिनो ज्ञानस्य विषयतया व्याप्तिग्रहविरोधितावच्छेदकं रूपम् । व्याप्तीश्चान्वयतो व्यतिरेकतश्च नानारूपाः प्रातिस्विकरूपेण उपादाय तावदवगाही ग्रहो वाच्यः । साध्यसाधनयोरप्रसिद्धेरसिद्धिभेदस्य वारणायाऽविरोधिन इत्यन्तम् । साध्यसाधनभेदेन व्यभिचारभेदा-

---

व्यापकत्वस्येति । ग्रहस्य विरोधादित्यन्वयः । एवमग्रेपि । असमानप्रकारकोपि व्यभिचारग्रहो व्यापकताज्ञानविरोधी साध्यस्य साधनाव्यापकत्वमेव साधारण्यमित्याशयेन चेदम् । साधनभेदेप्यभेदेन लाघवात् साध्यवदन्यावृत्तित्वे सति साध्यसामानाधिकरण्यमेव व्याप्तिरिति नव्यमते त्वाह अव्यभिचारित्वस्येति । व्याप्तिग्रहप्रतिबन्धकप्रयोजकत्वमात्रस्य साध्याप्रसिद्ध्यादावतिप्रसक्तत्वादाह लक्षणं त्विति । सव्यभिचारस्येत्यादिः । नानारूपा इति । अत्यन्ताभावान्योन्याभावाद्यन्तर्भावेण नानाविधा इत्यर्थः । तेनैकविधव्यभिचारस्यान्यविधव्याप्तिग्रहाविरोधित्वेपि न तत्राव्याप्तिरिति भावः । साध्येत्यादि । काञ्चनमयवन्हिमान् काञ्चनमयधूमादित्यादौ साध्यादेः काञ्चनमयत्वाद्यभावरूपायाः व्याप्यत्वासिद्धेर्वारणायेत्यर्थः । न चैवं धूमवान्धूमाव्यभिचारिसत्त्वादित्यादिस्थलीयव्यभिचारस्य प्रकृतसाधनग्रहविरोधित्वात्तत्राव्याप्तिः, साधनादिक्रोडीकृतव्यभिचारस्याऽसिद्धिमध्य एवान्तर्भावनीयत्वादिति भावः । ननु धूमवान् वन्होरित्यादौ साध्यसाधनग्रहविरोध्यप्रसिद्ध्या तत्रत्यव्यभिचाराव्याप्तिरत आह साध्यसाधनभेदेनेति । अन्यत्र असाधारण्यादिलक्षणे । ननु धूमवान्धूमव्यभिचारिधर्मादित्यादौ प्रकृतहेतुकव्याप्तिग्रहस्याहार्यत्वनियमात्तद्विरोधित्वाप्रसिद्ध्या तत्रत्यव्यभिचाराव्याप्तिरत आह शेषमिति । प्रातिस्विकरूपेण व्याप्तीनामवगाहिताः समुपादाय तद्व्यतिरेको यद्विषयकनिश्चयविरोधिविषयिताप्रयुक्तस्त-

यत्र विशिष्टं साध्यं साधनं वाऽप्रसिद्धं तत्र तद्ग्रहविरोधित्वं नोपादेयम्। एवमन्यत्रापि। शेषं हेत्वाभासलक्षणोक्तदिशाऽवसेयम्। व्यर्थविशेषणत्वन्तु न व्याप्तिग्रहविरोधीति वक्ष्यते। साध्याव्यभिचरितसामानाधिकरण्यविरहस्य बहिर्भावनीयत्वे पुनरन्वयव्याप्तौ

दुत्तरमनुमितित्वावच्छेदेन वर्तमानत्वमेव सव्यभिचारत्वं निर्वाव्यमिति भावः। प्राञ्चस्तु तावद्व्याप्त्यवगाहिग्रहत्वाव्यापकविषयिताशून्यमेव ग्रहमुपादाय तद्विरोधित्वं वाच्यमित्युक्तस्थले धर्मो धूमव्याप्य इत्याकारकव्याप्तिग्रहविरोधितामादायैव लक्षणं सङ्गमयन्ति। तत्तुच्छम्। एवमेव सर्वत्र सव्यभिचारलक्षणादावनुसर्तव्येतिग्रन्थेनैव गतार्थतया पौनरुक्त्यापत्तेरिति ध्येयम्। ननु वन्हिमान्नीलधूमादित्यादौ व्यर्थविशेषणत्वादावतिव्याप्तिस्तस्यापि व्याप्तिग्रहविरोधित्वादत आह व्यर्थेति। नीलधूमत्वादेः स्वसमानाधिकरणव्याप्यतावच्छेदकान्तरघटितत्वग्रहेपि तादृप्येण व्याप्तिग्रहस्योत्पादादिति भावः। ननु साध्यवदन्यावृत्तित्वे सति साध्यसामानाधिकरण्यरूपाया व्याप्तेर्विरहेतिव्याप्तिस्तस्य व्याप्यत्वासिद्धित्वेनाऽलक्ष्यत्वादत आह साध्याव्यभिचरितेति। ननु व्यापकसामानाधिकरण्यरूपाया अन्वयव्याप्तेरुपादाने तावद्व्याप्त्यवगाहिग्रहत्वाव्यापकविषयितांशून्यग्रहविरोधित्वाविवक्षयापि धूमवान्धूमव्यभिचारिधर्मादित्यादौ धूमव्यभिचारिधर्मस्योपग्रहो न स्यात् धर्मसामान्यव्यापकत्वस्य धूमव्यभिचारिधर्मव्यापकत्वाघटकत्वात् तद्विषयतायाः प्रकृतद्व्याप्त्यवगाहिग्रहत्वाव्यापकत्वादतो नव्यमतमनुवृत्याह अव्यभिचरितत्वं वेति। साध्यवदन्यावृत्तित्वादिरूपेत्यादिः। विशकलितं खण्डीकृतम्। तथा च केवलाव्यभिचरितत्वग्रहं प्रति तद्विशिष्टसामानाधिकरण्यवत्ताज्ञानस्याविरोधित्वादेव न तद्व्याप्तिरिति भावः। असाधारण्यस्य साध्यसामानाधिकरण्यधीविरोधित्वं प्राचामपि संमतमित्यावेदयितुं तेषामेव लक्षणमुपन्यस्य व्याकरोति सपक्षव्यावृत्तत्वमिति। हेतोरित्यादिः। निश्चितसाध्यवतः सपक्षत्वे शब्दो नित्यः शब्दत्वादित्यादिसङ्केतावतिव्याप्त्यापत्तेराह सपक्षः साध्यवानिति।

व्यापकत्वमव्यभिचरितत्वं वा सामानाधिकरण्यञ्च विशकलितं युगपदुपादेयम् । तत्र साधारणत्वं वर्णितम्, असाधारणत्वन्तु सपक्षव्यावृत्तत्वं, सपक्षश्च साध्यवान्, तद्व्यावृत्तत्वन्तदवृत्तित्वग्रहविरोधित्वम्। प्रकृतसाध्यसाधनग्रहाविरोधिनो ज्ञानस्य विषयतया तदुभयसामानाधिकरण्यग्रहविरोधितावच्छेदकमिति तु निष्कर्षः । संगृह्यते चेत्थं साध्यादेः साधनवदवृत्तित्वादिकम् । चाक्षुषस्पर्शवान् स्पार्शनशब्दवत्त्वादित्यादौ विशेष्ययोरसामानाधिकरण्यञ्च बाधा-

---

ननु साध्यवद्व्यावृत्तत्वं यदि साध्यवदवृत्तित्वात्यन्ताभावः तदा साध्यवदवृत्तिभिन्नत्वादावव्याप्तिरत आह तदवृत्तित्वेति । नन्वेवं साध्याप्रसिद्ध्यादावतिव्याप्तिरत आह प्रकृतेत्यादि।न च वन्हिमान् वन्ह्यभावादित्यादौ साध्याभाववत्त्वादिविशिष्टमपि असाधारण्यं स्यात् तस्यापि प्रकृतसाध्यसामानाधिकरण्यधीविरोधित्वादिति वाच्यम् । इष्टत्वादिति भावः । अनुगतोक्तेः फलमाह संगृह्यते इति । साध्यादेरित्यादिना साध्यवत्त्वाद्यवच्छेदेन साधनवदन्यत्वादेः परिग्रहः । ननु प्रकृतसाध्यसामानाधिकरण्याभावविशिष्टप्रकृतहेतुमत्त्वमेवास्त्वसाधारण्यं तावतैव साध्याप्रसिद्ध्यादेः व्युदासात्, नव्यमते च साध्यसामानाधिकरण्यविशिष्टबुद्धौ तदत्यन्ताभावग्रहस्यैव समानप्रकारकत्वेन विरोधितया साध्यवदवृत्तिभिन्नत्वाद्यसंग्रहेपि क्षत्यभावादत आह चाक्षुषेति । विशेष्ययोः स्पर्शशब्दयोः । अन्यथा प्रकृतहेतुसाध्ययोरप्रसिद्ध्या तदसाधारण्यासंग्रहः स्यादिति भावः । ननु गगनवन्महाकालादित्यत्र साध्यनिष्ठावृत्तित्वस्य बाधत्वेन हेतुनिष्ठावृत्तित्वस्य च स्वरूपासिद्धित्वेनाऽलक्ष्यत्वात्तत्रोक्तलक्षणातिव्याप्तिस्तयोरपि हेतुसाध्यसामानाधिकरण्यधीविरोधित्वादत आह बाधेत्यादि । क्रमेणान्वयः । न क्षतिरिति । स्वलान्तर एवासङ्कीर्णतया पार्थक्यसम्भवादिति भावः । विरुद्धग्रन्थीयसिद्धान्तमूलस्यानुगतलक्षणाकरणात् न्यूनतामपाकर्तुमाह इदमेव चेति । उक्तरूपवत्त्वमेव चेत्यर्थः । विरुद्धत्वं विरुद्धविभाजको धर्मः । ननुमणिकृदुक्तविरोध-

सिद्धिभेदस्य च साध्यसाधनयोरवृत्तित्वस्यैव तत्साङ्कर्य्येऽपि न क्षतिः। इदमेव च मणिकृतां विरुद्धत्वम्। इत्थञ्च तदीयमसाधारणत्वमेव विरुद्धत्वमिति। यत्र च धर्मिणि यो धर्मो यादृशो हेत्वाभासः तद्व्याप्यमपि तद्विशेषोऽन्तरेण प्रकरणसमं तद्व्याप्यञ्च, पृथगुपदेशादविरोधाच्च। अनुपसंहारित्वञ्च विशिष्टसाध्यसाधनग्रहाविरोधिनो ज्ञानस्य विषयतया व्यतिरेकव्याप्तिग्रहविरोधितावच्छेदकरूपवत्त्वम्। तादृशञ्च साध्यादेरत्यन्ताभावाप्रतियोगित्वादिकम्।

स्याऽसाधारणान्तर्भावे हेत्वाभासानां पञ्चविधत्वानुपपत्तिरत आह इत्थं चेति। तथा च प्रकृतहेतुनिष्ठसाध्यव्यापकाभावप्रतियोगित्वे सति पक्षवृत्तित्वरूपमेव विरोधमादाय हेत्वाभासानां पञ्चधा विभाग इति भावः। ननु हेतोः साध्यव्यभिचारव्याप्यवत्त्वादेरपि व्याप्त्यादिग्रहविरोधितावच्छेदकत्वात्तत्र सव्यभिचारादिलक्षणस्यातिव्याप्तिरत आह यत्र चेति। तद्विशेषः तादृशहेत्वाभासस्य विशेषः। तथा च हेतुनिष्ठं व्यभिचारादिव्याप्यवत्त्वमपि व्यभिचारत्वेन लक्ष्यमेवेति भावः। अन्तरेति। प्रकरणसमः सत्प्रतिपक्षस्तद्व्याप्यं च परित्यज्येत्यर्थः। प्रकरणसमस्य त्यागे हेतुमाह पृथगिति। न च साध्याभावव्याप्यविशिष्टपक्षमेवोपादाय सत्प्रतिपक्षस्य शास्त्रे पृथगुपन्याससम्भवात् पक्षनिष्ठं साध्याभावव्याप्यवत्त्वं बाध एवान्तर्भाव्यतामिति वाच्यम्। तत्रापि सत्प्रतिपक्षितव्यवहारस्य कथकसिद्धतया बाधत्वानौचित्यादिति भावः। सत्प्रतिपक्षव्याप्यस्य तद्विशेषत्वाभावे बीजमाह अविरोधादिति। साध्यवत्ताबुद्धौ साध्याभावव्याप्यव्याप्यवत्तानिश्चयस्याविरोधित्वादित्यर्थः। व्यतिरेकेत्यादि। अत्रापि नानाविधाः व्यतिरेकव्याप्तीरुपादाय तावद्वगाहिग्रहो वाच्यः। साध्यादेरित्यादि। आदिपदाभ्यां हेत्वभावादेः साध्याभावाव्यापकत्वाद्युपग्रहः। समानविषयतामात्रेण ज्ञानस्य प्रतिबन्धकत्वमाश्रित्येदम्। समानप्रकारकत्वेन तथात्वे पुनरभावत्वाद्यवच्छेदेन प्रतियोगित्वादिसम्बन्धेन साध्यादेरभाववत्त्वमेव तादृशरूपं द्रष्टव्यम्। साध्याभावत्वं च साध्यीयप्रतियोगितावत्त्वम्। व्यतिरे-

वन्ह्यभावाभावत्वेन वन्हेर्धूमाभाववद्वृत्तित्वज्ञानं वन्ह्यभावस्य धूमाभावव्यापकताज्ञानं कदाचिद्विरुन्ध्यादपि, न तु वन्हित्वेनेति नातिप्रसङ्गः। केवलान्वयिनि तत्सम्भवेऽपि अन्वयव्याप्त्युपादाने नानुमितिप्रतिरोध इति दिक् ॥

कव्याप्तिज्ञाने तादृशप्रतियोगितायां साध्यभानमावश्यकं तथा च तादृशप्रतियोगिताधर्मिकसाध्यप्रकारकज्ञानं प्रति तादृशप्रतियोगिताधर्मिकसाध्याभावप्रकारकज्ञानं प्रतिबन्धकमिति गुरुचरणाः। स्वरूपसम्बन्धावच्छिन्नप्रतियोगिताकाभावत्वावच्छेदेन साध्याभाववत्ताज्ञानं यथा स्वरूपसम्बन्धावच्छिन्नप्रतियोगिताकाभावत्वावच्छेदेन साध्यवत्ताज्ञानप्रतिबन्धकं तथाऽभावत्वावच्छेदेन साध्यवत्ताज्ञानं प्रति तादृशज्ञानं प्रतिबन्धकमित्यपि केचित्। ननु धूमाभाववदवृत्तिर्वन्हिरित्येवं साधारण्यज्ञानस्यापि धूमाभावव्यापको वन्ह्यभाव इत्येवं व्यतिरेकव्याप्तिधीविरोधित्वात् साधारण्येतिव्याप्तिरत आह वन्ह्यभावेति। समानविषयतामाश्रेणैव विरोधित्वमाश्रित्याह कदाचिदिति। वस्तुतः समानप्रकारकत्वेनैव विरोधित्वात्तस्यापि विरोधित्वं दुर्घटमिति भावः। न तु वन्हित्वेनेति। वन्हेर्धूमाभावाभाववदवृत्तित्वज्ञानमित्यनुषज्यते। नन्वेवं साध्यादेः केवलान्वयित्वादिप्रतिसन्धानदशायामनुमितिर्न स्यात् तद्ग्रहस्यापि व्यतिरेकव्याप्तिधीविरोधित्वादत आह केवलेति ॥

इति श्रीजगदीशतर्कालङ्कारकृतायामनुमानदीधितिव्याख्यायामनुपसंहारिग्रन्थः समाप्तः ॥

चिन्तामणेः विरुद्धः ।

विरुद्धो न साध्याभावव्याप्यः, संयोगसाध्यके सद्धेतावतिव्याप्तेः । नापि साध्यवन्निष्ठात्यन्ताभावप्रतियोगिव्याप्यत्वं तत्त्वम्, इदं द्रव्यं गुणवत्त्वादित्यादौ संयोगादिव्याप्येऽतिव्याप्तेः । किन्तु साध्यसमानाधिकरणसाध्याभावव्याप्यः साध्यवदन्योन्याभावव्याप्यो वा । साध्याभावत्वं साध्यविरोधित्वमात्रं भावाभावसाधारणम् । तेनाऽभावे साध्येऽभावाभावस्य भावत्वेऽपि नाव्याप्तिः ।

दीधित्याः विरुद्धः ।

साध्यविरोधित्वं साध्यप्रतियोगिकत्वम् । एकदेशिमतेनाह अ-

जागदीश्याः विरुद्धः ।

ननु साध्यविरोधित्वं यदि साध्यासामानाधिकरण्यं तदा मूलोक्तस्य साध्यासमानाधिकरणीभूताभावव्याप्यत्वस्यैव सम्यक्त्वे साध्याभावत्वप्रवेशो व्यर्थ इति वाच्यम् । मूलोक्तसाध्याभावसामानाधिकरण्यपदस्य प्रतियोग्यसमानाधिकरण्यार्थकतया तादृशजलत्वाद्यभावव्याप्यवन्हिसाध्यकधूमादावतिव्याप्त्यापत्तेरिति भावः । अभावाभावत्वं भावस्यैवेति सिद्धान्तभङ्गादाह एकदेशीति । न चे-

अभावाभावोऽभावप्रतियोगिनिरूप्यत्वेन भावभिन्न एव वा। न च भावत्वेनोपपत्तौ किमधिकेनेति वाच्यम। बाधकं विनाऽभावप्रतीतेः प्रमात्वात्। अन्यथा अत्य-

---

भावेत्यादि। न च भावस्य स्वाभावविरहात्मकत्वरूपप्रतियोगित्व-ग्राहिधर्मिग्राहकमानबाधः, प्रतियोगित्वस्य सम्बन्धान्तरत्वात्। स्व-स्याभावस्येत्यत्र षष्ठ्यर्थस्य तस्यावश्याभ्युपेयत्वात्। विरहत्वञ्च नाभावत्वम्, बाधात्। नापि तदग्रहप्रतिबन्धकग्रहविषयत्वम्, अ-विरोधात् प्रत्यक्षेण दुर्ग्रहत्वाच्च। न चानवस्था, अभावस्य स्वाभा-वाभावत्वे बाधकाभावात्। भावस्य तथात्वे बाधकमाह बाधकं वि-

---

त्यादि। घटो नास्तीति प्रमितावभावविरहत्वरूपं प्रतियोगित्वं घटे धर्मिणि संसर्गमर्यादया भासत इति तद्ग्राहकप्रमाणस्य बाधः स्यात् यद्यभावत्वं भावस्य न स्यादित्यर्थः। सम्बन्धान्तरत्वादिति। तथा च तादृशप्रतीतौ संसर्गतया अतिरिक्तप्रतियोगित्वं भासते न तु स्वाभावविरहत्वमिति भावः। ननु सम्बन्धान्तरे मानाभावादभाव-विरहत्वमेव तत्र संसर्ग इत्यत आह स्वस्येति। अत्र एतयोः। तस्य सम्बन्धान्तरस्वरूपस्य। ननु सम्बन्धान्तरस्येव तदघटितस्यापि स्वा-भावविरहत्वस्य संसर्गत्वे बाधकाभाव इत्यतो बाधकमाह विरहत्वं चेति। अभावत्वं भावभिन्नत्वम्। बाधादिति। घटादेर्भावत्वनियमादिति भावः। तदग्रहेति। स्वाभाववत्ताग्रहेत्यर्थः। अविरोधादिति। अभावाभा-वस्यातिरिक्तत्वेपि घटादेः स्वाभाववत्ताग्रहप्रतिबन्धकग्रहविषयत्व-सम्भवेन प्रतियोगित्वग्राहिधर्मिग्राहकप्रमाणस्याऽविरोधादित्यर्थः। न वा धर्मिग्राहकप्रमाणेन स्वाभाववत्ताग्रहप्रतिबन्धकग्रहविषयत्वं गृह्यत इत्याह प्रत्यक्षेणेति। उक्तस्य ज्ञानादिघटितत्वेन चक्षुराद्ययो-ग्यत्वादिति भावः। ननु घटाभावाभावस्यातिरिक्तत्वे तदभावाना-मप्यभावोऽतिरिच्यतामित्यनवस्थेत्याशङ्क्य निराचष्टे न चेति। तथात्वे

नेत्यादि । अभावप्रतीतेः अभावत्वविशिष्टप्रतीतेः । अभावत्वञ्च न भावभिन्नत्वं, प्रथमं दुर्ग्रहत्वात्, किन्त्वयमभावो न भाव इति प्रतीतिसाक्षिकं पदार्थान्तरं, तच्चानुपस्थितं निर्विकल्पकोपस्थितं वा

अभावाभावत्वे । बाधकं विनेति । तथा चाभावत्वं यदि भाववृत्ति स्यात्तदा घटेन्द्रियसन्निकर्षदशायां भूतले घटत्वावच्छिन्नाभावो नेति प्रमावत् भूतले नेत्यपि प्रमा स्यात्। न हि परेषां तादृशेन्द्रियसंयुक्तावशेषणताया इव तवापीन्द्रियसंयोगादेः कार्यतावच्छेदकं तत्तद्धर्मावच्छिन्नाभावत्वप्रकारकप्रत्यक्षत्वमेव शक्यते वक्तुं, भावमात्रवृत्तिघटत्वपटत्वाद्यनन्तधर्मप्रकारकस्य निष्प्रकारकस्य च द्रव्यप्रत्यक्षस्याप्यनुत्पत्तिप्रसङ्गात् । न च घटत्वादितत्तदनन्तधर्मप्रकारकद्रव्यप्रत्यक्षत्वद्रव्यनिर्विकल्पकत्वयोरपीन्द्रियसंयोगजन्यतावच्छेदकत्वोपगमान्न तदनुपपत्तिः, महागौरवापत्तेः घटोद्रव्यमितिवत् नद्रव्यमित्येवं द्रव्यत्ववत्तया घटप्रत्यक्षस्यैवमप्यवारणाच्चेति भावः । भावस्याभावविरहत्वेप्यभावत्वप्रतीतेः प्रमात्वं सम्भवत्यतो व्याचष्टे अभावत्वविशिष्टेति । इत्थं च बाधकं विनेत्यादिमूलस्य बाधकाभावात् घटादिसन्निकर्षदशायां तद्धर्मिकनेत्याकारकाभावत्वविशिष्टप्रतीतेः प्रसङ्गाद्रित्यर्थः । घटाभावो नास्तीत्यादिप्रतीतेर्भावाभिन्नत्वलक्षणाभावत्वस्य प्रमात्वानुरोधादभावाभावस्यातिरिक्तत्वमभ्युपगच्छतां मतं निरस्यति अभावत्वं चेति।नास्तीत्याकारकप्रतीतिनियामकमित्यादिः । प्रथमं चक्षुरादिसन्निकर्षदशायाम् । दुर्ग्रहत्वादिति । भावत्वावच्छिन्नस्य प्रागनुपस्थित्या सामग्रीविरहादिति भावः । अयमभावो न भाव इतीति । अन्यथा भावभिन्नत्वस्यैवाभावत्वपदार्थत्वे पौनरुक्त्यापत्तेरिति भावः । ननु पदार्थान्तरस्याप्यभावत्वस्य प्रागनुपस्थित्या प्रथमं दुर्ग्रहत्वं तुल्यमत आह तच्चेति । लौकिकान्याभावत्वप्रकारकबोधं प्रति अभावत्वज्ञानस्य हेतुत्वादिति भावः । लाघवादभावत्वप्रकारकप्रत्यक्षं प्रति यद्यभावत्वज्ञानं हेतुः स्यात्तदाह निर्विकल्पकेति । भावभिन्नत्वन्तु न निर्विकल्पकग्राह्यं द्रव्याद्यन्यतमत्वरूपस्य भावत्वस्याऽयोग्यत्वादिति भावः । प्रकारः घटोनास्तीतिप्रत्यक्षे प्र-

न्ताभावान्योन्याभावयोरप्रसिद्धिः । अथ साध्यहेत्वो-र्विरोधे पक्षे साध्यसत्त्वे हेत्वसिद्धिः, हेतुसत्त्वे साध्या-भावसिद्धौ बाधः । न च प्रमाणान्तरेण साध्याभावसि-द्धौ बाधो न हेतुत्वेनैवेति वाच्यम् । विशेषणवैयर्थ्या-दिति चेन्न । हेतोः पक्षे साध्याभावबाधानुपस्थापनेऽपि प्रथमोपस्थितविरोधस्यैव उपजीव्यत्वेन दोषत्वात् । ननु साध्याभावसम्बन्धो व्यभिचार एव दोषो न तु तन्नि-यतत्वमपि, गौरवात् असाधकत्वे व्यर्थत्वाच्च । न च साध्यासहचरितस्य साध्याभावसहचरितस्य वा गमक-

---

प्रकारः, अभाववच्चासमवेतत्वान्न जातिः । अन्यथेति । अनीतिप्रस-क्तैरधिकरणैस्तद्धर्मैर्वा अभावव्यवहारोपपत्तेरिति भावः । लाघवा-दबाधिताभावत्वविशिष्टप्रत्ययबलाच्चातिरिक्तैकाभावसिद्धिस्तुल्यैव। एतेनाभावत्वं सप्रतियोगिकत्वं तच्चाऽननुगतानामप्यावश्यकानां प्रतियोगिनां कल्प्यते इत्यपास्तम्, संयोगादिसाधारण्याच्च । गम-

---

कारः । अभावत्वस्याखण्डत्वे जातित्वापत्तिरत आह अभाववदिति । अधिकरणस्याभेदेन स्वाधिकरणत्वानुपपत्तेराह तत्तद्धर्मैर्वेति । अ-भाववव्यवहारेति । घटो नास्तीत्यादिव्यवहारोपपत्तेरित्यर्थः । ननु बहूनामधिकरणानां घटाभावत्वकल्पनामपेक्ष्य लाघवाद्घटत्वावच्छि-न्नाभावो न भाव इत्यबाधितभावभिन्नत्वप्रत्ययाच्च घटादेरतिरिक्तो-ऽभावः कल्प्यत इत्यत आह लाघवादिति । तुल्यैवेति । बहूनां प्रति-योगिनां घटाभावविरहत्वकल्पनामपेक्ष्य लाघवाद्घटाभावविरहो न भाव इत्यबाधितप्रत्ययाच्च घटाभावस्याभावोऽतिरिक्त एव सिद्ध्य-

त्वभ्रमरूपायामशक्तौ विशेषोऽस्ति, येनाशक्तिविशेषोन्नायकतया न व्यर्थविशेषणता। न चाऽनैकान्तिकसामान्यलक्षणे विपक्षगामित्वं न विशेषणम् असाधारणाद्यव्याप्तेः, साधारणन्तु सपक्षवृत्तित्वसहितमिति वाच्यम् । विपक्षगामित्वस्यैव साधारणत्वात् अधिकस्य व्यर्थत्वात् । न च विरुद्धं व्यावर्त्त्यम्, विपक्षगामित्वेनाऽत्रैव तदन्तर्भावात् । अथाऽनैकान्तिके विपक्षसम्बन्धो न दूषकताबीजम्, असाधारणाद्यव्याप्तेः । न च तत्रान्यदेव बीजम्, हेत्वाभासाधिक्यापत्तेरिति चेत् । अस्तु तावदेवं, तथापि साधारणे विरुद्धप्रवेशो वज्रलेप एव । अन्ये तु विरुद्धलक्षणे न व्यर्थत्वं, साधारणस्य व्यवच्छेद्यत्वात्, नाप्यसाधकतानुमितौ, एतस्यापि व्याप्यत्वात्, नीलधू-

---

कत्वभ्रमेति । व्यभिचारिण्यव्यभिचारमात्रे विरुद्धे च सामानाधिकरण्यांशेऽपि भ्रम इति । अशक्तौ विशेष इति । दूषकतायां

तीत्यर्थः । एतेनेति । अबाधितभावाभिन्नत्वप्रत्ययबलेनेत्यर्थः । कल्प्यत इति । घटाभावो नास्तीत्यादिप्रतीतिविषयतया कल्प्यत इत्यर्थः। ननु घटाभावस्याभावो न भाव इति प्रत्ययस्याऽबाधितत्वं विवादग्रस्तमत आह संयोगादीति । आदिना सादृश्याद्युपग्रहः । तथा च घटस्याभाव इतिवत् घटस्य संयोग इत्यादिप्रतीतिबलात् संयोगादिरपि सप्रतियोगिक इति तत्रापि घटाद्यभावत्वापत्तिः, संयोगादिव्यावृत्तं तु सप्रतियोगित्वं प्रागुक्तमेवाभावत्वसमानं पदार्थान्तरं पर्यवसन्नामिति भावः । अशक्तिविशेषोन्नायकतयैव विरुद्धस्य पार्थक्यं व्यवस्थाप-

मादौ च व्याप्तिरस्त्येवेति न स्वार्थानुमाने दोषः, परस्य तु व्यर्थत्वमधिकम्, न च विरुद्धत्वादित्यत्र शब्दाधिक्यमिति । तन्न । अर्थो हि लिङ्गं, न च व्यभिचारावारकविशेषणावच्छेदेनापि व्याप्तिर्गौरवादिति वक्ष्यते । न चार्थानुगत्या व्यर्थत्वेऽपि विरुद्धत्वादित्यत्र उद्भावनाशक्यत्वम्, आवश्यकतद्विवेचने तदुद्भावनस्य शक्यत्वादिति हेतुद्वयोपन्यासे चाधिकं प्रथमेन द्वितीयस्य कृतकर्त्तव्यताया दुष्टिबीजत्वात् । न च नीलधूमादित्यादौ विशिष्टकर्त्तव्यमन्येन केनापि कृतम् । धूमवत्त्वादित्यनेन कृतमिति चेन्न । तथाऽनुपन्यासात्, अन्यथा नीलानन्वयापत्तेः । अपरे तु साध्यानवगतसहचारः साध्याभावसहचारी विरुद्धः । अन्यथा पृथिव्यां मेयत्वेनेतर-

---

तुल्यत्वेऽपि निग्रहस्थानत्वेन विशेषाद्भेदेनोपन्यासः । अत एवानैकान्तिकसामान्यलक्षणे साधारणलक्षणे च विरोधवारकं विशेषणं छलजात्योर्निग्रहस्थानविशेषनिरनुयोज्यानुयोगविशेषत्ववदेतस्या-

---

यन्मूलं दूषयति व्यभिचारिणीत्यादिना । दूषकतायां व्याप्तिधीविरोधितायाम् । तुल्यत्वेऽपि अविशिष्टत्वेऽपि । निग्रहस्थानत्वेन अशक्तिविशेषोद्भावकत्वेन । व्यभिचारितो वैलक्षण्याद्विरुद्धस्य तदन्याभासत्वेनोपन्यास इत्यर्थः । सामान्यलक्षण इति । विरुद्धान्यपक्षवृत्तित्वे सतीत्यादिप्रागुक्तलक्षण इत्यर्थः । साधारणलक्षणे सपक्षविपक्षवृत्तित्वरूपे । ननु दूषकतायामसाङ्कर्यमेव हेत्वाभासानां भेदप्रयोजकं न तु

भेदानुमानं न विरुद्धं स्यात् साध्याभावाव्याप्यत्वात् । न च तत्साधारणम्, सपक्षासत्त्वात् । न च साध्यसहचाराज्ञानदशायां साधारणातिव्याप्तिः, तदा तस्यापि विरुद्धत्वादिति प्राहुः।तन्नाविपक्षगामित्वमात्रं दूषकमित्युक्तत्वात् । अत एव व्यभिचरितो व्यतिरेकी अनैकान्तिक एव । नापि साध्याभावसाधकत्वं तत्प्रमापकत्वं वा, साध्याभावसम्बन्धबुद्धिं विना तदज्ञानात् । नापि साध्यवदन्यत्वठयाप्यत्वम्, व्याप्यत्वविवेचने व्यर्थविशेषणत्वात् । नापि स्वव्यापकाभावप्रतियोगिसाध्यकत्वम्, साध्याभावस्य हेतुठयापकत्वप्रतीतौ हेतुसाध्याभावसम्बन्धभानस्यावश्यकत्वात् ॥

---

sनैकान्तिकविशेषसाधारणविशेषत्वेऽप्यदोषो वेति पुनराकरानुसारी पन्थाः । नापीत्यादि । व्यापकत्वं व्याप्यव्यापकसामानाधिकरण्यघटितं न वा, आद्ये साध्याभावस्येति । द्वितीये तु नाभासत्वमविरोधात् ॥

शक्तिविशेषोन्नायकत्वम्, अन्यथा व्यभिचारविशिष्टासिद्धिरपि हेत्वाभासान्तरं स्यादतः प्रकारान्तरमाह छलजात्यारिति । छलजात्योर्निग्रहस्थानविशेषात्मकस्य निरनुयोज्यानुयोगस्यावान्तरत्वेपि यथा छलत्वादिना कथायामुद्भावनं तथैव विरुद्धस्यानैकान्तिकविशेषात्मकसाधारणान्तरत्वेपि विरुद्धत्वेनोद्भावनं न दोषावहं तादृप्रयोणोद्भावनादेव अशक्तिविशेषस्य लाभादिति भावः । ननु व्याप-

उच्यते । साध्यव्यापकाभावप्रतियोगित्वं विरुद्धत्वम् । न च प्रतियोगिनोरन्वये भासमान एव तदभावयोर्व्याप्तिग्रहः, भिन्नग्राहकसामग्रीकत्वात् । अन्यथा व्यतिरेकिविलयापत्तेः । यद्वा वृत्तिमतः साध्यवदवृत्तित्वं,

---

साध्येत्यादि । हेत्वभावस्य साध्यवन्निष्ठाभावाप्रतियोगित्वज्ञानं वस्तुतस्तत्प्रतियोगिकाभावस्य हेतोः साध्यसामानाधिकरण्यग्रहं विरुणद्धीत्यभिप्रायेणदम् । यदि च तदभावाभावत्वेनासामानाधिकरण्यग्रहेऽपि तत्त्वेन सामानाधिकरण्यग्रहो न विरुध्यत इति भाव्यते तदाह यद्वेत्यादि । वृत्तिमत इति धर्मीति च पक्षधर्मत्वाविरोधित्व-

---

कत्वग्रहे सहचारज्ञानस्य हेतुतायाः स्वयमेव व्याप्तिग्रहोपाये दूषितत्वात्साध्याभावस्येत्यादिमूलासङ्गतिरतो वितर्क्य योजयति व्यापकत्वमिति । आद्य इति । हेतुमन्निष्ठाभावाप्रतियोगित्वे सति हेतुसमानाधिकरणत्वरूपं हेतुव्यापकत्वं साध्याभावस्य गृह्णतोऽवश्यं व्यभिचारग्रहादिति भावः ॥

इति जागदीश्यां विरुद्धपूर्वपक्षग्रन्थः समाप्तः ।

अथ विरुद्धसिद्धान्तः ।

ननु साध्याभावस्य हेतुव्यापकत्वं यथा नाभासः परामर्शाद्यविरोधित्वात्तथा हेत्वभावस्य साध्यव्यापकत्वमपीत्यत आह हेत्वभावस्येत्यादि । वस्तुत इति । वस्तुगत्या हेत्वभावप्रतियोगिको योऽभावस्तत्स्वरूपस्य हेतोरित्यर्थः । तदभावाभावत्वेनेति । हेत्वभावाभाव साध्यवन्निष्ठ इत्येवं साध्यसामानाधिकरण्यग्रहानुत्पादेपीत्यर्थः । साधनाभाव साध्यवन्निष्ठाभावाप्रतियोगित्वज्ञानस्य समानवि-

साध्यवद्वृत्तित्वानधिकरणत्वं, साध्यासमानाधिकरणधर्मत्वं, साध्यवद्वृत्तिस्वानधिकरणधर्मत्वं वा तत्त्वम्, न च व्यतिरेक्यतिव्याप्तिः, तत्र साध्याप्रसिद्ध्या तथा ज्ञानविरहात्। असाधारणे च सङ्कर एव, अनेनापि रूपेण तस्य दोषत्वात्। न च साध्यवद्वृत्तित्वे सति वृत्तिमत्त्वज्ञा-

---

प्रदर्शकं न तु विशेषकम्, दूषकतायामनुपयोगादव्याप्तिकरत्वाच्च। वृत्तिविशेषसूचनाय वा तत्, तेन समवायेन हेतुतायां धूमेनाव्याप्तिः। आद्ययोः साध्यवद्वृत्तित्वतदधिकरणत्वाभावौ चरमयोश्च साध्यवद्वृत्तितत्त्वाधिकरणभेदावर्थाविति भेदः। ज्ञानातिप्रसक्तिं

वयतामात्रेणैव तद्विरोधित्वादिति भावः। तत्त्वेन हेतुतावच्छेदकीभूतधूमत्वादिप्रकारेण। पक्षधर्मत्वेति। अन्यथा विरोधस्य पक्षधर्मताविरोधित्वप्रसिद्धावसिद्धावेव तदन्तर्भावः स्यादिति भावः। न त्विति। न पुनर्विरोधघटकमित्यर्थः। आनुकूल्याभावमुक्त्वा प्रातिकूल्यमप्याह अव्याप्तीति। वन्हिमानाकाशादित्यादिविरुद्धहेतोः वृत्तिमत्त्वाविरहेणाव्याप्तिकरत्वादित्यर्थः। ननु दूषणौपयिकलक्षणप्रस्तावे पक्षवृत्तित्वग्रहाविरोधित्वप्रदर्शनं सन्दर्भाविरुद्धमत आह वृत्तिविशेषेति। हेतुतावच्छेदकसम्बन्धेन साध्यवद्वृत्तित्वस्य सूचनायेत्यर्थः। नाव्याप्तिरिति। अन्यथा संयोगेनैव धूमस्य वह्निमद्वृत्तित्वाद्व्याप्तिः स्यात्। न चैवं जातिः घटत्वादित्यादौ समवायेन हेतावव्याप्तिः जातिसमवेतत्वाप्रसिद्धेरिति वाच्यम्। तत्र स्वाधिकरणावृत्तिसाध्यकत्वस्यैव विरोधत्वादिति भावः। चतुर्णां पौनरुक्त्यमाशङ्क्याह आद्ययोरित्यादि। भेद इति। न चैवं तेषामनुगतनिरुक्त्यकरणान्न्यूनत्वम्, इदमेव च मणिकृतां विरुद्धमित्यादिना प्रागेवानुगतविभाजकोपाधेः स्वयं दर्शितत्वादिति भावः। ननु पृथिवीतरेभ्यो

नात् साध्याभाववद्गामित्वज्ञानमावश्यकं तेन विना साध्यवदवृत्तित्वाज्ञानादिति वाच्यम् । उपजीव्यत्वेन भिन्नत्वात्, उपजीव्यत्वेऽपि साध्यवति न वर्त्तत इति ज्ञानं न स्वतोदूषकमिति चेन्न । असहचारज्ञानस्य वि-

---

निरस्यति न चेत्यादिना। तेनेत्यादि। साध्याभाववद्गामित्वज्ञानं विना वृत्तिमत्त्वविशिष्टसाध्यवदवृत्तित्वज्ञानापर्य्यवसानादित्यर्थः। असहचारेति। सहचारः सामानाधिकरण्यम्। व्यभिचारेति। व्यभिचारो

भिद्यते पृथिवीत्वादित्यादौ व्यतिरेकिणि पक्ष एव हेतोः साध्यवदवृत्तित्वात् तत्रातिव्याप्त्यसम्भव इत्यत आह ज्ञानेति। ननु साध्याभाववद्गामित्वज्ञानेन साध्यवदवृत्तित्वज्ञानाजननात् तेनविनेत्यादिमूलासङ्गतिरतो व्याचष्टे साध्याभाववदित्यादि । अपर्यवसानादिति। अवस्थानविरहादित्यर्थः। असति बाधके साध्याभाववद्गामित्वव्याप्यवत्तानिश्चयस्य साध्याभाववद्गामित्वानुमितिजनकत्वनियमादिति भावः। वस्तुतस्तु नचेत्यादिमूलस्य हेतुः साध्याभाववद्वृत्तिः वृत्तिमत्त्वे सति साध्यवदवृत्तित्वादित्यनुमानात्तज्ज्ञानमावश्यकमिति भावः। अत्राऽनुकूलतर्कमाह तेन विनेति । साध्याभाववद्वृत्तित्वेन विनेत्यर्थः। साध्यति। वृत्तिमत्त्वे सति साध्यवदवृत्तित्वापर्यवसानादित्यर्थः। तथा च हेतुर्यदि साध्याभाववद्वृत्तिर्न स्याद्वृत्तिमत्त्वविशिष्टसाध्यवदवृत्तिर्न स्यादिति भावः। दीधितौ अपर्यवसानादिति । गोत्वं यदि अश्वत्वाभाववद्वृत्तित्वप्रकारकज्ञानविशेष्यो न स्यात्तदा वृत्तिमत्त्वविशिष्टाश्वत्ववदवृत्तित्वप्रकारकज्ञानविशेष्यो न स्यादिति तर्कादभिमतसिद्धिरिति भावः। ननु बहुव्रीहौ उत्तरपदस्य लाक्षणिकत्वादसहचारज्ञानस्येत्यत्र न विद्यते सहचारो यत्रेति व्युत्पत्त्या सहचारपदेन सहचाराभाववतो बोधने तज्ज्ञानस्य व्याप्तिग्रहाप्रतिबन्धकत्वादसङ्गतिः सहचाराभावज्ञानत्वेनैव तथात्वात्

रोधितया व्याप्तिग्रहप्रतिबन्धकत्वात्, व्यभिचाराज्ञान-विरोधित्वेन व्यभिचारज्ञानवत्। ननु विरुद्धस्य स्वार्थानुमानदोषत्वेऽपि परार्थानुमानेऽपार्थकत्वम् अयोग्यताज्ञानेन निश्चितानन्वयादिति चेन्न। अयोग्यताज्ञानस्य विरुद्धत्वज्ञानोपजीवकत्वेन तस्यैव दोषत्वात्, बाधेऽप्येवम्। स चायं विधिसाधने त्रिविधः। साक्षात्साध्या-

---

न ज्ञायते यस्मात्तद्व्यभिचाराज्ञानमव्यभिचारज्ञानम्। तदयमर्थः, अव्यभिचरितसामानाधिकरण्यरूपाया व्याप्तेरव्यभिचारांशग्रहविरोधिग्रहविषयतया यथा व्यभिचारो हेत्वाभासस्तथा सामानाधिकरण्यांशग्रहाविरोधिग्रहविषयतया विरोधोऽपीति। स चायं विरुद्धो हेतुः। साध्याभावेति। तदभावत्वं तद्वत्ताग्रहविरोध्यभावत्वम्, तेन

अतो व्याचष्टे सहचारः सामानाधिकरण्यमिति। सहचारपदार्थः सामानाधिकरण्यमित्यर्थः। तथा च सहचारस्याभावोऽसहचार इति पूर्वपदार्थप्रधानोऽव्ययीभाव एवात्र समासः न बहुव्रीहिरिति नासङ्गतिरिति भावः। ननु सहचारसामान्याभावस्य व्याप्तिधीविरोधित्वेऽपि साध्यवदवृत्तित्वज्ञानस्य स्वतोदूषकत्वाप्राप्तिरतो व्याचष्टे सहचारः साध्यसामानाधिकरण्यमिति तु क्वाचित्कः परिभ्रष्टः पाठः। तथाचाऽसहचारज्ञानस्येतिमूलस्य साध्यासामानाधिकरण्यज्ञानस्येत्यर्थः। ननु व्यभिचाराज्ञानस्य नित्यत्वात्तद्विरोधित्वं व्यभिचारज्ञानस्य दुर्घटं न वा तद्धेत्वाभासताप्रयोजकम् अनुमितेस्तत्कारणज्ञानस्य विरोधिताया एव तथात्वादतो व्याचष्टे व्यभिचार इति। ननु विरोधितयेतिमूलस्य न व्याप्तिधीविरोधितयेत्यर्थः व्याप्तिग्रहप्रतिबन्धकत्वादित्यनेन पौनरुक्त्यापत्तेः, किं तु सामानाधिकरण्यग्रहविरोधितयेत्यर्थः तत्र च यदि व्याप्तिधीकारणीभूतस्य सामानाधिकर-

भावव्याप्यत्वात्, साध्यव्यापकाभावव्याप्यत्वात्, साध्यव्यापकविरुद्धोपलम्भात् । यथा धूमवानयं योग्यधूमवत्तया अनुपलभ्यमानत्वात्, निरग्निकत्वात्, जलाशय-

---

साध्यवदन्यत्वव्याप्यत्वोपसंग्रहः । एवमुत्तरत्रापि । साध्यव्यापकेति । अत्र व्याप्यपदं स्वरूपपरम् । साध्येत्यादि । साध्यव्यापकसामानाधिकरण्यग्रहविरोधिरूपवत्त्वादित्यर्थः । तेन साध्यव्यापकवदवृत्तित्वाद्युपसंग्रहः । सर्वत्र चोपलम्भपदं स्वरूपसिद्धिमात्र-

---

ण्यग्रहस्य विरोधित्वमभिप्रेतं तदानुमितौ तत्कारणज्ञाने वा विरोधस्य स्वतोदूषकत्वाप्राप्त्या हेत्वाभासत्वानुपपत्तिः तदवस्थैवेत्यतः फलितार्थमाह तदयमिति । सचायमित्यनेन विरोधिपरामर्शे तस्य त्रैविध्यासम्भवादसङ्गतिरतो व्याचष्टे विरुद्धो हेतुरिति । तद्वत्ताग्रहेति । साध्यवत्ताग्रहेत्यर्थः । न च साध्याभावावच्छेदकधर्मविधया साध्यवत्ताग्रहविरोधिनां तत्तदभावानां व्याप्यत्वेतिप्रसङ्गः, मूलस्थसाक्षात्पदमहिम्ना स्वरूपतः साध्यवत्ताग्रहविरोधित्वस्यैव लाभादिति भावः । एवमिति । साध्यव्यापकाभावत्वादिकमप्यग्रे साध्यव्यापकादिमत्ताग्रहविरोधित्वमेव वाच्यं तेन साध्यव्यापकवदन्यत्वादेर्नासंग्रहः । साध्यव्यापकाभावव्याप्यत्वादिपर्यवसितेन साध्यव्यापकविरुद्धत्वरूपतृतीयविभाजकेन द्वितीयस्य गतार्थत्वापत्तेराह व्याप्यपदमिति । अत एव निषेधसाधनस्थले व्याप्यपदमपरित्यज्यैवेदं मूले प्रदर्शयिष्यतीति भावः । तृतीये साध्यव्यापकविरुद्धत्वं यदि साध्यव्यापकाभावव्याप्यत्वमात्रं तदा साध्यव्यापकवदवृत्तित्वाद्यसंग्रहः स्यादतो व्याचष्टे साध्यव्यापकेति । अवृत्तित्वादीत्यादिना तादृशवृत्तिभिन्नत्वाद्युपग्रहः । मूले योग्यधूमवत्तयेत्यत्रयोग्यपदमुपलब्धेः प्रमात्वलाभार्थम् । तथा च धूमवत्त्वेनाऽप्रमीयमाणत्वादित्यर्थः । तेन योग्यधूमवत्तयानुपलभ्यमानत्वस्याऽयोग्यधूमवति साध्यसामानाधिकरण्येपि न क्षतिः । ननूपलम्भमन्तर्भाव्य विरुद्धविभाजकोपाधीनां

त्वात् । न च सर्वत्र साध्यव्यापकविरुद्धोपलम्भ इति न त्रैविध्यम् । एतदज्ञानेऽपि साध्याभावतद्व्यापकाभावठयाप्यत्वेनापि ज्ञातस्य दोषत्वात् । न च धूमवानयं तदभाववत्त्वादिति त्रयाधिकम्, स्वसमानाधिकरणात्यन्ताभावप्रतियोगित्वं हि व्यापकत्वं, तच्चाभेदेऽपि धूमवानयं धूमाभाववत्तयोपलभ्यमानत्वात् तद्वत्तयानुपलभ्यमानत्वादित्यनैकान्तिकमेव । निषेधसाधनेऽपि त्रिविधः । प्रतियोग्युपलम्भात्, साध्यव्यापकाभावोपलम्भात्,

---

फलकम् । साध्याभावेति । व्याप्यपदव्यत्यासेन साध्याभावव्याप्यत्वेन साध्यव्यापकाभावत्वेन चेत्यर्थः । स्वसमानेति । तथा च साध्याभावसाध्यव्यापकाभावयोर्निरुक्तसाध्यव्यापकाभावत्वेनानुगमान्नाधिक्यमित्यर्थः । प्रतियोग्युपलम्भात् स्वरूपतः साध्यवत्त्वग्रहविरोधित्वात् । तेन निर्वन्हिकान्यत्वादिसंग्रहः । साध्यव्यापके-

---

निर्वचनमयुक्तं तद्घटितताद्दशोपाधीनां ज्ञानस्य सर्वथैव साध्यसामानाधिकरण्यग्रहविरोधित्वादत आह दीधितौ सर्वेति । साध्यव्यापकविरुद्धोपलम्भादित्यत्र प्रतियोग्युपलम्भादित्यग्रिमेषु चेत्यर्थः । स्वरूपेति । उक्तस्वरूपाणां विरुद्धहेतौ सत्त्वप्रदर्शनमात्रफलकं न तूपलम्भघटिता अप्युपाधय इत्यर्थः । ननु साध्यव्यापकाभावव्याप्यत्वस्यापि साध्यव्यापकसामानाधिकरण्यग्रहविरोधित्वरूपत्वेन साध्यव्यापकविरुद्धत्वमध्येन्तर्भावितत्वादेतदज्ञानेपीत्यादिमूलासङ्गतिरत आह व्याप्यपदेति । तद्व्यापकाभावेत्यत्र तत्पदस्य साध्याभावपरत्वभ्रमं निराकुर्वन्नाह साध्यव्यापकाभावत्वेन चेति । अभेदेन व्यापकत्वोपगमेप्याधिक्यनिरासस्याऽस्फुटत्वादाह तथा चे-

साध्यव्यापकविरुद्धोपलम्भात्। यथा निरग्निकोऽयमग्नि-
मत्त्वात्, धूमाभावशून्यत्वात्, धूमवत्त्वात्। सर्वश्चायं

ति। अत्र व्यापकत्वं भेदाभेदसाधारणं, तेन साध्याभावव्याप्यत्व-
संग्रहः। धूमवत्त्वादिति। धूमाभावस्य वन्ह्यभावव्यापकत्वग्रहद-
शायामस्य मध्यमेऽन्तर्भावो, वन्ह्यभावव्यापकवन्हिसामग्र्या भावा-
भावव्याप्यत्वग्रहे च चरमे। इदं पुनरिहावधेयम्। कथितरूपाणि
किं स्वरूपतो ज्ञातान्येव सामानाधिकरण्यग्रहविरोधीनि असामा-

ति। निरुक्तेति। व्याप्यपदापेक्षया पूर्वनिरुक्तेत्यर्थः। इदमुपलक्ष-
णम्। साध्याभावस्यापि साध्याभावव्याप्यत्वात् प्रथमोपाधिनापि
तदनुगमान्नाधिक्यमिति द्रष्टव्यम्। साध्यवदन्यत्वादेः संग्रहार्थमाह
स्वरूपत इत्यादि। साध्यव्यापकाभावत्वादेरपि व्यावर्तकधर्मविधया
साध्यवत्ताग्रहविरोधित्वादनेनैव गतार्थत्वापत्तेः स्वरूपत इत्युक्तम्।
तथा च तेषां स्वरूपतः साध्यवत्ताज्ञानाविरोधित्वात् पृथगुपन्यास
इति भावः। ननु साध्याभावव्याप्यवत्त्वस्य स्वरूपतः साध्यवत्त्वग्र-
हाविरोधित्वेनोक्तेष्वनन्तर्भावाद्विधिसाधन इव निषेधसाधनेऽपि तस्य
दूषकत्वसम्भवाच्च तदनभिधानात् मूलस्य न्यूनत्वमत आह अत्रे-
ति। तथा च साध्यव्यापकीभूतस्य साध्यस्यैव सामानाधिकरण्य-
ग्रहविरोधितया तृतीय एव साध्याभावव्याप्यत्वस्यान्तर्भावान्न न्यू-
नत्वमिति भावः। ननु धूमाभावशून्यत्वं धूम एव तथा च तत्र वा-
स्तविकस्य साध्यव्यापकाभावत्वस्य विरहात् द्वितीये तस्योदाहरण-
त्वासङ्गतिः अन्यथा भावसाधारणस्यैव साध्यव्यापकाभावत्वस्य
निवेशे धूमवत्त्वादित्यपि द्वितीयस्योदाहरणमेव स्यादत आह धूमा-
भावस्येति। अस्य धूमवत्त्वादित्यस्य। वन्ह्यभावेति। वन्ह्यभावव्या-
पको यो वन्हिसामग्र्यभावः तदभावस्य व्याप्यत्वग्रह इत्यर्थः।
चरम इति। अन्तर्भाव इत्यनुषज्यते। तथा च भावाभावसाधार-
णमेव व्यापकाभावत्वं निविष्टं ग्राहकसामग्रीभेदवशाच्चैकस्यापि

नाधिकरण्यव्याप्यत्वेन वा, नाद्यः, व्यापकाभावव्याप्यत्वादेस्तदसम्भवात् । न द्वितीयः, साध्याभावत्वसाध्याभावव्याप्यत्वयोः स्वरूपेणैव ज्ञातयोस्तथात्वात् । तथात्वेऽपि तत्त्वमविरुद्धमिति चेत्, हन्तैवमसामानाधिकरण्यस्य समानाधिकरणावृत्तितत्तद्धर्माणाञ्च तथात्वादाधिक्यम् । न च एतानि धर्मिविभाजकान्येव, सर्वेषामेव साध्याभावव्याप्यत्वेनैकविधत्वादिति । विरोधोन्नायकप्रकारत्रैवि-

---

धूमस्य भेदेनोदाहरणत्वमिति भावः । एतदज्ञानेपीत्यादिमूलस्वरससिद्धमुक्तधर्माणां सामानाधिकरण्यधीविरोधित्वं दूषयति इदं पुनरित्यादिना । व्याप्यत्वेन वा ज्ञातानीत्यनुषज्यते । व्याप्यत्वादेरित्यादिना साध्यव्यापकवदवृत्तित्वादेः परिग्रहः । तदसम्भवादिति । साध्यव्यापकाभावव्याप्यत्वादिनिर्णयेपि हेतौ साध्यसामानाधिकरण्यज्ञानोत्पत्त्या तस्य विरोधित्वसम्भवात् तथा च साध्यव्यापकाभावत्वाद्युपन्यासोऽनुचित इति भावः । स्वरूपेणैवेति । साध्याभावत्वस्य साध्याभावव्याप्यत्वस्य वा हेतौ निर्णयेपि नियमतः तत्र सामानाधिकरण्यग्रहानुत्पादादिति भावः । शङ्कते तथात्वेपीति । स्वरूपतो ज्ञातस्य विरोधित्वेपि व्याप्यतया ज्ञातस्य विरोधित्वं न विरुद्धमित्यर्थः । एवमिति । असामानाधिकरण्यव्याप्यत्वेन येषां ज्ञानं सामानाधिकरण्यधीविरोधि तेषामपि स्वरूपतो विभजन इत्यर्थः । साध्याभावत्वादिवत्स्वरूपतः सामानाधिकरण्यव्याप्यत्वेनाधिक्यमुक्त्वा साध्यव्यापकाभावत्वादिवत् स्वरूपतस्तदविरोधिनामाधिक्यमाह समानाधिकरणावृत्तीति । तत्तद्धर्माणामिति । गोत्ववानश्वत्वादित्यादावश्वत्वादीनां तथात्वात् साध्यासामानाधिकरण्यव्याप्यत्वेन ज्ञातानां सामानाधिकरण्यधीविरोधित्वादाधिक्यमित्यर्थः । विभाजकान्येवेत्येवकारेण दूषकत्वप्रतिक्षेपः। सर्वेषामिति । तथा च साध्याभावव्याप्यत्वेन नियमतः सङ्करान्न तयोर्विभाजकत्वसम्भव इति भावः । प्राचां मतेनाह विरोधेति । कथायां विरोधोन्नायकधर्माणामुक्तत्रैविध्यनियमेनेत्यर्थः । धर्मान्तरेणापि कथायां विरोधान्नयनादुक्तनियमे मानाभाव इत्यस्वरसाद्वदन्तीत्युक्तम् । विरुद्धस्थले बाधस्व-

विशेषणद्वारापि । यथा कृष्णागुरुप्रभववन्हिमानयं कटुकासुरभिपाण्डरधूमवत्त्वात् । अयञ्च बाधाश्रयासिद्धस्वरूपासिद्धासाधारणसंकीर्णः क्वचित् ॥

ध्येन धर्मिणोऽपि त्रैविध्याभिधानमिति वदन्ति । अयञ्चेत्यादि । बाधस्वरूपासिद्ध्यन्यतरसङ्करस्तु आवश्यकोऽन्यसङ्करस्तु क्वाचित्को ज्ञानासङ्कराच्च पार्थक्यम् ॥

रूपासिद्ध्योरन्यतरस्यावश्यकत्वात्तत्र क्वाचित्कत्वासम्भवादाह बाधेति । हेतुविशेषणासिद्ध्यादिभिरपि क्वचित्साङ्कर्यसंभवादाश्रयासिद्ध्यादिपदस्योपलक्षणपरत्वमित्याशयेनाह अन्यसङ्करस्त्विति । ननु विरुद्धहेतौ बाधासिद्ध्योरन्यतरस्यावश्यकत्वे तदेवास्तु दूषणं कृतं विरोधेनेत्यत आह ज्ञानेति ॥

इति श्रीजगदीशतर्कालङ्कारविरचितायामनुमानचिन्तामणिदीधितिव्याख्यायां विरुद्धग्रन्थः समाप्तः ।

चिन्तामणेः सत्प्रतिपक्षः ।

सत्प्रतिपक्षत्वं न समानबलबोधितसाध्यविपर्य्ययलिङ्गत्वम्, परस्परप्रतिबन्धेनोभयोरबोधकत्वात् । बलञ्च न सपक्षसत्त्वादि, व्यतिरेकिण्यभावात् । नापि समानव्याप्तिपक्षधर्मतावत्त्वम्, विरोधेनैकत्र तद्वङ्गनियमात् । नापि व्याप्तिपक्षधर्मतया ज्ञातत्वम्, विरोधिव्याप्तिपक्षधर्मताविशिष्टज्ञानयोरन्यतरभ्रमत्वनियमेन नित्यत्वव्याप्तश्रावणत्वादित्वैशिष्ट्याप्रसिद्ध्याऽऽरोपयितुमशक्यत्वात् । न च साध्यव्याप्यस्य पक्षधर्मता पक्षधर्मस्य वा साध्यव्याप्यतारोप्येति वाच्यम् । एकत्र तदुभयाभावात्

दीधित्याः सत्प्रतिपक्षः ।

—०*०—

एकत्र तदुभय इति । व्याप्ये पक्षधर्मतायाः पक्षधर्मे च व्या-

जागदीश्याः सत्प्रतिपक्षः ।

ननु व्याप्ये पक्षधर्मत्वस्य पक्षधर्मे वा व्याप्यत्वस्याऽऽरोप एव लक्षणघटको न तु व्याप्तिविशिष्टपक्षधर्मत्वस्यारोप इत्येकत्रेत्यादिमूलासङ्गतिरतो भावार्थमाह व्याप्य इत्यादि । अव्यापकः सकल-

विशिष्टस्याऽप्रसिद्ध्या तद्वैशिष्ट्यस्यारोपासम्भवात्। नाप्यनिर्द्धारितविशेषेण बोधितसाध्यविपर्य्ययकत्वम्, उभयोरबोधकत्वात् । विशेषश्च न व्याप्तिभङ्गाभङ्गरूपः, एकत्र तद्भङ्गनियमात् ॥

प्यत्वस्यारोपः प्रत्येकमव्यापकोऽतो विशिष्टस्यारोपो वाच्यः, स चैकधर्मिणि विरोधिव्याप्यद्वयविरहाद्विशिष्टस्याऽप्रसिद्ध्या न सम्भवतीत्यर्थः । विरुद्धादौ साधने स्वव्यापकसामानाधिकरण्यरूपव्याप्तेरप्रसिद्धेश्चेत्यपि द्रष्टव्यम् । एकत्र तद्भङ्गेति । तथा चाऽन्यतरत्वेन तदवधारणमस्तीति भावः ॥

सत्प्रतिपक्षावृत्तिः। ननु विरोधिव्याप्त्या पक्षधर्मतया च ज्ञातत्वोक्तौ विशिष्टाप्रसिद्धिर्न क्षतिकरीत्यतः स्वयं तत्साधारणदोषमाह विरुद्धादाविति। आदिना व्यभिचार्यादुपग्रहः। तथा च पर्वतो वन्हिमान्धूमादित्यस्य प्रतिपक्षे पर्वतो न वन्हिमान्पर्वतत्वादित्यादावव्याप्तिरिति भावः। इदमुपलक्षणम्। तमो न द्रव्यमालोकानपेक्षचक्षुर्ग्राह्यत्वादित्यस्य प्रतिपक्षे तमो द्रव्यं रूपवत्त्वादित्यादौ हेतुताघटकसमवायेन पक्षवृत्तित्वाप्रसिद्ध्याऽव्याप्तिर्द्रष्टव्या । ननु व्याप्तिभङ्गो व्याप्त्यंशे भ्रमत्वं तथा चैकत्र तन्नियमेपि तदनवधारणादुक्तलक्षणं निर्दुष्टमेवेत्यत आह तथा चेति । अन्यतरत्वेन भङ्गाभङ्गान्यतरत्वेन। तथा च व्याप्त्यांशे भ्रमत्वतदभावान्यतरवत्तया निर्णयदशायां विरोधिपरामर्शद्वयात्मकप्रतिपक्षे लक्षणाव्याप्तिरिति भावः ॥

इति जागदीश्यां सत्प्रतिपक्षपूर्वपक्षग्रन्थः समाप्तः ।

उच्यते । साध्यविरोध्युपस्थापनसमर्थसमानबलोपस्थित्या प्रतिरुद्धकार्य्यलिङ्गत्वं तत्त्वम् । बलञ्च व्या-

---

सत्प्रतिपक्षितव्यवहारो हि सत्यसति वा साधने नाऽपरामृष्यमाणे नाप्यविद्यमानविरोधिपरामर्शे, अत एव सन् प्रतिपक्षो विरोधिव्याप्त्यादिमत्तया परामृष्यमाणो हेतुः विरोधिपरामर्शो वा यस्य परामृष्यमाणस्य हेतोरसौ सत्प्रतिपक्ष इति विग्रहमपि वर्णयन्ति, अतस्तदनुसारेणैव व्यवहारौपयिकं लक्षणमाह साध्येति । बाधाश्रयासिद्धिनिर्णयवारणाय समर्थान्तम् । न चासौ न व्याप्तिपक्षधर्मतात्मकबलोपस्थितिरिति वाच्यम् । व्याप्तिपक्षधर्मताविर-

---

अथ सत्प्रतिपक्षसिद्धान्तः ।

मूलोक्तसत्प्रतिपक्षोपाधेः सद्धेतावपि सत्त्वात्तत्र च हेत्वाभासासामान्यलक्षणासत्त्वादेतस्य तद्विभाजकत्वानुपपत्तिरतो व्यवहारौपयिकप्रतिपक्षपरतया मूलं समर्थयति सत्प्रतिपक्षितेति । सति समीचीने । एवमग्रेपि । अत एवेति । विग्रहमपि वर्णयन्तीत्यन्वयः । अविद्यमानलिङ्गकविरोधिपरामर्शस्थलीयप्रतिपक्षाव्याप्तेराह विरोधिपरामर्शो वेति । यस्येत्यनेन केवलहेतुबोधने तस्याऽपरामृष्यमाणतादशायामपि सत्प्रतिपक्षितत्वापत्तिरतः पूरयति परामृष्यमाणस्येति। बाधेत्यादि । काञ्चनमयह्रदो न वन्हिमानित्येवं बाधनिर्णयेन ह्रदो न काञ्चनमय इत्येवमाश्रयासिद्ध्या वा प्रतिरुद्धानुमितिस्वरूपकार्यके काञ्चनमयह्रदो वह्निव्याप्यधूमवानित्यादिपरामर्शविषये धूमादावतिव्याप्तिवारणार्थं समर्थान्तमुपस्थितिविशेषणमित्यर्थः । असौ प्रोक्तबाधादिनिर्णयः । व्याप्तिपक्षधर्मतात्मकेति । तादृशबलस्यैव मूलोक्तत्वादिति भावः । साध्यत्व इति । तथा च पर्वतो वन्हिव्याप्यधू-

दस्य साध्यत्वे पक्षतावच्छेदकत्वे वा तत्सम्भवात् । पक्षः साध्याभावव्याप्यवान् साध्यं पक्षवृत्तित्वाभावव्याप्यवदिति पक्षस्य, व्यापकभेदेन च अन्वयव्यतिरेकभेदेन च व्याप्तेश्च भिन्नत्वादेकोपादानेऽन्यासंग्रहेण बलस्याऽविवक्षितत्वाच्च । साध्यधीविरोध्यनुमितिजनकज्ञानविषयत्वेन तदुपादाय तदुपस्थित्यभिधानञ्च शिरोवे-

---

माभाववान्धूमादित्यत्र पर्वतो वन्हिव्याप्यधूमवानित्याकारेण लौकिकसन्निकर्षादिजनितेन बाधात्मकव्याप्तिपक्षधर्मतानिर्णयेन प्रतिरुद्धकार्यत्वादेतादृशधूमाभावव्याप्यधूमवत्तापरामर्शविषये धूमेऽतिव्याप्तिरिति भावः । आश्रयासिद्ध्यतिव्याप्त्यर्थमाह पक्षतावच्छेदकत्वे वेति । तथा च वन्हिव्याप्यधूमशून्यः पर्वतो वन्हिमानालोकादित्यत्र वन्हिव्याप्यधूमवत्पर्वतलक्षणाश्रयासिद्ध्यात्मकव्याप्तिपक्षधर्मत्वोपस्थित्या प्रतिरुद्धकार्यके परामृष्यमाणालोकादिहेतावतिव्याप्तिरिति भावः । ननूक्तव्याप्तिपक्षधर्मतयोः प्रकृतसाध्यानिरूपितत्वान्न तदात्मकबाधाद्यव्याप्तिरतः पक्षधर्मतायाः व्याप्तेश्चाऽननुगतत्वात्तदात्मकं बलं लक्षणे प्रवेश्यमेव नेत्याशयेनाह पक्ष इति। पक्षस्येति । एवं क्रमेण विरोधिपरामर्शीयपक्षस्येत्यर्थः । भिन्नत्वादित्यग्रेतनेनाऽन्वयः । व्यापकभेदेनेति । प्रथमे साध्याभावो व्यापको द्वितीये तु पक्षवृत्तित्वाभावस्तथेति व्यापकभेदेन विरोधिव्याप्तेर्भिन्नत्वादित्यर्थः । ननु पक्षधर्मिकसाध्यवत्तानुमितौ तद्धर्मिकसाध्याभावव्याप्यवत्ताबुद्धेरेव प्रतिरोधकत्वमते पक्षव्यापकयोर्भेदादबलस्याऽननुगमासम्भव इत्यत आह अन्वयव्यतिरेकभेदेन चेति । इदमुपलक्षणम् । व्यापकसामानाधिकरण्यरूपाया व्याप्तेः साधनभेदेनापि भेदो बोध्यः । एवं सर्वत्रैव व्याप्तिपक्षधर्मतयोर्द्वयोरपि हेतुतावच्छेदकसम्बन्धभेदादननुगमो द्रष्टव्यः । ननु विरोधिव्याप्तिपक्षधर्मतात्मकं बलमेवानुगतरूपेणोपादाय समर्थान्तं विशेषणमेव किमिति न त्यज्यते इत्यत आह साध्यधीति । प्रकृतपक्षधर्मिकसाध्यवत्ताधीविरोधिनी याऽनुमितिस्तज्जनकज्ञानविषयत्वेन विरोधिव्याप्तिपक्षधर्मतात्मकं बलमुपादेयमित्यर्थः । शिरोवेष्टनेनेति । तथा च लाघवात्समर्थान्तभागेनैवोपस्थितौ

ष्टेनेन नासिकास्पर्शमनुधावति । साध्यस्य साध्यसिद्धेर्विरोधिन्याः पक्षो न साध्यवानित्याद्युपस्थितेः, साध्यविरोधी साध्यवत्ताज्ञानप्रतिबन्धकज्ञानविषयो बाधः साध्याभावादिमत्पक्षादिः, तदुपस्थितेर्वा जननयोग्यया समानया बलोपस्थित्या तथाविधव्याप्त्यादिबुद्ध्या,

---

साध्यविरोध्यनुमितिजनकत्वस्य लाभसम्भवात्तादृशानुमितिजनकज्ञानविषयत्वमुपस्थितिविशेषणं गौरवग्रस्तमिति भावः । ननु साध्याभाववत्त्वाद्युपस्थितेः साध्यप्रतिबन्धकत्वरूपतद्विरोधित्वाभावाल्लक्षणासम्भव इत्यतो व्याचष्टे साध्यस्येत्यादि । साध्याभाववत्त्वोपस्थितिं परित्यज्य साध्यसिद्धिविरोध्युपस्थितित्वेनानुगतधर्मेण प्रवेशस्य फलं दर्शयति पक्ष इति । न साध्यवान् साध्यवद्भिन्नः । तथा च साध्याभावोपस्थितिसमर्थेत्युक्तौ साध्यवदन्यत्वादिव्याप्यवत्तापरामर्शस्थलीयप्रतिपक्षाव्याप्तिः स्यादिति भावः । उपस्थितेरित्यस्य जननयोग्ययेत्यग्रेन्वयः । साध्यपदस्य सिद्धिपरतायामाधुनिकलक्षणापत्तेः कल्पान्तरमाह साध्यविरोधीत्यादि । अत्र विरोधिपदस्य प्रतिबन्धकज्ञानविषयत्वेन बोधने शक्तिर्निरूढलक्षणा वा फलतो न कश्चिद्विशेषः । साध्याभाववत्पक्षस्योपस्थित्यभिधाने साध्यादिधर्मिकपक्षवृत्तित्वाभावव्याप्यवत्तापरामर्शदशायां सत्प्रतिपक्षाव्याप्तिरतः साध्यविरोधित्वेनानुगतानामुपस्थितिर्निवेशितेत्यावेदयितुमाह साध्याभावादिमदिति । आदिपदाभ्यां पक्षावृत्तित्वविशिष्टसाध्याद्युपग्रहः । तदुपस्थितेर्वेति । वाकारोऽनाख्यायाम् । यत्र पर्वतो वह्निमान्प्रमेयो वा धूमादित्यादौ साध्याभाववत्पक्षादिकं साध्याभावादिकं वा न प्रसिद्धं तत्रत्यस-प्रतिपक्षाव्याप्तिभिया पूर्वकल्पस्यैवानुसरणीयत्वात्तत्र च साध्यधीविरोधिन्या भ्रमरूपाया एवोपस्थितेः सौलभ्यादिति ध्येयम् । उपस्थापनेत्यत्र णिजर्थस्य विवरणं जननेति । समर्थेत्यस्य विवरणं योग्ययेति । जनकतावच्छेदकधर्मविशिष्टयेति समुदितार्थः । समानत्वस्य बलविशेषणत्वभ्रमं निराकुर्वन्नाह समानयेति । बलोपस्थित्येति यथाश्रुताभिप्रायेण । अत एव विवृणोति तथाविधेति । साध्याभावादिनिरूपितेत्यर्थः । व्याप्त्यादीत्यादिना पक्षधर्मत्वोपग्रहः । प्रागुक्तरीत्याऽननुगमात् बलस्य लक्षणाघटकत्वे तु समानया उपस्थि-

प्रतिरुद्धं कार्य्यं यस्य तादृशलिङ्गत्वमित्यर्थः । विरोधिव्याप्त्यादिविषयत्वलक्षणयोग्यताशालिन्या अप्युपस्थितेरप्रामाण्यग्रहे सत्प्रतिपक्षत्वासम्पादकत्वात् कार्य्यप्रतिरोधानुधावनम् । समानत्वञ्चाऽगृहीताप्रामाण्यकसाध्यसिद्ध्यौपयिकपरामर्शकालीनत्वम् । असति गृहीताप्रामाण्यके वा परामर्शे सत्प्रतिपक्षितत्वव्यवहारविरहात् । यत्तु प्रामाण्यनिर्णयेनाऽधिकबलतया बाधकस्य विरोधिपरामर्शस्य

त्या प्रतिरुद्धं कार्यं यस्येत्येवं योजना कार्या । ननु साध्यविरोध्युपस्थापनसमर्थोपस्थितिसमानकालीनसाध्यपरामर्शविषयलिङ्गत्वमित्येवास्तु तादृशोपस्थितिप्रतिरुद्धकार्यकत्वपर्यन्तं व्यर्थमत आह विरोधीति । शालिन्या अपीत्यनेन साध्यविरोध्युपस्थितिसमर्थत्वमादर्शितम् । परामर्शधर्मिकाप्रामाण्यज्ञानाभावस्य पृथगेवाऽनुमितिहेतुत्वमित्याशयेनेदम् । ननु हेतौ साध्यपरामर्शाभावदशायामप्रामाण्यज्ञानास्कन्दितसाध्यपरामर्शदशायां वा विरोधिपरामर्शप्रतिरुद्धकार्यकत्वसम्भवात् तदानीमपि सत्प्रतिपक्षत्वापत्तिरत आह समानत्वं चेति । साध्यपरामर्शानां व्याप्तिभेदेन नानात्वात्तेषामनुगमकं धर्ममाह साध्यसिद्ध्यौपयिकेति । प्रकृतपक्षकप्रकृतसाध्यकानुमितित्वघटितधर्मावच्छिन्नकार्यतानिरूपितकारणताशालिज्ञानकालीनत्वमित्यर्थः । साध्यसिद्ध्यौपयिकज्ञानकालीनत्वस्य फलमाह असतीति । परामर्श इत्यत्रेणान्वयः । अगृहीताप्रामाण्यकेत्यस्य फलमाह गृहीताप्रामाण्यक इति । अत्र साध्यपरामर्शे यद्यदप्रामाण्यधीदशायां न सत्प्रतिपक्षत्वव्यवहारः तत्तदप्रामाण्यज्ञानाभावकूटत्वं निवेश्यमतो न कोपि दोषः । सत्प्रतिपक्षितेति । हेतोः सत्प्रतिपक्षितत्वग्रहविरहादित्यर्थः । मिश्रमतमाह यत्त्विति । बाधकस्य साध्याभावानुमितिजनकस्य । समानेतीति । तथा च निश्चितप्रामाण्यकसाध्यपरामर्शकालीनत्वमेवोपस्थितेः समानबलत्वं मिश्राभिप्रेतमिति भावः । व्यभिचारेणेति । अनिश्चितप्रामाण्यकेनापि परामर्शेन स्वसाध्यानुमितेरुत्पादेन विपरीतानुमितेश्च प्रतिबन्धकत्वेन प्रामाण्यनिश्चयस्य जनकतावच्छेदकत्वादित्यर्थः । तथा च यावद्देकत्राऽप्रामाण्यं न गृह्यते

वारणाय समानेति । तदसत् । व्यभिचारेण प्रामाण्यग्रहस्याऽबलत्वात्, अन्यत्राऽप्रामाण्यग्रहानुकूलत्वेनैव क्वचित्तदुपयोगात् । बलपदोपसन्दानाच्चोक्तरूपलाभान्न तद्वैयर्थ्यम् । लिङ्गपदोपादानाच्च स्वीयलिङ्गतौपयिकपरामर्शलाभादात्मादेर्व्युदासः । विरोधिपरामर्शप्रतिरुद्धकार्य्यकत्वविशिष्टपरामर्शविषयत्वन्तु फलितार्थः ।

तावद्विरोधिपरामर्शयोः प्रतिपक्षितत्वमिष्टमेवेति तद्वारणार्थं समानपदं व्यर्थमिति भावः । नन्वेवं विरोधिपरामर्शस्य प्रामाण्यग्रहानुसरणं व्यर्थमत आह अन्यत्रेति । साध्यीयपरामर्श इत्यर्थः । अप्रामाण्यानुमापकव्याप्त्यादिप्रतिसन्धानस्य सार्वत्रिकत्वाभावादाह क्वचिदिति । तदुपयोगात् विरोधिपरामर्शीयप्रामाण्यनिश्चयस्योपयोगात् । ननु साध्यविरोध्युपस्थापनसमर्थसमानोपस्थित्या प्रतिरुद्धकार्यकत्वमेव यदि सम्यक् तर्हि बलं मूलकृता किमित्युपात्तमत आह बलपदेति । समानबलपदस्येत्यादिः । उक्तेति । अगृहीताप्रामाण्यकसाध्यपरामर्शकालीनत्वरूपेत्यर्थः । तथा च समानपदेनोक्तार्थलाभे तात्पर्यग्राहकतया बलपदं सफलमिति भावः । लिङ्गत्वस्य केवलान्वयित्वाद्यथाश्रुतलिङ्गपदेनात्मादेर्वारणासम्भवादाह स्वीयेति। तथा च स्वलिङ्गकप्रकृतसाध्यसिद्ध्यौपयिकत्वेनैव परामर्शो निवेशनीय इति भावः । नन्वेतावता स्वलिङ्गकप्रकृतसाध्यसिद्ध्यौपयिकागृहीताप्रामाण्यकपरामर्शकालीनसाध्यविरोध्युपस्थापनसमर्थसमानबलोपस्थित्या प्रतिरुद्धकार्यकत्वं फलितं तच्च मणिकारमते लिङ्गस्याऽकारणत्वाद्बाधितमतौ निष्कर्षमाह विरोधिपरामर्शेति । पक्षधर्मिकसाध्यविरोध्युन्नयनसमर्थस्वसमानकालीनपरामर्शप्रतिरुद्धकार्यकेत्यर्थः । स्वं साध्यीयपरामर्शः । तेन विरोधिपरामर्शाभावजन्यकार्यकत्वपर्यवसितस्य विरोधिपरामर्शप्रतिरुद्धकार्यकत्वस्य कालान्तरीयविरोधिपरामर्शमादायापि केवले साध्यपरामर्शे सम्भवात्तदानीं नातिव्याप्तिः । न च निर्वन्हिर्वन्हिशून्यो जलत्वादित्यादौ प्रकृतपक्षकप्रकृतसाध्याभावानुमित्यप्रसिद्ध्या तत्र तयोर्विरोधिपरामर्शयोः सत्प्रतिपक्षता न स्यादिति वाच्यम् । साध्यविरोधिविधेयकानु-

अगृहीताप्रामाण्यकत्वसम्बलितयोग्यतोपादाने तु बाधोपस्थितिसमर्थपरामर्शकालीनसाध्यसिद्धिसमर्थपरामर्शविषयत्वं वाच्यं तत्त्वम् ।

मितिजनकतावच्छेदकीभूतप्रकारितावच्छिन्नपक्षविशेष्यिताकनिश्चयस्य विवक्षितत्वात्, एतल्लाभार्थमेव परामर्शस्योपादानं, तदभावेन तदभावव्याप्येन वा विशिष्टधर्मिणि तद्वत्ताज्ञानस्यैवाऽनभ्युपगमेन वन्ह्यभावविशिष्टे धर्मिणि वन्हिव्याप्यवत्तापरामर्शोत्पादे बाधकाभावादिति भावः। विशिष्टेति । स्वलिङ्गकप्रकृतपक्षकसाध्यसिद्ध्यौपयिकागृहीताप्रामाण्यकपरामर्शविषयत्वमित्यर्थः । अत्रापि स्वलिङ्गकसाध्यविधेयकानुमितिजनकतावच्छेदकप्रकारित्वावच्छिन्नपक्षविशेष्यिताकनिश्चयस्य लाभार्थं परामर्शपदम् । तेन निर्वन्हिर्वन्हिमान्धूमादित्यादिस्थले प्रकृतपक्षकसाध्यानुमित्यप्रसिद्धावपि विरोधिपरामर्शयोर्नाव्याप्तिः । अनाहार्ययोरेव च विरोधिपरामर्शयोः सत्प्रतिपक्षव्यवहारौपयिकत्वात् वान्हिमान् वन्हिव्यभिचारिधर्मादित्यादिस्थलीयपरामर्शयोरसंग्रहेपि न क्षतिरिति ध्येयम् । अथाऽगृहीताप्रामाण्यकपरामर्शत्वेनैवानुमितिहेतुत्वं, परामर्शधर्मिकतत्तदप्रामाण्यज्ञानाभावत्वेन परामर्शत्वेन च प्रत्येकरूपेण अनुमितिहेतुत्वे स्वधर्मिकभ्रमत्वावगाह्येकपरामर्शोत्तरं साध्यस्य परामर्शान्तरादनुमित्यनुत्पादापत्तेः, तदप्रामाण्यज्ञानव्यक्तेरपि अनुमितिविरोधित्वात्, अन्यथा द्वितीयपरामर्शोत्पादक्षणे एव अनुमित्यापत्तेः तथा च विरोधिपरामर्शस्याऽप्रामाण्यज्ञानदशायां साध्यविरोध्युन्नयनस्वरूपयोग्यत्वाभावादेव तस्य सत्प्रतिपक्षत्वासम्पादकत्वात् कार्यप्रतिरोधानुधावनं विफलमित्याशयेनाह अगृहीतेत्यादि । बाधोपस्थितिसमर्थेति । प्रकृतपक्षकप्रकृतसाध्यसिद्ध्यौपयिकसाध्यसिद्धिविरोध्युन्नयनस्वरूपयोग्येत्यर्थः । तेन साध्यवदन्यत्वादिव्याप्यवत्तापरामर्शस्याप्युपग्रहः । निरुक्तपरामर्शकालीनत्वं तादृशपरामर्शविशिष्टत्वम् । तेन पुरुषान्तरीयविरोधिपरामर्शकालीनत्वमादाय नातिप्रसङ्गः । साध्यसिद्धिसमर्थेति । प्रकृतपक्षकस्वलिङ्गकसाध्यानुमितिस्वरूपयोग्येत्यर्थः । साध्यीयपरामर्शस्याऽप्रामाण्यज्ञानदशायां न साध्यानुमितिस-

सिपक्षधर्मते । विरोधिबोधकान्यगमकतौपयिकरूपसम्पत्तिमत्तया ज्ञायमानेन प्रतिरुद्धकार्य्यत्वं वा तत्त्वम् । स्थापनाया व्याप्तिपक्षधर्मत्वमुभयवादिसिद्धम्, वादिना

यदि चायं वन्हिव्याप्यवान् वन्ह्यभावव्याप्यव्याप्यवांश्चेति परामर्शादयं वन्हिमान् वन्ह्यभावव्याप्यवांश्चेत्यनुमितिः प्रामाणिकी न तु सत्प्रतिपक्षत्वं, तदा कार्य्यप्रतिरोधोऽवश्यमुपादेयः, अजनितविरोधिबोधकत्वेन च विरोधिपरामर्शो विशेषणीयः । अत एवाऽग्रिमलक्षणे विरोधिबोधकान्येति फलतो ज्ञानविशेषणम् । एकस्याऽप्रामाण्यग्रहेऽपरेणानुमितिजननात् तद्वारणाय वा तत् । प्रतिरुद्धकार्य्यत्वञ्च प्रतिरुद्धकार्य्यपरामर्शविषयत्वम् । एकदेशादि । न च द्वितीयस्य

मर्थत्वमतो नातिप्रसङ्गः । विरुद्धयोरनाहार्यैकनिर्णयागोचरत्वानियमादेकत्र धर्मिणि वन्हेस्तदभावव्याप्यवत्तायाश्च समूहालम्बनानुमित्यसम्भवाद्यदिचेत्युक्तम् । न त्विति । न पुनः फलीभूतेन वन्ह्यभावव्याप्यवत्तापरामर्शेन प्रागुपजातवन्हिव्याप्यवत्तापरामर्शस्य कार्यप्रतिरोध इत्यर्थः । अवश्यमिति । विरोधिपरामर्शप्रतिरुद्धकार्यक एव परामृष्यमाणहेतौ प्राचां मते प्रतिपक्षितव्यवहारादिति भावः । नन्वेवमपि तत्रैव वन्हिव्याप्यवत्तापरामर्शेन प्रतिरुद्धकार्यके वन्ह्यभावसाध्यकपरामर्शविषयहेतावतिव्याप्तिस्तादवस्थ्यमत आह अजनितेति । अत एवेति । यत एवाऽजनितफलकस्यैव विरोधिपरामर्शस्य प्रतिपक्षितव्यवहारोपयोगित्वमत एवेत्यर्थः । समासनिविष्टतया यथाश्रुतस्य गमकतौपयिकरूपेणैव साकाङ्क्षत्वादाह फलत इति । स्वमते प्रागुक्तसमूहालम्बनानुमितेरप्रामाणिकत्वात्तद्वारणासम्भवादाह एकस्येति । परामर्शस्येति शेषः । तत् विरोधिबोधकान्यपदम् । लिङ्गस्यानुमित्यजनकत्वादव्याप्तेरात्मादावतिव्याप्तेश्चाग्रिमलक्षणस्थापि प्रतिरुद्धकार्यकत्वबलं व्याचष्टे प्रतिरुद्धेति । मूले उभयोरि-

तदभावानुपन्यासात्, द्वितीयस्य तत्त्वमन्यतरासिद्धमिति प्रथमेन द्वितीयं बाधितमिति स्वार्थानुमान एवायं दोष इत्येके । तन्न । एकदा निरन्तरयोर्वोभयोर्व्याप्तिपक्षधर्मतया ज्ञातयोः प्रतिपक्षत्वात्। युगपदुपस्थितेश्च कारणवशेन स्वपरसाधारणत्वात् । अथ वस्तुनोऽद्वयात्मकत्वेन व्याप्तिपक्षधर्मताभङ्ग एकत्रावश्यक इति स एव दोषः । न च तयोर्विरोधभङ्गेऽप्युपपत्तेर्न व्याप्त्यादिभङ्गनियम इ-

---

परामर्शस्योत्पादनसमये पूर्वेणानुमितिजननात् कथं नैरन्तर्यमिति वाच्यम्। साधकमानादिवशेन क्षणमनुमित्यनुत्पादसम्भवात्। स्वपरेति । अयं भावः । न खलु सम्भवन्तः सर्वः एव हेत्वाभासाः समुद्भाव्याः, आधिक्यप्रसङ्गात्, परन्तु यथाकाममेकः, तथा च प्रतिपक्षोद्भावनेऽपि नाऽप्रतिषेधमात्रेण व्याप्त्याद्यभ्युपगम इति। प्र-

---

त्यस्य हेत्वोरित्यर्थः । ज्ञातयोरित्यत्र च भावे क्तः। तथा चैकदा क्रमिकयोर्वा हेतुद्वये व्याप्तिपक्षधर्मताज्ञानयोः प्रतिपक्षत्वादित्यर्थः। दीधितौ साधकमानादीत्यादिपदेन विरोधिपरामर्शसामग्र्या अपि साध्यानुमितिविरोधित्वात्तदुपग्रहः। द्वितीयपरामर्शोत्तरकालं तेनैव पूर्वाधीनानुमितेः प्रतिरोधसम्भवादाह क्षणमिति । ननु स्वपरेत्यादिमूलेन युगपदुत्पन्नयोर्विरोधिपरामर्शयोः परार्थस्थले प्रतिपक्षत्वव्यवस्थापनेप्याशङ्कितं क्रमोत्पन्नयोस्तथात्वं नोपपादितमेवेत्यतो भावमाह अयमिति। सर्व एवेति । समयबन्धं विनेत्यादिः । आधिक्यप्रसङ्गादिति । आधिक्याख्यनिग्रहस्थानप्रसङ्गादित्यर्थः । साधनद्वये इव दूषणद्वयेप्याकाङ्क्षाविरहस्याऽविशिष्टत्वादित्यर्थः । तथा चाधिक्यभियैव स्थापनाहेतौ प्रतिवादिना व्याप्त्यादिविरहानुपन्यास-

ति वाच्यम् । अविरोधेऽप्यनुमित्यविरोधात्, विरोधे तु व्याप्तिभङ्गनियमादिति चेन्न । प्रतिरुद्धत्वज्ञानानन्तरं व्याप्त्यादिभङ्गज्ञानमित्युपजीव्यत्वेन व्यभिचारवदस्यापि दोषत्वात् । ननु साध्यतदभावयोरिव तद्व्याप्यत्वेनावधारितयोर्विरोधादेकत्र ननिश्चयः किन्तु संशयः, निश्चये वाऽन्यतरव्याप्तिसंशय इति व्याप्यत्वासिद्धिरिति चेन्न । उभयोरेकत्र निश्चयानन्तरमन्यतरव्याप्तिसंशय इत्युपजीव्यत्वेनाऽस्य भिन्नत्वात्। दूषकताबीजन्तु समबलवि-

---

तिरुद्धत्वेति । प्रतिरोधप्रयोजकविरोधिव्याप्त्यादीत्यर्थः । उभयोरिति । परस्परभावव्याप्यत्वं हि हेत्वोर्विरोधः, तदग्रहे च तयोरेकत्र निर्णयो न विरुध्यते इति भावः । दूषकतेति । विरोधिपरामर्शस-

---

म्भवान्न तस्य व्याप्त्यादिकं प्रतिबन्धिसिद्धमिति तस्य बाधकत्वायोगात् परार्थस्यलेपि क्रमोत्पन्नयोर्विरोधिपरामर्शयोः प्रतिपक्षविधया दोषत्वं सम्भवत्येवेति भावः । ननु कार्यानुत्पादरूपप्रतिरुद्धत्वस्य ज्ञानं न व्याप्त्यादिभङ्गज्ञानस्योपजीव्यं न वा तथात्वेपि विरोधिपरामर्शयोर्दोषत्वसम्भव इत्यत आह प्रतिरोधप्रयोजकेति । ननु मिथो विरुद्धयोः साधनयोरेकत्र निश्चयस्यासम्भवस्य प्रागुक्तत्वादुभयोरेकत्र निश्चयोत्तरमित्याद्यसङ्गतमत आह परस्परभावेति । तदग्रहे चेति । हेत्वोः परस्परभावव्याप्यत्वाग्रहे चेत्यर्थः । तथा च तद्ग्रहस्य सत्त्वासत्त्वाभ्यामेव शङ्कासिद्धान्ताविति भावः । विरोधिसामग्र्याः सत्त्वे साध्यविरोध्यनुमित्यावश्यकतया प्रतिपक्ष एव न सम्भवतीत्यतो विरोधिसामग्रीपदमसाधारणकारणपरं वाच्यमित्याशयेन व्याचष्टे विरोधीत्यादि । तस्य विरोधिपरामर्शस्य । स्वरूपसतो व्याप्त्या-

रोधिसामग्रीप्रतिबन्धेन निर्णयाजनकत्वं, न तु व्याप्ति-पक्षधर्मताविरह एव । सद्धेतोरपि सत्प्रतिपक्षत्वात् । एकत्र व्याप्तिभङ्गज्ञानद्वारा वाऽस्य दूषकत्वम् । चक्षु-

---

त्वे नियमेन परामर्शान्तरादनुमित्यनुत्पादः तस्यानुमितिविरोधित्वं कल्पयति न तु तेन ज्ञाप्यमानस्य व्याप्त्यादिविरहस्य, सद्धेतावपि तस्यानुमितिविरोधित्वादित्यर्थः । व्याप्त्यादिविरहज्ञानद्वारा अस्य दूषकत्वमाह एकत्रेति । वाकारोऽनास्थायाम् । प्राथमिकावश्यकानुमितिप्रतिरोधेनैव तथात्वात् परमुखनिरीक्षकत्वेन तद्विषयस्याऽऽभासत्वायोगाच्चेति । ननु विरोधिपरामर्शो यदि विपरीतनिर्णयवि-

---

दिविरहस्य दोषत्वे व्यभिचारिहेतुकानुमितिः कदापि न स्यादत आह तेनेति । विरोधिपरामर्शेन ज्ञाप्यमानस्येत्यर्थः । इत्थं च मूलेऽपि व्याप्तिपक्षधर्मताविरह एवेत्यस्य ज्ञायमान इति शेषः । विरहस्येति । विरोधित्वं कल्पयतीत्यनुषज्यते । तस्य विरोधिपरामर्शस्य । सद्धेतौ व्याप्त्यादेर्विरहस्यासम्भवादिति भावः । पक्षधर्मताभङ्गानुक्त्या मूलस्य न्यूनतामपाकुर्वन्नाह व्याप्त्यादीति । तथा च मूले व्याप्तिभङ्गेत्यत्र व्याप्तिपदमनुमित्यौपयिकपरमिति भावः । अनास्थायां हेतुमाह प्राथमिकेति । विरोधिपरामर्शाभ्यां व्याप्त्यादिभङ्गकल्पनादशायामप्यनुमितेरनुत्पत्त्या प्राथमिकेन साक्षादनुमितिप्रतिरोधेनैव तयोर्दूषकत्वादित्यर्थः । ननु साक्षात् दूषकत्वं न व्यापारद्वारा दूषकत्वस्य बाधकं द्वयोः समावेशे क्षत्यभावादत आह परमुखेति । तद्विषयस्येति । विरोधिपरामर्शस्येत्यर्थः । अयोगादिति । अनुमितेस्तत्करणज्ञानस्य वा साक्षाद्विरोधिन एव हेत्वाभासत्वादन्यथोपाधेरपि तथात्वापत्तेरिति भावः । चक्षुरित्यादिमूलस्याऽर्थान्तरत्वं निराकुर्वन्नाह नन्विति । विशेषस्य पीतत्वाद्यभावव्याप्यस्य

रादेश्च नानुमानेन प्रतिरोधः, तदुपस्थितावपि फलदर्शनेन तस्याधिकबलत्वात् । नन्वेवं वादिवाक्यमात्रस्य प्रतिरोधकत्वे अनुमानमात्रोच्छेदः । न च विरोधिवाक्यस्य न्यूनबलत्वे लक्षणायोगः, समानबलत्वे प्रतिरोध एव, अधिकबलत्वे नरशिरःशौचानुमानवत्तेन बाध एवेति वाच्यम् । अगृह्यमाणविशेषदशायां प्रतिवादिवाक्येन सर्वानुमानप्रतिरोधापत्तेः । अनुमानात् पूर्वं पश्चाद्वा अनुमानान्तरेण तस्य न्यूनाधिकबलत्वानिरूपणात्, निरूपणे वानुमानवैयर्थ्यापत्तेः । मैवम् । विरोधिवाक्यमात्रस्य समबलत्वाभावात् । उक्तं हि व्याप्तिप-

---

रोधी कथं तर्हि सति विशेषदर्शने नयनादिजन्मा पीतत्वादिभ्रम इत्यत आह चक्षुरादेश्चेति । चस्त्वर्थः । अथ व्याप्तिपक्षधर्मते यदि

दर्शन इत्यर्थः । भ्रम इत्युपलक्षणम् । लौकिकस्यापि तद्वत्ताप्रत्यक्षस्य तदभावविशेषदर्शनदशायामनुपपत्तिर्द्रष्टव्या । ननु विरोधिपरामर्शदशायां तद्वत्तया शाब्दादिबोधाद्यनुत्पत्त्या चकारस्य शाब्दादिप्रमाणसमुच्चायकत्वानुपपत्तिरत आह चस्त्विति । मूले तदुपस्थितावपीति । विरोधिव्याप्यवत्त्वस्योपस्थितावपि फलस्य तद्वत्ताप्रत्यक्षस्य दर्शनात्तस्य चक्षुरादेरधिकबलत्वात् तद्वत्ताप्रत्यक्षप्रतिबन्धकासमवहितत्वादित्यर्थः । तथा च दोषविशेषाद्यजन्यबुद्धि प्रत्येव विरोधिपरामर्शत्वेन प्रतिबन्धकत्वमिति भावः । मूले प्रतिरोधकत्वे विरोधिधीजनकत्वे । लक्षणायोगः इति । वादिवाक्यजन्योपस्थितेरनुमितिरूपकार्य्यप्रतिबन्धकत्वेन तत्र प्रागुक्तसत्प्रतिपक्षलक्षणायोग

क्षधर्मते बलमिति । प्रत्यक्षादेर्लिङ्गभावेनैवानुमानप्रतिरोधः, कथायां तदुपन्यासानर्हत्वात् । यत्तु विरोधिव्याप्यद्वयस्याऽसाधारणत्वात् संशयजनकत्वं दूषकताबीजमिति । तन्न । एकैकं हि सत्प्रतिपक्षं न तु विशिष्टम्, एकैकञ्च न संशायकमिति । अनुमितिप्रामाण्यग्राहकाप्रवृत्तिर्दूषकताबीजमित्यन्ये । तन्न। परस्परप्रतिबन्धेनाऽनुमितेरेवाऽनुत्पत्तेः ।

बलं, कथं तर्हि प्रत्यक्षादेः प्रतिरोधकतया कथायामुपन्यास इत्यत आह प्रत्यक्षादेरिति। अत्र हेतुमाह कथायामिति। प्रत्यक्षस्य स्वरूपसत्त्वयैव बोधकत्वात् विरोधिवाक्यमात्रस्यानुमित्यविरोधित्वात् बोध्याभावव्याप्यवत्तानिर्णयत्वेनैव शाब्दादिबोधप्रतिरोधाच्चेति ।

इत्यर्थः । ननु तदभावलिङ्गत्वेनाऽगृहीतस्यापि तदभावग्राहकप्रत्यक्षादिप्रमाणस्य स्वतस्तद्वत्तानुमानप्रतिरोधकत्वाल्लिङ्गभावेनैवेत्यत्र एवकारासङ्गतिरतः कथास्थलाभिप्रायेण मूलं योजयितुमाह दीधितौ· अथ व्याप्तीत्यादि । प्रत्यक्षादेरित्यादिपदेन तदभावग्राहकवाक्योपग्रहः । प्रत्यक्षादेरितीतिथा च ह्रदो न वह्निमान् वन्ह्यभावग्राहकप्रत्यक्षप्रमाणवत्त्वात्तादृशवाक्यवत्त्वाद्वेत्याद्युपन्यासस्थले लिङ्गभावेनैव प्रत्यक्षादेरनुमानप्रतिरोधकत्वमतो नासङ्गतिरिति भावः । अत्र लिङ्गभावेन प्रतिरोधकत्वे। इत्थं च मूले तदुपन्यासानर्हत्वादित्यत्र तस्य लिङ्गभावानापन्नप्रत्यक्षादेः कथायामुपन्यासानर्हत्वादित्यर्थः । ननु तदभावव्याप्यस्येव तदभावग्राहकप्रत्यक्षस्यापि विरोधिसामग्रीत्वाल्लिङ्गभावं विनापि तदुपन्यासे बाधकाभाव इत्यत आह प्रत्यक्षस्येति। बोधकत्वात् विरोधिबोधकत्वात् । तथा च यस्य ज्ञातस्य विरोधिसामग्रीत्वं कुत इत्याकाङ्क्षानुरोधात्तदेव कथायामुपन्यस्यते विपरी-

रत्नकोषकारस्तु सत्प्रतिपक्षाभ्यां प्रत्येकं स्वसाध्यानुमितिः संशयरूपा जन्यते, विरुद्धोभयज्ञानसाम-

---

रत्नकोषकृतामयमभिप्रायः । एकधर्मिकाविरुद्धानेकप्रकारकनानाधर्मिकैकविरुद्धाविरुद्धनानाप्रकारकज्ञानत्वादिवदेकधर्मिकविरु-

---

तग्राहकप्रत्यक्षं च ज्ञातं सन्न तथेति उपन्यासानर्हमिति भावः । नन्वेवमपि विपरीतार्थकवाक्यस्य पदार्थोपस्थित्या ज्ञातस्यैव विरोधिसामग्रीत्वात्तस्यैव लिङ्गभावं विनोपन्यासार्हत्वसम्भवान्मूलस्थैवकारासङ्गतिरेवेत्यत आह विरोधीति । मात्रपदेन पदार्थोपस्थित्यादिव्यवच्छेदः । तथा च ज्ञातस्यापि विपरीतार्थकवाक्यस्य पदार्थोपस्थित्याद्यभावदशायां विरोधिसामग्रीत्वाभावान्न तन्मात्रस्यानुमितिविरोधित्वमिति लिङ्गभावेनैव तस्योपन्यस्तस्य तथात्वं वाच्यमिति भावः । ननु तथापि पदार्थोपस्थितिसहकृतानामेव ज्ञातविरोधिवाक्यानां विपरीतार्थकस्य शाब्दे अन्ततो मानसे वा विरोधिधीसामग्रीत्वसम्भवात् विनापि लिङ्गभावं तेषामुपन्यासे बाधकाभाव इत्यत आह बोध्याभावेति । विरोधिवाक्यस्य यदूबोध्यं तदभावव्याप्यवत्तानिश्चयेनैव स्थापनाजनितस्य विरोधिवाक्याधीनस्य शाब्दादिबोधस्य प्रतिरोधाच्चेत्यर्थः । तथा च उक्तक्रमेणापि विपरीतवाक्यस्य न विरोधिधीसामग्रीत्वमिति भावः ॥

ननु विशेषदर्शनदशायां प्रात्यक्षिकसंशयस्यानुत्पत्त्या संशयत्वावच्छिन्नं प्रत्येव विरोधिव्याप्यदर्शनाभावस्य हेतुत्वकल्पनाद्विरोधिव्याप्यवत्त्वनिश्चयसत्त्वे संशयाकारानुमितिस्वीकारो रत्नकोषकृतामनुचित इत्यत आह रत्नेत्यादि । विरुद्धानेकप्रकारकत्वघटितस्य संशयत्वस्य जन्यतावच्छेदकत्वे अविरुद्धानेकप्रकारकत्वघटितस्यापि तथात्वं स्यादित्याह एकधर्मिकेत्यादिना । एकधर्मिकत्वघटितस्य संशयत्वस्य जन्यतावच्छेदकत्वे नानाधर्मिकत्वघटितस्यापि तथात्वं स्यादित्याह नानाधर्मिकेति । ज्ञानत्वादिवदित्यादिपदेन नानाधर्मिकैकप्रकारक-

न्याः संशयजनकत्वात्, संशयद्वारा अस्य दूषकत्वम्। न च संशयरूपा नानुमितिः बाधस्येव विरोध्युपस्थितेरनुमितिसामग्रीविघटकत्वेनाऽवधारणात्, अन्यथा बाधे-

---

द्धानेकप्रकारकज्ञानत्वरूपं संशयत्वं न जन्यतावच्छेदकं, तत्तद्धर्मिकतत्तत्प्रकारकज्ञानत्वप्रयोजकसमाजप्रयोज्यत्वात् समाजस्य। क्व चिद्विरोधभानस्यापि तत्प्रयोजकाधीनत्वात्। नीलेतरघटत्वघटत्वाप्रकारकज्ञानत्वैकधर्मिकाविरुद्धानेकप्रकारकान्यज्ञानत्वादिवच्च संशयान्यज्ञानत्वादिरूपं निश्चयत्वमपि न जन्यतावच्छेदकं, तत्त्वप्रयोजकविरहादेव तत्त्वविरहाद्युपपत्तेः। एवञ्च तुल्यबलाभ्यां वि-

---

स्वादेः परिग्रहः। जन्यतावच्छेदकमिति। तथा च उक्तकार्यकारणभावविरहादनुमितेः संशयत्वं नाऽनुपपन्नमिति भावः। ज्ञानत्वप्रयोजकति। तादृशज्ञानत्वावच्छिन्ननियामकेत्यर्थः। समाजस्य संशयत्वघटकधर्माणां मिलनस्य। ननु विरोधिसत्त्वेनोभयप्रकारकत्वलक्षणं संशयत्वमवश्यं कारणनियम्यमत आह क्व चिदिति। तत्प्रयोजकं विरोधभानप्रयोजकम्। तथा च विरोधमविषयीकृत्यापि संशयेत्यादात्तज्ज्ञानार्थं संशयत्वं न जन्यतावच्छेदकमिति भावः। नन तथापि तद्विधेयकनिश्चयाकारानुमितित्वावच्छिन्नं प्रत्येव तद्व्याप्यत्वज्ञानं निश्चयस्य हेतुत्वादनुमितेः संशयत्वं दुर्वचमत आह नीलेत्यादि। तदभावप्रकारकेतरत्वघटितस्य तन्निश्चयत्वस्य जन्यतानवच्छेदकत्वे भेदघटितं नीलेतरघटत्वं दृष्टान्तः। तदप्रकारकत्वघटितस्य तदभावनिश्चयत्वस्य जन्यतानवच्छेदकत्वे सुसदृशं दृष्टान्तमाह घटत्वाप्रकारकेत्यादि। एकधर्मिकविरुद्धोभयप्रकारकज्ञानात्मकसंशयत्वघटितस्य निश्चयत्वस्य जन्यतानवच्छेदकत्वे तत्सदृशं दृष्टान्तमाह एकधर्मिकेत्यादि। तत्त्वं तदभावप्रकारकत्वादि। विरहादीत्यादिना तद्भेदस्योपग्रहः। एवं चेति निश्चयत्वस्य जन्यतानवच्छेदकत्वे

ऽप्यनुमित्यापत्तेरिति वाच्यम् । अधिकबलतया बाधेन प्रतिबन्धात् तुल्यबलत्वादनुमितिः स्यादेव, सामग्रीसत्त्वात् । साध्याभावबोधस्य च तत्र प्रतिबन्धकत्वं न तु तद्बोधकस्य चक्षुरादेः । प्रत्येकं निर्णायकत्वेनावधारितात् कथं संशय इति चेन्न । प्रत्येकाद्धि ज्ञानमुत्पद्य-

---

रुद्धोभयसामग्रीभ्यां जायमानं ज्ञानमर्थात् संशयरूपं भवति । अत एवाहत्यैव विप्रतिपत्तिजन्मानं संशयमामनन्ति । फलबलकल्पनीयश्च न्यूनाधिकसमबलभावः । सत्यामपि पीतत्वशुक्लत्वस्मृतौ सविधवर्त्तिनि शङ्खे सति दोषविशेषे पीतत्वस्यैवाऽऽतत्व शुक्लत्वस्यैव दूरस्थे च धर्मिणि असति विशेषदर्शने स्मृतयारेव कोट्योः सति

त्वेत्यर्थः । नन्वेवं संशयमात्रस्यैव साक्षात्कारत्वनियमात् तत्सामग्रीविरहे कुतः संशयात्मिकानुमितिरत आह अत एवेति । आहत्यैति । समानानेकधर्मादिसूत्रस्वरसात् विप्रतिपत्तिवाक्यतः शाब्द एव संशयो न तु तत्प्रत्येकपदार्थोपस्थित्यनन्तरं मानसः स इति शाब्द एव संशये व्यभिचारादुक्तनियम एव नास्तीत्यर्थः । ननु सामग्र्यास्तुल्यबलत्वं दुर्वचमतो न्यूनबलत्वादिकमित्र तदपि फलतर्के वाच्यमित्याह फलबलेति । भ्रमसामग्र्या बलवत्त्वं दर्शयन्नाह सतीति । पीतत्वस्यैवेति । नयनेन ग्रहादित्यन्वयः । चक्षुरादिपित्तादिदोषेण शुक्लत्वभ्रमसामग्र्या न्यूनबलत्वादिति भावः । प्रमासामग्र्या अधिकबलत्वं दर्शयन्नाह असति चेति । दोषविशेष इति पूर्वेणान्वयः । शुक्लत्वस्यैवेति । दोषात्मककारणविरहेण पीतत्वभ्रमसामग्र्या हीनबलत्वादिति भावः । अनुमितावित्र अन्यत्रापि सामग्र्योस्तुल्यबलत्वं दर्शयन्नाह दूरस्थे चेति । पित्तादीनामिव विशेषदर्शनस्याप्यधिकबलत्वसम्प्रदकत्वं दर्शयन्नाह सति चेति । एककोटिविशेषदर्शने सति तत्काल-

मानमर्थात् संशयो न तु प्रत्येकं संशयजनकत्वमिति मेने । तन्न । साध्यतदभावयोर्विरोधेन यथैकज्ञानस्यापरधीप्रतिबन्धकत्वं तथा साध्याभावव्याप्यवत्त्वस्यापि साध्यविरोधित्वात्तद्बुद्धेरपि साध्यधीप्रतिबन्धकत्वात् विरोधिज्ञानत्वस्य प्रतिबन्धकत्वे तन्त्रत्वात् ।

निबन्धे तु हेत्वाभासानां फलद्वारकं लक्षणम्।

च एकस्या एव नयनेन ग्रहात् । अथैवमुद्बुद्धाभ्यां विरोधिसंस्काराभ्यां स्मरणमपि संशयात्मकं स्यात्, किं न स्याद्यदि च नाऽनुभवबाधः, येन गुरुणापि निश्चयत्वेन संस्कारजनकत्वमुपेयते भवता । अथ विरोधिनो निर्णयोऽनुमितिप्रतिबन्धको विरोधित्वञ्च

रेव नयनेन ग्रहादित्यर्थः । न चोभयकोट्योर्विशेषदर्शने सति तयोर्नायनोपि संशयः स्यादिति वाच्यम् । तादृशफलादर्शनेन तत्र सामग्र्योः समबलत्वाकल्पनादिति भावः । ननु संशयस्य साक्षात्कारत्वानियमे स्मृतिरपि संशयः स्यादित्याशङ्क्य ते अथैवमिति । विरोधीति । एकधर्मिकतत्तदभावप्रकारकसंस्काराभ्यामित्यर्थः । न चोद्बोधकानां विशिष्यैव स्मृतिहेतुत्वादेकधर्मिणि तत्तदभावयोरेकदोद्बोधक एव संस्कारयोरसम्भवीति वाच्यम् । यस्य पुंसः समानधर्मिकतत्तदभावचाक्षुषसामग्र्योरिव समानधर्मिकतत्तदभावगोचरस्मृतिद्वयं अनुगतरूपाभ्यामुद्बोधकस्य हेतुत्वं तत्रैव च विरुद्धसंस्कारयोरेकदोद्बोधसम्भवादिति भावः । उत्तरयति किं न स्यादिति । आनुभविकत्वे स्मृतेः संशयत्वमिष्टमेव तद्बाधे तूभयकोट्योर्विशेषदर्शनदशायामेकधर्मिकतत्तदभावचाक्षुषसामग्र्योरिव समानधर्मिकतत्तदभावस्मृतिसामग्र्योरपि मिथो विरोधित्वं कल्प्यमिति भावः । अनुभवबाधस्तु त्वयाप्युच्यते इत्याह येनेति ।

सहानवस्थायित्वं साध्याभावस्येव तद्व्याप्यस्यापीति चेत् । यदि वस्तुतो विरोधिनो निर्णयस्तथा, कथं तर्हि पक्षतावच्छेदकादेस्तादृशस्य निश्चये भ्रमानुमितिः । अथ विरोधित्वेन, तदा तदग्रहे नेह साध्यमित्यादिनिर्णयेऽप्यनुमितिप्रसङ्गः । अथ विशेषदर्शनं विरोधिबुद्धिप्रतिबन्धकं कथमन्यथा तदनन्तरं न भ्रमसंशयाविति चेन्न। सत्यपि शुक्लत्वादिव्याप्यदर्शने शङ्खादौ दुष्टेन नयनेन पीतत्वादेरदुष्टेन च पीतत्वादिव्याप्यवत्तानिश्चये सत्यपि शुक्लत्वादेर्ग्रहात्, सति

निश्चयत्वेन हेतुत्वोक्तावपि अनुगतोद्बोधकस्थले स्मृतेः संशयत्वव्वारणासम्भवात् सोपहासमाह उपेयते भवतेति । मूलोक्तं सिद्धान्तं निरसितुमाशङ्क्यते अथेति। प्रतिबन्धक इति । अन्यथा बाधनिर्णये अनुमित्यापत्तेरिति भावः । ननु विरोधित्वं यदि तद्वत्ताग्रहप्रतिबन्धकग्रहविषयत्वं तदा विरोधिव्याप्यवत्तायास्तदसिद्धमत आह विरोधित्वं चेति । वस्तुत इति । वस्तुगत्या यः साध्यविरोधी तन्निश्चयो यदि प्रतिबन्धक इत्यर्थः । तादृशस्य साध्यविरोधिनः । विरोधित्वेनेति । निर्णयस्तथेत्यनुषज्यते । तदग्रहे विरोधित्वाग्रहे । नेह साध्यमिति । न चैवं साध्याभावस्याऽप्यव्याप्यवृत्तित्वभ्रमेपि तन्निश्चयः साध्यवत्ताबोधविरोधी स्यादिति वाच्यम् । अप्रामाण्यादेरिव अव्याप्यवृत्तित्वादेरपि ज्ञानस्योत्तेजकत्वादिति भावः । तदनन्तरमिति । तदभावव्याप्यवत्तानिश्चयोत्तरं न तस्य भ्रमः संशयो वेत्यर्थः । न तावद्विशिष्टधीसामान्ये विशेषदर्शनत्वेन प्रतिबन्धकत्वं किं तु प्रत्यक्षाद्यात्मकतत्तद्विशिष्टबुद्धिव्यक्तिष्वेव तच्चानुमितेः संशयत्वे न बाधकमित्याशयेनाह सत्यपीत्यादि । शुक्लत्वादीति । पीतत्वाद्यभावव्याप्यवत्तादर्शनेत्यर्थः । पीतत्वादेरिति । ग्रहादित्यग्रे अन्वयः । ननु प्रमात्मक एव विशिष्टधीसामान्ये तदभावविशेषदर्शनं विरोधि वाच्यमित्युक्तभ्रमस्य तत्सत्त्वेप्युत्पादो न दोषायेत्यत आह अदुष्टेन चेति । पीतत्वादीति । श्वेतत्वाद्यभावेत्यर्थः । नन्वेवं प्रत्यक्षान्यविशिष्टधीसामान्यं प्रत्येवास्तु विशेषदर्शनं विरोधीत्यत आह सति चेति । ननु लौकिकसन्निकर्षा-

च विशेषदर्शने क्वचिदुपनीतभानानुदयात् दूरतः प्रमितस्य स्थाणुत्वादेः शाखादौ करादिभ्रमेणाऽग्रहात् तत्तत्स्थलविशेष एव तस्य प्रतिबन्धकत्वमिति । अत्राहुः । अनुगतकार्य्यकारणभावानुरोधात् दोषविशेषाद्यजन्ये ज्ञाने कदाचिदनुभवे वा विशेषदर्शनं विरोधि कल्प्यते । न च प्रत्यक्ष एव तथा, सामान्ये बाधकाभावात् बोध्याभावव्याप्यवत्तानिश्चयेन शाब्दादिधीप्रतिबन्धाच्च । अथ वि-

---

जन्यविशिष्टधीसामान्यं प्रत्येव तस्य विरोधित्वं वाच्यं तच्चोपनीतभानसाधारणमेवेत्यत आह दूरत इति । दूरत्वदशायां प्रमितस्येन्द्रियसन्निकृष्टस्यापि स्थाणुत्वादेः स्थाणुत्वाभावव्याप्यकरत्वादिप्रकारेण शाखादिमत्ताभ्रमदशायां धर्मिण्यग्रहादित्यर्थः । इदमुपलक्षणम् । सत्यपि श्वैत्यसन्निकर्षे तदभावव्याप्यवत्ताभ्रमदशायां मलिनशङ्ख इवैत्यस्य नयनेनाऽग्रहादित्यपि द्रष्टव्यम् । अनुगतत्यस्य विशिष्टधीतदभावविशेषदर्शनाभावयोरित्यादिः । दोषाद्यशेषादीत्यादिना दूरत्वादिदोषविनाकृतलौकिकसन्निकर्षस्योपग्रहः । तदभावविशेषदर्शनदशायां तदवत्तासंस्कारस्याऽनुद्बोधे प्रमाणाभावादाह कदाचिदिति । वस्तुतोऽनुभवत्वजातौ मानाभावादनुगतरूपेणोद्बोधकस्य हेतुतास्थल एव स्मरणेपि विशेषदर्शनस्य विरोधित्वसम्भवाच्च पूर्वकल्प एव सम्पगित्याशयेनैव कदाचिदित्युक्तम् । तथेति । विशेषदर्शनं विरोधीत्यर्थः । सामान्ये दोषाद्यशेषाद्यजन्यविशिष्टधीसामान्ये । ननु निश्चिताव्यभिचारकत्वाद्दोषविशेषाद्यजन्यप्रत्यक्षत्वमेव विशेषदर्शनस्य प्रतिबद्ध्यतावच्छेदकं न तु तादृशज्ञानत्वमनुमितौ सन्दिग्धव्यभिचारकत्वादत आह बोध्याभावेति । शाब्दादीति । योग्यताज्ञानादिसत्त्वेपीत्यादिः । तथा च लाघवादिप्रतिसन्धानशून्यायां एव व्यभिचारशङ्कायाः कारणताधीप्रतिबन्धित्वात् सन्दिग्धव्यभिचारकेणापि विशिष्टबुद्धित्वेनैव प्रतिबध्यत्वं न तु तादृशप्रत्यक्षत्वेन शाब्दोपमित्यादौ प्रतिबध्यप्रतिबन्धकभावान्तरकल्पनागौरवप्रसङ्गादिति भावः । न च यत्र पर्वतत्वसामानाधिकरण्येनैव वन्हेस्तदभावस्य च व्याप्यवत्तापरामर्शस्तत्र भवन्मतेपि पर्वतोवन्हिमान् वा इत्याका-

रा संशयानुमितिदुर्वारा पर्वतत्वाद्यवच्छेदेनैव विरोधिपरामर्शस्य विशिष्टधीप्रतिबन्धकत्वादिति वाच्यम्। धर्मितावच्छेदकीभूतपर्वतत्वाद्यवच्छेदेन विरुद्धोभयप्रकारकज्ञानस्यैव संशयत्वात्तादृशज्ञानसामग्रीविरहेण पर्वतत्वोपलक्षिते वन्हितदभावयोः समूहालम्बनानुमितेरेव तत्रोत्पादात्। इदं तु चिन्त्यते। यत्र पर्वतत्वाद्यवच्छेदेनैवाऽभावव्याप्यवत्त्वस्य द्रव्यव्याप्यवत्त्वस्य च समूहालम्बनपरामर्शोत्तरं वह्न्यभावेतराभावस्य वन्हीतरद्रव्यस्य च पर्वते बाधनिश्चयः तत्रेतरबाधवशाद्वन्ह्यभावस्य वन्हेश्चानुमितिः पर्वतो वन्ह्यात्मकद्रव्यवान्न वेत्याकारा मणिकृन्मतेपि दुर्वारा तस्मात्तन्मतेपि विशेषबाधघटितयोः सामान्यसामग्र्योर्मिथो विशिष्टधीविरोधित्वान्तरं कल्पनीयमेव। अत्र वदन्ति। दोषविशेषाणां लौककसन्निकर्षविशेषाणां चाऽननुगतत्वाद्दोषविशेषाद्यजन्यत्वं नैकं किं तु दोषविशेषादिजन्यतत्तद्बुद्धीनां भेदवत्त्वमेव तद्वाच्यं तथा च तावद्भेदानां विशेष्यविशेषणभावे विनिगमकाभावादनन्तप्रतिबद्ध्यप्रतिबन्धकभावध्रौव्ये प्रातिस्विकरूपेण तत्तद्विशिष्टबुद्धिव्यक्तिष्वेव तत्तद्विशेषदर्शनत्वेन प्रतिबन्धकत्वं कल्प्यतामवच्छेदकलाघवादित्यनुमितौ तस्य विरोधित्वे मानाभावः। अथ साक्षात्कारत्वानिरूपिततत्तन्निष्ठप्रकारताकबुद्धिं प्रत्येव तदभावव्याप्यवत्तानिश्चयत्वेन विरोधित्वं साक्षात्कारत्वनिरूपिता च विलक्षणविषयता लौकिक इव दोषविशेषजन्येपि प्रत्यक्षे अनुगतैव, रजत इव शुक्तावपि रजतत्वदर्शने रजतं साक्षात्करोमीत्यनुभवात्, लौकिकस्येव दोषविशेषजन्यस्यापि हविराद्युपादानप्रत्यक्षस्य यागादिगोचरप्रवृत्तिजकत्वात् तदवच्छेदकत्वेनैव विलक्षणतादृशविषयतासिद्धेश्चेति चेन्न। सति विरोधिव्याप्यवत्तादर्शने बुभुत्सयापि तद्वत्तोपनीतप्रत्यक्षानुत्पत्तिप्रसङ्गात्। न चाऽनाहार्यतादृशबुद्धित्वेनैव प्रतिबध्यत्वं वाच्यम्। आहार्यत्वस्य दुर्वचत्वात्तदवच्छिन्नभेदस्य निवेशायोगात्। बुभुत्साकालीनतत्तद्विशिष्टबुद्धीनां प्रत्येकभेदस्य निवेशे च तेषां विशेष्यविशेषणभावभेदादेव गुरुतरानन्तप्रतिबध्यप्रतिबन्धकभावापत्तितादवस्थ्यात्, असत्यामपि बुभुत्सायां तत्कालीनबुद्धिव्यक्तीनां विरोधिपरामर्शदशायां सामान्यसामग्रीतः समुत्पत्तिप्रसङ्गाच्च। बुभुत्साकालीनतत्तद्बुद्धौ बुभुत्साव्यक्तीनां विशिष्य हेतुत्वकल्पने चातिगौरवापत्तेः। न च यद्यद्बुभुत्सासत्त्वे तदभावव्या-

व्यवत्तापरामर्शदशायां तद्वत्ताबोधः तत्तदबुभुत्साभावकूटविशिष्टतदभावव्याप्यवत्तापरामर्शत्वेनैव साक्षात्कारत्वानिरूपिततत्प्रकारताकधीसामान्यप्रतिबन्धकत्वमिति वाच्यम् । यत्राऽपेक्षाबुद्ध्यात्मकसाध्याभावव्याप्यवत्तापरामर्शोत्तरं क्रमेण साध्यस्य बुभुत्सापरामर्शौ तत्रोत्तरकालं साध्यस्योपनीतभानोत्पत्तिदशायां तन्मतेप्यनुमित्यापत्तिः साध्यस्योपनीतभानसामग्र्या अनुमितिसामग्र्यातो हीनबलत्वात् । इच्छाघटितसामग्रीत्वेन कथंचिदबलवत्त्वेपि प्रतिबन्धकदिश्येव तत्तदबुभुत्साविरहाणां विशेष्यविशेषणभावव्यत्यासेन गुरुतरप्रतिबध्यप्रतिबन्धकभावतादवस्थ्यात् । न च तावदबुभुत्साविरहविशिष्टतदभावपरामर्शत्वावच्छिन्नाभावस्य अखण्डस्य तद्वत्तिक्तित्वेनैव तद्वत्ताबोधहेतुत्वान्न गौरवमिति वाच्यम् । प्रतियोगिविनाकृतस्याऽखण्डाभावस्य तत्त्वेन हेतुतायामन्यथासिद्धेरन्यत्र व्यवस्थापितत्वात् । विशिष्टाभावस्य विशेषणाद्यभावस्वरूपत्वेनाऽखण्डत्वासम्भवाच्च । अथ प्रत्यक्षस्थले विशेषत एवास्तु विशेषदर्शनस्य विरोधित्वं विरोधिपरामर्शदशायां तद्वत्तायाः शाब्दोपमितिस्मृतीनामनुत्पत्त्या तत्प्रकारकपरोक्षत्वावच्छिन्नं प्रति तदभावपरामर्शत्वेन विरोधित्वं वाच्यं न तु शाब्दत्वाद्यन्तर्भावेण गौरवादित्यनुमितेः संशयत्वासम्भवः पर्वतादौ वन्ह्याद्यभावव्याप्यवत्त्वनिश्चयदशायां वन्हिमत्पर्वतत्वाद्यवच्छिन्ने वन्हिमत्पर्वतपदवाच्यत्वोपमितेरनुत्पत्त्या तस्या अपि विरोधिपरामर्शप्रतिबध्यत्वात्, परोक्षत्वं च जातिविशेषो बाधनिर्णयप्रतिबध्यतावच्छेदकत्वेनैवानुमितावपि सिद्धः, शाब्दादिसाधारणानुभवत्वजातौ प्रमाणाभावेन तत्साङ्कर्यासम्भवादिति चेन्न । अनुमितिसामग्रीदशायां ज्ञानान्तरानुत्पत्त्या तत्प्रतिबद्ध्यतावच्छेदकत्वेन सिद्धया जात्या साङ्कर्येण परोक्षत्वजात्यसम्भवात् । न च सत्यामपि अनुमितिसामग्र्यां शाब्दोपमितिप्रत्यक्षादीनां प्रत्येकमात्रबुभुत्सायां तत्प्रत्येकस्योत्पत्त्या प्रत्यक्षादिप्रत्येकबुभुत्साविरहविशिष्टानुमितिसामग्र्याः प्रत्यक्षत्वादिप्रत्येकधर्मावच्छिन्नं प्रत्येव विरोधित्वमिति वाच्यम् । प्रत्यक्षादिप्रत्येकबुभुत्सासत्त्वे अनुमितिसामग्रीप्रतिबध्यविजातीयज्ञानोत्पादेपि प्रत्यक्षादिप्रत्येकबुभुत्सायाः प्रत्यक्षादिप्रत्येकान्यधीविरोधित्वादेवोक्तनियमोपपत्तेः सर्वमत एव बुभुत्साघटितसामग्र्या बलवत्त्वोपगमात् । वस्तुतोनुमितिभिन्नं विजा-

तीयं वा ज्ञानं प्रति पक्षतादिविशिष्टवन्ह्यादिपरामर्शत्वपर्यवसितेऽनानुमितिसामग्रीत्वेन सर्वमत एव विरोधित्वं वाच्यं तथा च सोन्दडमते प्रतिपक्षस्थलेपि संशयात्मिकाया अपि अनुमितेरेव स्वीकारात् पक्षतादिविशिष्टवन्ह्यादिपरामर्शस्वरूपाया अनुमिति सामग्र्याः प्रतिबन्धादेव तदानीं न ज्ञानान्तरोत्पादः, चिन्तामणिकृतस्तु सत्यपि पक्षतादिसहकृतवन्ह्यादिपरामर्शे प्रतिपक्षस्थले घटादेर्मानसादिज्ञानोपगमात्पक्षतादिभिरिव विरोधिपरामर्शाभावेनापि विशिष्टमेव वन्ह्यादिपरामर्शत्वमनुमित्यन्यधीप्रतिबन्धकतावच्छेदकं वाच्यमिति नानाविधविरोधिपरामर्शाभावकूटस्योत्तेजकतागौरवादपि संशयात्मिकाऽनुमितिः स्वीकर्तुमुचितेति। यत्तु विरोधिपरामर्शस्याऽनुमित्यप्रतिबन्धकत्वे यत्र साध्याभावपरामर्शकालीनेषु साध्यपरामर्शसहस्रेषु विशिष्य विशिष्याऽप्रामाण्यज्ञानं तत्रापि तेभ्यः साध्यानुमितिप्रसङ्गः, तत्तदप्रामाण्यज्ञानव्यक्तित्वेन साध्यवत्तानुमितिविरोधित्वे चाऽनन्तप्रतिबध्यप्रतिबन्धकभावापत्तिस्तत्रैव साध्यानुमितिसामान्यं प्रति साध्याभावव्याप्यवत्तापरामर्शत्वेनानुगतरूपेण प्रतिबन्धकत्वकल्पनान्न कुत्राप्यनुमितिः संशयाकारेति। न च साध्याभावपरामर्शस्याऽप्रामाण्यज्ञानदशायां साध्यस्यानुमित्युत्पादेन तत्तदप्रामाण्यज्ञानाभावकूटविशिष्टसाध्याभावपरामर्शत्वेन विरोधितायाः वाच्यत्वात्तवापि तत्तदप्रामाण्यज्ञानस्योत्तेजकतायां विशेष्यविशेषणभावेनाऽनन्तप्रतिबध्यप्रतिबन्धकभावापत्तिरिति वाच्यम्। तावदप्रामाण्यज्ञानाभावविशिष्टसाध्याभावपरामर्शत्वावच्छिन्नाभावस्याऽखण्डस्य तत्तद्व्यक्तित्वेन साध्यानुमितिं प्रति हेतुत्वस्य मया वाच्यत्वादिति। तत्तुच्छम्। यत्र विरोधिपरामर्शकालीनं साध्यपरामर्शसहस्रमेव रक्तो दण्ड इत्यादिविशेषणतावच्छेदकप्रकारकं रक्तत्वाद्यंशे विशिष्य भ्रमत्वज्ञानास्कन्दितं वृत्तं तत्रोत्तरकालं रक्तत्वादिविशिष्टवैशिष्ट्यप्रत्यक्षादेर्वारणार्थं तत्तद्भ्रमत्वज्ञानव्यक्तीनां तादृशविशिष्टवैशिष्ट्यज्ञानप्रतिबन्धकतायां तवापि गौरवस्य तुल्यत्वात्। अस्माकं तु विरोधिपरामर्शस्यानुमित्यप्रतिबन्धकत्वादनुमितेरेव तत्रोत्पादात्। अन्यत्र क्लेशेन भिन्नविषयकानुमितिसामग्र्याः प्रतिबन्धकत्वेनैव तत्र रक्तत्वादिविशिष्टवैशिष्ट्यप्रत्यक्षानुत्पादसम्भवादिति दिक्। अत्रोच्यते। शाब्दोपमितिस्मृतिसाधारणमवश्यं प्रत्यक्षान्यतद्वत्ताबुद्धि-

त्वावच्छिन्नं प्रत्येव तदभावपरामर्शत्वेन विरोधित्वं वाच्यमतोऽनुमितेः संशयत्वासम्भवः । न च प्रत्यक्षान्यत्वतद्वत्तावुद्धित्वयोर्विशेष्यविशेषणभावावच्छेदकद्वयधौव्येण लाघवात्तद्वत्ताशाब्दत्वं तद्वत्त्वोपमितित्वं चेति द्वयमेव प्रतिबध्यतावच्छेदकमस्तु तदभावपरामर्शदशायां तद्विशिष्टस्मृतेस्तु उद्बोधकविरहादेवाऽनुत्पादसम्भवात् अनुगतोद्बोधकस्थले प्रमाणाभावादिति वाच्यम्। तद्वत्तावुद्धित्वविशिष्टप्रत्यक्षान्यत्वस्य दुर्वचत्वादेव प्रतिबध्यतावच्छेदत्वासम्भवात् । तद्वत्तावुद्धित्वविशिष्टं यत्प्रत्यक्षं तदन्यत्वस्यावच्छेदकत्वे विरोधिव्याप्यदर्शनदशायां सुखादेरप्यनुत्पत्त्यापत्तेः तस्यापि निरुक्तप्रत्यक्षभिन्नत्वात् । न च तद्वत्तावुद्धित्वं प्रत्यक्षं च द्वयमेव मिथो वैशिष्ट्यानापन्नं सदन्यत्वे विशेषणीभूय प्रतिबध्यतावच्छेदकं व्यासज्यवृत्त्यवच्छेदकत्वानङ्गीकारात् । अन्यथा तद्वत्तावुद्धित्वस्य प्रत्यक्षान्यत्वस्य च द्वयोरेव तादृशावच्छेदकत्वस्वीकारेण सामञ्जस्ये तयोर्विशेष्यविशेषणभावव्यत्यासोक्तेरुन्मत्तप्रलपितत्वापत्तेः । वस्तुतस्तत्प्रकारकपरोक्षत्वावच्छिन्नं प्रत्येव तदभावव्याप्यवत्तानिश्चयत्वेन प्रतिबन्धकत्वं वाच्यं, नित्यज्ञानवृत्तिना साक्षात्कारत्वेन सह सांकर्यभिया अनुमितिसामग्रीप्रतिबध्यतावच्छेदकत्वेन जात्यन्तरस्याऽसिद्ध्या तेन समं परोक्षत्वस्य सांकर्यशङ्कायां अप्यसम्भवात् । न चानुमितेः संशयान्यत्वनियमे प्रागुक्तरीत्यानुमितिभिन्नबुद्धावनुमितिसामग्र्याः प्रतिबन्धकतायां नानाविधतदभावपरामर्शानामुत्तेजकत्वकल्पनायां गौरवमिति वाच्यम् । अनुमितावपि तदभावपरामर्शस्य विरोधितया तद्गौरवस्य प्रामाणिकत्वात् । अन्यथा नीलपर्वतत्वावच्छिन्ने वन्निव्याप्यवत्तानिश्चयोत्तरं पर्वतत्वाद्यवच्छिन्ने नीलत्वाभावव्याप्यवत्तापरामर्शस्तत्रापि नीलपर्वतो वन्निमानित्यनुमितिप्रसङ्गात् । न च विधेयतान्यतरान्निष्ठप्रकारताकानुमितित्वावच्छिन्नं प्रत्येव तदभावपरामर्शत्वेन सोन्दडैर्विरोधित्वान्तरं स्वीक्रियते तथा सति लाघवेन तत्प्रकारकानुमितित्वावच्छिन्नं प्रत्येव तथात्वौचित्यात् यत्र पर्वतत्वावच्छेदेन वन्न्यभावव्याप्यवत्तां नीलपर्वतत्वावच्छेदेन वन्निव्याप्यवत्तामवगाहमानः परामर्श उत्पन्नस्तत्र पर्वतो न वन्निमान् नीलपर्वतश्च वन्निमान् इत्येवं निर्णयाकारानुमितिप्रसङ्गस्य तावतापि अनुद्धाराच्च । धर्मितावच्छेदकभेदेनो-

शेषान्तरदर्शनविरहविशिष्टमेव तत्तथा, अन्यथा कोटिद्वयविशेषदर्शने संशयो न स्यादिति चेन्न । भवत्येव तावद्यावदप्रामाण्यं न गृह्यते, अगृहीताप्रामाण्यकस्यैव विशेषदर्शनस्य विरोधित्वादिति ।

कानुमितेः संशयत्वासम्भवात्, इष्टापत्तौ चाऽनुभवविरोधात् । वस्तुतः अस्मन्मते अनुमितिभिन्नबुद्धावनुमितिसामग्र्याः प्रतिबन्धकतायां नानाविधतदभावपरामर्शानामुत्तेजकत्ववत् सोन्दङ्कतेपि घटचाक्षुषत्वादिप्रकारकनानाविधेच्छानां तत्रोत्तेजकतायां तुल्यमेव गौरवम्।अन्यथा वन्हितदभावयोः परामर्शदशायां सत्यामपि घटादेश्चाक्षुषादिबुभुत्सायां भवन्मते घटादिचाक्षुषानुत्पत्तिप्रसङ्गात्। भिन्नविषयेऽनुमितिसामग्र्या बलवत्त्वेन साध्यतदभावयोरनुमितेरेव सम्भवात्, अस्माकं तु विरोधिपरामर्शाभ्यां मिथः प्रतिबन्धात्तत्रानुमितिसामग्र्येव नास्ति घटादिचाक्षुषार्थं न तद्वोचरेच्छाव्यक्तीनामुत्तेजकत्वमिति सङ्क्षेपः वन्हिव्याप्यधूमवत्तानिश्चयस्य वन्ह्यभावव्याप्यपाषाणत्वादिमत्तानिश्चयस्य च कार्यतावच्छेदकं न तादृशनिश्चयाव्यवहितोत्तरानुमितित्वम्, अव्यवहितोत्तरत्वस्याऽननुगतत्वात् गुरुत्वाच्च, किं तु अनुमितित्वव्याप्यं वैजात्यमेव, तथा च तादृशनिश्चयाभ्यां संशयात्मकानुमित्युत्पादे तत्रैव निरुक्तवैजात्ययोः सङ्करप्रसङ्गः इत्यवश्यं रत्नकोषकृतापि वन्हिसाध्यकपरामर्शप्रयोज्यवैजात्यावच्छिन्नं प्रति वन्ह्यभावव्याप्यवत्तानिश्चयत्वेन वन्ह्यभावसाध्यकपरामर्शप्रयोज्यवैजात्यावच्छिन्नं प्रति च वन्हिव्याप्यवत्तानिश्चयत्वेन विरोधित्वं वाच्यमित्यनुमितेः संशयत्वासम्भवः । न च मिथो विरोधिपरामर्शप्रयोज्यवैजात्यान्तरं संशयात्मकानुमितौ स्वीकार्यं, तादृशफलासिद्धौ तदन्तर्भावेण कार्यतावच्छेदकवैजात्यान्तरकल्पनस्याऽन्याय्यत्वात् इत्यपि वदन्तीति कृतं पल्लवितेन ॥ विशेषान्तरेति । तदीयव्याप्यदर्शनाभावविशिष्टमेव तदभावव्याप्यदर्शनं तद्बुद्धाबोधविरोधीत्यर्थः । संशयः प्रात्यक्षिकः । यावदिति।परामर्शयोरप्रामाण्यं यावन्न गृह्यत इत्यर्थः।ननु विरोधिपरामर्शसत्त्वादप्रामाण्यग्रहोत्तरमेव कुतः सन्देह इत्यत आह अगृहीतेति।

अनैकान्तिकानामन्वयाद्व्यतिरेकाद्वा कोटयुपस्थापकतया संशयः फलं, विरुद्धस्य साध्यविपरीतज्ञानम्। अपक्षधर्मोऽपि विरुद्धोऽन्यत्र विपरीतज्ञानसमर्थ एव। बाधेऽन्यतो विपरीतज्ञानं न तु हेत्वभिमतादेः। नित्यो घटः कार्य्यत्वादिति विरुद्धे बाधसङ्करेऽप्यदोषः। असिद्धे अनैकान्तिकादिचतुष्टयज्ञानान्यालिङ्गत्वज्ञानं, बाधे पक्षधर्महेतौ व्याप्तिबाधः। प्रकरणसमे तु न व्याप्तिपक्षधर्मताबाधः फलं, नाप्यलिङ्गत्वज्ञानं, व्याप्त्यादिबुद्धिसत्त्वात्। नापि विपरीतबुद्धिः, स्वसाध्यविपरीतेनाऽनियमात्। नापि संश-

---

विरुद्धस्येति साध्याभावव्याप्यस्येत्यर्थः। बाध इति। हेतौ प्रकृतेऽन्यत्र वा। अपक्षधर्मे च पक्षधर्मताबाध इति शेषो वा। तथा च

ननु विरुद्धत्वं न साध्यसमानाधिकरणत्वं तदवच्छिन्नहेतुमत्ताज्ञानेन साध्याभावज्ञानजननासम्भवादत आह साध्याभावेति। ननु ह्रदो वन्हिमान् धूमादित्यादावपक्षधर्महेतुस्थलीयबाधस्य फलानुक्त्या मूलस्य न्यूनत्वमतो हेतुपदं प्रकृता प्रकृतहेतुसामान्यपरत्वेन व्याचक्षाणस्तदुपगृह्णाति प्रकृते अन्यत्र वेति। तथा च पक्षवृत्तिधर्मत्वावच्छेदेन व्याप्तिबाध एव बाधस्य फलं तच्च प्रकृतहेतोः पक्षावृत्तित्वेऽपि पक्षनिष्ठधर्मान्तरे सुलभमिति भावः। नन्वेवं पक्षधर्मे व्याप्तिबाधस्यैव सम्यक्त्वान्मूले हेतावित्यस्य वैफल्यमतो हेतुपदं प्रकृतहेतुपरं मन्वानः पूरणेनैव मूलन्यूनतामपाकरोति अपक्षधर्मे चेत्यादि। ननु ह्रदो वन्हिमान् घटत्वादित्यादावपक्षधर्मेऽपि हेतौ व्याप्तिबाधसम्भवात् इत्थमपि न्यूनत्वमेवेत्यतः फलितार्थमाह

यः, प्रत्येकं कोटिद्वयानुपनयात् । किन्तु कथमत्र तत्त्वनिर्णय इति जिज्ञासा फलम् । तथा च प्रकृतसाध्यहेत्वोः किं तत्त्वमिति जिज्ञासाजनिका व्याप्तिपक्षधर्मतोपस्थितिः प्रकरणसमः । न ह्यनुपस्थिते प्रतिपक्षे एकस्माज्जिज्ञासा, किन्तु निर्णय एव । अथ ज्ञातुमिच्छा जिज्ञासा सा च ज्ञानेष्टसाधनताज्ञानात् संशयाद्वेति कथं तेन विना विरोधिसाधनज्ञानमात्रादिति चेन्न । असति प्रतिपक्षे न जिज्ञासा सति सेत्यन्वयव्यतिरेकाभ्यां प्रकरणसमस्यापि जिज्ञासाकारणत्वात् । न चाऽनैकान्तिकातिव्याप्तिः । तत्र हि संशयद्वारा साध्ये जिज्ञा-

---

हेतौ व्याप्तिपक्षधर्मतान्यतरभङ्ग इत्यर्थः । प्रकृतेति । प्रकृतसाध्ययोर्यौ हेतू तयोरित्यर्थः । संशयादिति । तज्जन्यदुःखोत्सारणरूपेष्टसाधनताज्ञानात् अन्यत्र च इष्टान्तरसाधनताज्ञानाज्ज्ञानेच्छेति भेदेन विकल्पोपन्यासः । असतीत्यादि । हेतुसमीचीनत्वासमीचीनत्वसं-

---

तथा चेति । हेतौ प्रकृतहेतौ। ननु साध्यहेत्वोरित्यत्र मूले यदि द्वन्द्वसमासस्तदा साध्यस्यापि जिज्ञासालाभादसङ्गतिः प्रतिपक्षस्थले हेत्वोरेव तत्त्वजिज्ञासोत्पत्तेरतस्तत्पुरुषमाश्रित्य व्याचष्टे प्रकृतसाध्ययोरिति । मिथो विरोधिसाध्ययोरित्यर्थः । संशयस्य हेत्वोस्तत्वजिज्ञासाजनकत्वे मानाभावाद्व्याचष्टे तज्जन्येति । तज्जन्यं तत्त्वसन्देहजन्यं यत् दुःखं तदुत्सारणरूपस्येष्टस्य साधनताज्ञानादित्यर्थः । नन्वेवमिष्टसाधनताज्ञानादित्यस्य पृथगुपन्यासासङ्गतिरतः पूरयित्वा तदर्थमाह अन्यत्र चेति । प्रतिपक्षस्थलादन्यत्र चेत्यर्थः । इत्थं च सं-

सा, अत्र तु हेतुसमीचीनत्व इति । ननु परामर्शयो-रेकदानुत्पादात् कथं प्रतिरोधः, क्रमोत्पन्नयोरेकदाऽस-त्त्वादिति चेन्न । एकानन्तरमपरहेतुव्याप्तिपक्षधर्मताज्ञा-नाभ्यामग्रिमव्याप्तिविशिष्टज्ञानोत्पत्तिकाले पूर्वपरामर्श-नाशात् । न चोभयहेतुव्याप्तिपक्षधर्मताज्ञानानां पर्स्प-राप्रतिबन्धात् परामर्शोत्पाद इति वाच्यम् । व्याप्त्यादि-ज्ञानचतुष्टययौगपद्याभावात् । यत्तु व्याप्तिद्वयसंस्कारो-द्बोधकहेतुद्वयज्ञानयोः परस्परप्रतिबन्धात् नोभयव्या-प्तिस्मृतिरिति दूषकताबीजम् । इति । तन्न । व्याप्ति-

---

शयजन्यदुःखाभावरूपेष्टसाधनताज्ञानद्वारेण जिज्ञासोपयोगित्वादि-त्यर्थः । उत्पत्तिकाले उत्पत्तिपूर्वकाले । व्याप्तिपक्षधर्मताज्ञानयोरु-त्पादक्रमानियमादुभयोर्नाशकत्वमुक्तम् । उत्पत्तावेव वा तयोर-

---

शयाद्वेत्यत्र प्रतिपक्षस्थल इति पूरणार्हमिति ध्येयम् । प्रकरणसमस्य जिज्ञासाहेतुत्वे मानाभावादाह हेतुसमीचीनत्वेत्यादि । ननु पूर्वपरा-मर्शस्य स्वतृतीयक्षण एव नाशाच्चतुर्थक्षणात्मके परामर्शोत्तरोत्प-त्तिकाले तन्नाशाभिधानमसङ्गतमतो व्याचष्टे पूर्वकाल इति । तथा च तृतीयक्षण एव पूर्वपरामर्शस्य नाशः प्राप्तः । नन्वेवमपि हेत्वन्त-रीयव्याप्तिज्ञानस्यैव स्वाव्यवहितोत्तरोत्पन्नत्वेन पूर्वपरामर्शनाशक-त्वात्पक्षधर्मताज्ञानस्य तन्नाशकत्वोक्तिरसङ्गतेत्यत आह व्याप्तीत्या-दि । ननु व्याप्तिज्ञानपक्षधर्मताज्ञानाभ्यां कस्यापि परामर्शस्य नाशाजननात्तथाप्युभयोर्नाशकत्वाभिधानमसङ्गतमेवेत्यत आह उ-त्पत्ताविति । तथा च परहेतोर्व्याप्तिपक्षधर्मताज्ञानाभ्यामग्रि-

स्मृतिं विना सत्प्रतिपक्षाभावात् वादिभ्यां व्याप्त्युद्भावनाच्चेति । मैवम् । हेतुद्वयसमूहालम्बनाद्युगपदुभयव्याप्तिस्मृतावुभयपरामर्शरूपं ज्ञानमुत्पद्यते अत एकदा विरुद्धकार्य्यद्वयकारणान्नैकमपि कार्य्यमुत्पद्यते । तादृशपरामर्शश्च स्वार्थानुमाने प्रत्यक्षादितः, परस्य वाद्युपन्यस्तन्यायोत्थापितप्रमाणात् । अस्य च केवलान्वयिन्यपि सम्भवः घटोऽभिधेयः प्रमेयत्वादित्यत्राऽभिधेयत्वं घटनिष्ठात्यन्ताभावप्रतियोगि जात्यन्यत्वे सति घटमात्रवृ-

---

न्वयः । यत्र च व्याप्तिपक्षधर्मतयोः समूहालम्बनं तत्र द्वितीयपरामर्शोत्पत्तिकाल एव प्रथमपरामर्शनाशः । अस्य निरुक्तसत्प्रतिपक्षितत्वस्य । जात्यन्येति । सत्ताकम्बुग्रीवादिमत्त्वादावेकैकस्य

मपरामर्शस्य या उत्पत्तिस्तत्पूर्वकाल इति मूले अन्वयः । यद्यपि परामर्शे पक्षहेत्वोः सम्बन्धस्य संसर्गमर्यादयैव भानात् तत्रापि पक्षधर्मताज्ञानस्याऽहेतुत्वादिदमप्यसङ्गतम्, तथापि पक्षवृत्तित्वप्रकारकस्यापि परामर्शस्याऽनुमितिहेतुत्वमभ्युपेत्यैतदुक्तम् । स्वामिनौ देवदेत्तरौ इत्यादाविव व्याप्तिपक्षधर्मताज्ञानाभ्यामित्यत्रापि विभक्त्युपस्थाप्यं द्वित्वं व्युत्पत्तिवैचित्र्येण पदार्थतावच्छेदकीभूतयोर्व्याप्तिपक्षधर्मत्वयोरेवाऽन्वितमित्याशयेन यथाश्रुतमेव मूलं सङ्गमयन्नाह यत्र चेति । उत्पत्तिकाले एवेति । तथा च पूर्वकाल इत्यादिकं न व्याख्येयमिति भावः । साध्याभावव्याप्यत्वत्पक्षाद्यात्मकस्य दूषणौपयिकप्रतिपक्षस्य केवलान्वयिन्यसम्भवाद्वचाचष्टे निरुक्तेति । व्यवहारौपयिकेत्यर्थः । एकैकस्येति । घटमात्रवृत्त्यन्यत्वं सत्तायां जात्यन्यत्वं च कम्बुग्रीवादिमत्त्वे व्यभिचार्यतो विशिष्टो हेतुरित्यर्थः ।

त्त्यन्यधर्मत्वात् घटान्योन्याभाववत् पटरूपवच्च, घटनिष्ठात्यन्ताभावोऽभिधेयत्वप्रतियोगिकः घटवृत्तिनित्याभावत्वात् घटनिष्ठान्योन्याभावदिति विशेषादर्शनदशायाम्। न च पक्षैक्यमपि तन्त्रम्, विरोधस्यैव दूषकत्वेऽधिकस्य व्यर्थत्वात् ॥

व्यभिचाराद्विशिष्टोपादानम्। घटनिष्ठेति। घटनिष्ठात्यन्ताभावत्वेन सामान्यतः पक्षत्वान्न बाधाश्रयासिद्धी। नन्वाद्यस्य समवेतत्वादौ द्वितीयस्य पटत्वाभावादौ व्यभिचार इयत आह विशेषादर्शनेति। वस्तुतो घटो नाऽभिधेयः कम्बुग्रीवादिमत्त्वादित्वादिव्यतिरेकिणा सत्प्रतिपक्षः सम्भवत्येव, व्यापकाभावेनाऽप्रसिद्धस्यापि व्याप्याभा-

---

न च सत्तायामपि स्वरूपसम्बन्धावच्छिन्नघटनिष्ठाभावप्रतियोगित्वरूपस्य साध्यस्य सत्त्वान्न तत्र व्यभिचारः, सत्तापदस्य मूलस्थजातिपदस्य च भावत्वोपलक्षकत्वादिति भावः। ननु घटनिष्ठस्य घटात्यन्ताभावस्य पक्षत्वे बाधः तत्तदभावभिन्नत्वेन पक्षविशेषणत्वे च आश्रयासिद्धिरत आह घटनिष्ठेत्यादि। समवेतत्वादाविति। तस्यापि निरुक्तजात्यन्यत्वे सति घटमात्रवृत्त्यन्यत्वादिति भावः। पटत्वाभावादाविति। तस्यापि घटानष्ठनित्याभावत्वादिति भावः। विशेषादर्शनदशायां व्यभिचारास्फूर्तिदशायाम्। समानधर्मिकस्यैव विरोधिपरामर्शस्य प्रतिपक्षत्वमिति नव्यमतानुसारेणाह वस्तुत इति। साध्याप्रसिद्धावन्वयित्वासम्भवादाह व्यतिरेकिणेति। प्रमेयत्वव्यापकीभूताभावप्रतियोगित्वेन कम्बुग्रीवादिमत्तानिश्चयेनेत्यर्थः। ननूक्तक्रमेण व्यतिरेकिणो विरोध्यनुमितिसामग्रीत्वाभावान्न तस्य सत्प्रतिपक्षव्यवहारौपयिकत्वमत आह व्यापकाभावेति। ननु तथाप्युक्तक्रमेण परार्थस्थले प्रत्यक्षोपन्यास. केवलान्वयिनि दुर्घटः वाक्या-

वस्य सिद्ध्यभ्युपगमात्, प्रत्येकपदार्थप्रसिद्धौ तादृशप्रतिज्ञाद्युपपत्तेर्विशिष्टस्य वाक्यार्थत्वात् । सत्प्रतिपक्षस्तु साध्याभावव्याप्यवान् साध्यवदन्यत्वव्याप्यवांश्च पक्षः पक्षनिष्ठौ साध्याभावसाध्यवद्भेदव्याप्यौ इत्येवमादिः प्रत्येकमेव ।

विभाजकन्तु प्रकृतपक्षसाध्यवैशिष्ट्यग्रहविरोधित्वे सति प्रकृतपक्षसाध्यग्रहाविरोधिप्रकृतपक्षसाध्यवैशिष्ट्यग्रहविरोधिरूपोन्नाय-

---

र्थाप्रसिद्ध्या प्रतिज्ञाद्यसम्भवादत आह प्रत्येकेति । व्यवहारौपयिकस्य मूलोक्तसत्प्रतिपक्षस्य स्वरूपसत एवानुमितिविरोधित्वाज्ञाभासत्वमतः स्वयमेव हेत्वाभासरूपं तमुपदर्शयति सत्प्रतिपक्षस्त्विति । आभासीभूत इत्यादिः । यत्र विशिष्टपक्षापेक्षया साध्याभावादिव्याप्यवत्त्वमेव लघु तत्र पक्षधर्मिकतद्वत्तानिश्चयत्वेनैव प्रतिबन्धकत्वमित्याशयेनाह साध्याभावव्याप्येत्यादि । यत्र साध्याभावादिव्याप्यवत्तामपेक्ष्य विशिष्टपक्ष एव लघुस्तत्र साध्याभावादिव्याप्यधर्मिकपक्षनिश्चयत्वेनैव लाघवाद्विरोधित्वमित्याशयेनाह पक्षनिष्ठाविति । साध्याभावसाध्यवद्भेदयोर्व्याप्यावित्यर्थः । एवमादिरित्यादिना साध्याधिकरणत्वाभावव्याप्यवत्पक्षाद्युपग्रहः ॥

ननु तेषां प्रत्येकस्य विभाजकत्वे हेत्वाभासानां पञ्चविधत्वानुपपत्तिरत आह विभाजकं त्विति । प्रकृतेत्यादि । ह्रदो वन्हिमान् धूमादित्यादौ साध्याभावव्याप्यव्याप्यवत्पक्षस्य वारणाय सत्यन्तम् । प्रकृतयोः पक्षसाध्ययोर्वैशिष्ट्यग्रहविरोधित्वे सतीति तदर्थः । अत्र प्रकृतपक्षधर्मिकप्रकृतसाध्यवत्त्वग्रहविरोधित्वं न तादृशग्रहजनकीभूताभावप्रतियोगिज्ञानविषयतामात्रं तथा सति सत्यन्तवारणीयस्य साध्याभावव्याप्यवत्पक्षस्य व्यावर्तनानुपपत्तेः तज्ज्ञानस्यापि तदभावावगाहिप्रकृतसाध्यवत्तासमूहालम्बनविरोधित्वात्, नापि प्रकृतपक्षकप्रकृतसाध्यवत्ताज्ञानत्वावच्छिन्नं प्रति यादृशविशिष्टविषयकत्वेन प्रतिबन्धकत्वं तद्वत्त्वमेव तथा, निर्वन्हिः पर्वतो वन्हिमान् अलत्वादित्यादौ प्रकृतसाध्यवत्तया प्रकृतपक्षग्रहस्याहार्यत्वात्तादृशग्रहत्वावच्छिन्नप्रतिबध्यत्वाप्रसिद्ध्या तत्रत्यसत्प्रतिपक्षाव्याप्तेः प्रकृतपक्ष-

साध्यग्रहाविरोधीत्यस्य व्यर्थतापत्तेश्च, किं तु प्रकृतपक्षकप्रकृतसाध्यवत्ताग्रहत्वाव्यापकविषयिताशून्यग्रहं प्रति यादृशविशिष्टविषयकत्वेन प्रतिबन्धकत्वं तत्त्वमेव तथा वाच्यं, तथा च विषयितामात्रस्यैव यथाकथञ्चित्साध्यविशिष्टपक्षग्रहत्वाव्यापकत्वात्तच्छून्यग्रहाप्रसिद्ध्या लक्षणासम्भवः स्यादतः पक्षसाध्ययोः प्रकृतत्वोपादानम्। एवमुत्तरत्रापि बोध्यम्। काञ्चनमयह्रदः काञ्चनमयवन्हिमान् धूमादित्यादौ काञ्चनमयत्वाभावव्याप्यवतः पक्षादेर्वारणायाऽविरोध्यन्तम्। तच्च वैशिष्ट्यग्रहविरोधिनस्तदुभायकस्य च द्वयोः विशेषणं, समासनिविष्टस्य तस्योभयत्रैवाऽन्वयसम्भवात्। अन्यथा विरोधिमात्रस्य विशेषणत्वे वन्ह्यभावव्याप्यव्याप्याभाववान् पर्वतो वन्हिमानित्यादौ वन्ह्यभावव्याप्यव्याप्यवत्पर्वतात्मिकायामाश्रयासिद्धावतिव्याप्तिः तस्या अपि प्रकृतपक्षसाध्यग्रहविरोधी यः पक्षसाध्यवैशिष्ट्यग्रहविरोधिवन्ह्यभावव्याप्यवत्पर्वतात्मकप्रतिपक्षस्तदुभायकत्वात्। न च विरोध्युभायकस्यैव तद्विशेषणं देयमतो नोक्तदोषः, तथा सति वन्हिमान्पर्वतो वन्ह्यभावव्याप्यव्याप्याभाववानित्यादौ प्रकृतपक्षसाध्यवैशिष्ट्यग्रहविरोधिनः पर्वतत्वावच्छेदेन वन्ह्यभावव्याप्यवत्त्वस्योभायके वन्ह्यभावव्याप्यव्याप्यवत्पर्वतात्मकबाधेऽतिव्याप्त्यापत्तेः। तस्य प्रकृतपक्षसाध्यग्रहाविरोधित्वनियमात् प्रकृतपक्षसाध्यग्रहाविरोधी यस्तदुभयवैशिष्ट्यग्रहविरोधी तदुभायकत्वविरहेणैव तस्य वारणीयत्वात्। न चैवं वन्ह्यभावव्याप्याभावविशिष्टः पर्वतो वन्हिमानित्यादौ पर्वतत्वावच्छेदेन वन्ह्यभावव्याप्यवत्त्वस्यापि प्रतिपक्षत्वात्तत्राव्याप्तिः तस्य प्रकृतपक्षग्रहविरोधित्वादिति वाच्यम्। तस्याश्रयासिद्धित्वेनाऽलक्षणत्वेऽपि क्षत्यभावादिति ध्येयम्। न च ह्रदो वन्हिमान् धूमादित्यादौ प्रकृतपक्षसाध्यग्रहविरोधित्वाप्रसिद्ध्या तत्रत्यप्रतिपक्षाव्याप्तिः, प्रसिद्धपक्षसाध्यस्थले तादृशग्रहाविरोधित्वविशेषणस्याऽनुपादेयत्वात्। समानविशेष्यत्वप्रत्यासत्त्या प्रतिबन्धकत्वमते ह्रदत्वादिप्रकारकग्रहत्वावच्छिन्नं प्रति ह्रदादिभिन्नत्वज्ञानत्वेन समानविशेष्यतया प्रतिबन्धकत्वात् तत्रापि साध्यादिग्रहविरोधित्वसम्भवाच्च। पर्वतो वन्हिव्याप्याभाववान् धूमादित्यादौ वन्हिव्याप्यवत्पर्वतात्मकबाधेऽतिव्याप्तिवारणार्थमाह प्रकृतेत्यादि। अत्रापि पक्षसाध्ययोः प्रकृतत्वोपादानमसम्भववारणा-

कत्वम् । तदुन्नायकत्वञ्च यादृशविशिष्टविषयत्वेन परामर्शस्यानुमितिजनकत्वं तत्त्वम् । तच्च साध्याभावव्याप्यवत्पक्षादिकम् । असाधारणविरोधयोरन्यतरस्य प्रतिपक्षावेधया दोषत्वपक्षे प्रकृतसाधने प्रकृतसाध्यव्यापकाभावप्रतियोगित्वाद्यनवगाही परामर्शो ग्राह्यः । तत्र सत्यन्तेन सत्प्रतिपक्षोन्नायकस्य, अविरोध्यन्तेनाऽऽश्रयासिद्ध्याद्युन्नायकस्य, विरोध्यन्तेन वन्हिव्याप्याभावे साध्ये वन्हिव्याप्यवत्पक्षात्मकस्य बाधस्य व्युदासः । संगृह्यते चानेन

येति प्रागेवोक्तम् । ननूक्तरूपोन्नायकत्वं यदि तदुन्नयनहेतुधीविषयत्वं तदोपदर्शितबाधज्ञानस्यापि कथञ्चिद्विशेषणज्ञानादिविधया तद्धेतुत्वात्तत्रातिव्याप्तिस्तादवस्थ्यमत आह तदुन्नायकत्वञ्चेति । अनुमितिजनकत्वमिति । निरुक्तविरोधिरूपगोचरानुमितिजनकत्वमित्यर्थः । तेन वन्हिव्याप्यवत्पक्षात्मकबाधस्यापि वन्ह्याद्यनुमितिजनकत्वान्न तत्रातिव्याप्तितादवस्थ्यम् । लक्ष्येषु लक्षणं ग्राहयति तच्चेति । तादृशविशिष्टं चेत्यर्थः । पक्षादिकमित्यादिपदेन साध्यवद्भिन्नत्वव्याप्यवत्पक्षाद्युपग्रहः । ननु नित्यः शब्दः शब्दत्वादित्यादौ साध्यव्यापकीभूताभावप्रतियोगिहेतुमत्पक्षस्यापि निरुक्तरूपवत्त्वात् तत्रातिव्याप्तिः, तस्य माणक्रन्मते असाधारणत्वेन स्वमते च विरोधत्वेनाऽलक्ष्यत्वादत आह असाधारणेत्यादि । निरुक्तोपाधेरसाधारणत्वेपि न तस्य प्रतिपक्षविधया दोषत्वं किं तु मिथो व्याप्तिग्रहप्रतिबन्धकत्वेनैवेति मिश्रमतेऽनिव्याप्त्यसम्भवात् पक्ष इत्युक्तम् । प्रतियोगित्वादीत्यादिना साधनतावच्छेदकादौ तादृशप्रतियोगितावच्छेदकत्वाद्युपग्रहः । ननु प्रकृतसाध्याभावव्याप्यवत्प्रकृतपक्ष एवास्तु प्रतिपक्षः साध्यवत्तावुद्धौ नव्यमते तस्यैव विरोधित्वात्, तथा च पक्षनिष्ठसाध्याभावव्याप्यादेरनुगमार्थं विरोधिरूपोन्नायकत्वघटितलक्षणं व्यर्थमत आह संगृह्यते चेति । अन्यथा प्रकृतसाध्याप्रसिद्ध्या तत्रत्यप्रतिपक्षसङ्ग्रहो न स्यादिति भावः । प्रसङ्गादाह सत्प्रतिपक्षे चेति । यथासिद्धान्तमिति । बौद्धैरुदाहरणादिद्वयस्य, मीमांसकैः प्रतिज्ञादित्रयस्य, प्राच्यैः कण्टकोद्धारणादिवाक्यान्तर्भा-

काञ्चनमयवन्हिमान्नित्यादौ वन्ह्याद्यभावव्याप्यह्रदत्वादिमान् पक्ष इति । सत्प्रतिपक्षे च यथासिद्धान्तं पञ्चावयवादिप्रयोगमिच्छन्ति । अयं हेतुः साध्यव्यभिचारवान्नित्यादिवदयं पक्षः साध्याभावव्याप्यवान्नित्यादिकमुद्भावनं पुनरुचितं प्रतिभाति ॥

वेण वाक्यदशकस्य, नैय्यायिकैश्च प्रतिज्ञादिपञ्चकस्य न्यायत्वोपगमादिति भावः । उचितमिति । स्थापनानुमाने दोषाकाङ्क्षायां व्यभिचारादेरिव साध्याभावव्याप्यवत्पक्षात्मनः प्रतिपक्षस्यैव प्रथममुपन्यासार्हत्वादिति भावः ॥

इति श्रीजगदीशतर्कालङ्कारकृतायामनुमानचिन्तामणिदीधितिव्याख्यायां सत्प्रतिपक्षग्रन्थः समाप्तः ।

चिन्तामणेः असिद्धिः ।

असिद्धिस्तु न व्याप्तिपक्षधर्मताविरहः, प्रत्येकमननुगमात् । अथ प्रत्येकाभावेऽनुगतो व्याप्तिपक्षधर्मताविशिष्टाभावोऽसिद्धिः, यद्यपि विशिष्टस्यान्यत्वे प्रत्येकाभावाव्याप्तिरपसिद्धान्तश्च अनन्यत्वे प्रत्येकाभाव एव स इत्यननुगमः, तथापि विशेषणावच्छिन्नप्रतियोगिको विशेष्याभावो विशेषणविशेष्यसम्बन्धाभावो वा विशिष्टाभावोऽनुगत इति चेन्न । विशिष्टाभावाज्ञानेऽपि व्याप्त्यादिप्रत्येकाभावज्ञाने उद्भावने चानुमितिप्रतिबन्धो वादिनिवृत्तिश्चेति तत्प्रत्येकाभावाव्याप्तिः । अन्यथा तेषां हेत्वाभासान्तरतापत्तेः । न च विशिष्टाभावधीद्वारा प्र-

दीधित्याः असिद्धिः ।

वस्तुत इत्याद्यभ्युच्चयमात्रं, विशिष्टपरामर्शविरोधित्वेन वि-

जागदीश्याः असिद्धिः ।

संसर्गमर्यादयापि पक्षधर्मत्वाद्यवगाहिनि परामर्शे व्याप्तिविशिष्टपक्षधर्मत्वाभावनिश्चयस्य विरोधित्वमनुभवबलादिहाश्रीयत इत्याशयेनाह वस्तुत इति।प्रत्येकस्य समर्थत्वे तेनेत्यादिदोषं निर-

त्येकाभावो दोषो लभ्यत इति वाच्यम । प्रत्येकाभावस्य स्वत एव दोषत्वसम्भवात् । वस्तुतो विशिष्टाभावो दोष एव न, प्रत्येकस्य समर्थत्वे तेनैवान्यथासिद्धेर्व्यर्थविशेषणत्वात् प्रत्येकाभावमज्ञात्वा न विशिष्टाभावज्ञानमित्युपजीव्यत्वाद्विशिष्टाभावानुद्भावनेऽपि प्रत्येकोद्भावने वादिनिवृत्तेश्च । अत एव व्याप्तिपक्षधर्मतावैशिष्टज्ञानविषयाभावत्वं प्रत्येकाभावानुगतमसिद्धत्वम्, व्यभिचारादावसिद्धत्वेऽप्युपजीव्यत्वेन प्राथम्यात्तदुद्भावने वादिनिवृत्तेश्च स स्वत एव दूषकः, तत्र व्याप्त्यसिद्ध्यर्थमुपाधौ तूद्भाविते विप्रतिपद्यतेऽपि, तस्य दुर्ग्रहत्वात् व्यभिचारेणैव तदुन्नयनाच्च, यदि च व्यभिचारादिकमज्ञात्वाप्यसिद्धिबुद्धिः, तथाप्युपधेयसङ्करेऽप्युपाधेरसङ्कर एवेति निरस्तम्।व्यर्थविशेषणत्वादेव । एतेन व्याप्तिपक्षधर्मतान्यतराभावोऽसिद्धि-

---

शिष्टाभावस्य दोषताया दुर्वारत्वात् । प्रत्येकाभावमज्ञात्वापि शब्दादिना शक्यग्रहत्वाद्।व्यर्थविशेषणत्वस्य चाऽसाधकतासाधनएव

स्यति विशिष्टपरामर्शेति । विशिष्टाभावस्येति । व्याप्तिविशिष्टपक्षधर्मत्वाभावस्येत्यर्थः । दुर्वारत्वादिति । तथा च विशिष्टाभावस्यापि दूषणसमर्थत्वान्न प्रत्येकाभावेन तस्याऽन्यथासिद्धिरिति भावः । प्रत्येकाभावमज्ञात्वेत्यादियुक्तिं निरस्यति प्रत्येकेति । शब्दादिनेत्यादिनाऽनुमानोपग्रहः।शक्यग्रहत्वादितितथा च प्रत्येकाभावस्योपजीव्यत्वमेव नेति भावः । व्यर्थविशेषणत्वादिति उक्तं निरस्यति व्यर्थेति ।

रिति प्रत्युक्तम्। अन्यतरत्वाज्ञानेऽपि प्रत्येकाभावस्य दोषत्वात् व्यर्थविशेषणत्वाच्च। यत्तु व्याप्तिपक्षधर्मता-प्रमितिविरह आश्रयासिद्ध्यनुगतोऽसिद्धिः, तत्प्रमितिसत्त्वे तत्रानुमितिप्रमित्यापत्तेरिति। तदपि व्यर्थविशेषणत्वात् तदज्ञानेऽपि प्रत्येकज्ञानस्य दोषत्वाच्च निरस्तम्। वस्तुत-स्तु प्रकृतहेतुव्याप्तिपक्षधर्मतावैशिष्ट्यस्य तत्प्रमितेश्चाऽप्र-सिद्ध्या तदभावो ज्ञातुमुद्भावयितुञ्चाऽशक्य एव। यत्कि-ञ्चिद्व्याप्तिपक्षधर्मतावैशिष्ट्यप्रमितिविरहः सद्धेतुसाधारण: स्वप्रमितिविरहो यत्किञ्चित्प्रमितिविरहो वा सद्धेतावपि सकलतत्प्रमितिविरहो दुर्निरूपः, व्याप्त्याद्यभावादेव तद्ग्रहे स एव दोष उपजीव्यत्वात्। यदि च प्रमिति-विरहः स्वरूपसन्नेव दोषः कारणाभावत्वात् तदा व्याप्त्या-दिभ्रमादनुमितिर्न स्यात्। न स्याच्च हेत्वाभासता, ज्ञानग-

---

सम्भाव्यत्वात्। न वा तदपि, तादृशाभावविशिष्टव्याप्तेर्धर्मान्तरेणाऽव-

---

साधन एवेति। अयं हेतुरसाधको व्याप्तिविशिष्टपक्षधर्मताशून्यत्वा-दित्यसाधकतानुमाने तादृशावैशिष्ट्याभावत्वस्य स्वसमानाधिकरणप्र-त्येकाभावत्वापेक्षया गुरुत्वेन व्यर्थविशेषणत्वेऽपि परामर्शविरोधित्वेन दूषकतायां वैयर्थ्याभावादिति भावः। सम्भाव्यत्वादिति। वस्तुतो वि-शिष्टाभावत्वस्य प्रत्येकाभावत्वाघटितत्वाद्युक्तानुमानेऽपि न वैयर्थ्य-मिति विशिष्टाभावस्यातिरिक्तत्वमभ्युपेत्याह न वेति। तदपि व्यर्थवि-

भेतल्लक्षणाभावात्। एतेन व्याप्तिप्रमितिपक्षधर्मताप्रमिति-विरहान्यतरत्वमसिद्धिः अन्यतरत्वञ्च तदन्यान्यत्वं तेनोभयविरहेऽपि नाव्याप्तिरिति निरस्तं, व्यर्थविशेषणत्वादेव। स्यादेतत् व्याप्तिपक्षधर्मताभ्यां निश्चयः सिद्धिः तदभावोऽसिद्धिः, अत एवाव्याप्तेऽपक्षधर्मे च तदारोपरूपाऽसिद्धिरित्यनुमितिः न तु व्याप्तपक्षधर्मादपि तदनिश्चये। न चैवं हेतोरप्याभासत्वं तदाभासस्यापि हेतुत्वं स्यात्, दशाविशेष इष्टत्वात्। सेयं स्वरूपसती दूषिका, कारणाभावत्वात्। न च व्याप्त्यादिप्रत्येकनिश्चयाभाव एव दूषक आवश्यकत्वादिति वाच्यम्। विशिष्टनिश्चयस्य हेतुत्वे तदभावस्य कार्य्यानुत्पादकत्वादिति। मैवम्। एवं सव्यभिचारादेरप्यत्रैवान्तर्भावप्रसङ्गात् असिद्धेः स्वरूपसत एव दोषत्वे स्वज्ञानार्थं व्यभिचाराद्यनुद्भावना-

---

च्छेत्तुमशक्यत्वात् विशेष्यादिप्रतियोगिकत्वमात्रस्य व्यभिचारि-

---

शेषणत्वस्य सम्भाव्यत्वमपि। तादृशेति। अखण्डविशिष्टाभावेत्यर्थः। अशक्यत्वादात। प्रत्येकाभावत्वापेक्षया गुरुणो विशिष्टाभावत्वस्य भिन्नधर्मिकत्वनाऽवैयर्थ्यादिति भावः। ननु तथापि पक्षधर्मताप्रतियोगिकाभावत्वस्यैवाऽसाधकताव्याप्यतावच्छेदकत्वसम्भवाद्विशिष्टपक्षधर्मत्वाभावत्वस्य तथापि व्यर्थविशेषणत्वमेवेत्यत आह विशेष्यादीति। मात्रपदेन पक्षधर्मतात्वावच्छिन्नत्वादिप्रतिक्षेपः। व्यभिचारीति। साध्यसाधकेऽपि हेतौ पक्षधर्मत्वप्रतियोगिकाभावस्य

त्। यदि च तस्मात् सिद्धिर्नोपपद्यत इति तस्योपजीव्यत्वं तदाश्रयासिद्ध्यादिज्ञानात् सिद्धिर्नेति स एव पृथग्दोषः स्यात्। असिद्धिश्च ज्ञाता परस्यानुमाव्येति स्वज्ञानार्थमनुमानितासिद्धिनिर्वाहार्थमाश्रयासिद्ध्यादिज्ञानमावश्यकम्। कथञ्च हेतुतदाभासविवेकः, सिद्धौ द्वयोरपि हेतुत्वात् असिद्धौ तदाभासत्वात् व्यभिचारादेः सद्धेतौ सिद्धिमखण्डयतश्च हेत्वाभासत्वाभावात्। अथ सुषुप्तौ जागरेऽपि व्याप्तिपक्षधर्मतासत्त्वे तदनिश्चयेऽनुमित्यनुत्पादो हेत्वाभासप्रयोज्यः सव्यभिचारादौ तथाऽवधारणादित्यसिद्धिरज्ञाताऽपि हेत्वाभासः। न चैवं हे-

---

साधारणत्वादिति। व्यभिचारादेरिति। सद्धेतौ सद्धेतुत्वेन ज्ञायमाने। तदानीं सिद्धेरप्रतिबन्धेऽपि कालान्तरगृहीतेन व्यभिचारादिना तदानीन्तनाभासत्वं सुग्रहमिति तु ध्येयम्। तेन रूपेण

सत्त्वात्तस्याऽसाधकत्वव्यभिचारित्वादिति भावः। ननु सद्धेतौ व्यभिचारस्यैवासत्त्वात् तत्र तस्याभासत्वाभावप्रसञ्जनमसङ्गतमतो व्याचष्टे सद्धेतुत्वेनेति। व्याप्तिविशिष्टपक्षधर्मत्वेन निश्चीयमान इत्यर्थः। तथा च तादृशो व्यभिचार्य्यपीति तत्रैव तत्प्रसञ्जनमिति भावः। मूलमपि दूषयति तदानीमिति। व्याप्तिपक्षधर्मतानिश्चयदशायां तथावधानिश्चयात्मकसिद्ध्यप्रतिबन्धेऽपि कालान्तरगृहीतव्यभिचारेणैव तादृशसिद्धिप्रतिबन्धात् तादृशसिद्धिकालेऽपि व्यभिचारस्याभासत्वं सुग्रहं, न हि तदानीं सिद्धिखण्डकत्वमेव तदानीमाभासत्वं तथा, कदाचित् सिद्धिखण्डकस्यैव तथात्वादिति भावः।

त्वाभासाधिक्यं क्लृप्तान्तर्भावो वा, तेन रूपेण व्याप्त्यसिद्ध्यादेरेव संग्रहादिति चेन्न । एवं सव्यभिचारादिरप्यसिद्धिः स्यादित्युक्तत्वात् । उपजीव्यनाद्भेदे आश्रयासिद्ध्यादिरपि पृथक् स्यात् । सुषुप्त्यादावनुमित्यभावः कारणाभावात् कार्य्यानुत्पादो हि न प्रतिबन्धकमात्रात् किन्तु कारणाभावादपि, असत्यपि प्रतिबन्धके वन्ह्यभावेन दाहानुत्पत्तेः । अथानुमित्यनुत्पादो हेत्वाभासप्रयुक्त एवेति चेत् । तर्ह्यनुमितौ मनोयोगादिरपि न हेतुः, हेत्वाभासादेवाऽनुमित्यनुत्पादे तद्व्यतिरेकेणानुमित्यनुत्पादाभावात्, सिद्धरेव तद्धेतुत्वे चरमकारणमेव हेतुः स्यात् । अन्ये तु गमकतौपयिकप्रतिद्वन्द्विव्याप्तिपक्षधर्मताविरहनिश्चयतयोरन्यतरत्वं हेत्वाभासत्वं, तत्राधिकसमानबलौ बाधप्रतिरोधौ प्रतिद्वन्द्विनौ, व्याप्तिपक्षधर्मताविरहश्चासिद्धिः, तन्निश्चयौ च सव्यभिचारविरुद्धौ,

---

तत्साधारणरूपेण । वन्ह्यभावेनेति । वन्ह्यभावस्तु न प्रतिबन्धकः,

---

व्याप्तिपक्षधर्मतानिश्चयाभावत्वरूपस्याऽज्ञानरूपासिद्धित्वस्य व्याप्तिनिश्चयाभावरूपव्याप्यत्वासिद्ध्यादावसत्त्वात्तदनुगमकत्वासम्भवाद्बाधाचष्टे तत्साधारणेति । तथा च परामर्शत्वव्यापकीभूतनिश्चयत्वावच्छिन्नाभावत्वमेव परामर्शाभावव्याप्तिनिश्चयाद्यभावसंग्राहकमिति भावः । ननु वन्ह्यभावस्यैव दाहप्रतिबन्धकत्वादसत्यपि

न चानयोरप्यसिद्धान्तर्भावः, व्याप्तिविरहनियतत्वेन ज्ञातयोः स्वातन्त्र्येणैव दूषकत्वात् भ्रमे विशेषदर्शनस्येवेति । तन्न । अत्रापि व्याप्तिपक्षधर्मताविरह एवासिद्धिः पर्यवस्यति, तत्र चोक्तमेव । अन्यतरत्वञ्च न लक्षणं, व्यर्थविशेषणत्वात् हेत्वाभासान्तरबहिष्कृतस्य व्याप्तिपक्षधर्मतानिश्चयविरोधिनो रूपस्य विवक्षितत्वात्, तच्चाश्रयासिद्ध्यादिकमेवेति ॥

कारणीभूतो योऽभावस्तत्प्रतियोगिन एव तथात्वात् । यद्भावत्वेन कारणत्वं तदेव तथेत्यपि कश्चित् ॥

प्रतिबन्धक इत्यसङ्गतमत आह वन्ह्यभावस्त्विति।अभावो भावभिन्नः वन्हिस्तु दाहकारणीभूतोपि भाव एवेति तत्प्रतियोगिनो वन्ह्यभावस्य न दाहप्रतिबन्धकत्वमिति भावः। मतान्तरमाह यद्भावत्वेनेति । तादृशधर्मावच्छिन्नाभावत्वेन कारणत्वं तादृशधर्मवदेव प्रतिबन्धकमित्यर्थः । दाहादौ च न वन्ह्यभावत्वावच्छिन्नाभावत्वेन कारणत्वं, लाघवात् वन्हित्वेनैव तथात्वादिति भावः । न चोत्तेजकाभावविशिष्टमणित्वाद्यवच्छिन्नाभावव्यक्तेस्तद्व्यक्तित्वेनैव दाहादिहेतुत्वान्मण्यादेरुक्तप्रतिबन्धकत्वं न स्यादिति वाच्यम् । प्रतियोगिविनाकृतस्याऽखण्डाभावस्य तद्व्यक्तित्वेन हेतुतायामन्यथासिद्धत्वात्।अन्यथा पदार्थान्तरमप्यन्तर्भाव्याऽखण्डाभावस्य तद्व्यक्तित्वेन हेतुतापत्त्यादेरनुपदं विस्तृतत्वादिति भावः ॥

इति जागदीश्यामसिद्धिपूर्वपक्षग्रन्थः समाप्तः

उच्यते । आश्रयासिद्धिः स्वरूपासिद्धिः व्याप्यत्वासिद्धिः प्रत्येकमेव दोषः, प्रत्येकस्य ज्ञानादुद्भावनाच्चानुमितिप्रतिबन्धात्, न तु विशिष्टाभावः परामर्शविषयाभावो वा, व्यर्थविशेषणत्वात् तस्य ज्ञानमुद्भावनं विनाप्यनुमितिप्रतिबन्धात् । अनुभवसिद्धे हि लक्षणं न तु लक्षणानुरोधेनानुभवकल्पना, परामर्शविषयाभावत्वेनाऽनुगतेन त्रयाणामसिद्धत्वेन संग्रहो महर्षिणा कृत इति न विभागविरोधो हेत्वाभासाधिक्यं वा । अत एव ये व्याप्तिविरहपक्षधर्मताविरहरूपास्तेऽसिद्धिभेदमध्यमध्यासते तदन्ये च यथायथं व्यभिचारादय इति सिद्धा-

---

परामर्शेत्यादि । ननु परामर्शविषयाभावत्वमनाभासे, आभासत्वविशेषितमपि बाधविशेषे, परामर्शविरोधित्वविशेषित-

---

परामर्शविषयाभावत्वं परामर्शविषयप्रतियोगिकाभावत्वम् । तादृशविषयत्वावच्छिन्नाभावस्याऽसिद्धहेतावसत्त्वात् । अनाभासेऽतिप्रसक्तमित्यन्वयः । एवमग्रेऽपि । असिद्धेतावपि परामर्शविषयीभूतस्य साध्यतावच्छेदकादेरभावसत्त्वादिति भावः । बाधविशेष इति । पक्षनिष्ठसाध्याभावात्मनो बाधस्याभासत्वे सति परामर्शविषयप्रतियोगिकाभावत्वादिति भावः । साध्याभाववत्पक्षात्मनो बाधस्य तादृशविषयाभावत्वविरहात् तत्रातिव्याप्त्यसम्भवाद्विशेषपदम् । विशेषितं चेति । तादृशविरोधित्वमात्रस्य व्यभिचाराद्यतिप्रसक्तत्वादिति भावः । ननु तदन्यत्वेन विशेषणान्नातिप्रसक्तिरत आह अप्रसक्तं चेति । पक्षादाविति । पक्षादेः परामर्शविषयप्रतियोगिकाभा-

न्तप्रवादोऽपि । न चैवं साक्षात्प्रतिबन्धकत्वेन बाधप्रतिरोधयोर्व्याप्तिविरहलिङ्गत्वेन सव्यभिचारविरुद्धयोरपि संग्रहे विभागव्याघातः, स्वतन्त्राभिप्रायस्य निषेदुधुमशक्यत्वात् । अन्यथा शास्त्रे परिभाषाच्छेदापत्तेः । सव्यभिचारादेरप्येवं रूपसत्त्वेऽप्युपजीव्यत्वेन पृथक्त्वम्, उपधेयसङ्करेऽप्युपाधेरसङ्करात् । नन्वाश्रयाप्रसिद्ध्या कथमाश्रयासिद्धिरुद्भाव्या । न च शशीयतया गवि शृङ्गनिषेधवत् व्योमकमलमिति वाच्यम् । शशशृङ्गनिषेधो न गवीत्युक्तत्वादिति चेत् । व्योमकमलमिति निश्चितानन्वयत्वेनाऽपार्थकम्, आश्रयविशेषणासिद्ध्या चाश्रयासिद्धिरसङ्कीर्णा । व्याप्तिविरहश्च व्यर्थविशेषणादौ, तदुक्तमेकामसिद्धिं दुष्परिहरतो द्वितीयापत्तिरिति ।

श्च हेतोः साध्यासामानाधिकरण्येऽतिप्रसक्तम्, अप्रसक्तश्च साधनाद्यभाववत्पक्षादौ, पक्षादेः साधनवदन्यत्वादौ, साधनादेः पक्षादिवृत्त्यन्यत्वपक्षनिष्ठाभावप्रतियोगित्वादौ । अत एव यस्य यद्धर्म्मवत्त्वं परामर्शविषयस्तस्य तदभाववत्त्वं तदिति शब्दमात्रानुगतं प्रत्युक्तम्, परामर्शविरोधित्वमात्रञ्च सव्यभिचारेऽति-

---

वत्त्वविरहादिति भावः । आदिपदात् पक्षतावच्छेदकाद्यभाववत्पक्षादेरुपग्रहः । अत एव साधनाभाववत्पक्षाद्यव्याप्तेरेव । शब्दमात्रेति । यत्त्वतत्त्वयोरननुगमादर्थैक्यासम्भवादिति भावः । (सव्यभिचारादित्यादिना विरोधस्योपग्रहः ।) परामर्शविरोधित्वमात्रमिति मात्र-

उपाधिस्तु न व्याप्तिविरहः वह्निव्यापकधूमाव्यापकधर्मस्याप्रसिद्ध्या धूमे तद्विरहासिद्धेः, किन्तु यावत्स्वव्यभिचारिव्यभिचारिसाध्यसामानाधिकरण्यमनौपाधिकत्वं व्याप्तिः। साध्यव्यापकसाधनाव्यापकश्च धर्मान्तरं न तद्विरहः अपि तु तन्नियतः। न चैवमुपजीव्यत्वेन उपाधिर्हेत्वाभासान्तरम्, उपजीव्यत्वेऽपि स्वतोऽदूषकत्वेन तदर्थं परमुखवीक्षकत्वात्। न हि साध्यव्यापकाव्याप्यत्वमनुमितिविरोधि किन्तु व्यभिचारोन्नयनेन स्वव्यतिरेकेण सत्प्रतिपक्षतया वा, तदाह उपाधाववश्यं व्यभिचार उपाधेरेव व्यभिचारशङ्केति। अप्रयोजकान्यथासिद्धौ सोपाधी नासिद्धौ। प्रतिकूलतर्कानुकूलतर्काभावावुपजीव्यत्वे सति स्वतोदूषकावपि न हेत्वाभासौ, स्वरूपसतोरेव प्रतिबन्धकत्वादित्युक्तम्॥

प्रसक्तप्र। न च तदन्यत्वेन विशेषणीयं, नित्यो घटो द्रव्यं प्रमेयो वा जलत्वादिवादौ तदर्थाप्रसिद्धेः। अथ पक्षतावच्छेदकरूपेण पक्षे

पदेन तद्विषयाभावत्वव्युदासः। तेन साधनाभाववत्पक्षादौ नाव्याप्तिः। तदन्यत्वेन सव्यभिचाराद्यन्यत्वेन। नित्यो घट इत्यादि। द्रव्यत्वे साध्ये हेतुनिष्ठमेव साध्याभाववद्वृत्तित्वमप्रसिद्धं न तु तन्मात्रं प्रमेयत्वसाध्ये तु तदप्यप्रसिद्धमित्याशयेन साध्यान्तरमाह प्रमेय इति। आश्रयासिद्धिसम्पादनाय नित्यत्वोपादानम्। तदर्थेति। तदन्यत्वत्र त-

हेतुतावच्छेदकरूपेण हेतोर्यद्विशिष्टज्ञानं साध्यतावच्छेदकविशिष्टसाध्यावगाहितद्विरोधित्वं तदिति चेन्न । पक्षवृत्तित्वविशिष्टसाध्याव्यभिचरितसामानाधिकरण्याद्यभावाव्याप्तेः । न च विशिष्टपक्षविशिष्टसाधनवैशिष्ट्यविशिष्टसाध्यग्रहाविरोधि यद्व्याप्तिग्रहविरोधि तदन्यत्वे सति परामर्शविरोधित्वं तत्, विशिष्टपक्षवैशिष्ट्योपादानाद्वन्हिमान् जलह्रदत्वादिस्थादौ व्याप्तिग्रहविरोधिन्या अपि स्वरूपासिद्धेर्नाऽसंग्रह इति वाच्यम् । जलह्रदो वन्हिमान् काञ्चन-

---

त्पदस्य योऽर्थो व्यभिचारादिस्तदप्रसिद्धेरित्यर्थः । तथा च तत्राश्रयासिद्ध्याद्यव्याप्तिरिति भावः । साध्यस्यापि विशिष्टज्ञानोक्तौ बाधेति-व्याप्तिरतः स्वातन्त्र्येण साध्यावगाहितां निवेशयन्नाह साध्यतावच्छेदकेत्यादि । साध्यावगाहितदिति । प्रकृतसाध्यावगाहिनस्तादृशविशिष्टज्ञानस्य विरोधित्वमित्यर्थः । साध्याव्यभिचरितसामानाधिकरण्याभावस्य सव्यभिचारमध्य एव प्रागन्तर्भावितत्वात् पक्षवृत्तित्वविशिष्टेति । आदिना पक्षवृत्तित्वविशिष्टव्यतिरेकव्याप्त्याद्यभावस्योपग्रहः । न चेति । वाच्यमित्यन्वयः तत् असिद्धत्वम् । परामर्शविरोधित्वमात्रं साधारण्याद्यतिप्रसक्तमतः सत्यन्तम् । प्रकृतपक्षप्रकृतसाधनयोर्वैशिष्ट्यस्य प्रकृतसाध्यस्य च यो ग्रहस्तदविरोधी सन् यो व्याप्तिग्रहविरोधी तदन्यत्वे सतीत्यर्थः । केवलस्य व्याप्तिग्रहविरोध्यन्यत्वस्योक्तौ साध्याप्रसिद्ध्याद्यव्याप्तिरतोऽविरोधित्वान्तम् । प्रकृतपक्षसाधनयोर्वैशिष्ट्योक्तेः फलमाह विशिष्टपक्षेत्यादिना । नासंग्रह इति । वन्हिमदवृत्तित्वविशिष्टह्रदत्वस्वरूपायाः स्वरूपासिद्धेः साध्यसामानाधिकरण्यांशे व्याप्तिग्रहविरोधित्वेपि प्रकृतपक्षसाधनवैशिष्ट्यग्रहविरोधित्वादविरोधीभूय यो व्याप्तिग्रहविरोधी तदन्यत्वस्य तत्र सत्त्वादिति भावः जलह्रद इति ह्रदपक्षे वन्हिसाध्ये धूमहेतोः स्वरूपासिद्धिमात्रं काञ्चनमयवन्हिसाध्यकस्य तु व्याप्यत्वासिद्धिरपि सा च साध्याप्रसिद्धिसाधनाप्रसिद्धिभेदाद्द्विधेति साध्यसाधनयोः काञ्चनमयत्वोल्लेख । साध्यविशेषणासिद्ध्यादेरेव व्याप्तिग्रहविरो-

मयवन्हिमान् वा धूमात् काञ्चनमयधूमाद्वेत्यादौ व्याप्तिग्रहविरोधिनस्तादृशग्रहाविरोधिनो रूपस्याऽप्रसिद्धेः ।

* उच्यते । साधारण्यकथितासाधारण्यानुपसंहारित्वभिन्नं

धिनः प्रसिद्धत्वादाह तादृशेति । प्रकृतपक्षसाधनवैशिष्ट्यप्रकृतसाध्यग्रहाविराधिन इत्यर्थः ।

* उच्यत इत्यनन्तरमस्मत्सम्प्रदायसिद्धः पाठो लिख्यते । "साधारण्यकथितासाधारण्यानुपसंहारित्वभिन्नं ज्ञानस्य विषयतया परामर्शविरोधितावच्छेदकं रूपमसिद्धिः । यत्र साधारण्यादिकमप्रसिद्धं यत्र च वन्ह्यव्यभिचारिमेयत्ववान् वन्हिसमानाधिकरणह्रदत्ववान् वन्ह्यभावव्यापकीभूताभावप्रतियोगिह्रदत्ववान् वा पर्वतो वन्हिमान्मेयत्वात् ह्रदत्वाद्वा इत्यादौ यत्साधारण्यादिकमेव वासिद्धिस्तत्र तदन्यत्वं नोपादेयम् शब्दानुगमस्याऽकिञ्चित्करत्वात्। परामर्शे च व्याप्तिर्व्यतिरेकतोप्युपादेया नातो व्यतिरेकव्याप्तिविशिष्टपक्षधर्मत्वाभावादावव्याप्तिः । साधारण्याद्यनिरूपितया ज्ञानस्य विषयितया परामर्शविरोधितावच्छेदकं रूपं वाऽसिद्धिः। अत एव द्रव्यत्वाव्यभिचारिगुणद्रव्योभयसमवेतवान् द्र-

---

* अत्र उच्यते इत्यारभ्य वक्तव्यमित्यन्तं भवानन्दादीनामन्यथैव दीधितिपाठः सम्मतः इति पाठद्वैविध्यस्य प्रसिद्धतया जगदीशेन स्वाभिप्रेतपाठमुल्लिख्य व्याख्या कृता । अन्यसम्मतः पाठस्तु एवम्— "साधारण्यासाधारण्यैभिन्नं तज्ज्ञानस्य विषयतापरामर्शविरोधितावच्छेदकरूपमसिद्धिः । वन्ह्यव्यभिचारिमेयत्ववान् वन्हिसमानाधिकरणह्रदत्ववान् वा पर्वतो वन्हिमान् मेयत्वात् ह्रदत्वाद्वेत्यादौ आश्रयासिद्धिविरहेऽपि न क्षतिः, आसिद्धित्रयस्याऽसार्वत्रिकत्वात् । आश्रयासिद्धिलक्षणस्य चासिद्धिघटितत्वान्नातिप्रसङ्गः । प्रकृतपक्षाप्रविष्टाभावकसाधारण्यादिभिन्नं वा वक्तव्यम् परामर्शे चान्वयव्याप्तिरुपादेया तेनानुपसंहारित्वव्युदासः । साध्यसाधनभेदेनासिद्धिभेदात् यत्र साधारण्यादिकमप्रसिद्धं तत्र तदन्यत्वं नोपादेयं यथा काञ्चनमयः पर्वतो ह्रदो वा वन्हिमान् मेयो वा धूमात् मेयत्वाद्वेत्यादौ । पर्वतान्यः पर्वतो दह्यनान्यदहनवान् धूमान्यधूमादित्याद्यसिद्धिसम्पादनाय हेत्वाभासलक्षणोक्तरीतिरनुसरणीया । तत्र विशिष्टपक्षग्रहस्य विरोधित्वसिद्धिर्विरोधिरूपं वाश्रयासिद्धिः । प्रकृतपक्षप्रकृतहेतुग्रहाविरोधिनो ज्ञानस्य विषयतया तदुभयविशिष्टग्रहविरोधितावच्छेदकं स्वरूपासिद्धिः । संगृह्यते चानेनानित्यं गगनं रूपवत् चाक्षुषस्पर्शाश्रयत्वादित्यादौ निस्पर्शादिकम् । एवं शब्दो द्रव्यं गुणान्यत्वे सति सत्त्वात् गुणान्यत्वविशिष्टसत्त्वं द्रव्यत्वव्यभिचारि गुणवृत्तित्वादित्यादावपि नाव्याप्तिः । तदुभयभिन्नासिद्धिर्व्याप्यत्वासिद्धिः । पक्षादिभेदेनासिद्धिभेदात् यत्राश्रयासिद्ध्यादिकमप्रसिद्धं तत्र तदन्यत्वं न वक्तव्यमिति" ।

ज्ञानस्य विषयतया परामर्शविरोधितावच्छेदकं रूपमसिद्धिः । यत्र साधारण्यादिकमप्रसिद्धं यत्र च वन्ह्यव्यभिचारिमेयत्ववान् वन्हि-

---

व्यत्वसमानाधिकरणगुणसमवेतकर्मासमवेतवान्वा घटो द्रव्यं सत्त्वात् द्रव्यकर्मासमवेतसमवेताद्वेत्यादौ गुणद्रव्योभयसमवेतादिनिष्ठस्य द्रव्यत्वव्यभिचारित्वादेः सत्त्वादिनिष्ठद्रव्यत्वव्यभिचारित्वाद्यात्मकसाधारण्यादितोऽनतिरिक्तत्वेपि न क्षतिः। पर्वतान्यः पर्वतो दहनान्यदहनवान् धूमान्यधूमादित्यादौ असिद्धिसम्पादनाय हेत्वाभासलक्षणोक्ता रीतिरनुसर्त्तव्या। तत्र ज्ञानस्य विषयतया प्रकृतपक्षग्रहविरोधितावच्छेदकं रूपमाश्रयासिद्धिः।विशिष्टपक्षसाधनग्रहाविरोधिनो ज्ञानस्य विषयतया तदुभयवैशिष्ट्यग्रहविरोधितावच्छेदकरूपं स्वरूपासिद्धिः। संगृह्यते चेत्थमनित्यगगनं रूपवत् चाक्षुषस्पर्शवत्त्वादित्यादौ गगनादेर्निःस्पर्शत्वादिकम् । एवं शब्दो द्रव्यं गुणान्यत्वे सति सत्त्वात् गुणान्यत्वविशिष्टसत्त्वं द्रव्यत्वव्यभिचारि गुणवृत्तित्वादित्यादावपि नाव्याप्तिः। तदुभयाभिन्नासिद्धिर्व्याप्यत्वासिद्धिः । पक्षादिभेदेनाऽसिद्धिभेदाद्यत्राश्रयासिद्ध्यादिकमप्रसिद्धं तत्र तदन्यत्वं न वक्तव्यमिति"। अतः परं व्याख्यायते।साधारण्येत्यादि। परामर्शविरोधितावच्छेदकत्वं साधारण्यादेरपीत्यतो भिन्नान्तम्। मूलोक्तासाधारण्यस्य सत्प्रतिपक्षविधयानुमितिं प्रत्येव विरोधित्वात्तदन्यत्वप्रवेशेन साध्यसामानाधिकरण्यवारणायोगादाह कथितेति। साध्यसाधनसामानाधिकरण्यग्रहविरोध्यात्मकस्वोक्तेत्यर्थः। परामर्शविरोधिनीं कामिनीजिज्ञासामादाय कामिन्यादावतिव्याप्तिवारणाय ज्ञानस्येति । यादृशविशिष्टविषयकज्ञानत्वं प्रकृतपरामर्शत्वाव्याप्यविषयिताशून्यज्ञानप्रतिबन्धकतावच्छेदकीभूतविषयतानतिरिक्तवृत्ति साधारण्यादिभिन्नत्वादृशविशिष्टपदार्थोऽसिद्धिरिति तु फलितार्थः । ननु ह्रदः काञ्चनवन्हिमान् धूमादित्यादौ साधारण्याद्यप्रसिद्धेस्तत्रत्यस्वरूपासिद्ध्यादावव्याप्तिरत आह यत्रेति । अप्रसिद्धमिति । तत्र तदन्यत्वं नोपादेयमित्यन्वयः । ननु वन्ह्यव्यभिचारिमेयत्ववत्पर्वतो वन्हिमान् मेयत्वादित्यादावाश्रयासिद्धावव्याप्तिः। वन्हिव्यभिचारिमेयत्वाद्यात्मकायास्तस्याः साधारण्याद्यभिन्नत्वादत आह यत्र

समानाधिकरणह्रदत्ववान् वह्न्यभावव्यापकीभूताभावप्रतियोगि-ह्रदत्ववान् वा पर्वतो वह्निमान् मेयत्वात् ह्रदत्वाद्वेत्यादौ साधारण्यादिकमेव वाऽसिद्धिस्तत्र तदन्यत्वं नोपादेयं शब्दानुगमस्याऽकिञ्चित्करत्वात् । परामर्शे च व्याप्तिर्व्यतिरेकतोप्युपादेया, नातो व्यतिरेकव्याप्तिविशिष्टपक्षधर्मत्वाभावादावव्याप्तिः । साधारण्यादिरूपितया ज्ञानस्य विषयितया परामर्शविरोधितावच्छेदकरूपं वा असिद्धिः । अत एव द्रव्यत्वाव्यभिचारिगुणद्रव्योभयसमवेतवान् द्रव्यत्वसमानाधिकरणगुणसमवेतकर्मासमवेतवान् वा घटो

चेतामतुवन्तत्रयं पक्षीभूतस्य पर्वतस्य विशेषणम्।तत्रापि प्रथमेन साधारण्यस्यं द्वितीयेनाऽसाधारण्यत्वं तृतीयनाऽनुपसंहारित्वत्वमाश्रयासिद्धेर्लभ्यते। ननु परामर्शोत्र यद्यन्वयव्याप्तिग्रहगर्भस्तदा व्यतिरेकव्याप्तिविशिष्टपक्षधर्मत्वाभावाद्यव्याप्तिरत आह परामर्शे चेति। ननु द्रव्यत्वाव्यभिचारिद्रव्यगुणोभयसमवेतवान् घटो द्रव्यं सत्त्वादित्यादौ गुणद्रव्योभयसमवेतनिष्ठद्रव्यत्वव्यभिचाररूपायामाश्रयासिद्धावव्याप्तिलक्ष्याः सत्त्वादिसाधननिष्ठं यद्द्रव्यत्वादिव्यभिचारित्वाद्यात्मकं साधारण्यादिकं तद्भिन्नत्वाभावात्। न च द्रव्यत्वाव्यभिचारिद्रव्यसमवेते गुणसमवेतत्वमेव तत्राश्रयासिद्धिः, द्वयोरपि पक्षत्वीविरोधित्वेनैकशेषस्य दुष्करत्वादत आह साधारण्यादिरूपितयेति। साधारण्याद्यनवच्छिन्नयद्विषयताकज्ञानत्वेन परामर्शप्रतिबन्धकत्वं तत्त्वमित्यर्थः। कथिताश्रयासिद्धिज्ञानस्य हेतुभूतसत्त्वनिष्ठद्रव्यत्वव्यभिचारित्वानवच्छिन्नविषयताकस्यैव परामर्शविरोधित्वान्न तत्राव्याप्तिरिति भावः। उक्तानुशयं स्वयमेवाह अत एवेति। द्रव्यत्वाव्यभिचारी यो द्रव्यगुणोभयसमवेतस्तद्वान् घट इत्यन्वयः। गुणसमवेतरूपत्वादिनिष्ठस्य द्रव्यत्वव्यभिचारित्वस्य साधनीभूतसत्त्वनिष्ठव्यभिचारभिन्नत्वात् गुणसमवेतमात्रोक्तावव्याप्त्यभावात् द्रव्यपदमागुणपदन्त्वाश्रयासिद्धिसम्पत्त्यर्थम्। साधारण्यरूपायामाश्रयासिद्धावव्याप्तिमुद्भावयति साधारण्यरूपायां तस्यामुद्धरति द्रव्यत्व-

द्रव्यं सत्त्वात् द्रव्यकर्मासमवेतसमवेतादेरादौ गुणद्रव्योभयसमवेतादिनिष्ठस्य द्रव्यत्वव्यभिचारित्वादेः सत्तादिनिष्ठद्रव्यत्वव्यभिचारित्वाद्यात्मकसाधारण्यादितोऽनतिरिक्तत्वेऽपि न क्षतिः। पर्वतान्यः पर्वतो दहनान्यदहनवान् धूमान्यधूमादित्यादावसिद्धिसम्पादनाय हेत्वाभासोक्ता रीतिरनुसर्तव्या। तत्र ज्ञानस्य विषयतया विशि-

---

समानेति। द्रव्यत्वसमानाधिकरणो यो गुणसमवेतत्वे सति कर्मासमवेतस्तद्वान् घट इत्यन्वयः। अत्र गुणसमवेतत्वविशिष्टकर्मासमवेतनिष्ठं यत् द्रव्यत्वासामानाधिकरण्यं तत्स्वरूपाश्रयासिद्धेर्द्रव्यकर्मासमवेतत्वविशिष्टसमवेतात्मकं यत्साधनं तन्निष्ठासाधारण्याभिन्नत्वेपि तद्विषयतावच्छिन्नायाः परामर्शविरोधितायाः प्रकृतसाधनघटितासामानाधिकरण्यविषयितानवच्छिन्नत्वान्नाव्याप्तिरिति भावः। गुणसमवेतस्य कर्मासमवेतस्य च प्रत्येकोक्तावाश्रयासिद्ध्यसम्भवादुभयोरुपादानम्। द्रव्यत्वे साध्ये समवेतमात्रस्य हेतुतायामसाधारण्यासम्भवादाह द्रव्यकर्मासमवेतेति। यद्यपि द्रव्यासमवेतमात्रस्या हेतुत्वेपि तन्निष्ठासाधारण्याभेद आश्रयासिद्धेः सम्भवति, तथाप्याश्रयासिद्धिघटकस्य गुणत्वादेरेव हेतुत्वे स्फुटोऽसाधारण्याभेद इत्याशयेन विशिष्टो हेतुरुक्तः। इत्यादावित्यादिना वन्ह्याभावव्यापकीभूताभावप्रतियोगिजलत्ववान् पर्वतो वन्हिमान् जलत्वप्रमाप्रकारादित्यादेरुपग्रहः। तेन जलत्वानधिकरणाभावाप्रतियोगित्वरूपाश्रयासिद्धेः प्रकृतसाधननिष्ठानुपसंहारित्वाभिन्नत्वेपि तत्र नाव्याप्तिरिति भावः। ननु पर्वतान्यः पर्वत इत्यादौ परामर्शस्याहार्यत्वनियमात्तद्विरोधित्वाप्रसिद्ध्या तत्रत्याश्रयासिद्ध्यादावव्याप्तेरत आह पर्वतान्य इत्यादि। हेत्वाभासोक्तेति। के चित्त्वित्यादिना प्रागुक्तहेत्वाभासलक्षणवादित्यर्थः। तथा च तादृशस्थले हेत्वप्रसिद्ध्यादिकं यत्र यावत्सम्भवति तत्र तावदन्यान्यत्वमेवासिद्धित्वं वक्तव्यं शब्दैकरस्यार्थकञ्चित्करत्वादिति भावः। तादृशप्रकृतपक्षधर्मिकप्रकृतसाध्यव्याप्यप्रकृतहेतुमत्त्वावगाहित्वस्य व्यतिरेको यादृशविशिष्टविषयकनिश्चयविरोधित्वं

ष्टपक्षग्रहविरोधितावच्छेदकं रूपमाश्रयासिद्धिः। विशिष्टपक्षसाधनग्रहाविरोधिनो ज्ञानस्य विषयतया तदुभयवैशिष्ट्यग्रहविरोधितावच्छेदकरूपं स्वरूपासिद्धिः।संगृह्यते चेत्थमनित्यगगनं रूपवत् चाक्षुषस्पर्श-

---

षयताप्रयुक्तः साधारण्यादिभिन्नं तादृशविशिष्टमेवासिद्धिः। तादृशविशिष्टविषयकनिश्चयविरोधिविषयताप्रयुक्तत्वं तु तादृशनिश्चयत्वाभावव्याप्यविषयताघटितप्रतियोगिकत्वरूपं तत्रैव व्याख्यातमिति ध्येयम्। असिद्धेस्त्रैविध्यादाह तत्रेति। विशिष्टेति। प्रकृतपक्षतावच्छेदकविशिष्टेत्यर्थः। अत्रापि पर्वतान्यः पर्वतो वन्हिमान् धूमादित्यादावाश्रयासिद्धिसम्पत्तये पूर्वोक्तरीतिरनुसर्त्तव्या। एवमग्रिमयोरपि। विशिष्टपक्षेत्यादि। अविरोधिन इत्यन्तेन पक्षाप्रसिद्धिहेत्वप्रसिद्धयोर्व्युदासः। यत्र कामिनी पक्षो हेतुश्च तत्र विशिष्टपक्षहेतुज्ञानं कामिनीज्ञानमेव तदविरोधिन्याः कामिनीजिज्ञासायाः कामिन्यां पक्षभूतायां हेतुभूतकामिनीवैशिष्ट्यज्ञानविरोधिन्या विषयतावच्छेदककामिनीज्ञानादावतिव्याप्तिवारणाय ज्ञानस्येति। तदुभयेति।विशिष्टपक्षविशिष्टसाधनेत्यर्थः। न च ह्रदत्ववत्पर्वतो वन्हिमान् ह्रदत्वादित्यादौ पर्वतो वन्हिमान् पर्वतवृत्तिह्रदत्वादित्यादौ च ह्रदत्वाद्यभावविशिष्टपर्वतस्य प्रकृतपक्षसाधनग्रहविरोधित्वात्तादृशस्वरूपासिद्धावव्याप्तिरिति वाच्यम्।तत्र स्वरूपासिद्धिविरहेपि क्षत्यभावादाश्रयासिद्ध्यादेरेव तत्र दोषत्वात्।यत्राश्रयासिद्ध्याद्यात्मिकैव स्वरूपासिद्धिस्तत्राविरोधिन इत्यस्याऽनुपादेयताया उक्तप्रायत्वाच्चेति भावः। ननु समानप्रकारकज्ञानस्यैव विरोधित्वात् प्रकृतसाधनाभावविशिष्टप्रकृतपक्ष एवास्तु स्वरूपासिद्धिः कृतमनुगतनिरुक्त्याऽत आह संगृह्यते चेति। अन्यथा विशिष्टपक्षस्य विशिष्टसाधनस्य चाऽप्रसिद्ध्या तत्संग्रहो न स्यादित्यर्थः। (यद्वा उक्तविवक्षाफलमविरोधिन इत्यस्य व्यावृत्तिं च तन्त्रेणोपदर्शयति संगृह्यते चेति। अनित्यमित्यनेनाश्रयासिद्धिः, चाक्षुषेत्यनेन हेत्वसिद्धिः। तथा च तद्विशेषणादाने तदुभयत्रातिव्याप्तिः स्यादिति भावः। तदुभयेत्यस्य पक्षतावच्छेदकविशिष्टपक्षे हेतुतावच्छेदकविशिष्टहेतुवैशिष्ट्यग्रहविरोधित्वमर्थः।

वत्त्वादिस्यादौ गगनादेर्निःस्पर्शत्वादिकम् । एवं शब्दो द्रव्यं गुणान्यत्वे सति सत्त्वात् गुणान्यत्वविशिष्टसत्त्वं द्रव्यत्वव्यभिचारि गुणवृत्तित्वादिस्यादावपि नाव्याप्तिः । तदुभयभिन्नासिद्धिर्व्याप्यत्वासिद्धिः । पक्षादिभेदेनाऽसिद्धेर्भेदाद्यत्राश्रयासिद्ध्यादिकमप्रसिद्धं तत्र तदन्यत्वं न वक्तव्यमिति । सविषयवृत्तिप्रकृतसाध्यसाधनग्रहविरोधितानवच्छेदकप्रकृतपक्षप्रकृतसाधनवैशिष्ट्यग्रहविरोधितावच्छेदकरूपशून्यज्ञानस्य विषयोऽसिद्धिर्व्याप्यत्वासिद्धिः ।

तत्र विशिष्टान्तदलयोर्व्यावृत्तिमाह एवमिति । अत्र गुणान्यत्वविशिष्टसत्ताभाववच्छब्दस्य स्वरूपासिद्धिरूपस्य ज्ञानं यद्यपि पक्षतावच्छेदकविशिष्टशब्दे शुद्धहेतुमत्ताज्ञानं न विरुणद्धि, तथापि हेतुतावच्छेदकगुणान्यत्वविशिष्टसत्तात्वविशिष्टवैशिष्ट्यज्ञानं विरुणद्धीति न तन्नाव्याप्तिः । पक्षतावच्छेदकविशिष्टेत्यस्य व्यावृत्तिमाह गुणान्यत्वविशिष्टसत्त्वमिति ।) तदुभयेति । आश्रयासिद्धिस्वरूपासिद्धीत्यर्थः । ननु पर्वतः काञ्चनवन्हिमान् द्रव्यत्वादित्यादिस्थलीयव्याप्यत्वासिद्धावव्याप्तिः तत्राश्रयासिद्ध्याद्यप्रसिद्ध्या तदन्यत्वस्याऽलीकत्वादत आह पक्षादिभेदेनेति । न चैवमपि काञ्चनपर्वतो वन्हिमान् काञ्चनपर्वतादित्यादौ हेत्वप्रसिद्धावव्याप्तिः तस्य प्रकृतपक्षग्रहविरोधित्वेनाश्रयासिद्धितया तद्भिन्नत्वाभावादिति वाच्यम् । तस्याऽलक्ष्यत्वेपि क्षत्यभावात्, असिद्धित्रयस्याऽसार्वत्रिकत्वादिति भावः । कस्यचिद्व्याप्यत्वासिद्धिलक्षणमाह सविषयवृत्तीत्यादिना । साध्यसाधनयोरप्रसिद्ध्योः संग्रहार्थमनवच्छेदकान्तं विरोधितावच्छेदकरूपस्य विशेषणम् । (तत्रापि सविषयवृत्तिपदं पर्वतः पर्वतावृत्तिह्रदत्ववान् ह्रदत्वादित्यादौ पर्वतावृत्तिह्रदत्वादिरूपायां साध्याप्रसिद्धावव्याप्तिवारणार्थम् । अन्यथा साध्यग्रहविरोधितानवच्छेदकीभूतस्य पक्षसाधनवैशिष्ट्यग्रहविरोधितावच्छेदकरूपस्याऽप्रसिद्ध्या तत्राव्याप्तिप्रसङ्गात् । तदुपादाने च सविषयकनिष्ठं यत्साध्यग्रहविरोधितावच्छेदकं तद्भिन्नं पक्षधर्मिकहेत्वभावनिश्चयत्वादिरूपमेव पक्षसाधनवै-

साध्यपदोपादानात् पर्वतः पर्वतवृत्तिद्रव्यत्ववान् द्रव्यत्वादित्यादौ साध्याप्रसिद्धेर्नासंग्रहः । तस्याः स्वरूपासिद्धौ निवेशादनुपादेय-

---

शिष्टयग्रहविरोधितावच्छेदकं तत्र प्रसिद्धमिति नाव्याप्तिः । उक्तस्थलीयसाध्याप्रसिद्धेः स्वरूपासिद्धित्वमते च) धूमवान् वन्हेरित्यादौ ज्ञानगतधर्मस्य प्रकृतसाध्यसाधनग्रहविरोधितावच्छेदकत्वासम्भवेपि कामिनीजिज्ञासात्वादेरेव तथात्वात् पक्षवृत्तित्वविशिष्टसाध्याव्यभिचारितसामानाधिकरण्याभावे नाव्याप्तिरित्यावेदयितुं सविषयवृत्तीत्युक्तम् हेत्वप्रसिद्ध्यादिज्ञानस्यापि निरुक्तविरोधितानवच्छेदकीभूतसत्त्वादिधर्मवत्त्वादसम्भवापत्तिरतः प्रकृतपक्षेत्यादि।न च पर्वतान्यः पर्वतो दहनान्यदहनवान् धूमान्यधूमादित्यादौ हेत्वप्रसिद्ध्याद्यव्याप्तिः तत्र कामिनीजिज्ञासात्वस्यैव तादृशपक्षसाधनवैशिष्टयग्रहविरोधितावच्छेदकत्वात् तस्य च प्रकृतपक्षसाधनग्रहविरोधितानवच्छेदकत्वाभावेन निरुक्तरूपाप्रसिद्धेरिति वाच्यम्।प्रकृतपक्षप्रकृतसाधनवैशिष्टयग्रहेत्यनेन तादृशग्रहत्वाव्यापकविषयिताशून्यग्रहस्य विवक्षितत्वेन पर्वतो धूमवान् इत्येवंग्रहस्यापि तथात्वेन तद्विरोधितावच्छेदकस्य पर्वतधर्मिकधूमाभावनिश्चयत्वस्यैव प्रकृतसाध्यसाधनग्रहविरोधितानवच्छेदकस्य सौलभ्यादिति भावः । येन सम्बन्धेन विरोधितावच्छेदकत्वं तेनैव तच्छून्यत्वस्य लाभार्थं ज्ञानस्येत्युक्तम्। तेन स्वरूपासिद्ध्यादिज्ञानस्य संयोगादिसम्बन्धेन पक्षधर्मिकहेत्वभावनिश्चयत्वाद्यात्मकतादृशरूपशून्यत्वेपि न तत्राति-व्याप्तिः। तादृशज्ञानस्य विषयत्वं घटादौ विषयीभूतहेत्वाभासत्वं च व्यभिचारादावतिप्रसक्तमत उक्तमसिद्धिरिति । ननु पर्वतः काञ्चनवन्हिमान्धूमादित्यादौ साध्याप्रसिद्धिज्ञानस्य प्रकृतपक्षसाधनवैशिष्टयग्रहाविरोधित्वादेव तद्विषयीभूतसाध्याप्रसिद्धौ लक्षणसम्भवात्साध्यपदं विफलमत आह साध्येत्यादि।नासङ्गह इति।अन्यथा प्रकृतसाधनग्रहाविरोधिनः पर्वतावृत्तित्वविशिष्टह्रदत्वग्रहस्य प्रकृतपक्षप्रकृतसाधनवैशिष्टयग्रहविरोधित्वान्निरुक्तरूपशून्यत्वाभावेन च विषयीभूतायां साध्याप्रसिद्धावव्याप्तिरेव स्यादिति भावः । लाघवादाह तस्या इति । उक्तस्थलीयसाध्याप्रसिद्धेरित्यर्थः । कश्चिदित्यस्व-

मेव वा साध्यमित्यपि कश्चित् । साध्यत्वे त्वप्रसिद्धिव्याप्तिविशिष्टपक्षधर्मतादिविरहादयश्चैतद्भेदाः । यत्तु हेतुतावच्छेदकस्य व्याप्यतानवच्छेदकत्वम् अपि व्याप्यत्वासिद्धिः, नीलधूमत्वादेश्च तथात्वं समानाधिकरणं सम्भवदवच्छेदकान्तरमपेक्ष्य गुरुत्वादिति । अत्रावच्छेदकत्वं यद्यनतिरिक्तवृत्तित्वं, तदा तस्याप्यस्ति । अथ तादृशेन समानाधिकरणेन तादृशेन वा धर्मान्तरेणाऽघटितत्वे सति तत्त्वम् । तन्न । सत्यन्तस्य गौरवेणानुपादेयत्वात् ।

रसबीजन्तु अगृहीताप्रामाण्यकस्यैव ज्ञानस्य विरोधित्वाद्भ्रमत्वज्ञानास्कन्दितस्य स्वरूपासिद्धिज्ञानस्य निरुक्तरूपशून्यत्वात्तद्विषयस्वरूपासिद्धावतिव्याप्तिरित्यादिकं द्रष्टव्यम् । ननु व्याप्तेरसिद्धिर्व्याप्यत्वासिद्धिरितिव्युत्पत्त्या व्याप्तिविरहस्यैव व्याप्यत्वासिद्धिपदार्थत्वात्साध्याप्रसिद्धिसाधारणतल्लक्षणमयुक्तमित्याशङ्क्यापनयनाय साध्यहेतित्वित्यादि । तथा च व्याप्यत्वासिद्धिपदं न यौगिकं किन्तु मण्डपादिपदवत् रूढमिति भावः । तथात्वं व्याप्यत्वावच्छेदकत्वम् । तस्य नीलधूमत्वादेः । तादृशेनेति साध्यव्याप्यतावच्छेदकीभूतेनेत्यर्थः । तेन द्रव्यं गुणाद्यन्यत्वे सति सत्त्वादित्यादौ विशिष्टसत्तात्वस्य यत्स्वसमानाधिकरणं गुणाद्यन्यत्वं तदघटितत्वेपि नावच्छेदकत्वहानिः । न च महाकालनिरूपितविशेषणतया गुणान्यस्य हेतुतायां गुणान्यत्वस्यापि द्रव्यत्वव्याप्यतावच्छेदकत्वादुक्तदोषतादवस्थ्यम् । प्रकृतहेतुतावच्छेदकसम्बन्धेन यद्व्याप्यत्वं तदवच्छेदकधर्मान्तराघटितत्वस्यैव प्रवेश्यत्वादिति भावः । धूमप्रागभावत्वस्य धूमविशिष्टरासभत्वादेर्वा वन्निहव्याप्यतावच्छेदकान्तरधूमत्वादिघटितत्वाद्वावच्छेदकत्वं न स्यात् अतः समानाधिकरणेति प्रकृतहेतुतावच्छेदकताघटकसम्बन्धेन यत्स्वाधिकरणं तत्र प्रकृतव्याप्यवच्छेदकताघटकसम्बन्धेन वृत्तिमत्त्वे यर्थः तेन धूमत्वधूमप्रागभावत्वाद्योरपि यथाकथञ्चित्सम्बन्धेन मिथः सामानाधिकरण्येपि न क्षतिः प्रकृतहेतुतावच्छेदकताघटकसम्बन्धेन यत्स्वाधिकरणं तत्र तेनैव सम्बन्धेन वृत्तित्वन्तु

नापि अन्यूनानतिरिक्तवृत्तित्वम्, आलोकाद्यवृत्तेर्धूमत्वादेरप्यतथात्वापातात् । अथ स्वरूपसम्बन्धविशेषः, तर्हि द्रव्यं रूपादिमादौ रूपत्वादेरपि तथात्वं न स्यात् । रूपादिषु चतुर्विंशतौ सम्भवदवच्छेदकमेकं गुणत्वमपेक्ष्य रूपत्वादीनां चतुर्विंशतेः षड्विंशतेर्वा गुरुत्वात् । एवं पशुमान् सास्नादिमत इत्यादौ सास्नादिमत्त्वादेरपि गोत्वादिकां जातिमपेक्ष्य उपाधेर्गुरुत्वात् हेतुतावच्छेदकविशिष्टहेतुव्यापकसाध्यसमानाधिकरणतादृशहेतोः सा-

---

स्वसामानाधिकरण्यं न वाच्यम् । धूमत्वप्रकारकप्रमाविशेष्यत्वादेरपि वन्ह्यादिव्याप्यतावच्छेदकत्वापत्तेः । न चैवमपि द्रव्यं गुणकर्मान्यत्वे सति समवेतादित्यादौ विशिष्टसमवेतत्वं द्रव्यत्वस्य व्याप्यतावच्छेदकं न स्यात् स्वसमानाधिकरणेन प्रकृतव्याप्यतावच्छेदकीभूतगुणत्वादिना घटितत्वादिति वाच्यम् । स्वसमानाधिकरणेत्यस्य स्वव्यापकार्थकत्वादिति भावः । धूमप्रागभावादिकं न लिङ्गं प्रागभावत्वादीनां व्यर्थत्वादिति परामर्शीयमूलमनुरुध्य सामानाधिकरण्यं परित्यजन्नाह तादृशेन वेति । धूमत्वादेरपि स्वात्मकतादृशधर्मघटितत्वादवच्छेदकत्वं न स्यादतो धर्मान्तरेणेत्यन्तरपदम् । न चैवं धूमत्वमप्यवच्छेदकं स्यात् धूमत्वस्य विशिष्टधूमत्वाभिन्नतया धर्मान्तरत्वाभावादिति वाच्यम् । स्वानवच्छिन्नप्रकारतावच्छेदकत्वस्य धर्मान्तरपदेनोक्तत्वादिति भावः । तत्त्वं व्याप्त्यनतिरिक्तवृत्तित्वम् । यद्यवच्छेदकत्वमित्यनुषज्यते सत्यन्तस्येति । वन्हिमान्द्रव्यादित्यादौ द्रव्यत्वादेरवच्छेदकत्ववारणायाऽनतिरिक्तवृत्तित्वांशस्यावश्यकत्वादिति भावः । तथात्वं व्याप्यवच्छेदकत्वम् । कालिकदैशिकसाधारणयोः परत्वत्वापरत्वत्वजात्योः करणाभावादाह षड्विंशतेर्वेति । इदमुपलक्षणम् । वेगादिसाधारण्याः संस्कारत्वजातेः खण्डितत्वादष्टाविंशतेर्वेति द्रष्टव्यम् । व्याकृतबाहुल्यगौरवमुक्त्वा शरीरगौरवं दर्शयन्नाह एवमिति । सास्नादिमत्त्वस्यापीति । तथात्वं न स्यादित्यनेनान्वयः । ननु नीलधूमत्वादिकमिव सास्नावत्त्वादिकमप्यवच्छेदकं माभूत् को दोष इत्यत आह हेतुतेति । तादृशेति हेतुतावच्छेदकविशिष्टेत्यर्थः । केवला-

ष्याव्यभिचरितसम्बन्धिताद्दशहेतोर्वा ज्ञानस्यानुमितिकारणस्याऽविरोधिनो निरुक्तानवच्छेदकत्वस्य दोषत्वायोगाच्च। परार्थस्थले तु दृष्टान्तस्य साध्यादिवैकल्यवत् हेतावर्थ्यर्थविशेषणत्वमपि निग्र-

---

न्वयिखण्डकानां मतमाह साध्याव्यभिचरितेति। साध्याव्यभिचरितत्वे सति सम्बन्धिः समानाधिकरणो यत्तादृशो हेतुतावच्छेदकविशिष्टो हेतुस्तस्येत्यर्थः। ज्ञानस्येति। पक्षधर्मतेत्यादिः। निरुक्तेति। स्वरूपसम्बन्धात्मकव्याप्यवच्छेदकत्वाभावस्य हेत्वाभासत्वायोगादित्यर्थः। यद्विषयकं ज्ञानमनुमितेः परामर्शस्य वा ग्राह्याभावमुद्रया विरोधि तस्यैवाभासत्वात्। न च हेतुतावच्छेदकधर्मावच्छिन्नमेव साध्याव्यभिचरितसम्बन्धित्वं व्याप्तिः, तादृशसम्बन्धतामात्रस्य तत्त्वे पर्वतीयवन्हेरेव तथात्वात् धूमवान् वह्नेरित्यादिप्रयोगेऽपि वाद्यनिग्रहापत्तेः, तथा च ग्राह्याभावविधयैव हेतुतावच्छेदकस्य निरुक्तानवच्छेदकत्वं दोष इति वाच्यम्। परार्थस्थले व्याप्त्यतिप्रसक्तधर्मेण हेतुप्रयोगस्यापि पृथग्निग्रहस्थानत्वादेवातिप्रसङ्गभङ्गे हेतुतावच्छेदकधर्मावच्छिन्नत्वस्य व्याप्तावनन्तर्भावादिति भावः। यत्तु व्यापकसामानाधिकरण्यरूपव्याप्तौ हेतुतावच्छेदकधर्मावच्छिन्नाधिकरणत्वं निवेश्यम्, अन्यथा द्रव्यं विशिष्टसत्त्वादित्यादावव्याप्त्यापत्तेः। तथा च वन्हिमान् प्रमेयधूमादित्यादौ प्रमेयधूमत्वादेरधिकरणतानवच्छेदकत्वलक्षणं व्यर्थविशेषणत्वमसिद्धिभेद एव, परामर्शविरोधित्वात् प्रतियोगितायाश्चाधिकरणत्वस्यापि लघुधर्मसम्भवे गुरुधर्मानवच्छेद्यत्वात्, न चैवं केवलधूमत्वादेरपि अधिकरणतावच्छेदकत्वे मानाभावात् वन्हिमान् धूमादित्यत्रापि धूमत्वादौ व्यर्थविशेषणतास्यादिति वाच्यम्। विशिष्टधूमत्वावच्छिन्नाधिकरणतायाः अपि धूमत्वावच्छेद्यतया तदवच्छेदकत्वस्यैव तत्र हेतुतावच्छेदकीभूतधूमत्वादौ सुलभत्वात्, नीलधूमत्वादिना हेतुतायान्तु अधिकप्रयोगादेव निग्रह इति तच्चिन्त्यम्। ननु व्यर्थविशेषणत्वस्याऽदोषत्वे नीलधूमादित्यादिप्रयोगेऽपि निग्रहो न स्यादत आह परार्थस्थले त्विति। (साध्यादीत्यादिना साधनस्योपग्रहः) व्यर्थविशेषणत्वमपीति। यद्रूपेण हेतुः

हस्थानविभाजकसूत्रस्थानुक्तसमुच्चयपरेण चकारेण समुच्चितं पृथगेव निग्रहस्थानम् ॥

प्रयुज्यते तस्य स्वसमानाधिकरणव्याप्यतावच्छेदकान्तरघटितत्वमपीत्यर्थः।विभाजकसूत्रस्थेति। "हेत्वाभासाश्च यथोक्ता"इत्यन्तिमसूत्रस्थचकारेणेत्यर्थः । पृथगेव हेत्वाभासादिव्यतिरिक्तमेव । न च धूमादित्यस्यैव सम्यक्त्वे नीलधूमादिति प्रयुञ्जानस्याऽऽधिक्यमेवास्तु निग्रहस्थानं कृतं चशब्दसमुच्चयेनेति वाच्यम्। हेत्वधिकमिति सूत्रदृष्ट्या हेतुद्वयादिप्रयोगस्थले एवाधिक्यस्य निग्रहस्थानत्वोपगमादिति भावः ॥

इति श्रीजगदीशतर्कालङ्कारकृतायामनुमानदीधितिव्याख्यायामसिद्धिग्रन्थः समाप्तः ।

चिन्तामणेः बाधः ।

बाधो न साध्याभाववत्पक्षकत्वं पक्षवृत्त्यभावप्रतियोगिसाध्यकत्वं वा, पक्षे साध्याभावज्ञानमात्रस्य प्रमात्वज्ञानं विना अधिकबलत्वाज्ञानेन बाधाभावादिति वक्ष्यते । अत एव साध्याभाववत्पक्षवृत्तित्वमपि न, असिद्धिसङ्कीर्णबाधाव्याप्तेश्च । किन्तु साध्याभाववत्त्वप्रमाविषयंपक्षकत्वं, प्रमितसाध्याभाववत्पक्षकत्वं, पक्षनिष्ठप्रमाविषयत्वप्रकाराभावप्रतियोगिसाध्यकत्वं वेति ।

दीधित्याः बाधः ।

अतिरिक्तविषयतावादिमतेनाह पक्षेति । पक्षः साध्याभाववानिति ज्ञाने पक्षनिष्ठविषयत्वस्य प्रकारः साध्याभाव इति लक्षण-

जागदीश्याः बाधः ।

मणिकृता विषयतायाः सप्रकारत्वास्वीकारादाह अतिरिक्तेति । सप्रकारकविशेष्यतावादिमतेनेत्यर्थः । ननु पक्षनिष्ठत्वं यद्यभावान्वयि तदा प्रकारान्तवैय्यर्थ्यमतोऽन्यथा व्याचष्टे पक्ष इत्यादिना । प्रकाराभावेत्यत्र यदि तादृशप्रकारस्याऽभाव इति तत्पुरुषस्तदा साध्यस्य तत्प्रतियोगित्वाभावात् बाधमात्रासंग्रहः स्यादतः कर्मधारयाभिप्रायेण योजयति प्रकारः साध्याभाव इति । हेत्वादीत्यादिना

विवक्षितविवेकेन साध्याभावप्रमैव दोषः । सा च प्रमात्वेन ज्ञाता न स्वरूपसती, हेत्वाभासत्वात् । प्रमात्वज्ञानं विना अधिकबलत्वाभावेनाऽदोषत्वात् अप्रमायामपि प्रमात्वज्ञानेऽनुमितिप्रतिबन्धाच्च । अथ साध्याभाववति पक्षे हेतोः सत्त्वज्ञाने व्यभिचारः, तदज्ञानेऽसिद्धिः, संशययोग्यत्वाभावेन पक्षत्वाभावादाश्रयासिद्धिश्च । न च पक्षभिन्ने व्यभिचारो दोषः, व्यर्थविशेषणत्वात् सर्व्वोपसंहारप्रवृत्तव्याप्तेः साध्याभाववति साधनमित्यवगमादेव भङ्गात् । न चैवं सन्दिग्धसाध्यदृष्टान्ते सन्दिग्धानैकान्तिकवत्पक्षे व्यभिचारसंशया-

---

समन्वयः । विवक्षितेति । हेत्वादिविषयत्वेनाऽप्रतिबन्धकत्वादिति भावः । साध्याभावप्रमात्वग्रहे पक्षे साध्याभाववत्त्वग्रहस्यावश्यकत्वाभिप्रायेण, साध्याभावस्य बाधत्ववादिमतेन वा शङ्कते अथेति ।

हेतुनावच्छेदकाद्युपग्रहः । ननु पक्षधर्मिकसाध्याभावप्रमास्वरूपस्य बाधत्वस्य ग्रहे पक्षे साध्याभावस्याऽलाभादथेत्यादिमूलासङ्गतिरत आह साध्याभावेति । पक्षधर्मिकत्वादिः । आवश्यकत्वाभिप्रायेणेति । पक्षः साध्याभाववान् इति ज्ञानस्याऽन्यांशे साध्याभावप्रमात्वग्रहे पक्षधर्मिकसाध्यानुमित्यविरोधित्वात् पक्षांशे साध्याभावप्रमात्वस्यैव ग्रहस्तादृशानुमितेर्विरोधी वाच्यः पक्षांशे साध्याभावप्रमात्वं च साध्याभाववत्पक्षधर्मिकसाध्याभावप्रकारकज्ञानत्वमित्यवश्यं तादृशप्रमात्वग्रहदशायां पक्षे साध्याभावस्य भानमिति भावः । ननु

दनुमानमात्रोच्छेद इति, पक्षे साध्यसंशयोऽनुमानाङ्ग-
मिति । व्याप्तस्य पक्षधर्मताज्ञानादनुमित्युत्पादेन संश-
यनिवृत्तेः, अन्यथा विशेषदर्शनस्य संशयविरोधिता
भज्येत । न च पक्षे साध्याभावं प्रतीत्य व्यभिचारज्ञा-
नमित्युपजीव्यत्वादबाधः पृथक्, पक्षसाध्याभावप्रतीति-
रेव हि साध्याभावहेत्वोः सम्बन्धोल्लेखिनीत्यवोचत्वे-

पक्ष इति । व्याप्तौ निश्चितायां पक्षतत्समयोः साध्याभावसंशयो
न दोषायेत्यर्थः । अनुमित्युत्पादेनेति फलतोऽपि विरोधित्वमद-

पक्षविषयतास्वरूपसाध्याभाववद्विशेष्यकत्वावच्छिन्नं साध्याभाव-
प्रकारकत्वमेव पक्षांशे साध्याभावभ्रमत्वं वाच्यं तच्च पक्षे साध्या-
भावस्याऽलाभेऽपि सुग्रहमतः कल्पान्तरमाह साध्याभावस्येति ।
पक्षनिष्ठस्येत्यादिः । मूले पक्षे साध्यसंशय इति । पक्षे साध्यसंशय-
स्यानुमानाङ्गत्वानुरोधेन तत्सत्त्वेऽपि व्याप्तिविशिष्टपक्षधर्मताज्ञानो-
दयात्तदुत्तरमनुमितेरेवोत्पादेन विरोधिव्यभिचारसंशयानुत्पत्तेरित्य-
र्थः । तथा च साध्याभाववत्त्वांशे निश्चयाकारो व्याप्तिग्रहानुकूलत-
र्करहितो व्यभिचारसंशयो व्याप्तिग्रहस्य विरोधीति पक्षीयसाध्य-
संशयान्नानुमानमात्रोच्छेद इति भावः । पक्षे साध्यसंशयस्य मणि-
कृन्मतेऽनुमानाङ्गत्वाभावात् तदुपेक्ष्य फलितार्थमाह व्याप्ताविति-
त्यादि । तत्समेति दृष्टान्तार्थम् । न दोषायेति । न व्याप्तिग्रहविरो-
धिव्यभिचारसंशयोत्पादायेत्यर्थः । ननु व्याप्तिविशिष्टपक्षधर्मताज्ञा-
नेन प्रतिबन्धादेव व्यभिचारसंशयानुत्पत्तिसम्भवादनुमित्युत्पादप्र-
दर्शनं व्यर्थमत आह अनुमित्युत्पादेत्यादि।फलतोपीति । फलद्वारापि
व्याप्तिपक्षधर्मताज्ञानस्य व्यभिचारसंशयविरोधित्वप्रदर्शनायेत्यर्थः ।
फलतोपीत्यपिरनास्थायाम्, अजनितफलेनापि परामर्शेन व्यभिचा-
रधीप्रतिबन्धात् स्वरूपतो विरोधित्वस्यावश्यकत्वेन फलद्वारा

धत्वे ननोपजीव्यत्वम् । अन्यथा बाधदशायां पक्षे हेतोरज्ञानादसिद्धिरेव । न चोद्भावितव्यभिचारनिर्व्वाहाय बाधोद्भावनमावश्यकमित्युपजीव्यत्वम्, व्यभिचारोद्भावने परं कथन्तानावश्यकत्वात, तत्त्वे वा तन्निर्व्वाह्यमेव दूषणं क्लृप्तत्वात् । वन्हिरुष्णः कृतक इत्युद्भावनाद्वन्हिरुष्ण इत्युद्भावने लाघवमिति बाधः पृथगिति कश्चित् । तन्न। पक्षे साध्याभावप्रमा स्वार्थानुमाने यदि न दोषः तदा परं प्रत्यपि न स्यादविशेषादिति तदुद्भावनस्य दूरनिरस्तत्वात् । अथोपनीतकाञ्चनमयत्वविशिष्टंवन्ह्यनुमितेः सल्लिङ्गजन्यायाः आभासत्वं हेत्वा-

---

र्शनाय । अत एव ज्यायः स्वरूपतो विरोधित्वं द्रढयति अन्यथेति । हेत्वाभासाधीनमिति । न च हेत्वाभासस्यानुमित्याभासता-

---

तथात्वे मानाभावात् । एतदेव स्फुटीकुर्वन्नाह अत एवेति । फलतो विरोधित्वस्य गौणत्वादेवेत्यर्थः । जायस्त्वमावश्यकत्वेन । वस्तुतस्तु न चैवमित्याद्यनुमानाङ्गमित्यन्त एवाशङ्काग्रन्थः । यदि व्यभिचारज्ञानमात्रं विरोधि तदा पक्षीयव्यभिचारसंशयादनुमानमात्रोच्छेदः स्यादिति पक्षे साध्यसंशयोऽनुमानाङ्गमनुमानाविरोधि वाऽयमिति न चेति तदर्थः । यदि साध्यसंशयस्यानुमितिहेतुत्वं स्यात् स्यादपि तदनुरोधेन व्यभिचारसंशयत्वादनुमानमात्रोच्छेदः, न चैतदस्ति, यत्र प्रथमत एव व्याप्तिविशिष्टपक्षधर्मताज्ञानादनुमितिस्तत्र व्यभिचाराद्विशेषदर्शने सति संशयायोगादित्याशयेन सिद्धान्तयति मूले व्याप्यस्य पक्षधर्मताज्ञानादिनेति युक्तमुत्पश्यामः । न चेत्यादि । यद्यपि हेत्वाभासस्यानुमित्याभासतायां प्रयोजकत्वं व्या-

भासाधीनम् । न चानुमितेः पूर्वं तत्र व्यभिचारज्ञानं, विशिष्टस्याऽप्रसिद्ध्या तदभावस्याऽज्ञानात् । अत एव पक्षासिद्धिरपि न, अतः काञ्चनमयवन्ह्यभावरूपाद्बाधादनुमानाभासत्वं व्यधिकरणप्रकारावच्छिन्नप्रतियोगिकश्चात्राऽभाव इति चेन्न। वस्तुतो व्यभिचारस्यापि तत्र सत्त्वात्, ज्ञानञ्च तस्य बाधस्येवाऽनुमित्यनन्तरमेव । किञ्च वह्नौ काञ्चनमयत्वस्यानुमितावेव भाने काञ्चनमयवह्निमानित्यनुमितिर्न स्यात् विशिष्टस्य पूर्वमज्ञानाद्वन्हौ काञ्चनमयत्वांशेऽनुमितेराभासत्वं वन्हौ

प्रयोजकत्वे साध्यवति पक्षे लिङ्गाभासजन्याया अनुमितेराभासत्वापत्तिः, लिङ्गोपधाने तथात्वस्येष्टत्वात् । पक्षासिद्धिरित्यस्य बाधकमाननिबन्धनेत्यादिः । लिङ्गस्येत्याद्यभ्युच्चयमात्रं, वन्हेरप-

---

पक्षत्वमित्युक्तौ नायं दोषः, तथापि समव्याप्तत्वमेव प्रयोजकत्वमित्यभिप्रेत्य इयं शङ्कते ध्येयम् । काञ्चनमयत्वविशिष्टस्य वन्हेरप्रसिद्धावपि शुद्धवन्हिमादायैव सन्दिग्धसाध्यकत्वरूपस्य पक्षत्वस्य प्रसिद्धिसम्भवात्तदप्रसिद्धेरप्रसक्तत्वेन निराकरणायोगादाह बाधकेत्यादि । अनुमितेर्बाधकं विरोधि यन्मानं साध्यस्य तदभावस्य वा विशिष्टज्ञानं तन्निबन्धनेत्यर्थः । तेन विशिष्टसाध्यतदभावस्य च प्रागुपात्तत्वात् विशिष्टसाध्याप्रसिद्ध्या साधकमाननिबन्धनाया अपि पक्षासिद्धेः खण्डनार्हत्वात् बाधकमानमात्रोपन्यासानौचित्यमित्यपास्तम्. उक्तक्रमेण सिद्धिबाधयोरेवोपन्यस्तत्वादिति ध्येयम् । मूले वन्हौ काञ्चनमयत्वांशे इत्यादि । वन्हौ धर्मिणि काञ्चनमयत्वानु-

लिङ्गस्यासिद्धेः व्यभिचाराच्चान चानुमितेर्विषयाभावाधीनमप्रमात्वं किन्तु हेत्वाभासाधीनं, यस्य हि ज्ञानमनुमितिप्रतिबन्धकं स हेत्वाभासः। न च साध्याभावो ज्ञातः प्रतिबन्धक इति न स हेत्वाभासः । वस्तुतस्तु उपनीतस्यानुमितौ भाने मानाभावः प्रत्यभिज्ञादौ च प्रतीतिबलेनैव तत्कल्पनम् अन्यथा पूर्वोपस्थितसकलपदार्थभाने यथार्थानुमित्युच्छेदः । अपि चैवं परार्थानुमानेप्युपनीतभाने बाधितोऽर्थ उपनीतोऽयं मम भात इत्युद्भावनादेव विजयेत वादी उद्देश्यानुमितेरप्रतिबन्धान्न तत्र

क्षत्वात् काञ्चनमयत्वस्याऽसाध्यत्वाच्च । न च साध्याभाव इति ।

मितेराभासत्वं वन्हौ धर्मिणि काञ्चनमयत्वसाधकलिङ्गस्यासिद्धेर्व्यभिचाराच्च सम्भविष्यतीति शेषः । तथा चोपनीतकाञ्चनमयत्वविशिष्टवन्ह्यनुमितेराभासत्वमसिद्ध्यादिहेत्वाभासाधीनतयैवोपपन्नं न बाधस्य हेत्वाभासत्वं साधयतीति भावः । तत्पक्षकतत्साध्यकानुमित्याभासत्वं तत्पक्षकतत्साध्यीयहेत्वाभासाधीनमित्येवं नियममुररीकृत्य मूले दूषयति लिङ्गस्येत्यादिना । अभ्युच्चये हेतुमाह वन्हेरिति । वन्हिसाध्यकसालिङ्गपरामर्शजन्यानुमितिस्थल इत्यादिः । तादृशानुमितेरेव पूर्वं प्रक्रान्तत्वादिति भावः । वस्तुतः तद्धर्मिकतत्प्रकारकानुमित्याभासत्वं तत्पक्षकतत्साध्यकहेत्वाभासाधीनमित्येव व्याप्तिः तथा च सलिङ्गजन्यायाः पर्वतः काञ्चनमयवन्हिमानित्यनुमितेर्वन्हिपक्षककाञ्चनमयत्वसाध्यकानुमित्याभासत्वाभावेपि वन्हिधर्मिककाञ्चनमयत्वप्रकारकानुमित्याभासत्वादिति लिङ्गस्येत्यादिमूलं सम्यगेव इति प्रतीमः । स्वमते ज्ञातस्यैव साध्या-

बाधो दोष इति चेत्, तुल्यं स्वार्थानुमानेऽपि । अत एव यत्र सामान्यतोदृष्टानुमानमेवेतरबाधसहायं विशेषानुमापकं तत्र बाधकानामाभासत्वे तत्प्रयुक्तं सामान्यतोदृष्टस्याप्याभासत्वमिति बाधस्याऽसाङ्कर्य्यात्। न च यदि विशेषेविप्रतिपत्तौ सामान्यस्य प्रतिज्ञा तदा अर्थान्तरं सामान्यविप्रतिपत्तौ तु नेतरबाधकापेक्षेति वाच्यम् । स्वार्थानुमान एवैवं बाधासङ्करस्योक्तत्वादित्यपास्तम्। अनुमित्यप्रतिबन्धेन तत्र बाधस्यादोषत्वात्। ननु पक्षे साध्याभावग्रहवत्साध्याभावव्याप्यग्रहोऽपि दूषको विरोधित्वाविशेषात्, तथा च साध्याभावसम्बन्धो व्यभिचारः साध्याभावव्याप्यसामानाधिकरण्यं बाधः साध्याभावव्याप्यञ्च वन्हित्वादिकमेवेति चेत् न। पक्षे हि साध्याभावे ज्ञायमाने ज्ञाते वा यदि साध्याभावव्याप्यसामानाधिकरण्यबुद्धिस्तदा व्यभिचार एव । अथ पक्षे साध्याभाव-

---

अनुमितेः पूर्वं विशिष्टस्याऽप्रसिद्धया तदभावस्याऽज्ञानादिति भवतैवोक्तत्वादिति भावः ॥

भावस्याभासत्वान्नचेत्यस्याऽसङ्गतेराह अनुमितेः पूर्वमित्यादि । भवतैवेति। एवकारेण च भवन्मते न ज्ञातः प्रतिबन्धक इति मूलार्थः।

इति जागदीश्यां बाधपूर्वपक्षग्रन्थः ।

बुद्धिं विनैव सा, तर्हि हेतुसाध्याभावव्याप्ययोरगृह्यमाण-विशेषयोः सत्प्रतिपक्षत्वम् । अथ तुल्यबलेन सत्प्रतिपक्षोऽधिकबलेन बाध इति चेन्न । गमकतौपयिकरूपसाकल्यं हि बलं तच्च द्वयोर्ज्ञातमिति कथं न सत्प्रतिपक्षत्वं, गमकताबहिर्भूतञ्च न बलम् । अथ साध्याभावव्याप्यबुद्धेरनन्यथासिद्धत्वं बलं, तदा ततः साधनवति पक्षे साध्याभावानुमितावनैकान्तिकत्वमेव पक्षे साध्याभावग्रहत्वादिति यदुक्तं, तदप्यसिद्धम्, तस्य दोषत्वानभ्युपगमात्, अन्यथा हेत्वाभासान्तरतापत्तिः । अथ हेतुतः साध्यसिद्धिसम्भावनायां व्यभिचारासिद्धेः बाधेन हेतोरसाधकत्वे सिद्धे व्यभिचारसिद्धिरित्युपजीव्यत्वाद्बाधः पृथक्, अन्यथा हेतोरसाधकत्वे सिद्धे साध्यसिद्धिसम्भावनाविरहाद्व्यभिचारबुद्धिः तस्याञ्च सत्यां हेतोरसाधकत्वधीरित्यन्योन्याश्रय इति चेन्न । साध्यसिद्ध्युन्मुखहेतुज्ञानस्य प्रमितसाध्याभावसहचरितहेतुविषयत्वेन व्यभिचारज्ञानतया दूषकत्वात् । तथापि व्यभिचार साध्याभावप्रमा तन्त्रं तां विना तदभावादिति सैव दोष इति चेत् । सत्यम् । किन्तु साध्याभावप्रमा व्यभिचारज्ञानत्वेन दूषिका क्लृप्तत्वात्, न स्वतन्त्रा । अत एव पक्षे साध्याभावज्ञानत्वेन प्रति-

बन्धकत्वं न तु साध्याभावसमानाधिकरणसाधनज्ञानत्वेनेति प्रत्युक्तम्, तस्य लघुत्वेऽप्यक्लृप्तत्वात्। अथ प्रत्यक्षादौ प्रमामात्रं प्रति स्वातन्त्र्येण बाधो दोषत्वेन क्लृप्त इत्यनुमितावपि स एव दोष इति चेन्न। तर्हि हेत्वाभासः अनुमित्यसाधारणदोषस्य तत्त्वात् मनोयोगाभाववत् स्वरूपसत एव प्रतिबन्धकत्वात् हेतुत्वाभिमतावृत्तित्वेनाऽसाधकतालिङ्गत्वाभावाच्च। बाधितपक्षकत्वं लिङ्गमिति चेन्न। अन्यत्र तथा दूषकत्वाकल्पनात् ॥

उच्यते। पक्षे साध्याभावनिश्चयः साध्याभावज्ञानप्रमात्वनिश्चयात्, ज्ञानमात्रादर्थनिश्चये प्रामाण्यग्रहवैयर्थ्यं भ्रमत्वेन ज्ञातादर्थनिश्चयप्रसङ्गश्च, तथा चोपजीव्यत्वेनाधिकबलत्वेन वा पक्षे साध्याभावज्ञानस्य प्रमात्व-

---

तथा चेत्यादि। अधिकबलत्वेनाऽधिकरणरूपत्वेनाऽपेक्षणीयो व्य-

अथ बाधसिद्धान्तः।

अधिकं बलं यस्येति भ्रमं निरस्यन्नाह अधिकबलत्वेनेति। तृतीयासङ्गत्यर्थं पूरयति अपेक्षणीय इति। साध्याभाववत्ताज्ञानस्य प्रमात्वनिश्चयं विनापि व्यभिचारस्य सत्त्वात् व्याचष्टे व्यभिचारनिश्चय इति। ननु व्यभिचारज्ञानस्य न साध्याभावनिश्चयमात्राधीनत्वं गृहीताप्रामाण्यके तस्मिन्नसत्यपि व्यभिचारस्य ज्ञानात्। किं तु साध्याभावज्ञानप्रामाण्यनिश्चयाधीनत्वमेवेत्यतः तथैव व्याचष्टे

निश्चये सत्यभिचारो नान्यथा, उभयथापि साध्याभाव-निश्चयाधीनव्यभिचारज्ञानात् पूर्वं ज्ञातं साध्याभावज्ञा-

---

भिचारनिश्चयः। साध्याभावनिश्चयेति। साध्याभावो निश्चीयते येन प्रामाण्यनिश्चयेन तदधीनेत्यर्थः। अत्रेदं तत्त्वम्। साध्याभाववान् साध्यवदन्यो वा पक्षः, पक्षावृत्तिसाध्यं, पक्षे साध्याभावः, पक्ष-निष्ठसाध्यभाववत्त्वादिकं, साध्यादेः पक्षावृत्तित्वादिकं, साध्यवद-सामान्यादेः पक्षान्यत्वादिकं, विशिष्टसाध्ये पक्षादेर्विशेष्याभाववत्त्वादिकं, यथामतं पक्षे साध्यवत्ताज्ञानस्य साक्षाद्विरोधि प्रत्येकमेव

साध्याभाव इति। निश्चीयते येनेति। निश्चयविषयतापन्नः क्रियते येन विशेषणेनेत्यर्थः। निश्चितप्रामाण्यकज्ञानस्यैव प्राच्यैरर्थनिश्चायकत्वोपगमादिति भावः। अत्र बाधग्रन्थे। साध्याभाववत्त्वादिकमित्यादिना पक्षस्य साध्यवदन्यत्वोपग्रहः। साध्यादेरिति। आदिपदाभ्यां साध्यवत्त्वस्य पक्षवृत्त्यन्यत्वाद्युपग्रहः। वन्हिमतश्चत्वरस्य पर्वतान्यत्वं न बाध इत्यतः सामान्यपदम्। विशिष्टसाध्य इति। गुणः पटान्यत्वविशिष्टद्रव्यत्ववानित्यादौ गुणादेर्द्रव्यत्वाद्यभाववत्त्वमित्यर्थः। आदिना विशेष्यस्य पक्षावृत्तित्वोपग्रहः। विशिष्टे साध्ये पक्षस्य विशेषणाभावस्तु नाभासः तदग्रहदशायां विशिष्टवत्ताज्ञानहेतोर्धर्मिणि विशेषणवत्तानिश्चयस्यैव विरहेण विशिष्टवत्ताज्ञानस्यानुदयात् तत्र तस्याऽविरोधित्वात्, अत एव साध्यविशिष्टहेतुमत्त्वं तु पक्षे साध्यग्रहं विना दुर्ग्रहमित्यादिकं स्वयमेव प्रागुक्तमिति ध्येयम्। यथामतं विरोधीत्यन्वयः। तत्रानुभवबलाद्विघ्नविषयकस्यापि ज्ञानस्य प्रतिबन्धकत्वादुपात्तं निखिलमेव साध्यवत्ताविरोधित्वात् बाध इति प्राञ्चः। समानविषयकस्यैव ज्ञानस्य लाघवेन विरोधित्वात् पक्षः साध्याभाववान् पक्षे साध्याभाव इत्येतयोरेव बुद्ध्योर्विरोधित्वमित्यपरे। वस्तुतो यत्र पक्षापेक्षया साध्याभावो लघुः तत्र तत्प्रकारक एव बाधनिश्चयो विरोधी, यथा चैत्रावलोकितह्रदो वन्हिमान् इत्यादौ,

बाधः। तन्निश्चयश्च विरोधिनिश्चयत्वेन दोषविशेषाद्यजन्यज्ञानमात्र एव विरोधी । अत एवाऽनन्वयनिश्चयविरहो योग्यतेत्याचार्याः ।

तत्प्रकारकनिश्चयत्वापेक्षया साध्याभावप्रकारकनिश्चयत्वस्यैव लघुत्वेन साध्यवत्ताज्ञानप्रतिबन्धकतावच्छेदकत्वात् । यत्र तु साध्याभावापेक्षया पक्ष एव लघुस्तत्र साध्याभावधर्मिकः पक्षनिश्चय एव साध्यवत्ताज्ञानविरोधी, यथा जलह्रदः चैत्रावलोकितवन्हिमानित्यादौ, तत्र साध्याभावनिश्चयापेक्षया पक्षप्रकारकनिश्चयत्वस्यैव लाघवेन विरोधितावच्छेदकत्वात् । यत्र तु पक्षः साध्याभावश्च द्वयमेव तुल्यशरीरं तत्र साध्याभावप्रकारकस्येव पक्षप्रकारकस्यापि बाधनिश्चयस्य साध्यवत्ताज्ञानविरोधित्वं विनिगमकाभावात्, यथा घटाभावो वन्हिमानित्यादाविति तु परमार्थः । विरोधिनिश्चयत्वेनेति । विरोधितावच्छेदकतत्तद्धर्मप्रकारकनिश्चयत्वेनेत्यर्थः । दोषविशेषेति । साक्षात्कारत्वानिरूपिततत्प्रकारताकज्ञानमात्र इत्यर्थः । तेन दोषाद्यननुगमेपि न क्षतिः, न वा लौकिकसन्निकर्षजन्यस्यापि संशयस्य बाधनिश्चयदशायामुत्पादः, सन्निकृष्टकोटावपि सन्देहप्रकारतायाः साक्षात्कारत्वानिरूपितत्वादिति ध्येयम् । ज्ञानसामान्यविरोधितायां संवादमाह अत एवेति । योग्यता शाब्दधीहेतुः । अत्रेदं बोध्यम् । लौकिकसन्निकर्षजन्ये दोषविशेषजन्ये च साक्षात्कारत्वनिरूपिततत्प्रकारताकचाक्षुषादौ भ्रमत्वज्ञानाद्यनास्कन्दितस्तादिन्द्रियजन्य एव तदभावनिर्णयो लौकिकालौकिकसाधारणो विरोधी । सत्यपि स्पार्शनादिविरोधिनिर्णये तादृशप्रकारताकचाक्षुषाद्युत्पादात्तादिन्द्रियजन्यत्वनिवेशः । नायं स्थाणुरिति चाक्षुषभ्रमस्थले च विशेषदर्शनेनापि तस्याऽप्रामाण्यज्ञानास्कन्दनेनैव सम्पादितैवाऽयंस्थाणुरिति चाक्षुषोत्पत्तिः । अस्तु वा भ्रमत्वज्ञानास्कन्दितस्यैव विशेषदर्शनाभावविशिष्टस्य स्थाणुत्वाभावचाक्षुषस्य तादृशस्थाणुत्वचाक्षुषविरोधित्वम्, अत एव भ्रमोत्तरप्रत्यक्षं प्रति विशेषदर्शनस्य हेतुत्वं वर्णयन्ति मिश्राः । शङ्खे पीतत्वभ्रमदशायां च सत्यपि पीतत्वाभावव्याप्यदर्शने पित्तदोषेणैव प्रतिबन्धान्न पीतत्वाभावस्य चाक्षुषं, तत्र विशेषदर्शनस्य उत्तेजकत्वं वा न वाच्यं शब्दानुगमस्याऽनुपयुक्तत्वात्। यदि च

विभाजकन्तु प्रकृतपक्षप्रकृतसाध्यवैशिष्ट्यग्रहविरोध्यनुमानायकत्वे प्रकृतपक्षप्रकृतसाध्यग्रहविरोधित्वे च सति प्रकृतपक्षप्र-

---

सत्यपि मालिन्यदोषोत्पन्ने श्वैत्याभावचाक्षुषे मालिन्यमार्जनोत्तरमेव शङ्खे श्वैत्यचाक्षुषं तदा शङ्खधर्मिकनिरुक्तश्वैत्यचाक्षुषं प्रति मार्जनाद्यभावविशिष्टस्यैव श्वैत्याभावचाक्षुषस्य विरोधित्वं वाच्यम्। अत एव घटवति भूतले यत्किञ्चिद्वच्छेदेनालोकसंयोगादृघटाभावचाक्षुषे सत्यपि सर्वावच्छेदेनालोकसंयोगानन्तरमेव भूतलं घटवदिति चाक्षुषस्योत्पादेपि न क्षतिः। तत्रापि सर्वावयवावच्छिन्नालोकसंयोगानामुत्तेजकत्वात्। वस्तुतो विनश्यदवस्थेनापि पित्तादिना जनिते श्वैत्याद्यभावस्य भ्रमे सत्यपि पित्तादिनाशानन्तरक्षणे शङ्खादौ श्वैत्यादिचाक्षुषोत्पत्तेरानुभविकत्वात् लौकिकप्रत्यक्षं प्रति नैकविधमपि विपरीतज्ञानं विरोधि किन्तु तज्जनकीभूताः पित्तादिदोषा एव तत्प्रतिबन्धकाः। तत्प्रतिबद्ध्यतावच्छेदकं तु न श्वैत्यलौकिकचाक्षुषत्वं, सत्यपि पित्ते घटादेः श्वैत्यग्रहात्, नापि शङ्खधार्मिकतादृशचाक्षुषत्वं, सति पित्ते शङ्खे श्वैत्यस्य निर्विकल्पकापत्तेः, किं तु शङ्खश्वैत्यलौकिकचाक्षुषत्वम्। अत एव शङ्खस्य पित्तचक्षुःसन्निकृष्टतादृशायामपि इक्षुशङ्खकालीनो घट इत्यादिश्वैत्योपनीतदर्शनस्य नाऽनुपपत्तिः। एवं शङ्खे पीतत्वस्य वंशे सर्पत्वस्य तमसि नीलरूपस्य दर्पणादौ मुखादेर्दोषविशेषजन्यप्रत्यक्षे दिङ्मोहप्रत्यक्षे च न किञ्चिदपि विपरीतज्ञानं विरोधि, सत्यपि समानेन्द्रियजन्यबाधनिश्चये तादृशप्रत्यक्षाणामानुभाविकत्वात्। यदि च पित्तादिसमानकालोत्पन्नशङ्खधर्मिकपीतत्वाद्यभावलौकिकप्रत्यक्षस्योत्तरक्षणे न पित्तादिदोषाधीनपीतत्वादिभ्रमस्तदा शङ्खादिधर्मिकपीतत्वादिज्ञानमात्रं प्रत्येव तद्धर्मिकपीतत्वाद्यभावलौकिकनिश्चयस्य विरोधित्वं वाच्यम्। एवमन्यत्रापि यथानुभवं प्रतिबद्ध्यप्रतिबन्धकभावः सुधीभिरुल्लेख्य इति सङ्क्षेपः।

प्रकृतेत्यादि। साध्याभावव्याप्यवत्पक्षात्मनः सत्प्रतिपक्षस्य वारणाय प्रथमं सत्यन्तम्। तादृशविशिष्टविषयकत्वेन परामर्शस्य प्रकृतपक्षधर्मिकप्रकृतसाध्यवैशिष्ट्यग्रहविरोधिगोचरानुमि-

कृतसाध्यवैशिष्ट्यग्रहविरोधित्वम् । पक्षादेः साध्यासमानाधिकरण-

---

तिजनकत्वं तदन्यत्वे सतीत्यर्थः । अत्र प्रकृतपक्षधर्मिकप्रकृतसाध्यवत्ताग्रहविरोधित्वं न तादृशग्रहविरोधिविषयतामात्रं, वन्हिमत्पर्वतौ वन्हिव्याप्याभाववानित्यादिस्थले वन्हिमत्पर्वतस्यापि तादृशविरोधित्वात्तदुग्रायके वन्हिव्याप्यवत्पर्वताद्यात्मके तत्रत्यबाधे अव्याप्त्यापत्तेः, नापि प्रकृतपक्षकप्रकृतसाध्यवत्ताज्ञानत्वावच्छिन्नं प्रति यादृशविशिष्टविषयकत्वेन प्रतिबन्धकत्वं तत्त्वमेव तथा, निर्वन्हिः पर्वतो वन्हिमानित्यादौ तादृशग्रहत्वावच्छिन्नप्रतिबध्यत्वाप्रसिद्ध्या तत्रत्यबाधाव्याप्तेः, किं तु प्रकृतपक्षधर्मिकप्रकृतसाध्यवत्ताग्रहत्वाव्यापकविषयितासून्यग्रहत्वावच्छिन्नं प्रति यादृशविशिष्टविषयकत्वेन साक्षात्प्रतिबन्धकत्वं तत्त्वमेव तथा वाच्यं, तथा च विषयितामात्रस्यैव यथाकथञ्चित्साध्यविशिष्टपक्षग्रहत्वाव्यापकत्वात् तादृशग्रहाप्रसिद्ध्या बाधमात्राव्याप्तिरतः पक्षसाध्ययोः प्रकृतत्वद्वयोपादानम् । साक्षादित्युपादानाद्वन्हिमद्भ्रदो वन्ह्यभावव्याप्यव्याप्याभाववानित्यादौ वन्ह्यभावव्याप्यवत्त्वविशिष्टह्रदस्य विरोधिव्याप्यवत्ताविधया प्रकृतपक्षे प्रकृतसाध्यवैशिष्ट्यग्रहविरोधित्वात्तदुग्रायके वन्ह्यभावव्याप्यव्याप्यवद्भ्रदाद्यात्मकबाधे नाव्याप्तिरिति ध्येयम् । साध्यपक्षाप्रसिद्ध्यावारणाय द्वितीयं सत्यन्तम । ह्रदो वन्हिमान्धूमादित्यादौ प्रकृतपक्षादिग्रहविरोध्यप्रसिद्ध्या तत्रत्यबाधाव्याप्तेः, प्रसिद्धपक्षसाध्यस्थले तादृशग्रहाविरोधित्वस्यानुपादेयत्वात् । ह्रदत्वादिप्रकारकग्रहत्वावच्छिन्नं प्रति ह्रदभिन्नत्वादिज्ञानत्वेन समानविशेष्यताप्रत्यासत्त्या प्रतिबन्धकत्वमते तत्रापि पक्षादिग्रहविरोधित्वस्य सुवचत्वाच्च । न चैवं वन्हिमज्जलह्रदो वन्ह्यभावव्याप्याभाववान् इत्यादौ वन्ह्यभावव्याप्यवज्जलह्रदाद्यात्मकबाधे अव्याप्तिः तस्य प्रकृतपक्षग्रहविरोधित्वादिति वाच्यम् । तदभावव्याप्यवत्तादिव्यावृत्तस्यैव पक्षादिग्रहविरोधित्वस्योक्तत्वात्, तस्याश्रयासिद्धित्वेनाऽलक्ष्यत्वेऽपि क्षत्यभाव इत्यपि वदन्ति । व्यभिचारादावतिव्याप्तिवारणायाह प्रकृतपक्षेत्यादि । अत्रापि पक्षसाध्ययोः प्रकृतपदव्यावृत्तिः प्रागुक्तरीत्या द्रष्टव्या । ननु पक्षादेः साध्यासमा-

नप्रमात्वमेव दोष उपजीव्यत्वात् । यदि च पक्षे साध्याभावज्ञानस्य प्रमात्वनिश्चयो नाऽनुमितिविरोधी, तदा व्याप्तिपक्षधर्मतया हेतुज्ञानं विशेषदर्शनत्वेन पक्षे साध्याभावज्ञानं परिभूय साध्यं साधयेदेव पर्वते धूम इव व-

---

धर्मवत्त्वादिकमपि बाध एव । साध्याभाववत्पक्षादिज्ञानप्रमात्वन्तु न बाधः । तज्ज्ञानस्य पक्षादौ साध्याभावादेरनवगाहित्वे विरोधिविषयत्वाभावात्, अवगाहित्वे तु तद्विषयत्वेनैव प्रतिबन्धकत्वात् प्रमात्वनिश्चयस्यान्यत्र प्रतिबन्धकत्वाकल्पनाच्च । सर्वत्र निश्च-

---

नाधिकरणधर्मवत्ताज्ञानस्यापि साध्यविरोध्यनुन्नायकत्वात् साध्यवत्ताबोधविरोधित्वाच्च तत्रातिव्याप्तिरत आह पक्षादेरिति । ननु पक्षधर्मिकसाध्यवत्तानिश्चयसामान्यप्रतिबध्यतावच्छेदकत्वे सतीत्युक्तौ प्रतिपक्षवारणसम्भवात् विरोध्यनुन्नायकत्वादिप्रवेशे गौरवमत आह पक्षादेरिति तु नव्याः । आदिना साध्यासमानाधिकरणधर्मवत्पक्षाद्युपग्रहः । बाध एवेति मतभेदेन । नाऽतः परामर्शग्रन्थोक्तस्य साध्यवत्तावुद्धिं प्रति तद्विरोधित्वस्यासङ्गतिः । मूलोक्तं निरस्यति साध्याभावेति । पक्षधर्मिकसाध्यवत्ताज्ञानविरोधिवैशिष्ट्यावगाहिज्ञानप्रमात्वामत्यर्थः । तेन साध्यवदन्यत्वादिज्ञानप्रमात्वस्योपग्रहः । ननु साध्याभाववति साध्याभावप्रकारकमिदं ज्ञानमित्याकारकः साध्याभाववति पक्षे साध्याभावप्रकारकमिदं ज्ञानमित्याकारको वा निरुक्तप्रमात्वस्य ग्रहो विरोधी, तत्र नाद्य इत्याह तज्ज्ञानस्येति । निरुक्तप्रमात्वज्ञानस्येत्यर्थः । नान्त्य इत्याह अवगाहित्व इति । तद्विषयत्वेनेति । पक्षादौ साध्याभावादिविषयकत्वेनेत्यर्थः । तथा च प्रमात्वविषयत्वेनाऽप्रतिबन्धकत्वात्तस्याभासत्वं दुर्घटमिति भावः । नन्वेवमुक्तरीत्या प्रवृत्त्यादावपि फलानुपधायकत्वादिनिश्चयस्य प्रमात्वग्रहः प्रतिबन्धको न स्यात् अतस्तत्रे-

यस्य हेतुत्वे प्रतिबन्धकत्वे च भ्रमत्वाग्रहः, संशयसाधारणज्ञानमात्रस्य तथात्वे तु भ्रमत्वानिश्चयः प्रयोजकः, अन्यथाकाङ्क्षाकु-

---

ष्टापत्तिमाह प्रमात्वनिश्चयस्येति । ननु प्रमात्वनिश्चयस्याविरोधित्वे भ्रमनिश्चयत्वेन गृह्यमाणादपि बाधनिर्णयाद्विशिष्टधीर्न स्यादत आह सर्वत्रेति । हेतुत्व इति दृष्टान्तार्थम् । भ्रमत्वाग्रहः । प्रयोजक इत्यन्वयः । अत्र यद्यपि यद्रूपावच्छिन्नप्रकारताकनिश्चयत्वेन प्रतिबन्धकत्वं जनकत्वं वा तद्रूपावच्छिन्नाभाववत्त्वगर्भस्यैव भ्रमत्वस्याग्रहः प्रयोजको वाच्यः अन्यथाऽतिप्रसङ्गात्, तथा च भूतलं नीलघटवदित्यादिनिश्चयस्य नीलघटत्वावच्छिन्नाभाववद्गर्भभ्रमत्वग्रहदशायां भूतलं न घटवदिति प्रतीतिर्न स्यात् घटत्वावच्छिन्नाभाववत्ताबुद्धिं प्रति नीलघटत्वावच्छिन्नवत्तानिश्चयत्वेनाऽप्रतिबन्धकत्वाल्लाघवेन घटत्वावच्छिन्नवत्तानिश्चयत्वेनैव तथात्वात्, तथापि यादृशरूपावच्छिन्नप्रकारिताव्यक्तिर्वस्तुगत्या प्रतिबन्धकत्वस्य जनकत्वस्य वाऽवच्छेदिका तत्र तादृशरूपावच्छिन्नाभाववत्त्वगर्भस्य भ्रमत्वस्य ग्रहस्तन्त्रमित्यदोषः । कथितस्थले नीलघटत्वावच्छिन्नप्रकारिताव्यक्तेरेव घटत्वावच्छिन्नप्रकारितात्वेन घटसामान्याभावबुद्धिप्रतिबन्धकतावच्छेदकत्वात् विशेषणविशेष्यभावापन्नाभ्यां नीलत्वघटत्वाभ्यामवच्छिन्नाया एव प्रकारिताव्यक्तेर्नीलघटत्वावच्छिन्नप्रकारितात्वात्। एवं च साधनभेदेपि वन्ह्यभाववदवृत्तित्वावच्छिन्नप्रकारिताकपर्वतनिश्चयत्वेनैवानुगतरूपेण तादृशनिश्चयोत्तरानुमितिहेतुत्ववादिनां मतेपि वन्ह्यभाववदवृत्तिधूमवान्पर्वत इत्यादिपरामर्शे वन्ह्यभाववदवृत्तिधूमत्वावच्छिन्नाभावगर्भस्य धूमसामान्याभावगर्भस्य च भ्रमत्वस्य ग्रहदशायां न पर्वते वन्ह्यनुमितिः, विशिष्टधूमत्वावच्छिन्नायाः धूमत्वावच्छिन्नाया वा तत्रत्यप्रकारिताव्यक्तेरेव वन्ह्यभाववदवृत्तित्वावच्छिन्नप्रकारितात्वेनाऽनुमितिजनकतावच्छेदकतया तादृशविशिष्टधूमत्वाद्यवच्छिन्नाभाववत्त्वादिगर्भभ्रमत्वग्रहस्यापि तत्रोत्तेजकत्वादिति ध्येयम्। तथात्वे। हेतुत्वे प्रतिबन्धकत्वे च । अन्यथेति। प्रमात्वनिश्चयः प्रयोजकीभवेदित्यन्वयः। क्रमेण शाब्दधीप्रवृत्त्यनुमित्यादेः कारणतावच्छेदकनिविष्टो भवेदित्यर्थः। ननु प्रमात्वज्ञान-

ग्रिहम । न च साध्याभावबुद्धिरेवाऽगृह्यमाणविशेषा स-
त्प्रतिपक्षवत् प्रतिबन्धिकेति वाच्यम् । रजते नेदं रज-
तमिति ज्ञानेऽपि विशेषदर्शनेन रजतत्वस्य शङ्खे पीत-

तिसाध्यत्वादिनिश्चयहेतुप्रतिहेतुपरामर्शादीनां प्रमात्वनिश्चयो यो-
ग्यता व्यभिचारज्ञानादीनाञ्च प्रमात्वज्ञानं प्रयोजकीभवेत् ।
शङ्खादौ शुक्लत्वाभावभ्रमे च शुक्लत्वाद्यनुमितिर्न विना तदप्रामा-
ण्यग्रहं, न हि स्वरूपसत्यपि बाधनिश्चये शाब्दमानसादिज्ञानमुत्प-
द्यते । अथ लाघवेन संशयसाधारणं संसृष्टत्वज्ञानमेव शाब्दानु-
मित्योः कारणम्, आस्ताञ्च तस्यैव विरोधितया प्रकरणसमो बा-
धश्च हेत्वाभासोऽसिद्धिरिव परामर्शस्य, विलीयताञ्चाऽप्रसिद्धसा-

---

स्य विरोधित्वे शङ्खो न श्वेत इति भ्रमसत्त्वेपि शङ्खः श्वेत इत्यनु-
मितिर्न स्यात् अतस्तत्रेष्टापत्तिमाह शङ्खादाविति । स्वरूपेति । प्र-
मात्वेनाऽनिश्चीयमानेपीत्यर्थः । मिश्रोक्तमाशङ्क्य अथेति । लाघवे-
नेति । बाधनिश्चयाभावहेतुत्वापेक्षया लाघवेनत्यर्थः । प्राथमिकप्र-
त्यक्षे व्यभिचारादुगुरोरपि बुभुत्सविरहविशिष्टबाधनिश्चयाभावस्यैव
विशिष्टप्रत्यक्षे हेतुत्वं न तु संसृष्टत्वज्ञानस्येत्याशयेनाह शाब्दानुमि-
त्योरिति । जन्यता तु प्रत्यक्षान्यत्वविशिष्टज्ञानत्वेन विशिष्टानुमि-
तित्वादिना वक्तव्येयम् । यद्यपि बाधनिश्चयदशायां स्मरणोपमि-
त्योरप्यनुदयात्तत्रापि संसृष्टत्वधियः कारणत्वमुचितं, तथाप्युप-
मितेरतिरिक्तत्वे विवादात् स्मरणस्योद्बोधकविरहादपि बाधदशा-
यामनुत्पत्तिसम्भवात् शाब्दानुमित्योरेवोपादानम् । ननु बाधस्यानु-
मित्याविरोधित्वे हेत्वाभासता न स्यादत आह आस्तां चेति । तस्यैव
पक्षसाध्ययोः संसृष्टत्वज्ञानस्यैवेत्यर्थः । परामर्शस्येति । विरोधितया
हेत्वाभास इति पूर्वेणान्वयः । दोषमात्रस्यैवाऽनुमितिजनकज्ञानविरो-
धित्वादिति भावः । ननु पक्षसाध्ययोः संसृष्टत्वज्ञानस्यानुमितिहेतु-

त्वज्ञाने शुक्लत्वस्य चानुमानात्, वादिवाक्येन पक्षे साध्याभावज्ञानादनुमानोच्छेदप्रसङ्गाच्च । अथ पक्षे

ध्यकमनुमानमिति चेन्न । संशयासत्त्वसमये परामर्शोत्पादे सिद्धिसिषाधयिषे विना अनुमित्यनुत्पादप्रसङ्गात्, सति विशेषदर्शने संशयायोगादिति । एतेन लाघवात् प्रमात्वेन निर्णीयमानं बाधज्ञानं विरोधीति परास्तम् । विपरीतमेव लाघवं, स्फुटतरञ्च तद्भावसाध्ये तत्र

त्वे धूमव्यापकवन्ह्यभाववज्जलमित्यादिपरामर्शाज्जले धूमाभाव इत्याद्यनुमितिर्न स्यात्साध्याप्रसिद्ध्या तत्संसृष्टत्वज्ञानासम्भवात् अतस्तत्रेष्टापत्तिमाह विलीयतां चेति । ननु परामर्शस्य प्रागुत्पन्नं समकालोत्पन्नमुत्तरकालोत्पन्नं वा संसृष्टत्वज्ञानं हेतुः, तत्र नाद्य इत्याह संशयेति । संशयासत्त्वसमये परामर्शोत्पादे अनुमित्यनुत्पादप्रसङ्गादिति योजना । प्रागुत्पन्नस्य निश्चयात्मनः संसृष्टत्वज्ञानस्यानुमितिहेतुत्वमसम्भावितं पक्षतासंपत्त्यर्थमपेक्षितया परामर्शोत्तरानुमित्सया तस्य नाशादतो निश्चयासत्त्वदशायामिति नोक्तम् । ननु परामर्शकालोत्पन्नमेव संसृष्टत्वज्ञानमनुमितिहेतुरिति द्वितीयोऽस्तु कल्पः तस्य सिद्धत्वनियमेप्यनुमित्सयैव पक्षतासम्भवादत आह सिद्धिसिषाधयिषे विनेति । परामर्शदशायां तत्सामग्र्या प्रतिबन्धात्साध्यसंशयासम्भवात् सिद्धिपर्यन्तानुसरणम् । ननु परामर्शोत्तरमेव संशयात्मकं संसृष्टत्वज्ञानं भविष्यतीत्यस्तूत्तरः कल्प इत्यत आह सतीति । संशयायोगादिति । व्याप्यदर्शनोत्तरं साध्यवत्ता-निश्चयस्य सम्भवेपि पक्षतासंपत्त्यर्थमनुमित्सापेक्षणे तावत्पर्यन्तं परामर्श एव न तिष्ठेदिति भावः । ननु भ्रमत्वज्ञानानास्कन्दितबाधनिश्चयत्वेन न प्रतिबन्धकत्वं किं तु प्रमात्वनिश्चयास्कन्दितबाधज्ञानत्वेनैव तथात्वं निश्चयत्वस्योभयत्र प्रवेशेपि भ्रमत्वापेक्षया प्रमात्वस्य लघुत्वादित्याशङ्क्य निराचष्टे एतेनेति । [स्वरूपसत्यपि बाधनिश्चये शाब्दमानसानुत्पादेन बाधनिश्चयत्वस्य लघुत्वादित्यर्थः ।] ननु

साध्याभावप्रमैव साध्याभावहेतुविषया व्यभिचारज्ञानत्वेन दोषो न तु तस्याः प्रमात्वज्ञानमपीति चेत्, तर्हि

हि गोत्वाद्यप्रकारकं गोत्वाभावादिप्रकारकं ज्ञानं बाधनिश्चयः, तथा च गोत्वादिमद्भिन्नशेष्यकगोत्वाद्यभावप्रकारकत्वज्ञानाभावो भ्रमत्वग्रहविरहः। बाधग्रहश्च पक्षे गोत्वाद्यप्रकारकं ज्ञानं, तस्य च गोत्वादिमद्भिन्नशेष्यकगोत्वाद्यभावप्रकारकत्वाद्यप्रकारकं गोत्वाभाववद्भिन्नशेष्यकगोत्वाद्यभावप्रकारकत्वप्रकारकज्ञानं प्रमात्वनिश्चय इति। उक्तप्रायञ्च तत्तत्कार्य्यं प्रति प्रतिबन्धकानां कारणानाञ्च प्रमात्वेन

बाधग्रहस्य प्रमात्वनिर्णयदशायां शाब्दादिज्ञानानुत्पादो विवादग्रस्त इत्यत आह विपरीतेति। प्रमात्वेन निश्चीयमानबाधज्ञानत्वापेक्षया भ्रमत्वज्ञानानास्कन्दितबाधनिश्चयत्वेनैव सर्वत्र प्रतिबन्धकतायां लाघवं प्रमात्वनिश्चयत्वापेक्षया बाधनिश्चयत्वस्य लघुत्वादित्यर्थः। न वा सर्वत्र साध्ये बाधग्रहस्य प्रमात्वं भ्रमत्वापेक्षया लघुतरं येन तद्घटितमेव प्रतिबन्धकतावच्छेदकं स्यादित्याशयेनाह स्फुटतरं चेति। तत् लाघवम्। लाघवस्फुटीकरणाय स्वमतं व्याकरोति गोत्वाद्यप्रकारकेत्यादि। गौरवं स्फुटीकर्तुं परमतं व्याकरोति बाधग्रहश्चेत्यादि। प्रकारत्वादीत्यादिना गोत्वाभाववद्भिन्नशेष्यकगोत्वाभावप्रकारत्वाभावस्योपग्रहः। ननु भ्रमत्वज्ञानानास्कन्दितबाधनिश्चयत्वेन प्रतिबन्धकत्वेऽप्रामाण्यनिश्चयानास्कन्दितमेव भ्रमत्वज्ञानं प्रवेश्यं प्रमात्वेन निश्चीयमानबाधज्ञानत्वेन प्रतिबन्धकतायां तु अप्रामाण्यज्ञानास्कन्दित एव प्रामाण्यनिश्चयो निविष्ट इति लाघववैपरीत्येन प्रमात्वेन निश्चीयमानं बाधज्ञानमेव प्रतिबन्धकं युक्तमत आह उक्तप्रायं चेति। तथा च प्रमात्वज्ञानस्य प्रयोजकत्वे व्याप्त्यादिज्ञानं प्रत्यपि प्रमात्वेन निश्चीयमानमेव व्यभिचारादिज्ञानं विरोधि स्यादिति भावः। पूर्वं प्रमात्वनिश्चयस्यैव प्रतिबन्धकत्वमुक्तं न तु प्रमात्वेन निश्चीयमानस्येत्यतः प्रायपदम्। यद्यपीयं प्रतिब-

प्रमायाः अप्रमात्वज्ञाने भ्रान्तानुमितिर्न स्यात्, न स्याच्च पक्षे साध्याभावज्ञानप्रमात्वभ्रमादनुमितिप्रतिबन्धः । ननूपजीव्यत्वेऽप्यत्र साध्याभावप्रमेति ज्ञानं न स्वतोदूषकं, क्लृप्तत्वात् पक्षे साध्याभावनिश्चयं कुर्वत् व्यभिचार-

---

निश्चीयमानतया तथात्वापत्तिरिति । न च सति विशेषदर्शने विपरीतनिश्चयोऽकिञ्चित्करः तत्सत्त्वेऽपि विशेषदर्शनेन प्रत्यक्षोत्पादादिति वाच्यम् । विशेषदर्शनेन तन्नाशानन्तरमेव प्रत्यक्षोदयात्, परैरपि क्वचित् प्रत्यक्षविशेष एव विपरीतनिश्चयविशेषस्यैव

न्दिरनुत्तरं, तथापि प्रमात्वस्य नानात्वादेकविधप्रमात्वेन निश्चीयमानबाधज्ञानत्वेन प्रतिबन्धकत्वे अन्यविधप्रमात्वेन निश्चीयमाने सत्यपि बाधग्रहेऽनुमितिः स्यात् तादृशतादृशप्रत्येकप्रमात्वेन निश्चीयमानबाधज्ञानत्वावच्छिन्नाभावानां बहूनां हेतुत्वे च महागौरवापत्तिः स्यात्, अस्माकं तु यद्यदप्रामाण्यज्ञानदशायां बाधनिश्चये सत्यपि विशिष्टधीस्तत्तदप्रामाण्यज्ञानाभावकूटविशिष्टबाधनिश्चयत्वेनैव प्रतिबन्धकत्वादप्रामाण्यस्य नानाविधत्वेपि क्षत्यभावादित्येव मूलयुक्तिरिति ध्येयम । ननु तद्बाध्यदर्शनाभावविशिष्टस्यैव बाधनिश्चयस्य विशिष्टधीप्रतिबन्धकत्वाद्बाधस्यानुमितिविरोधित्वं दुर्घटमित्याशङ्क्य निराचष्टे न चेति । वाच्यमित्यन्वयः । अकिञ्चित्करः । प्रतिबन्धाक्षमः । तत्सत्त्वेपि बाधनिश्चयसत्त्वेपि । तन्नाशानन्तरमेवेति । बाधनिश्चयनाशोत्तरमेवेत्यर्थः । तथा च बाधसत्त्वे प्रत्यक्षमप्यसिद्धमेवेति भावः । सत्यपि बाधनिर्णये लौकिकादिप्रत्यक्षस्यानुभविकत्वमालम्ब्याह परैरपीति । प्राच्यैरपि, क्व चित् प्रत्यक्षविशेष एव दोषविशेषलौकिकसन्निकर्षादिजन्यात्मके प्रत्यक्षविशेषे एव, विपरीतनिश्चयविशेषस्यैव समानेन्द्रियजन्यबाधनिश्चयस्यैव, तथात्वोपगमात् सति विशेषदर्शनेऽकिञ्चित्करत्वोपगमादित्यर्थः । सत्यपि

ज्ञानद्वारेति चेन्न । अत्र साध्याभावप्रमेति ज्ञानान्नियमतः साध्यज्ञानानुदयात् तस्यैव प्रतिबन्धकत्वात्, शब्दादौ तथा दर्शनात् । साध्याभावप्रमाविषयवृत्तित्वस्य

तथात्वोपगमाच्च। न हि शाब्दादिबोधेऽपि विशेषादर्शनविशिष्टत्वेन स विरोधी, गौरवात् मानाभावाच्च। न वा चाक्षुषादिप्रत्यक्षे मानसादिविपरीतनिश्चयो विरोधी । उपयुज्यते च क्वचिद्विशेषदर्शनम-

---

पीतत्वाभावव्याप्यदर्शने शङ्खादौ पीतत्वादिभ्रमस्य पीतत्वाभावचाक्षुषविरोधित्वेनाऽकिञ्चित्करत्वाभावात्क्वचिदित्युक्तम् । तथा च दोषविशेषलौकिकसन्निकर्षादिजन्यस्थाणुत्वादिमत्ताचाक्षुषादिकं प्रति विशेषदर्शनाभावविशिष्टस्थाणुत्वाद्यभाववत्ताचाक्षुषत्वादिना प्रतिबन्धकत्वेप्यनुमित्यादौ तदभावनिश्चयत्वेनैव प्रतिबन्धकत्वं न तु तत्र विशेषदर्शनस्योत्तेजकत्वं, तदेव स्फुटीकरोति न हीति । सः विपरीतनिश्चयः । गौरवादिति । परोक्षविशिष्टबुद्धिं प्रति लाघवाद्विपरीतनिश्चयमात्रेण प्रतिबन्धकत्वादिति भावः । प्रामाणिकगौरवस्याऽदोषत्वादाह मानाभावाच्चेति । ननु दोषविशेषादिजन्यप्रत्यक्षे विशेषदर्शनाभावविशिष्टविपरीतनिश्चयमात्रस्यैव विरोधित्वाद्विपरीतनिश्चयविशेषस्यैवेति प्रागुक्तं विफलमत आह न वेति । चाक्षुषादिप्रत्यक्षे दोषादिजन्ये । मानसादीत्यादिनाऽऽनुमानिकाद्युपग्रहः । तथा च मानसादिबाधनिश्चयदशायां दोषविशेषादिजन्यचाक्षुषाद्युत्पत्त्यर्थमेव समानेन्द्रियजन्यार्थकस्य विशेषस्येत्यस्याऽभिधानमिति भावः । ननु सत्यपि बाधनिर्णये विशेषदर्शनोत्तरं क्वचिच्छाब्दादिबोधस्यानुभविकत्वात्परोक्षविशिष्टबुद्धित्वलेपि विशेषदर्शनस्योत्तेजकत्वम्, अन्यथा तस्य नोपयोगः स्यादत आह उपयुज्यते चेति । क्वचिदिति । यत्र विशेषदर्शनं न बाधस्याऽप्रामाण्यग्राहकं तत्र बाधनाशोत्तरमेव विशिष्टबुद्धिस्वीकारादिति भावः । न

हेतुवृत्तित्वादसाधकत्वेन साध्याभावप्रमाया हेत्वाभासत्वम् । साधारण्येऽपि ज्ञायमानं सत् यदनुमितिं प्रतिबन्धाति तस्यैव हेत्वाभासत्वम् । न च साध्याभावप्रमाऽत्रेति

प्रामाण्यग्राहकत्वेन बाधबुद्धेः । न चैवं बाधावतारदशायां पक्षे हेतोरग्रहेऽज्ञानलक्षणाऽसिद्धः, ग्रहे च व्यभिचारधीरेवेति वाच्यम्। बाधग्रहपरामर्शयोर्भेदात्, अभेदेऽपि पक्षः साध्यव्याप्यहेतुमान् साध्याभाववांश्च इति ग्रहस्य परस्परोपरागानवगाहिनो व्यभिचाराविषयत्वात् । एकत्र व्यभिचाराव्यभिचारयोरेकनिश्चयागोचरत्वात्, पूर्णे च करणे साक्षादनुमित्यविरोधिनो व्यभिचारज्ञाना-

---

चेति । वाच्यमित्यन्वयः । अज्ञानलक्षणेति । तथा च परामर्शाभावादेवानुमित्यनुत्पत्तौ बाधस्य तत्र प्रतिबन्धकत्वे मानाभावः । ग्रहे चेति । पक्षे हेतोरित्यनुषज्यते । व्यभिचारधीरेवेति । साध्याभाववान् पक्षो हेतुमानिति ग्रहस्य व्यभिचारधीत्वादिति भावः । भेदादिति । तथा च यत्र बाधनिश्चयोत्तरं परामर्शस्तत्र व्यभिचारज्ञानस्याऽनावश्यकत्वादबाध एवानुमितिप्रतिबन्धक इति भावः । विरोधिनोरपि तद्व्याप्यतदभावयोरेकनिश्चयगोचरत्वमभ्युपेत्याह अभेदेपीति । बाधग्रहपरामर्शयोरभेदेपीत्यर्थः । परस्परेति । हेतौ साध्याभाववदवृत्तित्वावगाहिन एव ज्ञानस्य व्यभिचारधीत्वान्निरुक्तसमूहालम्बनस्य चाऽतथात्वादिति भावः । ननूक्तसमूहालम्बनस्यैव हेतौ साध्याभाववदवृत्तित्वावगाहित्वे को विरोध इत्यत आह एकत्रेति । निश्चयेत्यस्य स्वारसिकेत्यादिः । तेन बुभुत्सादिवशाद्धेतुः साध्यव्यभिचारी तदभाववांश्च इति समुच्चयस्योपगमेपि न क्षतिः । ननु प्राचां मते हेतुसाध्याभावयोरेकधर्मिणि वैशिष्ट्यावगाहिज्ञानस्यैव व्यभिचारधीत्वात्साध्याभाववान् हेतुमानित्यादिग्रहस्यैव उक्तसमूहालम्ब-

निश्चयदशायां पक्षे साध्याभावहेत्वोर्ज्ञानाद्व्यभिचार इति वाच्यम् । प्रमात्वज्ञानस्य साध्याभावनिश्चयहेतुत्वेन त-

---

देरकिञ्चित्करत्वात् । उक्तश्च साध्यादेः पक्षाद्यवृत्तित्वादिकमपि बाधः । न च तद्ग्रहेऽपि व्यभिचारबुद्धिरावश्यकी । यत्त्वनिश्चितप्रामाण्यस्य ज्ञानस्यार्थनिश्चयरूपत्वे प्रामाण्यनिश्चयवैयर्थ्यमतिप्रसङ्गश्च तथा च पक्षे साध्याभावज्ञानस्य निश्चयत्वसम्पत्तयेऽपेक्षणीयस्तत्प्रमात्वनिश्चय एव प्रतिबन्धकः, प्राथमिकत्वादुपजीव्यत्वाच्च, न तु चरमभावि तदधीनं व्यभिचारज्ञानमिति । तत्तु-

---

नस्यापि व्यभिचारज्ञानत्वमेवेत्यत आह पूर्णे चेति । लिङ्गज्ञानात्मनोऽनुमितिकरणस्य पूर्णत्वं व्यापारीभूतपरामर्शसम्पत्तिः । अकिञ्चित्करत्वात् अनुमित्यनुत्पादाप्रयोजकत्वात् । तथा चावश्यं तत्र बाधनिश्चयत्वेन पृथक् प्रतिबन्धकत्वं वाच्यमिति भावः । ननु लिङ्गोपधानपक्षस्य प्रामाणिकत्वे व्यभिचारज्ञानस्यापि साक्षादेवानुमितिविरोधित्वात् बाधनिर्णयो न पृथग्विरोधीत्यत आह उक्तश्चेति । साध्यादेरिति । आदिपदाभ्यां पक्षतावच्छेदकादेः साध्यवदवृत्तित्वाद्युपग्रहः । तदग्रहे साध्यादेः पक्षावृत्तित्वादिग्रहे । मूलोक्तसमाधानं निरसितुं परिष्कृत्य दर्शयति यत्त्वित्यादिना । अर्थनिश्चयरूपत्वे अर्थनिश्चयकारित्वे । ननु कार्यानुपयुक्तोऽपि प्रामाण्यग्रहः सामग्रीवशादेवाभ्युपेतव्य इत्यत आह अतिप्रसङ्गश्चेति । गृहीताप्रामाण्यकादपि अर्थज्ञानात् कार्योत्पत्तिप्रसङ्गश्चेत्यर्थः । निश्चयत्वसम्पत्तय इति । साध्याभाववत्ताज्ञानस्य कार्ये यत्साधने साध्याभाववद्वृत्तित्वज्ञानं तत्कारित्वसम्पत्तये इत्यर्थः । साध्याभाववद्वृत्तित्वबुद्धौ निश्चितप्रामाण्यकसाध्याभाववत्ताज्ञानत्वेनैव हेतुत्वादिति भावः । प्रथमोत्पन्नत्वस्याऽकिञ्चित्करत्वादाह उपजीव्यत्वाच्चेति । व्यभिचारबुद्ध्युपजीव्यत्वाच्चेत्यर्थः । तथा च तद्धेतोरेवेति न्याय एव

च्छम् । तस्य प्रतिबन्धकत्वेनाऽकलुषत्वात् अगृहीताप्रामाण्यकत्वेनैव निश्चयस्य स्वकार्य्यकारित्वात्, अन्यथाऽनवस्थानात्, अप्रामाण्यशङ्कानिवर्त्तकत्वेन च क्वचित् प्रामाण्यग्रहोपयोगात्, संशयसाधारणस्य व्यभिचारज्ञानस्य विरोधित्वाच्चेति । यत्तूपनीतकाञ्चन-

---

साध्याभाववत्ताज्ञानप्रमात्वनिश्चयस्यानुमितिविरोधित्वे मानमिति भावः।व्यभिचारज्ञाने प्राथमिकत्वापजीव्यत्वयोर्व्यतिरेकमाह न त्विति। तदधीनमिति।साध्याभावज्ञानस्य प्रमात्वनिश्चयाधीनमित्यर्थः । तस्य साध्याभावज्ञानप्रमात्वनिश्चयस्य । अकलुषत्वादिति । व्यभिचारज्ञानस्य तु बाधनिश्चयाभावस्थल एव प्रतिबन्धकतायाः कलुषत्वादिति भावः।न वा साध्याभावज्ञानस्य प्रमात्वनिश्चयो व्यभिचारज्ञानस्योपजीव्य इत्याशयेनाह अगृहीतेति।अगृहीताप्रामाण्यकस्यैव साध्याभावाद्विनिश्चयस्य साध्याभाववदवृत्तित्वज्ञानादिलक्षणस्वकार्यकारित्वादित्यर्थः।अथाऽगृहीताप्रामाण्यकस्यैव ज्ञानस्य स्वकार्यकारित्वं न तु निश्चितप्रामाण्यकस्येत्यत्र किं विनिगमकमत आह अन्यथेति।यदि निश्चितप्रामाण्यकस्यैव ज्ञानस्य स्वकार्यकारित्वं तदा तत्तत्प्रामाण्यनिश्चयस्यापि स्वकार्यसम्पत्तये स्वप्रामाण्यनिश्चयापेक्षायामनवस्थापत्तिर्बाधिकेति भावः।नन्वेवमर्थनिश्चयस्य प्रामाण्यानुमानप्रयासो विफल इत्यत आह अप्रामाण्येति । अस्तु वा प्रमात्वेन निश्चीयमानमेवार्थज्ञानं स्वकार्यकारि तथापि यदि साध्याभाववत्त्वांशे निश्चयात्मकमेव व्यभिचारज्ञानमनुमितौ विरोधि स्यात्तदा तस्य विशिष्टवैशिष्ट्यबोधत्वनियमात्तद्धेताः साध्याभाववत्तानिश्चयस्य प्रमात्वनिश्चयो व्यभिचारज्ञानार्थमपेक्षणीयः स्यात्, न त्वेतदस्ति साध्याभावांशे संशयात्मनोपि व्यभिचारज्ञानस्यानुमितिविरोधित्वात्, अन्यथा वायू रूपवान् स्पर्शादित्यादेः पक्षे साध्यसन्देहदशायामप्रयोजकत्वं न स्यात् इत्यक्षरतात्पर्यादाह संशयेति । साध्याभावांशे संशयसाधारणस्येत्यर्थः । मूलोक्तं सोन्वडमतमेव परिष्कृत्योपन्यस्यति यत्विति । उपनीतं यत्काञ्चनमयत्वं तद्विशिष्टवान्हृदप्रकारेण या अनुमितिस्तद्विरोधीत्यर्थः । शुद्धवन्हिहृद्व्याप्यवत्तानिश्चयोत्तरं सम्भावितायाः पर्वतः का-

मयत्वविशिष्टवन्ह्यनुमितिविरोधी व्यधिकरणकाञ्चनमयत्वावच्छिन्नप्रतियोगिताको वन्ह्यभावो बाधः। न च विशिष्टसाध्याप्रसिद्ध्या कथं तद्विशिष्टानुमितिः, विशेष्ये विशेषणमिश्रादिन्यायेन तत्सम्भवात्। शुद्धसाध्यव्याप्तिग्रहादेव चोपनयसहकारेणाऽप्रसिद्धविशिष्टानुमितिसम्भवात् तदभावो बाधोऽस्तु। तेन रूपेण व्याप्तेर-

---

ञ्चनमयवन्हिमानित्यनुमितेः पर्वते काञ्चनमयत्वेन वन्हिर्नास्तीति बाधनिश्चयदशायामनुदयादिति भावः।व्यधिकरणेति। इदमुपलक्षणम्। वन्हौ काञ्चनमयत्वाभावस्याऽप्युक्तानुमितिविरोधित्वात्, अस्य मते कारणीभूतपरामर्शाविरोधित्वेनाभिद्धिमध्ये तदन्तर्भावासम्भवादिति ध्येयम्।ननु काञ्चनमयत्वावच्छिन्नसाध्यकानुमितौ तादृशवन्हित्वावच्छिन्नव्याप्यवत्तानिश्चयेन हेतुत्वाद्वन्हिसामान्यव्याप्यवत्तानिश्चयात् कुतस्तादृशवन्हित्वावच्छिन्नविधेयताकानुमितेः सम्भावना यस्याः काञ्चनमयत्वेन वन्हेर्बाधो विरोधी इत्याशङ्क्य निराचष्टे न चेति।विशिष्टसाध्याप्रसिद्ध्येति।विशिष्टसाध्ये हेतुव्यापकत्वाग्रहेणेत्यर्थः। तेन पृथक् काञ्चनमयवान्हित्वप्रकारेण साध्यप्रसिद्धावपि न तादृश्येण वन्ह्यनुमितेः सम्भव इति भावः।विशिष्टवान्हित्वावच्छिन्नविधेयताकानुमितित्वावच्छिन्नं प्रत्येव विशिष्टवन्हित्वावच्छिन्नस्य व्याप्यवत्तानिश्चयो हेतुः प्रकृते पुनरितरबाधस्थल इव काञ्चनमयत्वनिष्ठप्रकारतानिरूपितवन्हित्वावच्छिन्नावधेयताकैव वन्हेरनुमितिरतो विशिष्टसाध्यव्याप्यवत्तानिश्चय भावेपि न क्षतिरित्याशयेन परिहरति विशेष्य इत्यादि।ननु शुद्धवन्हेः परामर्शो न काञ्चनमयवह्नित्वप्रकारकानुमितिहेतुस्तथासति काञ्चनमयत्वानुपस्थितिदशायामपि तादृशानुमित्यापत्तेः, एवं च कस्याः प्रतिबन्धकतया काञ्चनमयत्वेन वन्ह्यभावो बाधः स्यादत आह शुद्धेति।उपनयेति।काञ्चनमयत्वाद्युपस्थितिसहकारेणेत्यर्थः। तदभाव इति। प्रागुक्तो व्यधिकरणकाञ्चनमयत्वाद्यवच्छिन्नप्रतियोगिताको वन्ह्यभावो बाधोऽस्त्वित्यर्थः। ननु पक्षे हेतोर्ग्रहदशायां काञ्चनमयत्वेन वन्हेर्बाधनिश्चये विशिष्टसाध्यव्यभिचारग्रह एवास्तु दोष इत्यत आह तनोति। व्यधिकरणकाञ्चनमयत्वादिरूपेण साध्यव्याप्ति-

नुपादानाच्च तथा व्यभिचारो न दोषाय, उपनीतसकलभाने चाऽप्रामाण्यं प्रत्यक्षेऽपि तुल्यम्, अनुद्देश्यांशे चानुमितेरप्रामाण्यं न वादिविजयप्रयोजकमिति । तन्न । प्रत्यक्षे हि विना सन्निकर्षमभानादुपनीतभानस्य प्रत्यभिज्ञादावानुभविकत्वादुपनयोऽपि सन्निकर्षः कल्पयते, अनुमितौ च फलासिद्ध्या न सामग्र्यन्तरकल्प-

---

ग्रहस्याऽनपेक्षितत्वादित्यर्थः । व्यभिचारः तादृशकाञ्चनमयत्वाद्यवच्छिन्नप्रतियोगिताकसाध्याभाववद्वृत्तित्वग्रहो न दोषायेत्यर्थः । शुद्धसाध्यव्याप्तिग्रहस्यैवोत्पन्नत्वादिति भावः । मूलोक्तदोषं प्रतिबन्दिमुद्रया उद्धरति उपनीतेति । तुल्यमिति । यदि च प्रत्यक्षस्थले भ्रमं प्रति विशिष्य दोषाणां हेतुत्वं सर्वांशे प्रमासामग्रीणां वा प्रतिबन्धकत्वं कल्प्यते तदानुमितिस्थलेऽपि तन्मया सुवचमिति भावः । अनुद्देश्येति । यत्रांशे विवादस्तदंशाप्रामाण्यस्यैव विजयप्रयोजकत्वात्, अन्यथेदं रजतमिति प्रत्यक्षस्यापि शुक्तित्वसाधकत्वेनोपन्यासो न स्याद्रजतत्वांशे तस्याप्यप्रामाण्यादिति भावः । फलासिद्ध्येति । फलमुपनीतावगाहित्वेनानुमितेरनुभव तद्विरहेणेत्यर्थः।न सामग्र्यन्तरमिति।न च प्रत्यक्षस्थल एवानुमितिसाधारणतत्प्रकारकानुभवत्वावच्छिन्नं प्रत्येव तदुपनयत्वेन हेतुत्वान्न सामग्र्यन्तरकल्पना तत्प्रकारकप्रत्यक्षत्वावच्छिन्नं प्रति तथात्वे प्रसिद्धसाध्यकस्थल इवाऽप्रसिद्धसाध्यकस्थलेऽप्यनुमितेः साध्यविशेषणकत्वापत्तेरिति वाच्यम्।विशेष्यविधया तदभावविधेयकानुमितित्वावच्छिन्नं प्रत्येव तद्व्यापकाभाववत्तानिश्चयस्य हेतुत्वेनाऽपरामृष्टसाध्यस्यानुमितौ विशेषणत्वासम्भवात् उपनीतविशेष्यकमानसाद्यनुरोधेन तदलौकिकप्रत्यक्षत्वावच्छिन्नं प्रत्येव तदुपनयत्वेन हेतुत्वात्, तत्प्रकारकानुभवत्वावच्छिन्नं प्रत्येव तदुपनयस्य हेतुत्वेपि काञ्चनमयत्वावच्छिन्नविधेयताकानुमितौ तादृशवन्हित्वावच्छिन्नव्याप्यवत्तानिश्चयस्य काञ्चनमयत्वनिष्ठप्रकारतानिरूपितवन्हित्वावच्छिन्नविधेयताकानुमितौ च काञ्चनमयान्यवन्हेर्बाधनिश्चयस्य विशेषसामग्रीत्वेन तद्विरहादेव शुद्ध-

दृशायां तदभावात् । पक्षधर्मताबलेन प्रसिद्धं बाधान्न सिध्यतीति बाधः पृथक् । प्रसिद्धवन्ह्यभाववति पक्षे व्यभिचारान्न तत्सिद्धिरिति चेत्, तर्ह्यप्रसिद्धवन्ह्यभाव-

---

ना । न खलु वह्निव्याप्यधूमपरामर्शादुपनीतरासभानुमितिरानुभविकी कस्यापि, अन्यथा पर्वते वन्हिसन्देहवतो निश्चितवन्हिव्यभिचारकेण अभिधेयत्वादिना पर्वतादौ प्रमेयत्वादिकमनुमिमतोऽपि वन्ह्यर्थिनो वन्हिमत्त्वनिश्चयान्निष्कम्पप्रवृत्त्यापत्तेरिति ।

पक्षधर्मताबलेनेत्यादि । ननु विशेषतो व्याप्यग्रहान्न तथा

वन्हेः परामर्शादुपनीतकाञ्चनमयत्वप्रकारेण वन्हेरनुमित्यसम्भवाच्चेति भावः । उपनीतेत्यस्य बाधाद्यनवतारदशायामित्यादिः । तेन रासभीयान्यवन्हेर्बाधनिश्चयदशायां शुद्धवन्हेः परामर्शादेव रासभीयवन्हिमानित्यनुमितेरानुभविकत्वेपि न क्षतिः । ननु विशेष्ये विशेषणमित्यादिन्यायेन काञ्चनमयवन्ह्याद्यनुमितावितरबाधनिश्चयस्य लाघवादिप्रतिसन्धानस्य च विशेषतो नाऽनन्तकार्यकारणभावः कल्प्यते गौरवात्, किन्तु लाघवात् तत्प्रकारकानुमितौ तद्व्याचरज्ञानत्वेनैकमेव हेतुत्वमित्यनुमितेरुपनीतभानत्वमावश्यकमत आह अन्यथेति । उपनयबलादेवानुमितौ भानस्वीकारः इत्यर्थः । लिङ्गोपधानपक्षस्य प्रामाणिकत्वे वन्हेर्हेतुतायां पर्वते प्रमेयत्वानुमितेर्लिङ्गविधयैव वन्हिमत्तानिश्चयात्ततो वन्ह्यर्थिनः प्रवृत्तिर्भवत्येव इत्यत अभिधेयत्वादिनेत्युक्तम् । प्रवृत्त्यापत्तेरिति । तथा च गत्यन्तरासम्भवादेव इतरबाधादेर्विशिष्याऽनन्तकार्यकारणभावः स्वीक्रियत इति भावः ।

मूले पक्षधर्मताबलेनेति । लाघवज्ञानादिवशादप्रसिद्धमहानसीयवन्ह्यादिकं स्वबाधान्न सिद्धतीति बाधः पृथगेव दोष इत्यर्थः । दीधितौ न तथेति । न विशेषतो महानसी-

वति सपक्षे व्यभिचारात् तमपि न साधयेत्, तदज्ञानात्तत्साधनेऽनुमितिरप्रमा स्यात् । अथ पक्षवृत्तेरन्य एव धूमादिः सपक्षे, तर्हि गोत्वपृथिवीत्वद्रव्यत्वादेरप्रसिद्धसास्नाद्यनुमानं न स्यात् सास्नादिप्रत्येकव्यभिचारात् ।

सिद्धिसम्भावना, सामान्यतः सिद्धौ न विशेषतो बाधो विरोधी भिन्नप्रकारकत्वात् । न च समानविषयत्वमेव विरोधित्वे तन्त्रम्, पृथिव्यादिरूपबाधग्रहेऽपि वायू रूपवान्नवेति संशयात् रूपवानि-

---

यवन्हित्वादिप्रकारेणानुमितेः सम्भावना इत्यर्थः । तथा च कुत्र विशेषतो बाधः प्रतिबन्धकः स्यादिति भावः । सामान्यतो वन्हित्वादिना। विशेषतो महानसीयवन्हित्वादिना । भिन्नेति । अन्यथा गृहे घटो नास्तीति निर्णयदशायां द्रव्यमस्तीति धीर्न स्यादिति भावः । ननु तत्तद्व्यक्तिवैशिष्ट्यावगाहिज्ञानं प्रति तत्तद्व्यक्तिप्रतियोगिकाभावनिर्णयत्वेनैव समानविषयतया प्रतिबन्धकत्वं न तु तत्तद्धर्मावच्छिन्नवैशिष्ट्यावगाहिबुद्धित्वावच्छिन्नं प्रति तत्तद्धर्मावच्छिन्नप्रतियोगिताकाभावनिश्चयत्वेन समानप्रकारतया तथात्वं, तत्तद्व्यक्तिमात्रवृत्त्यनन्तधर्मान्तर्भावेनाऽनन्तहेतुत्वकल्पने गौरवात्, गृहे घटो नास्तीति बुद्ध्यनन्तरं गृहे द्रव्यमस्तीति प्रतीतेर्घटान्यद्रव्यवत्तावगाहित्वेऽप्युपपत्तेः। तथा च महानसीयवन्हौ लाघवप्रतिसन्धानादिवशात् ज्ञायमानवन्हित्वप्रकारेणापि महानसीयवन्हिविषयिण्येवानुमितिः कथं महानसीयवन्हेर्बाधनिश्चये स्यात् तादृशबाधस्यापि तद्विरोधित्वादित्युपाध्यायमतमाशङ्क्य निराचष्टे न चेति । संशयादिति । तथा च तत्तद्धर्मान्तर्भावेन प्रतिबन्धकतायां गौरवमपि प्रामाणिकत्वादास्थेयम्, अन्यथा तत्तद्रूपाभावस्य निश्चयसत्त्वात् रूपत्वेनापि तत्तद्रूपस्य संशयो न स्यादिति भावः । ननु उक्तसंशयानुरोधाद्वरं प्रत्यक्षं प्रत्येव समानप्रकारकत्वेन विरोधित्वमस्तु

यदि च साध्यत्वावच्छेदकसास्नात्वादिसामान्यावच्छिन्न-
प्रतियोगिताकाभाववति न गोत्वादिकमिति न व्यभि-

नुमितेश्च । न चाऽरूपमेन रूपत्वेन शङ्कितमारोपितं वा तद्विषयः,
तादृशशङ्काविरहेऽपि तयोरानुभविकत्वात् । दोषवशान्नेह श्वेतं

परोक्षबुद्धौ तूक्तसमानविषयकत्वेनैव तथात्वं स्यादत आह रूपवा-
नित्यनुमितेश्चेति । ननु तत्तद्रूपाभावस्य निश्चयेन प्रतिबन्धादुक्त-
संशयादौ रूपत्वेन तत्तद्रूपं न प्रकारः किं तु रूपभिन्नं वस्त्वन्तरमेव
तथेत्याशङ्क्य निषेधति न चेति । अरूपं रूपभिन्नं, रूपत्वेन शङ्कि-
तं रूपं न वेति शङ्कविषयीभूतं, तद्विषयः वायूरूपवान्नवेत्यादि-
धीविषय इत्यन्वयः । रूपवान्नवेत्यादिबुद्धे रूपत्वविशिष्टवैशिष्ट्या-
वगाहित्वेपि तत्र विशेषणतावच्छेदकीभूतरूपत्वादिप्रकारकनिश्चयो
न हेतुः। विशेषणांशे धर्मितावच्छेदकान्तरसत्त्वस्थल एव तादृशरूप-
निश्चयत्वेन हेतुत्वात्, किं तु विशेषणतावच्छेदकीभूतरूपत्वप्रकार-
कज्ञानमात्रं तथेति भावः । ननु रूपत्वविशिष्टवैशिष्ट्यावगाहिज्ञाने
रूपत्वप्रकारकनिश्चयत्वेनैव हेतुत्वं संशयसाधारणतत्प्रकारकज्ञान-
मात्रस्य तथात्वे तदप्रामाण्यनिश्चयाभावस्योत्तेजकत्वकल्पनागौरवा-
पत्तेरत आह आरोपितं वेति । तथा चाऽरूपमेव रूपत्वप्रकारेण नि-
श्चयविषयीभूतं सद्वायू रूपवान्नवेत्यादिप्रतीतिविषय इति विशेषण-
तावच्छेदकप्रकारकनिश्चयोपि नाऽसम्भवीति भावः । तादृशेति ।
रूपभिन्नधर्मिकरूपत्वप्रकारकसंशयारोपयोर्विरहेपीत्यर्थः । तयोः
वायुधर्मिकरूपवत्तासंशयानुमित्योः । ननु पृथिव्यादिरूपस्य
बाधनिर्णयदशायामतिरिक्तरूपसम्भावनयैव तादृशः संशयः
अतिरिक्तरूपसम्भावनाविरहविशिष्टस्यैव तदभावनिश्चयस्य वि-
रोधित्वादिति यदि ब्रूयात्तदाप्याह दोषवशादिति । यद्यपि
नेह श्वेतमित्येव वक्तुमुचितम् । न च श्वेतशब्दस्य गुणप-

चारः, तर्हि धूमेऽप्येवं व्यभिचाराभावात् साध्यतावच्छेदकेन प्रकारेणाऽप्रसिद्धमिव प्रसिद्धमपि साध्यं धूमगोत्वादिकं साधयेत् यदि बाधो न दोष इति वयम् ।

द्रव्यमिति भ्रमेऽपि इह पीतः शङ्ख इति प्रमयात्, घटपटौ न स्तः दण्डी चैत्रो नास्तीति ग्रहेऽपि घटोऽस्ति चैत्रोऽस्तीत्यवगमात् ।

रत्वभ्रमवारणाय द्रव्यपदम्, नपुंसकलिङ्गनिर्देशादेव तद्भ्रमव्युदासात् । अन्यथा श्वेत इति पुल्लिङ्गनिर्देशापत्तेः । गुणे शुक्लादयः पुंसीत्यनुशासनात्तथापि समवायेन श्वैत्यविशिष्टस्याऽभावभानार्थं द्रव्यपदम्, अन्यथा खरिकादिलिप्तस्य श्यामघटादेरपि परम्परया श्वेतत्वात्तद्भावनिर्णयेऽपि साक्षाच्छ्वेतस्य शङ्खादेर्विशिष्टज्ञाने बाधकाप्रसक्तिरित्यर्थः।ननु इह पीतः शङ्ख इत्यादिदर्शने नेह श्वेतं द्रव्यमिति ज्ञानं परोक्षविशिष्टबुद्धिस्थले समविषयत्वेन विरोधितया न बाधकमत आह घटपटाविति्यादि । ननूक्तनिश्चयस्य घटपटोभयत्वावच्छिन्नप्रतियोगिताकत्वेन पटाभावस्यैवावगाहित्वात्तदुत्तरं घटो नास्तीतिप्रत्यय बाधकाभावः प्राच्यैः प्रत्येकाभावस्यैव द्वित्वाद्यवच्छिन्नप्रतियोगिताकत्वोपगमादत आह दण्डी चैत्रो नास्तीति । न चात्र दण्डिचैत्रत्वावच्छिन्नप्रतियोगिताकत्वेन मैत्राद्यभाव एव भासत इति तदुत्तरं चैत्रोऽस्तीतिप्रत्यये बाधकाभाव इति वाच्यम् । तादृशभ्रमसामग्र्या अनावश्यकत्वात्। अन्यथा तत्तद्घटादिव्यक्तिविशिष्टबुद्धिं प्रति तत्तत्पटादिप्रतियोगिताकाभावनिश्चयत्वेन भिन्नविषयकज्ञानस्यापि विनिगमनाभावेन प्रतिबन्धकत्वापत्तेः । पटो नास्तीत्यादिनिश्चयस्य पटत्वावच्छिन्नप्रतियोगिताकत्वेन घटाद्यभावभ्रमत्वस्वीकारेणैव तदुत्तरं घटोस्तीतिबुद्धेः सम्भवित्वात्, घटो नास्तीत्यादिनिश्चयस्य घटत्वावच्छिन्नप्रतियोगिताकत्वेन पटाद्यभावभ्रमत्वस्वीकारेणैव तदुत्तरं घटोस्तीत्यादिबुद्धेरनुत्पादस्यापि सम्भवादिति

सल्लिङ्गपरामर्शादुद्बाधितविशेषभानप्रसङ्गश्च विशेषबाधावतारानवतारयोः समानः समानसमाधानश्च । अत्र वदन्ति । व्यापकतानवच्छेदकमपि रूपं लाघवज्ञानादिसहकारिवशादनुमितौ प्रकारीभवति, यथा जीवमरणान्यतरप्रतियोगी प्राणित्वादित्यत्र जीवनप्रतियोगित्वम् । अन्यथा जीवित्वे सति गृहासत्त्वस्य हेतोरसिद्ध्या बहिःसत्तानुमानायोगात् । एवं क्षित्यादिकर्तुरेकत्वमपि ।

भावः । ननु समानप्रकारकत्वेनैव विरोधित्वे महानसीयवन्हेर्बाधानश्चयदशायामपि सल्लिङ्गपरामर्शादपि पर्वते वन्हित्वप्रकारेण तादृशवन्हेर्भ्रमानुमितिः स्यादतस्तत्र प्रतिबन्दिमाह सल्लिङ्गेत्यादि । तत्त्वार्थं । विशेषेति । समानप्रकारकत्वेन विरोधित्वमते महानसीयवन्हेर्बाधदशायामिव समानविषयकत्वेन तथात्वेऽपि तादृशवन्हेर्बाधानवतारदशायामुक्तभ्रमानुमितिप्रसङ्गः समानित्यर्थः । यदि पर्वतो वन्हिमान् इत्यनुमितेर्वन्हित्वप्रकारेण महानसीयवन्हिप्रकारकत्वेऽपि न भ्रमत्वं वन्हित्वावच्छिन्नाभाववति वन्हित्वावच्छिन्नप्रकारकज्ञानस्यैव वन्हित्वावच्छिन्नभ्रमत्वादित्युच्यते, यदि वा तस्या अनुमितेः आत्मर्गिकप्रामाण्यरक्षायै वन्हित्वादिप्रकारेण महानसीयवन्ह्यादेर्भ्रमानुमितिं प्रति हेतुत्वेन विशिष्य दोषः कल्प्यते, तदा समानप्रकारकत्वेन विरोधितामतेऽप्येतत्सुवचमित्याशयेनाह समानसमाधानश्चेति । व्यापकतेति । व्यापकतावच्छेदकत्वेनाऽगृहीतमपीत्यर्थः । लाघवज्ञानादीत्यादिना तदितरबाधनिश्चयस्योपग्रहः । लाघवज्ञानस्य सहकारितास्थलमाह यथेति । व्यापकतानवच्छेदकीभूतस्य जीवनप्रतियोगित्वस्याप्रकारत्वे दोषमाह अन्यथेति । जीवित्वग्राहकप्रमाणान्तरस्य तदानीमसत्त्वादिति भावः । ननु जीवित्वानिर्णयेऽपि हेत्वन्तरेणैव बहिःसत्तानुमानं भविष्यतीत्यत आह एवमिति । क्षित्यादि कर्तृजन्यं कार्यत्वादित्यत्र क्षित्यादिकर्तुरेकत्वमपि लाघवज्ञानवशात्प्रकारीभवतीत्यर्थः । अत्रैकत्वं यद्यपि न संख्याविशेषः कर्तुनानात्वेऽपि तत्संभवात्, नापि क्षितिकर्तृनिष्ठभेदप्रतियोगितानवच्छेदकैकत्वं तथा, प्रकृतानुमितेः पू-

अन्यथा एकोऽनेको वा क्षित्यादिकर्त्तेति सन्देहप्रसङ्गात्। अनुमितेश्च तादृप्येण लघ्वर्थाविषयकत्वे तथाविधानुव्यवसायविरहात् सति लाघवप्रतिसन्धाने लघ्वर्थपरिच्छेदकत्वमनुमानस्येत्यपि न सिध्येत्। इत्थञ्च विशेषतो जायमानानुमितिं विरुणद्धि बाधः। प्रमितिबाधः

र्वं क्षितिकर्तुरप्रसिद्ध्या तदन्तर्भाव्य लाघवस्याऽसम्भवात्, किन्तु एकत्वमद्वितीयत्वं तच्च चेतनामिन्नासमवेतजीवतदितरावृत्तिद्वित्वस्यानधिकरणत्वं, तादृशं च द्वित्वं जीवद्वयपर्याप्तमेव सुलभम् । ईश्वरघटाद्योर्द्वित्वं न चेतनासमवेतं जीवेश्वरयोर्द्वित्वं च न जीवतदितरावृत्तीति तदधिकरणत्वेपीश्वरस्य न निरुक्तैकत्वबाधः । यत्तु कर्तृपर्याप्तद्वित्वजीवावृत्तिद्वित्वोभयशून्यनिष्ठैकत्वं जीववृत्तिद्वित्वस्य कर्तृमात्रपर्याप्तस्य सत्त्वे च अधिककर्तृद्वयापत्तिगौरवेण तादृशद्वित्वद्वयाभावस्यैव क्षित्यादिकर्तर्युपगमात् तादृशैकत्वं च घट एव प्रसिद्धमिति । तत्तुच्छम् । कर्तृपर्याप्तस्य जीवेश्वरयोर्द्वित्वस्य जीववृत्तेश्च घटेश्वरयोर्द्वित्वस्याधिकरणत्वेनेश्वरस्य निरुक्तद्वित्वद्वयशून्यत्वबाधात् । (एकत्वमद्वितीयत्वं तच्च निरुक्तद्वित्वद्वयशून्यत्वमिति परमार्थः ।) यदपि कर्तृपर्याप्तत्वजीवावृत्तित्वोभयशून्यत्वसमानाधिकरणद्वित्वसामान्यकैकत्वमेव क्षितिकर्तुरेकत्वमिति । तन्मन्दम् । स्वत्वस्यानुगतत्वेन घटैकत्वस्य स्वपदेनोपग्रहे क्षितिकर्तरि तस्य बाधादतिरिक्तस्य चेश्वरीयैकत्वस्य प्रकृतानुमितेः पूर्वमसिद्धत्वादिति ध्येयम् । अन्यथा लाघवबशादेकत्वस्याऽभाने । ननु प्रकारान्तरेण क्षितिकर्तुरेकत्वानिर्णयदशायां तत्रैकत्वसंशयो भवत्येवेत्यत आह अनुमितेश्चेति । तादृप्येणेति । यद्रूपविशिष्टे लाघवप्रतिसन्धानं तत्प्रकारेणेत्यर्थः । तथाविधेति । यद्रूपविशिष्टे लाघवं तदवच्छिन्नावगाहित्वेनानुमितेरनुव्यवसायविरहादित्यर्थः । न सिद्ध्येदिति । प्रमाणाभावेन व्यापकतावच्छेदकरूपेण लघ्वर्थविषयकानुमितित्वावच्छिन्नं प्रति लाघवज्ञानस्य सहकारित्वकल्पनाया अप्यभावादिति भावः । लाघवज्ञानस्थले बाधासङ्करमुपसंहरन्नाह इत्थं चेति । महानसीयवन्हौ लाघवप्रतिसन्धानबलाद्वह्निसामान्यपरामर्शोत्तरं तादृप्येण जायमानानुमितिं महानसीयवन्हिर्नास्तीति बाध-

पृथक्। सल्लिङ्गपरामर्शात् कथं भ्रान्तानुमितिर्जायतां न जायेत वा कथं यथार्थेति चेत्। बाधानवतारे बाधितार्थलाघवज्ञानादोषादेव। तथा सामान्यतोदृष्टात्तदितरप्रसिद्धाशेषविशेषबाधसहकृतात् शिष्यमाणप्रसिद्धप्रकारिकानुमितिर्जायते, यथा भोजनसाध्यकपीत्वादिवासन्ध्याभोजनबाधे रात्रिभोजनप्रकारिका। एवं द्रव्यवृत्तित्वसाध्यिका गुणत्वादिच्छायां दिगन्तद्रव्यवृत्तित्वबाधे प्रसिद्धमनोवृत्तित्वानुमितिर्जायमाना मनोवृत्तित्वाभावप्रमया बा-

---

प्रमा प्रतिबध्नाति अतो बाधः पृथग्दोष इत्यर्थः। न चैवं महानसीयवह्नेस्तदन्यवन्हेश्च बाधनिश्चये वन्हिसामान्यानुमितिः स्यात् वन्हिसामान्यस्य परामर्शसत्त्वादिति वाच्यम्। विशेषाभावद्वयस्य वन्हिसामान्याभावव्याप्यत्वाग्रहे इष्टत्वात्, अन्यथा तस्यैव तद्विरोधित्वादिति भावः। शङ्कते सल्लिङ्गेति। लाघवज्ञानादिसहकारिवशादित्यत्रोक्तादिपदोपगृहीतस्य इतरबाधस्य सहकारितास्थलमाह तथेति। चैत्रो भुङ्क्ते पीनत्वादित्यत्र रात्रीतरभोक्तृत्वस्य बाधनिर्णये रात्रौ भुङ्क्ते इत्यनुमितिर्जायत इत्यर्थः। इतरबाधस्थले बाधासङ्कुरं व्युत्पादयति एवमिति। पृथिव्यादिदिगन्तानां मनोभिन्नाचेतनत्वेनोपग्रहः, तथा च इच्छा द्रव्याश्रिता गुणत्वादित्यत्र मनोभिन्नाचेतनद्रव्यवृत्तित्वस्य बाधनिश्चयदशायां मनोरूपाचेतनद्रव्यवृत्तित्वप्रकारेण जायमानानुमितिर्मनोवृत्तित्वाभावप्रमया प्रतिबद्ध्यत इति मनोवृत्तित्वाभावरूपो विशेषबाधो दोष इत्यर्थः। अत्रेदमवधेयम्। महानसीयान्यवन्हेर्बाधनिश्चयो न महानसीयवन्हित्वावच्छिन्नविधेयताकानुमितौ हेतुः, शुद्धवन्हिपरामर्शाद्विशिष्टवन्हित्वावच्छिन्नविधेयताकानुमित्यसम्भवात् विशिष्टवन्हिपरामर्शोत्पन्नायां तादृशानुमितौ व्यभिचाराच्च, किन्तु महानसीयत्वनिष्ठप्रकारतानिरूपितशुद्धवन्हित्वावच्छिन्नविधेयताकानुमितिं प्रत्येव महानसीयान्यवन्ह्यभावनिश्चयत्वेन हेतुत्वं सर्वत्रैवेतरबाधस्थले विशेष्ये विशेषणमितिन्यायेनैवानुमितेः स्वीकार्यत्वात्। यद्यप्येवमपि वन्हेर्महानसीयत्वेनाग्रहवमित्येवं प्रतिसन्धानजन्यायां वन्हिसामान्यपरामर्शोत्तरं ताद-

शानुमितौ व्यभिचारः, तथाप्यव्यवहितोत्तरत्वसम्बन्धेन तादृशबाधनिश्चयविशिष्टत्वेनापि कार्यविशेषणान्न दोषः । अव्यवहितोत्तरत्वं च यथानुगतानतिप्रसक्तं तथोक्तमनुमितिग्रन्थेऽस्माभिः । न चैवं तादृशबाधनिश्चयविशिष्टत्वमेव कार्यतावच्छेदकमस्तु महानसीयत्वनिष्ठप्रकारतानिरूपितवन्हित्वावच्छिन्नविधेयताकत्वप्रवेशो व्यर्थ इति वाच्यम् । भ्रमत्वेनाऽगृह्यमाणस्यैव तादृशबाधनिश्चयस्य हेतुतया यत्र महानसीयान्यवन्हिमान् पर्वतो न द्रव्यमित्येवं ज्ञानदशायां पर्वतत्वावच्छेदेन वन्हिव्याप्यवत्त्वस्य द्रव्यत्वव्याप्यवत्त्वस्य महानसीयान्यवन्हेर्बाधस्य च समूहालम्बननिर्णय एव तादृशबाधांशे भ्रमत्वज्ञानात्मकस्तम तदव्यवहितोत्तरोत्पन्नायां महानसीयवन्हिमत्पर्वतो द्रव्यं पर्वतश्च वन्हिमानित्येवं समूहालम्बनानुमितौ व्यभिचारवारणार्थं तन्निवेशस्यावश्यकत्वात्, अन्यथा तत्रापि पर्वतो महानसीयवन्हिमान् इत्यनुमितिप्रसङ्गात् । न चैं गृहीताप्रामाण्यकस्य महानसीयान्यवन्हिर्नास्तीति बाधनिश्चयस्योत्तरं महानसीयवन्हिभिन्नवन्हिर्नास्तीति बाधनिश्चयादपि महानसीयवन्हिमानित्यनुमित्युत्पत्त्या व्यभिचारः तदप्रामाण्यज्ञानव्यक्तेरनुत्तेजकत्वे द्वितीयक्षण एव तादृशानुमित्यापत्तेरिति वाच्यम् । महानसीयवन्हिभिन्नवन्हिर्नास्तीति बाधनिश्चयस्य महानसीयवन्ह्यात्मकवन्हिमानित्याकारकानुमितिं प्रत्येव हेतुतया महानसीयवन्हिमानित्यनुमितेरेव तत्रानुत्पादात् । यदघटितसामान्यस्य बाधनिर्णयस्तदघटितसामान्यप्रकारकानुमितिं प्रत्येव तादृशबाधनिश्चयस्य हेतुत्वात् । न च यत्राऽप्रामाण्यज्ञानास्कन्दितस्य महानसीयान्यवन्ह्यभावनिश्चयस्योत्तरं महानसीयवन्हित्वावच्छिन्नपरामर्शात्तादृशवन्हित्वावच्छिन्नविधेयताकानुमितिः सापि महानसीयत्वनिष्ठप्रकारतानिरूपितवन्हित्वावच्छिन्नप्रकारताकैव, तादृशप्रकारताकबुद्धित्वत्वेनैव महानसीयवन्हित्वावच्छिन्नव्याप्यवत्तापरामर्शजन्यत्वात् तादृशवन्हित्वावच्छिन्नाभावनिश्चयप्रतिबध्यत्वाच्च, तथा च तत्रैवाऽगृहीताप्रामाण्यकस्य महानसीयान्यवन्ह्यभावनिश्चयस्य हेतुतायां व्यभिचार इति वाच्यम् । तत्रत्यानुमितेर्महानसीयत्वनिष्ठप्रकारतानिरूपितवन्हित्वावच्छिन्नप्रकारताकत्वेऽपि महानसीयत्वनिष्ठप्रकारतानिरूपितशुद्धवन्हित्वावच्छिन्नविधेयताकत्वाभावादेव व्यभिचारासम्भ-

साध्याभाववन्मात्रसहचारो न व्यभिचारः साध्यप्रागभाव-ध्वंसवद्वृत्तित्वेन व्यभिचारितया पृथिवीत्वादिना गन्धादेः

वात् विशिष्टवन्हित्वस्यैव तत्र विधेयतावच्छेदकत्वादिति ध्येयम। एवं महानसीयो वन्हिर्नास्तीत्यादिबाधनिश्चयो महानसीयान्यत्वनिष्ठ-प्रकारतानिरूपितशुद्धवन्हित्वावच्छिन्नविधेयताकायां महानसीयान्यवन्हिमानित्यनुमितौ हेतुः। एवं महानसीयान्यारुणवन्हिर्नास्तीत्याकारकनिश्चयो महानसीयत्वारुणत्वोभयप्रकारतानिरूपितवन्हित्वावच्छिन्नविधेयताकायामेव महानसीयारुणवन्हिमानित्यनुमितौ हेतुर्न तु महानसीयत्वविशिष्टारुणत्वनिष्ठप्रकारतानिरूपितवन्हित्वावच्छिन्नविधेयताकानुमितिं प्रत्येव स हेतुः, महानसीयो योऽरुणस्तदन्यवन्हिर्नास्तीत्येवं बाधनिश्चयादेव तादृशानुमित्युत्पादेन व्यभिचारात् एकत्र द्वयमित्येकविधाविषयतायां अप्युक्तस्थलमेवोदाहरणं यत्रैकस्यां प्रकारतायां प्रकारताद्वयनिरूपकत्वं तत्रैव तत्स्वीकारात्। इच्छा द्रव्याश्रिता गुणत्वादित्यादौ तु पृथिव्याद्यभिन्नद्रव्यवृत्तित्वाभावनिश्चय एव पृथिव्याद्यन्यद्रव्यवृत्तित्वप्रकारकानुमितौ हेतुर्न तु पृथिव्यादिवृत्तित्वाभावप्रकारकनिर्णयसमुदायः, सामान्यघटितविशेषबाधस्यैव तथात्वात्, अन्यथा गुणवृत्तित्वाभावनिर्णयदशायामपीच्छा गुणान्यद्रव्यवृत्तिरित्यनुमित्यापत्तेः। न च गुणवृत्तित्वं न द्रव्यवृत्तित्वस्य विशेष इति न तद्बाधनिश्चयेप्युक्तानुमितिरिति वाच्यम। सामान्यविशेषभावस्याऽकिञ्चित्करत्वात। अन्यथा वन्हिमान् धूमादित्यादौ नीलान्यवन्ह्यभावप्रकारकनिश्चयाश्रीलवन्हिमानित्यनुमितेरनुत्पत्तिप्रसङ्गात् नीलस्य वन्हिविशेषत्वाभावात्, एवं शुद्धपर्वते वन्हेः परामर्शादपि काञ्चनमयान्यपर्वतो न वन्हिमानित्येवं बाधवशात् काञ्चनमयपर्वतो वन्हिमानित्यनुमितिर्जायमाना पर्वतः काञ्चनमयो नेत्यादिप्रमया बाध्यत इति तत्र तादृशप्रमाविषयीभूतः काञ्चनमयत्वाभावविशिष्टपर्वतादिर्बाध एव न पुनरसिद्धिः, कारणीभूतपरामर्शविरोधित्वादित्येवमादिकं बहुतरं स्वयमूहनीयमिति सङ्क्षेपः।कपिसंयोगी एतत्त्वादित्यादिसद्धेतोर्व्यभिचारित्वापातादाह किन्तुसाध्येत्या-

द्रव्यत्वादिना गुणस्याऽनुमानभङ्गप्रसङ्गात्, किन्तु साध्यात्यन्ताभाववद्गामित्वम्, एवञ्च स्वप्रागभावप्रध्वंसावच्छिन्नतदाश्रये तत्प्रतियोगिसाधने पक्षे व्यभिचारो नेति बाधो दूषणम् । अथाऽवच्छेद्ये सिद्धसाधनम्, अवच्छेदके हेत्वसिद्धिः, विशिष्टञ्च नान्यदिति चेत्, तर्हि प्रागभावप्रध्वंसप्रतियोगिनोरेकवृत्तित्वेनैकसमयतापि स्यात्। अथ यत्समयावच्छेदेन तत्र प्रागभावः प्रध्वंसो वा न

ध्यत इति विशेषबाधो दोषः । किन्तुसाध्येत्यादिकमापाततः । वस्तुतस्तु प्रतियोग्यसमानाधिकरणसम्बन्धविशेषावच्छिन्नप्रतियोगिताकसाध्याभाववद्गामित्वं व्यभिचारः । स्वप्रागभावेत्यादिकं स्पष्टत्वेनोक्तम् । तत्र तदानीं तदत्यन्ताभावस्यापि व्युत्पादितत्वात् । अत एवोत्पत्तिकालावच्छिन्ने घटे पृथिवीत्वादिना रूपादि-

---

दिकमिति । सम्बन्धविशेषेति।साध्यतावच्छेदकसम्बन्धावच्छिन्नेत्यर्थः । वृत्त्यनियामकसम्बन्धस्य प्रतियोगितावच्छेदकत्वमतेनेदम् । तेन चैत्रो गोमान् द्रव्यत्वादित्यादौ स्वामित्वसम्बन्धेन साध्यतायां व्यभिचारिणि नाव्याप्तिः । स्पष्टत्वेनेति । तद्गन्धप्रागभावकालावच्छिन्नो घटः तद्गन्धवान् तद्घटत्वादित्यादौ तत्तत्कालावच्छिन्नतत्तद्गन्धादिमत्ताबुद्धौ तत्तत्कालावच्छिन्नतत्तद्गन्धप्रागभावनिश्चयस्य विरोधित्वात्तद्विषयस्य, तत्तत्कालावच्छिन्नतत्तद्गन्धप्रागभावादेर्बाधत्वस्य स्पष्टत्वेन सर्वसम्मतत्वेनेत्यर्थः। स्वमते तत्तत्कालावच्छेदेन तत्तद्गन्धात्यन्ताभावस्यापि तत्र बाधत्वं सम्भवतीत्याह तत्रेति । प्रतियोग्याश्रयेपि धर्मिणि तत्प्रागभावकालावच्छेदेन तदत्यन्ताभावस्य व्याप्तिवादे व्युत्पादितत्वादित्यर्थः।अत एवेति तत्प्रागभावकालावच्छे-

तत्समयावच्छेदेन प्रतियोगीति चेत्, तर्हि तदवच्छेदेन प्रतियोगिसाधने न सिद्धसाधनं किन्तु बाध एव । अन्यथा भावात्यन्ताभावयोरप्यव्याप्यवृत्तित्वभङ्गः, एकवृत्तित्वात् । अवच्छेदकभेदेन वृत्तिरिहापि तुल्या, तत्र देशभेदोऽवच्छेदकोऽत्र तु समयभेद इति । असिद्धेरपि बाध एवोपजीव्यः । न चैवमुपजीव्यत्वाद्बाधवत् सिद्धसाधनमपि पृथक्, उपजीव्यत्वेऽपि स्वतोऽदूषकत्वात् । न हि साध्यज्ञानं तद्बुद्धिविरोधि, धारावाहिकज्ञानोदयात् । नाप्यनुमितिविरोधि, अनुमित्सया प्र-

---

साधने बाधो निराबाधं पदमादधाति । एवं साध्यवत्तानवच्छेदकदेशावच्छिन्नस्य पक्षत्वेऽपि बाधो बोध्यः ।

देन तद्वत्त्वापि तदत्यन्ताभावस्य सत्त्वादेवेत्यर्थः । निराबाधमिति । तत्तत्कालावच्छिन्नघटधर्मिकरूपत्वावच्छिन्नवत्तावुद्धौ तत्तत्कालावच्छिन्नघटधर्मिकरूपत्वावच्छिन्नात्यन्ताभावनिश्चयस्य विरोधित्वात्तद्विषयस्यैव तत्र बाधत्वात्, अन्यथा श्यामतादशायां घट एव रूपप्रागभाववत्तानिश्चयेपि तत्कालावच्छिन्नरूपवत्ताज्ञानोदयेन साध्यतावच्छेदकीभूतरूपत्वावच्छिन्नवत्तावुद्धिं प्रति रूपप्रागभाववत्तानिश्चयस्याऽविरोधित्वेन तद्विषयस्य बाधत्वायोगात् प्रागभावस्य रूपत्वाद्यवच्छिन्नप्रतियोगिताकत्वे मानाभावात्, तत्तत्कालावच्छिन्नतत्तद्व्यक्तित्वावच्छिन्नप्रकारताकबुद्धि प्रत्येव तत्तत्कालावच्छिन्नतत्तद्व्यक्तिप्रागभाववत्तानिश्चयत्वेन प्रतिबन्धकत्वादिति भावः । शिखरावच्छिन्नः पर्वतो वह्निमानित्यादावप्यसङ्कीर्णबाधस्य सम्भवात् मूलस्य न्यूनतामपाकुर्वन्नाह एवमिति ।

त्यक्षसिद्धेऽप्यनुमानदर्शनात् । तदुक्तं प्रत्यक्षदृष्टमप्यनुमानेन बुभुत्सन्ते तर्करसिका इति । श्रवणानन्तरं मननदर्शनाच्च । तस्मात् सिद्धिमात्रार्थिनः सिद्धौ न तदिच्छा, सिद्धिविशेषार्थिनः साऽस्तीति तस्यानुमितिरेव। एवञ्च सिषाधयिषितपक्षविघटनद्वारा सिद्धसाधनं दूषणं न स्वतः । नन्वभावधीरपि न भावधीप्रतिबन्धिका, नेदं

अथ पक्षतावच्छेदकावच्छेदेन साध्यसिद्धौ तदवच्छेदेन हेतुमत्ताज्ञानं प्रयोजकम्, अन्यथा गृहीतभागासिद्धेर्घटत्वादेरपि पृथिवीत्वाद्यवच्छेदेन रूपादिसिद्धिप्रसङ्गात्, न च शिखराद्यवच्छेदेन धूमादिमत्त्वमिति चेन्न । अवच्छेदकत्वयोर्वस्तुनोर्भेदात् श-

---

घटत्वादेरिति पञ्चमी । प्रसङ्गादिति । न च पक्षतावच्छेदकधर्मावच्छेदेनानुमितौ तादृशधर्मविशिष्टधार्मिकबाधनिश्चयाद्यभाव एव नियामक इति तत्सत्त्वे भागासिद्धहेतुनापि तादृशानुमितिरिष्टैवेति वाच्यम् । अनुभवविरोधात्, संयोगमात्रेण वन्ह्यादौ धूमव्यापकत्वावगाहिनः पर्वतत्वावच्छेदेन धूमवत्तापरामर्शात् पर्वतत्वावच्छेद्यसंयोगेनैव पाषाणमयत्वाद्यवच्छिन्नसंयोगेनापि पर्वते वन्ह्याद्यनुमितिप्रसङ्गाच्च । तादृशसम्बन्धेन बाधनिश्चयाद्यभावस्य तत्र सत्त्वात् तादृशसंयोगेन व्यापकत्वाग्रहादेव तत्सम्बन्धेनानुमित्यनुत्पादे पर्वतत्वाद्यवच्छेद्यसंयोगेनाप्यनुमित्यनापत्तेः तादृशसम्बन्धेनापि व्यापकत्वाग्रहस्याऽविशिष्टत्वादिति भावः । न च शिखरेति । तथा च कारणबाधादेव शिखराद्यवच्छेदेन वन्ह्याद्यनुमितेरसम्भवात्तत्र बाधस्य विरोधित्वे मानाभाव इति भावः। अवच्छेदकत्वयोरिति । यत्र पक्षतावच्छेदकपृथिवीत्वादेर्व्यापकत्वरूपमवच्छेद्यत्वं साध्येऽनुमितिरवगाहते तत्रैव तदवच्छेदेन हे-

रजतमिति भ्रमानन्तरं रजतनिश्चयात्। न चाऽभावप्रमा तथा, अपीतः शङ्ख इति प्रमापयत एव पीतोऽयमिति भ्रमदर्शनादिति चेन्न। विरोधिज्ञानं हि प्रतिबन्धकं प्रत्यक्षभ्रमस्य च प्रत्यक्षप्रमा विरोधिनी सा च शङ्खादौ नास्त्येव, अनुमितौ त्वभावप्रमामात्रमेव विरोधीति कथमभावप्रमायां भावानुमितिरिति।

न्दसामान्यस्याऽकिञ्चित्करत्वात्। अवच्छिन्नावृत्तेरपि च हेतोस्तत्त्वेन गृहीताज्जायमानामनुमितिं विरुणद्धि बाधप्रमा, सङ्करेऽपि वस्तुनोर्ज्ञानासङ्करात्। सुखाद्यनवच्छेदकशरीराद्यवच्छिन्नात्मादौ सुखादेर्साध्यकदुःखादेर्वर्त्तमानत्वात् कपिसंयोगाद्यनवच्छेदकमू-

---

तुमत्तानिश्चयः कारणं शिखरावच्छिन्नः पर्वतो वन्हिमानित्याद्यनुमितौ तु स्वरूपसम्बन्धविशेषात्मकमेव शिखरावच्छिन्नत्वं साध्यस्य भासत इति पक्षतावच्छेदकीभूतशिखरावच्छेदेन हेतुमत्त्वज्ञानं न तत्र प्रयोजकमिति भावः। पृथिवीत्वाद्यवच्छेदेन रूपवत्त्वाद्यनुमितावपि स्वरूपसम्बन्धविशेषात्मकमेवावच्छेदकत्वं भासते न तु व्यापकत्वमिति यदि ब्रूयात्तदाप्याह तदवच्छिन्नावृत्तेरपीति। पक्षतावच्छेदकीभूतशिखराद्यवच्छिन्नावृत्तेरपीत्यर्थः। तत्त्वेन तादृशशिखराद्यवच्छिन्नवृत्तिकत्वेन। ननु तथापि स्वरूपासिद्धिसाङ्कर्यमेवेत्यत आह सङ्करेऽपीति। स्वरूपासिद्धिबाधात्मकयोर्वस्तुनोः सङ्करेऽपीत्यर्थः। ननु ज्ञानासाङ्कर्येण भेदे ह्रदो वन्हिमान् धूमादित्यादावेव बाधस्य सौलभ्यादुत्कण्ठलानुधावनं विफलमतो वस्त्वसाङ्कर्यमप्याह सुखादीति। तथा च यत्र खण्डशरीरे सुखं नोत्पन्नं किं तु दुःखं तच्छरीरावच्छिन्नात्मा सुखी दुःखादित्यादौ पक्षतावच्छेदकीभूतशरीरावच्छेदेन हेतुसत्त्वान्न स्वरूपासिद्धिः किन्तु तदवच्छेदेन साध्यासत्त्वाद्बा-

स॰चायं दशविधः । धर्मिग्राहकमानबाधितं घटो द्रव्यापकः सत्त्वादिति प्रत्यक्षेण, परमाणवः सावयवा मूर्त्तत्वादित्यनुमानेन, मेरुः पाषाणमयः पर्वतत्वादिति सुवर्णमयत्वबोधकागमेन, साध्यप्रतियोगिग्राहकबाधितं वन्हिरनुष्णः कृतकत्वादिति प्रत्यक्षेण, शब्दोऽश्रावणो गुणत्वादित्यनुमानेन, गवयत्वं गवयपदाप्रवृत्तिनिमित्तं जातित्वादित्युपमानेन, साध्यग्राहकबाधितं नरशिरःकपालं शुचि प्राण्यङ्गत्वादित्यत्रागमेन, हेतुग्राहकबाधितं जलानिलावुष्णौ पृथिवीतो विपरीतस्पर्शत्वात् तेजोवदि-

---

लाद्यवच्छिन्ने कपिसंयोगादिसाध्यकवृक्षविशेषत्वादेर्वर्त्तमानत्वाच्च। अत्र चैतत्कालावच्छिन्नः पर्वतो वन्हिमानिति शब्दादिवदेतत्का-

---

ध एव दोषः साधनस्य साध्यव्याप्यतया तद्व्यभिचारस्य शङ्कितुमप्यशक्यत्वादिति भावः । अवान्तरभेदेन बाधस्य त्रैविध्यादाह कपीति। वृक्षविशेषत्वादेरिति । संयोगादिविशिष्टतद्वृक्षत्वादेरित्यर्थः। तद्वृक्षत्वमात्रस्य मूलावच्छिन्नवृत्तिकत्वाभावेन स्वरूपासिद्धत्वादिति ध्येयम् । ननु यदि क्वचिदपि पक्षतावच्छेदकीभूतदेशकालाद्यवच्छेदेन साध्यस्यानुमितिः प्रसिद्धा स्यात्तदा तुल्यन्यायेन उत्पत्तिकालावच्छिन्नो घटो गन्धवानित्यनुमितेरपि तादृशोत्पत्तिकालावच्छिन्नगन्धवत्त्वावगाहित्वसम्भवात् तद्विरोधित्वेनैव तादृशकालावच्छिन्नगन्धाद्यभावो बाधः पृथग्दोषः स्यात्, न त्वेवं, सर्वत्रैवानुमितौ पक्षतावच्छेदकोपलक्षिते धर्मिण्येव साध्यस्य भानादत आह अत्र चेति । एतत्कालावच्छेदेन वन्हिमत्तेति । अत्र एतत्कालावच्छिन्नत्वं प्रकारीभूतवन्हौ भासत इति प्राञ्चः । तत्कालावच्छेद्य-

ति प्रत्यक्षेण, मनो विभु ज्ञानसमवाय्याधारत्वादित्यनुमानेन, राजसूयं ब्राह्मणकर्त्तव्यं स्वर्गसाधनत्वादग्निष्टोमवादिति राजसूयकर्त्तव्यताबोधकागमेनेति ॥

लावच्छिन्नपर्वतपक्षकधूमादेरप्येतत्कालावच्छेदेन वन्हिमत्ताबुद्धिरनुभवसिद्धा नाऽपन्हवमर्हतीत्यभिप्रायः ॥

इति श्रीमहामहोपाध्यायरघुनाथशिरोमणिविरचितायां
तत्त्वचिन्तामणिदीधितावनुमानखण्डे
बाधान्तग्रन्थः समाप्तः ।

स्वविशिष्टसंयोगसम्बन्धेन वन्हिः पक्षे भासत इति नव्याः । अभिप्रायो मणिकारस्य ॥

इति श्रीजगदीशतर्कालङ्कारकृतायामनुमानतत्त्वचिन्तामणिदीधितिव्याख्यायां बाधग्रन्थः समाप्तः ।

अनुमानखण्डो बाधान्तः समाप्तः ।

चिन्तामणेः हेत्वाभासानामसाधकतासाधकत्वग्रन्थः ।

* अथ हेत्वाभासानामसाधकतासाधकत्वेन सदुत्तरत्वं जात्यादीनाञ्चाऽसाधकतासाधारण्येन परासाधकतासाधकतया स्वव्याघातकत्वादसदुत्तरत्वम् । अथ विरुद्धत्वादिज्ञानादेव स्वानुमितेरिव परानुमितेरपि प्रतिबन्धे किमसाधकतानुमानेन, यद्वचसि वाद्युक्तदूषणावगमः स निगृहीत इति समयबन्धेन कथाप्रवृत्तौ दूषणमात्रमुद्भाव्यमन्यथाऽर्थान्तरत्वादिति चेन्न । द्वयं ह्युद्देश्यं परानुमितिप्रतिबन्धः, स्थापनाया असाधकतासाधनत्वञ्च । तत्राद्यं दूषणमात्रज्ञानादेव, द्वितीयन्तु अलिङ्गत्वज्ञापनात् । प्रतिबन्धकत्ववदनेनापि रूपेण दूषकत्वसम्भव इत्यभिप्रायेण वा असाधकतासाधनमानन्त्यं पञ्चावयवप्रयोगापेक्षा स्यात्, अन्यथा न्यूनतापत्तिरिति चेन्नादूषणस्याऽसाधकताव्याप्यत्वमङ्गीकृत्य कथेति पक्षधर्मतायाएवोद्भाव्यत्वात्, अन्यथा अधिकतापत्तेः । नन्वेवं कृतकत्वेनाऽनित्यत्वानुमाने व्याप्तिर्नाभिधेया उभयसिद्धत्वा-

---

* हेत्वाभासानामसाधकतासाधकत्वव्यवस्थापनपरस्य एतन्मूलग्रन्थस्य दीधितिकृताऽव्याख्यानेन जागदीश्यपि नोपलभ्यते । मथुरानाथकृता रहस्याख्यव्याख्यापि नैव लभ्यते। केवलं जयदेवमिश्रविरचित आलोक एव । स च कलिकातासोसायटीमुद्रिते माथुरीसहितचिन्तामणिपुस्तके मध्ये निवेशित इत्यत्र मूलमेव सन्निवेशितमित्यलम् ।

दिति चेन्न । कथायां समयाविषयतया दूषणे त्वसाधकताव्याप्त्युपस्थितेरावश्यकत्वात् । अन्यथा कथकत्वविरोधात् । न त्वेवं कृतकत्वेनानुमाने, तद्व्याप्तिमनङ्गीकृत्यापि कथासम्भवात् । यस्तु कथारम्भे बाधस्याऽसाधकत्वव्याप्तिं नाङ्गीकरोति तं प्रति तद्दूषकत्वं प्रसाध्य पञ्चावयवप्रयोगः कर्त्तव्य एव । यत्तु दूषणे पक्षधर्मतामात्रमुद्भाव्यं तत्र, यत्र वादिनोस्तथा समयः, अन्यत्र तु पञ्चावयवप्रयोग एवेति । तन्न । कथासम्प्रदायविरोधात् । अथाऽसाधकत्वं न पक्षे साध्यप्रत्ययाजनकत्वं, तेनापि तत्त्वेनाज्ञानदशायां पक्षे साध्यभ्रमजननात् कदाचिदजनकत्वं सद्धेतावपि । नन्वेतत्काले साध्यविशिष्टपक्षज्ञानाजनकत्वं तत्, न हि दूषणत्वज्ञानदशायां पक्षे भ्रमरूपाप्यनुमितिः । साध्यविशिष्टपक्षज्ञानञ्च हेतुत्वेन ज्ञानदशायां प्रसिद्धमिति चेन्न । सद्धेतावसत्प्रतिपक्षतादशायामपि पूर्वकाले साध्यविशिष्टपक्षज्ञानाजनकत्वमस्तीत्यसाधकताप्रसङ्गात् । अथ पक्षे साध्यभ्रमजनकत्वं तत्, बाधविरुद्धयोरपि तत्त्वाज्ञानदशायां भ्रमजनकत्वादिति चेन्न । सद्धेतौ सत्प्रतिपक्षेऽसाधारणे च तत्त्वेन ज्ञानदशायां साध्यभ्रमजनकत्वात् अज्ञाने साध्यभ्रमाजनकत्वात् । नापि व्याप्तिपक्षधर्मतान्यतरराहित्यम्, सत्प्र-

तिपक्षासाधारणसद्धेतोरभावात् दशाविशेषे तस्य दोषत्वात् साध्याप्रसिद्धौ प्रकृतसाध्यव्याप्त्यप्रसिद्धेश्च । नाप्यनैकान्तिकाद्यन्यतमत्वम्, यत्किञ्चिदनैकान्तिकत्वस्यातिव्याप्तेः प्रकृतसाध्यानैकान्तिकत्वस्याप्रसिद्धत्वेन केवलान्वयिसाधनेऽप्रसिद्धेः अंशतः सिद्धसाधनात् साध्याविशेषाच्च । यत्तु एतत्कालीनैतत्पक्षीयत्वावच्छिन्नप्रतियोगिकैतत्साध्यप्रमाकरणत्वाभावः, तत्तत्कालतत्तत्पक्षविषयसाध्यत्वाभिमतानित्यत्वादिप्रमाजनकत्वाभावो वाऽसाधकत्वम् । न च प्रतियोग्यप्रसिद्धिः, एतत्कालीनैतत्पक्षीयत्वतत्तत्कालतत्तत्पक्षविषयत्वयोर्व्यधिकरणयोरेव प्रतियोगितावच्छेदकत्वादिति । तन्न । सद्धेतोः सत्प्रतिपक्षत्वाज्ञानदशायामपि तादृशप्रमायामकरणभावेनाऽसाधकतापत्तेः । नापि तृतीयलिङ्गपरामर्शस्याऽप्रमात्वं तत्, विरुद्धादौ परामर्शाभावात् सद्धेतौ सत्प्रतिपक्षेऽसाधारणे च तत्प्रमात्वाच्च । नाप्यनुमितिहेतुभूताभावप्रतियोगिज्ञानविषयत्वम् तत्, सद्धेतावपि कदाचित् व्यभिचारित्वसत्प्रतिपक्षत्वज्ञानस्यानुमितिप्रतिबन्धकत्वात् । अथानुमितिप्रतिबन्धकप्रमाविषयत्वमसाधकत्वं, सद्धेतौ व्यभिचारादिभ्रमः प्रतिबन्धकः, अनुमितिप्रतिबन्धकत्वञ्च व्यभिचारादिप्रमायास्तृतीयलिङ्गपरामर्शविघटन-

द्वारा तुल्यबलतया विषयतया वेति चेन्न । सत्प्रतिपक्षयोर्विरुद्धयोर्वास्तवतुल्यबलत्वाभावेन तद्भ्रमस्य प्रतिबन्धकत्वात् । न च तुल्यबलतया ज्ञायमानेन बोधितसाध्यविपर्ययकत्वज्ञानं प्रतिबन्धकं तच्च प्रमैवेति वाच्यम् । तुल्यबलताज्ञानमेव हि प्रतिबन्धकं न तु ज्ञायमानत्वज्ञानं, गौरवादसिद्धेश्च । न च सत्प्रतिपक्षेऽन्यतराङ्गवैकल्यप्रमैव प्रतिबन्धिकेति वाच्यम् । अन्यतरत्वं तदतदवृत्ति, न च तदतदवृत्तिसामानाधिकरण्येन ज्ञायमानस्य दोषत्वं, धर्ममात्रस्य व्यभिचारज्ञानादनुमित्युच्छेदापत्तेः । अन्यतराङ्गवैकल्यज्ञानोपजीव्यस्य तुल्यबलत्वज्ञानस्यैव प्रतिबन्धकत्वाच्च, अन्यथा व्याप्यत्वासिद्ध्यन्तर्भावापत्तेः । अथानैकान्तिकादिज्ञानस्य तत्तदनुमितिप्रतिबन्धकत्वमसाधकत्वं, तथा हीदमनैकान्तिकादिज्ञानमेतत्साध्यवत्तया एतत्पुरुषस्य एतत्कालीनैतत्पक्षकानुमितिप्रतिबन्धकम्, एतदनैकान्तिकज्ञानत्वात्, एतदन्यतज्ज्ञानवदिति चेन्न । एतत्साध्यवत्तयैतत्पक्षकानुमितेः कदाचिल्लिङ्गभ्रमात् प्रसिद्धावप्येतत्कालीनैतत्पुरुषस्य तादृशानुमित्यप्रसिद्धेः । नापि समीचीनसाध्यविशिष्टपक्षप्रत्ययाजनकत्वं, बाधविरुद्धासिद्धेषु साध्यानधिकरणे पक्षे सत्यसाध्यप्रतीत्यप्रसिद्धेः वन्हिमति बाष्पे धूमभ्र-

मात् वन्ह्यनुमितेः सत्यत्वाच्च । न चान्य एव वन्हिस्तत्र भासते, मानाभावात् तद्वह्नेः प्रत्यभिज्ञानात् एकव्यक्तिके तदसम्भवाच्च । न च साऽनुमितिर्लिङ्गविषयत्वेन भ्रमः, अनुमितौ लिङ्गभाने मानाभावात् । किञ्च भावोऽभावो वोभयथापि प्रमेयमिति सत्यानुमितौ भावत्वाभावत्ववति प्रमेयत्वज्ञाने एकत्र तयोरभावादसत्यानुमितिः स्यात् । न चान्यतरत्वं लिङ्गम्, तद्व्याप्तिमविदुषोऽप्यनुमितेर्व्यर्थविशेषणत्वाच्च । अथ साध्यव्याप्यत्वमेव तत्र तन्त्रं तत्र च बाधो नास्तीति चेत्, तर्हि कूटलिङ्गादनुमितौ वन्हिव्याप्यवत्त्वमेव तन्त्रं वन्हिव्याप्यञ्च किञ्चित्तत्रास्त्येव । अथ कूटलिङ्गे वन्हिव्याप्याभेदः प्रतीयते तथा च वह्नौ कूटलिङ्गव्यापकाभेदोऽपि, अन्यथा कूटस्यैव वन्हिव्याप्यत्वाप्रतीतेः, एवञ्च कूटलिङ्गव्यापको वन्हित्वेन भासत इति वन्ह्यनुमितिरसत्येति चेन्न । वन्हिव्याप्यालोके धूमारोपात् यत्रानुमितिस्तत्रासिद्धिभेदेऽसत्यत्वाभावापत्तेः आलोकव्यापके धूमव्यापकाभेदात् । अथ लिङ्गमनुमितिविषयो नियमतः पक्षधर्मताज्ञानविषयत्वात् व्याप्तिज्ञानविषयत्वात् नियमेनानुमितिहेतुविशेषणधीविषयत्वाच्च पर्वतत्ववत्साध्यवच्च । किञ्चैकविशेषणत्वेन ज्ञाते विशेषणान्तरधीसामग्री तत्रैव विशिष्टवैशिष्ट्यज्ञानमि-

नि धूमविशिष्ट एव वन्हिर्वैशिष्ट्यानुमितिरिति। नन्वनुमितौ व्यापकत्वभानेऽनुमित्यविच्छेदः। न च फलीभूतज्ञानन्यूनविषयस्यैव परामर्शस्यानुमितिहेतुत्वं, गौरवात्। विषयान्तरसञ्चारात् नानुमितिरित्यपि न, परामर्शस्य चरमकारणत्वात् प्रत्यक्षादिसामग्रीतो बलवत्त्वाच्चेति चेन्न। सिद्धसाधनेन विच्छेदात्। यद्यप्येवं लिङ्गज्ञानेऽप्रमात्वेऽपि साध्यप्रमात्वात् कथं तदसाधकं, तथाप्युक्तमसाधकत्वमस्त्येवेति चेत्, अस्तु तावदेवं, तथापि दैवात्तत्र धूमसत्त्वे कथं तदंशेऽप्यसत्त्यता। अत एव आर्द्रेन्धनप्रभवो वन्हिर्धूमव्यापको नान्यः। वन्हित्वेन व्यापकत्वादन्योऽपि तथा, तेन विनापि धूमसत्त्वात्। अत एव वाष्पे धूमभ्रमात् धूमव्यापको वन्हिर्भासते स च तत्र नास्त्येवेति न सानुमितिः सत्येति निरस्तं, दैवाद्धूमसत्त्वे सत्यत्वात्। उच्यते। स्वज्ञानदशायां पक्षे साध्यप्रत्ययाजनकत्वमसाधकत्वम्। तथा हि, विरुद्धत्वादिज्ञानदशावर्त्तीदं पक्षे साध्यप्रत्ययाजनकं विरुद्धादित्वात् पक्षविशेषणमहिम्ना तत्तद्दशायां पक्षे साध्यप्रत्ययाजनकत्वं सिद्ध्यति, बाधितेऽपि लिङ्गत्वभ्रमात् पक्षे साध्यप्रत्ययजनकत्वमिति न प्रतियोग्यप्रसिद्ध्या साध्याप्रसिद्धिः। यद्वा अनुमितिप्रतिबन्धकतावच्छेदकरूपवत्त्व-

मसाधकत्वम् । तथा हि, इदानीमिदमनुमितिप्रतिबन्धकतावच्छेदकरूपवदनैकान्तिकादित्वात् ज्ञानवत् । अनुमितिप्रतिबन्धकतावच्छेदकञ्च रूपं ज्ञाने विषयतयानैकान्तिकादित्वमेव । न च साध्याविशेषः, उपाधिविशेषस्यानुमेयत्वात्, तोयत्वेन पिपासोपशमनसमर्थतावच्छेदकरूपपरत्वानुमानवत् । अन्ये त्वनैकान्तिकबाधितविरुद्धेष्वव्याप्यत्वं व्याप्यत्वासिद्धेऽनैकान्तिकत्वं स्वरूपासिद्धसत्प्रतिपक्षासाधारणेषु दशाविशेषेऽनुमितिप्रतिबन्धकज्ञानविषयत्वमसाधकत्वम् । न चैवमनैकान्तिकोऽसाधक इति सहप्रयोगानुपपत्तिः, तत्राऽव्याप्यत्वस्याऽसाधकशब्दार्थत्वात् । असाधकताननुगमेऽपि च हेत्वाभासत्वमनुगतमेव, यस्य ज्ञानमनुमितिप्रतिबन्धकं तस्य हेत्वाभासत्वादिति ॥

इति श्रीमहामहोपाध्यायगङ्गेशोपाध्यायविरचिते तत्त्वचिन्तामणौ अनुमानखण्डे हेत्वाभासानामसाधकतासाधकत्वग्रन्थः समाप्तः ।

अनुमानखण्डो बाधान्तः समाप्तः ।

ॐश्रीः ।

अनुमानतत्त्वचिन्तामणौ

* ईश्वरानुमानम् ।

एवमनुमाने निरूपिते तस्माज्जगन्निर्मातृपुरुषविशेषसिद्धिः, क्षित्यादौ कार्यत्वेन घटवत् सकर्तृकत्वानुमानात् । ननु क्षित्यादि प्रत्येकं न पक्षः, तस्य स्वशब्देनाभिधातुमशक्यत्वात् । नापि मिलितम्, एकरूपाभावात् । अत एव सकर्तृकत्वासकर्तृकत्वविचारारम्भकसंशयविषयः तथाभूतविवादविषयो वा न पक्षः, एकरूपाभावेन तयोस्तावत्सुग्रहीतुमशक्यत्वाद्वादिनोर्निश्चितत्वेन संशयाभावात् । न च बाध्यनुमानयोस्तुल्यबलत्वेन मध्यस्थस्य संशयः, अनुमानाभ्यां तस्य संशयो मध्यस्थप्रज्ञानन्तरञ्चानुमानमित्यन्योन्याश्रयात् घटेऽपि कदाचित्तयोः सम्भवात् प्रत्येकं संशये विवादास्पदत्वेनानुमानेऽर्थान्तरतापत्तेश्च । न च शरीरापेक्षेण कर्त्रा यन्न कृतं शरीराजन्यं जन्यं वा पक्षः, जन्यात्मविशेषगुण-शब्द-फूत्कार-सर्गाद्यकालीनवेद--घटादि--लिप्यादिसम्प्रदायानामीश्वरमात्रकर्तृकाणामसंग्रहात् असिद्धेश्च, अदृष्टद्वारा शरीरिणोऽपि क्षित्यादिकर्तृत्वात् । नापि जन्यकृत्यजन्यं जन्यमुभयसिद्धकृतिजन्यान्यद्वा जन्यं पक्षः, क्षित्यादीनामदृष्टद्वारा जन्यकृतिजन्यत्वात् ।

---

* ईश्वरानुमानचिन्तामणेर्विस्तृतस्य कुत्र चिन्मध्ये स्थलविशेषमात्रे शिरोमणिना व्याख्यानादीधितेरल्पतया तदनुसारेण जागदीश्या अपि नैव विस्तृतिरीक्ष्यते-, अस्य मथुरानाथीयव्याख्यायाः अलभ्यतया आलोकस्यापि सम्पूर्णग्रन्थव्याख्यापरत्वादर्शनेन यथास्थितदीधितिजागदीशीभ्यां सहैव साधिवेशितोऽसौ मणिग्रन्थः ।

नाप्यदृष्टजनककृत्यंजन्यं जन्यकृतिसाक्षादजन्यं वा जन्यं पक्षः, ईश्वरकृतेरदृष्टजनकत्वेन क्षित्यादौ तदभावात् । घटादावप्येवं पक्षत्वेनांशतः सिद्धसाधनात् । न च क्षितिरेव पक्षः, अङ्कुरेण सन्दिग्धानैकान्तिकत्वात् । न च निश्चितविपक्षे हेतुसन्देहात्स इति वाच्यम् । हेतौ साध्याभाववद्वृत्तित्वसंशयस्य दूषकत्वात् । स च साध्याभाववति हेतुसन्देहाद्धेतुमति साध्याभावसन्देहाद्वा उभयथापि दोषः । न चैवं पक्षेऽपि तत् स्यात्, अनुमानमात्रोच्छेदकत्वेनेतरत्र तस्य दूषकत्वात् । अङ्कुरे हेतोरनिश्चये न सन्दिग्धानैकान्तिकम्, तन्निश्चये च साध्यसन्देहवति साध्यानुमितिरेव पक्षवत्सामग्रीसत्त्वात्, अत एवाङ्कुरः पक्षसम इति चेत्, न, तस्याऽपक्षत्वेन हेतोः पक्षधर्म्मताविरहेण स्थापनानुमानाविषयत्वात् । तदा तस्यापि पक्षत्वे प्रतिज्ञान्तरापत्तिः । अनुमानान्तराधीनतत्साध्यानुमित्यनन्तरञ्च पक्षेऽनुमितावितरेतराश्रयाच्चैकमप्यनुमानं स्यात् तत्रापि क्षित्यादौ सन्दिग्धानैकान्तात्, क्षितेर्विवादाविषयत्वे अङ्कुरे प्रथमं साध्यसाधनेऽर्थान्तराच्च । किञ्चैवमेकैकोपादानाभिज्ञसिद्धावपि नेश्वरसिद्धिः । नापि सर्गाद्यकालीनं द्व्यणुकं पक्षः, परम्प्रति सर्गाद्यसिद्धेः । किञ्च सकर्तृकत्वं न तावत्कृतिमत्सहभावः कृतिमज्जन्यत्वं वा, अस्मदादिना सिद्धसाधनात् । उपादानगोचरापरोक्षज्ञानचिकीर्षा—कृतिमज्जन्यत्वं तदिति चेत् । न । उपादानगोचरत्वं यदि यत्किञ्चिदुपादानगोचरत्वं तदा अस्मदादिनार्थान्तरत्वम्, ज्ञानादिजन्यत्वमपि विवक्षितम् । न च घटोपादानगोचरापरोक्षज्ञानादीनां क्षितिजनकत्वं सम्भवति, व्यभिचारादिति चेत् । न । क्षितिजनकादृष्टजनकज्ञानादीनामुपादानविषयत्वनियमेनादृष्टद्वारा तैरेव सिद्धसाधनात् । न च साक्षात्तज्जन्यत्वं विवक्षितम्, तद्धि न कृतिजन्याजन्यत्वे सति कृतिजन्यत्वम् स्वजनककृत्यव्यवहितोत्तरक्ष-

णवार्त्तित्वं वा, घटदृष्टान्तस्य साध्यविकलतापत्तेः घटादौ कुलालादिकर्त्तृकत्वाभावप्रसङ्गाच्च । न च शरीरक्रिया दृष्टान्तः इति वाच्यम् । घटेनाऽनैकान्तिकत्वात् चेष्टात्वस्योपाधित्वाच्च । नापि क्षित्याद्युपादानगोचरत्वं विवक्षितम्, अप्रसिद्धेः । न चोपादानशब्दस्य सम्बन्धिशब्दत्वेन घट–क्षित्यादिपदसमभिव्याहारे तत्तदुपादानबोधकत्वं चैत्रो मातृभक्तः मैत्रवदिति वाच्यम् । शाब्दे हि बोधे तथा । न चात्र शब्दः प्रमाणम्, वादिनोरनाप्तत्वात् । अनुमाने त्वनुगतेन व्यापकत्वग्रहे तेन रूपेण व्यापकसिद्धिः, तच्चोपादानत्वमेवेति कथं नार्थान्तरम् । किञ्चैवं घटादावपि तत्तदुपादानत्वेनैवोपस्थित्या सामान्येन रूपेण कुत्राप्यनुपस्थितेर्व्याप्तिरेव न गृह्येत । अपि च सामान्यलक्षणया ज्ञानलक्षणया योगजधर्म्मरूपया प्रत्यासत्त्या उपादानगोचरापरोक्षज्ञान–चिकीर्षा–कृतिमता अस्मदादिना सिद्धसाधनम्, तेषां क्षित्यव्यवहितपूर्वसमयासत्त्वेऽपि तद्वतः सत्त्वात् अदृष्टद्वारा तेषामपि जनकत्वसम्भवात् ज्ञानादिसाक्षाज्जन्यत्वस्य च निरस्तत्वात् ।

अथ योगजधर्म्माजन्य–सविकल्पकाजन्य–सामान्यलक्षणप्रत्यासत्त्यजन्य–जन्योपादानगोचरापरोक्षज्ञान–चिकीर्षा–कृतिमदजन्यं जन्यं पक्षः, योगजधर्म्माजन्य–सविकल्पकाजन्य–सामान्यलक्षणप्रत्यासत्त्यजन्योपादानगोचरज्ञान-चिकीर्षा-कृतिमज्जन्यमिति साध्यम् । यद्वा अनागतगोचरसाक्षात्कारजनकप्रत्यासत्त्यजन्यजन्यज्ञानादिमदजन्यं जन्यम् अनागतगोचरसाक्षात्कारजनकप्रत्यासत्त्यजन्योपादानगोचरापरोक्षज्ञानादिमज्जन्यमिति साध्यम्, ज्ञानाव्यवहितोत्तरसमयवर्त्तीच्छा–तदव्यवहितोत्तरसमयवर्तिकृतीनां जनकत्वं विवक्षितं न तु ज्ञानादीनां यौगपद्यं पौर्वापर्य्यं वा अतो न साध्याप्रसिद्धिर्न वा क्षित्यादौ बाध इति । मैवम् । योगजधर्म्मसामान्यज्ञानरूपप्र-

त्यासत्तीनामनागतगोचरसाक्षात्कारस्य तज्जनकप्रत्यासत्तीनाञ्च परस्याप्रसिद्धतया तदजन्यस्य साक्षात्कारस्याप्यप्रसिद्धत्वेन पक्ष-साध्ययोर्विशेषणासिद्ध्या परं प्रत्याश्रयासिद्धेः साध्याप्रसिद्धेश्च। तत्सिद्धौ वा पक्षे तदजन्यत्वासिद्धेः क्षितिजनकादृष्टजनककृति-चिकीर्षा-साक्षात्काराणां योगजधर्म्माद्यजन्यानामदृष्टद्वारा क्षिति-जनकत्वेन सिद्धसाधनात्। न च तादृशसाक्षाज्जन्यत्वं विवक्षि-तम्, घटादिदृष्टान्ते तदसम्भवात्, दृष्टान्ते घटादौ जनकेष्टसाध-ताज्ञानस्यानुमितित्वेन जन्यसविकल्पकव्याप्तिग्रहजन्यत्वेन साध्या-प्रसिद्धेश्च।

ननु व्याप्तिबलेन साध्यं सिद्ध्यति व्याप्तिश्च यत्र यत्र कार्य-त्वं तत्र तदुपादानाभिन्नजन्यत्वम् इतिरूपा न तु यद्यत्कार्य्यं त-त्तत्किञ्चिदुपादानाभिन्नजन्यमिति, एवञ्च यत्र यत्र कार्य्यत्वं त-त्र तदुपादानाभिन्नजन्यत्वमिति विशिष्य व्याप्त्या क्षित्यादौ का-र्य्यत्वं क्षित्याद्युपादानाभिन्नजन्यत्वमेव साधयत्यतो न सिद्धसाध-नमिति चेत्, न। घटे पटे च कार्यत्वस्य व्याप्तिग्रहः किं प्रत्येकं घटोपादानाद्यभिन्नजन्यत्वेन, तत्तदुपादानाभिन्नजन्यत्वेन, उपादा-नाभिन्नजन्यत्वेन वा, आद्ये घटोपादानाभिन्नजन्यत्वादौ कार्य्यत्व-स्य व्यभिचार एव। द्वितीये त्वननुगततत्तच्छब्दाभिधेयघटाद्युपा-दानगतानुगतरूपाभावात् कथं व्यापकताग्रहः, तत्तच्छब्दस्य स्व-भावात् समभिव्याहृतपरतया नायं दोष इति चेत्। न। अनुमाने शब्दस्वभावोपन्यासस्याप्रयोजकत्वात्। अत एवेदानीं देवदत्तो ब-हिरस्ति विद्यमानत्वे सति गृहासत्त्वात्, विद्यमानत्वे सति यो यदा यत्र नास्ति स तदा तदतिरिक्ते देशेऽस्ति यथाऽहमेव बहिरसन् गृ-हमध्ये तिष्ठामीत्यत्र पक्ष-दृष्टान्तसाधारण्यस्य-तत्त्वयोरनुगतयो-रभावान्नान्वयि, किन्तु व्यतिरेकीत्युक्तम्। तृतीये सिद्धसाधनमेव।

अथ सर्गाद्यकालीनद्व्यणुकं ज्ञानेच्छा-कृतिसमानकालीनसामग्रीजन्यम् कार्य्यत्वात् घटवत् अदृष्टसामग्रीजन्यत्वेऽदृष्टत्वापत्तिरिति चेत् । न । परम्प्रति सर्गाद्यसिद्धेः । ज्ञानादीनां सिद्धावपि द्व्यणुकाजनकत्वात् उदासीनसिद्धावप्रयोजकत्वाच्च । एतेन सर्गाद्यकालीनं द्व्यणुकं द्व्यणुकासमवायिकारणसमानकालीनकृतिजन्यमिति निरस्तम् । द्व्यणुकासमवायिकारणसमानकालीनकृतित्वेन गौरवाप्रयोजकत्वाभ्यामजनकत्वात् । किञ्च कार्य्यत्वं न तावद्योगोपस्थितकृत्यर्हत्वम्, असिद्धेः । नापि पूर्वकालासत्त्वे सति उत्तरकालसम्बन्धित्वं, तत्तत्पूर्वकालत्वस्यानानुगतत्वात् सकलपूर्वकालस्याऽप्रसिद्धेः । नापि कादाचित्कत्वं, प्रागभावेनाऽनैकान्तिकत्वात् । नापि प्रागभावप्रतियोगित्वं, ध्वंसेनाऽनैकान्तिकत्वात् । नापि सत्त्वे सति तत्त्वं, सत्ताजातेः परम्प्रति असिद्धेः स्वरूपसत्त्वस्य च ध्वंसेऽपि सत्त्वात् । यत्त्वयं घटः एतद्घटजनकानित्यज्ञान-चिकीर्षा-कृत्यतिरिक्तज्ञानादिजन्यः कार्यत्वात् पटवदित्यादि । तन्न । विपक्षबाधकाभावेनाऽप्रयोजकत्वात्, अन्यथा अयं घटः एतद्घटजनकानित्यादृष्टातिरिक्तादृष्टजन्यः कार्यत्वात् पटवत्, एतौ सुख-दुःखसाक्षात्कारौ एतज्जनकानित्यसुख-दुःखातिरिक्तसुख-दुःखसाध्यौ सुख-दुःखसाक्षात्कारत्वात् इत्यादिना नित्यधर्म्माधर्म्म-सुख-दुःखाश्रयस्यापि सिद्धिप्रसङ्गात् । अयं घटः स्वजनकानित्यज्ञानाद्यतिरिक्तज्ञानाद्यजन्यः घटत्वात् अपरघटवदित्यादिना सत्प्रतिपक्षाच्च ।

किञ्चित्तु दृश्यते तावदभिमतग्राहिणीन्द्रिये मनो निवेशयतः पुंसो मनःक्रियानुकूलो यत्नः, तथा च सर्गाद्यकालीनशरीरजन्यज्ञानध्वंसानाधारकालाधारज्ञानजनकात्ममनोयोगजनिका मनःक्रिया तन्मनोयोगोचरप्रयत्नानाधारतन्मनोयोगोचरप्रयत्न-तद्व्याप्येतरसकलका-

रणाधारकालानन्तरकालानाधारा तन्मनःक्रियात्वात् सम्मतत-न्मनःक्रियावत् अर्थात् प्रयत्नाधारकालानन्तरकालाधारा सा क्रि-या सिद्ध्यतीत्याहुः । तन्न, सर्गाद्यकाले ज्ञानजनकमनःसंयोगज-नकक्रियायां मानाभावः, पूर्वक्रिययैव संयोगसम्भवात् ईश्वरवा-दिनां तन्मनोगोचरप्रयत्नानाधारः कालोऽप्रसिद्ध एव, क्रियात्वस्यै-व हेतुत्वे व्यर्थविशेषणत्वञ्च । किञ्चैवं प्रयत्नानाधारकालानाधार-त्वम्, अर्थात् तत्सिद्धौ मानान्तरादीश्वरसिद्धौ अर्थान्तरत्वमि-ति । अत्रोच्यते । अदृष्टद्वारकोपादानगोचरजन्यकृत्यजन्यानि स-मवेतानि जन्यानि अदृष्टप्रागभावव्याप्यप्रागभावाप्रतियोग्यु-पादानगोचरापरोक्षज्ञान–चिकीर्षा–कृतिमज्जन्यानि स्वजनकाद-ष्टोत्तरोपादानगोचरापरोक्षज्ञान–चिकीर्षा–कृतिमज्जन्यानि वा अ-परोक्षज्ञान–चिकीर्षा–प्रयत्नविषयीभवदुपादानानि वा समवेत-त्वे सति प्रागभावप्रतियोगित्वात् यदेवं तदेवं यथा घटः तथा चै-तानि तस्मात्तथा । उक्तपक्षे कस्यचिदनन्तर्भावेऽपि तदादाय तथैव निरुक्तस्य पक्षत्वानिर्देश समूहालम्बनरूपैवानुमितिरुत्पद्यत । न च जन्यकृत्यजन्यत्वं तावदननुगतेष्वेकरूपाभावेन ग्रहीतुमशक्यमिति वाच्यम् । जन्यकृत्यजन्यत्वं हि जन्यकृतिजन्यान्यत्वमित्यन्यत्वेन रूपेण सामान्यलक्षणया तावतामुपस्थितेः । न च जन्यत्वविशेष-णव्यावर्त्त्यासिद्धिः, प्रमेयो घट इतिवदव्यावर्त्तकत्वेऽपि तदुप-रक्तबुद्धेरुद्देश्यत्वेन तस्योपरञ्जकत्वात् । उक्तान्यतमत्वमेव सकर्तृक-त्वम् । अत एव घटभोक्ता न घटकर्त्तेति व्यवह्रियते । एवञ्च श-ब्दस्फूर्त्कारादीनां पक्षतैव । ज्ञानेच्छादीनामपि पक्षत्वान्न सन्दिग्धा-नैकान्तिकता । उपादानस्य सिद्धत्वेऽप्युपादेयस्यासिद्धत्वेन तद्बुत्तया तत्रापि चिकीर्षा । यद्वा पक्षे हेतौ च न समवेतत्वं विशेषणं तेन ध्वंसोऽपि पक्षः । साध्ये च उपादानपदं कारणमात्रपरम्,प नुआ-

देयमेव वा। जन्येच्छाकृत्यजन्यत्वञ्च पक्षे विवक्षितं तेन कृतिध्वंसस्य कृतिजन्यत्वेऽपि इच्छाजन्यत्वाभावात् पक्षत्वम्। क्षितिरेव वा पक्षः। न चाङ्कुरे सन्दिग्धानैकान्तिकत्वम्, पक्षपक्षसमनैरपेक्ष्येण घटादौ निश्चितव्याप्तेर्लिङ्गस्य तयोर्दर्शनेनोभयत्रानुमित्यविरोधात्। न त्वनुमित्योरन्योन्यापेक्षत्वं येनान्योन्याश्रयः स्यात्। प्रतिज्ञाया अविषयत्वात् तत्र पक्षसमव्यपदेशः। न चाङ्कुरस्य पक्षत्वेनानिर्देशात्तत्र न पक्षधर्म्मताज्ञानमिति वाच्यम्। सिषाधयिषाविरहसहकृतसाधकप्रमाणाभाववति लिङ्गज्ञानस्यानुमितिमात्रकारणत्वात्, तच्च क्षितौ पञ्चावयवेन अङ्कुरे स्वत एवेति न कश्चिद्विशेषः। यदि च क्षितौ हेतुनिश्चयदशायामङ्कुरस्य हेतुमत्तया न निश्चयस्तदा क्व सन्दिग्धानैकान्तिकत्वम्।

अथ पक्षसमे साध्याभावसामानाधिकरण्यसंशयात् हेतौ व्याप्तिग्रह एव नोत्पद्यते उत्पन्नोऽपि वा बाध्येत इति चेत्, तर्हि महानसेऽपि धूमे व्याप्तिग्रहो न स्यात् भूतोऽपि वा बाध्येत सन्दिग्धवह्निकपर्वतापर्वतधूमवतामेकधर्म्माभावेनाऽपक्षत्वात्। तस्मात्साध्यसन्देहवति हेतुनिश्चयो न दोषः, किन्तु गुण एव, अन्यथाऽनुमानमात्रमुच्छिद्येत। पक्षादन्यत्र तद्दूषणमिति यदुक्तं तत्र पक्षान्यत्वं सिषाधयिषितसाध्यान्यत्वं यदि तदानपेक्षितानुमितिर्न स्यात्। अथ सन्दिग्धसाध्यान्यत्वं साधक-बाधकप्रमाणाभावविषयान्यत्वं वा तदा अङ्कुरेऽपि तन्नास्ति। अथ प्रतिज्ञाविषयान्यत्वं तदा स्वार्थानुमित्युच्छेदः। नियतविषयज्ञानाजन्यत्वेन पक्षविशेषणात्सर्वविषयज्ञानसिद्धिः। साध्ये च ज्ञानेच्छा-प्रयत्नानां विशेषणत्वेन विशिष्टसाधनत्वं विवक्षितं तेन न तदुपलक्षितक्षेत्रज्ञेनाऽर्थान्तरम्। सामान्यतोऽपि साध्यानिर्देशे पक्षधर्म्मताबलेनाभिमतविशेषसिद्धिश्च। नन्वाद्यसाध्यद्वये घटाद्युपादानगोचरापरोक्षज्ञान-चिकीर्षा-कृतीनामेव

जनकत्वमायातु इत्यर्थान्तरम् । न च तेषां व्यभिचारात् क्षित्यादौ न कारणत्वमिति वाच्यम् । अनादौ प्रवाहे कस्यचित् कदाचित् क्षितिद्व्यणुकादिपूर्व्वघटाद्युपादानगोचरज्ञानादिसत्त्वात् । न च सर्गाद्यकालीनस्यापि पक्षत्वात्तत्रेश्वरसिद्धिः, परम्मति तदसिद्धेरिति चेत् । न । ज्ञानादीनां त्रयाणां स्वविषयसमवेतकार्य्य प्रत्येव जनकत्वावधारणेनैतदनुमानस्य तदविषयत्वात् । अत एवान्योपादानगोचरापरोक्षज्ञानाद्यजन्यत्वेन पक्षविशेषणमपि न युक्तम् । तृतीयसाध्ये तु नार्थान्तरं क्षित्यादौ घटाद्युपादानासमवेतत्वात् । ननु सामान्यलक्षणादिप्रत्यासत्त्या क्षित्याद्युपादानगोचरं यत् प्रत्यक्षं तज्जन्यत्वमेवास्तु तथा चेश्वरे न प्रत्यक्षं न वेच्छा–प्रयत्नौ तयोः समानाधिकरणज्ञानाविषयेऽसत्त्वात् । न च तादृशप्रत्यासत्त्यजन्यत्वं प्रत्यक्षविशेषणं, परम्प्रत्यसिद्धेरिति चेत् । न । द्रव्यत्वेन ज्ञानलक्षणया वा कपालगोचरप्रत्यक्षेऽपि घटादौ अकर्तृकत्वात् क्षित्यादौ सकर्तृकत्वनिर्वाहकं ज्ञानं सिद्ध्यद्विलक्षणमेव सिद्ध्यति । न चावयवविभागद्वारा क्षित्यादिषु जलक्षेपात्समुद्रादिषु हस्तक्षेपात्परमाणुद्वयसंयोगे च द्व्यणुकेष्वस्मदादिकर्तृकत्वादंशतः सिद्धसाधनमिति वाच्यम् । तत्र हि क्षितिनाशे अस्मदादीनां कर्तृत्वं न तु खण्डक्षितौ, अवस्थितसंयोगेभ्य एव तदुपपत्तेः सकलतदुपादानगोचरज्ञानेच्छा–कृतीनामभावाच्च । अत एव द्व्यणुकेऽपि न कर्तृत्वम् । जलक्षेपादधिकपरिमाणकसमुद्रादेः सपक्षत्वमेव घटस्येव । ननु घटे साध्यविकलत्वम् अन्वय–व्यतिरेकाभ्यां ज्ञानादेरेव जनकत्वात् न तु तदाश्रयस्य धर्म्मिग्राहकस्यान्वय–व्यतिरेकस्य वा ग्राहकस्याभावात् । न च घट आत्मजन्य उत्पत्तिमत्त्वात् ज्ञानवदिति वाच्यम् । आत्मसमवेतत्वस्योपाधित्वात्, घटः आकाशजन्य उत्पत्तिमत्त्वात् शब्दवदितिवदप्रयोजकत्वाच्चेति चे-

त् । मैवम् । प्रयत्नवदात्मसंयोगश्चेष्टाद्वारा घटहेतुरतः प्रयत्न इव आत्मापि हेतुः । न चात्मसंयोगे सत्यपि प्रयत्नं विना न चेष्टेति प्रयत्न एव तत्कारणम्, असमवायिकारणं विना कार्यानुत्पत्तेः । न चात्मसंयोगस्य कारणत्वेऽपि संयोगे परिचायकमात्रमात्मेति वाच्यम् । संयोगमात्रस्याकारणत्वेन संयोगिविशेषितस्य हेतुत्वात् । आत्मसंयोगव्यतिरेकप्रयुक्तक्रियाव्यतिरेकस्याऽसिद्धेर्नात्मसंयोगः कारणमिति चेत् । न । या क्रिया व्यधिकरणयदीयगुणजन्या सा तत्संयोगासमवायिकारणिका यथा स्पर्शवद्वेगवद्द्रव्यसंयोगजा क्रियेति व्याप्त्या तत्सिद्धेः । न च क्रियाया मूर्त्तमात्रसमवेतासमवायिकारणकत्वनियम इति वाच्यम् । कार्यमात्राभिप्रायेण ज्ञानादौ व्यभिचारात् विशिष्याऽप्रयोजकत्वात् असमवायिकारणसंयोगाश्रयस्य तत्कार्यजनकत्वनियमाच्च ।

अन्ये तु अनुकूलकृतिसमवायित्वं कर्तृत्वं न तु जनकत्वे सति गौरवात् । कर्त्तरि कारकव्यपदेशश्चाभियुक्तानां सविशेषणे हीति न्यायेन कृतिपर्यवसन्न एव । एवं ज्ञानेच्छा—कृतिजन्यत्वमेव साध्यं तदाश्रयत्वमेवेश्वरस्य कर्त्तृत्वम् ।

अथ घटे कृतिसाध्येष्टसाधनताज्ञानं चिकीर्षाद्वारा हेतुः तच्च न प्रत्यक्षं चिकीर्षाविषये अनागते इन्द्रियासन्निकर्षात् किन्तु अनुमितिरूपं तथा च साध्यविकलो दृष्टान्तः साध्याप्रसिद्धिर्वा दोष इति चेत् । न । सिद्धवृत्त्यासिद्धाविषया हि कृतिः सिद्धविषयप्रत्यक्षे सति सम्भवति । न हि मृदवयवानां संस्थानविशेषे कृतिसाध्येष्टसाधनतानुमितावप्यवयवस्य प्रत्यक्षेणोपस्थितिं विना प्रवृत्तिः । अत एव यागे शब्दाच्चोदनाजीविलिङ्गाद्वा कृतिसाध्येष्टसाधनत्वेऽवगतेऽपि हविरादीनां प्रत्यक्षेणानुपस्थितौ न प्रवृत्तिः । न चोपादानप्रत्यक्षं प्रवर्त्तकज्ञानोपक्षीणम् । अप्रत्यक्षे परमाणौ तत्क्रियाया-

मिष्टसाधनताज्ञानेऽपि प्रवृत्त्यभावात् । प्रवृत्तिविषयस्य मृदङ्गादेः प्रत्यक्षत्वात् न शब्दफूत्कारादिना व्यभिचारः । न चाभिमतग्राहकेन्द्रियसंयोगार्थं मनसि प्रयत्नजन्यक्रियादर्शनाद्व्यभिचारः, अदृष्टसहकृतत्वगिन्द्रियेण हि मनोवहनाडीनामुपलम्भेन तद्गोचरप्रयत्नात् नाडीक्रिया ततः स्पर्शवद्वेगवन्नाड्या नोदनान्मनसि क्रिया न तु प्रयत्नात् । अत एव जलाद्यभ्यवहारमलोत्सर्गहेतुनाड़ीनामनाद्यभ्यासवासनावशात् अदृष्टसहकृतत्वगिन्द्रियेणोपलम्भात् तद्गोचरप्रयत्नः । नन्वेवं घटादावनुमितिजन्यत्वदर्शनादीश्वरे अनुमितिरपि सिद्ध्येत यथा प्रत्यक्षस्येन्द्रियजन्यत्वेऽपि नित्यं तदीश्वरे तथानुमितेर्लिङ्गजन्यत्वेऽपि सा तत्र नित्यैव अनित्येन अनादिद्व्यणुकाद्यजननादिति चेत् । न । स्वसुख-दुःखाभावादिसाधनतानुमितेर्हि हेतुत्वं घटादौ गृहीतम्, न च भगवति शरीरादृष्टाभावेन सुखमस्ति, अतो न क्षित्यादौ तस्य तथानुमितिर्यथार्था सम्भवति । न च तादृगनुमितेरनुमित्यन्तरस्य वानुमितित्वेन घटादौ प्रवृत्तिविषयप्रत्यक्षवद्धेतुत्वं गृहीतामिति नेश्वरे अनुमितिः । ननु द्वेषजन्यकृतिसाध्ये चिकीर्षाविरहाद्व्यभिचारः तदृष्टान्तेन क्षित्यादौ द्वेषसाध्यत्वादीश्वरे द्वेषोऽपि भवेत् द्वेषवतः संसारित्वे भगवतोऽपि तथात्वापत्तिरिति चेत् । न । न हि सर्पादिद्वेषादेव तन्नाशानुकूलव्यापारे कृतिरुत्पत्तुमर्हति । प्रयोजनमन्तरेण प्रेक्षावतां दुःखैकफले कृतेरनुत्पत्तेः किन्तु दुःखसाधनध्वंसं तत्साध्यदुःखानुत्पादं वा फलमुद्दिश्य तत्साधनताज्ञानात्, तथा चेष्टसाधनताज्ञानात् तत्रेच्छाऽस्त्येवेति सैव कृतिकारणं क्लृप्तत्वात्, द्वेषस्तु परम्परया तदुपक्षीणः, कुतस्तर्हि द्वेषसिद्धिः शास्त्रं द्वेष्मीत्यबाधितप्रत्ययात् । न चादृश्यस्य कर्तुरनुपलब्धिबाधः, अनुपलब्धिमात्रस्य बाधकत्वे अतीन्द्रियोच्छेदात् योग्यानुपलब्धेश्चासिद्धेः परमात्मनोऽयो-

ग्यत्वनियमात्, शशशृङ्गप्रतिबन्ध्या च नादृश्यमात्रनिरासः परमाण्वादिस्वीकारात् । नाप्ययोग्यकर्तृनिरासः, चेष्टया ज्ञानादिमतः परमात्मनोऽनुमानात् परम्प्रति तस्यायोग्यत्वात् । नापि शृङ्गे पशुत्ववदप्रयोजकम्, कर्तुः कार्य्यमात्रे कारणत्वावधारणात्, प्रतिबन्धिमात्रस्य चादूषणत्वात् । शशे पशुत्वेनायोग्यशृङ्गसिद्धिः कुतो नेति चेत् । न । अर्थान्तरत्वात् विपक्षे बाधकाभावेन व्याप्त्यसिद्धेः शृङ्गत्वस्य योग्यसंस्थानविशेषव्यङ्ग्यत्वेनायोग्यस्य विरोधेन शङ्कितुमशक्यत्वात् शशे शृङ्गस्यात्यन्ताभाव इति सर्वेषामबाधितप्रत्यक्षबाधितत्वाच्च । अथ कृति–कार्य्ययोर्नान्वय–व्यतिरेकाभ्यां व्याप्तिग्रहः त्वन्मते व्यापककृतेः सत्त्वे तद्देशे समये वा कृतिमात्रव्यतिरेकानिरूपणात् । नित्यकृतेरन्वयोऽपि न गृहीतः वह्निमात्रव्यतिरेकोऽस्ति गृह्यते चेति । न चैवमाकाशात्मनोरप्रसिद्धिः समवायिमात्रस्य व्यतिरेकानिरूपणेन कार्य्यं समवायिकारणजन्यमिति व्याप्तेरसिद्धेरिति वाच्यम् । समवायिकारणत्वग्रहे हि तत्संसर्गाभावोऽप्रयोजको निमित्तमात्रसाधारणत्वात् किन्तु यत्समवायि तत्र कार्य्यं यन्न समवायि तत्र नेत्यन्योन्याभावमादाय कार्य्यं समवायिजन्यमिति व्याप्तिग्रहसम्भवात् समवायित्वेन तयोरन्योन्याभावोऽस्ति गृह्यते च । यद्वा भावकार्य्यं समवेतमिति व्याप्त्या तयोः सिद्धिरिति, न, यथा हि यद्यद्वह्नेरन्वये धूमो गृहीतस्तत्तद्व्यतिरेके धूममात्रव्यतिरेकग्रहात् वह्नि–धूममात्रयोर्व्याप्तिग्रहः न तु पर्वतीयवह्नेरन्वयव्यतिरेकग्रहात् । न चान्यान्वय–व्यतिरेकाभ्यामन्यव्याप्तिग्रहे अतिप्रसङ्ग इति वाच्यम् । यद्विशेषयोरन्वय–व्यतिरेकग्रहस्तत्सामान्ययोर्बाधकं विना व्याप्तिग्रहात्, स च वह्नि–धूमव्याप्तिग्रह उत्पद्यमानः सकलधूमगोचरो धूमत्वपुरस्कारेण प्रसिद्धधूमगोचर एव वा, तथेहापि कृतिविशेष–का-

र्थविशेषयोरन्वय–व्यतिरेकग्रहो बाधकमन्तरेण कृति–कार्य्यमात्रयोर्व्याप्तिग्रहे उपायः, न तु पक्षधर्म्मताबललभ्यविशेषान्वय–व्यतिरेकग्रहः, अनुमानमात्रोच्छेदप्रसङ्गात् । एतेन कार्य्यत्वस्य विपक्षवृत्तिहतये सम्भाव्यतेऽतीन्द्रियकर्त्ता चेद्व्यतिरेकसिद्धिविधुरा व्याप्तिः कथं सिद्ध्यति, दृश्योऽथ व्यतिरेकसिद्धिमनसा कर्त्ता समाश्रीयते तत्त्यागेऽपि तदा तृणादिकमिति व्यक्तं विपक्षेक्षणमिति निरस्तम् । ननु यदि कर्तृमात्रव्याप्तिग्रहादृश्यकर्तृसिद्धिस्तदा वह्निमात्रव्याप्तधूमात् अदृश्यजाठरीयवह्निसिद्धिरपि स्यात् । न स्यात्, अदृश्यवह्नेर्धूमानुत्पत्तेर्दृश्यस्य तत्र हेतुत्वात् । ननु ज्ञानेच्छा–प्रयत्नत्रयव्यतिरेकान्न कार्य्यव्यतिरेकः किन्तु एकैकव्यतिरेकात् तथा च व्यर्थविशेषणत्वेन विशिष्टव्यतिरेको न हेतुव्यतिरेकव्याप्य इति न हेतोर्विशिष्टसिद्धिः साध्याभावव्यापकाभावप्रतियोगिन एव साध्यगमकत्वादिति चेत् । न । यत एकैकव्यतिरेकात्कार्यव्यतिरेकः अत एव कार्यत्वादेकैकं सिद्ध्यत् त्रयमपि सिद्ध्यति आर्थस्तु समाजः । स्यादेतत् अशरीरो नित्यज्ञानादिमान् सर्वज्ञः कर्त्ता पक्षे विवक्षितो घटादौ च कार्यत्वस्य तद्विपरीतकर्तृसहचारदर्शनाद्विशेषविरुद्धत्वमिति चेत् । न । हेतोर्विवक्षितसाध्यविपरीतसहचारमात्रस्याऽदूषकत्वात् । अन्यथानुमानमात्रोच्छेदप्रसङ्गात् । न चाऽनित्यज्ञानासर्वज्ञशरीरिकर्तृत्वेन समं कार्यत्वस्य व्याप्तिरस्ति, येन विपरीतसाधने विरुद्धत्वं स्यात्, तादृशव्याप्तिश्च त्वया मया वा नाङ्गीक्रियते अङ्कुरादौ योग्यानुपलम्भेन शरीरिकर्तृकत्वाभावात् । अथ यथादर्शनबलप्रवृत्तव्याप्त्याऽनित्यज्ञानादिमान् कर्त्तोपनेयः पक्षधर्म्मतया च नित्यज्ञानादिमान् तथा चोपनेयविशेषयोर्विरोधेन व्याप्ति–पक्षधर्म्मतयोर्विरोधात् परस्परसहकारिताविरहान्नानुमानं विशेषविरोधादिति चेत् । न । अनि-

त्यज्ञानादिकर्तृजन्यत्वेन व्याप्त्यग्रहात् ज्ञानादिमत्कर्तृजन्यत्वव्याप्तश्च पक्षधर्म्मतायाश्च पृथगुपनायकत्वाभावाच्च एकवैयर्थ्यप्रसङ्गात् । तथा च निरपेक्षतादशायां विशेषानुपस्थानादेव न विरोधज्ञानम्, सापेक्षतादशायान्तु सहोपलम्भादेव विरोधप्रतियोगिनोः सिद्ध्यसिद्धिभ्यां विरोधज्ञानाभावश्च । लिङ्गविशेषण–साध्यविशेषणविरोधे च विशेषविरोधः, यथा चन्दनप्रभवत्वह्निमानयम् असुरभिधूमवत्त्वादिति । ननु ज्ञानत्व–नित्यत्वयोः कर्तृत्वाशरीरित्वयोश्च परस्परविरुद्धत्वेन एकधर्म्यसमावेशात् कथं नित्यज्ञानादिकर्तृसिद्धिरिति चेत् । न । उपसंहारस्थानस्याऽभावात् । तथा हि ईश्वरे तद्बुद्धौ च शरीरित्व–कर्तृत्वे बुद्धित्व–नित्यत्वे चोपसंह्रियमाणे विरुद्धे न तु स्वाश्रयस्थिते, उभयोच्छेदप्रसङ्गात् । न चेश्वरस्तद्बुद्धिर्वोपस्थिता, उपस्थितौ वा धर्म्मिग्राहकमानेन तयोर्विरोधापहारात्, अनुपस्थिते च तद्द्वये विरोधज्ञानमकिञ्चित्करमेव, अस्मदादिबुद्धौ व्योमादौ कुविन्दे मुक्तात्मनि चोपस्थिते विरोधोपसंहारात् । बुद्धित्वनित्यत्वयोः कर्तृत्वाशरीरित्वयोरनधिगमेऽपि ईश्वरे अशरीरिकर्तृत्व–नित्यज्ञानादिसिद्धिरप्रत्यूहैव । अत एव नित्यत्वावयवत्वयोर्विरोधज्ञानमकिञ्चित्करमेवेति परमाणुसिद्धिः । ईश्वर–तद्बुद्ध्यादिकं तर्कितमिति चेत् । न । तर्कस्य प्रसञ्जनस्य संशयस्य चाज्ञातेऽसम्भवात् । स्यादेतत्, घटादौ कृतिसाध्यता हस्तादिव्यापारद्वारैव गृहीता न तु साक्षात् । न च पितृपुत्रयोरेकघटसाधनत्वमिव प्रयत्न–हस्तादिव्यापारयोः साक्षात्साधनत्वं वाच्यमिति वाच्यम् । घटार्थं हस्तव्यापारवत्कुलालसमीपस्थस्य हस्तादिव्यापारशून्यस्य तद्घटकर्तृत्वापत्तेः । न च हस्तादिव्यापारवत्ता अशरीरस्य सम्भवति । अन्यादृशी च कृतिसाध्यता न दृष्टा । शरीर–तद्व्यापारौ चाङ्कुरे बाधितावि-

ति कर्त्तुरपि बाध एव । अन्यथा त्वदनुमानादेव क्षेत्रज्ञ एव कर्त्ताऽनुमीयेत बुद्ध्यादिमत्परात्मनो योग्यानुपलब्धिबाधाभावात् । शरीरव्यापारद्वारैव क्षेत्रज्ञस्य हेतुत्वात् शरीरव्यापारस्य चाङ्कुरे बाधात् बाधित इति चेत् । तर्हि कर्तृमात्रस्यापि तद्द्वारैव चेष्टेतरकार्य्ये कर्तृत्वावधारणात् तद्बाधे कर्तृमात्रबाधोऽपि । एवञ्च कृतिसाध्यत्वे शरीरव्यापारजन्यत्वं प्रयोजकमिति स एव उपाधिः । एवं ज्ञानेच्छयोरपि इच्छाकृतिद्वारा जनकत्वमिति कथं द्वारं विना क्षित्यादौ जनकत्वमिति । उच्यते । जन्यमात्रे हस्तादिव्यापारजनककृतित्वेन न जनकत्वं चेष्टायां क्षित्यादौ च व्यभिचारात् । घटादौ च तथा जनकत्वमिति जन्यमात्रे कृतिमात्रस्य जनकत्वविरोधिविशेषयोर्जन्य-जनकभावे बाधकं विना सामान्ययोरपि तथाभावनियमात् । न हि विशेषे विशेषप्रयोजकत्वं सामान्ये सामान्यप्रयोजकत्वविरोधि । चेष्टेतरकार्य्ये शरीरव्यापारद्वारैव कृतेर्हेतुत्वात् तेन विना क्षित्यादौ न कृतिसाध्यतेति चेत् । न । चेष्टेतरकार्य्यमात्रे शरीरव्यापारजनककृतित्वेन न जनकत्वं क्षित्यादौ व्यभिचारात्, किन्तु तद्विशेषे घटादावित्युक्तत्वात् । न चैवमामवातजडीकृतकलेवरस्य प्रयत्नादेव घटोत्पत्तिः स्यात् हस्तादिव्यापारं विनाऽपि कृतेर्हेतुत्वादिति वाच्यम् । घटे कृतिवत् हस्तादिव्यापारस्यापि हेतुत्वात् । यदुक्तं क्षेत्रज्ञ एव कुतो नानुमीयत इति । तत्र यदि हस्तादिव्यापारकृतिमान् क्षेत्रज्ञोऽभिमतस्तदा हस्तादिव्यापारस्याङ्कुरे योग्यानुपलम्भबाधात् । अथ हस्तादिव्यापारशून्यकृतिमान् अभिमतस्तदा ओमित्युत्तरम्, स एव भगवानीश्वरः । अत एव सहभावनिरूपकत्वे नियतपूर्ववर्त्तित्वं कारणत्वम् । समवाय्यसमवायिनोस्तथात्वेन निमित्तेऽपि तथाभावात् । अन्यथा प्रतिबन्धकाभावानन्तरं प्रतिबन्धकसत्त्वकाले कार्य्यं स्यात् प्रतिबन्धका-

भावस्य पूर्व्वं सत्त्वात् । न च कृतेः सहभावनिरूपकत्वं स्वतः, कार्य्यसमये अभावात, तथा च तत्परिचायितव्यापारद्वारा तस्याः सहभावनिरूपकत्वम् । अतः शरीरव्यापारद्वारैव कृतेर्जनकत्वं न केवलाया इति निरस्तम् । समवाय्यसमवायि–प्रतिबन्धकाभावानां अविनश्यदवस्थत्वेन कारणत्वात् तथैवाऽन्वय–व्यतिरेकात् । तेन तेषामग्रिमविनाशक्षणे न कार्य्यम् । अन्यथा प्रतिव्यक्ति कार्य्यसहभावनिरूपणे कार्य्योत्पत्तेः प्राक् सहभावस्य निरूपयितुमशक्यत्वात् कारणत्वानिश्चयेन क्वापि प्रवृत्तिर्न स्यादिति तज्जातीयत्वस्यावश्यवाच्यत्वे विनश्यदवस्थं कथं सहभावेनापि व्यवच्छेद्यमतः स्वरूपयोग्यतारूपा कारणता तत्रापि । कार्य्याभावस्तु सहकारिविरहात् । अन्यथा निमित्तानां प्रत्येकं कार्य्यसहभावनिरूपकत्वेन जनकत्वे गौरवम्, प्रागभावस्य प्रतियोग्यजनकत्वप्रसङ्गाच्च । अन्यथा उत्पन्नोऽपि घट उत्पद्येत सामग्र्याः सत्त्वात् । न च स एव तत्र प्रतिबन्धकः, अभावान्तरस्य तत्राकारणत्वेन कारणीभूताभावप्रतियोगित्वरूपस्य प्रतिबन्धकत्वस्य प्रागभावकारणत्व एव विश्रामात् । न चैका सामग्री एकदैकमेव कार्य्यं जनयति स्वभावादिति वाच्यम् । सामग्री–तद्विरहस्य कार्य्य–तदभावप्रतियोगित्वेन सामग्र्यां सत्यां कार्य्यस्य तदभावे सामग्रीविरहस्य वज्रलेपायितत्वात् । स्यादेतत्, कर्त्ता शरीर्यव ज्ञानमनित्यमेव बुद्धिरिच्छाद्वारैव इच्छा कृतिद्वारैवहेतुरित्यादिप्राथमिकव्याप्तिप्रत्यक्षविरोधान्नाऽशरीरनित्यज्ञानादिकर्तृसिद्धिः । अत एव शरीरमनित्यमेवेति नियमान्न कर्तृत्वेन नित्यातीन्द्रियशरीरासिद्धिरीश्वरे । न चाप्रयोजकत्वम्, निरुपाधित्वेन शङ्काकलङ्काभावात् । कार्यत्व–सकर्तृकत्वयोरपि यदि निरुपाधित्वमस्ति तदापि तुल्यबलत्वेन सत्प्रतिपक्षवत्प्रतिरोधोऽस्तु । न च कार्यत्वं पक्षधर्म्मतासत्त्वाद्बलीयः कर्त्ता शरीर्येवेत्यादौ तु त-

क्षास्तीति वाच्यम् । ज्ञानमनित्यमेवेत्यादिव्याप्तेरेव क्षित्यादौ ज्ञानजन्यत्वविरोधित्वात्, एवं कार्यं ज्ञानजन्यं ज्ञानमनित्यमेवेत्यनयोर्विरोध एव, अविरोधे तु द्वयमपि स्यात्, तथा च क्षित्यादौ शरीरन्यनित्यज्ञानपर्यवसाने बाध एव । किञ्च ज्ञानमनित्यमेवेत्यादौ नित्यज्ञानादेरप्रसिद्धेस्तदव्यावर्त्तकतया नोपाधित्वानिश्चयः तत्संशयो वा, कार्यत्व—सकर्तृकत्वव्याप्तिग्रहदशायां शरीरव्यापाराव्यभिचारादुपाधेर्निश्चयः संशयो वास्तीति । तन्न । ज्ञानमनित्यमेवेत्यादिव्याप्तेरसिद्धेः । विपक्षबाधकाभावेनाप्रयोजकत्वात् । निरुपाधिसहचारदर्शन—व्यभिचारादर्शनादेव व्याप्तिग्रहः निरुपाधित्वमेव वा विपक्षबाधकमिति चेत् । न । अवयवो महानेव तेज उद्भूतरूपमेवेत्यादिव्याप्तिग्रहात् परमाणु—नयनादेरसिद्धिप्रसङ्गात् । अथ द्रव्यचाक्षुषत्वे अनेकद्रव्यवत्त्वस्य साक्षात्कारविषयेन्द्रियसन्निकर्षस्य हेतुत्वात् तन्मूलकविपक्षबाधकेन परमाण्वादिसाधकस्य बलवत्त्वात् परमाण्वादिसिद्धौ विरोधिव्याप्तेर्बाधः न तु वैपरीत्यं विपक्षबाधकाभावेन तस्या बलवत्त्वादिति मन्यसे, तर्हि ज्ञानादिकार्य्ययोः कार्य—कारणभावावधारणात् तन्मूलकविपक्षबाधकेन निष्कलङ्कव्याप्तिग्रहात् पक्षधर्म्मताग्रहसहितान्नित्यज्ञानादिसिद्धौ व्यभिचारान्न व्याप्तिः । अन्यथा साध्यं पक्षातिरिक्त एवेत्यादिनिरुपाधिसहचाराद्व्याप्तिग्रहे सकलानुमानोच्छेदः । वयन्तु ब्रूमः । पक्षधर्म्मताबलान्नित्यं ज्ञानं सिद्ध्यद्बुद्धिरनित्यैवेति व्याप्तिप्रत्यक्षेण न प्रतिबद्ध्यते, अस्मदादिबुद्धिपात्रविषयकत्वेन भिन्नविषयत्वात् एकविषयविरोधिज्ञानस्यैव प्रतिबन्धकत्वात् नित्यत्वानित्यत्वयोरेकजातीयद्रव्येऽविरोधात् । बुद्धिमात्रेऽनित्यत्वावधारणात् कथं तद्विशेषे नित्यत्वबुद्धिरिति चेत् । न । बुद्धिमात्रपदस्येश्वरानीश्वरबुद्धिपरत्वे विरोधाद्व्यभिचाराच्च । अस्मदादिबुद्धिमात्रपरत्वे भि-

अविषयत्वेनाऽप्रतिबन्धकत्वात्। बुद्धित्वं नित्यावृत्त्येवेत्यवगतमतः कथं तत्र नित्यवृत्तित्वावगम इति चेत्। न। उभयसिद्धनित्यावृत्तित्वावगमेऽप्यतिरिक्तनित्यवृत्तित्वावगतौ विरोधाभावात्। बुद्धित्वमनित्यत्वव्याप्यमवगतं नाऽनित्यत्वाभाववति ज्ञेयमिति चेत्। न। अनित्यत्वव्याप्यत्वमनित्यमात्रवृत्तित्वं तत्र चोक्तमेव। एतेन कर्त्ता शरीर्य्येवेत्याद्यपि ज्ञानं प्रतिबन्धकमित्यपास्तम्। ननु कर्तृजन्यत्वे जन्यत्वं नावच्छेदकं किन्तु घटत्वादिकमेव तेनैव रूपेणाऽन्वय-व्यतिरेकग्रहादावश्यकत्वाच्च, अननुगतमपि जन्यतावच्छेदकं वह्निजन्यतायां धूमत्वादिवत्। अथ घटत्वादिवज्जन्यत्वमप्यवच्छेदकम्, न हि विशेषोऽस्तीति सामान्यमप्रयोजकम्, तथा च वह्निजन्यत्वे धूमविशेषः प्रयोज्योऽस्तीति न धूमसामान्यमग्निं गमयेत् तस्माद्व्यद्विशेषयोः कार्य्य-कारणभावस्तत्सामान्ययोरपि बाधकं विना तथात्वनियम इति चेत्। न। तत्र बाधकाभावात् अत्र च ज्ञानमनित्यमेवेत्यादिप्राथमिकबहुव्याप्तिबाधात्, तुल्यत्वे वा व्याप्तिसंशयाधायकत्वात्। न च कार्य्य-कारणभावमूलकत्वेन कार्य्यत्व-सकर्तृकत्वव्याप्तिर्बलीयसीति वाच्यम्। विरोधिप्रत्यक्षेण कार्य्य-कारणभावस्यैवाऽसिद्धेः। एतेन धूमादौ वह्निजन्यतावच्छेदकमनुगतं न सम्भवति इह तु जन्यत्वमनुगतमस्त्यतो बाधकं विना न त्यज्यत इति परास्तम्। ज्ञानमनित्यमेवेत्यादिसहचारावसायस्य बाधकं विना व्याप्तिपर्य्यवसायिततया बाधकत्वादिति। मैवम्। निरुपाधित्वेन सहचारावसायस्य साधकं बाधकञ्च विना साधारण्येन व्याप्तिसंशयाधायकत्वात्। अन्यथा साध्यं पक्षातिरिक्त एव सुखं दुःखसम्भिन्नमेवेत्यादिव्याप्तिग्रहस्य कार्य्य-कारणभावग्राहकबाधकत्वे तत्संशयाधायकत्वे वा कार्य्यात्कारणानुमानोच्छेदे निरीहं जगज्जायते। तस्माद्व्यद्विशेषयोः कार्य्य-कारणभावस्तत्सा-

मान्ययोः कार्य्यकारणभावो बलवता बाधकेनाऽपनीयते, न चात्र तदस्ति । विरोधिव्याप्तिसाधकस्य विपक्षबाधकस्याऽभावात् ।

नव्यास्तु कार्य्यं कर्तृजन्यमिति व्याप्तेराशरीरनित्यज्ञानकर्त्रुपस्थितौ ज्ञानमनित्यमेवेत्यनेन विरोधप्रतिसन्धानं न तु तां विना, प्रतियोग्यनुपस्थितौ विरोधानिरूपणात्, तथा चोपजीव्यबाधात् ज्ञानमनित्यमेवेत्यादिव्याप्तिज्ञानमकिञ्चित्करमेव । अत एव पक्षधर्म्मताविनाकृतं विरोधिव्याप्तिज्ञानं न हेत्वाभासतयोक्तं, विरोधप्रतियोगिसिद्ध्यसिद्धिपराहतत्वात् । स्यादेतत् अस्तु शरीरजन्यत्वमुपाधिः । न च पक्षेतरत्ववत्पक्षमात्रव्यावर्त्तकविशेषणवत्त्वात् साधनविशेषितत्वात् साधनतुल्ययोगक्षेमत्वेन साध्यव्यापकत्वानिश्चयाच्च नोपाधित्वामिति वाच्यम् । चेष्टेतरकार्य्ये शरीरव्यापारद्वारैव कर्त्तुः कारणत्वात् शरीरसहकृतस्यैव स्वकार्य्ये कारणत्वाच्च । न हि शरीरविनाकृतः कर्त्ता शरीराक्रियां चेष्टां घटादिकं वा जनयति । न च यत्सहकृतं यज्जनकं तेन विना तज्जनकमतोऽर्थाच्छरीरजन्यमेव कर्त्तृजन्यमिति साध्यव्यापकत्वानिश्चयात् । पक्षेतरत्वादौ च विपक्षबाधकाभावान्न साध्यव्यापकतानिश्चय इति तेषामनुपाधित्वे बीजम् । अत एव बाधोन्नीतं वह्नीतरत्वं वह्निमत्त्वेन धूमवत्त्वे साध्ये आर्द्रेन्धनप्रभववह्निमत्त्वं रसवत्त्वेन गन्धवत्त्वे साध्ये पृथिवीत्वमुपाधिः विपक्षबाधकैस्तेषां साध्यव्यापकत्वनिश्चयात् । न च साधनविशेषितत्वमपि, जन्यत्वं हि प्रागभावप्रतियोगित्वं, शरीरजन्यत्वञ्च शरीरकारणकत्वम्, अन्यानिरुक्तेः इतरपदसमभिव्याहारेण जन्यपदादितरकारणकस्यैव प्रतीतेः तदर्थकत्वकल्पनादिति विधौ वक्ष्यते । अत एव शरीरिकर्त्तृकत्वमुपाधिः शरीरसहकृतस्यैव कर्त्तुः कारणत्वात्, व्याप्यं व्यापककोटावनिवेशयत एव प्रमाणस्य व्याप्तिग्राहकत्वात्, शरीरिकर्त्तृकत्व-सकर्तृक-

त्वयोर्न व्याप्तिग्रहः इति चेत्। न। विशिष्टाविशिष्टभेदेन व्याप्य-व्यापकभावाविरोधात्। अत एव जन्यत्वेन कारणजन्यत्वमनुमेयमिति। मैवम्। कर्तुर्हि शरीरसहकारिता किं घटादौ कर्त्तव्ये, कार्य्यमात्रे वा, स्वकार्य्ये वा। आद्ये कर्त्ता शरीरं विना घटादिकं न करोतीति किमायातं कर्त्तुः कार्य्यमात्रकरणे। द्वितीये तु कार्य्यमात्रं कर्तृजन्यामीति न त्वया स्वीक्रियते, स्वीकारे वा शरीराजन्यमपि कार्य्यं कर्तृजन्यमिति साध्याव्यापकत्वम्। तृतीये तु स्वजन्यत्वं न स्वजन्यतावच्छेदकम् आत्माश्रयात्। तथापि यत्र सकर्तृकत्वमस्ति तत्र शरीरजन्यत्वमावश्यकमिति तस्य साध्यव्यापकत्वम्, तुल्ययोगक्षेमत्वेन हेतुव्याप्यतासंशयाधायकत्वेन सन्दिग्धोपाधित्वं वेति चेत्। न। लाघवेन बाधकं विना कर्तृजन्यत्वे हि जन्यत्वमवच्छेदकं न तु शरीरजन्यत्वं गौरवात्, तथा च शरीरजन्यत्वं न सकर्तृकत्वव्यापकम्। घटादौ त्वार्थः समाजः घटत्वेन शरीरजन्यत्वनियमात् न तु व्यापकत्वप्रयुक्तः मानाभावात्। शरीरजन्यत्वं न सकर्तृकत्वव्यापकं तद्व्याप्यजलत्वाव्यापकत्वात् निम्नत्ववदिति बाधकात् हस्तादिना कर्तृत्वनिर्वाहेण शरीरस्याप्रयोजकतया साक्षात्प्रयत्नाधिष्ठेयजन्यत्वस्य साधनव्यापकत्वाच्च शरीरकर्तृकत्वमपि नोपाधिः। जन्यमात्रे कर्त्तुः शरीरसहकारितावि रहात्।

अथ यद्विशेषयोः कार्य्य-कारणभावस्तत्सामान्ययोरपि बाधकं विना तथा नियम इति त्वयैवं निरटङ्कि, तथा च कर्तृविशेष-शरीरजन्याविशेषयोः कार्य्य-कारणभावात् कर्तृमात्र-शरीरजन्यमात्रयोरपि तथाभावः, तथा च शरीरजन्यत्वं कर्तृजन्यतावच्छेदकमिति भवत्युपाधिः। न चैवं घटत्ववच्छरीरजन्यत्वं सकर्तृकत्वव्याप्यं न तु व्यापकमपीति वाच्यम्। उभयासिद्धसकलसकर्तृकवृत्तित्वेन साध्यव्यापकत्वनिश्चयात्। जन्यत्वेऽपि सकर्तृकत्वव्याप्य-

त्वग्राहकमस्तीति चेत्, तर्हि उभयत्र व्याप्तिग्राहकसाम्ये विनिगमकाभावात् व्याप्तिसंशयाधायकत्वेन सन्दिग्धोपाधिर्व्याप्यत्वासिद्धिर्वा साधनव्याप्यतासंशयाधायक एव हि सन्दिग्धोपाधिः, स च साध्यव्यापकत्वे साधनाव्यापकत्वे वा उभयत्र वा संशयादानं च वाच्यं शरीरजन्यत्व-सकर्तृकत्वयोरन्वय-व्यतिरेकज्ञाने जन्यत्व—सकर्तृकत्वयोस्तदग्रह आवश्यक इति लाघवात्तयोरेव व्याप्तिग्रहो न तूपाधिसाध्ययोः, साध्य-साधयोरन्वय-व्यतिरेकज्ञानञ्च शरीरजन्यत्वानवगमेऽपि भवतीति विनिगमकमिति। यतो न कर्तृमात्र—जन्यमात्रयोरन्वय—व्यतिरेकाभ्यां व्याप्तिग्रहः, कर्तृमात्रस्य व्यतिरेकाभावात्, किन्तु विशेषयोरन्वय—व्यतिरेकेण कार्य्य—कारणभावेन वा सामान्ययोस्तथात्वग्रहः तौ च तुल्याविति चेत्, उच्यते। अस्तु तावद्घटत्व-वज्जन्यत्व—शरीरजन्यत्वयोरपि कर्तृजन्यतावच्छेदकत्वेन सकर्तृकत्वव्याप्यत्वं ग्राहकतौल्यात् विनिगमकाभावात् विरोधाभावाच्च, सकर्तृकत्वव्यापकत्वन्तु शरीरजन्यत्वस्य कुतः घटत्ववदव्यापकस्यापि जन्यतावच्छेदकत्वात्। उभयसिद्धसकर्तृके अन्वय—व्यतिरेकाभ्यां शरीरजन्यत्वस्य व्यापकत्वग्रह इति चेत्, न, शरीरजन्यत्वाविनिवेद्यत्वेन तुल्यन्यायेन च प्रथमं कर्तृजन्यत्वे जन्यत्वमवच्छेदकं कल्प्तमिति तद्विरोधेन शरीरजन्यत्वस्य सकर्तृकत्वव्यापकत्वानवगमात्। अत एव न सन्दिग्धोपाधित्वम्। ननु घटादौ शरीरजन्यत्वे कर्तृजन्यत्वमनुगतमवच्छेदकं बाधकाभावात्। न च लाघवात् घटत्वादिकमेव तथा, कर्तृजन्यत्वेऽपि जन्यत्वस्याऽतथात्वापत्तेः। एवं शरीरजन्यत्वव्याप्यं सकर्तृकत्वं वह्नेर्धूम इवेति भवत्युपाधिः। किञ्च कर्तृजन्यत्वे जन्यत्वं शरीरजन्यत्वे वा सकर्तृकत्वमवच्छेदकमिति संशयेऽपि न हेतोः साध्यव्याप्यत्वनिश्चय इति चेत्, तर्हि, घटादौ कर्तृजन्यत्वे गृहीते तस्य शरीरजन्यत्वा-

वच्छेदकत्वं ग्रहीतव्यम्, घटे च घटत्ववज्जन्यत्वमपि बाधकं विना कर्तृजन्यतावच्छेदकं गृहीतमतो जन्यमात्रे कर्तृजन्यत्वात् न शरीरजन्यत्वे तदवच्छेदकत्वं प्रथमगृहीतोपजीव्यविरोधात् । अत एव न तस्य हेतौ व्याप्तिसंशयाधायकत्वमपि । एतेनाऽनणुत्व–क्षित्यवयववृत्त्यन्यत्वादय उपाधित्वेन निरस्ताः, जन्यत्वस्य साध्यव्याप्यत्वेन तेषां साध्याव्यापकत्वात् । तथापि क्षित्यादिकं न कर्तृजन्यं शरीराजन्यत्वात् गगनवदिति सत्प्रतिपक्षोऽस्त्विति चेत् । न । अस्य प्रसिद्धकर्तृजन्यत्वाभावविषयत्वात् अप्रतीतप्रतियोगिकाभावस्य निरूपयितुमशक्यत्वात्, स्थापनानुमानञ्च पक्षधर्म्मताबलात् प्रसिद्धकर्तृभिन्नकर्तृत्वसाधकमतो भिन्नविषयत्वान्न प्रतिबध्य–प्रतिबन्धकभावः । अत एव तद्व्यापकरहितत्वादिकमभावसाधकं बाधकमपास्तम् । तस्य प्रसिद्धाभावविषयकत्वेनाऽप्रसिद्धाभावाविषयकत्वात् व्यक्तिसाधकस्य च विशेषतोऽप्रसिद्धव्यक्तिसाधकत्वनियमात्, अन्यथानुमानवैयर्थ्यात् । कर्तृजन्यत्वमनुगतं घटादौ प्रसिद्धं यत्साध्यं तदभावो मया साध्यत इति चेत्, कर्तृजन्यत्वमनुगतमपि पक्षधर्म्मताबलेनाऽप्रसिद्धं कर्त्तारमादाय पर्य्यवस्यति तदभावस्तु प्रसिद्धस्य कर्त्तुरभावमादाय सिध्यति नाप्रसिद्धस्य, अनुगतस्यापि कर्तृजन्यत्वस्य तदभावस्य च कर्तृव्यक्तिघटितत्वात् । अन्यथा व्यक्तितदभावासिद्धिप्रसङ्गात् । न चैवं सत्प्रतिपक्षोच्छेदप्रसङ्गः, तस्य गोत्वाद्येकभावाभावसाधकविषयत्वात् । एतेन ज्ञानत्वं न नित्यवृत्ति ज्ञानमात्रवृत्तिजातित्वात् स्मृतित्ववत्, ज्ञानं न नित्यगुणवृत्तिगुणत्वव्याप्यजातियोगि चेतनविशेषगुणत्वात् सुखवत्, आत्मा न नित्यविशेषगुणाधारवृत्तिद्रव्यत्वापरजातिमान् विभुत्वात् गगनवत् इत्यपास्तम् । प्रसिद्धे नित्ये व्योमादौ प्रसिद्धायाश्च रूपत्व–जलत्वादिजातेर्व्यतिरेकविषयत्वादप्रयोजकत्वाच्च । किञ्च क्षित्यादौ

शरीराजन्यत्वमसिद्धम् अदृष्टद्वारा तज्जन्यत्वात् । न चाऽदृष्टद्वारकजन्यज्ञानाजन्यत्वं हेतुः, ज्ञाने जन्यत्वविशेषणस्याऽव्यावर्त्तकत्वेन व्यर्थत्वात् । न च स्थापनायां पक्षविशेषणेऽप्ययं दोषः, प्रमेयो घट इतिवदुपरक्तबुद्धेरुद्देश्यत्वात् । अपि च शरीराजन्यत्वे व्यर्थविशेषणत्वं लाघवेनाजन्यत्वस्यैव व्याप्यत्वात् न तु निष्प्रयोजनविशेषणवत्त्वमसिद्धम्, व्याप्तिग्रहोपयुक्तविशेषणवत्पक्षधर्म्मतोपयुक्तविशेषणस्यापि जनकत्वात्, व्यभिचारवारकस्यापि सार्थकत्वे अनुमितिप्रयोजकत्वस्यैव तन्त्रत्वात् । व्यभिचारवारकविशेषणवत्त्वेव व्याप्तिग्रह इति चेत् । न । निर्विशेषणेऽपि गोत्वादौ व्याप्तिग्रहात् । तत्रापि व्यक्तिविशिष्टे व्याप्तिग्रह इति चेत् । न । स्वतोव्यावृत्तगोत्वव्यभिचारात् । अन्यथाऽन्योन्याश्रयात् । अपि च व्यभिचारवारकविशेषणवत्त्वेव व्याप्तिग्रह इत्यप्रयोजकम्, सहचारदर्शनादिसत्त्वे तदभावेन व्याप्तिग्रहाविलम्बात् । व्यभिचारावारकविशेषणशून्य एव व्याप्तिग्रह इति चेत् । न । प्रमेयधूमे व्याप्तिग्रहात् । अथ तत्रोपात्तव्यभिचारावारकविशेषणशून्यत्वं विवक्षितम्, न च तत्र प्रमेयत्वं विशेषणमुपात्तमिति चेत् । न । विरोधात् । न हि तत्रोपात्तं तेन शून्यञ्चेति घटते । यद्विषयत्वेन परामर्शकारणमनुमितौ तल्लिङ्गं प्रकृते च व्यभिचारादन्यथासिद्धेश्च न विशेषणविषयकत्वेन तत्त्वमिति चेत् । न । धूमाव्याप्यत्वापत्तेः व्यभिचारात् तद्विषयत्वेनानुमित्यकारणत्वात् । अथैकमवच्छेदकम् अपरत्र व्याप्तिः, यद्वा लाघवेन व्यासज्यवृत्तिरेकैव व्याप्तिरिति विशिष्टव्याप्त्यर्थः तत्र विशेष्यतावच्छेदकस्य व्याप्त्यनवच्छेदकत्वेन विशेषणस्य तदवच्छेदकत्वनियमादेकवृत्तित्वबाधे सत्येव व्यासज्यवृत्तित्वमिति व्याप्तेश्च न शरीरजन्यत्वाभावे नीलधूमादौ च व्याप्तिरिति विशेष्यमात्रे सा, तथा च स्वरूपासिद्धिस्तद्वारणार्थं

विशेषणाभिधाने व्याप्यत्वासिद्धिरिति चेन्न । न। अव्यभिचारस्यानौपाधिकत्वस्य वा विशिष्टे नीलधूमादौ सत्त्वेन तद्व्यतिरेकसाधने बाधात् । न च विशेष्यमुपाधिः, साधनव्यापकत्वात् । कि-

---

ईश्वरानुमानदीधितिः ।

ईश्वरवादे, न च विशेष्यमुपाधिः साधनव्यापकत्वादिति । साध्यस्येति शेषः । शरीरसहकारेणैव कर्तुः कार्य्यजनकत्वात् शरीराजन्यस्य न कर्तृजन्यत्वम्। तथा चाऽकर्तृकत्वरूपसाध्यव्याप्यस्य शरीराजन्यत्वस्य हेतोरव्यापकतया साध्यस्याव्यापकं विशेष्यम् अजन्यत्वं नोपाधिरित्यर्थः । यदि विशिष्टाभावे हेतौ विशेषणवैयर्थ्यं

ईश्वरानुमानजागदीशी ।

ननु क्षितिर्न सकर्तृका शरीराजन्यत्वादित्यत्र विशेष्यीभूतस्याऽजन्यत्वस्यानुपाधित्वसम्पादकत्वेन साधनव्यापकत्वाभिधानमसङ्गतम् अङ्कुरादावेव शरीराजन्यत्वव्यभिचारादत आह साध्यस्येति शेष इति । ननु शरीराजन्यस्यापि सकर्तृकत्वसम्भवात्तथाप्यप्रयोजकत्वमेवोक्तानुमानस्येत्यतस्तर्कमाह शरीरसहकारेणेति । ननु साध्यस्य साधनव्यापकत्वं न विशेष्यीभूतस्याऽजन्यत्वस्यानुपाधित्वे बीजमतः फलितार्थमाह तथा चेति । हेतोरव्यापकतयेति । साध्यव्याप्याव्यापकस्य साध्याव्यापकत्वानियमादिति भावः ॥ एतदन्त एव क्वचिद्दीधितिग्रन्थः । किञ्चेत्यादिमूलस्याभिप्रायं प्रकाशयन्नाह यदीत्यादि । विशिष्टाभावे शरीराजन्यत्वादिरूपे । विशेष-

श्र सौरभविशेषवज्जूमरहितमिदं चन्दनप्रभवत्वद्विरहितत्वात्, निर्द्धूमोऽयमार्द्रेन्धनप्रभवत्वद्विरहितत्वात् इत्यादावपि कारणविशेषाभावेन कार्य्यविशेषाभावानुमानं न स्यात् वह्निरहितत्वादिकञ्चोपाधिर्भवेत्, व्यतिरेकिण्यष्टद्रव्यातिरिक्तद्रव्यानाश्रितत्वञ्च हेत्वभावव्याप्यं न स्यात् द्रव्यानाश्रितत्वस्यैव व्याप्यत्वात्, रूपादिषु मध्ये गन्धस्यैव व्यञ्जकत्वादित्यादौ त्वयाप्यसिद्धिवारकविशेषणस्वीकाराच्च। अपि च गौरत्वेण विशिष्टस्य व्यापकतापि न स्यात्, तथा च स्थापनानुमाने उपादानगोचरापरोक्षज्ञान-चिकीर्षा-कृतिमज्जन्यता, धूमेनार्द्रेन्धनप्रभवत्वद्विः घटत्वेन शरीरजन्यत्वादिकं नानुमीयेत।

विशेष्याभावरूपश्च विशेष्यमुपाधिर्भवेत् तदार्द्रेन्धनप्रभवत्वन्हिरहितत्वादिना निर्धूमत्वादौ साध्ये व्यर्थविशेषणत्वम् उपाधिश्च वन्हिरहितत्वादि सम्भवेदित्याह किञ्चेति। ननु स्वरूपासिद्धिवारकत्वाद्विशेषणस्य न वैयर्थ्यमिति न भ्रमः अपि तु व्यभिचारावारकत्वात्, रूपादिषु मध्य इत्यत्र गन्धव्यञ्जकत्वस्य हेतोर्व्यभिचारो न शुद्धेनैव वारयितुं शक्यते तस्य समभिव्याहारवशाच्छुद्धातिरिक्ताव्यञ्जकत्वरूपस्य गन्धव्यञ्जकेऽस्त्वेन विशेषणत्वायोगादतो रूपाद्यन्तर्गतगन्धातिरिक्ताव्यञ्जकत्वं तच्च व्यभिचारवारकमेव इत्यत आह अपि चेति।

णेति। शरीरात्मकविशेषणेत्यर्थः। व्यभिचारावारकत्वादिति विशेषणस्य वैयर्थ्यं ब्रूम इत्यन्वयः। नन्वेवं घ्राणेन्द्रियं पार्थिवं रूपादिषु मध्ये गन्धस्यैव व्यञ्जकत्वादित्यत्रापि रूपादिष्वित्यस्य व्यभिचारावारकत्वान्मूलोक्तवैयर्थ्येण दवस्थ्यमत आह रूपादिष्वित्यादि। गन्धव्यञ्जकत्वस्य हेतोर्व्यभिचारो मनःप्रभृतौ। तस्येति। शुद्धैवकारार्थस्येत्यर्थः। समभीति। षष्ठ्यन्तगन्धपदसमभिव्याहारवशादित्यर्थः। विशेषणत्वेति। गन्धव्यञ्जकत्वांशे विशेषणत्वायोगादित्यर्थः। तावन्मात्रस्य चालोकादौ व्यभिचारित्वादिति भावः। रूपादीत्यादि। रूपाद्यन्तर्गतं यद्गन्धातिरिक्तं तद्व्यञ्जकत्वमित्यर्थः।

यत्तु स्वजन्यान्योन्याभावापेक्षया शरीरजन्यान्योन्याभाव-स्याल्पत्वात् तेषामेव व्याप्यत्वमिति विपरीतमेव लाघवमिति । तन्न, विरोधाभावेन बहूनामल्पस्य च व्याप्यत्वात् । स्नेहे शीतस्पर्शव-त्त्वजलत्वयोर्गन्धाभावेऽपृथिवीत्व-पृथिवीत्वाभावयोरिव । अन्यथा नीलधूमस्यैव व्याप्यत्वे धूमसामान्यस्याऽव्याप्यत्वप्रसङ्गः ।

किञ्च स्वन्नये बहून्योन्याभावापेक्षया जन्यत्वात्सन्ताभावस्यैव व्याप्यता स्यादेकत्वात् । प्रमेयत्वाद्यनन्तधर्म्मविशिष्टस्य व्याप्तावपि प्रयोजनाभावान्नानुमाने तदुपन्यासः । अथ लाघवेन जन्यत्वस्य

यस्त्वित्यादि यावद्विशेषाभावानामेव सामान्याभावत्वमते । बहुल्पेति। बहवो जन्यान्योन्याभावा अल्पे शरीरजन्यान्योन्याभावाः । अपृथिवीत्वं पृथिवीसामान्यान्योन्याभावः स च विशेषाभावसमुदायः । जन्यत्वा-त्यन्ताभावस्येत्यभ्युच्चयमात्रं, जन्यत्वस्याखण्डस्य एकस्य विरहेण

तच्चेति । मनःप्रभृतीनां गन्धव्यञ्जकत्वेपि रूपादिव्यञ्जकत्वादेव विशिष्ट-हेत्वभावादिति भावः । अत्र रूपादीन्यादिपदेन रूपत्वादयः । बहुल्पेतीति विरोधाभावेन द्वयोरेव व्याप्यत्वादित्येवं मूलमभिप्रेत्य । बहूनामल्पस्य च व्याप्यत्वादित्येवं मूलपाठे तु बहुल्पपदयोः सह धारणं द्रष्टव्यम् । बहुल्पपदयोः प्रकृतपरत्वं द्योतयन्नाह बहव इत्यादि । बहवो जन्य-प्रतियोगिकान्योन्याभावा इत्यर्थः । अल्प इति । अङ्कुराद्यन्योन्याभा-वस्य शरीरजन्यप्रतियोगिकत्वाभावादिति भावः । अथाऽपृथिवीत्वं यदि पृथिवीत्वात्यन्ताभावस्तदाद्यमेण पौनरुक्त्यं बहुत्वासम्भवश्चे-त्यतो व्याचष्टे पृथिवीसामान्यान्योन्याभाव इति । ननु पृथिवीत्वाव-च्छिन्नान्योन्याभावस्यातिरिक्तत्वे बहुत्वासम्भवतादवस्थ्यमत आह स चेति । विशेषाभावेति । तत्तत्पृथिवीभेदसमुदाय इत्यर्थः । अभ्युच्चये हेतुमाह जन्यत्वस्येत्यादि । जन्यत्वस्यातिरिक्तत्वमते अखण्डत्वस-म्भवादाह एकस्येति । अतिरिक्तस्यापि जन्यत्वस्य कारणभेदेन ना-

शीघ्रोपस्थितिकतया जन्याभावत्वेन शीघ्रं व्याप्तिग्रहो न तु शरीरजन्याभावत्वेन विलम्बितप्रतीतिकत्वात् । यत्र विशेषण–विशेष्यान्यतराभाववति साध्यं तत्र विशिष्टाभावस्यापि व्याप्तिरिति चेत् । न । एवं ह्युत्पत्तिमत्त्वे सति सत्त्वादिकमनित्यत्व–सकर्तृकत्वव्याप्यतया न गृह्येत, शीघ्रोपस्थितिकतया घटत्वादेरेव तथाभावात् । यदि च सामान्य–विशेषभावाद्विरोधाभावेनोभयस्यापि व्याप्यता, तदा शरीराजन्यत्व–जन्यत्वाभावयोरापि तुल्यम् । किञ्च शरीरजन्यत्वं विशिष्टं तदभावं विशिनष्टि न तु साक्षात् तथा च शरीरजन्यत्वाभावोऽखण्ड एव हेतुरतो न व्यर्थविशेषणता । न चात्र विशिष्टाभावो विशेष्याभाव एव, क्षित्यादावजन्यतापत्तेः । अत एव स्थापनायां शरीरजन्यत्वमुपाधिः साध्याभावव्याप्याभावप्रतियोगित्वेन साध्यव्यापकत्वनियमात् । व्यर्थविशेषणेऽधिकं निग्रहस्थानमिति चेत् । न । हेतुद्वयोपन्यासे च तत्, इह तु विशिष्टमेकमेव हेतुरिति विरुद्धस्थले उक्तमिति । उच्यते । नीलधूमादौ

तुल्यन्यायतया सामान्याभावस्यापि तत्तज्जन्यत्वाभावरूपत्वात् । यद्यपि प्रत्येकव्याप्यत्वस्य सम्भवे बहूनामल्पानाञ्च तथात्वम्, न चेह,

---

नात्वादिति भावः । तुल्यन्यायतयेति । जन्यसामान्यान्योन्याभावतुल्यतयेत्यर्थः । अन्यथा जन्यत्वावच्छिन्नान्योन्याभावस्याप्येकस्यैवाऽखण्डस्य हेतुत्वसम्भवात्तद्विरोधः स्यादिति भावः । समुदायरूपत्वादिति । तथा च जन्यान्योन्याभावापेक्षया जन्यत्वाभावकूटस्यैव बाहुल्यमेकस्मिन्नेव जन्ये कारणभेदादनेकजन्यतासत्त्वादिति भावः । स्नेहादौ साध्ये बहूनां शीतस्पर्शानामल्पस्य च द्वयोरेव व्याप्यत्वमुपपादयन्नेवाऽकर्तृत्वे साध्ये जन्यान्योन्याभावकूटस्याऽव्याप्यत्वमाशङ्कते यद्यपीति । तथात्वम् अव्याप्यत्वम् । न चेति । क्षितिरकर्तृका

व्याप्तिरस्त्येव, अन्यथा विशेषाणामव्याप्यत्वे निराश्रया व्याप्तिः स्यात् । नीलत्वमपि न व्याप्यतावच्छेदकं गौरवात्, किन्तु धूमत्वमेव दण्डत्वेन कारणत्वे रूपमिव, धूमत्वञ्च न नीलिम्नि किन्तु तदाश्रये धूमे इति न नीलधूमस्य हेतुत्वम् । नीलधूमे नीलस्य विशेषणत्वे तद्विशिष्टे न धूमत्वम् उपलक्षणत्वे च धूमादेवानुमितिः । किञ्च व्यापकतावच्छेदकस्यैव हेतुतावच्छेदकत्वमिति न नीलधूमत्वं तथा । न चैवं धूमत्वस्यावच्छेदकत्वेऽपि सामग्रीसत्त्वान्नीलधूमादनुमित्युत्पत्तौ हेत्वाभासत्वं न स्यात् अनुमितिप्रतिबन्धकस्य तत्त्वादिति वाच्यम् । तदभावेऽपि नीलधूमप्रयुक्तसाध्यवत्प्रत्ययस्य भ्रमत्वेन तत्कारणत्वस्याभासत्वसम्भवादिति दिक् ।

एकैकस्यान्योन्याभावस्य व्यभिचारित्वात् तथा च शरीरजन्यान्योन्याभावसमुदायस्य व्याप्यत्वे न तत्र क्षित्याद्यन्योन्याभावानां निवेशो व्यर्थत्वात्, तथापि जन्यत्वशरीरजन्यत्वावच्छिन्नप्रतियोगिताकावतिरिक्तावेवाभावाविति न तत्र बहूलपभावसम्भव इत्यत्र तात्पर्य्यमिति ॥

जन्यान्योन्याभावकूटत्वस्वादित्यादौ न घटादिप्रत्येकान्योन्याभावस्य साध्यव्याप्यत्वमित्यर्थः । एकैकस्यं घटादिप्रत्येकान्योन्याभावस्य । घटादौ सकर्तृकत्वव्यभिचारित्वादित्यर्थः । स्नेहवान् शीतस्पर्शादित्यादौ तु बहूनामपि शीतस्पर्शानां प्रत्येकस्नेहाव्यभिचारित्वात् व्याप्यत्वे बाधकाभाव इति भावः । समुदायस्य व्याप्यत्व इति । सम्भवतीति शेषः । इत्यत्र दूषणे । तात्पर्यमिति । जन्यत्वात्यन्ताभावस्यैकत्वदर्शनेन जन्यत्वाद्यवच्छिन्नभेदस्याप्येकत्वस्य मूलस्वरससिद्धत्वादिति भावः ॥

विदुषां निवहैरिहैकमत्या-
यददुष्टं निरटङ्कि यच्च दुष्टम् ॥
मयि जल्पति कल्पनाधिनाथे
रघुनाथे मनुतां तदन्यथैव ॥

इति महामहोपाध्यायश्रीरघुनाथभट्टाचार्य्यशिरोमणि-
विरचिता ईश्वरानुमानतत्त्वचिन्तामणिदीधितिः
समाप्ता ।

अनुमानदीधितिः सम्पूर्णा ।

इति ईश्वरानुमानमणिदीधितिव्याख्या जागदीशी समाप्ता ।

कुर्वन्ति नित्यमनुमानमणेरनेके
प्रायः प्रयासमधिदीधिति नीतिभाजः ।
एषा पुनस्तदपि नैव निजं निरूढ-
मर्थं प्रकाशयति तेन ममैष यत्नः ॥

इति श्रीमहामहोपाध्यायजगदीशतर्कालङ्कारविरचिता
अनुमानतत्त्वचिन्तामणिदीधितिव्याख्या प्रकाशि-
काख्या ईश्वरानुमानान्ता सम्पूर्णा ।
शुभम् ।

अनुमानजागदीशी
सम्पूर्णा

—:०:—

एवं शरीराजन्यत्वेऽपि न शरीरमवच्छेदकं गौरवात्, येन विशेषणेन विना व्याप्तिर्न गृह्यते तस्यैव व्याप्यतावच्छेदकत्वनियमात्। अत एव गन्धस्यैव व्यञ्जकत्वादित्यत्राऽप्रसिद्धत्वेन रूपादिषु मध्य इति विशेषणं विना व्याप्तिर्ग्रहीतुं न शक्यत इत्यसिद्धिवारकमपि विशेषणं सार्थकमेव। सुरभिधूमविशेषादौ च चन्दनप्रभवान्यादेः कारणत्वात् कारणाभावस्य कार्याभावप्रयोजकतया व्याप्यत्वानिश्चयः। व्यापके च न व्यर्थविशेषणता, विशिष्टस्य कारणत्वेन व्यापकत्वात्। परिशेषव्यतिरेकिणि विपक्षबाधकेनाऽनन्यगतिकतया विशिष्टस्य व्यापकत्वात् विशिष्टाभावस्य हेत्वभावव्याप्यत्वम्। यत्र च विपक्षबाधकं नास्ति तत्र विशिष्टस्य व्यापकतापि न, यथा कार्यस्य द्विकर्तृकत्वेनापि शरीरजन्यत्वाभावोऽखण्डो हेतुः। यदि हि शरीरजन्यत्वं सकर्तृकत्वप्रयोजकं स्यात्तदा तदभावप्रयुक्तः सकर्तृकत्वाभाव इति तस्य साध्यव्याप्यता स्यात्, न चैवं, किन्तु जन्यत्वं लाघवात्तथा तथा चाऽजन्यत्वमेवोपाधिः। साध्यव्याप्याभावः साध्याभावव्यापक इति नियमेन तस्य साध्यव्यापकतानिश्चयात् सकर्तृकत्वशरीरजन्यत्वयोर्व्याप्यभावेन तदभावयोरपि व्याप्यभाव इति व्याप्यत्वासिद्धत्वाच्च। अत एव शरीरजन्यत्वाभावस्याऽकर्तृकत्वव्याप्यत्वात्तदभावयोरपि व्याप्य-व्यापकभाव इति निरस्तम्। शरीरजन्यत्वस्य सकर्तृकत्वाप्रयोजकत्वात्। न चाऽजन्यत्वं पूर्वसाधनव्यतिरेकत्वेन नोपाधिः सत्प्रतिपक्षोच्छेदप्रसङ्गादिति वाच्यम्। स्थापनाया यत्राभासत्वं तत्र विशेषादर्शनदशायां सत्प्रतिपक्षे पूर्वसाधनव्यतिरेकस्य साध्याव्यापकत्वेनानुपाधित्वात्। यथा शब्दोऽनित्यो गुणत्वादित्यत्र शब्दो नित्यो व्योमैकगुणत्वादित्यनेन सत्प्रतिपक्षे गुणत्वाभावो नोपाधिः, जलपरमाणुरूपे साध्याव्यापकत्वात्। न चैवमनैकान्तिकत्वमेव तत्रोद्भाव्यं, सत्प्रतिप-

क्षमुपेक्ष्य तस्योद्भावनानर्हत्वात् । किञ्च प्रागभावप्रतियोगित्वे सति समवेतत्वस्य तत्प्रतियोगित्वे सति सत्त्वस्य सत्त्वे सत्युत्पत्तिमत्त्वस्य वा हेतुत्वे एषामन्यतमव्यतिरेक उपाधिरिति न पूर्वसाधनव्यतिरेकः । अत एवाऽजन्यत्वस्य नोपाधित्वं ध्वंसे साध्याव्यापकत्वादिति न दोषः ।

अन्ये तु यन्निष्ठा यान्निरूपिता च व्याप्तिर्येन विशेषणेन विना न गृह्यते तत्र विशिष्टं व्याप्यतावच्छेदकम् अकर्तृकत्वानिरूपिताभावनिष्ठव्याप्तौ च शरीरं विनैव प्रतियोगितया जन्यत्वमवच्छेदकं कल्प्तमिति न शरीरजन्यत्वमवच्छेदकं धूमे नीलधूमत्वमिव, अतिगौरवेण शरीरजन्यत्वमप्रतियोगितया च जन्यत्वं नावच्छेदकमिति व्याप्यतावच्छेदकाभावान्न शरीरजन्यत्वाभावोऽकर्तृकत्वव्याप्यः । व्यभिचाराभावात् तथेति चेत् । न। क्षित्यादावेव व्यभिचारात्, अन्यथा क्षित्यादि नाऽदृष्टहेतुकं शरीरजन्यत्वाभावादित्यापि स्यात् । नन्वस्तु तावदशरीर–नित्यज्ञानादिकर्त्रनुमितिस्तथापि साऽनुमितिरयथार्था अशरीरे कर्तृत्वज्ञानत्वात् ज्ञानेच्छा–प्रयत्नेषु नित्यत्वज्ञानत्वात् शरीराजन्ये सकर्तृकत्वज्ञानत्वात्, घटः कर्त्रा, घटज्ञानादिकं नित्यं, व्योम सकर्तृकमिति ज्ञानवदिति साध्यम्। न चोपजीव्यबाधः , अनुमितेर्हि उपजीव्या । नन्वस्तु तदयथार्थत्वमपीति चेत्, न, कर्तृकार्ययोर्निरुपाधिकार्य–कारणाभावेन एतस्याऽप्रयोजकत्वात् । अन्यथा पर्वते वह्न्यनुमितिरयथार्था उभयसिद्धवह्निमद्भिन्ने वह्निज्ञानत्वादित्यादिना सकलान्वयव्यतिरेक्युच्छेदः । किञ्चानुमितेरयाथार्थ्यमनेन ज्ञाप्यं न तु कार्यं तथा च दोषादुत्पन्नस्यानेन ज्ञापने तत्रायमेव दोषो दोषान्तरं वा । नाद्यः, अन्योन्याश्रयात् उत्पन्ने तस्मिन् ज्ञापनं ज्ञापकादेव च तस्माद्दोषात्तदुत्पत्तिरिति । नान्त्यः, असिद्धेः । तर्कापरिशुद्धिस्तु न दूषणम् ।

यादे ईश्वरः कर्त्ता स्यात् शरीरी स्यात् इष्टसाधनताज्ञानवान् स्यात् प्रयोजनवान् स्यात् अनित्यज्ञानवान् स्यात्, क्षित्यादि यदि सकर्तृकं स्यात् शरीरिकर्तृकं स्यात् इत्यादितर्काणां विपर्यये आश्रयासिद्धिव्यर्थविशेषणत्वादिना विपर्ययापर्यवसानेनाभासत्वात् ।

ननु क्षित्यादावेककर्तृसिद्धिः कुतः एककर्तृकत्वेन व्याप्त्यभावात् । न च लाघवात्, तस्याऽप्रमाणत्वात् । सकर्तृकत्वप्रमाणादेव लाघवसहकृतात्तत्सिद्धिरिति चेत्, न तावदनुमितिमात्रे लाघवं सहकारि, व्यभिचारात् मानाभावाच्च । न हि लिङ्गपरामर्शे सति तद्विलम्बेनाऽनुमितिविलम्बो येन सहकारिता स्यात् । नापि लघ्वनुमितौ, अन्योन्याश्रयात् । नापि व्यक्त्यनुमितौ, धूमेन वह्न्यनुमितौ एकद्विहस्तसंशयाभावापत्तेः । साधकाभावेन नानात्वासिद्धौ कर्तृसिद्धिरेवैककर्तृसिद्धिरिति चेत् । न । एकत्वसाधकाभावेनैकत्वासिद्धौ कर्तृसिद्धिरेव नानात्वासिद्धिरित्यस्यापि सुवचनात् । अथ यमर्थमनालम्बमानानुमितिः पक्षे साध्यसंसर्गं न विषयीकरोति स पक्षधर्मताबलात्सिद्ध्यति न त्वधिकमपि, तथा च द्वितीयं कर्त्तारमविषयीकुर्वत्यपि कर्त्तारं विषयीकरोत्येवेति न द्वितीयमवगाहते, एकस्तु कर्त्ता सिध्यति तदविषयत्वे कर्तृविषयतैव न स्यात् एकविषयत्वाभावे नानाविषयत्वस्याप्यभावात्, तदघटितत्वात्तस्येति चेत्, एवं तर्हि कर्त्रैकत्वमपि न विषयः स्यादेकत्वविषयत्वं विनापि कर्तृविषयत्वसम्भवात् । वस्तुगत्यैकः सिध्यति न त्वेकत्वेनेति चेत्, न, एकत्वासिद्ध्या वस्तुगत्यैक इति ज्ञातुमशक्यत्वात्, तथा चेश्वरे एकत्वानेकत्वयोर्नित्यसंशय इति । उच्यते । यत्र प्रमाणे लघु-गुरुविषयता सम्भवति तत्र लाघवसहकारिता, कारणता-कार्यता-व्याप्यतादिग्राहके प्रत्यक्षे प्रवृत्तिनिमित्तग्राहके उपमाने शब्दशक्तिग्राहकानुमाने तथाविधप्रमाणमात्रे सकलतान्त्रिकैः सहकारित्वकल्पनात् ।

एवं लाघवमेवं गौरवमिति ज्ञानानन्तरं बाधकं विना लघूनामेव कारणत्व-कार्यत्व-प्रवृत्तिनिमित्तत्व-शब्दशक्यत्वानां ज्ञानदर्शनात् । तत्रापि लाघवानादरे शब्दशक्यत्वादिसंशये तन्मूलकव्यवहारोच्छेदो विनिगमकाभावात् सोऽयं विचारमारभते लाघवञ्च न तदङ्गमङ्गीकरोतीति महत्साहसम् । नन्वेवं वस्तुगत्या नानाकर्तृकेषु घटेषु घटत्वेन कुलालकर्तृकत्वानुमानेऽपि बाधकानवतारदशायां लाघवादेककर्तृसिद्धिः स्यात् । न चेष्टापत्तिः, अनुमित्यनन्तरं नानैककर्तृकत्वे संशयादिति चेत् । न । तत्रापि लाघवेन कर्त्रैक्यमेव सिद्ध्यति तत्सन्देहस्तु ज्ञानप्रामाण्यसंशयादिति पश्चान्नानाकर्तृकत्वसाधकप्रमाणादेककर्तृकतानुमानं तत्र बाध्यते । न चैवं क्षित्यादिकर्तर्यपि प्रामाण्यसंशयादेकत्वसंशयादेकत्वसंशयो दुरुच्छेदः, एकत्वे बाधकस्याभावेन प्रामाण्यनिश्चयात् । न चैकत्वसाधकाभाव एव बाधकः, अनुमितेरेव लाघवसहकारेण एकत्वसाधकत्वात् ।

अन्ये तु क्षितिकर्त्ता अङ्कुरकर्त्राभिन्नः अशरीरकर्तृत्वात् अङ्कुरकर्तृवदित्यभेदानुमानादेककर्तृसिद्धिः । न च क्षितिकर्त्ता अङ्कुरकर्तृभिन्नः अङ्कुरेऽकर्तृत्वात् कुलालवदिति सत्प्रतिपक्षः, अनित्यज्ञानानामाश्रयत्वस्योपाधित्वादित्याहुः । अत्राप्यप्रयोजकत्वे भेदाभेदयोर्गौरव-लाघवे एव शरणम् ।

तथापि कथं नित्यसर्वविषयज्ञानसिद्धिः । पक्षधर्म्मताबलादिति चेत्, व्यापकतयावगतस्य पक्षसम्बन्धमात्रं पक्षधर्म्मत्वेनोः सिध्यति तथा च पक्षे तदुपादानगोचरज्ञानमात्रं सिध्येन्न तु नित्यसर्वविषयज्ञानं, तेन रूपेण व्यापकत्वाग्रहात् । न च येन विनाऽनुपपत्तिः सोऽपि विषयः, व्यतिरेकविलयापत्तेः ।

तत्र प्राञ्चः । यमर्थमनालम्बमानानुमितिः पक्षे साध्यसम्बन्धं

न विषयीकरोति स पक्षधर्म्मतावलात्सिध्यतीत्यनुपपत्तिमूलको-ऽन्वयी, प्रतीतानुपपत्त्या च व्यतिरेकी। तदिहाऽनादिद्व्यणुकादिकार्यप्रवाहस्य पक्षत्वे तदुपादानस्यानादिज्ञानगोचरत्वं विना नोपादानगोचरज्ञानजन्यत्वमनादिकार्यप्रवाहस्यानुमितिरालम्बते, अनादितैव च नित्यता, सर्वमुक्तावपि तत्सत्त्वमनादिभावत्वात्, पक्ष-तदुपादानविषयतैव च सर्वविषयता, लाघवात्तु तावद्विषयकमनाद्येकमेव ज्ञानं सिध्यति, न तु नित्यानित्यज्ञानानीति।

नव्यास्तु अनित्यज्ञानाजन्यत्वेन पक्षविशेषणात् ज्ञानं सिध्यन्नित्यमेव सिध्यति अनित्ये बाधादिति।

वाचस्पतिमिश्रास्तु लाघवादेकज्ञानसिद्धौ उत्पत्तिमतोऽनादिकार्यप्रवाहं प्रत्यजनकत्वात् परिशेषेण नित्यज्ञानादिसिद्धिः। नियतविषयता च ज्ञानस्य कारणाधीना, कारणञ्च नित्यज्ञानान्निवर्त्तमानं नियतविषयतामादाय निवर्त्तत इति सर्वविषयत्वसिद्धिरिति।

षट्पदार्थप्रतिपादकवेदकर्तृत्वेनेश्वरस्य षट्पदार्थगोचरसाक्षात्कारवत्त्वेन वा सार्वज्ञम्। घटाकाशसंयोगादिकं प्रति ईश्वरस्य कर्तृत्वात् घटादिगोचरमपि ज्ञानं सिद्धमिति केचित्।

ननु घटादीनां कथमीश्वरकर्तृकत्वं भवति। घट ईश्वरकर्तृकः कार्यत्वात् क्षितिवदित्यनुमानादिति चेत्। न। घटस्य द्विकर्तृकतया तदृष्टान्तेन क्षित्यादिरपि द्विकर्तृका स्यात् तथा च घटवत् क्षितिः क्षितिवद्घट इतीश्वरानन्त्यम्। कार्ये कर्तृत्वेन कारणता न तु द्विकर्तृत्वेनेति चेत्, तर्हि नेश्वरकर्तृकत्वेन कारणता किन्तु कर्तृत्वेनेति। मैवम्। ज्ञानादीनां नित्यत्वेन सर्वविषयतया घटाद्युपादानविषयत्वमपीति कथं न तेषां घटादिकारणता कुलालादिज्ञानतुल्यत्वात्। तदाहुराचार्याः—"परमाण्वदृष्टाद्यधिष्ठातृसिद्धौ ज्ञानादीनां नित्यत्वेन सर्वविषयत्वे वेमाद्यधिष्ठानस्यापि न्यायमा-

त्वात् न तु तदधिष्ठानार्थमेवेश्वरसिद्धिः"—इति । "अहं सर्वस्य प्रभवो मत्तः सर्वं प्रवर्त्तते"—इत्याद्यागमाच्चायमर्थोऽध्यवसेयः ।

अथेश्वरस्य सर्वज्ञत्वे सर्वविषयभ्रान्तेर्ज्ञाने ईश्वरोऽपि भ्रान्तः स्यात् भ्रमस्येव तस्यापि भ्रमविषयविषयकत्वादिति चेत् । न । रजतत्वप्रकारकज्ञानवानयमिति ज्ञानं न भ्रमः अभ्रान्तस्य तथात्वात्, इदं रजतमिति ज्ञाने रजतत्वं प्रकारस्तेन स भ्रमः, ईश्वरज्ञाने च रजतत्वप्रकारकत्वं प्रकार इति स न भ्रमः । अत एवास्मदादिरपि भ्रान्तिज्ञो न भ्रान्त इति ॥ स्यादेतत्, प्रयोजनं विना कथमीश्वरः प्रवर्त्तते सुखस्याभावात् अधर्म्माभावेन निर्दुःखत्वात् । करुणया प्रवर्त्तते इति चेत्, तर्हि परसुख—दुःखप्रहाणे प्रयोजने, तथा च स्वर्गिणमेव सृजेन्न नारकिणम् । धर्म्माधर्म्मपरतन्त्रत्वात्तदनुरूपं फलं प्रापयतीति चेत्, तर्हि आवश्यकत्वात् कर्म्मनिमित्तमेव जगद्वैचित्र्यमस्तु किमीश्वरेणानपेक्षितकीटादिज्ञानवता । कर्म्मनिरपेक्षत्वे चैकदैव सदा च सर्ग—प्रलयौ स्यातां, ज्ञानादीनां नित्यत्वात् । किञ्च तत्प्रयत्नस्य करुणाजन्यत्वे शरीरादिजन्यत्वापत्तौ संसारितापत्तिरिति । न । ईश्वरानभ्युपगमे विचारस्याश्रयासिद्धत्वात् । तमभ्युपगम्य पृच्छसि चेत्, तदाकर्णय, जगत एव तदिच्छाविषयत्वेन स्वेष्टसाधनताज्ञानसत्त्वात् । वस्तुतस्तु क्षित्यादितत्तदसाधारणक्रमिकादृष्टादिसामग्रीसमवहिता ईश्वरज्ञानादयो यदा भवन्ति तदा क्षित्यादिकं करोतीति व्यवहारः । सर्ग—प्रलयासाधारणक्रमिकादृष्टादिसामग्रीसमवहितत्वमेव तदिच्छायाः चिकीर्षासञ्जिहीर्षात्वे । न चैवं किं तज्ज्ञानादिनेति वाच्यम् । क्षित्यादीनां कार्यत्वेन ज्ञानजन्यतया नित्यज्ञानादीनामपि जनकत्वात्, सुखादिशब्दयोरात्माकाशादिवत् ।

नन्वशरीरात्कथं वेद—घटादिशब्दव्यवहारसम्प्रदायः । उच्य-

ते । सर्गादावदृष्टोपगृहीतभूतभेदान्मीनशरीरोत्पत्तावदृष्टवदात्मसंयोगाददृष्टसहकृतप्रयत्नवदीश्वरसंयोगाद्वा सकलवेदार्थगोचरज्ञानाद्विवक्षासहितान्मीनकण्ठ–तालवादिक्रिया–तज्जन्यसंयोगाद्वेदोत्पत्तिः, एवं कुलालादिशरीरावच्छेदेनाऽदृष्टसहकृतप्रयत्नवदीश्वरसंयोगात्तद्बुद्धीच्छासहितात् प्रयत्नोत्पत्तौ सकलघटानुकूलव्यापारादृघटोत्पत्तिः, एवं प्रयोज्यवृद्धप्रयोजकवृद्धभावादिमच्छरीररूपावच्छेदेनाऽदृष्टसहकृतेश्वरज्ञानेच्छा–प्रयत्नादेव वाग्व्यवहारः, ततस्तदर्शी बालो व्युत्पद्यते, सोऽयं भूतावेशन्यायः ।

यत्तु यथा लिप्यादिना मौनिश्लोकमनुमाय पठति तथा सर्गान्तरोत्पन्नतत्त्वज्ञानवता भोगार्थं सर्गादावुत्पन्नेन मन्वादिना सर्वज्ञेश्वराभिप्रायस्थो वेदः साक्षात्कृत्याऽनूद्यते, ततोऽग्निमसम्प्रदायः, स एव च कायव्यूहं कृत्वा घटादिवाग्व्यवहारं प्रवर्त्तयतीति मतम् । तन्न । प्रतिसर्गाद्यनन्तसर्वज्ञकल्पनायां गौरवात्, तेषामेव क्षित्यादिकर्तृत्वसम्भवेनेश्वरानुमानाच्च । एतेन सर्गादौ सर्गान्तरसिद्धयोगिन एव क्षितिकर्त्तारः सन्त्विति परास्तम् । सर्गादावनन्तसर्वज्ञसिद्धिश्च किं प्रमाणान्तरात्, क्षित्यादिकर्तृग्राहकाद्वा । नाद्यः, तदसम्भवात् । नान्त्यः, अनादिद्व्यणुकादिकार्यप्रवाहस्य सकर्तृकत्वानुमानाल्लाघवसहकृतादेकस्यैव सर्वज्ञस्य सिद्धेः । अथेश्वरज्ञानमूलकशब्दशक्तिग्रहे प्रयोज्यव्यापारानुमितघटज्ञाने घटशब्दस्य कारणत्वग्रहो भ्रमः स्यात् तदीयज्ञानस्य नित्यत्वात् तथा च तज्जन्यघटशब्दशक्तिग्रहस्य भ्रमत्वेन सकलशाब्दज्ञानं भ्रमः स्यात् भ्रमपरम्परामूलकत्वात् । अनित्यसर्वज्ञमूलकशाब्दग्रहे च नायं दोष इति चेत् । न । व्यापारानुमितमिदं घटज्ञानं घटपदजन्यमिति ज्ञानस्य शब्दशक्तिग्रहकारणस्य भ्रमत्वेऽपि घटपदं घटशक्तमिति ज्ञानस्य यथार्थत्वात् विषयाबाधात् । न च भ्रममू-

ल्त्वेनाऽस्य भ्रमत्वमनुमेयम्। तदंशे व्यधिकरणप्रकाराभावेन बाधात् बाधितविषयत्वस्योपाधित्वाच्च। अत एव घटमानयेति शब्दानन्तरं सूत्रसञ्चाराधिष्ठितदारुपुत्रकस्य घटानयनव्यवहारदर्शनात् बालो घटपदे व्युत्पद्यते। तन्मूलकशाब्दज्ञानमपि न भ्रमः, तस्यापि भ्रमत्वे प्रयोज्यव्यवहारादिदानीं व्युत्पत्तिर्न स्यात्, किमयं प्रयोज्यश्चेतनव्यवहारात् व्युत्पन्नोऽचेतनव्यवहाराद्वेति संशयस्य वज्रलेपायमानत्वादिति। "विश्वतश्चक्षुरुत विश्वतोमुखो विश्वतोबाहुरुत विश्वतस्पात्। सं बाहुभ्यां धमति सं पतत्रैर्द्यावा—भूमी जनयन्देव एकः"—इत्यादि श्रुतयः "उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः। यो लोकत्रयमाविश्य विभर्त्यव्यय ईश्वरः"—इत्यादिस्मृतयश्च मानत्वेनानुसन्धेया इति। स्यादेतत् ईश्वरवच्छक्तिरपि कार्य्येणैवानुमीयते, तथा हि यादृशादेव करतलानलसंयोगादाहो दृष्टस्तादृशादेव प्रतिबन्धकसत्त्वे सति न जायते, अतो यदभावात्कार्याभावस्तदभ्युपेयं वह्न्यादौ, तेन विना तदभावायत्तदाहाभावानुपपत्तेरिति व्यतिरेकमुखेन शक्तिसिद्धिः। न चाऽदृष्टवैगुण्यम्, दृष्टसाद्गुण्ये तदभावात्, तस्य तदर्थत्वात्। अन्यथा दृढदण्डनुन्नमपि चक्रं न भ्राम्येत्। अथाऽदृष्टविलम्बादपि विलम्बो यथा बन्ध्यास्त्रीसम्प्रयोगे, परमाणुकर्म्मणि, अध्ययनतुल्यत्वेऽपि एकत्र फलाभावे चेति चेत् । न । अदृष्टविलम्बो हि न तन्नाशानुत्पादौ, मण्यपसारणानन्तरं दाहाभावप्रसङ्गात्। किञ्च नियमतो मणिसद्भावे कार्याभावस्तदभावे कार्यमिति दृष्टत्वात् मण्याद्यभाव एव कारणम्, अन्यथा कदाचिन्मण्याद्यभावेऽपि तदभावात् कार्यं न स्यात्, बन्ध्यासम्प्रयोगे तु दृष्टव्यभिचाराददृष्टविलम्बादेव विलम्बः। अदृष्टञ्च कचित् साक्षाज्जनकम्, अन्यथा परम्परया हेतुरपि न स्यात्। न च समप्रज्ञयोः समञ्च निरन्तरमभ्यस्यतोरेकः

प्रगल्भो नाऽपर इति दृश्यते। न च सर्वोत्पत्तिमतामदृष्टं निमित्तकारणम्, अगम्यागमनादिसाध्ये सुखे व्यभिचारात्। तद्धि नाऽधर्म्मात्, सुखत्वात्, नापि धर्म्मात्, तेन हि अगम्यागमनमुत्पाद्य सुखमुत्पादनीयम्, तथा चागम्यागमनकारणत्वेन न स धर्म्मः श्येनापूर्ववन्निषिद्धफलकत्वेनाऽनर्थकत्वात्। दाहप्रतिकूलादृष्टादेव दाहाभाव इति चेत्। न। तस्योत्तेजकाभावसहकृतमण्यजन्यत्वे तत्राऽदाहार्थिनोऽप्रवृत्तिप्रसङ्गात्। तज्जन्यत्वेऽपि तदुत्पादकादेव दाहाभाव इति किमदृष्टेन, अप्रथमोपस्थितत्वात् उपजीव्यत्वाच्च। प्रतिबन्धकाभावहेतुत्वस्य तेनाभ्युपगमात् अदृष्टोत्पत्तौ शौचाचमनादेः साधारणस्यात्राप्यन्वयः स्यात्, अशुचेरेव तदुत्पत्तौ शौचे सति तदभावापत्तेः, प्रतिपक्षसन्निधापकादृष्टस्यैव प्रतिबन्धकत्वे सति मण्यप्रयोगेऽपि दाहानापत्तिः अग्रिमकाल एव सन्निधिदर्शनेन तदसिद्ध्यभावात्। अस्तु तर्हि उत्तेजकाभावसहकृतप्रतिबन्धकाभावस्यान्वयव्यतिरेकाभ्यां हेतुत्वम्। एवं केवलोत्तेजकसद्भावे उभयसत्त्वे उभयाभावे च विशिष्टाभावोऽनुगतो हेतुः, प्रतिबन्धकत्वञ्च कारणीभूताभावप्रतियोगित्वम्, तच्च मण्यभावत्वेन न तु प्रतिबन्धकाभावत्वेनेति नान्योन्याश्रयः। अत एव प्रतिबन्धकत्वाभिमतमण्यादीनामभावकूट एव कारणं तेन मणिसद्भावे मन्त्राद्यभावेऽपि न कार्य्यम्। अनतिरिक्ताभाववादिमते च व्यवहारार्थं तत्स्थानाभिषिक्तस्य हेतुत्वम्। न चाऽभावो न कारणम्, भाववत्तद्ग्राहकतौल्यात्, दृष्टञ्च कुड्यसंयोगाभावस्य गतौ, अनुपलब्धेश्चाभावज्ञाने, विहिताकरणस्य प्रत्यवाये, निर्दोषत्वस्य वेदप्रामाण्ये जनकत्वमिति प्राञ्चः। मैवम्। विशिष्टं हि नार्थान्तरं येन तदभावोऽनुगतः स्यात्, किन्तु विशेषण-विशेष्य-सम्बन्धा इति तेषां प्रत्येकाभावस्य हेतुत्वे क्वचिद्विशेष्यमण्यभावः क्वचिदुत्तेजकाभावरूपविशे-

षणाभावः क्वचिदुभयं कारणमिति व्यभिचारेणैकमपि हेतुर्न स्यात् । स्यादेतत् प्रतियोगिभेदादिवत्प्रतियोगितावच्छेदकविशेषणभेदादप्यभावो भिद्यते, अन्यथा पृथिव्यादित्रयप्रत्येकरूपाभावेऽवगतेऽपि वायौ रूपसंशयो न स्यात् । एवञ्च यथा केवलदण्डसद्भावे दण्ड–पुरुषसद्भावे द्वयाभावे च विशेषण–विशेष्योभयाविरहमयुक्तः केवलपुरुषाभावोऽबाधितानुगतव्यवहारबलात् प्रतीतिसिद्धः तथा विशेष्यस्य प्रतिबन्धकस्याभावे विशेषणस्योत्तेजकाभावस्याभावे उभयाभावे च केवलप्रतिबन्धकाभावो विशेष्य–विशेषणोभयाभावव्यापकोऽनुगत एव दाहकारणमस्तु । अथ विशेषणाद्यभावैरेव केवलपुरुषाद्यभावव्यवहारः एकशक्तिमत्त्वादिति चेत् । न । अनुगतव्यवहारस्याऽनुगतज्ञानसाध्यत्वात् शक्तेश्चातीन्द्रियत्वात् । अथोत्तेजकप्रयोगकाले मणेः कोऽभावः, न तावत्प्राक्प्रध्वंसाभावः, तयोः प्रतियोग्यसमानकालत्वात् । न च श्यामोऽयमासीदित्यत्र श्यामध्वंसप्रयुक्तः श्यामघटत्वेन पक्वघटस्य ध्वंस एव न तु घटत्वेन, तथोत्तेजकाभावध्वंसप्रयुक्त उत्तेजकाभावत्वेन मणेः ध्वंस एवेति वाच्यम् । ध्वंसस्यानन्तत्वेन उत्तेजकापनयेऽपि दाहप्रसङ्गात् । नाप्यत्यन्ताभावः, तस्य कादाचित्कत्वाभावादिति चेत् । न । यथा दण्डोपनयापनयदशायां केवलपुरुषाभाव उत्पाद–विनाशवान्, अन्यथा अबाधितकेवलपुरुषाभाव–तदभावव्यवहारयोरुपपादयितुमशक्यत्वात्, तथोत्तेजकोपनयापनयशृङ्खलायां प्रतिबन्धकाभावोऽपि तथैव स्वीकरणीयः तुल्यन्यायत्वात् । यदि च संसर्गाभावत्रयवैधर्म्यात्तत्र नान्तर्भवति तदा तुरीय एव संसर्गाभावोऽस्तु, न हि कल्पविशेषबाधे सामान्यबाधः, विशेषान्तरमादायापि तस्य सम्भवात् । अन्यथा कल्पनानादिसंसर्गाभावादिवैधर्म्येण ध्वंसोऽपि न सिध्येद्व्यवहारान्यथानुपपत्तिश्च

तुल्यैव, सोऽयमस्माकं सगोत्रकलहो न तु शक्तिवादः । अस्तु वा ध्वंस एवाऽसौ, संसर्गाभावविभागे जन्याभावत्वेन ध्वंसस्य विभजनात् । न चैवं विनाशित्वेन प्रागभाव एव सः, परिभाषाया अपर्य्यनुयोज्यत्वात् । यद्वा अत्यन्ताभाव एवासौ, तस्य नित्यत्वेऽपि कदाचिदप्रतीति—कार्य्यानुदयौ प्रत्यासत्तिकादाचित्कत्वात्, प्रत्यासत्तिश्च विशेषणाभावो विशेष्याभाव उभयाभावश्च, तदैव विशिष्टात्यन्ताभावसत्त्वादिति । तन्न । यदि ह्यतीतविशेषणावच्छेदेन विद्यमानस्यैव विशेष्यस्य ध्वंसः स्यात् तदा क्षणरूपातीतविशेषणावच्छिन्नत्वेन घटस्य विनाशः स्यादिति क्षणभङ्गापत्तिः । किञ्च विद्यमानस्य विनष्टत्वेनाऽप्रतीतेः शिखा विनष्टा पुरुषो न विनष्ट इति विपरीताबाधितप्रत्ययाच्च न विशेषणाभावेऽपि विशेष्यध्वंसः । श्यामोऽयमासीत् केवलोयमासीत्पुरुषः इत्यादौ "सविशेषणे हीति" न्यायेन विशेष्यवति श्याम—कैवल्यादिध्वंस एव प्रतीयते, ध्वस्तस्य ध्वंसानुपपत्तेश्च न विद्यमानस्य ध्वंसः । एतेनोत्तेजकसद्भावे सत्युत्तेजकाभावविशिष्टमणेरुत्पन्नध्वंसस्योत्तेजकापनयसमये ध्वंसो जातोऽध्वस्तश्च ध्वंसः कारणमिति न विफल उत्तेजकापनय इत्यपास्तम् । विद्यमानध्वंसस्य च ध्वंसाभावात् । न च ध्वंसान्यः संसर्गाभावो विशिष्टाभाव इति वाच्यम् । उत्पन्नाभावस्य विनष्टप्रतीतिहेतुतया ततोऽपि विद्यमानस्य विनष्टत्वमत्ययापत्तेः । नापि विशिष्टाभावोऽत्यन्ताभावः, तथा हि स एव क्वचिद्विशेषणाभावसहितः क्वचिद्विशेष्याभावसहितो दाहकारणमित्यननुगमस्तदवस्थ एव, विशेषण—विशेष्याभावयोः प्रत्यासत्तित्वावच्छेदकानुगतधर्म्माभावात् । अथ विशिष्टविरोधित्वं विशेषण—विशेष्याभावयोरनुगतं तदवच्छेदकमस्ति तयोः सत्त्व एव विशिष्टात्यन्ताभावसत्त्वादिति चेत्, तर्हि विशिष्टविरोधित्वेनानुगतेन तयोरेव हि विशिष्टाभावत्वेन दाहव्यवहाराद्यौ

जनकत्वमस्तु कृतं तदुपजीविनाऽतिरिक्तविशिष्टाभावेन। अथोत्तेजककाले विद्यमानात्यन्ताभावानुवृत्तावप्युत्तेजकापनयने उत्तेजकाभावव्यक्तिर्या जाता तदवच्छिन्नमणेरभावो न तत्रेति तदा न कार्योदयः तत्तदुत्तेजकाभावविशिष्टमणेरभावकूटस्य जनकत्वादिति चेत्। न। तत्तदुत्तेजकाभावानामननुगतत्वेनानुगतविशिष्टाभावव्यवहारानुपपत्तेः, उत्तेजकाभावत्वेनानुगमेऽतिप्रसङ्ग एव। अथ विशेषण–विशेष्याभावयोर्विशिष्टविरोधित्वमनुगतकारणतावच्छेदकं यत्र तदन्यतराभावस्तत्र न विशिष्टं यत्र विशिष्टं तत्र न तयोरभाव इति सहानवस्थाननियमस्य विरोधस्यानुभवसिद्धत्वादिति चेत्। न। सहानवस्थाननियमो न परस्परविरहरूपतया विशेषण–विशेष्याभावस्य प्रत्येकं विशिष्टाभावतया तत्प्रत्येकाभावाभावस्य विशिष्टत्वापत्तेः तथा च विशेषण–विशेष्ययोः प्रत्येकं विशिष्टत्वापत्तिः तदभावस्य तत्त्वात्। न चोभयाभावाभाव उभयं विशिष्टम्। एवं ह्यभावद्वयं विशिष्टाभावो न तु प्रत्येकाभावरूप इति प्रत्येकाभावात् विशिष्टाभावव्यवहारो न स्यात्। नापि परस्परविरहव्याप्यत्वं तदाक्षेपकत्वं वा, विशेषण–विशेष्याभावस्य विशिष्टाभावत्वेन तदव्याप्यत्वात्तदनाक्षेपकत्वाच्च, अभेदे तयोरभावात्। एतेनान्यदपि विशिष्टव्यवहारविरोधित्वादिनाऽनुगतत्वमपास्तम्। केनाप्यनुगतेन रूपेण विशेषण–विशेष्याभावस्य विशिष्टाभावत्वे प्रत्येकाभावाभावस्य विशेषण––विशेष्यान्यतरमात्रस्य विशिष्टत्वापत्तेः, तदभावाभावस्य तत्त्वादित्युक्तत्वात्, तस्माद्विशेषण–विशेष्याभावो विशेषणावच्छिन्नविशेष्याभावो न विशिष्टाभाव इति। अत्रोच्यते, विशेषण–विशेष्ययोः सम्बन्धाद्विशिष्टव्यवहार इति तयोः सम्बन्धाभावाद्विशिष्टाभावव्यवहारः घट–तदभावव्यवहाराविव घटसत्त्वासत्त्वाभ्याम्। न हि तयोरसम्बन्धे विशिष्टव्यवहारः, न वा त-

दभावे सति न विशिष्टाभावव्यवहारः । यस्य यत्र यः सम्बन्धः स एव तत्र तस्य वैशिष्ट्यं, स च सम्बन्धाभावो विशेषणाभावात् विशेष्याभावादुभयाभावात्, सर्वत्राऽविशिष्ट एकः तेषां व्यापकोऽनुगतविशिष्टाभावव्यवहारादिकारणम्, इह दण्डी पुरुषो नास्तीत्यत्र तथा दर्शनात् । अत एव दण्डमात्रसद्भावे दण्ड–पुरुषसद्भावे उभयाभावे च कैवल्य–पुरुषयोः सम्बन्धाभावः सर्वत्रास्तीत्यनुगतः केवलपुरुषाभावव्यवहारः । एवञ्च प्रतिबन्धकोत्तेजकाभावयोः सम्बन्धाभावो दाहकारणम् । स च प्रतिबन्धकाभावे प्रतिबन्धकोत्तेजकसद्भावे उभयाभावे चास्ति, सर्वत्र प्रतिबन्धकोत्तेजकाभावयोः सम्बन्धो नास्तीति प्रतीतेः । नन्वेवं यत्र प्रतिबन्धकोत्तेजकाभावौ तत्रापि दाहः स्यात् अधिकरणाभावयोरतिरिक्तसम्बन्धाभावादिति चेत् । न । तदभावेऽपि स्वरूपसम्बन्धस्याभावात् सर्वत्र स्वरूपसम्बन्धादेवाऽधिकरणाभावयोर्वैशिष्ट्यप्रतीतेः । तथापि प्रतिबन्धकोत्तेजकाभावावेव स्वरूपसम्बन्धस्तयोरभावश्च प्रतिबन्धकाभाव उत्तेजकश्च दाहकारणं, तथा चोभयाभावे उत्तेजकासत्त्वे परं दाहः स्यात्, उत्तेजकवति प्रतिबन्धके दाहो न स्यादिति चेत् । न । अधिकरणाभावावेव स्वरूपसम्बन्धः तयोर्घटवद्भूतलचत्वरीयतदभावयोरपि स्वरूपसत्त्वे घटवति घटाभावव्यवहारापत्तेः , किन्तूपाधिष्टस्वभावत्वं, तच्च सम्बन्धान्तरं विना विशिष्टप्रत्ययजननयोग्यत्वम् । न च घटवद्भूतल–चत्वरीयतदभावयोर्विशिष्टप्रत्ययजननयोग्यत्वमस्ति, घटवति कदापि घटाभावप्रत्ययानुदयात्, तादिहापि प्रतिबन्धकोत्तेजकाभावयोर्विशिष्टप्रत्ययजननयोग्यत्वं स्वरूपसम्बन्धः , अन्यथोत्तेजकवति प्रतिबन्धके चत्वरीयोत्तेजकाभावाविशिष्टप्रत्ययापत्तेः । तादृशस्वरूपसम्बन्धाभावश्च प्रतिबन्धकाभावे प्रतिबन्धकोत्तेजकसद्भावे उभयाभावे चाविशिष्ट एव ।

यद्वा अदण्डपुरुषस्याभावे दण्डी पुरुषो न प्रतियोगी तस्याऽदण्डत्वाभावात् किन्तु तदन्यः, तस्याभावो दण्डिसद्भावेऽपि दण्डमात्रसत्त्वे उभयासत्त्वे चाविशिष्ट इति तस्मात् केवलपुरुषाभावव्यवहारोऽनुगतः। तदुक्तं न हि दण्डिनि सत्यदण्डानामन्येषां नाभावः, किन्तु दण्डाभावस्यैवेति युक्तम्, अन्यथा तत्रान्येषामिति पदस्य व्यर्थतापत्तेः, तथा केवलप्रतिबन्धकाभावे उत्तेजकसहकृतः प्रतिबन्धको न प्रतियोगी तस्य केवलत्वाभावात् किन्तु तदन्यः, तदन्यस्य च केवलप्रतिबन्धकस्याभावे उत्तेजकसहितप्रतिबन्धकसत्त्वे उत्तेजकमात्रसत्त्वे उभयासत्त्वे वा विशिष्ट एवेति नाऽननुगमः, उत्तेजकापनये च केवलप्रतिबन्धकोऽस्तीति न तदभाव इति दाहो न भवतीति। ननु न प्रतिबन्धकाभावः कारणम् एकदण्डान्वये घटोत्पत्तिवत्प्रतिबन्धकसत्त्वेऽपि प्रतिबन्धकान्तराभावेऽपि कार्यानुदयात्, न हि यावत्कारणतावच्छेदकावच्छिन्नं तावदन्वये कार्यमिति चेत्। न। प्रतिबन्धकाभावत्वेन न कारणत्वमन्योन्याश्रयात् किन्तु मण्याद्यभावत्वेनेत्युक्तत्वात्, तत्त्वेऽपि वा घटे दण्डसलिलादिवत्प्रतिबन्धकाभावकूटस्य दाहहेतुत्वात्।

यद्वा प्रतिबन्धकत्वावच्छिन्नप्रतियोगिक एवाभावः कारणम्, स च यावद्विशेषाभावनियत इति न प्रतिबन्धकसत्त्वेऽपरप्रतिबन्धकाभावेऽपि कार्योदयः। प्रतिबन्धकस्य च संसर्गाभावो हेतुः, तेन तत्सत्त्वे तदन्योन्याभावेऽपि न कार्यम्। अन्वय-व्यतिरेकाभ्यां व्याप्ति-कारणत्वयोर्ग्रहे संसर्गाभावस्य त्वयापि हेतुत्वाङ्गीकारात्, अन्यथा सामग्रीव्यापकयोः सत्त्वे तदन्योन्याभावे कार्यव्याप्याभावापत्तौ कार्य-कारणव्याप्य-व्यापकभावे व्याघातात्। किञ्च तवापि प्रतिबन्धकाभावे शक्तिरस्तीति तत्सत्त्वे तदन्योन्याभावमादाय शक्तिसत्त्वप्रसङ्गः। न च स दुर्वचः, न वा

प्रागभावादित्वेनाऽननुगम–व्यभिचारौ । प्रतियोग्यधिकरणयोः संसर्गमारोप्य यो निषेधः स संसर्गाभावः । भूतलं घटसंसर्गो नेत्यत्र भूतले घटसंसर्गस्य संसर्गो नारोप्यते किन्तु तादात्म्यम् । वयन्तु ब्रूमः, यत्र प्रतियोगिनमधिकरणे समारोप्य निषेधावगमः स संसर्गाभावः, यत्र चाधिकरणे प्रतियोगितावच्छेदकमारोप्य निषेधावगमः सोऽन्योन्याभावः । भूतलं न घट इत्यत्र भूतलस्य घटत्वावगमात् घटत्वमेव च घटतादात्म्यम् ।

आरोपस्य हेतुत्वे किं मानमिति चेत्, मा भूत्तावदन्यत्, नेदमिह नेदमिदमित्यबाधितविलक्षणव्यवहार एव तत्र मानमिति । ननु प्रतिबन्धकात्यन्ताभावो न हेतुः, तस्मिन् सत्यपि कार्य्याभावात् । न हि करादौ मण्यत्यन्ताभावः तत्संयोगात्यन्ताभावो वा, मणेः स्वावयववृत्तित्वात् संयोगस्य चाव्याप्यवृत्तित्वात् । अत एव न तत्प्रागभाव–प्रध्वंसौ हेतू, तयोः करादौ अवृत्तेः गुण–कर्म्मादेश्च प्रतिबध्यत्वानापत्तेः, तस्य जन्यधर्म्मानाश्रयत्वेन तत्र तयोरभावात्, न चान्यः संसर्गाभावोऽस्तीति चेत् । न । संसर्गावच्छिन्नप्रतियोगिकस्याभावाविशेषस्य सति प्रतिबन्धकेऽभावात् । स च समयविशेषावच्छेदेन संसर्गितया अत्यन्ताभाव एव, तथैवान्वयव्यतिरेकावधारणात् । अथैवं प्रध्वंस–प्रागभावस्थले समयविशेषावच्छिन्नात्यन्ताभावेनैवोपपत्तौ न तयोः सिद्धिः, अत्यन्ताभावो ह्यव्याप्यवृत्तिः तस्य चैकत्र भावाभावे क्वचिद्देशोऽवच्छेदकः क्वचित्काल इति चेत् । न । तत्र विद्यमानताविरोधित्वेनैव कपाले न घट इति प्रतीतिवैलक्षण्यात्, न त्वेवं भूतले घटाभावप्रतीतिः ।

अन्ये तु भविष्यति घटो नष्ट इति विलक्षणप्रतीत्योरत्यन्ताभावेनैकेन समर्थयितुमशक्यत्वात् अन्य एवायं संसर्गाभाव इत्यप्याहुः ।

एतेन विशेषणाभाव–विशेष्याभाव–तदुभयाभावघटितं साम-

ग्रीत्रयमेवास्तु दाहे च जातित्रयकल्पनमिति प्रत्युक्तम् । अनुगतहेतुसत्त्वात् दाहवैजात्यस्य योग्यानुपलम्भबाधितत्वाच्च । व्यक्तियोग्यतयैव जातियोग्यत्वेन योग्ये अयोग्यजात्यभावात् । ननु प्रहरं मा दहेत्यादौ सावधिप्रन्त्रपाठे मन्त्रविनाशे दाहः स्यात् । न च सङ्कल्पविषयकालविशेष एव तत्र प्रतिबन्धकः, सङ्कल्पनाशे समयस्य स्वतोऽविशेषात् । न च उद्देश्यत्वमेव तत्र विशेषः, तस्य विनाशात् । न चोद्देश्यध्वंसोऽपि हेतुः, तस्य यामादूर्ध्वमपि सत्त्वात् । न च मन्त्रपाठजनितमदृष्टमेव तत्र प्रतिबन्धकं तत्कालदाहाप्राप्तिकफलनाश्यत्वेन नाऽग्रे दाहप्रतिबन्ध इति वाच्यम् । प्रतिबन्धकमन्त्रपाठस्यानिषिद्धत्वेनाविहितत्वेन चादृष्टाजनकत्वात् तदाचारस्य विगीतत्वेन श्रुत्याद्यननुमापकत्वादिति । मैवम् । उद्देश्यत्वज्ञानाहितसंस्काराविषयकालस्य प्रतिबन्धकत्वात् । ननु प्रतिबन्धमकुर्वतामप्रतिबन्धकत्वेन शक्तिमनपकुर्वतां मन्त्रादीनां न प्रतिबन्धकत्वमतः शक्तिसिद्धिः । न च कार्य्यानुत्पाद एव प्रतिबन्धः तज्जनकत्वमेव प्रतिबन्धकत्वमिति वाच्यम् । कार्य्यानुत्पादो हि न तत्प्रागभावो न वा तदुत्तरकालसम्बन्धः तस्य मन्त्राद्यजन्यत्वादिति चेत् । न । मन्त्रादीनामप्रतिबन्धकत्वात् तत्प्रयोक्तारस्तु प्रतिबन्धकाः ते च किञ्चित्करा एव । मन्त्रादौ च कार्य्ये कारणोपचारात् स्वार्थिककन्प्रत्ययाद्वा तथा व्यपदेशः । प्रतिबन्धश्च सामग्रीविरहः । मन्त्राद्यभावघटितसामग्रीविरहश्च मन्त्रादिरेव, तदभावाभावस्य तत्त्वात् ।

नव्यास्तु न प्रतिबन्धकाभावः कारणं न वा शक्तिः किन्तु तत्तत्कालीनदाहविशेषं प्रति तत्तत्कालप्रतिबन्धेतरवह्नेः कारणत्वमिति प्रतिबन्धकाभावः कारणतावच्छेदको न तु कारणं दण्डत्ववत्, आकाशादौ त्वेकव्यक्तिके न यथा कारणत्वं क्वचित्प्रतिब-

न्धेऽप्यन्यत्र शब्दोत्पत्तेः किन्तु भेर्यादेः तथा कारणत्वमिति तत्प्रतिबन्धे न शब्दोत्पत्तिरित्याहुः। तन्न। वह्नि–प्रतिबन्धकाभावयोरन्वय–व्यतिरेकतौल्येनोभयस्यापि कारणत्वात्, न त्वेकमेवावच्छेदकं विनिगमकाभावात्। किञ्च यस्मिन् सत्यपि यदभावात्कार्य्याभावः तस्य कारणत्वमायाति न तु तदवच्छेदकत्वम्। न हि कार्य्यायोगव्यवच्छेदः करणत्वं, किन्तु नियतपूर्वसत्त्वं, तच्च सहकारिविरहप्रयुक्तकार्य्याभावेऽप्यक्षतम्। अन्यथा चक्रसहितदण्डत्वेन कारणत्वे सहकार्य्युच्छेदः। यस्य यद्धर्ममवगम्यैव नियतपूर्वसत्त्वमवगम्यते तस्य तत् अवच्छेदकं, दण्डत्वमिव, सहकारीतु न तथा। ननु मा भूदर्थापत्तिः शक्तौ मानमनुमानन्तु स्यात्, तथा हि स्थिरोऽवयवी जनकदशाविशिष्टो वह्निरजनकदशाव्यावृत्तभावभूतधर्म्मवान् जनकत्वात् कुण्ठकुठारात्तीक्ष्णकुठारवत् दाह्यासंयुक्तवह्नेः दाह्यसंयुक्तवह्निवच्च प्रतिबन्धकसत्त्वे संयोगादेरजनकदशावर्त्तित्वेन तदतिरिक्तातीन्द्रियभावभूतधर्म्मसिद्धिः। यद्यपि शक्तेर्भावहेतुजन्यत्वेन नाऽजनकदशाव्यावृत्तत्वं, तथाप्युद्भवविशिष्टायास्तथात्वम्। यद्वा धर्म्मेऽतीन्द्रियत्वं विशेषणम्। न च दृष्टान्तासिद्धिः, तुल्याधारत्वेऽपि लोहविशेषघटितकुठारे विलक्षणच्छिदाकार्य्यबलादतीन्द्रियतीक्ष्णत्वासिद्धेः। अथ वा तथाभूत एव वह्निः कार्य्यानुकूलातीन्द्रियाद्विष्ठधर्म्मसमवायी जनकत्वात् आत्मवत्, अतीन्द्रियत्वञ्च यद्यपि न साक्षात्काराविषयत्वम् अनित्यसाक्षात्काराविषयत्वं योगजधर्म्माद्यजन्यसाक्षात्काराविषयत्वं वा, परत्वं वा प्रत्यसिद्धेः, संयोगादिपञ्चकजन्यज्ञानाविषयत्वमैन्द्रियकाणामापि, तथापि संयोगाद्यन्यतरप्रत्यासत्तिजन्यसाक्षात्काराविषयत्वमुभयवादिसिद्धम्, अन्यतरत्वञ्च तदन्यान्यत्वम्। न चाभावातीन्द्रियत्वं, तस्यासिद्धेः। न च वह्नौ स्थितिस्थापके-

नाऽर्थान्तरं, तत्र तदभावात्, क्रियाया वेगेनाऽदृष्टवदात्मसंयोगेन वोत्पत्तेः। न चात्मत्वं नित्यत्वं वोपाधिः, स्पर्शैकत्वादिमति द्व्यणुके साध्याव्यापकत्वात्। यद्वा पिण्डीभूतो वह्निः दाहानुकूलाद्विष्टातीन्द्रियभावभूतधर्म्मवान् दाहजनकत्वादात्मवत्। न चात्मत्वमुपाधिः, अदृष्टत्वस्य दाहानुकूलत्वेनाऽदृष्टे साध्याव्यापकत्वात्। अथ वा करवह्निसंयोगः कार्य्यानुकूलातीन्द्रियधर्म्मसमवायी जनकत्वादात्मवत् द्व्यणुकवच्च। न चात्मत्वं द्रव्यत्वं वोपाधिः, द्व्यणुकैकत्व–स्पर्शादौ साध्याव्यापकत्वात्। यद्वा प्रतिबन्धकदशायां प्रत्यक्षसकलदाहहेतुसमवहितो दाहाजनको वह्निः जनकदशाद्वत्तिकार्य्यानुकूलभावभूतधर्म्मशून्यो–जनकत्वात् कुण्ठकुठारवत्। यद्वा तथाभूतो वह्निर्दाहजनकदशाद्वत्तिदाहानुकूलभावभूतधर्म्मशून्यः दाहाजनकत्वात् दाह्यासंयुक्तवह्निवत्। अनुकूलत्वञ्च कार्य्याभावप्रयोजकाभावप्रतियोगित्वं कारण–तदवच्छेदकसाधारणं, दृढ़दण्डत्वेन कारणत्वे दृढत्वाभावादापि कार्य्याभावदर्शनादिति। उच्यते। साध्यं विनापि उभयसिद्धप्रतिबन्धकाभावादेव जनकत्वादिहेतुसम्भवात् विपक्षबाधकाभावेनाऽनुमानानामप्रयोजकत्वम्। यदि च सहचारदर्शन–व्यभिचारादर्शनोपाध्यनुपलम्भमात्रादेव व्याप्तिग्रहः तदा शक्तिसिद्ध्यनन्तरं तेनैव हेतुना साध्ये शक्त्यतिरिक्तत्वप्रक्षेपेण शक्त्यतिरिक्तदाहानुकूलातीन्द्रियधर्म्मसिद्धिः। एवं तत्तदतिरिक्तप्रक्षेपात्तेनैव हेतुनाऽनन्ततादृशधर्म्मसिद्धिप्रसङ्गः। द्वितीयादितादृशधर्म्मसिद्धिं विनापि प्रथमानुमितशक्त्यैव जनकत्वाद्युपपत्तेर्न तादृशानन्तधर्म्मसिद्धिरिति चेत्, हन्तैवं शक्तिं विनापि तदर्थसिद्धेः किं शक्त्या। यद्धि ईश्वरानन्त्यवत् न शक्त्यानन्त्यमित्युक्तम्, तदबोधात्। कार्य्यमात्रे हि कर्तृत्वेन कारणत्वं न त्वीश्वरत्वेन द्विकर्तृकत्वादिना वा, गौरवात्, घटे त्वार्थः समाजः। एवमजनक-

दशाव्यावृत्तत्वेनैव प्रयोजकत्वं, न तु भावभूतत्वेनेति गौरवात्। अपि च भावकार्य्यमात्रस्य समवायिकारणजन्यत्वेन शक्तेरपि तथात्वात् शक्त्यनुकूला शक्तिरपरा समवायिकारणे मन्तव्या। एवं सापि समवायिकारणजन्येति तदनुकूलशक्तिस्वीकारे शक्त्यनवस्था। किञ्च प्रथमानुमानेऽजनकत्वं न स्वरूपायोग्यत्वम्, वह्नौ कुठारे च तदभावात्, किन्तु कार्य्यानुपधानम्, तथा च तदनुपधानदशायामपि वह्नौ शक्तिः कुठारे तैक्ष्ण्यमिति बाधो दृष्टान्तासिद्धिश्च लौहविशेषाणामेव सातिशयच्छिदाजनकत्वमिति नातीन्द्रियतैक्ष्ण्यप्रसिद्धिः। अग्रिमचतुर्षु बहिरिन्द्रियाप्रत्यक्षत्वमुपाधिः, तुल्ययोगक्षेमत्वेऽपि सन्दिग्धोपाधित्वेन दूषकत्वात्। अपि च जनकत्वस्य केवलान्वयित्वेनं व्यतिरेकाप्रसिद्ध्या नाऽन्वय-व्यतिरेकी। न च जनकत्वाभावस्य शक्तावेव प्रसिद्धिः, अन्योन्याश्रयात्। न च गुरुवचनपरम्परात एव वाक्यार्थतया तत्सिद्धिः, स्वप्नये सिद्धार्थस्याऽप्रमाणत्वात्। न च परार्द्धसङ्ख्यायां साध्यजनकत्व-व्यतिरेकयोः प्रसिद्धिः, अप्रत्यक्षायाः शब्दैकवेद्यायाः तस्याः प्रत्यक्षेण साध्य-हेतुव्यतिरेकयोर्ग्रहीतुमशक्यत्वात्। एतेन पण्डापूर्वेऽपि तत्सिद्धिरपास्ता। स्यादेतत् तृणारणिमणीनां वह्नौ कारणत्वादेकशक्तिमत्त्वमुपेयम्, एकजातीयकार्ये एकजातीयकारणत्वानियमात्। वह्न्यवान्तरजातीये तेषां प्रत्येकं कारणत्वमिति चेत्। न। वह्निजातीयस्याकस्मिकतापत्तेः, कारणगतैकरूपमपहाय कार्य्यगतबहुतररूपकल्पने गौरवात्। तृणारणिमणिप्रभववह्निषु अवान्तरजातेरनुपलम्भबाधितत्वाच्च। यत्र च तत्तदिन्धनप्रयोज्यं प्रदीप-दारुदहनादौ वैजात्यमनुभूयते तत्र कारणेष्वेकशक्तिमत्त्वमपि नास्ति। किञ्च गोमय-वृश्चिकप्रभववृश्चिकादिषु वैजात्यकल्पने तत्प्रभववृश्चिकेष्वपि वैजात्यं कल्प्यमेवं तत्प्र-

भव–तत्प्रभवेष्वपीति वैजात्यानन्त्यं, विजातीयकारणानां विजातीयकार्य्यजनकत्वनियमात् । न च तयोर्नैको दृश्चिकः, बुद्धिव्यपदेशयोरविशेषात् । यदि विजातीयेष्वेककार्य्यशक्तिसमवायान्न कार्य्यविशेषात्कारणविशेषः तदभावात्तदभावः क्वाप्यनुमीयेत, तदभावेऽपि तज्जातीयशक्तिमतोऽन्यस्मादपि तदुत्पत्तिसम्भवादिति चेत्, वह्निदृश्चिकादावेवमेतत् । निरूपितनियतवह्न्यादिकारणकधूमादौ कुतो न तदनुमानम् । अन्यथा कार्य्यवैजात्येऽपि तृणस्य वह्निविशेष इव वह्नित्वेन धूमविशेष एव कारणत्वं न तु धूममात्रे । तृणादिप्रभवत्वग्रहानन्तरं वह्न्यवान्तरजातेर्ग्रहवद्वह्नि–तदन्यजन्यत्वज्ञानानन्तरं धूमावान्तरजातिग्रहो भविष्यतीत्यप्याशङ्क्येत । बाधकं विना धूमत्वेन वह्निकार्य्यतेति चेत्, तर्हि बाधकं विना धूमं प्रति वह्नित्वेन कारणतेत्यपि तुल्यम् ।

यत्तु तृणत्वेन कारणत्वग्रहस्योपजीव्यत्वात्तद्रक्षार्थं वह्नौ जातिविशेष एव कल्प्यत इति, तन्न । वह्नित्वेन कार्य्यत्वग्रहात्तद्रक्षार्थं तृणादौ शक्तिकल्पनौचित्यात् । यथा चान्वय–व्यतिरेकाभ्यां तृण–फूत्कारयोः परस्परसहकारित्वं तथैव तच्छक्त्योरपि परस्परसहकारित्वेन वह्न्यनुकूलत्वं, तथैव कार्य्यदर्शनात् । एवं तृणारणिमणि–फूत्कार–निर्मन्थन–तरणिकिरणानां वह्न्यनुकूलशक्तिमत्त्वेन कारणत्वेऽपि फूत्कारेण तृणादेव निर्मन्थनेनाऽरणेरेव प्रतिफलिततरणिकिरणैर्मणेरेवाग्न्युत्पत्तिर्न तु मणि–फूत्कारादिभ्यः, मणि–फूत्कारशक्त्योः परस्परसहकारित्वविरहात् ।

यत्तु तृण–फूत्कारादिस्तोमत्रये विशिष्टे शक्तिरिति, तन्न । तृणत्वेन गृहीतकारणताभङ्गप्रसङ्गादिति । उच्यते, तृणाराणि–मणि–फूत्कारादिव्यक्तीनामानन्त्येन प्रतिव्यक्तिभावहेतुजनितानन्तशक्तिस्वीकारे गौरवं तावदनन्तव्यक्तिजन्यानन्तवह्निव्यक्तिषु जातिक-

स्पने लाघवमिति तदेव कल्प्यते। न च जातौ योग्यानुपलब्धिबाधः, गोमय–वृश्चिकप्रभववृश्चिकयोरीषन्नीलत्व–कपिलत्वव्यङ्ग्यवैजात्यस्य प्रत्यक्षसिद्धत्वात्। तृणजन्यनानाबह्निव्यक्तिषु तृणजन्यत्वज्ञानानन्तरं मणिजन्यव्यावृत्तानुगतबुद्धिरस्ति जातिविषया। तृणजन्यत्वेनोपाधिना सति चेत्। न। बाधकं विनाऽनुगतबुद्धेस्तद्व्यङ्ग्यजातिविषयत्वनियमात्।

न च गोमय–वृश्चिकप्रभववृश्चिकपरम्परायामननुगतजात्यापत्तिः, गोमयजन्यवृश्चिकप्रभववृश्चिकेषु वृश्चिकप्रभवत्वजातेः सत्त्वात्। बह्निमात्रे च दाहस्पर्शवानवयवस्तत्संयोगः सेवनादिश्च कारणानि। न च तृणादिकं विनापि तदुत्पत्तिप्रसङ्गः, विशेषसामग्रीमादायैव सामान्यसामग्र्या जनकत्वात्। ननु तृणारणि–मण्णीनां बह्नौ कारणत्वग्रहे शक्ति–वैजात्ययोरन्यतरकल्पनं तद्ग्रहश्च नान्वय–व्यतिरेकाभ्यां, व्यभिचारात्। अथाऽरणि–मण्यभाववति स्तोमविशेषे तृणं विना बह्निव्यतिरेकः तृणान्वये बह्निरित्यन्वय–व्यतिरेकाभ्यां तत्रैव स्तोमे तादितरसकलहेतुसमवधाने तृणान्वयेऽवश्यं बह्निरिति नियतान्वयेन रासभादिव्यावृत्तेन तृणादिकारणताग्रह इति चेत्। न। तृणं विनापि वह्निरिति ज्ञाने सति बह्निनियतपूर्ववर्त्तित्वस्य कारणत्वस्य ग्रहीतुमशक्यत्वात्। तृणाजन्ये बह्नौ मणेः कारणत्वग्रह इति चेत्। न। व्यभिचारेण बह्नौ तृणजन्यत्वाग्रहे तदजन्यत्वस्याप्यग्रहात् बह्निमात्रस्यैव तदजन्यत्वाच्च। न च मण्यजन्यत्वेन तृणजन्यत्वग्रहः, अन्योन्याश्रयात्। यत्तु यत्र कारणताग्राहकं नास्ति तत्र व्यभिचारस्तद्ग्रहपरिपन्थीति। तन्न। अबाधितनियतपूर्ववर्त्तित्वाभावग्रहे तद्ग्रहस्यासम्भवात् अभावप्रमायां भावज्ञानानुदयादिति। उच्यते। उक्तग्राहकैर्बह्निनिष्ठकार्य्यतानिरूपितकारणतावच्छेदकरूपवत्त्व तृणस्य तृ-

णनिष्ठकारणतानिरूपितकार्यतावच्छेदकरूपवत्त्वं वह्नेर्वा अकार्य्या-कारणव्यावृत्तं रूपं परिच्छिद्यते न तु तृणत्वेन कारणत्वं वह्नित्वेन कार्य्यत्वं वा, तच्चोभयथापि सम्भवति वह्नित्वेन कार्य्यतया तदनुकूलशक्तियोगित्वेन च तृणादीनां कारणतया वह्नित्वावान्तरजातिविशेषेण कार्य्यतया वा तत्र विनिगमकमुक्तमेव । अथ तृणारणि-मणीनामभावत्रये न कार्य्यम् अभावत्रयाभावे कार्य्यमिति अन्वय-व्यतिरेकाभ्यामभावत्रयाभावत्वेन तृणादीनां कारणत्वमिति न व्यभिचारः अभावाभावस्य भावपर्यवसन्नत्वादिति चेत्, अभावत्रयाभावः किं तृणादिप्रत्येकव्यापकोऽन्य एव उत तृणादि प्रत्येकमेव, आद्येऽभावस्य कारणत्वमिति किमायातं तृणादिकारणत्वे । द्वितीये तृणस्य नारणिमण्यभावाभावत्वं तदुभयत्वापत्तेः । एतेनाभावत्रये न कार्य्यं तदभावे कार्य्यमित्यन्वय-व्यतिरेकाभ्यां तृणादिप्रत्येकस्य कारणत्वग्रह इति परास्तम् । स्यादेतत्, मा भूत्सहजशक्तिराधेयशक्तिस्तु स्यात्, तथा हि "व्रीहीन् प्रोक्षती"त्यत्र कालान्तरकार्य्यानुकूलोऽतीन्द्रियोऽतिशयः प्रोक्षणजन्योऽस्तीत्युभयवादिसिद्धम् । स व्रीहिसमवेतो न वेति संशये व्रीहिनिष्ठ एव वाच्यः, कथमन्यथा प्रोक्षितानामेव तेषां कालान्तरेऽवघातादौ विनियोगः । न च मन्त्रादिसहकृतत्वमेव व्रीहिषु विशेषः, तेषां चिरध्वस्तत्वात् । ननु कथं प्रोक्षितस्यैवावघातादावन्वयः "व्रीहीनवहन्तीति" श्रुतेस्तन्मात्रान्वयेऽप्युपपत्तेः । अथ "व्रीहिभिर्यजेत" "व्रीहीन् प्रोक्षति" "व्रीहीनवहन्ति" "पुरोडाशैर्यजेते"त्यत्र यथा पुरोडाशे प्रकृत्यपेक्षायामवहतव्रीहीणामवयवानुवृत्तिद्वारान्वयः प्रोक्षणे च यागार्थमुपात्तव्रीहीणां तथावघाते व्रीह्याकाङ्क्षायां प्रोक्षितानामेवान्वयः बाधकं विना शब्दानां सन्निहितविशेषपरत्वनियमात्, व्यक्तिवचनानां सन्निहितविशेषपरत्व-

मिति न्यायात, अन्यथा प्रकरणादिसन्निहितत्यागे तदन्यसन्निधिकल्पने गौरवमिति चेत् । न। तर्ह्येकस्य द्वयं यत्र प्रोक्षणं तत्रावघातो न तु प्रोक्षणविशिष्टे, यत्र रूपं तत्र रस इतिवत्, तथा च प्रोक्षणस्य शब्देन कालान्तरकार्यजनकत्वाबोधनात् कथं तन्निर्वाहार्थमतिशयकल्पनम् । " प्रोक्षिता व्रीहयोऽवघाताय कल्पन्ते " इति वाक्यशेषात्प्रोक्षणविशिष्टस्यावघाते कारणताबोध इति चेत्, अस्तु तावदेवं, तथापि प्रोक्षिता इत्यत्र भूते क्तानुशासनादतीतप्रोक्षणे व्रीहाववघातान्वयः, तथा चावघाते प्रोक्षणध्वंसः कारणं न तु प्रोक्षणमिति । मैवम् । प्रोक्षणमवघातजनकं प्रमाणतस्तदर्थमुपादीयमानत्वात् अवघाते व्रीहिवत् । न चासिद्धिः, अप्रोक्षितेऽवघाताभावादवश्यमवघातार्थं प्रोक्षणोपादानात् । न च व्यापारं विना तथा सम्भवति । न च प्रोक्षणध्वंस एव व्यापारः, प्रतियोगिनोऽहेतुत्वापातात् । अन्यथा यागादावपि तथा स्यात् । फलस्य च नियतसमयोत्पत्तिकत्वमपूर्ववत् स्वभावादेव भविष्यति । न च प्रोक्षणोपलक्षिता व्रीहयस्तथा, निरन्वयध्वस्तत्वेनोपलक्षणस्याहेतुत्वात् । कुरुणा क्षेत्रमित्यत्र तु कुरुज्ञानस्येतरव्यावृत्तक्षेत्रव्यवहारजनकत्वं न तु कुरोः । अन्यथा यागोपलक्षितो यज्ञैव स्वर्गं फलिष्यति किमपूर्वेण । न च देवदत्ताद्यशरीरं देवदत्तविशेषगुणजन्यं जन्यत्वे सति तद्भोगसाधनत्वात् तन्निर्म्मितस्रग्वदिति तत्सिद्धिः, जन्मान्तरीयैरदृष्टजनकत्वाभिमतैर्ज्ञानेच्छा-प्रयत्नैः सिद्धसाधनात् । तस्मात्प्रोक्षणादयो भावभूतमतिशयं जनयन्त एव कालान्तरभाविकार्यजनकाः प्रमाणतस्तदर्थमुपादीयमानत्वात् यागचिकित्सावत्, स चातिशयो लाघवात् फलसमानाधिकरण इति व्रीहिनिष्ठ एव, तेन तत्समवहितत्वं व्रीहेः साक्षात्सम्बन्धात् पुरुषनिष्ठत्वे च व्रीहिणा साक्षात्सम्बन्धाभावात् परम्प-

रासम्बन्धे गौरवात् न साक्षादव्रीहिसमवहितत्वं स्यात् । किञ्च यो यद्भूतफलार्थितया क्रियते स बाधकं विना तद्भूतमेव तदनुकूलमतिशयं जनयति यथा याग–चिकित्से । अथ प्रोक्षणं पुरुषसमवेतातिशयजनकं कालान्तरभाविकार्यजनकत्वे सति विहितत्वात् यागवत्, अन्यथा विधिविरोधादिति चेत् । न । कृषि–चिकित्सादिना व्यभिचारात् अप्रयोजकत्वाच्च तेन विनापि विधिसम्भवात् । स च प्रतिव्रीहि नानैव । न चैवमेकव्रीहिनाशे फलानुदयः तावत्संस्काराणामभावादिति वाच्यम् । संस्कारत्वेन प्रयोजकत्वे किञ्चित्समवधानेऽपि दण्डादिवत्कार्यसम्भवात् । अस्तु वा सकलव्रीहिनिष्ठ एक एव । न चैकव्रीहिनाशे तन्नाशापत्तिः, किञ्चिदाश्रयनाशस्य दृक्षादाविव कार्य्यनाशकत्वादिति । उच्यते । अतिशयग्राहकमानाल्लाघवसहकृतात् स एक एव सिध्यति न नाना पुरुषनिष्ठश्च, तथा हि प्रोक्षणमपूर्वजनकं दृष्टद्वाराभावे सति कालान्तरभाविफलजनकतया विहितत्वात् याग–तदङ्गवत्, कृष्यादौ दृष्टद्वारसम्भवात् न व्यभिचारो न वाऽप्रयोजकत्वम् । याग–दान–होमादि–तदङ्गानामपूर्वजनकत्वे दृष्टद्वाराभावे सति कालान्तरभाविकार्यजनकतया विहितत्वस्यैव प्रयोजकत्वादन्यस्याऽननुगमात् । न च यो यद्भूतफलार्थितया क्रियते स बाधकं विना तद्भूतमेव तदनुकूलं फलं जनयतीति नियमः, शत्रुवधमुद्दिश्य प्रवर्त्तिते श्येनयागादौ व्यभिचारात् विपक्षे बाधकाभावाच्च । नापि यदुद्देशेन यत् क्रियते न तत् तत्र भाविकार्यानुकूलातिशयजनकमिति नियमः, हविस्त्यागादिभिर्व्यभिचारात् । ननु प्रोक्षितव्रीहिणा अदृष्टस्य जनितत्वाद्धविष इव न तस्य पुनरुपयोगान्तरं स्यात् विनियुक्तविनियोगविरोधात् उपयोगे वा तज्जातीयान्तरमप्युपादीयेताऽविशेषात् । न । "व्रीहीनवहन्ती"त्यत्रोक्तन्यायेन प्रोक्षितस्यैव

व्रीहेरन्वयात् । विधेर्दुर्लङ्घ्यत्वात् । यथा "बर्हिस्तृणोति बर्हिषि हविरासादयती"त्यत्र । यद्वा विचित्राः संस्काराः केचिदुद्देश्यसहकारिण एवाग्रिमकार्यकारिणः यथाभिचारसंस्कारो यं देहमुद्दिश्य प्रयुक्तः तदपेक्ष एव तत्सम्बद्धस्यैव दुःखं जनयति, तथा प्रोक्षणसंस्कारा अपि उद्देश्यव्रीहिसहकृता एवाग्रिमकार्य्यकर्त्तारः । यथा कारीरीजनितसंस्काराधारपुरुषसंयोगाज्जलमुचामदृष्टसमवधानं तथा प्रोक्षणजन्यादृष्टवदात्मसंयोगात् व्रीहीणामुत्तरक्रियाविशेषाः, कर्तृकर्मसाधनवैगुण्यात् फलाभावस्तुल्य एव । आगमिकत्वात् चाण्डालादिस्पर्शस्याहवनीयादिसंस्कारनाशकत्वश्रुतेर्व्यधिकरणस्याप्यपूर्वनाशकत्वम् । धर्म्मनाशे कर्म्मनाशापारगमनवत् निषिद्धकीर्त्तनवच्च । किञ्च प्रोक्षणजन्यातिशयो व्रीहिनिष्ठो न नाना, आत्मवृत्तेरेकस्मादप्युक्तन्यायेन कार्य्योपपत्तेः । नाप्येकः, एकद्वित्राश्रयनाशानां प्रत्येकमननुगमेन कार्य्यनाशे आश्रयमात्रनाशस्य जनकत्वादेव व्रीहिनाशेन तन्नाशादपरप्रोक्षितव्रीहीणामनन्वयापत्तेः । अथ "व्रीहिन् प्रोक्षती"तीप्सितद्वितीयाश्रुतेः क्रियाजन्येष्टफलभागित्वं व्रीहेरेवावगम्यते, न चापूर्वस्य व्रीहिवृत्तित्वम्, साक्षात् सम्बन्धस्यौत्सर्गिकत्वादिति चेत् । नं । धात्वर्थतावच्छेदकसंयोगेन व्रीहिकर्म्मतोपपत्तेः । न च संयोगावच्छिन्न एव व्यापारविशेषः प्रोक्षणार्थस्तथा च कथं प्रोक्षणैकदेशस्य प्रोक्षणसाध्यतयान्वय इति वाच्यम् । संयोगस्योपलक्षणत्वेनाऽपदर्थत्वात्, अन्यथा ग्रामं गच्छतीत्यादौ का गतिः, का वा "सक्तून् प्रोक्षती"त्यादौ, तत्राधेयशक्त्यभावात् । किञ्च घटं साक्षात्करोतीत्यादौ क्रियाजन्यसंस्कारादीनां घटावृत्तित्वात् संस्कारस्य स्वरूपसम्बन्धेन घटवृत्तित्वम् वह्निमनुमिनोतीत्यादिवत् । प्रयोगसाधुरेव वा द्वितीयेति यदि तदा प्रकृतेऽपि तथास्तु । अथ प्रतिमादौ प्रति-

ष्ठाजन्यं न यजमानादृष्टं पूज्यत्वे प्रयोजकं, भोगादिना तन्नाशेऽपि पूज्यत्वात् तत्सत्त्वेऽपि चाण्डालादिस्पर्शेनाऽपूज्यत्वात् अन्यधर्म्मं प्रत्यन्यधर्म्मस्याऽनुपयोगाच्च । न च प्रतिष्ठाध्वंसस्तथा, तत एव उपजीव्यप्रतिष्ठाप्रयोजकत्वभङ्गापत्तेश्च । तस्मात्प्रतिष्ठाजन्या अस्पृश्यस्पर्शादिनाश्या प्रतिमादिनिष्ठा शक्तिरभ्युपेया इति चेत् प्रतिष्ठाविधिना प्रतिमादौ देवतासन्निधिरहङ्कार-ममकाररूपः क्रियते स्वसादृश्यदर्शिनश्चित्रादौ इव ज्ञानस्य नाशेऽपि संस्कारसत्त्वात्, अस्पृश्यस्पर्शादिना च तन्नाशः । अचेतनदेवतापक्षे च यथार्थप्रतिष्ठितप्रत्यभिज्ञानस्याऽस्पृश्यस्पर्शादिविरहसहकृतस्य तथात्वम् "प्रतिष्ठितं पूजयेदि"तिविधिबलात्तत्प्रतिसन्धानस्यावश्यकत्वादिति प्राञ्चः ॥

नव्यास्तु प्रतिष्ठाविधिनैव तवाधेयशक्तिवदपूर्वान्तरं जन्यते तददृष्टवदात्मसंयोगाश्रयस्य पूज्यत्वम् अस्पृश्यस्पर्शेन तन्नाशे चापूज्यत्वमित्याहुः ।

वयन्तु ब्रूमः "प्रतिष्ठितं पूजयेदि"तिविधिवाक्येन प्रतिष्ठायाः कारणत्वं न बोध्यते किन्तु भूतार्थकानुशासनादतीतप्रतिष्ठे पूज्यत्वं बोध्यते, तथा च प्रतिष्ठाध्वंसः प्रतीष्ठाकालीनयावदस्पृश्यस्पर्शादिप्रतियोगिकानादिकालसंसर्गाभावसहितः पूज्यत्वप्रयोजकः स च प्रागभावोऽत्यन्ताभावश्च क्वचित् । कामिनीचरणाघातदोहदादिभिरशोकपुष्पोत्कर्षदर्शनादपि नाधेयशक्तिसिद्धिः, समयविशेषावच्छिन्नचरणदोहदादिसंयोगध्वंसस्यैव कारणत्वात् चरणाभिघाताद्याकृष्टभागान्तरजनितदृक्षादेव वा तदुपपत्तेः, कालान्तरे पुष्पाद्युत्कर्षादृक्षावयवोपचयावश्यम्भावेन वृक्षभेदावश्यकत्वात् । नापि ताम्रकांस्यादौ अस्तु भस्मसंयोगादिजन्यशुद्धिरूपा आधेयशक्तिः, तत्संयोगध्वंसस्य संयोगसमानकालीनास्पृश्यस्पर्शादिप्रतियोगिक-

यावदनादिसंसर्गाभावसहितस्य शुद्धिपदार्थत्वात् ।

भस्मादिसंयोगजनितः कांस्याद्युपभोगकर्तृनिष्ठः संस्कार एव शुद्धिरित्यन्ये ।

अभिमन्त्रितपयःपल्लवादावपि समयविशेषावच्छिन्नाभिमन्त्रणध्वंस एव व्यथाद्यपनायकः तत्तन्मन्त्रदेवतासन्निधिरेव वा । कलमबीजादीनामापरमाण्वन्तभङ्गे तत्र चाऽवान्तरजातेरभावे नियतकलमजातीयादिसिद्धिरपि परमाणुपाकजविशेषादेव, कार्य्यवृत्तिरूपादिसजातीयस्य पूर्वरूपविजातीयस्य परमाणौ पाकजरूपादेरुभयसिद्धत्वात् । यथा हि कलमबीजं यवादेर्जात्या व्यावर्त्तते तथा तत्परमाणवोऽपि पाकजैरेव । एवं माषकर्षणादिजनितात्परमाणुपाकपरम्परायाविशेषादेव हैमन्तिकसस्योत्पत्तिः । एतेन लाक्षारसावसेकादयो व्याख्याताः । निमित्तविशेषजनितपाकजात्तदफलविशेषः, यथा हारीतमांसं हारिद्रानलसाधितमुपभोगात्सद्यो व्यापादयति नान्यथा साधितमित्यादि । यत्र च तोय–तेजो–वायुषु न पाकजो विशेषः, तत्रोद्भवानुद्भव–द्रवत्व–कठिनत्वादयो विशेषास्तदुपनायकादृष्टविशेषादेव । तुलादौ चाऽधिवासनादिपूर्वकतुलारोहणसामग्री तुल्यस्य सत्यासत्यप्रतिज्ञत्वसहिता प्राचीनधर्म्माधर्म्मफले जय–भङ्गौ जनयति । यद्वा अहं निष्पापः पापवान्वेति तुलाधिरूढाभिशस्तज्ञानविशेषसहिता सा तथा, तदाहुः "तांस्तु देवाः प्रपश्यन्ति स्वश्चैवान्तरपूरुषः" इति । अथ वा प्रतिज्ञाशुद्ध्यशुद्धी अपेक्ष्य तया धर्म्माधर्म्मौ जन्येते ताभ्याञ्च जय–पराजयौ, सत्यासत्यप्रतिज्ञाभिशस्ततुलारोहणस्येष्टानिष्टफलत्वेनार्थतो विधि–निषेधात् "अभिशस्तः सत्यप्रतिज्ञो विजयकामस्तुलामारोहेदसत्यप्रतिज्ञो न तुलामारोहेत्" इति श्रुतेरुन्नयनात् । यद्वा तया देवतासन्निधिः क्रियते ताश्च कर्मानुरूपं लिङ्गमभिव्यञ्जयन्ति ।

कस्तर्हि शक्तिपदार्थः, कारणत्वम्, तच्च स्व-स्वव्याप्येतरसकलसम्पत्तौ कार्य्याभावव्यापकाभावप्रतियोगित्वम् । अथ वा यत्र कार्य्याभावव्याप्यता इतराभावावच्छिन्ना तत्कारणम् । बीजेऽङ्कुराभावव्याप्यता न बीजत्वेनावच्छिद्यते इतरसमवधाने सति बीजादङ्कुरसम्भवात्, किन्तु इतराभावेनावच्छिद्यते इतराभावे बीजस्याङ्कुराभावनियमात् । शिलाशकले त्वङ्कुराभावव्याप्यता शिलात्वेनावच्छिद्यते ।

यद्वा अन्यासमवधानावच्छिन्नकार्य्यानुत्पत्तिव्याप्यत्वं कारणत्वम्, रासभादेः स्वत एव कार्य्याभावव्याप्यता अन्यासमवधानस्य वैयर्थ्येनानवच्छेदकत्वात् । अनन्यथासिद्धनियतपूर्ववर्त्तिजातीयत्वं वा तत्त्वम् । अन्यथासिद्धत्वञ्च त्रिधा । येन सहैव यस्य यं प्रति पूर्ववर्त्तित्वमवगम्यते, यथा घटं प्रति दण्डरूपस्य । अन्यं प्रति पूर्ववर्त्तित्वे ज्ञात एव यं प्रति यस्य पूर्ववर्त्तित्वमवगम्यते, यथा शब्दं प्रति पूर्ववर्त्तित्वे ज्ञात एव ज्ञानं प्रत्याकाशस्य । अन्यत्र कृत्स्ननियतपूर्ववर्त्तिन एव कार्य्यसम्भवे तत्सहभूतत्वम्, यथा गन्धवति गन्धानुत्पादात् गन्धं प्रति तत्प्रागभावस्य नियतपूर्ववर्त्तित्वकल्पनात् पाकजस्थले गन्धं प्रति रूपादिप्रागभावानामन्यथासिद्धत्वम् । एतत्त्रितयव्यतिरेके नियतपूर्ववर्त्तित्वं कारणत्वम् । यागापूर्वयोस्तु यागपूर्ववर्त्तित्वेऽवगते न त्ववगम्यमाने, यत्र जन्यस्य पूर्वभावेऽवगते जनकस्य पूर्वभावोऽवगम्यते तत्र जन्येन जनकस्यान्यथासिद्धिः, यत्र च जनकस्य तथात्वेऽवगते जन्यस्य पूर्वभावावगमः तत्र तद्द्वारा तस्य जनकत्वमेव, दण्डसंयोग-भ्रमणयोस्तु युगपदेव पूर्वभावित्वग्रहः । स्व-स्वानन्तरोत्पत्तिकसकलसमवधाने सत्यपि यस्याभावात्कार्य्यं न जायते सति तु जायते तज्जातीयं प्रति तदनन्यथासिद्धम् अनन्यथासिद्धनियतपूर्ववर्त्तित्वं कारणत्वमित्यन्ये । तन्न । ई-

श्वर–तद्बुद्ध्यादीनामसंग्रहात्, तद्व्यतिरेकस्य तत्समवधानव्यतिरेकस्य वा अभावात् । कार्य्यस्यान्यथानुपपद्यमानताव्यवस्थाप्यत्वं वा अनन्यथासिद्धत्वम् । नन्वेवमतिरिक्तशक्तौ साधक–बाधकप्रमाणाभावान्नित्यं संशयः, न च साधकाभावस्य बाधकत्वम्, बाधकाभावस्यापि साधकत्वादिति चेत् । न । साधकाभावेन ब्रह्मावन्यत्र सिद्धातीन्द्रियधर्म्माभावसाधने लाघवं बाधकाभावेनातीन्द्रियधर्म्मसाधने च गौरवमिति साधकाभावात्तदभाव एव सिध्यतीति ॥

परमप्रयोजनमनुमानस्याऽपवर्गः "आत्मा वा अरे श्रोतव्यो मन्तव्यो निदिध्यासितव्यः साक्षात्कर्त्तव्यः" इति श्रुतेः । स च समानाधिकरणदुःखप्रागभावासहवृत्तिदुःखध्वंसः । ननु नासौ पुरुषार्थः, अतीतदुःखध्वंसस्य सिद्धत्वात् अनागतदुःखस्य ध्वंसयितुमशक्यत्वात् वर्त्तमानस्य पुरुषप्रयत्नं विनैव विरोधिगुणनाश्यत्वात्, अतीतदुःखवत् हेतूच्छेदे पुरुषव्यापारः प्रायश्चित्तवदिति चेत् । न । तर्हि हेतूच्छेदस्य सुख–दुःखाभावेतरत्वेन स्वतोऽपुरुषार्थत्वादनागतानुत्पादमुद्दिश्य क्रियमाणत्वाच्च यथा तत्र दुःखानुत्पादः पुरुषार्थस्तथेहापीति विवक्षितम्, अथानुत्पादस्य प्रागभावत्वेनाऽसाध्यत्वात् फलान्तरस्याभावाच्चानन्यगतिकतया कण्टकनाशवत् दुःखसाधननाश एव स्वतः पुरुषार्थस्तथेहापीति वा, उभयथापि दुःखध्वंसस्याऽपुरुषार्थत्वमेव, न च तयोरपि पुरुषार्थत्वमिति वक्ष्यते । मैवम् । दुःखान्तरध्वंसस्याऽयत्नसाध्यत्वेऽपि तादृशदुःखध्वंसस्य मिथ्याज्ञानोच्छेदद्वारा पुरुषप्रयत्नाधीनतत्त्वज्ञानसाध्यत्वात्, तथा हि तत्त्वज्ञानात्सवासनमिथ्याज्ञानाभावे दोषानुत्पत्तौ प्रवृत्त्यभावेऽदृष्टानुत्पत्तौ जन्माभावे तादृशदुःखध्वंसो भवति । अथ चरमदुःख उत्पन्ने तद्ध्वंसस्तज्ज्ञानादेव भविष्य-

ति तदनुत्पादे च तत्त्वज्ञानादपि न स्यादिति चेत् । न । प्रतियोगिवत्तत्त्वज्ञानस्यापि तद्धेतुत्वात्तुल्यवदुभयोरपि कारणत्वात्, तेन विना तदनुत्पत्तेः । अत एव शुकस्य तत्त्वज्ञानमुत्पन्नमिति तस्य तदध्वंस उत्पन्नो नास्मदादीनाम् । तत्र दुःखं नोत्पन्नमस्ति तेन स ध्वंसो नास्मदादीनामिति चेत्, अनादौ संसारे तत्कुतो नोत्पन्नम्, स्वकारणाभावादिति चेत् । न । अन्वय-व्यतिरेकानुविधायिनस्तत्त्वज्ञानादन्यस्याऽन्विष्यमाणस्याभावात् । मुक्तौ स ध्वंसोऽस्त्येव तस्मिन् सति मुक्तिरस्त्येवेति स मुक्त्युत्पादकोत्पाद्य इति सर्वाभ्युपगतम्, मुक्तिः सा अन्या वा । नन्वेवं ध्वंसार्थं दुःखमुपादेयं तदनुत्पाद्य ध्वंसानुत्पादादिति चेत्, सत्यम्, पुरुषार्थहेतुत्वेन लोके दुःख-तत्साधनयोरपि उपादानदर्शनात् अनागतकुम्भनाशार्थं मुद्गरादौ प्रवृत्तिदर्शनादनागतदुःखध्वंसार्थमपि प्रवृत्तिः । चरमदुःखध्वंसो न दुःखध्वंसत्वेनोद्देश्यः अयत्नसिद्धदुःखान्तरध्वंसवदपुरुषार्थत्वादिति चेत् । न । समानाधिकरणदुःखप्रागभावासहवृत्तिदुःखध्वंसत्वेन तस्योद्देश्यत्वात्, दुःखासम्भिन्नसुखवत् तस्य च पुरुषप्रयत्नसाध्यत्वमेवेत्युक्तम् । एतेन दुःखध्वंसत्वमेव मोक्षत्वम्, तत्तदात्मयावद्दुःखध्वंससम्बलनदशायान्तु तथा व्यपदेशः प्रतिपुरुषं दुःखध्वंसस्तोमस्य व्यक्तिस्थानीयत्वात् तेजोभावे सम्बलिते अन्धतमसपदप्रयोगवत्, यथा सम्बलिते एव द्वावितिति बुद्धि-व्यपदेशौ प्रवृत्तिरपि सम्बलनार्थमित्यपास्तम् । मिलितानामसाध्यत्वात्, मेलकस्याऽनतिरिक्तत्वेऽतिप्रसङ्गात्, अतिरिक्तत्वे जन्यस्य ध्वंसाद्वृत्तेः अजन्यस्य पुरुषार्थत्वक्षतेः, अन्धतमसादौ तथा सम्बल एव प्रयोगात् । एतेन संस्काराजनकभोगविषयदुःखध्वंसः संस्काराजनकानुभवभवध्वंसो वा मुक्तिः, न चातिव्याप्तिः, जनकत्वस्याऽजनयत्यपि भावादिति निरस्तम् । अपुरुषार्थत्वात् ।

अन्ये तु दुःखप्रागभावासहवृत्तिदुःखसाधनध्वंसो मोक्षः लोकेऽहिकण्टकादिनाशस्य वैदिके प्रायश्चित्तादौ पापनाशस्यानन्यगतिकतया दुःखसाधनध्वंसत्वेन पुरुषार्थत्वात्। अथाहिकण्टकादि पापं वा नाश्यतां तेन तज्जन्यं दुःखं न भवतीति दुःखानुत्पादमुद्दिश्य प्रवृत्तेर्दुःखानुत्पाद एव प्रयोजनं न तु दुःखसाधनाभावः सुख-दुःखाभावेतरत्वादिति चेत्। न। दुःखानुत्पादस्य प्रागभावत्वेनाऽनादितया असाध्यत्वात्। न च तत्पालनं साध्यम्। पालनं हि न तत्स्वरूपं, तस्यासाध्यत्वात्। नोत्तरसमयसम्बन्धः, अभावे सम्बन्धिद्वयातिरिक्तस्य तस्यामाणिकत्वात् अनभ्युपगमाच्च। नापि सम्बन्धिद्वयस्वरूपं साध्यम्, प्रागभावस्यापि असाध्यत्वात् समय-तदुपाध्योश्च प्रयत्नं विनैव सिद्धेः। अथ दुःखे द्वेषाद्यथा तदभावे इच्छा तथा दुःखसाधने द्वेषात् तदभावेऽपि इच्छा तथा तत्साधने प्रवृत्तिरिति चेत्। न। यदिच्छया यत्साधने यस्य प्रवृत्तिस्तस्यैव तत्प्रयोजनत्वमिति दुःखसाधनाभावस्यैव प्रयोजनत्वात्। अथ चिकीर्षायोनिप्रयत्ने प्रयोजनज्ञानापेक्षा तेन विनोपाये चिकीर्षाविरहात्, न तु द्वेषयोनियत्ने, अनिष्टसाधनताज्ञानादहिकण्टकादौ द्वेष्ये द्वेषात् तन्नाशानुकूलो यत्न उत्पद्यते, अयमेव हि द्वेषस्वभावो यत्प्रतिबन्धकं विना स्वविषयनाशानुकूलं यत्नमुत्पादयति, अन्यथा प्रयत्नद्वैविध्यानुत्पत्तेः, अत एव फलं विनैवोत्कटक्रोधान्धानां आत्मघाते प्रवृत्तिरिति चेत्। न। प्रयोजनमनुद्दिश्य द्वेषमात्रात् दुःखैकफलके प्रेक्षावतां प्रयत्नानुत्पादात्, क्रोधान्धानामपि तात्कालिकः फलाभिमानोऽस्त्येव उत्कटरागान्धानामिव परदारादावपि प्रवृत्ताविति। तन्न। दुःखं मे मा भूदित्युद्दिश्य प्रायश्चित्तादौ प्रवृत्तेर्दुःखानुत्पादस्यैव प्रयोजनत्वात्। न च प्रागभावस्याऽसाध्यत्वम्, दुःखसाधनविघटनद्वा-

रा तस्यापि कृतिसाध्यत्वात् । दुःखसाधनसमवधानदशायां कृतौ सत्यां दुःखसाधननाशे सत्यग्रिमसमये प्रागभावस्वरूपमस्ति तेन विना नास्तीत्यन्वय–व्यतिरेकयोस्तत्र सत्त्वात् । घटेऽपि कृतौ सत्यामग्रिमक्षणे तत्सत्त्वं तया विना नेत्येव कृतिसाध्यत्वम्, न तु प्रागसतोऽग्रिमक्षणे सत्त्वमुत्पत्तिः गौरवात् । कृतिं विना न यत्स्वरूपं तत्कृतिसाध्यं प्रागभावस्वरूपन्तु न तथेति चेत् । न । कृतिध्वंसेऽपि घटसत्त्वेनाग्रिमक्षण इत्यावश्यकत्वात् । अत एव योगवत् क्षेमस्याप्यनागतानिष्टानुत्पादजनकस्य परीक्षकप्रवृत्तिविषयत्वमिति वक्ष्यते निषेधापूर्वप्रस्तावे । ननु प्रायश्चित्तनाश्यपापजन्यदुःखस्य प्रागभावो यद्यस्ति तदा दुःखमावश्यकं तस्य प्रतियोगिजनकत्वनियमात्, नास्ति चेत् तर्हि तदभावादेव दुःखानुत्पाद इत्युभयथापि प्रायश्चित्तमफलम्, तस्माद् दुःखसाधनध्वंसमुखेन प्रागभावस्य साध्यतेति तत्रैव कृतिसाध्यत्वपर्य्यवसानाद्दुःखसाधनध्वंस एव पुरुषार्थो न तु दुःखानुत्पादार्थितयेति तत्र प्रागभावसत्त्वासत्त्वविचारो वायसदशनविचारवत् । अथ तदापि प्रागभावस्यासत्त्वे तदभावात् पापं न दुःखसाधनमिति तन्नाशार्थं प्रवर्त्तेत तस्य सत्त्वे च पापमादायैव तस्य दुःखोत्पादकत्वनियमात् प्रायश्चित्ते सत्यपि गले पादिकया पापावस्थानमिति न ततः पापनाश इति चेत् । न । प्रागभावस्याऽसत्त्वेऽपि दुःखसाधनजातीयनाशस्य पुरुषार्थत्वात् सत्त्वेऽपि पापान्तरमादायापि तस्य दुःखजनकत्वसम्भवात्, प्रायश्चित्तात्पापनाशः स्यादेवेति प्रागभावसत्त्वासत्त्वसन्देहेऽपि प्रायश्चित्तादौ प्रवृत्तिरप्रत्यूहेवेति । उच्यते । तत्र दुःखप्रागभावोऽस्त्येव तस्यैव दुःखानुत्पादरूपत्वेन पुरुषार्थत्वात् । स च पापनाशद्वारा प्रायश्चित्तसाध्य इति प्रागभावसत्त्वेऽपि न निष्फलं प्रायश्चित्तम् । तेन प्रागभावेन दुःख-

मवश्यं जननीयमिति चेत्, सत्यम्, किन्तु पापान्तरमासाद्य । न चैवं प्रायश्चित्तमफलम्, दुःखानुत्पादेन तस्य सफलत्वात् । न च दुःखानुत्पादस्यापि दुःखानुत्पादान्तरमेव फलं तच्च तत्र नास्तीत्यफलत्वम्, स्वरूपसत एव तस्य पुरुषार्थत्वात् अनवस्थानाच्च । अतोऽनेन पापेन दुःखं मे मा भूदिति विद्यमानपापनाशार्थं प्रायश्चित्ते प्रवृत्तिः । एतेन चीर्णप्रायश्चित्ते दुःखप्रागभावो नास्त्येव, अन्यथा तस्य प्रतियोगिनाश्यत्वेनानिर्मोक्षप्रसङ्गात्, न च प्रायश्चित्तवैफल्यं, न वा भगवतो दुःखमपकर्मोपदेशकत्वेनाऽनाप्तत्वम्, तस्य पापध्वंसेनैव सफलत्वात् प्रागभावानिश्चयेऽपि नरकसाधनपापानिश्चयात् तन्नाशार्थं प्रवृत्तिरित्यपास्तम् । दुःखसाधनध्वंसस्य स्वतोऽपुरुषार्थत्वात् । पापान्तरेण तत्प्रतियोगिजनने तन्नाशात् तस्माद्दुःखं मे मा भूदित्युद्दिश्य तत्साधनध्वंसार्थं प्रवृत्तिरिति दुःखानुत्पाद एव पुरुषार्थो न तु दुःखसाधनध्वंस इति स्थितम् । अपि च न तावद्दुःखमयसंसारबीजमिथ्याज्ञानस्य ध्वंसो मुक्तिः, तत्त्वज्ञानात् तन्नाशेऽपि शरीरधर्मादिसत्त्वदशायां मुक्तिप्रसङ्गात् । नापि शरीरेन्द्रियबुद्ध्यादि-तन्निदानधर्माधर्मध्वंसः, अचीर्णप्रायश्चित्तकर्मणां भोगैकनाश्यत्वेन तत्त्वज्ञानानाश्यत्वात्, भोगद्वारा तन्नाशस्य चाऽपुरुषार्थत्वादिति ।

अपरे तु दुःखात्यन्ताभावो मुक्तिः । यद्यपि परदुःखात्यन्ताभावः स्वतः सिद्ध एव स्वदुःखात्यन्ताभावः स्वात्मन्यसम्भवी घटादावतिप्रसक्तोऽसाध्यश्च, तथापि दुःखसाधनध्वंस एव स्ववृत्तिदुःखात्यन्ताभावसम्बन्धः स च साध्य एव । न चैवमावश्यकत्वेन स एव मुक्तिः, तस्य स्वतोऽपुरुषार्थत्वेन दुःखाभावमुद्दिश्य तत्र प्रवृत्तेः "दुःखेनात्यन्तं विमुक्तश्चरती"त्यत्रात्यन्ताभावत्वेन मुक्तिश्रवणाच्च । यद्यपि दुःखसाधनध्वंसो न पुरुषा-

र्थोऽत्यन्ताभावश्च न साध्यस्तथापि विशिष्टस्य पुरुषार्थत्वं विशेषणसाध्यत्वेन विशिष्टसाध्यत्वञ्च । अहिकण्टकादिनाशस्यापि तत्तद्व्यक्तिसाध्यदुःखात्यन्ताभावमुद्दिश्य तत्सम्बन्धत्वेनैव साध्यतेति । तन्न । अधर्मादिदुःखसाधनध्वंसस्य न मुक्तिनिर्वाहकत्वमित्युक्तत्वात् । किञ्च नाऽनागतस्ववृत्तिदुःखस्यात्यन्ताभावसम्बन्धः साध्यः, मुक्तस्याऽनागतस्ववृत्तिदुःखस्यानभ्युपगमात् अभ्युपगमे वा अमुक्तत्वापातात् अत्यन्ताभावसम्बन्धविरोधाच्च । नाप्युत्पन्नस्य स्ववृत्तिदुःखस्य, तदृत्तेस्तत्रात्यन्ताभावविरोधात् तदभावस्य स्वतःसिद्धत्वात् अतीतदुःखाभावस्याऽनुद्देश्यत्वाच्च । नापि परकीयदुःखस्यात्यन्ताभावसम्बन्धः, तस्य स्वतःसिद्धत्वात् । अपि च दुःखसाधनध्वंसस्य नात्यन्ताभावसम्बन्धत्वे मानमस्ति । दुःखसाधनध्वंसादावस्य दुःखस्यात्यन्ताभाव इति बुद्धि—व्यपदेशौ स्त इति चेत् । न । तस्य समानाधिकरणदुःखासमानकालदुःखाभावविषयत्वेनाप्युपपत्तौ अतिरिक्तसम्बन्धाविषयत्वात् । एतेन सर्वदुःखप्रागभावसंसर्गाभावो मुक्तिः, घटादेश्च न मुक्तत्वं, दुःखसाधनध्वंसविशेषितैतद्योगिनो मुक्तपदार्थत्वात् तथैव व्यवहारात् योग—रूढिभ्यां पङ्कजादिपदवाच्यत्ववदिति निरस्तम् । प्रागभावसंसर्गाभावस्य स्वतोऽनुद्देश्यत्वात् प्रत्युतात्यन्ताभावस्याऽसाध्यत्वेन ध्वंसरूपत्वेन तस्य दुःखरूपतया हेयत्वात् ।

प्राभाकरास्तु आत्यन्तिकदुःखप्रागभावो मुक्तिः । न च तस्यानादित्वेन सिद्धत्वादपुरुषार्थत्वम्, कदाचित् कृत्यनपेक्षत्वेऽपि प्रतियोगिजनकाधर्म्मनाशमुखेन तस्य कृतिसाध्यत्वात्, कृत्यधीनतत्त्वज्ञानादधर्म्मनाशे सत्याग्रिमसमये दुःखप्रागभावस्वरूपमस्ति, तया विना अधर्म्मेण दुःखजननान्न तत्प्रागभावस्वरूपमस्तीति घटवत् कृतिसाध्यत्वात् । व्यवस्थापितञ्च त्वया प्रागभावस्य कृति-

साध्यत्वमहिकण्टकादिनाशप्रायश्चित्तक्षेमार्थिप्रवृत्तिस्थले । न चैवं युगपद्धर्म्मध्वंस एव मुक्तिः प्रागभावस्याऽनादितया विवक्षितविवेकेन तत्रैव कृतिसाध्यत्वपर्य्यवसानादिति वाच्यम् । अधर्म्मध्वंसस्य स्वतोऽपुरुषार्थत्वात् । दुःखानुत्पादहेतुत्वेनैव तस्य प्रयोजनता वाच्या सा च कथमसाध्यत्वे प्रागभावस्य स्यादिति । अत एव "दुःख—जन्मे"त्यादिसूत्रमपि संगच्छते । अन्यथा मिथ्याज्ञानाद्यनुत्पादानां दुःखानुत्पादहेतुत्वेनाऽसङ्गतं स्यादित्यास्थिषतेति । तदतिस्थवीयः । तथा ह्यस्तु प्रागभावस्य साध्यत्वं तथापि तस्य प्रतियोगिजनकत्वनियमान्मुक्तस्यापि दुःखोत्पादप्रसङ्गः । अधर्म्म—शरीरादिसहकारिविरहान्न दुःखोत्पाद इति चेत्, तर्ह्युत्तरावधिविधुरत्वेनाऽनादेरत्यन्ताभावत्वापत्तौ प्रागभावत्वव्याकोपः । प्रतियोगिजनकनाश्यजातीयत्वेन तत्र प्रागभावव्यपदेशो वस्तुतो नित्य एव स इति चेत् । न । नित्यत्वेनात्यन्ताभावरूपतया प्रागभावान्यत्वेन नाश्यजातीयत्वाभावात् प्रतियोगिजनकनाशमुखेन तस्याऽसाध्यत्वाच्च । अपि च मुक्तेः प्रागभावस्य समानाधिकरणं भावि दुःखं न प्रतियोगि तस्याऽभावात् भावे वा अमुक्तत्वापातात् । नापि समानाधिकरणमतीतं वर्त्तमानञ्च, तत्प्रागभावस्य विनष्टत्वात् । नापि व्यधिकरणम्, अन्यवृत्तिदुःखस्यान्यत्रात्यन्ताभावेन प्रागभावाभावात् तस्य प्रतियोगिसमानदेशत्वात् । न च दुःखमात्रं प्रतियोगि, स्वपरावृत्तेर्दुःखमात्रस्याऽप्रामाणिकत्वात् तस्यात्यन्तासतो नित्यनिवृत्तत्वेन तन्निवृत्तये प्रेक्षावत्प्रवृत्त्यनुपपत्तेः । अहिकण्टकादिनाश—प्रायश्चित्तादिसाध्यदुःखप्रागभावस्य कलञ्जभक्षणप्रागभावस्य च समानाधिकरणमेव भावि दुःखं भक्षणञ्च प्रतियोगि ।

ननु दुःखाभावो न पुरुषार्थः सुखस्यापि हानेः तुल्यायव्ययत्वात् । न च बहुतरदुःखानुविद्धतया सुखस्यापि प्रेक्षावद्धेयत्वम्, आव-

श्यकत्वेन दुःखस्यैव हेयत्वात् सुखस्य निरुपधीच्छाविषयत्वात् । अन्यथा दुःखाननुविद्धतया तथात्वे पुरुषार्थत्वविरोधादिति चेत् । न । सुखमनुद्दिश्यापि दुःखभीरूणां दुःखहानार्थं प्रवृत्तिदर्शनात् दुःखाभावस्य स्वत एव पुरुषार्थत्वात् । न हि दुःखाभावदशायां सुखमस्तीत्युद्दिश्य दुःखहानार्थं प्रवर्त्तते । वैपरीत्यस्यापि सम्भवे सुखस्याप्यपुरुषार्थत्वापत्तेः अतो दुःखाभावदशायां सुखं नास्तीति ज्ञानं न दुःखाभावार्थिप्रवृत्तिप्रतिबन्धकम् । तस्मादविवेकिनः सुखमात्रलिप्सवो बहुतरदुःखानुविद्धमपि सुखमुद्दिश्य शिरो मदीयं यदि याति यास्यतीति कृत्वा परदारादिषु प्रवर्त्तमाना वरं वृन्दावने रम्ये इत्यादि वदन्तो नात्राधिकारिणः, ये च विवेकिनोऽस्मिन् संसारकान्तारे कियन्ति दुःखदुर्दिनानि कियती सुखद्योतिकेति कुपितफणिफणामण्डलच्छायाप्रतिमामिदमिति मन्यमानाः सुखमपि हातुमिच्छन्ति तेऽत्राधिकारिणः । न च भोगार्थिनामप्रवृत्तौ पुरुषार्थता हीयते, कस्यचिदप्रवृत्तावपि चिकित्सादेः पुरुषार्थत्वात् । अथ, दुःखाभावोऽपि नावेद्यः पुरुषार्थतयेष्यते । न हि मूर्छाद्यवस्थार्थी प्रवृत्तो दृश्यते सुधीः ॥ पुरुषार्थत्वेन सुखवत् ज्ञायमानत्वनियमात्, न च मुक्तिज्ञानं सम्भवतीति चेत् । न हि दुःखाभावं जानीयामित्युद्दिश्य प्रवृत्तिः, किन्तु दुखं मे मा भूदित्युद्दिश्येत्यतो दुःखस्याभाव एव पुरुषार्थः । तस्य ज्ञानञ्च स्वकारणाधीनं, न तु पुरुषार्थतोपयोगि, सुखी स्यामित्युद्दिश्य प्रवर्त्तते, न तु सुखं जानीयामिति, सुखमेव तथा न तु तदवगमः तस्यावश्यकत्वेनान्यथासिद्धत्वात् गौरवाच्च । किञ्च बहुतरदुःखजर्जरकलेवरा दुःखाभावमुद्दिश्य मरणेऽपि प्रवर्त्तमाना दृश्यन्ते, न च मरणे तस्य ज्ञानमस्ति । न ते विवेकिन इति चेत् । न । पुरुषार्थत्वे विवेकानुपयोगात् । किञ्च चरमदुःखानुभवेऽनागत-

दुःखध्वंसोऽपि विषयः, तथा चाग्निमक्षणे तद्भंसस्तद्विषयकश्च विनश्यदवस्थं ज्ञानमस्तीति वर्त्तमानाप्यचिरमनुभूयते । ज्ञानसमये मुक्तिलक्षणस्य सत्त्वात् न ज्ञानं मुक्तिविरोधि । प्रमाणन्तु, दुःखत्वं देवदत्तदुःखत्वं वा स्वाश्रयासमानकालीनध्वंसप्रतियोगिवृत्ति कार्य्यमात्रवृत्तिधर्म्मत्वात् सन्ततित्वाद्वा एतत्प्रदीपत्ववत् । सन्ततित्वञ्च नानाकालीनकार्य्यमात्रवृत्तिधर्म्मत्वम् । एवं सुखत्वादावपि साध्यं तेन सकलोच्छेदे मोक्षः । न चाप्रयोजकत्वम्, सन्तत्युच्छेदे मूलोच्छेदस्य प्रयोजकत्वात् । प्रकृते च मिथ्याज्ञानस्य संसारमूलस्य श्रवणादिक्रमेणोत्पन्नतत्त्वज्ञानात् निवृत्तिः सम्भवत्येव । "आत्मा ज्ञातव्यो न स पुनरावर्त्तते" इति श्रुतिश्च प्रमाणम् । रात्रिसत्रन्यायेनार्थवादोपनीतापुनरावृत्तेः अधिकारिविशेषणत्वात्, 'सः' आत्मज्ञः, 'न पुनरावर्त्तते' न पुनः शरीरी भवतीत्यर्थः । "आत्मा वा अरे श्रोतव्यो मन्तव्यो निदिध्यासितव्यः साक्षात्कर्तव्यः" इत्युपक्रम्य "दुःखेनात्यन्तं विमुक्तश्चरति" इति श्रुतिश्च मानम् ।

आचार्य्यास्तु, "अशरीरं वावसन्तं प्रियाप्रिये न स्पृशतः" इति श्रुतिस्तत्र प्रमाणम् । वावसन्तमिति यङ्लुकि । तेन संसारितादशायां क्षणमात्रमशरीरत्वेन नान्यथासिद्धिः । ननु द्वन्द्वस्वरसेन मिलितसुख-दुःखोभयनिषेधः प्रतीयते स तु नित्यवत्प्राप्त एव एकैकनिषेधे च वाक्यभेदापत्तिः, न च मुक्तौ प्रमाणमिति चेत् । न । द्वित्वेनैकेन रूपेणोपस्थितयोः प्रत्येकं निषेधान्वयेऽपि वाक्यभेदाभावात्, धव-खदिरौ छिन्धीत्यत्र प्रत्येकं छिदान्वय इव, न हि तत्र मिलितच्छिदा । अपि च न प्रियाप्रियरूपं किञ्चिदस्तीति मिलितनिषेधोऽप्येकैकान्वये प्रत्येकाभावे वा भवेत् तत्रैकान्वयस्याशरीरं अयोग्यत्वात् प्रत्येकाभाव एव पर्यवस्यति, अत

एव सर्वमुक्तिरपि, सर्वदुःखसन्ततिपक्षीकरणे तत्सिद्धेः अन्यथा मुक्तिरपि न स्यात् तत्रैव व्यभिचारात्। यदि चोषरात्मान एव केचित् तदा तच्छङ्क्या मोक्षार्थं न कश्चित् प्रवर्त्तेत। शम-दम-भोगानभिष्वङ्गादिमुक्तिचिह्नेन श्रुतिसिद्धेन सन्देहनिवृत्तिरिति चेत्। न। संसारित्वेन मुक्तियोग्यत्वात् न तु तद्विशेषणशमादिमत्त्वेन, सामान्ये बाधके सत्येव योग्यताया विशेषनिष्ठत्वात्।

किञ्च शमादयः श्रुतौ सहकारितया बोधिताः न तु योग्यतया, तत्त्वेऽपि संसारित्वेन तेऽपि साधनीयाः शमादिकमपि हि कार्य्यं तत्रापि संसारित्वेनैव योग्यता सामान्ये बाधकाभावात्। न च नित्यसुखाभिव्यक्तिर्मुक्तिः, सा हि न नित्या, मुक्त-संसारिणोरविशेषप्रसङ्गात्। नोत्पाद्या, तद्धेतुशरीराद्यभावात्, ज्ञानमात्रे सुखमात्रे वा तद्धेतुत्वावधारणात्। न च संसारिदशायां तद्धेतुः, सामान्ये बाधकाभावात्। अत एव स्वर्गादौ शरीरकल्पना। किञ्च तज्जनकं न तावदात्म-मनोयोगः, तस्याऽदृष्टादिनिरपेक्षस्याऽजनकत्वात्। विषयमात्रापेक्षणे तु संसारिदशायामपि तदभिव्यक्तिप्रसङ्गः। नापि योगजो धर्म्मः सहकारी, तस्योत्पन्नभावत्वेन विनाशित्वेऽपवर्गनिवृत्त्यापत्तेः। न च तज्जन्याभिव्यक्तिरनन्ता, तस्या अप्यत एव नाशात्। अथ तत्त्वज्ञानात्सवासनमिथ्याज्ञाननाशे दोषाभावेन प्रवृत्त्याद्यभावाद्धर्माधर्मयोरनुत्पादे प्राचीनधर्माधर्मक्षयात् दुःखसाधनशरीरादिनाश एव तद्धेतुरत एव तस्यानन्त्येनाभिव्यक्तिप्रवाहोऽप्यनन्त इति चेत्। न। शरीरं विना तदनुत्पत्तेः तस्य तद्धेतुत्वे मानाभावाच्च। न च मोक्षार्थिप्रवृत्तिरेव तत्र मानं, दुःखहानार्थितयापि तदुत्पत्तेः। न च नित्ये सुखे मानमस्ति। "नित्यं विज्ञानमानन्दं ब्रह्म" "आनन्दं ब्रह्मणो रूपं तच्च मोक्षे प्रतिष्ठित" मित्यादिश्रुतिर्मानमिति चेत्। न। उपजन-

नापायवतोज्ञान–सुखयोरहं जानाम्यहं सुखीति भिन्नत्वेनानुभूयमानयोर्ब्रह्माभेदबोधने प्रत्यक्षबाधात् । अथ सुखस्य ब्रह्माभेदबोधनादेवायोग्यतया अनित्यं सुखं विहाय वाक्यार्थत्वेन नित्यसुखसिद्धिः स्वर्गवत् न तु नित्ये सुखे सिद्धे तदभेदबोधनं येनान्योन्याश्रयः, यद्वा नित्यं सुखं बोधयित्वा तदभिन्नं ब्रह्म बोध्यते, न च वाक्यभेदः, वाक्यैकवाक्यत्वादिति चेत् । न । आत्मनोऽनुभूयमानत्वेन तदभिन्नस्य नित्यसुखस्याप्यनुभवप्रसङ्गात् सुखमात्रस्य स्वगोचरसाक्षात्कारजनकत्वनियमात् तदननुभवे वा आत्मनोऽपि अनुभवो न स्यात् । अथात्माभिन्नं नित्यसुखमनुभूयत एव सुखत्वं तत्र नानुभूयत–इति चेत्, न, सुखानुभवसामग्रा एव सुखत्वानुभावकत्वात्, तस्मादानन्दं ब्रह्मेति मत्वर्थीयाच्प्रत्ययान्तत्वेनानन्दवत्त्वं बोध्यं तेनाऽभेदः, अन्यथा नपुंसकलिङ्गत्वानुपपत्तेः ।

एतेन ब्रह्माद्वैततत्त्वसाक्षात्कारादविद्यानिवृत्तौ विज्ञानसुखात्मकः केवल आत्मा अपवर्गे वर्तत इति वेदान्तमतमपास्तम् । स्वप्रकाशसुखात्मकब्रह्मणो नित्यत्वेन मुक्त–संसारिणोरविशेषप्रसङ्गात्, पुरुषप्रयत्नं विना तस्य सत्त्वादपुरुषार्थत्वाच्च । अविद्यानिवृत्तिः प्रयत्नसाध्येति चेत्, अविद्या यदि मिथ्याज्ञानम्, अर्थान्तरं वा, उभयथापि सुख–दुःखाभाव–तत्साधनेतरत्वेन तन्निवृत्तेरपुरुषार्थत्वात् ।

त्रिदण्डिनस्तु, आनन्दमयपरमात्मनि जीवात्मलयो मोक्षः, लयश्च लिङ्गशरीरापगमः, लिङ्गशरीरञ्च एकादशेन्द्रियाणि पञ्च महाभूतानि सूक्ष्ममात्रया सम्भूयावस्थितानि जीवात्मनि सुख–दुःखावच्छेदकानीत्याहुः । तन्न । शरीरध्वंसस्य स्वतो दुःखसाधनाभावतया अपुरुषार्थत्वात् । न चोपाधिशरीरनाशे औपाधिकजीव-

नाशो लयः, स्वनाशस्यापुरुषार्थत्वात्, ब्रह्मणो नित्यत्वेन तदभिन्नस्य नाशानुपपत्तेः भेदाभेदस्य च विरोधेनाऽभावात्। नाप्यनुपप्लवा चित्तसन्ततिरपवर्गः, आवश्यकत्वेनानुपप्लवस्य दुःखाभावस्य पुरुषार्थत्वेन चित्तसन्ततेरपुरुषार्थत्वात् शरीरादि कारणं विना चित्तसन्ततेरनुत्पादाच्च। न हि चित्तमात्रं तत्सामग्री, शरीरादिवैयर्थ्यापत्तेः। नापि दुःखहेतुत्वेनात्मनो हानमेव मुक्तिः, सुख-दुःखाभावेतरत्वेनापुरुषार्थत्वात् ज्ञानरूपात्महानस्याऽयत्नसिद्धेः अतिरिक्तहानस्याशक्यत्वात्।

यत्तु योगर्द्धिसाध्यनिरतिशयानन्दमयीं जीवन्मुक्तिमुद्दिश्य प्रवृत्तेः कारणवशादात्यन्तिकदुःखाभावरूपां मुक्तिमासादयतीति मतम्। तन्न। परममुक्तेरपुरुषार्थत्वापत्तेः विरक्तस्य मोक्षेऽधिकारात् सुखोद्देशेनाप्रवृत्तेश्च। मोक्षे च सर्वाश्रमाणामधिकारः आश्रमचतुष्टयमुपक्रम्य "स ब्रह्मसंस्थोऽमृतत्वमेति" इति श्रुतेः, सङ्कोचे कारणाभावात्। आकाङ्क्षाया अविशेषेणानन्तर्यस्याऽप्रयोजकत्वात्। कथं तर्हि "मोक्षाश्रमश्चतुर्थो वै यो भिक्षोः परिकीर्तितः" इति प्रव्रज्यां मोक्षाश्रममाहुः, गृहस्थस्य च पुत्र-दारादिसङ्गो दुर्वार इत्यसाधारण्येन तथोपदेशात् तत्त्वज्ञाननिष्ठो गृहस्थोऽपि मुच्यत इत्यागमाच्च। एवं स्थिते मोक्षमुपक्रम्य "आत्मा वा अरे श्रोतव्यो मन्तव्यो निदिध्यासितव्यः साक्षात्कर्त्तव्यः" इति श्रुतिः, श्रुतिभ्यः शरीरादिभिन्नमात्मानमवधार्य्य शास्त्रेण पदार्थान् विविच्य तदबोधितोपपत्तिभिस्तस्य स्थिरीकरणरूपं मननं विदधाति। न च शब्दोपपत्तिजन्यतत्त्वज्ञानात् साक्षात्कारिसंस्कारमिथ्याज्ञाननिवृत्तिः, दिङ्मोहादौ तथाऽनुपलब्धेः, अतः श्रुति-स्मृत्युपदिष्टयोगविधिना चिरनिरन्तरादरसेवितनिदिध्यासनजन्ययोगजधर्मादात्मतत्त्वसाक्षात्कारं संसारबीजसंस्कारमिथ्याज्ञाननिहनन-

समर्थमासाद्य दोषाभावात्प्रवृत्त्यादेरभावे अनागतधर्मानुत्पादेऽनादिभवसञ्चितकर्मणां भोगेन क्षयादपवृज्यते। उपदेशमात्राच्छरीरभिन्नात्मावगमेऽप्यन्यपरत्वशङ्क्या सङ्कल्पकस्य नाऽश्रद्धामलक्षालनमिति मननमावश्यकम्। तथा च "मन्तव्यश्चोपपत्तिभिरि"ति श्रुतिरेवोपपत्तिबोधकस्य शास्त्रस्यापवर्गहेतुत्वं बोधयति, मननस्य तदेकसाध्यत्वात्। एवञ्च शम-दम-ब्रह्मचर्याद्युपबृंहितयावन्नित्य-नैमित्तिक-सन्ध्योपासनादिकर्म्मसहितात् तत्त्वज्ञानान्मुक्तिः। स्यादेतत् ज्ञान-कर्म्मणोर्न समप्राधान्येन समुच्चयः कर्मणां स्ववाक्यात् फलान्तरार्थत्वेन श्रुतत्वान्मोक्षार्थकल्पनाविरोधात् तत्त्वज्ञानस्य कर्म्मनैरपेक्षेण मुक्तिहेतुत्वप्रतीतेश्च। नाङ्गाङ्गिभावेन, तथा हि न कर्म्म सन्निपत्योपकारकम्, तत्त्वज्ञानशरीरानिर्वाहकत्वात्। नापि प्रयाजादिवदारादुपकारकम्, स्ववाक्यत एव कर्मणां प्रयोजनलाभेन फलवत्सन्निधावफलत्वाभावात्। उपपत्तिविरुद्धश्च ज्ञानकर्मसमुच्चयः काम्य-निषिद्धयोरभावात्। नाप्यसङ्कल्पितफलवत्काम्यकर्मसमुच्चयः, चतुर्थाश्रमविधिविरोधात्। अत एव न यावन्नित्य-नैमित्तिकसमुच्चयोऽपि। नापि यत्याश्रमविहितेन कर्मणा, तत्त्वज्ञाने सति गृहस्थस्यापि मुक्तेः।

"न्यायागतधनस्तत्त्वज्ञाननिष्ठोऽतिथिप्रियः।
श्राद्धकृत्सत्यवादी च गृहस्थोऽपि विमुच्यते"—

इति स्मृतेः। न चाऽननुगतमपि साधनं, स्वर्गवदपवर्गे प्रकारभेदाभावात्। न चापवर्गार्थिकर्त्तव्यतया कर्माणि विहितानि येन तत्समुच्चयः स्यात्। तस्मात् "सन्न्यस्य सर्वकर्माणी"ति स्मृतेः सर्वकर्मसन्न्यासो ज्ञानमात्राच्च मोक्ष इति। मैवम्। स्व-स्वाश्रमविहितेन कर्मणा ज्ञानस्य समप्राधान्येन समुच्चयात् ज्ञान-कर्मणोस्तुल्यत्वेन मुक्त्यर्थत्वाभिधानात्। तथाच श्रीभगवद्गीता—

"स्वे स्वे कर्मण्यभिरतः संसिद्धिं लभते नरः ।
स्वकर्मणा तमभ्यर्च्य सिद्धिं विन्दति मानवः" ॥

श्रीविष्णुपुराणे—

"तस्मात्तत्प्राप्तये यत्नः कर्त्तव्यः पण्डितैर्नरैः ।
तत्प्राप्तिहेतुर्विज्ञानं कर्म चोक्तं महामते" ॥

हारीतः—

"उभाभ्यामेव पक्षाभ्यां यथा खे पक्षिणां गतिः ।
तथैव ज्ञान-कर्मभ्यां प्राप्यते ब्रह्म शाश्वतम्" ॥

श्रुतिश्च, "सत्येन लभ्यस्तपसा ह्येष आत्मा सम्यग् ज्ञानेन ब्रह्मचर्येण च" इति । एतन्मूलकमेव

"परिज्ञानाद्भवेन्मुक्तिरेतदालस्यलक्षणम् ।
कायक्लेशभयाच्चैव कर्म नेच्छन्त्यपण्डिताः" ॥

"ज्ञानं प्रधानं नतु कर्महीनं
कर्म प्रधानं न तु बुद्धिहीनम् ।
तस्मादुभयोरेव भवेत्प्रसिद्धि-
र्न ह्येकपक्षो विहगः प्रयाति" ॥

न च फलान्तरार्थत्वेन श्रुतस्य कर्मणः फलान्तरार्थत्वमनुपपन्नम्, तथा वाक्यस्वरसाद् ज्ञानतुल्यतापतीतेः । तत्तत्फलजनकत्वेऽपि हि कर्मणां शब्द एव मानम्, एवमन्यत्रापि । भवतु वा आरादुपकारितया अङ्गाङ्गिभावेन समुच्चयः, स प्रयाजादिवदपूर्वद्वारैव ।

यत्तु जडभरतोपाख्याने—

"न पपाठ गुरुप्रोक्तां कृतोपनयनः श्रुतिम् ।
न ददर्श च कर्माणि शास्त्राणि जगृहे न च" इति ॥

तद्योगिधर्मसङ्कल्पत्यागार्थं जातिस्मरत्वेन न शिक्षितानीत्येवंपरं वा। तदुक्तम्– "जज्ञे जातिस्मरो द्विजः सर्वविज्ञानसम्पन्नः सर्वशास्त्रार्थतत्त्ववित्" इति।

अत्र केचित्। अनुत्पन्नतत्त्वज्ञानस्य ज्ञानार्थिनस्तत्प्रतिबन्धकाधर्मनिवृत्तिद्वारा प्रायश्चित्तवदारादुपकारकं कर्म, सन्निपत्योपकारकन्तु तत्त्वज्ञानम्। उत्पन्नतत्त्वज्ञानस्य तु अन्तरालब्धदृष्टेः कारीरीसमाप्तिवदारब्धाश्रमपरिपालनं लोकसंग्रहार्थम्। यद्यपि लोकसंग्रहो न प्रयोजनं सुख–दुःखाभाव–तत्साधनेतरत्वात्, तथाप्यकरणे लौकिकानां विगानान्निन्द्यत्वेन यज्ज्ञानं तत्परिहारार्थं तत्कर्मसाध्यदुःखोत्पादनेनाऽधर्मक्षयार्थञ्चेति। तन्न। तत्त्वज्ञानं प्रत्यङ्गत्वपक्षे कर्मणां ह्यपूर्वद्वारा जनकत्वं दुरितध्वंसकल्पनातो लघुत्वात् तस्माद् यानि कर्माणि उपनीतमात्रकर्तव्यत्वेन विहितानि सन्ध्योपासनादीनि तानि मोक्षार्थिभिरप्यवश्यं कर्तव्यानि, तत्परित्यागस्य प्रत्यवायहेतुत्वेनाऽशास्त्रीयत्वात् सङ्कोचे मानाभावात्, निषिद्धानि काम्यानि च बन्धहेतुत्वान्मुक्तिपरिपन्थीनीति त्यज्यन्ते। धनमूलानि च धनत्यागादेव त्यज्यन्ते। सोऽयं "संन्यस्य सर्वकर्माणी"त्यस्यार्थः। अयमेव हि सन्न्यासपदार्थः, तथा च श्रीभगवद्गीता—

"काम्यानां कर्मणां न्यासं सन्न्यासं कवयो विदुः।
नियतस्य तु सन्न्यासः कर्मणो नोपपद्यते।
मोहात्तस्य परित्यागस्तामसः परिकीर्त्तितः"॥

तत्त्वज्ञानं धर्मद्वारा मुक्तिसाधनं विहितत्वेन धर्मजनकत्वादिति धर्मस्यैव प्राधान्यम्। स च धर्मो मुक्त्यैव फलेन नाश्यते इति केचित्। तन्न। मिथ्याज्ञाननिवृत्त्या दृष्टद्वारेणैवोपपत्तावदृष्टकल्पनानवकाशात्। अन्यथा भेषजादिष्वपि तथा स्यात्। एवञ्च त-

वैव विहितत्वस्य व्यभिचारः ।

अत्र वदन्ति । संसारकारणोच्छेदक्रमेण कार्य्योच्छेदान्मोक्षः, एवञ्च तत्त्वज्ञानमात्रादेव मिथ्याज्ञानोच्छेदादपवर्गः तत्र न तस्य कर्मसहकारित्वम्, मिथ्याज्ञानोन्मूलने कर्मविनाकृतस्यैव तस्य दिङ्मोहादौ हेतुत्वावधारणात् । कर्मणामपवर्गहेतुताश्रुतिश्च तत्त्वज्ञानद्वाराप्युपपद्यते, साक्षात्तस्याऽश्रुतेः । तत्त्वज्ञानवतश्चाधिकारे नित्याकरणेऽपि दोषाभावेन प्रत्यवायाभावोपपत्तेः । अन्यथा भोगार्थं विहित–निषिद्धाचरणेन धर्माधर्मोत्पत्तौ मोक्षाभावप्रसङ्गः । ननु तत्तत्तीर्थमहादान–स्नान–काशीमरणादिकर्मणां तत्त्वज्ञाननैरपेक्ष्येण मुक्तिहेतुत्वं श्रूयते तत्कथं तत्त्वज्ञानमेव तद्धेतुः । न च तेषां तत्त्वज्ञानमेव व्यापारः, अनुपदं तत्त्वज्ञानानुत्पादादृष्टद्वारा तद्धेतुत्वं वाच्यं तथा चापवर्गकारणमेवादृष्टं कल्प्यतां लाघवात् । न च तत्त्वज्ञानप्रतिबन्धकाधर्मनाश एव तेषां व्यापारः, प्रतिबन्धकदुरितध्वंसतोऽपूर्वस्य लघुत्वात् । अथ तत्तत्कर्म्मणामननुगमात् कथं मुक्तिरनुगता दुःखध्वंसे प्रकाराभावादिति चेत् । न । गुणनाशे समवाय्यसमवायिनाशविरोधिगुणानां नाशकत्वनियमात् । तत्तन्नाशाविशेषे तु तत्तद्धेतुरिति चेत्, तर्हि तत्तद्दुःखध्वंसे तत्तत्कर्म्मणामपि तथात्वमस्तु, तवापि तत्त्वज्ञाने तत्प्रतिबन्धकदुरितध्वंसे चाननुगतानामेव तत्तत्कर्म्मणां जनकत्वं, मुमुक्षुमुद्दिश्य विहितत्वं वानुगतमस्तीति चेत् । न । ज्ञान–कर्म्मणोर्निरपेक्षकारणताश्रवणात् व्रीहि–यववद्विकल्प एव । निरपेक्षैकसाधनावरुद्धेऽपरसाधनावरुद्धेऽपरसाधनान्वयो न विकल्पमन्तरेण सम्भवति आकाङ्क्षाविरहादिति न्यायात् । साहित्यबोधकं विनैकं प्रत्यनेकस्य हेतुता यत्र शब्देन बोध्यते तत्र विकल्पेनाऽन्वयो यथा व्रीहि–यवयोरिति व्युत्पत्तेर्वा । वस्तुतस्तु दृढभूमिसंवासनमिथ्याज्ञानोन्मू-

लनं विना न मोक्ष इत्युभयसिद्धम्, तादृशमिथ्याज्ञाननाशे चान्वय-व्यतिरेकाभ्यां तत्त्वज्ञानकारणमवधारितमतो न तेन विना स इति तत्रापि तत्त्वज्ञानमावश्यकम् । यद्यपि मिथ्याज्ञाननाशे विरोधि-गुणस्यैव हेतुत्वम्, तथापि मिथ्याज्ञानप्रागभावासहवृत्तिमिथ्या-ज्ञानध्वंसस्य तदेकसाध्यत्वम् । "आत्मा ज्ञातव्यो न स पुनरावर्त्तते" इति श्रुतेर्मोक्षं प्रति तत्त्वज्ञानस्य हेतुत्वावधारणाच्च । "तमेव विदित्वाऽतिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय" इति श्रुत्या तत्त्वज्ञानं विना न मोक्षः किन्तु तस्मिन्सत्येवेति प्रतिपादनाच्च । अन्यथा स्वर्गादौ न शरीरादयः कल्प्येरन् कर्म्मणां तत्त्वज्ञानद्वारापि मुक्तिजनकत्वसम्भवात्, प्रमाणवतो गौरवञ्च न दोषाय । कर्म्मणां तत्त्वज्ञानविशेष एव जनकत्वमतो न तत्राऽननुगमो दोषाय । वाराणसीमरणस्य तत्त्वज्ञानफलकत्वमागमादेवावगम्यते । तत्त्वज्ञानाददत्तफलान्येव कर्म्माणि प्रायश्चित्तादिव विनश्यन्ति अनन्यथासिद्धशब्दबलात् । न च प्रायश्चित्तस्य दुरितोत्पत्तिनिमित्तकत्वं, पापनाशफलश्रवणात् । अत एव न ब्रह्महत्यादीनां प्रायश्चित्तदुःखमेव फलम्, नरकफलश्रुतिविरोधात् प्रायश्चित्तविधिवैय्यर्थ्याच्च, दुःखैकफलत्वेन तत्राप्रवृत्तेः । नापि कर्म्मान्तराधिकार एव फलम्, महापातकातिरिक्तेऽनधिकाराभावात्, अन्यथा यत्किञ्चित्पापवतोऽकृतप्रायश्चित्तत्वेनाऽनधिकारापत्तेः । प्राणान्तिके तदभावाच्च । श्रूयते हि—

"भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः ।
क्षीयन्ते चास्य कर्म्माणि तस्मिन् दृष्टे परात्मनि" ॥

स्मृतिश्च—

"ज्ञानाग्निः सर्वकर्म्माणि भस्मसात्कुरुतेऽर्जुन" इति ।

"नाभुक्तं क्षीयते कर्म्म" त्यत्र च प्रायश्चित्तादिस्मृतितः सङ्को-

चस्यावश्यकत्वेन शब्दबोधितनाशकानाश्यकर्म्मपरत्वं लाघवात् न तु तत्तदन्यकर्म्मपरत्वं गौरवात् पाप–पुण्यक्षयहेतूनां बहुतरत्वात् । ज्ञानस्य नाशकत्वं शब्दबोध्यमित्युक्तम् । अथ भस्मसात्पदस्य लाक्षणिकत्वेन यथा वह्नेः परम्परया भस्म तथा ज्ञानात्कर्म्मक्षय इत्यर्थः । तथा च "नाभुक्तं क्षीयते कर्म्मे"ति स्मृतिरुत्सर्गतो भोगेनैव क्षयमाह, अनन्यथासिद्धप्रायश्चित्तविधिना सा बाध्यते । ज्ञाननाश्यत्वञ्च भोगद्वारापि सम्भवतीत्यबाधे सम्भवति बाधकल्पना नेति चेत् । न । कर्म्मणो भोगनाश्यत्वे ज्ञानस्याऽनाशकत्वात् । न हि भोगस्तत्त्वज्ञानव्यापारः, तथाऽश्रवणात् तेन विनापि कर्म्मण एव तदुपपत्तेश्च । कर्म्मणो भोगनाश्यत्वे तत्त्वज्ञानानुपयोगात्।

यत्तु नाभुक्तमिति स्मृतिविरोधेन क्षीयन्त इत्यादिश्रुतेरन्यथा वर्णनम् । तन्न । स्मृतेः प्रत्यक्षवेदबाधितत्वेन विरुद्धार्थकवेदानुमापकत्वात् । वामदेव–सौभरिप्रभृतीनां कायव्यूहश्रवणात्तत्त्वज्ञानेन कायव्यूहमुत्पाद्य भोगद्वारा कर्म्मक्षय इति चेत् । न । तपःप्रभावादेव तत्त्वज्ञानानुत्पादेऽपि कायव्यूहसम्भवात् । भोगजनार्थञ्च कर्म्माभिरवश्यं तत्तत्कायनिष्पादनमिति न तत्र तत्त्वज्ञानोपयोगः, यौगपद्यञ्च कायानां तज्जनककर्म्मस्वभावात् तपःस्वभावाद्वा । न च ज्ञानं भोगद्वारा कर्म्मनाशकमित्युक्तम् । एतेनागमयोः परस्परविरोधात् अनिर्णये विमतिपदं कर्म्म भोगनाश्यं प्रायश्चित्ताद्यनाश्यत्वे सति कर्म्मत्वात् भुक्त–भुज्यमानकर्म्मवदित्यनुमानान्निर्णय इत्यपास्तम् । ज्ञानस्य प्रायश्चित्ततुल्यत्वेनाऽप्रयोजकत्वात् श्रुतिबाधितत्वाच्च शब्दबोधितनाशकानाश्यत्वस्योपाधित्वाच्च अकृतप्रधानेन कृतप्रधानेन चाङ्गापूर्वेण व्यभिचाराच्च, तस्य प्रधानयागादिनाश्यत्वात् । न च तस्यापि यागस्येव स्वर्गफलकत्वमिति तन्नाश्यत्वमेव अधिकृताधिकारेऽपि स्वर्गकामस्याधिकारात्

अन्यथा निष्फलेऽप्रवृत्तेरिति वाच्यम् । स्वर्गफलत्वेऽङ्गत्वविरोधात् । प्रवृत्तिश्च फलवद्यागार्थितया । तदुक्तम् "प्रधाने रागादङ्गे वैधी" ति । ननु "तावदेवास्य चिरं यावन्न विमोक्षः अथ सम्पत्स्यते कैवल्येन" इति श्रुतेः तावदेवास्योत्पन्नतत्त्वज्ञानस्य चिरं विलम्बः यावन्नोत्पन्नकर्म्मणो विमोक्षः, अथ सम्पत्स्यते कैवल्येनेत्यत्र भोगेन क्षपयित्वा इति शेषः । न च शेषे मानाभावः, सत्यपि विज्ञाने कर्म्मावस्थाने क्लृप्तसामर्थ्यस्य भोगस्यैव नाशकत्वेनाक्षेपादिति चेत् । न । तत्त्वज्ञाने सति तत्त्वज्ञानदशायां न मोक्षः किन्तु तदग्रिमक्षण इत्यर्थत्वेनाप्युपपत्तेः ।

यत्तु अकृतप्रधानाङ्गापूर्वाभिप्रायमेतत् "ज्ञानाग्निः सर्वकर्म्माणी"त्यादि, तेषां कार्य्याणां नाशकान्तराभावादिति । तन्न । प्रधानार्थितया क्लृप्तानां तदभावे तत्सामग्र्यसिद्धेः तत्सत्त्वेऽपि सर्वकर्म्मपदस्य कर्म्मान्तरपरिग्राहकस्य सङ्कोचे मानाभावात् । यदपि भस्मसात्करणादिना फलाजनकत्वमुच्यते तत्त्वज्ञानात्कृतमपि विहितं कर्म्म न फलायेति । तथा च श्रुतिः, "तद्यथा पुष्करपलाशेनापः श्लिष्यन्ते" इत्यादि । तदपि न । न हि भस्मसात्करणं क्षयश्चानुत्पत्तिरुच्यते, न च लक्षणा, मुख्ये बाधकाभावादिति । उच्यते । कर्म्मणो भोगनाश्यत्वेऽपि ज्ञानस्य कर्म्मनाशकत्वं भोगस्य तत्त्वज्ञानव्यापारत्वात् । न च भोगमात्रस्यैव कर्म्मनाशे सामर्थ्यात्तत्त्वज्ञानव्यभिचारः, कर्म्मप्रागभावासहवृत्तिकर्म्मनाशे युगपत्कर्म्मभोगे वाऽव्यभिचारात् । अत एवानुमानेनाऽऽगमबाधाप्रयोजकत्वेन च श्रुतिवाक्यशेषे मानाभावः । उत्पन्नतत्त्वज्ञानस्याऽपवर्गविलम्बोपपादनार्थमुक्तरीत्या भोगस्यैवाक्षेपादिति, तदस्यापवर्गस्य परमपुरुषार्थस्य श्रुतिसिद्धं कारणमनुमानमिति विविक्तम् ॥

इति श्रीमहामहोपाध्याय-श्रीगङ्गेशविरचिते तत्त्वचिन्तामणौ अनुमानाख्य-द्वितीयखण्डे—ईश्वरानुमानम् ।

समाप्तश्च द्वितीयमनुमानखण्डम् ॥

अनुमितिग्रन्थस्य शोधनम् ।

पृष्ठे	पङ्क्तौ	दुष्टम्	अदुष्टम्
१	१३	पमात्मने	[ओं नम इति ।] परमात्मने
,,	२१	कारणतावच्छेद	कारणतावच्छेद
२	१२	दित्याहुः । [केचित्तु	दित्याहुः।[वस्तुत आकाशानतिरिक्तत्वं मन्यमानानां मते आत्मावृत्तिविशेषगुणवत्त्वमेव भूतत्वम् तथा च आकाशस्यात्मानतिरेकाद्भूतत्वं पृथिव्यादिचतुष्टयमात्रवृत्तीति नोक्तदोष इति ध्येयम् । के चित्तु
,,	२०	दुःखानवछिन्न	दुःखानवच्छिन्न
,,	२१	षष्ठ्यर्थस्क	षष्ठ्यर्थस्तु
,,	२२	चरेच्छावद्भिन्नाय]॥ निपु	चरेच्छावद्भिन्नाय ॥ इदानीं ग्रन्थस्य निगूढार्थकत्वं दर्शयति परजुष्टेति ॥ इदानीमात्मनो निगूढत्वं व्यञ्जनया प्रतिपादयति न्यायमिति ॥ इदानीं विनयपुरःसरं ग्रन्थस्य निर्दोषत्वं व्यञ्जनया प्रतिपादयति मान्यानिति ॥] निपु
३	५	गनुमनं	गनुमानं
,,	६	प्रत्यक्षवित्यादिना	प्रत्यक्षवित्यादि
,,	२३	भावः प्रतिपाद्य	भावः [प्रत्यक्षोपजीवकत्वादित्यादिग्रन्थ]प्रतिपाद्य
४	३	जीवको	जीवकतो
,,	१२	फलस्येति । अनु	फलस्येति । [ननु विषयतानवच्छिन्नोपाजीवकत्वं तथा वाच्यम् तथा चोक्तस्थलेऽनुमितिर्विषयवि-

पृष्ठे	पङ्क्तौ	दुष्टम्	अदुष्टम्
			धयैवोपजीविकेत्यत आह आदीति ।]अनु
,,	२२	घटितमपीति भावः	घटितमपीति [तथा च शाब्दादिपरामर्शस्थलेपि पदादिसाक्षात्कारोपजीवकत्वमेव परम्परयेतिं] भावः ।
५	२२	जान्य	जन्य
६	२८	सूचितम ।	सूचितम ॥
७	३	धानव्यप्या ।	धानव्याप्या ।
,,	१४	ज्ञानप्रयोज्यतायाम्	ज्ञान[जन्यजिज्ञासा]प्रयोज्यतायाम्
,,	२४	अनुमादि	अनुमानादि
	३१	'स' निरूपिते खण्डचक्षुषि र	'निरूपिते खण्डचक्षुषि रस'
८	२२	निरूणं	निरूपणं
,,	२३	निरूण	निरूप्य
९	१	कार्यं कारणं वेति	करणं कार्यं वेति
,,	१०	तापन्नमि	तापन्नत्वमि
१०	९	किमस्य	स्किमस्य
,,	१४	तुल्यत्वे पीतितथा	तुल्यत्वेपीति । [यथा प्रत्यक्षोपजीवकत्वमनुमाने तथानुमानोपजीवकत्वस्य प्रत्यक्षे सत्त्वेपीत्यर्थः] तथा
११	४–५	बोधकमन्ततः सामान्यतोदृष्टजीवनक	बोधके सामान्यतोदृष्टमन्ततोऽदृष्टजनक
,,	११	त्पत्तौ तन्निरू	त्पत्तौ [तन्निरूपणेन] तन्निरू
१३	९	प्रमाण्या	प्रामाण्या
,,	२३	तत्रत्यतच्छ	तत्रेत्यत्र तच्छ
१४	२	ण्यादिभिरिति। तत्क	ण्यादिभिरिति [आदिना विभाग-

पृष्ठे	पङ्क्तौ	दुष्टम्	अदुष्टम्
			परिग्रहः। अत्र तृतीयार्थः प्रकारता। सप्तम्यर्थो विशेष्यत्वम्। निरूपणीये कर्तव्यनिरूपण इति बोध्यम्॥]
,,	२९	नुभिति	नुमिति
१५	२६	समेवत	समवेत
१६	१२	व्युत्यत्ति	व्युत्पत्ति
१७	२९	तथा वह्न्यादि	तथा च वह्न्यादि
१८	३	उक्त ज्ञानपद	उक्तं ज्ञानपदे
,,	१५	नव्यास्क्त	नव्यास्तु
,,	२७	पर्वतसंबन्धवान्	पर्वतसंबन्धवान् धूमो
१९	११	नक्षत्वा(नोक्ता)नु-मित्य	न कुत्राप्यनुमितावि
,,	१२	विशिष्टज्ञानस्य	विशिष्टज्ञानत्वस्य
,,	१३	विशिष्टज्ञानस्य	विशिष्टवत्त्वज्ञानस्य
२०	२	समानाधि	सामानाधि
,,	७	दित्याहुः॥ ननु	दित्याहुः। [अन्ये तु गौरत्वेणेति दीधितिकृन्मतपरामर्शोत्तरमुपाध्यायमतपरामर्शकल्पनागौरवेणेत्यर्थः न तु निरुक्तसामानाधिकरण्येन नन्वेवं तुल्योनुयोग इत्याह संबन्धसंबन्धेत्यादि उपाध्यायमतपरामर्शाभावेपि विशिष्टज्ञानस्य प्राच्यैरुपपादितत्वादित्याहुः॥]ननु
२१	३	बुद्धेर्ब्र	शाब्दबुद्धेर्ब्र
,,	७	प्रमाण्य	प्रमाण
,,	१२	सम्बधा	सम्बन्धा
,,	१३	बच्छिन्न	वच्छिन्न
,,	१८	न्वयसह	न्वयबोधसह
२२	१	लिङ्गक	लिङ्गक

पृष्ठे	पङ्क्तौ	दुष्टम्	अदुष्टम्
,,	३	साध्याव	साध्यवत्पक्षाव
,,	२५	लिङ्गेति । साध	लिङ्गेति । [लिङ्गोपहिते लिङ्गविशिष्टपक्षे लैङ्गिकस्य साध्यस्य भानिरासेन । तथा चाचार्यानुमितिनिरासेनेत्यर्थः ।] साध
२३	९	ईश्वरज्ञानताहशँ	ईश्वरताहश
,,	५	नीतकात्वतम (?)	नीतकाञ्चनमय
,,	७	मात्रस्याभ्रम	मात्रस्य भ्रम
२४	१	विशिष्टपक्ष	विशिष्टे पक्ष
,,	३	विशिष्टक्ष	विशिष्टत्वपक्ष
,,	११	धानदुक्त	धानादुक्त
२५	१५	त्यर्थः । तेनै	त्यर्थः । [तथा च बहिर्भूतान्तस्थ बहुव्रीह्यादिवारणार्थं पदार्थभेदद्वन्द्ववादिनोऽप्यावश्यकतया तेनैव ममापि कर्मधारयवारणमिति भावः] तेनै
,,	२७	भावः । उक्तत्वादिति ।	भावः [तदुभयं व्याप्तिविशिष्टत्वपक्षधर्मत्वोभयम् । अवगाहित्वं संसर्गमर्यादया । तथा चैकधर्मिनिष्ठविषयितानिरूपिततदुभयसंसर्गताख्यविषयिताशालिज्ञानजन्यत्वलाभः ।] उक्तत्वादिति ।
२६	९	भावः ॥ ननु	भावः [के चित्तु मीमांसकेति मीमांसकेन वह्निव्याप्यवान्पर्वत इति परामर्शान्नानुमितिरित्युच्यते तथैव ताहशलक्षणवादिना त्वयाप्यवश्यं वक्तव्यम् अन्यथा तज्ज्ञन्यानुमित्यव्याप्तिरतस्तन्मतप्रवेश इत्याहुः । तत्र । जातिगर्भतयैवाव्याप्तिवारणे तन्मतानवलम्बनेपि

पृष्ठे	पङ्क्तौ	दुष्टम्	अदुष्टम्
			क्षत्यभावादिति ध्येयम् ॥] ननु
२७	१	शिष्टं यत्पक्ष	शिष्टं व्याप्तिप्रकारकं यत्पक्ष
,,	५	निवेशनीयत्वे	विशेषणीयत्वे
२८	७	वच्छेदेनैवान्वयस्य	वच्छेदेन विधेयतावच्छेदकावच्छिन्नान्वयस्य
२९	पृष्ठे	"केचित्तु"(१४ पङ्क्तौ) इत्यादिः"वदन्ति"(१७ पङ्क्तौ) इत्यन्तो ग्रन्थो "भावः" (१९ पङ्क्तौ) इत्यस्यानन्तरं पठनीयः ।	
३०	२०	व्याप्तेः	व्याप्त्योः
३१	१२	दिति भावः ।	दिति भावः । [विशेषपदर्शनस्य विशेषदर्शनत्वेन हेतुतामत इत्यपि कश्चित् ।]
,,	२७	प्रसिद्धसाध्यक	अप्रसिद्धसाध्यक
,,	२९	संशयो	[भ्रम]संशयो
३२	४	तद्वत्ताप्रत्यक्ष	तद्वत्ता[निश्चयात्मक]प्रत्यक्ष
,,	६	योत्तरं पर्वत	योत्तरं [वह्न्यनुमितिदर्शनात्] पर्वत
,,	२०	संभवाच्च न च	संभवाच्च [न चाव्यवहितोत्तरत्वसंबन्धेन तद्धर्मिकतत्संशयादिविशिष्टतादृशप्रत्यक्षत्वमेव कार्यतावच्छेदकम् सम्बन्धाननुगमस्यापि दोषावहत्वात्] नच
३४	१	तिदश	तिदेश
,,	९	संशस्य	संशयस्य
,,	१७	व्याप्यम । तथाच	व्याप्यम । [आदिपदेन पक्षपरिग्रहः । लक्षणपदं स्वरूपपरम्] तथाच
३५	१	शान्द	शाब्द
,,	१५	यिष्यत इति।पदज	यिष्यत इति । [तद्घटकप्रत्येकपदजन्यपदार्थस्मृतेर्महावाक्यार्थबो-

पृष्ठे	पङ्क्तौ	दुष्टम्	अदुष्टम्
			घपर्यन्तमसत्त्वेपि] पदज
१५	१९	तदादेश्चेति। व्युत्पा	तदादेश्चेति। उपस्थापकत्वमिति। व्युत्पा
३७	१८	प्रामाण्यानिश्च	प्रामाण्यनिश्च
,,	२२	[विशेष	[प्रत्युत विशेष
३८	११	भावः। ननु	भावः [ननु कृत्यादेरुत्पत्त्यनन्तरं विशिष्टविषयकस्मृत्यैव क्षणविलम्बेन तदुपहितकृत्यादेः साक्षात्कारो जायत इति यदि ब्रूयात्तदा स्फुटव्यभिचारस्थलमाह विशेषणेति। विशेषणांशे विशेषणान्तराविषयकादित्यर्थः। विशिष्टस्मरणादित्यस्य विशिष्टवैशिष्ट्यस्मरणादित्यर्थः। यद्वा] ननु
३९	६	[यतो]	[यत्र]
,,	११	सम्भति।	सम्भवति।
४०	७	त्कार्यताय	त्कार्यताव
४१	६	व्यपस्थाप	व्यवस्थाप
,,	११	विषयसंनि	विषये संनि
४२	११	तरत्वादीत्यर्थः	तरत्वादिरित्यर्थः
,,	२०	भावः। [अथेति।]	भावः॥ [अथेति।]
,,	२३	व्याप्यवत्त्वनिश्च	व्याप्यवत्त्वादिनिश्च
४३	८	सङ्गात् अनुमिति	सङ्गात् [तथाच] अनुमिति
,,	१७	विरोधापत्तेःतत्र हे	विरोधापत्तेः। [नन्वत्र विषयतासम्बन्धेन कार्यकारणभावो वाच्यः तथा च विषयतया बाष्पादावेव कारणस्य सत्त्वान्न व्यभिचार इति स्मृतावपि तादृशधूमाद्यनन्तर्भावेण कारणत्वादतिव्याप्तिस्तदवस्थैवेति चेन्न। पुरुषा-

पृष्ठे	पङ्क्तौ	दुष्टम्	अदुष्टम्
			न्तरीयज्ञानमादायातिप्रसङ्गवारणाय तत्पुरुषीयत्वनिवेशस्यावश्यकत्वेन स्मृतौ तथाविधनिश्चयत्वमात्रावच्छिन्नजनकत्वाभावात् न च तत्पुरुषीयज्ञानविषयतासम्बन्धेन तथा वाच्यम् तथा च स्मतौ तादृशजन्यत्वमात्रमप्रत्यूहमिति वाच्यम् तथा निश्चयविषयतासम्बन्धस्यैव निवेशे स्मृतिकारणतायां ज्ञानत्वमात्रनिवेशादेव सामञ्जस्ये तथाविधनिश्चयत्वप्रवेशादेव स्मृतावतिव्याप्तिविरहादित्यस्मद्गुरुचरणाः। [तत्र हे
४३	२३	चाक्षुषत्वव्या	चाक्षुषत्वादिव्या
,,	२८	भावः। [सांकर्यघट	भावः। [आंशिकत्वोपगमादव्याप्यवृत्तित्वोपगमात्। तथा च न हि जातिरव्याप्यवृत्तिरिति भावः। सांकर्यघट
४५	९	भावः। नव्यास्तु	भावः। [के चित्तु संस्कारं प्रत्युपेक्षान्यनिश्चयत्वेन हेतुतयोपेक्षात्मकज्ञानात्संस्कारानुत्पत्त्या स्मृतेरसम्भवोतः स्मृतिजनकतायामुपेक्षान्यत्वाप्रवेशादतिव्याप्तिरित्याहुः। तच्चिन्त्यम्। फलव्यापारौ प्रत्येकरूपेण कारणत्वमिति व्यासेर्भवद्भिरेव स्वीकृतत्वात्। अन्यथा स्मार्तं प्रति ज्ञानत्वेनैव हेतुत्वम् न तु निश्चयत्वेन। तत्कुतो विशिष्टस्मरणेऽव्याप्तिरिति ध्येयम्।] नव्यास्तु

पृष्ठे	पङ्क्तौ	दुष्टम्	अदुष्टम्
,,	२२	भङ्गादिति प्राहुः ।	भङ्गादिति[न च सामान्याकार-ज्ञानत्वेनैव स्मृतिहेतुतास्तु संस्कारस्य तु संस्कारत्वेन व्यापारतास्त्विति वाच्यम् तथा सति तत्रत्यांशिकोपेक्षात्मकज्ञानादुपेक्षितांशेपि स्मृत्यापत्तेस्तज्जन्यत्वेनैव प्रत्यासत्तित्वादिति] प्राहुः ।
४६	९	व्याप्यभाव	व्याप्याभाव
,,	२७	धानिवर	धानविर
४७	१७	'वस्तुतस्तु' इत्यादिः 'पास्तम्' (२० पङ्क्तौ) इत्यन्तो ग्रन्थो २४ पङ्क्तिस्थ 'इति भावः ।' इतिग्रन्थानन्तरं पठनीयः ॥	
४८	२८	हेतुत्वम् वस्तुतो	हेतुत्वम् । वस्तुतो
,,	२९	रुषयितत्प्रकारक-संस्कारनाशसामान्यं प्रत्येव तत्पु	रुषीयसंस्कारनाश[सामान्य]म्प्रत्येव [तत्पु-
४९	७	[तत्] संस्का	[तत्प्रकारक]संस्का
,,	२४	ज्ञानसुखादीनामिव	ज्ञानसुखादिकं न कालिकसम्बन्धेन घटध्वंसप्रतियोग्यधिकरणे उत्पत्तिक्षणे अधिकरणताया अभावात् । इत्थं चोक्तकारणाभावान्न तेषां क्षणिकत्वम्। तेषामिव
,,	२८	प्रसङ्ग इति मदेकपरिशीलितः पन्थाः । यत्तु	प्रसङ्गः [अन्यथा घटध्वंसप्रतियोगिनः विषयतासम्बन्धेन अधिकरणं यन्नित्यज्ञानादिकं तत्तादात्म्यसम्बन्धेन घटध्वंसवत्त्वात् नित्यज्ञानादेः क्षणिकत्वं स्यादिति भावः] इति मदेकपरिशीलितः पन्थाः।[केचित्तु नच समानाकारत्वेन नाश्यनाशकभावे स्मृतिज-

पृष्ठ	पङ्क्तौ	दुष्टम्	अदुष्टम्
			न्यप्रथमसंस्कारव्यक्तीनां स्मृति- समानकालोत्पन्नसंस्काराणां च क्षणिकत्वापत्तिरिति वाच्यम् द्वि- तीयक्षणोत्पन्नसंस्कारादेव उत्तर- स्मृतिसम्भवात् अनायत्या तत्रत्य- स्मृतिव्यक्तीनां विशेषतो नाशक- त्वं वाच्यम् । तथा च सामान्य- सामग्रीसत्त्वेपि विशेषसामग्री- विरहादेव न तत्संस्कारनाशः । सकृदनुभूतस्थले चानुपपत्तिवि- रहान्न विशेषसामग्र्यन्तरकल्पन- मित्याहुः ।] यत्तु
५०	२६	भावनन्त्य	भावानन्त्य
५१	१५	इढत्वं	इढतरत्वं
,,	२६	वेत्यर्थः । [अन्य	वेत्यर्थः । [इदं निश्चिताव्यभिचा- रकत्वमित्यन्ये । अन्य
५२	१०	तं चेति ।	तं चेति । [तात्पर्यटीकायां प्रमाण- प्रमेयेत्यादितात्पर्यटीकायां मिश्रै- र्वाचस्पतिमिश्रैः स्मृतीनामिति।]
५३	९	किं चेति । तत्र	किं चेति । [व्याप्यविशेष्यकादि- ति । वह्निव्याप्यो धूमः पर्वत इ- त्यस्मादित्यर्थः। पक्षविशेष्यकादि- ति।वह्निव्याप्यधूमवान् पर्वत इत्य- स्मादित्यर्थः । तदुभयेति। व्याप्य- पक्षोभयवैशिष्ट्यावगाहीति] तत्र
,,	१३	रेति । तथा	रेति । [पञ्चम्यर्थश्च तत्र विशि- ष्यैव कार्यकारणभाव इत्यग्रिमेणै- वकारेणान्वयी ।] तथा
,,	२२	समान	[समान
,,	२७	त्यर्थः ॥ नाना	त्यर्थः ॥ [एवंचेति । व्याप्यपक्षो- भयवैशिष्ट्यावगाहिनिश्चयत्वेन

पृष्ठे	पङ्क्तौ	दुष्टम्	अदुष्टम्
			लक्षणघटकत्वे ।] नाना
५५	१	निवि	निर्वि
,,	३	पूर्व विषयस्मतेश्च	पूर्वं विषयस्मृतेश्च
,,	२०	एव इत्यत	एव [तत्र विशेषणबुद्धेः कारणत्वाभावात्] इत्यत
५७	२०	कश्चित् । यत्किञ्चि	कश्चित् । [व्याप्यत्वं न्यूनवृत्तित्वमित्यपि कश्चित्] यत्किञ्चि
५९	१२	कार्यतावच्छेद कोट्य	कार्यतावच्छेदककोट्य
६२	३०	दवस्थपरा	दवस्थधूमपरा
६३	२१	क्षत्यभावादेवं च	क्षत्यभावात् [प्रागभावस्यानुपगमे तदपहाय स्ववृत्तिभेदप्रतियोगितावच्छेदकध्वंसवत्त्वं निवेश्यम्] एवं च
,,	२७	जातिरूपल	जातिरुपल
,,	२९	जोत	जाते
६४	२८	पूर्वाक्तैलक्षणमवे	पूर्वोक्तलक्षणमेव
६५	१	प्रत्यक्षानुपादने	प्रत्यक्षाद्युत्पादेन
,,	२९	सुवचत्वादित्याहुः । तद्विन्यम् । तद्व्यक्तीत्यादि ।	सुवचत्वात् [एवं क्वचित्संयोगेन क्वचित्समवायादिना साध्यस्यानुमिती भानार्थमपि साध्यव्याप्यवत्पक्षधर्मिकसाध्यानुमितित्वाच्छिन्नं प्रति साध्यव्याप्यवत्पक्षनिश्चयत्वेन हेतुत्वात्] इत्याहुः । तद्विन्यम् । [लिङ्गोपधाने पर्वतो वह्निव्याप्यवान्निर्वह्नित्वादित्यादौ सर्वानुभवसिद्धस्यानुमित्युत्पादस्यापलापापत्तेः । विरोधिनोरेकनिश्चयाविषयत्वेनात्र निर्वह्नित्वव-त्पर्वतो वह्निव्याप्यवान्निश्चयस्यानु(?)मितेरुत्पत्त्यसम्भवात् । अत

पृष्ठ	पङ्क्तौ	दुष्टम्	अदुष्टम्
			एव साध्यत्वसाधनत्वयोर्विरोधित्वमते साधनत्वहेतुकसाध्यत्वानुमानं गुरुणापि दुर्घटमिति विधिवादे मिश्रा अप्याहुः] । तद्व्यक्तीत्यादि ।
६६	२८	वेतेत्यर्थः तथा	वेतेत्यर्थः [तदाश्रयसमवेतं स्मृतित्वमनुभवत्वं च] तथा
६७	२९	प्याहुः । अत्र	प्याहुः [इदं तु न सम्यक् एवं सति वह्निव्याप्यवत्पर्वतवान् देश इत्याकारकविशिष्टवैशिष्ट्यबोधेतिप्रसङ्गः स्यात् । तादृशबोधवृत्तिवह्निव्याप्यधूमवत्पर्वतनिश्चयत्वावच्छिन्नकारणताप्रतियोगिकजन्यतायां व्याप्तिज्ञानजन्यतावच्छेदकव्याप्तिप्रकारतानिरूपितधूमप्रकारत्वेनावच्छिन्नत्वात् । न चैवं भवन्मतेप्येष दोषः । मया तु व्याप्तिज्ञानत्वावच्छिन्नकारणताप्रतियोगिककार्यतावच्छेदकत्वपर्याप्त्यधिकरणधर्मावच्छिन्नत्वस्यावच्छिन्नान्तदलेन विवक्षितत्वात् तथा चापत्तिवृत्तितादृशजातिमादाय प्रत्यक्षमात्रेतिव्याप्तेः] । अत्र
६९	१७	विषयतया	विषयितया
,,	२०	तावच्छेदकत्वस्य	तावच्छेदकस्य
,,	२६	साध्यकानुमि	साध्यकाद्यनुमि
७०	३	ननुनमेपि अधिकस्य भागासिद्ध	ननुगमेपि अधिकस्य भागासिद्धि
७३	१८	साधर्म्येण	साधर्म्यत्वेन

00051660

Digitized with financial assistance from
Shri Brihad Bhartiya Samaj
on 20 February, 2020